अजनामक (ajanāma–ka) *m.* a mineral substance माक्षिकं तु कदम्ब: स्याच्चक्रनामाजनामक: AbhidhāCin. 1054; KośaKaTa. 1. 2899.

अजनामन् (aja–nāman) *adj.* called Aja, Aja by name (Raghu's son) स (रघु:) ···। अजनाम्नि सुते निवेशितश्रीरजरं धाम जरागमे जगाम RāmC. 8. 46; *n.* name of Aja (i. e. Viṣṇu) अजस्रसंकीर्तनयाजनाम्नां मुखादखेदस्फुरिताधरोष्ठात्। ··· दशनांशुजालमन्तस्तप:शुद्धमिवोत्किरन्तम्।··· मुनिम् ··· प्रणनाम राजा Rāgh. 2. 5.

अजनायिका (ajanāyikā) *f.* name of a medicinal plant त्रैलोक्यजननी या स्यादोषधी अजनायिका। तस्या: संपर्कमात्रेण बद्धस्तिष्ठति पारद: Rasā. 12. 28.

अजनारव (a–janārava) *adj.* devoid of the noise of the people अवाद्यमानवादित्रमगीतमजनारवम्। रङ्गस्थलमिवासन्नपात्रागममभूत्पुरम् UdaySuKa. 107. 10.

अजनार्दनप्रिय (a–janārdanapriya) *adj.* **i** not dear to Viṣṇu सेवितपुराणपुरुषोऽप्यजनार्दनप्रिय: ··· तरुणार्कमण्डलमध्यान्मुनिरवातरत् NalaCam. 3. 6 (26); **ii** not given to the harassment of the people, NalaCam. 3. 6 (26)

अजनाविल (a–janāvila) *adj.* not disturbed by people मया बिलेऽनन्यजनाविले (v. l. ऽस्मिन्नजनाविले) काल: ··· नीयते RāmC. 11. 76.

अजनाशन (aja–nāśana) *m.* wolf [pw]

अजनाशम् (aja–nāśam) *adv.* like the perishing of a goat (i. e. miserable or sudden death) अजनाशं नष्ट: PrakriKau. ii. 695. 3; अजनाशम् ··· प्रकीर्तितम् KośaKaTa. 2. 3067; यस्त्वजवत् क्षणात्। विनश्यत्यजनाशं स विनष्ट: परिकीर्तित: KośaKaTa. 2. 643.

[1]अजनि (aj–ani) *f.* path, road दिव्यमज्ममजनिम् Nir. 4. 13 (79. 16)

[2]अजनि (a–jani) *f.* non-generation, absence of birth सतोऽविनाशादसतोऽजनेश्च वृथा तत: कारणमत्र पक्षे SaṁkṣeS'ā. 3. 213 (ii. 274. 19); *adj.* without birth, having no birth अजनिममृतरूपं साम्बमीशं भजन्ते य इह परमसौख्यं ते हि धन्या लभन्ते S'ivāL. 83.

अजनिका (a–janikā) *adj.* (*f.*) which does not produce इष्टस्याजनिका सा च नियोज्येन फलार्थिना। कार्यत्वेन न संबन्धमर्हति क्षणभङ्गिनी PrakaPañ. 434. 23.

अजनित (a–janita) *adj.* not generated, not produced अजनितसत्त्वपुरुषान्यता(? था)ख्यातेस्तु चेतसोऽचरितार्थस्यास्ति साधिकारता TattvVai. 24. 10 (*on* 1. 9); अकृतं नपि। यवव्रीह्यादिसतुषहविष्यजनिते त्रिषु NānārthāSaṁ. ii. 57. 119; प्रदीप: ··· घटादिभिरजनितोऽपि तान् प्रकाशयति PramāMī. 34. 3 (*on* i. 2. 3); अफल: अजनितपरकार्योत्पत्ति: सन् सुपुष्पित: VīraMi.(Rājanīti.) 478. 15.

अजनितकुलिशक्षत (ajanita–kuliśakṣata) *adj.* not having caused a wound (i. e. not wounded) by the thunderbolt अजनितकुलिशक्षतोऽप्यमुञ्चद्रुधिरकणानवरोधकृत्रिमाद्रि: Rāgh. 14. 5.

अजनितक्लेश (ajanita–kleśa) *adj.* who has not caused pain or trouble गुरोरजनितक्लेशो वज्रोऽथ दशपूर्व्यभूत् PariPar. 12. 233.

अजनितत्व (ajanita–tva) *n.* the state of not being created or produced अकृतकस्य संबन्धिस्वभावेनाप्यजनितत्वात् KhaṇḍanKhā. 698. 3.

अजनितफल (ajanita–phala) *adj.* which has not produced the result or effect अजनितफले प्रातिस्विकयोग्यतायां मानाभावात् AdvaiSi. 455. 17; 610. 6; अजनितफलानि च पापानि तत्त्वज्ञानान्नश्यन्ति MaṇiKa. 60. 4.

अजनितबोधत्वभ्रम (ajanitabodhatva–bhrama) *m.* mistaken notion of the state (i. e. fact) that no understanding of the syntactic relatian is produced जनितान्वयबोधे त्वजनितबोधत्वभ्रम: इति दिक् BhāṭṭCin. i. 50. 30 (*on* i. 1. 4)

अजनितव्रीड (ajanita–vrīḍa) *adj.* which has not caused shame अजनितव्रीड: क्रीडारस: TilaMañ. 28. 3.

अजनितशासनभङ्गा (ajanita–śāsanabhaṅgā) *adj.* (*f.*) whose command or order was not violated अजनितशासनभङ्गा स्थिरजङ्गममण्डलै: स्ववने। निखिलप्राणिरुतज्ञा विन्दति पुरत: कथं वृन्दा VidaMā. 5. 2.

अजनिता (ajani–tā) *f.* the state of not having origination प्रकृतिरजोन्चिताऽजनितया च तथैकतया त्रिगुणमयी च सा भवति NayaMañ. I. iv. 2. 3.

अजनितान्वयबोधकत्व (ajanitānvayabodhaka–tva) *n.* the state of

not producing the knowledge of the interrelation (of words) स्वरूपयोग्यत्वे सति अजनितान्वयबोधकत्वमाकाङ्क्षा Tarkāmr̥. 20. 13.

अजनितान्वयबोधत्व (ajanitānvayabodha-tva) *n.* the state of not producing the knowledge of the interrelation (of words) यतो राज्ञ इति पुरुषेण नान्वेति किन्तु पुत्रेण तत एवाग्रेऽपि व्यर्थमजनितान्वयबोधत्वमिति TattvCin. iv(1). 206. 3.

अजनितान्वयबोधदशा (ajanitānvayabodha-daśā) *f.* stage at which the knowledge of the interrelation (of words) is not produced यद्वा त्रयाणां स्मरणेऽजनितान्वयबोधदशायां पुरुषान्वये तात्पर्याभावात् नान्वयबोध: TattvCin. iv(1). 237. 1.

अजनित्वा (a-janitvā) *ger.* without being born यदि तत्र केचिदमृत्वा न गच्छन्ति तत आगच्छन्त्यजनित्वा वा न तर्हि स प्रत्यक्षो देश एवंजातीयक: S'ābaBh. 1348. 2 (*on* vi. 1. 1)

अजनिमत्त्व (ajanimat-tva) *n.* the nature of being free from origin अजनिमत्त्वाच्चास्या: (अविद्याया:) IṣṭaSi. 372. 5; 365. 4.

अजनी (áj-anī) *f.* horse-whip अश्वा॑जनि॒ प्रचे॑त॒सोऽश्वा॑न्त्स॒मत्सु॑ चोदय R̥V. vi. 75. 13; म॒न्द्राज॑नी चोदते अ॒न्तरा॒सनि॑ R̥V. ix. 69. 2.

अजनुराग (aj-anurāga) *m.* colouring or connection with a vowel दृश्यतेऽजनुरागेण भेद: S'lokaVār. 5 (11). 30 (517. 3); यस्तु क्वचिदजनुरागेण भेदप्रत्यय: स केवलानामभावेनान्वयव्यतिरेकाभ्यामौपाधिक इति प्रतिपत्तव्यम् TātpaṬ.(U.) 449. 21 (*on* 5(11). 29); कथमयं विवेकोऽजनुरागरहितानामदर्शनात् NyāyRa. 517. 15 (*on* 5(11). 30)

अजनुस् (a-janus) *adj.* free from birth तव प्रिया प्रकृतिविशेषरूपिणी समागता मयि जनुषेऽजनु: सती BrDharmaP. i. 38. 57.

अजनेरित (a-janerita) *adj.* not trodden or frequented by the people एतान्यरण्यान्यभित: शिवानि योगानुकूलान्यजनेरितानि Saund. 16. 86.

अजन्त (aj-anta) *adj.* ending in a vowel अरुर्द्विषदजन्तस्य मुम् P. vi. 3. 67; MahāBh. i. 484. 4 (*on* ii. 4. 35); ii. 82.6 (*on* iii. 1. 97); द्विविधं प्रातिपदिकं ह्यजन्तञ्च हलन्तकम् AgniP. 350. 4; अजन्तलक्षणदीर्घत्वस्य ... अव्यावर्तनाद्दोषाभाव: Pradī. v. 277B. 7 (*on* vi. 4. 13); iii. 212B. 39 (*on* iii. 2. 178); साधुत्वार्थमज(? द)न्तधातुवर्गमुल्लङ्घ्यापि भवतिमेव प्रथमं निर्दिशति DhātuPra. 1. 1 (5. 1); 1. 233 (25. 4); नाजन्तादेरादिर्द्वि: MugdhaBo. 9. 50 (110. 9); 24. 10 (142. 23); CaturCin. iii(1). 1104. 22; iii(1). 1105. 1; SarvaDaS'aṁ. 15. 323; झलन्तस्याजन्तस्य च क्लीबस्य नुमागम: PrakriKau. i. 196. 8; SiddhāKau. 75A. 12; अजन्ता: पञ्चविंशतिर्निपात्यन्ते PrakriKau. i. 648. 10; SiddhāKau. 210B. 1; अजन्तानां हन्तेरिङादेशगमेश्च दीर्घ: स्यात् सनि PrakriKau. ii. 332. 3; SiddhāKau. 434B. 4; अजन्ताच्च्लेश्चिण् वा स्यात्कर्मकर्तरि तशब्दे PrakriKau. ii. 439. 6; SiddhāKau. 469B. 6; अजन्तपूर्वपदस्य चौ PāṇiTaVāNaMā. 41. 5; PūrvottaVāNaMā. 114. 5; अजन्तो विषयशब्द: S'ivārkaMaDī. i. 20. 33 (*on* i. 1. 1)

अजन्तता (ajanta-tā) *f.* the nature of ending in a vowel सर्वत्र स्वापवादव्यतिरेकेण अजन्तता च गोत्रशब्दस्य CaturCin. iii(1). 1105. 1.

अजन्तत्व (ajanta-tva) *n.* the nature of ending in a vowel (जुहू:) जुहोतेरेवाजन्तत्वसंभवाद्भवति Pradī. iii. 212B. 39 (*on* iii. 2. 178); नलोपस्य सुब्विधावसिद्धत्वादजन्तत्वाभावात् Pradī. vi. 68. 22 (*on* vii. 1. 73); उदात्त(? त्ते)-त्वमिदं क्षिधातुवर्जम् । तस्य त्वजन्तत्वादनुदात्तेत्त्वमित्यागम: DhātuPra. 1. 250 (26. 2); अनुशयशब्दस्याजन्तत्वेन कृदन्तत्वात् SarvaDaSaṁ. 15. 323; ण्यन्तत्वेनाजन्तत्वाच्चिण्वदिट् PrakriKau. ii. 434. 2; Prasā. ii. 482. 14; PūrvottaVāNaMā. 114 5; MīmāKau. iii(2). 28. 18 (*on* ii. 1. 5); SiddhāKau. 465B. 3; नपुंसकह्रस्वत्वं न प्राप्नोति अजन्तत्वाभावात् PariVr̥.(Sī.) 13. 2; 157. 9; LaS'abdeS'e. i. 292. 20; ii. 354. 1; ii. 350. 9.

अजन्तभूतपूर्व (ajanta-bhūtapūrva) *adj.* (verbal root) which previously terminated in a vowel तत्राज्ग्रहणस्य प्रयोजनमजन्तभूतपूर्वमात्रादपि यथा स्यात् MahāBh. i. 484. 4 (*on* ii. 4. 35); इदं तर्हि प्रयोजनमजन्तभूतपूर्वमात्रादपि यथा स्यात् MahāBh. ii. 82. 6 (*on* iii. 1. 97); KāśiVr̥. *on* P. iii. 1. 97; अजन्तभूतपूर्वादिति । अजन्तश्चासौ भूतपूर्वश्चेति कर्मधारय: Nyās. i. 567. 25 (*on* iii. 1. 97); PadMañ. *on* KāśiVr̥. *on* P. iii. 1. 97; PrakriKau. ii. 474. 6.

अजन्तर (aj-antara) *n.* another vowel इट् त्वजन्तराणां व्यावर्तक: Pradī. i. 447B. 14 (*on* i. 1. 56)

अजन्तर्भाव (aj-antarbhāva) *m.* inclusion in vowels (denoted by the Pratyāhāra *ac*) इको यणचि इत्यत्रेक: साक्षाद्विहितेन कार्यित्वेनाजन्तर्भावप्राप्तं निमित्तत्वं बाध्येत Prasā. i. 14. 5.

अजन्तुजग्ध (a-jantujagdha) *adj.* not (partly) eaten by insects अजन्तुजग्धं मृदु च पत्रं गुणवदुच्यते SuśruS. iv. 1. 116; कुटजवल्कमजन्तुजग्धम् (अतिसारवते प्रदद्यात्) SiddhYo. 3. 46.

अजन्तुसंकुल (a-jantusaṅkula) *adj.* not infested with worms, not worm-ridden, स्थानं सूत्रस्य ... आस्तीर्णम् ... फलकै: ... अजन्तुसङ्कुलै: काष्ठै: SamarāSū. 33. 26.

अजन्तोपसर्ग (ajantopasarga) *m.* vowel-ending pre-verb इह सूत्रे प्रशब्दोऽजन्तोपसर्गलक्षणार्थ: Nyās. i. 243. 7 (*on* i. 3. 64)

अजन्मजात (a-janmajāta) *adj.* whose life has not served its purpose तत: प्रभृति सौराष्ट्रै: स्त्रीत्रैषो जातजन्मभि: । अजन्मजातैश्चोपात्त: प्राह राजिभुवो यश: DvyāśraKā. 5. 130.

अजन्मतस् (a-janmatas) *adv.* because of not being born अथवा भाविकत्वेऽपि श्वमांसादिवशादिमे । जायन्तेऽशुचयो भावा नैव नित्या अजन्मत: TattvaSaṁ. 820.

अजन्मता (ajanma-tā) *f.* the state of not being born, birthlessness सङ्गत्यागं विदुर्मोक्षं सङ्गत्यागादजन्मता AnnaU. 5. 4.

अजन्मत्व (ajanma-tva) *n.* the state of not being the origin अजन्मत्वेऽपि असत्त्वनिवृत्तिस्सत्त्वप्राप्तिश्चेत् IṣṭaSi. 183. 3.

अजन्मन् (a-janman) *n.* **A** absence of (normal) birth (i. e. still-birth) मात्रादीनामेव तु खलु गर्भकराणां भावानां व्यापत्तिनिमित्तमस्याजन्म भवति CaraS. iv. 4. 28; **B i** immunity from birth तस्मात्सयोगादधिगम्य योगमजन्मनेऽकल्पत जन्मभीरु: RaghuVa. 18. 33; पुंस: परतरं यच्च व्याप्यजन्मविकारवत् VisṇuP. v. 23. 33; अजन्म काङ्क्षमाणास्ते निर्मुक्ता दोषदर्शिन: BrahmāṇḍP. ii. 4. 7; नालं बीजादिसंसिद्धो विधि: पुंसामजन्मने । तैल[ाभ्यङ्गाग्निदा]हादेरपि मुक्तिप्रसङ्गत: PramāVār. 2. 258; जन्मनिमित्तं हि पिता शशिमौलिरजन्मनो हेतु: EI. i. 114. 25; अजातं नैव गृह्णाति कुरु यत्नमजन्मनि S'ārṅgaPa. 4172; Subhāṣi. 3295; **B ii** non-appearance or non-origination नास्तीति धी: फलं चैषा प्रत्यक्षादेरजन्मन: S'lokaVār. 5(8). 43 (488. 7); मथ्यमानस्याजन्मनि यो विधि: स: ... दर्शित: comm. *on* ĀpaS'S. ix. 3. 3; BhaktiSū.(S'ā.) ii. 1. 21; *m.* **i** one of the thousand names of Viṣṇu अजन्मा शाश्वतो नित्य: ... प्रभु: SkandP. v(1). 63. 79; **ii** one who takes no birth (in this world) जन्मैव मृत्यु: संसारे नास्ति मृत्युरजन्मनाम् DaśāvaC. 8. 607.

अजन्मन् (a-janman) *adj.* **A i** unborn, birthless (epithet of the unborn or Eternal Being, Viṣṇu, S'iva or Jina) पुरुषस्य पदेष्वजन्मन: ... स हि ...चक्षुषा त्रितयं ज्ञानमयेन पश्यति RaghuVa. 8. 78; भगवान्संयोज्यात्मानमात्मनि ...अजन्मन्यमरे विष्णावप्रमेयेऽखिलात्मनि VisṇuP. v. 37. 75; व्यक्तं देवाजन्मन: शाश्वतस्य द्यौस्ते मूर्धा MatsyaP. 154. 9; अजन्मा अभू: VisṇuSaBh. 79. 10 (*on* 60); अजराय नमस्तुभ्यं नमस्ते स्तादजन्मने MahāP. 25. 97; 25. 106; (विष्णु:) अजन्मानेकजन्मा च...निर्गुणोऽपि गुणास्पदम् SkandP. iv. 59. 9; v(1). 7. 19; संयोज्यात्मानमात्मनि । ब्रह्मभूतेऽव्ययेऽचिन्त्ये वासुदेवमयेऽमले । अजन्मन्यजरेऽनाशनि BrahmP. 211. 12; पुरुष: ... अजन्मा जन्म चाप्नोति BhaviP. 578B. 2 (iii(4). 16. 69); अजन्मन: कथं जन्म ... कथय त्वं मुने मम PadmP. iv. 28. 67; अजन्मनो जन्मभृतश्च शौरे: स्वामित्वसंवादि बभूव दूत्यम् Yādavā. 23. 14; **A ii** who is not born at all लब्ध्वा जन्म न य: कश्चिद्घटयेत्पौरुषं नर: । जन्म तस्य वृथा भूतमजन्मा तु विशिष्यते MatsyaP. 148. 35; **B** as good as not born, of worthless or ignoble birth अजन्मा पुरुषस्तावत् ... यावन्नेषुभिरादत्ते विलुप्तमरिभिर्यश: Kirātā. 11. 70 = SūktiRa. 99. 15; रेऽजन्मन् ... भगदत्त तव पापिष्ठस्य कथं तां पुत्रीं दास्यामि SamyaKau. 69. 17; **C** devoid of origin or birth अजन्मनि तथा नित्ये पौर्वापर्यविवर्जिते । तत्त्वे जन्मादिरूपत्वं विरुद्धमुपलभ्यते VākyaP. 3(2). 18; नाप्येते विवक्षाजन्मानो ध्वनय:, अजन्मानो वा विवक्षाव्यङ्ग्या: PramāVāSvopVr̥. 76. 17; अजन्मानो लोका: किमवयववन्त: Mahimna. 6; तस्यैव च (आत्मन:) सर्पस्येवासर्परज्जुवन्निर्भेदाजन्मादृश्याभूतभौतिकस्याश्रयस्य देहादेस्सर्वस्य मायात्मत्वे अभ्युपेयत्वात् IṣṭaSi. 343. 22; 344. 16; वियतोऽजन्मनो जन्म यथा कुम्भादिजन्मना BrĀraUBhVā. i. 4. 355; वितनोषि जनानजन्मन: Gaṅgāva. 7. 25.

अजन्मनाश (a-janmanāśa) *adj.* not subject to birth and death न ह्यादिमध्यान्तमजस्य...विद्मो वयम्...अजन्मनाशस्य...सनातनस्य VisṇuP. iv. 1. 84.

अजन्मनिमित्त (ajanma-nimitta) *adj.* based on non-origination न च तेजोबन्नानां जन्मश्रवणादजन्मनिमित्तोऽप्यजाशब्द: संभवति Bhām. 293. 21 (*on* i. 4. 10); नाप्यजन्मनिमित्त: जन्मश्रवणात् PrakaVi. 339. 23–24.

अजन्मप्रसङ्ग (ajanma-prasaṅga) *m.* contingency of the absence of origin प्रकृतिराकाशस्य कारणमिति कश्चित् । तन्मते प्रकृतेरजन्मप्रसङ्ग: NyāySu. (Ja.) 432A. 4 (*on* ii. 3. 1)

अजन्ममात्रपर (ajanmamātra-para) *adj.* denoting only non-origination न जायत इति योगेनाजन्ममात्रपरस्याजशब्दस्य साङ्ख्याभिमतप्रकृतिपरत्वे विशेषकाभावात् S'ivārkaMaDī. i. 522. 22 (*on* i. 4. 8)

अजन्ममास् (a-janmamās) *m.* month other than that of one's birth

अजन्ममासि निर्मुक्तधनुर्मीनस्थभास्करम् । …लग्नमेतद् मनोहरम् MalliC. 2. 648.

अजन्मर्क्ष (a-janmarkṣa) *n.* constellation which is not that of (one's) birth-star अथ श्राद्धं मासि मास्यपरपक्षेऽन्यतमेऽहन्यजन्मर्क्षे VaikhāGS. 4. 7.

अजन्मसंख्याक (a-janmasaṁkhyāka) *adj.* whose births are countless or innumerable केचिद्वाजन्मसंख्याकाः (जीवाः) YogVā. iv. 43. 5.

अजन्मा (a-janmā) *adj.* (*f.*) birthless अरूपायाश्च मे रूपमजन्मायाश्च जन्म च । सुराणां रक्षणार्थाय विद्धि DevīBhāP. v. 18. 23.

अजन्य (ajanya) *m., n.* **A** unfavourable portent, evil omen, national calamity अजन्यं क्लीबमुत्पातः AmaK. 1685; ईतिरजन्यं च बुधैः … कथितः AbhidhāRaMā. 1. 127; उपलिङ्गं त्वरिष्टं स्यादजन्यं डिंबविप्लवौ Vaija. 98. 190; (अथ पुंनपुंसकलिङ्गः) पूयाजन्यप्रमयसमयाः Liṅgānu.(He.) 126. 1 (comm. अजन्यः उत्पातः); अजन्यमीतिरुत्पातः AbhidhāCin. 126; ईतिरजन्ये प्रवासे स्यात् AnekāSaṁ. 2. 157; राष्ट्रवाकुपुनः । नृशण्डयोरजन्ये च NānārthāSaṁ. i. 137. 1104; उत्पातः … । अजन्ये स्याच्चोत्पतने NānārthāSaṁ. ii. 15. 47; ii. 56. 106; अपूरयत् पाञ्चजन्यमजन्यमिव विद्विषाम् TriṣaS'aPuC. iv. 4. 169; उत्पातेता(? चो)पसर्गः स्यादजन्यं जन्यमित्यपि ParyāS'aRa. 2. 390; ईतिः प्रवासेऽजन्ये स्यात् AnekāTi. 2. 30; उत्पात- … । अजन्यमीतिरित्येते शब्दाः सप्त समार्थकाः S'abdaRa.(Vā.) 581; उत्पातेती अजन्यं च बृहद्भानोरुपाहितः ParaNā. 339; उत्पातः … । पुंसि क्लीबेऽप्यजन्यं स्यात् KalpaK. 404. 224; 129. 361; अजन्यमुपलिङ्गं चारिष्टमौत्पातिकं भवेत् KośaKaTa. 1. 679; **B** war, battle अजन्यायोधने संयद्रणो विग्रह इत्यपि ParaNā. 2427.

अजन्य (a-janya) *adj.* [*f.* -ā] **i** unborn, not produced, which is not a product वस्तु विवक्षितवस्तुप्रतिपादनशक्तमसदृशं तस्य । यदजनकमजन्यं वा तत्कथनं यत्स पर्यायः Kāvyālaṅ.(Ru.) 7. 42; राधां गङ्गा ददर्श सा । …अजन्यां सर्वजननीम् BrahmVaiP. ii. 11. 38; अजन्यं क्लीबमुत्पाते जन्यहीने तु तत् त्रिषु NānārthāSaṁ. ii. 56. 106; तद्वदेवाजन्यं प्रति न कारणत्वम् (कस्यचित्) PramāMī. 43. 5 (*on* i. 2. 12); न चैवं ध्यानक्रियाफलमजन्यम् VivaPraSaṁ. 319. 10; प्रजापतीनां जननीमजन्यां तामेष देवीमनघामसूत Yādavā. 18. 103; ननु कथमप्रामाण्यमजन्यम् YuktiSneha. 21. 32 (*on* i. 1. 2) अजन्यस्तु स्वतः सिद्धः स्वरूपं भाव इष्यते UjjvaNīMa. 402. 5; प्रागभावो विनाशी अजन्यः Tarkāmṛ. 15. 5; अजन्यो यस्स्वसमानाधिकरणान्याभावस्तत्प्रतियोगी GuruCandr. i. 426. 7; LaCandr. 417. 37; अत्र विभुनोरप्यात्ममनसोरजन्यसंयोगसाधनात्संयोगः MānaMe. 13. 1; **ii** unfit or improper to be produced or born; unfit for mankind [PW] **iii** ignoble, debased [DBHS]

अजन्यजनकभूत (ajanyajanaka-bhūta) *adj.* which is neither an effect nor a cause कोऽयमजन्यजनकभूतानामनु(? °नामु)पकारः ? स्वरूपस्य सिद्धेरकार्यत्वात् PramāVāSvopVṛ. 46. 2.

अजन्यजलदत्विष् (ajanyajalada-tviṣ) *adj.* which has the colour of portentous clouds अत्वरन्त निजपुद्गलाहुतिं प्रत्यजन्यजलदत्विषोऽस्रपाः RāmC. 29. 14.

अजन्यज्ञान (ajanya-jñāna) *n.* knowledge which is not a product (i. e. permanent, eternal) अजन्यज्ञाने प्रवृत्तिसंभवपरत्वाच्च GuruCandr. i. 162. 21.

अजन्यता (ajanya-tā) *f.* the state of not being produced आहुर्विज्ञानसामग्रीजन्यत्वे सत्यजन्यता TattvPradī.(Ci.) 122. 8; तत्किमजन्यतया स्यात् Vādā. 107. 2.

अजन्यतात्व (ajanyatā-tva) *n.* essential nature of the state of being not produced अजन्यतात्वस्य जन्यतासामान्याभावनिष्ठत्वेन शरीराजन्यत्वरूपे जन्यताविशेषाभावे अभावात् LaCandr. 403. 29.

अजन्यत्व (ajanya-tva) *n.* the state of not being produced प्रमाया ज्ञानकारणातिरिक्तकारणजन्यत्वं नाम प्रमात्वस्यैवंविधत्वेन वा ज्ञानस्य वा तत्संबन्धस्य वा । नाद्यः । अजन्यत्वात् TattvPrakā. 55B. 3 (*on* i. 3. 28); 55B. 4 (*on* i. 3. 28); न चाजन्यत्वमुपाधिः TattvPrakā. 56A. 1 (*on* i. 3. 28); जीवस्य … तस्य ब्रह्मरूपत्वेनाजन्यत्वात् GuruCandr. i. 158. 2; स आश्रयासिद्धः यथा शशविषाणं नित्यमजन्यत्वात् Tarkāmṛ. 19. 17; वस्तुतस्तु प्रागभावस्याजन्यत्वान्न फलत्वम् MīmāKau. ii. 106. 4 (*on* ii. 4. 2); i. 266. 18 (*on* i. 4. 22); अत्यन्ताभावप्रागभावयोर्ध्वंसवदजन्यत्वेन संसर्गाभावत्वस्य भाव्यतानवच्छेदकत्वात् BhāṭṭCin. i. 5. 25 (*on* i. 1. 1); अजन्यत्वस्यैव समर्थतया शरीरविशेषणवैयर्थ्यात् SarvaDaSaṁ. 11. 176; अप्रामाण्यमप्यवस्तुत्वेनाजन्यत्वादन्यानधीनम् YuktiSneha. 21. 31 (*on* i. 1. 2)

अजन्यत्वकल्पन (ajanyatva-kalpana) *n.* assumption of being not produced तस्याजन्यत्वकल्पनान्नानवस्थादोषः MīmāKau ii. 333. 23 (*on* iii. 3. 11)

अजन्यत्वनिरास (ajanyatva-nirāsa) *m.* refutation of (the view or theory of) non-origination तस्मादाकाशो जायते । … नीलं नभ इति प्रतीतेः । पञ्चीकरणप्रक्रियया रूपवांश्च । एतेनाकाशस्याजन्यत्वनिरासः YatīndraDī. 40. 11.

अजन्यत्वमात्र (ajanyatva-mātra) *n.* the mere state of being a non-product यत्र शरीराजन्यत्वं तत्र सर्वत्राजन्यत्वमात्रमप्यस्ति NyāySiA. 231. 3; ननु क्षित्यादिकमकर्तृकं शरीराजन्यत्वात् गगनवदिति सत्प्रतिपक्षते(? इ)ति चेत् अजन्यत्वमात्रस्यैवाकर्तृकत्वप्रयोजकत्वे विशेषणवैयर्थ्यात् SarvaDaKau. 21. 20.

अजन्यत्वानवधारण (ajanyatvānavadhāraṇa) *n.* non-ascertainment of being a non-product तस्यामवस्थायामजन्यत्वानवधारणाच्छब्दानन्तर्याच्छब्दजन्यत्वं भ्रान्त्यावगम्य शब्दस्य शक्तिर्भ्रान्त्यावगम्यते NyāyRaMā. 92. 1.

अजन्यप्रकाशगुण (ajanyaprakāśa-guṇa) *adj.* having the property of consciousness which is not a product अयमात्मा सति धर्मिणि अजन्यप्रकाशगुणः प्रकाशगुणत्वात् आदित्यवत् VivaPraSaṁ. 241. 9.

अजन्यप्रमात्व (ajanyapramā-tva) *n.* the nature of valid knowledge which is not a product अजन्यप्रमात्वमुपाधिः TattvPrakā. 56A. 2 (*on* i. 3. 28)

अजन्यफल (ajanya-phala) *adj.* having a non-product for its result तदेवमजन्यफलं वस्तुविषयं प्रमाणजन्यं ज्ञानम् VivaPraSaṁ. 328. 9.

अजन्यफलत्व (ajanyaphala-tva) *n.* the state of having a purpose or result which is not a product ननु ज्ञानं मानसी क्रिया, न, वैलक्षण्यादित्युत्तरम् । कथं वैलक्षण्यम् । अजन्यफलत्वात् । उक्तमजन्यफलत्वमहङ्कारटीकायाम् PañcPā. 93. 8 (*on* i. 1. 4); अक्रियात्वे मानस्याजन्यफलत्वमेष्टव्यम् IṣṭaSi. 212. 19.

अजन्यमहिका (ajanya-mahikā) *f.* natural or permanent frost or mist हेमाब्जिनीं वलयितामिव यामिनीभिः छन्नामजन्यमहिकाभिरिवार्कभासम् । … तत्रागतः परिगतां रजनीचरीभिः नारीं निरायतविपद्विधुरां ददर्श RāmC. 19. 42.

अजन्यवह्नि (ajanya-vahni) *m.* natural (*lit.* unproduced) (flash of) fire (e. g. lightning, fire of evil portent etc.) अभिजन्यमजन्यवह्निवत् कपिराजः स्वयमेव पुप्लुवे RāmC. 33. 55.

अजन्यसंयोग (ajanya-saṁyoga) *m.* unproduced (i. e. eternal) conjunction विभुनोरप्यात्ममनसोरजन्यसंयोगसाधनात् संयोगः MānaMe. 13. 1.

अजन्यसंस्कार (ajanya-saṁskāra) *m.* mental impression not caused or produced (by any agency) न च तत्तत्प्रकाराः संस्कारा अनादय एव सन्तीति साम्प्रतम् । अजन्यसंस्कारानङ्गीकारात् VaiyāBhū. 221. 10 (*on* 50)

अजन्या (a-janyā) *adj.* (*f.*) unborn, having no birth or origin राधां गङ्गा ददर्श सा । … अजन्यां सर्वजननीम् BrahmVaiP. ii. 11. 38; अमन्यतैनां तनयां स राजा रुक्मश्च मोहादनुजामजन्याम् Yādavā. 12. 6; 18. 103.

अजन्यान्त (ajanyānta) *adj.* ending with the word *ajanya* ज्ञानकरणाजन्याभावानुभवासाधारणकारणम् अनुपलब्धिरूपं प्रमाणम् । अनुमानादिजन्यातीन्द्रियाभावानुभवहेतावनुमानादावतिव्याप्तिवारणायाजन्यान्तं पदम् VedāntPari. 244. 2.

अजन्याभाव (ajanyābhāva) *m.* non-existence which is not a product (i. e. eternal non-existence) अथवा अजन्याभावसामान्यस्य स्वसामानाधिकरण्यं प्रतियोगित्धं चेत्युभयसम्बन्धेनाभावस्साध्यः GuruCandr. i. 426. 9.

[1]**अजप** (a-japa) *adj.* [*f.* -ā] **A** who does not murmur or repeat prayers or sacred formulas, who has not studied Vedas नाम वास्य वर्जयेत् । राज्ञश्चाजपः प्रेष्यः GautDS. i. 6. 13; ii. 6. 18; भविष्यन्ति कलौ युगे । अजपा ब्राह्मणास्तात शूद्रा जपपरायणाः MahāBhā. iii. 186. 28; iii. 188. 22; xii. 228. 5; xiii. 24. 23; अस्नात्वा न च भुञ्जीयादजपोऽग्निमपूज्य च LiṅgaP. i. 85. 143; अव्रतानाममन्त्राणामजपानां च भारत । प्रतिग्रहो न दातव्यः BhaviP. 17A. 7 (i. 4. 115); अजपः … निर्जपे त्रिषु NānārthāSaṁ. ii. 55. 95; **B** omitting or without repeating the utterance (of the three *vyāhṛtis*, viz. *bhūḥ*, *bhuvaḥ* and *svaḥ*) यदि कस्मैचिदवश्यकर्मणे जिगमिषेदादिश्य पालं प्राङवरुह्य चरित्वा तमर्थमेवमेवाजपयावृतारोहेत् AitĀ. V. i. 4. 24; *m.* **1** other than *japa* or silent muttering of prayers यज्ञकर्मण्यजपन्यूङ्खसामसु P. i. 2. 34; **2** absence of intrigues [SHAMASASTRY] तुल्ये लाभे देशकालौ …जवाजवौ (v. l. जपाजपौ) …च विमृश्य बहुगुणयुक्तं लाभमाददीत ArthS'ā. iii. 70. 4 (9. 4); **3** (a Brāhmaṇa) who does not properly recite his prayers or who recites heterodox texts अजपस्त्वसदध्येता NāmaMāli. 340 = Vaija. 83. 11 = KalpaK. 85. 155; अजपस्त्वसदध्येतर्ययं ना निर्जपे त्रिषु NānārthāSaṁ. ii. 55. 95.

[2]**अजप** (aja-pa) *m.* goat-herd ओषधीर्नामरूपाभ्यां जानते ह्यजपा वने CaraS. i. 1. 120 (1941 Ed.); अजपः … । अजस्य पातर्यपि च NānārthāSaṁ. ii. 55. 95.

अजपत् (a-japat) *adj.* [*f.* -tī, -ntī] not muttering (a prayer etc.) स्वयं जपेदजपन्त्यां प्रास्या इति GobhiGS. ii. 1. 21; अजपत्यां स्वयं जपेत् प्रास्या इति JaimiGS. 1. 20 (20. 5)

अजपति (aja-pati) *m.* **1** the best of goats; **2** name of Mars, lord of the sign of Aries [APTE]

अजपथ (aja-patha) *m.* [DEBRU. p. 55, Gaṇa *devapathādi* on P. v.

3. 100; GaṇRa. 3. 186 (228)] goat's path (a narrow and difficult path through which even a goat can pass with difficulty in a single file only) अजपथशङ्कुपथाभ्यां च Vār. 2 (*on* P. v. 1. 77); अयं चाजपथो नाम श्रूयमाणो विभीषणः । दृश्यमानो विशेषेण भृगुः पातार्थिनामिव BṛKathāS'loSaṁ. 18. 461.

अजपद (aja-pada) *adj.* [AltGr. II. 1. 111; P. v. 4. 120; JaineVyā. iv. 2. 121; S'ākaṭāVyā. ii. 1. 190; SaraKaṇṭhā.(Gr.) v. 4. 140; SiddhaHe. vii. 3. 129] goat-footed अजस्येव पादावस्य अजपदः KāśiVṛ. *on* P. v. 4. 120 = Prasā. i. 605. 12; एणीपदोऽजपदः प्रोष्ठपद इति भद्रपदवत् पदशब्देन सिद्धम् CāndraVṛ. *on* iv. 4. 105; औपम्ये स्यादेणीपदस्तथाजपद इत्यपि KośaKaTa. 1. 5001.

अजपद (aja-pada) *m.* **1** surgical instrument shaped like a goat's hoof वक्त्रान्तरं ततः कृत्वा भिन्द्याद् गुल्मं प्रमाणवित् । विमार्गाजपदादर्शैर्यथालाभं प्रपीडयेत् । मृद्नीयाद् गुल्ममेवैकम् CaraS. vi. 5. 140 (1941 Ed.); AṣṭāHṛ. iv. 14. 86; ततो हृदयमन्त्रं च वर्जयन् गुल्मं विमार्गाजपदादर्शान्यतमेन वक्त्रान्तरितं प्रपीडयन् प्रमृज्यात् AṣṭāSaṁ. ii. 94. 2 (4. 16); **2 i** the sign of the zodiac Aries जायाप्रमाणजनताभिरगापि सः (मैमिः) … । सुप्रातसुश्वसुदिवस्त्रिदशैश्वरो वा एणीपदाजपदभद्रपदादिराड् वा DvyāśraKā. 20. 2 (comm. अजपदो मेषराशिः । स चाश्विनीभरणीकृत्तिकैकपादरूपः) **2 ii** the asterism Pūrvā Bhādrapadā दस्रानलादितिभुजङ्गदिनेशभानां पूषासुराजपदविश्वसमीरणानाम् । वाक्यानि सव्यगतिचक्रभवादिकानि चत्वारि सर्वमुनयः प्रवदन्ति तज्ज्ञाः JātaPā. 17. 102; **3** name of Rudra [Vācaspatya, APTE]; *n.* the word *aja* अजसंबन्धबोधकस्याजपदस्य प्रत्यक्षसंनिधाने ऋषभपदस्याजगतवयोविशेषपरत्ववच्चोदकादजपदसंनिधौ तत्परत्वमेवेत्यर्थः MayūMāli. 676. 1 (*on* x. 2. 29)

अजपदकदण्ड (ajapadaka-daṇḍa) *m.* staff (cleft) like a goat's hoof [DBHS] [PW. 'a kind of pincers (Zange)'] cf. **अजपादकदण्डक.**

अजपर (aja-para) *adj.* having Brahman as the chief, headed by Brahman मुह्यन्ति यत्र कवयोऽजपरा यतन्तः । तम् … वन्दे महापुरुषमात्मनिगूढबोधम् BhāgP. xii. 8. 49 (S'rīdhara and Vīrarāghava ब्रह्ममुख्याः)

अजपशु (aja-paśu) *m.* goat as a sacrificial victim (अष्टकायाम्) गोपशुरजपशु स्थालीपाको वा S'āṅkhāGS. iii. 14. 3; यदेतज्जातिविशिष्टं धानं वयश्च न तदजपशुषु शक्यं कर्तुम् S'ābaBh. 1859. 17 (*on* x. 2. 68)

अजपा (a-japā) *f.* **1** name of a Mantra (also called Haṁsamantra) consisting of a number of specially modulated inhalations and exhalations after muttering the formula *haṁsaḥ so'ham* गायत्री सा परा ज्ञेया अजपा नाम विश्रुता MahāBhā. vi. App. I. 3(36); हकारेण बहिर्याति सकारेण विशेत् पुनः । हंस हंसेत्यमुं मन्त्रं जीवो जपति सर्वदा । …अजपा नाम गायत्री योगिनां मोक्षदा सदा DhyānBiU. 63; BrahmViU. 78; द्रुपदां वा जपेद् देवीमजपां जम्बुकां तथा । … यदि ब्रह्मत्वमिच्छति BṛParāSm. 4. 56 = BālamBha. i. 110. 21 (*on* 1. 25); AhirbuS. 51. 52; स्वर्गापवर्गदा शुद्धाजपा LalitāSa. 198; हंसौ तौ पुंप्रकृत्याख्यौ हं पुमान् प्रकृतिस्तु सः । अजपा कथिता ताभ्यां जीवोऽयमुपतिष्ठति S'āraTi. 25. 52; 6. 63; 6. 64; 14. 80; हंसमन्त्रः अजपा LalitāTriBh. 309. 4 (*on* 32); सर्वा सृष्टिः कृता तेन हंसोच्चारप्रयोगतः । अजपेयं समाख्याता विद्या सर्वाङ्गशोभना LakṣmīT. 24. 58; अजपा नाम गायत्री ब्रह्मविष्णुमहेश्वरी । अजपां जपते यस्तां पुनर्जन्म न विद्यते AgniP. 214. 26; अजपा नाम गायत्री योगिनां मोक्षदायिनी SkandP. iv. 41. 158; ĪśānS'iPa. i. 2. 71; i. 2. 74; PañcaRā.(Nā.) v. 11. 21; (जगदम्बिके) त्वं श्रद्धा च धृतिश्च वसुधा कमलाजपा च DevīBhāP. v. 19. 3; vi. 11. 63; VasiS. 46. 93; TantrSa. 5. 51; 8. 52; हंसचारो महादेवि यथा चलति सर्वदा । अजपा सैव गदिता S'aktiSaṁT. iii. 2. 87; मया पूर्वैरुरजपाम् …निःश्वासोच्छ्वासरूपिणीम् … देवताभ्यो निवेदयामीति संकल्प्य हंसस्सोऽहम् इति मन्त्रं पञ्चविंशतिवारं जपित्वा तदुपरि निःश्वासोच्छ्वासादिकं गायत्रीरूपं भावयित्वा NityoNi. 31. 18; **2** name of a S'akti or personified energy of Umā तासां परमशक्तीनामुमावयवसंभुवाम् । आख्यास्याम्याख्याम् … कामाख्या कमलाक्षी च धृतिस्त्रिपुरतापनी । …त्रिवर्गा गर्वरहिता अजपा जपहारिणी SkandP. iv. 72. 9.

अजपाजप (ajapā-japa) *m.* (symbolical) muttering of the Ajapā-mantra (which comes to 21600 times in a day as so many inhalations and exhalations take place within a day) देवीं प्रार्थ्य गुरूपदेशेन ज्ञातं सहजसिद्धमजपाजपं निवेदयेत् NityoNi. 31. 18.

अजपात्मन् (ajapātman) *adj.* of the nature of the Ajapā *mantra* तारशक्त्यादिकां न्यस्येदजपात्मद्विठान्तिकाम् S'āraTi. 6. 64; व्याहृतीनां महावाक्यपरमात्माजपात्मनाम् TantrRā. 26. 46; TantrSa. 8. 52.

अजपाद् (aja-pād) *adj.* having a goat's foot स विप्रश्च तदाजपाद् । पुरीं माहिष्मतीं प्राप्तः BhaviP. 565B. 9 (iii(4). 11. 70); *m.* **i** name of one of the 11 Rudras (born of Kaśyapa and Surabhi) शास्ताजपादहिर्बुध्न्यः … । एकादशैते रुद्राः S'ivaP. iii. 18. 26 (317A. 5); **ii** name of the 26th asterism Pūrvā Bhādrapadā अजपादश्वयुज्यपि (शून्यभान्याद्गुरग्रजाः) VasiS. 42. 75; 42. 23; NāraS. 51. 4; अजैकपादोऽजपात् । पूर्वप्रोष्ठपदर्क्षकम् JātaPā. 9. 44; **iii** name of the second of the 15 Muhūrtas at night रात्रिमुहूर्तास्त्वजपाद्दौ-द्राग्नेयाख्यपाम्यसंज्ञाश्च VasiS. 17. 8; NāraS. 9. 2; **iv** name of the divinity called *Aja ekapād* [MW.]

अजपाद (aja-pāda) *adj.* **A** goat-footed, CāndraVyā. iii. 2. 48; Gaṇ. Ra. 2. 133 (169); **B** having a foot like that of a goat (i. e. *camasa*) चमसः … अजपादोऽच्छावाकस्य MānS'S. 178. 2; *m.* **1 A** name of the 26th asterism Pūrvā Bhādrapadā पुष्पवती…विचरति गुणमध्ये दुर्भगा वाजपादे VasiS. 24. 29; 42. 42; **1 B** name of the presiding deity of the asterism Pūrvā Bhādrapadā अजपादोऽहिर्बुध्न्यः पूषा चेतीश्वरा भानाम् BṛSaṁ. 98. 5; SthāṇṬ. 78B. 10; **2** name of a sage तौ विष्णुपद्यामजपादहस्तिपादौ सह व्याघ्रपदा सुपादौ…माम्…स्तुतो पिक् DvyāśraKā. 20. 15; **3** name of a Rudra [APTE]

अजपादकदण्डक (ajapādaka-daṇḍaka) *m.* staff (cleft) like a goat's hoof [DBHS] cf. **अजपदकदण्ड.**

अजपाद्द्वितय (ajapād-dvitaya) *n.* pair of two asterisms (i. e. Pūrvā Bhādrapadā and Uttarā Bhādrapadā) अजपाद्वितये … यत्कृतं शनिसंयुक्तं गृह्यते यक्षराक्षसैः VasiS. 39. 29.

अजपाद्धिष्ण्य (ajapād-dhiṣṇya) *m.* asterism Pūrvā Bhādrapadā अष्टम्यामजपाद्धिष्ण्ये … नक्षत्रलाञ्छितो योगो देवानामपि नाशदः VasiS. 42. 33; दाम्भिको दुःसहः शूरश्चाजपाद्धिष्ण्यसंभवः NāraS. 52(0). 25.

अजपाद्भ (ajapād-bha) *n.* asterism Pūrvā Bhādrapadā अजपाद्भे भवेद्व्याधिः सर्वदा निधनप्रदः VasiS. 46. 91.

अजपामनु (ajapā-manu) *m.* *mantra* called Ajapā हंसोऽजपामनुः Tantrābhi. ix. 63. 1.

अजपामन्त्र (ajapā-mantra) *m.* the *mantra* called Ajapā (Haṁsa) अजपामन्त्रजपपरास्तद्देवताध्यानमात्रेणैव मुक्ता भवथ S'aṅkaVi.(Ā.) 117. 19; हंस इत्यजपामन्त्रो वा LalitāSaBh. 114. 32 (*on* 146)

अजपामूलमन्त्र (ajapā-mūlamantra) *m.* the basic *mantra* known as Ajapā अजपामूलमन्त्रस्य हंसरूपत्वेन सोऽहमित्यर्थे निर्धारिते परजीवयोर्भिदागन्धलेशाभावात् कथं योग इति वक्तुं शक्यते S'āṅkaVi.(Ā.) 198. 16.

अजपारूप (ajapā-rūpa) *n.* the form of Ajapā (*mantra*) अजपारूपेण प्राणापाननामकचन्द्रसूर्यनियमने LalitāTriBh. 298. 12 (*on* 27)

अजपार्ण (ajapārṇa) *m*, the (sacred) syllable belonging to Ajapā माजपार्णतारकांश्च तद्बहिः क्रमाल्लिखेत ĪśānS'iPa. i. 19. 86.

अजपार्श्व (aja-pārśva) *m.* name of a prince (son of S'vetakarṇa) (*lit.* having sides black like that of a goat) अजश्यामौ च तौ पार्श्वौ तावुभावपि समाहितौ । … ततोऽजपार्श्व इति तौ चक्राते तस्य नाम ह HariVaṁ. 114. 12; BrahmP. 13. 136.

अजपाल (aja-pālá) *m.* **1** goat-herd, shepherd तेजसेऽजपालम् VājaS. 30. 11; TaiBr. III. iv. 9. 1; महिष्युष्ट्रयजपालानामेवमेव प्रजाक्षयम् । करोति …जातहारिणी KāśyaS. 191A. 21; (अनुजग्मुश्च तं नृपम्) मेषपालाश्चाजपालाः BrahmP. 44. 32; आजीवनार्थमजाः पालयति अजपालः CaturCin. iii(1). 487. 4; KośaKaTa. 1. 7046; अजपालः अजरक्षणजीवनः VīraMi. (Āhnika.) 502. 16; **2** name of the son of Dīrghabāhu and father of Daśaratha दीर्घबाहुरजाज्जातश्चाजपालस्ततो नृपः MatsyaP. 12. 49; **3** name of a king (born in the solar dynasty) अजपालो नृपश्रेष्ठः सूर्यवंशसमुद्भवः SkandP. vii(3). 9. 4; **4** name of a king पुरा बभूव राजर्षिरजपाल इति श्रुतः BhaviP. 705A. 4 (iv. 71. 1)

अजपालादिजात (ajapālādi-jāta) *adj.* born of a goat-herd etc. अजपालादिजाता(? तां)श्च विशेषेण तु वर्जयेत् BṛParāSm. 7. 371.

अजपाविद्या (ajapā-vidyā) *f.* *mantra* called Ajapā आगमेऽप्यजपाविद्याया मूलाधारचक्रमारभ्य सहस्रारपर्यन्तं षट्चक्रस्थदेवतानां गणपत्यादीनां सम्यगुपासनेन…पुरुषः मुक्तो भविष्यति S'aṅkaVi.(Ā.) 198. 5.

अजपित्वा (a-japitvā) *ger.* without muttering a *mantra* नारत्नपाणिर्नास्नातो नोपहतवासा नाजपित्वा … अन्नमाददीत CaraS. i. 8. 20 (1922 Ed.); नाजपित्वा नानिरूप्य देवताभ्यः (अन्नमश्नीयात्) AṣṭāSaṁ. i. 65. 2 (1. 10)

अजपिन् (ajap-in) *adj.* one who does not mutter the (Gāyatrī) *mantra* भुङ्क्ते ह्यजपी पूयशोणितम् ViṣṇuP. iii. 11. 73; SkandP. iv. 10. 52; सहस्रेण (अघोरेभ्यः इति मन्त्रस्य) अजपी च तथा द्विजः … विशुध्यति LiṅgaP. i. 15. 11; BṛDharmaP. ii. 2. 15.

अजपुत्र (aja-putra) *m.* **i** son of Aja (Daśaratha) यस्याजपुत्रो दशरथः शान्तां नाम कन्यामनपत्यस्य दुहितृत्वे युयोज ViṣṇuP. iv. 18. 18; समाजगामाथ महीं हरिः स्वयम् । राज्ञोऽजपुत्रस्य वधूसु(? षु) जन्मने BṛDharmaP. i. 18. 47;

II son of Brahmā (Nārada) द्रुहिणोऽजश्चतुर्मुखः ··· तत्पुत्रोऽथ नारदः NāmMā. 73 (comm. अजपुत्रः)

अजपुर (aja-pura) *n.*~*m.* name of a Naya (territorial subdivision of a Viṣaya) श्रीनगरमुक्तौ राजगृहविषयान्तःपाति अजपुरनयप्रतिब(ब)द्धस्वसम्ब(म्ब)द्धाविच्छिन्नतलोपेत। नन्दिवनाक। मणिवाटक EI. xvii. 321. 26.

अजपुरीष (aja-purīṣa) *n.* faeces of a goat बर्बूरनिम्बकिसलाजपुरीषधूमैः। कासेक्षुराश्मवनितास्तनजेन घृष्टम्। ··· अक्षिण रुजं निहन्ति RasRaSa. 30. 53.

अजपूर्व (aja-pūrva) *adj.* beginning with Aries विंशतिरष्टिः सार्धा पादोना: सप्त चाजपूर्वाणाम् PañcSi. 3. 48 (3. 10)

अजपूर्वक (ajapūrva-ka) *adj.* beginning with Aries रव्यादिकानामजपूर्वकाणां बिन्दूपगस्थानफलं वदामि JātaPā. 10. 52.

अजपृष्ठ (aja-pṛṣṭha) *adj.* having the back like that of a goat औपम्ये ··· अजपृष्ठः KāśiVṛ. *on* vi. 2. 114.

अजपेक्ष (aj-apekṣa) *adj.* having reference to a vowel, with regard to a vowel नैतद्गुणापेक्षम्। किं तर्हि। अजपेक्षम् MahāBh. i. 208. 5 (*on* i. 2. 31); नास्त्यैचोरजपेक्षं पूर्वत्वमिति न भवति स्थानिवद्भावः Nyās. i. 105. 21 (*on* i. 1. 57); i. 137. 18 (*on* i. 1. 73); अजपेक्षमेव चान्तत्वं द्रष्टव्यम् ManuBh. i. 139. 26 (*on* 2. 125); तदेवमजपेक्षस्य पूर्वत्वस्याश्रयणात् कर्मसाधन एव विधिशब्दः PadMañ. *on* KaśiVṛ. *on* P. i. 1. 57.

अजपेक्षा (aj-apekṣā) *f.* reference or relation to a vowel अजपेक्षया पूर्वत्वस्येहाश्रयणात् Pradī. i. 476A. 30 (*on* i. 1. 57); Prasā. i. 791. 8.

अजपोपसंहार (ajapopasaṁhāra) *m.* conclusion of the Ajapā *mantra* (repeated inhalation and exhalation) यदा हंसो नादे लीनो भवति तदा तुर्यातीतमुन्मननमजपोपसंहारमित्यभिधीयते HaṁsU. 2. 0 (*l.* 13)

अजप्तव्य (a-japtavya) *adj.* not to be muttered अतो मामुद्धरासात्वम्··· । अजप्तव्यमथोपव्यं(?) तद्वदानुग्रहाद्विभो PadmP. ii. 38. 9.

अजप्त्वा (a-japtvā) *ger.* without muttering (the *mantra*) अस्नात्वा चाप्यहुत्वा चाप्यदत्त्वा (v. l. चाजप्त्वाऽदत्त्वा) ये तु भुञ्जते। ··· नरकं ते व्रजन्त्यधः DakṣaSm. 2. 62; भुङ्क्ते अजप्त्वा पूयशोणितम् BṛParāSm. 2. 224; नैव भुञ्जीत अजप्त्वा ParāSm. 12. 44.

अजप्रजाधिपकुल (ajaprajādhipa-kula) *n.* family of king Aja कृच्छ्रेणेदमजप्रजाधिपकुलं शान्ताकुटुम्बी मुनिर्वीतापत्यमवर्धयत् JānaPa. 7. 28.

अजप्रतिम (aja-pratima) *adj.* similar to the Unborn (i. e. Viṣṇu) इन्द्रसूनुराशाततया। सायकसंतत्याजप्रतिमं द्रोणं विदार्य संतत्याज YudhiVi. 6. 47 (comm. विष्णुतुल्यम्)

अजप्रवेश (aja-praveśa) *m.* entrance in the sign of Aries राकाकुहूशशिपभास्वदजप्रवेशे लग्नेश्वराः शुभखगैर्युतवीक्षिताश्चेत्। तद्वत्सरे जगति सौख्यमलं प्रकुर्युः TājiNī. iii(2). 43 (433)

अजप्रिया (aja-priyā) *f.* name of the plant *Zizyphus jujuba* (*lit.* pleasing to a goat) शम्यां सक्तुफला लक्ष्मीः शिवा तुङ्गाभिपादपः। अजप्रिया भस्मकाष्ठा NighS'e. 1961; अजप्रिया कुहा कोली विषमोभयकण्टका BhāvPra.(Bhā.) 6(7). 72.

अजप्लुत (aja-pluta) *n.* name of one of the 108 *karaṇas* (postures of the body in dance) गृहावलीनकं लीनं विष्णुक्रान्तमजप्लुतम्। ··· अष्टोत्तरशतं चैव करणानां प्रकीर्तितम् ViṣṇuDhaP. iii. 20. 51.

अजबकुमारी (ajaba-kumārī) *f.* name of an empress पट्टमहिषीमहाराज्ञीं[ज्ञी] अजबकुमारिदेवीसहितरक्षितत्रिवर्गं EI. xii. 246. 15.

अजबन्धन (aja-bandhana) *n.* tying (of) a goat गोनिकेतने। ··· गोनाशमाप्नोति तत्राजबन्धनाद् ध्रुवम् KṛṣiPa. 91.

अजबन्धु (aja-bandhu) *m.* fool [silly like a goat, APTE]

अजबभ्रु (ája-babhru) *adj.* brown like a goat सिलाची नाम कानीनोऽजबभ्रु पिता तव AV. v. 5. 8.

अजबस्त (aja-basta) *m.* name of a pupil of Hiraṇyanābha हिरण्यनाभस्य कृतशिष्यः ··· सोऽकरोच्च चतुर्विंशत्संहिता द्विपदां वरः। ··· गौतमश्चाजबस्तश्च ···इति क्रान्तास्तु सामगाः VāyuP. i. 61. 45.

अजबस्ति (aja-basti) *m.* name of a person शुभ्रादिभ्यः। शुभ्र इत्येवमादिभ्योऽपत्ये ढग् भवति।···शुभ्र···अजबस्ति CāndraVyā. ii. 4. 53; गृष्टयादिभ्यः। गृष्टि इत्येवमादिभ्योऽपत्ये ढञ् भवति। गृष्टि ··· अजबस्ति CāndraVyā. ii. 4. 77; यस्कादिभ्यः।···बहुषु विहितस्य लुग् भवति। ··· यस्क ··· अजबस्ति CāndraVyā. ii. 4. 110; KāśiVṛ. *on* ii. 4. 63; (v. l. अजवस्ति) KāśiVṛ. *on* iv. 1. 123; iv. 1. 136; GaṇRa. 1. 26 (55); 3. 219 (262); 3. 226 (268); Prasā. i. 714. 10; i. 719. 17; i. 727. 10.

अजबाध (aja-bādha) *m.* setting aside or sublation of a goat ननु नियतप्रयोगबलेन गोगतधानादिवाचकतया गोद्रव्येणाजबाधावश्यंभावात्कथं पूर्वः पक्षः MayūMāli. 675. 18 (*on* x. 2. 29)

अजबिन्दु (aja-bindu) *m.* name of a king of the Suvīras अजबिन्दुः सुवीराणाम्···शमश्च नन्दिवेगानामित्येते कुलपांसनाः MahāBhā. v. 72. 14; विननाश ···लोभादैलश्चातुर्वर्ण्यमत्याहारयमाणः सौवीरश्चाजबिन्दुः ArthS'ā. i. 38. 2 (1. 6)

अजबिल (aja-bila) *n.* name of a *liṅga* अजेन निर्मितं दिव्यं साक्षादजबिलं शुभम् LiṅgaP. i. 92. 153.

अजभ (aja-bha) *n.* **1** the asterism of Prajāpati (Rohiṇī) उत्सवभूषणमङ्गलमजभे कार्यं सपौष्टिकं कर्म VasiS. 14. 5; **2** the sign Aries देहो मेषश्चापसिंहाजभानां जीवश्चापी JātaPā. 17. 26.

अजभक्ष (aja-bhakṣa) *m.* name of a plant [PW]

अजभक्षा (aja-bhakṣā) *f.* name of the plant *Acacia arabica* अन्या क्षुद्रदुरालभ्भा मरुस्था मरुसंभवा। विशारदाजभक्षा स्यात् RājNi. 10. 25; विशारदा तुष्टभक्षाजभक्षा मरुसंभवा KalpaK. 301. 471.

अजभद्र (aja-bhadra) *m.* name of the plant *Acacia arabica* कफान्तकोऽजभद्रः स्यात् KalpaK. 284. 315.

अजभाग (aja-bhāga) *m.* area (at the centre in the diagramme) assigned to Aja (i. e. Brahman) स्थापयेद् ग्रामरक्षार्थं सर्वकामाभिवृद्धये। अनुक्तानां तु सर्वेषामजभागादिषु न्यसेत् S'ilpaR. i. 12. 3; MayaMa. 9. 127.

अजभान्तम् (ajabhāntam) *adv.* upto the zodiac sign Aries कन्यकावदनतस्त्वजभान्तम् ··· स्याद्दिनं च यमदिग्ध्रुवगानाम् SiddhāTaVi. 166. 15.

अजभू (aja-bhū) *m.* name of one of the nine sons of Ugrasena नवोग्रसेनस्य सुताः कंसस्तेषां तु पूर्वजः।···अजभू राष्ट्रपालश्च MatsyaP. 44. 75.

अजभूपति (aja-bhūpati) *m.* king Aja (son of Raghu) श्लेस आर्किरजभूपतिराबभ्लास इत्यनुदिशं त्वयि वादाः DvyāśraKā. 8. 47.

अजभृङ्गिका (aja-bhṛṅgikā) *f.* name of a root found in the Himālayas (with a milky juice and used as one of the eight medicaments in Hindu medicine) सातला क्षीरकाकोली विभाण्डी चाजभृङ्गिका RājNi. 432. 1.

अजभोजन (aja-bhojana) *n.* act of eating (the flesh of) a goat पानं सुराया अजभोजनं वा (स्वप्ने प्रशस्तम्) HāriS. ii. 2. 12.

अजमध्य (aja-madhya) *n.* flesh from the central part of a goat पुरीषक्षये ··· °अजमध्ययवशाकधान्याम्लानाम् (उपयोगः स्यात्) CaraS. iv. 6. 11 (1941 Ed.) (comm अजमध्यं छागान्तराधिः)

अजमल (aja-mala) *m.* wheet गोधूमो यवनो (v. l. °ऽजमलो)ऽपुष्पो निस्तुषः सुमनो वृषः ParyāMu. 18. 22.

अजमहामुख (aja-mahāmukha) *adj.* having a large goat's face गृध्रोलूकमुखैश्चैव मेषोष्ट्राजमहामुखैः।···भूतैः···अशून्यमभवन्नित्यम् VāyuP. i. 40. 21.

अजमानिन् (ajamān-in) *adj.* thinking oneself to be the Unborn अविक्लवस्ते परिकर्मणि स्थितो मा मे समुन्नद्धमदोऽजमानिनः BhāgP. ii. 9. 29.

अजमायु (ajá-māyu) *adj.* making sound like that of a goat, shouting like a goat गोमायुरेको अजमायुरेकः ṚV. vii. 103. 6; गोमायुरदादजमायुरदात् ··· नो वसूनि ṚV. vii. 103. 10.

अजमार (aja-māra) *m.* **1** name of a tribe or a prince [*kurvādigaṇa*] GaṇPā. 58. 4; CāndraVṛ. *on* ii. 4. 84; आजमारक्यः। अजमार इत्यन्यः GaṇRa. 3. 210 (254); अजमारक (v. l. अजमार) Prasā. i. 723. 22 (fn. l. 3); **2** name of a son of the companion of king Yaśomati नर्मसचिवकुमारोऽजमारः (अवदत्) YaśasCam. ii. 260. 25; **3** perhaps proper name of a man [pw]; **4** name of a country (modern Ajmer) [APTE]; **5** a butcher [APTE]

अजमारक (ajamāra-ka) *m.* name of a tribe or a prince अजमारक KāśiVṛ. *on* iv. 1. 151; शालीनकर्त्रे जनितान्तवृक्षाजमारकश्यावरथाश्च वेनः GaṇRa. iii. 210 (253); (कुर्वादिभ्यः) एभ्योऽपत्ये ण्यः स्यात् ··· अजमारक Prasā. i. 723. 22.

अजमारादि (ajamārādi) *adj.* (riddle) relating to *aja* (S'iva) and *māra* (Cupid) etc. अजमारादि गूढकम्। विदग्धो दुर्विदग्धानां कुरुते दर्पशान्तये VidaMuMa. 4. 9.

अजमारादिक (ajamārādi-ka) *adj.* beginning with *aja* or *māra* अजमारादिकं गूढं पदपदार्थगूढकम्।···इत्युद्देशकम् VidaMuMa. 1. 16.

अजमारी (aja-mārī) *f.* the plant *Carpopogon pruriens*, cawach अजमारी कोटराक्षी···। एकैकमौषधीबीजं मारयेद्रसभैरवम् Rasā. 5. 12.

अजमित्र (aja-mitra) *m.* name of a Brahmin अजमित्र (नडादिः) JaineVyā. 165. 27 (*on* iii. 1. 88)

अजमिश्र (aja-miśra) *m.* name of a poet कविप्रव(?ब)र्हाग्र्यकुटुम्ब(म्ब)पल्लीकुल्याजमिश्राङ्गभवाङ्गदस्य। पुत्रीम् ··· पत्नीं स लेभे कलिपञ्चनाम्नीम् EI. xiii. 291. 15.

अजमीढ (ajamīḍha) *m.* **1i** name of a Ṛṣi (descendant of Suhotra, seer of ṚV. iv. 43; 44) क उ श्रवत्सप्त पुरुमीळ्हाजमीळ्हौ सौहोत्रौ त्वाश्विनं हि । तं वाम् Sarvānu. 4. 43; ऐक्ष्वाकी जनयामास सुहोत्रात्…। अजमीढं सुमीढं च पुरुमीढं च भारत MahāBhā. i. 89. 26; i. 89. 27; v. 22. 6; अजमीढोऽस्वहार्यश्च …। एते मन्त्रकृत: सर्वे MatsyaP. 145. 103; 196. 47; आहार्योऽथाजमीट(? ढ)श्च VāyuP. i. 59. 99; आर्ष्टिशेनो(? णोऽ)जमीट(? ढ)श्च … । क्षात्रोपेता: स्मृता ह्येते तपसा ऋषितां गता: VāyuP. ii. 29. 112; BrahmāṇḍP. ii. 66. 87; i. 32. 109; भरत: …ख्यातोऽश्वमेधकृत् । ततो भरत[ा]द्भूमन्यु: ततस्सुहोत्र: । [त]तो हस्ति: । ततो विरोचन: । तस्मा[द]जमीढ: EI. iv. 231. 13; हस्तिनश्चैव दायादास्त्रय: परमकीर्तय: । अजमीढो द्विमीढश्च पुरुमीढस्तथैव च MatsyaP. 49. 43; VāyuP. ii. 37. 162; ViṣṇuP. iv. 19. 29; iv. 19. 56; सुहोत्रस्यापि दायादो हस्ती नाम बभूव ह । …हस्तिनश्चापि दायादास्त्रय: … । अजमीढो द्विमीढश्च HariVaṁ. 284*(5); 23. 95; 366*(18); KalkiP. iii. 4. 14; सुहोत्रस्य बृहत्पुत्रो बृहतस्तनयास्त्रय: । अजमीढो द्विमीढश्च पुरुमीढश्च वीर्यवान् HariVaṁ. i. 23. 73 = AgniP. 277. 15; BrahmP. 13. 81; अजमीढ: कार्त्तवीर्यो भद्रसेन: पुरूरवा: । …प्रापु: पूर्वमहीपालाश्चिरजीवित्वम् S'aktiSaṁ. i. 16. 6; **1ii** one belonging to the Ajamīḍha gotra अथाजमीढा: कण्वा: । तेषां त्र्यार्षेय: । आङ्गिरसाजमीढकाण्वेति ĀpaS'S. xxiv. 8. 2–3; अङ्गिराश्चाजमीढश्च कट्य(? ण्व)श्चैव महातपा: । परस्परमवैवाह्या: ऋषय: परिकीर्तिता: MatsyaP. 196. 47; अथाजमीढकण्वा: । तेषां त्र्यार्षेय: प्रवर: आङ्गिरसाजमीढकाण्वेति VīraMi. (Saṁskāra.) 636. 12; **2** a name of Yudhiṣṭhira (*prob.* ājamīḍha) ततोऽब्रवीद्वासुदेव: … कुन्तीसुतं धर्मभृतां वरिष्ठम् ।… निपीड्य पादौ युधिष्ठिरस्याजमीढस्य राज्ञ: MahāBhā. i. 183. 4; धर्मपुत्रोऽजमीढ: TrikāS'e. ii. 8. 14; AbhidhāCin. 707; ParaNā. 2312; KośaKaTa. 1. 5812; KalpaK. 93. 38; **3** name of a king (son of Vikuṇṭhana and Sudevā) विकुण्ठन: … उपयेमे सुदेवां नाम तस्यामस्य जज्ञे अजमीढ: MahāBhā. i. 90. 38; i. 90. 39; **4i** name of a king (son of Sudāsa) अथ चैद्यवराद् विद्वान् सुदासस्तस्य चात्मज: । अजमीढ: पुनर्जात: MatsyaP. 50. 15; **4ii** name of a king (son of Bharata and Nandā) सोमवंशं शृणुष्वाथ … दुष्यन्तस्य शकुन्तलायां भरत: । भरतस्य नन्दायामजमीढ: NaraP. 23. 9 (60. 5); 28. 13 (74. 14); **4 iii** name of a king (son of Rantideva) भरतस्यान्वये चैवाजमीढो नाम पार्थिव: । बभूव MahāBhā. xiii. 4. 2; दुष्यन्तनामाभूद्भरतस्य पिता द्विज । तत्पुत्रो रन्तिदेवोऽभूदजमीढस्ततोऽभवत् BṛDharmaP. i. 59. 37; **5** name of a king of solar dynasty नृगस्य यज्ञस्त्वजमीढस्य चासीत् MahāBhā. i. 50. 5; i. 70. 1; [pl.] name of a people 'जनपदतदवध्यो:' इत्येव ।…अवृद्धाज्जनपदावधे: । अजमीढा: KāśiVṛ. *on* P. iv. 2. 125.

अजमीढपक्ष (ajamīḍha-pakṣa) *m.* party of Ajamīḍha (i. e. Yudhiṣṭhira) यथार्हमानार्थकरा हि पार्थास्तेषां द्वेष्टा नास्त्याजमीढस्य पक्षे (v. l. अजमीढपक्षे) MahāBhā. v. 22. 6.

अजमीढमुख्य (ajamīḍha-mukhya) *adj.* king Ajamīḍha and others इक्ष्वाकुपूरुपृथुराघवधुन्धुमारमान्धातृहैहयययात्यजमीढमुख्यै: । … संपूजिता भगवती मनुजैर्भवानी SaurP. 50. 64.

अजमीढवत् (ajamīḍha-vat) *adv.* like *ṛṣi* Ajamīḍha, as in the case of Ajamīḍha कण्ववदजमीढवदङ्गिरोवदिति ĀpaS'S. xxiv. 8. 3; भेरुण्डा:…एतेषाम् … अङ्गिरोवदजमीढवत्कण्ववत् VīraMi. (Saṁskāra.) 634. 3.

अजमीढसुत (ajamīḍha-suta) *m.* son of king Ajamīḍha अजमीढसुतो जात: क्षीणे वंशे तु सोमक: BrahmP. 13. 100.

अजमीढाख्य (ajamīḍhākhya) *adj.* known as Ajamīḍha हस्ती नाम सुतो जात: … राज्यं दशसहस्रं च तत्र वासं चकार स: । तत्पुत्रस्त्वजमीढाख्य: BhaviP. 418B. 10 (iii(1). 3. 47)

अजमील (aja-mīla) *m.* name of a king (son of king Virocana cf. **अजमीढ**) ततो दुष्यन्त: ततो भ(र)त: ततो भूमन्यु: ततो हस्ती ततो विरोचन: तस्मादजमील: EI. v. 74. 6; vi. 351. 10; सु[हो]त्राद्धस्ती । हस्तिनो विरोचन: । विरोचनादजमील: EI. iv. 304. 11; vi. 336. 5.

[1]**अजमुख** (aja-mukha) *adj.* having the face of a goat, goat-faced प्रजापतेर्दग्धशीर्ष्णो भवत्वजमुखं शिर: BhāgP. iv. 7. 3; दक्षस्य यज्ञशीर्ष्णो हि भवत्वजमुखं शिर: S'ivaP. ii(2). 42. 7 (121B. 9); म्लेच्छास्तु शाका यवना: … हयमुखा गजमुखास्तुरगाजमुखा अपि TriṣaS'aPuC. ii. 3. 682; *m.* name of Prajāpati (Dakṣa) [APTE]

[2]**अजमुख** (a-jamukha) *adj.* (Poet.) not beginning with *jagaṇa* (Amphibrachys) अजमुखश्चीर्गन्तो नवमे ले मात्रासमकम् Chandonu. 3. 65.

अजमुखावासा (ajamukhāvāsā) *f.* name of Gāyatrī (*lit.* residing in the mouth of the Unborn i. e. Brahman) शृणु वक्ष्यामि यत्नेन गायत्र्यष्टसहस्रकम् । … अजा चाजमुखावासाप्यरविन्दनिभानना DevīBhāP. xii. 6. 14.

अजमुखिका (ajamukhi-kā) *f.* name of a Mātṛ (mother goddess) (created by S'iva) (पानार्थमन्धकास्रस्य सोऽसृजन्मातरस्तदा) गोकर्णिकाजमुखिका महाग्रीवा महामुखी MatsyaP. 179. 24.

अजमुखी (aja-mukhī) *f.* name of a Rākṣasī ततस्त्वजमुखी नाम राक्षसी वाक्यमब्रवीत् Rāmā. (GORR.) v. 25. 49.

अजमुदा (aja-mudā) *f.* seed of the plant called Ajwaen अथ कामेश्वरो मोदक: … रम्भाकन्दशतावरी ह्यजमुदा माषास्तिला धान्यकम् … समं चूर्णयेत् RasRaSa. 27. 116.

अजमुहूर्तक (ajamuhūrta-ka) *m.* name of an auspicious period (i. e. Brāhmamuhūrta, five Ghaṭikās prior to sunrise) मात: शृणु…अद्यतनेऽजमुहूर्तके । रात्रौ दृष्टो मया स्वप्न: S'ivaP. ii(3). 9. 17 (133A. 6)

अजमूत्र (aja-mūtra) *n.* goat's urine (बीजच्युतिविजयि) ध्वजलेपादजमूत्रै: पिष्टं वा वारुणीमूलम् RatiRaha. 15.25; 15. 111; S'ārṅgaPa. 3223; S'ārṅgaS. ii. 11. 57.

अजमूर्ति (aja-mūrti) *f.* Viṣṇu's incarnation वामनस्याजमूर्ते: … आश्रमानोकहानाम् । ततिरियम् RāmāCam. 1. 46.

अजमेदस् (aja-medas) *n.* goat's fat अजमेद: शाखादमेदसाम् (प्रधानम्) CaraS. i. 25. 38 (1941 Ed.); गुडमधूच्छिष्टाजमेद:संयुक्तेन तैलेन तलतापनं कुर्यात् Hastyāyur. 228. 26 (2. 29); महिषवराहाजमेदोभिरवसेचयेत् Hastyāyur. 229. 1 (2. 29)

अजमेध (aja-medha) *m.* offering of a goat इष्टं हास्याग्निमेधेन पुरुषमेधेन गोमेधेनाविमेधेनाजमेधेन … भवति य एवं विद्वान् अष्टाकपालेन यजते VādhūlaS'S. iv. 19A. 31; अजमेधाध्वरं कर्तुमारंभं कृतवानहम् । सोऽजो गतो गृहान्मे हि त्रोटयित्वा स्वबंधनम् S'ivaP. ii(4). 6. 5 (199B. 15)

अजमेर (ajamera) *n.* city of Ajmer चपहानिर्महीपति: । अजमेरपुरम्… अध्यास्य सुखितोऽभवत् BhaviP. 425A. 8 (iii(1). 7. 3); 468A. 25 (iii(3). 5. 4); अजस्य ब्रह्मणो मा च लक्ष्मीस्तत्र रमा गता । तया च नगरं रम्यमजमेरमजं स्मृतम् 543A. 31 (iii(4). 2. 2); 465B. 13 (iii(3). 2. 12)

अजमेरक (ajamera-ka) *n.* city of Ajmer धृतराष्ट्रांश एवासौ जनिष्यत्यजमेरके । पृथिवीराज इति स: BhaviP. 464B. 34 (iii(3). 1. 28)

अजमेरीय (ajamer-īya) *adj.* hailing from Ajmer तत्र प्रासादेऽजमेरीयश्रेष्ठिवर्गो नागपुरीयो जाम्बडवर्ग: समायात: PurāPraSaṁ. 31. 14.

अजमेरु (ajameru) *m.* city of Ajmer काबुले…लाहोरे…अजमेरौ…मुलताने …कनौजे…समरकन्दे SiddhāTaVi. 33. 1.

अजमोद (ajamoda) *m.* seeds of *Carum copticum* मृद्वीका° … °कपीतनोदुम्बराजमोदशृङ्गाटकशङ्खिनीफलासवा: षड्विंशति: CaraS. i. 25. 49 (1941 Ed); अगुरु° … °धान्यकाजमोदपृथ्वीका° … °माषाणाम् …कषायं कारयेत् CaraS. vi. 3. 267 (1941 Ed.); स्विन्नं च पाययेदेनं कुष्ठं च लवणानि च । वचाहिङ्ग्वजमोदं च समभागानि सर्पिषा SuśruS. iv. 8. 17; iv. 14. 10; vi. 44. 28; जीरकसर्षपाजमोदशतपुष्पातमालगुल्मांश्च कारयेत् KāmSū. 234. 8 (4. 1); अपामार्ग° … °बिल्वाजाज्यजमोदवार्ताक° … °हरेणुफलानि … इन्द्रियोपशमनानि AṣṭāSaṁ. i. 84. 22 (1. 14); कुष्ठाजमोदकिटिभहिंगुमूलकधान्यकम् । … गणं कटुकसंज्ञकम् । राजा संचिनुयाद्दुर्गे ViṣṇuDhaP. ii. 26. 62; (दद्यात्) कौबेर्यामजमोदं च त्वगेलाश्चेशदैवते S'ivU. 6. 75; अजमोदचूर्णं च मद्येन सह पाययेत् BhelaS. 221. 16 (6. 30); 206. 19 (6. 26); HārīS. iii. 7. 64; अजमोद: … एतेषां कार्षिका भागा: KāśyaS. 98A. 16; 114A. 23; (अश्मरीं भिनत्ति) क्रौंचोष्ट्रगर्दभास्थि° … °तालपत्रिकाजमोदनागरचूर्ण: AṣṭāSaṁ. ii. 79. 14 (4. 13); i. 71. 8 (1. 11); ii. 60. 11 (4. 10); AṣṭāHṛ. i. 15. 33; iv. 8. 77; एलाजमोदमरिचामलकाभयानाम् … क्वाथं पिबेदिह कफप्रचुरज्वरेषु KalyāKā. 9. 73; 9. 94; 9. 99; 9. 102; ग्रन्थिक° … °हपुषाजमोदै: (कल्याणको नाम गुड:) SiddhYo. 4. 38; 25. 36; त्रिकटुश्चित्रकम् । … अजमोदश्च सर्वेषां द्वौ द्वौ भागौ प्रकल्पयेत् RasRaSa. 19. 35; विश्वाजमोदसिन्धूत्थचिञ्चात्वग्भि: समाभया । … अतीसारनाशनी AgniP. 282. 28; ओषधयो वचाबलाजमोदप्रभृतय: AbhinBhā. i. 45. 16 (*on* 1. 121); अजमोद: (वातरोगे) Mānaso. iii. 6. 594; RasRaSa. 14. 47; 19. 35; MātaLī. 11. 26; Hastyāyur. 93. 8 (1. 13); 122. 9 (1. 17); 124. 3 (1. 17)

अजमोदक (ajamoda-ka) *m.* the plant *Carum copticum* or its seed अजमोदकै: । … कङ्कोलत्वग्लवंगीभि: (अशोभत वनम्) PadmP.(Ra.) 42. 18; इक्षुस्तम्बान् जीरकसर्षपमजमोदकं चैव KandaCū. iv. 1. 10; त्र्यूषणं त्रिफला …अजमोदक: । मन्थोऽयम् … हित: CaraS. i. 23. 18 (1941 Ed.); HārīS. iii. 7. 49; SiddhYo. 37. 4; अजमोज(? द)कजीरकाणि । … मण्डं सामातिसाररुधिरं हरति ĪśānS'iPa. i. 45. 179.

अजमोदा (ajamodā) *f.* the plant *Carum copticum* or its seed (मेघश्यामं च तं देशम्) शृङ्गवेराजमोदाभि: कुबेरकप्रियालकै: MatsyaP. 118. 40; कुष्ठाजमोदा किणिही … गण: कटुकसंज्ञित: MatsyaP. 217. 63; कुष्ठाजमोदासुरसादलानि चूर्णम् (भक्षणाज्जयति … पाण्डुरोगम्) HārīS. iii. 8. 31; iii. 5. 27; श्वदंष्ट्रा तालपत्रिका । अजमोदाकदंबस्य मूलम् … शर्करं

भिद्युः(? न्द्युः) AṣṭāHṛ. iv. 11.29; पिप्पली° ··· °मरिचाजमोदाभल्लातकास्थिहिङ्गुनिर्यासा इति दशेमानि दीपनीयानि CaraS. i. 4.9 (1941Ed.); vii. 7.41 (1941 Ed.); सैन्धवाजमोदायुक्तं वा निकुम्भतैलम् । ··· वातशूलेऽवचार्यम् SuśruS. iv. 14.10; v. 5.63; vi. 40.154; KāśyaS. 169B.21; अजमोदा ··· वातगुल्मं निहन्ति AṣṭāHṛ. iv. 14.35; बिल्वाजमोदे ··· तैलं वा कफवातनुत् SiddhYo. 40.26; 25.15; 25.56; 25.61; 51.70; 64.2; S'ārṅgaS. ii. 6.52; अजमोदं (v. l. °दां) विडङ्गं च पिष्ट्वा ··· पाययेत् । कृमिकोपप्रशान्त्यर्थम् RasRaSa. 14.47; RaseCin. 8.47 (102.3); अजमोदा कटुस्तीक्ष्णा दीपनी कफवातनुत् MadaPāNi. 22.375 = BhāvPra.(Bhā.) 6(2).80 = BhāvPraNi. 10.78; Hastyāyur. 118.15 (1.16)

अजमोदिका (ajamod-ikā) *f.* the plant *Carum copticum* or its seed शिफाजगन्धाकारव्यौ मेथिका चाजमोदिका RājNi. 429.28; अन्तःसम्मार्जने ज्ञेया ह्यजमोदा यवानिका । बहिःसम्मार्जने सैव विज्ञातव्याजमोदिका BhāvPra. (Bhā.) 6(1).136; यवानिकोग्रगन्धा च ब्रह्मदर्भाजमोदिका । सैवोक्ता दीप्यका दीप्या BhāvPra.(Bhā.) 6(2).76 = BhāvPraNi. 9.75.

अजमोह (aja-moha) *m.* Creator's bewilderment हरिरजमोहं कर्तुं सवत्सगोपान् विनिर्ममे स्वस्मात् PraboSu. 207.

अजम्भ (a-jambha) *adj.* **1** abstaining from sexual pleasure गुम्फन्नु हारान्वचनैरजम्भः । ··· लक्ष्मीं स रेधुषीमारभतेति नोतुम् DvyāśraKā. 10.76 (comm. अजम्भो मैथुनरहितो ब्रह्मचारीत्यर्थः ।); **2** toothless [PW] (न सन्ति जम्भा दन्ता यस्य सः) (सूर्ये च) भेकः । इति शब्दरत्नावली [S'abdaKaDru.]; *m.* **1** sun [S'abdaKaDru.]; **2** a frog [S'abdaKaDru.]

अजय (a-jaya) *adj.* [*f.* -ā] **1** invincible, unconquerable, undefeatable हिरण्यवर्णो अजयस् सुवीरो जरामृत्युं प्रजया सं विशस्व AV.(P.) xv. 6.5; तार्क्ष्यध्यानान्वितो यश्च त्रैलोक्ये ह्यजयो भवेत् AgniP. 133.24; हत्वा तं तारकं संख्ये देवानामजयं ततः SkandP. i(1). 31.5; असौ यद्यजयो देव त्रैलोक्येष्वपि सुव्रत VāmaP. 8.39; विष्णुरप्यमितौजास्तं ज्ञात्वाजयं(? य्यं) बलेः सुतम् VāmaP. 74.2; एषः ··· अजैषीदजयां मायाम् BhāgP. viii. 22.28; सुरासुराणामजयः ··· परमेश्वरो यस्तं यज्ञमूर्तिं प्रणतोऽस्मि VarāP. 5.52; जिनवरततिः ··· अजया । ···तनोतु मतिं मम CaturJiStu. 42; उत्क्षिप्य शूलमजयम्···उरसि क्षिपति स रक्षः MahāN. 9.28; अस्त्रं कामगमं विमानमजयं मध्येसमुद्रं पुरी सर्वं निष्फलम् MahāN. 9.99; **2** one who cannot win अच् क इत्येवमन्तमशक्तौ गम्यमानायामुत्तरपदं नञः परमन्तोदात्तं भवति । अपचो यः पक्तुं न शक्नोति । अजयः । KāśiVṛ. *on* vi. 2.157.

अजवक्त्र (aja-vaktra) *m.* name of a leader or chief of the Gaṇa of S'iva अजवक्त्रो हयवक्त्रः··· । वृन्दशस्तं समावृत्य जग्मुः सोमं गणैर्वृताः LiṅgaP. i. 72. 82; अजवक्त्रोऽष्टवक्त्रश्च ··· इत्याद्याः गणपाः ··· प्रययुः S'ivaP. ii(5). 9. 38 (231A. 3); *n.* the first point of Meṣa अथो भवेद्यः प्रतिवृत्तदेशो दूरे भुवस्तस्य कृतोच्चसंज्ञा । नीचं तथासन्नतरस्तदुच्चाद् व्यस्तं तदंशैरजवक्त्रमत्र SiddhāTaVi. 123. 18.

अजवत् (aja-vat) *adv.* **i** in the manner of sage Aja अजानां त्र्यार्षेयः प्रवरो भवति वैश्वामित्रमाधुच्छन्दसाजेति होताजवन्मधुच्छन्दोवद्विश्वामित्रवदित्यध्वर्युः BaudhS'S. iii. 448. 5; ĀpaS'S. xxiv. 9. 4; **ii** as in the case of king Aja न मलिनचेतस्युपदेशबीजप्ररोहोऽजवत् SāṁkhyaPraSū. 4. 29 (comm. यथाजनाम्नि नृपे भार्याशोकमलिनचित्ते वसिष्ठेनोक्तस्याप्युपदेशबीजस्य नाङ्कुर उत्पन्न इत्यर्थः); **iii** like a goat (कवयः) उत्पतन्त्यजवद् व्योम्नि केचित्प्राप्तपदत्रयाः TilaMañ. 2. 17.

अजवत् (ajava(n)t) *adj.* having a goat वस्तुतस्त्वजवत्यपि अजा नास्तीत्यादिप्रयोगात् स्त्रीत्वस्य नञर्थान्वयितावच्छेदकतया भानमावश्यकम् VyutpaVā. 189. 32.

अजवदन (aja-vadana) *adj.* goat-faced (वृषभराशेर्द्वितीयद्रेष्काणः) स्कन्धमुद्वहति गोपतितुल्यं क्षुत्परोऽजवदनः Bṛhajjā. 27. 5.

अजवध (aja-vadha) *m.* killing of a goat (दद्यात् ··· एकहायनमनड्वाहं खरवधे) मेषाजवधे च ViṣṇuSm. 50. 28; अजवधप्रायश्चित्तमाह CaturCin. iv(1). 111. 1.

अजवर (aja-vara) *m.* Brahman's boon दधानान् ··· तनुम् ··· असुरमुख्यानजवरात् । जघान···कपिलादीन् ··· वैकुण्ठः EI. i. 124. 1.

अजवरा (aja-varā) *f.* name of Pārvatī (*lit.* spouse of the Unborn i. e. S'iva) (अपर्णा···दुर्गा मृडानी) दुर्वाराजवरा च सा KalpaK. 394. 128.

अजवशा (aja-vaśā) *f.* barren she-goat बभ्रुकर्ण्यां चैवैतदजवशायां च दृष्टम् BaudhS'S. iii. 55. 7; ii. 179. 6; iii. 158. 4.

अजवस् (a-javás) *adj.* not quick, inactive, slow अ॒ज॒वसो॑ जु॒विनी॑भि॑र्विवृ॒श्चन्···इन्द्रः॑ ṚV. ii. 15. 6.

अजवसा (aja-vasā) *f.* goat's fat अश्वगन्धातसी°···°सैन्धवानि गोवा(?व)राहाजवसाभिः···पाचयित्वा···स्वेदयेत् Hastyāyur. 99. 11 (1. 14)

अजवस्त (ajavasta) *m.* name of a teacher [pw]

अजवस्ति (ajavasti) *m.* [*śubhrādigaṇa on* P. iv. 1. 123; *yaskādigaṇa on* P. ii. 4. 63; *gṛṣṭyādigaṇa on* P. iv. 1. 136] name of a person, [pl.] name of descendants of Ajavasti or a tribe, JaineVyā. 84. 23 (*on* i. 4. 134); 169. 19 (*on* iii. 1. 112); 170. 21 (*on* iii. 1. 124)

अजवस्था (aj-avasthā) *f.* condition or position as a vowel अचोऽवस्थानदशायां पूर्वत्वेन दृष्टस्याजवस्थाप्रभृतिपूर्वस्येत्यर्थः···अजपेक्षे तु पूर्वत्वे वि+आकरणः, सु+अश्वः इत्यजवस्थायां य्वोरभावेनैचोरदर्शनादप्रसङ्गः PadMañ. *on* i. 1. 57.

अजवाक्य (aja-vākya) *n.* sentence (stating) the Jīva as unborn अजवाक्येन जीवस्य नित्यत्वप्रतिपादनात् YuktiSneha. 113. 39 (*on* i. 1. 5)

अजवाच् (ajavāc) *adj.* going slowly or quietly अजवाजिभ्यः ··· पाण्डवसेनालोकः YudhiVi. 8. 31 (comm. अजवं निर्वेगमञ्चन्ति गच्छन्ति इति अजवाचः)

अजवारि (aja-vāri) *n.* goat's urine (तीक्ष्णमाक्षिकशुल्वम्) क्वथितेनाजवारिणा । भावितम् Rasā. 8. 77.

अजवाह (ajavāha) *m.* [*kacchādigaṇa on* P. iv. 2. 133] name of a district, GaṇPā. 35. 13.

अजवाहन (aja-vāhana) *adj.* having a goat for conveyance (वह्नेस्तु लक्षणं वक्ष्ये) ज्वालावितानसंयुक्तमजवाहनम् (कुर्वीत) MatsyaP. 261. 11; वितथं रक्तमजवाहनम् ··· ध्यात्वा BhaviP. 365B. 32 (ii(2). 10. 89); 382B. 23 (ii(2). 20(? 19). 99); अग्नये ··· अजवाहनाय ··· नमः ParaśuKS. 6. 14 (196. 7) = NityoNi. 24. 16; *m.* name of the great grand-son of Diṣṭa of Ikṣvāku lineage दिष्टपुत्रस्तु नाभागस्तस्मादपि भलन्दनः । भलन्दनस्य ··· राजासीदजवाहनः LiṅgaP. i. 66. 53.

अजवाहिन् (ajavāh-in) *adj.* moving by a goat or having a goat for vehicle (नमः) अग्नये ··· तीव्राय तथा चैवाजवाहिने BhaviP. 202B. 24 (i. 136. 54)

अजविक्रयकृत् (ajavikraya-kṛt) *adj.* who sells a goat अजविक्रयकृद्व्याधः ··· भवेत् SkandP. i(2). 51. 26.

अजविष् (aja-viṣ) *f.* goat's ordure or excretion गोगजाश्ववराहोष्ट्रखरमेषाजविड्समम् । समध्वेकैकशो लिह्याद् बहुश्लेष्मा AṣṭāSaṁ. ii. 34. 15 (4. 6) = AṣṭāHṛ. iv. 4. 36.

अजविषाण (aja-viṣāṇa) *m.* goat's horn गोमहिषाजविषाणैः ··· वज्रतरो नाम कल्कः BṛSaṁ. 57. 7.

अजवीथ (aja-vītha) [AltGr. II. 1. 280 ?] cf. **अजवीथि.**

अजवीथि (aja-vīthi) *f.* [AltGr. II. 1. 280 aja-vītha-?] **i** name of one of the divisions of the southern path in which the sun, moon and planets move नागवीथ्युत्तरा वीथी ह्यजवीथिस्तु दक्षिणा MatsyaP. 124. 53; BālaKrī. ii. 69. 22 (*on* 3. 196 (?186)); **ii** name of the constellations Mūla, Pūrvāṣāḍhā and Uttarāṣāḍhā उभे आषाढमूलं तु अजवीथ्यादयस्त्रयः MatsyaP. 124. 53; **iii** name of the constellations Hasta, Citrā and Svātī हस्तश्चित्रा तथा स्वाती ह्यजवीथिरिति स्मृता MatsyaP. 124. 58.

अजवीथिका (ajavīthi-kā) *f.* name of the constellations Rohiṇī, Mṛgaśīrṣa and Ārdrā रोहिण्याद्याजवीथिका S'abdaRa.(Vā.) 390.

अजवीथी (aja-vīthī) *f.* **i** name of one of the divisions of the southern path in which the sun, moon and planets move नागवीथ्युत्तरा वीथी अजवीथी च दक्षिणा VāyuP. i. 50. 130; BrahmāṇḍP. i. 21. 76; पितृयानोऽजवीथ्याश्च यदगस्त्यस्य चान्तरम् YājñaSm. 3. 184; सवितुर्बह्वयो वीथ्यो दिवि पद्धतयः ··· अगस्त्यस्यानन्तरा अजवीथी BālaKrī. ii. 66. 16 (*on* 3. 185); अजवीथ्यमरमार्गः Mitā. 396. 4 (*on* 3. 184) अजवीथी देवमार्गः DīpKa. 91. 12 (*on* 3. 184); BhāgP. v. 23. 5; DevīBhāP. viii. 17. 17; अजवीथीमृगवीथीवैश्वानरवीथ्यात्मको दक्षिणो मार्गः LalitāSaBh. 182. 5 (*on* 220); **ii** name of the constellations Mūla, Pūrvāṣāḍhā and Uttarāṣāḍhā मूलं चाषाढे द्वे चापि अजवीथ्यभिशब्दिता VāyuP. ii. 5. 51; i. 50. 130; मूलं पूर्वोत्तराषाढे अजवीथ्यभिशब्दिते BrahmāṇḍP. ii. 3. 51; i. 21. 76; DevīBhāP. viii. 15. 7; **iii** name of the constellations Hasta, Citrā and Viśākhā हस्तश्चित्रा विशाखिका अजवीथी Aparā. 1016. 18 (*on* 3. 184); **iv** name of the constellations S'ravaṇa, Dhaniṣṭhā and S'atatārakā कश्यपस्तु श्रवणादिनक्षत्रत्रयमजवीथीमाह Aparā. 1016. 19 (*on* 3. 184); **v** name of the constellations Rohiṇī, Mṛgaśīrṣa and Ārdrā रोहिण्याद्याजवीथी Vaija. 20. 46.

अजवृष (aja-vṛṣa) *m.* male goat स एकोऽजवृषस्तासां बह्वीनां रतिवर्धनः । रेमे BhāgP. ix. 19. 6.

अजवृषण (aja-vṛṣaṇa) *adj.* having testicles of a goat (आशीर्वादपराः कार्याः ··· द्विजोत्तमाः । यैः कृतः) क्षयी सोमोऽजवृषणस्तथैव च शतक्रतुः ViṣṇuDhaP. ii. 32. 26.

अजवृषभ (aja-vṛṣabhá) *m.* male goat [AltGr. II. 1. 250? S'atBr.? cf. **अजर्षभ**]

अजवेगनिष्कृत (ajavega-niṣkṛta) *adj.* free from the ravages of time (*lit.* unborn) धर्मः क्वचित्तत्र न भूतसौहृदं त्यागः क्वचित्तत्र न मुक्तिकारणम् । वीर्यं न पुंसोऽस्त्यजवेगनिष्कृतं न हि द्वितीयो गुणसङ्गवर्जितः BhāgP. viii. 8. 21.

अजव्यपेक्षा (aja-vyapekṣā) *f.* regard or consideration for Aja अथ काश्चिदजव्यपेक्षया गमयित्वा ··· समाः । तमसः परमापदव्ययं पुरुषं योगसमाधिना रघुः RaghuVa. 8. 24 (Mallinātha अजाकाङ्क्षानुरोधेन; Hemādri पुत्रोपरोधेन, न तु स्वेच्छया)

अजव्याख्यान (aja-vyākhyāna) *n.* explanation of the term *aja*

अजव्याख्यानवृत्तान्तं स्वपुत्रस्य पणं च तम् । त्वं प्रमाणीकृतश्चासीत्व्याख्यायार्थयते स सा PārśvC. 2. 577.

अजशकृच्चूर्ण (ajaśakṛc-cūrṇa) *n.* powder of the goat's dung अविकाजशकृच्चूर्णस्याढके द्वे तिलाढकम् । ...एतैः सेकः कार्यो वनस्पतेः BṛSaṁ. 55. 17; आविकाजशकृच्चूर्णं यवचूर्णं तिलानि च । गोमांसमुदकं चैव सप्तरात्रं निधापयेत् । उत्सेकः सर्ववृक्षाणाम् AgniP. 281. 11; 246. 28; S'ukraNī. 4(4). 55.

अजशङ्करादि (ajaśaṅkarādi) *adj.* Brahman, S'iva and other gods स एव आत्मात्मवतामधीश्वरस्त्रयीमयो धर्ममयस्तपोमयः । गतव्यलीकैरजशङ्करादिभिर्वितर्क्यलिङ्गो भगवान्प्रसीदताम् BhāgP. ii. 4. 19.

अजशरीर (aja-śarīra) *n.* body of a goat गजपरिमाणो वा कर्मवशादजशरीरं प्रविशति तदा तत्र न स मीयेत SarvaDaKau. 38. 27.

अजशावी (aja-śāvī) *f.* female young one of a goat अजशावी वराक्येषा तर्हि प्रागनुगृह्यताम् । वक्तुं पशुत्वान्नो वेत्ति किंचिन्मद्भक्तिपेशला SkandP. iv. 47. 39.

अजशासन (aja-śāsana) *n.* command of god Viṣṇu फणिपतिर्न मृणालनिभैः फणैः किमु बिभर्ति महीमजशासनात् Rāgh. 6. 61.

अजशिरस् (aja-śiras) *n.* goat's head एकं चेदजशिरः स्यादुखायामुपधाय MānS'S. 150. 19; अजो हि इत्यजशिरः VaitāSū. 29. 3.

अजशिवपूजना (ajaśiva-pūjanā) *f.* worship of S'iva who is without birth अजशिवपूजनया विशुद्धवीर्यैः।... सेवितम् ... शैवं मयमुपाश्रित्य निवसन्ति स S'ivaP. ii(5). 1. 74 (220B. 8)

अजशीर्ष (aja-śīrṣa) *n.* head of a goat अजशीर्षाम्बुजानूपमांसादपिशितैः पृथक् । साधयित्वा रसान् CaraS. vi. 28. 107 (1941 Ed.)

अजशीला (aja-śīlā) *f.* name of a type of women (*lit.* possessing characteristics of a she-goat) ऊष्मलाङ्गी सञ्चरिष्णुरजशीलेति कथ्यते BhāvPra. (Sā.) 112. 9(5)

अजशृङ्ग (aja-śṛṅga) *n.* **1** horn of a goat श्वोभूते क्षीरोदके संसृज्य शरीराण्यवसिञ्चत्यजशृङ्गेण गोशृङ्गेण मृण्मयेन कोशेन वा JaimiGS. 2. 5 (30. 19); **2** the shrub *Odina penuata* or *wodier* (and its fruit) °अजकर्णाजशृङ्गैः ... कफशमनमवाप्नोति सर्वप्रकारैः KalyāKā. 10. 16; अजशृङ्गेण धूप्यैनं स्नपयेच्छान्तिवारिभिः ĪśānS'iPa. i. 41. 22; अजशृङ्गाग्निमन्थे च जले प्रक्षिप्य पाचयेत् Hastyāyur. 246. 17 (2. 39); *m.* अपरस्तु मेषशृंगश्चक्षुष्यश्छेदनश्च ... अजशृंगो दीर्घफलः श्वेतपुष्पश्च AbhidhāMañ. 71. 6.

अजशृङ्गिका (ajaśṛṅg-ikā) *f.* a kind of *Valleriana*, the shrub *Odina wodier* तपस्विनी जटामांसी मेषपुष्पेऽजशृङ्गिका RājNi. 422. 1; मेषशृङ्गी...अजशृङ्गिका । ... मेषशृङ्गी रसे तिक्ता वातला कासनाशनी MadaPāNi. 10. 161; मेषशृङ्गी विषाणी स्यान्मेषवल्ल्यजशृङ्गिका ।...श्वासकासहृत् BhāvPra.(Bhā.) 6(4). 253 = BhāvPraNi. 73. 257; कुष्ठेऽन्त्ये पशुशृङ्गनागरदयोस्त्र्यां विषाणं स्त्रियां काकोल्यामजशृङ्गिकासु KośaKaTa. 2. 4956.

अजशृङ्गी (aja-śṛṅgī) *adj.* (*f.*) [Debru. p. 377] goat-horned अजशृङ्ग्यराटकी तीक्ष्णशृङ्गी व्यृषतु AV. iv. 37. 6.

अजशृङ्गी (aja-śṛṅgī) *f.* the plant *Odina pinnata* (with a fruit shaped like the goat's horn) or the shrub *Odina wodier* अजशृङ्ग्यज रक्षः AV. iv. 37. 2; विरेचनद्रव्याणि तु ... अश्वगन्धाजशृङ्गीक्षीरिणी° ... °कषायैश्च ... उपसंस्कृत्य...विरेचनार्हाय दद्यात् CaraS. iii. 8. 136 (1941 Ed.); अजा नामौषधिः 'अजशृङ्गी' इति विज्ञायते CaraS. vi. 1(4). 7 (1941 Ed.); विदारीसारिवारजनीगुडूच्योऽजशृङ्गी चेति वल्लीसंज्ञः SuśruS. i. 38. 72 (comm. वल्लीसंज्ञः पञ्चमूलम्); iv. 17. 14; अश्वगन्धाजशृङ्गी च सारिवे द्वे...कषायः परिषेचने KāśyaS. 100B. 42; अजशृङ्गी विषाणी स्याद्गोजिह्वादार्विके समे AmaK. 887; अजगंधाजशृङ्गीवचा° ... °सालमूलानि (विरेचनोपयोगीनि) AṣṭāSaṁ. i. 84. 8 (1. 14); i. 78. 2 (1. 12); i. 98. 25 (1. 18); ii. 98. 23 (4. 17); ii. 108. 12 (4. 19); ii. 203. 2 (6. 6); ii. 284. 24 (6. 28); अजशृङ्गीजटाकल्कमजामूत्रेण यः पिबेत् AṣṭāHr. iv. 8. 57; अजगन्धाश्वगन्धा च ... अजशृङ्गी च प्रलेपः श्लेष्मशोथहा SiddhYo. 44. 7; अजशृङ्गी च बिम्बी च ... । वरुणादिगणकाथः कफमेदोहरः स्मृतः S'ārṅgaS. ii. 2. 129; ParyāRaMā. 165; ज्योत्स्नी पटोलिका जाली अजशृङ्गी विषाणिका AgniP. 362. 56; ViṣṇuDhaP. ii. 49. 28; अजशृङ्गी मेषशृङ्गी सर्पदंष्ट्रा च वर्तिका DhanvNi. 23. 2; NighS'e. 2079; BhāvPraNi. 197. 4; 21. 181; अश्वगन्धाजशृङ्गी ... एतासां क्वाथेन परिषेचनम् BhāvPra.(Bhā.) 8(70 ? 71). 75; 6(2). 180; मुस्ता° ... °विडङ्गाजशृङ्गीभिः सह पयः शृतशीतम् ... आमाशयविशुद्धयर्थम् Hastyāyur. 62. 1 (1. 9); 63. 9 (1. 9); 365. 3 (3. 1); 606. 7 (4. 5); अजशृङ्गी कटुस्तिक्ता कफार्शःशूलशोफजित् RājNi. 23. 7; S'abdaRa.(Vā.) 1030; AbhidhāMañ. 71. 1; ApūNā. 13B. 3; KośaKaTa. 1. 4026; 1. 4413; KalpaK. 267. 166.

अजश्मश्रु (aja-śmaśru) *n.* beard of a goat ख्यात्यै प्रादादजमुखं दक्षस्य तु तदा शिवः । अजश्मश्रूण्यदाच्छ्मश्रुर्भृगवे तु महात्मने SkandP. ii(7). 8. 62; निद्रायन्तम् ... अजश्मश्रुदुर्दर्शचिबुकमध्यम् ... लेसिकापसदम् YaśasCam. ii. 43. 3.

अजश्याम (aja-śyāma) *adj.* black like a goat अजश्यामौ च पार्श्वौ तावुभावपि समाहितौ । तथैव च समारूढावजपार्श्वस्ततोऽभवत् HariVaṁ. 114. 12; अजश्यामः स (कुमारः) पार्श्वाभ्यां दृष्टाभ्यां सुसमाहितः । अजश्यामौ तु तत्पार्श्वौ देवेन संबभूवतुः BrahmP. 13. 135.

अजश्री (ajaśrī) *f.* alum [PW]

अजश्रुति (aja-śruti) *f.* Vedic expression or word *aja* अजश्रुत्या च विष्णुविरिञ्च्योः साधारणस्य ब्राह्मणनाम्नो विष्णौ समन्वयप्रतिपादनात् TattvPrakā. 63A. 2 (*on* i. 3. 43)

अजषट् (aja-ṣaṭka) *n.* the group of the six zodiac signs beginning with Aries स्यात्सायनोष्णांशुभुजश्चेसङ्स्यचराधेयोगो लवभोग्यघातात् । खाग्न्याप्तियुक्तस्तु चरं धनर्णं तुलाजषट्के तपनेऽन्यथास्ते GrahaLā. 2. 6.

अजस् (a-jas) (Gr.) the verbal root *jas-* with the negative *a* (preceding) नमिकम्पिस्म्यजस्कमहिंसदीपो रः JaineVyā. ii. 2. 148 नम्कम्पजस्कम्पसिहिंसदीपो रः S'ākaṭāVyā. iv. 3. 263.

अजस (a-jasa) (Gr.) the verbal root *jas-* with the negative *a* (preceding) नमिकम्पिस्म्यजसकमहिंसदीपो रः P. iii. 2. 167; स्म्यजसहिंसदीपनमकमकम्पो रः CāndraVyā. i. 2. 116; स्म्यजसहिंसदीपकम्पकमनमो रः SiddhaHe. v. 2. 79; हिन्सदीपकम्पाजसस्मिङ्कमनमो रः MugdhaBo. 26. 158 (167. 23)

अजसंयोग (aja-saṁyoga) *m.* unproduced (i. e. eternal) conjunction (of two all-pervasive substances or one all-pervasive substance with any other) अजसंयोगस्याप्युपपादितत्वात् TātpaṬ.(Vā.) 604. 17 (*on* iv. 1. 21); वार्तिककारस्याजसंयोगस्याभ्युपगमः प्रौढिवादतयेति लक्ष्यते TātpaṬ.(Vā.) 649. 4 (*on* iv. 2. 18–20); अजसंयोगे तदभावप्रसङ्गात् Bhām. 363. 3 (*on* ii. 1. 18); अजसंयोगेऽप्यसति तत्संयुक्ताणुसंयुक्तक्षेत्रज्ञादृष्टे NayaVi. 190. 1 (*on* i. 1. 5); अजसंयोगमिच्छन्तः केचिद्विभागं न सहन्ते Kiraṇā. 227. 9; अजसंयोगे व्यभिचारात् TattvPradī.(Ci.) 203. 10; संयोगः ... सर्वथापि नोपपद्यते ... अव्याप्तेरजसंयोगे द्रव्यत्वाद्यनिरूपणात् TattvPradī.(Ci.) 301. 2; 301. 10; अजसंयोगमनिच्छन्तं प्रति सर्वत्रासिद्धिमाह VedāntKa. 241. 24 (*on* ii. 1. 18); अजसंयोगश्च साधयिष्यते VedāntKa. 266. 15 (*on* ii. 213. 14); अजसंयोगस्याग्रे निराकरणात् TarkSaṁ.(Ā.) 55. 6; अजसंयोगः प्रामाणिकोऽपि प्रतिक्षिप्यते NyāyKu. 97. 8; भट्टपराशरपादैर्मैनोऽणुत्वसमर्थनदशायामजसंयोगो निरस्तः NyāySiA. 254. 29; अजसंयोगस्य कणभक्षाक्षचरणादिभिः प्रतिक्षेपाच्च SarvaDaSaṁ. 15. 153; अजसंयोगे नायं समाधिः संभवति NyāySu.(Ja.) 370A. 1 (*on* ii. 2. 6); जीवब्रह्मणोर्विभुत्वादजसंयोगस्यानिष्टत्वात् AṇuBh. 138. 2 (*on* ii. 2. 38)

अजसंयोगनिरास (ajasaṁyoga-nirāsa) *m.* refutation of the (view of) eternal conjunction तेषाञ्चानाधाराधेयत्वात् संयोगसिद्धौ नाजसंयोगनिराससिद्धिः NyāyKu. 97. 11.

अजसंयोगभङ्ग (ajasaṁyoga-bhaṅga) *m.* refutation of the (view of) eternal conjunction तव कथमजसंयोगभङ्गोऽन्यथा स्यात् TattvMu. 3. 17.

अजसंयोगसिद्धि (ajasaṁyoga-siddhi) *f.* establishment of eternal conjunction द्रव्यत्वेनात्मसंयोगित्वसाधने त्वजसंयोगसिद्धौ तत एव ... °विभागप्रसङ्गः TattvCin. i. 781. 7; अकार्यसंयोगस्तु विभुद्रव्ययोः । अजद्रव्यसंयोगः श्रुत्याङ्गीक्रियते । अनुमानादप्यजसंयोगसिद्धिः । यथा विभुद्रव्यं विभुद्रव्यसंयोगवद्द्रव्यत्वाद्घटवत् YatīndraDī. 96. 3.

अजसंयोगाङ्गीकार (ajasaṁyogāṅgīkāra) *m.* acceptance of eternal conjunction अजसंयोगाङ्गीकारपक्षे च सिद्धसाध्यताया दुर्वारत्वात् TarkSaṁ.(Ā.) 54. 2.

अजसंयोगाभाव (ajasaṁyogābhāva) *m.* absence of eternal conjunction अजसंयोगाभावो वक्ष्यते Kiraṇā. 26. 5.

अजसंस्थानमुख (ajasaṁsthāna-mukha) *adj.* having a face similar to that of a ram अजसंस्थानमुखः स्यान्मेषाद्यांशे Sārā. 50. 2.

अजसंक्रान्ति (aja-saṅkrānti) *f.* the sun's entry into the zodiac sign Aries ईशानादिदक्षिणाङ्कान् संलिखेदनलादितः । येन येनाजसंक्रान्तिस्तेन प्रावृट्फलं भवेत् KṛṣiPa. 55.

अजसंघ (aja-saṅgha) *m.* flock of goats नवांशदोषः सकलं गुणौघम्...। दत्तं निहन्तीव वृकोऽजसंघम् VasiS. 32. 54.

अजसंज्ञ (aja-sañjña) *adj.* **A** called *aja* (i. e. not sprouting) अजसंज्ञानि बीजानि छागं घ्नन्तुमथार्हसि ViṣṇuDhaP. iii. 345. 4; **B** called *aja* (i. e. sown in the ground) अजसंज्ञानि बीजानि भूमौ क्षिप्यन्त इत्यजसंज्ञानि भवन्ति BālamBha. iii. 177. 3 (*on* 3. 290)

अजसंज्ञा (aja-sañjñā) *f.* the name *aja* (i. e. not sprouting) तत्रापि बीजैर्यष्टव्यमजसंज्ञामुपागतैः । त्रिवर्षकालमुषितैर्न(? र्न) येषां पुनरुद्भमः SkandP. ii(9). 6. 29.

अजसंज्ञित (aja-sañjñita) *adj.* having the name Aja (i. e. S'iva) त्वं ब्रह्मा हरिरजसंज्ञितस्त्वमिन्द्रो वित्तेशः पितृपतिरम्बुपतिः समीरः MārkP. 104. 37.

अजसत्त्वाङ्गना (ajasattvāṅganā) *f.* type of woman who has the nature of a she-goat, a woman of goat-like characteristics कृशा तनुभुजोरस्का निष्टब्धशिरलोचना । संक्षिप्तपाणिपादा च सूक्ष्मरोमसमाचिता ॥ भयशीला जलोद्विग्ना बहुपथा वनप्रिया । चञ्चला शीघ्रगमना ह्यजसत्त्वाङ्गना स्मृता NāṭyaS'ā. 22. 140.

अजसंनिवेश (aj-asanniveśa) *m.* absence of (immediate) succession of vowels वृद्धसंज्ञायामजसंनिवेशादनादित्वम् Vār. 1 *on* P. i. 1. 73 (Pradī. पौर्वापर्येणावस्थानं संनिवेशः)

अजसप्तदशन् (aja-saptadaśan) *adj.* having seventeen goats (as sacrificial fee) अजसप्तदशैव सोऽपि कुरुः VaikhāS'S. 17. 11.

अजसमा (aja-samā) *adj.* (*f.*) resembling Viṣṇu (Unborn) पृथुलाजसमद्युतिः । पृथुलाजवत् कान्तिः । पक्षे पृथुला अजसमा विष्णुसमा KāvyKaVṛ. 68. 22 (3. 3)

अजसमिति (aja-samiti) *f.* flock of goats सुधायोगान्निहन्त्येव बधिरो योगचञ्चलः । वृकोऽजसमितिं यद्वत् VasiS. 43. 9.

अजसंपूज्यमाना (aja-sampūjyamānā) *adj.* (*f.*) being worshipped by Brahman (*m.*) (the Creator) भवाम्भोजनेत्राजसंपूज्यमानाम् ··· भजे शारदाम्बामजस्रं मदम्बाम् S'āraBhuA. 8.

अजसंबन्ध (aja-sambandha) *m.* eternal relation न चानधिष्ठितयोर्धर्माधर्मयोः प्रवृत्तिर्युक्तेति । तच्च न अजसंबन्धोपपत्तेः NyāyVār. 470. 10 (*on* iv. 1. 21)

अजसंबन्धबोधक (ajasambandha-bodhaka) *adj.* expressing association with goats अजसंबन्धबोधकस्याजपदस्य प्रत्यक्षसंनिधाने MayūMāli. 676. 1 (*on* x. 2. 29)

अजसंभव (aja-sambhava) *adj.* born of Brahman (*m.*) (the Unborn) धर्मैः ··· शंकरम् ··· । तुष्टाव विविधैर्वाक्यैर्दीनो भूत्वाजसंभवः S'ivaP. ii(2). 3. 31 (69B. 15); सूत उवाच । एवमेव गुरुव्यासः पृष्टवान्मेऽजसंभवम् । सनत्कुमारं सर्वज्ञं शिवभक्तम् S'ivaP. v. 4. 3 (410A. 6)

अजसर्पिस् (aja-sarpis) *n.* ghee or clarified butter (prepared from the milk) of a she-goat कुर्यात् । विषवृक्षविषाजसर्पिषोऽहीन् IśānS'iPa. i. 5. 45.

अजसलिल (aja-salila) *n.* urine of a goat त्रिकटुदहनवेल्लैः ··· अजसलिलविपिष्टैर्गुञ्जया तुल्यगोलः ··· हन्ति कुष्ठं गरिष्ठम् RasRaSa. 20. 52.

अजसादि (a-jasādi) *adj.* other than (Nom. pl. suffix) *jas* etc. अजसादिष्विति वक्तव्यम् । रात्रिं रात्रिं स्मरिष्यन्तः । रात्रिं रात्रिमजानतः । सर्वां रात्रिं सहोषित्वा । वृत्यामेकान्तरात्रिम् MahāBh. ii. 213. 12 (*on* iv. 1. 31)

अजसि (a-jasi) (Gr.) other than *jas* (Nom. pl. suffix) रात्रेश्चाजसौ P. iv. 1. 31.

अजसिद्धि (aja-siddhi) *f.* obtainment of goats (पूजयेत् परमेश्वरीम्) लकुचैरजसिद्धये TantrRā. 6. 86.

अजसुत (aja-suta) *m.* son of Aja (i. e. Daśaratha) अजनि···कुले । रवेरजसुतादजः KalkiP. iii. 3. 26.

अजसूत्र (aja-sūtra) *n.* central cord नेत्रं नेत्रमनुस्मरदजसूत्रं पार्श्वसूत्रं च । हाटकनिर्मितसूच्या आचार्यः संलिखेद् रेखाम् MayaMa. 33. 106 (cf. **ब्रह्मसूत्र** MānaSā. 52. 71)

अजसूनु (aja-sūnu) *m.* son of Aja (i. e. Daśaratha) अनेनैव प्रियसुहृदा पातयिष्यामि सह सूनुभिरजसूनुम् JānaPa. 4. 21(2)

अजस्तुन्द (aja-stunda) *n.* [AltGr. II. 1. 128] name of a city कास्तीराजस्तुन्दे नगरे P. vi. 1. 155; KāśiVṛ. *on* vi. 1. 155; अजस्तुदम्(?) JaineVyā. 300. 30 (*on* iv. 3. 116); GaṇRa. 2. 152 (188); अजस्येव तुन्दमस्य अजस्तुन्दं नगरम् Prasā. i. 682. 13; KośaKaTa. 1. 2658; अजस्येव तुन्दमस्येति अजस्तुन्दं नाम नगरम् SiddhāKau. 221B. 17.

अजस्तुमा (ajastumā) *f.* name of a plant अजस्तुमा (? अतस्युमा) रुद्रवन्ती कलायस्तु हरेणुका AśvaVai. 12. 62.

अजस्थिति (aja-sthiti) *adj.* who has an eternal existence अजस्थितिः ··· योऽभ्यागमेषु हतदुन्दुभिरेति भद्रकालीविलासमधरस्थितसैंहिकेयः HarVi. 31. 29.

अजस्य (ajasya) *m.* name of a sage (son of Surūpā) सुरूपा जनयामास ऋषीन् ···अजस्यमृषिजम् MatsyaP. 196. 4.

अजस्र (á-jasra) *adj.* [*f.* -ā] [DEBRU. p. 850; P. iii. 2. 167; नञ्पूर्वो जसु मोक्षणे । अजस्रः KātanVṛ. *on* iv. 4. 50; MugdhaBo. 26. 158 (167. 24); KāśiVṛ. *on* P. iii. 2. 167 क्रियासातत्ये admits *adv.* only] **A** indefatigable, untiring, unwearing (mostly Agni) विश्वामित्रेभिरिध्यते अजस्रः ṚV. iii. 1. 21; iii. 54. 1; विधातारो वि ते दधुरजस्राः ṚV. iv. 55. 2; इमो अग्ने वीततमानि हव्याजस्रो वक्षि देवतातिमच्छ ṚV. vii. 1. 18; viii. 60. 4; यो भानुभिर्विभावा विभात्यग्निर्देवेभिर्ऋतावाजस्रः ṚV. x. 6. 2; x. 12. 7; नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ṚV. x. 45. 1 = TaiS. I. iii. 14. 5; इहैव त्वमजस्र एध्यग्ने AV. iii. 78. 1; xix. 3. 2; अजस्रमिन्दुमरुषम् ··· अग्निमीडे TaiS. IV. ii. 10. 2; VājaS. 13. 43; 11. 31; आजरसं हासिन्नजस्रो दीदाय AitBr. 5. 2(117); अजस्रं त्वां सभापालाः । विजयभागं समिन्धताम् TaiBr. III. vii. 4. 5; BhārS'S. iv. 2. 4; **B** inextinguishable, not diminishing, perpetual (flame or lustre of fire) अजस्रो घर्मो हविरस्मि नाम ṚV. iii. 26. 7; उदग्ने भारत द्युमदजस्रेण दविद्युतत् । शोच ṚV. vi. 16. 45; vi. 48. 3; प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ ṚV. vii. 1. 3; TaiS. IV. vi. 5. 4; VājaS. 17. 76; ṚV. vii. 5. 4; सविता ज्योतिरुदयाँ अजस्रम् ṚV. x. 139. 1; अजस्रं घर्ममीमहे AV. vi. 36. 1; TaiS. I. v. 11. 1; VājaS. 26. 6; तेषां भानुरजस्र इच्छुक्रो देवेषु रोचते TaiS. IV. i. 5. 2; VājaS. 11. 54; यजमानोऽग्निहोत्रं जुहुयाद् अजस्रेष्वग्निष्वप्रवसन् JaimiBr. 1. 38; आधानाद् द्वादशरात्रमजस्राः ĀśvaS'S. I. ii. 1. 35; ĀpaS'S. v. 22. 13; प्रेतमाहिताग्निं ज्ञात्वाजस्रान् अग्नीन् कुर्वन्ति KauśiGS. v. 1. 4; **C** inexhaustible पाहि नो अग्ने पायुभिरजस्रैः ṚV. i. 189. 4; यस्याजस्रं शवसा मानमुक्थम् ṚV. i. 100. 14; **D** eternal, unending, everlasting यत्र ज्योतिरजस्रम् ṚV. ix. 113. 7; ज्योतिर्यच्छन्त्यजस्रम् ṚV. x. 185. 3; अजस्रं ज्योतिर्यदविन्दद्त्रिः AV. xiii. 2. 36; xvi. 2. 5; ते हि पुत्रासो अदितेः प्रजीवसे मर्त्याय । ज्योतिर्यच्छन्त्यजस्रम् VājaS. 3. 33; S'atBr. II. iii. 4. 37; अजस्रं ज्योतिर्नभसा सर्पदेति TaiĀ. iii. 11. 8 (317. 6); ब्रह्माद्वितीयमुदितं च तदस्यजस्रम् SaṁkṣeS'ā. 1. 93 (i. 85. 18); **E** uninterrupted, continuous अथास्य बाणेन विदारितस्य प्रादुर्बभूवासृगजस्रमुष्णम् MahāBhā. iv. 60. 4; अथेमान्यजस्राणि भवन्ति BaudhDS. ii. 2. 76; औपासनेऽजस्रे वर्तमाने VaikhāGS. 6. 15; अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्तसे RaghuVa. 3. 44; 3. 65; कथं तर्हि अग्निषु प्रयोगः ··· आधानाद् द्वादशरात्रमजस्रा इति । अत्राप्यजस्रजागरणादजस्राः PadMañ. *on* KāśiVṛ. *on* P. iii. 2. 167; यस्य शरीरे सर्वेषां सर्वाण्यायुधानि मोघानि भवन्त्यजस्राणि च (? अस्त्राणि च) PārāSū. 98. 3; ददर्श मकराकरम् । सत्संगतमिवाजस्रमविघातान्तरं परैः RāmāMañ. 288. 9; **F** obligatory अजस्रं धर्मकार्यं च तथा नैमित्तिकं प्रिये MahāBhā. xiii. App. I. 15. 3199; काम्यनैमित्तिकाजस्रं श्राद्धकर्मणि नित्यशः VāyuP. ii. 19. 1; अजस्रं कर्म वक्ष्यामि दिनं प्रति यदाचरेत् AgniP. 234. 1; **G** huge, large मूढ मन्यसे ··· जरत्तृणमिवाजस्रं हस्तिनं तम् BṛKathāK. 33. 64; *m.* **1** fire kindled at the wedding ceremony (to be kept continuously) अजस्रैरेनं दहेयुरित्येतदेकम् ĀgniveGS. iii. 5. 2 (142. 1); अनेन विधिनोत्पन्नो विवाहाग्निरिति स्मृतः । स एव स्यादजस्राख्यः LaghvāśvaSm. 15. 49; **2** name of one of the twelve sons of Suśarman जम्भोऽस्याजस्रशक्रकाः । ··· सुशर्माणः प्रकीर्तिताः VāyuP. ii. 38. 64.

अजस्रकर्मन् (ajasra-karman) *n.* obligatory rite काम्यनैमित्तिकाजस्रकर्मसु त्रिषु संस्थिताः S'ivaP. vii. 17. 41 (520A. 1)

अजस्रगलत् (ajasra-galat) *adj.* ever flowing, continuously dropping down अजस्रगलदस्रसंप्लवकिणाङ्कगण्डस्थलाः ··· प्रयान्ति किल सस्मिताः स्म सुरलोकबन्दिस्त्रियः MahāvīC. 7. 5 (192. 14); त्वङ्गत्तुरङ्गमखुरोच्छलितै रजोभिर्लेशैरजस्रगलदस्रसहस्रनेत्रः । पाणिग्रहे समरभूमिजयश्रियस्ते स्वाराडयं नृपतिनाथ सहस्रधारः SaduktiKa. 212. 19.

अजस्रगामिन् (ajasra-gāmin) *adj.* perpetual wanderer, nomadic हिण्डकोऽजस्रगामिनि S'abdaRaSaK. 30. 16.

अजस्रघटन (ajasra-ghaṭana) *n.* constant or continuous fashioning अयमङ्कहरिणः कुर्वीत किं किं कलाकन्थामिन्दुमयीमजस्रघटनोद्घाटस्थावस्थिताम् AnarghaRā. 7. 63.

अजस्रघर्मविसरा (ajasra-gharmavisarā) *adj.* (*f.*) having a constant flow of sweat तेषां मूर्तिमजस्रघर्मविसरां संख्येऽथ नेदीयसि S'rīKaC. 18. 56.

अजस्रचञ्चत् (ajasra-cañcat) *adj.* continuously brandishing घनैरिव ···अजस्रचञ्चत्तरवारिधारैः । तटित्कडाराक्षतया···रणाजिरम्···आवृतं तैः Rāgh. 17. 41.

अजस्रचञ्चल (ajasra-cañcala) *adj.* continuously active, ever moving अमी ततस्तस्य ··· । उपाहरन्नश्वमजस्रचञ्चलैः खुराञ्चलैः क्षोदितमन्दुरोदरम् NaiṣC. 1. 57.

अजस्रचिन्ता (ajasra-cintā) *f.* constant worry or anxiety कथमिवास्याजस्रचिन्तायासविह्वलमनसो वराकस्य निद्रासुखमुपनमेत् DaśKuC. 132. 13.

अजस्रजवाभ्यास (ajasra-javābhyāsa) *m.* practice of constantly running आचार्यपरिषद् देवस्य···अर्वन्तं विज्ञापयति ··· अजस्रजवाभ्य(? भ्या)सादिव सुविभक्तघनगात्रम् YaśasCam. i. 310. 2.

अजस्रजागरण (ajasra-jāgaraṇa) *n.* keeping continuously awake अजस्रानजुहूत इन्धीरन्निति ··· अत्राप्यजस्रजागरणादजस्राः PadMañ. *on* KāśiVṛ. *on* P. iii. 2. 167.

अजस्रज्वलित (ajasra-jvalita) *adj.* constantly kindled or inflamed

विशाम्पतिः … त्रेताग्नि(? भि)रिवाजस्रज्वलितैस्त्रिभिरयोमयैरपि वारणात्मकैरङ्कुशैः …
उपेतम्…करिणसंक्रमिण(?) हेमकूटमारुरोह AvantiKa. 99. 10.

अजस्रदत्तकविक (ajasradatta-kavika) *adj.* constantly or always
bridled अश्वैः सार्धमजस्रदत्तकविकैः क्षामैरशून्यासनैः MudrāRā. 7. 15.

अजस्रदानिन् (ajasra-dānin) *adj.* continuously in rut, constantly
rutting यस्य तु गजान् … अजस्रदानिनो दृष्ट्वाभवन्नन्येऽपि दानिनः SkandP. iv.
43. 22.

अजस्रदाव (ajasra-dāva) *m.* uninterrupted or incessant forest-fire
नाश्रायि यैश्चरणपद्मद्वन्द्वं तव क्षणमपीश । तैराश्रितं वनमजस्रदावज्वलत्तरु चिराय
ChandaśCū. 2. 100 (3)

अजस्रदीक्षा (ajasra-dīkṣā) *f.* continuous consecretion or initiation
अजस्रदीक्षाप्रयतस्य मद्गुरोः क्रियाविघाताय कथं प्रवर्तसे RaghuVa. 3. 44; 3. 65.

अजस्रदुष्ट (ajasra-duṣṭa) *adj.* constantly spoilt or rendered impure
अजस्रदुष्टरुधिरं भूरि तच्छोणितार्बुदम् AṣṭāSaṁ. ii. 309. 8 (6. 34)

अजस्रद्रोहिन् (ajasradroh-in) *adj.* having constant hatred, con-
stantly hating तस्याजस्रद्रोहिणो देहभाजां बाह्वोरेकश्चिच्छिदे राघवेण Rāgh. 10. 14.

अजस्रधारण (ajasra-dhāraṇa) *n.* perpetual maintenance or preser-
vation (of fire) अग्नीनामजस्रधारणाभावे … आहवनीयादिदेवताः गार्हपत्यमनुप्रवि-
शन्ति PūrvottaVāNaMā. 298. 3; नित्ये तूल्ये…प्राप्तमप्यजस्रधारणम्…न कर्तव्य-
मेव BhāṭṭDī. iv. 278. 19 (*on* xii. 4. 10)

अजस्रपक्ष (ajasra-pakṣa) *m.* alternative practice of the perpetual
(maintenance of fire) अजस्रपक्षे चाहवनीयस्य कर्मापवर्गे धारणस्याम्नानमिति
SaṅkarKāBh. 134. 15 (*on* iii. 2. 110); 148. 1 (*on* iii. 2. 59); PūrvottaVāNaMā.
298. 1; इतरथा अजस्रपक्षे उद्धृतत्वाभावात् उद्धृत इत्यस्य पाक्षिकानुवादत्वापत्तेः
BhāṭṭDī. iii. 175. 11 (*on* ix. 4. 5); अजस्रपक्षाभिप्रायेण वा तदुपपत्तिः Bhāṭṭ-
Can. 86. 3 (*on* xv. 2. 32)

अजस्रपण्य (ajasra-paṇya) *n.* commodity to be sold without lapse
of time (i. e. quickly) अजस्रपण्यानां कालोपरोधं सङ्कुलदोषं वा नोत्पादयेत्
ArthS'ā. i. 242. 2 (2. 16) (comm. अजस्रपण्यानां क्षीरशाकादीनाम्)

अजस्रपरमाश्चर्य (ajasra-paramāścarya) *n.* perpetual and superb
wonder यस्याष्टगुणमैश्वर्यं नानातिशयशोभितम् । अजस्रपरमाश्चर्यं सुरासुरमनोहरम्
PadmP.(Ra.) 98. 61.

अजस्रपरिदेवना (ajasra-paridevanā) *adj.* (*f.*) lamenting conti-
nuously मातरौ दुःखिते एते …। विरहे मापतां मृत्युमजस्रपरिदेवते(? ने) PadmP.
(Ra.) 32. 108.

अजस्रपुष्ट (ajasra-puṣṭa) *adj.* constantly nourished or enriched तैः ।
नृभटा यशः स्मेरमजस्रपुष्टं परिगत्वरं नागणयन् विनम्राः DvyāśraKā. 12. 42.

अजस्रबाष्पवदन (ajasrabāṣpa-vadana) *adj.* **i** with the face in
continuous tears अजस्रबाष्पवदनः कर्दमाक्तो जडाशयः । वर्षोक्षितस्य तप्तस्य स्थलस्य
सदृशः शिशुः YogVā. i. 19. 20; **ii** with the surface covered with conti-
nuous vapours, YogVā. i. 19. 20.

अजस्रभाव (ajasra-bhāva) *adj.* with constant faith or devotion
यूयं द्विजाग्र्याः…। नारायणं देवम्…अजस्रभावा भजताविवेश्य BhāgP. xii. 12. 55.

अजस्रभावना (ajasra-bhāvanā) *f.* incessant meditation विलोकयन्ती-
भिरजस्रभावनाबलादमुम् NaiṣC. 1. 29.

अजस्रम् (ajasram) *adv.* [*svarādigaṇa* on P. i. 1. 37; GaṇPā. 254. 115;
GaṇRa. 1. 15 (35); SiddhāKau. 209B. 2; 514A. 3; CāndraVṛ. *on* i. 2. 116;
JaineVyā. 117. 4 (*on* ii. 2. 148); अजस्रमिति जसु मोक्षणे नञ्पूर्वो रप्रत्य-
यान्तः क्रियासातत्ये वर्तते KāśiVṛ. *on* P. iii. 2. 167; न जस्यतीत्येवंशीलमजस्रं
निरन्तरम् S'abdaBhePra. (Ma.) 3. 52] **i** incessantly, uninterruptedly,
continuously अजुहुत्संवत्सरमजस्रमग्निमिन्धीत MānS'S. 29. 16; विवाहाग्निम-
ग्रतोऽजस्रं नयन्ति ĀśvaGS. i. 8. 5; अजस्रं निपतत्स्वग्नौ नागेषु MahāBhā. i.
48. 19; i. 434*; अजस्रमेव दुःखार्तः …। परिक्रामति संसारे चक्रवत् MahāBhā.
iii. 200. 37; iii. 265. 18; माद्रीसुतौ चापि … स्मरन्ति … सेनां वर्षन्तौ शरवर्षैरज-
स्रम् MahāBhā. v. 24. 6; v. 182. 15; अजस्रमन्वकीर्यन्त शराः पार्थरथं प्रति
MahāBhā. vii. 114. 28; vii. 73. 16; प्रपेतुरुर्व्यां नृशिरांस्यजस्रम् MahāBhā. viii.
12. 58; अजस्रमार्तां करुणं रुदन्तीम् BuddhaC. 9. 56; व्यानेन रसधातुः … युगपत्
सर्वतोऽजस्रं देहे विक्षिप्यते CaraS. vi. 15. 36 (1941 Ed.); व्रणश्च कठिनः संरम्भी
कण्डूप्रायः पिच्छिलमजस्रमास्रावं स्रवति SuśruS. ii. 4. 7; अजस्रमच्छं सलिलप्रकाशं
यस्याविवर्णं स्रवतीह नासा SuśruS. vi. 22. 16; या … अस्रैरजस्रमधुना पतिधर्मचिह्न-
मार्द्रीकृतं नयनबन्धमिदं दधाति ŪruBha. 40; तस्यानन्तरमन्यद्यज्ञान्तरं चाजस्रम-
विच्छिन्नं यजतीति ViṣṇuP. iv. 13. 136; तम् … पौराङ्गनाः …। प्रसूनलाजाप्रकरैर-
जस्रमवीवृषन् BrahmāṇḍP. ii. 27. 26; गर्भः … । अजस्रं ब्रह्म चाभ्यस्य षडङ्गं वेद-
मुद्गिरन् BrahmāṇḍP. ii. 74. 39; तैक्ष्ण्यं धैर्यमजस्रमुद्यमरतिः ख्यातिः Bṛhajjā.
8. 12; गिरयो नृपात्मजाकपोलमातेनुरजस्रमश्रुभिः JānaHa. 9. 22; पर्येत्यजस्रं तन्नद्धा
ग्रहकक्षा यथाक्रमम् SūryaSi. 12. 73; स्रोतोभिर्मदजलमुज्झतामजस्रम् Kirātā.
7. 38; 16. 37; प्रातरन्तमजस्रं स्यादस्यान्तः पार्वणो विधिः PrajāSm. 1. 162; अस्याः
… अजस्रं प्रवहता नयनोदकेनेवोढा … न प्रावर्तत वाणी Kād. 232. 12; निश्वासा
ग्लपयन्त्यजस्रमधुनैवोष्णास्तथा नाधरम् PriyDa. 3. 5; श्रेणयोऽस्मिन् शिवानामस्र-
स्रोतस्यजस्रम् … स्वनन्ति Nāgā. 4. 18; छिद्राण्यूर्ध्वमधोऽतश्चक्रमजस्रं स्वयं भ्रमति
BrāhmSphuSi. 22. 54; कुर्वद्भिर्मुखरुचिमुज्ज्वलामजस्रं यैस्तोयैरसिचत वल्लभां
विलासी S'iśuVa. 8. 38; समुत्सृजदिवाजस्रमश्रु स्वामिवियोगतः PadmP.(Ra.) 8. 254;
शरोरुधारास्त्वमुचन्नजस्रम् VarāṅgaC. 18. 23; सुखेनैव भवेद्यस्मिन्नजस्रं ब्रह्मचिन्त-
नम् । आसनं तद्विजानीयात् SarvaVeSāSaṁ. 913; दधतो दुस्तरवारितामजस्रम्।…
सुभटस्येव न दृश्यतेऽस्य पृष्ठम् HarVi. 5. 5; द्वावप्यजस्रमतिकर्कशसंप्रहारौ RāmC.
36. 34; एतामष्टसहस्रीमजस्रमनुपूर्वशः कृती विमृशन् YaśasCam. ii. 418. 22;
अस्रैरजस्रं गतम् AmaS'. 35; विबभुर्गजाः । अजस्रमम्बुसंसेकाद् रदैः प्रारोहितैरिव
MahāP. 29. 135; एवमसौ … अजस्रम् … विन्ध्याचलमनुससार NalaCam. 5. 32(6);
अजस्रम् … उपचितं रुधिरं रसायनमिव मन्ये Tantrākhyā. 25. 21; भवता मत्समीप-
विहारिणाजस्रं भवितव्यम् PañcT. 1. 54(28) (45. 10); पल्लवेक्षणैरम्बुकणिकाश्रुविसर-
मजस्रमसृजन्नुपवनद्रुमाः TilaMañ. 180. 1; पथ्यागीतिरजस्रं समतालमिताक्षरं मृदङ्ग-
मपि ĪśānS'iPa. i. 19. 28; पटहोद्घोषणां मन्त्री सोऽग्रेऽजस्रमदापयत् KathāSaSāg.
xii. 27. 95; यस्मिन् वासुकिसङ्गिमंग(द)रगुरुग्राहाहृतारिश्रियः संगात् शे(? शी)र्ष-
मजश्र(स्र)मश्रुसलिलं विद्याधरीचक्षुषाम् EI. vii. 90. 16; कृष्णोऽम्बरः सरति तोयम-
सावजस्रम् RākṣaKā. 11; प्रियगात्रसगोत्रमित्यजस्रं चतुरा काचन चम्पकं ददर्श
S'rīKaC. 8. 33; उत्तेजयन्ति…जडमतीन् विटाः । सारमेयानिवाजस्रं प्रोत्साह्य प्राकृता-
शयाः RājTa.(Ka.) 7. 1120; अजस्रं भक्षयन्त्येते शीतसात्म्या महाग्नयः Hastyā-
yur. 655. 1 (4. 16); वहत्यजस्रमस्राम्बुजम्बालजटिले दृशौ PāṇḍaC. 5. 394;
खेदम्…ते हरिष्यत्यजस्रं शीतो वायः(? युः) NemiDū. 46; हस्तिहस्तपृथुलोदक-
धाराः । मुञ्चति स … पञ्चरात्रमहिशत्रुरजस्रम् S'aṅkaDigVi.(Mā.) 5. 135; अङ्गै-
रुदञ्चत्पुलकैरजस्रं नलस्य शुश्राव गुणान् नताङ्गी Nalābhyu. 1. 32; यः कान्तिमान्
…कळभकौतुकवानजस्रं मान्यः … स तु देवसत्त्वः MātaLī. 8. 2; गतश्रीकत्रितयस्यै-
वाजस्रमाहवनीयधारणविधानात् BhāṭṭCan. 78. 16 (*on* xv. 2. 5); [in Cpd.]
आखण्डलः । किं चाजस्रमखार्पितेन हविषा संफुल्लमांसोल्लसत्सर्वाङ्गीणवलीविलुप्तनयन-
व्यूहः कथं वर्तते AnarghRā. 1. 28; अजस्रभूमीतटकुट्टनोद्गतैरुपास्यमानं चरणेषु रेणुभिः
NaiṣC. 1. 59 (Jīvātu अजस्रेण भूमीतटकुट्टनेन); SūktiMu. 102. 9; **ii** for
ever, perpetually भेतव्यम् … इन्द्रियेभ्यः … तैरजस्रं हि हन्यते Saund. 13. 31;
13. 40; एवं स जाग्रत्स्वप्नाभ्यामिदं सर्वं चराचरम् । संजीवयति चाजस्रं प्रमापयति
चाव्ययः ManuSm. 1. 57; न स्नानमाचरेद् भुक्त्वा … न वासोभिः सहाजस्रम्
ManuSm. 4. 129; 12. 32; येऽजस्रं विहितं कुर्युः प्राप्नुयुस्ते सदा शुभम् BṛParā-
Sm. 6. 171; वृथैव संकल्पशतैरजस्रमनङ्ग नीतोऽसि मयातिवृद्धिम् S'āk. 3. 6;
भावाभावसमुच्छेदैरजस्रं व्याकुलं जगत् MārkP. 4. 13; तया ग्रस्तमिवाजस्रम्
VākyaP. 13. 2 (*on* 1. 1); उषश्चक्रम् … अजस्रं तद् ब्रह्मणा चैव धार्यते AhirbuS.
8. 41; केचिच्चान्ये प्रकामं प्रतिवचनयुतैः कार्यजापैरजस्रम्…शासिताः भूमिपालाः
EI. ix. 191. 5; रैवतकं ददर्श । … गुर्वीरजस्रं दृषदः समन्तात्…अम्बुमुचां वितानैः ।
विन्ध्यायमानम् S'iśuVa. 4. 2; स्तोत्रस्रजं तव … धत्ते जनो यः … अजस्रं तम् …
समुपैति लक्ष्मीः BhaktāSt. 48; नीता येषां कथाभि(पि) प्रलयमभिमता कीर्ति-
पालैर[ज]स्रम् EI. xxi. 39. 19; भगवतोऽभिगमनादिलक्षणमाराधनमजस्रमन-
न्यचित्ततयाभिप्रेयते BrahmSūBh.(S'aṅ.) 415. 18 (*on* ii. 2. 42); भजे शारदाम्बा-
मजस्रं मदम्बाम् S'āraBhuA. 1; त्वं तावदजस्रं जनपदमध्यजीवी Tantrākhyā.
61. 17; PañcT. 3. 4(6) (278. 6); दुराराध्या हि नरपतयः पर्वता इवाजस्रं प्रकृति-
विषमाः PañcT. 1. 26(4) (25. 4); बुद्धिं कुरु … ब्रह्माहमस्मि परमार्थसदित्यजस्रम्
SaṁkṣeS'ā. 1. 288 (i. 217. 5); ब्रह्माद्वितीयमुदितं च तदस्यजस्रम् SaṁkṣeS'ā.
1. 93 (i. 85. 18); स्वनिलयगतमात्रः सुप्रतीपागमाभिः कपिपतिरुपदाभिस्तावजस्रं
सिषेवे RāmC. 5. 91; यस्याज्ञां परचक्रिणः स्रजमिवाजस्रं शिरोभिर्वहन्ति EI. vi.
30. 10; अजस्रं कुर्वतां कर्म … सिध्यन्ति विविधाः कामाः ParaS. 15. 27; न
भोजनाच्छादनमप्यजस्रमपेक्षते यस्तमहं नमामि Stotrā. 18. 4; भक्तिं हरौ भगवति
प्रवहन्नजस्रमानन्दबाष्पकलया … नात्मानमस्मरदसौ BhāgP. iv. 12. 18; भवन्ति
यथोर्मयस्तोयनिधेरजस्रम् VāmaP. 29. 22; तत्पुरुषः … रक्षतु मामजस्रम् SkandP.
iii(3). 12. 9; चलस्यजस्रं चरणादिवर्जितः AdhyāRā. i. 5. 44; गात्राणि कांस्य-
पात्राणि कर्मभिश्छिद्रितान्यसौ । कांस्यकार इवाजस्रं परिवर्तयते विधिः UdaySuK.
69. 24; जयति निशापतिमौलिर्दधन्महाकालविभ्रममजस्रम् VyaktiVi. 70. 13; अयि
जड … कुरु हृदयस्थां क्षमामजस्रम् ChandaśCū. 2. 200(5); पुण्यं विनश्वरम् ।…
इत्यजस्रं भावयन् स भववैराग्यमासदत् TriṣaS'aPuC. iv. 2. 9; अजस्रमभ्यासमुपे-
युषा समं मुदैव देवः कविना बुधेन च। दधौ … नयन्…उदयं दिने दिने NaiṣC.
1. 17; अमन्दमानन्दमजस्रमेव भुञ्जन्त आत्मीयमजात्समासते AnuVyā. 73B. 7
(*on* 4. 4); अजस्रं यद्गुणग्रामं वर्णयन्ति मही[भु]जाः EI. xxi. 164. 10; गोपाल-
मन्त्रम् … धार्यम् … अजस्रम् PañcaRā.(Nā.) iii. 13. 21; यस्मै श्रेयांस्यजस्रं

वितरति भगवान् देवदेवः स्वयम्भूः PratāYaBhū. 146. 7; मन्दानिलोऽपि वनितावदनारविन्दगन्धापहारनिपुणो निवसत्यजस्रम् SimhāDvā. 133. 2; ग्रहः खकक्षामित योजनानि भ्रमत्यजस्रं परिवर्तमानः GrahaGa. 22. 16 (4. 4); तावत्साळुवतिम्मकीर्तिलतिका पुष्यत्वजस्रं भुवि EI. vi. 237. 106; तनुरुचिभिरजस्रं पारदाभां पिबन्ती…प्रभवतु … शारदा पारदा नः VīraMi.(Paribhāṣā.) 1. 13; **iii** often, frequently, always कामेष्वजस्रं प्रममाद नन्दः Saund. 2. 63; 9. 9; मसीवर्णमजस्रं यो मूत्रमुष्णं प्रमेहति CaraS. ii. 4. 30; ii. 7. 7 (1941 Ed.); तीक्ष्णान्यजस्रमुपसेवेत स्नेहस्वेदोपनाहांश्च SuśruS. iv. 23. 12; अतिसुरतमजस्रं सेवनातिक्रमेण नयति रुधिरशोषं तेन वै पाण्डुरोगम् HāriS. iii. 8. 5; क्रियाप्रबन्धादयमध्वराणामजस्रमाहूतसहस्रनेत्रः RaghuVa. 6. 23; तं वासुदेवं प्रणमाम्यजस्रम् MatsyaP. 245. 24; सत्त्वानजस्रम् … समश्नता । क्षुध्यता जगृहाते तौ रक्षसा दीर्घबाहुना Bhaṭṭi. 6. 45; असावपि दुष्टमतिः … कौशलादजस्रं तान्भक्षयन् परं परितोषमुपागतः Tantrākhyā. 19. 11; 112. 22; तेषां … अजस्रं विपुलवृक्षच्छायायाम् … कृतसमागमानाम् … प्रीत्या कालोऽतिवर्तते PañcT. 2. 77(32) (251. 8); यच्छतीयं विपर्यासं भूरिभूतपरंपरा । बीजराशिरिवाजस्रं पूर्यमाणः पुनः पुनः YogVā. ii. 3. 34; (अश्वः) पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रम् UttaRāC. 4. 26; तानहम् … प्रक्षिपामि … अजस्रं संततम् GītāBh.(S'aṅ.) 462. 14 (*on* 16. 19); सृजन्ति ये मूत्रमजस्रमाविलम् KalyāKā. 11. 25; भोगसुखसाधनैकहेतोः … दानादिक्रियाभिः कर्तव्यमजस्रमुपबृंहणम् TilaMañ. 102. 17; निरन्तरैर्या (उज्जयिनी) रणितैरजस्रम् आज्ञामिवोद्घोषयति स्मरस्य NavaSāC. 1. 29; अजस्रम् … अमात्यादिलोकैः परिगतम् … भरतमवलोकयन् RāmāCam. 6. 102(3); अजस्रमारोहसि दूरदीर्घां संकल्पसोपानततिं तदीयाम् NaiṣC. 3. 106; Kuval. 85(8); बटूंश्चेष्टदानैरजस्रम्…यजेच्चापि विन्देत् ĪśānS'iPa. i. 15. 125; विद्यासमग्रस्वविभूतिजालैर्विश्वं विदित्वा च सृजत्यजस्रम् ĪśānS'iPa. ii. 2. 31; सङ्गादजस्रं मदवारणानां सावज्ञमालोकितदिग्द्विपेन्द्राः । अमुष्य वाहाः VikraDeC. 9. 138; पटहोद्घोषणां मन्त्री सोऽग्रेऽजस्रमदापयत् KathāSaSāg. xii. 27. 95; अजस्रं वाजिनां क्रयैः … चक्रे न मृत्तस्करसाद्धनम् RājTa.(Ka.) 8. 73; स चाजस्रमेव मृगोत्सादनं कुरुते Pañcā. 40. 17; परिमलमलिव्रात आसाद्य सद्यो यद्वद्दूराद् व्रजति कुसुमं सेवते चाप्यजस्रम् EI. i. 65. 15; अजस्रं हस्तिनो भक्ष्यं भक्षयन्ति यतस्ततः Hastyāyur. 24. 18 (1. 2); पायं पायमजस्रमुत्पलदृशां वक्त्रारविन्दासवम् PañcSā. 1. 20; अनुरञ्जयेदजस्रं तस्य गुणैर्वर्ण्यमानैस्तु KandaCū. iii. 5. 3; त्रिवेणीम् … अजस्रमवि(?व)गाह्य मनोविषादं तत्याज YātrāPra. 2. 42; त्वदीयकीर्तिः … श्रान्ता दिगन्तभ्रमणैरजस्रम् । श्रमं निराकर्तुमना इव स्वं स्वर्वाहिनीतोयमगाहतासौ ĀnandRa. 2. 14; भूषाविहीना न ददाति तस्मै स्वदर्शनं याचितमप्यजस्रम् AnaṅgaRa. 8. 21; आसेव्यसे च पुरुषैरजरैरजस्रम् RasSa. 48; ParyāRaMā. 550; KośaKaTa. 2. 2999; KalpaK. 381. 17.

अजस्रमुक्ति (ajasra–mukti) *f.* permanent liberation or emancipation एतद्वारमजस्रमुक्तियुवतेः ViveCū. 378.

अजस्ररत (ajasra–rata) *adj.* taking delight permanently or continuously त्वम्…स्वे सुखेऽजस्ररतोऽनवद्यः AdhyāRā. vi. 15. 52.

अजस्ररूपभाज् (ajasra–rūpabhāj) *adj.* possessed of handsome form for ever सः … दस्रतोऽजस्ररूपभाक् SkandP. iv. 43. 16.

अजस्ररोमहर्ष (ajasra–romaharṣa) *adj.* having continuous horripilation अयमसौ जयति … । कनकमणिशिलाविलासवक्षःस्थलगलदस्रमजस्ररोमहर्षः CaitaCa. 178. 17(8)

अजस्रलालाकर (ajasralālā–kara) *adj.* causing continuous flow of saliva अजस्रलालाकरकण्डुरान्वितं ब्रुवन्ति साक्षादुपजिह्विकामयम् KalyāKā. 15. 64.

अजस्रविटकुट्टन (ajasra–viṭakuṭṭana) *n.* constant pressing by the voluptuaries कैषा अजस्रविटकुट्टनस्थपुटितस्तनाभ्यन्तरा … प्रसह्य जरती पुनस्तरुणमेकमाकर्षति S'ṛṅgāBhū. 67.

अजस्रविस्रम्भ (ājasra–visrambha) *m.* ever-lasting confidence हृष्यन्नजस्रविस्रम्भादलोलैः केलिकेकिभिः(सः) PāṇḍaC. 4. 21.

अजस्रवृत्ति (ajasra–vṛtti) *adj.* existing permanently, of eternal existence अजस्रवृत्तिर्यः शब्दः सूक्ष्मत्वान्नोपलभ्यते VākyaP. 1. 108.

अजस्रवेग (ajasra–vega) *m.* undiminishing speed तस्य शैलस्य शिखरात् …गङ्गा भागीरथी शुभा । पतत्यजस्रवेगेन MahāBhā. vi. 7. 27.

अजस्रव्यसनासक्ता (ajasra–vyasanāsaktā) *adj.* (*f.*) permanently addicted to bad habits अजस्रव्यसनासक्ता तोयभे प्रथमार्तवा NāraS. 15. 22.

अजस्रशक्ति (ajasra–śakti) *adj.* possessed of eternal power यां प्राहुरजस्रशक्तिम् BrahmSūBh.(Ma.) 27A. 10 (*on* ii. 1. 31)

अजस्रशोष (ajāsra–śoṣa) *adj.* drying up constantly चिरं तदाध्यास्त मनोभवज्वराद्विमानपृष्ठं रजनीचरेश्वरः । मधूनि चन्द्रातपसङ्गशीतलान्यजस्रशोषैरनुशीलयन्मुखैः RāmC. 18. 43.

अजस्रसंविद् (ajasra–saṁvid) *adj.* possessed of eternal consciousness तुष्टुवुर्विविधैः स्तोत्रैः (शिवम्) … नित्यायाव्ययायाजस्रसंविदे…भव ते नमः S'ivaP. ii(2). 15. 54 (86A. 4); *f.* eternal consciousness, S'ivaP. ii(2). 15. 54 (86A. 4)

अजस्रसंकीर्तना (ajasra–saṅkīrtanā) *f.* continuous utterance अजस्रसंकीर्तनयाजनाम्नां मुखात्… । निसर्गशुभ्रं दशनांशुजालमन्तस्तपः शुद्धमिवोत्किरन्तम् (मुनिम् … प्रणनाम राजा) Rāgh. 2. 5.

अजस्रसङ्गम (ajasra–saṅgama) *m.* constant union तत्तु निरुपमजस्रसंगमाद् व्रीडमावहति मामकं मनः NaiṣC. 18. 63.

अजस्रसांनिध्य (ájasra–sānnidhya) *n.* constant presence अनेकसंगीतविदामजस्रसांनिध्ययोगात्सुतरां प्रवीणाः । गायन्ति यस्यां क्षितिपालकीर्तीर्विलासशारीशुकराजहंसाः Rāṣṭrau. 9. 50.

अजस्रसुख (ajasra–sukha) *n.* eternal bliss ब्रह्मेति यद्विदुरजस्रसुखं विशोकम् BhāgP. ii. 7. 48; *adj.* possessing eternal bliss समद्राक्षं शंकरम् … त्रिभिरंशैः शोभमानमजस्रसुखमव्ययम् S'ivaP. v. 1. 14 (405A. 14)

अजस्रसेवावसर (ajasrasevāvasara) *m.* opportunity for constant or permanent service अजस्रसेवावसरं प्राप्य पूज्ये सहोदरे । चत्वारोऽपि कनीयांसः कृतार्थं जन्म मेनिरे PāṇḍaC. 8. 40.

अजस्रसेव्या (ajasra–sevyā) *adj.* (*f.*) who is always to be worshipped अजस्रसेव्ये । …ललिते नमस्ते BrahmāṇḍP. iii. 30. 21.

अजस्रस्नान (ajasra–snāna) *n.* frequent or constant bathing निमित्तं विनाजस्रस्नानं निषिध्यते VīraMi. (Āhnika.) 167. 3.

अजस्रस्फूर्जिताकार (ajasrasphūrjitākāra) *adj.* ceaselessly emitting twanging sound अजस्रस्फूर्जिताकारो वान्तदुःखशरावलिः । अभावनामकोदण्डः परिस्फुरति सर्वतः YogVā. i. 24. 9.

अजस्रस्रुत (ajasra–sruta) *adj.* flowing or dripping continuously गभीरकासच्छलेन तर्जयन्त्या काळरात्र्या वाजस्रस्रुतलालास्यन्दिविस्रसया सुनियोगतः सकचग्रहं हठादाकृष्यते AvantiKa. 41. 12; °श्रेणयोऽस्मिन् शिवानामस्रस्रोतस्यजस्रस्रुतबहलवसा वासविस्रे स्वनन्ति SubhāRaK. 44. 9 (cf. Nāgā. 4. 18); आ सह्याद्रेरजस्रस्रुतमदसलि(लक्लि)न्नगण्डद्विपेन्द्रादा वारामाकरात् EI. xv. 60. 49.

अजस्रस्रुति (ajasra–sruti) *f.* continuous flow वक्त्रोद्वान्ताः पतन्त्यः शमितशिखिशिखाः श्रेणयोऽस्मिन् शिवानामस्रस्रोतस्यजस्रं स्रुतबहलवसावासविस्रे स्वनन्ति (v. l. अजस्रस्रुति) Nāgā. 4. 18.

अजस्राग्नि (ajasrāgni) *m.* fire called *ajasra* (*lit.* fire maintained permanantly) अग्निसंरक्षणे शक्तिर्यस्य चैव न वर्तते । तदारण्यामजस्राग्निं स्थापयेद्विधिपूर्वकम् LaghvāśvaSm. 1. 61; *adj.* who keeps or maintains the constant fire एकाग्निमानित्यनेन विच्छिन्नत्रेताग्निमानर्धाधान्येवाभिहितोऽजस्राग्निर्वेति सोऽप्याहिताग्निरेव VīraMi. (S'rāddha.) 325. 24.

अजस्रास्खलिताध्ययन (ajasrāskhalitādhyayana) *n.* constant and faultless study (of the Veda) सर्वेषु वेदेषु … अनन्यमनस्कतयाप्यजस्रास्खलिताध्ययनक्षमः अग्र्यः Mitā. 75. 4 (*on* 1. 219)

अजस्रास्रस्राविन् (ajasrāsrasrāv–in) *adj.* **i** causing the tears to flow constantly तदस्याजस्रास्रस्राविणो हृदयमहाव्रणस्य … दीर्घरोगस्य … विदुषामपि हृदयानि नालं सोढुमापातम् HarṣaC. 336. 2; **ii** causing the blood to flow constantly, HarṣaC. 336. 2.

अजस्रास्रितलोचना (ajasrāsrita–locanā) *adj.* (*f.*) having eyes continuously shedding tears ते दृष्ट्वा दुःखिते बाढमजस्रास्रितलोचने PadmP. (Ra.) 32. 103.

अजस्रोड्डीन (ajasroḍḍīna) *adj.* constantly flying over आसीत् … दैत्येन्द्रः … अजस्रोड्डीनरत्नौघताराढ्यखपुरान्तरः YogVā. iv. 25. 16.

अजस्रोत्थ (ajasrottha) *adj.* arising incessantly or continuously ध्यात्वा दुर्गाम्…अट्टहासैरजस्रोत्थैर्भीषितासुरसैनिकाम् S'āraTi. 22. 46.

अजस्रोत्थितोद्ध्वस्त (ajasrotthitoddhvasta) *adj.* constantly produced and destroyed रुद्रो भूत्वा भवत्येषः … धत्तेऽजस्रोत्थितोध्वस्तान्सर्गानमितभास्वरान् YogVā. i. 23. 25.

अजस्वभाव (aja–svabhāva) *adj.* of unborn nature अजस्वभावं ब्रह्मोक्तम् BṛBrahmaS. ii. 2. 76.

अजस्विषय (a–jasviṣaya) *m.* cases other than the Nom. pl. अजस्विषये ङीप् संज्ञाच्छन्दसोः Prasā. ii. 719. 16; रात्रिशब्दान्ङीप् स्यादजस्विषये छन्दसि SiddhāKau. 594A. 14.

अजहत् (a–jahat) *adj.* [*f.*–ī;–ntī] not leaving out, not abandoning, not losing गच्छन्तं महामेरुम् । एकं चाजहतम् TaiĀ. i. 7. 3 (43. 3 accent?) ग्रीष्मकालं समासाद्य यथार्कः तीक्ष्णतां व्रजेत् । स्वरूपमजहन्नेव तथैवात्र जगत्पतिः PāraS. 10. 307; 12. 41; PauṣkS. 30. 16; स्वभावमजहच्छश्वदाकारान्तरमाकृतेः । यत्तत्त्वमंशसंभूतं प्रादुर्भावान्तरं तु तत् PauṣkS. 36. 201; 30. 16; कोपापगमे नार्यास्तमेव हृदयेन भावमजहन्त्याः DhūrtaViSam. 20. 11; ततस्तु तौ लक्षणया सुलक्ष्यौ

तयोरखण्डैकरसत्वसिद्धये । नालं जहत्या न तथाऽजहत्या किन्तूभयार्थात्मिकयैव भाव्यम् VivaCū. 250; कार्यकारणवाच्यांशौ जीवेशौ यौ जहच्च तौ । अजहच्च तयोर्लक्ष्यौ चिदंशावेकरूपिणौ SadācāAnu. 27; श्रीः –स्वातन्त्र्यादेव संकोचं भजाम्यजहती स्वताम् LaksmīT. 6. 37; 32. 54; संवादितामजहतो दलिताद्रिकूटकल्पक्षयप्रसृतदण्डसमीरणानाम् । ···कसिन्··· °दानवभटाः न चकास्थ संख्ये HarVi. 13. 34; पिबच्छब्दः ···स्वार्थमजहन्नितरेतरयुक्तपिबदपिबत्परो भवतीत्यर्थः Bhām. 169. 10 (*on* i. 2. 11); 616. 12 (*on* iii. 3. 25); पिबच्छब्दः ··· स्वार्थं पिबन्तमजहत्···समुदायीभूतपिबदपिबत्परो भवति VedāntKa. 138. 1 (*on* i. 2. 11); स्वकीयं स्वभावमजहदेव स्वेच्छया बहुधा विजायते परः पुरुषः BrahmSūBh.(Rā.) 278. 1 (*on* i. 3. 1); नारायणः ··· स्वस्वभावमजहदेव ··· लोकेष्ववतीर्य ··· भक्तियोगमवतारयामास GītāBh.(Rā.) 22. 1 (*on* 1. 0); 235. 1 (*on* 4. 6); सा श्रीलङ्कक मानमार्गमजहत्यप्यात्तकण्ठा हठाद्विद्रुत्ता तव चित्रमुज्झितरजाः सूते यशःसन्ततिम् S'rīKaC. 25. 42; व्यसनविमुखं स्निग्धमजहन्न धीरोऽपि ··· शर्म लभते RājTa.(Ka.) 8. 692; एवं विभक्तं तमः तमस्त्वावस्थामजहदेव कार्यानुपयुक्तस्वजातीयतमसैकीभवति S'rutaPra. ii. 164. 18 (*on* i. 4. 23); अत्र स्वार्थमजहत एव काव्यादयः Ekāva. 2. 7(3) (65. 9); स तदा चेदिपतिः ··· अजहत्परुषोक्तिहेतिजालः ···दिदीपे Yādavā. 15. 96; तद्वैशिष्ट्यं च शास्त्रप्रथितमजहतां कोऽपराधः TattvMu. 3. 27; (ब्रूयादपि च शिष्येभ्यः सत्सिद्धान्तमहापयन्) स्वार्थिको णिच् अजहदित्यर्थः NyāySu.(Ja.) 537A. 2 (*on* iii. 3. 1); तथाप्येषोऽभिजातत्वादजहन्स्वामिभक्तताम् । ··· भोजो भूपमसेवत HammīMaKā. 9. 178; अजहतीमनुसृत्य तु लक्षणां भवति बुद्ध्यभिगामि पिबत्पदम् NayaMañ. I. ii. 3. 5; सा···जनकात्मजा···असूनजहती यद् दुर्बलानप्यसौ संदृष्टा Rāgh. 12. 63; 16. 21.

अजहत्त्व (ajahat–tva) *n.* the state of being one which does not leave (its real nature as the probans) अजहत्वे(? त्त्वे) तु लक्षणं न हेत्वाभासो भवितुमर्हति NyāyVār. 177. 20 (*on* i. 2. 5)

अजहत्प्रवृत्ति (ajahat–pravr̥tti) *f.* the signifying function which does not exclude the denotative sense वेदेऽपि लाक्षणिकवृत्तिरियं त्रिधैषा···वैश्वानरादिवचनेष्वजहत्प्रवृत्तिः SaṁkṣeS'ā. 1. 157 (i. 129. 1)

अजहत्प्रीति (ajahat–prīti) *adj.* who has not discarded affection अपि गर्भघनोदये व्यलासीदजहत्प्रीतिरहो स राजहंसः Acyutarā. 2. 6.

अजहत्समाधिक (ajahatsamādhi–ka) *adj.* who has not given up meditation समिन्धतेऽस्मिन्नजहत्समाधिकाः Yādavā. 6. 34.

अजहत्स्वगुणान्वित (ajahat–svaguṇānvita) *adj.* possessed of inherent (not to be given up) virtues or qualities आत्मानमेकमात्मस्थमजहत्स्वगुणान्वितम् । ते प्राप्नुवन्ति मामेव BrBrahmaS. ii. 2. 86.

अजहत्स्वधर्मता (ajahatsvadharma–tā) *f.* the state of not giving up the inherent characteristic होतुः सिद्धस्वरूपस्याध्वर्यवविधानादजहत्स्वधर्मतया हौत्र एव युक्त इति प्राप्तेऽभिधीयते TantrVā. 1170. 1 (*on* iii. 8. 21)

अजहत्स्वपन (ajahat–svapana) *adj.* who does not give up sleep अपि जागरूकमवने जगतामधिभोगिभोगमजहत्स्वपनम् । ··· अनमत् स हरिम् Acyutarā. 5. 58.

अजहत्स्वभाव (ajahat–svabhāva) *adj.* who does not give up his nature (true to one's nature) अहं सर्वेश्वरः ··· सर्वसमाश्रयणीयत्वायाजहत्स्वभाव एव वसुदेवसूनुरवतीर्णः GītāBh.(Rā.) 399. 8 (*on* 7. 44); नाडीसंबन्धो बहुधा जायम(? मा)नत्वं च ··· अजहत्स्वभावस्यैव परमात्मनो दृश्यते VedāntDī. 43. 10 (*on* i. 3. 1)

अजहत्स्वभावता (ajahatsvabhāva–tā) *f.* the state of not abandoning one's essential nature भगवज्जन्मनः स्वेच्छाकृतस्य निरङ्कुशैश्वर्यविरोधित्वात् अजहत्स्वभावतया विचित्रैश्वर्योद्दीपकत्वाच्च परमकारणत्वाप्रच्युतेः S'rutaPra. ii. 198. 7 (*on* i. 4. 29)

अजहत्स्वस्वभाव (ajahat–svasvabhāva) *adj.* not giving up one's essential nature (श्रद्धावान् भजते यो मां स मे युक्ततमो मतः) (माम्) अजहत्स्वस्वभावं वसुदेवगृहेऽवतीर्णम् ··· आत्मकान्त्या विश्वमाप्याययन्तं भजते सेवते उपास्त इत्यर्थः GītāBh.(Rā.) 364. 1 (*on* 6. 47)

अजहत्स्वस्वभावता (ajahatsvasvabhāva–tā) *f.* the state of not giving up one's essential nature सर्वतोमुखशब्देन नानायोनिनिवेशनम् । भद्रत्वं तत्र तस्यापि ह्यजहत्स्वस्वभावता AhirbuS. 55. 25.

अजहत्स्वार्थ (ajahat–svārtha) *adj.* [*f.* –ā] (word) not giving up the primary sense, (*lakṣaṇā*) which does not give up or exclude the denotative meaning परार्थाभिधानं वृत्तिरित्याहुः । अथ तेषामेवं ब्रुवतां किं जहत्स्वार्था वृत्तिर्भवत्याहोस्विदजहत्स्वार्था MahāBh. i. 364. 7 (*on* ii. 1. 1); i. 73. 13 (*on* i. 1. 19); i. 364. 9 (*on* ii. 1. 1); i. 364. 28 (*on* ii. 1. 1); i. 405. 22 (*on* ii. 1. 69); अजहत्स्वार्थाः सर्वाः शब्दवृत्तयः TantrVā. 319. 11 (*on* i. 4. 22); Nyās. i. 67. 2 (*on* i. 1. 19); इदमेव वृत्तित्रयमङ्गीकृत्य 'समर्थः पदविधिः' इत्यत्र सूत्रे जहत्स्वार्थाजहत्स्वार्था जहदजहत्स्वार्थेति ··· लक्षणाविभागं चक्रुः PañcPra. 13. 6; वृत्तिस्तत्राजहत्स्वार्था जहत्स्वार्थापि वर्तताम् SaraKaṇṭhā. 563. 15; 653. 20; श्रुतार्थद्वारा हि लक्षणा अजहत्स्वार्था NyāyRa. 29. 15 (*on* 1. 87); Pradī. ii. 159A. 36 (*on* i. 3. 19); NyāySu.(So.) 1080. 2 (*on* iii. 2. 1); अजहत्स्वार्थायामपि वृत्तावुपसर्जनपदं न स्वार्थमात्रे पर्यवस्यति, किन्तु तत्संसृष्टे प्रधानार्थे PadMañ. *on* KāśiVr̥. *on* P. i. 1. 19; ("सप्तमी शौण्डैः") अत्र साहचर्याद् धूर्तादिष्वजहत्स्वार्थ एव शौण्डशब्दः प्रयुज्यते PadMañ. *on* KāśiVr̥. *on* P. ii. 1. 40; सिद्धिं निजक्रियायाः कर्तुं यस्यां परस्य शब्देन । आक्षेपः क्रियतेऽसावजहत्स्वार्था समाख्याता Ekāva. 2. 7 (65. 6); ("छत्रिणो यान्ति" इत्यत्र) अजहत्स्वार्थायां प्रकरणादेव छत्रितदितरस्य यान्तीत्यनेन गमनकर्तृत्वमवगतम् TattvCin. iv(1). 174. 3; i. 826. 6; iv(2). 363. 4; सा (लक्षणा) त्रिधा जहत्स्वार्थाजहत्स्वार्था जहदजहत्स्वार्था चेति VedāntRaMañ. 1. 4 (62. 8); (उपादानलक्षणा) इयमेवाजहत्स्वार्थेत्युच्यते SāhiDa. 43. 6; 210. 10; Upask. 43. 8 (*on* i. 1. 28); "छत्रिणो यान्ति" इत्यादौ 'छत्रि'-पदस्यैकसार्थवाहित्वे लक्षणा । इयमेवाजहत्स्वार्था लक्षणा इत्युच्यते SiddhāMu. 49. 12 (*on* 82); लक्षणा द्विविधा जहत्स्वार्थाजहत्स्वार्था च Tarkāmr̥. 21. 12; लक्षणायाम् ···द्वौ भेदौ ध्वन्याश्रयतया स्थितौ जहत्स्वार्था अजहत्स्वार्था चेति RasGaṅ. 175. 11; 186. 7; 515. 11; BhāṭṭCin. i. 57. 27 (*on* i. 1. 4); जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा । भेदः संसर्ग उभयं वेति वाच्यव्यवस्थितेः VaiyaBhū. 140. 13 (*on* 30); 143. 6 (*on* 30); LaS'abdeS'e. i. 121. 2; VaiyāSiMañ. 123. 11.

अजहत्स्वार्थता (ajahatsvārtha–tā) *f.* the state of not giving up the primary meaning प्रथमानन्तरे वृत्तेरजहत्स्वार्थतेष्यते SaraKaṇṭhā. 563. 17; न चैकत्वलक्षणायां जहत्स्वार्थतापत्तेः प्रातिपदिक एवाजहत्स्वार्थता युक्तेति केषांचिदुक्तं युक्तम् BhāṭṭaDī. ii. 7. 12 (*on* iii. 5. 6)

अजहत्स्वार्थत्व (ajahatsvārtha–tva) *n.* the state of not giving up the primary meaning 'कुन्ताः प्रविशन्ति' इत्यादौ कुन्तसंयोगविशिष्टपुरुषाणां कुन्तत्वेन प्रतीतिरित्यजहत्स्वार्थत्वोपपत्तिः VaiyāSiMañ. 138. 17.

अजहत्स्वार्थलक्षण (ajahatsvārtha–lakṣaṇa) *adj.* characterised by not losing the primary meaning अत्र गौतमीयाः (राजपुरुष एवमादिषु) समासेषु कृप्तराजपदादेरेव सम्बन्धिलक्षणया राजसम्बन्ध्यभिन्नः पुरुष इति बोधसम्भवे न शक्तिकल्पनं युक्तम् । महाधिकारस्याप्याजहत्स्वार्थलक्षणव्यपेक्षारूपसामर्थ्ये समासादिविधानेनोपपत्तेः BhāṭṭCin. i. 110. 17 (*on* i. 1. 4)

अजहत्स्वार्थलक्षणा (ajahatsvārtha–lakṣaṇā) *f.* indication wherein the primary meaning is not given up एवञ्च छत्रिणो यान्ति ··· इत्यत्राजहत्स्वार्थलक्षणायामपि छत्रिणस्तत्समूहानन्तर्गतेनाच्छत्रिणाप्यविनाभाव एव TattvCin. iv(2). 689. 10; ("भार्या पुत्रश्च दासश्च ··· । प्राप्तापराधास्ताड्याः स्युः" इत्यत्र) भार्यापदमजहत्स्वार्थलक्षणया स्नुषादिपरमपि DaṇḍaVi. 231. 5; "दधि पश्यति" इत्यादौ द्वितीयालोपस्थले दधिशब्द एवाजहत्स्वार्थलक्षणया दधिकर्मत्वं बोधयति Tarkāmr̥. 21. 23; पूर्वाह्णपदं चाजहत्स्वार्थलक्षणया प्रत्यूषादिपूर्वाह्णपरम् VīraMi. (Āhnika.) 31. 25; 11. 8; VīraMi.(Saṁskāra.) 133. 5; VyutpaVā. 109. 25; LaCandr. 833. 35; आधारयतावजहत्स्वार्थलक्षणया यागोपस्थितिः MīmāKau. iii. 209. 18 (*on* ii. 2. 17); ii. 246. 2 (*on* iii. 2. 13); प्रकृते ('मदीयगुरुकार्मुकम्' इत्यत्र) चाजहत्स्वार्थलक्षणामूलध्वननेन मदीयेत्यनेन गर्वोत्कर्षस्यैव प्रकाशनात् ··· क्रोधस्याधिक्यं गम्यते RasGaṅ. 44. 18.

अजहत्स्वार्थवृत्ति (ajahatsvārtha–vr̥tti) *adj.* consisting of indication in which the primary meaning is not given up ('नीलमुत्पलम्' इत्यत्र) उत्पलशब्दसंनिधाने तदपेक्षी नीलशब्दस्तेनैकवाक्यतामभ्युपगच्छन्ना(? न्न)जहत्स्वार्थवृत्तिरुत्पलविशेषाभिधानपर उच्चार्यमाणः संबन्धमभ्युपैति S'ābaBh. 688. 9 (*on* iii. 1. 12); *f.* indication in which the primary meaning is not given up सृष्टिपदं अजहत्स्वार्थवृत्त्या सृष्ट्यसृष्टिसमुदायिपरम् MīmāKau. i. 289. 17 (*on* i. 4. 27)

अजहत्स्वार्थवृत्तित्व (ajahatsvārthavr̥tti–tva) *n.* the state of being an indication in which the primary meaning is not given up अक्षत्रियेऽपि च क्षत्रियकार्यापत्त्या प्रयोगोपपत्तेरजहत्स्वार्थवृत्तित्वेन जात्यत्यागसंभवान्नानेकशक्त्यापादकं निमित्तान्तरं कल्पनीयमित्याशयः NyāySu.(So.) 901. 2 (*on* ii. 3. 3)

अजहदवयवार्था (ajahad–avayavārthā) *adj.* (*f.*) a compound wherein the meanings of the component parts are not given up ननु संज्ञात्वेऽप्यजहदवयवार्थैव पञ्चजनशब्दवृत्तिः S'rutaPra. ii. 123. 32 (*on* i. 4. 11)

अजहदूष्मतरङ्ग (ajahad–ūṣmataraṅga) *adj.* wherein the heat-wave is not given up (still warm or hot) फूत्कृतैरजहदूष्मतरङ्गैर्भूयसा मसृणितोष्ठदलानि । अस्वदन्त सुदृशामभिकेभ्यः···मुखानि Gaṅgāva. 2. 43.

अजहद्गद्गदिकम् (ajahad–gadgadikam) *adv.* without giving up stuttering, in a choked voice, stutteringly शनैरवादीदजहद्गद्गदिकं स पद्मपादः S'aṅkaDigVi.(Mā.) 14. 154.

अजहद्गुणशक्तिकत्व (ajahadguṇaśaktika–tva) *n.* the state of not giv-

ing up qualities and powers (व्यूहाङ्गिनम्···ध्यायेम कृष्णम्) अवतारावस्थायाम् अव्यक्तशक्तित्वेऽपि अजहद्गुणशक्तिकत्वात्···परिपूर्णमेव VedāntRaMañ. 1. 4 (47. 17)

अजहद्धर्मत्व (ajahaddharma-tva) *n.* the state of not giving up the characteristic features पूर्वत्र निमित्ते निवृत्ते यथासंख्ये कृते तस्मादिहाप्यनुवर्तते । ते निवृत्ते यथासंख्ये एवानुवर्तेते । अजहद्धर्मत्वादधिकाराणाम् Nyās. i. 975. 13 (*on* iv. 3. 3)

अजहद्धेतुलक्षण (ajahad-dhetulakṣaṇa) *adj.* wherein the characteristics of a probans are not given up अजहद्धेतुलक्षणं (साधनं) न हेत्वाभासो भवति NyāyBh. 66. 6 (*on* i. 2. 9)

अजहद्भगवच्छक्ति (ajahad-bhavacchakti) *f.* not giving up (the possessor) (i. e. abiding) divine power अजहद्भगवच्छक्ति(:) सामर्थ्यं पुनरेव तत् PāraS. 5. 27.

अजहद्भृङ्गगीत (ajahad-bhṛṅgagīta) *adj.* not abandoning the humming of black bees (ऐरावतमथारुह्य ··· आजगाम पुरन्दर:) अजहद्भृङ्गगीतेन गर्जाडम्बरशोभिना । स्वकान्त्या कर्णतालेन कृप्तसंगीतखेलनम् Yādavā. 16. 9 (but comm. अजहन्ति भृङ्गगीतानि यं तेन)

अजहद्वाच्या (ajahad-vācyā) *adj.* (*f.*) (secondary expression) in which the primary meaning is not given up संबन्धनिबन्धना (लक्षणा) जहद्वाच्याजहद्वाच्या चेति द्विविधा PratāYaBhū. 46. 2.

अजहद्वृत्ति (ajahad-vṛtti) *adj.* whose nature is not to give up (i. e. sticking to) त्यजतो न जहाति योऽखिलान् विषयान् ···। स जहातु दुरन्तभावनामजहद्वृत्तिमिमां कथं जन: RāghPāṇ.(Dha.) 4. 5 (comm. अजहती वृत्तिर्वर्तनं यस्यास्ताम्); *f.* unchanging state पूर्णत्वेनाजहद्वृत्त्या त्रिष्वप्यध्वसु वर्तते । द्वैताद्वैतात्मकं ब्रह्म BṛĀraUBhVā. v. 1. 48.

अजहद्वृत्तित्व (ajahadvṛtti-tva) *n.* the state of not abandoning one's existence, invariable presence कथं पुनर्बलाकया सलिलानुमानम्, यावानस्य देशो बलाकयाजहद्वृत्तित्वेन प्रसिद्धो भवति तावन्तमन्तर्भाव्य वृक्षादिकमर्थं पक्षीकृत्य बलाकावत्त्वेन साधयति NyāyVār. 50. 7 (*on* i. 1. 5)

अजहद्रूप (ajahad-rūpa) *adj.* without giving up its (essential) form स्तिमितं तत् परं ब्रह्म···उन्मिषत्यजहद्रूपं स्वेच्छयैव कदाचन LakṣmīT. 22. 8.

अजहन्नीतीवर्मन् (ajahan-nītivarman) *adj.* who does not abandon the armour of royal polity तस्य सम्भृतसत्कीर्तेरजहन्नीतिवर्मण: । विनोदार्थमिदं काव्यं प्रवृत्तं नीतिवर्मण: KīcaVa. 1. 25 (*but* comm. अजहद् अत्यजन्नीतिरूपं वर्म कवचं यस्य स तथा)

अजहन्मज्जनोन्मज्जना (ajahan-majjanonmajjanā) *adj.* (*f.*) who has not abandoned dipping in and coming out (of water) अम्भ:क्रीडास्वनिशमजहन्मज्जनोन्मज्जनानां यक्षस्त्रीणाम् ··· क्षालितैरङ्गरागै: ।··· यस्या वाञ्छा भवति सरसी मानसं वो निवास: HaṁsDū.(Vā.) 71.

अजहल्लक्षणता (ajahallakṣaṇa-tā) *f.* the state of being an indication which does not give up the primary meaning (of a word) (तत् त्वम् इत्यत्र) एकात्मकत्वाज्जहती न सम्भवेत्तथाजहल्लक्षणता विरोधत: AdhyāRā. vii. 5. 27.

अजहल्लक्षणा (ajahal-lakṣaṇā) *f.* indication which does not give up the primary sense (of a word) तत्र लक्षणात्रैविध्यम् । जहल्लक्षणाजहल्लक्षणा जहदजहल्लक्षणा च MāthVṛ. 13. 16 (*on* 5); PañcaPra. 7. 6; SarvaVeSāSaṁ. 744; वाच्यार्थमत्यजन्त्या: यस्या वृत्ते: प्रवृत्तिरन्यार्थे । इयमजहतीति कथिता SvātmNi. 34; वाचा । वाक्शब्दोऽजहल्लक्षणया वाक्पूर्वव्यवहारपर: S'rutaPra. i(A). 184. 10 (*on* i. 1. 1); i(A). 68. 9 (*on* i. 1. 1); i(A). 246. 21 (*on* i. 1. 1); PratāYaBhū. 49. 8; अव्यक्तसहपठिताक्षरशब्दस्य ··· जीवसंबन्धेनाजहल्लक्षणायां लयविशेषादिप्रतिपादनौचित्यात् NyāySiA. 193. 7; TattvMu. 4. 80; न च वाच्यं लक्षणायां विचाराख्यो विषयानुबन्ध एव सिध्येत्, न ब्रह्मज्ञानाख्य: फलानुबन्ध इति; अजहल्लक्षणया स्वार्थस्यापि स्वीकृतत्वात् VivaPraSaṁ. 7. 22; TattvPrakā. 142A. 6 (*on* iii. 1. 10); NyāySu.(Ja.) 126B. 2 (*on* i. 1. 6); VedāntSā.(Sa.) 25. 1; TantrRa. 28. 16; VidhiRa. 29 (163. 20); पाप्मशब्दस्य ··· अजहल्लक्षणया पुण्यसाधारण्येऽपि पापमात्रे गृहीतशक्तिकस्य तस्य मोक्षशास्त्रेऽपि तत्साधारण्यनियमाभावात् S'ivārkMaDī. i. 248. 18 (*on* i. 1. 21); i. 265. 29 (*on* i. 1. 23); i. 336. 6 (*on* i. 2. 9); यत्र शक्यार्थमन्तर्भाव्यैव अर्थान्तरप्रतीति: तत्र अजहल्लक्षणा, यथा शुक्लो घट: VedāntPari. 204. 5; SiddhāSi. i. 31. 11; केचित्तु – अजहल्लक्षणया पित्रादयो यत्र तत्र मातामहास्तेनात्र नेत्याहु: NirṇaSi. 109. 19; नदीतीरे समुद्रतीरे वेति संदेहापत्त्या ···। शक्यलक्ष्योभयस्य क्रियान्वयित्वेऽजहल्लक्षणाङ्गीकारात् BhāṭṭCin. i. 57. 22 (*on* i. 1. 4)

अजहल्लिङ्ग (ajahal-liṅga) *adj.* [AltGr. II. 1. 318] (word) which does not drop its original gender (even when used as an adjective) अजहल्लिङ्गे तु लिङ्गविशेषनियमानुशासनान्न तथा TattvCin. iv. 2. 748; अव्ययैरजहल्लिङ्गै: ··· स्वबुद्ध्या मानसीं श्रयेत् AlaṅkāS'e. xix. 12 (19); अजहल्लिङ्गानां तु दारादिशब्दानां नित्यबहुवचनान्तानामेकस्मिन्निवागत्या तथा प्रयोग इति ध्येयम् VaiyāBhū. 125. 3 (*on* 25)

अजहल्लिङ्गत्व (ajahalliṅga-tva) *n.* being (a word) which does not drop its original gender (though used as an adjective) अजहल्लिङ्गत्वेनाग्रेऽप्यन्वय: BālamBha. i. 394. 1 (*on* 1. 133)

अजहल्लिङ्गनामार्थ (ajahalliṅganāmārtha) *m.* meaning of a nominal stem which does not drop its original gender जगति नरजन्म ··· दुष्प्राप: पुण्यहीनेन । यदि तु 'तपसा नाल्पेन शक्यते लब्धुम्' इत्याख्यातान्तं क्रियते तदा लिङ्गभेदो न दूषणम् । एवमजहल्लिङ्गनामार्थस्य सकृद्वृत्तावपि न दोष: । यथा 'फलमतिशयितं तपस्याया:' इति चतुर्थचरणनिर्माणे RasGaṅ. 439. 13.

अजहा (ajahā) *f.* the plant *Mucuna prurita* आत्मगुप्ताजहाव्यण्डा कण्डुरा प्रावृषायणी AmaK. 821; ऋषभी त्वजहाध्यण्डा कण्डूरा प्रावृषायणी Vaija. 55. 129; कटुकायाम्···कपिकच्छा मह्यगुप्ता कण्डुरा दुरभिग्रहा । अजहा NighS'e. 2185; BhāvPraNi. 60. 131; KoṡaKaTa. i. 4101; KalpaK. 293. 395.

अजहाति (a-jahāti) (Gr.) other than the root *hā* अजहातेरहा: CaturA.(S'au.) 2. 46.

अजहान (a-jahāna) *adj.* not abandoning राज्यं भवतरोर्बीजं ये न जानन्ति तेऽधमा: । तेभ्योऽप्यहं विशिष्ये तदजहानो विदन्नपि TriṡaS'aPuC. i. 5. 752.

अजहित (a-jahita) *adj.* not abandoned अग्निरजहित: प्रैतु प्रथमो यज्ञियानाम् MānS'S. 93. 22.

अजहोमाय (ajahomāya) *m.* name of a king अजहोमायनामासीद्वैरी तस्य महीभृत: RājTa.(Prā.) 510; 512; तत: काश्मीरलोकेन ···। अजहोमायभूपस्य निहतं सर्वसैनिकम् RājTa.(Prā.) 513.

अजह्नु (ajahnu) *m.* name of a king (son of Jahnu) उद्धृता राजवंशेषु ये भूयो भारते हता: । जह्नोरजह्नुस्तनय: MahāBhā. xii. 49. 3.

[1]अजा (aj-ā́) *f.* 1 she-goat; (pl.) collection of goats, males and females 2 name of a metre 3 name of a plant 4 first zodiacal sign 5 A course of the planet Venus over the three constellations Hasta, Viśākhā and Citrā B name of a path in the sky comprehending the three asterisms S'ravaṇa, Dhaniṣṭhā and S'atabhiṣā 6 name of a hall in a two halled building 1 she-goat कर्णगृह्या मघवा शौरदेव्यो वत्सं नस्त्रिभ्य आनयत् । अजां सूरिर्न धातवे R̥V. viii. 70. 15; गामजामविम् । यद्देव किं च प्रतिजग्रहाहम् AV. vi. 71. 1; TaiĀ. ii. 6. 2 (266. 5); द्वौ वा अजायै स्तनौ TaiS. II. i. 1. 6; अजासि रयिष्ठा पृथिव्याः सीद TaiS. III. iv. 2. 2 (Sāy. अजासि जातितश्छागीभवसि); अजा ह्यग्नेरजनिष्ट गर्भात् TaiS. IV. ii. 10. 4; एषा वा अग्नेः प्रिया तनूर्यदजा TaiS. V. i. 6. 2; TaiĀ. v. 2. 13 (598. 5); अङ्गिरस: सुवर्गं लोकं यन्तोऽजायां घर्मं प्रासिञ्चन् TaiS. V. iv. 3. 3; गायत्र्युदपतत्तस्या ज्योतिषा तमस्या अजाभ्यरुन्ध तदजाया अजत्वम् TaiS. VI. i. 6. 3; अजारे पिशङ्गिला VājaS. 23. 56 (Mahīdhara अजा नित्या माया रात्रिर्वा); अग्नीषोमाभ्यामजां तयामृतत्वमशीय PañcBr. i. 8. 6; पुष्ट्यै वा एतद्रूपम् । यदजा TaiBr. I. iii. 7. 8; अजायाः होतव्यम् TaiBr. III. vii. 3. 1; यज्ञस्य शीर्षच्छिन्नस्य शुगुदक्रामत्ततोऽजा समभवत् S'atBr. XIV. i. 2. 13; XIV. i. 2. 25; यदजायै पय: । तद्देवानां पय: TaiĀ. v. 10. 2 (637. 1); iii. 10. 3 (300. 3); v. 2. 4 (594. 4); अजामेकां लोहितशुक्लकृष्णां बह्वीं प्रजां जनयन्तीं सरूपाम् । अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्य: TaiĀ. x. 10. 1 (804. 3); S'vetāU. 4. 5; गामनुस्तरणीमजां वा रोहिणीं दक्षिणामुखीं प्रोक्ष्य S'āṅkhāS'S. iv. 14. 13; यदि ··· अग्निमैथ्यमानो न जायेत ··· अजायै दक्षिणे कर्णे होतव्यम् ĀpaS'S. ix. 3. 5; अनुनयन्त्यजां पुंश्छगलाम् ĀpaS'S. xv. 1. 6; xxii. 6. 7; पुंवन्मिथुनान्यन्यत्राजाभ्य: LāṭyāS'S. ii. 7. 17; (नित्यमभोज्यम्) गोश्च क्षीरमनिर्दशाहाया: सूतके । अजामहिष्योश्च GautDS. ii. 8. 23; VāsiDS. 14. 35; अजोक्षा चन्दनम् ···। गृहे स्थापयितव्यानि MahāBhā. v. 40. 9; xii. 189*(1); HariVaṁ. 116. 29; Rāmā. v. 15. 14; अजां नयति ग्रामम् MahāBh. i. 335. 13 (*on* P. i. 4. 51); VyutpaVā. 121. 3; अजा गावो महिष्यश्च अमेध्यं भक्षयन्ति या: । दुग्धं हव्ये च कव्ये च गोमयं न विलेपयेत् AtriS. 301; प्रसूता ब्राह्मणी गौश्च महिष्योऽजास्तथैव च । दशरात्रेण शुद्ध्यन्ति BṛParāSm. 6. 319; 8. 239; 10. 209; सर्पिष्यजाविमहिषीक्षीरवत् स्वानि निर्दिशेत् CaraS. i. 27. 234 (1941 Ed.); अजाक्षीरं पिबेन्नान्यदजाभिश्च वसेत् सह । अधस्तादवटेऽजानां वसन् शोषी विमुच्यते KāśyaS. 109B. 30; अजानाम् ··· लघु दोषहरं पय: KāśyaS. 356A. 6 192A. 6; BhelaS. 1. 5 (5. 12); अजाभिघातने चैव अधिकाङ्ग: प्रजायते । अजा तेन प्रदातव्या S'ātāSm. 2. 61; अजा वदति गान्धारे MāṇḍūS'i. 1. 9; S'ārṅgaPa. 2047; मुखतोऽजा: स सृष्टवान् ViṣṇuP. i. 5. 48; BrahmāṇḍP. i. 8. 43; LiṅgaP. i. 70. 237; वस्त:···। ददर्श कूपे पतितां स्वकर्मवशगामजाम् BhāgP. ix. 19. 3; गवां च महिषीणां च वर्जयित्वा तथाप्यजाम् । सर्वक्षीराणि वर्ज्यानि AgniP. 168. 19 =

VisṇuDhaP. ii. 73.36; NyāyBh. 67.21 (*on* i. 2.12); PadmP. (Ra.) 41.128; अजाश्वानखरोष्ट्राणां मार्जनात्तुपरेणुकान् । संस्पृशेद्यदि मूर्धात्मा श्रियं हन्ति हरेरपि LiṅgaP. i. 85.153; लोके यदृच्छया काचिदजा रोहितशुक्लवर्णा स्यात् BrahmSūBh.(S'aṅ.) 243.12 (*on* i. 4.10); वसागुणायामजायां प्रकृतायाम् BrahmSūBh.(Bhā.) 28.17 (*on* i. 1.19); यद्यजा संस्कार्या ततः सा प्रधानम् ṬupṬ. 11.1 (*on* iv. 1.23); ManuBh. i. 422.24 (*on* 5.8); चतसृभिरजाभिरेका धेनुः ··· लभ्यते Tantrākhyā. 132.7; PañcT. 5.2 (399.6); Pañcā. 276.7; शुंशुमारो मृतिं प्राप्य जाताजा पाणपाटके BṛKathāK. 73.75; हीनसेवा न कर्तव्या कर्तव्यो महदाश्रयः । पयोऽपि शौण्डिनीहस्ते वारुणीत्यभिधीयते (v. l. अजा सिंहप्रसादेन वने चरति निर्भयात्) Hitopa. 3.11; अजा परेषां विनिहन्ति वातं स्वयं तु वातेन हि सा म्रियेत YaśasCam. ii. 123.4; ii. 219.2; ग्रामत्रयं क्षेत्रमजासहस्रं प्रभूतराशिर्लभते स भूपात् EI. xxiii. 170.63; xxiii. 170.69; व्यालाः षोडश निर्दिष्टा हरिणो गृध्रकः शुकः । कुक्कुटः सिंहशार्दूलवृकाजागण्डकोगजाः SamarāSū. 75.27; द्विपद्धयस्त्र्यस्यसि कथं वृकयूथादजा यथा KicaVa. 4.19; सः ··· वृक्को न्वजाः शताज्याम् ।···महर्षीन्···जगाम पश्यन् DvyāśraKā. 4.41; स्त्रीणां समाजे समजे न्वजानां विवाय दृष्टिं स वशी न जातु (कर्णः) DvyāśraKā. 10.9; अजा इव प्रजा मोहाद् यो हन्यात् पृथिवीपतिः Pañcā. 41.10; S'ārṅgaPa. 1290; अजामहिष्योरपि पीयूषमपेयम् SmṛtiCan. v. 235.3; v. 235.20; ManvaVi. 590. 25 (*on* 5.8); बद्धपाणिपद्द्वन्द्वां सूनानीतामजामिव (अद्राक्षीदबलाम्) MalliC. 1.51; सानीताजा वृकैरिव MalliC. 7.188; PārśvC. 2.1018; SamarāSam. 4.437; PrabaCin. 69.31; KumāCaSam. 12.30; 100.4; अजायाश्च स्निग्धवृष्यादिभोजनम् । सद्यो वह्निकरम् RaseCin. 8.23 (84.3); 9.37 (125.6); अजया क्रीणाति इति वस्त्रादीनां क्रयसाधनत्वात् NyāyMāVi. 113.24 (*on* iii. 1.6); पक्ष्यङ्गे दारिते राज्ञाजगरो निरगात्ततः । अजा Dhūrtā. 98; एकेनाजा कर्णयोर्धृता परेण मारिता । ततः साजेयं नारी PurāPraSam. 130.3; 33.17; अजामहिष्योरपि दशाहमध्ये प्रतिषेधः (दुग्धस्य) ManvaMu. 194.24 (*on* 5.8); अजाया उदरे लिण्डीः को बन्धयति RatnaCūKa. 290; अजाल्पदोग्ध्री AṇuBh. 105.24 (*on* i. 4.9); SiddhāKau. 110A.2; VaiyāBhū. 43.13 (*on* 8); LaS'abdeS'e. i. 370.8; i. 525.25; अजामार्जारमूषाश्च (नक्षत्रयोनयः) TantrRā. 21.79; AmaK. 1858; ParyāRaMā. 1.756; Vaija. 70.63; AbhidhāCin. 1275; DhanvNi. 236.26; MadaPāNi. 74.20; ParaNā. 1210; KośaKaTa. 1.6794; KalpaK. 185.468; (pl.) collection of goats consisting of males and females ग्राम्याणां पशूनां संघाः । एतेषु सह विवक्षायां स्त्री शिष्यते ··· अजा इमाः KāśiVṛ. *on* P. i. 2.73; **2** name of a metre गौश्छन्दोऽजा छन्दोऽश्वश्छन्दः TaiS. IV. iii. 7.1; VājaS. 14.19; **3** name of a plant अजास्तनाभकन्दा तु सक्षीरा क्षुपरूपिणी । अजा महौषधी ज्ञेया शङ्खकुन्देन्दुपाण्डुरा SuśruS. iv. 30.18; iv. 30.5; अजानामौषधिरजशृङ्गीति विज्ञायते CaraS. vi. 1(4).7 (1941 Ed.); VisṇuDhaP. ii. 52.30; ii. 161.23; RasRaSa. 25.61; चन्द्राह्वाजा कृष्णफला KalpaK. 302.475; 316.598; **4** first zodiacal sign अजा क्रिया छागबस्तौ तूबरा विश्वभेषजी । मेषमाद्या क्रिया प्रोक्ता छागी वागीरयस्तथा JyotiṣaNi. RāśiNi. 1; **5A** course of the planet Venus over the three constellations Hasta, Viśākhā and Citrā हस्तविशाखात्वाष्ट्राण्यजा (वीथी शुक्रचारे) BṛSam. 9.3; **5B** name of a path in the sky comprehending the three asterisms S'ravaṇa, Dhaniṣṭhā and S'atabhiṣā प्रत्येकमश्विन्यादित्रिनक्षत्रा नागाद्या नव वीथयः । नागा गजा ऐरावती ऋषभा गौर्जरद्गवी मृगी अजा दहनेति Aparā. 1017.18 (*on* 3.187); **6** name of a hall in a two-halled building महिष्यजाभ्यामुद्वेगकरी चुल्ली धनापहा SamarāSū. 22.9.

²अजा (a–jā) *f.* [mostly a reinterpretation of ¹ajā́] **1A** primordial matter (consisting of the three Guṇas), Prakṛti **B** primordial matter (consisting of the three elements of fire, water and earth) **C** primordial matter (closely associated with Brahman) **2A** primordial nescience **B** extraordinary or miraculous power of a personal god **3** name of a divine cow **4** a barren woman **5** name of S'ivā **6** name of a woman created by Brahman (*m*) **7** name of Kṛṣṇa's sister **8** name of a river **1A** primordial matter (consisting of three Guṇas Sattva, Rajas and Tamas), Prakṛti ज्ञाज्ञौ द्वावजावीशनीशावजा ह्येका भोक्तृभोगार्थयुक्ता । अनन्तश्चात्मा विश्वरूपो ह्यकर्ता त्रयं यदा विन्दते ब्रह्ममेतत् S'vetāU. 1.9; VāyuP. i. 20.27; अजा प्रकृतिर्न जायत इत्यजा S'vetāUBh. 103.21 (*on* 1.9); BrahmSūBh.(S'aṅ.) 240.16 (*on* i. 4.8); SāṁkhyaTaKau. 2.1; प्रकृतिरेवाजा जन्माभावात् NyāySu.(Ja.) 192B.5 (*on* i. 4.1); मायातीतस्य परमात्मनः सकाशादजा गुणत्रयमयी किल अजायत S'aṅkaVi.(Ā.) 71.17; मायाजा प्रकृतिः प्रसूः KośaKaTa. 1.31; **1B** primordial matter (consisting of the three elements fire, water and earth) परमेश्वरादुत्पन्ना ज्योतिःप्रमुखा तेजोऽबन्नलक्षणा चतुर्विधस्य भूतग्रामस्य प्रकृतिभूतेयमजा प्रतिपत्तव्या BrahmSūBh.(S'aṅ.) 242.4 (*on* i. 4.9); **1C** primordial matter (closely associated with Brahman) अजा ब्रह्मात्मिकेति निश्चीयते BrahmSūBh.(Rā.) 354.9 (*on* i. 4.9); ब्रह्मकारणिकेयमजा VedāntSā.(Rā.) 121.7 (*on* i. 4.9); ब्रह्मकारणिकैवैषाजा । तथाह्यधीयत एके । यथारूपोऽयमजायाः प्रतिपादको मन्त्रस्तथारूपमेव मन्त्रं ब्रह्मात्मिकायास्तस्याः प्रतिपादकमधीयत एके शाखिनः VedāntDī. 68.14 (*on* i. 4.9); मन्त्रोक्ताजा ब्रह्मात्मिका अस्तु VedāntPāSau. 122.22 (*on* i. 4.8); ब्रह्मात्मिकाजा त्वजामन्त्रे पूर्वापरवाक्यवशात् प्रतिपत्तव्या VedāntKau. 124.2 (*on* i. 4.9); **2A** primordial nescience (sometimes taken as Māyā and sometimes as Avidyā) श्वेताश्वतरेऽपि पूर्वापरपर्यालोचनया मायैवाजा प्रतीयते PrakaVi. 339.15; अप्राणं शुद्धमेकं समभवदथ तन्मायया कर्तृसंज्ञं तस्मादन्यच्च नासीत्परिवृतमजया जीवभूतं तदेव S'atS'lo. 24; 27; अजा परेशस्य जगद्विमोहिनी विवेकिनामप्यपहन्ति संविदम् S'aṅkaVi.(Ā.) 276.3; **2B** extraordinary or miraculous power of a personal god त्वं देव शक्त्यां गुणकर्मयोनौ रेतस्त्वजायां कविमादधेऽजः BhāgP. iii. 5.49; कालो देशः क्रिया कर्ता करणं कार्यमागमः । द्रव्यं फलमिति ब्रह्मन्नवधोक्तोऽजया हरिः BhāgP. xii. 11.31; स्वसृष्टमिदमापीय शयानं सह शक्तिभिः । तदन्ते बोधयांचक्रुस्तल्लिङ्गैः श्रुतयः परम् ··· । जय जय जह्यजामजितदोषगृहीतगुणाम् BhāgP. x. 87.14; ब्रह्मोवाच– कर्ता न चाहं जगतो भवन्तो विमोहिता दुस्तरयाजया BṛBrahmaS. i. 1.8; शिवेन दृष्टा प्रकृतिः शैवी समभवद्द्विजाः । बिश्वधात्री त्वजाख्या च LiṅgaP. i. 3.13; विष्णुर्जग्राह तं शापं प्रशंसन् शांभवीमजाम् S'ivaP. ii(1). 4.18 (40B.16); iii. 8.15 (303B.2); प्रलयकाले नामरूपे विहायाचिद्वस्तुरूपा मायापि सूक्ष्मरूपेण महेश्वरस्य शरीरतया तिष्ठतीत्यजा सृष्टिसमये नामरूपोपेता तत्करणिका BrahmSūBh.(S'rī.) i. 524.2 (*on* i. 4.10); **3** name of a divine cow सुरभिः ··· । सुषुवे चरमं भूयो दिव्या गोमातरः शुभाः । ···अजाम् ···धेनुम् MahāBhā. xiii. App. I. 8 (48); **4** a barren woman रेतःक्षयकरी वन्ध्या अजास्ताः परिकीर्तिताः AṅgiSm. 124; **5** name of S'ivā अव्यात्···अजा त्वथ पृष्ठदेशम् SkandP. iv. 72.61; मेनका देवी ··· मेने शिवां मूलरूपामजां शिवशिवामिति BṛDharmP. i. 53.6; **6** name of a woman created by Brahman (*m.*) ब्रह्मोवाच – अहं प्रमदारूपं मायया सृज्य नारद । ···प्रादामृषिभ्यः प्रमदां मुने । ··· अजैका या समाख्याता कृष्णलोहितरूपिणी । मुक्तकेशीत्यभिधया सास्तेऽद्यापि BrahmP. 134.6; **7** name of Kṛṣṇa's sister अयं त्वदनुजामजामुपलपट्टके पिष्टवान् Nārāy. x. 39.4; **8** name of a river पयोष्ण्यजा भारती स्यात् Kalpak. 348.45.

अजांश (ajāṁśa) *m.* middle or central part or division (of the ground plan) युग्मायुग्मपदेषु द्व्येकत्रिभिरंशकैरजांशाः स्युः MayaMa. 10.53.

अजाकण्ठ (ajā–kaṇṭha) *m.* neck of a she-goat अङ्गी मणिरजाकण्ठस्तने Vaija. 235.62; AnekāTi. 2.235; KośaKaTa. 2.4866.

अजाकरीष (ajā–karīṣa) *m.n.* dung of a she-goat अजाकरीषस्यैवैते गुणाः सम्यक्प्रकीर्तिताः Hastyāyur. 300.3 (2.60); 636.22 (4.14)

अजाकर्ण (ajā–karṇa) *m.* **1** ear of a she-goat अश्वभावे अजाकर्णेऽश्वकर्णे वा गोष्ठे वा सलिलान्तिके (श्राद्धं कार्यम्) MatsyaP. 15.34; PadmP. v. 9.60; **2** kind of Sāla tree राजकद्रुरजाकर्णः S'abdaRa.(Vā.) 919.

अजाकारपरिकल्पना (ajākāra–parikalpanā) *f.* metaphor of a she-goat तेजोऽबन्नेषु अजाकारपरिकल्पनोपदेशादजाशब्दप्रयोगो न विरुध्यते PrakaVi. 340.17.

¹अजाकृति (aj–ākṛti) *f.* vowel-class, genus of vowels सिद्धमजाकृतिनिर्देशात् Vār. 3 (*on* P. i. 1.73); MahāBh. i. 189.18 (*on* i. 1.73); Pradī. v. 311B.1 (*on* vi. 4.47)

²अजाकृति (ajākṛti) *f.* she-goats as a class यावता न तावत् तेजोऽबन्नेषु अजाकृतिरस्ति BrahmSūBh.(S'aṅ.) 243.4 (*on* i. 4.10); 243.9 (*on* i. 4.10); अजाकृतिर्जातिस्तेजोऽबन्नेषु नास्ति Bhām. 293.20 (*on* i. 4.10)

अजाकृपाणीय (ajākṛpāṇ–īya) *adj.* like the she-goat and the sword (in the fable) इदं तर्हि । काकतालीयम् अजाकृपाणीयम् । अत्रापि येनैवावयवकार्ये प्रत्ययोत्पत्तिः क्रियते तेनैव समुदायकार्ये समाससंज्ञा भविष्यति । समासाच्च तद्विषयात् इति MahāBh. i. 377.13 (*on* ii. 1.3); CāndraVṛ. *on* iv. 3.83; KāśiVṛ. *on* v. 3.106; JaineVyā. 46.36 (*on* i. 8.3); 266.13 (*on* iv. 1.160); तदजाकृपाणीयं यः परेषु विश्वासः NītiVā. 10.40; S'ṛṅgāPra. 46.8; DvyāśraKā. 18.32; यथाजया भूमिं खनन्त्यात्मवधाय कृपाणो दर्शितस्तत्तुल्यं वृत्तं केनचिदात्मवधाय कृतम् । अजाकृपाणीयम् GaṇRa. 3.196 (239); KhaṇḍanKhā. 384.1; S'āliC. 5.125; KośaKaTa. 1.103; SiddhāKau. 318A.21; रघुकौत्सीयमित्यस्य काकतालीयम् अजाकृपाणीयम् इत्यादिवन्निष्पत्तिः AlaṅkāMañ. 8.16; NyāySu.(Ja.) 250A.3 (*on* ii. 1.2)

अजाक्षि (ajākṣi) *n.* goat's eye अजीव इति किम् । अजाक्षि JaineVyā. 277.28 (*on* iv. 2.72)

अजाक्षी (ajākṣī) *f.* **1** *Ficus hispida* अजाक्षी फल्गुनी चैव ··· काकोदुम्बरिका RājNi. 187.15; AṣṭāNi. [JOR. 38] 28.15; **2** name of a plant

अजाक्षी लोमपर्णी च AṣṭāNi. [JOR. 38] 31. 7.

अजाक्षीर (ajā-kṣīrá) *n.* goat's milk अथाजाक्षीरम् S'atBr. XIV. i. 2. 13; अर्कक्षीरमजाक्षीर आश्चोत्य प्रचरेत् BhārS'S. xi. 18. 11; ĀpaS'S. xv. 18. 10; xvi. 6. 1; xix. 12. 24; पाययेत्। अजाक्षीरं वार्धतैलम् SuśruS. iv. 5. 7; vi. 17. 90; CaraS. i. 1. 106 (1941 Ed.); BhelaS. 236. 8 (7. 8); स्त्रीविवक्षायां तु कुक्कुट्यण्डादिभिर्भवितव्यमेव ··· अजाक्षीरम् CāndraVṛ. *on* v. 2. 41; अजाक्षीरं पिबेत् KāśyaS. 109B. 30; 161A. 9; HārīS. iii. 9. 33; AṣṭāSaṁ. i. 48. 17 (1. 8); ii. 235. 7 (6. 16); माक्षिकं सैन्धवं शङ्खं तगरीं पिप्पलीं सिह्लाम्। अजाक्षीरेण संपेष्य गुलिकां कारयेद्भिषक् ViṣṇuDhaP. ii. 43. 5 SiddhYo. 4. 26; 9. 36; 39. 7; 61. 156; कालेयं लवणं लाक्षामजाक्षीरेण साधयेत् AśvaVai. 38. 8; Hastyāyur. 125. 25 (1. 17); 143. 18 (1. 18); ईषन्मधुरमजाक्षीरम् S'astrDī. 154. 14 (*on* i. 1. 7); S'ārṅgaS. iii. 13. 116; ĪśānS'iPa. i. 40. 144; i. 50. 13(1); ताम्रमजाक्षीरेण ···मारयेत् Rasā. 7. 148; 12. 217; RasRaSa. 17. 13; 29. 91; S'ārṅgaPa. 2970; अजाक्षीरेण टङ्कणम्। पिष्ट्वा RaseCin. 9. 109 (163. 21); 9. 176 (196. 6); 9. 184 (199. 9); AnaṅgaRa. 6. 05; (साधकः) होमादिष्टमवाप्नुयात्। अजाक्षीरयुतैस्तैश्च TantrRā. 32. 19.

अजागन्ध (ajā-gandha) *m.* name of a holy place अजागन्धे (तीर्थे) नरः स्नात्वा दृष्ट्वा ब्रह्मेश्वरं शिवम्। ब्रह्महत्यासमं पापं तत्क्षणात्संव्यपोहति SkandP. v(1). 28. 45.

अजागन्धि (ajā-gandhi) *m.* name of S'iva (जनाः) विदुः ··· पुष्करे तु ह्यजागन्धिम् (शिवम्) SkandP. iv. 109. 6.

अजागमन (ajā-gamana) *n.* sexual intercourse with a she-goat अथ महिषीवस्ताजागमनप्रायश्चित्तम् CaturCin. iv(1). 352. 1.

अजागर (ajāgara) *m.* name of the plant, *Eclipta alba* भृङ्गराजवृक्षः। इति शब्दरत्नावली [S'abdaKaDru.]; *adj.* not awake, not wakeful [PW]

अजागरण (a-jāgaraṇa) *n.* not keeping alive, not keeping burning तस्मादनित्यविशेषे दक्षिणाग्नावेवावतिष्ठते। तस्य चानित्यत्वं नित्यमजागरणात् KāśiVṛ. *on* P. iii. 1. 127 (PadMañ. सततमज्वलनादित्यर्थः। ज्वलनमेव हि तस्य जागरणम्)

अजागरयत् (a-jāgarayat) *adj.* not awakening, who does not awaken अतिस्वच्छन्दशायिनीम्। तामजागरयन्नूचे नीचकैर्नैषधापतिः PāṇḍaC. 6. 385.

अजागरूक (a-jāgarūka) *adj.* not vigilant, not attentive, not capable of apprehending, not conspicuous उक्तं चाजागरूकस्य मन्दबुद्धेः सुखात्मनः। ग्रन्थभीरोश्च सिध्यन्ति न शास्त्राणि तपांसि च BṛKathāS'loSaṁ. 7. 60; तथापि पूर्वमयं नासीत् पश्चाच्च न भविष्यतीत्यत्र प्रत्यक्षमजागरूकं पूर्वापरकालताग्रहणात् NyāyKa. 81. 24; ĀtmaTaVi. 55. 3; पारम्पर्येण साक्षाच्च तदेतत्प्रतिपद्यते। कवेरजागरूकस्य रसभङ्गनिमित्तताम् VyaktiVi. 32. 14; जागरूकाजागरूकगुणीभूतव्यङ्ग्ययोः प्रविष्टं निखिलमलंकारप्रधानं काव्यम् RasGaṅ. 23. 4.

अजागरूकत्व (ajāgarūka-tva) *n.* the state of being not capable, incapacity तस्य सादृश्यमात्रविषयतया व्याप्तिज्ञप्तावजागरूकत्वात् TattvPradī(Ci.) 244. 9.

अजागर्ति (ajāgarti) *adj.* (w. r. for अजागर्त?) BaudhPiMe. i. 6. 1; ĀgniveGS. iii. 5. 5 (144. 4)

अजागर्भिणी (ajā-garbhiṇī) *f.* [DEBRU. p. 332] pregnant she-goat चतुष्पाद्वाच्चिनः सुबन्ता गर्भिणीशब्देन समस्यन्ते, तत्पुरुषश्च समासो भवति। गोगर्भिणी। अजागर्भिणी KāśiVṛ. *on* ii. 1. 71; Prasā. i. 535. 14.

अजागल (ajā-gala) *m.* goat's tessels (*lit.* goat's neck) (*fig.* something useless) अजागलस्य यज्जन्म तज्जन्म श्रुतिचोदितम् DevīBhāP. xi. 23. 18.

अजागलकुच (ajāgala-kuca) *m.* fleshy protuberence on the neck of a she-goat (*fig.* something useless) स्वाम्युक्ते यो न यतते स भृत्यो भृत्यपाशकः। तज्जीवनमपि व्यर्थमजागलकुचाविव BhojPra. 5. 8.

अजागलस्तन (ajāgala-stana) *m.* **1** tessels on the neck of she-goat धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते। अजागलस्तनस्येव तस्य जन्म निरर्थकम् S'atTrayī. 544 = CāṇaNīDa. 13. 10 = VetāPañ.(S'i.) 58. 2; प्रजां न रञ्जयेद्यस्तु राजा रक्षादिभिर्गुणैः। अजागलस्तनस्येव तस्य नाम निरर्थकम् Tantrākhyā. 120. 2 = PañcT. 3. 114 (367. 5); Pañcā. 226. 28; SūktiRa. 40. 6; S'ārṅgaPa. 1289; Subhāṣi. 2841; न कश्चिदुपयोगोऽत्र कामानां विद्यते स्थितौ। अजागलस्तनस्येव प्रमाणाद्बन्धमोक्षयोः BṛĀraUBhVā. iv. 4. 457; अजागलस्तनस्येव प्रपञ्चोऽयं निरर्थकः SkandP. i(1). 31. 75; तृतीये त्वजागलस्तनकल्पः कायः नोपयुक्तांशविवेचने स्वं निवेशयति ĀtmaTaVi. 850. 3; BhaviP. 24B. 6 (i. 6. 22); SaurP. 2. 36; जडस्य ··· अजागलस्तनवदप्राधान्यप्रसङ्गात् VedāntKau. 224. 1 (*on* ii. 3. 18); अजागलस्तनसमवस्थं तव गमनागमनम् Jīvān. 106. 4; **2** (fig.) thing or person that is good for nothing, useless entity अदृष्टान्नियमे नित्ययत्नोऽत्राजागलस्तनः NyāySiA. 230. 16; S'atDū. 145. 39; ParamāKā. 90. 21; TrikāS'e. iii. 3. 136; AnekāSaṁ. 2. 148.

अजागलस्तनन्याय (ajāgalastana-nyāya) *m.* maxim of the tessels of a she-goat (i. e. uselessness of a thing) रसाद्युपकारमात्रेणालंकारत्वं मुख्यतो रूपकादौ तु वाच्याद्युपधानम् अजागलस्तनन्यायेन इति SāhiDa. 621. 11.

अजागलस्तनायमान (ajāgalastanāyamāna) *adj.* behaving like the tessels on the neck of a she-goat कृतमनुमानेनाजागलस्तनायमानेन विरुद्धधर्माध्यासेन TattvPradī.(Ci.) 213. 7; 324. 11; किमनेनाजागलस्तनायमानेन (ध्वनिना) Ekāva. 1. 13 (18) (25. 7); S'atDū. 163. 8; S'ivārkaMaDī. i. 92. 9 (*on* i. 1. 1); SiddhāLeSaṁ. 208. 8; कृत इति पदस्याजागलस्तनायमानत्वापत्तेः BālamBha. i. 71. 28 (*on* i. 14)

अजागलस्तनायितत्व (ajāgalastanāyita-tva) *n.* the state of becoming like the tessels on the neck of a she-goat अतोऽङ्गीकृतस्यापि शिवस्याजागलस्तनायितत्वेनात्राप्युत्पत्त्यसंभव एव NyāySu.(Ja.) 424A. 2 (*on* ii. 2. 12)

अजागलस्थस्तन (ajāgalastha-stana) *m.* tessels on the neck of a she-goat तेनात्माजागलस्थस्तन इव TattvMu. 2. 4.

अजागव (ajāgava) *n.* S'iva's bow जटाजूटः कपर्दः स्यात्···। अजागवमजगवं धनुः ParyāS'aRa. 1. 56; DvirūK.(Ha.) 180. cf. **अजगव.**

अजागृह (ajā-gṛha) *n.* name of a holy place अजारूपाः प्रयान्ति स्म व्याधयः सकला द्विजाः ··· ततस्तदाश्रयात्स्थानमजागृहमिति स्मृतम् SkandP. vi. 133. 3; अजागृहे नवनिधिः पार्श्वनाथः TīrthaKa. 86. 10.

अजागृहा (ajā-gṛhā) *f.* name of a deity तथान्यापि च तत्रास्ति देवता द्विजसत्तमाः। अजागृहेति विख्याता सर्वरोगक्षयावहा SkandP. vi. 133. 1.

अजागोष्ठ (ajā-goṣṭha) *n.* fold or enclosure for she-goats गवां स्थानं गोगोष्ठम्। महिषीगोष्ठम्। अजागोष्ठम् JaineVyā. 241. 12 (*on* iii. 4. 150)

अजाग्रत् (a-jāgrat) *adj.* in an unwakeful state तं वा एतमात्मानम् ··· स्वप्नेऽजाग्रतमसुषुप्तं सुषुप्तेऽजाग्रतमस्वप्नं तुरीयेऽजाग्रतमस्वप्नमसुषुप्तम् Nṛsiṁho-TāU. 2; (यथासवो जाग्रति सुप्तशक्तयः) यद्वा अजाग्रति सुषुप्तावसवः सुप्ताः शक्तयः येषां ते Bhāvārthadīpikā *on* BhāgP. iv. 31. 16.

अजाग्रत्स्वप्ननिद्र (a-jāgratsvapnanidra) *adj.* without the states of waking, dreaming and deep sleep अजाग्रत्स्वप्ननिद्रस्य यत्ते रूपं सनातनम् YogVā. iii. 121. 55; MahāU. 5 (50)

अजाघन (ajāghana) *m.* name of a species of horses शक्त्या चैव जवेनापि रणशूरस्त्वजाघनः AśvaVai. 6. 14.

अजाघात (ajā-ghāta) *m.* name of a mode of attack or stroke in fighting (*lit.* goat's attack) वदनं तिर्यगुन्नम्य प्रहारस्त्वजघातनम्। प्र(अ)जाघाते तु वदनात्ति(नन्ति)र्यगुन्नम्य घातयेत् Mānaso. iv. 3. 649.

अजाघृत (ajā-ghṛta) *n.* clarified butter from goat's milk सर्पनिर्मोकवानररोमकुक्कुटमेदोभिरजाघृतसंयुक्तैर्दीपयेत् Hastyāyur. 65. 15 (1. 9); अजाघृताक्तैर्बन्धूककुसुमैर्मध्यरात्रके। हवनाद्वनिताः सर्वा मोहयेत् TantrRā. 22. 37.

अजाघ्राता (ajāghrātā) *adj.* (*f.*) smelt or sniffed by a goat निशां प्राप्य तु तां योनिमजाघ्रातां तु कारयेत् ĀpaSm. 7. 6.

अजाङ्कण (ajāṅkaṇa) *adj.* having a court-yard at the place of Brahman (i. e. at the centre) षडाननसमोपेतं सप्रच्छन्नमजाङ्कणम्। एकानेकतलोपेतं प्रासादवदलङ्कृतम्। द्वारादि पूर्ववन्मेरुकान्तं नामाग्रजीविनाम् MayaMa. 26. 57.

अजाङ्ग (ajāṅga) *n.* goat's limb or organ न गजाङ्गैरजः सिध्येन्नाजाङ्गैर्वा गजो भवेत् ĪśānS'iPa. ii. 1. 52; अवेरङ्गानि सहसा पच्यन्ते, अजाङ्गानि तु विलम्बेन NyāyMāVi. 659. 18 (*on* xi. 4. 11)

अजाङ्गल (a-jāṅgala) *n.* (meat of the animal) other than that of the wild one पिष्टान्नमम्लं लवणानि मद्यं मृदं दिवास्वप्नमजाङ्गलं च।···शोफं जिघांसुः परिवर्जयेत्तु SuśruS. iv. 23. 13; SiddhYo. 39. 40; RasRaSa. 28. 71; सक्तुक्षीरमजाङ्गलानि सितया शालिं रसं मांसजम् ···सेवेतोष्णदिने BhāvPra.(Bhā.) 5. 355.

अजाङ्घिकता (ajāṅghika-tā) *f.* the nature of not being quick of foot नीयमानः स हि स्कन्धमधिरोप्यानुजीविभिः। अजाङ्घिकतया मार्गोल्लङ्घनाय स निःसहः RājTa.(Ka.) 8. 2276.

अजाङ्घ्रि (ajāṅghri) *m.* **1A** deity of the constellation Pūrvā Bhādrapadā वसवो वरुणोऽप्यजांघ्रिः। भगणस्य तु देवतामी(?) ĪśānS'iPa. i. 4. 28; **1B** constellation Pūrvā Bhādrapadā त्वा(?त्व)ष्ट्रजाङ्घ्रयोर्हुताशविष्ण्वोः···विवाहे ··· वैरं सर्वदावर्जनीयम् VasiS. 32. 204; **2** foot of Viṣṇu अजाङ्घ्रिनिर्दत्तरजश्चयापि ··· गङ्गा कुसङ्गापि पुनाति लोकान् SūktiMu. 105. 4; **3** goat's foot, SūktiMu. 105. 4.

अजाङ्घ्रिज (ajāṅghri-ja) *adj.* (comet) born under the constellation Pūrvā Bhādrapadā (केतुः) हन्यात्···अजाङ्घ्रिजश्च पाञ्चालान् VasiS. 10. 48.

अजाङ्घ्रित्रितय (ajāṅghri-tritaya) *n.* group of three constellations beginning with Pūrvā Bhādrapadā क्रमादजाङ्घ्रित्रितयं च शिष्टं त्रैवर्णिकानां

निखिलानि भानि VasiS. 32.210.

अजाङ्घ्रिधिष्ण्य (ajāṅghri–dhiṣṇya) *n.* the constellation Pūrvā Bhādrapadā नेयाद्याम्यदिशं त्वजाङ्घ्रिधिष्ण्ये VasiS. 37.27.

अजाङ्घ्रिभ (ajāṅghri–bha) *n.* the constellation Pūrvā Bhādrapadā शिल्पकार्येषु कुशलाजाङ्घ्रिभे प्रथमार्तवा NāraS. 15.27.

अजाज (ajā–ja) *adj.* coming from a she-goat अजाजं तु मधुरं कषायं च त्रिदोषनुत् । नवनीतम् BhojanKu. 148.1.

अजाजाति (ajā–jāti) *f.* the generic quality of a she-goat तेजोऽबन्नेषु तावदजाजातिर्नास्ति PrakaVi. 339 23.

अजाजि (ajāji) *f.* cf. **अजाजी**, *Cuminum cyminum*, cumin seed (it refers to the white variety) इक्षवो रसराजाश्च निष्पावाजाजिधान्यकम् MatsyaP. 60.8; 62.9; 62.28; 279.9; शिग्रुसुमुखमरिचाजाजिचित्रककल्कक्षीरगोमूत्रसिद्धेन वा कटुतैलेनानुवासयेत् AṣṭāSaṁ. i. 211.22 (2.3); ii. 101.15 (4.17); KalyāKā. 10.9; अजाजिपाठाघनपञ्चकोलव्याघ्रीरजन्यः सुखतोयपीताः । शोथम् ··· निघ्नन्ति SiddhYo. 39.5; 61.27; Hastyāyūr. 118.17 (1.16); 238.4 (2.32); S'ārṅgaPa. 1710; VīraMi.(Rājanīti.) 393.25; धान्यकाजाजिसैन्धवम् । ···एतत्कल्कं समं मिश्रं पक्त्वा तक्रं सपिण्डकम् BhojanKu. 41.3; 142.6; DhanvNi. 303.2; **ii** *Nigella indica*, black cumin seed जीरको जरणो ह्यचोऽजाजिः कृष्णे तु जीरके S'abdaRa.(Vā.) 1289.

अजाजिक (ajāji–ka) *m. Cuminum cyminum*, cumin seed cf. **अजाजि,** जीरकः···। अजाजिकः RājNi. 83.2.

अजाजिन (ajājina) *n.* goat's skin कुण्डमजाजिनं पललपिण्डः MahāBh. i. 39.9 (*on* P. i. 1.1); यथा दश दाडिमानि, षडपूपाः कुण्डम् अजाजिनम् NyāyBh. 336.20 (*on* v. 2.10); NyāyMañ. ii. 199.10; NyāySā. 25.10; सर्वथाप्यसंभवदन्वयम् । यथा कुण्डमजाजिनं फलं पिण्ड इति TārkiRa. 338.11.

अजाजिलवणान्वित (ajājilavaṇānvita) *adj.* having cumin seed and salt (mixed with it) सर्वकालेषु तच्छस्तमजाजिलवणान्वितम् (तक्रम्) HārīS. i. 8.64.

अजाजिशुष्क (ajāji–śuṣka) *n.* dry *Cuminum cyminum* यवान्यजाजिशुष्कं च ··· तथा हिङ्गु हरीतकी । ··· पेषयेत् BhelaS. 155.6 (6.10)

अजाजी (ajājī) *f.* cf. **अजाजि, 1 i** *Cuminum cyminum*, cumin seed (it refers to the white variety) अजाजीं चाजगन्धां च दद्याच्छीर्षविरेचने CaraS. i. 2.2 (1922 Ed.); मोदकान् । कारयेन्मरिचाजाजीपलचूर्णावचूर्णितान् CaraS. vi. 11.74 (1941 Ed.); i. 27.304 (1922 Ed.); vi. 5.69 (1941 Ed.); vi. 12.55 (1941 Ed.); vi. 26.22 (1941 Ed.); हिङ्गुसौवर्चलाजाजीविडदाडिमदीप्यकैः SuśruS. vi. 42.27; BhelaS. 137.12 (6.5); 199.15 (6.23); ArthS'ā. i. 234.1 (2.15); बिल्वाजाजीरजनिसुरसा पथ्यया सैन्धवं च । पिष्ट्वा चैतत्समगविष्ठतं पाचयेत् ··· हरति गुदजान्वातरोगाश्मरीं च HārīS. iii. 11.65; KāśyaS. 138A.9; कारवीकुञ्चिकाजाजीकवरीधान्यतुंबरु ।···कफवातजित् AṣṭāSaṁ. i. 78.4 (1.12); i. 126.12 (1.24); अजाज्याः सगुडं कल्कम् ··· पिबेद्वा मधुसंयुतम् AṣṭāSaṁ. ii. 12.7 (4.2); प्रातराहारकाले च युञ्जीत मुखधावनम् । बिडं सौवर्चलं कुष्ट(? ष्ठ)मजाजी मरिचं सिता AṣṭāSaṁ. ii. 40.14 (4.7); ii. 71.24 (4.11); हपुषामरिचवाष्पिकासैंधवदीप्यकाजाजीपंचकोलकैः ··· क्षीरम् ··· विपचेत् AṣṭāSaṁ. ii. 89.17 (4.16); ii. 20.20 (4.4); ii. 28.2 (4.5); ii. 90.23 (4.16); ii. 106.8 (4.19); ii. 107.7 (4.19); एलापाठाजाजी ··· पंचकोलकं हन्ति AṣṭāHr. i. 15.33; i. 14.25; iv. 3.20; KalyāKā. 10.5; AgniP. 286.14; सौवर्चलमजाज्यश्च ··· एतल्लवणमष्टाङ्गम् ··· । मदात्यये कफप्राये दद्यात् SiddhYo. 18.14; 14.9; 26.10; 27.47; पिप्पलीपिप्पलीमूलाजाजीचित्रकसैन्धवैः । युक्ता पीता सुरा हन्ति गुल्मम् SiddhYo. 30.31; 30.33; 36.9; 37.45; 61.1; 64.2; वचासातिविषाजाजीपाठावत्सकरेणुकैः । ··· हन्ति वातम् S'ārṅgaS. ii. 2.35; AśvaVai. 10.15; तमस्मै दापयेत्पिण्डमजाजीमरिचैर्युतम् Hastyāyur. 159.8 (2.3); सर्षपातिविषाजाजीरेणुकाकृष्णजीरकैः (समभागस्तु गुग्गुलुः ग्राह्यः) RasRaSa. 21.72; अजाजीं वा गुडेनैव भक्षयेत् ··· । यकृत्प्लीहोदराग्रं च श्वयथुं च विनाशयेत् RaseCin. 9.304 (246.23); 9.101 (157.12); 9.275 (234.12); स्विन्नं सदा दापयेत् ··· क्रमेणैलान्यूषणहिङ्गुजीरकयुगाजाजीविलङ्गान्वितम् MātaLī. 11.12; BhāvPra.(Bhā.) 6(2).82; BhojanKu. 141.20; अजाजी जरणं दीर्घ्यं मागधं जीरकं सितम् ParyāRaMā. 229; Liṅgānu.(Ha.) 41.13; AbhidhāRaMā. 2.461; DhanvNi. 82.25; गौरादिजीरकस्त्वन्योऽजाजी स्याच्छ्वेतजीरकः RājNi. 83.12; ParyāMu. 2.3; Vaija. 129.83; AbhidhāCin. 422; ParaNā. 1054; BhāvPraNi. 10.81; AbhidhāMañ. 104.7; ṢadrasaNi. 27.1; ApūNā. 15A.2; KośaKaTa. 1.4282; KalpaK. 154.191; **1 ii** *Nigella indica*, black cumin seed दीप्यकग्रन्थिकाजाजीहपुषाधान्यकैः समैः SuśruS. vi. 42.25 (comm. कृष्णजीरक इत्यन्ये); अजाजी गुडसंयुक्ता विषमज्वरनाशिनी SiddhYo. 1.228 (comm. अजाजी कृष्णजीरकम्); S'ārṅgaS. iii. 11.104; AśvaVai. 12.55; जीरको जरणोऽजाजी कणे कृष्णे तु जीरके AmaK. 1779; ParyāS'aRa. 2.455; AbhidhāMañ. 103.9; कृष्णाजाजी कृष्णजीरके ApūNā. 14A.2; S'abdaRa.(Su.) 3.59; **2** *Ficus oppositifolia* कृष्णोदुम्बरीका काकोदुम्बरी जघनेफला । अजाजी फल्गुनी फल्गुर्मलयूश्चित्रभेषजम् KalpaK. 260.111.

अजाजीक (ajājī–ka) *m. Cuminum cyminum*, cf. **अजाजी,** जीरम् अजाजीकः । जीरकोऽपि Liṅgānu.(He.) 130.6(c)

अजाजीजम्बाल (ajājī–jambāla) *m.* paste of *Cuminum cyminum* अजाजीजम्बाले रजसि मरिचानां च लुठिताः कटुत्वादुष्णत्वाज्जनितरसनौष्ठ्यतिकराः SubhāRaK. 35.1.

अजाजीपुष्पवत् (ajājīpuṣpa–vat) *adv.* like the flower of *Cuminum cyminum* तत्रातीन्द्रियत्वस्योपगमादसाभिरनुपलम्भः । अजाजीपुष्पवदित्यादिवचनात् PramāVāBh. 210.30.

अजाजीमूतखण्ड (ajā–jīmūtakhaṇḍa) *m. n.* she-goat's flesh like that of a small piece of cloud अजाजीमूतखण्डार्थे क्षुत्क्षुण्णक्षीणकुक्षिणा । कलत्रेण सहाटव्यां कृतः कलह आकुलः YogVā. iii. 107.29 (comm. जीमूतखण्डो मेघलेश इव तुच्छो मांसखण्डस्तदर्थम्)

अजाजीव (ajājīva) *m.* goat-herd जाबालः स्यादजाजीवः AmaK. 1950 = AbhidhāRaMā. 2.226 = Vaija. 138.29 = AgniP. 365.45 = S'abdaRa.(Vā.) 3078 = KośaKaTa. 1.7046; NāmaMāli. 613; अजाजीवस्तु जाबालः TrikāS'e. ii. 10.5; KalpaK. 204.23; PañcTaPra. 6.2.

अजाजीविन् (ajājīv–in) *m.* goat-herd अजाजीविनि जाबालः ParyāS'aRa. 2.578.

अजाजैत्री (ajājaitrī) *f.* name of the goddess Lalitā (*lit.* vanquisher of nescience) अष्टमूर्तिरजाजैत्री(? जेत्री) LalitāSa. 182 (comm. अविद्यारूपाया अजाया जेत्री)

अजाज्ञा (ajājñā) *f.* Creator's command तेषां पुराणवक्तृत्वं वृत्तिरासीदजाज्ञया KūrmaP. 151.12 (1.14); प्रादुर्बभूव सः···। अजाज्ञया···गुणैस्त्रिभिः LiṅgaP. i. 3.15; ii. 9.5.

अजाज्य (ajājya) *n.* ghee (prepared from the milk) of she-goat चक्षुष्यं दीपनम्···अजाज्यम् BhojanKu. 149.20.

अजाड्य (a–jāḍya) *n.* **1** absence of insentience ततोऽजाड्ये निजोल्लेखनिष्ठात्वार्थस्थितिस्ततः ĪśvaPraSū. i. 3.5; तथापरामर्शनमेव अजाड्यजीवितम् ··· अनन्यमुखप्रेक्षित्वं नाम PratyabhiVi. i. 242.8 (i. 5.11); ज्ञानत्वाजाड्यकण्ठोक्त्यनुगुणमवदन्मुख्यतात्मनीव TattvMu. 3.62; देशाद्देशं गते चित्ते मध्ये यच्चेतसो वपुः । अजाड्यसंविन्मननं तन्मयो भव सर्वदा YogVā. iii. 121.54; S'ārṅgaPa. 4250; MahāU. 5(49); MaṇḍBrU. 2.5 (351.4); 5.1 (352.13); **2** absence of sloth, agility जिह्वाया जाड्याजाड्येन वा प्रतिनियतदिवसीयजपसंख्याया अपूर्णत्वेऽधिकत्वे वा नियमभङ्गः स्यात् TantrSā.(K.) 33.1.

अजाणु (ajāṇu) *m.* eternal atom (अणोः) अनंशत्वेऽसंयोगात् कार्यासिद्धेर्नाजाणुसिद्धिः IṣṭaSi. 2.5.

अजाण्टी (ajāṇṭī) *f. Ronrea santaloides* अजाण्टी ऋक्षगन्धा स्यात् NighS'e. 2230. cf. **अजान्त्री.**

अजाण्ड (ajāṇḍa) *n.* universe, cosmos (*lit.* Creator's egg) तमो हि शारीरप्रपञ्चमाब्रह्मस्थावरान्तमनन्ताखिलाजाण्डभूतम् MaVākyaU. 585.15; (भीमेन प्रहतो बकासुरः) अजाण्डास्फोटनं कुर्वन्नाक्रोशच्छ्रा(? श्रा)ससंचयैः । भूमौ निपत्य लुलुठे MahāBhā. i. App. I. 93.33 (+4); BṛNāraP. 11.178; जगदिदमण्वाद्यजाण्डपर्यन्तम् KāmkaVi. 10; लोकातीतमजाण्डकोटिगमपि त्रैकालिकं यत्सुखं दुःखं च UjjvaNīMa. 472.5; 481.2.

अजाण्डिका (ajāṇḍikā) *f. Ronrea santaloides* ऋक्षगन्धा ··· वृषगन्धाप्यजाण्डिका KośaKaTa. 1.4111. cf. **अजान्त्री.**

अजात (á–jāta) *adj.* [*f.* –ā] **A i** not born, yet to be born (living beings) **ii** as good as not born, worthless **iii** not born, eternal **iv** (woman) who has no issue **B i** not created, not produced (abstract or inanimate) **ii** not fully prepared, not completely made, unfermented **C** not passed, not yet happened, future **A i** not born, yet to be born (living beings) नृ॒ङ्गातैर॒जातां॑ अ॒भि ये न॑न॒क्षुः ṚV. v. 15.2; दृं॒हं॑ प्र॒त्नां जनया॒जातां॑ जा॒तान्॑ वर्षीयसस्कृधि AV. vi. 136.2; AV. (P.) i. 67.2; अ॒ने॑ जा॒तान् प्र णु॑दा मे सप॒त्नान् प्रत्य॒जातान् ··· नुदस्व AV. vii. 34.1; vii. 35.1; AV. (P.) xx, 8.8; TaiS. IV. viii. 12.1; MaiS. ii. 8.7; iii. 2.10; KāṭhS. 17.6; KapiKaS. 26.5; VājaS. 15.1; 15.2; VājaS.(K.) xvi. 1.1; TaiĀ. ii. 5.2 (213.1); यस्यं पुत्रोऽजा॒तः स्यात् ते॑जस्व्ये॑वास्य ब्रह्मवर्च॒सी पुत्रो जा॑यते TaiS. I. v. 8.5 = I. vii. 6.5; य ए॒वं वि॒द्वान॑ग्निष्टोमेन॒ यज॑ते प्रा॒जाताः प्र॒जा ज॒नय॑ति TaiS. VII. i. 1.3; स योऽनुदिते जुहोति यथा कुमाराय वा वत्साय वाजाताय स्तनं प्रतिदध्यात्तादृक् तत् AitBr. 25.6 (665); तद्य एवं वेद परिजाताः प्रजा गृह्णाति प्र जाता (? प्राजाता) जनयति PañcBr. vi. 1.3; न वा अजातस्य गर्भस्य नाम कुर्वन्ति

KausīBr. 7.2 (29.9); TaiBr. I. vi. 2.7; याश्चैवास्य प्रजा जाता आसन् याश्चाजाता: S'atBr. II. v. 2.3; BaudhS'S. iii. 46.3; ĀpaS'S. iv. 16.3; VaikhāS'S. 7.13; LāṭyāS'S. ii. 11.4; हन्ति जातानजातांश्च द्रव्याणि प्रतिगृह्य VasiDS. 10.3; (हन्ति) सप्त जातानजातांश्च साक्षी साक्ष्यं मृषा वदन् BaudhDS. i. 10.34; हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन् MahāBhā. v. 35.27 = Rāmā. iv. 650*(1) = ManuSm. 8.99; जातं जातमवश्य(v. l. मजात)माशु विवशं मृत्यु: करोत्यात्मसात् S'atTrayī. 198; अजातमृतमूर्खेभ्यो मृताजातौ सुतौ वरम् S'atTrayī. 357; Pañcā. 1.11; PārśvC. 6.417; S'ārṅgaPa. 1483; SiṁhāDvā. 177.2 (Vidyasagar's Ed.); Hitopa. 0.13 (Vidyasagar's Ed.); Subhāṣi. 2728; अजातश्चास्मि तत्काले NāraSm. 28.5; Mitā. 133.9 (*on* 2.7); Aparā. 612.20 (*on* 2.7); S'ukraNī. 4(5).147; ये जाता येऽपि चाजाता: ···। वृत्तिं तेऽपि हि काङ्क्षन्ति LaHārīSm. 115; अजाता: पुत्रा: पितरं तापयन्ति NyāyBh. 248.2 (*on* iv. 1.16); NyāyVār. 458.10 (*on* iv. 1.16); HarṣaC. 320.2; BrahmSi. 52.17; AṣṭāSaṁ. i. 204.5 (2.2); अश्वतर्यामजाताप्यश्वतरी IṣṭaSi. 288.10; 90.10; S'ivDṛ. 6.41; BṛĀraUBhVā. i. 2.36; i. 2.64; iv. 3.597; न हि तस्यामजातायां नष्टायां वाखिलं जगत्। नास्तीति शक्यते वक्तुम् SaṁviSi. 87.7; PadmP. ii. 108.28; न स्थूलं न च वा सूक्ष्मं नाजातं जातमेव च YogVā. iii. 81.98; RāmāMañ. 224.19; नाजात एकोऽन्यं हन्ति NyāyMa. 18.1 = Nyāyāmṛ. 574B.7; Kiraṇā. 273.7; KathāSaSāg. x. 5.292; येऽपि श्रियं लेभिरे ··· ताल्लौँकोऽयमवैति लोकतिलकान् स्वप्नेऽप्यजातानिव RājTa.(Ka.) 1.47 = Subhāṣi. 188; VasaViKā. 5.40; अविद्धो विद्धवद्विष्णुरजातो जातवन्मृषा। ··· दर्शयति AnuVyā. 59B.8 (*on* 3.4); अस्यामजाता मम संततिश्चेत् शरद्यवश्यं भविता S'aṅkaDigVi.(Mā.) 2.42; अजाते चित्रलिखिते मृते च ···। क्षत्रेषु त्रिषु विश्वासश्चतुर्थो नोपलभ्यते PurāPraSaṁ. 92.4; **A ii** as good as not born, worthless अजा॑तो वा ए॒ष यो॑ऽलं॒ भू॒त्यै सन् भू॒तिं न प्रा॒प्नोति॑ TaiS. II. i. 5.4 (Sāy. अनुत्पन्नसम:); अ॑जातो वै ता॑वत् पु॑रुषो या॑वदग्निं ना॑धत्ते MaiS. i. 6.4; iii. 6.7; JaimiUBr. iii. 14.8; तस्याजातस्य···अभोजनीयं भवति GopBr. i. 3.19; अजात एवास्मि न यावदेनाम्। प्राप्नोमि PadmP.(Ra.) 19.121; ManuBh. i. 163.30 (*on* 2.169); अजातेनाथ जातेन तेन पुत्रेण को गुण:। भूर्नरैर्यस्य तातस्य···गृह्यते RauhiC. 90; **A iii** not born, eternal अजात इत्येवं कश्चिद्भीरु: प्रपद्यते S'vetāU. 4.21; BrahmViU. 86; EkāU. 2; SubāU. 3; (ब्रह्म) अद्भुतं चाप्यचिन्त्यं (v. l. °जातं) च MahāBhā. i. 1.29; VāyuP. i. 4.18; अजातं जायते यस्मादजाति: प्रकृतिस्तत: GauḍKā. 4.29; 4.6; 4.77; अजातस्य कुतो नाश: ViveCū. 464 = AdhyāU. 58; NyāyVār. 342.9 (*on* iii. 1.1); अजातस्य च नाशोक्तिर्नैव युक्त्यनुपातिनी TattvSaṁ. 372; 1825; 2872; सतोऽपि जातस्य नाश: नाजातस्य ब्रह्मण: IṣṭaSi. 151.22; 183.16; 309.20; अजातं सत् कथं पूर्वं बाधेत TātpaṬ.(Vā.) 93.15 (*on* i. 1.2); TattvCin. i. 532.14; LiṅgaP. i. 86.54; शक्त्या ह्यजातया ब्राह्म्या नियमोऽयं प्रकल्पित: YogVā. iii. 14.32; v. 33.23; YātrāPra. 1.84; **A iv** (woman) who has no issue (जातेर्बात् इत्यत्र) जातेरिति किम् ··· अजाता JaineVyā. 157.15 (*on* iii. 1.45); **B i** not created, not produced (abstract or inanimate) अजा॑ता आसन्नृतवोऽथो॑ धा॒ता···कं ते ज्येष्ठमुपा॑सत AV. xi. 8.5; AV.(P.) xvi. 85.5; TaiS. II. i. 2.3; S'atBr. XI. i. 6.1; अजाते दर्शनं नास्ति ···। जातोऽप्यजाततां याति विधात्रा यत्र नीयते HariVaṁ. 48.48; अजातानामनुत्पत्तौ जातानां विनिवृत्तये। रोगाणां यो विधिर्दृष्ट: सुखार्थी तं समाचरेत् CaraS. i. 28.34 (1941 Ed.); KātySm. 666; RatiRaha. 5.26; न ह्यजातानन्वयप्रध्वस्तयोरतिशय: क्वचित् SphoṭSi. 33.12; TātpaṬ.(Vā.) 214.20 (*on* i. 1.10); PrakaPañ. 274.22; मूलप्रमाणाभावेनाजाता येयं प्रमाणान्तरसंगति: NyāyRa. 68.10 (*on* 2.72); TarkSaṁ(Ā.) 132.19; DīpKa. 97.27 (*on* 3.252); शुकवामदेवादीनामजाता विद्यान्यस्य भविष्यतीति का प्रत्याशा SarvaDaKau. 138.12; AdvaiSi. 864.1; पाणिग्रहणमजातं जातं वा CampaS'reKa. 101; VaiyāBhū. 247.7 (*on* 65); तस्या: कोपशान्तिमजातामालोक्य···शिव एव बालो भूत्वा···क्रोधाग्निं पपौ LalitāSaBh. 214.33 (*on* 270); **B ii** not fully prepared, not completely made, unfermented अजातानि च मध्या(? द्या)नि (पिबेत्) BhelaS. 239.18 (7.9); पयो दधि च वातघ्नमजातं वातलं तु तत् AṣṭāSaṁ. i. 43.5 (1.7); सुरामजाताम् ··· पीतवतो व्यापदुद्भवति Hastyāyur. 177.15 (1.16); 96.18 (1.13); मधूलकोऽजातमद्ये S'ivaK. 135; **C** not passed, not yet happened, future जाताजाता ग्राहिका ग्राह्यभूता ··· जाता अतीतप्रत्युत्पन्ना। अजाता अनागता MaYānaSū. 50.8 (10.2); अतीताजातयोर्वापि न च [स्यादनृतार्थं]ता PramāVār. 1.209; 2.92; अतीताजातयोर्ज्ञानमन्यथाविषयं भवेत् TattvSaṁ. 1788; पर्यायमजातं भाविनम्···जानाति TātpaVṛ. 54.16 (*on* 1.41); Kāśi. i. 120.15 (*on* 2.114–115); ĀgaPrā. 3.9; 21.7.

अजात (ajāta) *m.* **i** name of a son of Hṛdika हृदीकस्याभवन् पुत्रा: ··· अजातो वनजातश्च कनीयककरम्भकौ। ··· असामञ्जा: सुतस्तस्य तमोऽजातस्य चात्मज:। अजातपुत्रा: ···सुदंष्ट्रश्च सुनाभश्च कृष्ण इति MatsyaP. 44.82; **ii** name of a Ṛṣi of Bhṛgu family (प्रवक्ष्यामि ··· भृगूद्वहान्) ऋषिभयश्चाजातश्च VisṇuDhaP. i. 111.29; **iii** name of a form of S'iva अजातोऽधिपति: प्रोक्तस्त्रयी निष्ठैकलिङ्गिनाम् MṛgendraT. iv. 1.112; ii. 3.18; iv. 1.121; ĪśānS'iPa. ii. 13.44; **iv** name of Jina नाभेयो नाभिजोऽजात: MahāP. 25.171; **v** short form of the name Ajātaśatru [DBHS.]; (Gr.) **i** not inclusive of the word *jāta* अनाच्छादनाज्जाते: पूर्वपदात् क्तादजातकृतमितप्रतिपन्नात् S'ākaṭāVyā. i. 3.24; **ii** word *ajāta* याव° ··· °जाताजातजान्वादिभ्य: कन् SaraKaṇṭhā.(Gr.) v. 4.14.

अजातक (ajāta-ka) *adj.* [*yāvādigaṇa* P. v. 4.29; JaineVyā. iv. 2.35; CāndraVyā. iv. 4.12; SaraKaṇṭhā.(Gr.) v. 4.14] unborn असन्तका धर्मे इमे प्रकाशिता अप्रादुभू(? र्भू)ताश्च अजात सर्वे (v. l. अजातकाश्च) SaddhaPuṇ. 168.24; अजातकोऽभवद्द्वेधा ब्रह्मणोऽव्यक्तजन्मन: MatsyaP. 154.355; *m.* name of a tree (ते···पश्यन्त: पादपान्) अजातकांस्तथाजीरान् MahāBhā. iii. 154.40.

अजातककुत्त्व (ajātakakut-tva) the state of non-appearance of the hump (वत्सस्य) अजातककुत्त्वेन बाल्यम्···गम्यते LaS'abdeS'e. ii. 119.1.

अजातककुद् (ajāta-kakud) *m.* young bull (which has not developed the hump) अवस्थायां ककुदस्यान्तस्य लोप: स्यात्। अजातककुद् वत्स: BhāṣāVṛ. *on* v. 4.146; ककुदस्यान्तलोप: स्यादवस्थायां द्योत्यायाम्। अजातककुत् PrakriKau. i. 614.3 (Prasā. अजातककुदिति। बालो वत्स उच्यते); SiddhāKau. 200A.18.

अजातकलापचिह्न (ajāta-kalāpacihna) *adj.* which has not developed the characteristic feature namely the plumage विज्ञायते शिशुरजातकलापचिह्न: प्रत्युत्पदै: परिसरन् सरस: कलापी Pañcā. 141.11.

अजातकल्प (a-jātakalpa) *adj.* who has not known the rules of conduct [JainL.]

[1]**अजातकाण्ड** (ajātakāṇḍa) *adj.* having no testicles एकाण्डोऽजातकाण्डश्च हीनाण्डोऽभ्यधिकाण्डक:। घण्टी च कम्बली चैव षडेते (अश्वा:) पापकृत्तमा: YuktiKa. 188.11.

[2]**अजातकाण्ड** (ajāta-kāṇḍa) *adj.* which has no (fully grown) stalk अजातकाण्डं तरुणं पत्रलं शस्यमुच्यते Hastyāyur. 621.12 (4.8)

अजातकूर्च (ajāta-kūrca) *adj.* without the growth of a beard वृथा ववल्ग। नवीनतारुण्यनिवेदनार्थमजातकूर्चेन मुखेन कश्चित् VikraDeC. 9.83.

अजातकृच्छ्र (ajāta-kṛcchra) *adj.* having no compunction, without qualms पुत्रप्रीत्याजातकृच्छ्र: कुमारम्। धर्मात्मानं प्रेषयामास विश्वामित्रप्रीत्यै सानुजं भूमिपाल: RāghPāṇ.(Ka.) 1.77 (comm. 'अजातकृच्छ्र:' इत्यकारप्रश्लेषाद्वा। तत्र पुत्राणां दुर्योधनादीनां प्रेम्णाजातकष्टो हृष्टहृदयो न तु सकष्ट एवेति भाव:)

अजातकेसर (ajāta-kesara) *adj.* on which mane has not (yet) grown अजातकेसरै: केसरिशिशुभि: सहोपजातपरिचय: ··· आपिबति कुरङ्गशावक: सिंहीस्तनम् Kād. 45.12.

अजातक्र (ajā-takra) *n.* butter-milk from goat's milk अथासौ षष्ठभक्तान्ते भ्रमन् गोचरचर्यया। चीनकूरमजातक्रसहितं लब्धवान् मुनि: PārśvC. 6.1215; एकदा चीनककूरमजातक्रं लब्धवान् KathāK. 26.12.

अजातखेद (ajāta-kheda) *adj.* not grief-stricken, not despondent अनीकिनीमाश्रितदीर्घनिद्रां बाणो निकृत्तामपि बाहुपङ्क्तिम्। अजातखेदो बुबुधे न नूनम् (comm. अजातव्यथ:) Yādavā. 20.75.

अजातगर्वा (ajāta-garvā) *adj.* (*f.*) who has not become proud राधाभिधां तावदजातगर्वामतिप्रियां गोपवधूं मुरारे। भवानुपादाय गतो विदूरम् Nāräy. x. 67.3.

अजातगात्रक्षय (ajāta-gātrakṣaya) *adj.* by which no emaciation of the body is caused गुरूपदेश: ···। अमेचकं नूतनमञ्जनं सतामजातगात्रक्षयमद्भुतं तप: MadhuVi. 3.22.

अजातगुण (ajāta-guṇa) *adj.* in whom no improvement has appeared (i. e. who has not recovered from an affliction) अनेकमणिमन्त्रौषधिप्रमुखप्रतीकारैरजातगुणं पुत्रं प्रेक्ष्य SiṁhāDvā. 43.2(12)

अजातचिन्तिता (ajāta-cintitā) *adj.* (*f.*) whose wish or desire has not been fulfilled अजातचिन्तिता नूनमेषात्मानं जिघांसति PadmP.(Ra.) 36.31.

अजातचैतन्या (ajāta-caitanyā) *adj.* (*f.*) devoid or bereft of sentience पातितश्च कोपितेन कोऽपि तेन मयि शाप:। पापे भजस्व लोहजातिमजातचैतन्या सतीति DaśKuC. 37.12.

अजातजगत्त्रयप्रतिमल्ल (ajāta-jagattrayapratimalla) *adj.* against whom challenging wrestler has not been born in the three worlds अहो द्विजवंशपांसन, किमेतत्कदाचिदपि तव स्वामी नाश्रौषीत् यथाजातजगत्त्रयप्रतिमल्लश्चतुरङ्गमल्ल: YaśasCam. i. 563.2.

अजातजागर (ajāta-jāgara) *adj.* who has not awakened (from sleep) अङ्गदेन विज्ञापितोऽप्यनङ्गसंगरसंगतपरिश्रमादजातजागरः सुग्रीवः RāmāCam. 4. 34(2)

अजातजाड्य (ajāta-jāḍya) *adj.* which has not become dull or inactive अजातजाड्यो जगति जिनशयो जम्भजित्पूजितौजा अज्यायो जन्मबीजं जयतु JinaS'. 2. 9.

अजाततल (ajāta-tāla) *adj.* not following measure or beat of time विस्वरमजाततालं वर्णस्वरसंपदा च परिहीणम् । अज्ञातस्थानलयं स्वरगतमेवंविधं हन्यात् NāṭyaS'ā. 27. 29.

अजाततृणपल्लव (ajāta-tṛṇapallava) *adj.* where (even) grass and tender leaves have not grown अदृष्टजनसंसर्गमजाततृणपल्लवम् । अरण्यमिदमासाद्य मतिर्मे खेदमागता YogVā. iii. 106. 12.

अजाततृप्ति (ajāta-tṛpti) *adj.* not contented, not satisfied मधुमदवीतव्रीडा यथा यथा लपति संमुखं बाला । तन्मुखमजाततृप्तिस्तथा तथा वल्लभः पिबति ĀryāSaS'. 425; तस्य चाभूज्जनयिता समुद्रो नाम विश्रुतः । अजाततृप्तिर्वित्तेषु समुद्र इव वारिषु PariPar. 2. 316.

अजाततोय (ajāta-toya) *adj.* wherein no water is accumulated(?) अजाततोये जठरे पूतनो मध्यदारयेत्(?) BhelaS. 168. 27 (6. 15)

अजातत्व (ajāta-tva) *n.* **i** the state of being unborn or not produced or not come into being आदित्वाच्चादिदेवोऽसावजातत्वादजः स्मृतः VāyuP. i. 5. 37; (हिरण्यगर्भः) आद्यो हि स्वयशश्चैव अजातत्वादजः स्मृतः BrahmāṇḍP. i. 4. 29; KūrmaP. 48. 3 (1. 4); LiṅgaP. i. 70. 100; आदित्वस्यादिदेवत्वादजातत्वादजः स्मृतः BhaviP. 130B. 3 (i. 77. 2); S'ivaP. vii. 10. 30 (512B. 8); अतो जातमिदं विश्वमजातत्वादनाशि च YogVā. iii. 20. 40; पूर्वं परमजातत्वादबाधितैव जायते TantrVā. 878. 18 (*on* iii. 3. 14); पुरुषप्रयत्नानन्तरं हि श्रवणं शब्दस्य द्वेधावकल्पते प्रागजातत्वादनुपलब्धः प्रयत्नेन जनित उपलभ्यतामापद्यते PrakaPañ. 351. 6; न नास्त्यजातत्वादित्येके नास्त्यात्मा अजातत्वात् शशविषाणवदिति NyāyVār. 339. 6 (*on* iii. 1. 1); तस्य (ज्ञातत्वस्य) च ज्ञानात्पूर्वमजातत्वात् ज्ञाने जाते च जातत्वात् ··· ज्ञानेन जन्यत इत्यवधार्यते TarkBhā.(Ke.) 54. 8; अजातत्वे घटाद्यपि किं न तथा स्यात् KhaṇḍanKhā. 1221. 22; प्रथमज्ञाने हि शुद्ध एवार्थो ज्ञायते न ज्ञातताविशिष्टः । तदानीं तस्या अजातत्वात् NyāySu.(Ja.) 497A. 4 (*on* iii. 2. 1); कथं पुनर्निस्सङ्गं ब्रह्मेत्यवगच्छामः अजातत्वात् ब्रह्मणः BālaKrī. ii. 32. 16 (*on* 3. 68); ननु चात्मासत्त्वे परैः प्रमाणान्यजातत्वादीन्युपन्यस्तानि TātpaṬ.(Vā.) 497. 7 (*on* iii. 1. 1); **ii** not having happened, not being performed सप्तपदीकरणस्याजातत्वाद्भार्यात्वानिष्पत्तेः पुनर्दानाशङ्कायामिदं वचनम् ManvaMu. 376. 16 (*on* 9. 71); स्वपितुर्देयकद्रव्यस्यागरूपस्य तच्छाद्धस्याजातत्वात् VīraMi. (Āhnika.) 397. 20.

अजातदधि (ajāta-dadhi) *adj.* which has not turned into curds दधिमण्डो मस्त्वजातदधि मन्दम् BhojanKu. 147. 6.

अजातदन्त (ajāta-danta) *adj.* [*f.* –ā] who has not (yet) cut teeth शिशोरजातदन्तस्य मातुरुत्सङ्गसर्पिणः । सौचिको वेधयेत्कर्णे सूच्या द्विगुणसूत्रया BṛhaspaSm. 244. 87; ParāSm. 3. 14; अजातदन्ता ये बाला: ये च गर्भाद्विनिर्गताः । न तेषामग्निसंस्कारो नाशौचं नोदकक्रिया BṛParāSm. 8. 45; VāyuP. ii. 48. 36; (बाले देशान्तरस्थे च) बालेऽजातदन्ते मृते ManvaMu. 210. 5 (*on* 5. 78); अजातदन्ता ये केचित् ये च गर्भे प्रपीडिताः SkandP. iv. 28. 11; सुतोऽस्याजातदन्तश्च मृतः कालवशात् BrahmP. 59. 9; अजातदन्ता या तु स्याद्गर्भदन्तसमन्विता । ··· वत्सिकेति निगद्यते BṛParāSm. 10. 303; कालेऽप्यजातदन्तश्च स्वल्पाङ्गश्चापि मत्कुणौ । पञ्चवर्षो गजो बालः स्यात्पोतो दशवर्षकः AbhidhāCin. 1219. (अनुजातः) जातदन्तादनु पश्चाज्जातोऽनुजातोऽजातदन्त इत्यर्थः HārLa. 1. 11; दशमासपर्यन्तमजातदन्तस्य चूडाकरणादूर्ध्वं दन्तजननात्पूर्वं मरणं तस्याशौचेऽनध्यवसायः स्यात् HārLa. 37. 8; बालाः कृतनामकरणा अजातदन्तास्तेषु च मृतेष्वह्नैव विशोधनम् Aparā. 909. 12 (*on* 3. 23); 910. 21 (*on* 3. 23); ManvaVi. 622. 23 (*on* 5. 58); 'अदन्तजाते' दन्तजननयोग्यसमयेऽप्यजातदन्ते VīraMi. 780. 12 (*on* 3. 18); BālamBha. iii. 1. 18 (*on* 3. 1–2)

अजातदन्तत्व (ajātadanta-tva) *n.* the state of not having cut the teeth अजातदन्तत्वात् सद्यःशौचम् कृतचूडत्वाच्चिरात्रमित्यन्यतरनिर्द्धारणे हेत्वभावः HārLa. 37. 10.

अजातदन्तबाल (ajātadanta-bāla) *m.* child who has not cut teeth अजातदन्तबाले तु सद्यःशौचं विधीयते S'aṅkhaSm. 15. 4.

अजातदन्तमरण (ajātadanta-maraṇa) *n.* death of one who has not yet cut teeth अजातदन्तमरणे निर्गुणानां सोदरादिसपिण्डानामेकरात्रम् (अशौचम्) HārLa. 39. 17.

अजातदीना (ajāta-dīnā) *adv.* (*f.*) unaffected, not become poor or weak अजातदीनां द्रुपदोद्भवायाः कालस्य दीप्तामिव खड्गरेखाम् । विपक्षसंहारमहाभुजङ्गीं वेणीं प्रियैः संशमयांबभूव Yādavā. 23. 56; (comm. चिरसंस्कारविरहेऽप्यजातक्षयाम्)

अजातदुःख (a-jātaduḥkha) *adj.* not grieved, not afflicted हरिवाहनः ···पीडितोऽपि तच्चित्तदुःखेन स्वस्थ इवाजातदुःख इव मध्यस्थ इव पटुपदप्रचारया वाचा तमुच्चैरवोचत् TilaMañ. 420. 18.

अजातनन्दना (ajāta-nandanā) *adj.* childless, without a son अजातनन्दना कालं निर्गमिष्यामि किं सखि । न पुत्रो न पतिश्चापि केवलं जन्म हार्यते MalliC. 7. 855.

[1]**अजातनय** (ajāta-naya) *adj.* not prudent, not wise अजातनयश्छाग इव नाभिनन्द्यते जनेन NalaCam. 4. 16 (29)

[2]**अजातनय** (ajā-tanaya) *m.* young one of a she-goat, NalaCam. 4. 16 (29)

अजातनष्टता (ajātanaṣṭa-tā) *f.* the state of (being) unborn and (being) destroyed तथा सतः । अजातनष्टता केन AbhidhK. 5. 27 (comm. तेनैव स्वभावेन सतो धर्मस्य कथमिदं सिध्यत्यजात इति यो विनष्ट इति वेति)

अजातनिजसंगमन (ajāta-nijasaṅgamana) *adj.* with whom personal union did not take place (काचित्) तूष्णीमजातनिजसंगमने वृषाङ्के वक्तव्यहानिपरिदूयमना बभूव BhikṣāKā. 34. 5.

अजातनिद्रा (ajāta-nidrā) *adj.* (*f.*) without sleep, sleepless अशेत सा काममजातनिद्रा Yādavā. 2. 19.

अजातनिर्वेद (ajāta-nirveda) *adj.* without developing disgust पुमानजातनिर्वेदो देहबन्धं जिहासितुम् । न हि शक्नोति SarvaVeSāSaṁ. 92; तत्राप्यजातनिर्वेदो म्रियमाणः (आस्ते) BhāgP. iii. 30. 14; मेदपल्याम्···विचित्रपापकर्मनिर्माणकर्मठतायामजातनिर्वेदा मेदाः प्रतिवसन्ति स्म TīrthaKa. 57. 22.

अजातनिष्पत्ति (ajāta-niṣpatti) *adj.* which has not reached the perfection (of a pearl), which has not developed into (a pearl) तस्मिन्सुवंशे कविमौक्तिकानामुत्पत्तिभूमौ कचिदेकदेशे । कश्चित्कविः सोढ्ल इत्यजातनिष्पत्तिरासीज्जलबिन्दुरेव UdaySuKa. 154. 21.

अजातन्याय (ajāta-nyāya) *m.* one whose law-suit is not made clear (in the presence of the fire) स्वपूरुषः । ··· अनग्नकौ रक्षेदर्थिप्रत्यर्थिनौ सदा । अनग्नकावजातन्यायौ RājNīRa. 19. 9.

अजानत् (á-jānat) *adj.* [*f.* -ī, -ntī] **i** not knowing (a specific thing), unaware क्षुध्यन्निदमजानताम्। सर्वार्था न सिध्यन्ते TaiĀ. i. 31.5 (186.3); अजानति यजमानः KātyS'S. iii. 5.3; इत्येवं पितामहायैवं प्रपितामहाय नामान्यजानतः JaimiGS. 2.2 (27.14); यद्वदन्ति तमोमूढा मूर्खा धर्ममजानतः। तत्पापं शतधा भूत्वा तद्वक्तॄनधिगच्छति VāsiDS. 3.6; कण्वं हि पितरं मन्ये पितरं स्वमजानती MahāBhā. i. 66.17; i. 37.26; ii. 63.29; अजानन्नर्जुनश्चापि निहतं पुत्रमौरसम् MahāBhā. vi. 86.75; vii. 97.30; गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः। …परित्यागो विधीयते MahāBhā. xii. 57.7; इति तद्वचनं श्रुत्वा राजा तेषां मनःप्रियम्। अजानन्निव जिज्ञासुरिदं वचनमब्रवीत् Rāmā. ii. 2.16; यो ह्यजानन्वै ब्राह्मणं हन्यात् सुरां वा पिबेत् सोऽपि मन्ये पतितः स्यात् MahāBh. i. 2.26 (*on* i. 1.0); ii. 213.13 (*on* iv. 1.31); अजानन् माहात्म्यं पतति शलभस्तीव्रदहने S'atTrayī. 160; अजानन्तोऽस्य द्रव्यस्यातिसर्गेण मुच्येरन् ArthS'ā. ii. 145.1 (4.6); अजानन् यो द्विजो नित्यमहुत्वात्ति शृतं हविः BṛParāSm. 4.194; तच्छ्रवणार्थं यत्किंचिदल्पाक्षराभिधेयमजानन्निव पृच्छेत् KāmSū. 3.2 (201.8); प्रच्छन्नं वा तैः संयोज्य स्वयमजानती भूत्वा … निवेदयेत् KāmSū. 7.1 (365.22); देशसात्म्यमजानन्तः कथं कुर्युश्चिकित्सितम् KāśyaS. 363B.23; तत्र वासो देवयान्याः शर्मिष्ठा जगृहे तदा। व्यतिक्रममजानन्ती दुहिता वृषपर्वणः MatsyaP. 27.6; शकटदासोऽपि तपस्वी तं तादृशं लेखमजानन्नेव कपटलेखं मया लेखित इति MudrāRā. 7.8(9); ननु जीवेन किं दुःखं न प्राप्तं मूढचेतसा। भवभ्रमणसक्तेन मोक्षमार्गमजानता PadmP.(Ra.) 98.79; पत्रच्छेदमजानञ्जानन् वा कौशलं कलाविषये KuṭṭaMa. 74; शोकश्च मोहश्च कामकर्मबीजमजानतो भवति ĪśopBh. 12.13 (*on* 7); कुलधर्ममजानन् यः संसारान्मोक्षमिच्छति KulārT. 2.47; आहारभेषजनिरुक्तिमजानतां नः… का वा क्रिया कथयताम् KalyāKā. 1.6; न चाजानन्स्वसाध्यार्थं विद्वान्कश्चित्प्रवर्तते BṛĀraUBhVā. (Sambandha.) 305; यस्तु जलार्थी जलबुद्ध्या सुरां पीतवांस्तस्याजानतो नापराधः ManuBh. ii. 383.4 (*on* 11.45); नासौ तत्फलमाप्नोति सम्यक् पाठमजानतः AmoghS'i. 124; आत्मशक्तिमजानतो विग्रहः क्षयकाले कीटिकानां पक्षोत्थानमिव NītiVā. 10.147; न हि आरोपविषयारोप्ये अजानन् आरोपयितुमर्हति TātpaṬ.(Vā.) 498.13 (*on* iii. 1.1); लब्धा अपि श्रियो यान्ति पुंसां भोक्तुमजानताम् YaśasCam. i. 386.6; प्रसङ्गस्त्वयि मे कृतः। अजानन्त्या परं भावम् BhāgP. iii. 23.54; एतच्च सर्वं देहातिरिक्तमात्मानमजानतो नोपपद्यते S'rīBh. 248.6 (*on* i. 2.12); गुणविषयविभागानौषधानामजानन् कुभिषगिव चिकित्सालोलुपो बालिशोऽसौ ĪśānS'iPa. i. 3.2; राजाथ तद्वधादन्यदजानन् दौस्थ्यभेषजम्। न्ययुङ्क्त RājTa.(Ka.) 8.2085; विवाहसमये प्राप्तमजानन्निव सोऽग्रजम्। नाकार्षीत् स्वागतमपि PariPar. 1.296; तन्माहात्म्यमजानन्तो भद्रायां यदि मङ्गलम्। कुर्याद्वंशक्षयं तस्य VasiS. 16.14; किं नु विज्ञपयिष्यामि तत्प्रवृत्तिमजानती SamarāSaṁ. 5.85; विपिनं प्रविवेश … करणीयं च किमप्यजानती (दमयन्ती) Nalābhyu. 7.57; अजानन् … पन्थानम्…स कश्मीराणामगाहत RājTa.(Jo.) 577; काव्यं कर्तुमजानतापि यदयं यत्नो मयारभ्यते Rāṣṭrau. 1.10; अमुमर्थमजानता मया कियदस्यै सरिते कृतं तपः Gaṅgāva. 7.47; **ii** ingorant (in general) नान्यत्तीर्थं न देवोऽन्यः … नरं तावदजानन्तं पावयन्ति महीपतिम् MahāBhā. xii. 298*(2); (प्रपञ्चस्य बाधम्) अजानतां तु सत्यतैव रूप्यादिवत् IṣṭaSi. 80.22; औदासीन्यमजानतोऽप्यस्तीति Bhām. 114.1 (*on* i. 1.4); लोकस्याजानतो विद्वांश्चक्रे सात्वतसंहिताम्। यस्यां वै श्रूयमाणायां कृष्णे…। भक्तिरुत्पद्यते BhāgP. i. 7.6; रामस्तु सर्वं ज्ञात्वैव भविष्यत्कार्यगौरवम्। अजानन्निव दुःखेन शुशोच जनकात्मजाम् AdhyāRā. vii. 7.49; अजानतस्त्वां नमतः फलं यत्तज्जानतोऽन्यं न तु देवतेति Viṣāpahā. 27; यदि ग्राम्यैरजानद्भिर्धर्मो न बहुमानितः PārśvC. 1.183; नो चेत्कथं भूतभवद्भविष्यत्कथाप्रबन्धान् रचयेरजानन् S'aṅkaDigVi.(Mā.) 7.26; का हि नापदजानतः Subhāṣi. 3157; **iii** not caring for, unmindful of तत्राश्रमे दम्पती … तपःकष्टमजानन्तौ कंचित्कालं व्यतीयतुः PariPar. 1.115; [Inst.] unintentionally, unawares अजानता भवेत्कश्चिदपराधः कृतो यदि MahāBhā. iii. 29.29; अहो बत महत्पापं सावित्र्या नृपते कृतम्। अजानन्त्या यदनया गुणवान् सत्यवान् वृतः MahāBhā. iii. 278.11; यदस्माभिरजानद्भिः किंचिदुक्तो नराधिपः। क्षन्तुमर्हति तत्सर्वम् MahāBhā. iv. 66.20; मया प्रदूषितस्त्वं यदजानता प्रभो।…प्रसादितस्त्वं क्षम मे महीश्वर Rāmā. iv. 18.57; स राजा अजानता मया पीतमित्याह ViṣṇuP. iv. 2.55; अथवाजानता

धेनुरियं व्यापादिता मम। तत्कथं शापयोग्योऽयं दुष्टं नास्य मनो यतः MārkP. 112.17; अजानता मया सैव पत्रैः शाखा वियोजिता Mṛcch. 4.18 (192); द्वे ज्योतिषी अजानन्त्या निर्भिन्ने कण्टकेन वै BhāgP. ix. 3.7; VarāP. 55.40; SkandP. v(1). 11.8; अजानता मया विद्धस्त्वातुमर्हसि मां मुने AdhyāRā. ii. 7.25; अजानता च मया तद्दर्शनावतीर्णे त्वयि प्रयुक्तोऽनुकूतवानेषोऽपि यथोचितं पूज्येषु UdaySuKa. 89.16; अजानता यत्कृतं पापं यथा सुप्तेन पर्यङ्कात्पतता कश्चिद्धतः Aparā. 1038.25 (on 3.221); अजानन्त्या कुमार्यासौ वृतस्तत्किं सहामहे CitraPaC. 221; उल्लङ्घ्य निर्माल्यमुदासितं यदजानतानेन पदे भवत्याः NīlaVi. 130.8.

अजानत (ajānata) *adj.* venerated by Brahman (Unborn) अजानत त्वन्महिमानमद्भुतं विमोहितं देव तवैव मायया। कृतापराधम् ... क्षमस्व Yādavā. 14.53.

अजानन (ajānana) *adj.* having the face of a goat अजाननश्चलाक्षिभ्रूः कामरूपी महायशाः ... अभिरक्षतु SuśruS. vi. 36.11; AṣṭāSaṁ. ii. 199.16 (6.6); BhāvPra.(Bhā.) viii. 71.115; तत्र ... केचिद्गणा नर्दन्ति ... खरास्याजाननास्तथा VarāP. 90.8.

अजाननक (ajānana-ka) *adj.* not knowing [DBHS]

अजानन्तर्य (aj-ānantarya) *n.* close proximity with a vowel, immediate occurrence of a vowel नाजानन्तर्ये बहिष्ट्वप्रकृप्तिरिति MahāBh. i. 310.7 (on i. 4.2); VyāḍiPari. 80; PariVṛ.(Nī.) 28.1; PariVṛ(Sī.) 128.9; केचिदाहुस्तदेवेदमजानन्तर्यदूषितम् S'lokaVār. 7.212 (904.8)

अजानन्तर्याश्रयण (ajānantaryāśrayaṇa) *n.* resorting to the immediate occurrence of a vowel अन्तरङ्गबहिरङ्गयोर्यत्र कचिदजानन्तर्याश्रयणमात्राश्रयणेन बहिरङ्गपरिभाषानिषेधे PāṇiTaVāNaMā. 17.5; 27.1.

अजानात्मकदेश (ajānātmaka-deśa) *m.* region having no goat तिलांश्च ... इत्यत्र अजानात्मकदेशे फलसंबन्धप्रतिपादनार्थमजेनेत्यनूद्यते DaṇḍaVi. 203.19.

अजानान (a-jānāna) *adj.* [*f.* -ā] **i** who has not realised (his wishes) काम्यं पुनराधेयमजानानस्य S'āṅkhS'S. ii. 5.1 (comm. अजानानस्य कामान् कुर्वतोऽपि काम्यानि। यस्यासंपत्तिः स एवमुच्यते); **ii** not knowing अजानानः प्रकाशं यः परद्रव्यं क्रीणीयात्तत्र तस्यादोषः ViṣṇuSm. 5.164; वागनादिरनन्तापि तत्त्वं तन्नावगाहते। गुणैस्तटस्थितैस्तैस्तैरजानानैव सा स्थिता AhirbuS. 8.11; सोऽजानानः कथमवृक्षव्यवच्छेदं प्रतिपद्येत संकेते PramāVāSvopVṛ. 38.15; अजानानो विशेषं वा क्रोधबोधितमानसः। दशाननः कदाचिन्नौ हन्तुं वाञ्छेदुभावपि PadmP.(Ra.) 47.14; अजानानोऽपि संज्ञात्वं सम्बन्धान्तरदर्शनात् S'lokaVār. 5(15).6 (640.7); ManuBh. i. 389.8 (on 4.176); अभिप्रायमजानानश्चोदयति Kāśi. iii. 201.15 (on 5(8).19); तत्स्थानमजानानाः S'rīBh. 301.20 (on i. 3.14); बौद्धभाषामजानानः RājTa.(Ka.) 1.135; KathāSaSāg. i. 7.65; तदाशयमजानाना विलक्षा सा ...। गत्वा तमूचे PariPar. 2.481; PārśvC. 1.307; स्वयमपि कदाचिद्रूपदिष्टम्...अर्थमजानानो न जानामीत्येव भाषसे S'atDū. 114.1; अजानानस्तत्त्वं न स मृगयतेऽन्यत्र सरसीम् S'ārṅgaPa. 942; S'ivārkaMaDī. i. 177.24 (on i. 1.4); स राजानमजानानम् ... न काङ्क्षति ParamāKā. 35.28; **iii** not recognising दैवमजानानां (? °जानानानां) चार्वाकादिमतमेयुषाम् AbhinBhā. iii. 8.21 (on 19.13)

अजानि (a-jā́ni) *adj.* [AltGr. II. 1.101; N. 82] having no wife, wifeless, unmarried अयमार्यात्यर्यमा ...। अस्या इच्छन्नग्रुवै पतिमुत जायामजानये AV. vi. 60.1; widower [APTE]

अजानिक (ajāni-ka) *adj.* having no wife [GaṇPā. 144.33 assigns it to *purohitādigaṇa*]

अजानिक (ajānika) *m.* goat-herd [APTE]

[1]**अजानुरागिणी** (ajānurāgiṇī) *adj.* (*f.*) attached to (king) Aja, cherishing love for (king) Aja मुधैवेन्दुमती महिष्यप्यजानुरागिणी बभूव VāsaDa. 153.1.

[2]**अजानुरागिणी** (ajānurāgiṇī) *adj.* (*f.*) desirous of a he-goat, VāsaDa. 153.1.

अजानुसक्थ (a-jānusaktha) *adj.* without knees and thighs (ससार मारश्च ततः स्वसैन्यं विघ्नं शमे शाक्यमुनेश्चिकीर्षन्। नानाश्रयाश्चानुचराः परीयुः) अजानुसक्था घटजानवश्च दंष्ट्रायुधाश्चैव नखायुधाश्च BuddhaC. 13.20.

अजानेय (ajāneya) *m.* [= आजानेय] a horse of noble or good breed वनायुजाश्च कांबोजाः पारदाः सिन्धुदेशजाः। टंकणाः पर्वतीयाश्च पारसीकास्तथा परे। अजानेयाः(? आजानेयाः) षट्पदाः दरदाः कालवंदिजाः। ... ये हयाः BrahmāṇḍP. iii. 16.17; *adj.* fearless अजानेयस्तु निर्भयः TrikāS'e. iii. 1.21.

अजान्त्री (ajāntrī) *f.* **i** the plant *Argyreia speciosa* or *argentea* वृद्धः कोटरपुष्पी स्यादजान्त्री RājNi. 155.13; अजान्त्री बोकडी चैव RājNi. 68.22; 425.11; वृद्धदारश्च सा कृष्णाजान्त्री KośaKaTa. 1.4114; KalpaK. 297.434; अजान्त्री वृद्धिदारुणि ApūNā. 42B.1; **ii** name of a plant (*Convolvulus argenteus*) अजान्त्री नीलबुह्ना ParyāRaMā. 112; ParyāMu. 17.21.

अजाप (a-jāpa) *adj.* who does not mutter a sacred *mantra* अजापैः...। त्रिलोचनमनाराध्य कथं त्रिदिवमिग्यते BṛKathāMañ. i. 3.40; (न भोजयेत् ... °कितवाजापराजप्रेष्य° ... तालनृत्यगीतशीलान्) अजापः गायत्र्यादिजपरहितः CaturCin. iii(1). 502.13.

अजापक्व (ajā-pakva) *n.* name of a medicinal preparation of ghee (used as a remedy against cough, asthma, consumption etc.) (अजादुग्धादिभ्यो जातम्) [APTE]

अजापञ्चप्रद (ajāpañca-prada) *adj.* giving (a gift of) five she-goats चैत्रे त्रिरात्रं नक्ताशी अजापञ्चप्रदः सुखी AgniP. 197.13.

अजापण्य (ajā-paṇya) *m.* trader in she-goats अजापण्यस्तौल्वलिरजातौल्वलिः MahāBh. i. 406.8 (on ii. 1.69)

अजापति (ajā-pati) *m.* he-goat त्रिपिबं त्विन्द्रियक्षीणं श्वेतं वृद्धमजापतिम्। वार्ध्रीणसं तु तं प्राहुर्याज्ञिकाः पितृकर्मणि ManuBh. i. 321.6 (on 3.261); अजापतिमजमित्यर्थः Aparā. 553.2 (on 1.259); CaturCin. iii(1). 590.5.

अजापत्या (ajāpatyā) *f.* name of Brahman's city ब्रह्मानन्दा ब्रह्मवृन्दाजापत्या जगती परा ParyāS'aRa. 1.11.

अजापथ (ajā-patha) *m.* path like that of a goat इवे प्रतिकृतौ, खौ इति चागतस्य कस्योस् भवति देवपथादिभ्यः परस्य। देवपथ इव देवपथः ... अजापथः JaineVyā. 265.21 (on iv. 1.154)

अजापयःशृत (ajāpayaś-śṛta) *adj.* boiled in goat's milk शृङ्गाटककशेरुकम्। अजापयःशृतमिदं सुशीतं शर्करान्वितम्। पीत्वा...वाजी रक्तमेहात्प्रमुच्यते AgniP. 288.22 = ViṣṇuDhaP. ii. 46.16.

अजापयस् (ajā-payas) *n.* goat's milk महावीरे गोपय आनयति। ... 'मधु हविरसि' इत्यजापयः BhārS'S. xi. 9.19 = ĀpaS'S. xv. 10.3; अथैनान्प्रभूतेनाजापयसा छृणत्ति ĀpaS'S. xv. 4.10; xv. 10.4; (सम्भारान्) निवपति ... पूर्वार्धमजापयः MānS'S. 106.10; अजापयसावसिञ्चति (उखाम्) KātyS'S. xvi. 4.23; xxvi. 5.16; मधु मधुकमजापयः...सकन्दलीकम्। यदपि शतसहस्रधा विभिन्नं भवति मृदु त्रिभिरेव तन्निषेकैः ArthS'ā. i. 202.4 (2.12); स्वरसः पीतः ... मण्डेन वाजापयसाऽथवापि। निहन्ति ... अतिसारम् HārīS. iii. 3.40; क्षौद्रं मेषशृङ्गमजापयः।... एष धूपोत्तमो नाम्ना KāśyaS. 170B.16; अजापयः शोषघ्नस्तन्यकररक्तसंग्रहणप्रशमनानाम् (अग्र्यम्) AṣṭāSaṁ. i. 80.23 (1.13); DhanvNi. 239.18; असृग्दरमाशु हन्ति। पिष्टं च सारिवमजापयसा समेतम् KalyāKā. 9.31; 9.42; एवमगादित्यश्च इत्यजापय इत्यादावपि द्रष्टव्यम् NyāyMañ. ii. 101.9; दर्वीप्रलेपः...। पीतस्त्वसौ कालविदा...अजापयसा SiddhYo. 3.57; TattvVai. 146.17 (on 3.17); विषम्। अजापयसि संस्विन्नं यामतः शुद्धिमाप्नुयात् S'ārṅgaS. ii. 12.294; स्नुकुश्रेष्ठकन्यास्नुह्यर्कश्वेतार्काजापयस्सु च। सम्भाव्य वेणुपात्रस्थं तेन नस्यं तथाञ्जनम् Īśān-S'iPa. i. 40.18; शिलाजतुज(? च)तक्रेण शालिपिष्टमजापयः।... करणं करिणां मदे Mānaso. iv. 3.461; त्रिदोषघ्नमजापयः BhojanKu. 131.13.

अजापाल (ajā-pāla) *m.* **1** goat-herd न भोजयेत्स्तेन° ... °अजापाल° ... प्रातिहारिकान् GautDS. ii. 6.15; अजापालो माहिषिकः कर्मदुष्टाश्च...पितृश्राद्धेषु वर्जिताः BṛParāSm. 7.9; अजापालेनापि रामेण ... पौरजनेनानुगतम् ... कुसुमपुरं नाम नगरम् VāsaDa. 111.1; स तस्मै कथयामास पुरेऽसौ पुरनामनि। मित्रवन्तमजापालमुपदेष्टारमात्मवित् PadmP. vi. 172.10; **2** Brahmin who protects barren women रेतःक्षयकरी वन्ध्या अजास्ताः परिकीर्तिताः। तासां यः पालयेद्विप्रो ह्यजापालः स उच्यते AṅgiSm. 124; **3 i** name of a king (of the Raghu-dynasty) रघोर्भूद् दिलीपस्तु ... दीर्घबाहुरजात् कालस्त्वजापालस्ततोऽभवत् AgniP. 272.33; रघुवंशसमुद्भूतो ह्यजापालो नृपोत्तमः SkandP. vii(1). 287.2; **3 ii** name of a king अस्ति देवी कामप्रदा नृणाम्। अजापालेन भूपेन स्थापिता पापनाशनी SkandP. vi. 95.1; अजापालो यदा राजा सर्वलोकहिते रतः SkandP. vi. 133.2; त्रेतायुगमुखे राजा अजापालो बभूव ह SkandP. vii.(1) 58 5; अजापालो महीपालो ह्यजादानैर्दिवङ्गतः CaturCin. i. 717.12; **4** entertaining love, VāsaDa. 111.1 (comm. अकारो वासुदेवस्तस्माज्जातोऽजः कामस्तमापालयति तादृक्)

अजापालक (ajā-pālaka) *m.* goat-herd [S'abdaKaDru.]

अजापालादिक (ajāpālādi-ka) *adj.* shepherd etc. योऽन्नम् ...अश्वादजापालादिकस्य च। ...सोऽनन्तं नरकं व्रजेत् BṛParāSm. 6.287.

अजापालार्पित (ajāpālārpita) *adj.* handed over to a shepherd अजापालार्पितोऽस्म्यन्यस्तन्यपानेन जीवितः SamarāSaṁ. 4.388.

अजापालि (ajāpāli) *m.* one belonging to the Ajāpāli *gotra* आनष्टयो भागुरयः श्येनपोऽथाजापालयः। शैरीषिरौदवाही च ... इत्येतेषामविवाहः MānS'S. 247.3.

अजापालेश्वरी (ajāpāleśvarī) *f.* name of a goddess (known after king Ajāpāla) अथान्यापि च तत्रास्ति देवी कामप्रदा नृणाम् । अजापालेन भूपेन स्थापिता … । तां च … अजापालेश्वरीं नरः । यो वै पूजयते SkandP. vi. 95. 2; vii(1). 58. 14; ततो गच्छेन्महादेवि अजापालेश्वरीं शुभाम् SkandP. vii(1). 287. 1.

अजापित्त (ajā-pitta) *n.* goat's bile अजापित्तकृतं व्योषं धूमस्थाने विशोष्य च । … राज्यन्धस्याञ्जनं हितम् RasRaSa. 23. 66.

अजापिन् (ajāp-in) *adj.* who does not mutter (sacred *mantras*) अस्नात्वा शमलं भुङ्क्ते त्वजापी पूयशोणितम् DakṣaSm. 2. 63; अस्नाताशी मलं भुङ्क्ते अजापी पूयशोणितम् SkandP. vii(1). 207. 35.

अजापुरीष (ajā-purīṣa) *n.* excrement or faeces of a she-goat अजापुरीषप्रतिमो रुजावान् … । विदार्य कृष्णं प्रचयोऽभ्युपैति SuśruS. vi. 5. 10; RugVi. 59. 28; BhāvPra.(Bhā.) viii. 62(?63). 63.

अजाप्य (a-jāpya) *adj.* who does not mutter the sacred formula अथ ग्रहाणामातिथ्यम् … व्याख्यास्यामः । अश्रद्दधानमशुचिकरणमजाप्यं त्यक्तमङ्गलम् । सुव्यक्तं ग्रहा नयन्ति पुरुषं यमसादनम् JaimiGS, 2. 9 (34. 2)

अजाप्रक्लृप्ति (ajā-praklpti) *f.* assumption (of the Prakṛti) as Unborn तदियमजाप्रक्लृप्तिरिह बहिरवत्रगुणे तदनुविधायिनी प्रथितजीवभिदानुकृतिः Naya-Mañ. I. iv. 2. 4.

अजाप्रसूत (ajā-prasūta) *adj.* discharged by a she-goat मूत्रेणाजाप्रसूतेन तैलं पातालयन्त्रजम् । विसर्पं नाशयत्याशु RasRaSa. 20. 3.

अजाप्राय (ajā-prāya) *adj.* consisting mostly of the goat's (milk) भविष्यन्ति कलौ युगे । अणुप्रायाणि धान्यानि अजाप्रायं तथा पयः ViṣṇuP. vi. 1. 54.

अजाप्रार्थना (ajā-prārthanā) *f.* prayer for a she-goat किं तुष्टेन प्रदातव्यं वासवेनाखिलार्थिना । अजाप्रार्थनया किं नु कामधेनुफलं लभेत् GaṇeP. ii. 107. 24.

अजाप्रिय (ajā-priya) *m.* **1** substance called Ajāpriya (*Ligusticum ajwaen*) अजाप्रियो ग्रहावासः शिलाख्यः कृष्णचोरकः AbhidhāMañ. 119. 4; **2** jujube tree (*lit.* goat's favourite) अजाप्रियः कुहाकोलिर्विषमो भयकण्टकः BhāvPraNi. 96. 71.

अजाप्रिया (ajā-priyā) *f.* jujube tree (*lit.* goat's favourite) स्निग्धच्छदाजाप्रिया च गृध्रनख्यल्पिका द्वयोः । कर्कन्धूः स्यात्फेनिलम्बं बदरी कुवलं त्रिषु KośaKaTa. 1. 3160.

अजाभवघृत (ajābhava-ghṛta) *n.* ghee from (the milk of) a she-goat षष्ठ्यादि च दशम्यन्तमजाभवघृतैस्तथा । प्रागुक्तैर्निस्तुषैः(शालीचणकमुद्गैः)-र्होमात्प्रागुक्तफलमाप्नुयात् TantrRā. 18. 51.

अजाभिघातन (ajābhighātana) *n.* killing a goat अजाभिघातने चैव अधिकाङ्गः प्रजायते । अजा तेन प्रदातव्या विचित्रवस्त्रसंयुता SātāSm. 2. 61.

अजाभुज (ajā-bhuja) *m.* arm of the Unborn (Prakṛti) अजाभुजात्पूर्वंगताच्च जातश्चादौ महाकल्पकरोऽहमग्निः BhaviP. 601A. 33 (iii(4). 25. 25)

अजामदग्न (a-jāmadagna) *adj.* who does not belong to the Jamadagni *gotra* अथ ह्याजामदग्नानां (? °ग्न्यानाम्) भार्गवच्यावनाप्नवानेति ĀśvaŚS. II. vi. 10. 7.

अजामदग्न्य (a-jāmadagnya) *adj.* who does not belong to the Jamadagni *gotra* जमदग्नीनां तु पञ्चावत्तमप्यजामदग्न्यो जामदग्न्यमामन्त्र्य पञ्चावत्तं कुर्वीत सर्वत्र ĀpaŚS. ii. 18. 2; तस्मात्राजामदग्न्यः पञ्चावत्तं जुहोति MahāBh. i. 105. 8 (*on* i. 1. 44); तत्र भृगवो द्विविधाः जामदग्न्या अजामदग्न्याश्च VīraMi.(Saṁskāra.) 616. 21 = BālamBha. i. 183. 4 (*on* 1. 53); VīraMi.(Saṁskāra.) 619. 9.

अजामदग्न्यता (ajāmadagnya-tā) *f.* the state of not belonging to to the Jamadagni *gotra* यद्यपि अजामदग्न्यतया चतुरवत्ती यजमानः तथापि वपा पञ्चावत्तैव कार्येत्यर्थः MayūMāli. 769. 10 (*on* x. 7. 20)

अजामदग्न्यत्व (ajāmadagnya-tva) *n.* the state of not belonging to Jamadagni *gotra* ननु वत्सविदाभ्यामाष्टिषेणस्यानुद्वाहनिमित्तं न सगोत्रत्वमस्याजामदग्न्यत्वात् VīraMi.(Saṁskāra.) 619. 23.

अजामन्त्र (ajā-mantra) *m.* *mantra* containing the word *ajā* (i. e. Primordial Cause) इति च तस्या एवावगमात्र स्वतन्त्रा काचित्प्रकृतिः प्रधानं नामाजामन्त्रेणाम्नायत इति शक्यते वक्तुम् BrahmSūBh.(Śaṅ.) 242. 18 (*on* i. 4. 9); 244. 11 (*on* i. 4. 11); अजामन्त्रोऽप्यात्मनोऽसंख्यातत्वमनुजानाति NītiMā. 51. 4; PrakaVi. 336. 23; अजामन्त्रः … प्रकृतेः … प्रतिपादकोऽङ्गीकर्तव्य इत्यर्थः ŚivārkaMaDī. i. 523. 19 (*on* i. 4. 9); i. 406. 23 (*on* i. 3. 5); i. 568. 2 (*on* i. 4. 27)

अजामन्त्रान्वित (ajāmantrānvita) *adj.* possessing the *mantra* containing the word *ajā* प्रथमेऽध्याये अजामन्त्रान्विते चतुर्थे च शक्तेः प्रक्रमात् ब्रह्मशक्तिरूपो विशेष इति GoviBh. 66. 14 (*on* i. 4. 9)

अजामन्त्रार्थ (ajāmantrārtha) *m.* meaning of the *mantra* containing the word *ajā* नाजामन्त्रार्थः प्रधानम् PrakaVi. 339. 15.

अजामांस (ajā-māṁsa) *n.* she-goat's meat शनैश्चराय कृसरामजामांसं च राहवे MatsyaP. 93. 20 द्रवीभवत्यजामांसम् BhojanKu. 96. 14.

अजामांसप्रतिनिधि (ajāmāṁsa-pratinidhi) *m.* substitute for she-goat's meat अजामांसप्रतिनिधिं माषापूपं जुहोति च ĪśānŚiPa. ii. 59. 67.

अजामार्जनिकोत्थ (ajāmārjanikottha) *adj.* arising out of the broom made of a she-goat's hair त्वम् … अजामार्जनिकोत्थैश्च रजोभिर्वा समाश्रितः SkandP. vi. 22. 26.

अजामि (á-jāmi) *adj.* **1** not a kin, not related, stranger, enemy स जामिभिर्यत् समजाति मीळ्हेऽजामिभिर्वा पुरुहूत एवैः ṚV. i. 100. 11; i. 111. 3; i. 124. 6; अवं स्थिरा तनुहि यातुजूनां जामिमजामिं प्र मृणीहि शत्रून् ṚV. iv. 4. 5 = TaiS. I. ii. 14. 2 = MaiS. ii. 7. 15 = KāṭhS. 16. 15 = KapiKaS. 25. 6; VājaS. 13. 13 = VājaS.(K.) 14. 13; KauṣīBr. 28. 6 (136. 20); येन वंसाम पृतनासु शत्रून्तवोतिभिरुत जामीँरजामीन् ṚV. vi. 19. 8; vi. 25. 3; vi. 44. 17; अजामिमन्यः श्नथयन्तमातिरत् ṚV. vii. 82. 6; स नो अजामीँरुत वा विजामीनभि तिष्ठ शर्धतो वाध्र्यश्व ṚV. x. 69. 12; यच्च जामि यच्चाजामि तद् वो निजिहतामित्येवैनांस्तदाह KauṣīBr. 28. 5 (136. 18); 28. 5 (136. 17); ĀśvaŚS. I. v. 7. 3; नि वो जामयो जिहतां न्यजामयः ŚāṅkhāŚS. vii. 6. 3; **2** whose husband is not living (i. e. a widow) अजामीति । अविद्यमानभर्तृकेत्यर्थः BālamBha. i. 419. 22 (*on* 1. 157); *n.* **1** incest, unlawful sexual act, cohabitation not allowed between relations (particularly between brothers and sisters) प्रियं दुग्धं न काम्यमजामि जाम्योः सचा ṚV. v. 19. 4; यमीर्यमस्य बिभृयादजामि ṚV. x. 10. 9; AV. xviii. 1. 10; यत्र जामयः कृणवन्नजामि ṚV. x. 10. 10 = AV. xviii. 1. 11; **2** transgressive act तानि उत्तराणि युगानि अगच्छान् आगमिष्यन्ति । यत्र जामयः बालिशाः अजामि अतिरिक्तानि शास्त्रविरुद्धानि कर्माणि कृण्वन् करिष्यन्ति NyāySu.(So.) 128. 27 (*on* i. 3. 2); **3** absence of repetitiveness, non-tautology मध्यतो गुदस्यावद्यति मध्यतो हि प्राण उत्तमस्यावद्यत्युत्तमो हि प्राणो यदीतरं यदीतरमुभयमेवाजामि TaiS. VI. iii. 10. 5; VII. iv. 2. 3; रथन्तरं दिवा भवति रथन्तरं नक्तमित्याहुर्ब्रह्मवादिनः केन तदजामीति सौभरं तृतीयसवने TaiS. VII. iv. 10. 2; KāṭhS. 33. 2; MaiS. iv. 6. 8; KāṭhS. 6. 5; 6. 7; KapiKaS. 4. 6; यत्कण्वरथन्तरं भवति तेनाजामि PañcBr. xiv. 3. 17; तस्य सच्छन्दसौ याज्यापुरोनुवाक्ये निगदो व्यवैति तेनाजामि भवति KauṣīBr. 3. 6 (12. 13); अनेन ह त्वेवाजाम्युपांश्वाज्यस्य यजति ŚatBr. I. vi. 3. 27; तदाहुर्यद् आज्यानि सर्वाणि समाननिधनानि केनाजामि क्रियन्त इति । नानादेवत्यानीति ब्रूयात् तेनाजामीति JaimiBr. 1. 106; 1. 300; यथा कथा च विशेषोऽजामि भवतीत्यपरम् Nir. 10. 16 (178. 19); सप्तैव तृचेषु वैरजामीत्यपरम् LāṭyāŚS. iii. 6. 31; अथाप्येवमजामि भवति NidāSū. 33. 19 (2. 8); 20. 8 (1. 12); अपि चान्ताख्यानि कर्माणीति । यद्वैतज्जामीत्यजामि वा कल्पयेत, अर्थोऽजामिकरण इति वापि तितिक्षेत NidāSū. 34. 6 (2. 8); 139. 22 (8. 6); 153. 14 (9. 1); 167. 8 (9. 10)

अजामिकरण (ajāmi-karaṇa) *n.* absence or removal of repetitiveness न चाजामिकरणं नाम किंचिदिष्टं फलम् ŚābaBh. 2095. 4 (*on* x. 8. 70); 2087. 25 (*on* x. 8. 49); अजामिकरणं चैषु प्रत्येकमवगम्यते । जामिदोषेण चोपांशुयाजोपन्यसनं कृतम् TantrVā. 481. 19 (*on* ii. 2. 9); *adj.* which causes absence or removal of repetitiveness अपि चान्ताख्यानि कर्माणीति । यद्वैतज्जामीत्यजामि वा कल्पयेत अर्थोऽजामिकरण इति वापि तितिक्षेत NidāSū. 34. 6 (2. 8)

अजामिकरणार्थत्व (ajāmikaraṇārtha-tva) *n.* the state of being for the purpose of the absence of repetitiveness अजामिकरणार्थत्वाच्च MīmāSū. x. 8. 63; अजामिकरणार्थत्वमत्र श्रूयते ŚābaBh. 2092. 2 (*on* x. 8. 63); 2094. 24 (*on* x. 8. 70)

अजामिकरत्व (ajāmikara-tva) *n.* the state of being the remover of repetitiveness यदन्तरालकालसंयोगेन विधास्यते तस्याजामिकरत्वं प्रशंसा TantrVā. 483. 4 (*on* ii. 2. 10)

अजामिकर्मन् (ajāmi-karman) *n.* act or deed befitting one who is not a close relation आगमिष्यन्ति तान्युत्तराणि युगानि । यत्र जामयः करिष्यन्त्यजामिकर्माणि Nir. 4. 20 (85. 3)

अजामिकृत् (ajāmi-kṛt) *n.* broth, gravy, sauce (*lit.* what removes staleness) स्वदनं व्यञ्जनं क्लीबे तेमनं स्यादजामिकृत् KalpaK. 145. 113.

अजामिता (ájāmi-tā) *f.* [DEBRU. p. 620] absence or removal of repetition, variation, non-uniformity cf. **अजामित्व**, सर्वाणि स्वाराण्याज्यानि तज्जामि नानादेवत्यैः स्तुवन्त्यजामितायै PañcBr. vii. 2. 5 = xvi. 5. 21; viii. 8. 12; तौ वा उपांशु निरुक्तौ भवतोऽजामितायै KauṣīBr. 3. 6 (12. 4); 3. 6 (12. 8); 13. 9 (60. 24); 30. 11 (146. 20); तत्तदुनादिश्याज्यस्यैव रूपेण गृह्णात्यजामितायै ŚatBr.

I. iii. 2. 8 = I. iii. 2. 9; I. viii. 1. 25; न द्वे चन सहाजामितायै जामि ह कुर्यात् S'atBr. II.ii. 3. 27; IV. ii. 2. 9; IV. ii. 3. 18; उपयामेन गृहीतो भवत्यजामितायै S'atBr. IV. iii. 5. 11; वरुणपाशात्प्रजाः प्रमुञ्चति मारुती दक्षिणाजामितायै S'atBr. (K.) I. v. 1. 8; अन्त्येन स्तोत्रेण समस्तोमो भवत्यजामितायै JaimiBr. 1. 201; 3. 145; 3. 184; ततश्च व्यवधानादजामिताबगम्यते S'ābaBh. 494. 10 (*on* ii. 2. 10); TantrVā. 481. 21 (*on* ii. 2. 9); अन्योन्यस्याजामिता शब्दशक्तेः SaṁkṣeS'ā. 1. 189 (i. 149. 22)

अजामिताकरण (ajāmitā-karaṇa) *n.* absence or removal of repetition अजामिताकरणशक्तिप्रदर्शनमुखेन तज्जन्ययागस्तुतिपरतया एकवाक्यत्वेऽप्युपपत्तेः MīmāKau. iii (2). 185. 17 (*on* ii. 2. 10)

अजामितार्थवाद (ajāmitārthavāda) *m.* laudatory declaration or statement pertaining to the absence of repetition तेनाजामितार्थवादं वक्ष्यामि S'ābaBh. 494. 10 (*on* ii. 2. 10)

अजामित्व (ájāmi-tva) *n.* absence or removal of repetition, variation, non-uniformity cf. **अजामिता**; अन्तरा यजत्यजामित्वायार्थो मिथुनत्वाय TaiS. II. vi. 6. 4; II. vi. 10. 4; V. v. 6. 2; VII. ii. 5. 5; चरुर्मध्ये स्यादजामित्वाय KāṭhS. 10. 8; 12. 4; 21. 7; हुत्वोपं सादयत्यजामित्वाय TaiBr. II. i. 4. 3; I. viii. 2. 1; III. iii. 4. 6; III. ix. 1. 2; प्रशंसार्थमजामित्वं यथामृतार्थत्वम् MīmāSū. x. 8. 70; विष्णुरुपांशु यष्टव्योऽजामित्वाय S'ābaBh. 489. 6 (*on* ii. 2. 9); अजामित्वं च तस्यैव प्रशंसेत्यवधारितम् S'āstrDī. 133. 2 (*on* ii. 2. 4); 132. 13 (*on* ii. 2. 4); उपसंहारोक्तिस्तद्वाराप्यजामित्वाय VedāntKa. 221. 2 (*on* i. 4. 19); 360. 13 (*on* iii. 2. 1); न चात्र विहितयागानुवादेन देवताविधिः शङ्कनीयः। समाधातव्येन जामित्वदोषेणोपक्रमात् अजामित्वेन समाधानेनोपसंहारात् NyāyMāVi. 84. 10 (*on* ii. 2. 4); VidhiRa. 5 (25. 2); MīmāKau. iii(2). 182. 18 (*on* ii. 2. 9); विष्ण्वादिपदानामजामित्वोपपादकतया अर्थवादत्वेनोपपत्तौ MīmāKau. iii(2). 187. 21 (*on* ii. 2. 10); सर्वान्तेऽजामित्वकीर्तनादित्यर्थः MayūMāli. 133. 1 (*on* ii. 2. 4); 132. 15 (*on* ii. 2. 4)

अजामित्वगुण (ajāmitva-guṇa) *m.* merit in the form of the absence or removal of repetition तच्चान्तरालकरणादेवाजामित्वगुणेन प्रशिशंसिषितम् S'āstrDī. 133. 5 (*on* ii. 2. 4)

अजामित्वार्थवाद (ajāmitvārthavāda) *m.* laudatory statement pertaing to the absence or removal of repetition न च प्रत्येकमजामित्वार्थवादाद् भिन्नवाक्यत्वावगतिः MīmāKau. iii(2). 185. 16 (*on* ii. 2. 10)

अजामित्वोपक्रमोपसंहार (ajāmitvopakramopasaṁhāra) *adj.* possessed of the beginning (or introduction) and conclusion pertaining to the absence or removal of repetition यथोपांशुयाजवाक्येऽजामित्वोपक्रमोपसंहारे विष्णुरुपांशु यष्टव्यः इत्यादीनि वचांसि BrahmSi. 124. 19.

अजामित्वोपसंहार (ajāmitvopasaṁhāra) *m.* conclusion pertaining to the absence or removal of repetition अजामित्वोपसंहारात् ... विष्णुरुपांशु यष्टव्यः इत्यादयो न विधयः PrakaVi. 160. 21; MayūMāli. 879. 6 (*on* xii. 4. 5)

अजामिभगिनी (ajāmi-bhaginī) *f.* sister whose husband is not living भ्रातृभ्यः पृथगुपादानमजामिभगिनीप्राप्त्यर्थम् Mitā. 53. 6 (*on* 1. 158)

अजामिल (ajāmila) *m.* name of a Brāhmaṇa कान्यकुब्जे द्विजः कश्चिद्दासीपतिरजामिलः। नाम्ना नष्टसदाचारो दास्याः संसर्गदूषितः BhāgP. vi. 1. 21; अजामिलं द्विजश्रेष्ठं वृषल्या सह संयुतम्। न भिया वारयामासुः सुराः BrahmVaiP. iv. 46. 54 = S'ivaP. ii(4). 1. 38 (192B. 14); (शम्भोः) नामोच्चारणमात्रेण जप्त्वा मंत्रमजामिलः। पश्चात्तापसमायुक्तस्त्ववाप परमां गतिम् SkandP. iii(3). 22. 93; ii(2). 15. 41; iii(3). 10. 4; BṛNāraP. 2. 44; 11. 29; BhaviP. 452B. 21 (iii(2). 25. 22); अजामिलोऽपि भूपाल दासीपतिरिति श्रुतः PadmP. iv. 87. 6; i. 31. 109 S'aṅkaVi.(Ā.) 183. 4; AṇuBh. 178. 26 (*on* iii. 1. 20); अजामिल इलातले मलिनमूर्तिरासीन्महान् HariVi. 4. 61; अजामिलो नाम महीसुरः ... दृष्टवान् सुधृष्टशीलां कुलटां मदाकुलाम् Nārāy. vi. 22. 1.

अजामिलमुख्य (ajāmila-mukhya) *adj.* having Ajāmila as the chief member, headed by Ajāmila गणिकाजामिलमुख्यानवता भवता बताहमपि। ... न सर्वथोपेक्ष्यः RasGaṅ. 77. 14.

अजामिलादि (ajāmilādi) *adj.* beginning with Ajāmila, Ajāmila and others पुरुषोत्तमेन प्रयुक्तोऽमानवः पुरुषोऽर्चिःपर्यन्तमागत्योपासकाननयत्युत विद्युत्पर्यन्तमिति संशये भूपर्यन्तागतैः पार्षदैरजामिलादेर्नयनादर्चिःपर्यन्तम् GoviBh. 309. 12 (*on* iv. 3. 6)

अजामिष (ajāmiṣa) *n.* goat's flesh (जायते) घृतं हत्वा तु नकुलः काको मद्गुरजामिषम् MārkP. 15. 21.

अजामुख (ajā-mukha) *n.* mouth or throat (i. e. bleating) of a goat षड्जो वेदे शिखण्डी स्यादृषभः स्यादजामुखे YājñaS'i. 6 F. N.; *m.* [sg.] name of a son of Danu अजामुखोऽथ भगवान् शिलो वामनसस्तथा। ... इति पुत्रा दनोर्वंशाः VāyuP. ii. 7. 5; [pl.] name of a group or clan of Piśācas षोडशानां पिशाचानां गणाः प्रोक्तास्तु षोडश। अजामुखा वक्रमुखाः ... स्कन्दिनस्तथा VāyuP. ii. 8. 257 = BrahmāṇḍP. ii. 7. 381; सर्वाङ्गकेशा वृत्ताक्षा दंष्ट्रिणो नखिनस्तथा। तिर्यगङ्गा पारुषदाः पिशाचास्ते ह्यजामुखाः BrahmāṇḍP. ii. 7. 386.

अजामुखसर (ajāmukha-sara) *n.* name of a holy lake (वक्ष्यामि तीर्थान्यायतनानि च) पुण्यं ब्रह्मसरं तथा। ... अजामुखसरं चैव घण्टाकर्णह्रदं तथा BrahmP. 25. 63.

अजामुखी (ajā-mukhī) *adj.* (*f.*) goat-faced (Rākṣasī) स (हनूमान्) ददर्शाविदूरस्था राक्षसीः...अजामुखीर्हस्तिमुखीर्गोमुखीः सूकरीमुखीः Rāmā. v. 15. 14; *f.* name of a Rākṣasī in Laṅkā ततस्त्वजामुखी नाम राक्षसी वाक्यमब्रवीत् Rāmā. v. 22. 38; अजामुख्या यदुक्तं हि तदेव मम रोचते Rāmā. v. 22. 40.

अजामूत्र (ajā-mūtra) *n.* urine of a she-goat अजामूत्रम् ... । ... हस्तिमूत्रमथोष्ट्रस्य हयस्य च खरस्य च CaraS. i. 1. 93; पिबेद् वा पिप्पलीमूलमजामूत्रेण संयुतम् SuśruS. vi. 54. 32; उद्वर्तितस्त्वजालेण्डैरजामूत्राभिषेचितः। ... अजाभिश्च वसेत् सह KāśyaS. 109B. 29; AṣṭāHṛ. iv. 3. 57; अविमूत्रमजामूत्रं गोमूत्रं माहिषं तथा। एतेन चाञ्जितो नागस्तून्मादात् परिमुच्यते Hastyāyur. 239. 17 (2. 33); 636. 22 (4. 14); यत्र तु लिङ्गविशेष उपकारकस्तत्रासौ विवक्ष्यत एव यथाजामूत्रेण पर्युक्षितं दातव्यमिति Pradī. v. 236B. 11 (*on* vi. 3. 42); निर्गुण्डिमूलं च निशे पश्वजामूत्रपेषिते। ... वृषान् हरेत् ĪśānS'iPa. i. 40. 99; i. 41. 52; i. 46. 29; तैलं सिद्धार्थकोद्भूतमजामूत्रविमिश्रितम्। ... नस्यं सिंहाणकापहम् Mānaso. ii. 6. 600; Rasā. 6. 133; शुद्धा मनःशिला। दिनमेकमजामूत्रे RaseCin. 7. 55 (70. 3); (भस्म) निष्कैकमजामूत्रैः ... । पाययेद्दरमरीं हन्ति RaseCin. 9. 174 (195. 16); अजामूत्रं च तद्विष्ठा ... । बुद्बुदं लेपतो हन्यान्मण्डलिक्ष्वेडसंभवम् S'ārṅgaPa. 2919; RājNi. 283. 11.

अजामूत्रक (ajāmūtra-ka) *n.* she-goat's urine बहुकृत्वोऽजामूत्रकक्षार उषिता हरीतकीः (प्रयोजयेत्) AṣṭāSaṁ. ii. 58. 21 (4. 10)

अजामृतजीव (ajāmṛta-jīva) *m.* individual soul which is neither born nor dies अज्ञा(? जा)मृतजीवसमर्पकस्य लौकिकजन्ममरणप्रत्ययविरोधो नास्ति PrakaVi. 609. 20.

अजामेदस् (ajā-medas) *n.* fat of she-goat मूढवातस्त्वजामेदः सुराभृष्टं ससैन्धवम् (लिह्यात्) CaraS. vi. 11. 27 (1941 Ed.) = AṣṭāSaṁ. ii. 25. 20 (4. 5) = AṣṭāHṛ. iv. 3. 85.

अजामोधा (ajāmodhā) *f.* the plant Ajwaen अजामोधा वराहश्च (sic) यवनी दीप्यकश्च सः ṢadrasaNi. 30. 7 cf. **अजमोदा**.

अजाम्बु (ajāmbu) *n.* urine of a goat (कर्णम्) प्रपूरयेत् अजांबुना वा लशुनार्कसैंधवैः। कफाधिके कर्णगतामये भृशम् KalyāKā. 15. 22.

अजाम्भस् (ajāmbhas) *n.* urine of a goat सर्वं पिष्टमजाम्भसा कृतगुलीनस्यादिनाहीन् जयेत् ĪśānS'iPa. i. 40. 5; अजाम्भसा पोत्रिशकृद्दालेपो घोणसापहः ĪśānS'iPa. i. 40. 34.

अजायता (a-jāyatā) *f.* the state of not being a wife या। स्थितिरत्राजायतया सुसदाम्।...अभाषि निषधराजाय तया Nalo. 1. 42.

अजायमान (á-jāyamāna) *adj.* [*f.* -ā] not being born or produced प्रजापतिश्चरति गर्भे अन्तरजायमानो बहुधा ... विजायते VājaS. 31. 19; TaiĀ. iii. 13. 1 (341. 4); अग्निहोत्राय कालेऽग्नावजायमानेऽप्यन्यमानीय जुहुयुः ĀśvaS'S. I. iii. 14. 14); BālaKrī. ii. 33. 14 (*on* 3. 60(?70)); अन्यस्मादजायमानं ध्रुवम् ... ज्ञात्वा देवं मुच्यते सर्वपाशैरविद्यादिभिः S'vetāUBh. 148. 17 (*on* 2. 15); तस्मादजायमानैव जायमानेव लक्ष्यते। अनुभूतिः BṛĀraUBhVā. i. 4. 335; iii. 4. 115; कर्मभिरजायमानस्यैवाश्रितवात्सल्याच्छन्दतो जननं हि तस्य (परमपुरुषस्य) श्रूयते VedāntSā.(Rā.) 83. 2 (*on* i. 3. 1); विष्टपविकटवटानामजायमानाय वी(? बी)जभूताय। रुद्राय नमः EI. ix. 140. 1; KhaṇḍanKhā. 444. 5; TattvPrakā. 47A. 2 (*on* i. 3. 13); हिरण्यगर्भः ... वस्तुतः स्वयमजायमानोऽपि ... सुरनरतिर्यगादिबहुप्रकारेण जायते S'ivārkaMaDī. i. 232. 30 (*on* i. 1. 17); ii. 170. 10 (*on* ii. 4. 5)

अजायमानत्व (ajāyamāna-tva) *n.* the state of not being produced, the state of not arising गामानय इत्यतो वाक्यार्थबोधस्याजायमानत्वात्...अन्वयव्यतिरेकाभ्यां पदशक्तिग्रहजन्य इत्यध्यवसीयते MīmāKau. i. 119. 20 (*on* i. 3. 24); (गङ्गायां घोष इत्यादौ) तीरादिबोधस्य तु शक्यसंबन्धबोधव्यतिरेकेणाजायमानत्वाल्लाक्षणिकत्वव्यवहारः MīmāKau. i. 123. 4 (*on* i. 3. 24); iiiA. 11. 9 (*on* i. 2. 3); अपभ्रंशानामबोधकत्वे ततो बोध एव न स्यात्। न च साधुस्मरणाद् बोधः। तमविदुषां जायमानत्वात्। तस्मादजायमानत्वात् VaiyāBhū. 197. 6 (*on* 37)

अजायमानप्रत्यक्ष (ajāyamāna-pratyakṣa) *n.* direct perception or perceptual knowledge which is not yet taking place प्रतियोग्यनुयोगिभिन्नधर्मप्रत्यक्षमन्तरेणाजायमानप्रत्यक्षविषयोक्तान्यतरत्वात् ... प्रतियोग्यनुयोगिधर्म-

प्रत्यक्षमन्तरेणाजायमानप्रत्यक्षविषयमेदकघटपटादौ व्यभिचारात् भिन्नान्तम् LaCandr. 845. 28.

अजायाघ्न (a-jāyāghna) *adj.* not having a mole or mark indicative of one's wife's death (i. e. having auspicious marks) सोऽकृतघ्नैरजायाघ्नैर ब्रह्मघ्नैर्नरैः समम् । ···हस्तिघ्नो मल्लतां ययौ DvyāśraKā. 11. 47 (comm. अजायाघ्नैः पुण्यपुरुषत्वाच्छुभलक्षणोपेतैरित्यर्थः)

अजायात्व (ajāyā-tva) *n.* the state of not being a (legal) wife एतच्चानुलोमजस्त्रीविषयम् । तस्यां भार्यात्वसंभवात्, न तु प्रतिलोमजाविषयम् । तस्या वर्णबाह्यत्वेनाजायात्वात् Aparā. 120. 1 (*on* 1. 96)

अजायुद्ध (ajā-yuddha) *n.* fight between two goats अजायुद्ध-मृषिश्राद्धं प्रत्यूषे मेघडम्बरः । दम्पत्योः कलहश्चैव परिणामे न किंचन S'ārṅga-Pa. 1455.

अजायूथ (ajā-yūtha) *n.* flock of she-goats अजाद्वयमहं ग्रहीष्ये । ततः षण्मासे षण्मासे प्रसववशाद् अजायूथं भविष्यति Pañcā. 276. 8; यौवनस्थस्त्वजा-यूथमध्यस्थः सुखमस्ति सः SamarāSaṁ. 3. 126; आगतं अजायूथम् । ताः सर्वा आवाहे पयः पातुं लग्नाः PrabaK. 97. 28.

अजायोग्य (ajā-yogya) *adj.* (fold) fit or meant for goats रथाश्व मातङ्गखरोष्ट्रगोऽजायोग्यैरनेकैरपि मंदिरैश्च (संकुलं नगरम्) BrahmāṇḍP. ii. 27. 12.

अजायोनि (ajā-yoni) *f.* womb of a she-goat, as a she-goat तेन दोषेण सा बाला अजायोनौ ह्यजायत BhaviP. 753A. 34 (iv. 103. 9)

अजारक्त (ajā-rakta) *n.* blood of a she-goat समिधो निम्बवृक्षस्य ह्यजारक्तविमिश्रिताः । मारयेत् (शत्रून्) ··· । परसैन्यमुखो भूत्वा सप्ताहं जुहुयाद यदि AgniP. 137. 8.

अजारक्ष (ajārakṣa) *adj.* guarding goats वृका भवन्त्यजारक्षाः समस्त-वसुधातले BṛKathāK. 63. 128.

अजारचेष्टित (a-jāraceṣṭita) *adj.* not behaving like a paramour तत्र स्वदारसंतुष्टो न्यायाध्यायो ददर्श सः । अजारचेष्टितं द्वन्द्वम् DvyāśraKā. 13. 31.

अजारज (a-jāraja) *adj.* not born of a paramour, not a bastard पितृमातृविहीनं च युवकं व्याधिवर्जितम् । ··· अजारजं विशुद्धं च सच्छूद्रपरिपोषितम् । ··· स्नापयित्वा च तं कर्ता पूजयेद्गन्धचन्दनैः BrahmVaiP. ii. 64. 102.

अजारजत्व (ajāraja-tva) *n.* the state of not being a bastard (नियोगोत्पादितौ) कुण्डगोळकौ मनुना श्राद्धे निषिद्धावित्यर्थः । तदेतदयुक्तम् ··· (तयोः) अजारजत्वं च नियुक्तस्याजारजत्वात् SmṛtiCan. v. 180. 13.

अजारजस् (ajā-rajas) *n.* dust raised by (the hooves of she-) goats (व्यासः) उवाच पार्थं विच्छायः कथमत्यन्तमीदृशः । अजारजोऽनुगमनं (कृतम्) ब्रह्महत्याथवा कृता BrahmP. 212. 37.

अजारजातत्व (ajārajāta-tva) *n.* the state of not being born of a paramour or not being a bastard कुण्डगोळकौ मनुना श्राद्धे निषिद्धावित्यर्थः । तदेतदयुक्तं नियोगोत्पादितयोरजारजातत्वेनाकुण्डगोळकत्वात् SmṛtiCan. v. 180. 13.

अजारयत् (a-jārayat) *adj.* not oxidizing अजारयन्तश्रमहेमगन्धं (v. l. अजारयन्तः परि°) वाञ्छन्ति सूतात् फलमप्युदारम् । क्षेत्रादनुत्पादपि सस्यजातं कृषी-वलास्ते भिषजश्च मन्दाः RaseCin. 3. 16 (18. 21)

अजाराहूति (ajārāhūti) *m.* name of a mode of hunting मृगशिशुनय-नानां लोचनालम्भिशोभं मुदमगमदजाराहूतिनाखेटकेन VīraBhā. 11. 28.

अजारुधिर (ajā-rudhira) *n.* blood of a she-goat (पल्लवैः) अजारुधिर-संसिक्तैर्जुहुयाद्दिवसत्रयम् S'āraTi. 21. 102.

अजारूढ (ajārūḍha) *adj.* riding or seated on a goat अजारूढं सरेद्रक्तं शक्तिपाणिं हुताशनम् PauṣkS. 4. 150 = PāraS. 11. 93; हुताशनस्त्वजारूढः शक्ति-हस्तो व्यवस्थितः PadmP. v. 39. 94; अजारूढं शक्तिधरम् ··· आवाहयेद्धव्यवाहनम् MahNirvāT. 9. 21.

अजारूप (ajā-rūpa) *adj.* [*f.* -ā] **1** having the form of a she-goat तांश्चापि सकलान्व्याधीन्मंत्रैः संयम्य यत्नतः । अजारूपान्स्वयं पश्चाद्यष्टिमादाय रक्षति SkandP. vi. 95. 43; अजारूपाः प्रयान्ति स व्याधयः सकला द्विजाः SkandP. vi. 133. 2; अजारूपांश्च रोगान्वै चारयामास भूमिपः SkandP. vii(1). 287. 3; **2** having the form of Unborn One तस्य शक्तीशस्य महात्मनः । शक्तिं व्यञ्जन्ति तासां ते त्वजारूपास्तु शक्तयः PauṣkS. 10. 9; *n.* form of a she-goat शूद्र-कोऽपि क्रमेण कालिकादेव्याजारूपं विकृत्य वापीं प्रविष्टया करुणरसितेन विप्रलब्धस्त-न्निष्कासनार्थं प्राविशत् PrabaK. 74. 16; TīrthaKa. 64. 17.

अजारूपकक्लृप्ति (ajārūpaka-klpti) *f.* supposition of the metaphor of a she-goat अजारूपकक्लृप्तिस्तेजोऽबन्नलक्षणायाश्चराचरयोनेरुपदिश्यते BrahmSū-Bh.(S'aṅ.) 243. 10 (*on* i. 4. 10)

अजारूपकल्पना (ajārūpa-kalpanā) *f.* idea of the form of a she-goat इदानीं तेजोऽबन्नलक्षणां प्रकृतिं छान्दोग्योपनिषत्प्रसिद्धामजारूपकल्पनया दर्शयति S'vetāUBh. 177. 12 (*on* 4. 5)

अजारेणु (ajā-reṇu) *f.* dust raised by a she-goat कार्पासं दन्तधावनम् । अजारेणुस्पृशं चै(श्चै)व शक्रस्यापि श्रियं हरेत् AtriS. 392.

अजारोहणप्रायश्चित्त (ajārohaṇa-prāyaścitta) *n.* expiation for riding on a goat अथ खरोष्ट्रबलीवर्दमहिषवस्ताजारोहणप्रायश्चित्तमाह CaturCin. iv. 361. 1.

अजार्धनिन्दिता (ajārdha-ninditā) *adj.* (*f.*) blamable because of incomplete utterance of vowels दूतस्य वाक् प्रदुष्टा सा पूर्वा(? र्वं)मजार्ध-निन्दिता AgniP. 293. 32.

अजार्धवक्त्र (ajārdhavaktra) *n.* half of the mouth of Brahman अजार्धवक्त्राज्जनितोऽहमादौ मरुन्महाकल्पकरो महेन्द्रः BhaviP. 601A. 25 (iii(4). 25. 23)

अजार्य (a-jārya) *adj.* not perishable अजर्यं संगतम् । संगतं किम् । अज-रिता कम्बलः । भावे तु संगतकर्तृकेऽपि ण्यदेव, अजार्यं संगतेन SiddhāKau. 483A. 4.

अजार्यमध्यग (ajāryamadhya-ga) *adj.* being the mean of the calculations of Brahmasiddhānta and the Āryasiddhānta शौक्रं केन्द्रमजार्यमध्य-गमितीमे यान्ति दृक्तुल्यताम् GrahaLā. 1. 16 (comm. ब्रह्मार्यपक्षयोः)

अजाल (a-jāla) *n.* absence of a net जलेऽपि निर्मले जालमजालं मनुते नरः । ··· जीवितात् परिहीयते BhelaS. 105. 6 (5. 7)

अजालगर्भ (a-jālagarbha) *adj.* without pores inside अजालगर्भं सद्वर्णं रेखाबिन्दुविवर्जितम् । ···रत्नं श्रेष्ठं रत्नविदो जगुः S'ukraNī. 4(2). 49.

अजालघुस्मरावासा (ajālaghu-smarāvāsā) *adj.* (*f.*) with the female organ as small as that of a she-goat अजालघुस्मरावासा बाह्यसंभोगरागिणी । नारी या चित्रिणीचिह्ना साप्सरोजातिरुच्यते S'ārṅgaPa. 3100.

अजालेण्ड (ajā-leṇḍa) *n.* excrement of a she-goat उद्वर्तितस्त्वजाले-ण्डैरजामूत्राभिषेचितः । अजाक्षीरं पिबेत्···एतत् क्षयघ्नम् KāśyaS. 109B. 29.

अजालोमन् (ajā-loman) *n.* wool of a she-goat बिडालविड्जालोम मेषशृङ्गी वचा मधु । धूपः शिशोर्ज्वरघ्नोऽयम् SiddhYo. 67. 2.

अजावक्त्रवत् (ajāvaktra-va(n)t) *adj.* [w. r. for अजावक्त्रवती] having the face of a she-goat (रावणः) पतिं शूर्पणखायास्तु विद्युज्जिह्वं तु दानवम् । अजावक्त्रवत(? त्या)स्तत्र जघान रणगर्वितम् ViṣṇuDhaP. i. 223. 4.

अजावन (ajāvana) *m.* name of a king तस्य क्षेत्रस्य रक्षार्थं ददौ स पुरुषोत्तमः । ··· विद्याधरं शङ्कुकर्णं सुकेशं राक्षसेश्वरम् । अजावनं च नृपतिम् VāmaP. 22. 41.

अजावर (ajāvara) *m.* son अजावरः पुत्रः MahāBhāraDī. *on* v. 70. 55.

अजावह (ajā-vaha) *m.* name of a district, JaineVyā. 191. 9 (*on* iii. 2. 111); cf. **अजवाह** *on* P. iv. 2. 133.

अजावाक्य (ajā-vākya) *n.* Vedic passage containing the word *ajā* तैत्तिरीयके अजावाक्यचिह्नितानुवाके 'यस्मात्परम्' इति वाक्यस्याधीतत्वात् S'ruta-Pra. ii. 184. 1 (*on* i. 4. 29); अघटमानमजावाक्यं शक्तिद्वारा ब्रह्मणि नीतम् VedāntKau. 126. 24 (*on* i. 4. 11)

अजावाच्य (ajā-vācya) *m.* name of a person, JaineVyā. 165. 26 (*on* iii. 1. 88)

अजावि (ajāví) *m.* [AltGr. II. 1. 157] goat and sheep तस्मा॑ज्जा॒ता अ॑ज॒ाव॑यः ṚV. x. 90. 10; उप॑हूता इ॒ह गाव॒ उप॑हूता अ॒जा॒व॑यः AV. vii. 60. 5; VājaS. 3. 43; मा गृ॑धो नो अ॒जावि॑षु AV. xi. 2. 21; xii. 2. 15; म॒हान् वा अनु॑ प्र॒जाः प॒शव॒ः प्र जा॑यन्त उपा॒ऽश्वन्तर्या॑मावे॒जाव॑यः TaiS. VI. v. 10. 1; PañcBr. xxvi. 11. 5; S'atBr. IV. v. 5. 6; गावो अश्वा अजावयः ··· इति मनसा ध्यायेत् LāṭyāS'S. ii. 10. 1; अजाविभ्याम् ··· यजेत् MānGS. i. 18. 8; अजावयो गृहं च कनिष्ठस्य VasiDS. 17. 44; अजावय इवागोपा वने श्वापदसंकुले । भृशमुद्विग्नमनसः MahāBhā. vii. 1. 23, अभक्ष्याः पशवो ग्राम्याः ··· अन्य-त्राजाविभ्यः BaudhDS. i. 5. 130; *f.* she-goat and ewe य॒था वृ॒का॑द॒जा॒वयो॒ धाव॑न्ति ब॒हु बिभ्य॑तीः AV. v. 21. 5; योनिष्वजावी व्यामिश्रगोचरत्वादनिश्चिते Aṣṭā-Saṁ. i. 34. 10 (1. 7); AṣṭāHṛ. i. 6. 53 (Sarvāṅgasundarā अजावी इति स्त्रीलिङ्गनिर्देशोऽत्र विवक्षित एव)

अजाविक (ajāviká) *n.* **1** [sg.] [AltGr. II. 1. 105; 162; गवाश्वादीनां समाहारे ऐक्यार्थं भवति । गवाश्वम् ···अजाविकम् CāndraVṛ. *on* ii. 2. 57]; group of goats and sheep उष्णिहमन्वाहाजाविकमेवोष्णिक् KauṣīBr. 11. 2 (49. 22); त॒स्माद् स॒ह सु॒तोऽजाविक॒स्यो॒भय॒स्यै॒वाजाः पूर्वा॒ यन्त्यनूच्यो॒ऽवयः S'atBr. IV. v. 5. 4; अजाविकस्य वा॒ऽएतद्रूपं यत्पवित्रमजाविके॒नै॒वैनं पुनन्ति S'atBr. XII. viii. 1. 13; एतानि वै विशि शिल्पानि गोऽश्वं हस्तिहिरण्यमजाविकम् ··· तान्येव ··· अनक्ति JaimiBr. 1. 263; खरोष्ट्रमहिषांश्चैव यच्च किंचिदजाविकम् । तत्सर्वं प्रतिजग्राह राजा MahāBhā. i. 105. 18; iv. 17. 13; ix. 36. 12; xii. 29. 101; xiii. 53. 39; xiii. 89. 13; संगृह्य रत्नं सुबहु मणिरत्नमजाविकम् Rāmā. i. App. I. 4 (4); तत्र जातं बहु द्रव्यं धनधान्यमजाविकम् Rāmā. ii. 194*(3); गोमहिषमजाविकं खरोष्ट्रमश्वा-

श्वतराश्च व्रजः ArthS'a. i. 137.5 (2.6); क्षुधापरीतस्तु किंचिदेव याचेत कृतमकृतं वा क्षेत्रं गामजाविकमन्ततो हिरण्यम् VasiDS. 12.3; GanPā. 73.4; अजाविके तु संरुद्धे वृकैः पाले त्वनायति ManuSm. 8.235; 9.119; 10.114; माषानष्टौ तु महिषी सस्यघातस्य कारिणी। दण्डनीया तदर्धं तु गौस्तदर्धमजाविकम् YājñaSm. 2.159; 1.267; गवाश्वादीनि च गणपाठे द्वन्द्वरूपाणि च एकवद्भवन्ति। ... अजाविकम् JaineVyā. 78.7 (*on* i.4.87); अजाविकं प्रौष्ठपदे विन्देद्धावां(?द्राश्व)स्त(?त)थोत्तरे। ...श्राद्धं कुर्वंस्तथाप्नोति MārkP. 33.15; श्राद्धं त्वभिजिता कुर्वन् विन्दतेऽजाविकं फलम् VāyuP. ii. 20.12; कदलीभिरजाविकं (आदेश्यम्) भवति BṛSaṁ. 29.7; Kāśi-Vṛ. *on* ii. 4.11; विभागकाले समसंख्यया यद्विभक्तुमजाविकं न शक्यते ManuBh. ii. 276.29 (*on* 9.119); ii. 456.8 (*on* 12.5); खरोष्ट्राश्वतरान्नागाञ्शकटाद्यमजाविकम्। दातव्यं केशवप्रीत्यै मासि मार्गशिरे नरैः VāmaP. 95.42; येन शिशुरेव हस्तग्रहणादजाविकं जघान JayaMa. 279.4 (5.4); अजाविकं प्रौष्ठपद्यां विन्देद्रावस्त(द्राश्व त)थोत्तरे ... श्राद्धं कुर्वंस्तथाप्नोति भरणीष्वायुरुत्तमम् BrahmP. 220.40; अभूतदुष्टे वारण्ये सदा कुर्वीत गोकुलम्। स(?सु)गुप्तमटवीवासं नित्यं कुर्यादजाविकम् BhaviP. 33B.22 (i. 12.45); 708B.17 (iv. 73.18); भवेत्। तेषां धनं च पुत्राश्च दासीदासमजाविकम् PadmP. v. 17.76; कपिलोऽजाविकं पातु GaneP. ii. 85.33; ग्रामजाः पशवः सर्वे वर्जयित्वा त्वजाविकम्। ... न भक्ष्याः परिकीर्तिताः Mānaso. i. 4.48; ii. 6.641; अजा च। अविकश्च। अजाविकम् । अजश्च अविका चेति वा GanRa. 2.129 (166); भक्षणमर्दनाभ्यां परसस्योपघातिनी महिषी महिषो वा माषानष्टौ दण्ड्यः स्यात् । गौश्चतुरो माषान्। अजाविकं द्वौ द्वौ माषौ Aparā. 769.2 (*on* 2.159); अजाविकेन जीवन्तीति आजाविकाः CaturCin. iii(i). 491.1; गावश्च पाटलाभिः कदलीभिरजाविकं (निर्देश्यम्) भवति S'ārṅgaPa. 2316; Prasā. i. 632.12; अजाविकमिति प्रत्येकं द्वयोर्नक्षत्रयोरन्वेति। अजा छागः, अविर्मेषः, स्वार्थे कः VīraMi. 328.9 (*on* 1.267); 638.26 (*on* 2.259(?159)); स्वर्णरत्नादिवासांसि गोतुरङ्गमतङ्गजान्। अजाविकमदाच्छम्भूराजो राजसभास्तुतः ParamāKā. 102.45; 173.14; अजाविकमिति समाहारद्वन्द्वः BālamBha. ii. 279.23 (*on* 2.159); *m.* [pl.] हिरण्यं द्विरदानश्वान्महिषोष्ट्रानजाविकान्...दत्त्वा MahāBhā. i. 894*(12); कारणमृतस्य ... कर्णलक्षणमजाविकानाम् ... आहरेयुः ArthS'ā. i. 316.3 (2.29); भेदस्य चाग्रहणमतिसादृश्यादजाविकानां ज्वालादीनां दृष्टम् Bṛha. 333.9 (*on* i. 1.20); अजाविकानामश्वानां कुञ्जराणां तथा गवाम्। ... मरणे समनुप्राप्ते ViṣṇuDhaP. ii. 125.46; परस्त्रीनिरताः सर्वे परद्रव्यपरायणाः। मत्स्यामिषेण जीवन्ति दुहन्ति चाप्यजाविकाः (v. l. अजाविकान्) BṛNāraP. 38.41; खरोष्ट्रगर्दभमहिष्यो महान्तः गौर्मध्यमा अजाविके क्षुद्राविति विभागः DaṇḍaVi. 284.5; **2** wool (produced from goats and sheep) नृपा ददुः। दास्यो रूपसमन्विताः। अजाविकं च विविधम् Rāmā. vii. 39.10 (Govindarāja); अष्टमराशाविक्षुः सैक्यं लोहान्यजाविकं चापि। नवमे तु तुरगलवणाम्बरास्त्रतिलधान्यमूलानि BṛSaṁ. 41.6 (comm. अजः छागः। अविः प्रसिद्धः। तज्जातमाविकम्); **3** name of a wrestling posture जानीयान्नियुद्धस्याथ कर्म...पर्यासनविपर्यासौ पशुमारमजाविकम् ... AgniP. 251.25; पर्णासनं विपर्यासः पशुमारमजाविकम् ... नियुद्धकर्म जानीयान्नियुद्धकुशलो जनः ViṣṇuDhaP. ii. 182.22; *m.* **1** goat-herd or shepherd, who earns livelihood on goats and sheep अजाविको माहिषश्च तथा च वृषलीपतिः।... सवासा जलमाविशेत् BṛYamaSm. 3.26; अजाविको माहिषिकस्तथा चक्रध्वजी च यः BrahmāṇḍP. iii. 2.166; अजाविको माहिषिकः समुद्री ... तस्करैश्च प्रपीड्यते SkandP. i(2). 41.71; अजाविका माहिषिकाः ... सर्वे नरकगामिनः BhaviP. 284A.21 (i. 191.14); अजाविको माहिषिको यः शूद्रावृषलीपतिः PadmP. ii. 67.85; अजाविको माहिषिकस्सामुद्रः ... नारकी स्यात् S'ivaP. v. 6.38 (412B.13); **2** one whose wife is barren शुक्रक्षयकरा वन्ध्या त्याज्येति परिकीर्तिता। तस्यास्तु यो भवेद्भर्ता तं तु विद्यादजाविकम् BṛYamaSm. 3.24; *adj.* pertaining to goats and sheep हितं घृतं केवल एव पैत्तिके ह्यजाविकं यन्मधुरैर्विपाचितम् SuśruS. vi. 17.33.

अजाविककाम (ajāvika-kāma) *adj.* desirous of obtaining goats and sheep स्वर्गकामः कृत्तिकासु श्राद्धं कुर्यात्। ... अजाविककामो रेवत्याम् Aparā. 560.15 (*on* 1.267)

अजाविकधनादि (ajāvikadhanādi) *adj.* wealth in goats and sheep etc. मेषः समानमूर्तिश्च अजाविकधनादिषु । वृषः सदृशरूपेषु चरते गोकुलादिषु VāmaP. 5.47.

अजाविकवध (ajāvika-vadha) *m.* slaughter of goats and sheep खराश्वोष्ट्रमृगेभानामजाविकवधस्तथा। संकरीकरणं ज्ञेयम् ManuSm. 11.68.

अजाविका (ajāvikā) *f.* [Dv.] female goat and sheep अजा चाविका चाजाविके ManuBh. ii. 181.21 (*on* 8.235); तत्राजाविकानां पञ्च माषान्वक्ष्यति (दण्डं हिंसायाम्) ManuBh. ii. 200.2 (*on* 8.297); अजाविकान्विताागाराद्राजकोशान्महासनात्।...मृत्तिकाः। प्रगृह्य...। सर्वबीजैः समायोज्य स्नानकुम्भेषु निक्षिपेत् ViṣṇuDhaP. ii. 104.90; कार्षापणः पणपर्याय एव पुराणपर्यायत्वेऽजाविकापेक्षया नकुलविडालयोर्लघुत्वेन दण्डगौरवानुपपत्तेः DaṇḍaVi. 127.22.

अजाविकादि (ajāvikādi) *adj.* male goat and sheep etc. वृषस्योक्षणः क्षुद्रपशूनामजाविकादीनां च पुंस्त्वप्रतिघातं वृषणमर्दनेन करोति (शतपणदण्डभाक्) Aparā. 823.1 (*on* 2.234)

अजाविपाल (ajāvi-pāla) *m.* rearer of goats and sheep (*fig.* illiterate or ignorant man) आत्मानात्मविवेकिनामपि पण्डितानामजाविपालानामिवाविविक्तौ शब्दप्रत्ययौ भवतः BrahmSūBh.(S'aṅ.) 32.14 (*on* i. 1.4)

अजाविप्रभव (ajāvi-prabhava) *adj.* prepared from (the milk of) a she-goat or ewe तक्रं त्वजाविप्रभवं न सेव्यमनिष्टगन्धं त्रिषु चाप्यपथ्यम् BhojanKu.144.4.

अजाविप्रभृति (ajāvi-prabhṛti) *adj.* beginning with goats and sheep विरूपांश्च सुरूपांश्चाजाविप्रभृतीन्पशूनवरुन्धे ChāndoUBh. 109.15 (*on* ii. 15.2)

अजाविलोमन् (ajāvi-loman) *n.* hair of goat or sheep अजाविलोम्नाध्वर्योः पवित्रं भवति ĀpaS'S. xix. 6.8.

अजाविशेष (ajā-viśeṣa) *m.* a particular she-goat यथा चमसविशेषो वाक्यशेषावसेयः तद्वदजाविशेषोऽपि हेत्वन्तरेण निश्चेतुं शक्यते S'rutaPra. ii. 116.17 (*on* i. 4.8)

अजावृक्ष (ajā-vṛkṣa) *m.* the shrub *Odina wodier* अजावृक्षो मेषशृङ्गश्चक्षुष्यो बहुशृङ्गकः S'abdaRa.(Vā.) 955.

अजावृत (ajāvṛta) *adj.* surrounded by goats धूम्राक्षः ... तच्च राजकुलं गतः। ददर्श च तमेकं स अजपालमजावृतम् BhaviP. 705B.7 (iv. 71.19)

अजावृन्द (ajā-vṛnda) *n.* herd of she-goats अजावृन्दमथालोक्य निविष्टं सुसुखान्वितम् SkandP. vi. 133.6.

अजावृष (ajā-vṛṣa) *m.* male goat [AltGr. II. 1.118; Hemac. on Uṇ. 518]

अजाव्रज (ajā-vraja) *m.* herd of she-goats कस्मिन्नप्यवसरे क्वापि ग्रामे यियासुरन्तरालेऽजाव्रजं व्रजन्तमालोक्य PrabaCin. 69.31; अन्यदा क्वापि ग्रामेऽजाव्रजं चरन्तं प्रेक्ष्य PurāPraSaṁ. 132.8.

अजाव्यादि (ajāvy-ādi) *adj.* goat, sheep etc. क्षुद्रपशूनामजाव्यादीनां दुःखोत्पादे ... चतुःपणादिक्रमेण दण्डो वेदितव्यः DīpKa. 66.26 (*on* 2.225)

अजाशकृत् (ajā-śakṛt) *n.* faeces of a she-goat अजाशकृन्मूत्रपयोघृतासृङ्मांसालयानि प्रतिसेवमानः।...जहाति ... शोषम् SuśruS. vi. 41.56; AṣṭāSaṁ. i. 193.5 (1.40); गवां कटुक(-मूखीक)मुष्णवीर्यमजाशकृत् । ग्रहणीं दीपयत्याशु Hastyāyur. 299.24 (2.60); RasPraSu. 4.86; अजाशकृत्तुषाग्निं च खनयित्वा भुवि क्षिपेत् RaseCin. 3.20 (21.13)

अजाशब्द (ajā-śabda) *m.* the word *ajā* नायमजाकृतिनिमित्तोऽजाशब्दः BrahmSūBh.(S'aṅ.) 243.9 (*on* i. 4.10); 240.17 (*on* i. 4.8); 243.5 (*on* i. 4.10); अजाशब्दो यद्यपि छागायां रूढस्तथाप्यध्यात्मविद्याधिकारान्न तत्र वर्तितुमर्हति Bhām. 290.9 (*on* i. 4.8); नायमजाशब्दस्तन्त्रसिद्धप्रधानविषयः VedantDī. 68.4 (*on* i. 4.8); PrakaVi. 340.17; अपरप्रेर्यत्वलक्षणस्वातन्त्र्यप्रतीत्यभ्युपगमेऽपि तादृशस्वातन्त्र्यलक्षणं कर्तृत्वं किं प्रकृत्याश्रयं उताजाशब्दवाच्यप्रकृतिशरीरकब्रह्माश्रयम् S'rutaPra. ii. 116.26 (*on* i. 4.8); VedāntKau. 123.6 (*on* i. 4.8); न जायत इति योगेनाजन्ममात्रपरस्याजाशब्दस्य सांख्याभिमतप्रकृतिपरत्वे विशेषकाभावादिति सौत्रं हेतुं व्याचष्टे S'ivārkaMaDī. i. 522.22 (*on* i. 4.8)

अजाशृङ्ग (ajā-śṛṅga) *n.* horn of a she-goat अजाशृङ्गनिभं श्यामं सुपीनं शृङ्गसंभवम्। भङ्गे च शृङ्गवेराभं ख्यातं तच्छृङ्गिणां विषम् KātySm. 446; वेणुमूलैरजाशृङ्गैर्गोमूत्रैश्चामरैः समाः(?मा)। माया तथैव जायेत चतुर्गतिवितीर्णये YaśasCam. ii. 416.18.

[1]**अजाश्रय** (aj-āśraya) *adj.* relating to (or depending on) a vowel प्लुत्यादिष्वजाश्रयो विधिर्न सिध्यति MahāBh. i. 22.7 (*on* i. 1.0)

[2]**अजाश्रय** (ajāśraya) *adj.* resorting to *aja* (Viṣṇu) स रेमे पद्मया तत्र वर्षपूगानजाश्रयः।...कल्किः KālkiP. ii. 6.32.

अजाश्रयणतत्पर (ajāśrayaṇa-tatpara) *adj.* persisting in its resort to the zodiacal sign Aries अजाश्रयणतत्परो भवतु स द्विजाधीश्वरः YātrāPra 2.22.

अजाश्रुति (ajā-śruti) *f.* the Vedic word *ajā* तथेदानीमजाश्रुतिरपि ब्रह्मणि नीयते VedāntKau. 123.2 (*on* i. 4.8)

[1]**अजाश्व** (ajā́śva) *adj.* one having goats as his horses or vehicle (epithet of Pūṣṣan) पूषणं न्व१जाश्वमुप स्तोषाम वाजिनम् ṚV. vi. 55.4; i. 138.4; vi. 55.3; अविता नो अजाश्वः पूषा ṚV. ix. 67.10; vi. 58.2; अजाश्वेति पूषणमाह Nir. 4.25 (88.6); बृहस्पतिमजाश्वं च सतारं बभ्रुमेव च। पञ्चर्चेन स्तुवन्नेतान्पञ्चकामानवाप्नुयात् ViṣṇuDhaP. ii. 124.58.

[2]**अजाश्व** (ajāśva) *m.* [Du.] goat as well as horse अजाश्वयोर्मुखं मेध्यं न गोर्न नरजा मलाः YājñaSm. 1.194; अजाश्वयोर्मुखं संयोगाद्द्रव्यान्तरशोधकत्वेन मेध्यमुच्यते। स्पर्शमेध्यता तु तयोः सर्वाङ्गविषयैव Aparā. 276.11 (*on* 1.194);

n. अजाश्वं मुखतो मेध्यं गावो मेध्यास्तु पृष्ठतः S'ārṅgaPa. 605; अजश्चाश्वश्च मुखप्रदेशे मेध्यः । अजस्यापि कथञ्चित्सेनाङ्गत्वादजाश्वमित्येकवद्भावः VīraMi. 270. 11 (*on* 1. 194)

अजासन (ajāsana) *adj.* whose seat is a goat विभावयेत् ··· सप्तार्चिषं च बिभ्राणमक्षमालां कमण्डलुम् । ज्वालामालाकुलं रक्तं शक्तिहस्तमजासनम् AgniP. 96. 27.

अजासमजतस् (ajāsamaja–tas) *adv.* from a herd of she-goats अजासमजतो मध्यात्काचिदेका च बर्करी । भ्रान्ता सती समायाता प्रदेशे तत्र दुश्चरे SkandP. i(2). 39. 72.

अजासर्पिस् (ajā–sarpis) *n.* clarified butter obtained from (the milk of) a she-goat अजासर्पिषा क्षीरेण जीवनीयैश्च संस्कृतां यवागूं पिबेत् AṣṭāSaṁ. i. 215. 21 (2. 4); एतैः सिद्धमजासर्पिरूषकादिगणेन च । भिनत्ति कफसंभूतामश्मरीं क्षिप्रमेव च SiddhYo. 34. 19.

अजासादृश्यकल्पना (ajāsādṛśya–kalpanā) *f.* idea of similarity with a she-goat ईश्वरादुत्पन्नायामपि चराचरप्रकृतावजासादृश्यकल्पनयोपदेशादविरोधः BrahmSūBh.(Bhā.) 75. 20 (*on* i. 4. 10)

अजासुत (ajā–suta) *m.* young one of a she-goat, a kid अजासुतस्य बालस्य मांसं लघुतरं स्मृतम् BhāvPra.(Bhā.) 6(11). 77.

अजास्तन (ajā–stana) *m., n.* the udder or teat of a she-goat अजास्तनाभकन्दा तु सक्षीरा क्षुपरूपिणी । अजा महौषधी ज्ञेया शङ्खकुन्देन्दुपाण्डुरा SuśruS. iv. 30. 17.

अजास्तनंधय (ajā–stanandhaya) *m.* unweaned young one of a she-goat, a kid साधु भवत्ययमजास्तनंधयः खलु यज्ञकर्मणे YaśasCam. ii. 131. 7; ii. 132. 2.

अजास्थिमज्जा (ajāsthimajjā) *f.* marrow of the bone(s) of a goat हरेणुमगधाजास्थिमज्जैलायकृदन्वितम् । यकृद्रसेनाञ्जनं वा श्लेष्मोपहतदृष्टये SuśruS. vi. 17. 23 (comm. मगधाजास्थिमज्जा पिप्पलीवितुषबीजानि)

अजास्पृश्या (ajāspṛśyā) *f.* name of the plant *Adhatoda vasica* अजास्पृश्या तथाज्येन पीता सर्वविषापहा ĪśānS'iPa. i. 40. 62.

अजास्य (ajāsya) *n.* mouth of a goat किं याति कूष्माण्डफलं ह्यजास्ये SkandP. iv. 5. 15.

अजास्वरूप (ajā–svarūpa) *n.* characteristic feature or nature of Primordial Matter तैत्तिरीयोपनिषदि अजास्वरूपमुक्त्वा तदितरत्वमीश्वरस्य दर्शितम् S'aṅkaVi.(Ā.) 124. 12.

अजास्वामिन् (ajā–svāmin) *m.* owner of a she-goat तस्यास्तत्र (? तस्य तत्र) द्विजः कश्चिदजास्वाम्यच्छिनद्रुषा । ···वृषणम् BhāgP. ix. 19. 10.

अजाहित्वा (a–jāhitvā) *ger.* not leaving out or not abandoning (i. e. taking) अन्येद्युः ··· । अभूजहित्वा समयं स्वसामग्रिकामजाहित्व ऋतुर्धनानाम् DvyāśraKā. 10. 15 (comm. अजाहित्वा गृहीत्वा । ··· हित्वा इत्यत्र 'हाको हिः क्त्वि' इति हिः । यङ्लुपि । जहित्वा । द्वित्वे पूर्वदीर्घत्वमपीच्छन्त्येके । अजाहित्वा । उभयत्रेटि– आतो लुक्)

अजाह्वय (ajāhvaya) *adj.* called *ajā* (a plant) नैम्बैर्गुडाजाह्वयहिङ्गुविश्वारसोनकाः पूर्ववदेष हिङ्गुः । अजाक्षीरपेषणधान्यराशिस्थापनेत्यर्थः ĪśānS'iPa. i. 50. 13.

[1]**अजि** (aji) (Gr.) verbal root *aj* अजेर्व्यघञपोः P. ii. 4. 56; PrakriKau. ii. 479. 10; अजेर्वी Kātan. iii. 4. 91; अजेर्व्यघुघञपक्येषु CāndraVyā. v. 4. 84; अजिव्रज्योश्च P. vii. 3. 60; अजिव्रजोः CāndraVyā. vi. 1. 91; अक्षोऽजेरञ्चतेरुत AhirbuS. 59. 10; वातशर्धयोरजिजहातिभ्याम् SaraKaṇṭhā.(Gr.) i. 4. 46; अजिवृरीभ्यो नित् SaraKaṇṭhā.(Gr.) ii. 1. 56; अघञ्क्यबलच्यजेर्वी SiddhaHe. iv. 4. 2; तद्धि रूपमजेर्वीभावेनेति PariVṛ(Sī.) 190. 6; *f.* going, motion [APTE]; throwing etc. [APTE]; *adj.* going, moving (as in पदाजि, walking on foot) [APTE]

[2]**अजि** (aji) (Gr.) grammatical suffix (=*aj*) पारेरजिः SaraKaṇṭhā. (Gr.) ii. 1. 248 (Vṛtti : पारेरजिप्रत्ययो भवति । पारक् प्राकारः शाकविशेषश्च)

[3]**अजि** (aji) *m.* [from *añj*– Uṇā. 4. 139] lustre अज्यते अजिस्तेजः Prasā. ii. 608. 3.

अजिक (ajika) *m.* name of a demon (one of the thirteen sons of Siṁhikā and Vipracitti) सैंहिकेया इति ख्यातास्त्रयोदश ··· अजिको नरकश्चैव S'ivaP. v. 32. 36 (443A. 13)

अज्ञानतन्निवृत्ति (ajñāna–tannivṛtti) *f.* ignorance and its removal अज्ञानं निवृत्तम् , पुनर्न जानामीति अज्ञानतन्निवृत्त्योः प्रसिद्धत्वात् IṣṭaSi. 65. 17.

अज्ञानतपस् (ajñāna–tapas) *n.* penance based on ignorance or wrong faith मित्रमज्ञानतपसा मृत्वा यक्ष इहाजनि PārśvC. 2. 189; ततश्च्युत्वा तिर्यग्जातिषु भ्रान्त्वाज्ञानतपसासिताक्षयक्षो जज्ञे KathāK. 25. 9.

अज्ञानतमःप्रशान्ति (ajñānatamaḥ–praśānti) *f.* annihilation of the darkness in the form of ignorance प्राह प्रपन्नार्तिहरः प्रसन्नधीः । विज्ञानमज्ञानतमःप्रशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः AdhyāRā. vii. 5. 6.

अज्ञानतमस् (ajñāna–tamas) *n.* darkness in the form of ignorance, darkness of ignorance (अच्युतम्) जेतुकामो अज्ञानतमसा वृतः MahāBhā. vii. 1428*(5); अज्ञानतमसाच्छन्नो मूढान्तःकरणो नरः ViṣṇuP. vi. 5. 21 = BrahmP. 233. 21; नष्टधर्मे जगत्यस्मिन्नज्ञानतमसावृते । भ्राम्यतां भव्यसत्त्वानामुदितस्त्वं दिवाकरः PadmP.(Ra.) 3. 202; ते तस्य अज्ञानतमसो गोचराः BṛĀraUBh. 632. 3 (*on* iv. 4. 11); इत्यज्ञानतमश्छन्नाः स्वदोषोन्मार्गगामिनः । … भ्रश्यन्ति निश्चितम् KathāSaSāg. xii. 5. 216; अज्ञानतमसि च्छन्नं ज्ञानदीपमनुत्तमम् BrahmVaiP. iv. 47. 114; अज्ञानतमसारूढा निकृतिज्ञाः … पच्यन्ते नरके नराः VarāP. 190. 35; अज्ञानतमसाच्छन्ने यत्प्रदीपस्त्वया धृतः BhaviP. 170A. 25 (i. 116. 97); अज्ञानतमसा व्याप्तं शिष्यमुद्योतयेद्गुरुः PadmP. ii. 85. 10; यथा पापात्मनां स्वान्तमज्ञानतमसावृतम् ĀdiP. 2. 32; अज्ञानतमसाकीर्णे चेतो जन्तोः स्वयं गुरुः । ज्ञानाञ्जनेन सम्माज्र्य करोति ब्रह्म निर्मलम् BṛDharmaP. i. 4. 3.

अज्ञानतमस्तिरस्कृति (ajñānatamas–tiraskṛti) *f.* concealment on account of the darkness of ignorance तत्राज्ञानतमस्तिरस्कृतिवशाद्दुस्सूत्रमुत्सूत्रयं यत्किञ्चित्किल मय्यनुग्रहधिया शोध्यं तदेतद्बुधैः PāṇḍaC. 18. 280.

अज्ञानतमोग्रन्थि (ajñānatamo–granthi) *m.* knot of darkness of ignorance परोक्षं हि ज्ञानमतिदृढतराज्ञानतमोग्रन्थिगुण्ठनान्निमीलितस्य … आत्मनः …अत्यन्तविसंष्ठुलत्वमवलम्बमानम् TattvPradī.(A.) 73. 4 (*on* 1. 55)

अज्ञानतमोनिवृत्ति (ajñānatamo–nivṛtti) *f.* removal of darkness of ignorance नमामि भक्त्या नमिनामधेयं सर्वज्ञमज्ञानतमोनिवृत्त्यै NemiNir. 1. 21.

अज्ञानतमोनुद (ajñānatamo–nuda) *adj.* removing the darkness of ignorance तस्मै नमोऽज्ञानतमोनुदाय HariVaṁ. 4*(4)

अज्ञानतमोऽन्ध (ajñānatamo'ndha) *adj.* blind on account of the darkness of ignorance येनाज्ञानतमोऽन्धस्य लोकस्योन्मीलनं कृतम् MatsyaP. 201. 32; ततोऽज्ञानतमोऽन्धस्य कावस्था जगतो भवेत् PadmP. v. 1. 42.

अज्ञानतमोऽनुवृत्ति (ajñānatamo'nuvṛtti) *f.* continuation of the darkness of ignorance उपासनीयं नितरां जनैः सदा प्रहाणयेऽज्ञानतमोऽनुवृत्तेः SiddhāRa. 6 (74. 3)

अज्ञानतरु (ajñāna–taru) *m.* tree of nescience सर्वापदामेकसखीमज्ञानतरुमञ्जरीम् । अनर्थसार्थजननीमविद्यामलमुद्धर YogVā. iv. 41. 38.

अज्ञानतरुशातन (ajñānataru–śātana) *adj.* [*f.* –ī] cutting off of the tree of ignorance परं विवर्धनं बुद्धेरज्ञानतरुशातनम् । … विद्धि साधुसमागमम् YogVā. ii. 16. 5; Subhāṣi. 210; सुखदा ज्ञानसंप्राप्तिरज्ञानतरुशातनी YogVā. v. 13. 11.

अज्ञानतस् (ajñāna–tas) *adv.* **A** unwillingly, inadvertantly, unintentionally (sin, crime etc.) दुर्यष्टं दुरधीतं पापं यच्चाज्ञानतोकृतम् ṚV.(Khila) iii. 10. 8; सः (कर्णः) … ब्रह्मवादिनः । जघानाज्ञानतः पार्थ होमधेनुम् MahāBhā. xii. 2. 20; अह्ना यदेनः क्रियते इन्द्रियैर्मनसापि वा । ज्ञानादज्ञानतो वापि MahāBhā. 1*. 496; xiv. App. I. 4(2981); अज्ञानतश्चान्द्रायणद्वयं कुर्यात् ViṣṇuSm. 53. 6; यः … चण्डालं स्पृशेत् । … अज्ञानतः वापि तस्य वक्ष्यामि निष्कृतिम् YamaSm. 2; यद्गृहस्थार्जितं पापं ज्ञानतोऽज्ञानतोऽपि वा । निर्दहिष्यति तत्सर्वम् … यतिः VṛGautaSm. 588. 15 (12); मामसम्भाष्याज्ञानत एव शयानस्य शापोत्सर्गमसौ … चकार ViṣṇuP. iv. 5. 10; अज्ञानतः कृते दण्डं पातयन्ति बुधा यदि । बुधेभ्यस्तम(? द)हं मन्ये वरमज्ञानिनो नराः MārkP. 112. 19; BrahmāṇḍP. iii. 7. 75; ज्ञानतोऽज्ञानत इति प्रमादकृते बुद्धिपूर्वे चाविशेषेण हिंसनात् ManuBh. ii. 197. 4 (*on* 8. 288); द्रव्याणि यो हरेद् यस्य ज्ञानतोऽज्ञानतोऽपि वा । स तस्योत्पाद्य तुष्टिं तु राज्ञे दद्यात् AgniP. 226. 33; अहोरात्रं च याञ्जन्तून्हिनस्त्यज्ञानतो यदि । तेषां स्नात्वा विशुद्ध्यर्थं प्राणायामान्षडाचरेत् ViṣṇuDhaP. ii. 131. 36; BṛNāraP. 9. 116; महतां दर्शनं ब्रह्मन् जायते न हि निष्फलम् । द्वेषादज्ञानतो वापि BrahmP. 163. 38; (ध्वजः) विधूतो हन्ति वातेन दातुरज्ञानतः कृतम् । पापम् BhaviP. 114A. 9 (i. 64. 25); 157A. 25 (i. 103. 41); 161A. 5 (i. 107. 13); पुरुषो यः स्त्रियं हन्यात् ज्ञानतोऽज्ञानतोऽपि वा DevīBhāP. vii. 25. 77; PadmP. ii. 29. 11; iii. 4. 24; देही … ज्ञानतोऽज्ञानतो वापि … । गङ्गामृत्युमवाप्यैव परं पदमवाप्नुते BṛDharmaP. i. 56. 7; i. 56. 18; भयादज्ञानतोऽपि वा । हर इत्युच्चरन्मर्त्यः सर्वपापैः प्रमुच्यते SaurP. 7. 31; भाद्रशुक्लचतुर्थ्यां यो ज्ञानतोऽज्ञानतोऽपि वा । अभिशापी भवेच्चन्द्रदर्शनात् GaṇeP. i. 61. 25; अज्ञानतः सुरादिकं भक्षयित्वा द्विजातयः पुनरुपनयनमर्हन्ति DīpKa. 98. 10 (*on* 3. 255); 99. 10 (*on* 3. 259); 102. 5 (*on* 3. 269); ManvaVi. 253. 27 (*on* 2. 220); अज्ञानतस्तथा कृतं मया । मम प्रायश्चित्तं दापयितव्यम् SamyaKau. 45. 10; अज्ञानतः कृते विप्र तत्प्रसादेन नश्यति SātvaT. 7. 54; अज्ञानतः ब्राह्मणेन मुक्तम् VetāPañ.(S'i.) 33. 19; अज्ञानतः संसर्गे तु षड्वार्षिकमेव VīraMi. 981. 28 (*on* 3. 261); यद्यप्यज्ञानतस्तथापि ब्रह्मवध्यादोषमावहेदेव Manmatho. 2. 17(16) (433. 16); **B** unknowingly, ignorantly, without understanding ब्राह्मणान्नं यदुच्छिष्टमश्नात्यज्ञानतो द्विजः ।… जपं कृत्वा विशुध्यति AtriS. 70; ĀpaSm. 5. 5; स्नेहाद्वा यदि वा लोभाद् भयादज्ञानतोऽपि वा । कुर्वन्त्यनुग्रहं ये तु तत्पापं तेषु गच्छति LikhiSm. 77; तस्मादज्ञानतो वापि मया भक्त्यैव संस्तुतः । प्रीतश्च भव BrahmāṇḍP. ii. 25. 31; दैवादज्ञानतो वा…नाप्नुवन्ति स्वहिततरमहाभेषजान्यप्युदाराः KalyāKā. 6. 66; 11. 135; लिप्सतेऽज्ञानतो लब्धं कण्ठे चामीकरं यथा NaiṣkaSi. 22. 4; विषमविशेषेणोपात्तं ज्ञानतोऽज्ञानतश्च मरणाय कल्पत एव ManuBh. ii. 383. 8 (*on* 11. 45) इदमज्ञानतः कृतम् Hitopa. 3. 15(4); ज्ञानतोऽज्ञानतो वापि भजतां कामदो मनुः KulārT. 3. 87; अज्ञानतो वापि द्विजो बौद्धालयं विशेत् BṛNāraP. 14. 71; DevīBhāP. ix. 45. 54; (ये) नामानि च महेशस्य गृणन्त्यज्ञानतोऽपि वा SaurP. 3. 13; अज्ञानतः शमीपत्रैस्त्वयापूजि विनायकः GaṇeP. ii. 33. 45; अज्ञानतो वापि भजन्तु लोकांस्तानेव योगैरपि चाधिगम्यान् AdhyāRā. vii. 9. 63; तथाप्यज्ञानतो नाथ मया पर्यनुयुज्यसे TrisaS'aPuC. ii. 6. 633; अज्ञानतः विक्रेतुरस्वामित्वाज्ञानतः SmṛtiCan. iv. 500. 7; जारश्च यस्याज्ञानतो गृहे स्थितस्तस्य गेहे नाद्यात् ManvaMu. 184. 25 (*on* 4. 216); ज्ञानादज्ञानतो वापि विष्णुनिन्दापरायणम् BṛBrahmaS. iii. 7. 82; त्वद्ब्राह्मयमित्थं व्यवहरति यदज्ञानतः सर्व एव Vidvanmo. 2. 14; यन्त्रं संहरयामि यामि भगवन् यक्षोऽहमज्ञानतो बालामद्य समागतोऽस्मि VasaTi. 30. 8; **C i** out of ignorance, due to lack of knowledge चाण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च । पतत्यज्ञानतो विप्रः LaS'ātāSm. 155; 168; सूक्ष्मत्वादतिलोभाच्च प्रकृत्याज्ञानतस्तथा । कामलक्ष्म तु दुर्ज्ञानं स्त्रीणां तद्भावितैरपि KāmSū. 323. 3 (6. 2); ज्ञानतोऽज्ञानतो वापि यथोक्तं न तु तन्मया । तत्सर्वं पूर्णमेवास्तु PauṣkS. 30. 150; ज्ञानतोऽज्ञानतो वापि यथोक्तं न कृतं मया । तत् सर्वं पूर्णमेवास्तु PāraS. 12. 388; ज्ञानतोऽज्ञानतो वापि यावद्देहस्य धारणम् । तावद्वर्णाश्रमाचारः BrahmāṇḍP. iii. 43. 58; हतं ज्ञानं क्रियाहीनं हतश्चाज्ञानतो नरः CāṇaNīDa. 8. 8; ज्ञानतोऽज्ञानतो वापि यन्मया

क्रियते शिवे । तव कृत्यमिदं सर्वम् KulārT. 7. 56; अज्ञानत: ··· कुरुते चिकित्साम् । सर्वानसौ मारयतीह जन्तून् KalyāKā. 7. 49; अतीतं वर्तमानं च ज्ञानतोऽज्ञानत: कृतम् । यदेनस्तत्क्षयं यायात् SkandP. iv. 86. 116; बालो वै यानि कर्माणि करोत्यज्ञानत: स्वग्रम् । न स लिप्यति पापेन VarāP. 137. 110; बाल्ये चाज्ञानतस्तात कृत्याकृत्यं कृतं मया PadmP. ii. 8. 79; iv. 94. 88; एषा तु शीलमेवैकं ररक्षाज्ञानतस्तदा । तेन श्वयोनौ पतिता KathāSaSāg. ii. 5. 135; व्याजह्रु: सूरयोऽनार्यदेशेष्वज्ञानत: सदा PariPa. 11. 97; स स्वभावत: । अज्ञानतो वा (अज्ञ:) UpādhiKha. 1B. 3; अज्ञानतो मया पूर्वं दृष्ट: प्राणप्रियोऽप्रिय: MalliC. 2. 507; यत्किंचिदत्र गदितं न चरित्रशेषमज्ञानत: PrabhāC. 40. 16; अज्ञानतस्त्वं गुरुरल्पबुद्धि: । शिष्योऽहमेतत् खलु भेदजातम् S'aṅkaVi.(Ā.) 276. 1; केचिदज्ञानतो नष्टा: केचिन्नष्टा: प्रमादत: S'ārṅgaPa. 1437; Subhāṣi. 2764; अज्ञानत: शिखानित्यत्वाज्ञानात् VīraMi. (Saṁskāra.) 316. 23; यावदज्ञानतो मौनम् ··· । तावान्माहात्म्यरूपेण पर्यवस्यति मान्त्रिके KaliVid. 13; दु:खाय नित्यं प्रकृतेश्च योगादज्ञानत: स्यात्पुरुषस्य बन्ध: Vidvanmo. 6. 21; स्थापितं यदि लोभेन मोहेनाज्ञानतोऽपि वा TantrRā. 6. 57; **C ii** due to nescience, from primordial ignorance अज्ञानत: स्फुरणमस्फुरणं च दृष्टम् SaṅkṣeS'ā. 44 (i. 50. 9); कूटस्थे विक्रिया नास्ति तस्मादज्ञानतो जनि: BṛĀraUBhVā. i. 4. 626; i. 4. 1011; अज्ञानतोऽध्यासवशात्प्रकाशते AdhyāRā. vii. 5. 36; S'aṅkaDigVi.(Mā.) 10. 91; तत्रापि यदि अज्ञानतोऽतिरिक्ता माया न तत्र प्रमाणम् SiddhāTa. 47. 11; 58. 18; **D** due to misunderstanding, out of mistake अज्ञानत: स्वचरितं नृपति: शशंस RaghuVa. 9. 77 (Malli. करिभ्रान्त्या); जघान मृगरूपान् सोऽज्ञानतो ब्राह्मणान् नृप: VarāP. 41. 19; मध्याह्नार्कमरीचिकास्विव पय:पूरो यदज्ञानत: PraboCan. 1. 1.

अज्ञानतस्कर (ajñāna-taskara) *m.* thief in the form of nescience दिष्ट्येदानीं परिज्ञातो मयैवाज्ञानतस्कर: YogVā. v. 52. 47.

अज्ञानता (ajñāna-tā) *f.* **i** the state of ignorance, positive ignorance कदाचिदज्ञानतयैवमंगना । गृहीतगर्भा प्रथमे दिने भवेत् KalyāKā. 2. 46; द्वयोरप्यभावयोर्जनिमत्वादज्ञानस्य च तदप्रतीतेर्न तयोरज्ञानता IṣṭaSi 67. 2; छादयिष्यत्यात्मजयोर्दोषमज्ञानतैव हि TriṣaS'aPuC. iv. 3. 127; तेनाप्यज्ञानता तस्मादध्येतव्यं ध्रुवं मया PrabhāC. 124. 4(14); अज्ञानतया यन्मया कृतं तत् सर्वं सहनीयम् SamyaKau. 52. 9; 75. 1; **ii** the state of being false knowledge अज्ञानतामज्ञानमिति प्रतीतिविषयतां संदेहगोचरतां च TattvPrakā. 3A. 5 (i. 1. 1)

अज्ञानतादात्म्य (ajñāna-tādātmya) *n.* identity with nescience अज्ञानोपहित, आत्मा अज्ञानतादात्म्यापन्नस्वचिदाभासाविवेकादन्तर्यामी ··· ईश्वर इति च कथ्यते SiddhāBi. 42. 6; अहंकारावच्छेदेन चित्संबन्धमज्ञानतादात्म्यमपि स्वीक्रियताम् GuruCandr. i. 53. 11; i. 53. 23; i. 156. 20; iii. 170. 16.

अज्ञानतापसंतप्त (ajñānatāpa-santapta) *adj.* afflicted by the troubles arising out of ignorance (जलै:) अज्ञानतापसंतप्तप्राणिप्राणैकरक्षिभि: । ··· स ईशान: ··· स्नपयामास (लिङ्गम्) SkandP. iv. 33. 23.

अज्ञानताप्रसिद्धि (ajñānatā-prasiddhi) *f.* common knowledge as ignorance न हि भ्रान्तिसंशयौ मुक्त्वा अन्यस्य सर्वमानातिगस्य अज्ञानताप्रसिद्धि: IṣṭaSi. 48. 13.

अज्ञानतिमिर (ajñāna-timira) *n.* **i** darkness of ignorance अज्ञानतिमिरप्लोषिललाटनयनत्विषे । नमस्ते त्रिपुराराते AhirBuS. 14. 1; तत्र प्रथमोक्तेषु ह्रासहेतुषु कार्यकारणभावेऽपि सत्यज्ञानतिमिरतिरोधीयमानज्ञानालोको लोको विरुद्धत्वमभिमन्यते TattvSaṁPañ. 157. 3 (*on* 442); सत्यमेकत्वमज्ञानतिमिरतिरोहितं परमभिध्यायत: अभिव्यज्यते BrahmSūBh.(Bhā.) 162. 6 (*on* iii. 2. 5); अज्ञानतिमिराच्छन्नो ज्ञानं प्राप्नोति तद्विद: BrahmVaiP. iii. 42. 34; iii. 44. 64; iii. 40. 91; अज्ञानतिमिरस्यैश्वर्यमहाग्रहस्य च समवाय: YaśasCam. ii. 66. 6; अज्ञानतिमिरच्छन्ने जगत्कारागृहान्तरे (भ्राम्यन्न मुक्तिमाप्नोति) SkandP. ii(2). 27. 34; iii(1). 26. 116; iv. 36. 1; अज्ञानतिमिरान्तरितदृष्टे: ··· मे पुनरात्मलाभेन प्रसीदतु भगवान् UdaySuKa. 142. 17; अज्ञानतिमिरं हत्वा नवभानुरिव प्रभो PārśvC. 1. 650; DīpKa. 1. 7 (*on* 1. 1); VīraBhā. 4. 25; **ii** amaurosis (*timira*) in the form of ignorance अज्ञानतिमिरोपेतान् संदेहपटलान्वितान् । निरामयान् य: कुरुते शास्त्राञ्जनशलाकया BṛhaSm. 16. 96; शास्त्राञ्जनेन योऽज्ञानतिमिरं विनिपातयेत् JayāS. 1. 65; अज्ञानतिमिरयोगादेकमपि स्वं स्वभावमात्मानम् । ग्राह्यग्राहकनानावैचित्र्येणावबुध्येत ParamāSā. 25.

अज्ञानतिमिरान्ध (ajñānatimirāndha) *adj.* **i** blinded by the darkness of ignorance अज्ञानतिमिरान्धस्य कावस्था जगतो भवेत् MahāBhā. i. 66*(2); अज्ञानतिमिरान्धानां जनानामविवेकिनाम् । शास्त्रपीठप्रतिष्ठानात् ज्ञानमेति च निर्मलम् PauṣkS. 41. 95; अज्ञानतिमिरान्धस्य मद्यपानरतस्य च ĀpaSm. 8. 16; दृष्टमपि येन न दृष्टं तस्याज्ञानतिमिरान्धस्य किं क्रियताम् Kād. 288. 21; BṛNāraP. 21. 20; SkandP. ii(2). 33. 1; iv. 40. 152; v(3). 168. 4; अज्ञानतिमिरान्धस्य व्रतेनानेन केशव । प्रसीद संमुखो भूत्वा PadmP. vi. 64. 39; अज्ञानतिमिरान्धानाम् ··· । प्लवो नान्योऽस्ति जगति लिङ्गाराधनमन्तरा S'ivaP. i. 21. 35 (28A. 5); अज्ञानतिमिरान्धोऽपि ।··· शृण्वन्नेतन्महातन्त्रं कर्मबन्धाद्विमुच्यते MahNirvāT. 14. 205; **ii** blinded by amaurosis (*timira*) in the form of ignorance अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नम: BrahmVaiP. iv. 59. 147; SkandP. v(3). 43. 25; BrahmP. 245. 12; अज्ञानतिमिरान्धानाम् ···। नेत्रमुन्मीलितं येन तस्मै श्रीगुरवे नम: KumāPraPra. 35. 8; TantrSā.(K.) 63. 17; अज्ञानतिमिरान्धानां त्वमेव परमाञ्जनम् BṛBrahmS. i. 2. 26.

अज्ञानतिमिरापह (ajñānatimirāpaha) *adj.* dispelling the darkness of ignorance पावनं परमं ज्ञानमज्ञानतिमिरापहम् PauṣkS. 1. 44; तन्निष्ठानामिदं नित्यमज्ञानतिमिरापहम् PāraS. 24. 26; इति संचिन्त्य भगवानज्ञानतिमिरापह: । तमुवाच ··· वसिष्ठ: YogVā. iv. 39. 27; नमस्यामि···। ईश्वराख्यं परं ज्योतिरज्ञानतिमिरापहम् ChandaśCū. 1. 16 (13); KāvyKaVṛ. 12. 24 (1. 2)

अज्ञानतिमिरार्क (ajñānatimirārka) *m.* sun (dispelling) darkness of ignorance अज्ञानतिमिरार्काभै: (कलशै: ईशान: स्नपयामास लिङ्गम्) SkandP. iv. 33. 24.

अज्ञानतिमिरावृत (ajñānatimirāvṛta) *adj.* covered with darkness in the form of ignorance (अगस्त्य:) जन्तूनज्ञानतिमिरावृतान् ··· दृष्ट्वा चिन्तयामास तान् प्रति BrahmāṇḍP. iii. 5. 5; (देवा:) शून्यं गिरिमपश्यन्त ह्यज्ञानतिमिरावृता: VāmaP. 62. 4; यदा शप्तो महादेवो ह्यज्ञानतिमिरावृतै: (ऋषिभि:) SkandP. vii(1). 304. 8.

अज्ञानतिमिरोद्भूति (ajñānatimirodbhūti) *f.* rise of the darkness of ignorance अज्ञानतिमिरोद्भूतिदूषिताशयलोचन: । जन: ··· प्रायो वस्तु न पश्यति SkandP. i(3B). 9. 32.

अज्ञानतिरोभाव (ajñāna-tirobhāva) *m.* disappearance of ignorance अथाज्ञानतिरोभावार्थमुपादानमिति NyāyVār. 490. 5 (*on* iv. 1. 99)

अज्ञानतिरोहित (ajñāna-tirohita) *adj.* **A** concealed by ignorance ऐश्वर्यमज्ञानतिरोहितं सद् ध्यानादभिव्यज्यत इत्यवोचत् SaṁkṣeS'ā. 3. 175 (ii. 255. 8); अनुभूयते हि स्वयंज्योतिषोऽपि भोक्तुर्देहादिसंघाताद्व्यावृत्तत्वमज्ञानतिरोहितमेव VivaPraSaṁ. 61. 11; 'अस्य महिमानमिति' इत्यस्याज्ञानतिरोहितब्रह्मभावाविर्भावपरत्व एव साङ्गत्यात् S'ivārkaMaDī. i. 406. 32 (*on* i. 3. 6); **B** overpowered by ignorance सच्चित्सदानन्दकृतस्वरूपं अभे(? वे)द्यमज्ञानतिरोहितानाम् । ···प्रणता: स्म देवम् BṛNāraP. 15. 64.

अज्ञानतुम्ब (ajñāna-tumba) *adj.* having the nave of ignorance अज्ञानतुम्बम्···मोहाभिरागप्रतिबद्धनेमिम् ।··· संसारचक्रं समनुर्जिगाय (? स मुनि°) VarāṅgaC. 31. 32.

अज्ञानतुल्य (ajñāna-tulya) *adj.* equal to ignorance एक: शत्रुर्न द्वितीयोऽस्ति शत्रुरज्ञानतुल्य: पुरुषस्य राजन् SaṁkṣeS'ā. 1. 321 (i. 24. 23)

अज्ञानत्व (ajñāna-tva) *n.* **i** the state of having ignorance अज्ञानत्वं च मूकत्वमित्याद्यास्तामसा: स्मृता: (व्याधय:) SaurP. 13. 11; विष्णुब्रह्मसूर्या मयि देवबोधे क्रुद्धे सति अज्ञानत्वान्न का: न वादिन: PrabhāC. 173. 18; यथा लोष्टो लुठद्वृक्षं वञ्चयित्वाशु गच्छति । अज्ञानत्वेऽजपशवस्तथा ह्यस्ति पुरादिकम् YogVā. iii. 57. 41; अज्ञानत्वा(? °ज्ञाना)द्वे शते दण्ड्य: ManvaMu. 311. 9 (*on* 8. 121); अहो मम अज्ञानत्वम् KathāK. 94. 7; **ii** the state of non-knowledge, the nature of being different from knowledge अज्ञानत्वे परिज्ञाते तदा स्यात्स्वविरोधिता S'ivDṛ. 4. 25; अज्ञानत्वे वा न ज्ञानोपादानत्वम् NyāyVārPari. 517. 2; इदंता हि अज्ञानत्वम् PratyabhiVi. i. 75. 3 (*on* i. 1. 4); जडत्वमप्यज्ञातृत्वं वा अज्ञानत्वं वा Nyāyāmṛ. 68B. 7; अविद्यावृत्तेरज्ञानत्वे ज्ञानस्यौत्सर्गिकं प्रामाण्यमिति विरुध्येत AdvaiSi. 654. 15; 295. 1; **iii** nature of ignorance (as a positive entity) अज्ञानत्वविरुद्धधर्मवत्तया वा अधिष्ठानज्ञानम् AdvaiSi. 650. 10; **iv** the state or nature of nescience अवस्थासु अज्ञानत्वरूपाखण्डधर्मानङ्गीकारात् GuruCandr. ii. 151. 15; i. 103. 5; अज्ञानमिति प्रत्यये ··· विषयविशेषाश्रितमज्ञानत्वरूपाखण्डधर्मविशिष्टं विषय: LaCandr. 550. 26; 299. 10.

अज्ञानत्वजाति (ajñānatva-jāti) *f.* generic quality of nescience नञ्पूर्वकजानातेरज्ञानत्वजातिमति लक्षणया तादृशज्ञानस्य तद्विषयकत्वात् LaCandr. 550. 30; 564. 20.

अज्ञानत्वप्रसङ्ग (ajñānatva-prasaṅga) *m.* possibility of being of the nature of what is different from knowledge सर्वात्मना हि सारूप्ये ज्ञानमज्ञानतां व्रजेत् (v. l. न च सर्वात्मना साम्यमज्ञानत्वप्रसङ्गत:) न च केनचिदंशेन सर्वं सर्वस्य वेदनम् PramāVār. 3. 435; निर्विषयत्वेनाज्ञानत्वप्रसङ्गात् NyāySiA. 242. 22; तद्वदेवाज्ञानत्वप्रसङ्गात् NyāyPari. 483. 21.

अज्ञानत्वप्रसिद्धि (ajñānatva-prasiddhi) *f.* common knowledge of being of the nature of ignorance ननु भ्रान्तिरेवाज्ञानम्, तस्या अज्ञानत्वप्रसिद्धे: IṣṭaSi. 48. 12.

अज्ञानत्वप्राप्ति (ajñānatva-prāpti) *f.* contingency of being nescience

-न तावज्ज्ञाननिवर्त्यमज्ञानम् पूर्वज्ञानस्यापि तन्निवर्त्यस्याज्ञानत्वप्राप्तेः TattvPradī.(Ci.) 54. 12.

अज्ञानत्वशून्यत्व (ajñānatvaśūnya-tva) *n.* the state of being devoid of the nature of nescience अनीदृक्त्वात् अज्ञानत्वशून्यत्वात् LaCandr. 488. 16.

अज्ञानत्वहेतु (ajñānatva-hetu) *m.* reason in the form of nescience अज्ञानत्वहेतोर्व्यभिचारः LaCandr. 302. 7.

अज्ञानत्वानधिकरणत्व (ajñānatvānadhikaraṇa-tva) *n.* the state of not being the substratum of the state of ignorance न चाज्ञानत्वानधिकरणत्वमुपाधिः Nyāyāmr. 301B. 8.

अज्ञानत्वापत्ति (ajñānatvāpatti) *f.* **i** contingency of being nescience तस्या भ्रमोपादानत्वेऽज्ञानत्वापत्तेः GuruCandr. ii. 155. 23; शक्तेर्भ्रमोपादानत्वेऽज्ञानत्वापत्तेः LaCandr. 489. 14; **ii** contingency of the state of non-knowledge ज्ञानस्यापि … ज्ञेयत्वे घटवदज्ञानत्वापत्तेः SarvaMaSaṁ. 33. 12.

अज्ञानत्वाभाव (ajñānatvābhāva) *m.* absence of the nature of nescience त्वदुक्तलक्षणस्यापि तस्याज्ञानत्वाभावात् TattvPradī.(Ci.) 55. 1.

अज्ञानत्वाभिमत (ajñānatvābhimata) *adj.* accepted as non-knowledge एवं च तस्याज्ञानत्वाभिमतस्य ज्ञानत्वाभावादर्थत्वमेवापन्नम् Kāśi. ii. 153. 12 (*on* 5. 143)

अज्ञानत्वायोग (ajñānatvāyoga) *m.* impossibility of the state of ignorance चैतन्याज्ञानयोरविरोधे ज्ञानत्वाज्ञानत्वायोगस्योक्तत्वात् Nyāyāmr. 364B. 5.

अज्ञानत्वाविशेष (ajñānatvāviśeṣa) *m.* non-difference in (the case of) the state of non-knowledge एवमज्ञानत्वाविशेषेऽपि … केचिदवश्यसंवेद्याः NyāyVārPari. 522. 3.

अज्ञानत्वाश्रय (ajñānatvāśraya) *m.* locus of the nature of ignorance अज्ञानत्वाश्रययोग्यव्यक्त्यन्तरस्य चाभावाच्च Nyāyāmr. 344A. 5.

अज्ञानदन्त (ajñāna-danta) *adj.* possessed of tusk in the form of ignorance ज्ञानाश्वत्थं निहन्ति…मनोवारणोऽज्ञानदन्तः VairāS.(Ja.) 97.

अज्ञानदम्भतस् (ajñānadambha-tas) *adv.* by feigning ignorance अज्ञानदम्भतः सर्वप्रकारैस्ते निषेधिताः PrabhāC. 181. 5.

अज्ञानदर्शन (ajñāna-darśana) *n.* discerning of ignorance जीवानामेवाज्ञानदर्शनाद् ब्रह्मणः सर्वज्ञत्वदर्शनात् AṇuBh. 81. 24 (*on* i. 3. 15)

अज्ञानदशा (ajñāna-daśā) *f.* the state of nescience शब्दश्रवणयोग्यमित्यज्ञानदशायां कार्यकरत्वात् सत्यत्वमुक्तम् VedāntKa. 223. 17 (*on* i. 4. 22); प्रियामरणहेतोरपि तत्त्वेनाज्ञानदशायाम् … कर्तव्यत्वदर्शनेन व्यभिचारात् AdvaiSi. 698. 8.

अज्ञानदाह (ajñāna-dāha) *m.* burning off (i. e. destruction) of nescience ज्ञानादज्ञानदाहेष्टेर्मुक्तिस्तेनापि योक्ष्यते IṣṭaSi. 362. 18; ज्ञातो ह्यात्मा अज्ञानदाह इत्युक्तम् IṣṭaSi. 371. 6; 76. 20; SaṁkṣeŚā. 4. 22 (ii. 372. 13)

अज्ञानदीर्घनिद्रा (ajñāna-dīrghanidrā) *f.* long sleep in the form of nescience अज्ञानदीर्घनिद्रामोहिताः सन्तः कथंचिदिव ब्रह्मतत्त्वम्…विद्युः BṛĀraU-Bh. 634. 11 (*on* iv. 4. 14)

अज्ञानदुःखौघ (ajñāna-duḥkhaugha) *m.* aggregate of miseries caused by nescience विधूयाज्ञानदुःखौघं मोक्षानन्दं समश्नुते NirguMāPū. 33.

अज्ञानदुर्ग्रह (ajñāna-durgraha) *m.* evil planet of ignorance दुर्निमित्तं समालोच्य तेन ते स्यातुमर्थिताः । अज्ञानदुर्ग्रहग्रस्ता न व्यलम्बन्त सत्वराः BṛKathā-Mañ. vii. 1. 381.

अज्ञानदूरीकरण (ajñāna-dūrīkaraṇa) *n.* removal of ignorance अज्ञानदूरीकरणं मानसं शौचमान्तरम् SarvaVeSāSaṁ. 115.

अज्ञानदृश् (ajñāna-dṛś) *adj.* possessed of eyes in the form of ignorance न लक्ष्यसेऽज्ञानदृशां शैलूष इव रूपधृक् AdhyāRā. iv. 6. 64.

अज्ञानदोष (ajñāna-doṣa) *m.* **i** ignorance as a fault अज्ञानदोषतो नाशं मा नैषीस्त्वैव जातुचित् । सुहृदम् PadmP.(Ra.) 47. 112; LiṅgaP. i. 86. 21; अन्येषां शास्त्रकर्तृणाम्…अज्ञानदोषदुष्टत्वात्तदुक्तेर्न प्रमाणता DevīBhāP. vii. 39. 19; GaṇeP. i. 61. 44; एतन्महाकष्टं जन्म दुःखं प्रकीर्तितम् । पुंसामज्ञानदोषेण ŚivaP. v. 23. 34 (432B. 13); ध्यात्वेत्यज्ञानदोषेण निदानं क्षुन्निदानतः । भवे भवेऽस्य भूयासं वधायेति व्यधादयम् SamarāSaṁ. 1. 194; BālamBha. iii. 202. 6 (*on* 3. 327); ŚivS. 1. 43; **ii** fault committed through ignorance अज्ञानात् कुशास्त्रसंस्काराद्धिंसादिष्वधर्मस्वरूपेषु धर्मबुद्ध्या या प्रवृत्तिस्तल्लक्षणो दोषः अज्ञानदोषः AupaSūṬ. 83. 4; SthānṬ. 190A. 3.

अज्ञानद्वारक (ajñānadvāra-ka) *adj.* [*f.* -ikā] **i** brought about by the absence of knowledge (भागासिद्धौ) अज्ञानद्वारिकायां त्वविषयवृत्तित्वं, अज्ञानं हि पक्षादेर्दोषः TārkiRa. 280. 12; **ii** brought about by ignorance यत्र तु पूर्ववादिनः पित्रर्णादिग्रहणहेतुकधारणादिप्रतिज्ञा तत्राज्ञानद्वारकः साक्षाद्वा तदपह्नवो मिथ्योत्तरम् VīraMi. (Vyavahāra.) 58. 10.

अज्ञानद्वारा (ajñāna-dvārā) *adv.* [Inst.] through ignorance or nescience केवलस्य घटस्य साक्षिवेद्यत्वाभावेऽपि अज्ञातत्वधर्मविशिष्टस्याज्ञानद्वारा … प्रतीतिरुपपद्यते VivaPraSaṁ. 20. 10; ज्ञानस्याज्ञानद्वारैवान्यविरोधित्वेन Nyāyāmr. 228B. 5.

अज्ञानद्वैविध्य (ajñāna-dvaividhya) *n.* twofold nature of ignorance ननु शुक्त्यज्ञानमपि शुक्त्यवच्छिन्नचैतन्यगतं वाच्यम् … अहं न जानामीति ज्ञातृस्थत्वानुभवविरोध इति चेन्न अज्ञानद्वैविध्यात् AdvaiSi. 578. 18.

अज्ञानधर्षित (ajñāna-dharṣita) *adj.* overpowered by ignorance संसाराङ्गारमध्यस्थाः पच्यमानाः स्वकर्मणा । सुखाभिमानिनो दुःखे नित्यमज्ञानधर्षिताः LakṣmiT. 13. 4.

अज्ञानधी (ajñāna-dhī) *f.* **i** idea of ignorance यथोष्णेऽनुष्णधीर्नास्ति ज्ञानेऽप्यज्ञानधीस्तथा ŚlokaVār. 5(3). 146 (308. 1); **ii** perception of nescience चिदात्मत्वात् स्वतो भाति सुखमज्ञानधीस्ततः PañcDa. 11. 60.

अज्ञानधूर्त (ajñāna-dhūrta) *m.* rogue in the form of nescience or ignorance चिरमज्ञानधूर्तेन पोथितोऽसि … । वृकेन दृप्तेनाटव्याम् … पशुपोतकः YogVā. v. 52. 46.

अज्ञानध्वंस (ajñāna-dhvaṁsa) *m.* destruction of nescience अज्ञानध्वंसकारित्वान्मोक्षो ज्ञानस्य भण्यते । उपचारात् कार्यमिति BṛĀraUBhVā. iii. 3. 90; अज्ञानध्वंसोचिता स्वाभाविकी ब्रह्मात्मता व्यवतिष्ठते PrakaVi. 66. 23; अज्ञानध्वंस प्रागेव सिद्धत्वे श्रवणादिवैयर्थ्यम् Nyāyāmr. 632A. 8; 426B. 5; अज्ञानध्वंसलक्षण एव तत्कार्यस्य जीवेशभेदादेश्च ध्वंस एक इत्येकैव तदीया तेषु … प्रतियोगितेति नाज्ञानभिन्नाव्याप्तिः GuruCandr. i. 96. 11; i. 127. 17.

अज्ञानध्वंसक (ajñānadhvaṁsa-ka) *adj.* destroyer of nescience यत्तत्तु वृत्तिजं ज्ञानं विज्ञानं ज्ञानमात्रकम् । अज्ञानध्वंसकं ज्ञानं विज्ञानं चोभयात्मकम् SadācāAnu. 49.

अज्ञानध्वंसिन् (ajñānadhvaṁs-in) *adj.* destroyer of nescience अज्ञानध्वंसि विज्ञानं न च कारकरूपताम् । गृहीत्वेह तमो हन्ति BṛĀraUBhVā. iv. 4. 942.

अज्ञानध्वस्तिवर्त्मन् (ajñānadhvasti-vartman) *n.* path of the destruction of nescience दशमोऽस्मीत्यतो ज्ञानादज्ञानध्वस्तिवर्त्मना । दशमाप्तिवदाप्तिः स्यात् TaiUBhāVā. 47. 1(2)

अज्ञानध्वान्त (ajñāna-dhvānta) *n.* darkness in the form of ignorance अज्ञानध्वान्तविध्वंसप्रचण्डमतिभास्करम् । आत्मनो ब्रह्मताज्ञानं नीराजनमिहात्मनः NirguMāPū. 24; ज्ञानम्…अज्ञानध्वान्तसन्तानप्रक्षयानन्तरोद्भवम् MahāP. 24. 118; न लक्ष्यसे । अज्ञानध्वान्तचित्तानाम् AdhyāRā. i. 3. 25; अनन्तस्य कथामेतामज्ञानध्वान्तनाशिनीम् । … प्रपठन् … बन्धाद्विमुच्यते KalkiP. ii. 5. 43; गुरुरत्र भवेदज्ञानध्वान्तपतितस्य YogŚā. 12. 16; अथोद्याने समाजग्मुः श्रीगुणन्धरसूरयः । अज्ञानध्वान्तहरणे सूरयः UttaKuC. 518; नतोऽसि वाङ्मनःकायैरज्ञानध्वान्तभास्करम् YogSā. 1. 6(1)

अज्ञाननानात्व (ajñāna-nānātva) *n.* plurality of nescience अज्ञाननानात्वाज्जीवनानात्वम् SiddhāBi. 47. 4.

अज्ञाननामन् (ajñāna-nāman) *adj.* ignorance by name, called ignorance मायीयकार्ममलमूलमुशन्ति तावद् अज्ञाननाममलमाणवमेव भद्राः Parā-Tri. 111. 13.

अज्ञाननाश (ajñāna-nāśa) *m.* destruction of ignorance or nescience ननु तेऽज्ञाननाशोऽपि सत्यश्चेद् द्वैतसत्यता IṣṭaSi. 364. 2; 373. 18; अज्ञाननाशपदमत्र हि मुख्यमिष्टम् SaṁkṣeŚā. (1. 213) i. 167. 7 (3. 111); ii 215. 4; BṛNāraP. 31. 146; दोषनाशे यथा शुक्ळो गृह्यते रोगिणा स्वयम् । शुक्लज्ञानात्तथाज्ञाननाशादात्मा तथा कृतः ŚivS. 1. 44; ज्ञानादज्ञाननाशेन लब्धमेव हि लभ्यते DevīBhāP. vii. 37. 33; vii. 34. 6; GaṇeP. i. 91. 48; PañcDa. 7. 92; चैत्रस्याज्ञाननाशेऽपि मैत्रस्य तदनाशात् Nyāyāmr. 227B. 7; 633B. 11; ज्ञानजन्योऽज्ञाननाशः GuruCandr. ii. 408. 19; ii. 155. 9; वृत्तेर्हि नाज्ञाननाशे हेतुत्वम् LaCandr. 482. 40; 500. 21; 562. 33; पादध्यानेनाज्ञाननाश इति भावः LalitāSaBh. 36. 31 (*on* 70)

अज्ञाननाशक (ajñāna-nāśaka) *adj.* [*f.* -ikā] destroyer of ignorance or nescience अज्ञाननाशकं नास्ति जटातीर्थाद्विते द्विजाः SkandP. iii(1). 20. 2; अज्ञाननाशक(म)मलं च दिनेशतुल्यमानन्दकन्दमखिलं महिमासमेतम् । तम् … प्रगाये PadmP. ii. 20. 21; अविद्यावृत्तिस्तावन्नाज्ञाननाशिका AdvaiSi. 655. 4; LalitāSaBh. 141. 9 (*on* 182); वृत्तिज्ञानमज्ञाननाशकम् GuruCandr. ii. 130. 8; LaCandr. 591. 30.

अज्ञाननाशकज्ञान (ajñānanāśaka-jñāna) *n.* knowledge which destroys ignorance or nescience अधिष्ठानज्ञानत्वं हि अज्ञाननाशकज्ञानत्वं वा AdvaiSi. 529. 15; अज्ञाननाशकज्ञाननिवर्त्यत्वेन मिथ्यात्वनिर्वाहः LaCandr. 758. 39;

प्रमेयतया अज्ञाननाशकज्ञानविषयतया LaCandr. 691. 42.

अज्ञाननाशकता (ajñānanāśaka-tā) *f.* the state of being the destroyer of ignorance or nescience न च ज्ञानस्य अज्ञाननाशकतापि प्रमाणसिद्धा JñānBiPra. 29. 12.

अज्ञाननाशकत्व (ajñānanāśaka-tva) *n.* the state of being the destroyer of nescience असदर्थस्यैव ··· अज्ञाननाशकत्वम् VedāntRaMañ. 1. 1 (10. 5); साधकत्वं साक्षिणोऽज्ञाननाशकत्वेऽनुपपन्नम् GuruCandr. ii. 376. 17; चैतन्यनिष्ठाया: प्रमाणजन्यापरोक्षान्त:करणवृत्तेरेव अज्ञाननाशकत्वाङ्गीकारेऽपि न दोष: JñānBiPra. 24. 21; तस्य मन्दबुद्धीनाम्···अज्ञाननाशकत्वासामर्थ्यात् SiddhāBi. 10. 6; अन्यथा ज्ञानस्य अज्ञाननाशकत्वपक्षे घटाभाववानयं घटवानयमिति ज्ञानस्य दुर्वारत्वात् GuruCandr. i. 130. 16; ब्रह्मान्यज्ञानमात्रस्याज्ञाननाशकत्वप्रसङ्गात् GuruCandr. ii. 157. 12; शुक्त्यादिज्ञानस्याप्यज्ञाननाशकत्वस्वीकारात् GuruCandr. ii. 157. 14.

अज्ञाननाशकनाश्यत्व (ajñānanāśakanāśya-tva) *n.* the state of being destroyable by the destroyer of nescience अज्ञानप्रयुक्तत्वेनाज्ञाननाशकनाश्यत्वात् GuruCandr. i. 166. 20.

अज्ञाननाशकभेद (ajñānanāśaka-bheda) *m.* a variety of what destroys nescience व्यञ्जकेति···अज्ञाननाशकभेदेनेति यावत् LaCandr. 655. 15.

अज्ञाननाशकवृत्ति (ajñānanāśaka-vṛtti) *f.* mental modification which destroys nescience व्यञ्जकेति । अज्ञाननाशकवृत्तीत्यर्थ: LaCandr. 655. 15; व्यञ्जकभेदेन अज्ञाननाशकवृत्तिभेदेन GuruCandr. iii. 183. 22.

अज्ञाननाशकाल (ajñānanāśa-kāla) *m.* time of the destruction of nescience अज्ञाननाशकालेऽपि नष्टक्षणावच्छेदेनाधिकरणस्थूलकालमादाय न जानामीति बुद्ध्यापत्ते: GuruCandr. iii. 37. 17.

अज्ञाननाशकृत् (ajñāna-nāśakṛt) *adj.* destroyer of ignorance or nescience प्रयत्नेन विनाज्ञाननाशकृत् ध्यायिनां महत् PāraS. 6. 199 = 10. 178; आदाय वास्तवं वृत्तं ज्ञानमज्ञाननाशकृत् BṛĀraUBhVā. ii. 4. 197.

अज्ञाननाशत्व (ajñānanāśa-tva) *n.* the state of being the destruction of nescience यदज्ञाननाशत्वमज्ञानप्रयुक्तनाशत्वं च तयोरन्यतरत्वं वा LaCandr. 175. 4; 500. 20; वृत्तेरज्ञाननाशत्वपक्षेऽपि तेन रूपेण वृत्तिप्रयुक्तत्वात् फलत्वम् GuruCandr. ii. 159. 20.

अज्ञाननाशद्वार् (ajñānanāśa-dvār) *f.* [Instr.] by means of the destruction of nescience तच्च अज्ञाननाशद्वारा ज्ञाने तमोनाशाधीनचाक्षुषद्वारा आलोके च बोध्यम् GuruCandr. ii. 415. 14; प्रपञ्चे साक्षात् कल्पने गौरवस्योक्तत्वेनाज्ञाननाशद्वारैव तद्वाच्यम् LaCandr. 573. 28.

अज्ञाननाशद्वारक (ajñānanāśadvāra-ka) *adj.* chanelled through the destruction of nescience तच्च ज्ञाने अज्ञाननाशद्वारकमालोके च तमोनाशजन्यचाक्षुषद्वारकम् LaCandr. 565. 17.

अज्ञाननाशन (ajñāna-nāśana) *adj.* destroying ignorance भगवंस्त्वत्प्रसादेन ज्ञातो ह्यज्ञाननाशन: । ··· हृद्याग: JayāS. 13. 4; PāraS. 6. 2; तीर्थमज्ञाननाशनम् । एतद्विनिर्मितं साक्षाच्छम्भुना SkandP. iii(1). 20. 8; iii(1). 30. 64; पठस्व ··· पुराणम् ··· अज्ञाननाशनं दिव्यं ज्ञानभास्करबोधकम् DevīBhāP. i. 16. 36; AdhyāRā. vi. 5. 1; *n.* destruction of ignorance ते प्रोचु: कीदृश: कोपोऽस्माकमज्ञाननाशने SamarāSam̐. 9. 45; ज्ञातताज्ञातते न स्त: ··· अज्ञाननाशनात् PañcDa. 8. 23.

अज्ञाननाशनाश्यता (ajñānanāśanāśya-tā) *f.* the state of being destroyable by the destruction of ignorance or nescience अज्ञाननाश्यता-(? नाशनाश्यता)वच्छेदकत्वस्य···आवश्यकत्वात् GuruCandr. ii. 186. 11.

अज्ञाननाशनाश्यत्व (ajñānanāśanāśya-tva) *n.* the state of being destroyable by the destruction of nescience शुक्तिरूप्यादेरज्ञानप्रयुक्तत्वादज्ञाननाशनाश्यत्वम् GuruCandr. ii. 314. 20; iii. 27. 16; अज्ञानकल्पितत्वात् अज्ञानप्रयुक्तत्वात् अज्ञाननाशनाश्यत्वात् LaCandr. 586. 12.

अज्ञाननाशित (ajñāna-nāśita) *adj.* destroyed unintentionally न्यासादिकं परद्रव्यं प्रभक्षितमुपेक्षितम् । अज्ञाननाशितं चैव येन दाप्य: स एव तत KātySm. 596.

अज्ञाननाशिनी (ajñāna-nāśinī) *adj.* (*f.*) removing ignorance हे मोहच्छिद् अज्ञाननाशिनि Kāvyānu.(He.) 268. 25; अज्ञाननाशिनी प्रज्ञा CāṇaNīDa. 5. 11.

अज्ञाननाशेष्टि (ajñānanāśeṣṭi) *f.* intention (i. e. acceptance) of the annihilation of nescience भेदस्य मायात्वान्माय्यात्मैकोऽस्त्वबोधदृक् । बोधादज्ञाननाशेष्टेर्मुक्तिस्स्यात् IṣṭaSi. 344. 13.

अज्ञाननाशोत्पत्ति (ajñānanāśotpatti) *f.* origination of the annihilation of nescience ज्ञानोपहितात्मनोऽज्ञाननाशत्वे ज्ञानादज्ञाननाशोत्पत्तिर्न संभवति LaCandr. 500. 35.

अज्ञाननिगूहन (ajñāna-nigūhana) *n.* hiding of ignorance अज्ञाननिगूहनार्थं तु प्रयुक्तज्ञानमेव परिहारेणाविष्करोति NyāyVār. 566. 17 (*on* v. 2. 20)

अज्ञाननिदान (ajñāna-nidāna) *adj.* based on ignorance [WBTF]

अज्ञाननिद्रा (ajñāna-nidrā) *f.* sleep in the form of ignorance or nescience अज्ञाननिद्राशयितो भवता प्रतिबोधित: । सर्वप्राणिवधादेष विरतोऽद्यप्रभृत्यहम् Nāgā. 5. 25; अज्ञाननिद्राया: प्रबुद्धो जागर्ति संयमी GītāBh.(S'an̐.) 68. 14 (*on* 2. 69); जाग्रत अज्ञाननिद्राया घोररूपाया: ··· क्षयं कुरुत KāṭhUBh. 145. 19 (*on* 3. 14); अज्ञाननिद्रया सुप्तं धर्मवाक्यानिलै: प्रबोधयेत Bārhas. 2. 66; चिरश्रुतिश्चाज्ञाननिद्राभिहननापनयनमात्रविलम्बिकैवल्याभिप्रायत्वाद्युक्ततरा PañcPra. 25. 2 (comm. अज्ञानमेव महती निद्रा सैवाभिहननमात्मनो बन्धनमाच्छादनम्); अज्ञाननिद्राक्षुभितो जीवो यावन्न बोधित: । तावत्पश्यति दुर्भेदं संसारारम्भविभ्रमम् YogVā. iii. 115. 16; (किरातजनमण्डले । हस्तहार्यतम:पिण्डा बभूवासितयामिनी) अज्ञाननिद्रानिबिडा भृङ्गपृष्ठच्छदच्छवि: YogVā. iii. 77. 15; अज्ञाननिद्राविद्राणसुप्रभातमिदं नृणाम् (चरितं कीर्तयिष्यामि श्रीमत्पार्श्वजिनप्रभो:) PārśvC. 1. 15.

अज्ञाननिधि (ajñāna-nidhi) *m.* store of ignorance, ignorant person सलीलमामीलितभीमचक्षुश्श्रुश्रवा वा सुकथाप्रसङ्ग: । सावज्ञमज्ञाननिधिर्व्यसर्पत् सर्पाधिराजोरुधनु:समीपम् SītāSva. 68.

अज्ञाननिन्दा (ajñāna-nindā) *f.* censure of ignorance अथापि ज्ञानप्रशंसा ··· अज्ञाननिन्दा च Nir. 1. 17 (40. 15)

अज्ञाननिन्दित (ajñāna-nindita) *adj.* censured by the ignorant तपश्च विपुलं तप्त्वा देवदानवदुश्चरम् । अर्थदेशादिसंयुक्तं गूढमज्ञाननिन्दितम् LiṅgaP. ii. 20. 10.

अज्ञाननिबन्धन (ajñāna-nibandhana) *adj.* [*f.* -ā] caused by nescience अब्रह्मात्मते यद्वदत्राज्ञाननिबन्धने BṛĀraUBhVā.(Sambandha.) 905; अज्ञाननिबन्धन एव शरीरप्रपञ्चो न वस्तुनिबन्धन: BālaKrī. ii. 33. 16 (*on* 3. 61(?71)); जीवस्य परमात्मना विपरीतमतित्वमज्ञाननिबन्धनम् NyāySu.(Ja.) 508B. 7 (*on* iii. 2. 10); अज्ञाननिबन्धनसंसारहेतुभूतपुण्यापुण्यकर्माचरणतद्विपाकभोगयोगादन्तवत्त्वम्···ईश्वरस्य···स्यात् VedāntKau. 210. 8 (*on* ii. 2. 4)

अज्ञाननिबन्धनत्व (ajñānanibandhana-tva) *n.* the state of being caused by ignorance न स्वपक्षसिद्ध्यसिद्धिनिबन्धनौ जयपराजयौ तयोर्ज्ञानाज्ञाननिबन्धनत्वात् PramāMī. 73. 26 (*on* ii. 1. 35)

अज्ञाननिमित्त (ajñāna-nimitta) *adj.* [*f.* -ā] caused by or based on ignorance or nescience न च अज्ञाननिमित्तं भगवत्प्रतिवचनं कल्पनीयम् GītāBh.(S'an̐.) 80. 3 (*on* 3. 0); अनेकजन्मान्तरसंचितैर्नरो विमुच्यतेऽज्ञाननिमित्तपातकै: UpadeSā. 302. 31; तत्त्वेन ब्रह्मणो नान्यद्वस्त्वन्तरमस्ति···। कथं तर्हि विज्ञानात्मनां नानेवोपलब्धि: । अज्ञाननिमित्तैव सा BālaKrī. ii. 31. 16 (*on* 3. 66); कर्मनिमित्तो बन्ध: कर्म त्वज्ञाननिमित्तम् NyāyRa. 668. 20 (*on* 5 (15). 101); वैलक्षण्यमात्मनो ब्रह्मणश्चान्यत्वमत्यन्तमविद्यमानमेवाज्ञाननिमित्तमज्ञाने विनष्टे स्वयमेव विलीयते S'āstrDī. 113. 29 (*on* i. 1. 5); बन्धश्चाज्ञाननिमित्त: NyāyMa. 282. 6; अज्ञाननिमित्तो बन्धो ज्ञाननिमित्तश्च मोक्ष: सुप्रसिद्ध: TattvPrakā. 151A. 2 (*on* iii. 2. 5)

अज्ञाननिमित्तता (ajñānanimitta-tā) *f.* the state of being caused by ignorance ज्ञानाज्ञाननिमित्ततया प्रतीतयोरपि स्वप्नाविर्भावतिरोधानयो: परमात्माधीनत्वमेव TattvPrakā. 151A. 4 (*on* iii. 2. 5)

अज्ञाननिमित्तत्व (ajñānanimitta-tva) *n.* the state of being caused by ignorance अज्ञाननिमित्तत्वात्स्वप्नप्रतीतेस्तत्तिरोधानं ज्ञानेन युक्तम् TattvPrakā. 151A. 2 (*on* iii. 2. 5); त एव परमाणव: प्रतिसंधीयमाना नाज्ञाननिमित्तत्वेऽवस्थिता: ĀtmaTaVi. 804. 21.

अज्ञाननिम्नपथ (ajñānanimna-patha) *adj.* going down towards wrong knowledge यदस्य अज्ञाननिम्नपथं बहिर्मुखं विषयोपभोगफलं चित्तमासीत् RājMār. 80. 6.

अज्ञाननियम (ajñāna-niyama) *m.* necessary presence of ignorance न चाग्रे वक्ष्यमाणार्थानामारम्भदशायामज्ञाननियम: श्रुतशास्त्रेभ्यस्तदज्ञानसंभवात् S'ivārkaMaDi. i. 83. 5 (*on* i. 1. 1)

अज्ञाननिरास (ajñāna-nirāsa) *m.* removal of ignorance संवेदनस्य प्रकाश्यत्वात् प्रकाशकत्वमसिद्धमिति चेत् न अज्ञाननिरासादिद्वारेण प्रकाशकत्वोपपत्ते: PramāMī. 4. 1 (*on* i. 1. 3); SyādvāMañ. 12 (58); ज्ञानमज्ञाननिरासस्यैव निदानम् PrakaVi. 3. 6.

अज्ञाननिरूपक (ajñāna-nirūpaka) *adj.* correlating non-cognition यदि च विषयसामान्यविशेषितमेव ज्ञानं सुषुप्तावज्ञाननिरूपकं तर्हि तदेव तदा ज्ञानाभावनिरूपकमस्तु Nyāyāmṛ. 316B. 9.

अज्ञाननिरोधित्व (ajñānanirodhi-tva) *n.* the state of obstructing nescience अज्ञाननिरोधित्वलक्षणं प्रकाशकत्वं रूपं प्रत्येव AdvaiSi. 485. 2.

अज्ञाननिर्भासा (ajñāna-nirbhāsā) *adj.* (*f.*) manifesting non-cognition बुद्धिरज्ञाननिर्भासा तवाज्ञानं प्रकल्पितम् । ततश्च ज्ञानमेवैकमपोह्यत्वेन संमतम् S'lokaVār. 5(3). 139 (306. 3)

अज्ञाननिर्माल्य (ajñāna-nirmālya) *n.* ignorance (nescience ?) in the form of remains of offering देहो देवालयः प्रोक्तो जीव एव महेश्वरः । त्यजेदज्ञाननिर्माल्यं सोऽहंभावेन योजयेत् BrahmāṇḍP. iii. 43. 53; KulārT. 9. 41.

अज्ञाननिर्हरण (ajñāna-nirharaṇa) *n.* removal of ignorance (nescience) अज्ञाननिर्हरणस्य च प्रसक्तत्वेन प्रसङ्गदोषाभावात् TattvPrakā. 3A. 1 (*on* i. 1. 0)

अज्ञाननिवर्तक (ajñāna-nivartaka) *adj.* [*f.* -ikā] which removes ignorance, dispeller of nescience अज्ञाननिवर्तकान्येव सर्वाणि ज्ञानान्येष्टव्यानि IṣṭaSi. 64. 9; अज्ञाननिवर्तकाभिमतप्रमाणज्ञानाभावस्तावत् त्वयाभ्युपगन्तव्यः S'rutaPra. iB. 14. 5 (*on* i. 1. 1); VivaPraSaṁ. 60. 20; अज्ञाननिवर्तकादन्यस्य च ज्ञानस्यानुपलम्भात् त्वयापि ··· वृत्तिप्रतिबिम्बितस्य घटानधिष्ठानस्य चैतन्यस्यैव घटानुभवत्वोक्तेश्च Nyāyāmṛ. 200A. 5; 338A. 6; 607B. 7; अज्ञानावृतत्वात् घटवदज्ञाननिवर्तकान्तरापेक्षा चेत्तर्हीष्टापत्तिः वृत्तेरेवापेक्षणात् AdvaiSi. 590. 28; शुद्धब्रह्माकारा चित्तवृत्तिः निष्प्रकारिकेवाज्ञाननिवर्तिका AdvaiSi. 678. 5; 654. 8; SiddhāLeSaṁ. 144. 2; 407. 3; एवं चाज्ञानानुमाने वृत्तिरेव प्रमात्वेनाज्ञाननिवर्तिका GuruCandr. iii. 39. 23; ii. 322. 9; ii. 368. 16; सप्रकारं निष्प्रकारं वा ब्रह्मज्ञानं अज्ञाननिवर्तकमिति वक्तव्यम् JñānBiPra. 26. 14; 23. 25.

अज्ञाननिवर्तकता (ajñānanivartaka-tā) *f.* the state of being the dispeller of nescience नन्वहं मनुष्य इत्यादिव्यावहारिकसंघातज्ञानस्य प्रमाणाजन्यत्वात् कथमज्ञाननिवर्तकता SiddhāBi. 113. 3; ब्रह्मज्ञानस्य जातिविशेषादिनैव अज्ञाननिवर्तकतावश्यकत्वस्योक्तत्वात् GuruCandr. i. 147. 22; 'अहं ब्रह्म मूलाज्ञानतत्कार्ये ज्ञाते' इत्यादिसमूहालम्बनस्याप्यज्ञाननिवर्तकतायां बाधकाभावात् LaCandr. 253. 13; 682. 33; 886. 36.

अज्ञाननिवर्तकत्व (ajñānanivartaka-tva) *n.* the state of being the dispeller of ignorance (nescience?) अज्ञाननिवर्तकत्वात् ज्ञानस्य BṛĀraUBh. 388. 8 (*on* iii. 3. 1); तुल्यमेतत्तवापि, अज्ञाननिवर्तकत्वात्सर्वज्ञानानां बाधकत्वप्रसङ्गात् IṣṭaSi. 94. 12; 72. 12; 199. 17; अज्ञानम्···ज्ञातयैव भवितुमर्हति ज्ञानस्य स्वाश्रय एवाज्ञाननिवर्तकत्वव्याप्तेः S'atDū. 107. 11; VivaPraSaṁ. 60. 18; AdvaiSi. 253. 1; 562. 10; 590. 23; 654. 14; 776. 7; अविद्याहङ्कारसुखदुःखादितद्धर्मप्रत्यक्षस्याज्ञाननिवर्तकत्वानभ्युपगमात् SiddhāLeSaṁ. 153. 1; कवितार्किकचक्रवर्तिनृसिंहभट्टोपाध्यायास्तु ··· रजतोत्पत्तेः प्रागिदमाकारवृत्तिरेव नास्तीति तस्या अज्ञाननिवर्तकत्वसदसद्भावविचारं निरालम्बनं मन्यन्ते SiddhāLeSaṁ. 188. 3; 144. 8; 152. 8; 211. 5; 225. 1; चरमवृत्तावपि अज्ञाननिवर्तकत्वाय चित्प्रतिबिम्बावश्यकत्वात् GuruCandr. i. 157. 15; i. 130. 24; ii. 141. 13; शुद्धब्रह्मणो यत् वृत्त्युपहितं रूपं तद्विषयकवृत्तेरेवाज्ञाननिवर्तकत्वात् LaCandr. 251. 16; 253. 12; 482. 31; 531. 18; 678. 21; अज्ञाननिवर्तकत्वं तु घटादिज्ञानवदस्त्येव SiddhāTa. 53. 25; निष्प्रकारकज्ञानस्य कुत्रापि अज्ञाननिवर्तकत्वं दृष्टमिति शुद्धब्रह्मज्ञाननिवृत्तिः JñānBiPra. 26. 17; 23. 31.

अज्ञाननिवर्तकप्रमा (ajñānanivartaka-pramā) *f.* valid knowledge which dispels nescience अज्ञाननिवर्तकप्रमायां घटकान्तरापेक्षेत्यर्थः GuruCandr. iii. 41. 16; अज्ञाननिवर्तकान्तरेति । अज्ञाननिवर्तकप्रमाघटकान्तरेत्यर्थः LaCandr. 590. 42.

अज्ञाननिवर्तकप्रमिति (ajñānanivartaka-pramiti) *f.* valid knowledge which dispels nescience न च रामशब्दस्य पदत्वात्कथमज्ञाननिवर्तकप्रमितिजनकत्वमिति वाच्यम् VīraMi.(Bhakti.) 39. 19.

अज्ञाननिवर्तकवृत्ति (ajñānanivartaka-vṛtti) *f.* modification or state of mind or internal organ which dispels nescience अज्ञाननिवर्तकवृत्तिविषयत्वयोग्यत्वस्यापरोक्षव्यवहारयोग्यपदेन विवक्षितत्वात् AdvaiSi. 288. 3; तथा चोपाध्यन्तरेत्यस्याज्ञाननिवर्तकवृत्तिविषयत्वेन संभवदुपाध्यन्तरेत्यर्थः LaCandr. 252. 9.

अज्ञाननिवर्तन (ajñāna-nivartana) *n.* termination of nescience ज्ञानस्य स्वप्रागभावनिवर्तन इवाज्ञाननिवर्तनेऽपि प्रतिबन्धायोगात् Nyāyāmṛ. 639B. 11; प्रकृते च निर्विकल्पको वाक्यार्थबोधः । तस्यैव प्रमात्वेनाज्ञाननिवृत्ति(v. l. °निवर्तन°)सामर्थ्यात् SiddhāBi. 9. 5; अव्यवहितज्ञानेनापि अज्ञाननिवर्तनात् AdvaiSi. 654. 11.

अज्ञाननिवृत्ति (ajñāna-nivṛtti) *f.* termination or elimination of ignorance or nescience आचार्यमुपसङ्गम्योत्पन्नषट्पदार्थज्ञानस्याज्ञाननिवृत्तौ विरक्तस्य रागद्वेषाभावात् PadārthaSaṁ. 281. 21; ViṣṇuP. v. 1. 42; न हि अनुपजातविशेषस्याज्ञाननिवृत्तिर्युक्ता NyāyVār. 490. 6 (*on* iv. 1. 49); तेनाज्ञाननिवृत्तौ हि ज्ञानेऽन्यार्थः प्रसज्यते S'lokaVār. 5(3). 138 (306. 1); BṛĀraUBh. 388. 19 (*on* iii. 3. 1); अज्ञाननिवृत्तिरेव भ्रमनिवृत्तिः तच्छरीरत्वात्तस्य IṣṭaSi. 83. 4; 187. 10; अज्ञाननिवृत्तेश्च सम्यग्ज्ञानस्वरूपलाभमात्रहेतुत्वात्तदुपादानम् NaiṣkaSi. 4. 1; NyāyKa. 282. 18; न तत्त्वज्ञानमज्ञाननिवृत्तिमात्रेण निःश्रेयसोपयोगि TātpaṬ.(Vā.) 638. 15 (*on* iv. 2. 1); अविद्यानिवृत्तिरेव मोक्षः।···कर्म सकलभेददर्शननिवृत्तिरूपाज्ञाननिवृत्तेः कथमिव साधनं भवेत् S'rīBh. 5. 19 (*on* i. 1. 1); GītāBh.(Rā.) 604. 13 (*on* 15. 15); अज्ञाननिवृत्तिर्वा PramāMī. i. 1. 38 (comm. प्रमाणप्रवृत्तेः पूर्वं प्रमातुर्विवक्षिते विषये यत् 'अज्ञानम्' तस्य निवृत्तिः फलमित्यन्ये); न चाज्ञाननिवृत्तिर्ज्ञाननिवर्त्या ज्ञानजन्यत्वात् TattvPradī.(Ci.) 389. 7; VedāntKa. 150. 18 (*on* i. 3. 2); जडस्याज्ञानप्रसङ्गाभावाच्च अज्ञाननिवृत्तेः पुरुषार्थत्वमपि न स्यात् S'atDū. 172. 13; तत्रानन्तर्येण सर्वप्रमाणानामज्ञाननिवृत्तिः फलम् SyādvāMañ. 17 (165); VivaPraSaṁ. 23. 6; ज्ञानेनाज्ञाननिवृत्तिरिति विशेषव्याप्तिः NyāySu.(Ja.) 19B. 12 (*on* i. 1. 1); 64B. 13 (*on* i. 1. 1); ननु यद्यज्ञाननिवृत्तिरात्मा तदोत्पन्नतत्त्वज्ञानस्य शरीरानुवृत्तिर्न स्यात् SarvaDaKau. 142. 17; 141. 27; 141. 28; अज्ञाननिवृत्तेर्मोक्षत्वेऽपि ··· अज्ञाने च···ब्रह्मस्वरूपत्वस्य मोक्षत्वस्य चादर्शनात् Nyāyāmṛ. 554A. 6; 69B. 7; 228A. 6; 632A. 12; प्रकृते च निर्विकल्पको वाक्यार्थबोधः। तस्यैव प्रमात्वेनाज्ञाननिवृत्तिसामर्थ्यात् SiddhāBi. 9. 5; 10. 7; 63. 1; 115. 5; अनृतव्यावृत्त्यज्ञाननिवृत्त्योरज्ञानादिप्रकाशरूपज्ञानस्य च ब्रह्मरूपत्वे अनृतादीनामपि तद्रूपत्वम् AdvaiSi. 794. 12; 468. 12; 776. 6; अज्ञानव्याप्यस्य निवृत्तिरप्यज्ञाननिवृत्तिद्वारा तादृशी GuruCandr. i. 103. 20; i. 101. 14; i. 126. 12; एकदेशनाशादिपक्षेऽप्युक्तविशिष्टाज्ञानसंबन्धस्य···विरहोऽज्ञाननिवृत्तिर्बोध्या GuruCandr. ii. 159. 19; ii. 42. 14; ii. 156. 4; अज्ञानप्रयुक्तत्वं तु अज्ञानतल्लेशान्यतरतादात्म्यानापन्नत्वम्, तेनाज्ञाननिवृत्तौ प्रतियोगिविधया अज्ञानस्य प्रयोजकत्वेऽपि न क्षतिः LaCandr. 290. 9; 454. 38; 500. 43; 562. 33; न तावत् ज्ञानेऽपूर्वविधिमङ्गीकृत्याज्ञाननिवृत्तेर्भाव्यत्वम् SiddhāTa. 51. 9; 55. 26; प्रारब्धकर्मरूपप्रतिबन्धकदशायामज्ञाननिवृत्तेरङ्गीकारात् VedāntPari. 364. 2; JñānBiPra. 24. 12.

अज्ञाननिवेदन (ajñāna-nivedana) *n.* expression of ignorance मायागिरोऽज्ञाननिवेदनेऽपि न काचिदत्रानुपपत्तिः SaṁkṣeS'ā. 3. 98 (ii. 206. 18)

अज्ञाननिश्चयत्व (ajñānaniścaya-tva) *n.* the state of certainty of nescience अज्ञानसाधकत्वं हि अज्ञाननिश्चयत्वम् LaCandr. 441. 39.

अज्ञाननिष्ठ (ajñāna-niṣṭha) *adj.* present in nescience संसारस्याज्ञाननिष्ठत्वाभावात् Nyāyāmṛ. 345A. 7; AdvaiSi. 580. 9; अज्ञाननिष्ठेनैव तादात्म्येन द्वयाकारत्वादुक्तधियोऽपि तदेव विषयो निर्णीयते GuruCandr. i. 11. 3; i. 18. 14.

अज्ञाननिह्नुति (ajñān-nihnuti) *f.* removal of ignorance संस्कारकं तु कर्म स्याज्ज्ञानात्त्वज्ञाननिह्नुतिः BṛĀraUBhVā. (Sambandha.) 368; iv. 4. 323; iv. 4. 519.

अज्ञाननीली (ajñāna-nīlī) *f.* particular disease of the lens of the eye in the form of nescience यथा दवाग्नेरपसर्तुकामो धावंस्तु तत्रैव पतत्यचक्षुः । अज्ञाननीलीवृतलोचनस्तु तथैव दुःखानलमभ्युपैति VarāṅgaC. 3. 59.

अज्ञाननुद् (ajñāna-nud) *adj.* removing ignorance न चाज्ञाननुदो मानस्यान्यकर्तृत्वम् IṣṭaSi. 367. 6.

अज्ञाननैमित्तिक (ajñāna-naimittika) *adj.* caused by ignorance, of which ignorance is the cause अज्ञाननैमित्तिक एष तापः BuddhaC. 9. 34.

अज्ञाननैरपेक्ष्य (ajñāna-nairapekṣya) *n.* independence of ignorance, non-requirement of ignorance अज्ञाननैरपेक्ष्येण कर्मणां स्वभाव एवैष यत्फलाविनाभावित्वमिति NyāyMañ. ii. 84. 14.

अज्ञानपक्ष (ajñāna-pakṣa) *m.* view of non-knowledge वैषयिकानन्दे तद्व्यतिरेकस्य हेतोरसिद्धेः तस्याप्यात्मत्वे अज्ञानपक्षोक्तदोषः प्रसञ्जनीयः AdvaiSi. 296. 1.

अज्ञानपङ्क (ajñāna-paṅka) *m.* mud (in the form) of ignorance अज्ञानपङ्कमग्नानां त्वं गतिर्नो महामुने JayāS. 2. 1; अज्ञानपङ्कगर्भस्थमनुद्धारं महामतिः । आत्मानं च समुत्तीर्णं गाथामेतामगायत MārkP. 44. 32; अज्ञानपङ्कनिर्मग्नं या समुद्धरते जनम् S'ivU. 7. 41.

अज्ञानपट (ajñāna-paṭa) *m.* veil of ignorance वासुदेवस्तमोऽन्धानां प्रत्यक्षो नैव जायते । अज्ञानपटसंवीतैरिन्द्रियैर्विषयेप्सुभिः S'aṅkhaSm. 7. 21.

अज्ञानपटल (ajñāna-paṭala) *m.* film in the form of ignorance येऽज्ञानपटलरुद्धदृशोऽन्यं ब्राह्माद्वदन्ति सिद्धान्तम् BrāhmSpuSi. 11. 1; अज्ञानपटले ध्वस्ते गुरुणा शास्त्रशास्त्रतः PārśvC. 2. 1032; अज्ञानपटलध्वान्तं विधूय परिमुच्यते AdhyāRā. iii. 4. 54.

अज्ञानपद्धति (ajñāna-paddhati) *f.* path of ignorance अज्ञानपद्धतिरियम् Kād. 173. 20.

अज्ञानपरंपरा (ajñāna-paramparā) *f.* sequence of ignorance तमसः फलमज्ञानपरंपरारूपम् GītāBh.(Rā.) 593. 21 (*on* 14. 16); भखेटयोः केवलयोर्युतेश्च संसाधनं श्रीरविणा मयार्थम् । पूर्वैस्तदज्ञानपरंपरोत्थभ्रान्त्यान्यथा तद्द्युतिजं निबद्धम् SiddhāTaVi. 358. 19.

अज्ञानपरराष्ट्र (ajñāna-pararāṣṭra) *n.* enemy-kingdom in the form of ignorance अज्ञानपरराष्ट्रं च न रन्ध्रं त्वस्य पश्यति YogVā. iv. 23. 25.

अज्ञानपरा (ajñāna-parā) *adj.* (*f.*) given to ignorance, ignorant मेनोवाच ··· कीदृशं शिवरूपं हि यदर्थे तप उत्तमम् । ···इत्यज्ञानपरा S'ivaP. ii(3). 43. 2 (174A. 9)

अज्ञानपरामर्श (ajñāna-parāmarśa) *m.* recollection of ignorance or nescience अज्ञानपरामर्शस्य तु···अन्यदेवाज्ञानं विषयः Nyāyāmṛ. 375A. 9; 318A. 8;

आत्मवेदनश्रुतिविरोधः ··· प्राज्ञविषयकत्वेनाज्ञानपरामर्शस्याभावः GuruCandr. iii. 54. 20.

अज्ञानपराहति (ajñāna-parāhati) *f.* destruction of nescience प्रमाणजन्यासाधारणाकारभानस्यैवाज्ञानविरोधित्वान्नापरोक्षतामात्रेणाज्ञानपराहतिप्रसङ्गः AdvaiSi. 407. 9.

अज्ञानपरिकल्पितत्व (ajñānaparikalpita-tva) *n.* the state of being imagined by ignorance अनृतेनापिधानं हि तेषां विशेषणम्। अज्ञानावेष्टितत्वमित्यर्थः। न त्वज्ञानपरिकल्पितत्वम् AnuBh. 81. 9 (*on* i. 3. 15)

अज्ञानपरिणाम (ajñāna-pariṇāma) *m.* modification of nescience अहंकारस्येव ··· अज्ञानपरिणामानां सुषुप्तौ संस्कारतापन्नत्वेन साक्षिभास्यत्वायोग्यत्वादेव तदा सप्रकारकवृत्त्यभावः GuruCandr. ii. 401. 11.

अज्ञानपरिणामत्व (ajñānapariṇāma-tva) *n.* the state of being the modification of nescience रूप्यमपि ··· अज्ञानपरिणामत्वाच्चोभयोपादानकम् Nyāyāmr. 502A. 7; अहङ्कारादेरज्ञानपरिणामत्वादज्ञानावच्छिन्नचित्यैक्याध्यासादुक्तभ्रमः GuruCandr. iii. 9. 24; LaCandr. 577. 31.

अज्ञानपरिणामभेद (ajñānapariṇāma-bheda) *m.* particular modification of nescience जीवस्यान्तःकरणरूपोऽज्ञानपरिणामभेदः SiddhāLeSaṁ. 88. 5.

अज्ञानपरिणाममनस् (ajñānapariṇāma-manas) *n.* mind which is the modification of nescience अज्ञानपरिणाममनसोऽपि तत्पक्षे शुद्धाश्रितत्वेन तत्परिणामवृत्तेरपि तदाश्रितत्वम् GuruCandr. ii. 411. 20; LaCandr. 563. 42.

अज्ञानपरीषहजय (ajñānaparīṣaha-jaya) *m.* conquest of the obstacle or hardship due to ignorance अज्ञानावमानज्ञानाभिलाषसहनमज्ञानपरीषहजयः TattvāRāVār. ix. 9. 27; अज्ञोऽयं न वेत्ति पशुसम इत्येवमाद्यधिक्षेपवचनं सहमानस्य परमदुश्चरतपोऽनुष्ठायिनो नित्यमप्रमत्तचेतसो मेऽद्यापि ज्ञानातिशयो नोत्पद्यते इति अनभिसंदधतोऽज्ञानपरि(?री)षहजयोऽवगन्तव्यः SarvāSi. 9. 9 (427. 8)

अज्ञानपवन (ajñāna-pavana) *m.* wind of ignorance रम्भास्तम्भनिभं मनः। अज्ञानपवनं जित्वा धृष्यमाणं निवारय PārśvC. 2. 715.

अज्ञानपाश (ajñāna-pāśa) *m.* snare of nescience अज्ञानपाशबद्धानां पशूनां पाशमोचकम्। रामेश्वरं शिवं शान्तमुपैमि शरणं सदा SkandP. iii(1). 49. 36.

अज्ञानपुष्प (ajñāna-puṣpa) *adj.* having flowers in the form of ignorance अज्ञानपुष्पम् ··· कर्मतरुं प्रभज्य मुनिद्विपास्तत्र सुखं वसन्ति VarāṅgaC. 10. 21.

अज्ञानपूर्व (a-jñānapūrva) *adj.* not preceded by knowledge यथा कस्यचिद्वैराग्यमस्ति न तत्त्वज्ञानम्, तस्मादज्ञानपूर्वाद् वैराग्यात् प्रकृतिलयः Sāṁkhya-KāBh. 26. 8 (*on* 45)

अज्ञानपूर्वक (ajñāna-pūrvaka) *adj.* preceded by ignorance or absence of knowledge वैषयो रागः संभूत्याः कारणम् ··· संसारे ··· । अज्ञानपूर्वकं तस्मादज्ञानं तु विवर्जयेत् BrahmāṇḍP. iii. 3. 49; अज्ञानपूर्वकैर्दोषैः प्रागुक्तैस्तु विवर्जितः। ··· यदा यजेत् PāraS. 12. 466; ननु सत्यं चेतनव्यवहारो नाज्ञानपूर्वकः किं त्वविदितविवेकग्रहणस्मरणपूर्वक इति Bhām. 17. 4 (*on* i. 1. 1); SarvaDaSaṁ. 16. 514.

अज्ञानपूर्वकत्व (ajñānapūrvaka-tva) *n.* the state of being preceded by nescience or absence of knowledge अज्ञानपूर्वकत्वात् तत्त्वज्ञानस्य Bhām. 591. 11 (*on* iii. 3. 6); चेतनव्यवहारस्याज्ञानपूर्वकत्वानुपपत्तेः Bhām. 17. 3 (*on* i. 1. 1); विशिष्टव्यवहारस्य विशिष्टज्ञानपूर्वकत्वनियमेनाज्ञानपूर्वकत्वानुपपत्तेः SarvaDa-Saṁ. 16. 512.

अज्ञानपूर्वम् (a-jñānapūrvam) *adv.* unknowingly, unintentionally अत उत्तरं तेन संभाष्य तिष्ठेदेकरात्रं जपन् सावित्रीमज्ञानपूर्वम् GautDS. iii. 2. 8.

अज्ञानप्रकार (ajñāna-prakāra) *m.* mode of ignorance यद्यज्ञानसाम्येऽपि विषयभेदमाश्रित्य निग्रहस्थाननानात्वम् ··· तर्ह्यज्ञानप्रकारवैचित्र्याद् भेदान्तराण्यपि वक्तव्यानि NyāyMañ. ii. 203. 33.

अज्ञानप्रकाश (ajñāna-prakāśa) *m.* manifestation of ignorance विषयावच्छिन्नाज्ञानज्ञानार्थं विषयावच्छिन्नत्वेनाज्ञानप्रकाशार्थम् GuruCandr. iii. 36. 12.

अज्ञानप्रकाशन (ajñāna-prakāśana) *n.* display of ignorance कृते स्नाने क्षणं शौचम् ··· । क्षीरक्षालनमङ्गार इवाज्ञानप्रकाशनम् SamarāSaṁ. 4. 473; तम्···दृष्ट्वानुकम्पया। प्रभुर्विमोचयामास तदज्ञानप्रकाशनात् PrabhāC. 119. 26.

अज्ञानप्रतिपक्ष (ajñāna-pratipakṣa) *m.* opposite of ignorance, remedy against ignorance ज्ञानमनास्रवमज्ञानप्रतिपक्षः Sphuṭā. i. 4. 19 (*on* 1. 1)

अज्ञानप्रतिबद्ध (ajñāna-pratibaddha) *adj.* obstructed by ignorance नन्वन्तरायध्वंसमात्रं चेन्मुक्तिस्तर्हि श्रवणमात्रेणैव तत्सिद्धिः स्यात्, अज्ञानप्रतिबद्धकण्ठचामीकरसिद्धिवदिति तत्राह SāṁkhyaPraBh. 151. 34 (*on* 6. 22)

अज्ञानप्रतिबन्धकत्व (ajñānapratibandhaka-tva) *n.* obstructive nature that abides in nescience उक्तव्यवहारकाले ··· अज्ञानप्रतिबन्धकत्वकल्पनावैयर्थ्यम् GuruCandr. ii. 413. 7.

अज्ञानप्रतिबिम्बित (ajñāna-pratibimbita) *adj.* [*f.* -ā] reflected in nescience अज्ञश्चाज्ञानप्रतिबिम्बिता चिदुच्यते PrakaVi. 3. 14; त एते पञ्च विशिष्टा अज्ञानप्रतिबिम्बितचित्स्वरूपे समारोपिताः PrakaVi. 116. 7; अज्ञानप्रतिबिम्बितस्य चिद्धातोः PrakaVi. 117. 16; अज्ञानप्रतिबिम्बितं चैतन्यं जीवः Siddhā-Bi. 46. 2; 48. 1; SiddhāLeSaṁ. 88. 4; SiddhāTa. 2. 10.

अज्ञानप्रतिबिम्बितता (ajñānapratibimbita-tā) *f.* the state of being reflected in nescience स एवाज्ञानप्रतिबिम्बिततया चेता द्रष्टा जीवः PrakaVi. 69. 14.

अज्ञानप्रतिभास (ajñāna-pratibhāsa) *adj.* appearing as other than knowledge कल्प्यमानमपि तदज्ञानप्रतिभासं विज्ञानमेव कल्प्येत TātpaṬ.(U.) 273. 16 (*on* 5(4). 139)

अज्ञानप्रतियोगिकत्व (ajñānapratiyogika-tva) *n.* the nature of having nescience for its counter-correlative अज्ञानतत्प्रयुक्तयोः ध्वंसैक्ये निवृत्तावज्ञानप्रतियोगिकत्वं वाच्यम् GuruCandr. i. 99. 11; i. 412. 15.

अज्ञानप्रतिषेध (ajñāna-pratiṣedha) *m.* negation of ignorance आत्मन्यज्ञानप्रतिषेधाच्च YogVār. 1. 4.

अज्ञानप्रतिसंधान (ajñāna-pratisandhāna) *n.* recollection of nescience उत्तरत्राज्ञानप्रतिसंधानानुपपत्तिरिति चेन्न S'atDū. 122. 24.

अज्ञानप्रतीति (ajñāna-pratīti) *f.* **1** experience of nescience अहमज्ञो मामन्यं च न जानामीत्यत्र वर्तमानतयैवाज्ञानप्रतीतेः S'atDū. 168. 28; न हि साक्षिणा अज्ञानमित्यज्ञानप्रतीतिः SiddhāTa. 8. 17; **2** knowledge of (the existence) of ignorance तपसा चीयते ब्रह्मेत्यत्राज्ञानप्रतीतौ तन्निरासाय TattvPrakā. 38A. 13 (*on* i. 2. 22)

अज्ञानप्रत्यक्ष (ajñāna-pratyakṣa) *n.* direct knowledge of nescience 'अहमज्ञः' इत्याद्याश्रयविषयप्रतीतिगर्भितमज्ञानप्रत्यक्षं व्याहतमेव VivaPraSaṁ. 20. 2; NyāySu.(Ja.) 62B. 10 (*on* i. 1. 1); अज्ञानप्रत्यक्षोत्पत्तेः पूर्वमज्ञाने विशेषणतयावच्छेदकज्ञानादिग्रहनियमः LaCandr. 551. 33.

अज्ञानप्रत्यक्षत्व (ajñānapratyakṣa-tva) *n.* perceptible nature of nescience अद्वैतसिद्धौ अज्ञानप्रत्यक्षत्वोपपत्तिः AdvaiSi. 559. 7.

अज्ञानप्रत्यय (ajñāna-pratyaya) *m.* cognition of ignorance or nescience अज्ञानप्रत्ययश्चायं किमालम्बन इष्यते S'lokaVār. 5 (3). 142 (307. 2); Kāśi. ii. 153. 14 (*on* 5 (3). 142); योऽयमज्ञानप्रत्ययः ग्राह्योपस्थापकः सः NyāyRa. 307. 9 (*on* 5 (3). 142); सामान्यज्ञानजनितोऽप्यज्ञानप्रत्ययः AdvaiSi. 589. 1; नञो विरोध्यर्थकतया ज्ञानविरोधित्वेनाज्ञानप्रत्ययात् LaCandr. 550. 29.

अज्ञानप्रधानद्वार (ajñāna-pradhānadvāra) *n.* nescience as the principal means अज्ञानप्रधानद्वारमादाय (परमात्मनः) क्षेत्रकारणत्वम् PañcPra. 70. 3 (5)

अज्ञानप्रभव (ajñāna-prabhava) *adj.* [*f.* -ā] arising from ignorance or nescience अज्ञानप्रभवं हीदं यद्दुःखमुपलभ्यते MahāBhā. xii. 153. 5; xii. 205. 18; एवं पशुसमैर्मूढैरज्ञानप्रभवं महत्। अवाप्यते नरैर्दुःखम् ViṣṇuP. vi. 5. 24 = BrahmP. 233. 24; अज्ञानप्रभवं सर्वं ज्ञानेन प्रविलीयते AparoAnu. 14; अज्ञानप्रभवो मन्युरहंमानोपबृंहितः BhāgP. viii. 19. 13; अज्ञानप्रभवाहंधीः स्वपरेति भिदा यतः BhāgP. x. 4. 26; अज्ञानप्रभवो मोहस्तस्माद्रागः प्रवर्तते ViṣṇuDhaP. iii. 233. 275; अज्ञानप्रभवं दुःखं ज्ञानेनैव निवर्तते S'ivaP. vii. 5. 11 (506B. 9); अज्ञानप्रभवाहंधीः AdhyāRā. vi. 10. 37; vi. 10. 39.

अज्ञानप्रभवत्वतस् (ajñānaprabhavatva-tas) *adv.* because (of the nature) of what is caused by ignorance अन्येषां शास्त्रकर्तॄणामज्ञानप्रभवत्वतः। तदुक्तेर्न प्रमाणता DevīBhāP. vii. 39. 19.

अज्ञानप्रमाण (ajñāna-pramāṇa) *n.* proof or means of revealing ignorance अज्ञानप्रमाणमपि केवलं नान्यप्रमाणविषयं स्पृशति IṣṭaSi. 195. 11; 193. 13.

अज्ञानप्रयुक्त (ajñāna-prayukta) *adj.* which is caused by or brought about by nescience अज्ञानप्रयुक्ततत्संस्कारान्यतरस्याभावाच्च व्यापकः LaCandr. 161. 22; विषयोऽज्ञानप्रयुक्तरूपो विवक्षितः GuruCandr. i. 368. 14.

अज्ञानप्रयुक्तता (ajñānaprayukta-tā) *f.* the state of being caused by or brought about by nescience अज्ञानकल्पितत्वेन अज्ञानप्रयुक्ततायोग्यत्वेन अस्वप्रकाशत्वेनेति यावत् LaCandr. 495. 41.

अञ्जनाधिका (añjanādhikā) *f.* a kind of lizard (also called Hālinī or Añjanī etc.) स्यादञ्जनाधिका हालिन्यञ्जनिका हलाहलः AbhidhāCin. 1298; S'abdaRa.(Su.) 4. 334; KośaKaTa. 1. 4524.

अञ्जनानन्दन (añjanā-nandana) *m.* Hanumat (*lit.* son of Añjanā) इत्याकूतं तस्य भीमोहितस्य ज्ञात्वालापैरञ्जनानन्दनोऽसौ। इत्थंकारं पथ्यमर्थं जगाद RāghPāṇ.(Dha.) 11. 22; 16. 34.

अञ्जनानन्दवर्धन (añjanānanda-vardhana) *adj.* increasing the joy of Añjanā (i. e. the son of Añjanā) दिष्ट्या सोऽयं महाबाहुरञ्जनानन्दवर्धनः UttaRāC. i. 32 = SaraKaṇṭhā. 694. 11.

अञ्जनानुगमन (añjanānugamana) *n.* entering (i. e. applying) of the ointment ततोऽञ्जनानुगमनायानुन्मीलयन् शनैरन्तश्चक्षुः संचारयेत् AṣṭāSam. i. 165. 5 (1. 32)

अञ्जनानुपलब्धि (añjanānupalabdhi) *f.* non-apprehension of the collyrium (in one's own eye) सामीप्याद्यथा चक्षुषोऽञ्जनानुपलब्धिः Sāṁkhya-KāBh. 6. 19 (*on* 7)

अञ्जनान्त (añjanānta) *m.* [Loc.] at the end of the application of collyrium or unguent प्रतिमर्शश्चतुर्दशसु कालेषूपादेयः।… मूत्रोच्चारकवलाञ्जनान्ते SiddhYo. 78. 10 (6)

अञ्जनान्तर (añjanāntara) *n.* another anointing अञ्जनकालेऽस्योपादानात्तदपवर्गे चापवर्गादञ्जनान्तरेऽन्यशकलोपादानम् S'āstrDī. 820. 11 (*on* xi. 3. 5)

अञ्जनान्तर्हित (añjanāntarhita) *adj.* invisible with the help of (magical) collyrium अञ्जनान्तर्हितो भूत्वा गुणशर्मा ततो ययौ KathāSaSāg. viii. 6. 81.

अञ्जनान्वय (añjanānvaya) *m.* name of a particular type of elephant believed to be descended from Añjana (the mystical elephant guardian (*diggaja*) of the southwest or west) रौद्रो लघुशिरा ह्रस्वश्वेतबिन्दुसमन्वितः। पाटलापुष्पनयनः स भवेदञ्जनान्वयः KalpaK. 109. 188.

अञ्जनान्वयसम्भव (añjanānvaya-sambhava) *adj.* born in the line of Añjana, descendent Añjana, (a particular tpye of elephant) स्निग्धवालधिदन्तो यः श्वेतोहरकरान्वितः। उन्नतस्थूलजघनः सोऽञ्जनान्वयसम्भवः Mānaso. ii. 3. 279.

अञ्जनान्वितलोचना (añjanānvita-locanā) *adj.* (*f.*) with eyes having collyrium अञ्जनान्वितलोचनाम् … ध्यायेत्तां विजयाम् KālīViT. 18. 16.

अञ्जनापति (añjanā-pati) *m.* husband of Añjanā वायुम् … पूजयेदञ्जनापतिम् NāraS. 33. 74.

अञ्जनाभ (añjanābha) *adj.* (dark-) coloured like collyrium, of the colour of collyrium लोहितैरञ्जनाभैश्च वैडूर्यसदृशैरपि (पुष्पैः) MahāBhā. iii. 155. 61; ज्ञात्वा तान्यञ्जनाभानि सूक्ष्मचूर्णानि कारयेत् CaraS. vi. 1. (3). 17 (1941 Ed.); vi. 4. 12 (1941 Ed.); BṛSaṁ. 54. 110; अञ्जनाभं महाकायं दशम्यां यममर्चयेत् ParaS. 13. 50; अपरेऽञ्जनाभैः…केचिद्विचेलुः…वक्त्रैः प्लवगपतयः RāmC. 25. 16; RugVi. 9. 6; नमः … कवचायाञ्जनाभाय LiṅgaP. ii. 21. 13; DevīBhāP. xii. 2. 7; अञ्जनाभं तथाकाशम् LakṣmīT. 35. 41 = 54. 14; साष्टत्रिंशत्कलामूर्तेमञ्जनाभं चतुर्मुखम्…ध्यात्वा ĪśānS'iPa. i. 30. 24; ii. 12. 13; अङ्गुष्ठमात्रं पुरुषं भजन्ते प्रफुल्लनेत्रोत्पलमञ्जनाभम् PañcaRā.(Nā.) v. 11. 26; प्रावृषेण्याः प्रियतमदिवसाः … अञ्जनाभमहावारिवाहौघनिचिताम्बराः VidaMuMa. 3. 3(1); S'ārṅgaPa. 3635; सोल्लासं मयि कृतनेत्रपद्मपातं लोकेऽहं कमपि किशोरमञ्जनो(? ना)भम् GopāKe-

Can. 95.5.

अञ्जनाभ (añjanābha) *m.* **1** name of a mountain चित्रकूटोऽञ्जनाभश्च पर्वतो गन्धमादनः MahāBhā. xiii. 151.27; **2** a kind of lentils मुद्गाः ··· अञ्जनाभाश्च सप्तैते अन्तर्भेदा उदाहृताः PāraS. 18.139; **3** name of a deity presiding over Pālikā vessels etc. यजेत् ··· पालिकाद्यधिदेवताः । अञ्जनाभं परं चैव पद्मनाभं ध्रुवं तथा PāraS. 16.159; **4 A** epithet of Viṣṇu (dark like collyrium) अञ्जनाभ हृषीकेश मायामय नमोऽस्तु ते NaraP. 11.46; अञ्जनाभो विष्णुः VīraMi. (Lakṣaṇa.) 41.4; **4 B** epithet of Rāhu [nt.]

अञ्जनाभक (añjanābha-ka) *n.* a kind of poison (from an inanimate material) मुस्तकं पौष्करम् ··· लाङ्गलक्यञ्जनाभकम् । ··· एवमादीनि चान्यानि मूलजानि स्थिराणि च CaraS. vi. 23.12 (1941 Ed.)

अञ्जनाभाग्य (añjanā-bhāgya) *n.* good-fortune of Añjanā (i. e. Hanumat) संजीवनमाशासे मञ्जुलमहिमानमञ्जनाभाग्यम् HanuPañ. 2.

अञ्जनाभाम्बर (añjanābhāmbara) *adj.* wearing a collyrium-coloured garment समं सीरिणा । अञ्जनाभाम्बरेण ··· पातु वश्चक्रपाणिः ChandoMañ. 2 375.

अञ्जनाभास् (añjanābhās) *adj.* resembling collyrium in colour तमालनीलोत्पलाञ्जनाभासः ।···घनाः प्रभूतजलाः BṛSaṁ. 21.23.

अञ्जनाभ्यञ्जन (añjanābhyañjana) *m. n.* name of a fortynine-night sacrifice cf. **आञ्जनाभ्यञ्जन**; अस्ति अञ्जनाभ्यञ्जनो नामैकोनपञ्चाशद्रात्रः S'ābaBh. 1919.1 (*on* x. 4.10); अस्ति अञ्जनाभ्यञ्जनं नाम सत्रम् S'āstrDī. 702.8 (*on* x. 4.6); अस्त्यञ्जनाभ्यञ्जनसंज्ञकः एकोनपञ्चाशद्रात्रः सत्रविशेषः NyāyMāVi. 535.25 (*on* x. 4.7); अञ्जनाभ्यञ्जनसत्रे···उक्तम् LaCandr. 695.31; अञ्जनाभ्यञ्जने सत्रे··· इति श्रुतम् BhāṭṭDī. iii. 280.9 (*on* x. 4.7)

अञ्जनाम्बुदसंकाश (añjanāmbuda-saṅkāśa) *adj.* resembling collyrium and rain cloud (in colour) अञ्जनाम्बुदसंकाशाः ··· अञ्जने पर्वते चैव ये वसन्ति प्लवङ्गमाः Rāmā. iv. 36.5.

अञ्जनाम्भस् (añjanāmbhas) *n.* water (tears ?) mixed with collyrium कालिम्ना समधित मन्युरेव वक्त्रं प्रापाक्ष्णोर्गलदपशब्दमञ्जनाम्भः S'iśuVa. 8.43.

अञ्जनार्जन (añjanārjana) *n.* acquisition of collyrium मुखसौरभभ्रमदलिप्रभावतो दशनच्छदोऽभजदिवाञ्जनार्जनम् S'rīKaC. 14.49.

अञ्जनार्ति (añjanārti) *f.* irritation due to the application of collyrium पिहितौ तौ (पुटौ) दृशो रुजि । सुप्तिमूर्च्छातिवर्त्मोष्णधूमवाताञ्जनार्तिषु SaṁgīRa. iv. 154.7 (7.444)

अञ्जनार्थ (añjanārtha) *adj.* meant for anointing तस्य ह्यञ्जनार्थेन स्वरुणा प्रयोजनम् S'ābaBh. 1281.13 (*on* iv. 4.27); मूलं तु ··· यूपशकलमिवाञ्जनार्थं कपालोपधानार्थमुपादीयते TantrRa. 123.6; अञ्जनार्थ एव स्वरुः MayūMāli. 402.3 (*on* iv. 4.10); 820.13 (*on* xi. 3.5)

अञ्जनार्थ (añjanārtha) *m.* [Loc.] for application as medicinal ointment पिष्ट्वाञ्जनार्थे कफजेषु धीमान् वर्तीर्विदध्यान्नयनामयेषु SuśruS. vi. 11.10; मरिचानि च श्वेतानि अञ्जनार्थे प्रदापयेत् Hastyāyur. 239.27 (2.33); [Inst.] for the purpose of anointing स्वरुशब्दश्चाञ्जनार्थेन शकले उपचरित इति गम्यते S'ābaBh. 1227.6 (*on* iv. 2.3)

अञ्जनार्थम् (añjanārtham) *adv.* **i** for the purpose of anointing शलाकायन्त्राण्यपि नानाप्रकाराणि···अञ्जनार्थमेकं कलायपरिमण्डलमुभयतो मुकुलाग्रम् SuśruS. i. 7.14; तत्र यः शकलः प्रथमः परापतेत्तं च स्वरुमञ्जनार्थं करोतीति S'ābaBh. 1227.17 (*on* iv. 2.4); **ii** for preparing ointment एतानि समभागानि अञ्जनार्थं प्रदापयेत् Hastyāyur. 239.29 (2.33); **iii** for the purpose of revealing (the filial devotion) सद्भावं चिन्तयामास अञ्जनार्थं द्विजोत्तमः PadmP. ii. 1.19.

अञ्जनार्पित (añjanārpita) *adj.* applied as an eye-ointment उन्मत्ताम्भः सलवणं नस्यालेपाञ्जनार्पितम् । ताम्बूलीसलिलं वापि समस्ताहिविषं हरेत् IśānS'iPa. i. 40.59.

अञ्जनावती (añjanā-vatī) *f.* name of the mate of the quarter-elephant called Añjana or Supratika अञ्जनादञ्जना(? नः) साम्नो विजज्ञे चाञ्जनावती VāyuP. ii. 8.221; BrahmāṇḍP. ii. 7.343; सप्तभिश्च रथन्तरा(दि)भिः सामभिरभ्रमुकपिला° ··· (अञ्जीन ? अञ्जना)वती° ··· °पिङ्गलेत्यादिभिः सह गजवधूभिरष्टाभिरष्टावुत्पन्नाः पतयो वारणानामैरावतः ··· अञ्जनः AvantiKa. 203.14; अञ्जना चाञ्जनावती···करिण्यश्च जातास्तस्मात्तु तत्प्रियाः BhaviP. 580B.8 (iii(4).17.53); AmaK. 154; Vaija. 17.9; Hārāva. 147; S'abdaRa.(Vā.) 314; KośaKaTa. 1.637; KalpaK. 375.53; S'abdaRaSaK. 166.6; **ii** epithet of the river Ganges अन्धतामिस्रहन्त्यन्ध्युरञ्जना ह्यञ्जनावती SkandP. iv. 29.39 (comm. अञ्जतीत्यञ्जना अविद्या । अञ्जनावती अविद्यावती); **iii** name of the plant *kālāñjana* [APTE]

अञ्जनाविल (añjanāvila) *adj.* **i** sullied with collyrium भ्रमरैः कुसुमानुसारिभिः परिकीर्णा परिवादिनी मुनेः । ददृशे पवनावलेपजं सृजती बाष्पमिवाञ्जनाविलम् RaghuVa. 8.35; अञ्जनाविलैरश्रुवारिभिर्मलिनितया ··· श्यामलितमास्पदं शिशुपादुमस्य दृष्टवती UdaySuKa. 109.30; **ii** filled with darkness मयानुरोधेन मया बिलेऽनन्यजनाविले [v. l. बिलेऽस्मिन्नञ्जनाविले] । कालोऽयम् ··· नीयते RāmC. 11.76.

अञ्जनाश्रु (añjanāśru) *n.* tear(s) mixed with collyrium सौवीरं कञ्चिके देशे उद्योते चाञ्जनाश्रुणि DharK. 2145; पल्लावस्तं व्रजति निगलच्चञ्चरीकाञ्जनाश्रुम् । ···अर्कः करेण । द्रागालिङ्गेदपि कुमुदिनीम् Jīvān. 132.10.

अञ्जनासङ्ग (añjanāsaṅga) *m.* contact with collyrium भ्रूकोदण्डस्फुरणरहितोऽप्यञ्जनासङ्गहान्या मालिन्यं च स्फुटमपनयन्नूनमच्छिन्नधारैः । ···बाष्पासारैः स्नपयति धरां नेत्रमेघे मृगाक्ष्याः MayūSaṁ. 2.44.

अञ्जनासंभव (añjanā-sambhava) *m.* Hanumat (born of Añjanā) साप्यञ्जनासंभवसिन्धुवर्जम् ··· । शोषं प्लवङ्गध्वजिनी जगाम धूम्राक्षनाम्नि क्षयधूमकेतौ RāmC. 32.36.

अञ्जनासुत (añjanā-suta) *m.* Hanumat (son of Añjanā) अयं च पुनरञ्जनासुतसमानीतमहीधरमहौषधिविधिलब्धजीवितानुजसमाश्लेषसुखलब्धमनोरथः ··· दाशरथिः RāmāCam. 6.82(1); ददाववलम्बं वपुषाञ्जनासुतः । ··· प्लवगानाम् RāmC. 12.2; 12.62; 20.39; 31.10; 34.30; 35.87; अञ्जनासुतम् । आजुहाव विभुरक्षिसंज्ञया Rāgh. 11.71.

अञ्जनासुतसमक्षम् (añjanāsuta-samakṣam) *adv.* in the presence (before the very eyes) of the son of Añjanā (i. e. Hanumat) अञ्जनासुतसमक्षमिदानीं कः प्रमादिनि विकत्थनवादः RāmC. 16.50.

अञ्जनासूनु (añjanā-sūnu) *m.* Hanumat (son of Añjanā) दशास्यस्त्रासितं वीक्ष्य निजं केसरिभिर्बलम् । समीपं चाञ्जनासूनुं कृतान्तमिव दुर्धरम् PadmP.(Ra.) 60.45; अतस्त्वमञ्जनासूनो ··· ब्रह्म चिन्तयस्व SkandP. iii(1). 45.55; मतान्यध्याप्य तान्यञ्जनासूनोरप्यथ नाद्यत्रेदमखिलं सम्यक्तमध्यापयत् BhāvPra.(S'ā.) 2.19(1); सन्देशं भरताय हारयति च द्रागञ्जनासूनुना JānaPa. 7.2.

अञ्जनिक (añjan-ika) *m.* [*purohitādigaṇa*] a species of lizard (cf. अञ्जनिका) GaṇPā. 144.18; अञ्जनमस्यास्तीति अञ्जनिकः GaṇRa. 7.403 (427)

अञ्जनिका (añjan-ikā) *f.* **i** box for collyrium उष्ट्रस्यास्थि भृङ्गराजरसेन भावितं दग्धमञ्जनमुष्ट्रास्थ्यञ्जनिकायां निहितमुष्ट्रास्थिशलाकयैव स्रोतोञ्जनसहितम् ··· चक्षुष्यं वशीकरणं चेत्याचक्षते KāmSū. 366.22 (7.1); KandaCū. vii. 1.39; तदञ्जनम्···सुवर्णरजत° ··· °घटितायामञ्जनिकायां निधापयेत् AṣṭāSaṁ. i. 51.24 (1.8); **ii** a kind of lizard हालाहलश्चाञ्जनिका ज्येष्ठा स्याद्गृहगोधिका AbhidhāRaMā. 2.102; AbhidhāCin. 1298; Vaija. 150.29; **iii** name of a maiden (daughter of Kāla) नवंम्यञ्जनिका नाम कालस्य दुहिता विभोः KathāSaSāg. viii. 2.351; **iv** a kind of medicinal plant नीलपुष्पी चाञ्जनिका नीला चाञ्जनकेशिका । चित्रिका पूतिमाषेति भिषग्भिः परिपठ्यते AbhidhāMañ. 234.7; **v** a small mouse [S'abdaKaDr.]; **vi** name of the mate of the quarter-elephant Supratīka [APTE]

अञ्जनिन् (añjan-in) *adj.* having collyrium (in the eyes) अञ्जनं चटापितम् । अञ्जनी भणति । ···किं मुधा क्लिश्यध्वे PrabaK. 100.23; अञ्जनी मृगदृशो दृगञ्चलः CaitaCa. 80.6(3)

अञ्जनिसुत (añjani-suta) *m.* Hanūmat (son of Añjani) हनूमानञ्जनिसुतो वायुपुत्रो महाबलः SkandP. v(3). 83.30.

अञ्जनी (añjanī) *f.* **i** name of the mother of Hanumat अञ्जना (v. l. अञ्जनी) सुप्रजा येन मातरिश्वा च नैर्ऋत Rāmā. vi. 61.18; अञ्जन्यामञ्जनापि च S'abdaBhePra.(Ma.) 1.92; अञ्जनीगर्भसंभूत आञ्जनेयो बभूव सः BṛBrahmaS. iii. 1.114; **ii** container or box for the eye-salve त्रिरात्रोपोषितः पुष्येण पुरुषघातिनः । काण्डकस्य शलाकामञ्जनीं च कारयेत् ArthS'ā. iii. 230.1 (14.3); **iii** name of the queen of king Hemasadana मागधे हेमसदनादञ्जन्यां प्रभविष्यति । विष्णोरंशो धर्मपाता बुधः SkandP. i(2). 40.255; **iv** name of one of the sixteen *śaktis* belonging to the second *āvaraṇa* of the S'auṇḍavyūha (worshipped during the king's victorious bathing) शौण्डव्यूहं शृणुष्व मे । ... प्रथमावरणं प्रोक्तं द्वितीयावरणं शृणु । ··· अञ्जनी मोहनी माया LiṅgaP. ii. 27.158; VīraMi. (Rājanīti.) 387.20; **v** name of a demoness सिंहिकासरसीबीजं रेणुकाबीजमेव च । अञ्जनीबीजकं ख्यातमनृतमपरं स्मृतम् । डकारस्य मया देवि ग्रन्थे वै रुद्रयामले UddhāK. 5.36; **vi** name of the daughter of the sage Gautama तगौतमसुतायां तद्वीर्यं शंभोर्महर्षिभिः । कर्णद्वारा तथाञ्जन्यां रामकार्यार्थमाहितम् S'ivaP. iii. 20.6 (319A.11); **vii** figure of a woman moulded in clay अञ्जनी लेप्ययोषिति AnekāSaṁ. 3.347; ViśvaPra. 91.80; MediK. 89.27; ViśvaLoK. 190.30; S'abdaRaSaK. 190.4; अञ्जनी लेपकामिनी Hārāva. 161; **viii** name of some plant or tree (used as purgative) कालाञ्जनी चाञ्जनी च रेचनी चासिताञ्जनी । नीलाञ्जनी च RājNi.

338.21; KalpaK. 308. 525; **ix** a kind of lizard अञ्जन्यामञ्जनाधिका हालिनी च हलाहल: S'abdaRa.(Su.) 4. 334.

अञ्जनीकार (añjanī-kārá) *m.* one who prepares collyrium शीलो॑याञ्जनीका॒रम् [आलभते] TaiBr. III. iv. 10(1)

अञ्जनीकारी (añjanī-kārī́) *f.* a woman preparing ointments शीलो॑याञ्जनीका॒रीम् VājaS. 30. 14.

अञ्जनीकृत्य (añjanī-kṛtya) *ger.* having used as collyrium अञ्जनीकृत्य कस्तूरीम् … काचित् सखीनां हास्यतामगात् NemiNir. 12. 51.

अञ्जनीगर्भसंभूत (añjanīgarbha-sambhūta) *adj.* born of the womb of Añjanī चिरं जीवतु दीर्घायुर्नरो हनुमान्सदा । अञ्जनीगर्भसंभूत: SkandP. v(2). 79. 6; अञ्जनीगर्भसंभूतं कुमारं ब्रह्मचारिणम् । दृष्टिदोषविनाशाय हनूमन्तं स्मराम्यहम् BhāvPra. (Bhā.) 5. 132.

अञ्जनीजन्मन् (añjanī-janman) *m.* Hanumat (born of Añjanī) धूम्राक्षम् …हतवानञ्जनीजन्मा BālRā. 9. 8.

अञ्जनीनन्दन (añjanī-nandana) *m.* son of Añjanī (i. e. Hanumat) अञ्जनीनन्दनम्…कपीशमक्षहन्तारं वन्दे Rāmā. 1. 20*(1)

अञ्जनीपति (añjanī-pati) *m.* husband of Añjanī (i. e. the god of wind) प्रपूजयेत्…वायुम्…अञ्जनीपतिम् VasiS. 37. 131.

अञ्जनीपुत्र (añjanī-putra) *m.* son of Añjanī (i. e. Hanumat) तत: प्राहाञ्जनीपुत्र: SkandP. iii(2). 37. 24.

अञ्जनीया (añjan-īyā) *adj.* (*f.*) to be anointed घृततैलवसानामन्यतमेन द्रव्येणाञ्जनीया: शर्करा: S'ābaBh. 365. 9 (*on* i. 4. 24); शर्करा: । ताश्च घृततैलवसादीनामन्यतमेन द्रव्येणाञ्जनीया: NyāyMāVi. 59. 10 (*on* i. 4. 19)

अञ्जनीरोग (añjanī-roga) *m.* an eye-disease एकदा श्रीवीसलदेवस्य दक्षिणे चक्षुषि अञ्जनीरोगो जात: PurāPraSaṁ. 79. 28.

अञ्जनीसुत (añjanī-suta) *m.* son of Añjanī (i. e. Hanumat) हनुमानञ्जनीसुत: । न किंचिदब्रवीत् Rāmā. iv. 1325*(2); vii. 36. 31; रामदेवेन दूतं कृत्वाञ्जनीसुतम् । …दत्तं ग्रामशतं नृप SkandP. iii(2). 36. 82; गन्तुं प्रचक्रे मतिमञ्जनीसुत: समुद्रमुत्तीर्य निशाचरालयम् NaraP. 50. 153; अहर्मुखाकृष्टपतङ्गमण्डल: फलाशया बाल इवाञ्जनीसुत: NavaSāC. 23. 19.

अञ्जनीसूनु (añjanī-sūnu) *m.* son of Añjanī (i. e. Hanumat) हनूमन्नञ्जनीसूनो वायुपुत्र महाबल । कैलासं परितो गत्वा लिङ्गमानय मा चिरम् SkandP. iii(1). 44. 97; iii(2). 37. 7; S'ivP. iv. 17. 70 (369. 5)

अञ्जनेभगिरि (añjanebha-giri) *m.* the mountain called Kālahastī स विनम्य चन्द्रशकलाभरणं शिवमञ्जनेभगिरिसंचरणम् Acyutarā. 5. 47.

अञ्जनोत्क्लेशित (añjanotkleśita) *adj.* (caused to be) irritated or excited by an ointment अञ्जनोत्क्लेशितं नस्यै: … वातकफं जयेत् AṣṭāSaṁ. i. 8. 21 (1. 3)

अञ्जनोदककृष्ण (añjanodaka-kṛṣṇa) *adj.* as black as water mixed with collyrium (रक्तम्) गृहधूमाञ्जनोदककृष्णं पीतं हरितम्…अस्कन्दि…पित्तात् AṣṭāSaṁ. i. 179. 11 (1. 36)

अञ्जनोद्भव (añjanodbhava) *m.* Hanumat (*lit.* born of Añjanā) तं समुद्रविजयं प्रतापत: शूरतैकपरमञ्जनोद्भवम् । सुप्रतिष्ठितमवेक्ष्य लज्जित: … अभवदुपप्लुतो नृप: RāghPāṇ.(Dha.) 10. 20 (comm. अञ्जनोद्भवं हनुमन्तम्)

अञ्जनोद्वेग (añjanodvega) *m.* fear caused by the ointment or collyrium अन्यथाञ्जनोद्वेगसंकुचितेऽन्त: सम्यगौषधं नानुप्रविशेत् AṣṭāSaṁ. i. 164. 19 (1. 32)

अञ्जनोपपद (añjanopapada) *adj.* having the word *añjana* as an epithet or adjunct (= अञ्जनगिरिपत्तन) अञ्जनोपपदं प्राप तदायं गिरिपत्तनम् BṛKathāK. 57. 417.

अञ्जनोपम (añjanopama) *adj.* resembling collyrium अश्माञ्जनोपमोऽध: शिरा सुजला BṛSaṁ. 54. 11.

अञ्जनोपार्जन (añjanopārjana) *n.* **1** acquiring lamp-black or collyrium (अस्ति…वसति:) यत्र च … लिपिकरेषु चाञ्जनोपार्जनम् YaśasCam. ii. 247. 18; **2** acquiring a stigma or black spot, YaśasCam. ii. 247. 18.

अञ्जनोल्लेखन (añjanollekhana) *n.* to draw a line with collyrium अत्र कुङ्कुमरजोयावकरागाञ्जनोल्लेखनरूपाणां जातिगुणक्रियाणामभावा उत्प्रेक्ष्यन्ते CitraMī. 87. 11.

अञ्जनौघ (añjanaugha) *m.* heap of collyrium दैत्येन्द्रनारीनयनाञ्जनौघहृतेरिवासादितकालिमा य: S'rīKaC. 1. 29.

अञ्जन्मषि (añjan-maṣi) *adj.* anointed with collyrium कृतागसं तं प्ररुदन्तमक्षिणी कषन्तमञ्जन्मषिणी स्वपाणिना BhāgP. x. 9. 11.

अञ्जन्य (añjanya) *m. n.* portent [*w. r.* for **अजन्य**] Hārāva. 210.

अञ्जन्याश्रम (añjany-āśrama) *n.* hermitage of Añjanī विन्ध्यस्य चोत्तरे भागे अञ्जन्याश्रममुत्तमम् SkandP. v(1). 54. 17.

अञ्जयत् (añjayat) *adj.* [*f.* -ntī] applying collyrium or ointment भगो न चित्र इत्येताभ्यामञ्जयन् सुभगो भवति SāmaViBr. ii. 6. 5; नाञ्जयन्तीं स्वके नेत्रे न चाभ्यक्तामनावृताम् । न पश्येत्प्रसवन्तीं च तेजस्कामो द्विजोत्तम: ManuSm. 4. 44 (ManvaMu. अञ्जनं कुर्वतीम्); ViṣṇuDhaP. ii. 89. 15; स्नानोत्तीर्णा…कज्जलेनाञ्जयन्ती नेत्रे दन्तीश्वरगतिरतिप्रेमपात्रीबभूव PadyaVe. 548.

अञ्जयितव्य (añjay-itavya) *adj.* to be anointed with (ointment or collyrium) पिप्पलीम्…वर्तयेत्…एतया सततमञ्जयितव्यं य: सुपर्णसममिच्छति चक्षु: AṣṭāSaṁ. ii. 251. 6 (6. 19) = SiddhYo. 61. 153.

अञ्जयित्वा (añjay-itvā) *ger.* having applied or anointed साक्षतैराधावै: शिवा न इति शिरोऽञ्जयित्वा VaikhāGS. 2. 13; यन्मे मन इति वामं चाञ्जनेनाञ्जयित्वा VaikhāGS. 2. 15.

अञ्जरक्करे (añjarakkare) name of a place विख्यातश्रीतिरुवडिदेसे वसतिमाश्रितम् । अंजरक्करेसन्मुळिळनाडुकेऽपि च विश्रुतम् EI. xvi. 313. 124.

अञ्जल (añjala) *m.* [in Cpd. for *añjali*, द्वित्रिभ्यामञ्जले: P. v 4. 102; MugdhaBo. 6. 57 (60. 18)] cf. **अञ्जलस्थ**; *m.* a kind of gem अर्को विमलकश्चैव गोमेदाञ्जलपूलिका: Hastyāyur. 635. 14 (4. 14)

अञ्जलस्थ (añjala-stha) *adj.* found in the joined palms ततो दत्त्वाञ्जलस्थं तदन्तर्धानाञ्जनं दृशो: KathāSaSāg. viii. 6. 150; अञ्जलस्थानि पुष्पाणि वासयन्ति करद्वयम् SaduktiKa. 301. 12.

अञ्जलि (añjalí) *m.* [DEBRU. p. 291; MAYR. i. p. 24. 545; iii. p. 625; Uṇā. 4. 2; Liṅgānu. (Pā.) 110. 11; (S'ā.) 120. 2; (Vā.) 13. 14; (He.) 28. 9; (Va.) 16; (Ha.) 24. 2; (Para.) (28) 3444] **i** joined open palms (as a container) तस्या॑ञ्जलिना॑ ब्रह्महत्यामुपा॑गृह्णात् TaiS. II. v. 1. 2; अ॒ञ्जलि॒ना स॒क्तू॑न् प्र॒दा॒व्ये॑ जुहुयात् TaiS. III. iii. 8. 4; स॒र्वा॑भि: (अङ्गुलीभि:) स॒म॒स्या॒ञ्ज॒लि॒ना॒ध्या॒वपति S'atBr. III. iii. 2. 13; अञ्ज॒लि॒नाप उ॒पाचति S'atBr. XIV. iii. 1. 27; स इत आदायाप: । अञ्जलिना पुरस्तादुपादधात् TaiĀ. i. 23. 5 (145. 1); अञ्जलौ मन्थमाधाय जपति ChāndoU. v. 2. 6; स्पृष्ट्वोदकमञ्जलिना प्रतिगृह्य ĀśvaS'S. I. i. 7. 3; प्राशित्रम् … अञ्जलिना प्रतिगृह्य ĀśvaS'S. I. i. 13. 1; अञ्जलौ पत्न्या: कृत्वा वेदं च मुक्तम् S'ānkhāS'S. i. 15. 10; अथाञ्जलिनाप उपहन्ति सुमित्रा न आप: … इति BaudhS'S. i. 41. 3; i. 184. 16; न्युप्तमाग्नीध्रोऽञ्जलिनाभिगृह्णाति ĀpaS'S. ii. 1. 8; स: योक्त्रमञ्जलिं कुरुते MānS'S. 24. 17; अक्ता धाना अञ्जलिना ĀśvaGS. ii. 1. 7; तस्याञ्जलौ फलानि दत्त्वा S'āṅkhāGS. i. 16. 10; इत्यञ्जलींस्त्रीनासिच्य दक्षिणोत्तराभ्यां पाणिभ्यां पाणी संगृह्य जपति KauṣīGS. ii. 2. 7; अञ्जलावुपस्तीर्य KāṭhGS. iii. 1. 29; लाजा अञ्जलिनाञ्जल्योरावपति MānGS. i. 11. 11; VārāGS. 5. 13; अथास्तमित आदित्ये गौरसर्षपान् फलीकरणमिश्रानञ्जलिना जुहोति BaudhGS. ii. 1. 17; दध्ना लवणमिश्रेणाञ्जलिना … अवोक्षेत् ĀpaGS. vii. 18. 1; इत्यपामञ्जलिमवसिञ्चति GobhiGS. iii. 4. 14; सकृद्गृहीतमञ्जलिं लाजानां वध्वञ्जलावावपेद् भ्राता DrāhyGS. i. 3. 20; दूर्वाग्रैरञ्जलावप आनीय KauśiSū. 24. 18; अञ्जलिना वा पिबेल्लोहितायसेन वा VasiDS. 5. 7; लिङ्गं वा सवृषणं परिवास्याञ्जलावाधाय … गच्छेत् BaudhDS. ii. 1. 14; नाञ्जलिना पिबेत् GautDS. i. 9. 20; येषामा सहस्रादञ्जलिर्न पूर्यते ते क्षुद्रजन्तव: MahāBh. i. 474. 15 (*on* ii. 4. 8); भीमोऽपि … पूरयित्वाञ्जलिं भूयो रुधिरस्योग्रनिस्वन: MahāBhā. viii. App. 1. 33. 22; प्रगृह्य च महीपालो जलपूरितमञ्जलिम् Rāmā. ii. 95. 27; कमलप्रतिमेऽञ्जलौ गृहीत्वा वचनम्…उवाच BuddhaC. 5. 29; न वार्यञ्जलिना पिबेत् ManuSm. 4. 63; ViṣṇuSm. 68. 47; सौवर्णपुष्पसंपूर्णमञ्जलिं संप्रसार्य च । … ध्यात्वा नारायणं देवमञ्जलौ संनिरोधयेत् JayāS. 12. 108; अञ्जलिना सक्तून् प्रदाव्ये जुहोति । द्विहस्तसंयोगोऽञ्जलि: S'ābaBh. 369. 3 (*on* i. 4. 25); सत्यञ्जलौ किं पुरुधान्नपात्र्या BhāgP. ii. 2. 4; S'atTra. 3. 111; तृषितेन मया…अञ्जलिर्विहित: पातुं कान्तारमृगतृष्णिकाम् KundMā. 4. 22; जलं नाञ्जलिना पिबेत् MārkP. 34. 111; अञ्जलिकाञ्जलिस्थाना AṣṭāSaṁ. i. 170. 9 (1. 34); अञ्जलौ मालां मुञ्चति MālaMā. 9. 291; कृत्वाभिमुखमाधाय कुसुमान्यञ्जलौ पुर: । त्याजयेत् MṛgendraT. ii. 7. 59; तृषितस्याञ्जलिना क्षुधितस्य पञ्चाङ्गुलियोगात्…ज्ञानमित्याद्यनुमानमेव MāṭhVṛ. 11. 21 (*on* 4); अञ्जलौ मनसा पीठं प्रथमं परिकल्पयेत् ParaS. 4. 40; अरुणे … अञ्जलौ निपतन्तो नयनोदबिन्दव: ĀścaCū. 6. 17; धृत्वाञ्जलिं कुमारस्य सुवर्णफलसंयुतम् LaghvāśvaSm. 10. 6; भक्षयन्त्यास्तिलास्तव । अष्टौ निपतिता वह्नावञ्जलेर्विरलाङ्गुले: BṛKathāS'loSaṁ. 4. 112; ततोऽञ्जलिं समापूर्य तोयै: प्राग्वदन: स्थित: … क्षिपेत् ĪśānS'iPa. i. 9. 91; एतत्पर्यालोचनया च पुष्पपूर्णमञ्जलिं कृत्वा CaturCin. iii(2). 196. 9; अञ्जलिर्युगंधरीलाजैर्भृत: ViviTīKa. 64. 12; तां च वेणीमञ्जलौ निधाय…क्षिपेत् TristhaSe. 22. 20; कुसुमगर्भितेऽञ्जलौ मूर्तं मूलमन्त्रान्ते महागणपतिमावाहयामीति त्रिकोणे आवाह्य NityoNi. 20. 28; पतञ्जलिरिति तु अञ्जले: पतित इति विग्रहे LaS'abdeS'e. i. 106. 9; **ii** (as a measure equal to 4 *palas* or 2 *prasṛtas*) य॒द्य॒नु॒ल॒भेरन् प्रसृ॒तमा॒त्रं वाञ्जलिमा॒त्रं वा S'atBr. IV. v. 10. 7; ब्रह्मौदनं नि॒र्वपति … चतु॒र: पा॒त्रांश्चतु॒रोऽञ्ज॒लीं॒श्चतु॒र: प्र॒सृ॒तान् S'atBr. XIII. iv. 1. 5; S'āṅkhāS'S. xvi. 1. 2; द्वित्रिभ्यामञ्जले: P. v. 4. 102;

(PadMañ. अञ्जलिपरिमितो व्रीह्यादिरञ्जलिः । न पाणिद्वयम्) JaineVyā. iv. 2. 105; CāndraVyā. iv. 4. 86; S'ākaṭāVyā. ii. 1. 164; SaraKaṇṭhā.(Gr.) v. 4. 118; SiddhaHe. vii. 3. 101; MugdhaBo. 6. 57 (60. 18); द्राक्षाञ्जलिं मृदित्वा वा CaraS. vi. 16. 55; पलं चतुर्गुणं विद्यादञ्जलिम् CaraS. vii. 12. 93 (1941 Ed.); भस्माञ्जलिं चापि घटे निधाय SuśruS. v. 3. 10; चतुःपलं बिल्वमानं पले द्वेऽञ्जलिरुच्यते HāriS. iv. 1. 6; दशैवाञ्जलयः प्रोक्ता उदकस्य त्वगाश्रयाः KāśyaS. 78A. 41; द्वे पले प्रसृतस्तौ द्वावञ्जलिः AṣṭāHṛ. v. 6. 27; त्रयोऽप्यञ्जलयो वसायाः KalyāKā. 3. 7; पाययत्यञ्जलिं जलम् SiddhYo. 1. 79; रक्तस्य सरसस्यात्र क्रमशोऽञ्जलयो मताः AgniP. 369. 41; S'ārṅgaS. i. 1. 26; रसस्याञ्जलयो नव SaṁgīRa. i. 50. 14 (i(2). 116); Aparā. 905. 9 (on 3. 104); एकोऽञ्जलिर्मज्जा BālaKrī. ii. 42. 7 (on 3. 96); RasaRaSa. 11. 7; BhāvPra.(Bhā.) 7(1). 12; **iii** contents of joined open palms अञ्जलीनावपति MānGS. i. 8. 7; एकैकस्य तिलान् मिश्रान् दद्यात् त्रीनष्ट वाञ्जलीन् Dakṣa-Sm. 2. 55; इति चापि विधाय दीयतां सलिलस्याञ्जलिरेक एव नौ KumāSaṁ. 4. 37; चतुर्दद्याञ्जलिं कुर्यात् BṛParāSm. 4. 142; एकैकमञ्जलीन् अर्हन्त्येते ··· देवर्षिपितरस्त्रयः LaghvāśvaSm. 1. 95; तृणैरञ्जलिभिश्चैव देवांस्तृप्येत् पुनः पितॄन् S'aṅkha-LiSm. 9; कृत्वाग्निवर्णं निर्वाप्य क्षीरे तस्याञ्जलिं पिबेत् AṣṭāHṛ. ii. 1. 39; प्रकीर्णैः पुष्पाणां हरिचरणयोरञ्जलिरयम् VeṇiSaṁ. 1. 8; चिक्षिपुः पौष्पमञ्जलिम् MahāP. 22. 152; ते जलमाविश्य प्रासिञ्चन्नञ्जलीन् मिथः GaṇeP. ii. 99. 20; सोऽपि··· दृष्ट्वा भस्मीकृतान् पितॄन् । साश्रुस्तेभ्योऽञ्जलिं दित्सुः RāmāCaṁ. 1. 72; RāmāMañ. 96. 22; स्वःसुन्दरीवृन्दपरिग्रहाय दत्तोऽञ्जलिः संप्रति दानवेन्द्रैः VikraDeC. 1. 52; तत्तोयैस्त्र्यञ्जलीन् दत्त्वा MahNirvāT. 5. 41; एतस्मिन् सरिदस्ति ··· यस्यां निवापाञ्जलौ ··· व्यग्राः शफर्यः EI. ii. 419. 47; एवं च दशसु दिनेषु पञ्चपञ्चाशदञ्जलयो भवन्ति VīrMi. (S'uddhi.) 202. 13; **iv** closely joined palms (as a mark of reverence or submission) अथ बर्हिषि प्राञ्चमञ्जलिं निधाय जपति नम उपेति KauṣīBr. 3. 8 (13. 16); पूर्वेण स्रुचावञ्जलिं निदधाति S'atBr. I. iv. 5. 1; सोऽञ्जलिं कृत्वा त्रिरुपतिष्ठतु JaimiBr. 1. 362; अञ्जलिं कृत्वा उपाश्चित ChāgU. 6. 9; तत्र उपेति बर्हिष्यञ्जलिं निधाय जपति S'āṅkhā-S'S. i. 14. 20; नमो देवेभ्य इति प्राञ्चमञ्जलिं करोति BaudhS'S. i. 196. 16; अग्रेण ध्रुवां जुहूं वाञ्जलिं कृत्वा··· जुहूमादत्ते ĀpaS'S. ii. 13. 2; KātySS. iii. 1. 15; अञ्जलिं कृत्वा नमो व इति DrāhyāGS. iii. 5. 27; अप्सरा देवकन्या वा ··· इति कृत्वाञ्जलिं सर्वे दद्दृशुस्ताम् MahāBhā. iii. 248. 10; सा तु ··· कृत्वा शिरसि चाञ्जलिम् । देवराजमथोवाच MahāBhā. v. 13. 3; अभिवाद्याञ्जलिं बद्ध्वा वन्दमानोऽभ्यभाषत MahāBhā. vii. 3. 8; अतो भयार्ताः प्रणिपत्य भूयः कृत्वाञ्जलीनुपतिष्ठन्ति शूरान् MahāBhā. xii. 100. 16; तावन्योन्याञ्जलिं कृत्वा···ननन्दतुर्दशरथो रोमपादश्च Rāmā. i. 10. 22; एषोऽञ्जलिर्मया बद्धः Rāmā. iv. 7. 11; इज्याञ्जलिनमस्कारजपहोमव्रतादिभिः SuśruS. vi. 37. 15; भो महाब्राह्मण अयमनुनयसर्वस्वमञ्जलिः Cārud. 1. 25(9); कृतो वित्तस्तम्भप्रतिहतधियामञ्जलिरपि SatTrayī. 150; एषोऽञ्जलिर्विरचितो वनदेवतानाम् KundaMā. 1. 23; सर्वे चतुर्भुजास्त्वेते द्वाभ्यां संधारयन्ति च । पीठमञ्जलिना द्वाभ्यां प्रणमन्ति जगत्प्रभुम् JayāS. 12. 13; रामाय सेषुचापाभ्यां कराभ्यां विदधेऽञ्जलिम् BrahmāṇḍP. ii. 23. 16; MārkP. 8. 6; यस्योदयास्तसमये ··· कुरुतेऽञ्जलिं त्रिनेत्रः LaghuJā. 1(0). 1; अञ्जलिं किल भयेन कुर्वती JānaHa. 8. 26; स्वागतमित्यञ्जलिनाभ्युपैति PādaTā. 16. 1; (मालती) अकथयच्च दधीचसंदिष्टं शिरसि निहितेनाञ्जलिना नमस्कारम् HarṣaC. 54. 7; क्षीणमनङ्गायाञ्जलिं ददे Kāvyāda. 3. 79; शिरसि कुर्वन्नञ्जलिम् ··· अशयिषि DaśKuC. 92. 5; शिरस्यञ्जलिमाधाय कृतसिद्धनमस्कृतिः PadmP.(Ra.) 7. 392; अञ्जलिना ··· स्वामिनमभिवन्दयेत् BārhaS. 4. 38; अञ्जलिं संप्रसार्य च PāraS. 5. 143; तत्त्वं प्रसीद भगवन्नयमञ्जलिस्ते MahāviC. 4. 21; देवताप्रसादाभयप्रार्थनादौ संहतहस्तसंयोगमात्रमञ्जलिः TantrVā. 332. 7 (on i. 4. 24); पूज्यानामञ्जलिस्तद्वदन्येषां वाक्यवन्दनम् KulārT. 12. 112; तुभ्यं मातर्योऽञ्जलिम् मूर्ध्नि धत्ते TripuVePāSt. 95; मातर्जाह्नवि शंभुसङ्गमिलिते मौलौ निधायाञ्जलिम् GaṅgāA. 8; व्याबद्धाञ्जलिशोभितेन शरणं मूर्ध्ना यदंघ्रिद्वयम् EI. vi. 245. 37; अयमञ्जलिरञ्जनासुतः सुदति प्रह्वशिरा विसृज्यताम् RāmC. 12. 82; जग्मुः ··· विद्विषां ··· सेवाञ्जलिं मौलयः EI. ix. 32. 40; तेषामु वा विनिहतोऽञ्जलिरेष मूर्ध्नि EI. iii. 275. 82; केवलमवलम्ब्य मध्यमपन्थानमुपरचयामि तेऽञ्जलिम् TilaMañ. 43. 2; क्रूराः कृतोऽञ्जलिरयम् TātpaṬ.(Vā.) 726. 11 (on v. 2. 24); को नाम तत्प्रति विनाञ्जलिमस्य कुर्यात् BhāgP. iii. 31. 18; अञ्जलिः शिरसा ब्रह्मन् कृतोऽयं पादयोस्तव BhaviP. 2. 2 (i. 1. 28); नाभिहृन्मस्तकेष्वेतैः क्रमात् कुर्यात् त्रिरञ्जलिम् IśānS'iP. i. 26. 15; अयं साधुचरस्तस्मादञ्जलिर्बध्यतामिह KāvPra. 325. 6; सद्यः कृत्वा पवन विनयादञ्जलिं मूर्ध्नि किंचिद्भक्त्योऽसौ रहसि भवता मद्गिरा गौडराजः PavaDū.(Dh.) 96; संभृतश्रुतैः । नाञ्जलिर्दीयते जातु मानाय च गुणाय च RājTa.(Ka.) 3. 132; ये वृद्धा लघवोऽपि येऽत्र गणका बद्धाञ्जलिं वच्मि तान् Golā. 280. 12 (31. 60); शिरस्यञ्जलिमुत्तंससंनिभं विरचय्य सः TriṣaS'aPuC. ii. 2. 460; समानेतुं कान्तं व्रज मदन बद्धोऽञ्जलिरयम् PratāYaBhū. 29. 5; ह्रीमूढानां करकिसलयच्छन्नकाञ्चीपटानामाकाङ्क्षन् वा कपटभणितैरञ्जलीन् मञ्जुवाचाम् (व्रज) HaṁsSaṁ. 70; छायाहेतोः पथि विटपिनामञ्जलिः केन बद्धः Subhāṣi. 282; **v** closely joined hands (as a posture in dance or a *mudrā* in Tantra) अञ्जलिश्च कपोतश्च ··· एते तु संयुता हस्ताः NāṭyaSā. 9. 8; पताकाभ्यां तु हस्ताभ्यां संश्लेषादञ्जलिः स्मृतः NāṭyaS'ā. 9. 128; अञ्जलिः प्रथमा मुद्रा वन्दनी हृदयानुगा AgniP. 26. 1; अञ्जलिश्च कपोतश्च कर्कटः स्वस्तिकस्तथा । एते वै संयुता हस्ताः ViṣṇuDhaP. iii 26. 5; SamarāSū. 83. 192; AbhinDa. 248; अथ संयुतहस्ताः । पताकहस्ततलयोः संश्लेषादञ्जलिः SaṁgīRa. 7. 185; 7. 82; अन्योन्यसंपुटदृढा घटिताग्रहस्ता मुद्राञ्जलिर्मुकुलिताम्बुरुहानुरूपा TantrSa. 12. 180; किंचिदाकुञ्चिताङ्गुल्यग्रयोः स्वाभिमुखं करयोरन्योन्यसंबन्धेऽञ्जलिः NityoNi. 72. 23; AmaK. 1244; 1481; Vaija. 179. 78; TrikāS'e. iii. 5. 2; AnekāSaṁ. 3. 617; AbhidhāCin. 598; MediK. 162. 60; अञ्जलि is given as one of the meanings of कर्वर, NānārthāSaṁ. ii. 79. 383.

अञ्जलिक (añjali-ka) *m. n.* [included in the *purohitādigaṇa* GaṇPā. 144. 17; KāśiVṛ. on v. 1. 128; JaineVyā. 236. 12 (on iii. 4. 118); GaṇRa. 7. 403 (426); 7. 403 (427); Prasā. i. 862. 12]; **1** a kind of arrow अञ्जलिकैरपि । पातयन्तोत्तमाङ्गानि पाण्डवा गजयोधिनाम् MahāBhā. vi. 58. 38; स पाण्डवानाम् ··· महारथान् ··· वारयामास ··· शितैरञ्जलिकैस्तथा MahāBhā. vi. 104. 30 (Devabodha अञ्जल्याकारफलैः); vii. 37. 22; अञ्जलिकेनाथ ··· चापं चिच्छेदाशु घटोत्कचः MahāBhā. vii. 150. 78; vii. 631*; आदत्त पार्थोऽञ्जलिकं निषङ्गात् MahāBhā. viii. 67. 16; viii. 60. 2; vii. 67. 33; viii. 1158*(1); viii. 1159*(3); भल्लैरञ्जलिकैरपि । विव्याध Rāmā. vi. 35. 23; शरेणाञ्जलिकेनारादूर्ध्वरोम्णः शिरोऽच्छिनत् KathāSaSāg. viii. 5. 59; DaśāvaC. 8. 761; खुरप्रोऽपि क्षुरप्रः स्यादर्धेन्दुप्रमुखा भिदाः । अप्यञ्जलिक इत्याद्या वाजः पक्षश्च पिच्छकः KalpaK. 119. 275; **2** who has folded the palms together, cf. **अञ्जलिकारिन्**, सुमन्त्रः । उपस्थितैरञ्जलिकारिभिश्च(v. l. अञ्जलिकैश्च)···समाकुलं द्वारपथं ददर्श Rāmā. ii. 305*(11)

अञ्जलिकरण (añjali-karaṇa) *n.* making *añjali*, joining the open palms, folding the palms in respectful salutation लौकिकश्चेश्वरो दानपरिचरणप्रणामाञ्जलिकरणस्तुतिमयीभिः ··· भक्तिभिः ··· आराधकाय फलं प्रयच्छति Bhām. 577. 19 (on iii. 2. 41); अञ्जलिकरणं प्रणामो भणितमिह गुणाधिकानां हि Tattv-Pradī.(A.) 354. 2 (on 3. 62); TātpaVṛ. 354. 11 (on 3. 62); 354. 14 (on 3. 62); नमस्काराञ्जलिकरणादुभौ हस्तौ समौ जान्वोरन्तरे यथा स्थितौ स्यातां तथा कृत्वा ··· द्विजोत्तमान् ··· पृच्छेत् SmṛtiCan. v. 280. 17.

अञ्जलिकर्मन् (añjali-karman) *n.* the act of joining the open palms, the act of folding the palms, respectful salutation भयेन भेदयेद् भीरुं शूरमञ्जलिकर्मणा MahāBhā. i. App. I. 81(101) = SūktiRa. 129. 2; लुब्धमर्थेन गृह्णीयात् स्तब्धमञ्जलिकर्मणा CāṇaNīDa. 6. 12 = Hitopa. 4. 107.

अञ्जलिका (añjali-kā) *f.* **1** folded or hollowed palms त्वं करोषि न्यञ्जलिकाम् TaiĀ. i. 6. 1 (34. 2); नि जानुका मे न्यञ्जलिका TaiĀ. i. 6. 2 (35. 1); **2** a small mouse तदिति तस्य वचनं निशम्य केचिदवादिषुः(?:) (v. l. एकोनल(? लो) निजदर्पस्फूर्जद्भुजा संज्ञितो) जृम्भमाणविजातिमुखध्वनिमुखर्शिजाननिजनिर्यत्परासुभोजनजनितविषज्वालाज(v. l. °जा)टालाभिर्व्यंजितजगज्जस्य प्रथमजांजलिका(v. l. °गलिका) इति S'ukSa. 67. 12; **3** a palm-shaped implement तत्र क्षारकर्मण्युपहरेत् पिचुवर्तिशलाकादर्व्यंजलिकाघृतमधुसुक्तयोदकमस्तुक्षीरोदकशीतोष्णदेहशयनासनादीनि AṣṭāSaṁ. i. 191. 16 (1. 39); i. 170. 8 (1. 34); **4** doll of clay स्याल्लेप्यमय्यञ्जलिका S'abdaRa.(Vā.) 2081; **5 A** ichneumon plant ऋक्षगन्धा सर्पगन्धा ऋषिजा[ञ्जलिका]स्तथा (v. l. ऋषिकाञ्जलिका) Paryā-Mu. 17. 23; **5B** *Mimosa pudica* [APTE]; **6A** a kind of insect (*hālāhala*) हालाहलस्त्वञ्जलिका सोक्ता कुटिलकीटकः RājNi. 404. 2; S'abdaRa.(Vā.) 1641; **6B** an insect of a spider tribe [APTE]

अञ्जलिकार (añjali-kāra) *m.* the plant *Mimosa pudica* or *natans*, cf. **अञ्जलिकारिका**, मातृवाहकाञ्जलिकारप्रचलाकभेकाक्षिपीलुकयोगो विषूचिकाकारः ArthS'ā. iii. 217. 8 (14. 1)

अञ्जलिकारक (añjali-kāraka) *adj.* making *añjali* (the folded palms) cf. **अञ्जलिकारिन्**, सुमन्त्रः । उपस्थितैरञ्जलिकारिभिश्च (v. l. अञ्जलिकारकैश्च) ···समाकुलं द्वारपथं ददर्श Rāmā. ii. 305*(11)

अञ्जलिकारिका (añjali-kārikā) *f.* **1** doll of clay, earthen doll, a kind of statue (जामाता) जगाम च ··· अञ्जलिकारिकाभिरुद्भासितपर्यन्ताम् ··· वेदीम् HarṣaC. 207. 15; स्मृता लेप्यमयी स्त्री तु बुधैरञ्जलिकारिका AbhidhāRa-Mā. 2. 338; NāmaMāli. 590; Vaija. 137. 13; AbhidhāCin. 1014; ParaNā. 678; KośaKaTa. 1. 2762; KalpaK. 18. 92; 208. 61; **2** the plant *Mimosa pudica* or *natans* षट्पदी नाम विख्याता तथा चाञ्जलिकारिका AśvaVai. 63. 2; Hastyāyur. 150. 9 (1. 18); (*Kośas* identify it with *lajjālu*, *raktapādī* or *raktaparṇī*, *namaskārī* etc.) Vaija. 57. 148; DhanvaNi. 155. 24; RājNi. 156. 3; NighS'e. 275. 2171; NānārthāSaṁ. iii. 105. 2; S'abdaRa.(Vā.) 1179;

KośaKaTa. 1. 4096; KalpaK. 313. 572; **3** a kind of small insect अञ्जलिकारिका । क्षुद्रजन्तुविशेषे च गजायुर्वेदभाषिते NānārthaSaṁ. iii. 105. 2.

अञ्जलिकारिन् (añjalikār-in) *adj.* who joins the hollowed palms together for salutation सूतो रामवेश्म ददर्श ह । उपस्थितैः समाकीर्णं जनैरञ्जलिकारिभिः Rāmā. ii. 300*(9); सुमन्त्रः । उपस्थितैरञ्जलिकारिभिश्च ··· समाकुलं द्वारपथं ददर्श Rāmā. ii. 305*(11); JayāS. 22. 32.

अञ्जलिकारी (añjali-kārī) *f. Mimosa pudica* or *natans* अन्या नमस्करी स्यादंजलिकारी कृताञ्जलिश्चेति AbhidhāMañ. 109. 3.

अञ्जलिकावेध (añjalikāvedha) *m.* particular mode of fighting with an elephant जानन्नञ्जलिकावेधं नापाक्रामत पाण्डवः MahāBhā. vii. 189*(3)

अञ्जलिकिसलय (añjali-kisalaya) *n.* sprout-like folded palms सा मामञ्जलिकिसलयोत्तंसितेन मुखविलोलकुन्तलेन मूर्ध्ना प्रणिपत्य DaśKuC. 82. 10.

अञ्जलिकुड्मल (añjali-kuḍmala) *n.* bud-like folded palms स मया प्रह्वया भूत्वा बद्धा चाञ्जलिकुड्मलम् । उक्तो वाक्यमिदम् Rāmā. ii. App. I. 7 (32); रुद्रमभ्यर्च्य दिव्यैरंजलिकुड्मलैः ··· बाणश्च स्वगृहं गतः S'ivaP. ii(5). 52. 20 (284B. 4); हस्तावञ्जलिकुड्मलं रचयितुम् SūktiRa. 124. 23.

अञ्जलिकृत (añjali-kṛta) *adj.* [*f.* -ā] who has joined palms अञ्जलिकृतः पिता उपतिष्ठते GobhiGS. ii. 8. 1 (comm. आहिताग्न्यादिपाठात् कृतशब्दस्य परनिपातः); iv. 3. 21; अञ्जलिकृतं प्रदक्षिणं मुञ्जमेखलामावध्नन् DrāhyGS. ii. 4. 20; इत्युक्तमात्रे भीष्मस्तु मूर्ध्न्यञ्जलिकृतोऽह्वयत् MahāBhā. i. 1056*; इत्यञ्जलिकृता सीता देवता अभ्ययाचत Rāmā. vii. 46. 18; vii. 47. 6.

अञ्जलिगत (añjali-gata) *adj.* [*f.* -ā] **i** found in folded palms, what is present in folded palms सत्यव्रतोऽञ्जलिगतां ···। उत्ससर्ज नदीतोये शफरीम् BhāgP. viii. 24. 13; **ii** pertaining to *añjali* द्वादशभिरव्ययैर्द्वादशसु वस्तुषु न्यूनाधिकसंख्याञ्जलिगता व्यवच्छिद्यते VīraMi. 862. 10 (*on* 3. 105)

अञ्जलिग्रथनादि (añjaligrathanādi) *adj.* act of saluting with folded palms etc. वन्दनोपासने कृत्वा सोऽञ्जलिग्रथनादिभिः ··· उत्ततार ताम् DvyāśraKā. 13. 15.

अञ्जलिग्रहण (añjali-grahaṇa) *n.* taking in joined palms अभिप्राणनस्याग्युद्दीपनसमर्थत्वेनाञ्जलिग्रहणप्रयोजनत्वमिति भावः MayūMāli. 408. 23 (*on* v. 1. 2)

अञ्जलिग्राह्यता (añjaligrāhya-tā) *f.* possibility of taking in joined palms अञ्जलिग्राह्यता चन्द्रत्विषः AlaṅkāCin. 7. 21.

अञ्जलिघटन (añjali-ghaṭana) *n.* act of joining palms करुणमातुरकृपणकोमलाञ्जलिघटनयाचितावसानमनलसोपलभ्यमानसद्भवरसं चोरिकासुरतरसतृप्तिमन्वगच्छत् AvantiKa. 36. 18.

अञ्जलिचुम्बितचूड (añjalicumbita-cūḍa) *adj.* whose crest has been kissed (i. e. touched) by joined palms (सः) अञ्जलिचुम्बितचूडश्चिरमशेत DaśKuC. 134. 3.

अञ्जलिच्छन्नवदन (añjalicchanna-vadana) *adj.* who has covered one's face with joined palms अवस्थां तां वीक्षितुमिवाक्षमाः अञ्जलिच्छन्नवदनाः चेल्यश्चेटाश्च चक्रन्दुः TriṣaS'aPuC. ii. 6. 175.

अञ्जलिच्छादितमुखी (añjalicchādita-mukhī) *adj.* (*f.*) who has covered the face with joined palms अञ्जलिच्छादितमुखी ··· रोदितुं प्रवृत्ता TāpaVa. iv. 9. 27.

अञ्जलिजलजपुट (añjalijalaja-puṭa) *m. n.* cavity of the lotus-like joined palms आदरादिवाञ्जलिजलजपुटावर्जिताभिर्नखांशुजालवेणिकाभिरभिषिच्यमानमौलिः AvantiKa. 144. 17.

अञ्जलित्रय (añjali-traya) *n.* three measures of joined palms गायत्रीमंत्रतोयाढ्यं दत्तं येनांजलित्रयम् । ··· किं न स्यात्तेन दत्तं जगत्त्रयम् SkandP. iv. 9. 46; अनेन खलु मन्त्रेण दद्यादम्भोऽञ्जलित्रयम् BṛDharmaP. i. 15. 49; क्रमादारोपयेच्छम्भोर्दमनस्याञ्जलित्रयम् ĪśānS'iPa. ii. 22. 65; ताप्येन रुक्मलोहस्य हतस्याप्यञ्जलित्रयम् (क्षिपेत्) RasRaSa. 28. 46; एवमेकैकस्याञ्जलित्रयप्रसेकः SmṛtiCan. ii. 522. 9; जलानामञ्जलित्रयम् । दत्त्वा जपेत्तु गायत्रीम् MahNirvāT. 5. 61; अञ्जलित्रयदानेन संक्षेपतर्पणमाचरन्ति VīraMi.(Āhnika.) 145. 16; 284. 7; अञ्जलित्रयपक्षतृतीयः प्रकृतः BālamBha. iii. 11. 19 (*on* 3. 3)

अञ्जलित्रितय (añjali-tritaya) *n.* three measures of joined palms निर्वाते तोयमादाय अञ्जलित्रितयं पिबेत् Rasā. 12. 252.

अञ्जलित्व (añjali-tva) *n.* the state of being with folded palms (in reverence) एकहस्तेन नमनं तु श्रीभागवते प्रतिषिद्धम्-एकेन पाणिना ··· इति । अञ्जलित्वमपि ह्यस्य नास्ति PāñcRāRa. 115. 17.

अञ्जलिदान (añjali-dāna) *n.* offering with joined palms उदकक्रिया अञ्जलिदानरूपा नित्यवत्कार्या VīraMi. 762. 7 (*on* 3. 4); अञ्जलिदानोत्तरं स्नानं भवति BālamBha. iii. 11. 31 (*on* 3. 5); iii. 11. 25 (*on* 3. 5)

अञ्जलिदानादि (añjalidānādi) *adj.* offering (water) with joined palms etc. यदत्र संध्याकर्मणि श्रौतमञ्जलिदानादि तदेवानुष्ठेयं नान्यदित्यभिप्राय इत्यनुसन्धेयम् SmṛtiCan. ii. 367. 19; पिण्डपदेन दशसु दिनेषु दीयमानाः । उदकमञ्जलिदानादि BālamBha. ii. 229. 19 (*on* 2. 135)

अञ्जलिदानापत्ति (añjalidānāpatti) *f.* contingency of the offering with joined palms परिभाषया मन्त्रसमाप्तौ अञ्जलिदानापत्तेः VīraMi.(Āhnika.) 353. 19.

अञ्जलिद्वय (añjali-dvaya) *n.* (contents of) pair of folded hands स्वगृह्ये विशेषानुक्तौ एकाञ्जलिना अञ्जलिद्वयस्य विकल्पः VīraMi.(Āhnika.) 344. 12.

अञ्जलिद्वितय (añjali-dvitaya) *adj.* of two measures of joined palms अञ्जलिद्वितये तोये कंसमात्रपयोन्विते । तुलार्धशर्करां दत्त्वा RasRaSa. 22. 114.

अञ्जलिनियम (añjali-niyama) *m.* rule regarding (the water libation with) joined palms अत्राञ्जलिनियममाह बोधायनः SmṛtiCan. ii. 513. 10; अञ्जलिनियमायाह । वसिष्ठेनापीति BālamBha. iii. 10. 24 (*on* 3. 3)

अञ्जलिनिर्देश (añjali-nirdeśa) *m.* indication or pointing out by joined palms नन्वञ्जलिनिर्देशादनामग्रहणाच्च दत्तमेव प्रतिवचनं कुशो ज्यायानिति KundaMā. 5. 14 (29)

अञ्जलिनिवृत्त्यर्थम् (añjali-nivṛttyartham) *adv.* for excluding *añjali* (i. e. joined palms) एकेन हस्तेनेत्यञ्जलिनिवृत्त्यर्थमुक्तम् SmṛtiCan. v. 367. 10.

अञ्जलिपद्म (añjali-padma) *m.* joined palms resembling a lotus (-bud) तेषामञ्जलिपद्मानि प्रगृहीतानि सर्वशः Rāmā. ii. 3. 1.

अञ्जलिपरिमित (añjali-parimita) *adj.* of the measure of joined palms अञ्जलिपरिमितो व्रीह्यादिरञ्जलिः PadMañ. *on* KāśiVṛ. *on* P. v. 4. 102.

अञ्जलिपात (añjali-pāta) *m.* showing reverence by joined palms शूरमञ्जलिपातेन भीरुं भेदेन भेदयेत् MahāBhā. xii. 347*(1)

अञ्जलिपात्र (añjali-pātra) *n.* cup of joined palms क्षीबः । अञ्जलिपात्रे पिबति च निजमूत्रविजृम्भितं चन्द्रम् KalāVi. 6. 20.

अञ्जलिपान (añjali-pāna) *adj.* who drinks (water) with joined palms पुण्यां तेरुरिक्षुमतीं नदीम् । अवेक्ष्याञ्जलिपानांश्च ब्राह्मणान्वेदपारगान् Rāmā. ii. 1588*(2)

अञ्जलिपुट (añjali-puṭa) *n.* cavity produced by joined palms नाञ्जलिपुटेनापः पिबेत् SuśruS. iv. 24. 98; शूद्रश्चेन्मन्त्रं लिखित्वाञ्जलिपुटे दद्यात् PārāSū. 6. 3; अञ्जलिपुटैर्ग्राह्या ··· सा वर्तते चन्द्रिका KāvyMī. 81. 1; ViddhaS'ā. 3. 14; SaraKaṇṭhā. 178. 8; SaduktiKa. 55. 26; S'ārṅgaPa. 3638; न गोचरश्चतुरोक्तिसुधारसास्वादविस्फुरितश्रवणाञ्जलिपुटायाः सहालापगोष्ठीनाम् YaśasCam. 84. 3; नमाम्येष बद्धाञ्जलिपुटम् GaṇeP. i. 4. 10; लोकनाथमवनिमव [भ]क्तिनम्रं रचिताञ्जलिपुटम् EI. xxi. 32. 7; किमेतदञ्जलिपुटे तातेन गोपायितम् SubhāRaK. 4. 30 = SaduktiKa. 7. 30; Subhāṣi. 69; त्वत्स्तोत्रायाञ्जलिपुटमिवाविर्भवत्कुड्मलौघाः S'rīKaC. 16. 15; पूजासज्जाः अञ्जलिपुटाः - अञ्जलय एव यासां ताः AupaSūT. 105. 12; शिरसि निदधानोऽञ्जलिपुटम् ··· अये गौरीनाथ ··· नेष्यामि दिवसान् S'atTrayī. 227 = SaduktiKa. 317. 13 = Ekāva. 3. 1 (102. 10); SāhiDa. 194. 10; Kuval. 171 (22); प्रेयसीवदनमुक्षितुमात्तं नीरमंजलिपुटे दयितेन HammīMaKā. 6. 22; बद्धाञ्जलिपुटं ततः । उवाच KathāKau. 4. 67; अर्घ्योदकानि महसामधिपाय दातुमाविश्चतोऽञ्जलिपुटेष्वखिलान्द्विजातीन् ··· किमिहानुकुर्वन्ति ··· अरविन्दाः AcyutarA. 10. 10; शक्यमञ्जलिपुटैः सलिलार्द्रैः ··· तदानीं विष्वगुज्ज्वलयितुं विपिनानि Gaṅgāva. 2. 36; आधारमण्डपस्थं ज्योतिर्विशेषमञ्जलिपुटं प्रति दक्षिणनासापुटेन संप्राप्तं परिभाव्य BālamBha. i. 86. 18 (1. 23)

अञ्जलिपुटक (añjali-puṭaka) *adj.* who has joined palms (in salutation) इत्युक्त्वाञ्जलिपुटकं स्तुवन्तं शंकरो नरम् । ··· पुनर्वचनमब्रवीत् PadmP. v. 14. 37.

अञ्जलिपुटसंभृत (añjaliputa-sambhṛta) *adj.* held in the joined palms अञ्जलिपुटसम्भृतोपजातबीजतण्डुलैः ··· वैखानसकुमारकैः ··· नर्मदैकगूढपार्श्वम् ··· आश्रमवनमदर्शयत् AvantiKa. 139. 8.

अञ्जलिपुरुष (añjali-puruṣa) *m.* man with joined palms अञ्जलिपुरुषः करयोः परस्परपृष्ठलग्नयोः ViṣṇuDhaP. iii. 32. 0 (328A. 3)

अञ्जलिपूरित (añjali-pūrita) *adj.* filled in the joined palms नाभिदघ्ने जले स्थित्वा जलैरञ्जलिपूरितैः ··· मन्त्री सहस्रमभिषेचयेत् ĪśānS'iPa. i. 38. 5.

अञ्जलिपूर्णम् (añjali-pūrṇam) *adv.* filling the cavity of folded palms मुक्तवन्तमपामञ्जलिपूर्णमादित्यमुपस्थापयेत् ĀśvaS'S. II. ii. 14. 6.

अञ्जलिपूर्वम् (añjali-pūrvam) *adv.* preceded by folding of hands (in respectful salutation) तत्र संघस्याञ्जलिपूर्वं विज्ञप्तिकां चक्रे PurāPraSaṁ. 66. 26.

अञ्जलिपेय (añjali-peya) *adj.* to be drunk with joined palms आरादञ्जलिपेयमत्र ··· सौरभ्यं पवनोपनीतमसितो धावन्त्यमी षट्पदाः PārvPa. 1. 8.

अञ्जलिप्रक्षेप (añjali-prakṣepa) *m.* throwing of (water, rice or

sesamum) with joined hands यद्यपि सन्ध्याया विनिवृत्तिः श्रूयते तथाप्यञ्जलिप्रक्षेपादिकं कुर्यात् Mitā. 334. 1 (*on* 3. 17); अञ्जलिप्रक्षेपस्तूच्चार्यमाणया सावित्र्या कार्यः Aparā. 893. 6 (*on* 3. 17); मनसोच्चारयेदित्येतदञ्जलिप्रक्षेपव्यतिरिक्तविषयम् SmṛtiCan. vi. 74. 17; स्थले स्थित्वा जलेऽञ्जलिप्रक्षेपो न कार्यः BālamBha. i. 339. 24 (*on* 1. 101)

अञ्जलिप्रग्रह (añjali-pragraha) *adj.* given to joining the palms (in respectful salutation) सोऽञ्जलिप्रग्रहो भूत्वा चतुर्वक्त्रो निरुक्तगः MahāBhā. (Chitraśālā Press, Poona, 1932) xii. 342. 124; xiii. 140. 36; Rāmā. vii. 100. 15; *m.* joining the palms (as a mark of respect) एषोऽञ्जलिप्रग्रहं करोति Padm-Prā. 15. 19; अञ्जलिप्रग्रहेण हस्तजोटनेन मनस एकत्वकरणेन JñātāDhaṬ. 46B. 8.

अञ्जलिप्रणयिन् (añjali-praṇayin) *adj.* given to holding palms together (in respectful salutation) यत्र यत्र दृशः पेतुस्तव ... तत्र तत्राबभौ श्रीमानञ्जलिप्रणयी जनः RāmāMañ. 393. 12.

अञ्जलिप्रमाण (añjali-pramāṇa) *n.* measure of joined palms जातस्य वर्धमानस्य...देहिनः। स्वेनाञ्जलिप्रमाणेन द्रवाणि प्रमिमीमहे KāśyaS. 78A. 21.

अञ्जलिप्रसूनस्थ (añjaliprasūna-stha) *adj.* residing in the flowers in the joined palms आवाहयामि लक्ष्मीशं ... अञ्जलिप्रसूनस्थं स्वमूर्तावितवतायें LakṣmīT. 36. 96.

अञ्जलिप्रह्वम् (añjali-prahvam) *adv.* bowing with joined palms (in respectful salutation) नम्यमानोऽञ्जलिप्रह्वम् ... मुदागादाश्रमपदम् PārśvC. 6. 101.

अञ्जलिप्रिय (añjali-priya) *m.* name of a Yakṣa [DBHS]

अञ्जलिप्रिया (añjali-priyā) *f.* name of a plant (*añjalinī*) *Mimosa pudica* मुशली शक्रवल्ली च सदाभद्राञ्जलिप्रिया S'āraTi. 8. 158.

अञ्जलिबद्ध (añjali-baddha) *adj.* with hollowed palms joined together (in reverence) सर्वे...एते (ऋग्वेदादयः) द्वाभ्यामञ्जलिबद्धाभ्यां(भुजाभ्यां) प्रणमन्त्यासनस्थिताम् (देवीं लक्ष्मीम्) LakṣmīT. 36. 20; मयि अञ्जलिबद्धे एतैरपि अञ्जलिः कृतः VedāntRaMañ. 3. 8 (108. 4)

अञ्जलिबन्ध (añjali-bandha) *m.* folding of the palms, joining of the palms (in salutation) त्वय्यपि विपद्धान्धव विन्ध्य वन्ध्योऽयमञ्जलिबन्धः HarṣaC. 327. 11; सभाविसर्जनानन्तरमञ्जलिबन्धस्य कारणं पृच्छन् PrabaCin. 80. 24; 80. 27; आम्बडः सचिवाग्रणीः। चकाराञ्जलिबन्धेन नमस्कारं नरेशितुः KumāCaSaṁ. 17. 10; 17. 11; 56. 8; 56. 10; अकरोदञ्जलिबन्धमब्जिनी MadhuVi. 7. 7; आचार्यनामग्रहणे भगवन्नामग्रहणे च अञ्जलिबन्धादिकं तत्र तत्र ग्राह्यम् PañcRāRa. 116. 6; न बलं भुजयोः क्रमेत तस्मिन्नवशादञ्जलिबन्धशिक्षितौ यौ S'ivLī. 3. 2.

अञ्जलिबन्धन (añjali-bandhana) *n.* folding of the hands (in salutation) अरातेर्यः प्रयुङ्क्ते तौ (करौ) पुरुषोऽञ्जलिबन्धने PadmP.(Ra.) 9. 87; दूरेऽप्यञ्जलिबन्धनं प्रणमनं स्तब्धार्धमूर्ध्नः कृतः SūktiMu. 1. 10; S'ārṅgaPa. 71; PrabaCin. 73. 13.

अञ्जलिबन्धसंपद् (añjalibandha-sampad) *f.* glory of the folded palms (in salutation) विवेश ता(पुरी)मञ्जलिबद्धसंपदा (v. l. अञ्जलिबन्धसंपदा) मुहुर्मुहुःखेन्दोरुदयेन सर्वतः। नरेन्द्रसूनुर्मुकुलानि कल्पयन् JānaHa. 9. 51.

अञ्जलिभृत् (añjali-bhṛt) *adj.* holding together both the palms (in salutation) नवपल्लवाञ्जलिभृतः ... तरून् गमयतावनतिम् Kirātā. 6. 26; प्रपन्नानां मूर्तः सुकृतपरिपाको जनिमताम् (v. l. सुकृतपरिपाकोऽञ्जलिभृताम्) MahāvīC. 7. 33 (208. 7)

अञ्जलिभोजनी (añjali-bhojanī) *adj.* (*f.*) eating from the joined palms ऋतुकालं वनिता मुनिव्रता। ... शरावपत्रांजलिभोजनी दिने KalyāKā. 2. 42.

अञ्जलिमध्यग (añjalimadhya-ga) *adj.* placed in palms joined together (in reverence) आमन्त्र्य च पवित्रं तत् विधायाञ्जलिमध्यगम् (तच्छिवाय निवेदयेत्) AgniP. 78. 52.

अञ्जलिमध्यस्थ (añjalimadhya-stha) *adj.* found in the palms joined together अञ्जलिमध्यस्थत्रिकोणचक्रे सञ्चिन्त्यमूर्तिं ... पूजयेत् SetuBa. 81. 15.

अञ्जलिमस्तक (añjali-mastaka) *adj.* with folded hands on the head जगाद मन्दनिःस्वानो विजयोऽञ्जलिमस्तकः PadmP.(Ra.) 96. 39.

अञ्जलिमात्र (añjali-mātrá) *adj.* measuring an *añjali* यद्यनुलमेरन् प्रसृतमात्रं वाञ्जलिमात्रं वा तदन्यैरेकधनैरभ्युन्नीय यथाप्रभावं प्रचरेयुः S'atBr. IV. v. 10. 7; पयो गृह्णीयात्सौवर्णे पात्रेऽञ्जलिमात्रम् SuśruS. iv. 29. 10.

अञ्जलिमाला (añjali-mālā) *f.* row of folded palms गृह्णन्नञ्जलिमालाश्च धार्तराष्ट्रो जनाधिपः। सुयोधनो ययावग्रे MahāBhā. iii. 240. 44.

अञ्जलिमालाधारिन् (añjalimālādhār-in) *m.* name of a former Buddha [DBHS]

अञ्जलिमाल्यमौलि (añjalimālya-mauli) *adj.* whose head (is adorned with) the flower of folded palms नृपो निधायाञ्जलिमाल्यमौलिः मुनिम्...जगाद SītāSva. 79.

अञ्जलिमित (añjali-mita) *adj.* measured by the cavity of the joined palms ज्ञातयः ... उदकमञ्जलिमितं सकृदेव सपिण्डादयः प्रसिञ्चन्ति VīraMi. 762. 12 (*on* 3. 5); इषुः ... परिध्या चाञ्जलिमितः NītiPra. 4. 28.

अञ्जलिमितायत (añjalimitāyata) *adj.* [*f.* -ā] as broad as the joined palms अञ्जलिमितायतो वितस्तिमात्रो दीर्घः शङ्खो विष्णोः PārāSū. 39. 3; अञ्जलिमितायता...घण्टा PārāSū. 39. 8.

अञ्जलिमुद्रा (añjali-mudrā) *f.* position of joined palms हृदयङ्गमसंज्ञं यत् पञ्चकं त्वङ्गणादिकम्। कृत्वमञ्जलिमुद्रायाम्...निवेदनीयं बहुधा PauṣkS. 38. 238; एवं संपूरयित्वा तु प्रणम्याञ्जलिमुद्रया PāraS. 14. 248; अञ्जल्याऽञ्जलिमुद्रा स्याद्वासुदेवप्रियैव सा Tantrābhi. xi. 78. 1; उत्तानौ किञ्चिदाकुञ्चितकरशाखौ पाणी विधारयेदिति अञ्जलिमुद्रा [JainL.]

अञ्जलियोगिन् (añjali-yogin) *adj.* which is in contact with palms joined together (in salutation) इत्युक्त्वा शिरसा पादौ वन्दित्वाञ्जलियोगिनः (? ना)। ...स भवनं गतः PadmP.(Ra.) 35. 91.

अञ्जलियोजन (añjali-yojana) *n.* joining together of the palms (in salutation) (स्थानकम्) अञ्जलियोजनात् गुरूणामतिवात्सल्यकरणं तु तुरीयकम् TriṣaS'aPuC. i. 1. 886.

अञ्जलिरूपक (añjalirūpa-ka) *adj.* in the form of an *añjali* (folded hands) स्पष्टौ प्रसारितौ हस्तौ कुर्यादञ्जलिरूपकौ JayāS. 8. 78; LakṣmīT. 34. 54.

अञ्जलिविरचन (añjali-viracana) *n.* joining of palms (in supplication) स्तब्धेऽर्धाङ्गे चरणपतनं नैव वामस्य पाणेर्वैमत्येनाञ्जलिविरचनं नैव वाचां प्रपञ्चः RasiJī. 34.

अञ्जलिवृद्धि (añjali-vṛddhi) *f.* increase (in the number of offerings) of handsful (of water) तावदञ्जलिवृद्धिः कार्येत्यर्थः। अत्र प्रेतोपकारविशेषापेक्षया यावन्त्याशौचदिनानि तावदुदकदानावृत्तिः कार्या SmṛtiCan. vi. 98. 1.

अञ्जलिव्यञ्जनम् (añjali-vyañjanam) *adv.* with the folded palms exposed भवन्तमुपसेवितुं बहिरिहाञ्जलिव्यञ्जनं पुरन्दरपुरःसरः सुरजनो ननूदीक्षते S'rīKaC. 16. 27.

अञ्जलिशत (añjali-śata) *n.* a hundred (salutations with) folded palms इदानीमस्माकं स्फुरदुरुजराजर्जरमिदं वपुर्जातं तृष्णे विरम विरमेत्यञ्जलिशतम् SaduktiKa. 320. 2.

अञ्जलिशुक्ति (añjali-śukti) *f.* trivial shell or conch [pw]

अञ्जलिश्लिष्टहस्त (añjaliśliṣṭa-hasta) *adj.* with palms joined to form an *añjali* श्रीगुप्तो नाम धूर्तः ... दृष्ट्वा दूरात्प्रसिद्धां तव नवजननीमञ्जलिश्लिष्टहस्तः ...स्तोतुमेतां प्रवृत्तः SamaMā. 6. 29.

अञ्जलिसंयुक्त (añjali-saṁyukta) *adj.* having palms joined together (in salutation) हृदयेऽञ्जलिसंयुक्तचण्डेशो भक्तिसंयुतः। ... दक्षिणामूर्तिमीशानं कुर्याद्वटतरोरधः S'ilpaRa. ii. 22. 145.

अञ्जलिसंयुता (añjali-saṁyutā) *adj.* [*f.* -ā] having palms joined together (in salutation) शंभोरर्धाङ्गुलेनैव षोडशाङ्गुलमुन्नता। श्रीमानोत्तुङ्गसंपूर्णा हृदयेऽञ्जलिसंयुता S'ilpaRa. ii. 22. 47.

अञ्जलिसंश्लेष (añjali-saṁśleṣa) *m.* placing of the palms joined together (in salutation) शिरस्यञ्जलिसंश्लेषः ... प्रतिपत्तिरियं गुरोः YogS'ā. 3. 125.

अञ्जलिसंसिक्त (añjali-saṁsikta) *adj.* poured with joined palms एवं त्रिरभिषुतमध्वर्युणा अञ्जलिसंसिक्तं राजानमुन्नेतान्तरेषे उद्धृत्याधवनीयेऽवनयति VaikhāS'S. xv. 13.

अञ्जलिसंस्थित (añjali-saṁsthita) *adj.* present in the palms joined together (विष्णुः) स्वमूर्तिसंस्थितः पूज्यः पुष्पैरञ्जलिसंस्थितैः JayāS. 13. 76.

अञ्जलिसख (añjali-sakha) *adj.* associated with joined palms देवः... मुनिगुरुं तमञ्जलिसखे(न) मौलिनोपतस्थौ AvantiKa. 206. 7.

अञ्जलिसंख्या (añjali-saṁkhyā) *f.* number of offerings of handsful (of water) यमतर्पणेऽञ्जलिसंख्यामाह VīraMi. (Āhnika.) 353. 12; अञ्जलिसंख्यापक्षाश्च त्रयः स्मृतिषूक्ताः BālamBha. iii. 10. 16 (*on* 3. 3); i. 340. 19 (*on* 1. 101)

अञ्जलिसंख्येय (añjali-saṁkhyeya) *adj.* to be measured by joined palmsful यत्त्वञ्जलिसंख्येयं तदुपदेक्ष्यामः (उदकादिकम्) CaraS. iv. 7. 16. (1941 Ed.)

अञ्जलिसंचित (añjali-sañcita) *adj.* collected in the folded palms त्वद्वैरिवामभ्रुवः ... सिञ्चन्त्यञ्जलिसंचिताश्रुभिरलं युष्मत्प्रतापानलम् SūktiSu. 97.

अञ्जलिसञ्जन (añjali-sañjana) *n.* joining of the palms (in reverence) कर्तुमर्हाञ्जलिसञ्जनेन स्वसंभूतिः प्राञ्जलतापि NaiṣC. 8. 22.

अञ्जलिसनाथमौलि (añjalisanātha-mauli) *adj.* who have joined

their hands at the forehead अयम्…अवलोकयति स…अञ्जलिसनाथमौलिभिः… परमभागवतसूरिभिराबध्यमानसेवानुवृत्तिम्…अनिमेषपतिम् YātrāPra. 3. 199(8)

अञ्जलिसंपुट (añjali-sampuṭa) *m.* cavity of the folded palms निशितमायुधमञ्जलिसंपुटः … । ननु भवज्जयसाधनमाहवे…द्विषाम् HarVi. 45. 21; मन्त्राक्षतान्…आदाय भूमिपतिरञ्जलिसंपुटेन Raghunā. 4. 70; Rāgh. 13. 69.

अञ्जलिसंबद्ध (añjali-sambaddha) *adj.* joined together into a cavity of joined palms (तस्य) हरिः … अञ्जलिसंबद्धं गृहीत्वाशु करद्वयम् SkandP. v(1). 3. 37.

अञ्जलिस्थ (añjali-stha) *adj.* contained in the folded hands समर्पयामि स्फुटमञ्जलिस्थं विकासिजातीकुसुमोत्करं ते TripuMāPūSt.(S'aṅ.) 101; ParaS. 4. 42; अञ्जलिस्थाम्भसा सेकादायुर्लक्ष्मीं च विन्दति IśānS'iPa. i. 37. 43; अञ्जलिस्थानि पुष्पाणि वासयन्ति करद्वयम् SubhāRaK. 37. 20; SūktiMu. 6. 4; S'ārṅgaPa. 199; KrsnaKa. 2. 47.

अञ्जलिस्थाना (añjali-sthānā) *adj.* (*f.*) shaped like folded hands अञ्जलिकाञ्जलिस्थाना AstāSaṁ. i. 170. 9 (1. 34)

अञ्जलिस्नान (añjali-snāna) *n.* bath with handfuls (of water) (भर्तरि मृते) तूष्णीं भौमजले नित्यमञ्जलिस्नानमुत्तमम् (कुर्याच्चैवंविधं तपः) MahāBhā. xiii. App. 15 (4669+)

अञ्जलिहस्तबन्ध (añjalihasta-bandha) *adj.* bearing the position of closely joined palms ऊचे वेत्री…अञ्जलिहस्तबन्धः DvyāśraKā. 6. 16.

अञ्जलिहोम (añjali-homa) *m.* offering with (substance contained in) the folded palms किं देवताप्रसादादिप्रार्थनायामिव हस्तसंयोगमात्रमञ्जलिहोमे S'āstrDī. 92. 9 (*on* i. 4. 20)

अञ्जली (añjalī) *f.* **i** joined palms (as a container) जलम् … पपुः सर्वे स्वचुलकैरञ्जलीभिश्च केचन GaṇeP. ii. 91. 6 (in reverence) श्रीकुम्भः … । विरचय्याञ्जलीबन्धं स्तुतवान् MalliC. 5. 324; **ii** a measure sufficient to fill hollow of joined palms अञ्जली कुडवे विद्यादञ्जलिः करसंपुटे ViśvaPra. 160. 136.

अञ्जलीक (añjalī-ka) *m.* **1** one of the types of Vaisṇava devotees चतुर्भिरञ्जलीकैस्तु ततो वायव्यगोचरे (एकायनीयशाखोत्थमन्त्रान् … । पाठयेत्) JayāS. 20. 267 = PāraS. 12. 313; **2** a species of lizard हालाहलोऽञ्ज (? लोऽञ्ज)लीकः प्रोक्तः AbhidhāMañ. 147. 11.

अञ्जलीकारिका (añjalī-kārikā) *f.* a kind of statue [nt.] cf. अञ्जलिकारिका.

अञ्जलीकूल (añjalī-kūla) *n.* name of a place धूम … अञ्जलीकूल JaineVyā. 190. 6 (*on* iii. 2. 105)

अञ्जलीकृत (añjalī-kṛta) *adj.* made into a cavity of the palms सप्ताश्वत्थस्य पर्णानि हस्तयोरञ्जलीकृतयोर्न्यसेत् Mitā. 205. 9 (*on* 2. 103); VyavaNi. 160. 6.

अञ्जलीकृत्य (añjalī-kṛtya) *ger.* having turned into a hollow of the palms प्रभुरप्यञ्जलीकृत्य पाणिपात्रमधारयत् TriṣaS'aPuC. i. 3. 292.

अञ्जलीपुट (añjalī-puṭa) *m.* cavity of the folded hands कुम्भः … । अञ्जलीपुटसंस्थानः SamarāSū. 63. 11.

अञ्जलीभूत (añjalī-bhūta) *adj.* which has turned into a cavity of the palms (हस्तयोः) अञ्जलीभूतयोरश्वत्थस्य सप्त पत्राणि न्यसेत् Aparā. 705. 6 (*on* 2. 103)

अञ्जलीयक (añjalīya-ka) *m.* one of the types of Vaisṇava devotees अञ्जलीयकविप्राय यद्दत्तं विधिपूर्वकम् JayāS. 21. 87; cf. अञ्जलीक.

अञ्जल्यर्ध (añjaly-ardha) *n.* half the measure of *añjli* श्लेष्मण ओजसस्तावदेवाञ्जल्यर्धमेव … रेतसोऽप्यञ्जल्यर्धमेव Aparā. 985. 15 (*on* 3. 107); VīraMi. 862. 9 (*on* 3. 107); अञ्जल्यर्धमितं पयः पिबेत् VīraMi.(Saṁskāra.) 293. 25.

अञ्जल्यादिहस्त (añjalyādi-hasta) *m.* *añjali* and other positions of hands देवतागुरुनृपादयो यदा निर्दिश्यन्ते तदा ललाटक्षेत्रचारिभिः अञ्जल्यादिहस्तैः AbhinBhā. ii. 67. 4 (*on* 9. 172) cf. **अञ्जलिहस्त.**

अञ्जल्यावृत्ति (añjaly-āvṛtti) *f.* repetition of the offering (of the contents) of folded hands अञ्जल्यावृत्त्या प्रत्यञ्जलि त्यागबोधकमन्त्रावृत्तिः VīraMi. (Āhnika.) 345. 2.

अञ्जल्युदक (añjaly-udaka) *n.* water contained in the cavity of hands folded कुर्वतो जलतर्पणम् । तस्याञ्जल्युदके मत्स्यः स्वल्प एकोऽभ्यपद्यत AgniP. 2. 5.

9.10; तत्स्वरेवैतदुतोऽभि विपश्यति S'atBr. I. i. 2.21; तस्माद् द्वयो रेत: सिक्तं सदेकतामेवाप्येति योषामेवाभि । अत आजाना हि योषा AitĀ. I. iv. 2.22; अतो न विषयो हेतुर्बन्धाय न विमुक्तये Saund. 13.53; अतश्च हस्त इत्युक्ता मया श्रद्धा विशेषत: Saund. 12.36; अतश्च प्रकृतं बुद्ध्वा देशकालान्तराणि च । तन्त्रकर्तुरभिप्रायानुपायांश्चार्थमादिशेत् CaraS. i. 26.35; अर्थे समवैषम्यमतो द्रव्यकर्मणाम् MīmāSū. iv. 1.21; अतस्त्वशङ्कनीयेयं भूमि: Avimā. 1.6 (2); अत: समीपे परिणेतुरिष्यते…प्रमदा S'āk. 5.18; अतो मध्यस्थ: पूज्यो भवितुमर्हति Mālavikā. 1.6 (20); त्वया मेऽवहृतं मन:। वृणोम्यहमतो मृत्युम् MārkP. 66.18; अतो न मन्युं कर्तुमर्हसि VeṇīSaṁ. 1.186; दधिरे रसाञ्जनमपूर्वमत: प्रियवेश्मवर्त्म सुदृशो ददृशु: S'iśuVa. 9.21; प्रायेणार्यभटेन व्यवहार: प्रतिदिनं यतोऽशक्य:। उद्वाहजातकादिषु तत्समफललघुतरोक्तिरत: KhaṇḍKhā. 1.2; MaBhāsk. 1.30; माङ्गलिकं तत्स्थानमतो दर्शय MālaMā. 6.82; पयोधिमिव वाडवो दहति मामतस्त्रायताम् MahāvīC. 5.26 (129.12); न चाग्निशुद्धिमल्पका: प्रतियन्तीत्यतो दारुणमनुष्ठितम् UttaRāC. 4.10 (8); अतो न पुरुषव्यापारतन्त्रा ब्रह्मविद्या BrahmSūBh.(S'aṅ.) 22.19 (*on* i. 1.4); तेऽपि…प्रतिषेद्धव्या:।…अत: प्रधानमल्लनिबर्हणन्यायेनातिदिशति BrahmSūBh.(S'aṅ.) 274.17 (*on* i. 4.28); एवमनेकशक्तिप्रवृत्तियुक्तं ब्रह्म । अत एकत्वं नानात्वं चोभयमपि सत्यमेव BrahmSūBh.(S'aṅ.) 309.11 (*on* ii. 1.14); अतो वृत्तसंशयच्छेदश्छन्दोविचिते: विधेय: इति KāvyālaṅSū. i. 3.6; अत: परुषं रिपु: प्रतिजगर्जं तर्जयन् RāghPāṇ.(Dha.) 17.15; अत: शूद्रस्य नायं संस्कार: द्विजातिग्रहणाच्च ManuBh. i. 93.16 (*on* 2.35); ब्रह्म स्वयंज्योतिरतो विभाति BhāgP. xi. 28.22; अत: स्त्रीकृते मया मित्रवध: कर्तव्य: PañcT. 4.0 (381.4); अत:शब्द: वृत्तस्य हेतुभावे S'rīBh. 1.12 (i. 1.1); अतो नीति: प्रयत्नेन श्रवणीया नृपोत्तमै: YuktiK. 2.11; एकत्वोभयगोचरा मतिरतो द्वित्वं ततो जायते Lakṣaṇā. 10.12; प्रकाशकादिकं रूपं स्फटिकादिसलक्षणम्। अतस्तु ज्ञानरूपत्वम् LakṣmīT. 2.27; वनमिदमपूर्वसत्त्वाधिष्ठितम्। अतोऽस्माकं त्याज्यम् Hitopa. 2.71(6); हे साधो त्वमतो गुणेषु विपुलेष्वास्थां वृथा मा कृथा: S'atTrayī. 29; तस्या: किं विरहेऽपि जीवितमतो वाचालतां नाश्रये PuruṣPa. 194.22; तद्गुणनिर्णयशास्त्रं प्रमाणमतो नाटकलक्षणम् … वक्ष्याम: NāṭaLaRaK. 6; तव दाक्षिण्यमपि नास्ति । अतस्ते किमाशीर्वचसा BhojPra. 10.8; अत ईश्वरादेव फलं भवति AṇuBh. 204.15 (*on* iii. 2.38); अत: सद्गुरुवाहितदीक्षा सर्वकर्माणि साधयेत् TantrSā.(K.) 5.31; त्वं सेतुमन्थकृदत: किमसौ बिभेति Kuval. 20(28); अतो नृपसम: पुत्रो भविता ते न संशय: RatnaCū. 57; लिङादिज्ञानं हि शब्दभावनाभाव्यार्थभावनां निर्वर्तयति कुठार इव छेदनम्। अतो लिङादिज्ञानस्य करणत्वेनान्वय: MīmāNyāPra. 194.24; अत: … रामवेषो राजा जनकसमीपं प्रवेशयितव्य: JānaPa. 1.17 (7.21); अनेकजीववादेऽतो नावच्छेदनय: शुभ: VedāntSiSūMañ. 4.16; [Kośas give the meanings पञ्चम्यर्थ, हेतु, कारण AnekāSaṁ. 7.49; ViśvaPra. 187.21; ViśvaLoK. 409.18; Vaija. 285.16; अपदेश AnekāSaṁ. 7.49; ViśvaPra. 187.21; ViśvaLoK. 409.18; निर्देश AnekāSaṁ. 7.49; ViśvaPra. 187.21; ViśvaLoK. 409.18; निन्दा Vaija. 285.16; चित्र Vaija. 285.16]

अतस (at-asá) *m. n.* [Alt. Gr. I. 10 (átasa?); DEBRU. p. 236; MAYR. / derived fr. *at-* + *-asa*(*c*) Uṇā. 3.117; the word is enumerated in the *gaurādigaṇa*, GaṇPā. 81.56; JaineVyā. 153.26 (*on* iii. 1.23); CāndrVṛ. *on* ii. 3.37] *n.* **A** bush, thicket आ स्वमद्म युवमानो अजरस्तृष्वविष्यन्नतसेषु तिष्ठति ṚV. i. 58.2; i. 58.4; अग्निश्चिद्धि ष्मातसे शुशुक्वानापो न द्वीपं दधति प्रयांसि ṚV. i. 169.3; यथा चिद्वृद्धमतसमग्ने संजूर्वसि क्षमि ṚV. viii. 60.7; सोमो विश्वान्यतसा वनानि नार्वागिन्द्रं प्रतिमानानि देभु: ṚV. x. 89.5 = TaiS. II. ii. 12.3 = TaiĀ. x. 1.9 (774.13) = Nir. 5.12 (99.15); **B i** dry wood अग्नि: शोचिष्माँ अतसान्युष्णन् कृष्णव्यथिरस्वदयन्न भूम ṚV. ii. 4.7; iii. 7.3; यो नो अरातिं समिधान चक्रे नीचा तं धक्ष्यतसं न शुष्कम् ṚV. iv. 4.4 = TaiS. I. ii. 14.2 = VājaS. 13.12 = VājaS.(K.) xiv. 1.12 = MaiS. ii. 7.15 = KāṭhS. 16.15; ṚV. iv. 7.10; **B ii** dry grass अतसे शुष्कतृणे शुशुक्वान् दीप्तवान् अग्निरिव MīmāKau. iii(1). 99.8 (*on* i. 2.51); **C** forest अतस: पुमान्। वनस्पतिप्रभेदे स्यादतसी तु स्त्रियामियम्। उमासंज्ञे धान्यभेदे वने तु स्याद् नपुंसकम् NānārthāSaṁ. ii. 57.121; [*m.* **1** a kind of tree अतस: पुमान्। वनस्पतिभेदे NānārthāSaṁ. ii. 57.121; **2** a garment made of the fibre of flax अतस: … क्षौमं प्रहरणं वायुश्च DhātuVṛ. 1.38 (122.14); **3** missile, weapon अतस: … क्षौमं प्रहरणं वायुश्च DhātuVṛ. 1.38 (122.14); **4** wind, air अतसो वात: comm. *on* Uṇā. 3.117; DhātuVṛ. 1.38 (122.14); **5** soul स्वात्मा क्षेत्रज्ञ: पुरुषोऽतस: KośaKaTa. 1.33]

अतसर्थ (atas-artha) *m.* meaning of the suffix *atas* तातसर्थे त्येन JaineVyā. i. 4.39.

अतसाय्य (atasáyya) *adj.* [*f.* -ā] [DEBRU. p. 286, 405] attainable, to be sought after तव स्वधाव इयमा समर्य ऊतिर्वाजेष्वतसाय्या भूत् ṚV. i. 63.6; सद्यो यो नृभ्यो अतसाय्यो भूत्पस्पृधानेभ्य: सूर्यस्य सातौ ṚV. ii. 19.4.

अतसि (atasi) *f. Linum usitatissimum*, common flax, linseed स्फिगतसिजटिलालूम्नाहरिद्राबलाकामुखजलहरितालीकङ्गुगोधाविधानाम् KosaKaTa. 2.2361.

अतसिका (atasi-kā) *f. Linum usitatissimum*, common flax, linseed हृदि विभोरभवस्य कुर्यात्। … ऊरू … अतसिकाकुसुमावभासौ BhāgP. iii. 28.24; KośaKaTa. 2.7084.

अतसिज (atasi-ja) *adj.* (garment) made of the fibre of flax शाणजेऽतसिजे चापि क्षौमं क्लीब उदीरितम् S'abdaRaSaK. 227.11.

अतसिपिच्छा (atasi-picchā) *f.* scum or gum of linseed अन्त:पूरयेन्मुहु:। घृतेन कल्कीकृतया शाल्मल्यतसिपिच्छया AṣṭāHṛ. ii. 2.25.

अतसिसंभव (atasi-sambhava) *adj.* produced from linseed सर्षपस्य च तैलेन मधुकातसिसंभवै:। …नरकान्…। तीर्त्वा …राजा विष्णुलोकमगात् VāmaP. 95.62.

¹अतसी (atasí) *f.* [DEBRU. p. 237 (*atasī́* not *atasí*); 383, 405/ the word *atasa* is enumerated in the *gaurādigaṇa*, GaṇPā. 81.56; derived from *atasa* + *f.* suffix (*ṅ*)*ī*(*ṣ*), P. iv. 1.41; JaineVyā. 153.26 (*on* iii. 1.23); CāndraVṛ. *on* ii. 3.37; but PW and MW take the base as *atasí m.*] prayer [but PW beggar (one who wanders about), MW a wandering mendicant] कन्नव्यो अतसीनां तुरो गृणीत मर्त्य: ṚV. viii. 3.13 = AV. xx. 50.1.

²अतसी (atasī) *f.* [TURN. 198 / listed as *f.*, see Liṅgānu.(He.) 31.14; Liṅgānu.(Para.) (33). 3460] **1** *Linum usitatissimum* (also refers to flower or seed), common flax, linseed अतसीपुष्पसंकाश: पीतवासा जनार्दन: …व्यभ्राजत MahāBhā. v. 92.52; iii. 186.86; xii. 47.60; xii. 51.8; उष्णातसी स्वादुरसानिलघ्नी पित्तोल्बणा स्यात् कटुका विपाके SuśruS. i. 46.49; सुरदारुरास्नामाषातसीतैलफलानि कुष्ठम् … वातामयिनां प्रदेह: CaraS. i. 3.16 (1922 Ed.); i. 13.10; ii. 5.7 (1922 Ed.); षट्कं तैलमतसीनाम् ArthS'ā. i. 236.3 (2.15); i. 286.2 (2.24); तिला बहुविधाश्चोप्या अतसी शणमेव च BṛParāSm. 5.138; न देया: पितृकार्येषु … मधुकातसी MatsyaP. 15.38; MārkP. 15.8; VāyuP. i. 38.69; अतसीं शतपुष्पां च कुठारच्छिन्नमेव च। ऋषिवी(?बी)जं च विन्यस्य मध्यकुम्भे तु सप्तमे PāraS. 14.411; अतसीबिल्वैश्च युत: कल्कोऽयं वज्रलेपाख्य: BṛSaṁ. 57.3; 41.5; अतसी स्यादुमा क्षुमा AmaK. 1746; AnekāSa. 638; क्वचित्सगोधूमयवातसीतिला: (व्यराजत) VarāṅgaC. 21.41; भृष्टै: पयसि निर्वातैरतसीतिलसर्षपै:। क्षीरपिष्टै: प्रलिम्पेद्वा वातवैसर्पपीडितम् KāśyaS. 327A.3; 128B.23; पुराणपिण्याककृष्णाशिग्रुत्वगतसीसिकता मूत्रपिष्टा: सुखोष्णा: प्रलेपे दद्यात् AṣṭāSaṁ. ii. 108.11 (4.19); i. 187.19 (1.38); AṣṭāHṛ. v. 4.55; तिलातसीसर्षपतैलभावितं स्वदेहमेहातुरमाशु वामयेत् KalyāKā. 11.31; 9.38; ManuBh. ii. 210.8 (*on* 8.326); चणकोमातसी क्षौमी रुद्रपत्नी सुवर्चला ParyāRaMā. 476; AbhidhāRaMā. 2.427; शणबीजातसीयवान् … तक्रेणाम्लेन पेषयेत् (गण्डानि … प्रलेपात्तेन शाम्यन्ति) SiddhYo. 41.4; 44.17; JayaMa. 289.22; (*on* 5.5); न देया: पितृकार्येषु पयश्चाजाविकं तथा। कोद्रवो दारवरटा कपित्थ(?त्थं) मधुकातसी PadmP. v. 9.66; BrahmP. 217.62; BhaviP. 410B.19 (ii(3). 20.113); अतसीकरञ्जतैलप्रविगाढो वज्रलेप: स्यात् SamarāSū. 31.131; सुवर्चलामसृण्यौ च क्षुमा चोमाप्यतस्यपि Vaija. 126.45; 272.12; चण्डिकातसी TrikāS'e. ii. 9.4; iii. 3.293; कुलत्थमाषगोधूमैरतसीतिलसर्षपै: (संस्वेदयेन्नरम्) S'āṅgaS. iii. 2.24; iii. 5.48; iii. 11.99; Mitā. 64.6 (*on* 1.187); अतसी पिच्छला देवी मदगन्धा मदोत्कटा। उमा क्षुमा हैमवती सुनीला नीलपुष्पिका RājNi. 231.24; 426.11; DhanvNi. 231.19; AṣṭāNi. 22.6; अतसीभि: … सर्ववातहर: स्वेद: पुटाख्यो गात्रसंभव: AśvaVai. 18.3; 54.3; शणे भङ्गा मातुलानी स्यादुमा तु क्षुमातसी NighS'e. 2282; AnekāSaṁ. 2.309; 2.311; AbhidhāCin. 1179; ViśvaPra. 112.33; 112.34; अतसी सुरसाद्वयम् (…संगृह्य पल्लवानेषामम्ल(म्लि)काम्लेन मिश्रयेत् Mānaso. iii. 13.1551; शमी सक्तुफला शिम्बा चोमा दुर्गातसी स्मृता DharK. 1730; NānārthSaṁ. 16.22; NānārthāSaṁ. ii. 57.121; HārLa. 192.10; 'अयसी'ति अतसी SthānṬ. 406B.9; क्षौ(क्षु)मातसी, शाण: प्रसिद्ध: Aparā. 1055.18 (*on* 3.243); SmṛtiCan. i. 79.17; v. 374.7; उमातसी हैमवती हरिद्राकीर्तिकान्तिषु MediK. 115.2; CaturCin. iii(1). 548.17; ManvaVi. 133.13 (*on* 2.41); अतसीचम्पकवर्णौ तुलसीकीर्तिसुरभीकृतस्वाङ्गौ। यदुनाथौ नाथौ न: कृतम् अपरैश्चित्तदेवनरदेवै: EI. iv. 150.13; AnekāTi. 2.32; MadaPāNi. 65.46; चिक्कणस्त्वतसीकङ्गुप्रियङ्गूमाक्षुमा: समा: S'abdaRa.(Vā.) 2842; 3753; EI. x. 80.1; अतसीशीतशिवाकृष्णकन्दाहरितालमन:शिलासुवर्णपुष्पीमहाकन्दासर्जरसै: … पुराणघृतेन संयोज्य धूपयेत् Hastyāyur. 65.17 (1.9); 76.26 (1.10); 98.4 (1.14); 109.20 (1.15); अतस्येरण्डयोर्बीजान्याढकीशणयोरपि। मन्यास्तम्भे तु संगृह्य पञ्चमूलं च पेषयेत् Hastyāyur. 219.26 (2.22); 231.26 (2.30); 333.10 (2.70 (?69)); उमा क्षमातसी नीलपुष्पिका च कलायिका AbhidhāMañ. 136.5; 247.12;

251. 7; BhāvPraNi. 143. 68; ṢaḍrasaNi. 23. 11; ParaNā. 1058; तत्रातसीपुष्पसमानवर्णे निपी(त)र्णे(?) सति मक्षिकाः स्युः S'ilpaRa. i. 14. 29; अतसी प्रसिद्धा तस्या अपि शाकत्वेन तैलप्रकृतित्वेन वा निषेधः VīraMi.(S'rāddha.) 40. 12; (Saṁskāra.) 415. 13; VīraMi. 84. 14 (*on* 1. 29); 258. 16 (*on* 1. 186); उमा क्षुमातसी चण्डी KośaKaTa. 1. 6525; अतसी पिच्छला देवी ··· उमा क्षुमा हैमवती KalpaK. 140. 70; BhojanKu. 17. 14; S'abdaRaSaK. 227. 8; राम ··· कच्छातिरूढातसीगुच्छाङ्गप्रभ मर्दितुं मम समागच्छान्तरं दृश्यतः Rāmāṣṭa. 16; शणविकारः शाणः, क्षुमा अतसी तद्विकारः क्षौमम् BālamBha. i. 151. 24 (*on* 1. 29); i. 153. 4 (*on* 1. 29); KavīndraKa. 3. 6(20); [*atasī* is also identified with *bhāṅga*, *Cannabis sativa* अतसी तन्मयं भाङ्गिकम् SthāṇT. 338B. 5]; **2** blue or dark-brown (colour) उपप्रवेशकाः ··· रक्तपीतातसीहेमाः ··· वर्णानुरूपसद्गन्धमाल्यालेपनभूषणाः PāraS. 11. 183; **3** thicket, copse(?) [APTE]

अतसीकाष्ठ (atasī-kāṣṭha) *n.* wood of *Linum usitatissimum* अतसीकाष्ठजस्नेहसंयुक्तं तु विमर्दयेत् S'ilpaRa. ii. 19. 18.

अतसीकुसुम (atasī-kusuma) *n.* flower of *Linum usitatissimum* अतसीकुसुमश्यामकौशेयस्रग्विलेपनौ (गणौ) PāraS. 11. 171; रक्ताशोकस्य कुसुममतसीकुसुमं तथा ··· दातव्यम् ViṣṇuDhaP. ii. 91. 11; अतसीकुसुमानि च। किंशुकस्य च पुष्पाणि शस्तं पीतं गुणं भवेत् BhaviP. 349A. 6 (ii(2). 2. 36); गवलं माहिषं शृङ्गम् अतसीकुसुमं धान्यविशेषपुष्पं एतेषामिव प्रकाशो दीप्तिर्येषां ते तथा AupaSūT. 92. 10; अतसीकुसुमं विहसन्महसा ··· हरिः StavMā. 255. 11.

अतसीकुसुमच्छाय (atasīkusuma-cchāya) *adj.* having the complexion like the (colour of the) flower of *Linum usitatissimum* मरीचः ··· ददर्श दूरादायान्तं कार्यदूतं नियोगिनम् ··· अतसीकुसुमच्छायम् NarmaMā. 1. 48.

अतसीकुसुमदामन् (atasīkusuma-dāman) *n.* garland of the flowers of *Linum usitatissimum* अस्यातसीकुसुमदामरुचः कृपाणपट्टेन निर्मलकरालकरेण बाहुः। सङ्ग्रामभूमिषु भयङ्करताम् ··· आपत् HarVi. 39. 12.

अतसीकुसुमप्रकाश (atasīkusuma-prakāśa) *adj.* having the lustre as of the flower of *Linum usitatissimum* अत्यन्तबालमतसीकुसुमप्रकाशं दिग्वाससम् ··· कृष्णं नमामि KṛṣṇaKa. 2. 19.

अतसीकुसुमप्रभ (atasīkusuma-prabha) *adj.* having the lustre like that of the flower of *Linum usitatissimum* इति दत्त्वा वरं तेषामतसीकुसुमप्रभः ··· अन्तर्दधे हरिः BṛNāraP. 4. 77; अतसीकुसुमप्रभं मुखे तदनु त्वक्कचमेचकद्युति। ···प्रसृतं संप्रति सर्वतस्तमः AlaṅkāRa. 93. (12)

अतसीकुसुमवर्ण (atasīkusuma-varṇa) *m.* colour of the flower of *Linum usitatissimum* वाणातसीकुसुमवर्णनिभश्च शस्तः ··· सूर्यात्मजः BṛSaṁ. 10. 21.

अतसीकुसुमश्याम (atasīkusuma-śyāma) *adj.* dark like the flower of *Linum usitatissimum* अतसीकुसुमश्यामौ ··· गणौ ··· प्रत्यग्भागे तथा न्यसेत् PauṣkS. 4. 175; कार्यः ··· विष्णुः ··· अतसीकुसुमश्यामः BṛSaṁ. 58. 32; PāraS. 11. 54; 11. 150; 11. 171; नमामि परमात्मानं रामम्···। अतसीकुसुमश्यामम् SkandP. ii(8). 1. 29; ii(8). 7. 29; विष्णुमावाहयिष्यामि ···। अतसीकुसुमश्यामम् ViṣṇuDhaP. iii. 104. 35; (मुनिश्रेष्ठाः कृष्णम् ··· संस्तुवन्ति) जय जयातसीकुसुमश्यामदेह BrahmP. 65. 49; अतसीकुसुमश्यामः शुशुभे नवमाधवः DaśāvaC. 8. 231; देवाः ··· देवं वीक्षितुं समुपाव्रजन्। ··· अतसीकुसुमश्यामम् ParamāKā. 167. 6.

अतसीकुसुमसंकाश (atasīkusuma-saṅkāśa) *adj.* resembling (in colour) the flower of *Linum usitatissimum* अतसीकुसुमसंकाशत्वाद भेदोपचाराद्रुमा वा LalitāSaBh. 135. 3 (*on* 177)

अतसीकुसुमसाम्य (atasīkusuma-sāmya) *n.* likeness or resemblance with the flower of *Linum usitatissimum* व्योम्नोऽतसीकुसुमसाम्यमपह्नुवाना। ··· दोलातलं भगवती तदलंकरोतु S'rīKaC. 7. 52.

अतसीकुसुमाभ (atasīkusumābha) *adj.* having colour like that of the flower of *Linum usitatissimum* अतसीकुसुमाभं च मूत्रं यो बहु मुञ्चति Hastyāyur. 290. 27 (2. 58); अतसीकुसुमाव(?भ)तनुम् ··· भुवनैकगुरुम्। ··· प्रयजेत् PañcaRā.(Nā.) iii. 12. 11.

अतसीकुसुमाभास (atasīkusumābhāsa) *adj.* having the lustre of the flower of *Linum usitatissimum* अतसीकुसुमाभासं शयानं पीतवाससम्। ··· क्षणमात्रं तु तं दृष्ट्वा पुनस्तत्र न दृष्टवान् NaraP. 26. 42; सदनाग्रे ययौ तावद्धरिः कमललोचनः। अतसीकुसुमाभासः DevīBhāP. iii. 3. 28.

अतसीकुसुमावभास (atasīkusumāvabhāsa) *adj.* having the lustre of the flower of *Linum usitatissimum* चेतो मदीयमतसीकुसुमावभासं स्मेराननं स्मरति गोपवधूकिशोरम् KṛṣṇaKa. 2. 24.

अतसीकुसुमोपम (atasīkusumopama) *adj.* resembling (in colour) the flower of *Linum usitatissimum* अतसीकुसुमोपमं मुखे तदनु त्वक्कुचचूचुकद्युति। अथ बालतमालमांसलं प्रसृतं संप्रति सर्वतस्तमः NavaSāC. 12. 41.

अतसीकुसुमोपमेय (atasīkusumopameya) *adj.* to be compared with the flower of *Linum usitatissimum* अतसीकुसुमोपमेयकान्तिः ··· वनमाली वितनोतु मङ्गलानि HariVi. 5. 97.

अतसीकृत (atasī-kṛta) *adj.* made from (the bark of) the plant *Linum usitatissimum* अथ भवेत्क्षौमं दुकूलेऽस्त्रियामङ्के स्यादतसीकृते च वसने KośaKaTa. 2. 7003.

अतसीगण (atasī-gaṇa) *m.* bundle of flax or the plant *Linum usitatissimum* पिचव्यानां चातसीगणपट्टमूलकानां पुष्कलान् संभारान् ··· लोकेनादाय व्रजता ··· व्याप्तदिगन्तरम् ··· वनग्रामकं ददर्श HarṣaC. 305. 13.

अतसीगुच्छ (atasī-guccha) *m.* bunch or cluster of (the blossoms of) *Linum usitatissimum* लक्ष्मीविद्युल्लसितमतसीगुच्छसच्छायकायम् ··· त्रिदशपरिषत्कालमेवं ददर्श RāmāCam. 1. 13; कति सन्ति गृहे बालाः···। येनायमतसीगुच्छच्छविः प्रक्षोभितस्त्वया (कृष्णः) GopāKeCan. 51. 9.

अतसीचूर्ण (atasī-cūrṇa) *n.* powder of (the seeds of) *Linum usitatissimum* अतसीचूर्णभागं च संभृतं स्थापयेत् त्र्यहम् Hastyāyur. 678. 23 (4. 23)

अतसीज (atasī-ja) *adj.* **i** produced from (the fibres of the bark of) *Linum usitatissimum* क्षौमं वल्कलजांशुके शणजेऽतसीजे MediK. 115. 9; **ii** produced from (the seeds of) *Linum usitatissimum* अतसीजं महाकालीनिम्बजं तिलजं तथा ··· तैलमादाय RasRaSa. 10. 74.

अतसीतैल (atasī-taila) *n.* oil of (the seeds of) *Linum usitatissimum* अतसीतैलसंयुक्ताः दीपा दत्ताः शिवालये SkandP. i(1). 13. 44; मधुरं त्वतसीतैलं पिच्छिलं चानिलापहम्। मदगन्धि कषायं च कफकासापहारकम् RājNi. 234. 6 = BhojanKu. 152. 4; कुलत्थमतसीतैलम् ··· वर्जयेत् Rasā. 18. 124; सः (तैलशब्दः) स्नेहमात्रवाचकः अतसीतैलमेरण्डतैलमित्यादि CaturCin. iii(2). 717. 10; अतसीतैलमाग्नेयं स्निग्धोष्णं कफपित्तनुत् MadaPāNi. 57. 38.

अतसीत्वच् (atasī-tvac) *f.* bark of *Linum usitatissimum* क्षौमं अतसीत्वक्संभवतन्तुनिर्मितम् SmṛtiCan. v. 267. 8; क्षौमाणामतसीत्वग्जनितानाम् ManvaVi. 669. 2 (*on* 5. 120)

अतसीधूमचूर्ण (atasīdhūma-cūrṇa) *n.* powder of wheat and seeds of *Linum usitatissimum* अतसीधूमचूर्णैर्द्विमिस्तूदकसिद्धाम् ··· यवागूं मांसरससुसंस्कृतां पाययेत् Hastyāyur. 96. 23 (1. 13)

अतसीनील (atasī-nīla) *adj.* dark like (the flower of) *Linum usitatissimum* अङ्गाट्टङ्किकया कलङ्कमतसीनीलं लुनीहि स्वयम् ··· कुरङ्गकेतनम् AnyoMuLa. 68.

अतसीपट (atasī-paṭa) *m.* cloth made of (the fibres of the bark of) *Linum usitatissimum* दुकूलमतसीपटे S'abdaRa.(Su.) 3. 219.

अतसीपत्त्रक (atasī-pattraka) *n.* leaf of *Linum usitatissimum* अतसीपत्रकं निम्बं न्यग्रोधकलिकान्वितम्। अतीसारे प्रशंसन्ति पिण्डोऽयं वाजिनः शुभः AśvaCi. 13. 35; त्रिफलाम्भसा तु संमर्थ सप्ताष्टदशरात्रकम्। यवगोधूममाषांश्चाप्यतसीपत्रकं तथा। यथा समांशं संयोज्य चूर्णितम् S'ilpaRa. ii. 19. 10.

अतसीपिष्ट (atasī-piṣṭa) *n.* fine powder of (seeds of) *Linum usitatissimum* (तोयम्) कतकफलनिघृष्टं वातसीपिष्टयुक्तम्। ··· परिकलितमनेकैः शोधितं गालितं तत् KalyāKā. 5. 12.

अतसीपुष्प (atasī-puṣpa) *n.* flower of *Linum usitatissimum* ग्रीष्मेऽतसीपुष्पनिभस्तीक्ष्णांशुर्दावदीपिताः। दिशो ज्वलन्ति AṣṭāSaṁ. i. 16. 8 (1. 4)

अतसीपुष्पक (atasīpuṣpa-ka) *n.* flower of *Linum usitatissimum* पूजयेद्यदि। ··· अतसीपुष्पकैर्देवं विष्णुवल्लभतामियात् S'ivaP. ii(1). 14. 30 (56B. 8)

अतसीपुष्पवर्ण (atasīpuṣpa-varṇa) *adj.* having the colour of the flower of *Linum usitatissimum* अतसीपुष्पवर्णानि ताम्राणि वा विसर्पीणि पिडकावन्ति च दद्रुकुष्ठानि SuśruS. ii. 5. 8; कोविदारपद्मपाटलीकलायक्षौमातसीपुष्पवर्णाः ··· ध्मायमाना न स्फुटन्ति ··· रूप्यधातवः ArthS'ā. i. 201. 2 (2. 12); (वृषभः) अतसीपुष्पवर्णश्च तथा धन्वतरः स्मृतः MatsyaP. 207. 26; अतसीपुष्पवर्णस्तु पीतवासा जनार्दनः SkandP. v(3). 103. 52; *m.* colour of the flower of *Linum usitatissimum* प्राणिनां च कपालेषु क्रिमयः सन्ति पञ्च वै। ··· अतसीपुष्पवर्णेन कृष्णपुच्छा न संशयः PadmP. ii. 53. 95.

अतसीपुष्पवर्णाभ (atasīpuṣpavarṇābha) *adj.* [*f.* -ā] resembling in colour the flower of *Linum usitatissimum* अतसीपुष्पवर्णाभः श्रीवत्सकृतलक्षणः। साक्षाल्लक्ष्म्या इवावासः स तदा प्रतिभाति मे MahāBhā. iii. 186. 86; प्रवक्ष्यामि ···। अतसीपुष्पवर्णाभाम् ··· महिषासुरमर्दिनीम् MatsyaP. 260. 57.

अतसीपुष्पश्याम (atasīpuṣpa-śyāma) *adj.* dark like the flower of *Linum usitatissimum* रूपेणानेन चरति पाकलः ···। वैष्णवोऽप्यतसीपुष्पश्यामः Hastyāyur. 703. 21 (4. 35)

अतसीपुष्पसंकाश (atasīpuṣpa-saṅkāśa) *adj.* [*f.* -ā] resembling

(in colour) the flower of *Linum usitatissimum* अतसीपुष्पवर्णाभः (v. l. अतसीपुष्पसंकाशः) श्रीवत्सकृतलक्षणः। … स तदा प्रतिभाति मे MahāBhā. iii. 186. 86; अतसीपुष्पसंकाशः पीतवासा जनार्दनः। व्यभ्राजत सभामध्ये हेम्नीवोपहितो मणिः MahāBhā. v. 92. 52; xii. 47. 60; xii. 51. 8; अतसीपुष्पसंकाशमिदं मूर्तिगणं स्मृतम् PauṣkS. 36. 168; अतसीपुष्पसंकाशम् …। संस्थापयामि देवेशम् …जनार्दनम् MatsyaP. 266. 35; अतसीपुष्पसंकाशवासोमाल्यानुलेपनम्। वीरघ्नं वीरहाख्यं च ध्यायेत् PāraS. 11. 146; अतसीपुष्पसंकाशां तत्र देवीं सलक्षणाम्।… पूजयेत् MṛgendraT. App. 2 (256. 16); अतसीपुष्पसंकाशं यत्तावन्नेत्रमण्डलम् PrakaPañ. 56. 7; संचिन्तयेत् … अतसीपुष्पसंकाशवसनम् (संकर्षणम्) LakṣmīT. 10. 32; जनार्दनः। प्रादुर्बभूव … अतसीपुष्पसंकाशः SkandP. i(1). 18. 23; ii(1). 9. 78; iv. 19. 119; अतसीपुष्पसंकाशं पीताम्बरधरं शुभम्। सदण्डं महिषारूढं (यमम्) लिखेत्पत्रे तु दक्षिणे ViṣṇuDhaP. ii. 104. 44; अतसीपुष्पसंकाशम् …। दिव्याम्बरधरं दृष्ट्वा मृकण्डुर्विस्मितोऽभवत् BṛNāraP. 4. 80; 15. 68; 36. 40; विश्वकर्मा …। तत्स्थानात्कारयामास प्रतिमाः … द्वितीयं पुण्डरीकाक्षम् …। अतसीपुष्पसंकाशम् … हरिम् BrahmP. 50. 51; 178. 123; अतसीपुष्पसंकाशम् …याम्यां तु स्थापयेद्बुधम् BhaviP. 382A. 2 (ii(2). 20 (? 19). 71); अतसीपुष्पसंकाशो विष्णुः पीताम्बरो हरिः PadmP. iv. 94. 50; देवः…अतसीपुष्पसंकाशः…आगतोऽयम्…विष्णुः SaurP. 57. 53; (इन्द्रनीलस्य…अष्टविधा छविः) अतसीपुष्पसंकाशा Mānaso. ii. 4. 502; iii. 1. 753; iii. 8. 1053; iv. 2. 245; अतसीपुष्पसंकाशं खं वीक्ष्य जलदागमे। ये वियोगेऽपि जीवन्ति न तेषां विद्यते भयम् S'ārṅgaPa. 512 = Subhāṣi. 1718.

अतसीपुष्पसच्छाया (atasīpuṣpa-sacchāyā) *adj.* (*f.*) having the lustre of the flower of *Linum usitatissimum* वक्ष्ये कात्यायनीं देवीम्…अतसीपुष्पसच्छायाम् Mānaso. iii. 1. 766.

अतसीपुष्पसंनिभ (atasīpuṣpa-sannibha) *adj.* resembling (in colour) the flower of *Linum usitatissimum* शोभतेऽभ्यधिकं शौरिरतसीपुष्पसंनिभः MahāBhā. vii. 213*(4); होमं कुर्यात्तदर्धेन अतसीपुष्पसंनिभैः। तिलैः JayāS. 31. 35; जलजैश्च…नानावर्णैः…तपनीयसवर्णैश्च अतसीपुष्पसंनिभैः (युक्त प्रदेशम्) MatsyaP. 118. 41; अकस्मात्सलिले तस्मिन्नतसीपुष्पसंनिभम्।…प्रपश्याम्यहमीशानम् SkandP. v(3). 19. 22; अनयोर्मध्यतस्त्वे(? स्त्वे)कम् … सर्वाभरणसंपन्नमतसीपुष्पसंनिभम्…पश्यामि LiṅgaP. ii 5. 98; अतः परं वर्णवर्णान् व्याहरामि यथातथम्। चम्पका अतसीपुष्पसंनिभं विद्रुमं तथा DevīBhāP. xii. 2. 5; सकारं गुल्फयोर्न्यसेदतसीपुष्पसंनिभम् BṛParāSm. 4. 80; BālamBha. i. 111. 18 (on 1. 24–25); राजावर्तः स एव स्यादतसीपुष्पसंनिभः Mānaso. iii. 1. 161; iii. 14. 1612.

अतसीपुष्पाच्छगुच्छ (atasīpuṣpācchaguccha) *m.* beautiful bunch of the flowers of *Linum usitatissimum* हस्तन्यस्तविमुग्धवेणुमतसीपुष्पाच्छगुच्छच्छविं तूर्णं दर्शय (कृष्णम्) GopāKeCan. 108. 33.

अतसीप्रभव (atasī-prabhava) *adj.* made of (the fibres of the bark of) *Linum usitatissimum* क्षौममतसीप्रभवम् Aparā. 507. 28 (on 1. 241)

अतसीफल (atasī-phala) *n.* seed (*lit.* fruit) of *Linum usitatissimum* or common flax, linseed तण्डुलानतसीफलम्। मार्षास्तिलांश्च किण्वं च सर्वमेकत्र चूर्णयेत् CaraS. vi. 8. 176 (1941 Ed.); मसूरिकाः। … लोहजालसमाः काश्चिदतसीफलसंनिभाः RugVi. 54. 26; YuktiKa. 149. 1.

अतसीबीज (atasī-bīja) *n.* seed of *Linum usitatissimum* or common flax, linseed तिलैरण्डातसीबीजसर्षपैः परिलिप्य च। श्लेष्मगुल्ममयःपात्रैः सुखोष्णैः स्वेदयेद्भिषक् CaraS. vi. 5. 141 (1941 Ed.); vi. 25. 51 (1941 Ed.); SmṛtiCan. v. 266. 17; (स्नेहैः दीपं दद्यात्) स्नेहाः एरण्डकुसुम्भातसीबीजोद्भवाः, न वसादयः VīraMi. (S'rāddha.) 161. 26.

अतसीमय (atasī-maya) *adj.* made of (the fibre of) flax, flaxen क्षौममतसीमयं गोण्यादि BālaKrī. ii. 17. 9 (on 3. 36); क्षौममतसीमयं वस्त्रम् Aparā. 261. 18 (on 1. 187) = 831. 7 (on 3. 37); कौशेयमतसीमयम् Aparā. 784. 22 (on 2. 180) = 846. 14 (on 2. 275)

अतसीलता (atasī-latā) *f.* the plant *Linum usitatissimum*, common flax plant घृतगन्धा निम्बुवल्ली तिलकन्दातसीलता। … दिव्यौषध्यो महाबलाः RasPraSu. 9. 8.

अतसीवज्र (atasī-vajra) *m.* name of a kind of greyish sword or scimitar अतसीफलसंकाशमङ्गं भूमिः सितासिता। अतसीवज्रमाहुस्तं (खड्गम्) तत्क्षते शिरसो रुजा YuktiKa. 149. 2.

अतसीवर्णसंनिभ (atasīvarṇa-sannibha) *adj.* resembling the (bluish) colour of the (flowers of the) common flax (said of a species of snakes) नानाविचित्रराजीभिरतसीवर्णसंनिभाः। बाणपुष्पसवर्णाभा वैश्यास्ते वै भुजंगमाः BhaviP. 75B. 29 (i. 36. 40)

अतसीवल्कलमय (atasīvalkala-maya) *adj.* made of the fibre of flax, flaxen क्षौममतसीवल्कलमयं वस्त्रम् Aparā. 296. 3 (on 1. 204)

अतसीवसन (atasī-vasana) *n.* linen cloth क्षौममट्टे दुकूले स्यादतसीवसनेऽपि च Vis'vaPra. 110. 6.

अतसीवस्त्र (atasī-vastra) *n.* linen cloth क्षौमं स्यादतसीवस्त्रे Vis'vaLoK. 248. 42.

अतसीवृक्षवल्कल (atasīvṛkṣa-valkala) *n.* fibre of the flax plant क्षौमं अतसीवृक्षवल्कलनिर्मितम् DīpKa. 23. 12 (on 1. 187)

अतसीसरस् (atasī-saras) *n.* name of a holy lake in Kashmir (कश्मीरायाम् … नरः) उद्वर्तनसरः पुण्यं पुण्यं च अतसीसरः। … दृष्ट्वा स्वर्लोकमाप्नुयात् NilaP. 1261.

अतसीसूत्र (atasī-sūtra) *n.* flax-yarn or fibre क्षौममतसीसूत्रनिर्मितम् SmṛtiCan. i. 75. 9 = ii. 477. 18 = DīpKa. 80. 5 (on 3. 36); क्षौममतसीसूत्रकृतं दुकूलम् BālamBha. i. 372. 5 (on 1. 119); VīraMi. 817. 20 (on 3. 36)

अतसीसून (atasī-sūna) *n* (blue) flower of *Linum usitatissimum* or flax तस्यातसीसूनसमानभासो (हरेः) भ्राम्यन्मयूखावलिमण्डलेन। चक्रेण रेजे यमुनाजलौघः स्फुरन्महावर्त इवैकबाहुः S'is'uVa. 3. 17; प्रवर्तमानः सुरनायकाङ्के जिनोऽतसीसूनसमानभानुः। विकस्वरे चम्पकपुष्पकोशे प्रशस्यरोलम्बयुवेव रेजे NemiC. 6. 4.

अतसुच् (atasuc) (Gr.) the secondary suffix *atás* दक्षिणोत्तराभ्यामतसुच् P. v. 3. 28; दक्षिणोत्तराभ्यामतसुजिति सूत्रेण चास्तात्यपवादकः अतसुच्प्रत्ययो विहितः LaCandr. 599. 33; GuruCandr. iii. 63. 3.

अतस्कर (a-taskará) *adj.* free from robbers or bandits तं पन्थानं जयेमानमित्रमतस्करम् AV. xii. 1. 47; *m.* not a thief अतस्करस्तस्करसंगतो यथा तद् वो निहन्मि प्रथमं ततोऽप्ययमुम् KumāSaṁ. 15. 42; वणिगतस्करः …जगति दुर्लभः HarṣaC. 249. 11; अद्वैतात्मसत्याभिसंधस्य अतस्करस्येव तप्तपरशुग्रहणे बन्धदाहाभावः … मोक्षश्च ChāndoUBh. 8. 9 (on 0. 0. 0); विषमो हि सङ्गदोषस्तस्करयोगोऽप्यतस्करस्येव ParamāSā. 53; BālamBha. ii. 284. 26 (on 2. 170)

अतस्करकरग्राह्य (a-taskarakaragrāhya) *adj.* not liable to be stolen by the hands of a thief or robber अतस्करकरग्राह्यमराजाज्ञावशंवदम्। अदायादविभागार्हं धनमार्जयत स्थिरम् SūktiRa. 163. 125.

अतस्तब्ध (a-tastabdha) *adj.* (recitation) not frequently interrupted or broken, without falterings ततोऽसौ व्याहरेद् विप्रान् वाचकः श्रद्धयान्वितः। अलम्बितमतस्तब्धम् …। अलंसक्ताक्षरपदं रसभावसमन्वितम् BhaviP. 312B. 8 (i. 216. 62)

अतस्तित (atastita) *adj.* [w. r. for *adhaḥsthita*?] situated low, lower भूषयेद् द्वारशाखाभ्यामूर्ध्वौदुम्बरकं द्विज। व्यालसिंहगजाश्वाद्यैरुदुम्बरमतस्तितम् (? अधःस्थितम्) PauṣkS. 4. 52.

अतस्त्या (atas-tyā) *adj.* (*f.*) [P. iv. 2. 104] emanating therefrom अतस्त्यान्धकास मानसमा नः ĪśvaS'. 93 (comm. हे अन्धकास अन्धकदैत्यमस्यति यस्तत्संबोधनम्। …[नः] अस्माकं मानसमा मानसस्य चेतसः मा शोभा…अतस्त्या अत आगता)

अतस्त्व (atas-tva) *n.* infiniteness, endlessness, boundlessness किमस्ति गगने … अतस्त्वम् KavīndraKa. 3. 1(12) (comm. गगने अतस्त्वम् अनन्तत्वम् अस्ति। 'तसु उपक्षये' भावे क्विप् नञ्बहुव्रीहौ भावे त्वप्रत्ययः)

अतस्थान (á-tasthāna) *adj.* not suiting, not fitting that place तद्तुथा न कुर्यादतस्थानो वा एषः S'atBr. XII. v. 1. 1 = XII. v. 1. 2 = XII. v. 1. 3 = XII. v. 2. 2.

अताच्छीलिक (a-tācchīlika) *adj.* (Gr.) (a suffix) not denoting a particular disposition or habit or custom (of the agent of the action) तदेवं ताच्छीलिकानामताच्छीलिकैरेवासरूपविधिर्नास्तीति ज्ञापितम् PariVṛ.(Sī.) 88. 19.

अताच्छील्य (a-tācchīlya) *n.* **A** (Gr.) absence of the state of (an agent's) having a particular disposition or custom or habit साधुकारिण्यताच्छील्येऽपि णिनिर्भवति Nyās. i. 623. 3 (on P. iii. 2. 78); PadMañ. *on* KāśiVṛ. *on* P. iii. 2. 135; **B** habitual non-observance of that (religious impiety) धर्मशीले महीपाले यान्ति तच्छीलतां प्रजाः। अताच्छील्यमतच्छीले MahāP. 41. 97.

अताच्छील्यार्थ (a-tācchīlyārtha) *adj.* (Gr.) (a rule) intended for (enjoining the suffix in a sense) other than (an agent's) having a particular disposition or custom or habit अताच्छील्यार्थ आरम्भः। जात्यर्थो वा KāśiVṛ. on P. iii. 2. 79 = Nyās. i. 623. 11 (on iii. 2. 79); Nyās. i. 622. 25 (on iii. 2. 78); i. 651. 19 (on iii. 2. 135); अताच्छील्यार्थमिदम् Pradī. iii. 174A. 30 (on iii. 2. 78) = iii. 206B. 16 (on iii. 2. 135); 'सुप्यजातौ…' इति सिद्धेऽताच्छील्यार्थमिदं वचनम् PadMañ. *on* KāśiVṛ. *on* iii. 2. 51; *on* iii. 2. 78; 'साधुकारिणि'। अताच्छील्यार्थं जात्यर्थं वासरूपनिवृत्त्यर्थं च Prasā. ii. 541. 8; ii. 541. 9; SiddhāKau. 499A. 4.

अताच्छील्यार्थम् (a-tācchīlyārtham) *adv.* intended for (enjoining

the suffix in a sense) other than (an agent's) having a particular disposition or custom or habit तृन्विधावृत्विक्षु चानुपसर्गस्य । अताच्छील्यार्थं वक्तव्यम् Prasā. ii. 585. 9.

अताटङ्क (a–tāṭaṅka) *adj.* having no ear-ornament एककर्णस्थताटङ्काद-ताटङ्कं वरं मुखम् SūktiMu. 88. 11.

अताडन (a–tāḍana) *n.* **i** absence of striking अमुं निदानं विदुरायतीनां नेह प्रभावाच्छिदुरा यतीनाम् । अताडनैः कार्मुकमाविलेषु … माविलेषु Kapphiṇā. 6. 42; **ii** not beating or inflicting corporeal punishment तथा हि शिष्यशिष्टिरवधेनेति । अस्यार्थः । शिष्यस्य शिक्षावधेनाताडनेन Subodhi. 21. 9 (*on* 2. 32); BālamBha. ii. 48. 27 (*on* 2. 32)

अताडनीय (a–tāḍanīya) *adj.* who should not be beaten or inflicted with corporeal punishment (अबन्धनं यश्च बध्नाति बन्ध्यं यश्च प्रमुञ्चति । अप्राप्तव्यवहारं च) चकारैरताडनीयताडनकर्तुर्बद्धोन्मोचयितुश्च संग्रहः ViraMi. 704. 17 (*on* 2. 243)

अताडयत् (a–tāḍayat) *adj.* **i** not beating or causing any injury (as a punishment) (राजा विनिर्णयं कुर्यादक्षिण्वन् न्यासधार(? रि)णम् ManuSm. 8. 196) अक्षिण्वन् अताडयन् SmṛtiCan. iv. 423. 17; **ii** not stroking (water with the hands) उदकं हस्तादिनानभिघ्नन्नताडयन्नुपस्पृशेत् स्नायात् BālamBha. i. 342(? 322). 27 (*on* 1. 100)

अताडित (a–tāḍita) *adj.* [*f.* –ā] **i** not beaten, not struck देवदुन्दुभयश्चैव नेदुः स्वयमुदीरिताः (v. l. अताडिताः) MahāBhā. iii. 195. 14; ततः प्रभृति कुसुमधवलाभिर्वनलताभिरताडितापि वेदनामधत्त HarṣaC. 47. 8; 184. 12; अताडिते तूर्यनादस्ताडिते नादवर्जिते VasiS. 45. 100; **ii** not played upon अङ्कगतापि न वीणा कलमधुरमताडिता क्वणति Subhāṣi. 2852.

अताण्डव (a–tāṇḍava) *n.* absence of the *tāṇḍava* (violent type of dance) अताण्डवचलच्चण्डवीचिदोर्दण्डमण्डलैः BṛKathāMañ. v. 1. 80.

अतातनय (a–tātatanaya) *adj.* not the son of (our) father येनायम् … माम् … अतातनयमिव … अतिदुष्करे कर्मणि समादिष्टवान् HarṣaC. 249. 4.

अताति (a–tāti) *f.* free from dependence on others, independence ततोऽतातिततोतौते ततता ते ततोततः AlaṅkāCin. 38. 7 (comm. तातिः परिग्रहः परायत्तत्वम् … न तातिः अतातिः)

अतात्त्विक (a–tāttvika) *adj.* [*f.* –ī] not true, unreal तथा चायं क्रियाकरणेतिकर्तव्यताफलप्रपञ्चम् अतात्त्विकं विनिश्चिन्वन् कथमधिकृतो नाम Bhām. 43. 24 (*on* i. 1. 1); 165. 18 (*on* i. 2. 6); NayaVi. 259. 2 (*on* i. 1. 24); ममेति चेतनोपरागो दर्पणस्येव मुखोपरागो भेदाग्रहादतात्त्विकः NyāyKuA. i. 52. 4; PramāMā. 16. 17; संसारमालासु चलाचलासु न ज्ञायते तत्त्वमतात्त्विकीषु YogVā. i. 27. 26; अभिदा श्रुतिगाप्यतात्त्विकी चेत् पुरुषार्थश्रवणं न तद्गतौ स्यात् S'aṅkaDigVi.(Mā.) 15. 59; SiddhāTaVi. 51. 45; न हि तत्त्वप्रधानशास्त्रस्यातात्त्विकगुणप्रतिपादनपरत्वं युक्तम् S'rutaPra. ii. 463. 14 (*on* iii. 3. 5); ii. 573. 15 (*on* iv. 1. 2); SarvaDaKau. 107. 10; अतात्त्विकं हि तात्त्विकात्यन्ताभावप्रतियोगीत्युक्तम् Nyāyāmṛ. 409B. 8; 240B. 8; SiddhāMu. 26. 29 (*on* 49); ब्रह्मभिन्नं प्रपञ्चनिषेधादिकं अतात्त्विकमित्यतात्त्विकत्वेन बोधयन्त्याः श्रुतेरप्रामाण्यासंभवात् AdvaiSi. 110. 1; 99. 1; 334. 18; S'ivārkaMaDī. ii. 244. 11 (*on* iii. 2. 11); GuruCandr. i. 153. 19; i. 158. 22.

अतात्त्विकगन्धानुमिति (atāttvikagandhānumiti) *f.* inference of unreal smell गन्धप्रागभावावच्छिन्ने घटे तात्त्विकव्याप्त्यादिमतापि पृथिवीत्वेनातात्त्विकगन्धानुमितिदर्शनात् AdvaiSi. 365. 17.

अतात्त्विकघटादिस्वरूप (atāttvikaghaṭādi–svarūpa) *n.* nature of the unreal jar etc. मिथ्यात्वानुमितेः घटादिनिषेधस्य बोधकत्वेऽपि तस्य तात्त्विकत्वेन अतात्त्विकघटादिस्वरूपज्ञानस्य उपजीव्यस्याविरोधात् GuruCandr. i. 295. 11.

अतात्त्विकत्व (atāttvika–tva) *n.* the state of being not true or unreal न तावत् ज्ञानं पक्षविषयं प्राश्निकाधिकरणं चेति बौद्धराद्धान्ते संभवति ज्ञानस्यानाधारत्वात् । विषयिविषयभावस्यातात्त्विकत्वात् TātpaṬ.(Vā.) 321. 10 (*on* i. 2. 1); आत्मभेदस्यातात्त्विकत्वेन … भेदनिर्देशो न संगच्छते GītāBhā.(Rā.) 61. 2 (*on* 2. 12); TattvPradī.(Ci.) 75. 3; गुणानामतात्त्विकत्वान्नासंगतिरिति चेत् – अत एव ह्यसंगतिः S'rutaPra. ii. 463. 13 (*on* iii. 3. 5); ii. 434. 21 (*on* iii. 2. 11); TarkSaṁ.(Ā.) 7. 5; 136. 20; SarvaDaKau. 124. 9; न ह्येकस्मिन्नेवाकारे तात्त्विकातात्त्विकत्वयोः प्राप्तिरस्ति Nyāyāmṛ. 624A. 6; 107B. 8; AṇuBh. 71. 16 (*on* i. 2. 30); 84. 8 (*on* i. 3. 19); LaCandr. 463. 22.

अतात्त्विकत्वकण्ठोक्ति (atāttvikatva–kaṇṭhokti) *f.* explicit mention of the nature of being unreal or untrue ऐक्यस्यातात्त्विकत्वकण्ठोक्तिर्दर्शिता S'rutaPra. iB. 81. 25 (*on* i. 1. 1)

अतात्त्विकत्वद्योतक (atāttvikatva–dyotaka) *adj.* indicating the state of not being true यत्र यदा द्वैतमिव भवति । स्वनिष्ठभेद इव भवति । इवशब्दः स्वनिष्ठभेदस्यातात्त्विकत्वद्योतकः S'rutaPra. iA. 207. 13 (*on* i. 1. 1)

अतात्त्विकत्वपक्ष (atāttvikatva–pakṣa) *m.* view (that something is) of the nature of unreal मिथ्यात्वघटकाभावस्य तात्त्विकत्वपक्ष इवातात्त्विकत्वपक्षेऽपि अनवच्छिन्नत्वस्वीकारात् GuruCandr. i. 71. 5.

अतात्त्विकत्वसंभव (atāttvikatva–sambhava) *m.* possibility of being unreal अभावत्वस्यातिरिक्तत्वेऽप्यनुयोगिताविशेषरूपस्य तस्य प्रतियोगिताया इवातात्त्विकत्वसंभवात् GuruCandr. i. 190. 24.

अतात्त्विकत्वस्वीकार (atāttvikatva–svīkāra) *m.* acceptance of the nature of being unreal अविरोधाय विधिसमुच्चयस्यैवातात्त्विकत्वस्वीकारश्च AdvaiSi. 621. 24.

अतात्त्विकत्वाङ्गीकार (atāttvikatvāṅgīkāra) *m.* acceptance or admission of the nature of being unreal निषेधसमुच्चयस्यातात्त्विकत्वाङ्गीकारात् न व्याहतिः AdvaiSi. 621. 19.

अतात्त्विकत्वानिर्वाह (atāttvikatvānirvāha) *m.* absence of the maintenance of the nature of being unreal तद्विषयकाज्ञानपरिणामत्वव्यतिरेकेण विकारे अतात्त्विकत्वानिर्वाहात् AdvaiSi. 758. 17.

अतात्त्विकत्वापत्ति (atāttvikatvāpatti) *f.* contingency of being unreal योग्यतादिमिथ्यात्वबोधने च श्रुत्यर्थस्यातात्त्विकत्वापत्तिः AdvaiSi. 507. 4.

अतात्त्विकत्वावश्यकत्व (atāttvikatvāvaśyakatva) *n.* necessity of the nature of being unreal क्षेमसाधारणजन्यत्वस्य प्रतिबिम्बाभावनिष्ठस्य प्रतिबिम्बघटितत्वेन अतात्त्विकत्वावश्यकत्वात् GuruCandr. i. 291. 18.

अतात्त्विकत्वोपपत्ति (atāttvikatvopapatti) *f.* possibility of the nature of being unreal वेदादापाततः प्रतीतानामपि वेदतात्पर्यविषयत्वाभावादतात्त्विकत्वोपपत्तेः AdvaiSi. 693. 5.

अतात्त्विकनिषेध (atāttvika–niṣedha) *m.* untrue or unreal negation न चातात्त्विकनिषेधबोधकत्वे श्रुतेरप्रामाण्यापत्तिः ब्रह्मभिन्नम् … अतात्त्विकमित्यतात्त्विकत्वेन बोधयन्त्याः श्रुतेरप्रामाण्यासंभवात् AdvaiSi. 110. 1.

अतात्त्विकप्रपञ्च (atāttvika–prapañca) *m.* unreal world अतात्त्विकप्रपञ्चे यदि तात्त्विकत्वमप्यध्यक्षेण न गृह्यते कथं तर्हि तस्यातत्त्वावेदकत्वम् … इति वाच्यम् AdvaiSi. 352. 12.

अतात्त्विकप्रमाण (atāttvika–pramāṇa) *n.* unreal means of valid knowledge अतात्त्विकप्रमाणभावेभ्योऽपि तत्त्वज्ञानोत्पत्तिदर्शनात् Bhām. 5. 14 (*on* i. 1. 1); ननु किमिदं प्रमाणदृष्टत्वम् । तात्त्विकप्रमाणदृष्टत्वम् अतात्त्विकप्रमाणदृष्टत्वं वा Vādā. 64. 6.

अतात्त्विकप्रामाण्य (atāttvika–prāmāṇya) *n.* unreal validity, validity of unreal nature श्रुतिप्रत्यक्षयोः तात्त्विकप्रामाण्यविरोधे श्रुतेरतात्त्विकप्रामाण्यस्यासम्भवात् प्रत्यक्षस्यैव तदित्युक्तत्वात् GuruCandr. i. 336. 11; ii. 217. 18.

अतात्त्विकभिदावलम्ब (atāttvikabhidāvalamba) *adj.* depending upon unreal difference स्पु(? स्फु)टमभिदैव जीवपरयोर्बलात् कठविमुश्रुतिव्रजमिता तदनुसरत्प्रमाणमितरत्त्वतात्त्विकभिदावलम्बमखिलम् NayaMañ. IV. i. 2. 4.

अतात्त्विकभेद (atāttvika–bheda) *m.* unreal difference न ह्यतात्त्विकभेदः प्रतिज्ञातः ब्रह्मजिज्ञासेत्युपक्रमविरोधात् S'rutaPra. iB. 297. 15 (*on* i. 2. 6); S'ivārkaMaDī. i. 539. 9 (*on* i. 4. 16); तथा च समाभ्यधिकराहित्यादपकृष्टानां सत्त्वलाभेनातात्त्विकभेदप्रत्ययेऽपि न क्षतिः LaCandr. 839. 36.

अतात्त्विकभोग (atāttvika–bhoga) *m.* unreal enjoyment सिद्धान्तेऽप्यतात्त्विकभोगाभ्युपगमाद् अवास्तवस्य न निषेध इत्यर्थः VedāntKa. 255. 21 (*on* ii. 2. 6)

अतात्त्विकमानत्व (atāttvikamāna–tva) *n.* the state of being an unreal authority तथा च विरोधिप्रत्यक्षे मानत्वानिर्णयात् न श्रुतेरतात्त्विकमानत्वम् LaCandr. 823. 40

अतात्त्विकरूपारोपण (atāttvikarūpāropaṇa) *n.* superimposition of an unreal form अचिद्ब्रह्मणोस्तु ' सर्वं खल्विदं ब्रह्म ' इत्यादावतात्त्विकरूपारोपणेन सामानाधिकरण्यम् S'rutaPra. iB. 53. 17 (*on* i. 1. 1)

अतात्त्विकविकार (atāttvika–vikāra) *m.* unreal or illusory change त्वद्रीत्या ब्रह्मण एव…अतात्त्विकविकारेण शुक्त्यादिवत् विवर्ताधिष्ठानत्वरूपोपादानत्वोपपत्तेः Nyāyāmṛ. 333A. 7; 502A. 13; ब्रह्मण एवातात्त्विकविकारसंभवात् AdvaiSi. 758. 16.

अतात्त्विकविधिसमुच्चय (atāttvikavidhi–samuccaya) *m.* combination of unreal affirmations अतात्त्विकविधिसमुच्चयापत्तिस्त्विष्टैव AdvaiSi. 622. 2.

अतात्त्विकविश्व (atāttvika–viśva) *n.* unreal universe इदमनौष्ण्यमतात्त्विकविश्वान्तर्गतेन जलाद्यनौष्ण्येन तुल्यस्वभावं चेत् Nyāyāmṛ. 120B. 8.

अतात्त्विकविषयकत्व (atāttvikaviṣayaka–tva) *n.* the state of having unreal content दृगादिसंसर्गस्य निर्वक्तुमशक्यत्वादित्यादियुक्तिसचिवानुमानादिना विश्वसत्यत्वश्रुतेरतात्त्विकविषयकत्वसिद्धिः GuruCandr. i. 459. 16; LaCandr. 722. 9.

अतात्त्विकविषयत्व (atāttvikaviṣaya-tva) *n.* the state of being an unreal content यदि चाविरोधाय द्वैतवाक्यस्य लक्षणादिनाद्वैतपरत्वं वातात्त्विकविषयत्वेन व्यवस्था वा Nyāyāmṛ. 267A. 6.

अतात्त्विकव्युत्पत्ति (atāttvika-vyutpatti) *f.* unreal word-sense-relationship अतात्त्विकव्युत्पत्तेर्बीजं बहुधा पदमार्थं वाक्यं सर्वाणि पदानि आख्यातं वा इत्यादि NayaVi. 259. 4 (*on* i. 1. 24)

अतात्त्विकसत्ता (atāttvika-sattā) *f.* unreal existence तद्वदेवातात्त्विकसत्तादिविशिष्टार्थत्वापातात् Nyāyāmṛ. 469A. 8.

अतात्त्विकसत्त्व (atāttvika-sattva) *n.* unreal existence लक्षणाया घटादाविवातात्त्विकसत्त्वसंबन्धेनाप्युपपत्तेः Nyāyāmṛ. 468A. 7.

अतात्त्विकसंबन्ध (atāttvika-sambandha) *m.* unreal relation अतात्त्विकसंबन्धेनैव लक्षणोपपत्तेः AdvaiSi. 674. 8.

अतात्त्विकहेतु (atāttvika-hetu) *m.* unreal reason or argument अतात्त्विकहेतुसद्भावेन तात्त्विकधर्माभावस्य बोधनेन व्याघाताभावात् AdvaiSi. 623. 1.

अतात्त्विकाकार (atāttvikākāra) *m.* unreal form तस्मादतात्त्विकाकारसमुल्लेखपुरःसराः । न यथावस्तु जायन्ते कदाचिदपि कल्पनाः NyāyaMañ. i. 87. 15.

अतात्त्विकाज्ञान (atāttvikājñāna) *n.* nescience which is not real चैतन्यप्रकाशविरुद्धतत्समसत्ताकाज्ञानान्तरस्याभावेनातात्त्विकाज्ञानविरोधस्यैव वाच्यत्वात् Nyāyāmṛ. 338B. 8.

अतात्त्विकाद्वैत (atāttvikādvaita) *n.* unreal non-duality अतात्त्विकाद्वैतमद्वैतवाक्यस्य तात्त्विकद्वैतं द्वैतवाक्यस्यार्थोऽस्तु GuruCandr. ii. 262. 10.

अतात्त्विकान्यथाभाव (atāttvikānyathābhāva) *m.* unreal change अविद्यामन्तरेणातात्त्विकान्यथाभावलक्षणस्य विवर्तस्यैवासंभवात् AdvaiSi. 573. 8; परिणामादिति सूत्राक्षराच्च ··· अतात्त्विकान्यथाभावात्मा विवर्तः परिहृतः GoviBh. 81. 12 (*on* i. 4. 26)

अतात्त्विकावयवित्व (atāttvikāvayavi-tva) *n.* the state of being an unreal object with parts न तत्त्वतस्तदप्यस्तीति चेन्न, अतात्त्विकावयवित्वस्यास्माकमसिद्धेः Vādā. 83. 4.

अतात्त्विकास्वप्रकाशवृत्ति (atāttvikāsvaprakāśa-vṛtti) *adj.* present in what is neither real nor self-luminous तथा तात्त्विकस्वप्रकाशसत्तातादात्म्यं प्रपञ्चे कल्पितं तात्त्विकस्वप्रकाशत्वविरोधीति अतात्त्विकास्वप्रकाशवृत्त्युच्यते GuruCandr. i. 208. 8.

अतात्त्विकेच्छा (atāttvikecchā) *f.* unreal desire तात्त्विकेऽपि ज्ञानस्वरूपे यदि तत् (सविषयकत्वं) न तात्त्विकं तर्हि अतात्त्विकेच्छादौ तत्तथा नतरामित्यर्थः GuruCandr. i. 152. 18.

अतात्त्विकोपास्यत्व (atāttvikopāsya-tva) *n.* unreal nature of being the object of meditation उपास्यत्वे अतात्त्विकोपास्यत्वे LaCandr. 732. 32.

अतात्पर्य (a-tātparya) *n.* **A** absence of import or intention अतात्पर्यस्यापि दर्शनाज्जपमन्त्रेषु BrahmSi. 77. 2; एवं च सत्युक्तरूपे ब्रह्मणि शब्दस्यातात्पर्यात् प्रमाणान्तरेण यादृगस्य रूपं व्यवस्थाप्यते न तच्छब्देन विरुध्यते Bhām. 76. 23 (*on* i. 1. 4); न च स्रुक्स्रुवत्वह्वयादावतात्पर्यं श्रुतेर्भवेत् AnuVyā. 3B. 1 (*on* i. 1. 1); उपाख्यानानामसत्यत्वेऽपि तत्रार्थवादानामतात्पर्यात् NyāySu. (So.) 57. 24 (*on* i. 2. 10); न च तत्रातात्पर्यान्नातत्त्वावेदकता Nyāyāmṛ. 251B. 9; न च देवतानिरासो जैमिनेरतात्पर्यादन्वारुह्यवादत्वाद्वा तदभ्युपगमेन न विरोध इति युक्तम् SiddhāSi. 44. 1; पदान्तरसापेक्षत्वेऽपि तत्रातात्पर्यान्न गौरवम् MīmāKau. 163. 9 (i. 4. 2); कर्मणः प्राधान्येन तत्स्वरूपज्ञापने विधेरतात्पर्यात् MayūMāli. 135. 39 (ii. 2. 5); **B** absence of appropriateness or fitness अक्षराणामतात्पर्याद्युक्तितश्चाप्यसंभवात् । प्रतिपत्तुं वयं तादृक्शक्नुमो नाञ्जसा परम् BṛĀraU-BhVā. i. 4. 951 (comm. श्रुत्यक्षराणां समस्तव्यस्तात्मके वस्तुनि आनुकूल्याभावात्); **C** absence of attachment तदन्यधीरतात्पर्यं पटुत्वविरहो धियः S'rutaPra. i (B). 20. 18 (i. 1. 1) (comm. पथि गच्छतः तृणादावादरश्च नास्ति)

अतात्पर्यकत्व (atātparyaka-tva) *n.* the state of being devoid of any intention or import वैदिकवाक्यानामतात्पर्यकत्वे तस्मात् वाक्यार्थबुद्ध्यनुदयप्रसङ्गात् अनादितात्पर्यवान् भवः सिद्ध्यति MaṇiKa. 72. 9.

अतात्पर्यज्ञ (a-tātparyajña) *adj.* not knowing the real or intended import तेऽप्यतात्पर्यज्ञास्तात्पर्यवाचोयुक्तेर्देवानां प्रियाः KāvPra. 226. 1; Kāvyānu.(He.) 33. 7.

अतात्पर्यप्रसङ्ग (atātparya-prasaṅga) *m.* contingency of not being its import मुखतोऽप्रतिपादने अतात्पर्यप्रसङ्गः VivaPraSam. 10. 3.

अतात्पर्यभूत (a-tātparyabhūta) *adj.* being not its purport गुणीभूतव्यङ्ग्येऽतात्पर्यभूतोऽप्यर्थः स्वशब्दानभिधेयः प्रतीतिपथमवतरन् कस्य व्यापारस्य विषयतामवलम्बताम् KāvPra. 245. 3; अतात्पर्यभूतोऽप्यर्थः स्वशब्देनाभिधेयः (v. l. तात्पर्यभूतो°) Kāvyānu.(He.) 34. 26.

अतात्पर्यवद्वाक्य (atātparyavad-vākya) *n.* text that does not have the main purport or primary intention ज्ञानस्तुतिपराणि वाक्यानि नात्ममेदं प्रमातुं शक्नुवन्ति । तात्पर्यवद्वाक्यविरोधेनातात्पर्यवद्वाक्यानां गुणवादत्वोपपत्तेः AdvaiSi. 542. 14.

अतात्पर्यविद् (a-tātparyavid) *adj.* who does not understand the intention or import इत्यनर्थाय शब्दैकपरोऽतात्पर्यविज्जडः KathāSaSāg. x. 6. 212.

अतात्पर्यविषय (a-tātparyaviṣaya) *m.* not the object of intention अतात्पर्यविषयस्य च प्रतीतस्य त्यक्तत्वात् Nyāyāmṛ. 439A. 9; उपस्थितिरूपत्वेऽपि लक्षणायास्तात्पर्यविषयानुकूलोपस्थितिरेव सा नोक्तोपस्थितिरूपा । अतात्पर्यविषयतादृगुपस्थितौ गतत्वात् AdvaiSi. 691. 31; तात्पर्यविषयार्थबोधादतात्पर्यविषयार्थविषयापि शाब्दधीरिष्यते RasGaṅ. 141. 1; GuruCandr. ii. 288. 21; अतात्पर्यविषयमत्वर्थलक्षणा तु न तत्र बाधिका LaCandr. 377. 39.

अतात्पर्यविषयत्व (atātparyaviṣaya-tva) *n.* the state of not being the intention तेषामतात्पर्यविषयत्वेऽपि तैरेव गुणीभूतैः काव्यव्यवहारः SāhiDa. 247. 4 (comm. तात्पर्यविषयत्वेनाप्रधानेऽपि)

अतात्पर्यविषयीभूत (a-tātparyaviṣayibhūta) *adj.* which has not become the object of the intention (of the speaker) अतात्पर्यविषयीभूतार्थबोधो जायमानो व्यञ्जनव्यापारसाध्यः RasGaṅ. 140. 2.

अतात्पर्यहेतु (atātparya-hetu) *m.* cause of the absence of intention यदि च सत्त्वश्रुतिः प्रत्यक्षप्राप्तार्थत्वान्न स्वार्थपरा तर्हि मिथ्यात्वश्रुतिरपि तद्विरुद्धार्थत्वात्तथा स्यात् मानान्तरप्राप्तिवत् तद्विरोधस्याप्यतात्पर्यहेतुत्वात् Nyāyāmṛ. 166A. 6.

अतात्पर्यापत्ति (atātparyāpatti) *f.* contingency of the absence of intention न तत्र श्रुतेस्तात्पर्यमित्यादिकुसृष्टयस्तु दर्शपौर्णमासादिष्वप्यतात्पर्यापत्त्यादिभिर्निरसनीयाः GoviBh. 160. 9 (*on* ii. 3. 34)

अतात्पर्यापात (atātparyāpāta) *m.* contingency or chance of the absence of intention न च कर्तृत्वस्य क्लेशसंबन्धान्न श्रुतिस्तत्परा दर्शपूर्णमासादावप्यतात्पर्यापातात् Nyāyāmṛ. 393B. 8.

अतात्पर्यार्थ (a-tātparyārtha) *m.* not the intended meaning अतात्पर्यार्थविषयापि शाब्दबुद्धिस्तस्मादेव RasGaṅ. 137. 10; अवाच्यार्थोऽतात्पर्यार्थः RasGaṅ. 138. 5; 140. 8; 141. 12.

अतात्पर्योपपत्ति (atātparyopapatti) *f.* reasonableness of the absence of intention पार्थिवद्रव्यमात्रे बन्धनसंभवेन खादिरत्वादावतात्पर्योपपत्तेः (यूपपदस्य) NyāySu.(Ja.) 73B. 6 (*on* i. 1. 1)

अतात्त्विकत्व (atāttvika-tva) *n.* unreal nature वाक्यार्थप्रतीतिसमय एव पदार्थसमन्वयपर्यालोचनया आ(अ)वर्तमानस्य हेतोरतात्त्विकत्वावगतेरार्थः संभावनात्मक इवार्थ इत्यर्थः AlaṅkāRa. 32 (83)

अताद्धीन्य (a-tādadhīnya) *n.* absence of dependence on Him एवं जगतः तदधीनत्वतत्कार्यत्वादिप्रतिपादनमुखेन अताद्धीन्यातत्कार्यत्वादिव्युदसनात् ब्रह्मैककारणत्वं स्थिरीकृतम् S'rutaPra. ii. 204. 21 (*on* i. 4. 29)

अताद्र्थ्य (a-tādarthya) *n.* **i** absence of the state of having that as its sense एषा स्यात्पुरुषाख्यानाद्दुर्वशीचरितादिवत् । प्रतिपत्तिरताद्र्थ्येऽप्यस्य प्रकृतितस्तव TattvSam. 2357; **ii** the state of not being a cause of that (dust) (*lit.* the state of not being intended for it) एवं पिपीलिकापङ्क्तेः रेणुचक्रान्वये सति । गजाश्वोपजनापायेऽप्यताद्र्थ्यमशङ्कितः S'lokaVār. 7. 164 (892. 2) (NyāyRa. गजाश्वोपजनापायवेलायां तद्वशादेवोपजनापायौ भजमानेन रेणुचक्रेण सत्यपि यादृच्छिके पिपीलिकापङ्क्त्यन्वये ताद्र्थ्यं रेणुचक्रकारणत्वं तस्या नास्ति); **iii** the state of not being meant for it (i. e. the Veda) शास्त्राङ्गमपि नैवैतदताद्र्थ्यात्कथादिवत् TantrVā. 221. 18 (*on* i. 3. 18); **iv** the state of not being for that purpose यश्च ताद्र्थ्याताद्र्थ्यकृतो विशेषो नासौ तन्त्रमिति वक्ष्यति TantrVā. 1084. 3 (*on* iii. 6. 10); समुदाय एषां गुणभूतः । न च गुण आकृष्यमाणो गुणिनमाकर्षति । अताद्र्थ्यात् ṬupṬ. 171. 12 (*on* viii. 1. 20)

अतादवस्थ्य (a-tādavasthya) *n.* absence of being in that (same) condition समानविषयत्वेऽपि स्मृत्यनुभवयोरनुभवो यथार्थो न स्मृतिः···अनुभवकाले तस्यार्थस्य तावद(? ताद)वस्थ्यात् स्मृतिकाले त्वतादवस्थ्यात् NyāyVārPari. 162. 6; NyāySu.(Ja.) 251A. 4 (*on* ii. 1. 2); न खलु प्रत्युपदेशं वस्तु भिद्यते । तस्य सर्वत्र तादवस्थ्यात् । अतादवस्थ्ये वा तदेव न भवेत् Bhām. 668. 20 (*on* iii. 3. 58); न हि नित्योऽर्थक्रियां क्रमेण प्रवर्तयितुमुत्सहते अतादवस्थ्यस्यानित्यतालक्षणत्वात् SyādvāMañ. 26 (23); *adj.* free from that state अस्पष्टवैकृतविविक्तविकारचक्रहेतोर्नियम्य न कदाचिदतादवस्थ्यम् । कृच्छ्रेण नाभिहृदयाम्बुजकोटरस्थं पश्यन्त्यविप्लुतसमाधिदृशो यमार्याः HarVi. 47. 71.

अतादात्म्य (a-tādātmya) *n.* absence of being of the same nature, absence of identity अथाव्यवस्थात्मनि न व्यवस्थिता एवमतादात्म्यादव्यवस्था न भवतीति संशयाभाव इति NyāySūBh. 75. 3 (*on* ii. 1. 4); अतादात्म्यान्न हि घटं

जनयन्तीह तन्तवः BṛĀraUBhVā. iii. 2. 88; शब्दयोः सामानाधिकरण्यं तादात्म्यमिति चेत् अयुक्तमिदं गौर्वाहीक इत्यादावतादात्म्येऽपि सामानाधिकरण्यदर्शनात् PrakaPañ. 72. 7; अतादात्म्येनाग्रहणं व्यतिरेकेणाग्रहणं पृथक्शब्दोऽपि अतादात्म्यं ब्रूते TātpaṬ. (Vā.) 232. 9–10 (*on* i. 1. 15); परमार्थतो धर्मिणोरतादात्म्यं विवेकः Bhām. 8. 17 (*on* i. 1. 1); अर्थाः प्रमाणस्य व्यापकाः । न च प्रमाणमर्थानां व्यापकं अहेतुत्वादतादात्म्याच्च KāśiVṛ. i. 126. 11 (*on* 2. 117)

अतादात्म्यरूप (atādātmya–rūpa) *n.* form or nature of non-identity or difference यदैतस्मिन्नानन्दमयेऽल्पमप्यन्तरमतादात्म्यरूपं पश्यति तदा संसारभयान्न निवर्तते BrahmSūBh.(S'aṅ.) 58. 1 (*on* i. 1. 19)

अतादात्म्यविषयत्व (atādātmyaviṣaya–tva) *n.* the nature of having a sphere other than identity अन्योन्यप्रतियोगिकः अभावः अन्योन्याभावः इति प्रत्यूढं अन्योन्यशब्दस्य अतादात्म्यविषयत्वे प्रागुक्तदोषानतिक्रमणात् TarkSaṁ. (Ā.) 131. 3.

अतादात्म्यस्वभाव (atādātmya–svabhāva) *adj.* the nature of which (*viz.* the *skandha*) is not of the nature of that (i. e. parts) स्कन्धो मात्रानुरोधेन व्यवहारेऽवधार्यते ।··· अतादात्म्यस्वभावे वा ह्यानर्थक्यादलं परैः NyāyVi. 2. 284 (Vādirājasūri मात्रानुरोधेन मात्राणां तद्भागानामनुरोधः ··· अतादात्म्यं अमात्ररुपत्वं सर्वथा तद्व्यतिरेकात् स्वभावो यस्य तस्मिन् वा स्कन्धे)

अतादात्म्यानुपपत्ति (atādātmyānupapatti) *f.* impossibility of (the word's) being not identical with or different from that (portion of the word) (शब्दस्य) एकदेशाभिव्यक्तिरिति चेत् न ··· तादात्म्यातादात्म्यानुपपत्तेः NyāyVār. 289. 14 (*on* ii. 2. 14)

अतादृगर्थ (atādṛg–artha) *adj.* having a meaning unlike that (intended) अतादृगर्थमेव सद्रुचः स्मर्यत इत्यर्थः। अत्र स्मरण आकारो वर्तते Prasā. i. 80. 24.

अतादृगुपायाश्रयण (atādṛgupāyāśrayaṇa) *n.* resorting to the means unlike them धीरोदात्तधीरललितधीरोद्धतधीरप्रशान्तानां पूर्णोपायप्रवृत्तत्वेन नायकानामतादृगुपायाश्रयेण प्रतिनायकानां च चरितम् ··· अधर्मादिभ्यश्च निवृत्तिं निर्विशङ्कं विधत्ते AbhinBhā. i. 7. 2 (*on* 1. 4)

अतादृग्विभक्ति (atādṛg–vibhakti) *f.* incongruent grammatical case-suffix दृष्टं च प्रयाजशेषेण हवींष्यभिधारयतीत्यत्र प्रयाजशेषप्रातिपदिकस्वारस्याय प्रयाजशेषं हविःषु प्रक्षिपतीति विभक्त्यस्वारस्यम् ।··· युक्तोऽतादृग्विभक्तेर्हि बाधः प्रा(? प्र)याजशेषवत् Nyāyāmṛ. 596B. 5.

अतादृश् (a–tādṛś) *adj.* **i** not similar (in sequence) न च स्वरूपभेदस्तादृशस्तावतां वर्णानां वर्णान्तरेभ्यो (तेभ्यो) वातावद्भ्यस्तावद्भ्यो वातादृग्भ्योऽन्त्यविज्ञानोपरोहिणामर्थप्रत्ययात् प्राक् न प्रथते TattvBi. 50. 2; **ii** not of that (kind), not like that अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् । अतादृशि वाच्यादनतिशायिनि KāvyPra. 21. 1; 'अतादृशि गुणीभूतव्यङ्ग्यम्' इत्यादिकाव्यप्रकाशलक्षणे चित्रान्यत्वं टीकाकारैर्दत्तम्, तन्न RasGaṅ. 20. 4.

अतादृश (a–tādṛśa) [*f.* –ī] *adj.* **i** not like that (person or thing) धूमादेरग्न्यादिसामग्रीजन्यतया प्रत्यक्षानुपलम्भाभ्यां निश्चितरूपत्वेऽपि तादृशस्यातादृशादपि भावः समाशङ्क्यते HetuBiṬ. 154. 14; तद्विलक्षणं अतादृशम् HetuBiṬ. 154. 28; (रूढिरूपेण प्रत्ययः स्यात्) तमभ्युपेत्य पक्षश्चेदभ्युपेतं विरुध्यते । विशेष्यस्याप्रसिद्धिश्च तवास्माकमतादृशे S'lokaVār. 5 (2). 46 (228. 4); अतादृशे तु पक्षीकृतेऽस्माकमत्राप्रसिद्धविशेष्यत्वम् NyāyRa. 228. 14 (*on* 5 (2). 46); SarvaVeSāSaṁ. 761; NavSāC. 13. 63; सूत्रमपि ··· प्रीत्याविभक्तत्वं पुरुषार्थहेतुत्वं दर्शयन्नतादृशस्य नास्ति पुरुषार्थतेति दर्शयति TantrRa. 28. 18; दर्शनस्पर्शनग्राह्यस्य योग्यानुपलम्भबाधितत्वात् अतादृशस्य तेजोमात्रस्य (=सौरस्य तेजसः) निवृत्तेरशक्यत्वादनिष्टत्वाच्च Kiraṇā. 101. 5; KāvyPra. 738. 6; चिन्त्यमानस्य पुंसस्तु नारीरूपं पुनः पुनः । अदृष्टं तत्समाश्रित्य पुंसमुन्मादयाम्यहम् ।··· तादृशोऽतादृशो रङ्गवस्तुरूपं समाश्रये PadmP. ii. 57. 33; आकाश इत्येवावगम्यते न त्वत्रेदं नास्तीति । इयमपि च वस्तुतो मूर्ताभावगोचरैव प्रतीतिः ··· नञ्वर्जिताभिलापसंबन्धाददतादृशीव प्रकाशते NyāSu.(Ja.) 396A. 4 (*on* ii. 2. 7); भगवदुक्तस्वसंगमावधिकस्य भक्तस्य संगमसमयनिर्धारो भवति । अतादृशस्य तस्य स न AṇuBh. 249. 17 (*on* iii. 3. 42); येषामग्निहोत्रादिकारकं प्रारब्धमस्ति तैरेव तन्नाशाय भोगवत्तदपि क्रियते न त्वतादृशैः AṇuBh. 313. 11 (*on* iv. 1. 16); 325. 10 (*on* iv. 2. 13); प्राणिनां पुनरपि सुखजनकविषयगोचरस्वप्ने वाञ्छा, अतादृशे च स्वप्ने प्रद्वेषः SiddhāLeSaṁ. 313. 7; पुष्पवन्तपदमुभयप्रकारकज्ञाने शक्तमित्याकारकशक्तिग्रहस्य तादृशज्ञानत्वमेव कार्यतावच्छेदकमिति तादृशव्युत्पत्तिमता नैकैकबोधापत्तिरतादृशस्य च भवत्येव तादृशो बोधः S'aktiVā. 91. 25; अतीतभवनिष्पादितसकलब्रह्मविचारस्य प्रतिबन्धक्षये सहजसिद्धज्ञानस्य वामदेवादेरिव विचारानपेक्षत्वेऽप्यक्षतेः। अतादृशस्य ज्ञानार्थतयैव ब्रह्मविचारापेक्षणात् SiddhāSi. i. 6. 12; सिद्धे मानान्तरेण विरुद्धे वा सिद्धान्तिनोऽपि तदनङ्गीकारात् । अतादृशे च बोधकतामात्रस्य परेणापि स्वीकारात् SiddhāSi. i. 42. 10; व्यसनाग्रस्तो द्रविणार्हो धुर्यः पुत्रोऽतादृशो वा पुत्रः ···सर्वस्वग्राही VīraMi. 473. 7 (*on* 2. 51); **ii** untoward, improper नवसाहसाङ्क न तवासुरादहं कलयामि संप्रति किमप्यतादृशम् NavSāC. 10. 27; *n.* improper action कमलिनी सरसा सरसामियं विकसितानवमं नवमण्डनम् । किमिति नाधिगता धिगतादृशं मधुकरेण बताणवता कृतम् Kāvyālaṅ.(Ru.) 3. 58.

अतादृशत्याग (atādṛśa–tyāga) *m.* offering which is not like that (i. e. intended for a particular deity) एवं च देवोद्देश्यकत्वादेरपि न वाच्यान्तर्भावः । अतादृशत्यागतात्पर्येण स्वाहादिप्रयोगस्य देशनादेशितत्वविरहेणैवानतिप्रसङ्गात् VyutpaVā. 174. 23.

अतादृशत्व (atādṛśa–tva) *n.* the state of being not like that चैत्रेण पच्यते तण्डुल इत्यादिवाक्यघटकतयादीनां तादृशसमभिव्यवहारादिशून्यतया तद्विषयिताया अतादृशत्वम् VyutpaVā. 111. 1; न च सामान्यधर्मस्य प्रागभावप्रतियोगितानवच्छेदकत्वेन वेदत्वस्यातथात्वादसिद्धिरिति वाच्यम् । वेदत्वस्यातादृशत्वेऽपि इदानीन्तनवेदत्वानां तदवच्छेदकतया नासिद्धिः BhāṭṭCin. i. 140. 2 (*on* i. 1. 27–32); कुलतन्त्राप्रामाण्यवचनं गौरीकान्तलक्ष्मणादेरतादृशत्वं ध्वनयति SetuBa. 25. 8.

अतादृशबहुव्रीहि (atādṛśa–bahuvrīhi) *m.* a Bahuvrīhi compound that is *not such* (a Bahuvrīhi in which the meaning of the constituent members is not taken into consideration) लोहितेत्यादौ च बहुव्रीहेर्मतुप्समानार्थत्वात् सर्वादीत्यादौ च तद्गुणसंविज्ञानस्यातादृशबहुव्रीह्यपेक्षया मुख्यत्वान्नोपलक्षणत्वम् GuruCandr. ii. 17. 21.

अतादृशभ्रातृ (atādṛśa–bhrātṛ) *m.* brother who is not of that type (i. e. one who has shared ancestral property with one's brothers) यत्तु ··· अपुत्रस्य ··· इत्यादि, तत्पितृधनानुपघातेनार्जितविभक्तधनेषु भ्रातृषु द्रष्टव्यम् । अतादृशभ्रातृभावे च पितरौ ज्येष्ठा वा पत्नी Aparā. 744. 17 (*on* 2. 136)

अतादृशमातृकुल (atādṛśa–mātṛkula) *n.* maternal family which is not of that type (i. e. well-known) कन्याग्रहणे नियमं सूचयन् कुलपरीक्षामाह । ··· एकत्र योजनेऽतादृशमातृकुलस्यापि संग्रहापत्तिः BālamBha. i. 197. 26 (*on* 1. 54)

अतादृशरणोद्यमा (atādṛśa–raṇodyamā) *adj.* (*f.*) with unusual preparation for battle (ललिताम्) ताम्···अतादृशरणोद्यमाम् । ··· विषंगः सुदुराशयः । पृष्ठवंशे रथेन्द्रस्य घट्टयामास सैनिकैः BrahmāṇḍP. iii. 25. 57.

अतादृशाज्ञान (atādṛśājñāna) *n.* nescience which is not of that nature (i. e. which causes knowledge or expression of the form 'it does not exist') अभानापादकस्य परोक्षेण निवृत्त्यननुभवात् अतादृशाज्ञानं प्रत्येव तथा स्वीकारात् GuruCandr. i. 102. 20.

1 Ai has crossed, traversed or gone beyond (animate, inanimate or abstract subject) बालभावमतिक्रान्तान् यौवनस्थांश्च तानहम् । …श्रुत्वा हृष्ट आसम् MahāBhā. ix. 2. 7; अतिक्रान्तोऽसि कौन्तेय कालशैलं च पर्वतम् MahāBhā. iii. 675*(2); ध्वजमूलमतिक्रान्तानां चाकृतशुल्कानां शुल्कादष्टगुणो दण्ड: ArthS'ā. i. 272. 4 (2. 21); दैत्यानामेषा लक्ष्मी: शिरोगता । सप्त स्थानान्यतिक्रान्ता MārkP. 18. 47; सुदूरमतिक्रान्त: स पापकृत् Kād. 35. 2; EI. iv. 210. 2; xxi. 75. 5; अहो वेगादतिक्रान्तं विमानं पदवीं पराम् PadmP.(Ra.) 82. 9; अतिजवेन दूरमतिक्रान्त: स चपल: कथं दृश्यते UttaRāC. 4. 26(9); यथा व्याकरणं तीर्णं इति प्राप्त: उच्यते, न अतिक्रान्त:, तद्वत् BrahmSūBh.(S'aṅ.) 608. 8 (*on* iii. 2. 32); YaśasCam. i. 139. 2; NavaSāC. 2. 43; स परमाणुस्तमाकाशप्रदेशं यदा व्यतिपतितोऽतिक्रान्तो भवति TātpaVṛ. 196. 19 (*on* 2. 47); कालिन्दीमप्यतिक्रान्ता: (वत्सा:) PrasaRā. 5. 32(3); MalliC. 1. 130; 1. 352; तुर्यावस्थामतिक्रान्ते पुरुषे … इयमपि सर्वावस्थाविवर्जिता LalitāSaBh. 79. 10 (*on* 114); **1 Aii** gone away or departed or left (animate subject) (अथोपरमम्) अमुञ्जाने ब्राह्मणे गोषु च । अतिक्रान्तेष्वधीयीरन् S'āṅkhāGS. iv. 7. 51; KauṣīGS. iii. 9. 46; न हि तस्मान्मन: कश्चिच्चक्षुषी वा नरोत्तमात् । नर: शक्नोत्यपाकष्टुमतिक्रान्तेऽपि राघवे Rāmā. ii. 15. 10; प्रमत्तं प्रच्छन्नं नायकमतिक्रान्तं च वीक्षते KāmSū. 214. 9 (3. 3); मामनवेक्ष्यैवातिक्रान्ता Ubhayābhi. 5. 5; 14. 5; एवमुक्त्वा तावतिक्रान्तौ Tantrākhyā. 105. 5; PañcT. 3. 57(16) (315. 7); Tantrākhyā. 89. 13; यस्त्वतिक्रान्तं व्याहृत्य पूजयति नासौ सम्यक्पूजक: TantrVā. 639. 24 (*on* ii. 4. 8); VāmaP. 53. 28; कथमतिक्रान्तं किरातै: KirātaVyā. 44(1); प्रच्छन्नं वा भ्रमन्तं वातिक्रान्तं पश्यति प्रियम् SāhiDa. 139. 3; **1 Aiii** which has vanished or disappeared (abstract subject) न च केवलं हिताहारोपयोगादेव सर्वं व्याधिभयमतिक्रान्तं भवति CaraS. i. 28. 7 (1941 Ed.); **1 Aiv** which has overtaken, gone past (inanimate subject) अपरौ चाप्यतिक्रान्तौ कर्णौ संस्पृश्य मे शरौ MahāBhā. iv. 48. 6; यत्र त्वाम् … अतिक्रान्तास्त्रयो रथा: MahāBhā. vii. 105. 8; **1 Av** rushing forward, marching out, penetrating पतगश्रेष्ठ: … । अतिक्रान्तोऽमृतस्यार्थे सर्वतोऽग्निमपश्यत MahāBhā. i. 28. 22; पक्षकक्षोरस्यै: समं वर्तमानो दण्ड: । …स एव पक्षाभ्यां प्रतिक्रान्तो दृढक:, स एवातिक्रान्त: पक्षाभ्यामसह्य: ArthS'ā. iii. 138. 2 (10. 6); असह्य: … अतिक्रान्तश्च पक्षाभ्याम् NītiSā. 20. 45; 20. 46; **1 Avi** gone or passed beyond the range (of sight, hearing etc.) सोऽतिक्रान्त: श्रवणविषयम् MeghDū. 100; कथं लोचनपथमतिक्रान्त: सरामलक्ष्मणो भगवान् AnargharRā. 1. 59(1); आलोकपथमतिक्रान्ते … रघुनन्दने RāmāCam. 2. 46(2); कथं नयनपथमतिक्रान्तैव कान्ता PrasaRā. 2. 29(3);

4.48(2); कथमतिक्रान्त एव बाणगोचरमिभराज: JānaPa. 3.19(6); 2.30(5); **1 A vii** past, former, lost, what has happened or transpired (as in time, event, incident etc.) अथ कश्चिच्छस्त्रे वानुवचने वा प्रमत्त उपहन्यात् …उपहतमबुद्धमतिक्रान्तं मन्यमान: …उपहतमनुपहतं कृत्वानन्तर्यात् प्रयोग: स्याद् वृत्तान्तादिति मीमांसन्ते KauṣīBr. 26.3 (121.4); अतिक्रान्तं हि यत्कार्यं पश्चाच्चिन्तयतीति च। तच्चास्य न भवेत् कार्यं च्चिन्तया च विनश्यति MahāBhā. viii. 22.24; SūktiRa. 163.109; MahāBhā. x. 1.29; xii. 137.27; अतिक्रान्तमतिक्रान्तमनवाप्य मनोरथम्। …पिता मे विनशिष्यति Rāmā. ii. 45.17; HariVaṁ. 38.14; नष्टं मृतमतिक्रान्तं नानुशोचन्ति पण्डिता: BhelaS. 107.19 (5.8); सुखदु:खमतिक्रान्तम्…। च्चिरविस्मृतं स्मरति य: स्मृतिमानिति वेदितव्योऽसौ NāṭyaS'ā. 7.82; नास्त्येव नूनमायातमतिक्रान्तस्य वस्तुन: BrahmāṇḍP. ii. 30.32; कारणं यदतिक्रान्तं मृतमिष्टं च बान्धवम्। … न शोचन्ति विचक्षणा: PadmP.(Ra.) 30.72; GītāBh.(S'aṅ.) 113.14 (*on* 4.5); अन्यत्र भूताच्च अतिक्रान्तात् कालात् भव्याच्च भविष्यतश्च KāṭhUBh. 130.16 (*on* 2.14); कार्यम् … नातिक्रान्तं प्राप्यते यौवनं वा RāghPāṇ.(Dha.) 11.3; प्रवरो न त्वतिक्रान्तो याज्याकालेऽपनीयते TantrVā. 1060.1 (*on* iii. 5.46); अतिक्रान्तस्यार्थस्य स्मर्त्री स्मृति: KāvyMī. 10.21; अहमतिक्रान्ते भवे…अभवं नूनं खेचरी रूपशालिनी BṛKathāK. 127.191; PadmP. v. 38.258; यत्किंचिदनुत्पन्नमतिक्रान्तं तत् सर्वं योगी जानाति RājMār. 48.16; Loc. 154.19 (*on* 3.16); S'rīBh. 285.17 (*on* i. 3.7); ĀryāSaS'a. 124; कोऽन्य: कालमतिक्रान्तं नेतुं प्रत्यक्षतां क्षम:। कविप्रजापतींस्त्यक्त्वा रम्यनिर्माणशालिन: RājTa.(Ka.) 1.4; 4.406; अतिक्रान्तमतिक्रान्तमनागतमनागतम्। वर्तमानसुखभ्रान्तिर्न वा भोगिदरिद्रयो: SūktiRa. 200.21; Subhāṣi. 3274; S'atDū. 113.18; अतिक्रान्तस्यैष्यतो वा पर्वणस्तदानीमदूष्यत्वात् NyāyPari. 213.12; उत्थाय … तस्मिन्नेव शयने समासीन: … अतिक्रान्तमनन्तं कालं निरर्थकमवलोक्य निर्वेदं परं गच्छेत् PāñcRāRa. 89.13; Kāśi. ii. 185.22 (*on* 5(3).235); YuktiSneha. 65.29 (*on* i. 1.5); Bhāsk. i. 286.5 (*on* i. 5.19); **1 A viii** belonging to the past, departed, dead मत्समो हि गदायुद्धे पृथिव्यां नास्ति कश्चन। नासीत् कश्चिदतिक्रान्तो भविता न च कश्चन MahāBhā. v. 54.31; धरमाणानामपि प्रतिमा: स्थाप्यन्ते। देवकुलिक:- न खलु, अतिक्रान्तानामेव Prati. 3.7(24); Tantrākhyā. 125.7 = PañcT. 4.1(41) (375.8); AvantiKa. 185.3; पूर्वे अतिक्रान्ता: पारिक्षिता अश्वमेधयाजिनोऽभवन् BṛĀraUBh. 399.9 (*on* iii. 3.2); KāṭhUBh. 105.12 (*on* 1.6); ChāndoUBh. 360.18 (*on* vi. 4.5); गीतसूक्तिरतिक्रान्ते स्तोता देशान्तरस्थिते। प्रत्यक्षे तु कवौ लोक: सावज्ञ: सुमहत्यपि KāvyMī. 51.13; PāṇḍaC. 1.20; यदा पौत्रोऽप्यतिक्रान्तो मृतस्तदा 'पुत्रपौत्रै ऋणं देयम्' Subodhi. 39.28 (*on* 2.90); **1 A ix** which has come to an end, ceased, stopped आर्तवं या न पश्यन्ति पश्यन्ति विफलं च या:। अतिप्रभूतमत्यल्पमतिक्रान्तमनागतम् KāśyaS. 186A.23; नास्ति वैरमतिक्रान्तं सान्त्वितोऽस्मीति नाश्वसेत्। विश्वासाद्धन्यते लोक: SūktiRa. 108.2; **1 A x** which has elapsed or passed off (time) (संध्यायाम्) अतिक्रान्तायां महाव्याहृती: सावित्रीं स्वस्त्ययनानि च जपित्वा … उदिते प्राध्ययनम् S'āṅkhāGS. ii. 9.2 = KauṣīGS. ii. 6.3; अतिक्रान्ते सावित्र्या: काल ऋतुं त्रैविद्यकं ब्रह्मचर्यं चरेत् ĀpaDS. i(1). 1.23; बह्वस्तिष्यपुनर्वसवोऽतिक्रान्ता: MahāBh. i. 231.17 (*on* i. 2.63); अतिक्रान्ते दशाहे तु त्रिरात्रमशुचिर्भवेत् ManuSm. 5.76; अलमलं संभ्रमेण। अतिक्रान्त: खल्वेष काल: Prati. 7.3(23); S'atTrayī. 201; न मम…अतिक्रान्ता स्वामिन्नाहारवेला Tantrākhyā. 21.13; नरैर्मोक्षो ह्यतिक्रान्तैरवाप्यते। वर्षायुतायुतै: MārkP. 12.9; BrahmāṇḍP. ii. 8.34; निर्वृत्ते प्रयोगेऽतिक्रान्ते वाजपेयकाले याग: प्रयुज्यते S'ābaBh. 1268.24 (*on* iv. 3.41); अतिक्रान्तो मध्याह्न: KuṇḍaMā. 3.15(7); येयं पौर्णमास्यतिक्रान्ता एतस्यां देवानपूपुजाम: JaineVyā. 131.20 (*on* ii. 3.111); CāndraVṛ. *on* i. 3.106; Prasā. ii. 452.6; SiddhāKau. 473A.4; अतिक्रान्तेषु च बहुषु वासरेषु कदाचित् (हर्ष:) … इमामार्यां शुश्राव HarṣaC. 254.4; 162.7; BrāhmSphuSi. 16.32; PadmP.(Ra.) 3.77; सखे वरं त एवातिक्रान्ता मुहूर्ता: MālaMā. 9.226; मध्यन्दिनमतिक्रान्तमिति दिनमप्यतिक्रान्तमेव AnarghaRā. 2.31 (1); अहोरात्रे त्वतिक्रान्ते … आसीन्मे महोत्सव: BṛKathāS'loSaṁ. 27.60; स्वाध्यायवेलेयमतिक्रान्ता प्रमादत: BṛKathāK. 17.11; NalaCam. 4.13 (1); 5.9 (3); अतिक्रान्ते च षष्ठीजागरे समागते च दशमेऽह्नि … हरिवाहन इति शिशोर्नाम चक्रे TilaMañ. 78.1; 34.23; 79.19; कालमतिक्रान्तं सुखासक्तो न वेत्ति य:। अक्षया: संक्षयमुखे हुतास्तेन विभूतय: RāmaMañ. 130.15; बहुभिर्वर्षसहस्रैरतिक्रान्तै: … दण्डकारण्यं राम:…पुन: प्रविष्ट: AuciViCa. 27 (8); PadmP. ii. 53.36; GaṇeP. i. 17.18; संवेशयेद्गजं रात्रावतिक्रान्तेऽष्टनालिके Hastyāyur. 653.16 (4.15); MudriKu. 4.19 (3); HārLa. 13.5; प्रधानकालश्चातिक्रान्त: SmṛtiCaṇ. iii. 104.10; EI. viii. 115.73; S'āliC. 2.62; षण्मास्यामतिक्रान्तायां रजस्वती तेन क्षारेति दूषिता PrabaK. 85.27; PuruṣPa. 192.7; Subodhi. 15.16 (*on* 2.24); LaṭaMe. 2.30 (5); VetāPañ.(S'i.) 9.35; BhojPra. 19.27; HaṁsDū.(Rū.) 94; नन्वतिक्रान्त एव तत्समानयनस्यावसर: AdbhuDa. 5.14 (2); MadaKeC. 22 (6); गौणकालेऽप्यतिक्रान्ते प्रायश्चित्तमुक्तं धर्मसूत्रे BālamBha. i. 165.29 (*on* 1.38); iii. 162.31 (*on* 3.265); **1 A xi** advanced (in age) अनपत्य: …। अतिक्रान्तेन वयसा सन्तापमुपजग्मिवाम् (अश्वपति:) MahāBhā. iii. 277.7; **1 A xii** (with Abl.) placed beyond, lying outside, lying beyond प्रतिमण्डलस्य मध्यं घनभूमध्यादतिक्रान्तम् ĀryaBh. 3.18 (63); क्षरं पञ्चात्मकं विद्धि तदन्तरक्षरं स्मृतम्। उभाभ्यां यदतिक्रान्तं शुद्धं विद्धि सनातनम् GaṇeP. ii. 144.4; **1 B i** excelling, surpassing (with animate objects) अति तं क्रमति य एवैनं पूर्वोऽतिक्रान्तो भ्रातृव्य: KāṭhS. 7.9; 21.4; यदि मन्येत यजमान: पूर्वो मातिक्रान्तो भ्रातृव्य इति प्रतिप्रस्थानेन पूर्वो गृहीत्वा पूर्वो हुत्वा पूर्व: सादयेत् ĀpaS'S. xii. 21.18; xvi. 23.7; मागधोऽथाप्यतिक्रान्तो द्विरदेन प्रमाथिना। भगदत्तादनवर: MahāBhā. viii. 13.3; अतिक्रान्तमिदं ब्राह्मणकुलं कतरत् अतिकतरं ब्राह्मणकुलम् MahāBh. i. 87.18 (*on* Vār. 5 *on* i. 1.27); त्यागशक्त्यतिक्रान्त: … चतुर्वेदवित् मातृदत्त: AvantiKa. 14.4; कथमसि कार्कश्येन कर्णसुतमप्यतिक्रान्त: DaśKuC. 65.7; 68.20; अतिक्रान्त: सर्वमतिसर्व: PrakriKau. i. 140.4; i. 254.1; i. 523.1; चमूं सेनामतिक्रान्तोऽतिचमू: Prasā. i. 171.18; i. 551.9; अतिक्रान्तो भवकन्तमतिभवकान् SiddhāKau. 52A.7; धीवानमतिक्रान्ता अतिधीवरी LaS'abdeS'e. i. 382.1; i. 324.6; ii. 230.5; **1 B ii** overcoming, transcending सोऽयमग्नि: परेण मृत्युमतिक्रान्तो दीप्यते S'atBr. XIV. iv. 1.13; XIV. iv. 1.16; (त्वम्) पञ्च भूतान्यतिक्रान्त: MahāBhā. xiii. 2.86; रोगम् …। विद्याद् द्विदोषजं तद्वत् प्रत्याख्येयं त्रिदोषजम्। क्रियापथमतिक्रान्तं सर्वमार्गानुसारिणम् CaraS. i. 10.19 (1941 Ed.); बलवान् मृत्युरेतामपि रक्षामतिक्रान्त: Prati. 3.7 (8); अतिक्रान्तैस्तमो महत्। आत्मभि: … आस्थितम् … महच्चक्रं सुदर्शनम् AhirbuS. 9.31; तां शक्तिं समवायाख्याम् …। भेदाभेदमतिक्रान्ताम् … अनुगृह्णाति संबन्ध: VākyaP. iii. 3.10; मानसं सन्तापं जीवन्नेवातिक्रान्तो भवति MuṇḍaUBh. 360.1 (*on* iii. 2.9); ChāndoUBh. 101.15 (*on* ii. 10.1); GītāBh.(S'aṅ.) 423.2 (*on* 14.2); लौकिकीं कारणत्वादिभुवमतिक्रान्तै: AbhinBhā. i. 284.7 (*on* 6.31); i. 52.18 (*on* 2.19); ये हि मायामतिक्रान्ता: …। लभन्ते … निर्वाणं ते KūrmaP. 460.6 (2.2); वाक्पथमतिक्रान्ता: स्वदन्ते गुणा: EI. vi. 206.12; i. 357.32; अतीन्द्रियस्वभावपरमात्मनो विपरीतानि…इन्द्रियाण्यतिक्रान्तस्य…परोक्षं किमपि नास्ति TātpaVṛ. 32.14 (*on* 1.22); अतिवधो रम्यतर: प्रकार: क्रूरान्तरारिषु स्वसमानो मुनिमण्डलस्य। ऊकारान्तपक्षे अतिक्रान्ता वधूर्येन मुनिमण्डलेन तदतिवधु, तस्यातिवधो: KāvyKaVṛ. 82.19 (3.4); SiṁhāDvā. 207.3 (17); अतिश्वी सेवेति। शुनोऽपि सेवामतिक्रान्ता Prasā. i. 556.21; अतिवर्णं वर्णमतिक्रान्तम् अतिगौरातिकृष्णादि VīraMi. (Saṁskāra.) 589.4; भिन्नम् अत्यन्तभिन्नम् अतिक्रान्तोऽतिभिन्न: भेदाभेदवान् LaCandr. 678.33; त्रिष्वतीतनु यन्नावमतिक्रान्तं भवेदिह KośaKaTa. 1.2354; **1 B iii** extending beyond or exceeding (a particular period or limit) अतिक्रान्तं यतश्छन्दमतिच्छन्दमिदं तत: BṛĀraUBhVā. iv. 3.1297; संवत्सरे भवा सांवत्सरी तामतिक्रान्ता अतिसांवत्सरी ManuBh. ii. 145.10 (*on* 8.153); i. 214.1 (*on* 3.12); ii. 145.11 (*on* 8.153); अतिक्रान्तो मात्रां परिमाणमतिमात्र: Bhām. 192.7 (*on* i. 2.29); Kāvyālaṅ.(Ru.) 11.17; PrakaVi. 214.26; अतिक्रान्तो रात्रिमतिरात्र: MugdhaBo.(com.) 6.51 (59.18); न तु वर्षादतिक्रान्तम् (प्रवेशकेन वक्तव्यम्) NāṭaLaRaK. 300; **1 C i** who has bypassed, neglected, transgressed or violated (with Acc.) एष राजा भृगूद्वह। अतिक्रान्तश्च मर्यादाम् MahāBhā. i. 78.29 = MatsyaP. 32.30; दूतसमुदाचारमतिक्रान्त: केशवो बध्यताम् DūtVā. 38 (3); नापत्यस्नेहात् कर्तव्यमतिक्रान्तोऽसि TāpaVa. 1.10 (1); भार्या पतिमतिक्रान्ता चावसीदत्यसंशयम् BṛDharmaP. i. 49.58; i. 36.33; (प्रसिद्धिहतम्) मञ्जीरादिषु रणितप्रायम् … मेघादिषु गर्जितप्रमुखम् इति प्रसिद्धिमतिक्रान्तम् KāvyPra. 365.1; अतिक्रान्तस्य ते धर्मं कामवृत्तस्य वानर। … दण्डोऽयं प्रतिपादित: MahāN. 4.76; पतिमतिक्रान्ता अतिपत्नी LaS'abdeS'e. i. 393.17; धर्मसेतुमतिक्रान्ताल्लोकधर्मार्थकारणात्। असिना धर्मगर्भेण शिक्षयस्व प्रजापते NītiPra. 3.32; **1 C ii** who has deviated from (with Abl.) त्वं च धर्मादतिक्रान्त: Rāmā. iv. 18.23; त्वां तु सत्यादतिक्रान्तं हनिष्यामि सबान्धवम् Rāmā. iv. 29.49; **1 D** which has covered (an animal) अर्चायां किम्? गामतिक्रान्तोऽतिगव: MugdhaBo. 6.88 (64.11); **1 E** redundant (because of loss of association) किं प्रस्थितदेवतातिक्रान्तोऽपीन्द्र उपलक्षयितव्य: उत्तराश्च मित्रावरुणाद्या: … उत इन्द्रमित्रावरुणादय एव केवला: TantrVā. 803.1 (*on* iii. 2.30); **1 F** (a foot) which is in the *atikrānta* pose तत: पञ्चपदीं गच्छेदतिक्रान्तै: पदैरथ NāṭyaS'ā. 5.95; अतिक्रान्तं च वामकम् NāṭyaS'ā. 11.17; वामोऽतिक्रान्त एव च NāṭyaS'ā. 11.21; शकटास्यस्थितै: पादैरतिक्रान्तैस्तथैव च। कार्या पाशुपतानां गतिरुद्धतगामिनी NāṭyaS'ā. 12.86; प्रासादारोहणं कार्यमतिक्रान्तै: पदैरथ NāṭyaS'ā. 12.97; 11.10; 12.78; **2 A** crossed, passed over, reached, traversed कथमतिक्रान्तमागस्त्याश्रमपदम् MahāvīC. 7.13 (3); कियतां पुनरह्नां परिवर्तेन रघुराष्ट्रमतिक्रान्तं वत्सै: PrasaRā. 5.31 (1); 5.32 (1); पटीपातादतिक्रान्तं क्रोशानां हि शतं हयै: MalliC. 6.505; कथमतिक्रान्त एव प्रियमित्रेण प्रमदवन-

पर्यन्तः Mukundā. 65 (2); **2B** excelled, surpassed नातिक्रान्तमिदं लोके पुरुषैणेह केनचित्। तव सभ्रातृभार्यस्य वासः प्राकृतवद् वने Rāmā. ii. 46. 9; अयोध्यायां कुलपतिः ··· । अतिक्रान्तो बहुसुतैः PadmP.(Ra.) 123. 87; अतिक्रान्ता सभा यस्य (चन्द्राङ्गदस्य) सुधर्ममतिमानुषीम् GaneP. i. 53. 4; अतिक्रान्तेष्वसंख्येषु ततो राजस्वजायत। प्रशान्तः शान्तनुर्नाम तेजोधाम प्रजापतिः PāndaC. 1. 20; **2C** transgressed, violated पिता पुत्रस्य भोक्ता च पितुः पुत्रस्तथैव च। अतिक्रान्तानि भोज्यानि भविष्यन्ति युगक्षये MahāBhā. iii. 188. 25; xiii. 52. 12; नातिक्रान्तं मुनिश्रेष्ठ यत् कर्तव्यं कृतं मया Rāmā. i. 50. 11; यदि किंचिदतिक्रान्तम्···। प्रेष्यस्य क्षमितव्यं मे Rāmā. iv. 35. 11; धर्षितेनापि नातिक्रान्तः समुदाचारः PañcRā. 2. 11 (2); भाष्यकृतश्च उपन्यासः प्रमाणवानपि विना कारणेनातिक्रान्तः TantrVā. 424. 16 (*on* ii. 1. 46); 926. 17 (*on* iii. 4. 12); 'सर्वत एवात्मानं गोपायेद्' इति नैष विधिरतिक्रान्तो भवति ManuBh. i. 134. 27 (*on* 2. 113); i. 223. 20 (*on* 3. 34); ii. 203. 7 (*on* 8. 309); अतिक्रान्ताऽन्यर्हणीयसभाजनानि किल श्रेयसां परिपन्थीनि भवन्ति CandaKau. 2. 14 (4); 5. 18 (14); ब्रह्मचर्यमतिक्रान्तम् DaśāvaC. 10. 24; Aparā. 1115. 18 (*on* 3. 268); **2D** disregarded, neglected (by not being invited) (ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते) वेदविवर्जिते वेदाध्ययनरहिते विप्रेऽतिक्रान्ते अनुपात्ते सति तस्य तदतिक्रमकृतप्रकृतप्रयोजनहानिप्रत्यवायादिरूपो न कश्चिद् दोषो जायते CaturCin. iii (1). 453. 22; **2E** evaded, delayed, omitted, postponed, not performed in proper time वैश्वदेवे त्वतिक्रान्ते अहोरात्रमभोजनम् GobhiSm. 3. 120; सर्वमात्ययिकं कार्यं शृणुयान्नातिपातयेत्। कृच्छ्रसाध्यमतिक्रान्तमसाध्यं वा विजायते ArthŚā. i. 96. 7 (1. 19); SūktiRa. 156. 18; यद्यप्यतिक्रान्ताः काला अतिक्रान्तानां परिसंख्याय प्रधानमात्राणि कर्तव्यानि Śāba-Bh. 1472. 26 (*on* vi. 5. 40); प्रधानेन सहातिक्रान्तानां संकल्पोऽथवा जातकर्मादिकर्मेण(? णा)मनुक्रमेण संकल्प इति विचारणीयम् BālamBha. i. 43. 15 (*on* 1. 12); **2F i** previous, earlier, mentioned before, gone before, preceding (text, meaning etc.) एतावद्धि अतिक्रान्तेन विधिप्रतिषेधार्थेन मन्त्रब्राह्मणेनावगन्तव्यम् KāṭhUBh. 113. 17 (*on* 1. 20); BrahmSūBh.(Śaṅ.) 561. 1 (*on* iii. 2. 1); तत्र षट्संख्यया वक्ष्यमाणानि पञ्चतन्मात्राणि अतिक्रान्तश्चाहंकारः प्रतिनिर्दिश्यते ManuBh. i. 15. 21 (*on* 1. 16); अतिक्रान्तस्य सर्वस्य ग्रन्थार्थस्य पिण्डार्थकथनमविस्मरणार्थम् ManuBh. i. 82. 3 (*on* 2. 25); संक्षेपेणातिक्रान्तस्वाध्यायद्वयस्यार्थं कथयत्यनुसरणाय ManuBh. i. 327. 3 (*on* 4. 1); i. 132. 13 (*on* 2. 108); ii. 61. 16 (*on* 7. 205); JayaMa. 178. 15 (*on* 2. 10); **2F ii** completed, finished, over अतिक्रान्तस्तृतीयविषयः ŚābaBh. 1298. 16 (*on* iv. 1. 21) = NyāyRa-Mā. 146. 8; अतिक्रान्तं प्रासङ्गिकम्। अभिवादनविधिरिदानीं प्रक्रम्यते ManuBh. i. 135. 26 (*on* 2. 117); सप्ताष्टश्लोका अध्येतृवेदित्रोः प्रशंसार्था अतिक्रान्ताः ManuBh. i. 155. 19 (*on* 2. 158); i. 123. 6 (*on* 2. 87); i. 234. 20 (*on* 3. 57); i. 271. 3 (*on* 3. 137); i. 293. 21 (*on* 3. 191); इत्थमतिक्रान्तेनाध्यायद्वयेनोपेये···ब्रह्मणि श्रीवासुदेवे निर्णीते···साधनान्यभिधीयन्ते VedāntKau. 254. 15 (*on* iii. 1. 1); विवाहप्रकरणमतिक्रान्तम् ManvaMu. 100. 1 (*on* 3. 67); (physical act, rite, etc.) स्नपनेऽस्मिन्नतिक्रान्ते मूलमन्त्रायुतं जपेत् PāraS. 19. 133; अतः (हिंसायाः) प्रयत्नेऽतिक्रान्ते मूलमन्त्रायुतं जपेत् PāraS. 19. 133; अतः (हिंसायाः) प्रयत्नेऽतिक्रान्ते भवत्ययं संकल्पप्रतिषेध इति ManuBh. i. 384. 22 (*on* 4. 162); अतिक्रान्ते कर्मणि तत एव फलसिद्धेः Kāśi. i. 162. 6 (*on* 2. 197) = YuktiSneha. 25. 29 (*on* i. 1. 2); अतिक्रान्ते विवाहे तु सुराः सर्वे दिवं ययुः BrahmP. 87. 32; नातिक्रान्तमथापि विचार्यतामेतत् AdbhuDa. 2. 8 (5); **2G** got over, overcome अतिक्रान्तानि विघ्नानि मयूरेशेन GaneP. ii. 101. 6.

अतिक्रान्त (ati-krānta) *n.* **1** the past (time, event, incident etc.) अतिक्रान्तमतिक्रान्तं न निवर्तति कर्हिचित् MahāBhā. i. 2064*(2); भारतस्यास्य वर्षस्य···अनागतमतिक्रान्तं वर्तमानं च संजय। आचक्ष्व मे विस्तरेण MahāBhā. vi. 11. 2; मन्त्रिणो यस्य कुलजाः··· अतिक्रान्तमशोचन्तः स राज्यफलमश्नुते MahāBhā. xii. 116. 16; ii. 138*(1); viii. App. 1. 5(12); अनागते न पतसि अतिक्रान्ते च काक न। यदि संप्रति पतसि सर्वो लोकः पतत्ययम् MahāBh. ii. 124. 3 (*on* (Vār. 5 *on*) iii. 2. 123); अनागतमतिक्रान्तं वर्तमानमिति त्रयम् (कालविभागः) MahāBh. ii. 124. 6 (*on* (Vār. 5 *on*) iii. 2. 123]; अनागतं प्रार्थयतामतिक्रान्तं च शोचताम्। वर्तमानैरतुष्टानां निर्वाणं नोपपद्यते BhagAjju. 40(11); देव, अतिक्रान्ते धैर्यमवलम्ब्यताम् UttaRāC. 3. 33(2); PadmP. i. 7. 2; **2** transgression, wrong deed यदि सर्वमवुद्धीनामतिक्रान्तममेधसाम्। अतिक्रमो मद्विधस्य (=युधिष्ठिरस्य) कथंस्वित् स्यादनिन्दिते MahāBhā. iii. 30. 24; क्रोधान्मोहाच्च साहसात्। तातस्य यदतिक्रान्तं प्रत्याहरतु तद् भवान् Rāmā. ii. 98. 52; पितुर्हि समतिक्रान्तं (v. l. यदतिक्रान्तम्) पुत्रो यः साधु मन्यते। तदपत्यं मतं लोके विपरीतमतोऽन्यथा Rāmā. ii. 98. 53; SūktiRa. 74. 15; **3** name of one of the six varieties of Karṣaṇa (prolonging of sound) अनागतमतिक्रान्तं विच्छिन्नं विषमाहतम्। तन्वन्तमस्थितान्तं च वर्जयेत् कर्षणं बुधः NāraŚi. i. 6. 19; **4 i** name of a kind of step or pose of the feet in dancing (one of the 108 Karaṇas) अतिक्रान्तक्रमं कृत्वा पुरस्तात् संप्रसारयेत्। प्रयोगवशगौ हस्तावतिक्रान्ते प्रकीर्तितौ NāṭyaŚā. 4. 127; अधिकृतं नाम धूमाकुलनेत्राङ्गसङ्कोचनविधूननातिक्रान्तापक्रान्तादिभिः (समुत्पद्यते) NāṭyaŚā. 7. 95; 4. 46; ViṣṇuDhaP. iii. 20. 49; SaṃgiRa. iv. 192. 18 (7. 558); यत्र चारीमतिक्रान्तां प्रयोगानुगतौ करौ। कुर्वीत तदतिक्रान्तमुद्धतस्य परिक्रमे। हस्तौ गरुडपक्षाख्यौ भट्टतण्डुरिहाब्रवीत् NṛttaRa. 4. 114; अतिक्रान्तं विधायाङ्घ्रिं पुरो यत्र प्रसारयेत्। करौ प्रयोगयोग्यौ च तदतिक्रान्तमुच्यते Nṛtyā. 1270; **4 ii** name of an 'aerial' *maṇḍala* (in dance) आद्यं पादं च जनितं कृत्वोद्वाहितमाचरेत्। ···अतिक्रान्तं पुनर्वामं दण्डपादं च दक्षिणम्। विज्ञेयमेतद् व्यायामे त्वतिक्रान्तं तु मण्डलम् NāṭyaŚā. 11. 11; ViṣṇuDhaP. iii. 20. 24; SaṃgiRa. iv. 348. 4 (7. 1144); iv. 354. 1 (7. 1177); अतिक्रान्तं तमेवाङ्घ्रिं (= वामम्) दण्डपादं तु दक्षिणम्। यस्मिन्निदमतिक्रान्तं व्यायामे परिकीर्तितम् NṛttaRa. 3. 169; Nṛtyā. 1521; अतिक्रान्तायुतो वामो (अङ्घ्रिः) दण्डपादायुतः परः। अतिक्रान्तं तदा ज्ञेयं मण्डलं शंकरप्रियम् NṛtyaK. ii. 4. 35.

अतिक्रान्तकन्यातुला (atikrānta-kanyātulā) *adj.* (*f.*) **1** who has surpassed (in lustre or beauty) a comparison with (other virgins) वृश्चिकराशिरविस्थितिमिवातिक्रान्तकन्यातुलाम् ··· कन्यकाम् ··· अपश्यत् VāsaDa. 62. 4; **2** which has traversed Virgo and Libra, VāsaDa. 62. 4.

अतिक्रान्तकम्पा (atikrānta-kampā) *adj.* (*f.*) who has got over (her) tremor सा च तापसी निलीनकौणपभयादतिक्रान्तकम्पा ··· रोदितुमारब्धवती UdaySuKa. 89. 25.

अतिक्रान्तकलहालाप (atikrāntakalahālāpa) *m.* conversation about bygone frays अतिक्रान्तसुभटकलहालापेषु (v. l. अतिक्रान्तकलहालापेषु) स्नेहवृष्टिमिव तुष्टिमिष्टे कृपाणे पातयन्तम् ··· हर्षमद्राक्षीत् HarṣaC. 113. 2.

अतिक्रान्तकान्तद्युति (atikrānta-kāntadyuti) *f.* charming lustre which is gone away (faded) ततोऽपश्यदतिक्रान्तकान्तद्युतिसमुद्भवम्। वदनं धरणीन्द्रस्य प्रभातशशिपाण्डुरम् PadmP.(Ra.) 115. 35.

अतिक्रान्तकाल (atikrānta-kāla) *adj.* [*f.* –ā] **i** whose (proper) time has passed or elapsed यद्यतिक्रान्तकालस्यापि क्रिया श्राद्धप्रयुक्तत्वात्सर्वैरविशेषात्कर्तव्यम् BālaKrī. i. 151. 10 (*on* 1. 225); नापि यजमानेऽतिक्रान्तकालस्य करणात्सगुणं वरणम् TantrVā. 1060. 5 (*on* iii. 5. 46); सावित्री नातिवर्तते नातिक्रान्तकाला भवति ManvaVi. 131. 9 (*on* 2. 38); ManuBh. i. 95. 10 (*on* 2. 38); इत्थं पत्रारूढमृणमतिक्रान्तकालमपि पितृणां संबन्धि दाप्यते Mitā. 193. 10 (*on* 2. 90); हेत्वाभासादिकम्···अतिक्रान्तकालमप्युद्भाव्यम् NyāyPari. 213. 3; अतिक्रान्तकालमित्युक्तेः प्रपौत्रादीनामपि पत्रारूढे ऋणे देयमित्याशङ्का भवति Subodhi. 39. 29 (*on* 2. 90); उपनयनं नातिक्रान्तकालं भवति ManvaMu. 41. 9 (*on* 2. 38); अतिक्रान्तकालाद्वियमाननिमित्तस्य बलवत्त्वात् NirṇaSi. 382. 13; **ii** who has passed his (alloted) time (i. e. dead) पितातिक्रान्तकालो मे नाथो दीक्षासमुत्सुकः PadmP. (Ra.) 31. 177; *m.* past time भूतपूर्वशब्दोऽतिक्रान्तकालवचनः KāśiVṛ. *on* P. v. 3. 53; तस्मादन्यतरोक्तावतिक्रान्तकालो न प्रतीयते Nyās. ii. 121. 11 (*on* v. 3. 53); ii. 121. 8 (*on* v. 3. 53); तस्मादतिक्रान्तकालविशेषितपूर्ववर्तिस्तम्भादिपदार्थविषयमिन्द्रियादिसन्निकर्षोत्पन्नमेवेदं प्रत्यभिज्ञाज्ञानम् NyāyMañ. ii. 33. 11; इयमुद्धारयोगस्मृतिरतिक्रान्तकालविषया ManuBh. ii. 273. 23 (*on* 9. 112)

अतिक्रान्तकालिक (atikrānta-kālika) *adj.* belonging to a past age or time पूर्वयजमानोऽतिक्रान्तकालिकः BṛĀraUBh. 50. 11 (*on* i. 3. 8)

अतिक्रान्तकालीन (atikrānta-kālīna) *adj.* belonging to a past age or time ह स वै किल ··· पूर्वे अतिक्रान्तकालीना विद्वांसः आत्मज्ञाः BṛĀraUBh. 648. 4 (*on* iv. 4. 22); पूर्वेऽतिक्रान्तकालीना विद्वांसो ज्ञाततत्त्वकाः BṛĀraUBhVā. iv. 4. 1097.

अतिक्रान्तक्रम (atikrānta-krama) *adj.* put in reverse order अन्यैरपि सामान्यशब्दैः श्लेषः साध्यते – अतिक्रान्तक्रमभारतीस्थितिः पक्षे तीरभास्थितिः Kāvya-KaVṛ. 51. 4 (3. 1); 51. 7 (3. 1)

अतिक्रान्तक्रम (atikrānta-krama) *m.* (name of) a particular kind of movement of the feet (*cārī*) अतिक्रान्तक्रमं कृत्वा पुरस्तात्संप्रसारयेत् NāṭyaŚā. 4. 127; 4. 144; 9. 279; 10. 43; 10. 45.

अतिक्रान्तगुणा (atikrānta-guṇā) *adj.* (*f.*) incalculable, unlimited (संख्यामतिगुणाम्) अतिक्रान्तगुणामपि(? प)रिमितामिति यावत् CaturCin. ii(2). 923. 10.

अतिक्रान्तगुरु (atikrānta-guru) *adj.* who has disobeyed his elders नातिक्रान्तगुरूणां हि क्रिया कोप(? कापि) फलेग्रहिः PāṇḍaC. 5. 45.

अतिक्रान्तग्राहिन् (atikrāntagrāh-in) *adj.* cognitive of the past नन्वतिक्रान्तग्राहि च प्रत्यभिज्ञाविज्ञानम् NyāyMañ. ii. 32. 25.

अतिक्रान्तघटना (atikrānta-ghaṭanā) *f.* composition based on past event (name of a particular kind of rhetorical composition called *śayyā*) अतिक्रान्तघटना यथा – तस्य चक्रुश्चमत्कारं व्यतीतसमया अपि। सितार्द्रमुकुलोद्भेदाः

कदम्बवनराजयः । इयमतिक्रान्तस्यापि कदम्बवनराजीनामार्द्रमुकुलोद्भेदस्य विरहिमनश्चमत्कारकारिणो रामस्य स्मृतिद्वारेण घटनादतिक्रान्तघटना SaraKaṇṭhā. 184. 15.

अतिक्रान्तचत्वारिंशद्वर्ष (atikrānta-catvārimśadvarṣa) *adj.* who has passed forty years (of age) न ग्राहयेत् । द्विरदपतिमतिक्रान्तचत्वारिंशद्वर्षम् Hastyāyur. 201. 13 (2. 13)

अतिक्रान्तचारी (atikrānta-cārī) *f.* a variety of aerial (*ākāśikī*) Cārī (graceful movement of a single foot in dance) अथ भ्रमरी – अतिक्रान्तचार्युक्तं कुञ्चितं पादमुत्क्षिप्य AbhinBhā. ii. 106. 7 (*on* 10. 45); ii. 105. 10 (*on* 10. 43); cf. SāmgīRa. 7. 942–44.

अतिक्रान्तचिकित्स (atikrānta-cikitsa) *adj.* which is beyond treatment सखे अतिक्रान्तचिकित्सः परोक्षो मदनातङ्कः KaumuMa. 5. 23 (5)

अतिक्रान्तचेतोवृत्ति (atikrānta-cetovṛtti) *adj.* which has surpassed the functioning (speed) of the mind (तुरगपुङ्गवः) अपर्याप्तामतिक्रान्तचेतोवृत्तेः स्वरंहसः । विस्तारयन्निव महीं चटुलैः खुरघट्टनैः MadhuVi. 4. 22.

अतिक्रान्तजन्मन् (atikrānta-janman) *n.* past birth स च प्रजापतिः अतिक्रान्तजन्मनि…अदहत् BṛĀraUBh. 80. 9 (*on* i. 4. 1)

अतिक्रान्तजन्मावस्थ (atikrāntajanmāvastha) *adj.* being in the state of the past birth एकत्वदर्शनानर्थक्यप्रसङ्गः । यथा प्रजापतेरतिक्रान्तजन्मावस्थस्यैकत्वदर्शनं विद्यमानमप्यविद्याबन्धकारणं नापनिन्ये BṛĀraUBh. 82. 19 (*on* i. 4. 2)

अतिक्रान्तजातकर्मन् (atikrānta-jātakarman) *n.* birth rite which is missed or delayed इति अतिक्रान्तजातकर्मादिकर्मणां प्रयोगः BālamBha. i. 43. 14 (*on* 1. 11–12)

अतिक्रान्तता (atikrānta-tā) *f.* dislocation अतिक्षिप्ते द्वयोः सन्ध्यस्थ्नोरतिक्रान्तता वेदना च SuśruS. ii. 15. 7 (comm. अतिक्रान्तता दूरगमनम्)

अतिक्रान्तत्व (atikrānta-tva) *n.* **i** the state of being past or over संस्कारक्रमस्यातिक्रान्तत्वात् TantrVā. 1030. 21 (*on* iii. 4. 49); न तु प्रदर्शितं प्राप्यते क्षणिकत्वेनातिक्रान्तत्वात् NyāyMañ. i. 22. 16; i. 64. 12; ii. 165. 23; भूतस्यातिक्रान्तत्वात् … अनागतमेव संसारदुःखं हातव्यम् RājMār. 28. 25; यागव्रतेषु तु न विधातव्यं ऋतुकालस्यातिक्रान्तत्वात् SaṅkarKāBh. 30. 25 (*on* i. 3. 21); नियमावधेरवभृथकालस्य श्रुत्युक्तस्यातिक्रान्तत्वात् NyāyMāVi. 345. 21 (*on* vi. 5. 11); **ii** the state of having gone beyond तस्याश्च … तुर्यावस्थामतिक्रान्तत्वात्तुर्यातीतेत्येव यौगिको व्यवहारः LalitāSaBh. 79. 9 (*on* 114)

अतिक्रान्तदंश (atikrānta-daṁśa) *m.* bite which has passed (a period of time) यस्तु मां (? मा) समतिक्रान्तदंशो नोत्क्रमते प्रभो Hastyāyur. 193. 7 (2. 11)

अतिक्रान्तदमनक (atikrānta-damanaka) *adj.* **A** which is later than (the time of) the *damanaka* flowers यस्मै च … अतिक्रान्तदमनकाय वसन्तायेव … तरुण्यः स्पृहयाञ्चक्रुः VāsaDa. 39. 2 (comm. दमनकः पुष्पविशेषः); **B** by whom brave men are overcome, VāsaDa. 39. 2 (comm. अतिक्रान्ताः अभिभूताः दमनकाः वीरा येन तस्मै)

अतिक्रान्तदशाह (atikrānta-daśāha) *adj.* in which case ten days have passed अतिक्रान्तदशाहं सपिण्डमरणं श्रुत्वा सचेलस्नानमात्रेण…स्पृश्यो भवति HārLa. 33. 7; 40. 2.

अतिक्रान्तदिगन्तर (atikrānta-digantara) *adj.* which has covered the space between the quarters परिभाव्य नितान्तमैरवं तदतिक्रान्तदिगन्तरं बलम् ।… मुमुदे कुन्तलपार्थिवः VikraDeC. 15. 42.

अतिक्रान्तदिन (atikrānta-dina) *n.* past day अद्यापि यदि वाहारमतिक्रान्तदिनेष्विव । न गृह्णामि TriṣaŚaPuC. i. 3. 241.

अतिक्रान्तदिनवृत्त (atikrāntadina-vṛtta) *adj.* which happened in past days 'वेत्ति कश्चिदतिक्रान्तदिनवृत्तं कुमारवृत्तान्तम्' इति परिग्रहलोकमप्राक्षीत् TilaMañ. 415. 17.

अतिक्रान्तदिवस (atikrānta-divasa) *m.* past day अतिक्रान्तदिवसे गोपगृहे सुप्तः सन्नपश्यम् Hitopa. 2. 99 (24); अतिक्रान्तदिवसगतदशत्वादिसंख्यावच्चासतोर्भूतभविष्यतोरविद्यमानत्वेऽपि धर्मिणः प्रकाशनधर्मो जायते ŚāstrDī. 57. 11 (*on* i. 1. 5)

अतिक्रान्तनियम (atikrānta-niyama) *adj.* which has transgressed the rule अर्थेन्द्रियसंयोगादिः … आत्माश्रये धीकार्येऽतिक्रान्तनियमः NayaVi. 130. 6 (*on* i. 1. 5)

अतिक्रान्तनिषेध (atikrānta-niṣedha) *adj.* who has violated or transgressed prohibition अतिक्रान्तनिषेधस्य लिप्सया ब्राह्मणस्य चोपदेष्टृत्वसंभवात् ManuBh. i. 361. 16 (*on* 4. 80); अतिक्रान्तनिषेधं पुरुषमाश्रित्य … उक्तम् Bhām. 224. 17 (*on* i. 3. 19); अतिक्रान्तनिषेधैर्वा कैश्चिदुक्ताद्वाक्याच्छूद्रादेर्ज्ञानमुत्पद्यत एव ŚrīBh. 329. 16 (*on* i. 3. 39); तथाप्यतिक्रान्तनिषेधः पूर्वपतिकृताणांपाकरणाधिकारी भवत्येव Mitā. 168. 11 (*on* 2. 51); 437. 10 (*on* 3. 257); 437. 24 (*on* 3. 257); अथवातिक्रान्तनिषेधेन यत्र ब्रह्मवधः क्रियते तत्रैतत् Aparā. 682. 5 (*on* 2. 83); अतिक्रान्तनिषेधानां ब्राह्मणक्षत्रियवैश्यशूद्राणां पालयितृत्वम् … प्रवृत्तम् ŚivārkaMaDī. i. 479. 28 (*on* i. 3. 34); यद्यप्येतयानं निषिद्धं तथाप्यतिक्रान्तनिषेधस्यापद्गतस्य वा सद्द्यानाभ्यनुज्ञानार्थं तयानाभ्यनुज्ञानम् VīraMi.(Saṁskāra.) 491. 8; 736. 21; (Vyavahāra.) 268. 12; अतिक्रान्तनिषेधेभ्यः त्रैभाषिकेभ्यो म्लेच्छानां वैदिकशब्दग्रहणसंभवात् MīmāKau. i. 82. 7 (*on* i. 3. 10); अतिक्रान्तनिषेधानामेव याजकत्वं बोध्यम् MayūMāli. 459. 5 (*on* vi. 1. 13); अन्ये तु अतिक्रान्तनिषेधेन पुराणे श्राव्यमात्रेण (? माणे) श्रावयितैव प्रत्यवैति न श्रोतेत्याहुः BālamBha. i. 381. 17 (*on* 1. 121)

अतिक्रान्तनिषेधता (atikrāntaniṣedha-tā) *f.* the state of being one who has violated the prohibitory rule भिन्नमुल्लङ्घितं शास्त्रनिषिद्धं कर्म येन स तथा तस्य भावस्तथा अतिक्रान्तनिषेधता VedāntKa. 31. 5 (*on* 1. 1)

अतिक्रान्तनिषेधत्व (atikrāntaniṣedha-tva) *n.* the state of being one who has transgressed the prohibitory rule प्रायश्चित्तीयते पुत्रदारादिदानेऽतिक्रान्तनिषेधत्वात् SmṛtiCan. iv. 443. 14.

अतिक्रान्तनिषेधाधिकार (atikrānta-niṣedhādhikāra) *adj.* who has violated the authority of a prohibitory injunction योऽत्यन्तप्रवृद्धद्वेषो न हिंस्याद्भूतानीत्यतिक्रान्तनिषेधाधिकारः ManuBh. i. 62. 7 (*on* 2. 6)

अतिक्रान्तपद (atikrānta-pada) *n.* long or wide step अतिक्रान्तपदैरङ्गधूननैर्भञ्जनग्रहैः । बाष्पजृम्भणनिश्वासैरभिनेयोऽग्निसंभवः BhāvPra.(Śā.) 21. 3(1)

अतिक्रान्तपाक (atikrānta-pāka) *adj.* beyond cooking, characterised by overcooking मृदुपाकाश्च ये भक्ष्याः स्थूलाश्च कठिनाश्च ये । गुरवस्ते त्वतिक्रान्तपाकाः पुष्टिबलप्रदाः BhojanKu. 49. 21.

अतिक्रान्तपार्थिव (atikrānta-pārthiva) *m.* past king न खलु चन्द्रगुप्तदोषा अतिक्रान्तपार्थिवगुणानधुना स्मारयन्ति प्रकृतीः MudrāRā. 1. 20(80); सुतविभक्तभूभागान्न केवलमतिक्रान्तपार्थिवान्गिरीनपि बहुमन्यत (राजा) TilaMañ. 21. 16.

अतिक्रान्तपूर्व (atikrānta-pūrva) *adj.* disobeyed before or earlier ब्राह्मणवचनमिति । न मया अतिक्रान्तपूर्वम् KarṇaBhā. 23(7); न मया गुरुवचनमतिक्रान्तपूर्वम् Prati. 3. 4(8)

अतिक्रान्तप्रतिषेध (atikrānta-pratiṣedha) *adj.* who has violated the prohibitory injunction श्येनादिफलं तु हिंसायतिक्रान्तप्रतिषेधेनावाप्यते Kāśi. i. 176. 23 (*on* 2. 221)

अतिक्रान्तप्रत्यक्षविषय (atikrānta-pratyakṣaviṣaya) *adj.* which is beyond the scope of perception न चातिक्रान्तप्रत्यक्षविषय एवंलक्षणकेऽर्थे शब्दमन्तरेण परिच्छेदोऽवकल्पते ŚābaBh. 844. 18 (*on* iii. 3. 14)

अतिक्रान्तप्रत्यवमर्शक (atikrānta-pratyavamarśaka) *adj.* which refers to what is gone (i. e. stated) before इतिशब्दोऽतिक्रान्तप्रत्यवमर्शकः Prasā. i. 272. 8.

अतिक्रान्तप्रत्यवमर्शिन् (atikrānta-pratyavamarśin) *adj.* which refers to what is gone (i. e. stated) before अत्र इतिशब्दोऽतिक्रान्तप्रत्यवमर्शी Nyās. ii. 205. 11 (*on* vi. 1. 6); ii. 253. 19 (*on* vi. 1. 85)

अतिक्रान्तप्रधान (atikrānta-pradhāna) *adj.* having 'surpassed' as the principal sense अतिक्रान्तप्रधानस्यात्र (? श्चात्र) सत्त्वधर्मपरिग्रहात् उच्चैः शब्दः पठ्यते PadMañ. *on* KāśiVṛ. *on* P. i. 1. 37; *on* P. i. 4. 105; अतिशब्दस्तु अतिक्रान्तप्रधानो नानाशक्तिर्भिर्युज्यते Prasā. i. 524. 13.

अतिक्रान्तप्रभावा (atikrānta-prabhāvā) *adj.* (*f.*) glory of which is over अतिक्रान्तप्रभावेयं कालदौरात्म्यपीडिता । निष्किञ्चनाथ संजाता पृथिवी गतगौरवा RājTa.(Ka.) 2. 35.

अतिक्रान्तप्रसवा (atikrānta-prasavā) *adj.* (*f.*) who is beyond giving birth to a child (i. e. who has abortion at every pregnancy) अतिप्रसवा अतिक्रान्तप्रसवा प्रतिगर्भं गर्भस्राववतीति यावत् (स्त्री) SmṛtiCan. iv. 574. 6.

अतिक्रान्तबन्धु (atikrānta-bandhu) *adj.* who has deserted the relatives किं वातिक्रान्तबन्धूनां स्वेच्छाचारहतात्मनाम् । इमास्ता विपदः स्त्रीणां कुमारीणां कथैव का KathāSaSāg. vi. 8. 7.

अतिक्रान्तबहुवयस् (atikrānta-bahuvayas) *adj.* who has passed many years of age (i. e. who has become very old) एकामतिक्रान्तबहुवयसमङ्गनामुपगम्य सविनयमपृच्छम् TilaMañ. 266. 3.

अतिक्रान्तबालभाव (atikrānta-bālabhāva) *adj.* who has passed the stage of childhood, who has grown beyond childhood समावृत्तो गुरुकुलात्प्रत्यागतो यावद्वातीतशैशवः अतिक्रान्तबालभावः ManuBh. ii. 84. 13 (*on* 8. 27)

अतिक्रान्तबाल्य (atikrānta-bālya) *adj.* whose childhood is over चारपुरुषैरतिक्रान्तबाल्यैः ··· हिरण्यानि तत्त्वेन तत्र निक्षेपयित्वा तैरेव ··· सः निक्षेपधारी प्राड्विवाकेन चारपुरुषनिक्षिप्तसुवर्णं याच्यः ManvaMu. 322. 22 (*on* 8. 182)

अतिक्रान्तभय (atikrānta-bhaya) *adj.* who has overcome fear अतिक्रान्तभये तत्र जातहासेऽखिले जने । आययौ श्रुतवृत्तान्ता तत्र रूपणिकाथ सा KathāSaSāg. ii. 4. 186.

अतिक्रान्तभव (atikrānta-bhava) *m.* previous birth नातिक्रान्तभवे त्वासीद्ब्रह्मविद्या प्रजापतेः BrĀraUBhVā. i. 4. 89; इतो भवात्तृतीयस्मिन्नतिक्रान्तभवे प्रभोः । पिताऽभवद् वज्रसेनः TriṣaS'aPuC. i. 3. 322.

अतिक्रान्तभावनीय (atikrānta-bhāvanīya) *m.* fourth (and the highest) of the four kinds of Yogins in the *saṁprajñātasamādhi* (who has exceeded all objects of contemplation) चत्वारः खल्वमी योगिनः प्रथमकल्पिको मधुभूमिकः प्रज्ञाज्योतिरतिक्रान्तभावनीयश्चेति ··· चतुर्थो यस्त्वतिक्रान्तभावनीयः YogBh. 174. 6 (*on* 3. 51); संप्रत्यतिक्रान्तभावनीयस्य ध्यायिनश्चतुर्थस्य चित्तावस्थामाह TattvVai. 6. 4 (*on* 1. 2); चत्वारो योगिनो भवन्ति तत्र ··· अतिक्रान्तभावनीयश्चतुर्थः RājMār. 62. 9; संप्रज्ञातयोगिनश्चतुर्भूमिका भवन्ति । तद्यथा प्रथमकल्पिको मधुभूमिकः प्रज्ञाज्योतिरतिक्रान्तभावनीयश्चेति YogSā. 16. 5(1)

अतिक्रान्तमद्य (atikrānta-madya) *n.* liquor which is overfermented मन्दकातिक्रान्तमद्यपानात् ··· प्रकुपितो वायुरपानः CaraS. vi. 14. 9 (1941 Ed.)

अतिक्रान्तमनस्कार (atikrānta-manaskāra) *m.* one who has transcended mental activity अतिक्रान्तमनस्कारो भ्रूमध्ये चित्तधारणात् AbhidhK. 6. 11 (Sphuṭā जितमनस्कारत्वादतिक्रान्तत्वादित्यर्थः)

अतिक्रान्तमर्याद (atikrānta-maryāda) *adj.* [*f.* –ā] **i** who has violated or transgressed the limits of proper conduct (in general) ताननतिक्रान्तमर्यादान्नान्यो संहर्तुमर्हति MahāBhā. viii. 24. 55; xii. 28. 9; तमतिक्रान्तमर्यादमाददानमसांप्रतम् । ऊचुर्महर्षयः सर्वे मरीचिप्रमुखास्तदा HariVaṁ. 5. 8= VāyuP. ii. 1. 113; BrahmP. 4. 35; तमतिक्रान्तमर्यादमवदानसुसंव्रतम् । ऊचुर्महर्षयः सर्वे BrahmāṇḍP. i. 36. 133; एवमतिक्रान्तमर्यादे त्वयि निमित्तमात्रेण पाण्डवक्रोधेन भवितव्यम् VeṇīSaṁ. 1. 256; तमतिक्रान्तमर्यादं प्रजापीडनतत्परम् । ऊचुर्महर्षयः क्रुद्धाः SkandP. vii(1). 336. 79; **ii** (a woman) who has violated the limit (of good behaviour or chastity) अतिक्रान्तमर्यादाया बहुपुरुषसंपर्क उच्यते S'ivārkaMaDī. i. 491. 23 (*on* i. 3. 31)

अतिक्रान्तमहाध्वन् (atikrānta-mahādhvan) *adj.* who has traversed a long way अतिक्रामन्ति सहसा तं ग्रन्थिं दुरतिक्रमम् । अतिक्रान्तमहाध्वानो घट्टभूमिमिवाध्वगाः TriṣaS'aPuC. i. 3. 592.

अतिक्रान्तमानुष (atikrānta-mānuṣa) *adj.* which has surpassed human (power) न केवलमतिक्रान्तमानुषेण प्रभावेण आकारेणापि शक्यत एव निश्चेतुम् (राम इति) KundaMā. 3. 14(1)

अतिक्रान्तयाग (atikrānta-yāga) *adj.* by whom sacrifices have already been performed यदि यागस्य विनाशित्वादन्येन तत्सम्बन्धिना फलं साध्यमानं यागेन साधितं भवति ततो लाघवादतिक्रान्तयागेनात्मनैव वरं साधयितव्यम् । यद्वा कर्मविनाशोऽयं फलं नः साधयिष्यति TantrVā. 362. 15 (*on* ii. 1. 5); न चातिक्रान्तयागेभ्यः पुरुषेभ्यः फलोद्गतिः TantrVā. 368. 18 (*on* ii. 1. 5)

अतिक्रान्तयामिनीवृत्तान्त (atikrāntayāminī-vṛttānta) *m.* incident of the previous night पत्युरतिक्रान्तयामिनीवृत्तान्तमाकर्णयन्तीम् ···मदिरावतीमद्राक्षीत् (नृपतिः) TilaMañ. 72. 6.

अतिक्रान्तयुग (atikrānta-yuga) *adj.* crossing over from one aeon to another मन्वन्तराणां संताने संतानाश्च श्रुतौ स्मृताः । अतिक्रान्तयुगाश्चैव ब्रह्मक्षत्रस्य संभवाः MatsyaP. 273. 63.

अतिक्रान्तयोगक्षेमा (atikrānta-yogakṣemā) *adj.* (*f.*) beyond security or welfare (i. e. having no security) अतिक्रान्तयोगक्षेमा रात्रिः PratiYau. 3. 1(95)

अतिक्रान्तयोगिन् (atikrāntayog-in) *adj.* (the constellation) the conjunction of which (with the moon) is over (नक्षत्राणि) षड् अनागतयोगीनि स्थितयोगीनि द्वादश । नवातिक्रान्तयोगीनि तथा योगः प्रदृश्यते AVPari. i(5). 7.

अतिक्रान्तयौवना (atikrānta-yauvanā) *adj.* (*f.*) (a woman) who is past her youth अतिक्रान्तयौवना वर्षाणां पञ्चपञ्चाशतः पञ्चाशतो वा आर्तवाभावादेव SthānṬ. 313B. 4.

अतिक्रान्तरस (atikrānta-rasa) *adj.* over-ripe, overmatured संपद्विरुद्धं तद्विद्यादसंजातरसं तु यत् । अतिक्रान्तरसं वापि विपन्नरसमेव वा CaraS. i. 26. 101 (1941 Ed.)

अतिक्रान्तर्तुलिङ्ग (atikrāntartu-liṅga) *n.* characteristic of (peculiar to) the previous season अतिक्रान्तर्तुलिङ्गं यत्कुसुमाद्यनुवर्तते । लिङ्गानुवृत्तिं तामाहुः सा ज्ञेया काव्यलोकतः । वर्षासु ग्रीष्मलिङ्गाब्जविकासानुवृत्तिः KāvyMī. 109. 6.

अतिक्रान्तवचन (atikrānta-vacana) *adj.* expressive of the past event भूतशब्दोऽयमतिक्रान्तवचनः Nyās i. 625. 4 (*on* iii. 2. 84)

अतिक्रान्तवत् (atikrānta-va(n)t) *adj.* **Ai** who has erred (who has gone beyond propriety) कालियः — भगवन् अज्ञानादतिक्रान्तवान् सान्तःपुरः शरणागतोऽस्मि BālC. 4. 11(1); **Aii** who has transcended or overcome स यः कश्चित्···अतिक्रान्तवानुपाधिधर्मं हृदयाद्यात्मत्वम् BrĀraUBh. 480. 11 (*on* iii. 9. 26); **Aiii** who has transgressed or violated न सत्यमतिक्रान्तवानसि Bhām. 272. 1 (*on* i. 3. 3); **B** who has crossed over अहम् ··· धावन् भूयसीं भूमिमतिक्रान्तवान् UdaySuKa. 30. 20.

अतिक्रान्तवयस् (atikrānta-vayas) *adj.* advanced in age अतिक्रान्तवया राजा मा स्मैनं व्यवरोरुधः Rāmā. ii. 1263*(1)

अतिक्रान्तवयस्त्व (atikrāntavayas-tva) *n.* advancement in age, agedness तत्र व्यावर्तनकारणानि ··· अतिक्रान्तवयस्त्वम् KāmSū. 258. 8 (5. 1); JayaMa. 258. 22 (*on* 5. 1)

अतिक्रान्तवर्ण (atikrānta-varṇa) *m.* sound already pronounced तां च बुद्धिम् ··· अतिक्रान्तवर्णग्रहणरूपां सदसद्वर्णगोचरां केचिद्विचित्रामिच्छन्ति Tātpa-Ṭ.(U.) 468. 15 (*on* 5(10). 111)

अतिक्रान्तवस्तु (atikrānta-vastu) *f.* past thing or event कृतमतिक्रान्तवस्तुचिन्तया TilaMañ. 338. 3.

अतिक्रान्तवाचिन् (atikrāntavāc-in) *adj.* expressing what is past (i. e. past event) भूतपूर्वशब्दोऽतिक्रान्तवाची Prasā. i. 916. 21.

अतिक्रान्तवार्ता (atikrānta-vārtā) *f.* news of what is past or over अतिक्रान्तवार्ताप्रकाशनपुरःसरं पितुरादेशमभिलिखितमीक्षितवान् TilaMañ. 321. 19.

अतिक्रान्तविग्रह (atikrānta-vigraha) *m.* past battle or fight अतिक्रान्तविग्रहाश्रिताः कथा न कथयितव्याः PratiYau. 2. 13(19)

अतिक्रान्तविधिनिषेध (atikrānta-vidhiniṣedha) *adj.* who is beyond (i. e. who does not observe) injunction or prohibition सत्यासत्यतां व्यवहारे जानन्नपि यो नराधमोऽतिक्रान्तविधिनिषेधः ···सत्यवचनं न ददाति Aparā. 677. 6 (*on* 2. 77)

अतिक्रान्तविवाह (atikrānta-vivāha) *m.* marriage already accomplished यत्त्वस्याः स्यादितिवत् लक्षणायास्तुल्यत्वेऽपि अतिक्रान्तविवाहसंबन्धेनेदानीं सा इति जघन्यायास्तस्या अनौचित्यात् BālamBha. ii. 264. 10 (*on* 2. 145)

अतिक्रान्तविषय (atikrānta-viṣaya) *adj.* relating to (the ritual or rite) which is over (i. e. already performed) अत एव च अतिक्रान्तविषयमेतत्कार्यैकत्वाभिधानम् BrahmSūBh.(S'aṅ.) 729. 13 (*on* iv. 1. 16)

अतिक्रान्तवेतन (atikrānta-vetana) *adj.* (payment of) whose wages is delayed न कुप्यवेतनी कश्चिन्न चातिक्रान्तवेतनी (v. l. °वेतनः) MahāBhā. iii. 16. 22.

अतिक्रान्तवेतनिन् (atikrānta-vetanin) *adj.* payment of whose wages is delayed न कुप्यवेतनी कश्चिन्न चातिक्रान्तवेतनी MahāBhā. iii. 16. 22.

अतिक्रान्तवेल (atikrānta-vela) *adj.* who has crossed the (usual) time शिशुमारोऽपि वलीवदनप्रीत्यातिक्रान्तवेलो गृहमागतः Tantrākhyā. 124. 21.

अतिक्रान्तवेला (atikrānta-velā) *f.* time beyond limit, late hour तेनोक्तं किमतिक्रान्तवेलायां त्वं समागता SamarāSaṁ. 4. 279.

अतिक्रान्तवैभव (atikrānta-vaibhava) *n.* past glory or prowess प्रयत्नरुद्धोऽपि···अतिक्रान्तवैभवस्मरणयोनिमन्युः ···ईक्षणयुगमपूर्यत विस्तारिणा बाष्पनीरेण TilaMañ. 258. 18.

अतिक्रान्तव्रत (atikrānta-vrata) *n.* religious vow not done in time इति प्रायश्चित्ताम्नानादतिक्रान्तव्रतानुष्ठानं नास्तीति गम्यते NirṇaSi. 19. 20.

अतिक्रान्तशब्दार्था (atikrānta-śabdārthā) *adj.* (*f.*) violating the meaning of the words एवमतिक्रान्तशब्दार्था त्वन्मतिर्भाति AṇuBh. 31. 3 (*on* i. 1. 11)

अतिक्रान्तशासना (atikrānta-śāsanā) *adj.* (*f.*) who has transgressed the law अतिक्रान्तशासनाश्च प्रजाः सर्वाः क्षितीः संकिरेयुः DaśKuC. 130. 8.

अतिक्रान्तशास्त्र (atikrānta-śāstra) *adj.* who has transgressed (the rules of) scriptures लुब्धस्य सति धने व्ययमकुर्वाणस्योच्छास्त्रवर्तिनो अतिक्रान्तशास्त्रस्य च राज्ञो धनं न प्रतिगृह्णीयात् Aparā. 184. 8 (*on* 1. 140)

अतिक्रान्तशास्त्रमर्याद (atikrānta-śāstramaryāda) *adj.* who has transgressed the limits (rules) of the scriptures उच्छास्त्रवर्तिनः अतिक्रान्तशास्त्रमर्यादस्य (राज्ञः धनं न प्रतिगृह्णीयात्) VīraMi. 224. 27 (*on* 1. 140)

अतिक्रान्तशुद्धकाल (atikrānta-śuddhakāla) *adj.* (rite) whose

proper time is over तान्यालस्यादिनातिक्रान्तशुद्धकालप्रारम्भविषयाणि NirṇaSi. 38. 21.

अतिक्रान्तश्राद्ध (atikrānta-śrāddha) *n.* S'rāddha ceremony for which the proper time is over पूर्वमासे मृतितिथिमुल्लङ्घ्योत्तरमासे मृतितिथौ अतिक्रान्तश्राद्धं प्राप्तकालं च श्राद्धं चेति द्वयं तत्र कार्यम् VīraMi.(Samaya.) 214. 18.

अतिक्रान्तषोडशवर्ष (atikrānta-ṣoḍaśavarṣa) *adj.* beyond the age of sixteen, who is more than sixteen years of age इदं चातिक्रान्तषोडशवर्षस्य सप्तदशे वर्षे उपनयनं द्रष्टव्यम् VīraMi. (Saṁskāra.) 350. 4.

अतिक्रान्तसंवत्सर (atikrānta-saṁvatsara) *m.* previous year अतः समयादतिक्रान्तसंवत्सरे त्रिकालदर्शी मुनिर्महायशो नाम ··· काञ्च्यामुपाययौ TilaMañ. 272. 9; *adj.* [*f.* -ā] which is for a period beyond a year अर्वागपि संवत्सराद्या (वृद्धिः) दीयते साप्यतिक्रान्तसंवत्सरैव ManuBh. ii. 145. 17 (*on* 8. 153)

अतिक्रान्तसंस्कार (atikrānta-saṁskāra) *m.* sacrament which is not performed or is neglected पुनःसंस्कारमतिक्रान्तसंस्कारमित्यर्थः VīraMi. (Saṁskāra) 177. 22.

अतिक्रान्तसप्तति (atikrānta-saptati) *adj.* who has crossed seventy years of life न शुद्धिरूनदशमे न चातिक्रान्तसप्ततौ AṣṭāSaṁ. i. 157. 25 (1. 29)

अतिक्रान्तसमुद्रक्षोभ (atikrānta-samudrakṣobha) *m.* past agitation of the sea देशकालनियमश्च। ··· क्वचिदभिन्नदेशतया च। यथा दिवानिशाकरास्तगमनातिक्रान्तसमुद्रक्षोभयोरिति NyāyPari. 101. 3.

अतिक्रान्तसमुद्रवृद्धि (atikrānta-samudravṛddhi) *f.* past high-tide of the sea चन्द्रनभोमध्यस्थितेरतिक्रान्तसमुद्रवृद्धेश्च एककालताभावात् YuktiSneha. 65. 28 (*on* i. 1. 5)

अतिक्रान्तसंभव (atikrānta-sambhava) *adj.* whose birth was earlier (by a specific period) ते षष्ट्यातिक्रान्तसंभवम्। ··· ददृशुः स्थविरं नरम् KumāCaSaṁ. 12. 27.

अतिक्रान्तसर्गादि (atikrānta-sargādi) *adj.* past or earlier creations etc. यथास्य सर्गस्यादौ प्रकर्षगत्या सिद्धस्तथातिक्रान्तसर्गादिष्वपि प्रत्येतव्यः YogBh. 32. 9 (*on* 1. 26)

अतिक्रान्तसुख (atikrānta-sukha) *adj.* (times) in which happiness is a thing of the past अतिक्रान्तसुखाः कालाः MahāBhā. i. 119. 6.

अतिक्रान्तस्थित (atikrānta-sthita) *adj.* being in the *atikrāntacārī* pose गच्छेत्सललितैः पादैरतिक्रान्तस्थितैः सदा NāṭyaS'ā. 12. 43.

अतिक्रान्तस्वकाल (atikrānta-svakāla) *adj.* which is past its proper time अस्माद्वचनान्नित्यं स्नानं कथंचिदतिक्रान्तस्वकालं महानिशावर्जं रात्रावपि कर्तव्यम् CaturCin. iii(2). 108. 14.

अतिक्रान्ता (ati-krāntā) *f.* name of one of the 16 varieties of aerial (*ākāśa-*) *cāris* or steps in a dance (wherein one bent leg is raised up, brought forward and then placed on the ground); आकाशिकीनां चारीणां संप्रवक्ष्यामि लक्षणम्। कुञ्चितं पादमुत्क्षिप्य पुरतः संप्रसारयेत्। उत्क्षिप्य पातयेच्चैनमतिक्रान्ता तु सा स्मृता NāṭyaS'ā. 10. 30 (comm. गन्तव्यातिक्रमादतिक्रान्ता); 10. 11; गुल्फक्षेत्रेऽन्यपादस्योद्वृत्याङ्घ्रिं कुञ्चितं पुरः। किंचित् प्रसार्य चोत्क्षिप्य यथाप्रकृति लोकवत्। चतुस्तालान्तरेण ततोऽग्रेण निपातयेत्। यत्र चारीमतिक्रान्तां निःशङ्कस्तामकीर्तयत् SaṁgīRa. iv. 290. 7 (7. 944); अग्निजे (आवेगे) धूतिरङ्गानां धूमाकुलितनेत्रता। चार्यातिक्रान्तया चापक्रान्तया चरणं भवेत् SaṁgīRa. iv. 862. 15 (7. 1623); NṛtyaRa. 3. 40; अङ्घ्रेरेकस्य गुल्फे चेदन्यमुद्धृत्य कुञ्चितम्। प्रसार्य पुरतः किंचिदथोत्क्षिप्य निपातयेत्। अग्रे लोकानुसारेण चतुस्तालान्तरादितः। अतिक्रान्ता तदा चारी Nṛtyā. 1017; NṛtyaK. ii. 2. 42.

अतिक्रान्तातिक्रान्त (atikrāntātikrānta) *adj.* surpassing those who have surpassed प्रतिष्ठिता वयं देवमनुष्येषु अतिक्रान्तातिक्रान्ताः Divyāva. 29. 6.

अतिक्रान्ताध्यायद्वय (atikrāntādhyāya-dvaya) *n.* previous two Adhyāyas (chapters) अतिक्रान्ताध्यायद्वयेन परं ब्रह्म वेदान्ताः प्रतिपादयन्ति S'rīBh. 564. 5 (*on* iii. 1. 1)

अतिक्रान्तानतिक्रान्तविशेष (atikrāntānatikrānta-viśeṣa) *m.* difference between (a sacrifice) which is over and (a sacrifice) which is not yet over अतिक्रान्तानतिक्रान्तविशेषस्तु नास्ति TantrVā. 368. 19 (*on* iii. 1. 5)

अतिक्रान्तानुकार्य (atikrāntānukārya) *m.* (dramatic) role of a person of the earlier age नातिक्रान्तानुकार्यस्य रसभावनया कविः। करोति काव्यम् BhāvPra. (S'ā.) 6. 153(7)

अतिक्रान्ताभिगमन (atikrāntābhigamana) *n.* movement with the *Atikrāntacārī* style अतिक्रान्ताभिगमने पादमेतत् प्रयोजयेत् ViṣṇuDhaP. iii. 24. 63.

अतिक्रान्ताभिधेयम् (atikrāntābhidheyam) *adj.* beyond expression, inexpressible अत्यर्थमतिक्रान्ताभिधेयं प्रियत्वं वाचामगोचरमित्यर्थः S'rutaPra. iA. 61. 3 (i. 1. 1)

अतिक्रान्तार्थ (atikrāntārtha) *m.* meaning 'surpassing or excelling' अस्य चातिक्रान्तार्थं प्रत्युपसर्जनत्वेऽपि राजकुमारीत्येतदर्थं प्रत्यनुपसर्जनत्वमेव LaS'abdeS'e. i. 530. 16.

अतिक्रान्तायुक्तकशत (atikrāntāyuktaka-śata) *n.* hundred past officials (भूपालः स्कन्धावारम्) अतिक्रान्तायुक्तकशतानि च शंसद्भिः ·· कटकं जगाम HarṣaC. 286. 7.

अतिक्रान्तानेकजन्मकृत (atikrāntānekajanma-kṛta) *adj.* done in several past births यानि चातिक्रान्तानेकजन्मकृतानि तेषां च फलमदत्वा नाशो न युक्तः GītāBh.(S'aṅ.) 395. 16 (*on* 13. 23); 552. 5 (*on* 18. 66)

अतिक्रान्तार्थविधान (atikrāntārtha-vidhāna) *n.* injunction of an object which is past न च विधेयान्तरोपादाने सत्यतिक्रान्तार्थविधानमवकल्पते TantrVā. 549. 18 (*on* ii. 2. 26)

अतिक्रान्तार्थवृत्ति (atikrāntārtha-vṛtti) *adj.* signifying the meaning 'surpassing or excelling' वृत्तिविषयेऽतिशब्दोऽतिक्रान्तार्थवृत्तिः PadMañ. *on* KāśiVṛ. *on* P. vi. 2. 191.

अतिक्रान्तालोचन (atikrāntālocana) *n.* consideration of what has gone before or passed न त्वेतदतिक्रान्तालोचनेन···अभिहितम् TantrVā. 628. 6 (*on* ii. 3. 29)

अतिक्रान्तावधि (atikrāntāvadhi) *adj.* who has transgressed the (prescribed) time-limit अथैत्यतिक्रान्तावधेः स्वामिनः समागमनानन्तर्यमुच्यते SmṛtiCan. iii. 313. 3.

अतिक्रान्तावधिक (atikrāntāvadhi-ka) *adj.* who has transgressed the (prescribed) time-limit तदतिक्रान्तावधिकस्य स्वामिनो नाशनिश्चयविषये द्रष्टव्यम् SmṛtiCan. iii. 313. 6.

अतिक्रान्तावस्थ (atikrāntāvastha) *adj.* who has passed the stage (of intoxication) अतिक्रान्तावस्थो गजपतिरिदम् ··· जगत्सर्वं हन्तुं समभिलषति क्रोधकलुषः MātaLī. 9. 17.

अतिक्रान्तावेक्षण (atikrāntāvekṣaṇa) *n.* consideration of what has gone before (in a book) (i. e. reference to a previous point) पुरस्तादेवं विहितमित्यतिक्रान्तावेक्षणम् ArthS'ā. iii. 246. 1 (15. 1); यत्पूर्वमुक्तं तदतिक्रान्तावेक्षणम् SuśruS. vi. 65. 31; अथ तन्त्रयुक्तयो भवन्ति ··· अतिक्रान्तावेक्षणम् ViṣṇuDhaP. iii. 6. 0.

अतिक्रान्ताशौच (atikrāntāśauca) *n.* (period of) impurity that has passed अतिक्रान्ताशौचेऽप्ययमेवार्थः स्मृत्यन्तरे दर्शितः Mitā. 334. 34 (*on* 3. 17); एवमुक्तमतिक्रान्ताशौचं मातापितृव्यतिरिक्तसपिण्डविषयम् SmṛtiCan. vi. 54. 13; NirṇaSi. 377. 26; BālamBha. iii. 27. 4 (*on* 3. 14); iii. 59. 7 (*on* 3. 18)

अतिक्रान्ति (ati-krānti) *f.* 1 stepping over, going from one step to another प्रजापतिष्षष्ठादहः सप्तममहरभ्यत्यक्रामत्। अतिक्रान्तिः एवैषा JaimiBr. 3. 174; 3. 204; 2A overcoming ननु मृत्योरतिक्रान्तेरुद्गीथज्ञानकर्मणोः। फलस्य संभवात् BṛĀraUBhVā. i. 3. 8; 2B surpassing समानवीर्यान्वयपौरुषेषु यः करोत्यतिक्रान्तिमसौ तिरस्क्रिया Kirātā. 14. 23; S'abdaRa.(Vā.) 4533; 3 transgression, neglect, omission अतिक्रान्तिरतस्तेषां लोकद्वयविरोधिनी MahāP. 6. 152; S'abdaRaSaK. 151. 12.

अतिक्रान्तुम् (atikrān-tum) *inf.* 1 to overcome नाशकत्तानतिक्रान्तुं मृत्युर्ब्रह्मविदो यथा MahāBhā. viii. 33. 9; 2 to transgress, to disobey तामाज्ञां क्षणमप्यहं नातिक्रान्तुमिहेच्छामि MārkP. 23. 90; न हि शक्नोम्यतिक्रान्तुं सत्यमाबाल्यसेवितम् KathāSaSāg. xii. 17. 38; 3 to cross, to overstep नातिक्रान्तुमलं ब्रह्मंस्तदद्यापि महोदधिः ViṣṇuP. v. 38. 10.

अतिक्रान्तोत्पत्ति (atikrāntotpatti) *f.* reappearance (of a past thing) or rebirth भूतप्रादुर्भावः अतिक्रान्तोत्पत्तिः SiddhāKau. 417A. 9.

अतिक्रान्तोपनयनकाल (atikrāntopanayanakāla) *adj.* whose (prescribed) time for thread-ceremony has elapsed अतिक्रान्तोपनयनकालानां यद्भवति तदाह Aparā. 68. 5 (*on* 1. 38); प्रागुपनयनादिति वदता अतिक्रान्तोपनयनकालस्यापि यावदुपनयनमेते धर्मा भवन्तीत्युक्तं भवति VīraMi.(Saṁskāra.) 328. 11.

अतिक्रान्तोपवर्णन (atikrāntopavarṇana) *n.* description or statement of what has already taken place, narrating the past किमिदानीमतिक्रान्तोपवर्णनेन PañcT. 2. 53 (241. 1); किमि(? म)तिक्रान्तोपवर्णनेन AnarghRā. 4. 12 (1)

अतिक्रान्तोपवर्णित (atikrāntopavarṇita) *n.* description or statement of the past किमिदानीमि(? म)तिक्रान्तोपवर्णितेन AnarghRā. 4. 12 (1)

अतिक्रान्तोपवासा (atikrāntopavāsā) *adj.* (*f.*) wherein the prescribed fasting has been missed, passed without fasting (with reference

to Ekādaśī) विष्णुता केनापि हेतुनातिक्रान्तोपवासा (एकादशी) Aparā. 202.18 (*on* 1.154)

अतिक्रान्तोपालम्भ (atikrāntopālambha) *m.* cursing the past किमतिक्रान्तोपालम्भेन Hitopa. 1.126 (1)

अतिक्राम (ati-krāma) *m.* name of a group of formulas (TaiS. III. v. 3) अथातिक्रामातीमोक्षैश्चरत्यग्निना देवेन BaudhŚS. i. 242.2; अथातोऽतिक्रामाणामेव···संवत्सरमेतैः क्रमैः क्रमेत BaudhŚS. ii. 187.15.

अतिक्रामक (ati-krāmaka) *adj.* exceeding, transgressing [MW]

अतिक्रामण (ati-krāmaṇa) *n.* past case, earlier fact (प्रकृतस्य) साधनं प्रदेशोऽतिक्रामणेन सति(? सोऽति)देशः ViṣṇuDhaP. iii. 6.0.

अतिक्रामत् (ati-krā́mat) *adj.* [*f.* -ntī] **A i** going across, crossing, stepping over, traversing अ॒ति॒क्राम॑न्तो दु॒रि॒ता प॒दानि॑ AV. xii. 2.28; अ॒ति॒क्राम॒न्तो॒ऽव॒रा॒न्परे॑भिः AV. xii. 2.29; अपरेणाहवनीयं दक्षिणातिक्रामन् ··· ब्रह्माणमीक्षते ĀpaŚS. xv. 10.11; मत्स्यवन्धैरेतत्सरःसमीपेन अतिक्रामद्भिरभिहितम् Tantrākhyā. 19.2 = PañcT. 1.61 (67.6); चित्रग्रीवः···नभस्यतिक्रामन् Tantrākhyā. 54.13; अपसरापसरेति क्रोशतः प्राजकस्य पथो नातिक्रामन्यदि हिंस्यान्न दोषः ManuBh. ii. 198.16 (*on* 8.292); एवमसौ ··· अटवीश्चातिक्रामन् NalaCam. 5.32; PadmP. iv. 44.42; KathāSaSāg. xii. 35.41; अतिक्रामत्स्वरे तत्र त्वायुःसंहननादिकम् TriṣaŚaPuC. i. 2.128; मदीक्षणार्पितदृशः कृच्छादतिक्रामतः किं व्रीडाहतया मया भुजलतापाशो न कण्ठेऽर्पितः ŚārṅgaPa. 3437; **A ii** skipping, jumping over स्थानान्यतिक्रामतः···(चन्द्रार्धचूडामणेः) जयन्ति···केलयः KarpūC. 2; **B i** elapsing, passing (of time) अतिक्रामति कालेऽस्मिन्सर्वभूतक्षयावहे MahāBhā. xii. 169.1; HarṣaC. 64.4; AnargharRā. 4.50; NalaCam. 3.23; 4.9; क्रमादतिक्रामति च यौवने TilaMañ. 20.13; RājTa.(Ka.) 3.82; BhojPra. 10.2; **B ii** letting (fixed) time lapse दोहकालमतिक्रामतस्तत्फलहानं दण्डः ArthŚā. i. 317.1 (2.29); **B iii** crossing over, going beyond (a specific period) वयसा पञ्चपञ्चाशतं वर्षाण्यतिक्रामन्तम् ··· भैरवाचार्यं ददर्श HarṣaC. 155.3; क्रमेण शैशवमतिक्रामतोऽस्य NalaCam. 4.14 (1); वर्षाकालमतिक्रामन् ···नवरात्राणि प्रारेभे PrabaCin. 17.1; **C** ignoring, setting aside, transgressing, violating, not abiding by, failing को हि संबन्धकम्···ईप्सितम् । अतिक्रामन्न तप्येत MahāBhā. i. 94.70; अतिक्रामन्केशवस्य तथ्यं वचनमर्थवत् MahāBhā. v. 123.7; चक्रवृद्धिं समारूढो देशकालव्यवस्थितः । अतिक्रामन्देशकालौ न तत्फलमवाप्नुयात् ManuSm. 8.156; शास्त्रोपदेशमतिक्रामतः BrahmSi. 43.23; तीर्थमतिक्रामन् वञ्चितः स्याम् PādaTā. 12.12; PadmPrā. 12.15; BṛĀraUBh.(Śaṅ.) 267.19; अतिक्रामन्निदं वाक्यं प्रायश्चित्तं च सोऽर्हति BṛKathāK. 59.69; स्वधर्ममतिक्रामतां सर्वेषां पार्थिवो गुरुः NītiVā. 7.22 (comm. निषेधयिता); TātpaṬ. 529.12 (*on* iii. 1.56); वाक्यार्थं प्रतिपद्यमानोऽपि···विधिमतिक्रामन्दृश्यते NītiMā. 58.8; प्रतिषेधशास्त्रमतिक्रामन्त्याश्रयमनुगमनोपदेशः Mitā. 28.24 (*on* 1.86); एते च साक्षिधर्ममतिक्रामन्तः प्रथमसाहसं दण्डनीयाः Aparā. 763.19 (*on* 2.153); KāmVa. 6.37; राजाह्वानमतिक्रामतो दण्डः बृहस्पतिनोक्तः ViraMi.(Vyavahāra.) 40.25; **D** encroaching, covering (for sexual intercourse) aggressively जातसस्मयस्तामेवाजामतिक्रामन् YaśasCam. ii. 219.2.

अतिक्रामम् (ati-krāmam) *adv.* stepping forward ज्योतिष्मत्याज्यभागौ यजति ··· अग्रेणाघारसंभेदमतिक्रामम् VārāŚS. I. iii. 4.28; उदङ्ङतिक्रामं सोमाय पितृमतेऽनु स्वधेत्यनुवाचयति VārāŚS. I. vii. 4.39.

अतिक्रामयत् (ati-krāmayat) *adj.* causing to pass, letting cross over or transcend (खेलनैः) पञ्चातिक्रामयन्वर्षाण्ययमेकाहलीलया PāṇḍaC. 1.127; सत्त्वभावान् अतिनेनीयमानः संसारं भृशमतिक्रामयन् NyāySu.(Ja.) 585B.10 (*on* iii. 4.5)

अतिक्रामयितव्य (ati-krāmayitavya) *adj.* which is to be necessarily transgressed or violated अयमपि नारदीयः प्रतिषेधोऽतिक्रामयितव्यः BālaKri. i. 228.12 (*on* 2.74)

अतिक्रामयित्वा (atikrāmayi-tvā) *ger.* having deceived or disregarded बलेन येन वै सीताम् ··· । मामतिक्रामयित्वा त्वं हृतवांस्तद्धिदर्शय Rāmā. vi. 31.55.

अतिक्रामित (ati-krāmita) *adj.* [*f.* -ā] caused to pass or lapse तत्किमिति कालोऽतिक्रामितः इत्यादिभिरालापैः JayaMa. 50.13 (*on* 1.4); पारणलङ्घिता अतिक्रामिता द्वादशी धर्महरणं करोति CaturCin. iii (2). 283.8.

अतिक्रामिन् (atikrām-in) *adj.* rapist, ravisher धात्वर्थालोचनात् अपहारीत्यतिक्रामिणमित्यभिगामिनमित्यमीषामपि तत्परत्वात् DaṇḍaVi. 237.9.

अतिक्रिमिगतोदर (atikrimigatodara) *adj.* having severe infection of worms in the stomach अतिक्रिमिगतोदरान् ··· सितत्रिकटुचूर्णकैः ··· मृदुविरेचनैर्योजयेत् KalyāKā. 8.44.

अतिक्रिय (ati-kriya) *adj.* having severe action or effect अत्यर्थमतिदृष्टमतिक्रियम् । एवं द्विविधमाख्यातम् Hastyāyur. 504.29 (3.21)

अतिक्रिया (ati-kriyā) *f.* **A** extra effort नास्ति त्वतिक्रिया तस्य रणेऽरीणां प्रतिक्रिया MahāBhā. iii. 84.14; **B** unjustifiable excess in action, overdoing मूलान्तरं निरस्तं च सामान्येनैव यत्पुरा । तदनुप्राप्यते पश्चाद्विरोधेनेत्यतिक्रिया TantrVā. 84.18 (*on* i. 3.3); (NyāySu. उचितां क्रियामतिक्रम्य क्रिया); **C** excessive or over treatment बालक्षाणौ प्रशाधयेत् । कालातीतः क्रियाभिर्वातिक्रियाभिरतोऽपि वा Hastyāyur. 209.20 (2.16)

अतिक्रियात्मक (atikriyātma-ka) *adj.* having over-active nature तत्राभिमानी भगवान्वायुश्चातिक्रियात्मकः VāyuP. i. 2.40.

अतिक्री (ati-krī) *f.* variety of the Sadyaskrī (a kind of Soma sacrifice) अतिक्रिया यक्ष्यमाणस्तिलेषु दीक्षते BaudhŚS. ii. 371.1.

अतिक्रीडन (ati-krīḍana) *n.* excessive sport or play भजत्यरि(v. l. ति)क्रीडनमर्भकैः समम्···चित्रकः PadmP.(Ra.) 42.44.

अतिक्रीडा (ati-krīḍā) *f.* overplaying, excessive sport अतिक्रीडां सर्वदा परिवर्जय SkandP. iii(3). 11.27.

अतिक्रुद्ध (ati-kruddha) *adj.* [*f.* -ā] excessively angry इति श्रुत्वा पुलोमाया भृगुः परममन्युमान् । शशापाग्निमभि(v. l. ति)क्रुद्धः सर्वभक्षो भविष्यसि MahāBhā. i. 6.13; ii. 39.18; iii. 12.42; viii. 39.14; HariVaṁ. 22.30; अतिक्रुद्धापि तु न द्वारदेशाद्भूयो गच्छेत् KāmSū. 186.7 (2.10) (comm. न भूयो न बहिः); NītiVā. 25.80; YaśasCam. ii. 327.22; BrahmP. 12.33; PadmP. v. 49.94; रूपाण्यभिद्रवति वा योऽतिक्रुद्धो मतङ्गजः Hastyāyur. 341.26 (2.71); YudhiVi. 8.36; Bhāsk. i. 258.5 (*on* i. 5.14); TantrRā. 6.67; पशुपतिरतिक्रुद्धो दृश्यते Manmatho. 4.23 (648.2); *m. mantra* having twenty-eight or thirty-one syllables अष्टाविंशत्यक्षरो वा एकत्रिंशदथापि वा । अतिक्रुद्धः स कथितो निन्दितः सर्वकर्मसु ŚāraTi. 2.101; 2.69.

अतिक्रुध् (ati-krudh-) IV. P. to be extremely angry नातिक्रुध्यति ··· गजः श्लैष्मिकः MātaLī. 11.40.

अतिक्रुध् (ati-krudh) *adj.* excessively angry व्यतर्कयज्ज्वरमिव रौद्रमुद्धतम् । ··· अतिक्रुधं निश्चयम् ··· जनः ŚiśuVa. 17.7; *f.* excessive anger, great anger विधुरीकृतमप्यतिक्रुधाग्रे मम राधावदनं मनो धिनोति VidaMā. 7.50; तं दृष्ट्वातिक्रुधा क्षिप्तः कुठारो हि मया ततः BrahmāṇḍP. ii. 44.27; KathāSaSāg. i. 1.56; ŚāliC. i. 136.

अतिक्रुश् (ati-kruś-) I. P. to cry or call out loudly सा गृहीतातिचुक्रोश रावणेन यशस्विनी । ··· रामं दूरगतं वने Rāmā. iii. 47.20.

अतिक्रुष्ट (áti-kruṣṭa) *n.* excessive lamentation (deified) अति॑क्रुष्टाय मा॒ग॒धम् VājaS. 30.5; TaiBr. III. iv. 1.1 (Bhāskara अतिक्षिप्ताय); (आलभेत) पुंश्चलमतिक्रुष्टाय YaśasCam. ii. 358.2.

अतिक्रूर (ati-krūra) *adj.* [*f.* -ā] **A** very cruel शापमेनं तु शुश्राव स्वयमेव पितामहः । अतिक्रूरं समुद्दिष्टं कद्र्वा दैवादतीव हि MahāBhā. i. 18.9; PāraS. 19.576; BrahmāṇḍP. iii. 23.65; PadmP.(Ra.) 26.19; ChāndoUBh. 451.16 (*on* vii. 15.3); BṛĀraUBh. 340.19 (*on* ii. 5.16); क्षुधितमतिक्रूरं च न भुक्तिसमये संनिधापयेत् NītiVā. 25.40; TantrRā. 29.70; व्यर्थतां जग्मुः ··· यथातिक्रूरचित्तानामार्ये क्रूरशतान्यपि SkandP. i(2). 21.144; ii(1). 14.39; vi. 100.50; BrahmVaiP. iv. 85.162; BhaviP. 733B.10 (iv. 89.36); अतिक्रूरेऽप्यहिः स्मृतः DharK. 2780; हिंसा अतिक्रूरा SmṛtiCan. iv. 573.1; अतिक्रूरार्थसहितं परुषं परिकीर्त्यते PratāYaBhū. 316.6; CaitaCa. 32.10 (2); AnyāŚ.(Nī.) 64; **B** very hard न त्वक्नवमनमन्यत्रातिक्रूरकोष्ठात् (विरेचयेत्) AṣṭāSaṁ. i. 141.10 (1.27); *m. mantra* having 30 or 33 syllables त्रिंशदक्षरको मन्त्रस्त्रयस्त्रिंशदथापि वा । अतिक्रूरः स कथितो निन्दितः सर्वकर्मसु ŚāraTi. 2.102.

अतिक्रूरत्व (atikrūra-tva) *n.* excessive cruelty निर्घृणत्वमतिक्रूरत्वम् ··· प्रसज्येत BrahmSūBh.(Śaṅ.) 342.2 (*on* ii. 1.34)

अतिक्रूरमनस् (atikrūra-manas) *adj.* very cruel-minded अतिक्रूरमनाः पापा एवमादीनुपद्रवान् । चक्रे सा तस्य निर्वेदरहिता सततं परान् PadmP.(Ra.) 104.114; PāṇḍaC. 9.206.

अतिक्रूरवध (atikrūra-vadha) *m.* extremely cruel murder उग्रता भवेत् । तत्रानुभावोऽतिक्रूरवधबन्धनताडनैः BhāvPra.(Śā.) 23.17(1)

अतिक्रोध (ati-krodha) *m.* excessive anger, great anger चकर्ष दोर्भ्यामुत्पाट्य भीमो मल्लममित्रहा । विनदन्तमभिक्रोशन् (v. l. अतिक्रोधात्) शार्दूल इव वारणम् MahāBhā. iv. 12.21; KāmSū. 352.15 (6.6); ParāSm. 4.1; BṛParāSm. 8.50; सर्वे दानवपुंगवाः । वाचमूचुरतिक्रोधाज्ज्वलन्तो ललितां प्रति BrahmāṇḍP. iii. 27.18; PadmP.(Ra.) 41.74; RugVi. 63.1; SkandP. iii(3). 11.26; अतिक्रोधादुपाध्यायो विरुद्धमकरोन्मयि KathāSaSāg. iii. 6.129; NāraS. 31.14; TriṣaŚaPuC. iv. 7.280; असिः ··· अतिक्रोधाद्विवेश द्विषः Sadukti-

Ka. 206. 9; *adj.* extremely angry अतिक्रोधा योधाः ··· उदग्रं जयमापेदिरे ĀnandRa. 7. 39(40) (7)

अतिक्रोधताम्राक्ष (atikrodha-tāmrākṣa) *adj.* red-eyed with extreme anger कालनेमिर्महासुरः । ततोऽतिक्रोधताम्राक्षः शक्तिमुद्यम्य वेगवान् । स्वशक्त्या ताडयामास वसुम् HariVaṁ. 37. 518*(8)

अतिक्रोधदुर्धर (atikrodha-durdhara) *adj.* irresistible due to excessive anger उर्वीरुहमतिक्रोधदुर्धरो निशाचरः क्षिपति UdaySuKa. 80. 2.

अतिक्रोधन (ati-krodhana) *adj.* full of excessive anger न चाप्यतिक्रोधनस्तु परिहासः NāṭyaŚā. 22. 276; NītiVā. 10. 137; MātaLī. 1. 29.

अतिक्रोधवश (atikrodha-vaśa) *m.* control or influence of excessive anger जगामातिक्रोधवशं त्रिपुरारिर्महायशाः PadmP. v. 5. 2.

अतिक्रोधान्धा (atikrodhāndhā) (*f.*) blind due to excessive anger अतिक्रोधान्धापि स्मरभरसमासुग्नहृदया पयोधेः पुत्रीयं पितृजनितदर्पेव वलते CaitaCa. 262. 22 (10)

अतिक्रोधान्वित (atikrodhānvita) *adj.* full of excessive anger भक्तहेतोरहं देवि ··· अतिक्रोधान्वितः शूलं गृहीत्वान्वजयं पुरा ŚivaP. ii(2). 23. 43 (97B. 13)

अतिक्रोधिन् (ati-krodhin) *adj.* extremely angry त्वम् ··· रसं जानासि मतिमानतिक्रोधी भविष्यसि PadmP. iv. 106. 94.

अतिक्रोशत् (ati-krośat) *adj.* **A** shouting, roaring भीमः ··· विनदन्तमभिक्रोशन् (v. l. अतिक्रोशन्) शार्दूल इव वारणम् MahāBhā. iv. 12. 21; **B** lamenting greatly, weeping exceedingly देवाः ··· रुरुदुर्विह्वलाश्चातिक्रोशन्तः ŚivaP. ii(3). 19. 18 (143B. 16)

अतिक्रौर्य (ati-kraurya) *n.* excessive cruelty अतिक्रौर्यमतिक्षान्तिरत्यन्ताभीतिपातनम् । ··· सदोषता: BhaviP. 28B. 1 (i. 8. 24); नातिक्रौर्यं नातिशाठ्यं धारयेन्नातिमार्दवम् ŚukraNī. 3. 218.

अतिक्लान्त (ati-klānta) *adj.* [*f.* -ā] excessively tired वारणः ···अतिमात्रम्···अस्नेहमतिक्लान्तो भोज्यते हन्यते Hastyāyur. 64. 20 (1. 9); प्राप्ता तानवमुर्वशी रतिरतिक्लान्ता हता रोहिणी RājeKaPū. 23 = Subhāṣi. 2616.

अतिक्लिन्न (ati-klinna) *adj.* very much softened, sticky अतिक्लिन्नं ग्लानिकरं युक्तियुक्तं हि भोजनम् BhāvPra.(Bhā.) 5. 140 = BhojanKu. 216. 19.

अतिक्लिश् (ati-kliś-) IX. P. **A** to torment excessively भक्तं मां मातिक्लिश्नः Bhaṭṭi. 6. 17; IV. Ā. **B** to give trouble, to be inconvenient कुमारयतीत्यस्य सिद्धये बहुलवचनं नातिक्लिश्यते PariVṛ.(Sī.) 60. 3.

अतिक्लिश्य (ati-kliśya) *ger.* becoming greatly troubled or distressed (कस्यचित्) समस्तेष्वैतिक्लेषु परीक्षोपक्षेपादतिक्लिश्य निःशेषदुराशाविनाशाविनाशनांशुमन्मरीचिक्लिरेण तत्त्वेषु रुचिः संजायते YaśasCam. ii. 322. 18.

अतिक्लिष्ट (ati-kliṣṭa) *adj.* [*f.* -ā] **1** greatly afflicted, extremely distressed, pressed hard नातिक्लिष्टपयोधरः ··· प्रथमोपगूहनविधिः पुष्णातु वो मङ्गलम् SubhaDha. 1. 1; निराहारमतिक्लिष्टं दृष्ट्वा वैश्यं कृपामयी रुरोद BrahmVaiP. ii. 63. 9; iv. 56. 32; **2** far-fetched, difficult to establish, to be acquired or desired with great difficulty, complicated, laborious (idea, argument, indication etc.) न द्रव्याश्रयवचनः शब्दो भवेदाकृतिवादिन इत्याह । तदतिक्लिष्टम् ··· इत्युपेक्षितव्यम् TantrVā. 257. 23 (*on* i. 3. 26); वाक्येषु पुनरतिचिरतरतिरोहिताक्षरपरम्परानुसन्धानमतिक्लिष्टमदृष्टपूर्वमिति NyāyMañ. i. 356. 16; भोग्यत्वेन हि आयतनत्वमतिक्लिष्टम् Bhām. 197. 2 (*on* i. 3. 4); अतिक्लिष्टलाक्षणिकस्तुत्यर्थत्वाङ्गीकारकारणं विधिनैकवाक्यत्वादित्यनेनोक्तम् NyāySu. (So.) 51. 28 (*on* i. 2. 7); ज्ञानस्वरूप इत्यर्थस्त्वतिक्लिष्टः ŚrutaPra. iB. 292. 20 (*on* i. 2. 2); तण्डुलशब्दस्य दार्शिकहविः सामान्यलक्षकत्वकल्पनया तद्विभागप्रतियोगिनीनां शब्दानुपात्तानां देवतानां कथंचिद्बुद्धिस्थिरीकरणेन चातिक्लिष्टं कल्पनीयम् VidhiRa. 41(204. 11); अत्र शेषभाजां लोप इत्यध्याहारः । अयमतिक्लिष्टः ŚivārkaMaDī. i. 7. 4 (*on* i. 1. 0); i. 12. 8 (*on* i. 1. 0); यदुक्तं साध्यसादृश्यमूला गौण्यतिक्लिष्टा PūrvottaVāNaMā. 10. 4; 8. 17; 9. 2; अतिक्लिष्टलक्षणाश्रयणायोगात्तत्राव्याप्तिर्वज्रलेपायते CitraMī. 47. 7; यत्तु कैयटेनोक्तं तत्त्वतिक्लिष्टम् LaŚabdeŚe. ii. 475. 2.

अतिक्लीब (ati-klība) *adj.* **A** extremely impotent अतिभीरुमतिक्लीबम्··· न भजन्ति नृपं श्रियः MahāBhā. iii. 239. 4; **B** extremely negligible सात्यके अतिक्लीबमभिहितं भवता SubhaDha. 4. 16(4)

अतिक्लीबम् (ati-klībam) *adv.* with excessive delay, drawlingly नातिद्रुतं न विलम्बितं नातिक्लीबं नात्युच्चैर्नातिनीचैः स्वरैरध्ययनमभ्यस्येत् CaraS. i. 8. 24 (comm. अतिविलम्बितोच्चारणम्)

अतिक्लेद (ati-kleda) *m.* excessive moistening अतिक्लेदोऽग्निनाशनः AṣṭāSaṁ. i. 22. 21 (1. 6)

अतिक्लेश (ati-kleśa) *m.* **A** great affliction, great trouble or worry, extreme distress अतिक्लेशेन येऽर्थाः स्युः ··· मा स्म तेषु मनः कृथाः MahāBhā. v. 39. 61; योषित् ··· तद्धिता शुभमाप्नोति तत्सालोक्यम् ··· नातिक्लेशेन ViṣṇuP. vi. 2. 29; अतिक्लेशेन ये ह्यर्था धर्मस्यातिक्रमेण तु । ··· ते अर्था मा भवन्तु मे CāṇaNīDa. 16. 11; भवतस्तु···अतिक्लेशः स्यादित्यसमानम् TantrVā. 48. 4 (*on* i. 2. 29); पतिं विनातिक्लेशेन कालो याति सुधावले ĀdiP. 18. 44; अतिक्लेशेन लब्धोऽसि तान्क्लेशान्वेत्ति चेश्वरः GaṇeP. ii. 21. 40; ii. 91. 33; अतिक्लेशविवर्जितम् । पञ्चाक्षरेण जप्तं च तोयमन्नं विदुः सुखम् ŚivaP. i. 18. 154 (24B. 14); उच्चं कृत्वा चारितोऽतिक्लेशेन सम्पादितः स्वरः AbhinBhā. i. 52. 21 (*on* 2. 19); किञ्च ···अतिक्लेशेन समारब्धा वा वृत्तिः ··· शोभते NyāyRa. 3. 14 (*on* 0. 8); भावयन्ति क्वचित्तत्र नातिक्लेशो भविष्यति NyāyKu. 10. 7; **B** great or excessive pain अतिक्लेशान्सहामीह नाहं बुध्याम्यबुद्धिमान् MahāBhā. xii. 171. 41; (*fig.*) निपीय ··· जलम् ··· विषण्णोऽतिक्लेशात् ··· वमति जलभारं जलधरः SaduktiKa. 175. 2; **C** great distortion, far-fetchedness, great strain लक्षणात्तद्विदुक्त्वा नातिक्लेशो भविष्यति ŚlokaVār. 7. 216 (905. 8); वृत्तिं कल्पयतोऽतिक्लेशः इत्युपसंहरति NyāyRa. 832. 20 (*on* 6. 401); प्ररोचनाकल्पनमप्यतिक्लेशेन निर्वोढव्यम् NyāySu. (So.) 76. 24 (*on* i. 2. 22); *adj.* very painful or severe विरम्यतामतिक्लेशात्तपसोऽस्मान्मदाज्ञया MatsyaP. 157. 8.

अतिक्लेशकर (atikleśa-kara) *adj.* [*f.* -ī] causing excessive pain, causing great distress, exceedingly troublesome अतिक्लेशकरं तपस्तथाप्याचारहीनस्य न फलतीति श्रुतिः ManuBh. i. 48. 11 (*on* 1. 110); i. 365. 1 (*on* 4. 92); अतिक्लेशकरी परेषाम् । माद्यन्ति ते सम्पदमुग्रभावाः ··· लब्ध्वा Vidvanmo. 7. 10.

अतिक्लेशतस् (atikleśa-tas) *adv.* taking a lot of trouble इति मां व्यास उक्तवान् । आगतश्च ततश्चात्र वाहीकेभ्योऽतिक्लेशतः SkandP. i(2). 46. 135.

अतिक्लेशयुक्तत्व (atikleśayukta-tva) *n.* the state of having excessive trouble तस्मादागमनादावतिक्लेशयुक्तत्वेन स्वर्गफलेऽपि विरक्तेन भवितव्यम् TattvPrakā. 141B. 5 (*on* iii. 1. 9)

अतिक्लेशरूप (atikleśa-rūpa) *adj.* having the form of excessive trouble महाव्यापारोऽतिक्लेशरूपः क्रीडार्थः NyāyRa. 653. 21 (*on* 5(15). 56)

अतिक्लेशवश (atikleśa-vaśa) *m.* [Abl.] due to or because of extreme trouble नीलाम्बुदश्यामोऽतिक्लेशवशाद् हृदयादपगच्छतु AṇuBh. 325. 14 (*on* iv. 2. 13)

अतिक्लेशसह (atikleśa-saha) *adj.* who tolerates excessive pain or trouble नातिक्लेशसहो विप्र सोऽभवत्कोपनो भृशम् MārkP. 99. 7; नातिवृद्धविकारिणाम् । नातिक्लेशसहानां च शमनं हितमुच्यते KāśyaS. 238A. 37.

अतिक्लेशसाध्य (atikleśa-sādhya) *adj.* which can be accomplished with great effort, achievable with great strain अध्ययनं तावत् ··· अतिक्लेशसाध्यम् ŚivārkaMaDī. i. 27. 11 (*on* i. 1. 1); PūrvottaVāNaMā. 304. 14.

अतिक्लेशसाध्यत्व (atikleśasādhya-tva) *n.* the state of being accomplished with great effort उत्तरवेद्यपेक्षया तस्यानेकदृष्टाङ्गकपालयुक्तस्यातिक्लेशसाध्यत्वात् ŚivārkaMaDī. ii. 366. 12 (*on* iii. 3. 45)

अतिक्लेशानुषङ्ग (atikleśānuṣaṅga) *m.* connection with excessive trouble अतः स्वर्गफलस्यातिक्लेशानुषङ्गाभावात् न तत्र वैराग्यमापादनीयम् TattvPrakā. 141B. 1 (*on* iii. 1. 9)

अतिक्लेशाभाव (atikleśābhāva) *m.* absence of excessive effort or strain संबन्धग्रहणसंभवेनातिक्लेशाभावात् YuktiSneha. 156. 31 (*on* i. 1. 7)

अतिक्वाण (ati-kvāṇa) *m.* loud sound (especially of a musical instrument or lute) एतेष्विति किम् ? अतिक्वाणः JaineVyā. 125. 22 (*on* ii. 3. 68); अतिक्वाणो वर्तते KāśiVṛ. *on* iii. 3. 65; Prasā. ii. 657. 19.

अतिक्वाथ (ati-kvātha) *m.* excessive boiling अतिक्वाथादूर्ध्वं तरलयति च क्षीरजलधिं विना कल्पापायं प्रसरतितरां कोऽयमनलः SamudraMa. 2. 13.

अतिक्षण् (ati-kṣaṇ-) VIII. P. to injure or to hurt severely रक्तस्रावं न कुर्वीत न चातिक्षणुयात्तलम् Hastyāyur. 112. 9 (1. 15)

अतिक्षम् (ati-kṣam-) I. P. to forgive fully विश्वा क्षामद् देवोऽति दुरितान्यग्निः AV. vii. 63(65). 1.

अतिक्षमा (ati-kṣamā) *f.* extreme forbearance आनन्दरङ्गस्य···प्रशासतः क्षमामतिक्षमामतिप्रभावतः । यशो जनाः समन्ततः समं ततः श्रिया जगुः ĀnandRa. 8. 35.

अतिक्षमिता (atikṣami-tā) *f.* the state of having excessive forbearance नातिसहिष्णुता च नखक्षतादीनां प्रयुज्यमानानां नातिक्षमिता JayaMa. 82. 13 (*on* 2. 1)

अतिक्षय (ati-kṣaya) *m.* **i** great destruction भवितातिक्षयो घोरो नूनं स्वायंभुवेऽन्तरे VarāP. 24. 17; अवृष्टेरन्यदा तत्राभूद्दुर्भिक्षमतिक्षयम् । सचराचरजीवानां कुर्वद्दुर्वीतलेऽधिकम् PrabhāC. 7. 2; **ii** complete loss (of a lunar day) तस्मादतिक्षये तिथीनां यस्मिन्नेवाहोरात्रे चन्द्रस्यादर्शनं पूर्णोदयो वा भवति तदादृश्य-

माने चन्द्रमस्यमावास्योपवासः Aparā. 218. 3 (*on* 1. 154)

अतिक्षयादि (atikṣayādi) *adj.* complete loss (of a lunar day) etc. चतुर्थी द्वादशीमध्ये यदतिक्षयादि न तथैदमनुष्ठेयम् BālamBha. iii. 191. 9 (*on* 3. 325)

अतिक्षयिष्णु (ati-kṣayiṣṇu) *adj.* greatly thinning, very slender तथा हृतं तस्य तथा पृथुत्वं यथाभवन्मध्यमतिक्षयिष्णु JānaHa. 1. 30.

अतिक्षर् (ati-kṣar-) I. P. **i** to pass through, to overflow, to flow across सोमा॑सो दध्या॑शिरः। पुवित्र॒मत्य॑क्षरन् ṚV. ix. 63. 15; छन्दसां वै यो रसोऽत्यक्षरत् सोऽतिच्छन्दसमभ्यत्यक्षरत् AitBr. 16. 3 (440); तदत्यक्षरत्। तत्क्षीरमभवत् JaimiBr. 2. 228; 3. 18; तेषां॒ यो र॒सोऽत्यक्ष॑रत्। तानि॑ शु॒क्रिय॒जूं॑ष्यभवन् TaiĀ. v. 10. 1 (636. 14); (caus.) to allow to flow over पाद्यामपः … नातिक्षारयति BhārS'S. i. 26. 3; **ii** to go beyond, to surpass, to overtake अ॒युसानावरं॒ पृथ्व॑ति॒ क्षरन्ति॒ याम॑भिः ṚV. v. 66. 5; सर्वाणि भूतानि…न चैनमतिक्षरन्ति AitĀ. II. ii. 2. 20.

अतिक्षरितृ (ati-kṣaritṛ) *adj.* slipping down too much प्रक्षरं स्त्री तुरङ्गादेः सन्नाहे प्रखराह्वये। त्रिषु त्वतिक्षरितरि NānārthāSam. ii. 143. 1093.

अतिक्षान्ति (ati-kṣānti) *f.* extreme forbearance अतिक्रौर्यमतिक्षान्तिः …तास्ताः सदोषताः BhaviP. 28B. 1 (i. 8. 24)

अतिक्षाम (ati-kṣāma) *adj.* **i** very weak आदिराजः … ददर्श मुनिमासीनम् … नातिक्षामं भगवतः स्निग्धापाङ्गावलोकनात् BhāgP. iii. 21. 46; **ii** very thin राजन्तीमुदरेणातिक्षामेण … देवीम् … ददर्श श्रीप्रभप्रभुः TriṣaS'aPuC. i. 1. 502.

अतिक्षामतस् (atikṣāma-tas) *adv.* due to excessive weakness मनुजः …खादंस्ताम्यति चोर्ध्वदृष्टिरथवा मूर्च्छेत्यतिक्षामतः KalyāKā. 22. 83.

अतिक्षामता (atikṣāma-tā) *f.* extreme reduction अग्निसंयोगाः … तेजोधातुं प्रभावतो वर्धयन्ति यस्य प्रभावादपां संघातः क्षामक्षामो जायते यावदतिक्षामतां गतोऽन्ते न पुनः सन्तानं सन्तनोति AbhidhKoBh. 194. 10 (*on* 4. 3)

अतिक्षारत्व (atikṣāra-tva) *n.* excessiee causticity औषधस्य … अतिक्षारत्वात् … दुर्योगातियोगादुत्पद्यते KāśyaS. 156A. 36.

अतिक्षारद्रव्य (atikṣāra-dravya) *n.* excessively alkaline substance क्षारस्यापि विनष्टवीर्यसमये … अतिक्षारद्रव्यगणैश्च तद्दहनतः शक्तिः समाप्याययेत् KalyāKā. 21. 10.

अतिक्षारसेवन (atikṣāra-sevana) *n.* consuming extremely caustic (substance) °शोकातिक्षारसेवनातिसार° °प्रभृतिभिर्विशेषैर्बन्धनान्मुच्यते गर्भः SuśruS. ii. 8. 3.

अतिक्षिप् (ati-kṣip-) VI. P. [अति इत्येवंपूर्वात्क्षिपो मम् … अतिक्षिपति JaineVyā. 32. 22 (*on* i. 2. 77); CāndraVṛ. *on* i. 4. 132; KāśiVṛ. *on* P. i. 3. 80; KātanVṛ. *on* iii. 2. 47; MugdhaBo. 134. 19 (22. 1); कर्तृगेऽपि फले परस्मैपदम् …अभिक्षिपति एवं प्रति अति PrakriKau. ii. 392. 7; KośaKaTa. 2. 1470] to extend beyond, to throw excessively.

अतिक्षिपत् (ati-kṣipat) *adj.* excessively setting in motion प्राक्षितेन्द्रं पराकुर्वन्ननुकुर्वन्स पूर्वजान्। सानुजोऽतिक्षिपन्सेनाम् DvyāśraKā. 7. 67.

अतिक्षिप्त (ati-kṣipta) *adj.* **i** greatly extended अतिक्षिप्तान्यतिक्षिप्तान् …उपन्यासान्कृत्वा वेश्मानुसारिणः MahāBhā. xii. 101. 25; नास्येन्द्रियमनेकाग्रं नातिक्षिप्तमनोरथः। … ईदृक्सांख्यो विमुच्यते MahāBhā. xii. 228. 36; **ii** being away (from homeland) बलव्यसनानि … अतिक्षिप्तमुपनिविष्टम्…अन्धमिति ArthS'ā. iii. 35. 4 (8. 5); iii. 37. 3 (8. 5); NītiS'ā. 14. 69; 14. 81; आच्छेदतिक्षिप्तमधोगतं चोपरि वर्तयेत् SuśruS. iv. 3. 18; *n.* upwards dislocation (of a bone) अतिक्षिप्ते द्वयोः सन्ध्यस्थ्नोरतिक्रान्तता वेदना च SuśruS. ii. 15. 7; ii. 15. 5; तत्र सन्धिमुक्तं (भग्नं) षड्विधम् – उत्पिष्टम्…अतिक्षिप्तम् AṣṭāSam. ii. 300. 23 (6. 32); SiddhYo. 46. 2; *m.* instruction (to an elephant) in which (the prick of the elephant goad) is extended ahead सृणिः प्रसार्यतेऽग्रे यदातिक्षिप्तः स कथ्यते Mānaso. iv. 3. 589.

अतिक्षिप्तसन्धि (atikṣipta-sandhi) *adj.* with protruding joints अथ द्वापरे…शरीरमुत्पद्यते … अतिक्षिप्तसन्धि KāśyaS. 65B. 37.

अतिक्षिप्र (áti-kṣipra) *adj.* [*f.* -ā] very swift भवत्येवातिक्षिप्रा देवतेत्याहुः TaiS. II. i. 1. 1; लवणांकुशौ। अतिक्षिप्रपरावर्तौ तावुदारस्थाविव। आरेभाते परिक्रीडां परसैन्यमहाह्रदे PadmP.(Ra.) 101. 47.

अतिक्षिप्र (ati-kṣipra) *adv.* (in cpd.) very rapidly अतिक्षिप्रचिरोत्पन्नं कृशद्रव्यमपाहितम्। अप्रतिष्ठितसंस्थानं गृहं नमति पञ्चधा SamarāSū. 48. 108.

अतिक्षिप्रत्व (atiksipra-tva) *n.* the state of being very swift क्षेपिष्ठत्वेति। अतिक्षिप्रत्वेत्यर्थः LaCandr. 511. 19.

अतिक्षीण (ati-kṣīṇa) *adj.* [*f.* -ā] very weak, very much reduced अतिक्षीणबलमांसशोणितम् … अचिकित्स्यं विद्यात् CaraS. vi. 19. 9 (1941 Ed.); काले भगवतस्तस्य अतिक्षीणः पिता तदा।…श्वशुरं पर्यपृच्छत VarāP. 162. 21; नाडी … अतिक्षीणा च शीता च जीवितं हन्त्यसंशयम् S'āṅgaS. i. 3. 5; सोऽयं संप्रति शीतदीधितिरतिक्षीणाङ्गकान्तिः श्रियम् … समीहते MohaRāPa. 5. 23; यस्मिन्नहनि चन्द्रमाः सोमः न दृश्येत आगमादिना अतिक्षीण इत्युपलभ्यतेताममावास्यामुपवसेत् VīraMi.(Saṁskāra.) 882. 18.

अतिक्षीणतर (atikṣīṇa-tara) *adj.* very lean (गजः) अतिक्षीणतरः …। दीनाख्यः कुरुते दीनं भूभुजम् YuktiKa. 202. 14.

अतिक्षीबता (atikṣība-tā) *f.* excessive intoxication क्षणदाचरः प्रतिक्षणमतिक्षीबतया प्रतिपक्षबलमिव स्वबलमपि भक्षयन्…आजगाम RāmāCam. 6. 57(4)

अतिक्षीबत्व (atikṣība-tva) *n.* excessive intoxication अतिक्षीबत्वसंक्षोभक्षुत(?त्)क्षामक्षमामयैः।…समीपस्थापदः सभाः BhaviP. 84A. 29 (i. 43. 23)

अतिक्षुण्ण (ati-kṣuṇṇa) *adj.* thoroughly discussed or investigated अर्थश्चायमतिक्षुण्ण ऋजुविमलादिषु PrakaPañ. 487. 9; साधुत्वम् … प्रमितवृत्त्यार्थप्रत्यायकत्वं वेति कौस्तुभ एवातिक्षुण्णम् BhaṭṭDī. i. 52. 4 (*on* i. 3. 8)

अतिक्षुत्परीत (atikṣut-parīta) *adj.* overcome with excessive hunger मृगान्हत्वा श्रान्तोऽतिक्षुत्परीतो विकुक्षिरेकं शशमभक्षयत् ViṣṇuP. iv. 2. 16.

अतिक्षुद्र (ati-kṣudra) *adj.* [*f.* -ā] **A i** extremely mean इदं तु यदतिक्षुद्रं वार्ष्णेयार्थे कृतं त्वया। … नैतत्त्वय्युपपद्यते MahāBhā. vii. 118. 13; शोकम् …अतिक्षुद्रम् … परित्यज्य युद्धायोपतिष्ठ GītāBh.(Rā.) 46. 2 (*on* 2. 13); अतिक्षुद्रं रौद्रं शिरसि करदानेन निधनं जगन्नाथाद् वव्रे Nārāy. x. 89. 4; **A ii** very small अतिक्षुद्रं द्विचक्रं च नवीनजलदप्रभम्। दधिवामनाभिधम् (गृहम्) BrahmVaiP. ii. 21. 63; तस्यामतिक्षुद्रसभासरस्यामक्रूरदंष्ट्रावलिना मुखेन। जग्राह वीरः स विविच्य शुद्धां वाणीं मृणालीमिव राजहंसः RāmC. 23. 58; मुख्याः मुखजाः विप्रुषो द्रप्सबिन्दवोऽतिक्षुद्राः बाह्यद्रव्येषु पतिता अपि नोच्छिष्टतां जनयन्ति ManvaVi. 681. 27 (*on* 5. 141); **A iii** of a very short duration शरज्ज्योत्स्नी रासे विधिरजनिरूपापि निमिषादतिक्षुद्रा तासां यदजनि न तद्विस्मयपदम् UjjvaNīMa. 467. 5; **B** very insignificant, of no worth or value का नाम सन्ध्यावन्दनस्यातिक्षुद्रस्यावश्यानसंभावना PrakaVi. 950. 15; यत्तु कैश्चिज्जल्पितम् … तदतिक्षुद्रम् S'rutaPra. ii. 197. 4 (*on* i. 4. 8); किं गतमेतैरतिक्षुद्रैः … वयम् … अपहरिष्यामः सुधाम् NīlaVi. 119. 14; **C** very low, extremely wicked ऊर्जे न भक्षयेत् क्षौद्रमतिक्षुद्रगतिप्रदम् SkandP. iv. 6. 99; रक्षोजातिस्त्वतिक्षुद्रा हन्तुं शक्या नोर्जस्वलैरपि PāṇḍaC. 9. 212.

अतिक्षुद्रधन्धना (atikṣudra-dhandhanā) *f.* extremely unimportant discussion घटश्चेत्यत्राप्यापत्तेरित्यास्तामतिक्षुद्रधन्धनयेति VaiyāBhū. 216. 16 (*on* 47)

अतिक्षुध् (ati-kṣudh) *f.* excessive hunger यच्चातिक्षुद्वशानुगः भुङ्क्ते … तच्च क्रमविरुद्धं स्यात् CaraS. i. 26. 99; मरीचिः … अत्यन्तवृष्ट्यनावृष्टी अजीर्णातिक्षुधाविव। प्रभावेनागदेनेव जगतोऽप्यपसारयन् TriṣaS'aPuC. i. 6. 57; अतिस्थौल्यादतिक्षुत्तृट्प्रस्वेदश्वासनिद्राताः (भवेयुः) AṣṭāSam. i. 125. 13 (1. 24)

अतिक्षुधार्त (atikṣudhārta) *adj.* [*f.* -ā] overcome with excessive hunger, extremely hungry निदाघतैक्ष्ण्यादिह दुष्टसत्त्वाः क्षोभं गवां कुर्युरतिक्षुधार्ताः Yādavā. 5. 13; अतिक्षुधार्ता सततं काकसत्त्वेति सोच्यते AnaṅgaRa. 4. 17.

अतिक्षुधित (ati-kṣudhita) *adj.* very hungry अतिक्षुधितस्य चिरकालाद् भक्तं समागतम् KathāK. 44. 5; *n.* excessive hunger अतिक्षुधिते नाभ्यासः क्रियते बुधैः S'ivS. 3. 44.

अतिक्षुभित (ati-kṣubhita) *adj.* very much agitated, very much enraged अक्षिपदतिक्षुभितः स जवाच्चतुर्दश निशाटभटान् Rāgh. 8. 62.

अतिक्षुल्लसर्ग (atikṣulla-sarga) *adj.* created as very small अतिक्षुल्लसर्गश्चायं मार्गो यथा न देवोऽपि ग्रहीतुं शक्नोति महिलानां हृदयम् YaśasCam. ii. 63. 1.

अतिक्षेपीयस्ता (atikṣepīyas-tā) *f.* the state of being excessively speedy अतिक्षेपीयस्तया तु युगपत्ता दृष्टविरुद्धा न कल्प्यते (रश्मीनाम्) NayaVi. 72. 4 (*on* i. 1. 4)

अतिक्षेम (ati-kṣema) *n.* great safety, great happiness तस्मिन् यातुरतिक्षेमं गमनागमनं सदा VasiS. 37. 214; यदि क्षेमं निजं वाञ्छसि (v. l. अतिक्षेमं निजं वाञ्छति) BhāmiVi. 4. 6.

अतिक्षोद (ati-kṣoda) *m.* excessive scrutiny, too much investigation अलमतिक्षोदेन NyāyMañ. i. 289. 19; PadMañ. *on* KaśiVṛ. *on* P. ii. 3. 65.

अतिक्षोभन (ati-kṣobhana) *n.* heavy stirring धूमप्रायः प्रतिमुहुरतिक्षोभनोद्भ्रान्ततेजाः कारीषाग्निः…घोषवह्निः…भाति निर्विश्यमानः SubhāRaK. 12. 10.

अतिक्षोभम् (ati-kṣobham) *adv.* very harshly भगवानपि सर्वात्मा नातिक्षोभं प्रवायति Rāmā. v. 11. 63.

अतिक्षोभित (ati-kṣobhita) *adj.* very much agitated अतिक्षोभितश्चाब्धिरुद्वेलो जायते BrahmP. 209. 8.

अतिखञ्जत् (ati-khañjat) *adj.* excessively limping तेनातिखञ्जतोऽश्वस्य

स्तब्धं पर्व च जायते AśvaVai. 59.2.

अतिखट्व (ati-khaṭva) *adj.* [*f.* -ā] gone beyond the bedstead अतिखट्वः अतिमाल इत्यत्रान्तर्यतो विवृतस्य विवृतः प्राप्नोति MahāBhā. i. 15.13 (*on* i. 1.0); अतिक्रान्तः खट्वामतिखट्वः JaineVyā. 61.7 (*on* i. 3.81); अतिखट्वाय JaineVyā. 375.6 (*on* v. 2.108); अतिखट्वे निषेहि JaineVyā. 375.15 (*on* v. 2.110); CāndraVṛ. *on* ii. 2.24; KāśiVṛ. *on* P. i. 1.48; अतिक्रान्तः खट्वामतिखट्वः KāśiVṛ. *on* P. ii. 2.18; vi. 1.68; vi. 2.2; अतिखट्वेन ब्राह्मणकुलेन KāśiVṛ. *on* P. vii. 3.105; अतिखट्वायेत्यत्र ··· याडागमो न भवति KāśiVṛ. *on* P. vii. 3.113.

अतिखट्विका (atikhaṭvi-kā) *adj.* (*f.*) (little one) gone beyond bedstead अतिक्रान्ता खट्वाम् अतिखट्विका JaineVyā. 367.31 (*on* v. 2.53); CāndraVṛ. *on* vi. 1.73; अल्पा अतिखट्वा अतिखट्विका KāśiVṛ. *on* P. vii. 3.48.

अतिखण्डयमान (ati-khaṇḍyamāna) *adj.* being severely bitten अतिखण्डयमानमधरं धत्ते न केशग्रहे AmaS. 106.

अतिखन् (ati-khan-) I. P. to dig more (than the prescribed measure) नैता मात्रा अतिखनति ĀpaŚS. ii. 2.8; HirŚS. i. 6.95.

अतिखर (ati-khara) *adj.* **i** very harsh (sound or wind) इमे रुधिरधाराभिर्वर्षन्तोऽतिखरस्वनाः Rāmā. iii. 23.4 (v. l. of D 5-7); भुवनमतिखरखुरघोषतुलितमेघनिस्वनं रुद्धगात्रं मुक्तवल्गकं नाम AvantiKa. 67.13; क्वचिदतिखररवसंभृतकक्षम् (दयिते वनं पश्य) PadmP.(Ra.) 42.48; मरुतोऽतिखरा ग्रीष्मे Kāvyālaṅ.(Ru.) 7.25; NānārthāSaṁ. ii. 143.1094; ViśvaLoK. 307.183; **ii** very sharp (arrow) खरस्यातिखरैः शरैर्दशरथात्मजः । दारितः RāmāMañ. 126.23; अतिखर क्षुरु(?र)प्र° ··· °अश्ववारम् ··· कुम्भकसैन्यं भङ्गमगमत् SthānṬ. 402B. 6; **iii** very hot (rays of the sun) अतिखररविरश्मीपांशुसंपूर्णभूमिः HārīS. i. 4.5; मध्याह्नेऽतिखरे निदाघसमये तापो घनो वर्तते SārṅgaPa. 3861; कनककलशश्रेणी ··· अतिखरकराघातैः ··· शिथिलीकृता SūktiMu. 107.4; **iv** very hard (stone, tree) लघुर्विरूपोऽतिखरः···करोति गोमेदमणिर्विनाशम् YuktiKa. 106.14; किराती कीर्णान्यालोक्य रत्नान्यतिखरखदिराङ्गारशङ्कां करोति SūktiSu. 174; *m. n.* a medicinal plant अतिखरः औषध(?धि)विशेषः Liṅgānu.(He.) 126.4.16; Liṅgānu.(Sā.) 123.8; Liṅgānu.(Para.) (154).3743; अतिखरम् । अर्थस्तु लोकादवसेयः GaṇRa. 2.75 (117); KalpaK. 480.175; KośaKaTa. 2.2798.

अतिखरत्व (atikhara-tva) *n.* excessive roughness अतिखरत्वमङ्गानामतिश्लक्ष्णता वा KāśyaS. 115B. 20.

अतिखर्व (ati-kharva) *adj.* [*f.* -ā] **i** very short (in height) कोऽयं नाथ ···। अतिखर्वजनाकारः ··· अतिकुत्सितः BrahmVaiP. iv. 30.14; iv. 47.87; नात्युच्चं नातिखर्वम् ··· कुमारगुप्तम् ··· ददृशतुः HarṣaC. 196.8; अनतिदीर्घा नातिखर्वा (चित्रिणी) RatiRaha. 1.14; अतिखर्वो(?र्वा)णीति विन्ध्यपर्वताग्रेषु गर्वात् परिभवं बबन्ध AvantiKa. 159.6; नातिखर्वं नातिविस्तीर्णम् ··· देवतागृहमकारयत TilaMañ. 33.21; PañcSā. 1.32; RatiMañ. 5; **ii** very short (in duration) हेमन्तकाले अतिखर्वे तदहस्तत्र किंचिदूने चतुर्दशघटिकामात्रे आवर्तनम् CaturCin. iii(2). 329.1.

अतिखर्वता (atikharva-tā) *f.* excessive dwarness (i. e. humiliaty) त्वां विधाय युधि क्रोधाद्ग्रान्धारेयं बबन्ध यः । सोऽप्यस्मिन् विनयाद्धत्ते···अतिखर्वताम् PāṇḍaC. 13.644.

अतिखल (ati-khala) *adj.* very wicked युवां दुष्टावतिखलावपराधकरौ मम SivaP. ii(5). 24.16 (249A. 4)

अतिखलत्व (atikhala-tva) *n.* great wickedness क्लिष्टधियां दोषं वक्ष्यत्यतिखलत्वम् SubhāRaK. 38.48.

अतिखाता (áti-khātā) *adj.* (*f.*) dug deeper than (the measure) (वेदिः) पितृदेवत्यातिखाता TaiS. II. vi. 4.2; TaiBr. III. ii. 9.10; VaikhāŚS. 5.1.

अतिखादिन् (atikhād-in) *adj.* habitually eating too much, gluttonous प्रद्विषन्ति परिख्यातं राजानमतिखादिनम् MahāBhā. xii. 88.17.

अतिखिन्न (ati-khinna) *adj.* [*f.* -ā] **i** very much worried or fatigued विहंगमः ।··· प्राणांस्त्यजति दुस्त्यजान् । अयमस्य (v. l. अतिखिन्नः) शरीरेऽस्मिन् प्राणः ··· विद्यते Rāmā. iii. 64.3; तं दृष्ट्वा पतितं भूमौ जीवन्तमिव वृत्रहा । चिन्तामापातिखिन्नाङ्गः DevīBhāP. vi. 2.9; PāṇḍaC. 17.186; **ii** very much dejected or disappointed (सुमन्त्रः) अतिखिन्नं नृपं दृष्ट्वा कैकेयीं समपृच्छत AdhyāRā. ii. 3.43; PariPar. 2.680; अतिखिन्नां मातरमानन्दय GopāKeCan. 113.10; 63.20; PrabhāC. 4.9; 9.20; प्रणीतेक्षणेयं मुहुस्ते पदव्याम् ···। अलब्धं ततस्त्वाममे(?वे)त्यतिखिन्ना StavMā. 253.5; ViraMi. 499.28 (*on* 2.68-72); (मुनीनाम्) अनवाप्य शक्रमतिखिन्नवर्त्मणां न वियुज्यते करतलं कपोलतः Manmatho. 4.2 (641.10)

अतिखिन्नवत् (atikhinna-va(n)t) *adj.* one who is greatly disheartened श्रावकव्रतम् । ग्राहितोऽहं परं लोकैर्हास्यमानोऽतिखिन्नवान् PārśvC. 6.129.

अतिखेत्त्री (ati-khettrī) *adj.* (*f.*) worrying oneself very much पाता न मां त्वम् ··· अखेदिता यद्यधुनातिखेत्त्रीम् DvyāśraKā. 10.50.

अतिखेद (ati-kheda) *m.* great exhaustion तपस्यतः···प्रववृते महास्वेदोऽतिखेदतः SkandP. iv(2). 59.108; कायं नीहारहारावलिमिलितमरुत्ताण्डवेनातिखेदः ।··· प्रासेयम् ··· जरा मे GopāKeCan. 55.2; सुरतजमतिखेदम्···हन्यादमृतफलम् BhojanKu. 56.8.

अतिखेदना (ati-khedanā) *adj.* (*f.*) causing great pain संश्लक्ष्णगुणातिखेदना···कच्छपिका KalyāKā. 11.16.

अतिखेदयितव्य (ati-khedayitavya) *adj.* to be teased too much नातिखेदयितव्योऽहं प्रियः प्रमदया ···। मानश्च विरलः कार्यः SṛṅgāTi.(Ru.) 2.77.

अतिखेदवत् (atikheda-va(n)t) *adj.* possessed of great dejection मुदमजहादतिखेदवानुलूकः ।···विधौ विधुरत्वमभ्युपेते HarVi. 28.75.

अतिखेदिता (ati-kheditā) *adj.* (*f.*) greatly worried ततोऽस्रसरितश्छेदे विप्रलापेऽतिखेदिता ।··· केकयैवमभाषत PadmP.(Ra.) 32.127.

अतिखेदिन् (ati-khedin) *adj.* greatly worried दुःखार्णवनिमग्नानां यातायातेऽतिखेदिनाम् ।··· काश्येका मुक्तिसाधनम् SkandP. iv(2). 85.55.

अतिखेया (ati-kheyā) *adj.* (*f.*) to be dug deeper than (the prescribed measure) वेदिः···नातिखेया KāṭhS. 25.4; KapiKaS. 39.1.

अतिखेल (ati-khela) *adj.* extremely sportive खेऽतिखेलम्···प्रादुरास विषमे समं तमः RāmC. 2.62.

अतिखेलन (ati-khelana) *n.* excessive playing सदा प्रीत्या मुदा चातिखेलनं चक्रतुः सुतौ SivaP. ii(4). 19.5 (216B. 6)

अतिख्या (ati-khyā-) II. P. **A i** to overlook, to neglect मा नो अति ख्य आ गहि ṚV. i. 4.3 = AV. xx. 57.3 = AV. xx. 68.3; विश्वे अर्यो विपश्चितोऽति ख्यः ṚV. viii. 65.9; मा नो गव्येभिरश्व्यैः सहस्रेभिरति ख्यतम् ṚV. viii. 73.15; **A ii** to pass over, to abandon मा नो मर्ताय रिपवे ··· पुरो रुद्रावति ख्यतम् ṚV. viii. 22.14; **B** to survey वशा समुद्रमत्यख्यद्रुद्रा ज्योतींषि बिभ्रती AV. x. 10.15; AV.(P.) xvi. 108.5.

अतिख्यात (ati-khyāta) *adj.* very famous बलमभि(v. l. ति)ख्यातं विज्ञाय दृढधन्विनाम् (राजा) MahāBhā. i. App. 80 (53); षड्विंशकमिति ख्यातं (v. l. तद्विशेषमतिख्यातं) यत्परात्परम् MahāBhā. xiii. 14.181; i. 119.24; अतिख्याते ··· वर्णे जन्म भवादृशाम् । आचारश्चान्यथा दुष्टस्त्यक्तव्यः GaṇeP. i. 76.33.

अतिख्यातकुल (atikhyāta-kula) *adj.* whose lineage is very famous पुरुषैः···अभि(v. l. ति)ख्यातकुलैर्वीरैः MahāBhā. iii. 16.10; *n.* famous lineage अयोध्यायामतिख्यातकुलोत्पन्नः ··· परीक्षिन्नामा SkandP. v(2). 84.2.

अतिख्याति (ati-khyāti) *f.* great renown or fame अतिख्यातिमतिधैर्यं च साधय SkandP. iii(3). 11.28; रूपेणातिख्यातिमासेदुषी स्वा । उद्वाहार्थं दीयतां भूप कन्या NemiNir. 11.48.

अतिग (ati-ga) *adj.* [*f.* -ā] [DEBRU. p. 78] **A** going beyond, overreaching (space, time, number etc.) °वयोतिगान् ।···मन्त्रकालेऽपसारयेत् ManuSm. 7.149; तुङ्गं वेश्म ··· संख्यातिगाः संपदः SatTrayī. 252; बाणैः···। आयुर्देहातिगैः पीतं रुधिरं तु पतत्रिभिः RaghuVa. 12.48; संकोचेनैव दोष्णां मुहुरभिनयतः सर्वलोकातिगानाम् MudrāRā. 1.2; **B i** overcoming, conquering, subduing शोकातिगो मोदते स्वर्गलोके KāṭhU. 1.12 = 1.18; MaitreU. 1(4).9; न वनं गन्तुकामस्य त्यजतश्च वसुंधराम् । सर्वलोकातिगस्येव लक्ष्यते चित्तविक्रिया Rāmā. ii. 16.59; (गङ्गा) मानिनी मान्या मनोरथपथातिगा SkandP. iv(1). 29.134; क्रिमौषधपथातिगैरुपहतो महाव्याधिभिः MudrāRā. 6.15 (29); (महीपतिः) परोपतापपैशुन्यमात्सर्येर्ष्यानृतातिगः NītiSā. 4.17 = AgniP. 238.10; ऊर्मिषट्कातिगं रूपं तदस्याहुर्मनीषिणः NyāyMañ. ii. 77.27 = SyādvāMañ. 8 (116); YaśasCam. i. 134.2; ii. 391.15; विरजस्तमसः स्युर्द्वयातिगाः AmaK. 1441 = ŚabdaRa.(Vā.) 2397; KośaKaTa. 1.5709; **B ii** surpassing, outdoing अयमेकोऽत्यगात् (v. l. °तिगः) सर्ववेगेन वाहान् MahāBhā. i. 88.17; कीर्तिमांस्तस्य पुत्रोऽभूत् सोऽपि पश्चा(v. l. सवितृश्चा)तिगोऽभवत् MahāBhā. xii. 59.96; नमः । सुवर्चसेऽथ वीराय शूराय ह्यतिगाय च VāyuP. i. 24.211 (?111); वपुःप्रकर्षेण जनातिगेन Kirātā. 3.2; सर्वभुवनातिग लोके नोपमानमसि नाप्युपमेयः Kirātā. 18.34; SiśuVa. 13.17; शक्तिमैविष्यति जनातिगा PadmP.(Ra.) 7.219; रम्यमेतदरम्यं वा कः परिच्छेत्तुमर्हति । किं तु द्वयातिगं चित्तमद्य नौ पश्यतोरभूत् AnarghaRā. 2.42; त्रैलोक्यातिगमेव वीरधवलक्षोणीपतेः पौरुषम् HammiMaMa. 2.16; **B iii** transgressing, violating शास्त्रातिगः स्मृतो मूर्खः BaudhDS. i. 5.66; आर्यशास्त्रातिगे क्रूरे MahāBhā. iii. 31.40; **B iv** beyond the range of यत्रत्यावनिपालयागविधिषु प्रत्यक्षमक्षातिगो देवः स्वं हविराबिभर्ति EI. xv. 59.19.

अतिगङ्ग (ati–gaṅga) *adj.* who has crossed the river Gaṅgā (गोस्त्रियोरुपसर्जनस्य) अतिगङ्गः PrakriKau. i. 525. 1 (comm. गङ्गामतिक्रान्तः)

अतिगच्छत् (ati–gacchat) *adj.* passing, elapsing (of time) तेषां माता···। अनागच्छत्सु पुत्रेषु भैक्ष्यकालेऽतिगच्छति MahāBhā. i. 181. 37; कालेऽतिगच्छति । देव्यां सत्त्वसमावेशवार्ता प्रावर्तयत् BṛKathāS'loSaṁ. 5. 83.

अतिगञ्ज (ati–gañja) *m.* one of the Yogas (a period of time during which the joint motion in longitude of the sun and the moon is increased by 13° 20' degrees) (योगाः) अतिगण्डः सुकर्मा च···तत्रातिगञ्जो गञ्जोऽपि KalpaK. 406. 10.

अतिगणशस् (atigaṇa–śas) *adv.* in large numbers or groups गणयन्तोऽतिगणशः ··· गणकाः गणिताशयाः (समागताः) ParamāKā. 27. 72.

अतिगण्ड (ati–gaṇḍa) *m.* **1** one of the Yogas (a period of time during which the joint motion in longitude of the sun and the moon is increased by 13° 20' degrees) गण्डातिगण्डशूलं च ··· वर्जयेत् BṛhaspaSm. 258. 184; VasiS. 15. 1; 15. 5; वर्जं(र्ज्ये)···व्यतीपातातिगण्डयोः MatsyaP. 253. 7; Mānaso. iii 1. 10; घटिकाः ··· विवर्जयेत् । षट् षड् गण्डेऽति(? ति)गण्डे च AgniP. 127. 1; BrahmVaiP. iv. 96. 78; YaśasCam. i. 318. 15 (comm.); विष्कम्भशूलगण्डाश्चाप्यतिगण्डोऽथ वज्रकम् ĪśānS'iPa. ii. 26. 23; ii. 26. 24; DharK. 592; MediK. 45. 38; विष्कम्भगण्डशूलाश्चातिगण्डो वज्रवैधृती MalliC. 2. 645; वधरुचिर्जातोऽतिगण्डे JātaPā. 9. 97; वज्रेऽतिगण्डे वा ।··· असाध्या ज्वरिणः HāriS. ii. 6. 6; षट्कं गंडातिगंडयोः ।···नाड्यस्तु गर्हिताः NāraS. 7. 4; **2** name of a son of Viṣṭi and Viśvarūpa गण्डो नामाभवत्पुत्रो ह्यतिगण्डस्तथैव च BrahmP. 165. 29; **3** large cheek or temple [Apte]; *adj.* having large cheeks or temples अतिगण्डोयोगभेदे बृहद्गण्डे तु वाच्यवत् MediK. 45. 38.

अतिगत (ati–gata) *adj.* [*f.* –ā] **i** passed, elapsed (of time) दशाहेऽतिगते ··· (नृपात्मजः) श्राद्धकर्माण्यकारयत् Rāmā. ii. 71. 1; मूर्धजेषु च जग्राह समयेऽतिगते तु सा HariVaṁ. 154*; कतिपयेष्वद्रौ मासेष्वतिगतेषु सः ··· आराधयामास पुण्डरीककरम् YogVā. v. 49. 20; दशाहोऽतिगतस्तीव्रमेतयोर्युध्यमानयोः PadmP.(Ra.) 75. 5; अस्माकमतिगताश्चत्वारोऽपि ते वर्षकल्पा वार्षिकमासाः TilaMañ. 223. 21; वत्सरशताष्टकेऽतिगते ।··· समजनि वलभ्याः । भङ्गः PrabhāC. 44. 1; आद्ये यामे परमतिगते मन्दमुन्मील्य नेत्रे MayūSaṁ. 2. 60; **ii** gone, gone away from, crossed, absent from सप्तमराशौ यदि चोदग्दक्षिणेन नातिगतः । चन्द्रः ···छायामौर्वीं तदा विशति BṛSaṁ. 5. 10; अतिगतः छन्दः (कामः) यस्माद्रूपात् तत् अतिच्छन्दं रूपम् BṛĀraUBh. 568. 19 (*on* iv. 3. 21); **iii** gone or travelled beyond प्रतिवेशगृहातिगतायाः षट्पणः ।··· परगृहातिगतायाश्चतुर्विंशतिपणः ArthS'ā. ii. 25. 3; ii. 25. 5 (3. 4); **iv** preceding, gone before कर्मप्रधानेऽतिगते च काण्डे वाक्यत्वमाख्यातपदप्रयुक्तम् SaṁkṣeS'ā. 1. 488 (i. 353. 13); अभिव्यक्तिर्यद्यतिगता(? अनागता)वस्थात्यागेन वर्तमानावस्थालाभ इत्युच्यते SāṁkhyaPraBh. 130. 1 (*on* 5. 60); **v** surpassed विलोक्य कलनातिगतं गुणौघम् EI. x. 21. 10; **vi** gone beyond, beyond the reach अतिगतार्कमयूखपथावधिर्यदि तमोघनभूमिषु मोदते RāmC. 7. 59; शंभो···अतिगतकलुषप्रपञ्च S'ivaP. vii(2). 31. 2 (582B. 6); अतिगतसखीहस्तोन्मानक्रमं दिवसक्रमैः ··· कुचद्वयम् SubhāRaK. 15. 45.

अतिगतजन (atigata–jana) *adj.* deserted by people, having no human beings, desolate (यं तस्करः) अतिगतजने अत्यन्तविगतजने देशे विसृजेत् ChāndoUBh. 399. 10 (*on* vi. 14. 1)

अतिगति (ati–gati) *f.* very deep entry (नेत्राणि बस्तींश्च) अप्राप्त्यतिगतिक्षोभकर्षणक्षणनस्रवाः ।··· तेषां दोषाः CaraS. viii. 5. 5 (1941 Ed.) (comm. अतिगतिः दूरप्रवेशः); ज्ञात्वा शोणितभेदमप्यतिगतिं संस्थापयेदौषधैः KalyāKā. 21. 48; *adj.* involving excessive discharge अर्शोभेदाः षडतिगतयो विंशतिश्च प्रमेहाः Jīvān. 87. 3.

अतिगत्वर (ati–gatvara) *adj.* very swift वाहनैरतिगत्वरैः···प्रापुर्वैद्याधरा गणाः PadmP.(Ra.) 81. 103.

अतिगद्गद (ati–gadgada) *adj.* **i** (of persons) of faltering (speech), with throat choked up (शिवः) पुलकितसर्वाङ्गः साश्रुनेत्रोऽतिगद्गदः BrahmVaiP. i. 3. 24; **ii** (of throat, speech etc.) choked up, faltering or indistinct (due to emotions) न शशाक प्रभाषितुम् । अतिगद्गदकण्ठत्वात् GaṇeP. ii. 137. 44; (सा) सुरेरुपाश्रयं प्रायादतिगद्गदशब्दभूः PrabhāC. 175. 10; (वृत्रः) प्रोवाच ··· प्रेम्णातिगद्गदगिरा DevīBhāP. vi. 4. 6; दुःसाध्या सुरतेऽतिगद्गदरवा ··· हस्तिनी AnaṅgaRa. 1. 13.

अतिगद्गदम् (atigadgad–am) *adv.* with a choked up throat किम् ··· भाषसे चातिगद्गदम् PāṇḍaC. 10. 134.

अतिगन्तुम् (ati–gantum) *inf.* to run away अजिघांसत् अतिगन्तुमैच्छत् पलायितुं प्रारभतेत्यर्थः AitUBh. 262. 11 (*on* 3. 3)

अतिगन्तृ (ati–gantṛ) *adj.* surpassing, overtaking अयमेकोऽत्यगात् (v. l. अतिगन्ता) सर्ववेगेन वाहान् MahāBhā. i. 88. 17.

अतिगन्ध (ati–gandha) *adj.* having very strong smell, exuding overpowering smell निर्गन्धमतिगन्धं वा तत्पुष्पं हृच्छिरोरुजम् । कुर्यात् AṣṭāSaṁ. i. 50. 18 (1. 8); *m.* **i** sulphur [*n.* PW] गन्धकः···पूतिगन्धोऽतिगन्धश्च RājNi. 117. 13; **ii** kind of fragrant grass भूतृणम् ··· बधिरश्चातिगन्धश्च DhanvNi. 360. 15; **iii** kind of Jasmine मुद्गरः···वृत्तपुष्पोऽतिगन्धश्च गन्धराजः DhanvNi. 369. 20; अतिगन्धो गन्धराजो जनेष्टः KalpaK. 277. 254; **iv** the tree *Michelia campaka* स्थिरपुष्पस्तु चम्पकः । अतिगन्धः KalpaK. 276. 244; **v** the tree *Terminalia catappa* क्रोष्टुफलोऽतिगन्धस्तापसद्रुमः KalpaK. 284. 318.

अतिगन्धक (atigandha–ka) *m.* kind of fragrant grass भूतृणः···गुच्छलस्त्वतिगन्धकः KalpaK. 289. 358.

अतिगन्धद्रव्य (atigandha–dravya) *n.* very fragrant substance अम्बरम् । नाकेऽतिगन्धद्रव्ये च TrikāS'e. iii. 3. 327; जनातिगन्धद्रव्येषु स्याज्जनी जननी जनिः S'abdaRa.(Su.) 4. 232.

अतिगन्धवह (ati–gandhavaha) *adj.* surpassing the wind, more swift than wind अधिरुह्य वाहमतिगन्धवहम् Acyutarā. 5. 44.

अतिगन्धविलेपन (atigandha–vilepana) *n.* very fragrant ointment वेदवीणामृदङ्गैश्च नातिगन्धविलेपनैः । तथा मे जायते प्रीतिर्यथा श्रुत्वा ···। इतिहासपुराणानि वाच्यमानानि वाचकैः BhaviP. 171B. 9 (i. 116. 127)

अतिगन्धाढ्य (atigandhāḍhya) *adj.* very fragrant पङ्कजं चातिगन्धाढ्यमपश्यद्वनीपतिः DevīBhāP. vi. 21. 23.

अतिगन्धादि (atigandhādi) *adj.* giving a very bad smell etc. दुष्टो व्रणोऽतिगन्धादिः शुद्धलिङ्गविपर्ययः RugVi. 42. 8.

अतिगन्धालु (atigandhālu) *f.* name of the plant *putradātrī* पुत्रदात्री ··· वृत्तपत्रातिगन्धालुः RājNi. 333. 17.

अतिगन्धिका (ati–gandhikā) *f.* name of a plant हपुषा विपुषा विश्रा विश्रगन्धातिगन्धिका DhanvNi. 70. 20.

अतिगन्धिन् (ati–gandhin) *adj.* giving out a very bad smell, stinking मूत्रम् ··· अतिगन्धि सवेदनम् ··· अप्रशस्तम् KāśyaS. 47B. 30.

अतिगभीर (ati–gabhīra) *adj.* [*f.* –ā] **i** very deep (as of water) अतिगम्भीर(v. l. अतिगभीर)मवगूरणं शोकसागरस्य UttaRāC. 3. 33 (1) [NS Ed.]; चतुरश्रातिगभीरा वापी कार्या मनोरमा सुदृढा SamarāSū. 31. 157; पुनरतिगभीरे पयसि पाथोनिधेरमज्जम् UdaySuKa. 10. 19; विमलतरमतिगभीरं सुपवित्रं सत्त्ववत्सुरसम् । हंसावासं स्थानं मानसमिह शोभते नितराम् RasGaṅ. 245. 19; **ii** very profound, very acute (in temperament) कल्लोलिनीपतिरिवातिगभीरवृत्तिः (सुतः स च भविष्यति तावकीनः) NemiNir. 3. 42; कथाः । नाबुद्धातिगभीराणां शक्या रसयितुं गुणाः RājTa.(Ka.) 8. 1550; नृपतिरतिगभीरां चित्तवृत्तिं निगुह्य अरमत स वयस्यैः Nalābhyu. 1. 59; अतिगभीरोऽयं दुर्निवारानुरागतारल्यः संप्रवृत्तः CaitaCa. 101. 16 (4); न तावदतिगभीरैर्भवद्भिरेवमभिलपितुं युज्यतेCaitaCa. 142. 10 (6);ध्वनिनातिगभीरेण काव्यतत्त्वनिवेशिना । आनन्दवर्धनः कस्य नासीदानन्दवर्धनः SūktiMu. 4. 78; विमलतरमतिगभीरं सुपवित्रम् ··· स्थानं मानसमिह शोभते नितराम् RasGaṅ. 245. 19; **iii** very sonorous, SūktiMu. 4. 78; स नासरः ··· निर्भिन्दन्निव निर्मोकमतिगभीरभेरीभाङ्कृतिभिः ĀnandRa. 7. 13 (13)

अतिगभीरता (atigabhīra–tā) *f.* **i** great depth (अम्भोनिधिं स निरवर्णयत्) उत्तानमप्यतिगभीरतयानुयातम् HarVi. 30. 55; सर्वबिन्दूनां नाभावेव प्रवेशकथनेन नाभेरतिगभीरतायाश्चाभिव्यञ्जनात् CitraMi. 2. 7; **ii** great profundity (of character) कलशोद्भवः अगस्त्यः स च गम्भीरतरसमुद्रपानादतिगभीरतया विवक्षितः CaturCin. iii(2). 520. 21.

अतिगभीरत्व (atigabhīra–tva) *n.* nature of being very profound ग्रन्थान् नानाविधांश्चक्रुः प्रख्यातास्ते महीतले । तेषामतिगभीरत्वात् RasāSu. 8. 10 (1. 52)

अतिगम् (ati–gam–) I. P. **1A** to go beyond the limit तिरः पवित्रमतिनीताः । आपो धारय मातिगुः TaiBr. III. vii. 4. 14; तद्द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवातपन् BhāgP. ii. 6. 21; **1B** to leave, to abandon मा शिरोऽस्य पदा मर्दीर्मा धर्मस्तेऽत्यगान्महान् MahāBhā. ix. 58. 15; **1C** to transgress, violate सूर्याचन्द्रमसावीशौ मर्यादां नातिगच्छतः BṛĀraUBhVā. iii. 8. 134; **1D** to pass (तस्य) गृहीतब्रह्मचर्यस्य दिवसाः कतिचिदतिजग्मुः TilaMañ. 35. 13; 202. 8; S'aṅkaDigVi.(Mā.) 9. 65; (गच्छति:) अतेर्यापन ईरितः KośaKaTa. 2.1395; **2A** to go past अत्यन्यानगाम् TaiS. I. iii. 5. 1; VājaS. 5. 42; तांश्च सर्वान् ··· पुरन्दरः । अवहस्यात्यगाच्छीघ्रम् MahāBhā. i. 27. 10; देवाः ··· अभि(v. l. अति) गच्छन्ति तीर्थं पुण्यं ब्राह्मणसेवितम् MahāBhā. ix. 36. 5; ज्ञात्वा पपात सन्तप्तो मूर्च्छामतिजगाम ह DevīBhāP. vii. 26. 25; **2B** to cross क्रमशोऽतिजगाम नर्मदां स दुरन्ताम् RāghPāṇ.(Dha.) 4. 42; ततश्च कोशलाधीशो मार्गेऽखण्डप्रयाणकैः । नद्यैः काव्यैरिव कविः शास्त्रवर्त्मातिगच्छति MalliC. 6. 91; **2C** to transcend ते शुक्रं नृबीजम्

… अतिवर्तन्ति अतिगच्छन्ति धीराः बुद्धिमन्तः न पुनर्योनिं प्रसर्पन्ति MuṇḍUBh. 353. 11 (*on* iii. 2. 1); सोऽमृतस्याभयस्येशो मर्त्यमन्नं यदत्यगात् BhāgP. ii. 6. 17; **2D** to surpass, to excel or prove superior to वसिष्ठः…सन्निणो रोमहर्षणम् । विधानतो यथाशास्त्रं प्रज्ञयातिजगाम ह BrahmāṇḍP. i. 1. 18; **2E** to overcome, to subdue अत्ययाम अतिगच्छामः असुरानभिभूय देवभावं शास्त्रप्रकाशितं प्रतिपद्यामहे BṛĀraUBh. 36. 13 (*on* i. 3. 1); 45. 20 (*on* i. 3. 2); राज्ञः शत्रोः मायामत्यगादतिक्रान्तवान् VīraMi.(Rājanīti.) 106. 25; **2F** to deviate from, to go against (मयः) न च कैरपि सूचितोऽभवन्नियतिं नातिजगाम केवलम् RāmC. 13. 27.

अतिगम् (ati-gam) *adv.* excessively अतिगं भीरगुहा … हृदयहरा श्रेयोऽर्थिनां शरणं न स्त्री श्रीर्वा NalaCam. 4. 16 (74) (comm. अतिगमतिशयेन बिभेतीति भीर्भीरुः स्त्रीत्वभावत्वात्)

अतिगमन (ati-gamana) *n.* **1** excessive sexual intercourse ईर्ष्याद्धि कुप्यते वेश्या प्रसङ्गाच्च विरज्यते । स्तब्धातिगमनाच्चापि दानादपि विलुप्यते VitVr. 24; **2** excessive development नाना अत्ययः अतिगमनं येषां व्याधीनाम् … ते नानात्ययाः व्याधयः ChāndoUBh. 234. 18 (*on* iv. 10. 3); **3** entrance 'अतिगमनानि' प्रवेशमार्गान् 'निर्गमनानि' निस्तरणमार्गान् 'द्वाराणि' प्रतोलयः अपरद्वाराणि JñātāDhaṬ. 81A. 6; **4** excessive walking रक्तपित्तकफाः … कुपिता यदा । स दुर्बलस्ततो नागः … तथातिगमनादपि Hastyāyur. 225. 25 (2. 28)

अतिगम्भीर (ati-gambhīra) *adj.* [*f.* –ā] **1A** very deep स तं पप्रच्छ च नृपः किमेतदिति विस्मितः । अतिगम्भीरमवनेर्दर्शितान्तर्गतोदरम् MārkP. 116. 14; यमुनां चातिगम्भीराम् … वसुदेवो वहन्विष्णुं जानुमात्रवहां ययौ ViṣṇuP. v. 3. 18; BrahmP. 182. 22; पातालगुहाभिरिवातिगम्भीराभिरायुधशालाभिरुपेतम् … राजकुलं विवेश Kād. 87. 6; तेषु च निसर्गधीरस्याप्येवंविधायामवस्थायामतिगम्भीराभोगशोकक्षोभसंवेगात् पदे पदे महान्ति प्रमादस्थानानि शङ्कनीयानि UttaRāC. 3. 1 (5); अतिगम्भीरमविशन्मैथिली मोहसागरम् RāmC. 31. 71; योऽणुव्रतादिसंयुक्तः … । सागरो वातिगम्भीरः…कथं चानीयते सोऽत्र BṛKathāK. 60. 83; तच्छ्रुत्वा कृताभ्युपगमोऽहम् … अतिगम्भीरमवनिधरगह्वरमगच्छम् TilaMañ. 398. 20; मायामुनिः … प्रसभमतिगम्भीरगलगुहाकुहरोज्जिहानघोरघोषाभिघातघनघूर्णितापघनम् … अवमीत् YaśasCam. ii. 295. 10; एवं 'भाष्याब्धिः क्वातिगम्भीरः' इत्यादौ द्रष्टव्यम् Alaṅkāsa. 202. 15; तयोः … मनोवदतिगम्भीरा नाभिश्च प्रत्यभासत TriṣaŚaPuC. ii. 3. 65; सा हि नौरतिगम्भीरं विविक्षोर्नाट्यसागरम् RasāSu. 298. 21 (3. 291); अतिगम्भीरेऽपारे ज्ञानचिदानन्दसागरे … जीवतरङ्गावलिः स्फुरति PraboSu. 161; **1B** very serene or grave (appearance) दिष्ट्यातिगम्भीरकल्याणाकृतिरयं वयस्यो वत्सस्य UttaRāC. 6. 8 (6); MālaMā. 5. 27; अहो अतिगम्भीरभीषणाः सम्प्रति वर्तन्ते श्मशानशाखिनः CaṇḍaKau. 4. 16 (1); **1C** sounding deeply or sonorously रेणुकाम् … समाभाष्यातिगम्भीरा वाग्बाचाशरीरिणी BrahmāṇḍP. ii. 30. 42; (कन्दर्पकेतुः) क्वचिदतिगम्भीरमुरजरवाहूतसानन्दनर्तितनीलकण्ठम् … वासवदत्ताभवनं ददर्श VāsaDa. 221. 3; एवमाद्या महारावाः भटानाम् … निश्चेरुरतिगम्भीरा वदनेभ्यः समन्ततः PadmP.(Ra.) 102. 165; UttaRāC. 3. 33 (1); अतिगम्भीरः सौजन्योद्गारः MahāvīC. 4. 24 (1); कृतान्तरूपयेवातिगम्भीरया भारत्या सारयन्निव समवसरणदुन्दुभिध्वनेरिति कर्तुं स्तुतिं प्रस्तुतवान् (समरकेतुः) TilaMañ. 218. 7; यद्विवेचितमतिगम्भीरप्रौढवाचा भगवता वृत्तिकारेण लक्षणान्यसंख्यानीति AbhinBhā. ii. 348. 21 (*on* 16A. 5); नृत्यहेतुर्मयूराणां निष्कृताम्बुदगर्जितः । तूर्यनादोऽतिगम्भीरो दिगन्तान् व्यानशे तदा NemiC. 7. 16; **2A** profound, unfathomable, very great दुर्दर्शमतिगम्भीरमजं साम्यं विशारदम् । बुद्ध्वा पदम् GauḍKā. 4. 100; अतिगम्भीरमेतत्किमपि भविष्यति UttaRāC. 4. 26 (12); अतिगम्भीरः सुरसः स्वीकारः MahāvīC. 5. 60 (13); अहो अतिगम्भीरा दुरवगाह्या विचित्रा चेयं माया KāṭhUBh. 144. 6 (*on* 3. 12); BrahmSūBh.(Śaṅ.) 339. 8 (*on* ii. 1. 31); 303. 19 (*on* ii. 1. 11); किं तवानया चिन्तयातिगम्भीरया BrahmSūBh.(Bhā.) 82. 14 (*on* i. 4. 21); तावावाम् … मग्नौवः स्मातिगम्भीरं शब्दब्रह्ममहोदधिम् LakṣmīT. 50. 13; अतिगम्भीरजगत्कारणविषयत्वं तर्कस्य नास्ति Bhām. 347. 3 (*on* ii. 1. 13); अतिगम्भीरभुजसारकासारकैरवारामः खलु रामः PrasaRā. 3. 39 (4); (बुद्धेः गुणाः) अगाधमतिगम्भीरमुदारं कृपणं तथा TantrRā. 36. 31; **2B** of great import, having deep sense कथाम् … प्रस्तुते … प्रसन्नामतिगम्भीराम् MahāP. 1. 109; भाष्यम् …। प्रतिपदमतिगम्भीरं न शक्यते मादृशैर्बोद्धुम् ŚivārkaMaDī. i. 1. 19 (*on* i. 1. 1); अतिगम्भीरा हि वेदान्ताः स्वल्पमतीनामशक्यार्थनिश्चयाः ŚivārkaMaDī. ii. 3. 7 (*on* ii. 1. 1); **2C** having a profound nature or personality अतिगम्भीरं महद्राजकुलम् HarṣaC. 90. 8; अतिगम्भीरे भूपे कूप इव जनस्य निरवतारस्य । दधति समीहितसिद्धिं गुणवन्तः पार्थिवा घटकाः HarṣaC. 70. 1 = VyaktiVi. 91. 13; अग्रगण्योऽतिगम्भीरः पात्रापात्रविशेषवित् ।… इत्यादिलक्षणोपेतः श्रीगुरुः कथितः प्रिये KulārT. 13. 43; महासत्त्वोऽतिगम्भीरः क्षमावानविकत्थनः । … धीरोदात्तः DaśRū. 2. 4 = BhāvPra.(Śā.) 308. 13 (10); 92. 14 (4); SāhiSā. 4. 47; धीरोदात्तोऽतिगम्भीरो न्यायी सत्त्वी क्षमी स्थिरः NāṭyaDa. 29. 18 (8); PratāYaBhū. 21. 1; दयावानतिगम्भीरो विनीतः सत्त्वसारवान् … धीरोदात्त उदाहृतः RasāSu. 13. 20 (1. 73); SāhiDa. 97. 17; कौशिकोपदिष्टसकलास्त्रग्रामो रामोऽयमतिगम्भीरमहासत्त्वः JānaPa. 4. 60 (2)

अतिगम्भीरजल (atigambhīra-jala) *adj.* having deep waters स्तिमितप्रवाहोऽतिगम्भीरजलो नद्येकदेशः ह्रदः CaturCin. iii(1). 868. 3.

अतिगम्भीरजलद (atigambhīra-jalada) *m.* very dense cloud यस्याहुरतिगम्भीरजलदप्रतिमं गलम् । स वः करोतु निःशङ्कमुदयं प्रति मङ्गलम् KīcaVa. 1. 3; SaraKaṇṭhā. 207. 2.

अतिगम्भीरता (atigambhīra-tā) *f.* profundity, patience of a very high order चित्तेऽतिगम्भीरता … त्वय्यस्ति भो राघव CāṇaNīDa. 12. 15; अतिगम्भीरता – गाम्भीर्यमविकारः स्यात् सत्यपि क्षोभकारणे RasāSu. 14. 5 (1. 73)

अतिगम्भीरदर्शन (atigambhīra-darśana) *adj.* having a very obscure appearance पुरा सर्वमभूदिदम् । … तमःसंवृतमस्पर्शमतिगम्भीरदर्शनम् MahāBhā. xii. 160. 12.

अतिगम्भीरदोष (atigambhīra-doṣa) *m.* serious fault ततः सुतसुताद् दृप्ताद् व्यक्तं न श्रियमाप्स्यसि । तथा चेतोऽतिगम्भीरदोषशङ्कि तवाधुना KīcaVa. 3. 15.

अतिगम्भीरप्रकृति (atigambhīra-prakṛti) *adj.* possessing a very profound nature or disposition देवतागुरुसाक्ष्येण स्वीकृता स्वीयनायिका । क्षमावत्यतिगम्भीरप्रकृतिः सच्चरित्रभृत् Vāgbhaṭā. 5. 13.

अतिगम्भीरप्रतीति (atigambhīra-pratīti) *f.* knowledge as 'very deep' अन्यथा जानुमात्रेऽप्युदकेऽतिगम्भीरप्रतीतिर्न स्यात् SiddhāBi. 23. 1.

अतिगम्भीरम् (ati-gambhīram) *adv.* very loudly सेनापतिस्तु…अतिगम्भीरमारसन्तीनां समरढक्कानां ध्वनितेन पातयन्निव सबन्धनान्यरातिहृदयानि … शिबिरान्निरगच्छत् TilaMañ. 86. 9.

अतिगम्भीरवयस् (atigambhīra-vayas) *adj.* having an unfathomable age अतिगम्भीरवयसः कालस्य मन्वन्तरपरिवृत्तं कियल्लोकत्रयमिदम् BhāgP. v. 24. 24.

अतिगम्भीरा (ati-gambhīrā) *f.* name of a nymph पुनराह शचीपतिः । गम्भीरां चातिगम्भीरामुभे ये गर्विते तदा BrahmP. 147. 11.

अतिगम्य (ati-gamya) *ger.* **i** having skipped or passed over परैरवर्स्यत्यतिगम्य कानिचित् ṚkPrāti. 11. 1; **ii** having gone beyond (the reach of) अवसर इह तौ सपक्षताया भृशमतिगम्य दृशोः पथं व्यतीतौ PrabhāC. 70. 4.

अतिगरिमभय (atigarima-bhaya) *n.* fear of excessive heaviness or laboriousness इत्थं त्वर्थाविरोधेऽप्यतिगरिमभयान्नेष्यते शब्दशक्तिः TattvMu. 5. 91.

अतिगरीयस् (ati-garīyas) *adj.* (*Comp.*) [*f.* –ī] [AltGr. II. 1. 233] very great, more important, very prominent, very large वेदेभ्योऽपि षडङ्गेभ्यो गायत्र्यतिगरीयसी BṛParāSm. 4. 16; त्वयामुना सुकृतेन क्रीतोऽयं दासजन इत्यसारमतिगरीयसा क्रीणासीति स ते प्रज्ञाधिक्षेपः DaśKuC. 50. 13; स चाहरहरागत्यादरेणातिगरीयसार्चयन्…कदाचित्काङ्क्षितार्थसाधनाय शनैरयाचिष्ट DaśKuC. 124. 14; नियुज्यमानेन पुरः कर्मण्यतिगरीयसि ।… भर्त्रा कार्मुकमानमत् ŚiśuVa. 19. 91; तव दैत्यस्य धिषणातिगरीयसी PadmP.(Ra.) 8. 45; सर्वेषां व्यसनानां स्वामिव्यसनं भवत्यतिगरीयः TāpaVa. 4. 5; विष्णुदत्तकः …। कुटुम्बपोषणं चक्रे क्लेशेनातिगरीयसा BṛKathāK. 3. 6; 46. 139; सैषा … कौरवादीनामतिगरीयसी लक्ष्मीः SubhaDha. 4. 10 (2); कुमारिलमताम्भोधौ गभीरेऽतिगरीयसि । युक्तिरत्नं दिदृक्षूणामिदं सिद्धाञ्जनं परम् MānaMe. 308. 1.

अतिगरुत्मत्स्पर्धा (atigarutmat-spardhā) *f.* competition for excelling Garuḍa प्रययुरतिगरुत्मत्स्पर्धयैराकवाहाः(? वैवाशु वाहाः) VīraBhā. 11. 15.

अतिगर्ग (ati-garga) *adj.* who has surpassed the descendants of Garga यत्र वृत्त्यैकत्वं गम्यते यत्रा बहुत्वं तत्रापि भवति । गर्गानतिक्रान्तः अतिगर्गः JaineVyā. 84. 28 (*on* i. 4. 135); PadMañ. *on* KāśiVṛ. *on* P. (ii. 4. 62)

अतिगर्ज् (ati-garj-) I. P. to speak loudly or provokingly or in a threatening voice [MW]

अतिगर्जित (ati-garjita) *n.* **i** loud roaring ननु न स्थिरमेतद्धि श्रूयतेऽस्यातिगर्जितम् PadmP.(Ra.) 103. 34; निशम्य च । स्वगर्जितप्रतिरवं मत्वा तत्रातिगर्जितम् KathāSaSāg. x. 4. 104; AdhyāRā. v. 3. 93; **ii** loud thundering (सा वाणी) उद्वेजितापि जलदैः क्षोभिताप्यतिगर्जितैः YogVā. iii. 72. 22.

अतिगर्जिन् (atigarj-in) *adj.* roaring excessively [perhaps w. r. for अभिगर्जिन्] निशम्य च । स्वगर्जितप्रतिरवं मत्वा तत्रातिगर्जिनम् KathāSaSāg. x. 4. 105 (BROCKHAUS' Ed.)

अतिगर्ध (ati-gardha) *m.* excessive greed, overcovetousness अतिगर्धेन ये ह्यर्था वञ्चयित्वा परं च ये । अपहृत्य परेषां वा वाञ्छन्ते नैव ते स्थिराः KathāSaSāg. xiii. 1. 116.

अतिगर्भ (ati-garbha) *m.* deep interior (of the body) दुर्जयानपि जयत्यतिगर्भादर्शसां सकलरोगसमूहान् KalyāKā. 12. 122.

अतिगर्भपीडिताङ्गी (ati-garbhapīḍitāṅgī) *adj.* (*f.*) having excessive pain in the limbs due to the foetus सितपिकलोचनचरणं चर्वणपूर्वं च कर्णपूरणत: । अतिगर्भपीडिताङ्गी वनितौ(? ता) सुखप्रसूतिमातनुते RatiRaha. 15. 72.

अतिगर्भस्रावसंस्थापन (atigarbhasrāva-saṁsthāpana) *adj.* preserving the foetus from severe aboration (क्षीरम्) श्रमहरमतिगर्भस्रावसंस्थापनं च KalyāKā. 5. 23.

अतिगर्व (ati-garva) *m.* excessive pride or conceit अतिगर्वेण रावण: ···बद्ध: CāṇaNīDa. 3. 12; BhaviP. 117B. 13 (i. 66. 31); विव्वोकस्त्वतिगर्वेण वस्तुनीष्टेऽप्यनादर: SāhiDa. 133. 2; VetāPañ.(S'i.) 22. 15; सुग्रीवादिकपीश्वरै: प्रणयिभिर्नीतोऽतिगर्वं पुन: । ···किमहो ब्रूमो बलं मारुते: AlaṅkāMañ. 193. 16.

अतिगर्वित (ati-garvita) *adj.* [*f.* –ā] extremely proud or conceited, extremely haughty or arrogant दक्षस्य दुहिता या तु सुरभीत्यतिगर्विता MahāBhā. i. 93. 8; सुरुचि: प्राह भूपालप्रत्यक्षमतिगर्विता ViṣṇuP. i. 11. 14; MārkP. 88. 24; इत्युक्त्वा भण्डदैत्येन्द्रं कुबिलाक्षोऽतिगर्वित: BrahmāṇḍP. iii. 22. 30; LalitāSa. 155; BhāgP. iv. 8. 10; वैश्रवण: ···। सुमालिनोऽन्तिकं दूतं प्रजिघायातिगर्वित: PadmP.(Ra.) 8. 163; AbhidhāRaMā. 2. 228; VāstuVi. 4. 47; शेषस्त्वशेषजगतां पतिरास्तेऽतिगर्वित: LiṅgaP. i. 49. 64; BrahmP. 71. 4; 132. 4; DevīBhāP. viii. 23. 23; PadmP. vi. 3. 34; हिरण्यकशिपुर्देव मद्वरेणातिगर्वित: । बाधते सकलान्देवान्मुनीन्निर्धूतकल्मषान् SaurP. 28. 22; VasiS. 43. 6; अरे दासि न जानासि स्वात्मानमतिगर्विता PāṇḍaC. 2. 328; Subhāṣi. 2405; अतिगर्वित: ··· प्रतिनायक: SāhiSā. 4. 64.

अतिगर्ह् (ati-garh-) I. Ā. to censure or accuse severely लज्जां च तथापि नागमिष्यस्तेन त्व(? त्वा)मतिगर्हते दशास्य: Rāvaṇā. 12. 58.

अतिगर्हित (ati-garhita) *adj.* [*f.* –ā] highly condemned, extremely censured, utterly despised शुभग्रहाणां वारा: स्यु: पूजिता ब्रह्मणो मतम् । सोमवार: सिते पक्षे कृष्णे पक्षेऽतिगर्हित: BṛhaspaSm. 249. 120; अहो मे ··· ब्रह्मस्वहरणे वाञ्छा तद्धत्या चातिगर्हिता BrahmāṇḍP. ii. 30. 20; तदप्यतिगर्हितं धर्मविरुद्धं च Tantrākhyā. 125. 9; PañcT. 4. 1 (376. 1); Hitopa. 2. 34; संसारे मूर्खपुत्रत्वं मरणादतिगर्हितम् DevīBhāP. iii. 10. 44; GaṇeP. i. 2. 31; क्रकचो नाम योगोऽयं मङ्गलेष्वतिगर्हित: NāraS. 10. 5; ManvaVi. 607. 22 (*on* 5. 31); तुल्येऽपि हि मनुष्यत्वे भृत्यत्वे चातिगर्हिते । तत्रापि यो न प्रथम: सोऽपि वाञ्छति जीवितुम् SūktiRa. 103. 1; धिषणेन तथा प्रोक्तं चार्वाकमतिगर्हितम् SāṁkhyaPraBh. 4. 20 (*on* 0. 0); S'ivLī. 3. 5.

अतिगर्ह्य (ati-garhya) *adj.* greatly condemnable क्व च कामशास्त्रमतिगर्ह्यमिदम् S'aṅkaDigVi.(Mā.) 9. 87.

अतिगर्ह्यत्व (atigarhya-tva) *n.* the state of being highly censurable or condemnable मिथ्याचारातिगर्ह्यत्वात्सौकर्यादक्रियाश्रित: AbhidhK. 4. 33.

अतिगव (ati-gava) *adj.* [*f.* –ī] out-doing a bull or a cow (गोरहृदुपि) गोशब्दाट्टो भवति अहृदुब्विषये । ··· अतिगवी JaineVyā. 280. 11 (*on* iv. 2. 94); अर्चायां किम् । गामतिक्रान्तोऽतिगव: MugdhaBo. 6. 88 (64. 11); पूजनात्किम् । गामतिक्रान्तोऽतिगव: PrakriKau. i. 652. 9 = SiddhāKau. 211B. 4; [(a bull) covering the cow, MW; very foolish, quite stupid, Vācas.; Apte; inexpressible, indescribable, Vācas; Apte]

अतिगव्य (atigav-ya) *adj.* suitable for or product of an excellent cow अतिगव्यमिति तदन्तविधिरिष्ट: KātanVṛ. *on* ii. 6. 11; अत एवासमासग्रहणात् पूर्वत्र तदन्तविधि: । तेन गव्यमतिगव्यम् BhāṣāVṛ. v. 1. 20.

अतिगहन (ati-gahana) *adj.* [*f.* –ā] **i** very deep, impassable आशा नाम नदी ··· अतिगहना ··· तस्या: पारगता विशुद्धमनसो नन्दन्तु योगीश्वरा: S'atTrayī. 173; SūktiRa. 200. 33; S'ārṅgaPa. 4103; कृत्वा चुम्बनमम्बरेऽतिगहने विद्योत्य विद्युल्लता: (घनै:) Subhāṣi. 841; **ii** extremely profound, very difficult to understand, very abstruse, very much inexplicable भगवति च भावातिगहनादतिगहनश्च बुद्धानां भावो दुराज्ञेयस्तस्मान्नास्माभिस्तदज्ञानात्त्रसितव्यमिति MaYānaSū. 6. 27 (1. 15); HetuBiṬ. 43. 4; S'atS'lo. 65; सर्वथातिगहनो बलीयानेष संसारमोह: TilaMañ. 244. 23; PadmP. iv. 87. 13; तदास्ताम् । अवान्तरमेतत् अतिगहनं च PratyabhiVi. i. 46. 4 (i. 1. 1); YogVā. iv. 39. 8; Bhāsk. i. 399. 8 (*on* i. 8. 1); कोऽतिगहन: ··· भव: VidaMuMa. 3. 7; RaseCin. 8. 30; अतिवाहितमतिगहनं विनापवादेन यौवनं येन । दोषनिधाने जन्मनि किं न प्राप्तं फलं तेन Subhāṣi. 3373; अन्ये हि ग्रन्था महान्तोऽतिगहनास्तै: सहसा शब्दा न प्रकाश्यन्ते Prasā. i. 11. 9; i. 37. 8; NīlaVi. 40. 5; **iii** quite hidden बीजानां गर्भितानां फलमतिगहनं गूढमुद्भेदयंश्च MudrāRā. 4. 3; **iv** very dense or thick, extremely impenetrable श्रुत्वा राजा स्वराज्यं निजगुरुमवजित्यारिभि: संगृहीतं मात्रा सार्धं प्रयातं वनमतिगहनं स्वर्गतं तं च तस्मिन् BrahmāṇḍP. ii. 48. 4; CaṇḍiS'. 39; अहम् ··· अतिगहनम् ··· तमालविटपिनो मूलदेशमविशम् Kād. 34. 18; ĪśvaSi.(Yā.) 78. 20; **v** extremely difficult or complicated, very intricate राज्यं हि नाम···अतिगहनम् Kād. 297. 11; तदेतदतिगहनं धीमतामपि । किं पुनर्मन्दबुद्धीनाम् Tantrākhyā. 1. 18; PañcT. 0. 4 (4. 12) तदित्थमेव द्वादशविधं प्रमेयमतिगहनसंसारमारवस्थलप्रभवतीव्रसंतापनिर्वापणमहाह्रदतामुपयातीति NyāyMañ. ii. 3. 2; MohaRāPa. 2. 7(11); राजसेवातिगहना बुद्धिमद्भिर्विना न सा । कर्तुं शक्या S'ukraNī. 3. 280; **vi** very fierce ततो निगहने (? अतिगहने Jñānapīṭha Ed.) युद्धे प्रवृत्ते खरदूषण: PadmP.(Ra.) 16. 66; **vii** very deep or profound, intense एवं विज्ञाय तापत्रयमतिगहनं मोहमूलं परस्मिन् SaṁkṣeS'ā. 3. 56 (ii. 181. 3); Mitā. 379. 2 (*on* 3. 104); अतिगहने फणिपटले स्पन्दितुमपि क: क्षमो मनुज: SetuBa. 1. 12; *m.* one of the gods guarding the door अमरेशो विरूपाक्ष: सुधर्मिष्ठो नियामक: । सर्वसत्त्वाश्रयश्चातिगहनस्तदनन्तरम् PāraS. 11. 207.

अतिगहनगहन (atigahana-gahana) *adj.* extremely complicated or difficult तदेतत्कुशाग्रधिषणै: क्षोदनीयमतिगहनगहनमिति नेह प्रतन्यते AlaṅkāSa. 13. 1.

अतिगहनता (atigahana-tā) *f.* the nature of being very profound कानिचिदतिगहनताज्ञापनाय वाङ्मनसागोचरत्वाद्याकारेण NyāySu.(Ja.) 124B. 7 (*on* i. 1. 6); वेदार्थस्यातिगहनतोक्ते: AdvaiSi. 515. 3.

अतिगहनत्व (atigahana-tva) *n.* **i** the state of being extremely dense or impenetrable कुन्तादीनामतिगहनत्वं प्रयोजनम् SāhiDa. 43. 4(2); भव: संसार एवारण्यमतिगहनत्वात् LalitāSaBh. 58. 4(*on* 92); **ii** the state of being very difficult to understand, very profound वक्ष्यमाणस्यार्थस्यातिगहनत्वात् S'āṣtraDī. 131. 12 (*on* i. 1. 5); कौलधर्माणामतिगहनत्वेन SetuBa. 181. 31; 182. 1.

अतिगहनद्रुम (atigahana-druma) *adj.* in which trees are very dense स: ··· बभ्राम मृगयासक्तो वनेऽतिगहनद्रुमे SkandP. ii(8). 7. 116.

अतिगहननिकुञ्ज (atigahana-nikuñja) *m.* extremely thick bower अयमतिगहननिकुञ्जो दूरे पुरतो वयं बाला: GopāKeCan. 75. 35.

अतिगहनसंबन्ध (atigahana-sambandha) *m.* relation which is very difficult to comprehend ननु कथमतिदेशमात्रेणातिगहनसंबन्धादिज्ञानं भवेत् Bhāsk. ii. 35. 13 (*on* ii. 2. 1)

अतिगहनार्था (atigahanārthā) *adj.* (*f.*) having a meaning very difficult to grasp विश्वरूपाचार्यस्य विकटा अतिगहनार्था या उक्तयो व्याख्यानानि BālamBha. i. 2. 14 (*on* 1. 1)

अतिगह्वर (ati-gahvara) *adj.* [*f.* –ī] very much deep or profound or unapproachable तज्जटामण्डले शुभ्रे विलिल्ये सातिगह्वरे BrahmāṇḍP. ii. 56. 42; जगाहेऽन्यांश्च दैत्यानामावासानतिगह्वरान् S'kandP. i(3B). 11. 14; अहो सुदुस्तरा विष्णोर्मायेयमतिगह्वरी BhaviP. 835A. 3 (*on* iv. 153. 55)

अतिगह्वरत्व (atigahvara-tva) *n.* extreme profundity अतिगह्वरत्वं··· ब्रह्मणो वक्ष्यति BṛĀraUBh. 216. 18 (*on* ii. 1. 1)

अतिगा (ati-gā-) III. P. to pass through, to pass beyond, to miss अतिं ··· गव्या जिगात्यण्व्या RV. ix. 14. 6; अत्यन्यानगां नान्यानुपागाम् TaiS. I. iii. 5. 1; III. ii. 5. 3–4; मा न: कालोऽत्यगादयम् MahāBhā. i. 33. 7; Rāmā. i. 1308*(2); मा त्वा धर्मोऽत्यगान्महान् MahāBhā. iii. 205. 8.

अतिगाढ (ati-gāḍha) *adj.* [*f.* –ā] **i** very deep or thick स्निग्धातिगाढातिपटुप्रयोगै: ··· श्लेष्मप्रकोपं समुपैति KalyāKā. 3. 59; **ii** very tight अतिगाढमौर्वीकृतस्थितिरराजत भोगिराज: HarVi. 50. 29; चक्रेऽतिगाढकरपिष्टकरालहारतारावलीविलुलितातनुचूर्णपूर्णम् । वज्रव्रणौघम् ··· विदर्भ: HarVi. 34. 21; 34. 28; कृतप्रयत्नापि दृढमतिगाढपाशग्रन्थिपीडितगलत्वादपारयन्ती वक्तुम् TilaMañ. 309. 3; **iii** very sound कश्चित्सुरतखिन्नाङ्ग: ··· कृत्वा प्राणसमां निद्रामतिगाढां निषेवते PadmP.(Ra.) 32. 3; **iv** very intense अतिगाढदिनोष्णजन्मभि: परित: स्वेदलवैरिवाङ्कितम् NavaSāC. 12. 47; सौहार्देनातिगाढेन शान्तासीद्विमला मति: BhāgP. i. 15. 28; BṛDharmaP. i. 9. 12; न चातिगाढं च न चातिमन्दं संदीपनं दृष्टमिदं रसानाम् NāṭaLaRaK. 1969.

अतिगाढगुण (atigāḍha-guṇa) *adj.* [*f.* ā] having deep-rooted virtues अतिगाढगुणस्यास्य नाब्जवद्भङ्गुरा गुणा: KāvyaPra. 649. 5; अतिगाढगुणायाश्च नाब्जवद्भङ्गुरा गुणा: SāhiDa. 559. 9(10)

अतिगाढचिन्ता (atigāḍha-cintā) *f.* very keen anxiety रात्रिं च दुर्लभरसोत्सुकतातिगाढचिन्तामहोत्सवमयीमिव तां ततस्ते । निन्यु: KathāSaSāg. vi. 5. 96.

अतिगाढतर (atigāḍha-tara) *adv.* very heavily वर्षास्वतिगाढतरस्रवदुदकधारासंव्याप्तदिगन्तरासु LalitāTriBh. 321. 5 (*on* 39)

अतिगाढतरता (atigāḍhatara-tā) *f.* the state of being very much tight किं प्रतिविधास्यसि ··· प्रतिदिनमतिगाढतरतामापाद्यमानेन काञ्चीकलापेन दूयमानस्य ··· मध्यभागस्य Kād. 69. 21.

अतिगाढत्व (atigāḍha-tva) *n.* **i** excessive thickness सिराणामवहन-कारणानि मूर्च्छा भयम् … अतिगाढत्वम् …चेति AṣṭāSaṁ. i. 178. 23 (*on* 1. 36); **ii** exceeding tightness उत्साहोच्छ्वसदङ्गत्वादतिगाढत्वमागतम्। सौवर्णं वर्म TriṣaS'aPuC. i. 4. 381.

अतिगाढप्रहार (atigāḍha-prahāra) *m.* very severe stroke अतिगाढ-प्रहारार्तः कृतान्तो मूर्च्छितोऽभवत् SkandP. i(2). 17. 27.

अतिगाढबन्ध (atigāḍha-bandha) *m.* very tight bond योक्त्रीकृतैः फणिगणैरतिगाढबन्धतीव्रार्तिसीत्कृतिसमीरनिभेन शीतान्। स्कन्धानिलानिव निपीय HarVi. 39. 33.

अतिगाढम् (ati-gāḍham) *adv.* **i** excessively, greatly हास्यवस्तुषु चाप्यस्य …नातिगाढं प्रहृष्येत MahāBhā. iv. 4. 29; अनारूढप्रौढ्यश्च नातिगाढमुद्वेजयन्ति घर्मोर्मयः TilaMañ. 209. 7; नागकुमारेण … इत्यतिगाढं निर्भर्त्स्य स दारकः … व्यापादितः ViviTīKa. 33. 23; **ii** very tightly, very closely ते तु … मदीयेनैव शृङ्खलेन तमतिगाढं बद्ध्वा हर्षकिलकिलारवमकुर्वन् DaśKuC. 107. 12; तदुरःसूत्र-मतिगाढम् … अवलम्बमानस्य TattvVai. 189. 22 (4. 10); अङ्गैरहं समुपगुह्य ततोऽतिगाढं नोन्मीलयामि नयने न च तां त्यजामि CaurPañ. 6; PadyaVe. 17.

अतिगाढराग (atigāḍha-rāga) *adj.* of very deep colour क्षीबोऽतिगाढ-रागं पीत्वा मधु वीतरागः किम् KalāVi. 6. 19.

अतिगाढरुज् (atigāḍha-ruj) *adj.* having very deep wounds शङ्के शिलीमुखगणाः क्वणितच्छलेन शौर्यातिरेकमतिगाढरुजो निनिन्दुः HarVi. 16. 29.

अतिगामुक (ati-gāmuka) *adj.* passing beyond, surpassing ते … वर्षा-नशीतिमतिगामुकम् … सर्वपलितं ददृशुर्नरम् KumāDeC.(So.) 12. 30; कामितपूरणे सुरतरोरुपमामतिगामुकौ। तव विभो भजते … क्रमौ CaturJiSt. 5.

अतिगाम्भीर्य (ati-gāmbhīrya) *n.* **i** great profundity, majestic nature of high order ससत्त्वतातिगाम्भीर्यं तत्तस्य भूषणमभूद् दूषणं यन्महो-दधेः DaśāvaC. 5. 8; **ii** great depth; DaśāvaC. 5. 8.

अतिगार्ग (ati-gārga) *adj.* surpassing the son of Gārgī सोऽतिगार्गा-स्तान् … धृत्वा निववृते ततः DvyāśraKā. 15. 1.

अतिगार्गक (atigārga-ka) *adj.* surpassing a group of descendants of the sage Garga श्रितो मानुषकैश्वासि … वार्धकैश्चातिगार्गकैः DvyāśraKā. 15. 49.

अतिगार्ग्य (ati-gārgya) *m.* [AltGr. II. 1. 258] excellent Gārgya इह च प्रसज्येत – शोभनो गार्ग्यः अतिगार्ग्य इति MahāBh. v. 209A. 19 (*on* P. vi. 2. 191); KāśiVṛ. (*on* P. vi. 2. 191); Prasā. ii. 784. 9; SiddhāKau. 655B. 17.

अतिगार्द्ध्य (ati-gārddhya) *n.* excessive greediness पीत्वा जलानां निधिनातिगार्द्ध्यात् … क्षिप्ता इवेन्दोः … रुचः S'iśuVa. 3. 73; यदि परं त एव स्थूलकवलैराकुलतरमतिगार्द्ध्याद्भक्षयन्तः प्रेतप्राया इति मुधैव श्राद्धादिविधानम् SyādvāMañ. 11(204)

अतिगाल्य (ati-gālya) *ger.* having strained उग्राम्बुदातिविषयष्टिकषायम् …अतिगाल्य…पिबेत् KalyāKā. 9. 100.

अतिगाह् (áti-gāh-) 1. A. [AltGr. 1. 184] to pass over, to wade through, to go across अति॑ गाहेमहि॒ द्विषः॑ ṚV. ii. 7. 3; MantrBr. i. 2. 5; ए॒षः … प॒वित्र॒मति॑ गाहते ṚV. ix. 67. 20; ix. 86. 26; यां वा अतिहार्यामसंवीतोऽतिगाहते मृदा वै स लिप्यते JaimiBr. 1. 275; देवीराप इत्यपोऽतिगाहते ĀpaS'S. x. 19. 9; छागपृष्ठानि चारुह्य … अतिगाहते(? न्ते) चाध्वानम् BṛKathāS'loSaṁ. 18. 455.

अतिगिलित (ati-gilita) *adj.* completely swallowed महारुद्रः सद्यः … दितिजेनातिगिलितः S'ivP. ii(5). 46. 23 (276. 11)

अतिगीत (ati-gīta) *n.* extraordinary singing गीतज्ञा अतिगीतेन तोष-यन्ति नराधिपान् SkandP. iv. 1. 22; *adj.* very much praised तच्च कृत्वाति-गीतार्थकारिताराधनादृतः PrabhāC. 109. 24.

अतिगुच्छक (ati-gucchaka) *adj.* very plump शङ्खदेशौ यस्य भग्नौ स्कन्धदेशोऽतिगुच्छकः (गजस्य) YuktiKa. 203. 11.

अतिगुण (ati-guṇa) *adj.* [*f.* –ā] **i** having extraordinary or excellent qualities, very virtuous भवन्तः … मनुजपतिसुतां यथा लभध्वं तदधिगुणं (v. l. अतिगुणं) पुरुषार्थमारभध्वम् Rāmā. iv. 40. 47; सर्व एवात्मपुत्रमति-गुणमभिलषति ViṣṇuP. iv. 7. 21; अहमूढां(? ढा) कुलीनेन द्विजेनातिगुणेन च SkandP. v(2). 78. 20; **ii** having many or abundant good qualities or merits जैवे नैकगुणाल्परत्यतिगुणा विज्ञानयुक्ता सती Bṛhajjā. 24. 5; **iii** greater in number, very large संख्यामतिगुणां चापि तेषु लोकेषु मोदते MahāBhā. xiii. 110. 32; इदं प्लवगसैन्यं मे सहसैव समागतम्। अतोऽप्यतिगुणं भूरि क्रमेण समुपैष्यति RāmāMañ. 203. 16; **iv** devoid of merits or good qualities [APTE]; *m.* **i** distinguished or excellent quality तेषामतिगुणैः सर्वैः श्रीमाँल्लोकहिते रतः Rāmā. i. 523*; [वि]मुनातिगुणानुरा[गा]त्सल्लक्षणक्षितिभुजा च परीक्ष्य [सम्यक्?] EI. i. 201. 21; **ii** name of S'iva (as possessing surpassing qualities or transcending all qualities) (शूलिने नमः) ईज्याय याजकाय च … तत्त्वायातिगुणाय च LiṅgaP. i. 21. 30.

अतिगुणता (atiguṇa-tā) *f.* the state of having extraordinary qualities [PW]

अतिगुणयत् (ati-guṇayat) *adj.* increasing greatly अङ्गैः स्वैर्दुर्निमित्ता-न्ययमतिगुणयन्कुम्भकर्णोऽभ्युपैति AdbhuDa. 8. 38.

अतिगुणवत् (atiguṇa-va(n)t) *adj.* possessed of extremely virtuous qualities [a person] तदयमत्रानीयतामलमतिगुणवत्परान्वेषणेनेति ViṣṇuP. iv. 13. 129; धिङ् माम् … अतिगुणवति राजन्यन्यथा … अवचिन्तयन्तम् HarṣaC. 126. 16; 180. 14; यत्तु वृद्धहारीतेनोक्तम् … तद्ब्राह्मणस्यातिगुणवत्क्षत्रियादिविषयम् Aparā. 1107. 3 (*on* 3. 267); (things) नैवेद्यं चातिगुणवद्दद्यात्पुरुषतुष्टिदम् BhāgP. viii. 16. 52 (Vaṁśīdhara मधुरादिगुणयुक्तम्); अतिनिर्गुणवदतिगुणवदपेक्षया विकल्पः ManvaVi. 892. 3 (*on* 8. 33)

अतिगुणशालिन् (atiguṇaśāl-in) *adj.* (gem) possessing excellent qualities अत्यन्तरमणीयानां दुर्लभानां च कामतः। भवेन्मूल्यं न मानेन तथातिगुण-शालिनाम् S'ukraNī. 4(2). 82.

अतिगुणान्वित (atiguṇānvita) *adj.* possessed of excellent qualities or many virtues प्रसादाद्भवतोः पुत्रो भवत्वतिगुणान्वितः MārkP. 111. 11; अयं हि वंशः … अतिगुणान्वितैः … भूपालैरलंकृतः ViṣṇuP. iv. 6. 4.

अतिगुपिलता (atigupila-tā) *f.* the state of being very much concealed (from others' view), (in) great secrecy एकाकिन्याप्यनुसृतः काम-देवायतनमार्ग(? :) कृतोऽतिगुपिलतया दिवापि संत्रासकारिणि … निशायामिह महीयसि महीपतिक्रीडावने प्रवेशः TilaMañ. 315. 9.

अतिगुप्त (ati-gupta) *adj.* [*f.* –ā] **i** well-guarded तत्समीपे समे दीप्ते कर्तव्यं रसमण्डपम्। अतिगुप्तं सुविस्तीर्णं कपाटार्गलशोभितम् RasRaSa. 6. 16; दण्डः … अतिगुप्तायां सातिशयी द्रष्टव्यः DaṇḍaVi. 169. 8; **ii** kept as a close secret अतिगुप्ता परा विद्या सृष्टिस्थितिविधायिनी KulaCūT. 7. 1 [F. N.]; कथेय मतिगुप्ता च पुराणेषु पुरंदर BrahmVaiP. ii. 59. 62; दृष्ट्वा प्रकृष्टमहिमानमनन्तभक्त्या तं गुप्तराममतिगुप्तपदं च किंचित्। प्राप्नोति यत्तदिह किं ननु देवरा[जो] EI. xxv. 19. 53; त्रिकोणं तस्यान्तःस्फुरति च … तदन्तः शून्यं तत् सकलसुरगणैः सेवितं चातिगुप्तम् ṢaṭcakraNi. 41; **iii** much concealed (from one's view) गङ्गा-तरङ्गेषु कलिन्दजायाः कल्लोलमालामिलितेषु दृष्टिः। विवेश वेश्माग्र(ग)तस्य तस्य सरस्वतीं द्रष्टुमिवातिगुप्ताम् VīraBhā. 12. 37.

अतिगुप्ततर (atigupta-tara) *adj.* extremely well concealed or hidden आवां विनायके विघ्नान् कर्तुं यातः पुरीं तु ताम्। अतिगुप्ततरौ तत्र स्थितौ बालप्रती-क्षकौ GaṇeP. ii. 56. 7.

अतिगुप्तता (atigupta-tā) *f.* the state of being very well protected or concealed मनसश्चञ्चलताया अर्थस्यातिगुप्ततायाश्च। को वेद कः कदाचित् कुर्या-देतत् KandaCū. ii. 9. 36; एवमतिगुप्ततयावस्थितोऽपि मृतशरीरस्थो मज्जाधातुः पिपीलिकाभिरस्थ्नामन्तराक्रम्य भुज्यत एव SetuBa. 107. 1.

अतिगुप्तरहस्यका (atiguptarahasya-kā) *adj.* (*f.*) possessing very well guarded secret तिस्रस्त्रिपीठनिलयाः मदिरामत्ता…अतिगुप्तरहस्यकाः (देव्यः) BrahmāṇḍP. iii. 19. 51.

अतिगुप्तवाद (atigupta-vāda) *m.* very secret debate मन्त्रोऽतिगुप्तवादे स्याद्भेददेवविशेषयोः DharK. 2060.

अतिगुप्तेङ्गिताकार (atiguptegitākāra) *adj.* who has well concealed the form and signs of his intentions अतिगुप्तेङ्गिताकारैरास्यतेऽत्रैव वेश्मनि PāṇḍaC. 7. 168.

अतिगुर् (ati-gur-) VI. P. **i** to roar above (all) मृ॒गो नाश्नो अति॒ यज्जु॑गु॒र्यात् ṚV. i. 173. 2; **ii** to assert, to promise अतेर्गुरिः प्रतिज्ञायाम् KośaKaTa. 2. 1862.

अतिगुरु (ati-guru) *m.* [*f.* –vī] very respectable person (such as father, mother, teacher) त्रयः पुरुषस्यातिगुरवो भवन्ति। पिता माता आचार्यश्च ViṣṇuSm. 31. 1; सः … असंख्ये संख्ये कृतरतिरतिगुरुरासीत् HarVi. 46. 51; पात्रैरागमवारिधेरतिगुरोः पूर्णैः स्वधीगाहितात्। उद्धृत्यार्थसुधारसान् Gurvā. 284; *adj.* **i** too big or unwieldy अतिगुरुस्तथा कल्पः स्यात् BāudhS'S. iii. 290. 2; पुत्रैः पौत्रैश्च कर्मण्यतिगुरुणि कृते तात साक्षी त्वमेव VeṇīSaṁ. 5. 266; **ii** extremely severe, of great intensity (of anger, misery etc.) अतिगुर्वां(? वीं) लज्जामुवाह Kād. 197. 5; कीटक्षतिं स्रुतिभिरस्रमिवोद्वमन्तः (v. l. शुचमिवाति गुरुं वहन्तः) … वृक्षाः MudrāRā. 6. 13; NaiṣaC. 6. 22; खरश्वायम् … कटु रटन्। … विपदमतिगुर्वीं दिशति नः KaumuMi. 8. 3; कोपोऽस्यातिगुरुर्न चातिनिपुणाः सख्योऽपि संबोधने S'ārṅgaPa. 3578; **iii** very heavy, of great weight अतिगुरुवैरिवारणापकर्षणाविकृतमहिमोरुसीरेण सीरिणा ViṣṇuP. iv. 13. 85; राज्यवर्धनहर्षौ … अतिगुरुभिः पदन्यासैरनेकनरपतिसंचरणचलां निश्चलीकुर्वाणमिवोर्वीं

(कुमारगुप्तं) ददृशतुः HarṣaC. 196.8; पिंषञ्छैलेन्द्रकल्पं महिषमतिगुरुः … अङ्घ्रिपद्मः CaṇḍiS'. 93; बलिर्बबन्धे जलधिर्ममन्थे…येनैष भारोऽतिगुरुर्न तस्य Bhaṭṭi. 2.39; ये खड्गाः … अतिगुरवः YuktiKa. 171.9; RasāSu. 304.4 (3.341); KathāSaSāg. xii. 34.179; समरकेतुः … अतिगुरुखड्गभारखेदितेनेव स्पन्दमानेन तत्क्षणं दक्षिणेन भुजदण्डेन व्यञ्जितारब्धकार्यसिद्धिः … वैश्रवणवल्लभां दिशं प्रत्युदचलत् TilaMañ. 198.15; अतिगुरुचरणक्रमैर्वितन्वन्नवनमितोन्नमितस्थलामिवोर्वीम्। अयमुपसर्पति मामगाधिराजः PārvPa. 5.26; अतिगुरुजघनस्थलावगाहाज्जलमतिवेलमजायताङ्गनानाम् Nalābhyu. 6.56; **iv** very heavy for digestion (of foodstuffs) समासतः सर्वमतिगुरूष्णतीक्ष्णरूक्षमन्नपानम् AṣṭāSaṁ. i. 206.13 (2.2); अतिगुरवो राजमाषा न भक्ष्या इति VakroJī. 102.9; इक्षुरसः परितप्तः स्निग्धः स्यात्कफविनाशनोऽतिगुरुः BhojanKu. 158.2; **v** very deep प्रत्युप्तदीप्ततरनूतनपद्मरागमासीदिवातिगुरु दंसनमग्निकस्य HarVi. 40.24; **vi** of great importance, very important भद्र यदि न रहस्यं नातिगुरु तच्छ्रोतुमिच्छामि MudrāRā. 6.15 (15); यद्गुह्यं मिथ उपदिश्यते तद्यथाकथंचिद्भवतीत्यवधारितं ग्रहणं नातिगुरु ManuBh. ii. 114.25 (*on* 8.97); नूनमनिच्छतोऽपि च्छद्मान्यसत्ये कर्मण्यवतारयन्त्यतिगुरूणि मित्रकार्याणि SubhaDha. 2.4 (2); राज्यं नार्जेति राजानं राजैव तु तदर्जति। तृणवद्गणयन्त्येतत्केचित्तदतिगुर्वपि ParamāKā. 35.31; **vii** very noble, very respectable तस्मादप्यतिगुरवः प्रलयेऽप्यचला महात्मानः BhāmiVi. 1.92; **viii** ending in a long vowel पद्म राम … इत्यादिशब्दानामादौ अतिगुरुशब्दोऽन्तगुरुशब्दश्च प्रयोज्यः KāvyKaVṛ. 51.12 (3.1); *adv.* exceedingly, with great haste or quickness द्वारं व्यस्तार्गलं वः परमपदपुरो दर्शयाम्येत यूयं श्रोतृजन्तूनिवैवं गदितुमतिगुरु भ्राम्यतीतस्ततो यः। पर्षद्युत्कर्षवत्यां प्रवचनकरणानेहसि श्रीजिनस्य स्ताद्धस्तो वः प्रशस्तः प्रणिपतनकृतावादृतानां स वृद्ध्यै JinaS'. 2.7.

अतिगुरुक (atiguru-ka) *adj.* very great, unbearable ममातिगुरुकं कौतुकं विद्यते KathāK. 32.7; अतिगुरुकमिदानीं विमाननादुःखं हृदयस्य Tāpa-Va. 4.15 (3)

अतिगुरुकीर्ति (atiguru-kīrti) *adj.* (*f.*) having great fame अतिगुरुकीर्ति राधिकामर्चयामि StavMā. 71.29.

अतिगुरुतर (atiguru-tara) *adj.* very great (heinous) अद्यावद्यवृन्दविद्रावकभवत्पावनपादपांसूनां महसा सहसाद्यान्यघान्यतिगुरुतराणि Manmatho. 2.15 (432.11)

अतिगुरुता (atiguru-tā) *f.* extreme heaviness सच्छिद्रतातिगुरुता तनुता सुखमेद्यता। कवचानां विनिर्दिष्टः समासाद्दोषसंग्रहः YuktiKa. 140.15.

अतिगुरुत्व (atiguru-tva) *n.* **i** extreme heaviness or weight कुचमण्डलेन। ननाम मध्योऽतिगुरुत्वभाजा नितान्तमाक्रान्त इवाङ्गनानाम् S'is'uVa. 3.15; सुप्तत्वक्कृष्णरुधिरातिगुरुत्वकण्डूः…कुष्ठे…भवन्ति KalyāKā. 11.60; बलवता पुरुषेणाक्रम्यमाणेऽतिगुरुत्वप्रत्ययात् NyāySiA. 257.1; **ii** very severe nature (in performance) प्रायश्चित्तस्यातिगुरुत्वात् Mitā. 421.33 (*on* 3.243); प्रायश्चित्तस्यातिगुरुत्वेन महापातकोचितत्वात् BālaKrī. ii. 97.11 (*on* 3.237 (?243)); BālamBha. iii. 136.9 (*on* 3.243); **iii** very cumbersome nature तत्रापि प्रतिक्षिणोत्पत्त्यादिकल्पनस्यातिगुरुत्वात् NyāySiA. 200.24.

अतिगुरुद्रव्य (atiguru-dravya) *n.* substance which is very heavy or hard to digest यत् … अतिगुरुद्रव्यमत्यम्लयुक्तम् … तद्वातघ्नमुक्तम् KalyāKā. 10.19.

अतिगुरुपरिणाहता (atigurupariṇāha-tā) *f.* the state of being of very great dimensions, the state of having a large size अतिगुरुपरिणाहतया पतनभयात्कीलिताभ्यामिव चूचुकच्छलेन गिरिसारेण … पयोधराभ्यामुद्भासमानाम् … कन्यकाम् … अपश्यत्स्वप्ने VāsaDa. 56.4.

अतिगुरुपातक (atiguru-pātaka) *n.* very great sin, heinous crime अतिगुरुपातकं गुरुदारेषु दुष्टेन भावेन प्रेक्षणमपि ManuBh. i. 186.10 (*on* 2.214)

अतिगुरुपुरुष (atiguru-puruṣa) *m.* very strong person इतरस्यानुदिनमतिगुरुपुरुषभेद्यमानस्य…बलहानिरभूत् ViṣṇuP. iv. 13.51.

अतिगुरुप्रतर्क (atiguru-pratarka) *m.* very serious thoughts सति स तस्यातिगुरुप्रतर्के चेतस्यथ प्राह मुनिं नरेन्द्रः JānaHa. 7.19.

अतिगुरुभार (atiguru-bhāra) *m.* very heavy burden अतिगुरुभारहरणात्…प्रकुप्यति पवनः Hastyāyur. 58.7 (1.9); 62.22 (1.9); 69.13 (1.9); स्वस्तिवाचनिकमर्थिमण्डलं तत्तथैव भरतेन तर्पितम्। यद्यथातिगुरुभारखेदितं रिक्थकं तृणमिवात्यजत् पथि Rāgh. 20.84.

अतिगुरुवेदन (atiguru-vedana) *adj.* having extremely acute pain (नयनम्) भवति च शिशिरजलनिषेवणादतिगुरुवेदनम् Hastyāyur. 141.22 (1.18)

अतिगुरुवैरिन् (atiguru-vairin) *m.* very strong or powerful enemy न हि कश्चिद्भगवता…अतिगुरुवैरिवारणापकर्षणाविकृतमहिमोरुसीरेण सीरिणा च सह … योद्धुं समर्थः ViṣṇuP. iv. 13.85.

अतिगुरुहार (atiguru-hāra) *m.* very heavy necklace अयमतिगुरुहारभारजातां श्रमजडताम् … व्यनक्ति NavaSāC. 3.31.

अतिगुर्वक्षर (atigurv-akṣara) *n.* very heavy syllable नातिदीर्घं नातिह्रस्वं नातिगुर्वक्षरान्वितम्।… नाम कुर्यात् ViṣṇuP. iii. 10.11; अस्पष्टमर्थहीनं च अतिगुर्वक्षरान्वितम्। नादद्यान्नाम BṛNāraP. 23.8.

अतिगुल्म (ati-gulma) *m.* **A** chronic enlargement of the spleen or any glandular enlargement in the abdomen शूलातिगुल्मगुदभङ्गुरकास्तथा स्युः।… गुदरुजः HārīS. iii. 11.11; **B** name of a son of Sāraṇa (one of the sons of Vasudeva) अथ रामाणां गिरिको गिरिरेव च। शुल्कगुल्मोऽतिगुल्मश्च BrahmāṇḍP. ii. 71.167.

अतिगुहा (ati-guhā) *f.* the plant *Hemionites cordifolia* अतिगुहाम् … शिरसा धारयेत् SuśruS. i. 19.29; v. 8.51; गुहामतिगुहां श्वेताम् … पिष्ट्वा CaraS. vi. 23.213 (1941 Ed.); लक्ष्मीं गुहामतिगुहाम् (धूपयेत्) AṣṭāSaṁ. i. 186.16 (1.38); गुहा चातिगुहापि च। एतैः प्रकथिता पेया श्वासकासज्वरार्तिनुत् Mānaso. i. 19.162; DhanvNi. 23.11; ParyāRaMā. 34; NighS'e. 2160; MadaPāNi. 4.64; AbhidhāMañ. 260.9; ApūNā. 42B.3; 53A.1; KośaKaTa. 1.3730.

अतिगुहासंग्राहिन् (atiguhā-saṅgrāhin) *adj.* **i** having a collection of many caves पुरोहितः … गिरि(? गिरिरि)वातिगुहासंग्राही…रक्षाविधा(? धि) यथावदन्वतिष्ठत् AvantiKa. 137.4; **ii** collecting the medicinal plant *Hemionites cordifolia*, AvantiKa. 137.4.

अतिगुह्य (ati-guhya) *adj.* extremely secret, very well concealed परमिदमतिगुह्यं दर्शितं ते मयाद्य ViveCū. 577; जयाध्यानं प्रवक्ष्यामि चातिगुह्यम् KālīViT. 18.11; (महानसम्) न चातिगुह्यं प्रकटम् BhaviP. 34A.26 (i. 13.8); अतिगु(? गु)ह्यमिदं पृष्टम् DevīBhāP. xi. 24.2; (वक्ष्ये मनुम्) अतिगुह्यम् PañcaRā.(Nā.) iii. 3.3; अतिगुह्यं परं तत्त्वं शृणु MahNirvāT. 3.5; *m.* name of S'iva नमोऽतिगुह्याय … शिवाय SaurP. 29.40; *n.* the sound *cha* or *da* छं लं सुतलं चातिगुह्यं चाचिन्त्यसंज्ञकम् … प्रोच्य KulārT. 4.39; शवर्गं च तपश्चातिगुह्यं च हाकिनीमपि … प्रोच्य ललाटे विन्यसेत् KulārT. 4.49.

अतिगुह्यक (atiguhya-ka) *adj.* very secret गोपित्तेन शतं वारान् सौराष्ट्रीं भावयेत्ततः। धमित्वा पातयेत् सत्त्वं क्रामणं चातिगुह्यकम् Rasā. 7.80 = RasRaSa. 3.65.

अतिगुह्यतम (atiguhya-tama) *adj.* extremely secret अतिगुह्यतमं ह्येतत् गोपनीयं प्रयत्नतः PadmP. iv. 82.81; एतत्तेऽभिहितं देवि श्रीरामहृदयं मया। अतिगुह्यतमम् AdhyāRā. i. 1.53; कवचम् … अतिगुह्यतमम् … स्नेहाद्वदाम्यहम् PañcaRā.(Nā.) i. 5.11.

अतिगुह्यतर (atiguhya-tara) *adj.* [*f.* -ā] which is much more secret श्रीकृष्णेन पुरा दत्तम् … अतिगुह्यतरं तत्त्वम् BrahmVaiP. iii. 31.10; विद्या महिषमर्दिनी। अतिगुह्यतरानित्या (°तरा नित्या) KulaCūT. 7.4; वदामि ते। अतिगुह्यतरं तत्त्वम् PañcaRā.(Nā.) iv. 5.3.

अतिगुह्योपदंशिन् (atiguhyopadaṁśin) *adj.* having the mark of a bite on this private part सर्पादिविषनाशाय टङ्कणस्य रजोऽम्भसा। पानाभ्यञ्जननस्यायैरतिगुह्योपदंशिना RasRaSa. 25.115.

अतिगूढ (ati-gūḍha) *adj.* **i** very secretive असितजलदकान्तिः पापगन्धोऽतिगूढः…स भवति धनहीनः…विचरति पवनोत्था यस्य कान्तिः शरीरे HorāSā. 16.28; **ii** very difficult, recondite श्रीमन्निम्बार्कस्तद्व्याख्यानम्…वेदान्तपारिजातसौरभाख्यमतिगूढं कृतवान् VedāntKau. 2.7 (*on* i. 1.1); **iii** very well concealed or hidden अतिगूढहृदयगजप्ररूढपरमार्थरत्नसंचयतः। अहमेवेति महेश्वरभावे का दुर्गतिः कस्य ParamāSā. 59; अतिगूढं च पुंश्चिह्नम् TriṣaS'aPuC. i. 2.699; अत्राप्रयासेन शिक्षादानलक्षणं वस्तु व्यङ्ग्यम्…गूढं चमत्करोति नातिगूढम् Kāvyānu.(He.) 128.10; तेनातिगूढस्फुटव्यङ्ग्ययोर्निरासः RasGaṅ. 12.1; VīraMi. (Vyavahāra.) 122.3; **iv** highly esoteric, very profound आर्याशतेन तदिदं संक्षिप्तं शास्त्रसारमतिगूढम्। अभिनवगुप्तेन मया ParamāSā. 105.

अतिगूढतनु (atigūḍha-tanu) *adj.* with a very well concealed body अतिगूढतनुर्वनेऽथवा परिहासं वितनोषि मां (दमयन्तीम्) प्रति Nalābhyu. 7.54.

अतिगूढत्व (atigūḍha-tva) *n.* the state of being well hidden or profound को वेद तदाशयस्यातिगूढत्वात् VedāntRaMañ. 3.8 (119.4)

अतिगूढपद् (ati-gūḍhapad) *adj.* surpassing the snake (in crookedness or cruelty) द्विपात्सु दुष्टेऽनुपपादुकेऽस्मिन् वृत्तानि बिभ्रत्यतिगूढपान्दि DvyāśraKā. 2.70 (comm. गूढपादं सर्पमपि रौद्रत्वेन कौटिल्येन चातिक्रान्तानि)

अतिगूढभावा (atigūḍha-bhāvā) *adj.* (*f.*) having very well concealed feelings तेनातिगूढभावापि सा सखीभिरलक्ष्यत NavaSāC. 6.51.

अतिगूढम् (atigūḍham) *adv.* very secretly, in a well concealed

manner निपुणे निःश्वसिष्येवमतिगूढं यथा यथा NavaSāC. 6. 65; अतिगूढं वद्र्धाते तयोर्गर्भौ सुखप्रदौ TriṣaS'aPuC. ii. 2. 122.

अतिगूढवत् (atigūḍha-vat) *adv.* very stealthily, in a highly concealed manner स रुरोध तमध्वानमग्रे गत्वातिगूढवत् SkandP. iv. 12. 27.

अतिगूढशरीर (atigūḍha-śarīra) *adj.* with completely hidden body यदि जानाम्यधितीरम् । त्वामतिगूढशरीरम् । दूरे सूरसुतायाम् । सायं कथमुपयायाम् StavMā. 271. 4.

अतिगूढातिसुख (atigūḍhātisukha) *n.* great joy that is lying deep (in the heart) or is very well concealed तदातिगूढातिसुखेन पूर्णः प्रोल्लासिवक्त्रः सुधयेव चन्द्रः VīraBhā. 12. 7.

अतिगूढार्थ (atigūḍhārtha) *m.* well concealed meaning नातिगूढार्थसंपत्तिः श्रव्यशब्दमनोरमा । वीरे रौद्रेऽद्भुते शान्ते वृत्तिरेषा मता यथा S'ṛṅgāMañ. (Ru.) 3. 64.

अतिगूढैकगह्वर (atigūḍhaikagahvara) *n.* a cave which is very well concealed or hidden सुकूटपर्वते यस्मादतिगूढैकगह्वरे । रोपितौ …नभश्चरैः । सहकारौ PārśvC. 7. 89.

अतिगृद्ध (ati-gṛddha) *adj.* extremely greedy अतिगृद्धाः कृतस्नेहा दीर्घकालं सहोषिताः । कृतमित्राः कृतबला धार्तराष्ट्राः परंतप MahāBhā. v. 71. 6.

अतिगृद्धि (ati-gṛddhi) *f.* excessive greed गुहेयमतिगृध्ये(? द्ध्ये)व गिलित्वा जनतामिमाम् । …उज्जगाल MahāP. 32. 36.

अतिगृद्धिमत् (atigṛddhi-mat) *adj.* with great greed विषयानीहते दुःखी तत्प्राप्तावतिगृद्धिमान् MahāP. 11. 209.

अतिगृध्नुता (atigṛdhnu-tā) *f.* excessive greediness अतिगृध्नुता । … लिङ्गान्यार्ते स्मृतानि वै MahāP. 21. 40.

अतिगृहोत्तम (ati-gṛhottama) *n.* very excellent house देवतागृहकर्ता च यतीनामाश्रमस्य च । क्रीडत्यतिगृहोत्तमैः (v. l. त्तमे) PadmP. ii. 68. 11.

अतिगृह्य (atigṛh-ya) *ger.* having taken above all तद्दतिग्राह्यैरतिगृह्यावारुन्धत TaiBr. I. iii. 3. 1.

अतिगै (ati-gai) I. P. to shout (*lit.* sing) aloud व्यायामोल्कालकरणादधोमौलौ जगन्निधौ । तत्कालेऽतिजगुर्लोकाः 'स्वर्गोपरि मही बभौ ' PadyaVe. 847.

अतिगो (ati-go) *m. f.* excellent cow or bull सु अति किम् इत्येतेभ्यः परस्य सान्तो न भवति । …अतिगौः JaineVyā. 276. 23 (*on* iv. 2. 66); CāndraVṛ. *on* iv. 4. 54; KāśiVṛ. *on* v. 4. 69 (Nyās. अतिशयितः गौः अतिगौः)

अतिगोचर (ati-gocara) *adj.* beyond the reach जलकणोऽपि मरोरतिगोचरः Subhāṣi. 939.

अतिगोचरवर्तिनी (atigocaravart-inī) *adj.* (*f.*) lying beyond the reach (of thought or desire) भगवद्वाच्ञा चास्मन्मनोरथानामप्यतिगोचरवर्तिनी ViṣṇuP. iv. 2. 83.

अतिगोपिता (ati-gopitā) *adj.* (*f.*) very well concealed, kept most secret अथ वक्ष्ये परां विद्यां त्रिपुरामतिगोपिताम् S'āraTi. 12. 2.

अतिगोप्य (ati-gopya) *adj.* [*f.* -ā]; highly confidential, fit to be kept very secret स्तवनं चातिगोप्यं च BrahmVaiP. 3. 38; अतिगोप्यं त्वया दृष्टम् PadmP. iv. 73. 7; ध्यानमस्य प्रवक्ष्यामि अतिगोप्यं परात्परम् KāliViT. 16. 5; या कृष्णेनातिगोप्याशु भजद्भ्योऽपि न दीयते BhaktiRaSi. i. 3. 18.

अतिगोप्यतर (atigopya-tara) *adj.* fit to be kept very secret, extremely confidential अतिगोप्यतरं दिव्यमनाख्येयं प्रचक्षते VāyuP. ii. 42. 19.

अतिगोप्यत्व (atigopya-tva) *n.* the state of being a great secret ज्ञानस्यातिगोप्यत्वमहिम्नः समर्थनात् TattvPrakā. 196B. 10 (*on* iii. 4. 49); गूढं तमुद्घाटयन्त्यतिगोप्यत्वमस्मिन्नर्थे … ज्ञापयन्ती (श्रुतिः) AṇuBh. 344. 21 (*on* iv. 3. 17)

अतिगोमती (ati-gomatī) *adj.* (*f.*) who surpasses one possessed of many cows (or bulls) अतिगोमतीत्यत्रापि भवति PadMañ. *on* KāśiVṛ. *on* P. iv. 1. 6.

अतिगोष्ठी (ati-goṣṭhī) *f.* excessive talk अतिगोष्ठी निरङ्कुशत्वम् … पत्युरीर्ष्यालुता चेति स्त्रीणां विनाशकारणानि KāmSū. 304. 3 (5. 6) (JayaMa. स्त्रीभिः सह गोष्ठी); VetāPañ.(S'i.) 16. 1; अतिगोष्ठ्यङ्कुशविगमौ …स्त्रीणां विनाशकारणमुपदिष्टं कामशास्त्रेषु KandaCū. v. 6. 42.

अतिगौण (ati-gauṇa) *adj.* (common qualities) which are very few यत्रातिगौणैर्जघन्यैर्द्वित्रादिसामान्यैः प्रतिकृतिः सादृश्यं बोध्यते Kāśi. iii. 156. 24 (*on* 5(6). 53)

अतिगौणलक्षणत्व (atigauṇalakṣaṇa-tva) *n.* the state of being a very secondary definition अन्वयप्रदर्शनसमये च तदेकदेशे तथैव योजनेऽतिगौणलक्षणत्वादिन्द्रियार्थसंनिकर्षजत्वादिवदगौणलक्षणत्वाभावादनुमानमप्रमाणम् NyāyMañ. i. 108. 17.

अतिगौर (ati-gaura) *adj.* [*f.* -ī] **1** excessively white, very fair in complexion शरीरमधिकृत्याष्टौ पुरुषा निन्दिता भवन्ति तद्यथा अतिदीर्घश्चातिह्रस्वश्चातिलोमा चालोमा चातिकृष्णश्चातिगौरश्च CaraS. i. 21. 3 (1922 Ed.); राज्ञश्चक्रवर्तिनः स्त्री भवति … नातिगौरी नातिश्यामा GiMS. iii(1). 36. 16; KāśyaS. 48B. 6; S'ivKePāSt. 12; तन्त्रेऽस्मिन्वर्जिता ये च प्रतिष्ठां तैर्न कारयेत् । … जडोऽतिगौरः PañcaRā.(Ha.) i. 3. 7; अपश्यत्…स विनायकम् । …अतिगौरं कोमलाङ्गम् GaṇeP. ii. 53. 16; BhaviP. 200B. 28 (i. 135. 62); अतिवर्णमतिकृष्णमतिगौरं वा (कुलं विवाहे वर्ज्यम्) Aparā. 85. 16 (*on* I. 54); अतिगौरी । … नले सा (भैमी) वासार्थितामभृत NaiṣC. 12. 110 (comm. अतितरां गौरी गौरवर्णा); **2** who has excelled 'Pārvatī' NaiṣC. 12. 110 (comm. गौरीं पार्वतीमतिक्रान्ता)

अतिगौरत्व (atigaura-tva) *n.* excessive whiteness, very fair complexion कृष्णोऽतिगौरत्वमुपैति यश्च । तथा मृतिं याति नरः HāriS. ii. 5. 3.

अतिगौरभ (atigaura-bha) *adj.* having extremely fair complexion अतिगौरभपङ्गुपीपु रतम् (वन्देमहि … त्वाम्) StavMā. 49. 11.

अतिगौरव (ati-gaurava) *adj.* [*f.* -ā] **1** extremely reverential or respectful भवन्ति साम्येऽपि निविष्टचेतसां वपुर्विशेषेष्वतिगौरवाः क्रियाः KumāSaṁ. 5. 31 (comm. अतिशयितं गौरवं यासु ताः); **2** of great volume or intensity ततः कोलाहलमभूदतिगौरवमुल्बणम् । ब्रह्मणाचरितं दृष्ट्वा देवानाम् LiṅgaP. ii. 1. 41; *n.* **A** excessive cumbrousness or laboriousness or prolixity (in expression or argument etc.) तस्य पृथक् पृथक् चोदनेऽतिगौरवं स्यात् PramāVāSvopVṛ. 44. 3; संभवन्त्यां तु गतौ नातिगौरवं युक्तमिति TantrVā. 22. 18 (*on* i. 2. 7); 328. 13 (*on* i. 4. 22 ? 21); 559. 7 (*on* ii. 2. 27); इत्यादिवाक्यजातानि न लिख्यन्तेऽतिगौरवात् ĀgaPrā. 49. 17; तज्जातीयानेकावान्तरसंस्कारकल्पनेऽतिगौरवम् TattvVai. 141. 19 (*on* 3. 17); S'āstrDī. 636. 11 (*on* ix. 4. 5); S'atDū. 60. 3; Nyāyāmṛ. 175B. 8; MīmāKau. iii. 180. 25 (*on* ii. 2. 7); LaS'abdeS'e. i. 12. 9; BālamBha. i. 227. 29 (*on* 1. 81); **B** excessive heaviness, very heavy burden or weight स्तननितम्बकृतादतिगौरवादलसमाकुलमीश्वरसंभ्रमात् । इति गतं दधतीभिः AṣṭāSaṁ. ii. 53. 20 (4. 9); कफप्रसेकश्वयथुतन्द्रालस्यातिगौरवैः । पाण्डुरोगी (उपलक्षितः) RugVi. 8. 6; धार्यमाणोऽप्यनाधारस्तैरद्रिरतिगौरवात् । ययाववस्तलम् SkandP. ii(9). 11. 24; **C** extreme greatness एकदाहं तदुत्सङ्गे वर्तमानो महामुने । अचिन्तयं दर्शयामि निजाङ्गस्यातिगौरवम् ĀdiP. 21. 55; वचनमस्तकेऽतिगौरवं चोभयमते तुल्यम् VīraMi. (Vyavahāra). 163. 3; **D** great reverence बहुमानोऽतिगौरवम् JayaMa. 124. 7 (*on* 2. 4)

अतिगौरवता (atigaurava-tā) *f.* excessive heaviness or weight पीनांसो वपुषोऽतिगौरवतया मन्दाङ्घ्रिविन्यासकृत् … नन्दो निराक्रामत GopāKeCan. 111. 29.

अतिगौरवनिमित्त (atigaurava-nimitta) *adj.* caused by excessive cumbrousness विधित्वादिद्वारप्ररोचनाकल्पनायामतिगौरवनिमित्ताद्वाक्यभेदात् TantrVā. 23. 1 (*on* i. 2. 7)

अतिगौरवात्मन् (atigauravātman) *adj.* having excessive heaviness or greatness for one's nature गरीयसामप्यतिगौरवात्मन् । …भगवन्प्रसीद ViṣṇuP. v. 1. 56; BrahmP. 181. 22.

अतिगौरवानुसारिणी (atigauravānusāriṇī) *adj.* (*f.*) corresponding to the excessively heavy nature (of punishment) तेषां लाघवगौरवातिगौरवानुसारिण्यो लघुगुरुगुरुतरदण्डसंवादिन्यो निष्ठुरादयः संज्ञाः DaṇḍaVi. 196. 16.

अतिगौरवापत्ति (atigauravāpatti) *f.* contingency of excessive cumbrousness (of argument) तत्तत्प्रागभावध्वंसानां च कल्पने अतिगौरवापत्त्या BhāṭṭDī. i. 10. 9 (*on* i. 1. 5)

अतिग्म (a-tigma) *adj.* not sharp, mild कोमलातिग्मयोर्मृदु AnekāSa. 663.

अतिग्मगु (atigma-gu) *m.* the moon (*lit.* having mild rays) भानोः शीतमतिग्मगोरहित(? म)ता शृङ्गात्पयोऽधेनुतः …भवेज्जातुचित् SubhāRaSaṁ. 442.

अतिग्मता (atigma-tā) *f.* mildness मनागतिग्मतां प्राप्ते खे प्रयाति विवस्वति । ताभ्यां तुरंगमोऽदर्शि SkandP. iv. 50. 40.

अतिग्मदीधिति (atigma-dīdhiti) *m.* the moon (whose rays are not scorching) क्षीरविप्लुवक्त्रोद्गमैरिव प्लाविर्तेऽशुभिरतिग्मदीधितिः । व्योम्नि मज्जनभयेन शङ्कितः संचरन्निव गतेन लक्षितः RāghPāṇ.(Dha.) 17. 51.

अतिग्मधामन् (atigma-dhāman) *m.* the moon (having mild lustre) अतिग्मधामानमपि प्रयान्तं तम् …। एष्यद्वियोगानि समाकुलानि द्रष्टुं न चक्राह्वयुगानि शेकुः Rāvaṇā. 5. 11.

अतिग्मभास् (atigma-bhās) *m.* the moon (having mild lustre) प्रसारिता दूरमतिग्मभासा कराः S'rīKaC. 6. 35.

अतिग्मरश्मि (atigma-raśmi) *m.* the moon (whose rays are not

scorching) कल्लोलिताप्युदयतो यदतिग्मरश्मेः ··· तद्भासि दुग्धजलधेरधिदेवता त्वम् SrīKaC. 11. 34; 11. 64.

अतिग्रथित (ati-grathita) *adj.* too much clotted अतिसान्द्रातिग्रथितो दोषेण सह मूर्च्छितः । मदप्रवेगो भवति (कषायः) BhelaS. 263. 6 (8. 7)

अतिग्रन्थविस्तर (ati-granthavistara) *m.* excessive length of the book (दोषाः) इह तु अतिग्रन्थविस्तरभयान्न लिखिताः Nyās. i. 514. 26 (*on* iii. 1. 26); ManuBh. i. 387. 10 (*on* 4. 172)

अतिग्रन्थि (ati-granthi) *m.* excessive swelling कफात्···भवेदतिग्रन्थिरिहालजी गदः KalyāKā. 15. 172.

अतिग्रह् (ati-grah-) ix. u. **1** to draw over and above तदप्ततानतिग्राह्यान्दुद्गृह्णस्तानत्यगृह्णत S'atBr. IV. v. 4. 2; JaimiBr. 2. 40; NidāSū. 96. 4 (6. 1); **2** to take, to adopt परिमलालयः ··· नियमं चातिजग्राह ··· एकपत्नीव्रतं नित्यं चरिष्यामि SkandP. iv. 76. 80; **3** to take excessively (गजः) वाचनं वातिगृह्णाति निर्वाणं यत्र नीयते Hastyāyur. 233. 18 (2. 31); **4** (pass.) to surpass, to excel, to know as superior to वृत्ततोऽतिगृह्यते । वृत्तेनातिगृह्यते । अन्यानतिक्रम्य गृह्यते, अतिशयेन वा गृह्यत इत्यर्थः CāndraVr. *on* iv. 3. 3; Prasā. i. 947. 10; SiddhāKau. 324A. 11; DvyāśraKā. 18. 98.

अतिग्रह (ati-grahá) *m.* **1** going beyond, surpassing उक्थस्यातिग्रहो रात्रिः KauṣīBr. 30. 11 (146. 19); अतिग्रहाव्ययथनक्षेपेष्वकर्तरि तृतीयायाः P. v. 4. 46; CāndraVyā. iv. 3. 3; JaineVyā. iv. 2. 51; KāśiVr. *on* P. v. 4. 46; S'ākaṭāVyā. iii. 4. 8; SiddhaHe. vii. 2. 85; **2** object of the sense organ कति ग्रहाः कत्यतिग्रहाः S'atBr. XIV. vi. 2. 1; ग्रहातिग्रहसंज्ञकस्य ··· बन्धनस्य प्रवृत्तिः BrahmSūBh.(S'aṅ.) 805. 4 (*on* iv. 2. 6); NaiṣkaSi. 30. 10; BrĀraUBhVā. iii. 2. 12; iv. 4. 268; गन्धादयोऽष्टावतिग्रहाः Bhām. 283. 4 (*on* i. 4. 1); 508. 5 (*on* ii. 4. 5); 729. 22 (*on* iv. 2. 6); तत्र हि ग्रहातिग्रहरूपेणेन्द्रियार्थस्वभावः BrahmSūBh.(Rā.) 735. 7 (*on* iv. 2. 12); S'rutaPra. ii. 99. 29 (*on* i. 4. 1); **3** evil spirit येऽन्येऽतिग्रहाद्याश्च···विघ्नेशमन्त्रो हन्येतान JayāS. 32. 34; BrĀraUBhVā. i. 4. 1822; **4** subsidiary star बलिनः (राहोः) परमोपासनया ग्रहातिग्रहमार्गादिवृत्तलभ्यमानत्वात् तदुपासनमावश्यकम् S'aṅkaVi. (Ā.) 211. 11; **5** contents of (a vessel called Graha) ग्रहातिग्रहरूपेण ग्रहः पात्रविशेषः तत्स्थद्रव्यमतिग्रहः S'rutaPra. ii. 602. 12 (*on* iv. 2. 12); *adj.* **1** beyond control अनु(v. l. ति)ग्रहः खलु हरेरैरावणो वारणः S'atTrayī. 49; **2** gone beyond the house-holder's stage तस्य कर्तुर्नियोगेन संसारो येन वर्धितः । संसारस्य कुतो वृद्धिः सर्वे स्युर्यदतिग्रहाः MatsyaP. 154. 154; **3** superior to a planet श्रीभाकमिश्रः ··· अतिग्रहोऽप्येवमग्रहः EI. ii. 176. 4.

अतिग्रहत्व (atigraha-tva) *n.* the state of being a superior controller इन्द्रियाणां च ग्रहत्वं विषयाणामतिग्रहत्वम् BrahmSūBh.(S'aṅ.) 228. 3 (*on* i. 4. 1); PrakaVi. 321. 22; 674. 17; VedāntKa. 331. 15 (*on* ii. 4. 5); गन्धरसनामरूपशब्दकामकर्मस्पर्शाख्यानां विषयाणामतिग्रहत्वं च श्रुतम् S'rutaPra. ii. 99. 29 (*on* i. 4. 1)

अतिग्राम्यतर (ati-grāmyatara) *adj.* very much vulgar एतदप्यतिग्राम्यतरम् VakroJī. 8. 6.

अतिग्राम्या (ati-grāmyā) *adj.* (*f.*) very much vulgar, very much low (in taste) यदि त्वं तरुणि रमणमन्दिरं व्रजसि तत्किं त्वदीयं (परिसरणम्) रणरणकमकारणं मम करोतीत्यतिग्राम्येयमुक्तिः VakroJī. 8. 3.

अतिग्राह (ati-grāha) *m.* **1** superior to the grasper (i. e. object of the sense-organ) प्राणो वै ग्रहः सोऽपानेनातिग्राहेण गृहीतोऽपानेन हि गन्धाञ्जिघ्रति BrĀraU. iii. 2. 2; नाम्ना वक्तव्येन विषयेण अतिग्राहेण BrĀraUBh. 377. 2 (*on* iii. 2. 3); **2** right knowledge, correct apprehension [Apte]; **3** act of overtaking [Apte]; **4** one who seizes or takes to a very great extent [Apte]

अतिग्राह्य (ati-grāhya) *m.* name of the three extra libations for Agni, Indra and Sūrya which are included in the Agniṣṭoma, also the name of the cups in which they are taken अतिग्राह्याश्च मे (कल्पन्ताम्) TaiS. IV. vii. 7. 2; VI. vi. 8. 1; अतिग्राह्याः परःसामसु TaiBr. I. ii. 2. 4; I. ii. 5. 3; I. iii. 3. 1; S'atBr. IV. v. 4. 2; वैश्वकर्मणोऽतिग्राह्यः S'āṅkhāĀ. 2. 17 (9. 21); आहरत्यध्वर्युः ··· अतिग्राह्यांश्चमसान् AitĀ. V. iii. 2. 20; उक्थपात्रं चमसांश्चान्तरातिग्राह्यान्भक्षयन्ति निष्केवल्ये ĀśvaS'S. II. i. 3. 22; S'āṅkhaS'S. x. 2. 6; BaudhS'S. ii. 165. 17; त्रीनग्निष्टोमेऽतिग्राह्यान् गृह्णाति आग्नेयमैन्द्रं सौर्यमिति ĀpaS'S. xii. 15. 9; xiii. 8. 7; xviii. 2. 1; xxi. 13. 20; xxi. 21. 3; xxii. 7. 8; MānS'S. 166. 10; 197. 3; LāṭyāS'S. iii. 6. 2; अश्यतिग्राह्यस्य विकृतावुपदेशादप्रवृत्तिः स्यात् MīmāSū. x. 8. 23; SaṅkarKā. xv. 3. 1; अतिग्राह्या नाम ग्रहाः प्रकृतौ श्रुताः S'āstrDī. 782. 20 (*on* x. 8. 11); SaṅkarKāBh. 152. 10 (*on* iii. 3. 2); NyāyMāVi. 609. 27 (*on* x. 8. 11); अतिग्राह्या नाम केचन ग्रहाः VidhiRa. 2(6. 17); 2(7. 14)

अतिग्राह्यग्रहण (atigrāhya-grahaṇa) *n.* filling up of Atigrāhya cup तत्रातिग्राह्यग्रहणं त्र्यहे पूर्वे KātyS'S. xii. 3. 2.

अतिग्राह्यत्व (atigrāhya-tvá) *n.* the state of being an Atigrāhya cup ततो यदत्यशिंष्यत तदतिग्राह्या अभवन् तदतिग्राह्याणामतिग्राह्यत्वम् TaiS. VI. vi. 8. 1; TaiBr. I. iii. 3. 1.

अतिग्राह्यनिषेध (atigrāhya-niṣedha) *m.* prohibition of the Atigrāhya cup अतिग्राह्यनिषेध उक्तन्यायेन प्रकृतगाम्येव BhāṭṭCan. 88. 4 (*on* xv. 3. 3)

अतिग्राह्यपरिसंख्यार्थ (atigrāhya-parisaṅkhyārtha) *adj.* intended for excluding the Atigrāhya cup विकृत्यन्तरेऽश्यतिग्राह्यपरिसंख्यार्थमेवेदम् BhāṭṭDī. iv. 117. 16 (*on* x. 8. 11)

अतिग्राह्यपात्र (atigrāhya-pātra) *n.* cup used for Atigrāhya libation स्थाल्यावन्तरेण त्रीण्युदञ्च्यतिग्राह्यपात्राणि ĀpaS'S. xii. 1. 15; xviii. 1. 13; अतिग्राह्यायतने चत्वार्यतिग्राह्यपात्राणि प्रतिदिशं निहितानि भवन्ति ĀpaS'S. xxi. 21. 14; त्रीण्यतिग्राह्यपात्राणि प्रयुनक्ति BhārS'S. xiii. 2. 1; MānS'S. 160. 7; 170. 1.

अतिग्राह्यप्राप्ति (atigrāhya-prāpti) *f.* contingency of the Atigrāhya (Soma) cup गवामयनादिरूपसत्रेऽपि प्रत्यहमतिग्राह्यप्राप्तौ BhāṭṭDī. iv. 119. 1 (*on* x. 8. 11)

अतिग्राह्यभक्ष (atigrāhya-bhakṣa) *m.* eating from the Atigrāhya cup तेषां यथैव प्रवरानुपूर्व्यमेवं धर्मोच्छिष्टेऽतिग्राह्यभक्षेषु षोडशिनि BaudhS'S. ii. 246. 14.

अतिग्राह्यविधि (atigrāhya-vidhi) *m.* injunction regarding (the cup named) Atigrāhya द्वितीये वैकृतेष्वग्निविधिष्वतिग्राह्यविधिषु चाप्यासिः स्यात् VidhiRa. 2(6. 8); 2(10. 16); 2(14. 17–18); अतिग्राह्यविधेः प्रकरणशेषत्वप्रतिपादनात् SaṅkarKāBh. 153. 4 (*on* iii. 3. 3)

अतिग्राह्यसंज्ञक (atigrāhyasañjña-ka) *adj.* called Atigrāhya अतिग्राह्यसंज्ञका ग्रहा यज्ञस्योपष्टम्भकत्वादनुष्ठेया इत्यर्थः NyāyMāVi. 610. 4 (*on* x. 8. 11); BhāṭṭDī. (read °संज्ञक) iv. 117. 9 (*on* x. 8. 11)

अतिग्राह्यायतन (atigrāhyāyatana) *n.* the place for keeping Atigrāhya cups अतिग्राह्यायतने चत्वार्यतिग्राह्यपात्राणि प्रतिदिशं निहितानि भवन्ति ĀpaS'S. xxi. 21. 14.

अतिग्लान (atiglāna) *m.* pl. [v. l. अभि°] name of a family [PW]

अतिग्लानिकर (atiglāni-kara) *adj.* causing great exhaustion अन्नसंसर्गेण हि तन्नातिग्लानिकरं भवति AṣṭāSaṁ. i. 122. 19 (1. 23)

अतिघ (ati-gha) *m.* **1** a weapon, bludgeon, (very destructive) [MW]; **2** wrath [MW]

अतिघण्टा (ati-ghaṇṭā) *f.* name of one of the eight *śaktis* or deities चण्डव्यूहं शृणुष्व मे । ···अतिघण्टा ··· प्रथमावरणे प्रोक्ता LiṅgaP. ii. 27. 140; अतिघण्टा···चण्डा···प्रथमावरणम् VīraMi.(Rājanīti.) 386. 24.

अतिघन (ati-ghana) *adj.* [*f.* -ā] **A i** excessively thick, very compact अतिघनाश्च मूर्धजा वित्तहीनानाम् BrSaṁ. 68. 82; वर्षासु···अतिघनेन घनसंघातेनावनते···नभसि दुर्बलं शरीरं भवति AṣṭāSaṁ. i. 121. 19 (1. 23); i. 191. 15 (1. 39); i. 27. 14 (1. 6); अतिघनं कैशिकं भूयादुदारं त्रिपुरविजयिनः श्रेयसे नः S'ivPāKeSt. 32; ध्वान्तेनातिघनेन यस्तु वचसा ज्ञातः स्वरेणामुकः AnarghaRā. 2. 52; निर्भिद्य क्ष्मारुहाणामतिघनमुदरम् RasGaṅ. 170. 4; **A ii** thickened, solidified पिबेद्रसं नातिघनम् AṣṭāHr. i. 3. 30; स्तन्यक्षीरम् ··· कृत्वा गेहम् ··· अतिघनम् ··· तस्यैवान्तः ··· पिबेत् KalyāKā. 6. 58; 11. 15; 12. 28; तत्समपरिमाणां सितां चातिघनं घृतं च सममेकत्र मेलयित्वा BhojanKu. 50. 5; **B** extremely intense दृष्टोऽहं तैरतिघनया कृपा प्रभावितैः UdaySuKa. 37. 13; एतत् ··· जघनमतिघनादेनसो ··· पातु पीताम्बरस्य ViṣṇuPādāSt. 21; वितरातिघनामनङ्गलेखे शशकृत्वो गतशङ्कमङ्कपालीम् MadaKeC. 57; अमुष्मिन्या कापि द्युतिरतिघना भाति RasGaṅ. 386. 1; **C** firm, compact, massive अतिघनं जघनम् DaśKuC. 2. 9; जघनमतिघनं बालशीतांशुमौलेः S'ivaKePāSt. 20; *m.* name of an attendant of Skanda स्युर्गणेश्वराः ··· काञ्चनातिघनावपि । पश्चिमे ĪśānS'iPa. ii. 53. 84.

अतिघनकुङ्कुमरागा (atighanakuṅkuma-rāgā) *adj.* (*f.*) having the redness of very thick saffron (paste) अतिघनकुङ्कुमरागा पुरः पताकेव दृश्यते संध्या Kāvyālaṅ.(Ru.) 8. 37.

अतिघनघृणा (atighana-ghṛṇā) *f.* very intense compassion निर्विघ्नाविघ्ननिघ्नानतिघनघृणया ··· घटयति ··· यस्याङ्घ्रियुग्मं विघटयतु घनं सोऽघसंघातमर्हन् JinaS'. 1. 5.

अतिघनजघन (atighana-jaghana) *n.* very campact or firm hip अतिघनजघनाभोगभारखिन्नो[रुदण्ड°] … जङ्घाद्वितयेन राजमाना AvantiKa. 23. 13; नित्योद्यिन्नातिघनजघनप्राग्भारधरणे । … मदनललिता याति प्रियगृहम् ChandaśCū. ii. 275. 3.

अतिघनतरपत्त्रच्छन्न (atighanatarapattra-cchanna) *adj.* covered with excessively dense foliage अस्ति … न्यग्रोधवृक्षः (v. l. तस्य समीपे…अतिघनतरपत्त्रच्छन्नः…न्यग्रोधपादपः) तिष्ठति PañcT. 3. 1 (272. 33); [Kosegarten's Ed. p. 148. l. 5]

अतिघनतरहास्य (atighanatara-hāsya) *n.* excessively loud laughter अतिघनतरहास्यैः … रमयति हि … हस्तिनीमादियामे S'ṛṅgāDi. 2. 36; 2. 38.

अतिघनता (atighana-tā) *f.* excessive thickness or denseness अतिघनतया मारुतेनापि दुःखलभ्यप्रवेशम् …एलालतामन्दिरमविक्षत् TilaMañ. 353. 14; दद्यात्प्रलेपं निपुणः शुष्कं कुड्ये(ड्यं) विमृश्य तु । … न चातिघनतां यातं न चातितनुतां गतम् VisṇuDhaP. iii. 40. 6.

अतिघनत्व (atighana-tva) *n.* excessive density औषधस्य … अतिघनत्वात्…दुर्योगातियोगाद्युपद्यते KāśyaS. 156A. 35.

अतिघनद्रुम (atighana-druma) *adj.* with very dense trees मनोभूः… भजति स…वनस्य तस्यातिघनद्रुमस्य छायातमीं तारकितां प्रसूनैः KīrtiKau. 6. 44.

अतिघनानकध्वनि (ati-ghanānakadhvani) *adj.* excelling the sound of a cloud and a drum नितम्बिनीभिः करकैरवाहतं नदत्नवाम्भोऽतिघनानकध्वनि- … अनीनृतन्मेघसखम् VasaViKā. 7. 54.

अतिघनान्धतमस (atighanāndhatamasa) *n.* very deep and pitchy darkness अतिघनान्धतमसगर्भे … कान्तिकलिकामपश्यम् UdaySuKa. 60. 19.

अतिघनावृति (atighanāvṛti) *f.* very strong fencing चतुर्दिक्षु खले कुर्यात् प्राच्य(? ज्या)मतिघनावृतिम् BṛParāSm. 5. 168.

अतिघनीभू (atighanī-bhū-) I. P. to become excessively solid or thick नातिश्यायते नातिघनीभवति Sphutā. ii. 55. 20 (*on* 2. 33)

अतिघर्घरम् (ati-ghargharam) *adv.* with excessive *gharghara* (harsh) sound शक्रोऽपि प्राह मा मूढ रोदीस्त्वं चातिघर्घरम् VāmaP. 71. 36.

अतिघर्घरा (ati-ghargharā) *adj.* (*f.*) very noisy (hence unacceptable) इयं तावदतिघर्घरा कल्पना NyāyMañ. i. 197. 7.

अतिघर्म (ati-gharma) *adj.* very hot, much heated सप्ताहादतिघर्मे पात्रे ताम्रेऽथवापि मृत्कृते ĪśānS'iPa. i. 50. 36; *m.* excessive heat, warmth अतिस्वेदातिघर्मेण चिन्ताशोषभयादिना…जायते मारुतक्षयः HārīS. iii. 9. 8.

अतिघर्मकर्मन् (atigharma-karman) *n.* work under the excessive heat (of the sun) ऋतुप्रकोपादतिघर्मकर्मणः (v. l. अतिघर्मकर्मणः) ।… भवन्ति… मसूरिका: KalyāKā. 18. 29.

अतिघर्मता (atigharma-tā) *f.* the state of having excessive heat अतिघर्मतया वापि तीक्ष्णोष्णकटुसेवनात् HārīS. iii. 10. 1.

अतिघर्षण (ati-gharṣaṇa) *n.* excessive rubbing or friction नमन्नरेन्द्रमुकुटश्रेणीनामतिघर्षणात् किणीकृतौ विराजेते चरणौ तस्य भूभुजः BrahmāṇḍP. ii. 50. 18; शाणेन वह्निं वमति ध्रुवं वाप्यतिघर्षणात् … स वै खड्गः YuktiKa. 156. 20.

अतिघस (ati-ghasa) *m.* name of an attendant of Skanda घसं चातिघसं चैव … प्रददौ कार्तिकेयाय वरुणः MahāBhā. ix. 44. 41; घसं चातिघसं वीरौ वरुणश्च ददौ प्रभुः SkandP. i(2). 30. 54; घसं चातिघसं वायुः प्रादादनुचरावुभौ VāmaP. 57. 69.

अतिघस्मर (ati-ghasmara) *adj.* extremely voracious or gluttonous निद्रालावतिघस्मरे…प्रत्याशा…यत् कुम्भकर्णे स्थिता BālRā. 8. 14; अतिघस्मराः … ये राजार्हास्ते हयाः स्मृताः S'ārṅgaP. 1618.

अतिघात (ati-ghāta) *m.* striking heavily, heavy stroke हृष्यति चातिघातैः … आभीरजा RatiRaha. 5. 10.

अतिघातम् (ati-ghātam) *adv.* striking very hard सर्वेषामतिघातमवद्यति MānSS. 130. 5.

अतिघूर्णता (atighūrṇa-tā) *f.* excessive shaking तृष्णा दाहोऽतिघूर्णता … मसूरिकाभिभूतस्य … लक्षणानि च दृश्यन्ते RugVi. 54. 27; BhāvPra.(Bhā.) 8 (59). 27.

अतिघूर्णमान (ati-ghūrṇamāna) *adj.* excessively rolling about अये रत्नापीड, कथमर्धोन्मीलितलोचन एव संचरन्नतिघूर्णमानानामङ्गानामनीश्वर इवावलक्ष्यसे KamVa. 4. 7 (4-5)

अतिघृष्ट (ati-ghṛṣṭa) *adj.* excessively rubbed क्षतो वाऽप्यतिघृष्टो वा पच्यते च ततस्तलः Hastyāyur. 226. 1 (2. 28)

अतिघोर (ati-ghora) *adj.* [*f.*–ā] **1** very dreadful, very fierce, very frightening चन्द्रे च यत्र विकृतं च भवेदशान्तं मासात् समुद्भवति तत्र भयो(? वधो)-ऽतिघोरः AVPari. lxx(c). 32. 23; ततोऽभवन्महद्युद्धं त्वदीयानां परैः सह । … शूराणामनिवर्तिनाम् (v. l. अतिघोरमभीतवत्) MahāBhā. vii. 39. 19; अद्य सप्तदशाहानि वर्तमानस्य भारत । संग्रामस्यातिघोरस्य वध्यतां चाभितो युधि MahāBhā. ix. 3. 27; द्विजः …। वनं किल दुर्गमनुप्राप्तः …। सिंहव्याघ्रगजाकारैरतिघोरैर्महाशनैः । समन्तात्संपरिक्षिप्तम् MahāBhā. xi. 5. 4; उद्यन्तीष्वतिघोरासु हादिनीष्वशनीषु च ।… प्रादुश्चक्रे कालनेमिः AhirbuS. 1. 50; अभूत्…। अशस्त्रमतिघोरं तत्तयोर्युद्धं सुदारुणम् VisṇuP. v. 20. 68; BrahmP. 193. 54; अन्धकारे … क्षणमवर्ततातिघोरः संप्रहारः AvantiKa. 102 5; कृतान्तमिवापरं पापकर्माणमतिघोरं व्याधमपश्यत् PañcT. 2. 1 (8) (182. 22); संसारकूपमतिघोरमगाधमूलं संप्राप्य दुःखशतसर्पसमाकुलस्य ।… लक्ष्मीनृसिंह मम देहि करावलम्बम् LakṣmīNṛSt. 5; भेषजम् … रोगान्निहन्त्याशु तदातिघोरान् हीनाधिकं तद्विफलादिदोषम् KalyāKā. 3. 35; शब्देन चातिघोरेण देहात्प्राणा विनिर्ययुः SkandP. v(1). 6. 70; भानुर्गृहेष्वाराध्यते जनैः । नारीभिश्चातिघोरेऽस्मिन्पतिताभिर्भवार्णवे BhaviP. 170B. 7 (i. 116. 105); मनः … पुरुषमतिघोरे … संसारहुतभुजि जुहोति Bhām. 52. 22 (*on* i. 1. 1); गजरथतुरगाणां संप्रभूवातियुद्धं सुरनरमुनिसङ्घैर्वीक्षितं चातिघोरम् DevīBhāP. iii. 15. 6; अतिघोरं च त्वां दृष्ट्वा … व्याकुलेन्द्रियश्च भवामि GītāBh.(Rā.) 549. 13 (*on* 11. 24); पार्थः … अतिघोरैर्मार्गणैः … वञ्चितोऽपि चापमुत्सृज्य रथोपरि उपाविशत् GītāBh.(Rā.) 43. 1 (*on* 1. 26–47); इहातिघोरे संसारे जनो वैषयिकैः सुखैः ।… पतति गौरिव TrisaS'aPuC. ii. 1. 133; अथ गच्छति श्रीरामे …। निमित्तान्यतिघोराणि ददर्श नृपसत्तमः AdhyāRā. i. 7. 1; विषज्वाला…ततोऽतिघोरा…निमग्ना क्षीरसागरे RasRaSa. 29. 7; तेषामतिघोरा निरयसरणिः … पुराणादिषु प्रपञ्चिता NyāySiA. 215. 29; दिशागजो दृप्त इवातिघोरः Yādavā. 2. 43; राज्ञो रणं नैव भविष्यतीति प्रश्ने कृते यच्छुभा भवन्ति । चेष्टाः समस्ताः सरमासुतस्य भवेत्तदानीं समरोऽतिघोरः S'ārṅgaPa. 2391; **2** very intense, very violent, very severe सुरापानाद्व्रतं प्रापयित्वा संज्ञानाशं चैव तथातिघोरं दृष्ट्वा कचम् … जगाद MahāBhā. i. 71. 52; किं भीम नैनं त्वमिहाशृणोषि विस्फारितं गाण्डिवस्यातिघोरम् MahāBhā. viii. 286*(2); अद्य सप्तदशाहानि वर्तमानस्य भारत । विनाशस्यातिघोरस्य वध्यतां चाभितो युधि MahāBhā. ix. 3. 27; यदा विशाखासु महेन्द्रमन्त्री सुतश्च भानोर्दहनर्क्षयातः । तदा प्रजानामनयोऽतिघोरः BṛSaṁ. 10. 19; भूभृतोऽस्याः समुद्भवे…अतिघोरा च भ्रान्तिरासीत् AvantiKa. 45. 14; यः सन्निपातप्रभवोऽतिघोरः (उन्मादः) सर्वैः समस्तैः स च हेतुभिः स्यात् RugVi. 20. 13; तवातिघोराभासो रश्मयः … जगत्समग्रमापूर्य प्रतपन्ति GītāBh.(Rā.) 551. 8–9 (*on* 11. 30); यावत्समायाता योगेश्वर्यः समन्ततः कृत्वा कलकलारावमतिघोरम् MāliniT. 10. 29; वदसि यदि किंचिदपि दन्तरुचिकौमुदी हरति दरतिमिरमतिघोरम् GītGo. x. 19. 1; निर्घोषेणातिघोरेण जगद्बाधिर्यदायिनः … मिमिलुः स्यन्दना मिथः TrisaS'aPuC. iv. 4. 166; विप्राणामतिघोरधारकठिनप्रोतकुठाराघाताद्… मेरुः परं कम्पते PadyāTa. 55; वेत्राहतिमतिघोरां विभज्य ये भुञ्जते जना नियतम् … तेपूपेश्चैव S'ivLī. 21. 96; अयं मतंगजः…क्रमपि अतिघोरमारवमुद्गिरंस्त्रिचतुराणि पदानि पश्चादपसृत्य…°धरणितलं निपतति RasSa. 115 (5); वज्रं … जिह्वया चातिघोरया कालरात्रिनिकाशम् NītiPra. 5. 3.

अतिघोर (ati-ghora) *n.* terrible or violent (act or event)) अतिघोरं दृष्ट्वा मैश्रधान्यं पुरोडाशं अन्याशायां वा निदधाति KauśiSū. 46. 10; शोकोपरुद्धनयनेन यदा तु शस्त्रं सक्तं तदास्य विहितं रिपुणातिघोरम् VeṇiSaṁ. 3. 157; नन्दनरेन्द्रद्रविणैर्दुष्कृतमिव किमपि विहितमतिघोरम् SūktiMu. 9. 16; S'ārṅgaPa. 381; घनैर्वद्धव्यूहैः किमिदमतिघोरं व्यवसितम् SubhāRaK. 10. 48; *m.* name of S'iva (शिवाय नमः) अतिघोराय LiṅgaP. i. 18. 4.

अतिघोरदुःख (atighora-duḥkha) *n.* very severe pain अतिघोरदुःखयोगकरणान्नैर्घृण्यम् … चावर्जनीयम् S'rīBh. 463. 3–4 (*on* ii. 1. 34)

अतिघोरप्रदर्शन (atighora-pradarśana) *adj.* looking very terrible or fierce कबन्धमिव संस्थानादतिघोरप्रदर्शनम् Rāmā. iii. 1261*(1)

अतिघोररूप (atighora-rūpa) *adj.* of a very dreadful nature विमुच्यतेऽसौ विषमज्वरेण वातामयैश्चाप्यतिघोररूपैः HārīS. iii. 2. 207; *n.* extremely formidable appearance भवता … अतिघोररूपमिदमाविष्कृतम् GītāBh.(Rā.) 551. 16 (*on* 11. 31)

अतिघोरवत् (atighora-va(n)t) *adj.* possessed of a terrible nature रक्षांसि … अतुल्यरूपाण्यतिघोरवन्ति विघ्नं सदा तपसश्चिन्तयन्ति MahāBhā. iii. 113. 1.

अतिघोरा (ati-ghorā) *f.* **1** name of one of the S'aktis belonging to the first *āvaraṇa* of Caṇḍavyūha चण्डव्यूहं शृणुष्व मे अतिघण्टा चातिघोरा … प्रथमावरणे प्रोक्ताः LiṅgaP. ii. 27. 140; ii. 27. 168; अतिघण्टा अतिघोरा कराला चण्डाप्रथमावरणम् VīraMi.(Rājanīti.) 386. 24; 388. 6; **2** name of a group of hells (*naraka*) अतिघोरा महाघोरा घोररूपा च पञ्चमी । … इति ते नामतः प्रोक्ता घोरा नरककोटयः S'ivaP. 415A. 11 (v. 8. 18); AgniP. 370. 15.

अतिघोराक्ष (atighorākṣa) *adj.* of very dreadful eyes ततस्तमतिघोराक्षमवेक्ष्यातिभयातुराः गोपाः…चुक्रुशुः VisṇuP. v. 14. 7; BrahmP. 189. 51.

अतिघोरारवा (atighorāravā) *adj.* (*f.*) making a very violent noise

धनाश्मपरुषे देशेऽतिघोरारवाः ··· दृश्यन्ते कुलनिम्नगाः RājTa.(Ka.) 4. 308.

अतिघोरिका (ati-ghorikā) *f.* one of the 16 S'aktis belonging to the second *āvaraṇa* of Dākṣavyūha दाक्षव्यूहं शृणुष्व ··· अतिघोरिका द्वितीयावरणे षोडशैव प्रकीर्तिताः LiṅgaP. ii. 27. 139; VīraMi.(Rājanīti.) 386. 24.

अतिघोष (ati-ghoṣa) *m.* very loud proclamation अतिघोषेऽपि मूर्खस्य विस्मरत्येव धारितम् Bharat. 17B. 6; शृङ्गीभेदे महाघोषा पुंसि हट्टे(?ट्टा)तिघोषयोः ViśvaLoK. 384. 38; महाघोषा तु कर्कट्यां शृङ्ग्यां हट्टातिघोषयोः S'abdaRaSaK. 334. 11.

अतिघोषण (ati-ghoṣaṇa) *n.* very loud proclamation महाघोषोऽतिघोषणे ViśvaPra. 173. 32; महाघोषा तु कर्कटशृङ्ग्यां पुंस्यतिघोषणे MediK. 184. 56.

अतिघोषा (ati-ghoṣā) *f.* name of a goddess in the second enclosure of Jayābhiṣeka अतिघोषा सुघोषिणी विद्युता (शकुनाद्वितीयावरणम्) VīraMi. (Rājanīti.) 389. 4–5.

अतिघ्नी (ati-ghnī) *f.* summit or highest state (*lit.* destroying (misery) completely) कुमारः ··· अतिघ्नीमानन्दस्य गत्वा शयीत S'atBr. XIV. v. 1. 22; अतिघ्नीमानन्दस्य गत्वा BṛĀraU. ii. 1. 19; अतिशयेन दुःखं हन्तीत्यतिघ्नी आनन्दस्य अवस्था सुखावस्था BṛĀraUBh. 245. 7 (*on* ii. 1. 19); आनन्दस्य परां काष्ठामतिघ्नीमेत्य निर्वृतः BṛĀraUBhVā. ii. 1. 347; अतिघ्नीमतिशयेन दुःखहन्त्रीं दशाम् S'ivārkaMaDi. ii. 240. 20 (*on* iii. 2. 9)

अतिघ्न्य (atighnya) *adj* [DEBRU. p. 791] overpowering (?) स क्षियति विश्वस्येशानो वृषा भूम्यामतिघ्न्यः AV. xi. 7. 16.

¹अतिङ् (a-tiṅ) *adj.* A other than the personal suffix *tiṅ* कृदतिङ् P. iii. 1. 93; ह्रस्वस्यातिङि पिति तुक् CāndraVyā. v. 1. 69; v. 3. 61; v. 4. 78; v. 4. 127; vi. 2. 12; ध्यायतिङ् कृत् S'ākaṭāVyā. i. 1. 43; अतिङ् किम्? रुरुदिव LaS'abdeS'e. i. 321. 15; B other than a word ending in a *tiṅ* suffix (other than a verbal form) तिङतिङः P. viii. 1. 28.

²अतिङ् (a-tiṅ) *adj.* (word) not ending in a personal suffix *tiṅ* उपपदमतिङ् P. ii. 2. 19; (KāśiVṛ. उपपदमतिङन्तम्) उपपदं समस्यते अतिङ् च समासो भवति PadMañ. *on* KāśiVṛ. *on* P. ii. 2. 19; अतिङिति बहुव्रीहिणा तिङन्ताघटितः समासः LaS'abdeS'e. ii. 61. 4; उपपदमतिङ् SaraKaṇṭhā.(Gr.) iii. 2. 157.

अतिङन्त (a-tiṅanta) *adj.* not ending in a personal suffix (*tiṅ*) उपपदमतिङन्तं समर्थेन शब्दान्तरेण सह समस्यते नित्यम् KāśiVṛ. *on* ii. 2. 19; PrakriKau. i. 560. 8; अतिङन्तात्पदात्परं तिङन्तं पदं सर्वमनुदात्तम् Prasā. ii. 785. 23; i. 515. 13; तेन तत्रातिङन्तस्यैव धातुस्वरूपस्यैव (ग्रहणम्) MīmāKau. iii(2). 29. 9 (*on* ii. 1. 5); अतिङन्तात्पदात्परं तिङन्तं निहन्यते SiddhāKau. 657B. 4; 183A. 3; अत्राप्यतिङन्तः समास इति व्याख्यातम् LaS'abdeS'e. ii. 66. 9; कथं वा तिङ्ङतिङ इति सूत्रे अतिङन्तात् (? तिङन्तात्) परस्य पर्युदासः VaiyāBhū. 65. 1 (*on* 16)

अतिङ्भाविन् (a-tiṅbhāvin) *adj.* which will not have later a *tiṅ* suffix (substituted in its place) अतिङ्भाविनस्तु कर्तरि कृदिति वचनात् कर्तर्येव साधुत्वं प्राप्नोतीति वचनम् Pradī. iii. 273B. 24 (*on* iii. 4. 69); लकारा द्विविधाः तिङ्भाविनोऽतिङ्भाविनश्च Prasā. ii. 6. 7; अतिङ्भाविलकारविध्यंशस्य कर्त्रर्थकत्वपरत्वस्यैव स्वीकार्यत्वात् MayūMāli. 268. 4 (*on* iii. 4. 9)

अतिङ्रूप (a-tiṅrūpa) *adj.* not being of the form of a verbal suffix (*tiṅ*) शतृशानच्प्रभृतीनामतिङ्रूपाणाम् ··· एकवचनादिसंज्ञाविरहेण MayūMāli. 268. 3 (*on* iii. 4. 9)

अतिङ्विषयत्व (atiṅviṣaya-tva) *n.* the state of not having *tiṅ* in its scope तिङ्ग्रहणं पूर्वसूत्रस्यातिङ्विषयत्वलाभार्थम् LaS'abdeS'e. ii. 1113. 6.

अतिचकित (ati-cakita) *adj.* very much afraid of ईशोऽध्यापको नः परमतिचकितैर्वर्णनित्यत्वमुक्तम् TattvMu. 5. 26; नन्दोपनन्दादयस्तद्ग्रन्थितुटिशङ्कयातिचकिता गोवर्धनोद्धारणे ĀnaMandā. 35; न खलु ···। अतिचकितजनव्रजे व्रजेऽस्मिन्नुपधिरेष तुरंगमप्रचारः KaṁVa. 2. 20; तपोधनाः कतिचिदतिचकिताः प्रायुञ्जत परमाशिषः NīlaVi. 75. 1.

अतिचकितमति (aticakita-mati) *adj.* very much frightened in mind अतिचकितमतिः पुरैव पश्यन् ··· भरतः RāmāCam. 2. 62.

अतिचक्षुष्य (ati-cakṣuṣya) *adj.* [*f.* –ā] A most wholesome for the eyes आर्घ्यं मध्वतिचक्षुष्यं कफपित्तहरं परम् SuśruS. i. 45. 138; BhojanKu. 166. 16; B very attractive to the eyes तामदृष्ट्वातिचक्षुष्यां प्रियां मानसहारिणीम्। अतिवाहयितुं नाहं प्रभवामि दिनत्रयम् PadmP.(Ra.) 15. 125.

अतिचङ्क्रमण (ati-caṅkramaṇa) *n.* excessive walking अतिस्थानमतिचङ्क्रमणम् ··· भावानेतानमनसाप्यसेवमानः CaraS. i. 15. 16 ((1922 Ed.); (वर्जयेत्) अत्यासनमतिस्थानमतिचङ्क्रमणानि च BhelaS. 12. 15 (1. 8); 119. 27 (6. 1); अतिचंक्रमणेनापि हन्याद्गर्भमुपस्थितम् KāśyaS. 85B. 41; 162A. 25.

अतिचङ्क्रमणोद्भव (aticaṅkramaṇodbhava) *adj.* produced by excessive walking शर्कराश्मरिखल्वाद्या अतिचङ्क्रमणोद्भवाः KāśyaS. 162B. 32.

अतिचञ्चल (ati-cañcala) *adj.* [*f.* –ā] A very unsteady, constantly moving, extremely agile or nimble मन्त्रः ··· । अतिचञ्चलदीप्ताग्निः AhirbuS. 18. 45; विटपिनः···भ्रमरदृष्टिभिरतिचञ्चलाभिः प्ररूपा(?प)यन्ति AvantiKa. 141. 13; तत्र डिण्डुकसादृश्यात् सर्पपोतोऽतिचञ्चलः। गृहीतोऽसौ महादेव्या पाणिना BṛKathāK. 102 (8). 12; अनङ्गलीलालुलितानलकानतिचञ्चलान्। कः कर्ता स्थानविन्यस्तसुभगान् MalliC. 1. 170; 8. 509; रसेन्द्रो दोषनिर्मुक्तः श्यावो रूक्षोऽतिचञ्चलः RasRaSa. 1. 70; आसाम् ···मेघोन्मेषं प्रकुर्वाते लोचने चातिचञ्चले RauhiC. 331; (अतिचञ्चलं य)दतिदूरवर्ति···(लक्ष्यम्)न···सुभिदं बभूव न तदस्य धन्विनः PṛthvīVi. 9. 62; विपिनेऽतिचञ्चलानामपि च मृगाणां (श्रियम्) कथं हरति RasGaṅ. 145. 6; 535. 2; यत्र ··· निपेतुरतिचञ्चलाश्चतुरकामिनीदृष्टयः PadyaVe. 805; रराज ध्वनिते मेघे विद्युन्मालातिचञ्चला RājTa.(Prā.) 805; अतिचञ्चला विद्युत् न बबन्ध स्थैर्यं गगनतले ĀnandRa. 5. 51 (17); B very unsteady, fickle, wavering (in character or behaviour) यदा यशोदा तौ बालौ ···। शशाक नो वारयितुं क्रीडन्तावतिचञ्चलौ ViṣṇuP. v. 6. 13; संपदश्चातिचञ्चलाः BrahmāṇḍP. ii. 53. 48; तेन संभाव्यमानोऽसौ शालो नष्टोऽतिचञ्चलः PadmP.(Ra.) 52. 22; महागृद्धिसमेतोऽयं क्रूरचित्तोऽतिचञ्चलः BṛKathāK. 147. 4; 116. 60; कामिनी कातिचञ्चला SkandP. vii(4). 3. 9; सा तु पूर्वानुरागाद्वै मय्या प्रेम्णातिचञ्चला DevīBhāP. iii. 18. 2; वेदयेव बलवद्भोग्या राजश्रीरतिचञ्चला KathāSaSāg. iv. 1. 56; नियम्यते येन मनोऽतिचञ्चलम् SubhāRaSaṁ. 890; अतिचञ्चलम् ··· चेतः। ···अप्रमादात्···भिन्द्यात् YogS'ā. 12. 41; पटुतां प्रथयन्नतिचञ्चल हे विश मा कलहे (कृष्ण) StavMā. 238 4; अतिपरुषपवनविलुलितदीपशिखेवातिचञ्चला लक्ष्मीः SiṁhāDvā. 142. 4; *m.* sound *jh* दीर्घबाहू रसो रूपं नादाख्यश्चातिचञ्चलः Tantrābhi. (7). 49. 14.

अतिचञ्चलचेष्टित (aticañcala-ceṣṭita) *adj.* of extremely agile movement यदि शक्नोषि गच्छ त्वमतिचञ्चलचेष्टितः ViṣṇuP. v. 6. 15; BrahmP. 184. 36.

अतिचञ्चलता (aticañcala-tā) *f.* extreme tremor (यो वेगः (विषजः) पञ्चमोऽसौ नयति विवशताम्) तनोर्विवशतामतिचञ्चलताम् BālamBha. ii. 119. 10 (*on* 2. 110)

अतिचञ्चलमति (aticañcala-mati) *adj.* very fickle-minded कृपणोऽतिचञ्चलमतिः···ऋणी···सुमतिभिः कार्यो वरो नेदृशः AnaṅgaRa. 8. 8.

अतिचञ्चलमानस (aticañcala-mānasa) *adj.* whose mind is very unsteady तावत्यन्तं सुदुर्वृत्तावतिचञ्चलमानसौ SkandP. iv. 65. 31.

अतिचञ्चललोचन (aticañcala-locana) *adj.* whose eyes are very tremulous (सः ··· अद्राक्षीद्राक्षसम्) अतिचञ्चललोचनम् SkandP. iv. 54. 21.

अतिचञ्चलस्वभाव (aticañcala-svabhāva) *adj.* extremely unsteady in nature बको जले मीनमतिचञ्चलस्वभावमपि मत्स्यग्रहणार्थमेकतानान्तःकरणश्चिन्तयति ManvaMu. 266. 11 (*on* 7. 106)

अतिचञ्चलात्मिका (aticañcalātmikā) *adj.* (*f.*) very unsteady or unstable in nature धिगीदृशीं श्रियमतिचञ्चलात्मिकाम् PadmP.(Ra.) 76. 43.

अतिचञ्चलाशय (aticañcalāśaya) *adj.* whose intention is very fickle अकरोदतिचञ्चलाशयो बत दोलेव गतागतं नलः Nalābhyu. 7. 46.

अतिचञ्चलेक्षण (aticañcalekṣaṇa) *adj.* whose eyes are very tremulous धावमानमतिचञ्चलेक्षणम्।··· नमत गोपबालकम् PañcaRā.(Nā.) v. 1. 60.

अतिचटुल (ati-caṭula) *adj.* very pleasing राधा ··· कंसाराते रतिरसमहो चक्रेऽतिचटुलम् ChandoMa. 2. 250.

अतिचटुलवीचि (aticaṭula-vīci) *f.* very tremulous wave वञ्च्यतामयमतिचटुलवीचिवेगाकृष्टैर्भ्रमद्भिः ··· अभ्रैः ··· आवर्तैः TilaMañ. 145. 21.

अतिचटुलशाखा (aticaṭula-śākhā) *f.* greatly shaking branch समीरप्रेङ्खोलदतिचटुलशाखाभुजतया वयस्याया येन स्तनवसनमास्फालितमभूत् VidaMā. 3. 45.

अतिचण्ड (ati-caṇḍa) *adj.* [*f.* –ā] I very terrific, very powerful or violent सौवर्णदण्डं दधतातिचण्डम्। स नन्दिनाधिष्ठितमध्यतिष्ठत्सौधाङ्गणद्वारमनङ्गशत्रोः KumāSaṁ. 12. 5; (उत्पातः) वातोऽतिचण्डः BṛSaṁ. 32. 24; YogYā. 3. 14; वायुना वातिचण्डेन विप्रलापादिहेतुना। येनेदं विपरीतत्वं वराकः समुपागतः PadmP.(Ra.) 66. 76; खगपतिरतिचण्डभीमवेगो मम कुलमाशु विनाशयति NīlaP. 65; असन्निमन्त्रणं कृत्वा भवद्भ्यातिचण्डया। उपानद्भक्षणं दत्तम् BṛKathāK. 68. 51; महामहिषनिष्पेषकेलिः पारमगाद्वयोः। राज्ञस्त्वातिचण्डस्य चण्डिकाचरणस्य च NavaSāC. 2. 25; तेषां ग्रामांश्च ···। भोक्ष्यन्ति न च संदेहो अतिचण्डा महाबलाः।··· तुरुष्काः PadmP. ii. 78. 40; अस्य ··· मृगाधिपादप्यतिचण्डमोजः VasaVikā. 3. 25; अतिचण्डपश्चिमसमीरहृतैरभितोऽपि तिग्ममहसः किरणैः। अनुषञ्जिता इव वनावलयो दवसंगता ददृशिरे S'ivLī. 17. 67; II (person) of a very powerful sexual urge (नखराः) प्रलम्बभूरिशिखरा अति-

चण्डयोः स्युः RatiRaha. 8. 2.

अतिचण्डतुण्ड (aticaṇḍa-tuṇḍa) *n.* very fierce beak मम (जटायोः) पुनरतिचण्डतुण्डलीढस्त्रुटननुपैष्यति ते (रावणस्य) स चन्द्रहासः Rāgh. 9. 79.

अतिचण्डत्व (aticaṇḍa-tva) *n.* **i** excessive cruelty अतिचण्डत्वमालम्ब्य निदाघस्य इवार्यमा । त्वं दुःसहकराक्रान्तां पृथिवीं जातु मा कृथाः TriṣaS'aPuC. ii. 1. 221; **ii** excessive or unbearable heat, TriṣaS'aPuC. ii. 1. 221.

अतिचण्डवेग (aticaṇḍa-vega) *adj.* [*f.* -ā] **i** possessed of very violent speed or velocity (शक्तिः) विभिद्य वक्षःस्थलमीश्वरस्य ममज्ज भूमावतिचण्डवेगा VarāṅgaC. 18. 62; स एष लोकानतिचण्डवेगो विकर्षसि त्वं (रुद्रः) खलु कालनाथः BhāgP. iv. 24. 65; **ii** possessing a very powerful sexual urge प्रियोपभोगा अतिचण्डवेगाः । मनोरमाः पुष्पपुरप्रसूताः AnaṅgaRa. 5. 15.

अतिचण्डा (ati-caṇḍā) *f.* name of one of the eight Nāyikā deities अष्टनायिकादेवीः…परिपूजयेत् ।… अतिचण्डाम् … चण्डवतीं तथा BrahmVaiP. ii. 64. 82.

अतिचण्डिका (ati-caṇḍikā) *f.* name of one of the nine forms of goddess Durgā रुद्रचण्डादयो नव । रुद्रचण्डा … अतिचण्डिका AgniP. 50. 11; 185. 5.

अतिचतुर् (ati-catur) *adj.* **i** beyond four (i. e. the fifth) (चुलुक्य) धुर्योऽस्यनड्वानिव मेऽतिचत्वा हरेर्भुजस्त्वं तव के सखायः DvyāśraKā. 2. 3; **ii** superior to or surpassing four (men) अ(?)प्रधानादेव अतिचतुराम् KātanVr. on ii. 1. 74.

अतिचतुर (ati-catura) *adj.* [*f.* -ā] **i** very clever, exceedingly skilful स्फटिकान्सोऽतिचतुरश्चतुरो व्यकरोद् वृषान् TriṣaS'aPuC. ii. 2. 488; तदातिचतुरा ललिता तयोः…गान्धर्वेण विधिना विवाहं नाटयति GopāKeCan. 130. 29; 136. 16; न दीनं नार्थवन्तं च न चातिचतुरं जडम् । दूतम् … संदिशेत् BhāvPra. (S'ā.) 94. 9 (4); (पट्टराज्ञी) अतिचतुरा MādhavāĀ. 3; 23; अतिचतुराभिर्वेष्टितालीघटाभिः प्रियसखि पुरतस्ते दुस्तरा बाहुदासि UjjvaNīMa. 150. 13; अतिचतुरसानन्दवन्दिमागधजनवृन्द° … °ध्वनिभिः मुखरीकृतम् … तिरुवेङ्कटक्षितिपतिः … आत्मानं धन्यतमं मन्यते स ĀnandaRa. 3. 11 (6); **ii** very quick नायं राजा महाप्रश्नं वेत्त्यस्मिन् दातुमुत्तरम् । तेन तूष्णीं व्रजत्येष हृष्टोऽतिचतुरैः पदैः KathāSaSāg. xii. 31. 62; **iii** quickly pronounced (i. e. short syllable) मध्यषट्केऽतिचतुरे मन्दाक्रान्ता विराजते SuvṛTi. 2. 34.

अतिचतुरश्र (ati-caturaśra) *adj.* very fitting, quite proper तदिदं भेदेनैव भेदप्रसाधनं नातिचतुरश्रम् BrahmSi. 50. 20; अपारतन्त्र्यं परिमितप्रकारत्वं चेति नातिचतुरश्रम् VakroJī. 86. 2; 135. 2; सर्व एवाभावः सर्वत्र कारणमिति वचनमतिचतुरश्रम् NyāyKu. 165 5.

अतिचतुरसखी (aticatura-sakhī) *f.* very clever female friend अतिचतुरसखीवचःक्रमेण…प्रियमभिरमयांचकार Nalābhyu. 6. 20.

अतिचतुर्मुख (ati-caturmukha) *adj.* surpassing the four-faced god, having more than four faces(?) ते इष्टकाकारकरालमतिचतुर्मुखम् । चतुर्विधैस्तु रूपं ध्यानम् AVPari. 36 (1). 3.

अतिचन्द्र (ati-candra) *m.* proper name of a *daitya* [pw]

अतिचन्द्रामृत (ati-candrāmṛta) *adj.* surpassing the nectar of the moon अतिचन्द्रामृतः कोऽपि परिरम्भो मृगीदृशाम् BṛKathāMañ. xviii. 1. 124.

अतिचन्द्रार्क (ati-candrārka) *adj.* surpassing the sun and the moon (in lustre) अतिचन्द्रार्कभास्वरैः ।… बभासे भवनह्रदैः HariVaṁ. 93. 34.

अतिचपल (ati-capala) *adj.* [*f.* -ā] **i** very unsteady, very agile, constantly moving अतिचपलानामिन्द्रियाश्वानामन्तःसंयमनरज्जुभिरिव … कण्ठनाडीभिर्निरन्तरसंबद्धकन्धरम् …जाबालिमपश्यम् Kād. 42. 12; अतिचपलकपिकम्पितकक्कोलच्युतपल्लवफलशबलैः … विराजिता लतामण्डपैः Kād. 19. 7; शाखामृगमतिचपलम् … विचिन्तयतः ।… फलबीजं पुरुषस्य जातु न गलति RatiRaha. 5. 4; अतिचपलकपिकुलान्दोलिततरुशिखर° NalaCam. 6. 42 (8); अयमतिचपलो निसर्गरक्तां स्थलनलिनीमवधीर्य देव यातः (पतगः) NavaSāC. 3. 35; यथा चाति(च)पलानां (हस्तिनाम्) यत्र विधिरनुष्ठीयते Hastyāyur. 619. 5 (4. 7); क्षुद्रस्य क्षतिकारिणोऽतिचपलस्याह्लादविच्छेदिनः । येयं निम्बफलेषु काक भवतः … प्रीतिः S'ārṅgaPa. 884; *adv.* (in Cpd.) very quickly अतिचपलफालविस्फारिभिः स्फुलिङ्गैः फुल्लन् … निर्जगाम … राक्षसः UdaySuKa. 81. 10; **ii** very fickle, very fickle-minded, very much inconstant (in behaviour) शक्त्या पाणितलेऽङ्किनोऽतिचपलस्तोये च भीरुः क्रिये Bṛhajjā. 17. 1; राज्यलक्ष्मीः … पवनगतिरिवातिचपला Pañcā. 227. 3; निर्लज्जाः … अतिचपलाः … साध्याः सुखेनाङ्गनाः AnaṅgaRa. 8. 17; सुभगपरिचयं जहाति चेत्त्वमतिचपला मम चित्तचेतनेयम् AmṛUda. 4. 79; अतिचपला … सा चित्रिणीति स्मृता S'ṛṅgāDī. 2. 10; कष्टमतिचपलायास्तावदस्याः कृते शिवदासहितोपदेशं अवधीरितवानहम् MadaKeC. 92 (1); एषोऽतिचपलो बालो दैत्यान् हन्ति बहूनपि GaṇeP. ii. 85. 16; खला इवातिचपलाः … यौवनवासराः SamaMā. 1. 47; एकदा दधिमथनं कुर्वत्यतिचपलेन पुत्रेण प्रक्षोभिताह (यशोदा) GopāKeCan. 141. 7; अत्यासन्नोऽतिचपलः को न दह्येत वह्निना BṛKathāS'loSaṁ. 4. 5; क्षामक्षामामिमां स्वां तनुमतिचपल प्रेक्षसे किं स्वयं नः Subhāṣi. 1412; **iii** very inconstant, changing quickly धिगतिचपलं मानुषसुखम् PadmP. (Ra.) 12. 375; क्षरमतिचपलं नो मनः S'atS'lo. 92; अतिचपलो हीन्द्रियसंघातः ManuBh. i. 186. 22 (*on* 2. 215); अतिचपलचञ्चलमनोवाक्कायव्यापाररहितत्वेन स्वस्वरूपे निश्चलं स्थिरम् TātpaVṛ. 257. 17 (*on* 2. 100); तनुसरसि शुष्केऽतिचपलः…मनोमीनो लीनो भवतु मम पीनो ननु शिवे PadyaVe. 813; **iv** having very quick movements, moving very fast, greatly or constantly shaking अतिचपलवीचिप्रचयतया ताण्डवोद्दण्डदोर्दण्डखण्डपरशुविडम्बनापण्डितम् … जलनिधिमपश्यत् VāsaDa. 266. 6; अतिचपलाः सरसतरङ्गाः AvantiKa. 27. 7; अतिचपले दीर्घे दृगम्भोरुहे … इदं दिग्याञ्जनं दीयताम् TripuMāPūSt. (S'aṅ.) 44; नारदो विश्ववन्दितः । कस्मादेषोऽतिचपलो वायुवद्भ्रमते जगत् SkandP. i (2). 54. 20; अतिचपलम् … जघनतटम् … निरीक्षमाणो न तृप्यामि ĀryāSaS'a. 64; पवनाहतलवलीदलपटलैरतिचपलैः । … सुरभिर्भृङ्गमिह गायति…मुदितः ChandaśCū. 2. 316 (4); अतिचपलोऽयं (वायुः) Pañcā. 215. 13; अतिचपलाः अनियतचेष्टाः…कल्लोलाः VedāntKa. 384. 7 (*on* iii. 2. 32)

अतिचपलचित्ता (aticapala-cittā) *adj.* (*f.*) very fickle-minded अतिचपलचित्तात्र स्पन्दने केयमारोपिता ViṣṇuP. iv. 12. 26.

अतिचपलजलकपि (aticapala-jalakapi) *m.* quick-moving or very agile water-monkey अतिचपलजलकपिकुल° … °शिशिरतरम् … पुलिनजलम् VāsaDa. 277. 5.

अतिचपलता (aticapala-tā) *f.* extreme fickleness दैवान्मालिन्ययोगेऽप्यतिचपलतया योऽवदातानुयातः JinaS'. 3. 18.

अतिचपलत्व (aticapala-tva) *n.* extreme unsteadiness, extreme fickleness अलमतिचपलत्वात् स्वप्नमायोपमत्वात् परिणतिविरसत्वात् संगमेन प्रियायाः S'atTrayī. 839 = SubhāRaK. 17. 13; अलमतिचपलत्वात् … सङ्गमेनाङ्गनायाः KāvyPra. 319. 2 = S'ārṅgaPa. 566.

अतिचपलभाव (aticapala-bhāva) *adj.* extremely unsteady in nature कथमतिचपलभावानाम् … नानाविधलिङ्गवेदना विकाराः सम्भवन्ति Hastyāyur. 618. 25 (4. 6)

अतिचपलमाल (aticapala-māla) *adj.* having a very unsteady garland सुन्दरि माधवमव कलयालम् । मित्रकरलोलया रत्नमयदोलया चलितवपुरतिचपलमालम् StavMā. 262. 30.

अतिचपलराजलक्ष्मी (aticapala-rājalakṣmī) *f.* very unsteady royal glory (sovereignty) (मातङ्गकुमारी) अतिचपलराजलक्ष्मीबन्धनिगडकटकशङ्कामुपजनयतेन्द्रनीलकेयूरयुगलेन … वेष्टितबाहुशिखरम् … राजानमद्राक्षीत् Kād. 9. 12.

अतिचपला (ati-capalā) *f.* a kind of metre भवति हि खलु गतिरतिचपला (अतिजगती) NāṭyaS'ā. 32. 220; अतिचपला न चतुर्गुः(? र्गाः) AbhinBhā. iv. 336. 27 (*on* 28. 218)

अतिचमत्कार (ati-camatkāra) *m.* abundant charm एकवृत्तादरः प्रायः पूर्वेषामपि दृश्यते । तत्रैवातिचमत्कारात् SuvṛTi. 3. 28.

अतिचमत्कारिन् (aticamatkār-in) *adj.* highly relishable, tasty विचित्रसंस्कारमतिचमत्कारिबहुप्रकारवेसव(? वा)रसारम् …अन्नं निष्पादयेत् CaturCin. iii(1). 1163. 8.

अतिचमत्कृत (ati-camatkṛta) *adj.* extremely pleased or charmed कविराजं नृपः प्राह तद्वाचातिचमत्कृतः PrabhāC. 189. 24.

अतिचमू (ati-camū) *adj.* victorious over an army चमूमतिक्रान्तोऽतिचमूः Prasā. i. 171. 18; हे अतिचमु SiddhāKau. 66A. 7.

अतिचय (ati-cayá) *m.* piling up in excess मा ते अग्नेऽचयेन मातिचयेनायुरावृक्षि TaiBr. III. x. 3. 1.

अतिचर् (ati-car-) I. U. [DhātuPā. 1. 591 P. with the *upasarga ati*; संपृच … अतिचरापचरामुषाभ्याहनश्च P. iii. 2. 142] **Ai** to transgress, to offend सह वै देवाश्च मनुष्याश्चादनपचन आसंस्ते मनुष्या देवानत्यचरन् KāṭhS. 8. 7; तमपि देवकरम् … परम् । अतिचरन्ति अपराधपरा जनाः PadmP. iii. 25. 10; तत्र विराधदनुकबन्धप्रभृतयः केऽप्यभिचरन्तीति (v. l. अतिचरन्ति) श्रुतम् MahāvīC. 2. 9 (9); **Aii** to counteract क्रियासु वः कास्वपि धर्मबाह्याः कश्चिन्मुने नातिचरन्ति केचित् Rāgh. 2. 15; **Bi** to violate, to be unfaithful to यद्यात्रश्नमास्कन्देत्पत्न्येनमतिचरिष्यतीति विद्यात् ĀpaS'S. ix. 20. 3; नातिचरेद्भर्तारम् GautDS. ii. 9. 2; यथा चाहं नातिचरे कथंचित् पतीन् MahāBhā. iii. 252. 20; पतिं या नातिचरति … सा भर्तृलोकानाप्नोति BṛhaspaSm. 193. 8; VṛHāriSm. 11. 198; नातिचरेद्भर्तारं दृष्टादृष्टफललोभेन ManuBh. i. 494. 15 (*on* 5. 162); ii. 271. 20 (*on* 9. 102); त्वं भर्तृशासनमतिचरसि BhāgP. v. 10. 7; न प्रेषयेन्नातिचरेद्दण्ड्या(न्) अपि न दण्डयेत् ।… एष हि ब्रह्मबन्धूनां बन्धः BṛDha-

rmaP. ii. 2. 54; (रामे राज्यं प्रशासति) नार्यो नात्यचरन्भर्तृन् BrahmP. 213. 149; SmṛtiCan. iv. 582. 1; (चरि:) अतेरुलङ्घनानीत्योः KośaKaTa. 2. 841; **Bii** to wander beyond (the time limit for alms) नित्यं नातिचरँल्लाभे (v. l. अतिचरेत्) MahāBhā. i. 110. 13; **C** to cross तं हेमास्तिस्रो दिशोऽतिचेरुः JaimiBr. 2. 62; अन्ये भगणांश्चापि दीपिता अतिचेरुः BhāgP. iii. 17. 14.

अतिचर (ati-cara) *adj.* transcending विदितवेदितव्यस्य…मनोगोचरातिचरैः…तपःप्रारम्भैः…साधुपरमेष्ठिनोऽष्टतयीमिष्टिं करोमि YaśasCam. ii. 376. 6.

अतिचरण (ati-caraṇa) *n.* **1** excessive sexual intercourse बहुशश्चातिचरणादन्या बीजं न विन्दति SuśruS. vi. 38. 16; अतिचरणादिषु सर्वास्वनिलजास्वयमेव क्रमः AṣṭāSaṁ. ii. 325. 14 (6. 39); **2** inconstancy (of the probans) इन्द्रियादिष्वतिचरणमसिद्ध्यादि च स्याद् विकल्पे TattvMu. 3. 37; अतिचरणं तद्बहिष्कारपक्षे TattvMu. 3. 49; हेतुर्धात्वर्थता चेदतिचरणम् TattvMu. 5. 67 (comm. अनैकान्तिकत्वम्)

अतिचरणा (aticaraṇā) *f.* disease of vulva caused by excessive intercourse पवनोऽतिव्यवायेन शोफसुप्तिरुजः स्त्रियाः । करोति कुपितो योनौ सा चातिचरणा मता CaraS. vi. 30. 17 (1941 Ed.); सैवातिचरणा शोफसंयुक्तातिव्यवायतः AṣṭāHṛ. vi. 33. 31; योनिरोगाः … स्यान्नन्दा चातिचरणा योनिरोगा इतीरिताः S'ārṅgaS. i. 7. 179; *adj.* (*f.*) indulging in sex excessively मैथुनेऽचरणा पूर्वं पुरुषादतिरिच्यते । बहुशश्चातिचरणा तयोर्बीजं न विन्दति RugVi. 62. 9; BhāvPra.(Bhā.) viii. 69. 12.

अतिचरत् (ati-carat) *adj.* [*f.* ati-cárantī] **i** disregarding अ॑ति वै॑ ता॑: प्रजा॑पतिमचरंस्ता॑ अतिच॑रन्तीर्वै॑रुणेनाग्राहयत् MaiS. i. 10. 10; KāthS. 13. 12; 36. 5; **ii** going too far अल्पमल्पं यथाभोज्यं पूर्वलाभेन जातुचित् । नित्यं नातिचरल्लाँभे MahāBhā. i. 110. 13; **iii** using in excess (कुष्ठनिदानम्) स्नेहांश्चातिचरतः युगपत् त्रयो दोषाः प्रकोपमापद्यन्ते CaraS. ii. 5. 7.

अतिचरा (aticarā) *f.* name of a plant *Hibiscus mutabilis* अव्यथातिचरा पद्मा चारटी पद्मचारिणी AmaK. 940; रम्या पद्मवती चातिचरा स्थूलरुहा स्मृता RājNi. 152. 7; पद्मचारिण्यतिचरा पद्मा पद्मवतीति च DhanvNi. 152. 2; अव्यथातिचरा पद्मा Vaija. 130. 89; पद्मचारिण्यतिचरा MadaPāNi. 28. 77; S'abdaRa.(Vā.) 1245; पद्मचारिण्यतिचरा व्यथा पद्मा … च शारदी BhāvPraNi. 82. 15; KośaKaTa. 1. 2449; अतिचरा पद्मतरौ S'abdaRaSaK. 285. 8; सुपुष्करा चातिचरा KalpaK. 312. 562.

अतिचरित (ati-carita) *adj.* [*f.* -ā] **1** transgressed धर्मं विचरतः (v. l. धर्मोऽतिचरितः) पीडा सापि द्वाभ्यां नियच्छति MahāBhā. i. App. 81. 141; **2** overstayed (लग्नस्थे धनपे) अतिचरिते बहुदिवसं हरणं नो कार्यसिद्धिरीषदपि TājiNi. iii(1) (5). 107 (359); *n.* act of going astray, breaking of the rule of conduct, misbehaviour न यदतिचरितं जनेषु केनाप्यपरिमितं ननु भाग्यमेतस्याः S'ivLī. 7. 62; कथं तेष्वतिचरितं वीरमानिना राघवबटुना JānaPa. 4. 37 (8)

अतिचरितवै (áti-caritavái) *inf.* to ignore, to show indifference त॑स्मात् पिता॑ ना॑तिचरितवा॑ इति MaiS. i. 10. 10.

अतिचर्चा (ati-carcā) *f.* unnecessary or excessive discussion अलमतिचर्चया SyādvāMañ. 11 (167)

अतिचर्मन् (ati-carman) *n.* thick leather सद्यो व्रणे यथोक्ताभिः क्रियाभिः समुपाचरेत् । कुर्यात्संवरणं चास्य मृदितेनातिचर्मणा Hastyāyur. 209. 16 (2. 16)

अतिचर्वणा (ati-carvaṇā) *f.* excessive relish (सात्त्विकाः) ते च … विभावेन रत्यादिगतेनैवातिचर्वणागोचरेणाहृता अनुभावैश्च गम्यमाना भावा भवन्ति Kāvyānu.(He.) 119. 2.

अतिचर्वितचर्वण (aticarvita-carvaṇa) *n.* chewing of what is already chewed (i. e. repetition) अलमतिशुष्क (v. l. °चर्वित) चर्वणेन LaṭaMe. 2. 17 (10)

अतिचल (ati-cala) *adj.* [*f.* -ā] **i** moving very fast, very unsteady, very quick तत्र वातमेवंविधमनारोग्यकरं विद्यात् … अतिचलमतिपरुषम् CaraS. iii. 3. 7; समीरणं चातिचलं विलोकयन् RāmC. 5. 39; मध्याह्नपवनदोलितानामतिचला … वेल्लतीव शाखिनां छाया UdaySuKa. 45. 28; NaiṣC. 14. 28; **ii** very fickle, very inconstant वश्यता परमा तेन जायतेऽतिचलात्मनाम् । इन्द्रियाणाम् ViṣṇuP. vi. 7. 44; ĀdiP. 26. 27.

अतिचलत् (ati-calat) *adj.* excessively moving अतिचलज्जलदोत्थमुपप्लवम् … परिषस्वजे ।… शरत् Kapphiṇā. 8. 47.

अतिचलता (aticala-tā) *f.* excessive fickleness तडिदतिचलतां ते किं दृगन्तादपाठीत् UjjvaNīMa. 80. 2.

अतिचलाचला (ati-calācalā) *adj.* (*f.*) excessively fickle तदलं राज्यभोगेन लक्ष्मीरतिचलाचला MahāP. 4. 150.

अतिचाण्डाल (ati-cāṇḍāla) *m.* lower than a cāṇḍāla आरूढपतितोत्पन्नो ब्राह्मणो वृषलेन च । उभौ तावतिचाण्डालौ सगोत्रायां तु जायते LaS'ātāSm. 59.

अतिचातुर (ati-cātura) *adj.* very skilled छित्त्वा शीर्षम्… कबन्धाद्द्वाजिनो हरेः । कबन्धे योजयामास विश्वकर्मातिचातुरः SkandP. iii(2). 15. 10.

अतिचातुर्य (ati-cāturya) *n.* great skill अद्राक्षु… ते … अतिचातुर्यपर्यवस्थापितानुश्रवतात्पर्य°…°जनालंकृतसप्तमकक्ष्यम्…स्वायंभुवं भवनम् NīlaVi. 40. 11.

अतिचापल (ati-cāpala) *n.* great unsteadiness or great fickleness योषितां चातिचापलम् TattvSaṁ. 3579; YogVā. iii. 26. 37; अलमतिचापलेन वाचाम् NyāyMa. 254. 3; KāvyPra. 289. 2; अतिचापलं वितन्वन् …। मुखरयसि स्वयमेताम् … शङ्कुरिव घण्टाम् ĀryāSaS'a. 6.

अतिचापलशालिन् (aticāpalaśāl-in) *adj.* possessed of great fickleness or unsteadiness अतिचापलशालिचित्तसंदाननैकसदनं क्षणमप्यमुक्ता । या सर्वदैव भवता तदुदन्तचिन्ता तान्ति तनोति तव KāvyPra. 289. 2.

अतिचापल्य (ati-cāpalya) *n.* excessive quickness अत्रान्तरे स मत्कुणोऽतिचापल्यात् खट्वान्तं प्रविष्टः PañcT. 62. 12 (Kosegarten's Ed.)

अतिचार (ati-cāra) *m.* **A** (moral) transgression, unfaithfulness, violation (of vows) अतिचारं पृष्टां पत्नीम् … मार्जयति VaitāS'S. 4. 8; मनसा भर्तुरतिचारे त्रिरात्रं यावकम् … क्षीरोदनं वा भुञ्जानाधः शयीत VasiDS. 21. 6; अगस्त्यस्याभि(v. l. ति)चारेण युष्माकं वै वपा हुता MahāBhā. i. 109. 15; VāyuP. i. 59. 64; राजद्विष्टातिचाराभ्याम्…अस्वाम्यं जायते स्त्रियाः ArthS'ā. ii. 23. 5 (3. 3); ii. 177. 1 (4. 13); ii. 182. 4 (4. 13); GobhiSm. 3. 4; शङ्का च काङ्क्षा मतिवि(? विं)प्लुता च परस्य दृष्टेरपि च प्रशंसा । भूयः सदानायतनस्य सेवा पञ्चातिचाराः खलु दर्शनस्य VarāṅgaC. 31. 70; अतिचारोऽतिक्रमः धर्मार्थकामेष्वसहभावः ManuBh. ii. 271. 27 (*on* 9. 102); BṛKathāK. 17. 12; YaśasCam. ii. 417. 13; अतिचारा जिनैः पञ्च गदिताः … तीव्रमन्मथाभिनिवेशनम् ।… अतिचारा मताः पञ्च चतुर्थव्रतसंभवाः । हिरण्यस्वर्णयोर्वास्तुक्षेत्रयोर्धनधान्ययोः । कुप्यस्य दासदास्योश्च प्रमाणेऽतिक्रमाद्द्विधा(? भिधाः) SubhāRaSaṁ. 848–51; BṛKathāMañ. ix. 1. 258; अतिचारास्ततो हेयाः …। क्रोधाद्बन्धश्छविच्छेदोऽधिकभाराधिरोपणम् । प्रहारोऽन्नादिरोधश्च आहिंसायां प्रकीर्तिताः। धनधान्यस्य कुप्यस्य गवादेः क्षेत्रवास्तुनः । हिरण्यहेम्नश्च संख्यातिक्रमः YogS'ā. 3. 94; ज्ञानाद्यतिचारशुद्ध्यर्थं यदालोचनादि ज्ञानादीनां वा योऽतिचारस्तत् ज्ञानप्रायश्चित्तादि तत्राकालाविनयाध्ययनादयोऽष्टावतिचारा ज्ञानस्य SthānṬ. 163A. 2; (शोधिता) सकृदतिचारालोचनेन … सकलातिचारकचवरविरहेण SthānṬ. 277A. 1; 323B. 14; अतिचारविशुद्धिः … भिक्षाचर्याद्यतिचारजातं तदालोचनार्हम् … तपोविशेषेणैवातिचारपारगमनम् AupaSūṬ. 78. 11; JñātāDhaṬ. 73B. 5; न रागवन्नो भजसेऽतिचारं नालम्बसे वक्रगतिं कदाचित् ।… तथापि पृथ्वीतनयोऽसि रूढः GotaSt. 10; स्खलत्येषा … अतिचारैः समेष्वपि Gurvā. 373; 4. 14; 'ऋत्विगाचार्यौ नातिचरितव्यौ' इति वचन(? ने)नातिचारनिषेधात् BhaṭṭDī. iv. 186. 23 (*on* xi. 3. 12); MayūMāli. 826. 6 (*on* xi. 3. 12); **B** excessiveness, superiority अतिचाराद्भृशं भीता भर्तुः सा (गान्धारी) MahāBhā. i. 1112*; तस्यातिचारप्ररूढप्रणयसहकारमञ्जरी सुमञ्जरी नामाग्रमहादेवी YaśasCam. ii. 360. 21; **C** overtaking (of planets), crossing अतिचारे त्रिपक्षं स्याद्वक्रे मासचतुष्टयम् । व्रतोद्वाहौ न कुर्वीत गुरोर्वक्रातिचारयोः AgniP. 121. 6; अतिचारगतो मन्दः पुनर्वक्राध्वसंस्थितः SkandP. iv. 56. 23 (comm. राशिमुल्लङ्घ्य गतः); (शुक्रस्य) अतिचारोऽष्टवासरान् BhaviP. 321B. 18 (ii (1). 4. 40); GotaSt. 10; दशदिवसपञ्चदिनात्त्रिपक्षमतिचारवक्रयोर्दद्युः । भौमाद्याः VasiS. 18. 14; TājiNi. iii. 5. 20 (334); सितः…ज्ञः…एषां गुणागुणैः…उदितास्तमितवक्रातिचार(? र)रूपैः VīraMi. (Samaya.) 265. 19; 12. 15; 96. 33; NirṇaSi. 223. 2; **D** overlapping or inconstancy मैवं बाधातिचारस्ववचनहतिभिः स्वोक्तदृष्टान्तदौस्थ्यात् TattvMu. 4. 95; 4. 24; गर्भदासादौ तथानियमनयोग्येऽतिचारात् SiddhāSi. ii. 101. 3; **E** name of one of the four forms of Kṣetrapāla (क्षेत्रपालाः) अतिचारश्च राजा च कपाल्याख्यो महामनाः । ते श्यामाः ĪśānS'iPa. i. 32. 61; cf. **अतीचार.**

अतिचारय् (ati-cāray) [*caus.*] to mix and administer अस्य …गन्धोदकावसेकेन वा रसमतिचारयेत् पुष्पचूर्णोपहारेण वा ArthS'ā. iii. 173. 8 (12. 5)

अतिचारिता (aticāri-tā) *f.* **i** (moral) transgression बृहतां पतिर्न भजसेऽतिचारिताम् PṛthvīVi. 9. 4; **ii** overtaking of planets, PṛthvīVi. 9. 4.

अतिचारिन् (aticār-in) *adj.* [*f.* -iṇī] [DEBRU. p. 344; P. iii. 2. 142; JaineVyā. ii. 2. 123; CāndraVyā. i. 2. 96; SaraKaṇṭhā.(Gr.) i. 4. 207; SiddhaHe. v. 2. 62] **i** transgressing moral laws स्त्री यातिचारिणी गुप्ता पिण्डं तु लभेत GautDS. iii. 4. 35; इतिवादिनस्ते दधिरेऽतिचार्यव्यभिचारिसंचार्यपचारिणोऽस्त्रम् DvyāśraKā. 12. 35; **ii** surpassing, excelling कुण्डले त्वतिचारिणी । ईदृशी … सुरत्ने भवतः कुतः PadmP.(Ra.) 26. 140; YaśasCam. i. 71. 12.

अतिचारु (ati-cāru) *adj.* [*f.* -ī] very charming, very beautiful, very attractive ते चित्रकूटस्य नितम्बरेखानिचारुषु । क्रीडन्तः PadmP.(Ra.) 33. 34; कुङ्कुमेनातिचारुणा । लिम्पति स गुरोः पादौ स्वयमेव क्षितीश्वरः BṛKathāK. 22. 31; अतिचारुचन्द्रनैः … अलंकृताम् … विन्ध्याटवीम् NalaCam. 6. 11 (23); स्मरामि तस्यातिचारुचन्द्रोद्गते: … अनङ्गोत्सवदिनप्रदोषस्य TilaMañ. 338. 14; 73. 16; विचारेणातिचारुणा । देवमालोकयेत् YogVā. v. 24. 44; वारस्त्रीभिर्वीज्यमानं चामरैरतिचारुभिः (ददर्श बाहुबलिनं सः) TriṣaS'aPuC. i. 5. 74; i. 4. 429; भिक्षा माधुकरी वरम् । अतिचार्वीऽप्यनाचारदूताहूता न तु श्रियः PāṇḍaC. 8. 217; VasaViKā. 3. 25; सत्यप्रतिज्ञत्वमतिचारु च सौगते PrabhāC. 124. 25; CaitaCa. 182. 14 (8); अतिचारुचन्द्ररोचिः … सुरभिः कदानुयास्यति RasiRañ. 107; BhojanKu. 65. 21; निधाय पाणौ खनित्रमतिचारु चितार्थम् Hāsyārṇa. 1. 34 (Cappeller's Ed.)

अतिचारुता (aticāru-tā) *f.* great charm बृहस्पतिमिन्दुं च कुमारस्यातिचारुतया साभिलाषौ दृष्ट्वा ViṣṇuP. iv. 6. 24; TilaMañ. 285. 2.

अतिचार्वङ्गी (aticārv-aṅgi) *adj.* (*f.*) whose limbs are very charming विलासिन्योऽतिचार्वङ्ग्यो ननृतुर्लास्यमुत्तमम् MārkP. 129. 9; 85. 45; (माधवी) स्त्रीरत्नमतिचार्वङ्गी रत्नभूषणभूषिता BrahmVaiP. ii. 15. 3 = DevīBhāP. ix. 17. 3; अतिचार्वङ्ग्यपि मे…दुनोति गात्रं विरहे प्रियासौ Pañcā. 47. 6.

अतिचाषि (ati-cāṣi) *adj.* (*f.*) surpassing (the lustre of) the *cāṣa* bird भूपः … प्रभां बिभ्रद्भिरतिचाषि वा दीप्रान्कुम्भानुदासयत् DvyāśraKā. 15. 74.

अतिचिक्क (ati-cikka) *adj.* having excessively flat nose अतिचिक्कतेप्यचिकिना द्युवासिनो निबिडं ममाजिमवलोक्य भाविनः DvyāśraKā. 18. 36.

अतिचिक्कण (ati-cikkaṇa) *adj.* [*f.* -ā] **i** very smooth, very sticky अत्र मृच्छब्देनातिचिक्कणाया भाण्डादिनिर्माणयोग्यायाः कुम्भकारसंस्कृताया मृदः पिण्डोऽभिधीयते comm. *on* KātyS'S xxvi. 1. 4; **ii** very sticky, very stingy तीक्ष्णम् … व्यसनिनम् … अतिव्ययशीलमन्यदेशायातमतिचिक्कणं चामात्यं न कुर्वीत NītiVā. 18. 13; *n.* extreme unctuousness शरीरसुस्निग्धतयातिचिक्कणम् … प्रमेहरूपाणि KalyāKā. 11. 7; *adv.* (ati-cikkaṇam) very smoothly or finely हिङ्गुलम्…प्रत्येकं पलिकं भागं चूर्णयेदतिचिक्कणम् RaseCin. 9. 318 (254. 23)

अतिचिक्कणचित्त (aticikkaṇa-citta) *adj.* whose mind is very covetous भद्रमित्रः … तं न्यासार्पणेऽतिचिक्कणचित्तं निश्चित्य YaśasCam. ii. 347. 3.

अतिचिक्रमिषत् (ati-cikramiṣat) *adj.* wishing to cross over cf. **अनतिचिक्रमिषत्** NidāSū. 178. 1 (10. 4)

अतिचिगचिगापित (ati-cigacigāpita) *adj.* extremely clumsy तेनोक्तम् —अतिचिगचिगापितम् (इदं पद्यम्) PurāPraSaṁ. 104. 4.

अतिचित् (ati-cit-) I. P. to distinguish, to prefer, to mark out ब्रह्मणा वा चितयेमा जनाँ अति ṚV. ii. 2. 10; iv. 36. 9.

अतिचित (ati-cita) *adj.* very much accumulated सबालपाषाणतृणावरोधात् सदान्त्र एवातिचितं मलं यत् । महोदरम् … करोति KalyāKā. 11. 134.

अतिचित्र (ati-citra) *adj.* [*f.* -ā] **i** very strange, extremely peculiar, very incongruous अर्थोष्मणा विरहितः पुरुषः स एव चान्यः क्षणेन भवतीत्यतिचित्रमेतत् PañcT. 2. 35 (233. 4) = Pañcā. 144. 24; अन्यस्य स्वरूपसंवेदनमन्यस्य ग्राह्यतेत्यतिचित्रमेतत् NyāyKa. 123. 5; क्षीणे विधौ हरिविलग्नकरोऽतिचित्रं गृह्णाति तं द्युमणिमभ्रपिशाच एकः Subhāṣi. 569; अधिरोपयतीन्दुवंशरत्ने…शरासने ज्याम् । अतिचित्रममित्रपार्थिवानामवरूढाजनि सेयमंसकूटात् Acyutarā. 2. 48; **ii** very surprising, extremely marvellous, most wonderful तत्राप्यन्यजन्मोपात्तसंस्कारानुबन्धेन वा पुरुषप्रयत्नेन वा संस्कारातिशयः उपजायत इति नातिचित्रम् Kād. 13. 13; एकविषयोपसंहाराचित्तस्यातिचित्रमैकाग्र्यम् DaśKuC. 135. 22; अतिचित्रमिदं महीपतिर्यदकृष्णामवनीं करिष्यति S'iśuVa. 16. 79; नाममात्रकथा नातिचित्रं हि तपसः फलम् BṛKathāS'loSaṁ. 18. 524; अहोऽतिचित्रं नृपतेश्चरित्रं परं पवित्रं तव किं वदामि DevīBhāP. iii. 22. 24; उपविश पुत्र ममाङ्के नियमेन महीयसातिचित्रेण । अर्होऽसि गुणगणोद्गतगौरवसंवादिनानेन KalāVi. 1. 80; कथाभिरतिचित्राभिर्मोहयन्सभ्यमण्डलम् RājTa.(Ka.) 6. 32; सखे नातिचित्रमेतत् Dūtāṅg. 49(1); एकस्यैवातिचित्रस्य वस्तुनः करणेन हि । तत्सामान्यान्यवस्तूनां करणं स भवेत्त्रिधा । विशेषः AlaṅkāKau.(Ka.) 338. 9; भोः स्वामिन्नेदमतिचित्रम् CaitaCa. 179. 2(8); विश्वत्रय्यां विश्रुतं वस्तुजातं संघीकृत्य प्रायशः सर्वशक्त्या । नेत्रा वाण्या नैपुणान्निर्मनुष्यं शिल्पं साक्षात्कल्पितं वातिचित्रम् Raghunā. 10. 53; **iii** variegated, variously decorated, manifold, various, of different types स्वयमहमतिचित्रैर्नृत्तवादित्रगीतैर्भगवति भवदीयं मानसं रञ्जयामि DevīCatūSt. 58; गृहम् … विधातव्यम् । प्राग्ग्रीवैरतिचित्रैः शालैर्जालैर्विभूषितं विविधैः SamarāSū. 31. 125; 66. 31; अतिचित्रैः सुमनोभिः सुमनोभिर्योगिनामिवोपचितम् KaṁVa. 4. 47; आपीडैरतिचित्रैर्भूषणदानैरदोष(? षै)श्च…धात्रेयिकाम् … ग्राहयेत् KandaCū. add. 23 after iii. 3. 7; *adv.* (ati-citram) in a very wonderful manner, marvellously अतिचित्रं पर्यक्रीडत राजकन्या DaśKuC. 105. 6.

अतिचित्रकृत् (aticitra-kṛt) *adj.* causing great wonder (i. e. deliverance) एतानि यानि प्रोक्तानि काशीप्राप्तिकराणि च । प्राप्य काशीं भवेन्मुक्तो जन्तुर्नान्यत्र कुत्रचित् । अत एव हि तत्क्षेत्रं पवित्रमतिचित्रकृत् SkandP. iv. 25. 43 (comm. अतिचित्रं कैवल्यम्)

अतिचित्रतर (ati-citratara) *m.* one of the six varieties of Mārgatāla in which the *kalā* has the duration of two *mātrās* of the *druta* type अतिचित्रतरो मार्ग(? र्गः) कलाश्च द्रुतसंज्ञिकः (? काः) SaṁgīMa. ii. 3. 59.

अतिचित्रता (aticitra-tā) *f.* **i** the state of being very marvellous or wonderful (incongruity) अन्येनान्यस्य कल्पनासंभवादतिचित्रता S'ivDṛ. 4. 45; **ii** being odd or strange एवं मूढस्य मूढत्वं स्वार्थान्धस्यातिचित्रता KathāSaSāg. x. 5. 247.

अतिचित्रतेजस् (aticitra-tejas) *adj.* possessing a very strange or marvellous splendour तत्र कंचिदतिचित्रतेजसं सादिनम् … । पश्यति स … नृपः S'ivLī. 21. 44.

अतिचित्रधृक् (aticitra-dhṛk) *adj.* having many pictures (वास्तुः) नाचित्रो नातिचित्रधृक् YuktiKa. 45. 5.

अतिचित्रपद (aticitra-pada) *adj.* possessing very wonderful words तत्रातिचित्रपदमत्रभवान् … सुधीन्द्रान् । … अग्राहयत्कृतम् S'aṅkaDigVi.(Mā.) 10. 114.

अतिचित्रयोधिन् (aticitrayodh-in) *adj.* fighting very marvellously अतिचित्रयोधी … । सुदर्शनः सात्यकिमापतन्तं न्यवारयद्राजवरः प्रसह्य MahāBhā. vii. 94. 6.

अतिचित्ररूप (aticitra-rūpa) *adj.* having variegated colours सिंहासनं तत्र सभान्तराले … नानाविधाभिर्द्युतिभिर्मणीनाम् नानाविधानामतिचित्ररूपम् । … भाति Vidvanmo. 8. 75.

अतिचित्रशब्दशय्या (aticitra-śabdaśayyā) *f.* very wonderful style अनयोरतिचित्रशब्दशय्यां दधतोः … । पटुवादमृधेऽन्तरं तटस्थाः न किंचनान्वविन्दन् S'aṅkaDigVi.(Mā.) 15. 91.

अतिचित्रशील (aticitra-śīla) *adj.* whose conduct is very peculiar कृतान्तविजयिन्नतिचित्रशीलं त्वां मन्महे न सुलभं च न दुर्लभं च YātrāPra. 6. 109.

अतिचित्राकृति (aticitrākṛti) *adj.* of various kinds शृण्वानस्याद्वितीयं निरवधिसहजानन्दसंवित्स्वरूपं मन्वानस्यातिचित्राकृतिप्रतिधिषणाशक्तिरूपोपपत्त्या । विश्वं कृष्णाद्वितीयं भयचकितधिया ध्यायतश्चान्तकाले ज्योतिर्ज्योतिःस्वरूपे भगवति विशति ब्रह्मरन्ध्रं विभिद्य KaṁVa. 6. 45.

अतिचित्राङ्ग (aticitrāṅga) *adj.* having a very much variegated body, having an amazing form सोऽथ हेममृगो भूत्वा सीतादृष्टिपथं गतः । मायावी चातिचित्राङ्गः DevīBhāP. iii. 28. 28.

अतिचित्राभिधान (aticitrābhidhāna) *n.* very peculiar statement दुर्विवेकत्वाच्चातिचित्राभिधानमिति SaṅkarKāBh. 198. 1 (*on* iv. 2. 33)

अतिचित्रार्थ (aticitrārtha) *adj.* having very wonderful meanings अनेकार्थविशेषैर्यत्सूक्तैः सौष्ठवसंयुतैः । उपेतमतिचित्रार्थैरुदात्तं तच्च कीर्त्यते Nāṭya-S'ā. 16. 111.

अतिचित्रित (ati-citrita) *adj.* **i** very marvellous, very wonderful, very strange इमं चन्द्रगतिः श्रुत्वा वृत्तान्तमतिचित्रितम् । लोकधर्मतरुं वध्यं विदित्वा भवबन्धनम् PadmP.(Ra.) 30. 55; **ii** very much variegated, greatly decorated पद्मोवाच । ब्रूहि तन्मम किं कुत्र जातः कीर … तव । पतत्रं कुङ्कुमेन… अतिचित्रितम् । करोमि KalkiP. ii. 1. 18.

अतिचित्रीय (ati-citrīya-) [Denom.] to be the object of great wonder सद्यः संगतानां च सैनिकानां तदत्यचित्रीयताकारान्तरग्रहणम् DaśKuC. 127. 7; त्रिभुवनमुकुटमयानां पार्थिवानामुत्पत्तौ नातिचित्रीयते … उपकरणानां सामग्री AvantiKa. 165. 13.

अतिचिन्त (ati-cinta) *adj.* full of anxiety, very anxious अतीव चिन्ता यस्मिंस्तत् अतिचिन्तम् JñātāDhaṬ. 36B. 7.

अतिचिन्तन (ati-cintana) *n.* excessive anxiety ग्लानिः किं नातिचिन्तनात् DaśRū. 4. 57.

अतिचिन्ता (ati-cintā) *f.* great worry or anxiety अश्रुजलनिपतनस्थानगाश्चातिचिन्ताम् (पिटका जनयन्ति) BṛSaṁ. 52. 2; वसुदेवोऽपि दुःखार्तो विललापातिचिन्तया PadmP. iii. 13. 36; शुष्कवादं जलक्रीडामतिचिन्तां च वर्जयेत् Rasā. 18. 119 = RaseCin. 3. 87 (37. 6); तच्छोष्यते दिनकृतेत्यतिचिन्तयेव शोकानतं कलमशालि वनं विपाण्डु Subhāṣi. 1822.

अतिचिन्ताकर (aticintā-kara) *adj.* causing much anxiety शौर्यं जनन्यादीनामतिचिन्ताकरम् AlaṅkāMañ. 188. 7.

अतिचिन्ताकुल (aticintākula) *adj.* troubled with excessive anxiety अतिचिन्ताकुलो राजा च्छायायामप्यविश्वसन् । … श्रद्दधे न स्वजीवितम् RājTa.

(S'rī.) 1(7). 182.

अतिचिन्तामणि (ati-cintāmaṇi) *adj.* surpassing a wish-yielding jewel बिम्बं श्रीपार्श्वनाथस्य ···। प्रातिष्ठिपत् शुभे लग्ने मन्त्री श्रीहेमसूरिभिः। अतिचिन्तामणिं प्राणिवाञ्छितातीतवस्तुदम् PrabhāC. 206. 3.

अतिचिन्तिया (ati-cintiyā) *f.* great anxiety हव्यासस्त्वतिचिन्तिया। स्याच्चिन्ता चिन्तया TrikāS'e. i. 7. 6 (comm. हव्यासः अतिचिन्तिया चिन्ता चिन्तया इति चत्वारि चिन्तायाः)

अतिचिन्वत् (ati-cinvat) *adj.* searching thoroughly (हैहयेषु) अतिचिन्वत्सु विप्राणां भवनान्निःसृतं बहु (धनम्) DevīBhāP. vi. 16. 23.

अतिचिपिटमुखी (aticipiṭa-mukhī) *adj.* (*f.*) having a very flat mouth काचघटीं नातिचिपिटमुखीं नात्युच्चमुखीं मसीभाजनप्रायाम् ··· विधाय करीषैरुपरि पुटो देयः RaseCin. 2. 6.

अतिचिपिटलौहपात्री (aticipiṭa-lauhapātrī) *f.* very shallow iron container सविडं सग्रासमीशज्ञं(? जं) पात्रे। अतिचिपिटलौहपात्र्या पिधाय संलिप्य वह्निना योज्यम् RaseCin. 3. 23.

अतिचिर (ati-cira) *adj.* **A** much older रोमकसिद्धान्तोऽयं नातिचिरे पौलिशेऽप्येवम् PañcSi. 1. 10; **B** of a very long duration अतिचिरं कालमहो खलु वयम् ··· नानाविधानि तपांसि वृथा चकृम NīlaVi. 41. 10.

अतिचिर (ati-cira) *n.* a very long period (of time); **अतिचिरस्य** (ati-cirasya) [Gen.] for a very long time मनो मन्दस्पन्दं बहिरतिचिरस्यापि विमृशन् न जाने कस्यैषा परिणतिरुदारस्य तपसः S'atTrayī. 308; **अतिचिरात्** (ati-cirāt) [Abl.] **A** after a very long time शरदि हंसगणस्य ···। समवगाढुमधौतविनिर्मलं नवसरोऽवसरोऽतिचिरादभूत् HarVi. 3. 74; TilaMañ. 243. 16; तस्यावलेपस्तिमितादरस्य पुरः पुरस्कारविवर्जिताभ्याम्। उद्योगमात्रेव रिपोस्तदुग्रं नूनं बभूवेऽतिचिराच्चराभ्याम् RāmC. 27. 2; तदपि नातिचिरादेव स्फुटीभावमुपैष्यति KamVa. 2. 14(1); लब्धोमाया इयमतिचिरादर्चितायाः प्रसादात् MayūSam. 2. 36; उत्ताम्यतोरतिचिरादपि मन्मथाग्नेरावयोर्घटनमत्र कथं चिदासीत् Mukundā. 23; **B** very late सा लीनगर्भा करिणी प्रसूतेऽतिचिरादपि Hastyāyur. 414. 27 (3. 8); द्वितीयरात्रावतिचिराद् द्वारमागतः स कटकं खटखटापयति PrabaK. 25. 24; **C** at last, finally [nt, MW]; **अतिचिराय** (ati-cirāya) [Dat.] for a very long time धात्री-तैस्तैः परचित्ताकर्षणमन्त्रैर्वचनैः ··· अतिचिरायाचरितोपचारा ··· पुण्यकान्तामुद्दिश्य श्लोकमुदाहार्षीत् YaśasCam. ii. 362. 8; तेजस्ततोऽकरोदस्रस्य। नातिचिरायास्तोकं शोषितमुदरस्थमुत्तरायास्तोकम् YudhiVi. 8. 88; **अतिचिरेण** (ati-cireṇa) [Inst.] **A** for too long a time नातिचिरेण विशेषात् BrahmSū. iii. 1. 23; आशु नत्वतिचिरेण ManvaVi. 1424. 13 (*on* 11. 160); तत्र इह ··· योनिमापद्यन्त इति विशेषान्नातिचिरेण BrahmSūBh.(Ma.) 129A. 6 (*on* iii. 1. 25); तद्रूपता च नातिचिरेण AṇuBh. 180. 15 (*on* iii. 1. 23); **B** with much delay, very late अतिचिरेणागमनस्यैव निषेधात् Tattv-Prakā. 146A. 9 (*on* iii. 1. 25); द्वितीयरात्रावतिचिराद् (v. l. अतिचिरेण) द्वारमागतः स कटकं खटखटापयति PrabaK. 25. 24.

अतिचिरकाल (aticira-kāla) *adj.* lasting for a very long period of time गव्यं क्षीरं सुखोष्णं हितमतिचिरकालातिसारज्वरोन्माद° ··· °कासश्लिहासु KalyāKā. 9. 101; कः खलु महाप्रयासमतिचिरकालं तावद् द्वादशवार्षिकं व्रतचरणमाद्रियेत ManuBh. i. 199. 22 (*on* 3. 1); कण्डूतेर्यः प्रतीकारः प्रतिक्रिया दीर्घकाल इत्यतिचिरकालः JayaMa. 80. 7 (*on* 2. 1); *m.* [in Cpd.] a long period of time अतिचिरकाललग्नमतिक्रान्तकुनृपतिसहस्रसंपर्ककलङ्कमिव क्षालयन्ती यस्य विमले कृपाणधाराजले चिरमुवास राजलक्ष्मीः Kād. 5. 21; केवलमतिचिरकालोपचिता बलवती मे प्रेमप्रवृत्तिरस्याम् Kād. 101. 23; देव्यपि तिलकमञ्जरी जातविस्मया निरीक्ष्य तम् ··· अतिचिरकालदृष्टमिष्टापत्यमिव हारमीरितानन्दाश्रुवर्षा ··· हृदि समारोपितवती TilaMañ. 405. 4; अतिचिरकालप्रार्थितमनियतकथनीयमात्मसंवेद्यम्। सुरतसुखमन्वभूत(? व)म् VasaTi. 31. 1.

अतिचिरकालजीविता (aticirakālajīvi-tā) *f.* life for a very long period; longevity कालविद्भिर्विनिर्णीता यस्यातिचिरजीविता। स चेज्जीवति संछिन्नशिरास्तद्दैवमुत्तमम् YogVā. ii. 8. 18.

अतिचिरकालम् (ati-cirakālam) *adv.* for a very long period of time निर्वर्ण्य चातिचिरकालमालपितुकामस्तदभिमुखोऽभवम् TilaMañ. 248. 11; 225. 13; 268. 23; (पितृगृहे) नातिचिरकालमवस्थानं श्वशुरकोपभयात् JayaMa. 241. 10 (*on* 4. 1); अतिचिरकालमेवंविधविविधकष्टभावनायां प्रकृतिविपर्ययादुन्मादः Nāṭa-LaRaK. 2484.

अतिचिरतरतिरोहित (aticiratara-tirohita) *adj.* which has disappeared long ago पदेषु पूर्ववर्णेषु नातिदूरमतिक्रान्तेषु बुद्ध्योपसंहर्तुं शक्येषु घटमानमन्त्यवर्णवेलायामनुसंधानं वाक्येषु पुनरतिचिरतरतिरोहिताक्षरपरम्परानुसन्धानमतिक्लिष्टमदृष्टपूर्वमिति NyāyMañ. i. 356. 15.

अतिचिरदर्शन (aticira-darśana) *n.* sight (of someone or something) after a very long gap (of time) महीपतिः ··· अतिचिरदर्शनादपरिचितमिव ··· पश्चाद् व्रजता पुरुषेणानुगम्यमानं विजयवेगमपश्यत् TilaMañ. 80. 23.

अतिचिरदर्शनोत्कण्ठित (aticira-darśanotkaṇṭhita) *adj.* eager to see (someone) since a very long time पश्यतु त्वां जनः। व्रजन्तु सफलतामतिचिरदर्शनोत्कण्ठितानि लोकलोचनानि Kād. 77. 17.

अतिचिरदुःखिता (aticira-duḥkhitā) *adj.* (*f.*) unhappy since a very long time राज्यस्थं त्वां हि बुद्ध्वा सा कथं तेनासि विस्मृता। इति क्रुद्धा शापेऽज्ञातु पुत्रातिचिरदुःखिता KathāSaSāg. ix. 6. 138.

अतिचिरनिबद्ध (aticira-nibaddha) *adj.* kept under control or restricted for a very long period of time सत्यमिदमकुशलं यदतिचिरनिबद्धघोटकब्रह्मचारिणस्तव कामिनीरत्नं करतललग्नम् Mukundā. 125(9)

अतिचिरप्रणयिन् (aticira-praṇayin) *adj.* who has been affetionate for a very long period of time क्षितितलोपसर्पिणा च शिरसा प्रदर्शितादरः कृत्वा प्रणाममतिचिरप्रणयीव स्पष्टवर्णोच्चारया गिरा सप्रगल्भमुवाच (कैवर्तनायकः) TilaMañ. 130. 19.

अतिचिरप्रवृद्ध (aticira-pravṛddha) *adj.* intensified over a very long period of time अतिचिरप्रवृद्धामर्षोद्दीपितस्य भीमस्य वचनाद् विज्ञापय राजानम् VeṇīSaṁ. 1. 101.

अतिचिरप्रार्थिता (aticira-prārthitā) *adj.* (*f.*) sought after for a very long time वक्त्रे मन्दानिलपरिमलं पादयोः पल्लवाभाम् ···न्यस्य यस्यां वधूनाम् लेभे मैत्रीं मधुरतिचिरप्रार्थितां मन्मथेन HaṁsDū.(Vā.) 73.

अतिचिरप्रोषित (aticira-proṣita) *adj.* who has lived away for a very long period of time नगरयोषितः ··· अवनिपतिं सवलवाहनमतिचिरप्रोषितपरावृत्तं गोपुरेण निविशमानमवलोकयन्ति TātpaṬ.(Vā.) 115. 5 (*on* i. 1. 3)

अतिचिरब्रह्मचर्यचरण (aticira-brahmacaryacaraṇa) *n.* practice of celibacy over a long period of time आवामतिचिरब्रह्मचर्यचरणसमुपजातायतनखलोमादिमन्तौ Bhām. 217. 8 (*on* i. 3. 19)

अतिचिरम् (ati-ciram) *adv.* for a very long period of time अतिचिरमेवं दुग्ध्वा सान्नाय्यं तिष्ठेदिति शाण्डिल्यायनः LāṭyāS'S. x. 16. 11; KāśyaS. 318A. 13; तिष्ठेन्नातिचिरं तत्र नैव किंचिदुदीरयेत् ViṣṇuP. iii. 11. 15; MārkP. 26. 6; सर्वः प्रहृष्टो जनः। कश्चिन्नातिचिरं विलम्बयति मां कार्यात्ययाशङ्कया Dhūrta-ViSaṁ. 6. 21; नातिचिरं गतायां च तस्यामनन्तरमेवेमां भूमिमनुप्राप्तो महाभागः Kād. 178. 6; 7. 12; 102. 2; अतिचिरमुपरि विश्राम्यद्भिरिव वलनविकटं पतद्भिः खुरैः खण्डितमुवि···वाजिनि महति समारूढम् (युवानमद्राक्षीत्) HarṣaC. 36. 9; 165. 4; 264. 17; 330. 12; मत्तनृत्तमिव समीकवीथ्यामाचरन्तौ वैरमयाविवातिचिरमयुध्येताम् (तौ) AvantiKa. 108. 7; PadmP.(Ra.) 41. 97; MahāviC. 6. 61 (185. 8); मा पुनरतिचिरमेवं प्रविधास्यसि कन्दुकक्रीडाम् KuṭṭaMa. 362; AnarghaRā. 2. 39(2); विक्रंसोऽर्यस्य दृष्ट्वा चरणमतिचिरं सप्तयो नैव पूष्णो जग्मुः क्षोभादिवोच्चैर्नभसि स मधुजिद्धन्तु वः कल्मषाणि EI. i. 156. 1; PrakaPañ. 101. 2; अस्याः। स्थितमतिचिरम्···मां दिदृक्षोः स्मरामि ViddhaS'ā. 3. 3 = SubhāRaK. 17. 59; NalaCam. 4. 9(43); (नरपतिः) आराध्य भगवन्तमतिचिरमादिदेवमागत्य निजसदनम्···निषसाद TilaMañ. 45. 15; 34. 23; 100. 1; 107. 17; 161. 21; 341. 12; °स्वर्गपुत्रादिवैषयिकसुखमनेकदुःखसंभिन्नं न चातिचिरमनुवर्तते ĀgaPrā. 46. 5; तैस्तैर्विलासैः मदनमदविनोदमुद्यानमतिचिरमनुभूय (मध्याह्नसमयानतिवाहयामास) YaśasCam. i. 527. 7; ii. 345. 20; ii. 418. 2; देवकी कंसेन रुद्धातिचिरं शुचार्पिता BhāgP. i. 8. 23; KalkiP. iii. 12. 28; विधाय च विचित्रमतिचिरं युद्धम् ··· धरायामचेतनः पपात हरिकुलपतिः RāmāCam. 6. 56(3); KaumuMi. 4. 1(4); S'ivārkaMaDī. i. 360. 22 (*on* i. 2. 16); आकाशादिष्वमीषां वसतिरतिचिरं (जीवानाम्) Naya-Mañ. III. i. 5. 9; KathāK. 124. 26; Rāgh. 2. 62; 3. 67; अतिचिरं पतिगृहकारानिरुद्धतया कदाप्यविज्ञातबहिरङ्गणाः कुलाङ्गनाः S'ṛṅgāSar. 140(1); अतिचिरमजनि रजनिरतिकाली। सङ्गमविन्दत न हि वनमाली StavMā. 276. 16.

अतिचिरविपन्न (aticira-vipanna) *adj.* dead very long ago विलोक्य ···अतिचिरविपन्नपन्नगस्याश्चिशेषे शिरसि विद्योतमानं दिव्यरत्नम् UdaySuKa. 60. 30.

अतिचिरविप्रयुक्त (aticira-viprayukta) *adj.* separated for a very long time तत्र महति समरोत्सवे वत्समतिचिरविप्रयुक्ता देवपादा इति ··· नियुज्य ··· उपलब्धवानस्मि देवपादान् AdbhuDa. 4. 6(1)

अतिचिरस्थायिन् (aticirasthāy-in) *adj.* lasting for a very long period of time अतिचिरस्थायी वैरानुबन्धः स्थावराणामपि VasaTi. 6. 6.

अतिचिरायमाण (aticirāya-māṇa) *adj.* becoming (apparently) too long (in time), passing very slowly युगमिव निगमय्य कतिचिदतिचिरायमाणानि वासराणि यावदेवं प्रलपितुं प्रवृत्तोऽस्मि S'ṛṅgāSar. 116(4)

अतिचिरायुस् (ati-cirāyus) *adj.* possessing a very long life अतिचिरायुषं तपोराशिं ददर्श AvantiKa. 144. 11.

अतिचिरावस्थान (ati-cirāvasthāna) *n.* staying for a very long time

अतिचिरावस्थाननिर्वेदप्रसुप्ताघोरणाभिः ··· करिणीभिराकीर्णं शुकनासगृहद्वारमासाद्य तुरङ्गादवततार Kād. 95. 3.

अतिचिरेप्सितार्थ (aticirepsitārtha) *m.* object desired for a very long time तं त्वां वयं नाथ···अतिचिरेप्सितार्थम्। दृष्ट्वा गता निर्वृतिमद्य सर्वे BhāgP. viii. 6. 13.

अतिचिरोपरोध (ati-ciroparodha) *m.* obstruction for a very long time अतिचिरोपरोधसंवर्धितप्रतिघानलव्यतिकरविशेषभीषणज्वालाकलापदुरापमपि परिवृत्य जातवेदसम् NīlaVi. 21. 16.

अतिचिरोद्धृत (ati-ciroddhṛta) *adj.* picked up long ago नातिचिरोद्धृतानां च धातुविषां धातकीकुसुमानां गौणीरगुणिताः ··· लोकेनादाय व्रजता ··· व्याप्तदिगन्तरम् ··· वनग्रामकं ददर्श HarṣaC. 305. 12.

अतिचिरोपभोग (ati-ciropabhoga) *m.* enjoyment for an excessively long time अतिचिरोपभोगपरिश्रान्तिगरिमविश्रान्ततनुलतां विभावरीं दधानः Yātrā-Pra. 4. 147(4)

अतिचिरोपरुद्ध (ati-ciroparuddha) *adj.* obstructed for an excessively long time कतिचिदतिचिरोपरुद्धकण्डूलदोर्मण्डलतया ··· पर्यवसाययितुमिव भूधरानङ्गुलिस्फोटेन NīlaVi. 15. 18.

अतिचिरोषिता (ati-ciroṣitā) *adj.* (*f.*) staying for an excessively long time ततस्तां प्राह चार्वङ्गीं पिता नातिचिरोषिताम् MārkP. 77. 17.

अतिचूर्ण (ati-cūrṇa) *n.* **1** fine powder पिबेत्तथा नागबलातिपूर्वबलातिचूर्णं पयसा प्रभाते KalyāKā. 6. 51; **2** very short word (i. e. uncompounded) नातिचूर्णपदैर्युक्ता···समत्वात् समता मता NāṭyaSā. 19. 100.

अतिचूर्णित (ati-cūrṇita) *adj.* very much crushed (i. e. destroyed) बिभीषणः। पादेनाधर्षयद्विप्रं स विप्रोऽप्यतिचूर्णितः PadmP. iv. 100. 145.

अतिचृत् (ati-cṛt-) VI. P. to stick on, to fasten अर्हजातस्य यन्नाम तेन त्वाति चृतामसि AV. v. 28. 12.

अतिचेष्ट् (ati-ceṣṭ-) I. A. to make excessive effort वृत्त्यर्थं नातिचेष्टेत Hitopa. 1. 139.

अतिचेष्टित (ati-ceṣṭita) *n.* extra-ordinary deed or action विचित्रमतिचेष्टितं श्रयति संसृतौ जन्मवान् SubhāRaSaṁ. 224; यानपानातिचेष्टितैः। ··· प्लीहा च्युतः स्थानाद्विवर्धते AṣṭāSaṁ. i. 291. 17 (3. 12); यज्ञैर्दानैस्तपोभिर्वा संग्रामे चातिचेष्टितैः MārkP. 19. 29; *adj.* possessing extra-ordinary deeds श्रोतुमिच्छामि चरितं श्रूयते सोऽतिचेष्टितः MārkP. 130. 2; अलघावतिचेष्टिताः ··· मुनिलोकाः समुपासते स सन्ध्याम् Rāvaṇā. 5. 21.

अतिचोदित (ati-codita) *adj.* greatly impelled स तथेति ब्रुवन्नेव देवैरप्यतिचोदितः BrahmP. 11. 17.

अतिचोर (ati-cora) *m.* super-thief न चातिचोरा न च दुष्टदुर्मृगाः KalyāKā. 2. 36.

अतिचौर (ati-caura) *m.* super-thief शिष्यः।··· चौरस्याप्यतिचौरश्चरति सदा वञ्चकस्य गुरोः Deśopa. 8. 27.

अतिचौर्य (ati-caurya) *n.* big or excessive theft तेषाममूनि च फलानि वै। ··· अतिचौर्यमतिक्रोधः NāraS. 31. 14; [Abl.] very secretly शिशुम् ··· अनयन्नगराद्वहिर्निशायामतिचौर्यात् Raghunā. 8. 29.

अतिच्छत्र (ati-cchatra) *m.* **1** mushroom, a kind of vegetable छत्रातिच्छत्रक्षीराकैः···। दत्तेन मासं प्रीयन्ते पितरः ViṣṇuDhaP. i. 141. 41; **2** *Barleria longifolia* छत्रातिच्छत्रवीरणाः (एवमादीनि विज्ञेयो मधुरो गणः) MatsyaP. 217. 47; छत्रातिच्छत्रपालङ्क्यौ मालातृणकभूस्तृणे AmaK. 982; **3** a species of water plant जलतृणविशेषः [S'abdaKaDru.]

अतिच्छत्रक (ati-cchatraka) *m.* *Petrospermum suberifolium*, tree with an umbrella shape छत्रवृक्षः छातारियाविष इति ख्यातः S'abdaKaDru.; **2** *Andropogon schoenauthns, Pfychotic ajowan*, a kind of sweet grass पालङ्ग्यो गोमयप्रेङ्खं छत्रातिच्छत्रकावपि भूतृणं च वियन्मूलम् KośaKaTa. 1. 4337; अतिच्छत्रको भूतीके ApūNā. 11B. 1.

अतिच्छत्रका (ati-cchatrakā) *f.* name of the plant *Barleria longifolia* सहचरी शतपुष्पा सितच्छत्रातिच्छत्रका S'abdaRa.(Su.) 4. 220; छत्रातिच्छत्रके विद्याद्रक्षोघ्ने कन्दसम्भवे KalpaK. 316. 594.

अतिच्छत्रा (ati-cchatrā) *f.* **1** *Anise* (*Aisum* or *Anethum sowa*) अतिच्छत्रां पलङ्कषाम् CaraS. vi. 9. 46 (1941 Ed.); काचन महौषधी सोमसमवीर्या ··· छत्रातिच्छत्राकरेणुः SuśruS. iv. 30. 5; शतपुष्पा सितच्छत्रातिच्छत्रा मधुरा मिसिः AgniP. 362. 66; **2** the plant *Baleria longifolia* छत्रातिच्छत्रा श्रावणी महाश्रावणी CaraS. iii. 8. 139; छत्रा अतिच्छत्रा मेदा महामेदा CaraS. vi. 14. 6; वचां छत्रामतिच्छत्राम् AṣṭāSaṁ. i. 186. 17 (1. 38); **3** sesamum seed छत्रामतिच्छत्रां सकर्कटीम् ··· एतत्सर्वं समाहृत्य प्रदेहं तस्य कारयेत् Hastyāyur. 256. 21 (2. 47)

अतिच्छन्द (ati-cchanda) *adj.* **1** who has surpassed or overcome desires अतिक्रान्तं यतश्छन्दमतिच्छन्दमिदं ततः BṛĀraUBhVā. iv. 3. 1297; अतिच्छन्दमिच्छावर्जितम् S'ivārkaMaDī. ii. 240. 20 (*on* iii. 2. 9); **2** violation of Vedic principles अतिच्छेदा(v. l. च्छन्दा)तिवादाभ्यां स्मयोऽयं समुपागतः MahāBhā. xiii. 121. 9; *m.* name of a metre ऋषिर्यमोऽस्यातिच्छन्दो विष्णुरेवास्य दैवतम् ĪśānS'iPa. i. 35. 132; तदधिकोनाक्षराणां त्वतिच्छन्दः कृतिच्छन्दः पदादिनैव व्यवहारः BhāṭṭCan. 107. 14 (*on* xvi. 2. 2)

अतिच्छन्दस् (áti-cchandas) *f.* **1A** name of a type of Vedic metre which is longer than the normal metres (i. e. having more than twelve syllables in a foot) रेवत्सामातिच्छन्दा उ छन्दोऽजातशत्रुः स्योना नो अस्तु TaiS. IV. iv. 12. 4; वर्ष्म वा एषा छन्दसां यदतिच्छन्दाः TaiS. V. ii. 1. 5; V. iii. 8. 3; VI. i. 9. 4; अतिच्छन्दा वै सर्वाणि च्छन्दांसि TaiS. VI. i. 9. 4 = TaiBr. I. vii. 9. 6; अतिच्छन्दा इन्द्रियं बृहदृषभो गौर्वयो दधुः VājaS. 21. 22; धेनवोऽतिच्छन्दसे VājaS. 24. 13; अतिच्छन्दसं छन्द इन्द्रियं बृहत् ··· दधत् VājaS. 28. 34; अतिच्छन्दाश्छन्दः AitBr. 22. 7 (584); मरुतश्च त्वाङ्गिरसश्च देवा अतिच्छन्दसा ··· आरोहन्तु AitBr. 38. 1 (930); अथो रुद्रो वै ज्येष्ठश्च देवानामतिच्छन्दाश्छन्दसाम् KauṣiBr. 25. 13 (118. 20); तद्वा अतिच्छन्दःसु भवति ṢaḍviBr. iii. 1. 16; एषा वै सर्वाणि छन्दांसि यदतिच्छन्दाः S'atBr. V. iv. 3. 22 = XIV. iii. 1. 11; अतिच्छन्दा वै छदिश्छन्दः सा हि सर्वाणि छन्दांसि S'atBr. VIII. ii. 4. 5; साध्याश्चाप्याश्चातिच्छन्दसं समभरन्। तां ते प्राविशन् JaimiBr. 1. 283; अथ गायत्री एकपदाम् ··· विराजमतिच्छन्दसम् ··· इत्येतानि मृगच्छन्दसानि प्राजायत JaimiBr. 3. 324; प्राजापत्या अतिच्छन्दसः DevaBr. 2. 9; अतिच्छन्दाश्छदेर्यं DevaBr. 3. 19; अतिच्छन्दाश्छन्दसः ĀpaS'S. xiv. 4. 16; MānS'S. 90. 7; शिशिरोऽतिच्छन्दास्त्रयस्त्रिंशस्तोमो रैवतं साम Nir. 7. 11 (138. 3); द्वावतिच्छन्दसां वर्गा उत्तरौ चतुरुत्तरौ ṚPrāti. 16. 53; प्राजापत्या त्वतिच्छन्दाः ṚPrāti. 17. 7; अनुष्टुभमतिच्छन्दःस्ववदध्यात् KarmaNi. 9A. 11; **1B** verse in *aticchandas* metre अभि त्यं देवꣳसवितारमित्यतिच्छन्दसर्चा मिमीते TaiS. VI. i. 9. 4; अतिच्छन्दसः शंसति AitBr. 16. 3 (440); अतिच्छन्दसाहवनीयमुपतिष्ठन्ते PañcBr. iv. 9. 1; v. 2. 10; तां ते संपदं मोहयन्ति येऽतिच्छन्दोभिर्यजन्ति KauṣiBr. 23. 4 (105. 11); अभि त्यं देवम् ··· इत्यतिच्छन्दसा वैश्वदेवं प्रतिपद्यते KauṣiBr. 23. 8 (106. 22); ता उ एव द्वानवतिरतिच्छन्दसः JaimiBr. 2. 48; अतिच्छन्दाः प्रथमा (ऋक्) S'āṅkhāĀ. 2. 5 (6. 27); षट् सप्तेत्यतिच्छन्दसाम् S'āṅkhāS'S. vii. 27. 13; अथैनमतिच्छन्दसर्चा मिमीते BaudhS'S. i. 171. 9; ĀpaS'S. x. 24. 8; xxi. 9. 15; **2** name of an altar brick placed with recitation of a *mantra* in *aticchandas* metre अतिच्छन्दसमुपदधाति TaiS. V. iii. 8. 3; उष्णिहः पुरस्तादुपदधाति···अतिच्छन्दसमुत्तरतः BaudhS'S. ii. 43. 13; अतिच्छन्दसं मध्ये ĀpaS'S. xvii. 4. 10; पुरीषवत्याः पूर्वामतिच्छन्दसम् KātyS'S. xvii. 12. 16; *n.* name of a type of Vedic metre which is longer than the normal metres द्यौर्वै देवता ··· अतिच्छन्दश्छन्दः GopaBr. ii. 6. 11; त्रयोदशादीन्यतिच्छन्दांसि चाहुः MahāBhā. iii. 134. 20; इदानीमतिजगती···अतिधृतिश्चेति सप्त अतिच्छन्दांसि एकैकपादाक्षरवृद्ध्या क्रमेणोद्गीयन्ते MṛtaSaṁ. 194. 7 (*on* 7. 1); मन्त्रोऽयं वज्रगान्धारी···अतिच्छन्दस्तथा विष्णुर्दुर्गा चास्याधिदैवतम् ĪśānS'iPa. i. 43. 73 (309. 2); *adj.* **1** beyond the normal metres अतिच्छन्दा वै प्रजापतिः KauṣiBr. 23. 4 (104. 22); तेन तेऽतिच्छन्दसो भवन्ति KauṣiBr. 23. 4 (105. 8); ĀśvaS'S. I. iv. 12. 1; **2** beyond or free from worldly desires, exceeding thought or will तद्वा अस्यैतत्। अतिच्छन्दोऽपहतपाप्माभयम् रूपम् S'atBr. XIV. vii. 1. 22; BṛĀraU. iv. 3. 21; अतिच्छन्दा अतिच्छन्दमित्यर्थः रूपपरत्वात्। छन्दः कामः अतिगतः छन्दः यस्माद्रूपात् तदतिच्छन्दं रूपम् BṛĀraUBh. 568. 18 (*on* iv. 3. 21); **3** beyond enclosure or cover (of veins) नाड्याच्छादनाभावोऽतिच्छन्दः AṇuBh. 98. 23 (*on* i. 3. 42); **4** violating Vedic traditions or injunctions [APTE]

अतिच्छन्दस्त्व (aticchandas-tva) *n.* the real significance of the name Aticchandas (longer than the usual metres) छन्दसां वै यो रसोऽत्यक्षरत्सोऽतिच्छन्दसमभ्यत्यक्षरत्तदतिच्छन्दसोऽतिच्छन्दस्त्वम् AitBr. 16. 3 (440)

अतिच्छन्दादिलक्षण (aticchandādi-lakṣaṇa) *adj.* having the characteristic of transcending desires and so on यत एवमिदं वस्तु अतिच्छन्दादिलक्षणम् BṛĀraUBhVā. iv. 3. 1355.

अतिच्छन्दोक्तिबाध (aticchandokti-bādha) *m.* contradiction of the statement of *aticchanda* अतिच्छन्दोक्तिबाधः स्याद्वस्तुतन्त्रत्वहेतुतः BṛĀraUBhVā. iv. 4. 451.

अतितीक्ष्ण (ati-tīkṣṇa) *adj.* [*f.* -ā] **i** very harsh प्रब्रूयाच्चातितीक्ष्णेन कण्ठेन मृदुनादिना MāṇḍūS'i. 4. 5; वाचः ··· अतितीक्ष्णा मया क्षान्ताः MahāBhā. iii. 296. 3; v. 21. 4; **ii** very strong अतितीक्ष्णोग्राभिष्यन्दिनां गन्धानामतिमात्रं घ्राणमतियोगः CaraS. i. 11. 37; BrahmāṇḍP. iii. 28. 100; नातितीक्ष्णमृदुस्वच्छघनं व्यापन्नमेव वा (मद्यं पेयम्) AṣṭāSaṁ. i. 27. 14 (1. 6); i. 123. 12 (1. 23); i. 163. 13 (1. 32); क्षारस्य ··· दशैव दोषाः ··· अत्युष्णोऽतिशीतोऽतितीक्ष्णः AṣṭāSaṁ. i. 191. 15 (1. 39); AṣṭāHṛ. i. 3. 26; न विकारशतानि नातितीक्ष्णा मदिरा दर्शयति स Kapphiṇā. 13. 33; RugVi. 26. 6; GītāBh.(S'aṅ.) 475. 9 (*on* 17. 9); GītāBh.(Rā.) 617. 25 (*on* 17. 9); BṛKathāK. 123. 11; NītiVā. 30. 11; SiddhYo. 75. 15; GaṇeP. ii. 95. 54; ii. 115. 35; AśvaVai. 6. 11; RājTa.(Jo.) 821; (मूत्रम्) औष्ट्रमतितीक्ष्णं कृमिकोष्ठविशोधनार्थं दद्यात् Hastyāyur. 687. 3 (4. 27); **iii** very severe, very cruel अतितीक्ष्णः ··· सर्वे ब्रह्महणैः समाः MahāBhā. v. 35. 40; viii. App. 1. 8(11); xiii. 72. 37; तस्याः ···सौम्यप्रकारमतितीक्ष्णमवेक्ष्य वक्त्रम् Avimā. 2. 7; BṛSaṁ. 68. 110; दुर्वासिसातितीक्ष्णेन ··· अन्यैर्महर्षिभिः ··· प्रत्यवेक्ष्यसे SkandP. i(3B). 3. 12; ii(2). 30. 12; ii(8). 7. 127; Hastyāyur. 612. 2 (4. 5); सिंहासनमशिश्रियत् । अतितीक्ष्णो नवो राजा RājTa.(S'rī.) 2. 6; S'ukraNī. 4(7). 123; **iv** very sharp (means) नृपस्त्वां हन्तुमुद्यतः । अद्य श्वो वातितीक्ष्णैश्च किंचिन्नावापि बुध्यसे Manaso. ii. 18. 990; अतितीक्ष्णेन शस्त्रेण छिन्नमांसं च कर्तयेत् AśvaVai. 39. 25; *m.* red Moringa pterygosperma अती(? ति)तीक्ष्णो रक्तशिग्रौ ApūNā. 20B. 4.

अतितीक्ष्णक (atitīkṣṇa-ka) *m.* name of a plant श्वेतोऽतितीक्ष्णकः KośaKaTa. 1. 3375.

अतितीक्ष्णकर (atitīkṣṇa-kara) *adj.* doing very cruel (acts) (भवेज्जातः) भौमे…पञ्चमेऽतितीक्ष्णकरः HorāSā. 21. 19.

अतितीक्ष्णकाग्र (ati-tīkṣṇakāgra) *n.* very sharp point, extremely sharp awn शूकोऽपि धान्याद्यतितीक्ष्णकाग्रे KośaKaTa. 2. 3337.

अतितीक्ष्णकील (atitīkṣṇa-kīla) *m.* very sharp nail or spike सुभगस्तारकोत्तमः । विद्धोऽतितीक्ष्णकीलेन शूलाप्रोत इवाजनि MalliC. 7. 251.

अतितीक्ष्णकोटि (atitīkṣṇa-koṭi) *adj.* having very sharp point, very sharp-tipped अतितीक्ष्णकोटिभिष्टङ्किकाभिस्तक्ष्यमाणाभ्यः शिखरमणिशिलाभ्यः समन्ततः समुच्छलितानि…स्थूलशकलानि TilaMañ. 156. 8.

अतितीक्ष्णचञ्चु (atitīkṣṇa-cañcu) *f.* very sharp beak शुककुलम् …अतितीक्ष्णचञ्चुचरणैरुपद्रुतां मां करिष्यति प्रसभम् S'ṛṅgāMañ.(A.) 10. 9.

अतितीक्ष्णतरा (atitīkṣṇa-tarā) *adj.* (*f.*) extremely sharp अतितीक्ष्णतरे जिह्वे मुखे कुर्यात्तु लोचने S'ilpaRa. ii. 16. 52.

अतितीक्ष्णता (atitīkṣṇa-tā) *f.* excessive sharpness अतितीक्ष्णता अतिमृदुता … अतिस्निग्धता … द्रव्यदोषाः SuśruS. iv. 35. 32; HarṣaC. 160. 9; KalyāKā. 2. 12; शस्त्राणां चातितीक्ष्णताम् … अनुगच्छन्ति योषितः SūktiRa. 54. 3; RājTa.(S'rī.) 2. 114.

अतितीक्ष्णधार (atitīkṣṇa-dhāra) *adj.* having a very sharp edge अतितीक्ष्णधारोऽपि … मन्दमपि पूर्वच्छेदतः परेण प्रसर्तुं न शशाक निस्त्रिंशः TilaMañ. 53. 14.

अतितीक्ष्णधी (atitīkṣṇa-dhī) *adj.* having an extremely sharp intellect अतितीक्ष्णधीः …तस्या जारोऽप्यासीज्जयाकरः RājTa.(Ka.) 7. 125.

अतितीक्ष्णप्रज्ञ (atitīkṣṇa-prajña) *adj.* having a very sharp intellect ततोऽतितीक्ष्णप्रज्ञेन नोनकाख्येन मन्त्रिणा । अभ्यूह्य शिक्षितकलो विलक्षोऽगाद्यथागतम् RājTa.(Ka.) 7. 530.

अतितीक्ष्णमहादंष्ट्र (atitīkṣṇa-mahādaṁṣṭra) *adj.* having very sharp and large teeth स (शरभाख्यो हरः) मृगार्धशरीरेण … अतितीक्ष्णमहादंष्ट्रः LiṅgaP. i. 96. 67.

अतितीक्ष्णवेग (atitīkṣṇa-vega) *adj.* having very sharp (i. e. high) speed ततः समेतावतितीक्ष्णवेगौ महाबलौ तौ रणनिर्विशङ्कौ । कपिश्च रक्षोऽधिपतेश्च पुत्रः Rāmā. v. 46. 24.

अतितीक्ष्णा (ati-tīkṣṇā) *f.* red mustard आसुरी राजिका राजी कृष्णका रक्तसर्षपः । तीक्ष्णगन्धा चातितीक्ष्णा DhanvNi. 146. 9; ApūNā. 20B. 4.

अतितीक्ष्णांशु (atitīkṣṇāṁśu) *adj.* (the sun) whose rays are very hot or scorching तीक्ष्णांशुरतितीक्ष्णांशुर्ग्रीष्मे संक्षिपतीव यत् AṣṭāHṛ. i. 3. 26.

अतितीक्ष्णाग्निसाध्य (atītīkṣṇāgni-sādhya) *adj.* curable by highly strong fire अतितीक्ष्णाग्निसाध्यांस्तु शिलाभिः साधयेद्भिषक् Hastyāyur. 112. 1 (1. 15)

अतितीक्ष्णाग्र (atitīkṣṇāgra) *adj.* which has a very piercing or sharp tip तच्छूलमतितीक्ष्णाग्रं सुभीमं लोमहर्षणम् MahāBhā. xiii. 14. 135; अलावीदतितीक्ष्णाग्राण्यविकारं कुशानि सा SkandP. i(3B). 18. 54.

अतितीक्ष्णाङ्ग (ati-tīkṣṇāṅga) *adj.* having very sharp limbs (in outlines) अनुरूपप्रमाणेन नातितीक्ष्णाङ्गमेव च । …गण्डपरावृत्तं स्थानम् ViṣṇuDhaP. iii. 39. 22.

अतितीक्ष्णानन (atitīkṣṇānana) *adj.* [*f.* –ā] possessing an extremely sharp beak or mouth यन्त्रम् काकमुखं तदेव यदपि ध्वाङ्क्षातितीक्ष्णाननम् Jīvān. 282. 5; या शीघ्रं पिबतीह शीघ्रगमना दीर्घातितीक्ष्णानना । सा स्याच्छङ्कुमुखी KalyāKā. 21. 41.

अतितीक्ष्णाभिधेयसूचि (atitīkṣṇābhidheya-sūci) *adj.* consisting of needles in the form of very sharp ideas पशुजनहृदयकुशेशये न अस्मदीयैर्वचनशतैरपि अतितीक्ष्णाभिधेयसूचिभिरपि संभेदोऽथ विकासोऽथ वितरीतुं शक्यः ParāTri. 137. 1.

अतितीक्ष्णास्त्र (atitīkṣṇāstra) *n.* very sharp missile पापिनो जनान् । निहन्त्याद्यातितीक्ष्णास्त्रैः BrahmāṇḍP. iii. 39. 26.

अतितीर्थ (atitīrtha) *n.* name of a *tīrtha* (a holy place) [PW]

अतितीव्र (ati-tīvra) *adj.* [*f.* –ā] **A** very intense, very poignant अतितीव्राणि दुःखानि …। तवाहं संजयाश्रौषं पुत्राणां मम संक्षयम् MahāBhā. viii. 20. 1; भयेऽतितीव्रे विषयेषु सज्जसे BuddhaC. 4. 97; आविर्बभूव शक्तीनामतितीव्रस्तृषाज्वरः BrahmāṇḍP. iii. 28. 47; यातनास्वतितीव्रासु वाहीके संस्थिते तदा ।… पतितं तद्धि गृध्रास्यात् SkandP. iv. 28. 80; करचरणपार्श्वपृष्ठप्रभृतिष्वनिलस्य कोपमतितीव्रम् (कुरुते) AṣṭāSaṁ. i. 98. 8 (1. 18); व्याधीनामतितीव्राणां शमनं पादपांशुना PadmP.(Ra.) 14. 124; तस्मिन् असत्यार्थेऽतितीव्रे जिह्वाच्छेदः DaṇḍaVi. 202. 23; इत्थमुत्थितमतार्कितमतितीव्रम्…प्रसोढुम् ĀnandRa. 3. 20 (1); **B** very austere, very fierce, very harsh अतितीव्रोऽयमारम्भस्त्वयारब्धः MahāBhā. iii. 280. 5; अतितीव्रमभूद्युद्धं नरराक्षसयोर्मृधे MahāBhā. vii. 142. 38; अतितीव्रमभूद्युद्धं तयोः पुरुषसिंहयोः MahāBhā. vii. 131. 110; अतितीव्रं तपो मया कृतम् ManuBh. i. 409. 23 (*on* 4. 236); अतितीव्रेण तपसा स्वशरीरमशोषयत् VarāP. 6. 7; अहो ममातितीव्राणि तेजांसि च तपांसि च । व्यर्थीभूतानि RāmāMañ. 347. 3; **C** very severe, very strict जटिलः कर्कशः पिङ्गो ह्यतितीव्रो महाप्रभुः PadmP. ii. 12. 74; मोक्षितोऽहं त्वया शापात् । प्रदत्तादतितीव्रेण ब्रह्ममित्रेण MārkP. 63. 36; अतितीव्रं स्तवैः … कुर्याद्दशम् S'ārṅgaPa. 1594; नातितीव्रो न वा मन्दः सर्वस्यैव महीपतिः RājTa.(Jo.) 541; **D** very fierce, very hot, very strong योगी … अतितीव्रेण नाग्निनाप्येष दह्यते MāliniT. 15. 31; कः शमयेत् । अतितीव्रदुःसहभवोष्णकरप्रचुरातपप्रभवतापमिमम् S'aṅkaDigVi.(Mā.) 9. 34; **E** very terrible, very formidable बिभ्रतस्तव यद्रूपमतितीव्रं नतास्मि तत् BrahmP. 32. 14; **F** very pungent, acid [MW, APTE]

अतितीव्रतपस् (atitīvra-tapas) *adj.* who practises very severe penance अतितीव्रतपा नित्यं तत्त्वार्थगतमानसः PadmP.(Ra.) 13. 63; अतितीव्रतपोबलानरीञ्जयमाशंसति पाकशासनः RāmC. 13. 7; *n.* very severe penance अतितीव्रतपस्तप्त्वा सूर्योऽलभत तां द्युतिम् BrahmāṇḍP. iii. 35. 43; तपनः…अतितीव्रतपसा जज्वाल नितरां मुने SkandP. iv. 49. 29.

अतितीव्रतर (atitīvra-tara) *adj.* excessively severe वह्निरतितीव्रतरावेगावेशेन सर्वाङ्गे प्रकम्पनेनावधूतः Kāvyānu.(He.) 139. 5.

अतितीव्रता (atitīvra-tā) *f.* great severity अतितीव्रतान्वितं छाययैव सुरराजमण्डलम् । यश्चकार परिहीनमोजसा HarVi. 14. 19.

अतितीव्रताप (atitīvra-tāpa) *m.* excessive distress अतत न बहिरेव तापशान्ति व्यधित मनोऽप्यतितीव्रतापवन्ध्यम् Kapphiṇā. 10. 5.

अतितीव्रत्व (atitīvra-tva) *n.* great severity भगवद्विरहभावेनातितीव्रत्वेन सर्वोपमर्दिना AṇuBh. 32. 4 (*on* i. 1. 11); भगवदाविर्भावे सत्यपि पूर्वभावस्यातितीव्रत्वेन AṇuBh. 33. 8 (*on* i. 1. 11)

अतितीव्रनियम (atitīvra-niyama) *m.* very austere observance तस्यातितीव्रनियमाद्रुस्तेऽगस्त्ये KalāVi. 1. 75.

अतितीव्रप्रकृति (atitīvra-prakṛti) *f.* very fierce nature अतितीव्रप्रकृतिकोपनो नरपतिः … त्वामस्मांश्च … हनिष्यति KaṁVa. 5. 35 (3)

अतितीव्रप्ररोचित (atitīvra-prarocita) *adj.* excessively allured अधिकारिणः प्रतिपत्तिमात्राददतितीव्रप्ररोचितात् प्रथमप्रवृत्तादनन्तरम् … प्रतिपत्तिस्तथैव AbhinBhā. i. 278. 22 (*on* 6. 32)

अतितीव्रबल (atitīvra-bala) *adj.* having excessive power or strength योगः सः …। प्रयोज्यः कफसंसृष्टे नातितीव्रबलेऽनिले KāśyaS. 277B. 30.

अतितीव्रम् (ati-tīvram) *adv.* **A** very intensely संहारकालसविशेषरुचोऽतितीव्रमुष्णत्विषो दिनमिव HarVi. 8. 49; **B** excessively, very bitterly अनुदिनमतितीव्रं रोदिषीति त्वमुच्चैः Subhāṣi. 1117; **C** very quickly अतितीव्रमतिकौतुकतः समेत्य … अदिशत् … रत्नानि (भूमिपालः) ĀnandRa. 3. 11.

अतितीव्रमदा (atitīvra-madā) *adj.* (*f.*) causing severe intoxication नातितीव्रमदा लघ्वी पथ्या वैभीतकी सुरा AṣṭāSaṁ. i. 27. 19 (1. 6) = AṣṭāHṛ. i. 5. 69.

अतितीव्ररुज् (atitīvra-ruj) *adj.* causing very severe pain मन्दस्रावोऽतितीव्ररुक् ।… व्रणो मारुतसंभवः CaraS. vi. 25. 11 (1941 Ed.)

अतितीव्ररुजा (atitīvra-rūjā) *f.* excessively severe pain अतितीव्ररुजारागदाहश्वयथुपीडितम् । पाकात्ययेन तच्छुक्रं वर्जयेत्तीव्रवेदनम् AṣṭāSaṁ. ii. 227. 4 (6. 13); AṣṭāHṛ. v. 10. 29.

अतितीव्रविवृत्त (atitīvra-vivṛtta) *adj.* turned or rolled with excessive intensity ज्वलयामास च कोपवह्निना सः । अतितीव्रविवृत्तभीष्मनेत्रश्रुतिशृङ्गाग्रविभिन्नमेघजालः SkandP. i(3). 10. 107.

अतितीव्रविष (atitīvra-viṣa) *n.* very strong poison तत्र चातितीव्रविषदाहवेदनोपशमाय शनकैर्निधाय ताम् TilaMañ. 380. 12; *adj.* greatly poisonous क्वातितीव्रविषाः सर्पाः क्वासौ चन्दनभूरुहः Candrā. 5. 80.

अतितीव्रवेग (atitīvra-vega) *adj.* moving extremely fast बाणैः सुमुक्तैरतितीव्रवेगैर्यैराहतो मृत्युरपि व्यथेत् MahāBhā. viii. 12. 53; स मुमोच बाणानतितीव्रवेगान् DevīBhāP. iv. 9. 28.

अतितीव्रवेदन (atitīvra-vedana) *adj.* causing excessively severe pain नरकेष्वतितीव्रवेदनेषु … जीवाः ।… परिपत्यानुभवन्ति घोरदुःखम् VarāṅgaC. 24. 65.

अतितीव्रवेदना (atitīvra-vedanā) *f.* very severe pain (नरकान् प्राप्य) घोरानतितीव्रवेदनापादकत्वेनातिभयंकरान् Mitā. 400. 20 (*on* 3. 206)

अतितीव्रशक्तिपात (atitīvraśakti-pāta) *m.* advent (i. e. favour) of very strong energy (of S'iva) परमार्थमार्गमेनं झटिति यदा गुरुमुखात् समभ्येति। अतितीव्रशक्तिपातात् तदैव निर्विघ्नमेव शिवः ParamāSā. 96; भक्तानाम् – अतितीव्रशक्तिपाताघ्रातहृदयत्वेन समावेशरूपभजनशालिनाम् Bhāsk. ii. 280. 12 (*on* iv. 1. 1)

अतितीव्रसुरता (atitīvra-suratā) *adj.* (*f.*) performing intercourse with extreme intensity अतितीव्रसुरता···सा हस्तिनीति श्रुता S'ṛṅgāDī. 2. 6.

अतितीव्रस्वभावा (atitīvra-svabhāvā) *adj.* (*f.*) having an excessively strong nature अतितीव्रस्वभावाश्च आज्ञाशक्तय एवैताः BrahmāṇḍP. iii. 19. 29.

अतितीव्रा (ati-tīvrā) *f.* Dūrvā grass गण्डाली स्याद्गण्डदूर्वातितीव्रा RājNi. 164. 2.

अतितुङ्ग (ati-tuṅga) *adj.* [*f.* -ā] **1A** very tall, very high अतितुङ्गो हीरशालः BrahmāṇḍP. iii. 33. 14; (नारकाः) उल्लङ्घयन्तेऽतितुङ्गेषु पादपेष्वन्धकारिषु PadmP.(Ra.) 26. 89; 25. 14; 33. 53; अतितुङ्गः···। भगवति कलितोऽयं वाहनार्थं मया ते ··· तुरङ्गः DevīCatuSta. 47; LalitāStaRa. 93; उत्कन्धरानेव रणाङ्गणेषु यस्यातितुङ्गस्य हठात् प्रहर्तुः। न नम्रभावादपरो नृपाणामासीत् कृपाणप्रतिषेधमार्गः VikraDeC. 3. 69; तदवेक्षितुं गगनमध्यतलं रविरध्यरोहदतितुङ्गमिव S'ivLī. 17. 80; योधाः ··· समधिरुह्य तुरङ्गान् ··· अतितुङ्गान् ĀnandRa. 7. 39 (8); **1B** very prominent अतितुङ्गघोरघोणम् ··· शबरसेनापतिमपश्यम् Kād. 30. 2; नौमि मतङ्गाननमतितुङ्गामलकरजवरहेलम् PadyāTa. 5; PadyaVe. 7; **2** very great, very noble विभूतिमतितुङ्गांश्च वाध(? बान्ध)वांश्च सुमानसान्। परित्यज्य मयि प्रीत्या विदेशमपि संगता PadmP.(Ra.) 30. 102; प्रस्थितस्य मया साकमेवं धृत्यातितुङ्गया। प्राप्ता जनपरीवादवार्ता PadmP.(Ra.) 98. 68.

अतितुङ्गता (atituṅga-tā) *f.* excessive tallness अपश्यंस्ते वनषण्डम् ···। अतितुङ्गतया व्योम आवृण्वानं नरोत्तम VāmaP. 89. 12.

अतितुङ्गद्रुम (atituṅga-druma) *m.* very tall tree सा···। अटवीमतिभीषणामगादतितुङ्गद्रुमलम्बिताम्बराम् Nalābhyu. 7. 67.

अतितुङ्गपद (atituṅga-pada) *n.* very high position (i. e. heaven) (श्रयामि सेतुम्) अतितुङ्गपदलिप्सुतनुभृदधिरोहिणीम् ··· दुर्ललितयातुधानसमाजधूमकेतुरामसेतुम् YātrāPra. 5. 45 (2)

अतितुङ्गभाग (atituṅga-bhāga) *m.* very high position of a planet नित्याङ्गनाहरिमयामनुसारनीरसंख्या दिवाकरमुखादतितुङ्गभागाः JātaPā. 1. 29.

अतितुङ्गवत् (atituṅga-va(n)t) *adj.* very high सेनावेशनहर्म्यं तु यमभागेऽतितुङ्गवत् MayaMa. 29. 32.

अतितुङ्गशिखर (atituṅga-śikhara) *n.* very high peak अस्यातितुङ्गशिखरोन्नमितम् ··· नितम्बतटमम्बरमालम्बे HarVi. 5. 81; स राजा ··· अतितुङ्गशिखरतोरणप्राकारं शक्रावतारं नाम सिद्धायतनमगमत् TilaMañ. 35. 16.

अतितुङ्गशृङ्ग (atituṅga-śṛṅga) *n.* **1** very high peak अतितुङ्गशृङ्गोच्छ्रायप्रांशुपृथुशिलाशालपरिगतम् ··· कामदेवायतनमायातवती TilaMañ. 303. 19; **2** very long horn(s) अतितुङ्गशृङ्गभासुरम् ··· महोक्षाधिराजमद्राक्षीत् YātrāPra. 1. 53 (3)

अतितुङ्गसुरनिकेतन (atituṅga-suraniketana) *n.* very lofty abode of the gods अतितुङ्गसुरनिकेतनशिखरसमुत्क्षिप्तपवनचलिताभिः। मञ्जरितमिव विराजति यत्र नभो वैजयन्तीभिः KuṭṭaMa. 6.

अतितुच्छ (ati-tuccha) *adj.* **A** extremely insignificant, absolutely empty (argument) तव त्ववस्तुरूपाणामपोहानां सर्वप्रकारशून्यानां भिन्नत्वव्यपदेशोऽतितुच्छ एव S'arka. 39. 11; अतितुच्छश्चायमिन्द्रियचैतन्यपक्षः NyāyMañ. ii. 14. 5; शब्दैकप्रमाणकत्वपक्षोऽतितुच्छ एव Kāśi. ii. 176. 20 (*on* 5 (3). 213); अतितुच्छश्चायं सर्वज्ञवादः NyāyRa. 85. 14 (*on* 2. 131); तस्मान्न निषेध्यत्वमिति। तदिदमतितुच्छं न निराकरणमपि प्रयोजयति NyāyRaMā. 112. 18; Nyāyāmṛ. 68A. 6; 289A. 9; UpaParā. 14. 17; यदस्य संसृष्टिनस्तु संसृष्टी इत्यादिवचनस्य भवताभिहितं तत्त्वतितुच्छम् VīraMi.(Vyavahāra) 513. 2; **B** very inferior इन्द्रत्वं च···चिरजीवित्वमेव वा। जलबुद्बुदवद्बुद्ध्या चातितुच्छं न गण्यते BrahmVaiP. i. 14. 54; ज्ञानमात्रमिदमतितुच्छमिति तत्सृष्टौ (? अ)लौकिक्य एव विप्रतिपत्तयः Loc. 200. 26 (*on* 3. 33); दृश्यते हि म्लेच्छप्रायैरतितुच्छैर्नास्तिकैरास्तिकमार्गे परिभूते ··· स्वच्छधियाम् ··· संरम्भेण प्रवृत्तिः TarkSaṁ.(Ā.) 102. 13; **C** very small उदरेणातितुच्छेन···योषिद्भवति भोगाढ्या SkandP. iv. 37. 50.

अतितुच्छक (atituccha-ka) *adj.* very trifling त्रैलोक्यमिदमैश्वर्यं कियदेवातितुच्छकम् DevīBhāP. viii. 19. 25.

अतितुच्छता (atituccha-tā) *f.* **A** the state of being extremely insignificant or empty तस्य कथमतितुच्छता कारणाभावेन तथाविधज्ञानाभावात् TātpaṬ.(U.) 73. 18 (*on* 2. 112); किं परप्रत्ययाश्रयणेनेत्युपालभमानोऽतितुच्छतया नायं पक्षो निराकरणं प्रयोजयति इति दर्शयति Kāśi. i. 119. 13 (*on* 2. 112); **B** the state of being of a very low cadre न किञ्चिद्व्यसनमतिरिच्यते अतितुच्छताजातिचारानर्हत्वं भवतीत्यर्थः ManvaVi. 1260. 8 (*on* 9. 296); **C** extreme meagreness भ्रातुरेकत्वे भगिनीनां च सप्ताष्टत्वे भ्रातृभागस्यैकनिष्ठत्वे तच्चतुर्थभागस्य स्वल्पत्वेन तत्राप्यंशकल्पनायामतितुच्छता स्यात्तदंशस्य S'ubodhi. 54. 22 (*on* 2. 124)

अतितुच्छत्व (atituccha-tva) *n.* **A i** extreme insignificance or emptiness (of an argument) नापि ··· सोऽनेन निषिध्यते, अतितुच्छत्वेनानिराकार्यत्वात् TātpaṬ.(U.) 73. 18 (*on* 2. 112); NyāyMañ. ii. 198. 14; सोऽतितुच्छत्वादेव न निराकार्यः NyāyRaMā. 80. 9 (*on* 2. 112); चार्वाकसमयस्यातिविरोधित्वेऽप्यतितुच्छत्वेन प्रथमं निषेध्यतायोगात् TattvPrakā. 94A. 9 (*on* ii. 2. 1); असदुत्तरमेव पूर्वपक्षस्यातितुच्छत्वज्ञापनाय उक्तमिति समाहितम् MīmāKau. ii. 118. 21 (*on* ii. 4. 11); i. 230. 5 (*on* i. 4. 9); अत्र च पूर्वपक्षस्यातितुच्छत्वात्सुहृद्भूत्वोपदेशः BhāṭṭDī. ii. 246. 6 (*on* vi. 2. 8); लोकायतिकादिमतानि त्वतितुच्छत्वात् ··· नोट्टङ्कितानि GoviBh. 133. 9 (*on* ii. 2. 32); **A ii** excessive inferiority चन्द्रस्य जलेनोपमानतया सम्भावितस्य वराकतोक्त्यातितुच्छत्वान्मुखेन सह दूरापास्तं साम्यम् AlaṅkāRa. 22(41); **B** nothingness, state of a non-entity अस्तु तर्ह्यनित्यमेवोपलब्ध्यर्थक्रियारहितत्वेन गगनारविन्दवदतितुच्छत्वादित्यत आह TattvVai. 129. 16 (*on* 3. 13)

अतितुच्छप्राय (atituccha-prāya) *adj.* almost nothing, absolutely insignificant or subordinate अवयवैरिति। अतितुच्छप्रायैरित्यर्थः Loc. 218. 24 (*on* 3. 41) = Kāvyānu.(He.) 310. 12 (comm.)

अतितुद् (ati-tud) *adj.* excessively pricking जजौजोजाजिजिज्जाजी तं ततोऽतितताततुत् S'iśuVa. 19. 3.

अतितुन्दिल (ati-tundila) *adj.* having an excessively protuberant belly अतितुन्दिलस्य···घोणासृजा···अस्य···स्वर्वासिनो हासिताः BālRā. 10. 21.

अतितुभ्यम् (ati-tubhyam) cf. **अतियुष्मद्** KāśiVṛ. *on* P. vii. 2. 93; vii. 2. 95; KātanVṛ. *on* ii. 3. 12; Pradī. vi. 163. 7 (*on* vii. 2. 98); PrakriKau. i. 254. 5.

अतितुमुला (ati-tumulā) *adj.* (*f.*) very tumultuous, excessively noisy आक्रन्दः ··· चक्रेऽतितुमुला दिशः PāṇḍaC. 7. 513.

अतितुम्बरु (ati-tumbaru) *adj.* surpassing Tumbasu तस्मिन्नतितुम्बरौ मधुरतरं गायति सति श्रुतं तत्स्वरूपं महादेव्या TīrthaKa. 62. 6 = PrabaK. 70. 3.

अतितुम्बुरु (ati-tumburu) *adj.* who has surpassed Tumburu (in musical achievements) सः ··· प्रेयान्बभूव लोकस्य गान्धर्वेणातितुम्बुरुः PariPar. 9. 38;

अतितुरङ्गम् (ati-turaṅgam) *adv.* surpassing a horse (in speed) त्वरितमतितुरङ्गं संभ्रमादीयिवांसं नरपतिः ···भल्लमादाय दोर्भ्याम् Rāvaṇā. 3. 52.

अतितुष् (ati-tuṣ-) IV. P. to be very much pleased लोकातीत इवात्यर्थमध्यारोप्य विवक्षितः। योऽर्थस्तेनातितुष्यन्ति विदग्धा नेतरे जनाः Kāvyāda. 1. 89.

अतितुष्ट (ati-tuṣṭa) *adj.* [*f.* -ā] very much pleased, very much delighted मृडान्यापि तथेत्युक्ता राज्ञी भक्त्यातितुष्टया SkandP. iv. 83. 23; तदातितुष्टा सुरसत्तमा सा अट्टाट्टहासं मुमुचे त्रिनेत्रा VāmaP. 18. 18; 62. 48; ज्ञानिनां गुरुः। ज्ञानं कथितुमारेभे ह्यतितुष्टः सनातनः BrahmVaiP. ii. 36. 63; GaṇeP. i. 92. 5; BrahmP. 114. 16; द्रम्मं स चार्जयित्वातितुष्टः श्रीवृषभप्रभुम् ··· पूजयामास भक्तितः PrabhāC. 204. 12; PrabaCin. 50. 12; इति मुनिरतितुष्टोऽध्युष्य सर्वज्ञपीठम्···बदरीं स प्राप S'aṅkaDigVi(Mā.) 16. 93.

अतितुष्टात्मन् (atituṣṭātman) *adj.* whose mind is greatly pleased शक्रेण···°प्रशमनं दृष्ट्वातितुष्टात्मना निःशङ्कं निदधे शचीकुचतटे चेतश्चिरेण ध्रुवम् EI. ii. 441. 10.

अतितुष्टि (ati-tuṣṭi) *f.* great satisfaction, great pleasure ज्योत्स्नाभिसारविधये बिसकङ्कणानि मुक्तागुणा मलयजं च तवातितुष्टयै S'rīKaC. 11. 33.

अतितुष्टिद (atituṣṭi-da) *adj.* causing great satisfaction, giving great pleasure पवित्रकं कृतं विष्णोरन्तस्थस्यातितुष्टिदम् PauṣkS. 30. 226; PāraS. 12. 28.

अतितुष्ट्यर्थ (atituṣṭy-artha) *adj.* intended for great satisfaction इमानि त्वतितुष्ट्यर्थानि खड्गामिषं महाशल्कम् BālaKrī. i. 169. 7 (*on* 1. 256–257)

अतितूर्ण (ati-tūrṇa) *adj.* very swift अतितूर्णमतिविलम्बितमुल्बणनादं च नादहीनं च। ··· परुषं च (पाठं) निन्दन्ति KāvyMī. 33. 11; तावत्सोऽपि नृपकुमारः ···शीर्णतरुरिवातितूर्णवातापनीतजीर्णपर्णनिवहः सहसैव विच्छायतामगच्छत् TilaMañ. 290. 6.

अतितूर्णम् (ati-tūrṇam) *adv.* very speedily, very quickly, in great haste बाहू प्रसार्याभिमुखोऽतितूर्णं स धर्मराजस्य समीपमद्र(? द्रि)राट् MahāBhā. ix. 94*. (1); नातितूर्णम् (अध्वानं प्रपद्येत) ViṣṇuSm. 63. 11; क्रोधादधावदपभीरतितूर्णमन्यनागाभियुक्त इव युक्तमहो महेभः S'iśuVa. 5. 32; नातितूर्णं न सन्ततम्

(व्रजेत्) AṣṭāSaṁ. i. 9. 19(1. 3); VarāṅgaC. 12. 58; अतितूर्णं न चेत्प्राप्तो मयि जीवति विह्वले RājTa.(S'rī.) i. 3. 89; Raghunā. 8. 13; NīlaVi. 80. 20; MahāN. 9. 23.

अतितृट्परीत (atitṛṭ-parīta) *adj.* overcome by excessive thirst, ViṣṇuP. iv. 2. 14[nt.] cf. **अतिक्षुत्परीत.**

अतितृण्ण (áti-tṛṇṇa) *adj.* excessively injured or pierced यन्मे छिद्रं चक्षुषो हृदयस्य मनसो वातितृण्णं बृहस्पतिर्मे तद् दधातु VājaS. 36. 2

अतितृद् (ati-tṛd-) VII. P. to pierce through तिस्रो दिवो अत्यतृणत् तिस्र इमाः पृथिवीरुत AV. xix. 32. 4.

अतितृप् (ati-tṛp-) VI. P. to thoroughly or fully satisfy, to satiate यं त्वा (द्रोणकलशं) सोमेनातीतृपाम VājaS. 7. 29.

अतितृप् (ati-tṛp-) IV. P. to be satiated [MW]

अतितृप्त (ati-tṛpta) *adj.* [*f.* -ā] fully satiated, fully satisfied नातितृप्ता (v. l. नातितृप्त्या) स्वयं भुक्त्वा … परिचरेत् पतिम् VedavyāSm. 2. 31; 3. 75; नातितृप्तः क्षुधार्तो न…योगं युञ्जीत योगवित् SkandP. iv. 41. 68; पुनः स पप्रच्छ न चातितृप्तो विदुरः BhāgP. iii. 14. 1; एष वै भक्षयित्वा तां जानकीं शुभदर्शनाम्। शेते विविक्तेऽतितृप्तः AdhyāRā. iii. 8. 25; अतिसुहितोऽतितृप्त इत्यर्थः SmṛtiCan, ii. 614. 12; अर्थिनामतितृप्तानां श्रीशंकरपुरे नृपः। अपेक्ष्य विदधे छायां न फलानि महीरुहाम् RājTa.(S'rī.) i. 5. 18; ManvaMu. 156. 6 (*on* 4. 62); Bhāsk. i. 411. 21 (*on* i. 8. 6)

अतितृप्तता (atitṛpta-tā) *f.* full satisfaction तदिदं विशदं वचोमृतं परिपीयाभ्युदितं द्विजाधिपान्। अतितृप्ततया विनिर्ममे स तदुद्गारमिव स्मितं सितम् NaiṣC. 2. 49; तृप्तातृप्तातितृप्तलिङ्गानि तु क्रमात् स्वास्थ्यवातपित्तकफविकारैरादिशेत् AṣṭāSaṁ. i. 166. 16 (1. 33)

अतितृप्ताक्ष (atitṛptākṣa) *adj.* having very swollen [?] eyes उन्मादी चातितृप्ताक्षो रतेषु विकलेन्द्रियः HārīS. iii. 2. 233.

अतितृप्ति (ati-tṛpti) *f.* satiety, great satisfaction भृत्यैः परिवृतो भुक्त्वा नातितृप्त्याथ संविशेत् YājñaSm. 1. 114; स्तैमित्यं गुरुताङ्गस्य निद्रातन्द्रातितृप्तयः KāśyaS. 44B. 1; BālaKrī. i. 99. 10 (*on* 1. 114); नातितृप्ता स्वयं भुक्त्वा (v. l. नातितृप्त्या) VedavyāSm. 2. 31; तेष्वेव कालेषु जलादीनि यावता नातितृप्तिर्भवति ManuBh. ii. 438. 8 (*on* 11. 213); फलानीमानि गृह्णीध्वम्…एभिः … अतितृप्तिर्भविष्यति SkandP. iii(2). 37. 20; iv. 80. 30; ManvaMu. 156. 3 (*on* 4. 62); अतितृप्त्यादिजनिते त्वालस्ये श्रमाद्विविक्तविषयत्वं बोध्यम् RasGaṅ. 115. 4; 114. 10.

अतितृप्तिकारण (atitṛpti-kāraṇa) *n.* cause of great satisfaction दर्शनं स्तवनं पूजा…ममातितृप्तिकारणम् SkandP. i(2). 41. 182.

अतितृप्तिकृत् (atitṛpti-kṛt) *adj.* causing great satisfaction पवित्रमतितृप्तिकृत् किमिह (पयः) VidaMuMa. 3. 42.

अतितृप्तिरूपा (atitṛpti-rūpā) *adj.* (*f.*) of the nature of great satisfaction अर्थक्रियाम् अतितृप्तिरूपाम् Bhāsk. i. 58. 22 (*on* i. 1. 2)

अतितृप्तिशून्य (atitṛpti-śūnya) *adj.* not feeling satiety भृत्यैः पुत्रादिभिः परिवृतः सहितो भुक्त्वा नातितृप्तः अतितृप्तिशून्यः संविशेत् शयीत VīraMi. 204. 28 (*on* 1. 114)

अतितृप्तिहेतु (atitṛpti-hetu) *m.* [Abl.] for the sake of great satisfaction (पितरः) ये देवपूर्वाण्यतितृप्तिहेतोरश्नन्ति कव्यानि शुभाहुतानि MārkP. 96. 38.

अतितृष् (ati-tṛṣ) *f.* excessive thirst इह चातितृषा क्षुधा च तप्ताः फलहेतोर्गणनाथवृक्षमेतत्। अधिरुह्य फलत्वमेव याताः KathāSaSāg. xii. 34. 390; AṣṭāSaṁ. i. 23. 22 (1. 6) (v. l. अधितृष्)

अतितृषा (ati-tṛṣā) *f.* excessive thirst गुर्वन्नमेवातितृषां करोति SuśruS. vi. 48. 15; KalyāKā. 9. 2.

अतितृषाक्रान्त (atitṛṣākrānta) *adj.* overcome by excessive thirst मध्याह्नेऽतितृषाक्रान्तौ हयौ पञ्चत्वमापतुः KathāSaSāg. vii. 8. 98.

अतितृषित (ati-tṛṣita) *adj.* eagerly longing for इयमतितृषितम् … मम वरतनुराचकर्ष चित्तम् VidaMā. 6. 15.

अतितृष्ण (ati-tṛṣṇa) *adj.* **1** extremely greedy or desirous अहं तु नाभिघृष्णोमि (v. l. नातितृष्णोऽस्मि) यत्कृतं न मया पुरा MahāBhā. i. 88. 11; **2** exceedingly thirsty तीक्ष्णज्वरोऽतितृष्णश्च रक्तमूत्रं च मूत्र्यते HārīS. iii. 2. 227; स नन्दिनीस्तन्यमनिन्दितात्मा … पपौ वसिष्ठेन कृताभ्यनुज्ञः। शुभ्रं यशो मूर्तमिवातितृष्णः RaghuVa. 2. 69.

अतितृष्णा (ati-tṛṣṇā) *f.* **1** excessive greed or desire नोच्छिन्द्यादात्मनो मूलं परेषां चातितृष्णया ManuSm. 7. 139 (अतितृष्णया चातिकरग्रहणेन ManvaVi.); अतितृष्णा न कर्तव्या तृष्णां नैव परित्यजेत् PañcT. 2. 28 (220. 3); अतितृष्णा न कर्तव्या वित्तशाठ्यं विवर्जयेत् PadmP. vi. 44. 49; Pañcā. 138. 6; एषातितृष्णा कृष्णाहिर्भूभुजां हृद्बिलेशया KaṁVa. 6. 2; अपि चैकभागमधिजग्मुषी विभोरतितृष्णयेव परभागमाश्रिता YātrāPra. 3. 106; हा जन्तवो ब्रह्मपदान्तमन्तर्न शान्तिमायान्त्यतितृष्णयैव Vidvanmo. 7. 45; **2** great desire or longing देहि मे हरिभक्तिञ्च … अतितृष्णा गुणाख्याने नित्यमस्तु ममेश्वर PañcaRā.(Nā.) i. 8. 27; **3** excessive thirst स पण्डितः … अरण्यानीमवगाहमानोऽतितृष्णातरलितः … जलं याचितवान् PrabaCin. 4. 6; [अतितृष्णा is given as the meaning of आशा, आशा दिगतितृष्णयोः Vaija. 220. 3]

अतितृष्णाकुलित (atitṛṣṇākulita) *adj.* troubled or overpowered with great greed 'अलोलुपान्' अतितृष्णाकुलितहृदयेभ्योऽन्यान् (ब्राह्मणान्) CaturCin. iii(1). 1137. 8.

अतितृष्णाभिभूत (atitṛṣṇābhibhūta) *adj.* overpowered with excessive greed अतितृष्णाभिभूतस्य शिखा भवति मस्तके Pañcā. 138. 7.

अतितृष्यत् (ati-tṛṣyat) *adj.* **1** who is very thirsty देहमायम्य वेगेन घोषयत्यतितृष्यतः। महाहिक्केति सा ज्ञेया SuśruS. vi. 50. 14; कम्पयन्ती शिरो ग्रीवामाध्मातस्यातितृष्यतः … यमला वेगिनी हिध्मा परिणामवती च सा AṣṭāHṛ. iii. 4. 24; आघ्राय क्षणमतितृष्यतापि शेषात् … नाचेमे हिममपि वारि वारणेन Kirātā. 7. 34; मरुषु पथिकस्येव मनोविभ्रमहेतुषु कथास्वतितृष्यतः (मारिदत्तस्य) कतिचित्संवत्सरा व्यतिचक्रमुः YaśasCam. i. 43. 1; **2** who is hankering after, YaśasCam. i. 43. 1.

अतितृह् (ati-tṛh-) VII. P. to crush completely, to destroy thoroughly किं ब्रवीति प्रतिबलबलं वीरो विलोकयन्। अतितृणहानि KavīndraKa. ii. 10. 8.

अतितॄ (ati-tṝ-) I. P. III. P. **1 A** to cross, to go to the other side of (waters, ocean), to go to the end of (the world); (caus) to enable one to cross त्वया वयम्…अपोऽति शूर तरामसि ṚV. vii. 32. 27; viii. 19. 14 आकाशेऽपि विचरन्ति अम्बुनाथमप्यतितरन्ति … नियतमुपायपृष्ठोद्यमा मनुष्याः AvantiKa. 39. 1; संसारसागरं विद्या कथंचिदतितारयति BrahmSūBh.(Bhā.) 217. 9 (*on* iii. 4. 49); त्वमपि ह्यध्वनोऽस्य संन्यस्तदण्डः … ज्ञानासिमादाय तराति पारम् BhāgP. v. 13. 20; बालिशः श्वलाङ्गुलेनातितितर्ति सिन्धुम् BhāgP. vi. 9. 22; (वसुदेवः) अतिततार दिनाधिपतेः सुतामनघयोगमना इव संसृतिम् Yādavā. 3. 41; **1 B** to get over (hateful persons, narrowness, difficulties, illusion) येन विश्वा अति द्विषो अतारिम ṚV. viii. 13. 21; अति द्वेषांसि तरेम ṚV. iii. 27. 3; अया धिया तुतुर्यामात्यंहः ṚV. v. 45. 11; दिवाकरोऽति द्युम्नैस्तमांसि विश्वातारीद्दुरितानि शुक्रः AV. xiii. 2. 34;ययाऽति विश्वा दुरिता तरेम TaiS. I. ii. 3. 2; त्वां भक्त्या ये हृषीकेश दुर्गाण्यतितरन्ति ते MahāBhā. vii. 124. 15; xiii. 32. 27; Hitopa. 4. 89; ते दुस्तरामतितरन्ति च देवमायाम् BhāgP. ii. 7. 42; ii. 7. 46; विद्याम्…वितरिष्ये। यया चासौ भयं चातितरिष्यति BhāgP. iii. 24. 40; VāmaP. 94. 52; स धर्मनावमारुह्य दुर्गाण्यतितरिष्यति PadmP. v. 19. 356; **2** to excel विश्वेत्स धीभिः सुभगो जनाँ अति द्युम्नैरुद्न इव तारिषत् ṚV. viii. 19. 14; **3** to overcome (death) तेनौदनेनाति तराणि मृत्युम् AV. iv. 35. 1; येनातरन् भूतकृतोऽति मृत्युम् AV. iv. 35. 2; उभयोर्लोकयोर्ऋद्ध्वा। अति मृत्युं तराम्यहम् TaiBr. I. ii. 1. 15; स्तोभेनैव मृत्योरास्यं अपिधायैतं मृत्युमतितरति JaimiBr. 1. 332; JaimiUBr. iii. 35. 8; तेन विद्यामुत्पाद्य मृत्युं काममतिरति AitUBh, 249. 4 (*on* 1. 0); GītāBh. (S'aṅ.) 13. 25; तव नामानि शाम्भवि। प्रजपन्नेति मायान्तमति मृत्युं तराम्यहम् TripuVePāSt. 171. 35; **4** to get away from, to escape शृङ्गाभ्यां रक्षो नुदते मूलेन यातुधान्यः। मध्येन यक्ष्मं बाधते नैनं पाप्माति तरति AV. xix. 36. 2; **5** to transcend तान् (अग्निं, वायुं, आदित्यं) एवैतेनातितरति JaimiBr. 2. 318; **6** to overpower, to subdue तेन पवित्रेण शुद्धेन (चरणेन) पूता अति पाप्मानमरातिं तरेम TaiĀ. x. 1. 11 (776. 6)

अतितेजन (ati-tejana) *adj.* very sharp गाढविद्धानरीन् कृत्वा मार्गणैः सोऽतितेजनैः MahāBhā. vii. 96. 33.

अतितेजना (ati-tejanā) *adj.* (*f.*) very spirited देव्याः प्रतीहारी जयाख्या अतितेजना। वाक्यमुवाच VarāP. 95. 23.

अतितेजनी (ati-tejanī) *f.* **i** name of the plant Tejavalā अतितेजनी तेजवला ApūNā. 30B. 3; **ii** name of the plant Triparṇī [PW]

अतितेजस् (ati-tejas) *adj.* **i** very spirited, very vigorous अमर्षः शौर्यं च शीघ्रत्वमिति तेजसः (v. l. अतितेजसः) गुणाः MahāBhā. iii. 30. 20; महोत्साहा भविष्यन्ति पाण्डवा ह्यतितेजसः MahāBhā. iv. 28. 7; अग्निश्च सिंहश्च कुलपुत्रश्च…सर्वे ते ह्यतितेजसः MahāBhā. v. 37. 55; तव पित्रातितेजसा। पुनर्न शङ्किता नेतुं गङ्गां प्रार्थयतानघ Rāmā. i. 43. 11; ख्यातो महोद्यमबलार्थयुतोऽतितेजाः Bṛhajjā. 21. 4; नातिशीतम् … चकार भीत्या वै तस्य कोपनस्यातितेजसः MārkP. 99. 4; संज्ञा…भार्या भगवतो मार्तण्डस्यातितेजसः BrahmāṇḍP. ii. 59. 34; अग्न्यादयोऽतितेजसोऽपि क्लेशेनैव ब्रह्म विदितवन्तः KenUBh. 50. 15 (*on* 3. 1); पतत्रिराजमारूढः सुपर्णमतितेजसम् KūrmaP. 264. 9 (1. 25); स्तुतो महादेवो भार्गवेणातितेजसा S'ivaP. ii(5). 50. 34 (282A. 3); पावकायातितेजसे … नमः LiṅgaP. i. 41. 31; **ii** very bright or powerful (रामः) वरयामास परशुं

चातितेजसम् MahāBhā. xii. 105*(2); एकं चक्रं द्वादशारं रथस्यास्यातितेजसः SkandP. ii(9). 27. 89; ब्रह्मा ददाति संतुष्टो विमानमतितेजसम् BhaviP. 40B. 6 (i. 16. 53); *n.* **i** great lustre or power युवाभ्याम् … तेजसा धार्यते जगत् (v. l. जगद्व्याप्यातितेजसा) MahāBhā. iii. 41. 2; तवातितेजसाविष्टमिदं रूपं न शोभते HariVaṁ. 8. 31; BrahmāṇḍP. ii. 59. 66; BhaviP. 134A. 21 (i. 79. 47); BrahmP. 32. 77; न सेहे देवकीं द्रष्टुं कश्चिदप्यतितेजसा। जाज्वल्यमानाम् ViṣṇuP. v. 2. 5; BhavāBhu. 1; अतितेजःसमुत्थाय … कृष्णाय ते नमः BrahmVaiP. iv. 42. 28; नमः। अतितेजःस्वरूपाय PadmP. ii. 18. 54; को गृह्णाति फणमणिं ज्वलन्तमतितेजसा भुजङ्गस्य Pañcā. 84. 1; **ii** lightning अतितेजसा दग्धे सिद्धिर्नास्ति SuśruS. i. 12. 39 [*f.* PW]; *m.* **i** name of one of the twelve Ādityas अंशुर्भगश्चातितेजा आदित्या द्वादश स्मृताः ViṣṇuP. i. 15. 131; S'ivaP. v. 32. 8 (442B. 8); BrahmP. 3. 58; **ii** name of one of the Saptarṣis of the eleventh Age (सप्तऋषीन् निबोधत) पौलहो ह्यतितेजाश्च … एकादशेऽन्तरे BrahmāṇḍP. iii. 1. 80; *f.* fourteenth night of Karmamāsa, IndSt. 10. 296 [PW] cf. **अतितेजा.**

अतितेजस्क (atitejas-ka) *adj.* very refulgent, greatly shining तस्य मध्येऽतितेजस्कमुच्चप्राकारतोरणम् (स्थानम्) KūrmaP. 423. 2 (1. 49)

अतितेजस्ता (atitejas-tā) *f.* great refulgance अतितेजस्तया द्वितीय इव परब्रह्मणः … मुनिरवातरत् NalaCam. 3. 6(40)

अतितेजस्विन् (ati-tejasvin) *adj.* **i** very vigorous, very powerful, very spirited योधयत्यतितेजस्वी मधुवन्मधुसूदन MahāBhā. ii. App. 21. 1023; गरुडः …। कामवीर्योऽतितेजस्वी HariVaṁ. 91. 36; पुरूरवाः … अतियज्वातितेजस्वी ViṣṇuP. iv. 6. 35; न स्पृशत्येवातितेजस्विनं शोकः HarṣaC. 261. 8; मुनिपुत्रोऽतितेजस्वी … तपस्यति BrahmāṇḍP. ii. 24. 51; BhāgP. i. 18. 32; व्रणदातातितेजस्वी विष्णुतुल्यो बभूव BrahmVaiP. i. 9. 34; (सत्यव्रतः) विपाप्मा चातितेजस्वी संभूतः DevīBhāP. vii. 12. 13; हनूमान् … वायुपुत्रोऽतितेजस्वी AdhyāRā. iv. 6. 13; अतितेजस्व्यपि राजा पानासक्तो न साधयत्यर्थान् S'ārṅgaPa. 1388; Subhāṣi. 2869; को भवान्? अतितेजस्वी दृश्यसे SiṁhāDvā. 167. 3(7); 207. 3 (19); ĀnandRa. 2. 49(14); **ii** very brilliant, very lustrous, of very fair complexion नान्यदप्यतितेजस्वि न क्रुद्धस्य गुरोर्मुखम् (निरीक्षेत) AṣṭāSaṁ. i. 12. 17 (1. 3); विद्युन्माली … सुरेष्वतितेजस्वी PariPar. 1. 217; स्निग्धदेशेऽतितेजस्वी रूपयुक्तः प्रजायते BṛParāSm. 10. 218.

अतितेजःसंयोग (atitejas-saṁyoga) *m.* close contact with excessive heat अतितेजःसंयोगात् भस्मभावापत्तेश्च LalitāTriBh. 350. 19 (*on* 57)

अतितेजा (ati-tejā) *f.* the fourteenth night of Karmamāsa चतुर्दशी अतितेजा comm. on Sūryaprajñapti 148A. 4.

अतितेजिनी (atitejinī) *f.* name of a plant शीता तिक्तातितेजिनी MadaPāNi. 12. 185.

अतितेजोमय (ati-tejomaya) *adj.* full of excessive lustre श्रेणिसमुद्धारमतितेजोमयमुत्तरा शतं मन्दिराणि एकावल्या सन्ति SāmaraU. 266. 23.

अतितेजोविमान (atitejo-vimāna) *n.* very lustrous aerial car सोऽतितेजोविमानेन सूर्यलोके महीयते SkandP. iv. 27. 97.

अतितैक्ष्ण्य (ati-taikṣṇya) *n.* **i** the nature of being very aggravated (पाचकांशानाम्) मान्द्यातितैक्ष्ण्यतः। वृद्धिः क्षयश्च धातूनां जायते AṣṭāSaṁ. i. 103. 13 (1. 19); **ii** the nature of being very hot or pungent अतितैक्ष्ण्यादिना दुरुपयोगाः … आहारा राजसस्येष्टाः GītāBh.(Rā.) 617. 26 (*on* 17. 9)

अतितैजस (ati-taijasa) *adj.* excelling the luminaries, very refulgent तवातितैजसं रूपं न कश्चित्सोढुमुत्सहेत् BrahmP. 33. 25.

अतितैल (ati-taila) *n.* too much of oil (i. e. too oily food) अतिवे-(v. l. तै)लं यदाश्नामि तदा (वह्निः) समुपशाम्यति PadmP. vi. 53. 17.

अतितैलपान (atitaila-pāna) *n.* taking too much of oil अतितैलपानं वातप्रकोपप्रशमाय दृष्टम् ViṣṇuDhaP. ii. 56. 128.

अतितैसृकम् (atitaisṛkam) *adv.* not the proper time for using quilt अतितैसृकम्। तैसृकमाच्छादनम् KāśiVṛ. *on* P. ii. 1. 6; न तैसृकस्य वर्तमानः कालः उपभोगस्येत्यर्थेऽतितैसृकम् Nyās. ii. 22. 23 (*on* ii. 1. 6); KātanVṛ. *on* P. ii. 5. 14; अव्ययानां यथा—अतितैसृकम् S'ṛṅgāPra. 60. 23.

अतितोत्त्रसेत्र (ati-totrasetra) *adj.* disregarding the goad and the reins अतितोत्रसेत्रा लघुयोक्त्रनद्धिस्त्रविमेढ्का: पत्रद्वयाः प्रणेशुः DvyāśraKā. 12. 47.

अतितोदना (ati-todanā) *adj.* (*f.*) very painful सकच्छपापृष्ठनिभातितोदना। … निगद्यते कच्छपिका KalyāKā. 11. 15.

अतितोय (ati-toya) *adj.* having too much water गच्छेन्नरेन्द्रो विजयाय …देशम्। न चातितोयं न च तोयहीनम् NītiSā. 16. 41; *n.* excessive water न चात्र निश्शैलतरावनिर्भवेत्। न चातितोयं न च निर्जलान्वितम् KalyāKā. 2. 36; *m.* lightning अतितोयोऽपि मेघाग्नौ ParyāRaMā. 1478.

अतितोष (ati-toṣa) *adj.* giving great satisfaction द्विजगुरु[ज]नतातीति)तोषस्य तोषशर्मणो विप्रस्य EI. xv. 307. 18; *m.* extreme joy (साधुना) मतिः सदातितोषेण कर्तव्याराधनाध्वजे BṛKathāK. 1. 23; तस्यातितोषमायाति सगणो भास्करः स्वयम् NīlaP. 453; अतितोषपुष्टजठरः कूष्माण्डकोऽव्याज्जगत् SaduktiKa. 25. 30.

अतितोषिणी (ati-toṣiṇī) *adj.* (*f.*) causing great pleasure (सेयम्) केशवस्यातितोषिणी PadmP. iv. 72. 83.

अतितोषित (ati-toṣita) *adj.* very much pleased तदनु स रङ्गमहीन्द्रो बुद्धावतितोषितान्तरङ्गमहीन्द्रः। हूणपम् … उपगम्यात्रवीत् ĀnandRa. 5. 34.

अतितोषिन् (ati-toṣin) *adj.* who has been much pleased यथैतेषां मया पूर्वं वरो दत्तोऽतितोषिणाम् BṛKathāK. 11. 129.

अतित्यक्षु (a-tityakṣu) *adj.* not desirous of giving up केन स्विद्ब्राह्मणो जीवेज्जघन्ये काल आगते। अतित्यक्षुः पुत्रपौत्रान् MahāBhā. xii. 139. 7.

अतित्यद् (ati-tyad) *adj.* surpassing that त्यदतिक्रान्तः [pw. Schol.] अतित्यद्। अतित्यदौ। अतित्यदः KāśiVṛ. *on* vii. 2. 102; PrakriKau. i. 243. 9; SiddhāKau. 90A. 7.

अतित्याग (ati-tyāga) *m.* **i** excessive liberality, absolute sacrifice, gifting away too much तरुदाहोऽतिशीतेन दुर्भिक्षमतिवर्षणात्। अतित्यागादनौचित्यमतिः कुत्रापि नेष्यते PārśvC. 1. 103; 1. 466; KathāK. 117. 23; **ii** dismissal (of a person) absolutely or getting rid (of a person) frequently अतित्यागः (अतुष्टराजलक्षणम्) ArthS'ā. ii. 214. 3 (5. 5) (comm. विसृष्टप्रत्यागतस्य कार्यापदेशेन पुनः पुनः विसर्जनम्)

अतित्यागदूषण (atityāga-dūṣaṇa) *n.* fault of extreme liberality अथ विज्ञपयामास तस्यातित्यागदूषणम्।… सज्जनः…महीभुजे PārśvC. 1. 82.

अतित्यागिन् (ati-tyāgin) *adj.* extremely liberal or bountiful अतित्यागी च योगी च…कथं कालवशं गतः (भीमः) MahāBhā. i. App. 86 (30)

अतित्रपा (ati-trapā) *f.* great shame स्वं कलत्रमपि द्रष्टुं तत्रातित्रपयाक्षमः…तप्यते स दिवानिशम् RājTa.(Ka.) 8. 832.

अतित्रपाकर (atitrapā-kara) *adj.* causing great shame or bashfulness भद्राः। स्मरणकारणं वः प्रकाश्यमानमतित्रपाकरं तत्किमाचक्षीमहि MohaRāPa. 5. 57 (1); देशे गुरुजनासन्ने विवृतेऽतित्रपाकरे। न रमेत ना BhāvPra.(Bhā.) 5. 295.

अतित्रपान्विता (atitrapānvitā) *adj.* (*f.*) having great bashfulness प्रमोदे कारणं बाला नोवाचातित्रपान्विता DevīBhāP. iii. 17. 52.

अतित्रय (ati-traya) *adj.* more than or exceeding three (i. e. four) अतित्रयाणां वर्णानाम् … प्रमुरेषः DvyāśraKā. 1. 183.

अतित्रस्त (ati-trasta) *adj.* much frightened उदस्यन्तः…विन्ध्यशिखरान्।… अतित्रस्ताश्चपलमपसर्पन्ति कपयः AnargharRā. 6. 32; अतित्रस्तो हि भगवानाजगाम सुरेश्वरः BrahmVaiP. iii. 6. 11.

अतित्रस्तमुखाम्बुज (atitrasta-mukhāmbuja) *adj.* with much frightened lotus-like face एतदुक्त्वा स्थितो विष्णुरतित्रस्तमुखाम्बुजः S'ivaP. ii(2). 35. 53 (112B. 10)

अतित्रस्नु (ati-trasnu) *adj.* overtimid [MW]

अतित्रास (ati-trāsa) *m.* extreme fear अतित्रासलोलायतलोचनयुगलं त्राहि त्राहि माम् … इत्याकुलविलापविधुरं स राजकन्यारत्नमद्राक्षीत् ViṣṇuP. iv. 12. 17; अतित्रासेन रोषेण गृहीताश्च चमूवराः। संग्राममधिकं तेनुः BrahmāṇḍP. iii. 23. 91.

अतित्रि (ati-tri) *adj.* more than or exceeding three (i. e. four) अतित्रीणामुदन्वताम्। प्रमुरेषः DvyāśraKā. 1. 183.

अतित्रुटदुत्सुक (atitruṭad-utsuka) *adj.* with bursting eagerness असह आशु विदूरयितुं परो युवतिनीविमतित्रुटदुत्सुकः HammīMaKā. 7. 81.

अतित्वक्प्रसादन (ati-tvakprasādana) *adj.* extremely pleasant to or soothing for the skin कषायः…रूक्षोऽतित्वक्प्रसादनः AṣṭāHṛ. i. 10. 21.

अतित्वम् (ati-tvam) cf. **अतियुष्मद्.**

अतित्वर् (ati-tvar-) I. Ā. to hasten over much [MW] (caus.) उपजपितारो वा नातित्वरयन्ति…इति शनैर्यायात् ArthS'ā. iii. 109. 3 (10. 2)

अतित्वर (ati-tvara) *adj.* hastening very much, with great haste सह नवार्ककरैरिव यूथपैः कपिरसावपरेद्युरतित्वरः।… नृपतपस्विवरस्य पुरोऽभवत् RāmC. 7. 1.

अतित्वरत् (ati-tvara(n)t) *adj.* hurrying much, with great haste अतित्वरन्तो विविशुः परं ते Rāmā. ii. 1592*(1); देवाः…। त्वष्टारमभ्यूचुरतित्वरन्तः कुरुष्व चास्त्राणि BrahmP. 110. 51; यदौदरं ज्योतिरतित्वरन्महत् … तवैव तद्रूपम् BhaviP. 182A. 18 (i. 123. 45)

अतित्वरम् (ati-tvaram) *adv.* very hurriedly प्रजिघाय च सर्वासु दिक्षु

चक्षुरतित्वरम् PadmP.(Ra.) 53. 19.

अतित्वरा (ati-tvarā) *f.* great haste, extreme quickness [mostly Inst.] ततः परमतित्वरया विशेषवत्समुच्चयेन (प्रयुञ्जीत) रागसंधुक्षणार्थम् KāmSū. 105. 13 (2. 3) (comm. तदनुरूपमतित्वरया विशेषवद्विकल्पवर्गानुष्ठानात्समुच्चयेन चेदं वेत्यत्रापि विंशनिप्रयोगाः); 151. 12 (2. 7); आकर्ण्य … मुनिदारकेभ्यः । एकाकिनीमशरणां रुदतीमरण्ये गर्भातुरां स्त्रियमतित्वरयागतोऽस्मि KundaMā. 1. 26; अतित्वरागमनद्रुततरपदोद्धूयमानधूलिराजिव्याजेन राजवार्ताश्रवणकुतूहलिन्या मेदिन्येवानुगम्यमानं कुरङ्गमनामानमायान्तमद्राक्षीत् HarṣaC. 212. 2; 212. 4; अतित्वरयाविचारेणैव देवलोकसुखप्रदा LalitāTriBh. 307. 11 (*on* 31); यत्तु तदनुक्त्वैवातित्वरया शास्त्रलक्षणमभिधीयते तन्न युक्तम् NyāyRa. 406. 14 (*on* 5(5). 2); यावन्न निपतति शरीरम् … तावदतित्वरया विचारे प्रवर्तितव्यम् PrakaVi. 27. 21; संहर भववैरिणं त्वतित्वरया ĀryāS'. 4; अतित्वरायां सार्धप्रहरत्रयावधि जपेत् BālamBha. i. 127. 3 (*on* 1. 24)

अतित्वरान्वित (atitvarānvita) *adj.* with great haste or hurry प्रयात्येष दुरात्मातित्वरान्वितः ViṣṇuP. v. 9. 21 = BrahmP. 187. 20; प्रयत्नस्तु तदप्राप्तौ व्यापारोऽतित्वरान्वितः DaśRū. 1. 20; PratāYaBhū. 105. 10; SāhiDa. 298. 9; त्वष्टा चातित्वरान्वितः । वाजिशीर्षं चकर्ताशु DevīBhāP. i. 5. 108.

अतित्वरापरीत (atitvarā-parīta) *adj.* with great haste अतित्वरापरीतौ तौ पराभूत्युद्भवासहौ । अपि नासहतां यानम् PadmP.(Ra.) 101. 29.

अतित्वरायुत (atitvarā-yuta) *adj.* with great haste प्रयत्नस्तु फलावाप्तेर्व्यापारोऽतित्वरायुतः Mānaso. iv. 2. 132.

अतित्वरावश (atitvarā-vaśa) *m.* [Abl.] due to great haste अनर्पयित्वा कुचयोरतित्वरावशाद्वहन्ती नवहारवल्लरीम् । व्यभाद्दरीतुं विभुमेकिका Raghunā. 11. 10.

अतित्वरित (ati-tvarita) *adj.* with great hurry, very quick गत्वा ततोऽतित्वरितः स्वां पुरीं रघुनन्दनः । अध्यावसत् MahāBhā. iii. 736*(2); अतित्वरितसखीजनोपनीतमासनमध्यास्य देवेन प्रहितानि तान्याभरणोपायनान्युपानैषम् NalaCam. 7. 22 (10); इदम् … अतित्वरितचेटीसमारोप्यमाणदीपिकाचक्रवालनिह्नुतसायंतनसमयसन्तमसबन्धम् … उत्सवायतनम् S'ṛṅgāBhū. 81. 7; अतिप्लवम् । अतित्वरितेन मार्गेण BālamBha. iii. 159. 31 (*on* 3. 264); *n.* great haste प्रत्यक्षादिषु वक्तव्यं शब्दमात्रस्य लक्षणम् । तदतित्वरितेनेह किं शास्त्रादभिधीयते S'lokaVār. 5(5). 1 (406. 2); यत्पुनरतित्वरितेनैव सामान्यलक्षणावसरे विशेषो लक्ष्यते तदसाम्प्रतम् Kāśi. iii. 102. 15 (*on* 5(5). 1)

अतित्वरितगति (atitvarita-gati) *f.* very swift walking or movement सा…अतित्वरितगतिजनितं वातमन्तरेव जरयन्ती…न्यद्रासीत् YaśasCam. ii. 51. 1.

अतित्वरितगमन (atitvarita-gamana) *adj.* moving or walking very quickly or hurriedly सः…अतित्वरितगमनः…तामेव दिशमगच्छत् Kād. 34. 21.

अतित्वरितपद (atitvarita-pada) *n.* very quick or hurried step अतित्वरितपदप्रवृत्तैरवनिपतिभिः … केयूरकोटिताडितानाम् … मणिस्तम्भानां रणितेन सर्वतः क्षुभितमिव तदास्थानभवनमभवत् Kād. 14. 20.

अतित्वरितम् (ati-tvaritam) *adv.* very quickly, very hurriedly अतित्वरितमुभाभ्यामपि भवद्भ्याम् … द्वे अप्याद्ये सेनाङ्गे देवस्य विज्ञापनीये YaśasCam. i. 290. 2; ii. 41. 5; शतमन्युः … निस्सरन्नपि बहिस्ततोऽप्यतित्वरितम् … आबध्य कक्ष्याम् NīlaVi. 17. 18.

अतित्वरितवत् (atitvarita-va(n)t) *adj.* who had hurried much तथैव च तेन प्रतिपन्नम् (v. l. तथा करोमीत्युक्त्वा स चातित्वरितवान्) PañcT. 1. 86 (97. 11)

अतित्वरितविक्रान्ति (atitvarita-vikrānti) *adj.* (*f.*) having very quick movement अथ श्रीललितादेव्याः श्रीपाशायुधसंभवा । अतित्वरितविक्रान्तिरश्वारूढाचलत्पुरः BrahmāṇḍP. iii. 16. 14.

अतित्वरितोक्त (atitvaritokta) *adj.* uttered or said in great haste तदितरपरिचोदनानवतारप्रसङ्गादतित्वरितोक्तम् TantrVā. 1127. 23 (*on* iii. 7. 2)

अतिथि (áti-thi) *m.* [MAYR. 1. 27; 3. 626; DEBRU. p. 722; Uṇā. 4. 2; KāśiVṛ. *on* vi. 2. 44; / अतिथिरभ्यतितो गृहान् भवति । अभ्येति तिथिषु परकुलानीति वा । परगृहाणीति वा Nir. 4. 5 (76. 17); अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते ManuSm. 3. 105 = ViṣṇuSm. 67. 34 = VasiSm. 8. 7 = SkandP. iii(2). 6. 22; VasiDS. 4. 5; ParāSm. 1. 42; अतिथेरतिथिः प्रोक्तः BrahmāṇḍP. ii. 15. 17; न विद्यते तिथिर्यस्य सोऽप्यतिथिः PadMañ. *on* KāśiVṛ. *on* P. iv. 4. 104; अनित्या हि तिथिर्यस्मात्तस्मादतिथिरुच्यते BallāC. 63. 15; संयममविनाशयन्नततीत्यतिथिः TattvāRāVār. vii. 21. 11; पञ्चेन्द्रियप्रवृत्ताख्यास्तिथयः पञ्च कीर्तिताः । संसारे(ऽ)श्रेयहेतुत्वात्ताभिर्मुक्तोऽतिथिर्भवेत् YaśasCam. ii. 412. 10] **A** guest, casual visitor स्योनशीरतिथिर्न प्रीणानः ṚV. i. 73. 1; अतो न आ नॄनतिथीनतः पत्नीर्दशस्यत ṚV. v. 50. 3; एते वै प्रियाश्चाप्रियाश्चर्त्विजः स्वर्गं लोकं गमयन्ति यदतिथयः AV. ix. 6. 23; यद्वा अतिथिपतिरतिथीन्परिविष्य गृहानुपोदैत्यवभृथमेव तदुपावैति AV. ix. 6. 53; हिरण्यस्रगयं मणिः श्रद्धां यज्ञं महो दधत् । गृहे वसतु नोऽतिथिः AV. x. 6. 4; अतिथेरातिथ्यमसि TaiS. I. ii. 10. 1 = KāṭhS. 2. 8 = VājaS. 5. 1; अनस्वी च रथी चातिथीनामपचिततमौ TaiS. V. ii. 2. 3; अतिथिभ्यश्च दानम् S'āṅkhāS'S. ii. 3. 25; अतिथींश्च लभेमहि GautPiMe. ii. 5. 12; ऋषिः पुराणोऽतिथिराजगाम MahāBhā. iii. 26. 4; अथागच्छद् द्विजः कश्चिदतिथिः MahāBhā. xiv. 93. 11; अहमतिथिः । कोऽत्र भोः Prati. 5. 7(2); अतिथिरयमस्माकमुपाध्यायो दशकण्ठस्य AnarghaRā. 3. 51(8); भर्तृदारिके नवपुरुषोऽतिथिरागतः TāpaVa. 3. 13(54); को नाम नातिथिरिहाश्रमकन्यकानां वाचा रमेत Kapphiṇā. 6. 24; अतिथिमतिविशिष्टमादरादमरवधूरभि तं जगाम सा RāmC. 12. 97; स्वामिन् किं न तवातिथेः समुचितं सख्यानयानुष्ठितम् NalaCam. 7. 37; एकदा गाधिमगमत् कश्चित्तत्र प्रियोऽतिथिः YogVā. v. 47. 27; अतिथिर्मे मुनिः कश्चित्सह शिष्यैरुपागतः ĀdiP. 23. 41; स प्राणाहुतितोयार्थी ददर्शातिथिमागतम् DarpDa. 6. 41; अथ गोविन्ददत्तस्य गृहानतिथिराययौ KathāSaSāg i. 7. 44; तवागताः स्मोऽतिथयः PariPar. 1. 147; अवतारः सरस्वत्यास्त्वं यत्रातिथिरागतः PāṇḍaC. 3. 252; कृतकृत्याः प्रतीक्षन्ते मृत्युं प्रियमिवातिथिम् HāsyaCū. 145. 17; पुण्यमद्यास्माकं येन त्वमतिथिः संपन्नोऽसि PrabaK. 92. 26; भवन्त एव … चामृतं पिबन्तु चातिथीनिमान् सुरान् विधाय दानवाः NīlaVi. 121. 19; (definitions and varieties of guests) एष वा अतिथिर्यच्छ्रोत्रियः AV. ix. 6. 37; तद्यस्यैवं विद्वान्व्रात्यो राज्ञोऽतिथिर्गृहानागच्छेत् AV. xv. 10. 1; अतिथिदेवो भव TaiĀ. vii 11. 3 (732. 14); प्रविशत्यतिथिर्ब्राह्मणो गृहान् KāṭhU. 2. 7; वैश्वदेवं हुत्वा अतिथिं आकाङ्क्षेत् BhārGS. 3. 14 (83. 3); KauṣīGS. iii. 10. 11; BaudhGS. ii. 9. 1; असमानग्रामोऽतिथिरैकरात्रिकोऽधिवृक्षसूर्योपस्थायी GautDS. i. 5. 36; संप्राप्तो वैश्वदेवान्ते सोऽतिथिः स्वर्गसंक्रमः ParāSm. 1. 40; दूराध्वोपगतं श्रान्तं वैश्वदेव उपस्थितम् । अतिथिं तं विजानीयान्नातिथिः पूर्वमागतः ParāSm. 1. 41; S'aṅkhaSm. 6. 3; ViṣṇuSm. 67. 34; अध्वनीनोऽतिथिर्ज्ञेयः YājñaSm. 1. 111; अतिथिः स्यादयाचकः VāyuP. ii. 17. 17; अज्ञातकुलनामानमन्यदेशादुपागतम् । क्षुधार्तं पांसुकीर्णाङ्घ्रिमतिथिं तं विदुर्बुधाः Mānaso. i. 15. 114; BhaviP. 273A. 4 (i. 184. 8); PadmP. ii. 36. 19; वालखिल्यो यतिश्चैव विज्ञेयो ह्यतिथिः सदा BrahmāṇḍP. ii. 15. 16; एकरात्रिको ग्रामान्तरादागतोऽसंबन्धी अतिथिः VīraMi. (Āhnika.) 156. 21; (duties towards the guests) अशितावत्यतिथावश्नीयाद्यज्ञस्य सात्मत्वाय AV. ix. 6. 38; इष्टं च वा एष पूर्तं च गृहाणामश्नाति यः पूर्वोऽतिथेरश्नाति AV. ix. 6. 31; नादत्वा गुरुभ्यो नातिथिभ्यो नोपाश्रितेभ्यः (भक्षयेत्) CaraS. i. 8. 20; AṣṭāSaṁ. i. 65. 4 (1. 10); अतिथिं ब्रह्मरूपं च कथं हन्यामनागसम् MahāBhā. iii. 154. 33; अतिथेः प्रतिकूलं ते न कर्तव्यं कथंचन MahāBhā. xiii. 2. 41; ब्राह्मणश्चातिथिश्चैष अनुक्तो हि शपेत माम् Rāmā. iii. 45. 2; मातुलातिथिसंश्रितैः … विवादं न समाचरेत् ManuSm. 4. 179; अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ViṣṇuSm. 67. 33; अनाशितमतिथिं गृहे न वासयेत् ViṣṇuSm. 67. 30; कथमतिथिं मां परिभवसि S'āk. 4. 0(25); एतत्तु मां दहति यद्गृहमस्मदीयं क्षीणार्थमित्यतिथयः परिवर्जयन्ति Mṛcch. 1. 12; अतिथिर्यस्य नाश्नाति न तच्छ्राद्धं प्रशस्यते KūrmaP. 608. 18 (2. 22); असत्कृत्यातिथिं नाथो न मे भोक्ष्यति कर्हिचित् SkandP. iv. 96. 131; गृहस्थैश्च न निन्द्यास्तु सदा ह्यतिथयः LiṅgaP. i. 29. 43; अयं सायतनं प्राप्तमतिथिं क्षुधयार्दितम् । वाण्यापि नाकरोत् तस्य पूजनम् PadmP. iv. 39. 61; अतिथिर्विमुखो यस्य याति पूजां विना गृहात् । स तस्य … पुण्यं हृत्वा पलायते RāmāMañ. 116. 16; यत्र श्रोत्रियानतिथीनासनपाद्यादिभिरपि गृहिणो नोपतिष्ठन्ति PraboCan. 2. 6 (22. 6); भवन्तश्चेदृशा धर्मज्ञा यन्मामतिथिं हन्तुमुद्यताः Hitopa. 1. 43(5); अतिथिम् … मा वधीः RājTa. (Jo.) 1126; मम राज्ये अतिथिभिरकृतभोजनैर्न यथा स्थीयते तथा कर्तव्यम् VīraMi. 667. 20 (*on* 2. 186); (duties towards guests and others associated with him) भोजयेत् पूर्वमतिथिकुमारव्याधितगर्भिणीस्ववासिनीस्थविरान् GautDS. i. 5. 23; अग्रे भोजयेदतिथीन् BaudhDS. ii. 7. 19; गृहस्थस्य … देवपित्रतिथिभृत्येषु त्यागः शेषभोजनं च ArthS'ā. i. 29. 10 (1. 3); धर्मागतं प्राप्य धनं यजेत दद्यात्सदैवातिथीन् भोजयेच्च MahāBhā. i. 86. 3; स्मयन्नेव तु तान् वीरान् द्रोणः प्रत्यग्रहीत्स्वयम् । अतिथीनागतान् यद्वत् सलिलेनासनेन च MahāBhā. vii. 85. 22; वासयन्त्यतिथीन्नित्यं नित्यं ये चानसूयकाः । … दुर्गाण्यतितरन्ति ते MahāBhā. xii. 111. 4; अतिथीनन्नपानेन पितॄंश्च स्वधया तथा MahāBhā. xii. 99. 8; येन येन च तुष्येत नित्यमेव त्वयातिथिः । अप्यात्मनः प्रदानेन न ते कार्या विचारणा MahāBhā. xiii. 2. 42; अतिथिं प्रतिपूज्य च । …स तेषां भोजनं ददौ Rāmā. iii. 11. 24; अस्माकमतिथिश्चैव पूज्यश्च प्लवतां वरः Rāmā. v. 1. 86; स ददर्शातिथिं श्लाघ्यं देवर्षिम् HariVaṁ. 46. 4; संपादयत्यर्थद्वयमारोग्यमिन्द्रियविजयं चेति ।… अतिथीनां पूजकः CaraS. i. 8. 18; i. 11. 33; अतिथये प्रदद्यादासनोदके ViṣṇuSm. 67. 45; 59. 29; प्रत्युज्जगामातिथिमातिथेयः RaghuVa. 5. 2; अतिथीनाश्रमोन्मुखान् । पुनानं पवनोद्धूतैर्धूमैः RaghuVa. 1. 53; अतिथिः परिचरितव्यः S'ābaBh. 1657. 6 (*on* ix. 1. 10); सन्तु मेऽतिथयः श्लाघ्याः MārkP. 19. 17; MatsyaP. 16. 50; निवापेन पितॄनर्चन् यज्ञैर्देवांस्तथातिथीन् । अन्नैः ViṣṇuP. iii. 9. 9; बोभुज्यतेऽतिथिसुहृत्स्वजनैः सहान्नम् BṛSaṁ. 19. 18; अतिथीनामथार्चनम् PauṣkS. 41. 60; विसर्जयेदनु-

व्रज्य सुतृप्तश्रोत्रियातिथीन् VedavyāSm. 3. 46; दीयतामतिथये शरीरमिदम् HarṣaC. 339. 9; देव क्षुन्मानतिथिरुपस्थित: VeṇīSaṁ. 6. 200; ऋषिरयमतिथिश्चेद् विष्टर: पाद्यमर्घ्यं तदनु च मधुपर्क: कल्प्यतां श्रोत्रियाय MahāvīC. 2. 44; देवातिथीनां पूजा च…धर्मोऽयं वनवासिन: NītiSā. 2. 28; यथातिथये प्रद्रुताय दद्यात्तादृगेतत् ManuBh. i. 71. 20 (*on* 2. 10); तानि पर्वाणि येष्वतिथिपरिजनयो: प्रकामं संतर्पणम् NītiVā. 27. 48; स्वकर्मणा धनं लब्ध्वा पितृदेवातिथीनपि । सम्यक् संप्रीणयेद् भक्त्या VāmaP. 14. 12; अतिथि: प्रार्थयामि त्वां देहं यागाय पावनम् AgniP. 114. 6; अतिथे: सेवनं दानम्…ब्रह्मचारी समाचरेत् BṛDharmaP. ii. 5. 1; पूजाऽप्यतिथिदेवानाम् धर्मोऽयं गृहिणां कृत: SamarāSū. 7. 19; बालादीनतिथिभृत्यांश्च संभोज्य …शेषभोजनं कर्तव्यम् Mitā. 36. 12 (*on* 1. 105); पिता त्वां च नियुङ्क्ते स शुश्रूषायै ममातिथे: KathāSaSāg. i. 1. 40; अतिथिस्तद्वद्देवास्य गृहस्थस्य प्रभु: स्मृत: S'aṅkhaSm. 5. 7; प्रवर्तयत…अतिथीनां सपर्यार्थम्…पशुविशसनानि KaumuMi. 1. 16 (20); अभीष्टो ह्यतिथि: कामं गृहसर्वस्वमर्हति PāṇḍaC. 5. 403; अतिथिपूजनमतिथिभ्योऽन्नदानं स मनुष्ययज्ञ इत्यर्थ: SmṛtiCan. ii. 566. 17; दानं चतुर्विधाहारपात्राच्छादनसद्मनाम् । अतिथिभ्योऽतिथिसंविभागव्रतमुदीरितम् TriṣaS'aPuC. i. 3. 639; i. 1. 191; MalliC. 7. 820; SamarāSaṁ. 1. 294; वेदविहिता तु हिंसा प्रत्युत धर्महेतु: देवतातिथिपितॄणां प्रीतिसंपादकत्वात् SyādvāMañ. 11 (6); अतिथिर्दातुरत्यन्तोपकारक: Aparā. 438. 2 (*on* 2. 219–221); यद्यप्यन्नं नास्ति तदा प्रीतिवचनेनापि तावदतिथि: पूज्य: Hitopa. 1. 44 (1); पात्रं मे पयसा पूर्णमतिथि: कोऽपि पीतवान् PrabhāC. 6. 14; संपूजितो वोऽतिथिरुद्धरेत्कुलम् S'aṅkaDigVi. (Mā.) 14. 104; देवतातिथिविप्राणामदत्त्वा योऽन्नमश्नुते । … वायस: संप्रजायते S'ārṅgaPa. 724; सेवेत देवभूदेववृद्धवैद्यनृपातिथीन् BhāvPra. (Bhā.) 5. 250; अतिथिसोदरान् । हित्वा गृही न भुञ्जीयात् प्राणै: कण्ठगतैरपि MahNirvāT. 8. 33; प्रिये राधिके गृहागतायातिथये निवेदय पल्लवास्तरणम् GopāKeCan. 127. 35; यथातिथि: प्रीयते तथा कर्तव्यतया विहितम् S'ivārkaMaDī. i. 36. 12 (*on* i. 1. 1); अतिथिकुमारादीनां तु भोजने पौर्वापर्यमनियतम् VīraMi. (Āhnika.) 455. 22; (Agni as guest) श्रेष्ठं यविष्ठमतिथिम् … । अग्निमीळे व्युष्टिषु ṚV. i. 44. 4; प्रेष्ठं वो अतिथिं गृणीषेऽग्निम् ṚV. i. 186. 3; विश्पतिं यह्वमतिथिं नर: सदा …। प्र शंसन्ति ṚV. iii. 3. 8; कविप्रशस्तो अतिथि: शिवो न: ṚV. v. 1. 8; अधा विश्वीव्योऽसि प्रियो नो अतिथि: ṚV. vi. 2. 7; द्युतानो दैव्यो अतिथि: शुशोच ṚV. vii. 8. 4; समिधाग्निं दुवस्यत घृतैर्बोधयतातिथिम् ṚV. viii. 44. 1; स दर्शतश्रीरतिथिर्गृहेगृहे ṚV. x. 91. 2; तेषामासन्नानामतिथिरात्मं जुहोति AV. ix. 6. 21; घृतैर्बोधयतातिथिम् TaiS. IV. ii. 3. 1; VājaS. 3. 1; दीदाय दैव्यो अतिथि: शिवो न: TaiS. II. v. 12. 4; VājaS. 12. 34; एष ह वा अस्य प्रियोऽतिथिर्यदग्निरग्ने: AitBr. 3. 5 (71); (as guest among men) दधुष्ट्वा भृगवो मानुषेष्वा …। होतारमग्ने अतिथिं वरेण्यम् ṚV. i. 58. 6; विश्वेषामतिथिर्मानुषाणाम् ṚV. iv. 1. 20; कविं सम्राजमतिथिं जनानाम् ṚV. vi. 7. 1; अतिथिं मानुषाणाम् ṚV. viii. 23. 25; त्व१ग्निमतिथिं जनानाम् ṚV. x. 1. 5; एको विभूरतिथिर्जनानाम् AV. vii. 21. 1; (guest of the clans) विशामग्निमतिथिं सुप्रयसम् ṚV. ii. 4. 1; विशामतिथिर्विभावसु: ṚV. iii. 2. 2; प्रियो विशामतिथिर्मानुषीणाम् ṚV. v. 1. 9; v. 3. 5; v. 18. 1; viii. 74. 1; अग्निरकामयत विशोविशोऽतिथि: स्याम् PañcBr. xiv. 11. 37; AitĀ. I. i. 1. 4; वैश्वानर: अग्निरेव साक्षात् प्रविशति अतिथिस्सन् ब्राह्मण: KāṭhUBh. 106. 5 (*on* 1. 7); अतिथि: सर्वभूतानामग्नि: सोमो गवामृतम् MahāBhā. iii. 1382*(5); (*fig.* used to emphasize a casual or accidental visit and hence to indicate *death* or *birth in heaven*, an *accidental* occurrence etc.) अद्यैवातिथय: सर्वे भविष्यन्ति यमस्य ते MahāBhā. V. App. 1. 7 (14); कैलासस्य त्रिदशवनितादर्पणस्यातिथि: स्या: MeghDū. 58; स्वकृत्यभारसंन्यासी यावदित्थं विषीदसि । तावदन्तकदंष्ट्राणामरातिरतिथिर्न ते RāmC. 1. 46; अहो विक्रमैकरसिकेषु महासाहसिकेषु भवत्सु मध्ये किं कोऽपि मे प्रार्थनातिथिमनोरथसारथिरस्ति YaśasCam. ii. 302. 23; (पतग:) अयमतिथिर्वनपल्लवस्य जात: NavaSāC. 3. 38; °शिर: सरोजातिथिभृङ्गभङ्गिभि: S'rīKaC. 3. 9; 3. 16; 3. 56; वच: प्रियतमश्रुतेरतिथिरेव RasMañ. 3; स दृशोरतिथिर्न नोऽभूत् CaitanCa. 120. 10 (5); तान् सोऽतिथीन् कारितवान् यमस्य VīraBhā. 2. 61; आसन्नक्ष्णो: क्षणमतिथयो यस्य ते ते न देशा: BhramaDū. 17; एतदेव मम पुण्यमगण्यं यत् कृशोदरि दृशोरतिथिस्त्वम् PadyaVe. 275; तेषामासीदक्ष्णामतिथि: ĀnandRa. 1. 14; [Kośas give synonyms of अतिथि as आगन्तु or आगन्तुक, MediK. 77. 14; S'abdaRaSaK. 169. 17; प्राघूर्णक प्रावुण or प्रावुणक AbhidhāCin. 499; ViśvaPra. 76. 16; ViśvaLoK. 164. 16; तिथिहीन NānārthāSaṁ. ii. 59. 150] **B** [included in *śubhrādigaṇa*, GaṇPā. 230. 28; GaṇRa. 3. 220 (263)] a king of the solar race (son of Kuśa, grandson of Rāma) अतिथिस्तु कुशाज्जज्ञे HariVaṁ. 10. 75; अतिथिं नाम काकुत्स्थात् पुत्रं प्राप कुमुद्वती RaghuVa. 17. 1; KāvyPra. 778. 3; CitraMī. 33. 22; कुशस्यातिथि: … पुत्रोऽभूत् ViṣṇuP. iv. 4. 105; MatsyaP. 12. 52; कुशस्य पुत्रो धर्मात्मा ह्यतिथि: सुप्रियातिथि: VāyuP. ii. 26. 199; BrahmāṇḍP. ii. 63. 201; नप्तेव मैथिलीभर्तुरतिथिर्नाम पार्थिव: NavaSāC. 11. 35; KūrmaP. 235. 18 (1. 21); AgniP. 272. 36; LiṅgaP. i. 66. 38; BrahmP. 8. 88; BhaviP. 415A. 24 (ii(1). 2. 8); PadmP. v. 8. 156; SaurP. 30. 70; S'ivaP. v. 39. 19 (452A. 2); KalkiP. iii. 4. 1; कुशपुत्र, कुशनन्दन, कुशतनय, नृपभेद TrikāS'e. 3. 194; AnekāSaṁ. 3. 307; ViśvaPra. 76. 16; NānārthāSaṁ. ii. 59. 150; MediK. 77. 14; ViśvaLoK. 164. 16; KośaKaTa. 2. 5803; S'abdaRaSaK. 169. 17; **C** name of S'iva असंसृष्टोऽतिथि: … एवं नाम्नां सहस्रेण तुष्टाव हि हरं हरि: S'ivaP. iv. 35. 78 (392B. 9); LiṅgaP. i. 98. 104; SaurP. 41. 89; **D** one of the Ādya gods अन्तरीक्षो वसुहयो ह्यतिथिश्च प्रियव्रत: । … आद्या ह्येते प्रकीर्तिता: VāyuP. ii. 1. 59; **E** name of a deity guarding the gates सुमुख: कालदण्डश्चातिथिर्मुदितस्तथा । … द्वारपा: स्मृता: ĪśānS'iPa. ii. 59. 95; **F** name of a King अयोध्यायां पुरा कश्चिदतिथिर्नाम वै नृप: SkandP. ii(4). 32. 54; **G** name of a Ṛṣi, VīraMi. (Saṁskāra.) 624. 6; S'abdaRa. (Vā.) 411; **H** anger, wrath क्रुध्, AnekāSaṁ. 3. 307; कोप ViśvaPra. 76. 16; ViśvaLoK. 164. 16; KośaKaTa. 2. 5803; **I** bitumen शिलाजतु DhanvNi. 128. 2; [Vedic name of an attendant of Soma, GOLD.]

अतिथि (a-tithi) *f.* **i** day which is not a lunar day, inauspicious lunar day न रजस्वलां नातुराम् … न सन्ध्ययोर्नातिथिषु … नारहसि व्यवायं गच्छेत् CaraS. i. 8. 22; **ii** name of a queen हस्तिनागपुरे … अभूदायोधनो नाम नृपति: ।… अतिथिर्नामा(? म) चास्य महादेवी YaśasCam. ii. 350. 23.

अतिथिकालोपस्थित (atithikālopasthita) *adj.* arriving at a time (specified) for a guest पाषण्डिन: … एतानतिथिकालोपस्थितान् वाङ्मात्रेणापि न पूजयेत् ManvaMu. 150. 6 (*on* 4. 30)

अतिथिकुशल (a-tithikuśala) *adj.* **1** who is not well-versed in (the interpretation of) the lunar days अभ्यस्ततिथिभिरप्यतिथिकुशलै: … ब्राह्मणैरध्यासितम् (कुण्डिनं नाम नगरम्) NalaCam. 2. 27 (7); **2** who receives guests and takes up the sacred grass, NalaCam. 2. 27 (7); (cf. comm. अतिथीन् … कुशांश्च लान्ति स्वीकुर्वन्ति)

अतिथिक्रिया (atithi-kriyā) *f.* reception of a guest, hospitality मुनय: … रामलक्ष्मणयो: पश्चादकुर्वन्नतिथिक्रियाम् Rāmā. i. 22. 18; i. 28. 16; तां देवतापित्र्यतिथिक्रियार्थामन्वग्ययौ RaghuVa. 2. 16; कृतमेव त्वया सर्वं सर्वामेवातिथिक्रियाम् MārkP. 70. 14; वानप्रस्थाश्रमं धर्मं प्रवक्ष्याम: … शय्या ब्रह्मचर्यं पितृदेवातिथिक्रिया: VāmaP. 14. 112; रचयितुं ह्युचितामतिथिक्रियां पथिकमाह्वयतीव … फलिताम्रवणावली NemiC. 8. 18.

अतिथिगवी (atithi-gavī) *f.* cow to be offered to the guest (i. e. Soma) अथ हैके सप्तगुना यजन्ते सोमक्रयण्यतिथिगव्यनूबन्ध्याश्चतस्रो मध्यत: BaudhS'S. iii. 232. 7.

अतिथिगौरवऋद्धि (atithi-gauravarddhi) *f.* abundance of hospitality to a guest आजिषु वीरा: … गौरवाद्दपुरपास्य भजन्ते मत्कृतामतिथिगौरवऋद्धिम् NaiṣC. 5. 15.

अतिथिग्रहण (atithi-grahaṇa) *n.* obtainment of a guest ततो गोदोहमात्रं वै कालं तिष्ठेद्गृहाङ्गणे । अतिथिग्रहणार्थाय ViṣṇuP. iii. 11. 58.

अतिथिग्व (atithi-gvá) *m.* [DEBRU. p. 545] **1** name of a king (father of Divodāsa) आविथारन्धयोऽतिथिग्वाय शम्बरम् (Sāy. अतिथिभिर्गन्तव्याय दिवोदासाय) ṚV. i. 51. 6; i. 112. 14; अतिथिग्वाय शम्बरं गिरेरुग्रो अवाभरत् ṚV. i. 130. 7; दिवोदासमतिथिग्वं यदावम् ṚV. iv. 26. 3; दिवोदासादतिथिग्वस्य राध: शाम्बरं वसु प्रत्यग्रभीष्म ṚV. vi. 47. 22 (Sāy. स (प्रस्तोक:) एव दिवोदासोऽश्वथोऽतिथिग्व इति चाख्यायते); **2** name of a sage य आयुं कुत्समतिथिग्वमर्दयो वावृधानो दिवेदिवे ṚV. viii. 53. 2 (Sāy. एतत्संज्ञमृषिम्); **3** name of a king associated with Indra मघवन् … नि तुर्वशम् … शिशीह्यतिथिग्वाय शंस्यं करिष्यन् ṚV. vii. 19. 8; त्वं करञ्जमुत पर्णयं वधीस्तेजिष्ठयातिथिग्वस्य वर्तनी ṚV. i. 53. 8; त्वमस्मै कुत्समतिथिग्वमायुं महे राज्ञे यूने अरन्धनाय: ṚV. i. 53. 10; प्र तत्ते अद्या करणं कृतं भूत्कुत्सं यदायुमतिथिग्वमस्मै ṚV. vi. 18. 13; कुत्सस्यायोरतिथिग्वस्य वीरान्न्यवृणक् ṚV. ii. 14. 7; अहं गुङ्गुभ्यो अतिथिग्वम् … धारयम् ṚV. x. 48. 8 (Sāy. अतिथिगो: पुत्रम्)

अतिथिजन (atithi-jana) *m.* guests अस्मदीयमिह धर्मोपदेशप्रदानमेव प्रथममातिथेयमतिथिजनेषु NalaCam. 6. 28 (8); स्वाधीनसुलभम् … अतिथिजनप्रतिपूजनसमर्थरूपं शरीरधनम् JātMā. 29. 18 (6. 16); 34. 24 (7. 4); विप्र: प्रियव्रतो नाम …। आसीत्कार्श्यां शुभाचार: सदातिथिजनप्रिय: SkandP. iv. 47. 4; अतिथिजनशेषमश्नति सज्जनजिह्वे कृतार्थासि SubhāRaK. 37. 40; अतिथिजनसपर्यापर्युत्सुकसौमित्रिसमाहृतकन्दमूलफलकल्पितैकदेशम् … रामाश्रमं भरत: … अभजत RāmaCam. 2. 76 (11); अतिथिजनार्चनै: … ते नैकं दिनमिव वन्ध्यतामनैषु: RāghPāṇ. (Ka.) 5. 2.

अतिथिज्ञ (atithi-jña) *adj.* who knows the (duties towards) the guests (विप्र:) अस्तेनश्चातिथिज्ञश्च स राजन्केतनक्षम: MahāBhā. xiii. 24. 27.

अतिथिता (atithi-tā) *f.* the status of a guest ते वध्यमानाः पार्थेन ··· शक्रस्यातिथितां गताः MahāBhā. vii. 18.36; viii. 43.77; अप्रत्ययस्य वातिथितया समुपस्थितत्वादर्थः JayaMa. 357.22 (*on* 6.6); धनमित्रनरेन्द्रस्य स्नेहादतिथितां गतः।···बलिः TriṣaS'aPuC. iv. 3.75; मुनिरेषः···अर्थिनोऽप्यतिथितामनुमेने NaiṣC. 5.4 (comm. आतिथ्यम्); निजानुजेनातिथितामुपेतः प्राचीपतेर्वाहनवारणेन । सिन्दूरसान्द्रे किमकारि मूर्ध्नि तेनारुणश्रीरयमुज्जिहीते NaiṣC. 22.44; अनगारेष्वतिथितामागतेष्वन्नतृष्णया PariPar. 12.317; (fig.) दृशोरतिथितां नीत्वा विष्णुर्वाराणसीं ततः। पुण्डरीकाक्ष इत्याख्यां सफलीकृतवान्मुदा SkandP. iv. 58.16; इयं न यस्यातिथितां गता दृशोः NavaSāC. 7.5; परान्परःशतान्प्रेतपतेरतिथितां नयन् । परमारान्वयं चक्रे क्षेत्रसिंहोऽत्र सार्थकम् HammīMaKā. 13.204; कालस्यातिथितां गतोऽपि कुरुते कां कां नवाश्चर्यताम् ParamāKā. 19.137.

अतिथित्व (atithi-tva) *n.* the status of a guest अतिथित्वेन वर्णानां देयं शक्त्यानुपूर्वशः YājñaSm. 1.107; सकलयज्ञातिथित्वेन वैश्यान्नं तेन संस्कृतम् ĀpaSm. 8.16; विद्वान्विद्वांसमविद्वांसं च क्षुधितं चागतं चातिथित्वेन परिचरति PārāSū. 97.11; क्षत्रियो यदि वा गच्छेदतिथित्वेन वेश्मनि Bṛ-ParāSm. 4.210 (206); त्रिभ्यश्चाधिकस्य विप्रस्याभिगतस्यातिथित्वं कल्प्यम् Aparā. 146.11 (*on* 1.104); त्वम्···मद्भाग्येन गतोऽतिथित्वम् SaduktiKa. 33.25; अतिथित्वेनागतोऽनर्चितो वसन्नन्यत्रापि ManvaVi. 339.27 (*on* 3.100); कः पुनरतिथित्वेऽधिक्रियत इत्यत आह – अतिथिन्वेऽपि BālaKrī. i. 96.22 (*on* 1.106); वैडालव्रतिकायातिथित्वेन सत्कृतार्थदानादि निषिद्धम् ManvaMu. 179.29 (*on* 4.192); अतिथित्वात्स नः पूज्यो वरश्चान्यो न तादृशः KathāSaSāg. xii. 23.84; अतिथित्वेनोपस्थितानां ब्राह्मणादीनां वर्णानुपूर्व्ये यथाशक्त्यन्नं देयमित्यर्थः VīraMi. 200.1 (*on* 1.107); एवं च प्रियस्य यदतिथित्वमुक्तं शातातपेन BālamBha. i. 357.3 (*on* 1.107); PrabaK. 119.10; (fig.) अतिथित्वमवाप नेत्रयोर्बुधलोकः शिवशर्मणस्त्वथ SkandP. iv. 15.20; छिन्नेऽपि जगाम पक्ष्मयुग्मे पक्षीन्द्रस्त्रिदिवस्य योऽतिथित्वम् RāmC. 14.18; आयाति···कथंकारम्··· बिम्बं मज्जनस्यातिथित्वम् S'rīKaC. 14.60; अन्तकस्य स तत्कालमतिथित्वं गमिष्यति PariPar. 9.9; अतिथित्वमनायि सा दृशोः सदसत्संशयगोचरोदरी NaiṣC. 2.40; तव भवनस्यातिथित्वं विधास्ये KamVa. 5.38.

अतिथित्वनिराकरण (atithitva-nirākaraṇa) *n.* denial of the status of a guest सख्यादीनामतिथित्वनिराकरणात् VīraMi.(Āhnika.) 439.7.

अतिथित्वमात्र (atithitva-mātra) *n.* mere status of a guest श्रोत्रियत्वमात्रेणातिथित्वमात्रेण वा विशिष्टस्य माननमनेन फलाय विधीयत इत्यनुसन्धेयम् Aparā. 156.3 (*on* 1.111)

अतिथित्वसंभव (atithitva-sambhava) *m.* possibility of (possessing) the status of a guest भैक्ष्यभोजित्वात्तेषां नातिथित्वसंभवः ManuBh. i. 343.2 (*on* 4.31)

अतिथित्वाभाव (atithitvābhāva) *m.* absence of the guest-status मित्रादीनामतिथित्वाभावो मनुनोक्तः BālamBha. i. 358.20 (*on* 1.108); एकग्रामनिवासिनोऽतिथित्वाभावेऽपि वैश्वदेवार्थमुद्धृत्यावश्यं भिक्षा प्रदातव्या VīraMi.(Āhnika.) 436.21.

अतिथित्वाभिधान (atithitvābhidhāna) *n.* statement of assigning the status of a guest (to some one) शातातपवाक्ये···प्रियस्यातिथित्वाभिधानात् VīraMi.(Āhnika.) 439.5.

अतिथिदर्शन (atithi-darśana) *n.* sight of a guest तदहो ददतोऽन्नं महात्मनः। शिष्टं मात्सर्यहीनस्य वर्धत्यतिथिदर्शनात् MahāBhā. iii. 246.9; कोऽयमतिथिदर्शनेन प्रतिभयः प्रथितः स्वेदकम्पोपप्लवः KaumuMi. 1.18 (6)

अतिथिदान (atithi-dāna) *n.* offering to a guest एवकारोऽतिथिदानादपि पूर्वकरणाद् विचिकित्सानिवृत्त्यर्थः BālaKrī. i. 95.1 (*on* 1.102)

अतिथिदारिद्र्य (atithi-dāridrya) *n.* poverty of a guest प्रदीप्तेऽतिथिदारिद्र्यदावाग्नौ क्षिपतोऽपि ते। दानवारिणि ··· स्नेहनाशो न दृश्यते AlaṅkāMañ. 128.10.

अतिथिदेव (athithi-deva) *adj.* having a guest for a deity अतिथिदेवो भव TaiU.1.11 = TaiĀ. vii. xi. 2 (S'aṅ. देवतावदुपास्या एते इत्यर्थः)

अतिथिदेवत्य (atithi-devatya) *adj.* pertaining to treatment of a guest as a deity अस्ति ह्याचारो बहुलं लोके। देवदेवत्यमतिथिदेवत्यं पितृदेवत्यम् Nir. 7.4 (134.12); अत्र हि देवताशब्दः स्मर्यते। अग्निदेवत्यं सूक्तम्। अग्निदेवत्यं हविरिति। तथा अतिथिदेवत्यम्, पितृदेवत्यमिति S'ābaBh. 1927.21 (*on* x. 4.23)

अतिथिदैवत (atithi-daivata) *adj.* having a guest as a deity मुनिः ··· नित्यं चातिथिदैवतः SkandP. iv. 94.2.

अतिथिदैवत्य (atithi-daivatya) *adj.* having a guest as a deity गृहस्थोऽतिथिदैवत्यस्तस्मात्तं पूजयेत्सदा ViṣṇuDhaP. ii. 92.57.

अतिथिद्विष् (atithi-dviṣ) *adj.* hating a guest, MediK. 18.9; AnekāSaṁ. 4.28; ViśvaPra. 19.216; S'abdaRaSaK. 40.17; AnekāTi. 4.149.

अतिथिद्वेष (atithi-dveṣa) *m.* hatred of a guest, inhospitality [MW]

अतिथिधर्म (atithi-dharma) *m.* **1 A** duty towards a guest भो भद्र ··· तद्गृह्यतामतिथिधर्मः Pañcā. 26.17; **1 B** duty of a guest अतिथिधर्ममाह – गोदोहनकालमिति VīraMi.(Āhnika.) 442.10; **2** [Inst.] in the role of a guest यदि त्वतिथिधर्मेण क्षत्रियो गृहमाव्रजेत् ManuSm. 3.111; ViṣṇuSm. 67.36; आश्रमान्तरस्थानां भैक्षचर्या विहिता न त्वतिथिधर्मेण भोजनम् ManuBh. i. 258.2 (*on* 3.109); आगतमप्यतिथिं न विद्यात् नातिथिधर्मेणार्चयेत् ManvaVi. 341.21 (*on* 3.103); भवं(? व)त्योऽतिथिधर्मेण प्राप्ताः स्वर्गात्सुमध्यमाः DevīBhāP. iv. 6.32; VīraMi.(Āhnika.) 449.2.

अतिथिधर्मशालिन् (atithidharmaśāl-in) *adj.* possessed of the status of a guest वैश्यशूद्रावपि ··· ग्रामान्तरादागतत्वादतिथिधर्मशालिनौ ManvaMu. 108.5 (*on* 3.112)

अतिथिधर्मिन् (atithi-dharmin) *adj.* having the nature of a guest वैश्यशूद्रावपि प्राप्तौ कुटुम्बेऽतिथिधर्मिणौ। भोजयेत् ViṣṇuSm. 67.37; ManuSm. 3.112; सकाशं तव संप्राप्तौ दूरादतिथिधर्मिणौ BhaviP. 612B.20 (iv. 3.25); वैश्यशूद्रावपि प्राप्तौ कुटुम्बेऽतिथिधर्मिणौ ··· भोजयेत्सह भृत्यैस्तौ BallāC. 63.16.

अतिथिधर्मोपदेश (atithidharmopadeśa) *m.* instruction relating to the duties towards a guest अतिथिमवजानन्तं यजमानमतिथिधर्मोपदेशेन तत्स्वीकारमकारयतां ब्राह्मणानामयं प्रत्यवायः CaturCin. iii(1). 440.9.

अतिथिन् (ati-thín) *adj.* [DEBRU. p. 330, 722] wanderer, itinerant [w. r. for वैतिथिन् MahāBhā. xii. 29.22]

अतिथिनी (atithín-ī) *adj.* (*f.*) bringing guests साध्वर्या अतिथिनीरिषिराः ···। बृहस्पतिः ··· गा ऊपे ṚV. x. 68.3 (Sāy. सततं गच्छन्तीः) = AV. xx. 16.3.

अतिथिनिमित्तक (atithinimitta-ka) *adj.* meant for a guest अतिथिनिमित्तके आतिथ्यं यदुपात्तं तदतिथिना भक्ष्यमित्यर्थः VīraMi.(Āhnika.) 530.17.

अतिथिनिरीक्षण (atithi-nirīkṣaṇa) *n.* looking out for a guest भिक्षादानानन्तरमप्यतिथिनिरीक्षणाय गृहाङ्कणे कंचित्कालं तिष्ठेदित्यर्थः SmṛtiCan. ii. 588.8; VīraMi.(Āhnika.) 433.21.

अतिथिपञ्चम (atithi-pañcama) *adj.* with the guest as the fifth देवान् पितृन्मनुष्यांश्च भिक्षूनतिथिपञ्चमान् MahāBhā. v. 33.63.

अतिथिपति (átithi-pati) *m.* [AltGr. II. 1.264] a host यजमानब्राह्मणं वा एतदतिथिपतिः कुरुते AV. ix. 6.18; ix. 6.3; यद्वा अतिथिपतिरतिथीन्प्रतिविष्य गृहानुपोदैति AV. ix. 6.53; अतिथिपतिर्वा अतिथीनामीष्टे MaiS. iv. 8.1.

अतिथिपथ (atithi-patha) *m.* guest's path (i. e. arrival) गृहपतिर्मम ! प्रतीक्षेतातिथिपथम् SkandP. iv. 96.132.

अतिथिपद (atithi-pada) *n.* **i** position of a guest तेन चाहमतिथिपदादातिथेयेनापश्चितोपचिताकाल्पखेदः(?)··· तमब्रवम् AvantiKa. 193.16; **ii** the word 'guest' अनित्यं स्थित इत्यस्मिन्नर्थेऽतिथिपदं निपात्यते ManvaVi. 341.1 (*on* 3.102)

अतिथिपरिग्रह (atithi-parigraha) *m.* reception of a guest यः प्राजापत्यामिष्टिं निरूप्य ··· प्रव्रजितो न तस्य होमो न तस्यातिथिपरिग्रहः NyāyKa. 278.1.

अतिथिपरिवेषण (atithi-pariveṣaṇa) *n.* serving food to a guest धर्मकार्ये च भिक्षादानातिथिपरिवेषणहोमीयद्रव्योपकल्पनादि प्रात्यहिकम् ManvaMu. 378.30 (*on* 9.86)

अतिथिपूजक (atithi-pūjaka) *adj.* [*f.*-ikā] honouring a guest देवतातिथिपूजकाः। दीर्घायुषो नराः सर्वे Rāmā. i. 6.16; देवतातिथिपूजकः।···ब्राह्मणो नावसीदति ParāSm. 1.38; अतिथिपूजकाः। ये च वेदार्थवक्तारस्ते वै भागवतोत्तमाः SkandP. ii(1). 21.56; परीक्षितनृपोऽभवत्। देवतातिथिपूजकः BhaviP. 558A.13 (iii(4). 9.3); ये वै ह्यतिथिपूजकाः।··· विज्ञेया वैष्णवा नराः PadmP. iii. 1.27; यज्वा विनीतो ह्रीमांश्च देवतातिथिपूजकः GaṇeP. ii. 27.5; देवतातिथिपूजिका। नाम्ना इन्दुमती ख्याता GaṇeP. i. 53.7; निःस्पृहोऽतिथिपूजकः।··· सैव सत्राधिपः स्मृतः S'ukraNi. 2.169.

अतिथिपूजन (atithi-pūjana) *n.* honour shown to a guest अहं बाला नियुक्तातिथिपूजने MahāBhā. i. 113.32; सत्यार्जवं चातिथिपूजनं च ···। निषेवितव्यानि सुखानि लोके MahāBhā. xii. 61.14; यज्ञः ··· अतिथिपूजनम्। ··· एतद्ब्राह्मणलक्षणम् MahāBhā. xii. 191*(1); श्रुतपूर्वो मया धर्मो महानतिथिपूजने MahāBhā. xii. 142.39; xiii. 2.68; सत्यं च ···। द्विजातिदेवातिथिपूजनं च पन्थानमाहुस्त्रिदिवस्य सन्तः Rāmā. ii. 101.30; पञ्च क्लृप्ता महायज्ञाः···नृयज्ञोऽतिथिपूजनम् ManuSm. 3.70; धन्यं यशस्यमायुष्यं स्वर्ग्यं वातिथिपूजनम् ManuSm. 3.106; न चाप्नोति गृही लोकान् यथा त्वतिथिपूजनात् ViṣṇuSm. 67.44; 67.28; ParāSm. 1.39; अस्नानभोजिनो नाग्निदेवतातिथिपूजनम्। करिष्यन्ति ViṣṇuP. vi. 1.27; सायं प्रातश्च भोक्तव्यं कृत्वा चातिथिपूजनम् MārkP. 34.49; चतुर्विधो वराहारः

संयतेभ्यः प्रदीयते । श्रद्धादिगुणसम्पत्त्या तस्यादतिथिपूजनम् VarāṅgaC. 15.124; धर्मान्वः पुरतो वक्ष्ये ··· पञ्चयज्ञाद्यतिथिपूजनम् LaghvāśvaSm. 1.2; GobhiSm. 2.27; तुष्टाः स्युः सर्वदेवताः ··· यथा ह्यतिथिपूजनात् VṛGautaSm. 534.15 (6); होतव्यमग्निहोत्रं च कुर्याच्चातिथिपूजनम् TaiUBhāVā. 32.18(1); NyāyKa. 277.11; वेदाभ्यासोऽन्वहं शक्त्या श्राद्धं चातिथिपूजनम् । गृहस्थस्य परो धर्मः KūrmaP. 26.9 (1.2); ViṣṇuDhaP. ii. 95.11; BrahmVaiP. i. 29.7; SkandP. iv. 96.134; (सुधर्मा) भगवद्भजने सक्ता तथा चातिथिपूजने GaṇeP. i. 1.35; अकारि यत्रातिथिपूजनं धनं मनोरमश्च स्वयमालयोऽकृतः(?त) Rāvaṇā. 8.66; हिंसादिदोषयुक्तोऽपि मुच्यतेऽतिथिपूजनात् KṛṣiPa. 8; SmṛtiCan. iv. 717.16; मठाग्रहारसदननिर्माणातिथिपूजनैः । नृपोपचारैः साफल्यमनैषीत्सर्वसंपदः (मन्त्री) RājTa.(S'ri.) 3.37; भूतयज्ञादि अतिथिपूजनपर्यन्तं क्रमेण कर्तव्यम् VīraMi.(Āhnika.) 391.20; 441.14; AbhidhāCin. 822; *adj.* honouring a guest गृहाश्रमः···रम्यः सर्वत्रातिथिपूजनः BhaviP. 740B.15 (iv. 94.38)

अतिथिपूजना (atithi-pūjanā) *f.* honour shown to a guest अहो देहप्रदानेन दर्शितातिथिपूजना MahāBhā. xii. 143.8.

अतिथिपूजा (atithi-pūjā) *f.* honour shown to a guest पाद्यमासनमेवाथ दीपमन्नं प्रतिश्रयम् । दद्यादतिथिपूजार्थम् MahāBhā. xiii. 7.12; देवतातिथिपूजायां प्रसक्ता गृहमेधिनः MahāBhā. xiii. 32.19; धर्मद्वारेष्वनवधीयेत ··· अतिथिपूजायां दाने CaraS. i. 11.33 (1922 Ed.); (स्वधर्मः) वानप्रस्थस्य ··· देवतापित्रतिथिपूजा ArthS'ā. i. 30.4 (1.3); अतिथिपूजायां यतेत ViṣṇuP. iii. 11.70; सा तापसकन्यका ···मम···अतिथिपूजामकरोत् TilaMañ. 256.21; गोदेवातिथिपूजासु निरालस्यो भवानघ SkandP. iii(3). 11.23; PadmP. v. 27.43; LiṅgaP. i. 29.44; गत्वा च राजधानीं स्वां प्रेषयामास सोऽन्वहम् । तस्या अतिथिपूजार्थं पक्वान्नानि धनानि च KathāSaSāg. x. 10.153; सत्प्रतिग्रहादिन्यायेनोपार्जितधनः अतिथिपूजातत्परः (गृहस्थोऽपि मुच्यते) Mitā. 400.5 (*on* 3.205); अतश्चातिथिपूजाया अकरणे निन्दा ब्राह्मणातिथिपूजनाकरणविषयैव Aparā. 152.11 (*on* 9.107); अतिथिपूजाद्यर्थमेव च – अह्नो मासस्य षण्णां वा तथा संवत्सरस्य वा । अर्थस्य निचयं कुर्यात् BālaKrī. ii. 22.21 (*on* 3.47); देवतातिथिपूजासु गृहस्थो निरतो भवेत् MahNirvāT. 8.24; अतिथिपूजाप्रसङ्गेन राजादीनामपि गृहागतानां पूजाविशेषमाह ManvaMu. 109.23 (*on* 3.119); (वर्णनीयाः) आश्रमेऽतिथिपूजैणविश्वासो हिंस्रशान्तता AlaṅkāS'e. 16.0 (73); रात्रावपि ह्यतिथिपूजा स्मर्यते BālamBha. i. 104.3 (*on* 1.24)

अतिथिपूजादिक (atithipūjādi-ka) *adj.* honouring a guest etc. गृहस्थस्यातिथिपूजादिकमपि···अपेक्ष्यम् VīraMi. 903.28 (*on* 3.205)

अतिथिपूजानियम (atithipūjā-niyama) *m.* obligation regarding honouring a guest यदि भार्यया सह प्रवसेदग्नयश्च गृह एव भवेयुस्तदा नातिथिपूजानियमः ManuBh. i. 251.23 (*on* 3.93)

अतिथिपूजानिवृत्ति (atithipūjā-nivṛtti) *f.* abstention from honouring a guest यथोक्तलक्षणातिथ्यभावेऽतिथिपूजानिवृत्तिः ManuBh. i. 134.23 (*on* 2.113)

अतिथिपूजापर (atithipūjā-para) *adj.* **i** devoted to honouring guests अतिथिपूजापरः···गृहस्थः···मुच्यते VīraMi. 904.5 (*on* 3.205); **ii** referring to the honouring of a guest विप्रनिषेधकानि तानि ··· अतिथिपूजापराणि BālamBha. i. 494.18 (*on* 1.221)

अतिथिपूजापरायण (atithipūjā-parāyaṇa) *adj.* devoted to honouring guests स्नानसंध्याग्निहोत्रस्वाध्यायवैश्वदेवातिथिपूजापरायणः SaṅkaVi.(Ā.) 69.9.

अतिथिपूजाफल (atithipūjā-phala) *n.* result of honouring guests स्वर्गग्रहणमतिथिपूजाफलोपलक्षणार्थम् ManuBh. i. 216.20 (*on* 3.18)

अतिथिपूजाविधि (atithipūjā-vidhi) *m.* procedure of honouring guests अशक्तस्य तृणादिदानेनाप्यतिथिपूजाविधिः स्यात् ManuBh. i. 250.23 (*on* 3.91)

अतिथिपूजाव्यतिक्रम (atithipūjā-vyatikrama) *m.* omission of (the duty of) honouring a guest अत्यन्तदरिद्रस्याप्यतिथिपूजाव्यतिक्रमो न युक्तः ManuBh. i. 249.27 (*on* 3.90)

अतिथिप्रग्रह (atithi-pragraha) *m.* welcome to a guest अतिथिप्रग्रहरतः ··· नरः ··· स्वर्गतिं प्रतिपद्यते BrahmP. 225.27.

अतिथिप्रतिपूजन (atithi-pratipūjana) *n.* honouring a guest निश्चिता खलु मे बुद्धिरतिथिप्रतिपूजने MahāBhā. xii. 142.40.

अतिथिप्रत्याख्यान (atithi-pratyākhyāna) *n.* rejection of a guest अतिथिप्रत्याख्याने च दोष उक्त आपस्तम्बेन VīraMi.(Āhnika.) 435.22.

अतिथिप्रत्युत्थान (atithi-pratyutthāna) *n.* standing up in honour of a guest (आचारहीनः) गुर्वतिथिप्रत्युत्थानाद्याचारवर्जितः ManvaMu. 120.8 (*on* 3.165)

अतिथिप्रधान (atithi-pradhāna) *adj.* having a guest as the principal object आतिथ्यमतिथिप्रीत्यर्थं सदतिथिप्रधानम् S'ivārkaMaDī. i. 36.6 (*on* i. 1.1); PūrvottaVāNaMā. 250.6.

अतिथिप्रभृति (atithi-prabhṛti) *adj.* guest etc. विघसो यज्ञशेषः अतिथिप्रभृतिभिः भुक्तशेषश्च SmṛtiCan. v. 155.3; शेषान् निमन्त्रितव्यतिरिक्तानतिथिप्रभृतीन् SmṛtiCan. v. 279.20; v. 194.5.

अतिथिप्रयुक्त (atithi-prayukta) *adj.* caused by the guest सर्वं तदतिथिप्रयुक्तम् S'ābaBh. 1649.23 (*on* ix. 1.6); 1657.5 (*on* ix. 1.10)

अतिथिप्रसङ्ग (atithi-prasaṅga) *m.* [Inst.] in the context of (honouring) a guest अतिथिप्रसङ्गेन गृहागतानां स्नातकादीनामर्घ्यत्वमाह VīraMi. 201.20 (*on* 1.110)

अतिथिप्राग्भोजन (atithiprāg-bhojana) *n.* eating before a guest न हि ··· अतिथिप्राग्भोजनं सकलब्रह्मविद्याङ्गम् PūrvottaVāNaMā. 307.13; 308.11; 309.8.

अतिथिप्राणक (atithiprāṇa-ka) *adj.* with guest as his very life नृपः अतिथिप्राणको नित्यम् BṛNāraP. 13.10.

अतिथिप्राणाग्निहोत्र (atithi-prāṇāgnihotra) *n.* Prāṇāgnihotra (to be done) by the guest अतिथिप्राणाग्निहोत्रात् पूर्वं स्वीयप्राणाग्निहोत्रं कुर्यात् VedāntKa. 453.16 (*on* iii. 3.40)

अतिथिप्राप्ति (atithi-prāpti) *f.* obtainment of a guest क्व चेद्गतिथिप्राप्तिरह्नो पुण्योदयोऽद्य मे KathāSaSāg. xii. 5.129.

अतिथिप्रार्थनमनोरथ (atithiprārthana-manoratha) *adj.* [*f.* –ā] **1** desirous of the requests of guests यत्र ··· स्वर्गवसतय इवातिथिप्रार्थनमनोरथाः ··· सन्ति ग्रामाः YaśasCam. i. 14.1; **2** not having lunar days and having desires (fulfilled) without being asked for, (comm. अविद्यमानास्तिथयः प्रार्थितमनोरथाश्च यासाम्)

अतिथिप्राशस्त्य (atithi-prāśastya) *n.* praise of a guest गोविन्दस्य जयन्ति सायमतिथिप्राशस्त्यगर्भा गिरः GītGo. vi. 12.4.

अतिथिप्रिय (atithi-priya) *adj.* [*f.* –ā] to whom a guest is dear, hospitable अतिथिप्रियः । यो ददाति सतां नित्यं स मां पृच्छतु पाण्डवः MahāBhā. xii. 55.9; (ये) सततं चातिथिप्रियाः ··· तान्नमस्यामि MahāBhā. xiii. 32.12; दाता यज्वा च धीरश्च श्रुतवानतिथिप्रियः HariVaṃ. i. 24.8; न्यायागतधनस्तत्त्वज्ञाननिष्ठोऽतिथिप्रियः YājñaSm. 3.205 (अतिथयः प्रियाः यस्य सोऽतिथिप्रियः Aparā. 1029.8); Kiraṇā. 12.17; वरुणायास्तटे विप्रः ··· सदातिथिप्रियो रात्रावागतानां समाश्रयः MārkP. 61.6; अतिथिप्रियः । तस्याः पुत्रः स्मृतोऽक्रूरः VāyuP. ii. 34.109 = BrahmāṇḍP. ii. 71.110 = LiṅgaP. i. 69.24; सत्यवादी च नित्यं चैवातिथिप्रियः AhirbuS. 15.48; अतिथिः प्रियस्य (?अतिथिप्रियस्य) ··· जितेन्द्रियस्य दत्ता हि गौस्तारयते परत्र VṛGautaSm. 574.1 (9); देवदत्त इति द्विजः ।··· व्रतनिष्ठोऽतिथिप्रियः VarāP. 146.5; अनुरक्ता त्वयि सदा द्विजदेवातिथिप्रिया GaṇeP. i. 7.13; सुगन्धा नाम यस्यासीत् पत्नी ··· द्विजदेवातिथिप्रिया GaṇeP. i. 58.14; विदर्घे स विशाम्पत्युरातिथ्यमतिथिप्रियः NavaSāC. 11.38; सोऽतिथिप्रियः ··· गृहस्थोऽपि विमुच्यते NyāyMañ. ii. 85.31; अतिथिप्रियाय दान्ताय धेनुं दद्याद्गुणाधिके BhaviP. 831B.2 (iv. 151.23); अतिथिप्रियाणां गृहेऽपि मोक्षः पुरुषोत्तमानाम् PadmP. v. 19.318 = SūktiRa. 25.11; Subhāṣi. 3017; तिथिरतिथिप्रिय दशमी SaraKaṇṭhā. 262.9; द्रुपः । द्रोणाचार्याय विदधावातिथ्यमतिथिप्रियः PāṇḍaC. 3.257; अतिथिप्रियो विरचिताभरणः श्रवणातिथिं तिथिमसावकरोत् Rāṣṭrau. 17.37; तद्भार्यापि तथैवेत्थं तमुवाचातिथिप्रिया KathāSaSāg. i. 7.50.

अतिथिप्रिय (atithi-priya) *m.* **1** one of the thousand names of Viṣṇu. अतिथिप्रियः (इति विष्णुसहस्रनामानि) SkandP. v(1). 63.135; **2** name of one of the hosts of Skanda in the North-Western region अतिस्थिरश्रोच्छ्रितश्च चतुर्थस्त्वतिथिप्रियः ĪśānS'iPa. ii. 53.85.

अतिथिप्रीणन (atithi-prīṇana) *n.* (room for) entertaining guests प्रकरोतु वा द्वयमिदं याम्येऽतिथिप्रीणनम् S'ilpaRa. ii. 31.67 = MānaSā. App. 450B.21.

अतिथिप्रीति (atithi-prīti) *f.* **i** love for a guest (सा) अपूर्वमतिथिप्रीत्या स्वागतेनान्वरञ्जयत् KathāSaSāg. iv. 2.86; **ii** satisfaction of a guest अतिथिप्रीतिस्तु मधुपर्कसंस्कारादिसमास्वादजा प्रत्यक्षोपलक्ष्यैव SyādvāMañ. 11 (11)

अतिथिप्रीतिपर्यन्तता (atithiprītiparyanta-tā) *f.* the state of continuing till the satisfaction of a guest इत्यतिथिप्रीतिपर्यन्ततया आतिथ्यविधिवत् SiddhāSi. i. 45.21.

अतिथिप्रीतिविधान (atithiprīti-vidhāna) *n.* act of pleasing the guests आतिथ्यमतिथिप्रीतिविधानम् S'ivārkaMaDī. i. 36.12 (*on* i. 1.1) = PūrvottaVāNaMā. 250.15.

अतिथिप्रीत्यन्त (atithiprīty-anta) *adj.* ending with the satisfaction

of a guest अतिथिप्रीत्यन्तमनुष्ठितं कर्मैव फलदम् SiddhāSi. i. 45. 5.

अतिथिप्रीत्यर्थ (atithiprīty-artha) *adj.* meant for the satisfaction of a guest अतिथिप्रीत्यर्था धर्मा: VedāntKa. 181. 24 (*on* i. 3. 26); अतिथिप्रीत्यर्थे कर्मण्यातिथ्ये कथमश्रद्धा परिहरणीया SiddhāSi. i. 45. 3; आतिथ्यमतिथिप्रीत्यर्थं सद् अतिथिप्रधानम् S'ivārkaMaDī. i. 36. 6 (*on* i. 1. 1) = PūrvottaVāNaMā. 250. 6.

अतिथिप्रीत्यर्थम् (atithiprīty-artham) *adv.* in order to please a guest देवतातिथिप्रीत्यर्थम्…। न हिंस्या: प्राणिन: VarāngaC. 15. 112.

अतिथिप्रेक्षण (atithi-prekṣaṇa) *n.* looking for or waiting for a guest प्रणयिता यत्र (अवन्तिषु) अतिथिप्रेक्षणे (वर्तते) YaśasCam. i. 203. 5.

अतिथिबहुत्व (atithi-bahutva) *n.* abundance of guests यत्तु वायुपुराणे … न सेवनपरोऽतिथि: इति तदतिथिबहुत्वे द्रष्टव्यम् SmṛtiCan. ii. 589. 15.

अतिथिबाहुल्याभाव (atithibāhulyābhāva) *m.* absence of abundance of guests तत्काले अतिथिबाहुल्याभावादेकातिथित्वम् ManvaVi. 343. 1 (*on* 3. 105)

अतिथिभक्त (atithi-bhakta) *adj.* devoted to a guest मम पुत्र: … देवतातिथिभक्त: GaṇeP. i. 59. 4.

अतिथिभक्ति (atithi-bhakti) *f.* devotion to a guest सातिथिभक्त्या च पाद्यं तस्मै ददौ BrahmVaiP. ii. 14. 12.

अतिथिभाग (atithi-bhāga) *m.* share of a guest उपेत्यातिथिभागं तां वीरोऽयाचत यक्षिणीम् KathāSaSāg. xii. 6. 246.

अतिथिभाजन (atithi-bhājana) *adj.* fit for a guest भवतो: किं वयमत्र कुशलप्रश्नस्य भाजनम्, न पुनरतिथिभाजनस्य समुचितस्य कण्ठग्रहस्य KundaMā. 5. 11 (5)

अतिथिभाव (atithi-bhāva) *m.* the status of a guest ब्राह्मणादीनां वर्णानामतिथिभावे सति ब्राह्मणादिक्रमेण ते भोजयितव्या: Aparā. 152. 2 (*on* 1. 107); 'संप्रीत्या गृहमागतान्' न त्वतिथिभावेन तस्य प्रतिषेधात् ManvaMu. 108. 20 (*on* 3. 113)

अतिथिभिक्षुप्रभृति (atithibhikṣu-prabhṛti) *adj.* guest, mendicant and so on नॄन् अतिथिभिक्षुप्रभृतीनर्चयेत् ManuBh. i. 242. 23 (*on* 3. 71)

अतिथिभोजन (atithi-bhojana) *n.* feeding a guest युक्तस्त्वं तथातिथिभोजने । न … शस्त्रसमुद्योगे MahāBhā. vii. 114. 72; सायं प्रातश्च भोक्तव्यं कृत्वा ह्यतिथिभोजनम् SkandP. i(2). 41. 161; अतिथिभोजनस्य प्राथम्यं निन्दित्वा स्वामिभोजनम् … प्रापयन्ती … आदरं करोति BrahmSūBh.(S'aṅ.) 682. 14 (*on* iii. 3. 40) = BrahmSūBh.(Bhā.) 191. 23 (*on* iii. 3. 40) = Bhām. 648. 18 (*on* iii. 3. 40); स्वामिभोजनस्य ह्यतिथिभोजनादुत्तर: काल: VedāntKa. 453. 6 (*on* iii. 3. 40); अतिथिभोजनमेतेभ्य: प्राक् बोद्धव्यम् DīpKa. 14. 26 (*on* 1. 105); अतिथिभोजनेन भक्तक्षये प्राणाग्निहोत्रलोपमाशङ्क्य S'rutaPra. ii. 512. 1 (*on* iii 3. 40); अतिथिभोजनस्य बलिकर्मानन्तर्यं श्राद्धाकरणे बोद्धव्यम् VīraMi.(Āhnika.) 392. 3; BālamBha. i. 346. 16 (*on* 1. 103)

अतिथिभोजननियम (atithibhojana-niyama) *m.* rule of feeding a guest यद्यपि प्रातराशेऽप्यतिथिभोजननियम: सायं तु तद्व्यतिक्रमे प्रायश्चित्ताधिक्यम् ManuBh. i. 250. 17 (*on* 3. 90)

अतिथिभोजनादि (atithibhojanādi) *adj.* feeding of guests etc. श्राद्धेऽतिथिभोजनादौ च कादाचित्क उपयोग: ManuBh. ii. 348. 17 (*on* 10. 63); आतिथेयमतिथिभोजनादि ManvaMu. 90. 1 (*on* 3. 18); एवं च नित्यश्राद्धात्पूर्वं भिक्षुकोपस्थितौ तस्मै भिक्षादानं ततो नित्यश्राद्धादि, ततोऽतिथिभोजनादीति क्रम: VīraMi. (Āhnika.) 431. 2.

अतिथिमत् (atithi-ma(n)t) *adj.* [*f.* –tī] containing the word *atithi* सैषाग्नेय्यतिथिमती न सौम्यातिथिमत्यस्ति AitBr. 3. 6 (76); आज्यभागौ … अतिथिमन्तौ हैके कुर्वन्ति KauṣīBr. 8. 2 (35. 9); संयाज्ये अतिथिमत्यौ रथवत्यौ त्रिष्टुभावाग्नेय्यौ KauṣīBr. 8. 2 (35. 17); धाय्ये अतिथिमन्तौ ĀśvaS'S. I. iv. 5. 3.

अतिथिरहित (atithi-rahita) *adj.* without a guest अतिथिरहिते श्राद्धे ये भुञ्जन्ति…काकयोनिं व्रजन्ति ते LaS'ātāSm. 101.

अतिथिरूप (atithi-rūpa) *adj.* [*f.* –ā] having the form of a guest ब्राह्मणमतिथिरूपम् … भिक्षादानेन चार्हयेत् ManvaMu. 134. 13 (*on* 3. 243); संहारादि कार्यं जनयन् चिद्देवता…आत्मीया…अतिथिरूपा PratyabhiHṛ. 197. 6 (20) (Adyar Ed.); *n.* role of a guest कृपयातिथिरूपेण भवद्भिस्तीर्थका: कृता: BhāgP. i. 19. 32; चरन्त्यतिथिरूपेण पितर: BhaviP. 280B. 12 (i. 188. 18); यदा तु क्षत्रियादिरतिथिरूपेणागच्छति तदा मनूक्तम् SmṛtiCan. ii. 594. 18.

अतिथिरूपभूत (atithirūpa-bhūta) *n.* living being in the capacity of a guest अतिथिरूपभूतानि प्रत्युपजीव्यमग्निहोत्रं श्रुतम् VedāntKa. 453. 10 (*on* iii. 3. 40)

अतिथिरूपभृत् (atithirūpa-bhṛt) *adj.* having the form of a guest चित्रगुप्तो गृहानागादेकदातिथिरूपभृत् KathāSaSāg. xii. 5. 325.

अतिथिलक्षण (atithi-lakṣaṇa) *n.* characteristic features of a guest अतिथिलक्षणं वक्ष्यति ManuBh. i. 247. 16 (*on* 3. 84); CaturCin. iii(1). 350. 3; अप्रसिद्धत्वादतिथिलक्षणमाह ManvaMu. 106. 20 (*on* 3. 102)

अतिथिलक्षणरहित (atithilakṣaṇa-rahita) *adj.* not having the characteristic features of a guest अतिथिलक्षणरहितमेवालीकातिथिभावमाविस्कृ-(?ष्कृ)त्य भोजनयाचनेन … श्राद्धे विघ्नकर्तारं प्रत्याह हारीत: CaturCin. iii(1). 441. 6.

अतिथिलक्षणलक्षित (atithilakṣaṇa-lakṣita) *adj.* marked by (possessing) the characteristic features of a guest आतिथ्यरहिते अतिथिलक्षणलक्षितविप्रागमनेऽपि तत्पूजारहिते SmṛtiCan. v. 279. 14; CaturCin. iii(1). 440. 11.

अतिथिलक्षणहीन (atithilakṣaṇa-hīna) *adj.* lacking the characteristic features of a guest यस्त्वतिथिलक्षणहीनो भोजनयाचनादिना श्राद्धविघ्नं करोति SmṛtiCan. v. 280. 2.

अतिथिलाभ (atithi-lābha) *m.* availability of a guest अतिथींश्चेद-लिप्स्यत भृशमन्नमदास्यत् । अत्रान्नदानं फलं तद्धेतुभूतोऽतिथिलाभ: JaineVyā. 132. 12 (*on* ii. 3. 115)

अतिथिलोकत्रा (atithiloka-trā) *adv.* to the guests स: … अतिथिलोकत्राकृतवाजिनीक: … वेत्रपुरमध्यवसत् (वेङ्कटेन्द्र:) ĀnandRa. 2. 40 (13)

अतिथिलोप (atithi-lopa) *m.* loss of a guest वनराजिके वसन्तकुसुमाग्रयणं कुर्वन्त्या भवत्या न खल्वतिथिलोप: कृत: PadmPrā. 16. 10.

अतिथिवचन (atithi-vacana) *n.* mention of *atithi* (guest) (बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यका: । संभोज्यातिथिभृत्यांश्च दम्पत्यो: शेषभोजनम्) अतिथिवचनं दृष्टान्तार्थम् । चशब्दोऽभ्यागतार्थ: BālaKrī. i. 96. 5 (*on* 1. 104)

अतिथिवत् (atithi-vat) *adv.* **1** like the sage Atithi अथातिथीनां व्यार्षेय: । आत्रेयार्चनानसातिथ्येति । अतिथिवदर्चनानसवदत्रिवदिति ĀpaS'S. xxiv. 8. 13; **2** like a guest दासा:…अतिथिवच्छूद्रं भोजयेयु: HirS'S. xxvii. 1. 73; ĀpaDS. ii(2). 4. 20; वधूज्ञातिभिरतिथिवदर्चित: BaudhGS. i. 1. 24; विवाहे गौ: । गृहेषु गौ: । तया वरमतिथिवदर्हयेत् ĀpaGS. i. 3. 8; देवता वा प्रयोजयेदतिथिवद् भोजनस्य तदर्थत्वात् MīmāSū. ix. 1. 6; यागो नाम देवतापूजा । पूजा च पूजनीयं प्रति गुणभूता । तदेतदतिथिवद् द्रष्टव्यम् S'ābaBh. 1649. 22 (*on* ix. 1. 6); गृहस्था य उपासीरन् वाचं धेनुं चतुस्तनीम् । स्वर्गौकसां पितॄणां च पूज्यास्तेऽतिथिवद्दिवि BṛParāSm. 6. 82; स्तुतेरपि हि पूज्यत्वाद् ज्ञायते यजिवाच्यता । न वातिथिवदेतस्या: पूज्यतेति च वक्ष्यते TantrVā. 484. 10 (*on* ii. 2. 10); गृहेष्वतिथिवत्तिष्ठेत् SātvaT. 8. 26; (अहम्) अमुना चातिथिवदुपचरित: क्षणं विश्रान्त: DaśKuC. 41. 6; AṇuBh. 181. 3 (*on* iii. 1. 24); PraboSu. 79; अतिथिवत् भिक्षुकयोर्यतिब्रह्मचारिणोरपि पूज्यतामाह VīraMi.(Āhnika.) 446. 24; 453. 14; BālamBha. i. 357. 11 (*on* 1. 108)

अतिथिवत्सल (atithi-vatsala) *adj.* fond of or hospitable to the guests पति: … प्रियदत्ताया धार्मिकोऽतिथिवत्सल: KathāSaSāg. ix. 2. 241.

अतिथिवर्ग (atithi-varga) *m.* group of guests कुलपतिसमादेशादतिथिवर्गमुपचरन्ती…कंचित्कालमनयम् TilaMañ. 331. 2.

अतिथिवर्जित (atithi-varjita) *adj.* deficient in a guest यस्याग्निहोत्रम् … अतिथिवर्जितं च ।… आसप्तमांस्तस्य लोकान् हिनस्ति MuṇḍaU. i. 2. 3; अतिथिवर्जितं च अतिथिपूजनं च अहन्यहन्यक्रियमाणं यस्य MuṇḍaUBh. 315. 13 (*on* i. 2. 3); एतत्त्वतिथिभोजनमतिथिलक्षणलक्षित आगते सति द्रष्टव्यं न पुनरतिथिवर्जितश्राद्धकरणे CaturCin. iii(1). 440. 11.

अतिथिवल्लभ (atithi-vallabha) *adj.* dear to guests महानन्दो द्विज: … सदैवातिथिवल्लभ: SkandP. iv. 98. 41; इष्टसंपादिनीं विद्यां ससारातिथिवल्लभ: (तापस:) KathāSaSāg. xii. 25. 35.

अतिथिवाञ्छा (atithi-vāñchā) *f.* desire for (i. e. expectation of) a guest चतुर्विधेभ्यो भूतेभ्यो बलिं पश्चाद्विनिक्षिपेत् । द्वारि गोदोहमात्रं तु तिष्ठेदतिथिवाञ्छया VṛHārīSm. 8. 226.

अतिथिविद्विष् (atithi-vidviṣ) *adj.* hating guests मृष्टेरुको वदान्येऽपि मृष्टाशिन्यतिथिद्विषि (v. l. मिशिन्यतिथिविद्विषि) S'abdaRaSaK. 40. 17.

अतिथिविशेष (atithi-viśeṣa) *m.* distinguished guest अये को नु खल्वयम् … अतिथिविशेषस्तपोवनं न: सनाथयति SubhaDha. 1. 4 (8); (महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्) एतच्चातिथिविशेषापेक्षया व्यस्तसमस्तत्वेन योज्यम् BālaKrī. i. 97. 17 (*on* 1. 108)

अतिथिविषय (atithi-viṣaya) *adj.* **1** possessing men who are averse to request for worldly pleasures यदतिथिविषयेऽस्मिन् विष्टरे सृष्टिरेषा सुरभितरुमणीनामर्थितार्थप्रदानाम् । इदमणकमिहैकं मे कृशाङ्गत्वहेतु: YaśasCam. i. 421. 1; **2** concerned with guests इष्टापूर्तेष्वतिथिविषये … य: प्रवीणां नागादेवीमलभत VikraDeC. 18. 80; अतिथिविषयस्तु महोक्षं वा महाजं वा श्रोत्रियाय … प्रकल्पयेदित्यादि: (हिंसाविधि:) SyādvāMañ. 11 (15); नष्टशौचे व्रतभ्रष्टे …। दीयमानं रुदत्यन्नम् … इति च मनूक्तं नातिथिविषयम् BālamBha. i. 357. 9 (*on*

1. 107)

अतिथिवेदम् (atithi-vedam) *adv.* all the guests whom he can find अशेषविशिष्टे कर्मणि वाचि दृशिविदोर्ध्वोर्णम् भवति । साधुदर्शी प्रणमति … अतिथिवेदं भोजयति । यं यं विन्दति विन्ते वा तं सर्वं भोजयतीत्यर्थः JaineVyā. 139. 19 (*on* ii. 4. 15) cf. P. iii. 4. 29.

अतिथिवेला (atithi-velā) *f.* time for (the arrival of) a guest यं किलातिथिवेलायामागतं विभवोचितम् । यो नार्चयति दुर्बुद्धिस्तस्य धर्मो न विद्यते PadmP.(Ra.) 35. 112; अन्यदातिथिवेलायां गगनाङ्गणचारिणौ … मुनी सुगुप्तिगुप्ताख्यावायान्तौ संमुखं भुवा … । सीतयेक्षितौ PadmP.(Ra.) 41. 13.

अतिथिव्यतिरिक्त (atithi-vyatirikta) *adj.* other than a guest तदपि… अतिथिव्यतिरिक्तश्राद्धोत्तरकालभोजनीयब्राह्मणविषयं वा द्रष्टव्यम् CaturCin. iii(1). 441. 4.

अतिथिव्रत (atithi-vrata) *adj.* observing the vow of hospitality मुद्गलः… अतिथिव्रती (v. l. अतिथिव्रतः)…। सत्रमिष्टीकृतं नाम समुपास्ते MahāBhā. iii. 246. 4; xiii. 105. 19; सत्त्वम् … अतिथिव्रतम् … आर्षं विद्यात् CaraS. iv. 4. 39 (1922 Ed.); *n.* function of a guest आश्रमं मम संप्राप्तः … पुरंदरः । अतिथिव्रतमास्थाय MahāBhā. xii. 258. 44.

अतिथिव्रतता (atithivrata-tā) *f.* the state of observing the vow of hospitality अतिथिव्रतता धर्मो धर्मस्त्रेताग्निधारणम् MahāBhā. xiii. 128. 40.

अतिथिव्रतिन् (atithi-vratin) *adj.* observing the vow of hospitality अतिथिव्रती क्रियावांश्च (मुद्गलः) MahāBhā. iii. 246. 4.

अतिथिशुश्रूषा (atithi-śuśrūṣā) *f.* care of a guest, serving a guest अग्नयोऽतिथिशुश्रूषा यज्ञो दानं सुरार्चनम् । गृहस्थस्य समासेन धर्मोऽयं मुनिपुंगवाः KūrmaP. 25. 11 (1. 2); श्राद्धमतिथिशुश्रूषां (कुर्यात्) SātvaT. 5. 10.

अतिथिशेषभोजन (atithiśeṣa-bhojana) *n.* taking food that remains after serving a guest वन्यहुतातिथिशेषभोजनानि वानप्रस्थस्य PadārthaSaṁ. 273. 9; अतिथिशेषभोजनं च धर्मसाधनम् NyāyKa. 277. 25.

अतिथिशेषभोजिन् (atithiśeṣabhoj-in) *adj.* habitually taking food that remains after serving a guest भृत्यातिथिशेषभोजी काले दारानुपेयात् SāmViBr. i. 3. 7.

अतिथिशेषान्न (atithiśeṣānna) *n.* food that remains after serving a guest भुञ्जानोऽतिथिशेषान्नमिहायुर्धनभाग् भवेत् SkandP. iv. 38. 33.

अतिथिश्रेष्ठ (atithi-śreṣṭha) *adj.* best of the guests, excellent or distinguished guest त्वमतिथिश्रेष्ठः पूजनीयः प्रयत्नतः Rāmā. i. 51. 4.

अतिथिसंयुक्त (atithi-saṁyukta) *adj.* accompanied by a guest भुञ्जीतातिथिसंयुक्तः सर्वं पितृनिषेवितम् MatsyaP. 17. 62.

अतिथिसंविभाग (atithi-saṁvibhāga) *m.* sharing (one's food) with guests, hospitality (one of the seven S'ikṣāvratas in Jainism) अतिथिसंविभागो नाम न्यायागतानां कल्पनीयानामन्नपानादीनां द्रव्याणां देशकालश्रद्धासत्कारक्रमोपेतं परयात्मानुग्रहबुद्ध्या संयतेभ्यो दानम् TattvāBh. *on* 7. 16; अतिथये संविभागः अतिथिसंविभागः । अश्वघासादिवद् वृत्तिः TattvāRāVār. vii. 21. 12; अतिथिसंविभागश्चतुर्विधो भिक्षोपकरणौषधप्रतिश्रयभेदात् TattvāRāVār. vii. 21. 28; तत्किं मुक्तं यत्र नास्त्यतिथिसंविभागः NītiVā. 27. 13; त्यागोऽतिथिसंविभागः शुद्धान्नोदकदानतः MalliC. 3. 228; अतिथिसंविभागाख्यं शिक्षाव्रतचतुष्टयी PārśvC. 6. 752; द्वादशं व्रतं त्वतिथिसंविभागाख्यम् PrabaK. 37. 1.

अतिथिसंविभागव्रत (atithisaṁvibhāga-vrata) *n.* vow to share (one's food) with guests (one of the seven S'ikṣāvratas in Jainism) °अतिथिसंविभागव्रतसंपन्नश्च TattvārthāSū. 7. 16; दानम् …। अतिथिभ्योऽतिथिसंविभागव्रतमुदीरितम् KumāCaSaṁ. 75. 33 = TriṣaS'aPuC. i. 3. 639.

अतिथिसंज्ञकत्व (atithisaṁjñaka-tva) *n.* the state of possessing the designation of a guest व्रती ब्रह्मचारी, यतिः परिव्राजकः, अनयोरेव विधिधर्मैकयोरतिथिसंज्ञकत्वम् CaturCin. iii(1). 428. 13.

अतिथिसत्कारपर (atithisatkāra-para) *adj.* intent on or devoted to honouring a guest अतिथिसत्कारपरेण…अधिष्ठितं कुसुमपुरं नाम नगरम् VāsaDa. 112. 1.

अतिथिसत्कारोचित (atithisatkārocita) *adj.* worthy of or fit for hospitality अतिथिसत्कारोचितमुपढौक्य प्रसादनाय प्रणाममकरोत् NalaCam. 3. 17 (13)

अतिथिसत्क्रिया (atithi-satkriyā) *f.* act of honouring or worshipping guests बलिकर्मस्वधाहोमस्वाध्यायातिथिसत्क्रियाः । … महामखाः YājñaSm. 1. 102; भौतो नृयज्ञोऽतिथिसत्क्रिया SkandP. iv. 38. 25 (v. l.); अतिथिसत्क्रिया मनुष्ययज्ञः Mitā. 35. 13 (*on* 1. 102); अमात्यः…कृत्वा चातिथिसत्क्रियाम् DevīBhāP. i. 17. 55; सा भर्तुश्चकारातिथिसत्क्रियाम् DarpDa. 2. 18; अतिथिसत्क्रिया ब्राह्मणायान्नदानम् ViraMi. 197. 10 (*on* 1. 102)

अतिथिसत्रशाला (atithi-satraśālā) *f.* residential hall for guests अतिथिसत्रशालासु … सूपकारकलकलः समुल्लास NalaCam. 7. 10 (42)

अतिथिसंतृप्ति (atithi-santṛpti) *f.* satisfaction of a guest नृयज्ञोऽतिथिसंतृप्तिः KośaKaTa. 1. 5569.

अतिथिसत्कार (atithi-satkāra) *m.* **A** [pl.] acts of hospitality, various means of receiving a guest तैस्तैरतिथिसत्कारैराजवेऽस्या दृढं मनः MahāBhā. xiii. 2. 64; (तम्) सर्वैरतिथिसत्कारैः पूजयामास मैथिली Rāmā. iii. 44. 31; विश्रामय तावदतिथिसत्कारैः GopāKeCan. 139. 6; अतिथिसत्कारैर्मुनिना सोऽभ्यनन्द्यत KathāSaSāg. v. 2. 16; **B** [sg.] reception of a guest, honour shown to a guest प्रतिगृह्यतामतिथिसत्कारः SvapnVā. i. 12. 10; यथा चातिथिसत्कारं जानीयात् तथा प्रयतितव्यम् PratiYau. 2. 0 (6); वाचानुवृत्तिः खल्वतिथिसत्कारः Prati. 5. 8 (3); दुहितरमतिथिसत्कारायादिश्य सोमतीर्थं गतः S'āk. 1. 12 (3); (सः) याजनाध्यापनातिथिसत्कारादिभ्यः (तिरस्कार्यः) ManuBh. 1. 72. 17 (*on* 2. 11); स्वधाकारातिथिसत्कारयोर्महायज्ञत्वेन … विहितत्वात् BālaKrī. 95. 10 (*on* 1. 103); अतिथिसत्कारः किमत्र क्रियताम् BṛKathāS'loSaṁ. 10. 134; तस्यातिथिसत्कारः कर्तव्यः KathāSaSāg. v. 2. 16; मूषकस्यातिथिसत्कारं चकार PañcT. 2. 25 (41) (210. 10); (सः) अतिथिसत्कारादेरपि बाह्यः कार्यः ManvaMu. 55. 24 (*on* 2. 103); अतिथिसत्काराद्गृहः शाम्यति RājTa.(Prā.) 419; माधवीलतिका तवातिथिसत्कारायोपस्थिता GopāKeCan. 73. 12.

अतिथिसपर्या (atithi-saparyā) *f.* worship or hospitable treatment of a guest, hospitality कथमतिथिसपर्या शिक्षिताः शाखिनोऽपि Nāgā. 1. 11; सत्क्रियामतिथिसपर्याम् BālaKrī. 1. 108 (97. 16); सद्भिः क्रियमाणातिथिसपर्या मनसि भवति AlaṅkāMañ. 18 (33)

अतिथिसभाजनोचिता (atithisabhājanocitā) *adj.* (*f.*) proper or fit for honouring a guest समाहृतायां सामग्र्यामतिथिसभाजनोचितायाम् । आगच्छत् … ब्रह्मर्षिः S'ivLi. 6. 3.

अतिथिसमर्चन (atithi-samarcana) *n.* worshipping or honouring of a guest, hospitality अतिथिसमर्चनैः … धर्मः स्यात् SkandP. iv. 3. 93; अतिथिसमर्चनम् । विशन्त्यन्यानि दत्वा … यमालये । न SkandP. iv. 7. 31.

अतिथिसमाचार (atithi-samācāra) *m.* customary behaviour towards a guest अतिथिसमाचारमवलम्बिष्ये S'āk. 1. 23 (5)

अतिथिसमानधर्म (atithi-samānadharma) *m.* status equal to that of a guest क्षत्रियादीनाम् … अतिथिसमानधर्मेण ब्राह्मणभोजनानन्तरं भोजनीयत्वम् CaturCin. iii(1). 440. 15.

अतिथिसमुदाचार (atithi-samudācāra) *m.* customary behaviour of a guest अहमप्यतिथिसमुदाचारमनुष्ठास्यामि Prati. 5. 7 (2)

अतिथिसंपत्ति (atithi-sampatti) *f.* abundance of guests श्रीस्तस्यातिथिसम्पत्त्यै … अभूत् RājTa.(Jo.) 739.

अतिथिसंमता (atithi-sammatā) *adj.* (*f.*) acceptable to a guest नाचरन्ति च सायं ये पूजामतिथिसंमताम् SkandP. iii(1). 52. 176.

अतिथिसात् (atithi-sāt) *adv.* at the disposal of or entrusted to a guest श्रीभरानतिथिसात्करवाणि स्वोपभोगपरता न हितेति NaiṣC. 5. 23.

अतिथिसाधु (atithi-sādhu) *adj.* proper or good for a guest, hospitable (आतिथेयी) पूजायाम् ।… अतिथिसाधौ AnekāK. 663.

अतिथिसार्थ (atithi-sārtha) *m.* caravan (i. e. a collection) of guests सकलातिथिसार्थसन्तर्पणकलकलः AvantiKa. 11. 10.

अतिथिसेवा (atithi-sevā) *f.* service to a guest, hospitality श्रद्धा चातिथिसेवा च …। इति नानाविधाः प्रोक्ता अहिंसा BṛDharmaP. i. 2. 11; अन्येनाप्यतिथिसेवा कार्या RasGaṅ. 464. 10.

अतिथिस्नापन (atithi-snāpana) *n.* bathing a guest, offering a bath to a guest अतिथिस्नापनात्पुण्यं दशगोदानजं भवेत् ViṣṇuDhaP. iii. 289. 19.

अतिथिस्वधर्म (atithi-svadharma) *m.* one's duty towards a guest (सा) विवेश…पर्णकुटीम् … संचिन्त्य तेषामतिथिस्वधर्मम् MahāBhā. iii. 250. 9.

अतिथीकर्तुम् (atithī-kartum) *inf.* in order to make (something) a guest of (i. e. a receipient) वचांसि कर्णयोरतिथीकर्तुमर्हति भवान् Jīvān. 94. 2.

अतिथीकृ (atithī-kṛ-) VIII. P. to make (one) a guest of (i. e. receipient) नृपं खगः । दयासमुद्रे स तदाशयेऽतिथीचकार कारुण्यरसापगा गिरः NaiṣC. 1. 134.

अतिथीकृत (atithī-kṛta) *adj.* **1** [*f.* ā] (fig.) made a guest (of sight) (i. e. actualised) येन श्रवःसरणिसंचरणोचितानि दानानि तान्यपि दृशोरतिथीकृतानि CaturCin. i. 891. 7; (of death) के नाम नात्र कान्ताभिः कृतान्तस्यातिथीकृताः RājTa.(Ka.) 7. 425; **2** who has been treated as a guest (i. e. stranger) शोचाम्यतिथीकृतां त्वाम् Nalābhyu. 8. 34; **3** which has been made to receive a guest किमर्थमतिथीकृतमिदं मम मन्दिरम् Manmatho. 2. 17 (1)

(433. 1)

अतिथीकृतमहायोध (atithīkṛta-mahāyodha) *adj.* making great warriors as guests of प्रावतिष्ट दिवोऽतिथीकृतमहायोधं महायोधनम् RāghPāṇ. (Ka.) 9. 14.

अतिथीकृत्य (atithīkṛt-ya) *ger.* having treated as a guest नेत्रयोर्-तिथीकृत्य ज्ञानवापीं कलावती। कदम्बकुसुमाकारां बभार क्षणतस्तनुम् SkandP. iv. 34. 39.

अतिथीन्दु (atithīndu) *m.* moon in the form of a guest (तपस्विनी निरगात्) अतिथीन्दुविलोकनोत्थया शमसिन्धोरिव वेलया दृशा। परितः परिषिञ्चती दिशः RāmC. 12. 87.

अतिथीभविष्यत् (atithī-bhaviṣyat) *adj.* who will become a guest (i. e. approach) धिग् धिग् रे पौरुषं जन्मान्तर अतिथीभविष्यति मृत्यौ किमिव परिहृतं धारातीर्थमिदम् HammīMaMa. 3. 11 (34)

अतिथीभू (atithī-bhū-) I. P. to become a guest (of the ears) (i. e. to be listened to) आस्तां सुधा …। श्रीदेवसूरिसुगुरोर्यदि सूक्तयस्ताः पाकोत्तराः श्रवणयोरतिथीभवन्ति MudriKu. 1. 19 = PurāPraSaṁ. 27. 15.

अतिथीभूत (atithī-bhūta) *adj.* becoming a guest तत्रैतज्जघनोदरस्तन-मुखश्रीभिः क्रमेणातिथीभूतं हन्त निमन्त्र्यते मुहुरिति व्यग्रं किमागच्छति (चेतः) UdaySuKa. 119. 9; समाश्वास्यातिथीभूतं यदा तस्मै प्रवक्ष्यसि। स्ववृत्तान्तं तदैत-स्मान्मोक्षं प्राप्स्यसि शापतः KathāSaSāg. xii. 7. 311; अविदूरे विनीतायाः स्कन्धा-वारं न्यवेशयत्। तस्याः सहोदरमिवातिथीभूतं महीपतिः TriṣaŚaPuC. i. 4. 608.

अतिथीभूय (atithībhū-ya) *ger.* having become a guest दवदन्तीं नलोऽवादीत् देवि यामः क्व संप्रति। भैमी बभाषे मे तातोऽतिथीभूय पवित्र्यताम् MalliC. 6. 143; (रामः) ततः सदारसोदर्यः प्रतस्थे दक्षिणां दिशम्। आश्रमेषु मुनी-न्द्राणामतिथीभूय भूयसाम् Ragh. 7. 11.

अतिथीय (atithīya-) [*denom.*] to behave like a guest कृष्णेन विक्र-मद्व्यत्राम्भोजमोजायितं तथा। चाणूरेण यथा वेगात् कृतान्तस्यातिथीयताम् PāṇḍaC. 2. 411.

अतिथीयित (atithīy-ita) *adj.* acted as a guest चाणूरेण यथा वेगात् कृतान्तस्यातिथीयितम् PāṇḍaC. 2. 411 (Bhavnagar Ed.)

अतिथीश (atithīśa) *m.* A name of a particular form of Śiva अति-थीशः स्थाणुको हरः (स्युरेते वरमूर्तयः) BrahmāṇḍP. iii. 44. 49; मुखादिकेशवादि-स्थानेषु ऐं ह्रीं श्रीं अं श्रीकण्ठेशपूर्णोदरीभ्यां नमः…अतिथीशगोमुखीभ्यां नमः…इति स्वराणाम् VīraMi. (Bhakti.) 113. 12; B vocalic ṛ class ऋः क्रोधोऽतिथीशः Tantrābhi. ii. 8. 1; v. 35. 19; v. 41. 17; vii. 47. 19; viii. 54. 8.

अतिथेय (atith-eya) *n.* service to a guest अतिथेयं स्वयं यत्र यत्र पात्र-निरीक्षणम्। गुणाः श्रद्धादयो यत्र दानं तत्सात्त्विकं विदुः YaśasCam. ii. 408. 13.

अतिथ्य (atithya) *m.* a guest अतिथ्योऽतिथिरातिथ्य आवृपरौ गन्तुगन्तुकौ ŚabdaRa. (Su.) 3. 110.

अतिथ्यभ्यागतादिपूजा (atithyabhyāgatādi-pūjā) *f.* honouring of guests, invitees etc. शिष्टशुश्रूषा अतिथ्यभ्यागतादिपूजा VīraMi. (Saṁskāra.) 874. 18.

अतिथ्यर्चन (atithy-arcana) *n.* reception (*lit.* worship) of a guest अनया च निन्दया अतिथ्यर्चनस्य नित्यतावगम्यते ManvaMu. 106. 13 (*on* 3. 100)

अतिथ्यर्चा (atithy-arcā) *f.* honouring a guest, hospitality पाठनं ब्रह्मयज्ञः स्यात् तर्पणं च पितृक्रतुः। होमो दैवो बलिर्भौतोऽतिथ्यर्चा नृक्रतुः क्रमात् SkandP. iv. 38. 25.

अतिथ्यर्थ (atithy-artha) *adj.* meant for a guest भोजनाचाप्यति-थ्यर्थादपूर्वं दातृसंश्रितम् TantrVā. 236. 5 (*on* i. 3. 25); अराधि सिद्धमेवान्नमति-थ्यर्थं न संशयः TaiUBhVā. 203. 11 (3)

अतिथ्यर्थ (atithy-artha) *n.* [Loc.] for the sake of a guest न देवार्थे न विप्रार्थे नातिथ्यर्थे पचेत् क्वचित् SkandP. iv. 3. 715; स्यादातिथ्यमतिथ्यर्थे NānārthāSaṁ. ii. 64. 20; MediK. 126. 73; आतिथ्यश्चातिथ्यर्थे ŚabdaRaSaK. 252. 4.

अतिथ्यर्थम् (atithyartham) *adv.* for the sake of a guest (गीर्वाणाः समहर्षयः … संतर्प्य) मत्तैर्विद्यार्थिनामन्नैरतिथ्यर्थं महाधनैः SkandP. iv. 3. 15; (रेवा) क्रमेणाप्यत पार्थिवेन) … फलैरतिथ्यर्थमुपाचरन्तः … यस्यां मुनीन्द्रास्तट-पादपाश्च Rāvaṇā. 4. 24; (चतुर्थीति वर्तते) अर्थशब्दे उत्तरपदे चतुर्थ्यन्तं पूर्वपदं प्रकृतिस्वरं भवति। अतिथ्यर्थम् KāśiVṛ. *on* vi. 2. 44; आतिथ्यं यदतिथ्यर्थम् Anekā-Saṁ. 247; त्रिष्वातिथ्यमतिथ्यर्थम् Vaija. 88. 67; अन्नासंभवे तृणविश्रामभूमिपाद-प्रक्षालनाद्यर्थजलप्रियवचनान्यपि धार्मिकगृहेषु अतिथ्यर्थं न कदाचिदुच्छिद्यन्ते अवश्य-देयानीति विधीयते ManvaMu. 106. 18 (*on* 3. 101)

अतिथ्यस् (atithy-as) II. P. to become a guest (i. e. to be in the range of (the eyes) तत्रान्विष्यन् बहुललवलीं स्निग्धराजीववीथीं भृङ्ग भ्रातर्विरहि-वनितालोचनस्यातिथीस्याः BhramDū. 52.

अतिथ्यर्थिन् (atithyarth-in) *adj.* seeking for a guest इतरश्चातिथ्यर्थी, यदि तेन दृष्टोऽभविष्यत् उताभोक्ष्यत JaineVyā. 132. 21 (*on* ii. 3. 116)

अतिथ्या (atithyā) *f.* an *iṣṭi* (minor sacrifice) called *atithyā* (i. e. meant for a guest) अतिथ्यया चरन्ति। अतिथ्यया चरित्वा प्रवर्ग्योपसद्भ्यां चरन्ति JaimiŚS. 3.

अतिथ्यागम (atithy-āgama) *m.* arrival of a guest स्थानस्थितानां सूर्यास्ते प्राच्यां कुर्यादुमा ध्वनिम्। नृपप्रसादं कुरुते शान्तेऽतिथ्यागमाय च ŚārṅgaPa. 2501.

अतिथ्यागमन (atithy-āgamana) *n.* arrival of a guest पाकसमाप्तात्व-तिथ्यागमने पुनः पाकेऽपि न वैश्वदेवान्तरम् VīraMi. (Āhnika.) 398. 10.

अतिथ्याभिसंरम्भ (atithyābhisaṁrambha) *m.* flurry towards the reception or welcome of a guest मातेऽतिथ्याभिसंरम्भो भविष्यति तपोधन। लिङ्गस्यास्य प्रभावोऽयं यदहं निष्प्रभीकृतः SkandP. v(2). 30. 49.

अतिथ्युपवेशन (atithy-upaveśana) *n.* seating the guest अतिथ्युप-वेशनपृथिव्यादिस्तुतिदेवतास्तुतिप्राणायामाः सव्येनैव CaturCin. iii(1). 1120. 2.

अतिथ्युपादान (atithy-upādāna) *n.* mention or use of the word *atithi* अनयोः क्रमानियमसूचनायावश्यकत्वसूचनाय च पुनरतिथ्युपादानम् Bālam-Bha. i. 355. 2 (*on* 1. 105)

अतिथ्युल्लेख (atithy-ullekha) *m.* reference to a guest पुनरग्रे … अतिथ्युल्लेखो मूले कृतः BālamBha. i. 354. 15 (*on* 1. 105)

अतिदंसित (ati-daṁsita) *adj.* very marvellous, very bright सहदेवस्य खड्गोऽयं भास्वाद्दोऽतिदंसितः MahāBhā. iv. 720. *25.

अतिदक्ष (ati-dakṣa) *adj.* [*f.* -ā] very skilful or efficient सः… यमतुल्यदेहः क्रूराकृतिर्हननकर्मणि चातिदक्षः DeviBhāP. iii. 11. 23; तुङ्गविद्या … पट्टमण्डलवस्त्रेषु अतिदक्षा मनोहरा ĀdiP. 11. 52.

अतिदक्षतर (atidakṣa-tara) *adj.* excessively skilful सरवमैविचक्षणम-खिलविलक्षणतनुलक्षणमतिदक्षतरम् (वन्देमहि) StavMā. 48. 15.

अतिदक्षिण (ati-dakṣiṇa) *adj.* [*f.* -ā] A very courteous, exceedingly polite आर्यस्य साधोः करुणात्मकस्य मन्नित्यभीरोरतिदक्षिणस्य Saund. 6. 14; अकरोच्च चेतस्यतिदक्षिणः खलु देवो हर्षः HarṣaC. 126. 11; (अहम्) ततः सखीजनेनातिदक्षिणेन दृढतरीकृतस्नेहनिगलस्तया संनताङ्ग्या संगत्यारंसि DaśKuC. 122. 18; NavaSāC. 1. 75; स त्रिः प्रदक्षिणीचक्रे भक्तिदक्षोऽतिदक्षिणः TriṣaŚa-PuC. ii. 6. 586; अतिदक्षिणा ह्यसौ प्रायेणापरस्यापि मान्यजनस्य न करोति वाक्य-मन्यथा TilaMañ. 32. 14; B giving many gifts अक्रूरः सुषुवे तस्मात्सदा-यज्ञोऽतिदक्षिणः MatsyaP. 45. 27; C very clever अतिदक्षिणः कुमारः स मेऽशक्यः प्रत्यानेतुम् AvantiKa. 245. 10; D southernmost आकम्पितानां मरुतेव यस्य दोष्णाजिभूमावतिदक्षिणेन NavaSāC. 1. 75; E simple or easily accessible अनुकृतपक्षिणमतिदक्षिणम् (वन्देमहि त्वाम्) StavMā. 48. 27.

अतिदक्षिणाशय (atidakṣiṇāśaya) *adj.* who is very generous at heart फणावतीगणैः स्तुतस्तदातिदक्षिणाशयः फणीश्वरे कृताभयः (जय प्रभो कृपा-निधे) StavMā. 189. 7.

अतिदग्ध (ati-dagdha) *adj.* [*f.* -ā] i overburnt, excessively cauterized, badly burnt (up to the flesh) अतिदग्धे दाहपाक° … मूर्च्छाः स्युर्मरणं वा SuśruS. i. 11. 26; तत्र प्लुष्टं दुर्दग्धं सम्यग्दग्धमतिदग्धं चेति चतुर्विधमग्निदग्धम् SuśruS. i. 12. 16; अतिदग्धे तु गुदावदरणम् SuśruS. iv. 6. 6; अतिदग्धं मांसगं स्याद्वातपित्तकफाश्रितम् HārīS. iii. 88. 3; ऊषादाहराग … पित्तप्रकोपैरतिदग्धम् AṣṭāSaṁ. i. 192. 10 (1. 39); प्रमाददग्धं पुनश्चतुर्विधं भवति तुच्छं दुर्दग्धं सम्यग्दग्धमतिदग्धं च AṣṭāSaṁ. i. 194. 3 (1. 40); अतिदग्धस्य विज्ञानमतः शृणु महीपते Hastyāyur. 113. 16 (1. 15); सम्यगामातिदग्धानाम-पलिङ्गान्यतः परम् Hastyāyur. 331. 8 (2. 70); प्लुष्टोतिदग्धो दुर्दग्धः सम्य-ग्दग्धः प्रकीर्तितः ŚārṅgaS. i. 7. 79; परिदग्धमतिदग्धम् SmṛtiCan. v. 221. 21; अतिदग्धे विशीर्णानि मांसान्युद्धृत्य शीतलाम्। क्रियां कुर्यात् BhāvPra. (Bhā.) 8 (47). 104; ii overbaked यत्र मध्यपूर्वार्धमात्रमतिदग्धमितरत्स्वदनीयपकम् MayūMāli. 484. 29 (*on* vi. 4. 5)

अतिदग्धतनूरुह (atidagdha-tanūruha) *adj.* whose hair on the body are very much burnt संसारदावदहनाकरभीकरोरुज्वालावलीभिरतिदग्धतनूरुहस्य। …लक्ष्मीनृसिंह मम देहि करावलम्बम् LakṣmīNṛSt. 3.

अतिदघ् (ati-dagh-) v. P. to reach beyond, to bypasts मा परि वर्क्तमुत मातिं धक्तम् ṚV. 1. 183. 4; शिक्षा स्तोतृभ्यो मातिं धग्भगो नः ṚV. ii. 11 21; ii. 15. 10.

अतिदण्ड (ati-daṇḍa) *adj.* punishing severely नातिदण्डो न निर्दण्डश्चा-रचक्षुरजिह्मगः ViṣṇuDhaP. ii. 3. 4; *m.* severe punishment अतिदण्डाच्च गुणि-भिस्त्यज्यते पातकी भवेत् ŚukraNī. 4(1). 52.

अतिदण्डग्रह (atidaṇḍa-graha) *m.* levying heavy fine नातिदण्डग्रहप्रीतिर्दक्षिणाशाविभोरिव PadmP.(Ra.) 2. 62.

अतिदण्डिन् (ati-daṇḍin) *adj.* who gives severe punishment संकर्षकोऽतिदण्डी तद्ग्रामं त्यक्त्वान्यतो वसेत् S'ukraNī. 3. 319.

अतिदत्त (ati-datta) *m.* name of a prince राजाधिदेवस्य सुता जज्ञिरे वीर्यवत्तराः । दत्तातिदत्तौ बलिनौ HariVaṁ. 28. 2.

अतिदधि (ati-dadhi) *adj.* going beyond the curds तदन्तस्याप्यनङ्। अतिदध्ना SiddhāKau. vii. 1. 75 (77. 10) (Tattāvabodhinī दधि अतिक्रान्ते-नेत्यर्थः); तेन 'अतिदध्ना ब्राह्मणेन' इत्यादि सिद्धम् LaS'abdeS'e. 290. 18; *n.* too much curds संसेवनान्मधुरपिच्छलजागरेण स्वप्नैर्दिवातिदधिगौल्यहिमाशनेन संजायते जनुः कफस्य HāriS. iii. 12. 3.

अतिदधिप्रभोजिन् (atidadhi-prabhojin) *adj.* who eats meals with too much curds व्यधयेद्विमर्दयन् । छिद्रां करेणातिदधिप्रभोजिनम् KalyāKā. 11. 166.

अतिदन्तवद्विभु (atidantavad-vibhu) *adj.* in which the commanders have mounted elephants तर्ति क्षितिस्थामनुजो जघान च द्रवत्तुरङ्गामतिदन्तवद्विभुम् JānaHa. 5. 28.

अतिदन्तुर (áti-dantura) *adj.* having very prominent or projecting teeth अथैतानरूपेभ्य आलभते । ... अतिकिरिटमतिदन्तुरम् TaiBr. III. iv. 19. 1; अद्राक्षीद्राक्षसं घोरम् ... अतिदन्तुरम् SkandP. iv. 54. 13.

अतिदन्तुरता (atidantura-tā) *f.* the state of being extremely uneven भगवत आविर्भावात् पूर्वमाशैशवमयं जन्तुरतिदन्तुरतया द्विजगुर्वादिषु मन्तुमत्तया मत्तया मनोवृत्त्यागच्छत् CaitaCa. 22. 11 (1)

अतिदम् (ati-dam-) IV. P. to become well-tamed चला मनोजवा मेघपथेऽतिवर्तिनः । प्रसह्य नीता गुरुभिर्महापथं नरोऽतिदाम्यन्त्यपि यत्र वाजिनः Rāgh-Pāṇ.(Dha.) 1. 16.

अतिदम्भ (ati-dambha) *m.* excessive hypocrisy or deceit ते (अनर्थादयः) बुद्धिदौर्बल्यात् ... अतिदम्भात् ... दैवयोगाच्च स्युः KāmSū. 352. 14 (6. 6); KandaCū. vi. 6. 3.

अतिदयमानमानस (atidayamāna-mānasa) *adj.* possessing a very sympathetic or compassionate mind दाशरथिरतिदयमानमानसः ... इदमवादीत् RāmāCam. 6. 17 (3)

अतिदयापर (atidayā-para) *adj.* very compassionate साधवोऽतिदयापराः DeviBhāP. iii. 24. 32.

अतिदयायुक्त (atidayā-yukta) *adj.* possessing great compassion तान्दृष्ट्वातिदयायुक्तस्तेषां दुःखेन दुःखितः । अनन्तश्चिन्तयामास BhāvPra.(Bhā.) 1. 60.

अतिदयालु (ati-dayālu) *adj.* very compassionate अहिंसा...या । तथैव पितरः सर्वे तृप्यन्त्यतिदयालवः SkandP. ii(9). 22. 46.

अतिदयाशीतल (atidayā-śītala) *adj.* cooling (i. e. gentle) due to excessive compassion मोदान्निपतदतिदयाशीतलं चूतबाणे दक्षारेरीक्षणानां त्रयमपहरतादाशु तापत्रयं नः S'ivaKePāSt. 30.

अतिदयित (ati-dayita) *adj.* extremely dear or beloved अवनिपतिस्तु दूरादेव दृष्ट्वातिदयितं तनयम् ... शयनादुदगात् HarṣaC. 219. 17; नागाः...सर्वेऽतिदयिता राजन्वासुकेः सुमहात्मनः NīlaP. 949; 355.

अतिदयितलास्य (atidayita-lāsya) *adj.* to whom dancing is very dear अतिदयितलास्यस्य च शैलूषमध्यमध्यास्य मूर्धानमसिलतया मृणालमिवालुनाद्ग्निमित्रात्मजस्य सुमित्रस्य मित्रदेवः HarṣaC. 269. 1.

अतिदरिद्र (ati-daridra) *adj.* extremely poor शुक्लस्यातिदरिद्रस्य हृतं दारिद्र्यमादरात् GaṇeP. ii. 53. 45; RājaTa.(Ka.) 7. 1344; तत्र च भरटको नाम भरटकोऽतिदरिद्रो वसति Bharaṭ. 9B. 9; BhojaPra. 34. 22; कोऽभीष्टोऽतिदरिद्रस्य सेव्यन्ते के च भिक्षुभिः VidaMuMa. 2. 67; महानिधिरतिदरिद्रैरकस्माल्लब्धो दर्शनमात्रेण महानन्दकरः S'ivārkaMaDī. i. 14. 21 (*on* i. 1. 1)

अतिदर्प (ati-darpa) *m.* **1** excessive pride or conceit ततः कोसलेश्वरोऽप्यतिदर्पात् परिभवमसहमानो हास्तिकप्रायमशेषमात्मसैन्यं सज्जीकृतवान् Ratnā. 4. 4 (23); AvantiKa. 63. 10; वयस्यस्यातिदर्पोऽयं भक्तस्य RāmāMaṅ. 203. 13; RāghPāṇ.(Ka.) 5. 38; MudriKu. 1. 12; **2** name of a (black) snake अस्ति कस्मिंश्चिद्वल्मीके महाकायः कृष्णसर्पोऽतिदर्पो नाम Pañcā. 196. 2; *adj.* (*f.*) excessively proud or conceited (भार्या) कौशलसारातिदर्पा च KandaCū. v. 1. 49.

अतिदर्पित (ati-darpita) *adj.* excessively arrogant or conceited एवमस्त्विति तेनोक्ते विकटाक्षोऽतिदर्पितः...अजय्योऽभूत् AbhirbuS. 33. 41.

अतिदर्पितबल (atidarpita-bala) *adj.* whose army is extremely proud or arrogant हृष्टो गर्जति चातिदर्पितबलो दुर्योधनो वा शिखी Mṛcch. 5. 6.

अतिदर्पिन् (ati-darpin) *adj.* extremely proud वन्दीकृताः ... सुरर्षीणां पत्न्यस्तेनातिदर्पिणा SkandP. iv. 71. 13.

अतिदर्शन (ati-darśana) *n.* **i** constant vision तमसश्चातिदर्शनम् CaraS. i. 24. 15 = vi. 3. 81 (1941 Ed.) **ii** frequent sight नो चेत्प्रधक्ष्यते कामो भूयो भूयोऽतिदर्शनात् VāmaP. 63. 48.

अतिदर्शिन् (atidarś-in) *adj.* very far-sighted नयनेनाशुदर्शिना (v. l. अतिदर्शिना) Rāmā. iii. 65. 17.

अतिदवीयस् (ati-davīyas) *adj.* [*f.* -ī] very distant, far off अतिदवीयोनभस्तलभ्रमणखिन्नदिनकरतुरगवान्तफेनस्तबका इव ... तारका व्यराजन्त Vāsa-Da. 182. 1; अद्वैतस्य च नातिदवीयानेष पन्था इत्यलमलीकविकत्थनेन NyāyMañ. i. 202. 11; ii. 13. 6; तथा श्रोत्रज्ञता अतिदवीयसि देशेऽभिव्यज्यमानतया श्रोत्रपथमनासेदुषामपि शब्दानां ज्ञातृता Mitā. 399. 21 (*on* 3. 202); PāṇḍaC. 17. 57; शब्दशक्तिश्च नातिदवीयसीति NyāyPari. 322. 10; RasSa. 131 (8)

अतिदवीयस्ता (atidavīyas-tā) *f.* **i** the state of being very distant or far off अहम् ... अतिदवीयस्तया रसातल इव प्रविष्टाम् ... अभिपर्यन्तामवनिमीक्षमाणः TilaMañ. 242. 16; न चातिदवीयस्तया तदर्थस्य हेयतया तदपि पुरुषस्यापेक्षितं तस्योपेक्षणीयविषयत्वात् TātpaṬ.(Vā.) 21. 17 (*on* i. 1. 1); **ii** the state of being of very great height अतिदवीयस्तया प्रपातस्याल्पशेषजीवितोऽयमामीलितलोचनो मुहुर्मुहुर्मुखेन पतति मुहुर्मुहुरत्युल्बणं श्वसिति मुहुर्मुहुश्चञ्चुपुटं विवृणोति Kād. 38. 1.

अतिदवीयस्त्व (atidavīyas-tva) *n.* extreme remoteness सिद्धमपि वा वेदे कर्तृस्मरणमन्यथासिद्धं वेदकरणकालस्यातिदवीयस्त्वात् NyāyMañ. i. 217. 18.

अतिदशरथ (ati-daśaratha) *adj.* surpassing (king) Daśaratha अतिदिलीपमतिदशरथमङ्गीकृतं कर्म रामभद्रेण BālRā. 3. 70 (9)

अतिदह् (ati-dah-) I. P. (Ā.) to burn excessively, to scorch अग्निस्तें तनुवं माऽतिं धाक् TaiS. I. i. 8. 1; न मय्यग्निं चेष्युसेऽति मा धक्ष्यति TaiS. V. v. 2. 3; V. v. 2. 4; अग्निर्मातिधक्ष्यतीत्यबिभेत् (पृथिवी) KāṭhS. 8. 2; स (अग्निः) इमाः सर्वा नदीरतिददाह S'atBr. I. iv. 1. 14; VII. i. 1. 9; मासानतिदंहीः । मासानतिहाय दाः Nir. 1. 7 (33. 7); एष चापि रणे (v. l. चाति रणे) भीष्मो दहते वै महाचमूम् MahāBhā. vi. 108. 41 [pw]

अतिदहन (ati-dahana) *m.* name of an attendant of Kārttikeya परिघं वटकं भीमं हाहातिदहनौ तथा । प्रददावंशुमान् पञ्च प्रमथान् षण्मुखाय हि VāmaP. 57. 70.

अतिदहनात्मक (atidahanātma-ka) *adj.* having intense burning power पुत्रिकाब्रवीत् । तात अतिदहनात्मकोऽयम् । नाहमेनमभिलषामि Pañcā. 215. 3.

अतिदह्यमान (ati-dahyámāna) *adj.* [*f.* -ā] being excessively burnt तं पृथिव्यब्रवीन्न मय्यग्निं चेष्युसेऽति मा धक्ष्यति सा त्वातिदह्यमाना वि धविष्ये TaiS. V. v. 2. 3; विरिच्यमानोऽप्यतिरिच्यमानो (v. l. अतिदह्यमानो) विद्वान्कविः सुकृतं मे दधाति MahāBhā. v. 36. 9.

अतिदा (ati-dā-) III. P. **i** to give excessively, to surpass others as a donor अधु प्लायोगिरति दासदन्यानासङ्गः ṚV. viii. 1. 33; कल्पद्रुमान्परिहसन्त इवेह सन्तः संकल्पितैरतिददत्यकदर्थितं यत् Subhāṣi. 274; **ii** to offer (rice-balls as *piṇḍa*) bypassing (the living one) न जीवन्तमतिदद्यात् MānS'S. 9. 13; कुतः न जीवन्तमतिददातीति श्रुतेरिति । अतिददाति अतिक्रम्य ददाति Vīra-Mi.(Saṁskāra.) 920. 8.

अतिदाक्षिणात्य (ati-dākṣiṇātya) *adj.* surpassing the southern king ग्रैवेयकी प्राक्षित दीप्रकौक्षेयकः स गर्वादतिदाक्षिणात्यः DvyāśraKā. 16. 10 (comm. दक्षिणस्यां दिशि भवं रावणमतिक्रान्तः)

अतिदाक्षिण्य (ati-dākṣiṇya) *n.* excessive politeness राजन्, अलमतिदाक्षिण्येन KundaMā. 5. 11 (12)

अतिदाक्षिण्यतस् (atidākṣiṇya-tas) *adv.* out of excessive politeness अतिदाक्षिण्यतोऽथ सः ।... सहानेन गतो वनम् PārśvC. 1. 315.

अतिदाक्षिण्ययुक्त (atidākṣiṇya-yukta) *adj.* who is endowed with extreme politeness अतिदाक्षिण्ययुक्तानाम् ... दूरतो यान्ति सम्पदः BhojaPra. 3. 9.

अतिदातृ (ati-dātṛ) *adj.* excessively generous, exceedingly liberal अत्यार्यमतिदातारम् ... श्रीर्भयान्नोपसर्पति MahāBhā. v. 39. 50; SūktiRa. 167. 2; Subhāṣi. 2646; नैवान्यमतिदातारं शक्नोमि च निरीक्षितुम् VarāP. 165. 8.

अतिदातृता (atidātṛ-tā) *f.* great generosity अतिदातृतामतिकदर्यतां च न प्रकटीकरोति जलदस्तपात्यये PṛthvīVi. 9. 18.

अतिदात्र (ati-dātra) *adj.* surpassing a sickle, more curved than a sickle अतिदात्रदंष्ट्रैरतिपोत्रवक्त्रैः पिशिताशनैः...नृपश्चुकोप DvyāśraKā. 12. 48.

अतिदान (ati-dāna) *n.* **i** superior gift, excellent gift (surpassing all

other gifts) त्रीण्याहुरतिदानानि गाव: पृथ्वी सरस्वती SamhiUBr. = VasiSm. 29. 20 = AgniP. 63. 19 = BṛNāraP. 13. 143 = BhaviP. 831A. 24 (iv. 151. 18) = Aparā. 1151. 16 (*on* 3. 288) = SūktiRa. 18. 1; सर्वेषामेव दानानां (v. l. अतिदानानां) तिलदानं परं स्मृतम् MahāBhā. xiii. 65. 13; यस्मिन् जयश्रीर्नियता द्विपेन्द्रे देय: स नामेत्यतिदानशौर्यम् JātaMā. 54. 4 (9. 14); सत्यार्जवक्षान्त्यतिदानशूरास्ते संभवन्त्युत्तमभोगभूमौ VarāṅgaC. 7. 25; भूमिदानं महादानमतिदानं प्रकीर्तितम् ··· अपवर्गफलप्रदम् BṛNāraP. 11. 134; 13. 142; NaraP. 30. 42; अथ भूमिदानाख्यमतिदानमारभ्यते CaturCin. i. 494. 21; i. 397. 3; **ii** giving excessively, giving immoderately, excessive charity नातिसामं नातिदानं न च स्त्रीषु दण्ड: (कर्तव्य:) Bārhas. 1. 52; अतिदानाद्बलिर्बद्ध: CāṇaNiDa. 3. 12 = S'ārṅgaPa. 1445 = MādhavāĀ. 26 = VedāPañ.(S'i.) 22. 16; अतिदानेन धर्मोऽर्थं बाधते JayaMa. 27. 4 (*on* 1. 2); गोपानामतिदानैश्च ··· घृताम्बुभि: । सिक्ता नरास्तथा नार्य: ĀdiP. 15. 12; राजन्नस्यातिदानस्य न पश्याम्युचितं फलम् DarpaDa. 6. 35; तत: श्रुत्वातिदानं तत्सौवर्णपुरुषोद्भवम् । नरसिंहनृप: ··· अगात् KathāSaSāg. vii. 4. 141; बलिरेक एव···येनातिदानविततद्रविणावशेषशुद्धि: कृता स्वतनुबन्धसमर्पणेन DaśāvaC. 5. 219; दानं दरिद्रभरणं च । अतिदानम् (चाटुप्रवाहोऽयम्) SaduktiKa. 186. 20; परस्तादतिदानानां विधिर्विधुतपातक: CaturCin. i. 4. 16; कुमारोऽतिदानान्निषिद्ध: KathāK. 118. 1; अतिदानाद्धत: कर्ण: SūktiRa. 163. 52; अतिदानात्सुखासङ्गाद्धनवृद्धिर्न जायते PuruṣaPa. 183. 2; अतिदानेन दारिद्र्यम् S'ukraNi. 3. 220; 5. 37; **iii** overdose (of salt to an elephant) अतिदानेऽपि राजेन्द्र रक्तपित्तं प्रकुप्यति Hastyāyur. 675. 28 (4. 23); 676. 9 (4. 23)

अतिदानतस् (atidāna–tas) *adv.* due to excessive disposal अन्नस्य पात्रपतितस्याल्पस्याप्यतिदानत: । अक्षयेणाक्षीणमहानसर्द्धयश्च तेऽभवन् TriṣaS'aPuC. i. 1. 871.

अतिदानभाज् (atidāna–bhāj) *adj.* possessing the (quality of) great liberality अर्थिभ्रंशबहूभवत्फलभरव्याजेन कुब्जायित: सत्यस्मिन्नतिदानभाजि कथमप्यास्तां स कल्पद्रुम: NaiṣC. 12. 67 = SaduktiKa. 199. 5; Subhāṣi. 2517.

अतिदानरस (atidāna–rasa) *m.* delight in great liberality अतिदानरसादसावयष्ट क्रतुना विश्वजिता जिताखिलारि: RāmC. 8. 44.

अतिदानशील (atidāna–śila) *adj.* given to great liberality पुरूरवास्त्वतिदानशील: ViṣṇuP. iv. 6. 35.

अतिदान्त (ati–dānta) *m.* **1** name of a prince विव्याध मार्गणै: । अनिर्दान्त(v. l. अतिदान्त)स्तथाष्टाभिर्बृहद्दुर्गश्च पञ्चभि: HariVaṁ. 87. 55; **2** name of a son of Bhadika तस्य पुत्रा बभूवुर्हि ··· सुदान्तश्चातिदान्तश्च BrahmP. 16. 6.

अतिदान्ता (ati–dāntā) *adj.* (*f.*) having complete control over the senses कान्तातिदान्ता शान्ता च सुशीला सर्वमङ्गला DevīBhāP. ix. 1. 23.

अतिदारिद्र्य (ati–dāridrya) *n.* excessive poverty शको नाम भविष्यश्च योऽतिदारिद्र्यहारक: SkandP. i(2). 40. 254; यौ गिरिजाशप्तौ ··· ततस्तावतिदारिद्र्यान्मातामहगृहे स्थितौ BṛKathāMañ. 12. 21.

अतिदारुण (ati–dāruṇa) *adj.* [*f.* –ā] **i** very fierce, very terrible, very cruel (men, demons, gods etc.) शृङ्गी ··· तिग्मवीर्योऽतिकोपन: (v. l. कोपोऽतिदारुण:) MahāBhā. i. 46. 2; हता: सव्यसाचिना ··· दानवा अतिदारुणा: HariVaṁ. 3. 75; जनार्दन: । मैत्रेयाखिलभूतानि भक्षयत्यतिदारुण: ViṣṇuP. i. 2. 63; v. 20. 61; त्वच: । पृथक्कुर्वन्ति वै याम्या: शरीरादतिदारुणा: MārkP. 14. 66; 118. 48; जनिष्यति हि पुत्रस्ते क्रूरकर्मातिदारुण: VāyuP. ii. 29. 74; कथमतिदारुणं तमहं विषमिवाप्रियकारिणं कामं सकामं कुर्याम् Kād. 180. 18; अतिदारुणो जनसंमर्दो वर्तते MālaMā. 10. 4; 9. 130; बालान्वयस्यानतिदारुण: ।··· पशुमारममारयत् BhāgP. iv. 13. 41; दूयते सततं तेन परमात्मातिदारुण: BrahmVaiP. i. 13. 32; स्वकार्यनिपुणै: स्वामिन् गीर्वाणैरतिदारुणै: । त्याजितोऽहम् SkandP. iv. 39. 21; अतिदारुणदीर्घदेहाभिर्महायोगिनीभिरापूर्यमाणपरिसरम् YaśasCam. i. 47. 1; महावीर्या दानवास्त्वतिदारुणा: BrahmP. 3. 85; 10. 40; निहतास्तत्र राक्षसाश्चातिदारुणा: PadmP. iv. 34. 43; कुम्भकर्णस्तु दुष्टात्मा···विचचारातिदारुण: AdhyāRā. vii. 1. 61; विप्राणां कुक्षिं भित्त्वातिदारुण: । वातापी निर्ययौ RāmāMañ. 115. 18; आदौ तावद् व्यापारस्था:···परविभवहरणनिरता भवन्त्यतिदारुणा: Subhāṣi. 2405; नभस्वन् ··· जगत्यामतिदारुणोऽसि YātrāPra. 4. 93; **ii** very fierce, very ferocious (animals) (पापा:) भक्ष्यन्ते ह्यतिदारुणै: श्वभि: शृगालै: PadmP. iv. 97. 11; **iii** very intense, very painful, very terrible (emotions, feelings) कृतकृत्योऽद्य सुग्रीवो वैरेऽस्मिन्नतिदारुणे Rāmā. iv. 23. 15; नरकेष्वतिदारुणम् । प्राप्नुवन्ति नरा दु:खम् ViṣṇuP. v. 23. 45; BrahmP. 196. 43; उत्पाद्य कामं क्रोधं च लोभं वाप्यतिदारुणम् DevīBhāP. iv. 5. 19; वैषयिकं सुखम् । आपातमात्रमधुरं परिणामेऽतिदारुणम् PariPar. 3. 267; 12. 298; वधबन्धपरिक्लेशं प्राप्नुवन्त्यतिदारुणम् Hastyāyur. 685. 26 (4. 26); **iv** very terrible, very disastrous (time) कालस्त्वयं मृत्युमयोऽतिदारुण: MahāBhā. viii. 29. 22; कालो ज्ञेयोऽतिदारुण: SūrySi. 11. 16; कालो भूत्वातिदारुण: BrahmP. 56. 42; कल्पान्त इव तत्रासील्लोकानामतिदारुण: GaṇeP. ii. 57. 22; मध्याह्नसमयो जज्ञे पान्थानामतिदारुण: PārśvC. 6. 1045; स्पर्शमोक्षौ भा(? भ)वेतां तन्मध्यकालोऽतिदारुण: SiddhāTaVi. 363. 4; **v** very dreadful, very fearful, very terrible (events etc.) युद्धमभूद्घोरं दशाहान्यतिदारुणम् MahāBhā. i. 2. 155; सप्ताहं भूमिकम्पनम् ।··· सधूमं ह्यतिदारुणम् MahāBhā. iii. 193. 22; निस्वन: । शस्त्राणां वानराणां च संबभूवातिदारुण: Rāmā. vi. 34. 13; तत्र खल्वतिदारुणं व्यसनं संवृत्तम् SvapnaVā. 1. 12 (21); पश्यध्वमतिदारुणान् महोत्पातान् ViṣṇuP. v. 37. 30; श्रुत्वा तं शापमतिदारुणम् MārkP. 16. 31; वज्रमयं वर्षं प्रावर्तदतिदारुणम् MatsyaP. 150. 202; वक्ष्यन्ते···कुष्ठादीनतिदारुणान् AṣṭāHṛ. i. 14. 20; तै: समारब्धं मायाकर्मातिदारुणम् PadmP.(Ra.) 7. 307; गुदरोगा भवन्त्यस्य पापरूपातिदारुणा: HārīS. ii. 1. 17; AṣṭāSaṁ. i. 162. 6 (1. 31); आकस्मिके वा संपन्ने विनिपातेऽतिदारुणे MahāvīC. App. B. 6. 12 (298. 3); अतिदारुणो हृदयमर्मोद्घात: UttaRāC. 6. 32 (1); अतिदारुणो दशाविपाक: संप्रति वयस्यस्य MālaMā. 9. 110; गतेऽतिभूमिं विरहेऽतिदारुणे RāmC. 5. 60; BṛKathāK. 150. 4; शमं नय···रोगान् प्रमेहांश्चातिदारुणान् AgniP. 31. 21; रोगग्रामो नृणां देहे सम्भवत्यतिदारुण: ViṣṇuDhaP. ii. 62. 15; तत्रातिदारुणं विघ्नं मुने समुपजायत BrahmP. 96. 14; (हयग्रीव:) तपश्चक्रेऽतिदारुणम् DevīBhāP. i. 5. 88; प्रविष्टा तामसी शक्तिस्तस्या देहेऽतिदारुणा DevīBhāP. i. 5. 79; तेन पापेन संजातं वेणुत्वमतिदारुणम् PadmP. iv. 73. 40; मया ··· स्वप्नो दृष्टोऽतिदारुण: RāmāMañ. 80. 12; दुर्ग्रहेषु विरुद्धेषु दशापाकेऽतिदारुणे DarpDa. 6. 22; विषयास्ते ··· परिणामेऽतिदारुणा: PariPar. 12. 298; जयापीडस्त्वसंमूढो व्यसनेऽप्यतिदारुणे RājTa.(Ka.) 4. 523; रम्यमापातमात्रे यत् परिणामेऽतिदारुणम् (मैथुनम्) YogS'ā. 2. 77; संसारे निसर्गेणातिदारुणे TriṣaS'aPuC. i. 1. 58; तदातिदारुणं युद्धं शीघ्रं भवति AdbhuSāg. 294. 16; PārśvC. 1. 712; गुरुगीर्भङ्गाद् व्रतभङ्गोऽतिदारुण: SamarāSaṁ. 4. 314; जायते महतामप्यतिदारुणा दशा Nalābhyu. 7. 37; अथवा किमेनमासुरीमतिदारुणां प्रकृतिमाश्रितमुपालभे KaṁVa. 3.2 (1); (भगीरथ:) तपश्चरिष्यन्नतिदारुणम् Gaṅgāva. 3. 54; पाणितले ··· अतिदारुणेन तेजसा च समालक्ष्यत तरलमिव साध्वसेन तद्गरलम् NīlaVi. 101. 8; **vi** very severe, very painful, extremely fierce (objects) अतिदारुणाम् ··· गदाम् ··· भीमो व्यवासृजत् MahāBhā. viii. 59. 24; यच्चातिदारुणम् ।··· तदक्षि तर्पणादेव लभेतोर्जाम् SuśruS. vi. 18. 17; पैनाकमस्त्रं कङ्कालं कापालमतिदारुणम् AhirbuS. 30. 26; कुम्भीपाकसुपाकौ च क्रकचश्चातिदारुण: S'ivaP. v. 8. 29 (415B. 4); प्रवृत्ता: संग्रामे नद्य: सद्योऽतिदारुणा: KalkiP. iii. 8. 33; रुद्रनारायणमयौ कोपाग्नी त्वतिदारुणौ Hastyāyur. 55. 18 (1. 8); (सूनु:) उष्णकिरणकिरणैरतिदारुणै: । सन्तापं चानुभवति TriṣaS'aPuC. i. 3. 501; अतिदारुणा न रजनीषु हैमनीष्वपि वातुमुद्यमभृतस्समीरणा: PṛthvīVi. 9. 20; जनेभ्य: ··· कर्णविषं तस्मिन्नश्रौषमतिदारुणम् PāṇḍaC. 7. 509; *n.* very dreadful event कष्टमिदमतिदारुणमापतितम् PañcT. 1. 171 (4) (178. 2) (*v. l.*)

अतिदारुणकर्मन् (atidāruṇa–karman) *adj.* performing excessively cruel acts अतिदारुणकर्माणश्चला दुर्ग्रहचेतस: । नारका: परिदुद्रुवु: PadmP.(Ra.) 123. 22; मुधा च तवैवमतिदारुणकर्मणो धर्म इति प्रसिद्धि: YaśasCam. ii. 64. 6.

अतिदारुणज्वर (atidāruṇa–jvara) *m.* excessively terrible fever वटिकां विबन्धयेत् । भक्षणाज्जयति···पाण्डुरोगमतिदारुणज्वरान् HārīS. iii. 8. 32.

अतिदारुणतर (atidāruṇa–tara) *adj.* much more intensively cruel इदमन्यदतिदारुणतरमुपस्थितम् KirātāVyā. 31.

अतिदारुणता (atidāruṇa–tā) *f.* excessive severity (of heat) अहो अतिदारुणता शरदातपस्य PriyDa. i. 4. 26.

अतिदारुणदशा (atidāruṇa–daśā) *f.* excessively dreadful state उदारचेतसामतिदारुणदशापाके···न···अन्त:करणमुत्सहते मदीयम् TilaMañ. 42. 17.

अतिदारुणम् (ati–dāruṇam) *adv.* very violently स रुरोदातिदारुणम् ViṣṇuP. i. 21. 38.

अतिदारुणशङ्का (atidāruṇa–śaṅkā) *f.* very dreadful suspicion अनयातिदारुणशङ्कामारोपितं चेत: ĀryāSaS'a. 467.

अतिदारुणाङ्ग (atidāruṇāṅga) *adj.* having a very dreadful body कर्मण्युपेतेऽभ्युदयं पुराणे सम्प्रेरके सत्यतिदारुणाङ्गे PadmP.(Ra.) 74. 115.

अतिदारुणावेग (atidāruṇāvega) *adj.* of very severe intensity हरिवाहन:···अतिदारुणावेगेनोद्वेगेन कथंचनाप्यशक्नुवन् गृहेऽवस्थातुम् TilaMañ. 181. 7.

अतिदार्ढ्य (ati–dārḍhya) *n.* excessive strength or firmness अतिदार्ढ्यं तस्य (पतत्रिण:) दृष्ट्वा ··· जघान GaṇeP. 98. 36 (2); देवादीनां च मिथ्याज्ञानाप्राप्तिरतिदार्ढ्येनाभिभवायोगात् TattvPrakā. 198A. 4 (*on* iii. 4. 36)

अतिदार्ढ्यार्थम् (atidārḍhyārtham) *adv.* in order to strengthen firmly उपसंहृतेऽतिदार्ढ्यार्थं प्रमाणान्तरमाह Upask. 217. 4 (*on* iv. 2. 11)

अतिदाश् (ati–dāś) I. P. to favour with too many gifts मघैर्मघोनो अति शूर दाशसि ṚV. viii. 24. 2.

अतिदास्यत् (ati–dāsyat) *adj.* going to favour with a superior gift

भगवान् ··· कृत्वा पुरन्दरश्रियं बलयेऽतिदास्यन् SātvaT. 2. 67.

अतिदाह (ati-dāhá) *m.* **A** excessive burning or inflammation इयं वा अग्नेरतिदाहादबिभेत् TaiS. V. ii. 5. 2; अस्य वरो ममैवातिदाहः AvantiKa. 177. 6; ज्वरातिदाहात्प्रचुराम्बुपानात् ··· प्रवृद्धं महोदरम् KalyāKā. 11. 133; बभूवातिदाहयुक्तो मर्तुकामोऽतितेजसा BrahmVaiP. iv. 22. 33; जातः प्रागतिदाहवेदनमहारम्भः स तस्या ज्वरः KaviKaṇṭhā. v. 1. 51; अतिदाहः ··· पैत्तिकज्वरलक्षणम् ĪśānŚiPa. i. 45. 30; दीपस्यापि स्फुरति नितरां शान्तिकालेऽतिदाहः RājTa.(Jo.) 1122; **B** burning more than necessary अतिदाहे ··· प्रायश्चित्तं विनिर्दिशेत् ParāSm. 9. 28.

अतिदिग्ध (ati-digdha) *adj.* excessively poisoned (arrow) न शर्म लेभे हृदये सिंह इवातिदिग्धविद्धः BuddhaC. 5. 1.

अतिदिलीप (ati-dilīpa) *adj.* surpassing (king) Dilīpa अतिदिलीपम् ··· अङ्गीकृतं कर्म रामभद्रेण BālRā. 3. 70 (79. 9)

अतिदिव् (ati-div) IV. P. to risk in gambling तद्वित्तं मातिदेवीर्मा जैषीः शकुने परम् MahāBhā. ii. 53. 9.

अतिदिव् (ati-div) *adj.* surpassing the sky or heaven अतिदिवम् KātanVr. *on* ii. 2. 27.

अतिदिवाविहार (ati-divāvihāra) *m.* excessive sexual intercourse by day-time किमयमतिदिवाविहारेण सुहृज्जन उत्कण्ठते PādaTā. 15. 24.

अतिदिव्यमाल्य (atidivya-mālya) *adj.* possessing a highly divine garland अतिदिव्यमाल्यगन्धः ··· भवति नरः स देवजुष्टः RugVi. 20. 18.

अतिदिश् (ati-diś-) VI. P. **A** to transfer, make over यामस्मै दक्षिणामानयेयुर्न ता इत्सद्योऽन्यस्माऽअतिदिशेद्यन्मेदं यश आगंस्तत्सद्योऽन्यस्माऽअतिदिशानि ŚatBr. XIV. i. 1. 32; **B i** to transfer features or extend rules to other things एवमित्युपस्थानादिजपान्तमतिदिश्यते ĀśvaŚS. I. v. 3. 23; अत्र पूर्वाधिकरणन्यायोऽतिदिश्यते ŚābaBh. 758. 15 (*on* iii. 2. 10); 1206. 14 (*on* iv. 1. 17); सामान्यस्यातिदेशोऽयं विशेषोऽत्रातिदिश्यते VākyaP. 2. 80; अनया दिशैत्येनेन क्षपणकन्यायोऽतिदिश्यते TātpaṬ.(U.) 79. 26 (*on* 2. 143); तदेव च कृतनिर्वचनं नामाक्षिपुरुषस्याप्यतिदिशति BrahmSūBh. (Śaṅ.) 65. 15 (*on* i. 1. 20); 274. 17 (*on* i. 4. 28); 287. 6 (*on* ii. 1. 3); 287. 9 (*on* ii. 1. 3); 305. 12 (*on* ii. 1. 12); 504. 11 (*on* ii. 4. 8); तस्यैतस्य चाक्षुषस्य पुरुषस्य तदेव रूपमतिदिश्यते ChāndoUBh. 52. 4 (*on* i. 7. 5); न हि शास्त्राण्यतिदिश्यन्ते ṬupṬ. 53. 7 (*on* v. 1. 13); वसिष्ठो दारवाणां तक्षणमुक्त्वा प्रकृत्यातिदिशति BālaKrī. i. 127. 6 (*on* 1. 181); अक्षिपुरुषस्यापि तदेव नामातिदिश्यते BrahmSūBh.(Bhā.) 29. 22 (*on* i. 1. 20); तेनाविपरीततया शब्दोऽतिदिश्यते NyāyMañ. ii. 178. 9; एतदेवेति – गोघातकप्रायश्चित्तं सर्वेषूपपातकेष्वतिदिशति ManuBh. ii. 406. 9 (*on* 11. 116); i. 183. 5 (*on* 2. 205); i. 312. 11 (*on* 3. 238); ii. 359. 6 (*on* 10. 98); ii. 427. 5 (*on* 11. 180); ह्रस्वाक्षरस्य पादान्ते वर्तमानस्य गुरुसंज्ञातिदिश्यते MṛtaSaṁ. 5. 6 (*on* 1. 10); यथासंख्यमनुदेशः सामान्यमतिदिश्यते AgniP. 346. 21; एतदेव ··· द्विचन्द्रादिविषयेष्वतिदिशति Kāśi. ii. 76. 6 (*on* 5(3). 213; तस्मान्मा भूच्छास्त्रस्य क्रमस्य चानर्थक्यमित्यनुक्तमतिदिश्यते JayaMa. 104. 15 (*on* 2. 2); उक्तयुक्तिं हृदि निधायातिदिशति NyāyVārPari. 118. 4; इमां दीर्घत्वोत्पत्तिमतिदिशति Kiraṇā. 216. 15; 309. 17; वनन्यायमेव पङ्क्तावतिदिशति NyāyRa. 637. 17 (*on* 5(14). 93); 746. 15 (*on* 6. 61); तथा प्राणा इति प्रमाणमप्यतिदिश्यते ŚrīBh. 547. 13 (*on* ii. 4. 1); यत्र साध्यधर्मोऽन्यत्रातिदिश्यते स दृष्टान्तः TārkiRa. 268. 14; अन्याश्च मातरस्तद्वदिति तत्क्षणादेव शुद्धा इत्यतिदिश्यते न तु स्नानमप्यतिदिश्यते HārLa. 20. 7; तत्र मुक्तप्रभेदं योग्येष्वतिदिशति TattvSaṁkhyā. 43. 3; अनेन च वचनेन शावाशौचवत्तत्कर्माणि जननेऽप्यतिदिश्यन्ते Aparā. 896. 30 (*on* 3. 19); 1063. 11 (*on* 3. 251); आकालमभोजनं कर्तव्यमित्येके आचार्या अतिदिशन्ति SmṛtiCan. vi. 102. 3; किमग्निहोत्रशब्दो नित्याग्निहोत्रधर्मानिहातिदिशेत् VedāntKa. 8. 15 (*on* i. 1. 1); 87. 5 (*on* i. 1. 4); अभावस्य प्रमाणान्तरविषयत्वेऽप्युक्तदूषणमतिदिशति ŚrutaPra. iB. 9. 11 (*on* i. 1. 1); नान्दीमुखे ··· वृद्धिश्राद्धधर्मा अतिदिश्यन्ते CaturCin. iii(1). 144. 5; एतामेव सन्निधिव्यवधिव्यवस्थामनारभ्याधीताङ्गवाक्येष्वतिदिशति NyāySu.(So.) 24. 17 (*on* i. 2. 7); 40. 8 (*on* i. 2. 7); वाजिने ··· पयोविध्यन्तोऽतिदिश्यते NyāyMāVi. 7. 17 (*on* i. 1. 1); महावाक्यार्थानुपपत्तिमभिधायावान्तरवाक्येऽपि तामतिदिशति NyāySu(Ja.) 104B. 2 (*on* i. 1. 2); 273B. 12 (*on* ii. 1. 2); 438B. 10 (*on* ii. 3. 14); उक्तन्यायमन्यत्राप्यतिदिशति Subodhi. 7. 19 (*on* 2. 10); इदानीं ब्रह्मण्येवान्वेतीति वदन्नाकाशन्यायमतिदिशति VedāntKau. 38. 13 (*on* i. 1. 24); द्वितीयादि(? षु) प्रथमोक्तमेवातिदिश्यते AṇuBh. 36. 2 (*on* i. 1. 14); 43. 7 (*on* i. 1. 22); 158. 5 (*on* ii. 4. 1); 253. 7 (*on* iii. 3. 46); अपादानादपि धर्मोत्पत्तिमतिदिशति Upask. 264. 4 (*on* vi. 1. 12); अनेन तु स्नेहादिवृत्तिरप्यतिदिश्यत इत्यपुनरुक्तिः ManvaMu. 62. 11 (*on* 2. 133); तैरेव न्यायैस्तात्पर्यावधारणमित्यतिदेशः ŚivārkaMaDī. i. 60. 29 (*on* i. 1. 1); गोदानफलमन्यत्राप्यतिदिशति VīraMi. 280. 21 (*on* 1. 209); 305. 3 (*on* 1. 243); 634. 20 (*on* 2. 154); तदिदं होमद्वयं विकृतावतिदिश्यते न वा BhāṭṭDī. iii. 132. 21 (*on* ix. 2. 17); विकृतौ च कथंभावाकाङ्क्षायामुपकारसंपादनमतिदिश्यत इत्युक्तम् MīmāNyāPra. 217. 35; 219. 14–15; [(दिशिः) अतेरन्यधर्मप्राप्तौ] KośaKaTa. 2. 920; तत्र सामान्यं पूर्वपक्षं मन्त्रनामधेययोरप्यतिदिशति MayūMāli. 6. 22–23 (*on* i. 2. 1); ज्ञानादिगुणेष्वप्येतदतिदिशति Bhāsk. i. 100. 7 (*on* i. 2. 6); i. 137. 14 (*on* i. 3. 6); ii. 35. 12 (*on* ii. 2. 1); **B ii** to apply by transfer स्थानिकार्यमादेशेऽतिदिश्यते MahāBh. i. 133. 5 (*on* i. 1. 56); i. 227. 9–10 (*on* i. 2. 51) न ह्यर्था अतिदिश्यन्ते । लौकिकत्वात्तेषाम् Nyās. i. 343. 21 (*on* ii. 1. 10); परस्मैपदं चातिदिश्यते KātanVr. iii. 2. 23; विधिग्रहणाद्विशेषोऽप्यतिदिश्यते PariVr.(Sī.) 65. 1; 71. 18; 173. 21; क्रुशे रूपमतिदिश्यते Prasā. i. 168. 15; i. 809. 11; ते तथैव विकारेऽतिदिश्यन्ते SiddhāKau. 268B. 11; 322A. 2; तच्चोदात्तऋकारविशिष्टमतिदिश्यते LaŚabdeŚe. i. 261. 5; ii. 80. 9; ii. 411. 2; **B iii** to convey, denote, imply स्पर्शनम् इति संज्ञात्वेन कर्मातिदिशति JayaMa. 97. 24 (*on* 2. 2); **B iv** to order, to direct न्यक्कृतैश्वर्यपर्याप्त्यस्तमर्यादचेतसाम् । विनयाय तथाप्येषां दिक्षु दण्डोऽतिदिश्यताम् YaśasCam. i. 392. 4; **B v** to teach or instruct well दिव्यालयस्य निर्माणप्रकारो विश्वकर्मणे । देवादेशाद्विरिञ्चेन स्फुटमेवात्यदिश्यत JayāS. 1. 126 (Add. verses); **B vi** to apply by transfer (i. e. to substitute) अत्र स्त्रीशब्दस्य पुंशब्दोऽतिदिश्यते Prasā. i. 528. 19.

अतिदिश् (ati-diś) *f.* transference (by analogy) अनयैवातिदिशा मध्यमस्य पणत्रयम् ··· दातव्यम् ManvaMu. 269. 28 (*on* 7. 126)

अतिदिशत् (ati-diśat) *adj.* using the rule of transference (to other cases) तथा स्वयम् 'एतेन क्रमाक्रमादयोऽपी'ति अतिदिशन् वक्ष्यति HetuBiṬ. 147. 28; 70. 8; 118. 2; एतमेव न्यायं निमित्तनैमित्तिकभावेऽतिदिशंस्तस्यापि द्विप्रकारतां दर्शयति Loc. 42. 24 (*on* 1. 13); दोषवशादिति दृष्टान्ते शिक्षितमर्थद्वयं दार्ष्टान्तिकेऽतिदिशन् शङ्काद्वयं चार्थान्निराकरोति ŚrutaPra. iA. 80. 11 (*on* i. 1. 1); iA. 215. 24 (*on* i. 1. 1); मुख्यावभृथशब्दो यस्तत्सादृश्यविवक्षया । धर्मानतिदिशन्कर्मे विधत्ते धर्मसंयुतम् NyāyMāVi. 383. 17 (*on* vii. 3. 4); तत्र दारककर्मतुल्यतामतिदिशन्नाह Upask. 228. 4 (*on* v. 1. 12); 107. 5 (ii. 2. 3); 202. 8 (*on* iv. 1. 9); गोवधप्रायश्चित्तमतिदिशन्नेव प्रायश्चित्तान्तरमुपपातकान्तरेष्वाह VīraMi. 998. 20 (*on* 3. 265); देशक्रमेऽप्येनं न्यायमतिदिशंस्तदभिधायकं द्वितीयं श्लोकं व्याचष्टे Bhāsk. ii. 22. 17 (*on* ii. 1. 7); अग्रेऽपि अतिदिशन्नाह । एवं च हीनमिति BālamBha. ii. 122. 27 (*on* 2. 113)

अतिदिश्य (atidiś-ya) *ger.* **i** having pointed out इत्यर्चितः स भगवानतिदिश्यात्मनः पदम् । बालस्य पश्यतो धाम स्वमगाद्गरुडध्वजः BhāgP. iv. 9. 26; **ii** having used the rule of transference ब्रह्मवधिनः प्रायश्चित्तमुपदिश्य तत्संसर्गिणि तदतिदिश्य तदपवादकं प्रथमं सूत्रम् DaṇḍaVi. 245. 14; 55. 7; श्रीक्रमः प्रकृतिमेतः। अतिदिश्य तमन्यत्र विशेषस्तु निरूप्यते NityoNi. 2. 4; एवं तद्धर्मानतिदिश्य प्रकृष्टसाधारणधर्ममाह BālamBha. iii. 189. 14 (*on* 3. 324)

अतिदिश्यमान (ati-diśyamāna) *adj.* being prescribed by the rule of transference सामान्ये ह्यतिदिश्यमाने विशेषो नातिदिष्टो भवति MahāBh. i. 134. 17 (*on* i. 1. 56); निकायित्वात् पूर्वाग्निशुद्धधर्मेष्वत्रातिदिश्यमानेषु TantrVā. 560. 17 (*on* ii. 2. 27); ते इमे वस्तुधर्मा अवस्तुन्यतिदिश्यमाना असूत्रपटकारित्वं सूचयन्ति Śarka. 74. 10; वत्करणमतिदिश्यमानविरुद्धस्वाश्रयस्यापि लाभार्थम् LaŚabdeŚe. i. 337. 6.

अतिदिश्यमानकार्य (atidiśyamāna-kārya) *n.* (grammatical) operation being prescribed by the rule of transference अतिदिश्यमानकार्याणामुपदेशदेश एव देश इत्यभियुक्ताः LaŚabdeŚe. i. 74. 9; i. 250. 5; ii. 703. 1.

अतिदिश्यमानत्व (atidiśyamāna-tva) *n.* the state of being prescribed by the rule of transference पूर्वगुरुणैव समोत्तमगुरुस्वीकारायातिदिश्यमानत्वाद्युक्तमेतत् TattvPrakā. 178B. 12 (*on* iii. 3. 47)

अतिदिश्यमानधर्म (atidiśyamāna-dharma) *m.* quality obtained by the extension of a rule अतिदिश्यमानधर्मविरुद्धस्वाश्रयकार्याभावात् LaŚabdeŚe. i. 76. 9; i. 77. 22; i. 117. 6.

अतिदिश्यमानपदार्थ (atidiśyamāna-padārtha) *m.* thing obtained by the rule of transference अतिदिश्यमानपदार्थविषये द्वयोरप्यतिदेशयोः सामान्यविषयत्वम् BhāṭṭDī. iii. 224. 1 (*on* x. 2. 14)

अतिदिश्यमानरूप (atidiśyamāna-rūpa) *n.* form obtained by the rule of transference तथाप्यतिदिश्यमानरूपविरुद्धस्य स्वाश्रयस्यातिदेशविषयेऽप्रवृत्तेर्न दोषः LaŚabdeŚe. ii. 92. 10.

अतिदिष्ट (ati-diṣṭa) *adj.* **i** enjoined or known by the rule of transference, applied by analogy अतिदिष्टानां स्तोमपृष्ठसंस्थान्यत्वादनन्यभावः ĀśvaŚS. II. iii. 1. 12; सामान्ये ह्यतिदिश्यमाने विशेषो नातिदिष्टो भवति MahāBh. i. 134. 17 (*on* i. 1. 56); किमर्थं तर्हि परैस्तत्राभेदप्रतिपादनपूर्वकं वाक्ये तदतिदिष्टम् TātpaṬ.(U.) 373. 17 (*on* 5 (6). 111); पुण्यस्याप्यश्लेषविनाशयोरघन्यायोऽतिदिष्टः

BrahmSūBh.(S'an.) 792. 1 (*on* iv. 1. 16); अत्र भिक्षुणापोहपक्षे जातिपक्षतुल्यत्वमतिदिष्टम् S'arka. 74. 7; ते चातिदिष्टा अर्थवादाः फलं समर्पयन्ति PrakaPañ. 6. 9; भाष्यकारेण नियमोऽप्यतिदिष्ट इति मन्वानश्चोदयति TātpaṬ.(Vā.) 328. 6 (*on* i. 2. 2); इति पूर्वपक्षोऽतिदिष्टः Kāśi. i. 25. 22 (*on* 1. 55); कामावस्थाः स्त्रीषूपदिष्टाः पुरुषेष्वतिदिष्टाः AbhinBhā. iii. 204. 15 (*on* 22. 197); यदा तु विकृतावतिदिष्टा धर्म्यास्तदा कथमत्रैते प्रयोक्तव्याः NyāyRaMā. 173. 7; न ह्यतिदिष्टानामर्थवशेन क्रमान्तरं विकृतिषु संभवति TantrRa. 233. 15; श्रोत्रसंस्कारदूषणं शब्दसंस्कारेऽतिदिष्टम् NyāyRa. 752. 9 (*on* 6. 83); सिद्धेऽतिदेशेऽधुनातिदिष्टानां पदार्थानाम् ··· ऊहश्चिन्त्यते S'āstrDī. 572. 10 (*on* ix. 1. 1); विशेषातिदिष्टः प्रकृतं न बाधते SaraKaṇṭhā.(Gr.) i. 2. 71; बृहस्पत्यादिनाप्यनुपदिष्टधर्मकेष्वेवान्वाहितादिष्वतिदिष्टम् SmṛtiCan. iv. 425. 19; ब्रह्महव्रतमतिदिष्टमपि द्वादशाब्दिकमेव सुरापः कुर्यात् Aparā. 1072. 14 (*on* 3. 254); दोषपरिकल्पितमित्यनेन दोषवशादित्यादिनोक्तमतिदिष्टम् S'rutaPra. iA. 80. 19 (*on* i. 1. 1); तदीयद्रव्येषु क्षीरादिषु अतिदिष्टेषु तेषां मध्ये ··· नैवोपवासबाधकत्वम् CaturCin. iii(2). 165. 19; आभिचारिकेष्टौ प्रथम आग्नावैष्णवे तृतीयस्याग्नीषोमीयस्य विध्यन्तोऽतिदिष्टः NyāyMāVi. 7. 21 (*on* i. 1. 1); प्रकृत्युपदिष्टमन्त्रसामसंस्कारकर्मणां विकृतावतिदिष्टानां प्रकृतिविकृत्योर्द्रव्यदेवताभेदे सति···ऊहो दर्शितः VivaPraSaṁ. 139. 3; टित्कितोरागमयोराद्यन्तावयवत्वमतिदिष्टम् PariVṛ.(Sī.) 10. 22; नीवारेषु च व्रीहिरूपद्वाराभावेनातिदिष्टोऽपि बाध्येत Nyāyāmṛ. 617B. 6; नीवारेषु च व्रीहित्वाभावेनातिदिष्टोऽपि बाध्येत AdvaiSi. 864. 10; अतिदिष्टानां मन्त्रसामसंस्काराणाम् ···अन्यथाभावरूप ऊहो नवमे चिन्तितः S'ivārkaMaDī. i. 75. 6 (*on* i. 1. 1); i. 358. 9 (*on* i. 2. 14); ii. 393. 98 (*on* iii. 4. 21); ii. 407. 21 (*on* iii. 4. 42); न तौ पशौ करोतीतिवदतिदिष्टस्य सापिण्ड्यस्य निषेधेन वर्जनासंभवात् VīraMi.(Saṁskāra.) 692. 25; अधुना अतिदिष्टानां पदार्थानाम् ···बाधो निरूप्यते BhāṭṭDī. iii. 185. 5 (*on* x. 1. 1); परशक्तिज्ञानजन्यबोधरूपोपकारस्य प्रकृतौ क्लृप्तस्य सौर्यापूर्वसाधनसूर्यदेवतोद्देशेनातिदिष्टस्याग्निपदेनासंभवात् LaCandr. 702. 43; तथा सत्यतिदिष्टचमसबाधप्रसङ्गात् MayūMāli. 558. 4 (*on* viii. 1. 14); अतिदिष्टे तद्वान्चिशब्दप्रवृत्तिरत्र पक्षे इति बोध्यम् LaS'abdeS'e. ii. 92. 7; ‖ indicated पन्था अयं तेऽद्य मया निसृष्टः (v. l. अतिदिष्टः) MahāBhā. iii. 133. 2.

अतिदिष्टगुरुभाव (atidiṣṭa-gurubhāva) *adj.* to whom parenthood is applied by the rule of transference (analogically) अतिदिष्टगुरुभावानां मातुलपितृव्यादीनां या भार्यास्तद्गमन इदं प्रायश्चित्तम् ManuBh. ii. 403. 1 (*on* 11. 105)

अतिदिष्टत्व (atidiṣṭa-tva) *n.* the state or nature of being obtained by the rule of transference तदुत्फुल्लकविजृम्भितकाभ्यां तु वृषमेव वडवापि ताभ्यामेवाश्वमित्यर्थोक्तम् । पूर्वमतिदिष्टत्वात् JayaMa. 137. 23 (*on* 2. 6); यदप्युच्यते उपदिष्टस्याप्युपकारस्यान्यदीयस्यान्यत्रातिदेशादतिदिष्टत्वमप्यस्ति तेनापदेशातिदेशयोरेकत्रैव युगपत्सम्भवात् NyāyRaMā. 177. 6; यत्तु 'मातुः सपत्नीं भगिनीम्' इत्यादिना गुरुतल्पव्रतमतिदिष्टत्वात् पादोनमुक्तं तदसवर्णगुरुतल्पगमनविषयम् Aparā. 1084. 18 (*on* 3. 260); 1105. 16 (*on* 3. 266)

अतिदिष्टधर्म (atidiṣṭa-dharma) *m.* procedure or duty etc. obtained by the rule of transference सुयज्ञोऽप्युपदिष्टधर्माभ्यां सहातिदिष्टधर्मानाह SmṛtiCan. v. 319. 5; याचितकेऽप्यतिदिष्टधर्मवर्गान्तर्गतत्वेन प्राप्तमप्यवश्यानुष्ठेयं न भवतीत्याह बृहस्पतिः SmṛtiCan. iv. 429. 6.

अतिदिष्टपदार्थ (atidiṣṭa-padārtha) *m.* object (rite, *mantra* etc.) known or obtained by the rule of transference अतिदिष्टपदार्थस्य रूपान्तरमूहनम् NyāyMāVi. 479. 4 (*on* x. 0. 0); मन्त्रसामसंस्कारेष्वतिदिष्टपदार्थेषु यत्रास्त्यूहः यत्र च नास्ति तदुभयमत्र विचार्यम् NyāyMāVi. 418. 5 (*on* ix. 0. 0); यथातिदिष्टपदार्थैः प्रथमं पूरितेऽपि वैकृतकथंभावे पश्चाद्विकृत्याम्नातपदार्थस्यापि तत्रानुप्रवेशः कल्प्यते तद्वत् MayūMāli. 302. 18 (*on* iii. 6. 6)

अतिदिष्टपदार्थधर्मत्व (atidiṣṭapadārthadharma-tva) *n.* the state of being related to the object known by the rule of transference ऊहस्यातिदिष्टपदार्थधर्मत्वेनातिदेशप्रत्यासन्नत्वात् तदुत्तरं निरूपणे कृत एवावसरः BhāṭṭDī. iii. 187. 19 (*on* x. 1. 1)

अतिदिष्टपदार्थप्रयोग (atidiṣṭapadārtha-prayoga) *m.* use of a thing known by the rule of transference ततोऽतिदिष्टपदार्थप्रयोगविकारात्मकोहसिद्ध्यर्थं नवमः MayūMāli. 522. 11 (*on* vii. 1. 1)

अतिदिष्टपदार्थबाध (atidiṣṭapadārtha-bādha) *m.* negation of a thing obtained by the rule of transference ततोऽतिदिष्टपदार्थबाधसिद्ध्यर्थं दशमः MayūMāli. 522. 12 (*on* vii. 1. 1)

अतिदिष्टपदार्थविषय (atidiṣṭapadārtha-viṣaya) *adj.* related to an object or attribute known by the rule of transference यदि यज्यर्थाः स्युः तदा सर्वे सर्वत्रोपदिश्यन्ते न त्वतिदेशः क्वाप्यस्ति । ततोऽतिदिष्टपदार्थविषय ऊहो नारभ्यते NyāyMāVi. 418. 18 (*on* ix. 1. 1)

अतिदिष्टपदार्थविषयता (atidiṣṭapadārthaviṣaya-tā) *f.* the state of being related to the thing obtained by the rule of transference अतिदिष्टपदार्थविषयतया तत्सापेक्ष ऊहः···चिन्त्यते MayūMāli. 572. 2 (*on* ix. 1. 1)

अतिदिष्टपदार्थेयत्ता (atidiṣṭapadārtheyattā) *f.* fixed measure of things obtained by the rule of transference उपदिष्टातिदिष्टपदार्थेयत्तावधारणाधीनं च प्रयोगेयत्तावधारणम् S'āstrDī. 793. 11 (*on* xi. 1. 1)

अतिदिष्टपाक्षिकव्रीहि (atidiṣṭa-pākṣikavrīhi) *m.* paddy optionally obtained by the rule of transference चोदकप्राप्तो व्रीहियवविकल्पो न बाध्यः। कुतः। प्रत्यक्षस्य व्रीहिवाक्यस्यातिदिष्टपाक्षिकव्रीह्यनुवादेन शुक्लगुणविधानार्थत्वे सति बाधमन्तरेणोपपन्नत्वात् NyāyMāVi. 598. 17 (*on* x. 7. 19)

अतिदिष्टप्रणयन (atidiṣṭa-praṇayana) *n* carrying (of waters) obtained by the rule of transference प्रणयनमात्रमाश्रित्य फलाय विधीयमानं गोदोहनं विकृतावतिदिष्टप्रणयनसद्भावात्तदाश्रितमुपदेशत एव प्रवर्तते MayūMāli. 558. 2 (*on* viii. 1. 14)

अतिदिष्टप्रयाज (atidiṣṭa-prayāja) *m.* fore-offering (*prayāja*) obtained by the rule of transference पश्चादतिदिष्टप्रयाजाद्याकरणेऽपि क्रतुवैगुण्यानापत्तिः BhāṭṭDī. iv. 134. 9 (*on* xi. 1. 2)

अतिदिष्टप्रातिपदिकत्व (atidiṣṭaprātipadika-tva) *n.* the nature of a *prātipadika* (base) obtained by the rule of transference प्रातिपदिकग्रहणे तु मुख्यप्रातिपदिकग्रहणार्थत्वादतिदिष्टप्रातिपदिकत्वस्य ह्रस्वस्याभावः PadMañ. *on* KāśiVṛ. *on* P. i. 2. 47.

अतिदिष्टप्रायश्चित्त (atidiṣṭa-prāyaścitta) *adj.* for whom atonement is obtained by the rule of transference तेनातिदिष्टप्रायश्चित्तोऽपतितत्वाद् द्विजातिकर्मभिर(? स्व)धिक्रियत एव Aparā. 1063. 18 (*on* 3. 251)

अतिदिष्टफल (atidiṣṭa-phala) *n.* fruit or result obtained by the rule of transference किमनुबन्धादिभिरतिदिष्टफलान्वयाच्च विद्याविधिः कल्प्यः, उत नेति S'rutaPra. ii. 518. 25 (*on* iii. 3. 44)

अतिदिष्टबहुव्रीहि (atidiṣṭa-bahuvrihi) *m.* possessive compound obtained by the rule of transference (i. e. secondary *bahuvrīhi*) अतिदिष्टबहुव्रीहौ सर्वनामत्वनिषेधो न PrakriKau. i. 960. 5; 'न बहुव्रीहौ' इत्यत्र पुनर्बहुव्रीहिग्रहणं मुख्यबहुव्रीहिलाभार्थम्। तेनातिदिष्टबहुव्रीहौ सर्वनामतास्त्येवेति प्राञ्चः SiddhāKau. 328A. 12.

अतिदिष्टबाध (atidiṣṭa-bādha) *m.* negation or cancellation of what is obtained by the rule of transference न च तत्रापि चोदकाद् द्वादशपरिमाणप्राप्तेः कथमेकनिवेश इति वाच्यम् । उपदिष्टेनातिदिष्टबाधात् MayūMāli. 498. 2 (*on* vi. 5. 8)

अतिदिष्टब्रह्मचर्य (atidiṣṭa-brahmacarya) *adj.* in which observance of celibacy is obtained by the rule of transference व्रतान्तरेषु कृच्छ्रचान्द्रायणादिष्वतिदिष्टब्रह्मचर्येषु स्कन्दने सत्येतदेव यागमात्रम् Mitā. 475. 22 (*on* 3. 280)

अतिदिष्टभत्व (atidiṣṭabha-tva) the state of being *bha* (middle base) obtained by the rule of transference अत एवेष्ठवद्भावेनातिदिष्टभत्वस्य वर्णाश्रयत्वमित्यादिव्यवहारः LaS'abdeS'e. i. 74. 14.

अतिदिष्टलिङ्ग (atidsṭa-liṅga) *n.* gender obtained by the rule of transference लुबन्तार्थेऽतिदिष्टलिङ्गस्य तद्विशेषणे विशेषणानामिति प्राप्तस्य निषेधेऽपि वस्तुतो विशेषस्य पुंस्त्वात्तदक्षतेः LaS'abdeS'e. ii. 253. 20.

अतिदिष्टविध्यन्त (atidiṣṭa-vidhyanta) *m.* auxiliary that is obtained by the rule of transference न चैवमतिदिष्टविध्यन्तग्रहणं क्वापि न स्यादिति वाच्यम् । आकाङ्क्षाबलाल्लिङ्गविशेषाच्च तदुपपत्तेः MayūMāli. 567. 16 (*on* viii. 3. 5)

अतिदिष्टविषय (atidiṣṭa-viṣaya) *adj.* having for its sphere that which is obtained by the rule of transference पूर्वन्यायेनात्राद्योपादाननियम इति सिद्धान्तसौकर्यायातिदिष्टविषयः पूर्वन्यायः। अयं तु विचार उपदिष्टविषय इति विषयभेदं दर्शयति MayūMāli. 720. 3 (*on* x. 5. 5)

अतिदिष्टव्रीहि (atidiṣṭa-vrīhi) *m.* rice obtained by the rule of transference तथा सत्यतिदिष्टव्रीहियवयोर्यत्कार्यं तदेवोपदिश्यमानशुक्लव्रीहीणां कार्यम् NyāyMāVi. 598. 20 (*on* x. 7. 19)

अतिदिष्टसाधारण्य (atidiṣṭa-sādhāraṇya) *n.* commonness in relation to that which is obtained by the rule of transference आहवनीयवाक्यगतजुहोतेरपि···ये विकृतिष्वामनहोमादय उपदिष्टा न त्वतिदिष्टास्तत्साधारण्यमेवाङ्गीकृतम्। तन्मात्रसाधारण्ये ह्यतिदिष्टसाधारण्य इव न विरम्य व्यापारप्रसक्तिरस्ति VidhiRa. 35 (187. 14)

अतिदिष्टसामन् (atidiṣṭa-sāman) *n.* *sāman* obtained by the rule of transference सा चेह विवृद्धिरुपदिष्टातिदिष्टसामभिरेव सिध्यति S'āstrDī. 704. 15 (*on* x. 4. 11); BhāṭṭDī. iii. 284. 19 (*on* x. 4. 11)

अतिदिष्टाजद्रव्य (atidiṣṭājadravya) *n.* object 'goat' obtained by

the rule of transference अतो द्रव्यपर्यन्तत्वावश्यंभावे श्वेतगुणकद्रव्यमात्रस्यैवोपदेशतोऽवगमादतिदिष्टाजद्रव्यनियमबाध इति पूर्वपक्षे MayūMāli. 676.7 (*on* x. 2.30)

अतिदिष्टाजबाध (atidiṣṭāja-bādha) *m.* negation or cancellation of the goat obtained by the rule of transference चोदकानुग्रहे वस्तुतो गोगतधानादिलक्षणगुणस्य श्रुतस्यासंपादनेन गुणोपदेशबलादेवातिदिष्टाजबाध: MayūMāli. 676.3 (*on* x. 2.29)

अतिदिष्टाश्रयण (atidiṣṭāśrayaṇa) *n.* resorting (to the parts) obtained by the rule of transference अत: फलान्तरेण तेषां विधित्वनिर्वाहादतिदिष्टाश्रयणेन गुणकामा न प्रवर्तन्त इति परिभाषानाश्रयणीया VidhiRa. 37 (192.15)

अतिदीक्षित (ati-dīkṣita) *adj.* who has taken a great vow तेन मार्गेण यातोऽसौ विपश्चिद्दृक्षचक्रवत् । अविद्याया: परीक्षार्थमामोक्षमतिदीक्षित: YogVā. vi(2). 129.26.

अतिदीन (ati-dīna) *adj.* [*f.* -ā] very miserable, very weak, very dejected, very much in distress, very poor गात्रेऽपि तोदविरतिर्मैलिनातिदीना वातार्तिपीडितनरस्य महामते स्यात् HārīS. iii. 7.4; स्खलितगतिरकस्मात् त्रस्तकर्णोऽतिदीन: ··· (गज:) भयकृत् BṛSaṁ. 94.12; VeṇīSaṁ. 5.48; यत्पीडातोऽतिदीना विदधति चलनं लोचनानां रमण्य: । तन्मन्यन्ते ··· सद्विलासं मनुष्या: SubhāRaSaṁ. 127; BrahmVaiP. iv. 43.6; DevīBhāP. iv. 12.49; अतिवृद्धे चातिदीने···अतिक्रुद्धेऽप्यसंतुष्टे षट्सु कन्या न दीयते PadmP. v. 49.98; AdhyāRā. iii. 7.66; पतच्छिर: स्थितमतिदीनं तेन ते दशामिमां किमिति मृगीव सेवसे KīcaVa. 5.15; एवं व्रतस्थितो भक्त्या सप्तक्षेत्र्यां धनं वपन् । दयया चातिदीनेषु महाश्रावक उच्यते YogŚā. 3.119; KumāPraPra. 76.25; देवातिदीनया मयायं भर्तृभिक्षायै धारितस्त्वत्पुरोऽञ्चल: PāṇḍaC. 9.10; अनुदिनमनुशैलं तामनालोक्य सीतां प्रतिदिनमतिदीनं वीक्ष्य रामं विरामम् SaduktiKa. 36.5; MahāN. 5.64; अरातिराश्यंशगतोऽतिदीन: (ग्रह:) JātaPā. 2.18; MātaLī. 9.11; KaṁVa. 6.5(4); तदुदन्तपरे मुखे सखीनामतिदीनामियमादधाति दृष्टिम् RasGaṅ. 105.15; BhāmiVi. 2.25; कण्ठीरवो य: परगन्धनागै: । अत्याहितादक्षिपथेऽतिदीनैरहो तृणान्यादयते दयालु: Raghunā. 3.40; Gaṅgāva 5.25; अतिदीनमर्हति न गाढबन्धनान्यवलम्ब्यमित्यहरदंशुकाञ्चलम् Acyutarā. 9.68.

अतिदीनकृतारावा (atidīna-kṛtārāvā) *adj.* (*f.*) uttering very pitiable sounds अतिदीनकृतारावां धूसरां वनरेणुना PadmP.(Ra.) 43.96.

अतिदीनगिर् (atidīna-gir) *adj.* with feeble speech अवोचत् प्रेक्षकानन्यान् निर्वेदादतिदीनगी: PrabhāC. 106.27.

अतिदीनचित्त (atidīna-citta) *adj.* with extremely distressed mind विकलेऽतिदीनचित्ते विषयाशामात्रधारिणि नितान्तम् ĀryāSaŚa. 21.

अतिदीनता (atidīna-tā) *f.* absolute humbleness अतिदीनतया सर्वे सुनुतिं कुरुतादरात् ŚivaP. ii(3). 24.39 (150A.16)

अतिदीनधी (atidīna-dhī) *adj.* with very humble mind इत्युक्त्वा नभगस्सोऽतिदीनधीस्तु कृताञ्जलि: । तुष्टाव तं महेशानम् ŚivaP. iii. 29.45 (330B.7)

अतिदीनम् (ati-dīnam) *adv.* very miserably, very dejectedly इति चिन्तयतस्तस्य बहुशस्तत्र नारद । अतिदीनं तरोर्मूले भानुरस्ताचलं गत: ŚivaP. ii(1). 18.8 (62B.6)

अतिदीनमनस् (atidīna-manas) *adj.* with very dejected mind अतिदीनमना: शनैरवादीदजहद्द्वद्दिकं स पद्मपाद: ŚaṅkaDigVi.(Mā.) 14.154.

अतिदीनमानसा (atidīna-mānasā) *adj.* (*f.*) with very dejected mind अथ तां करुणप्रलापिनीमुपयन्तीमतिदीनमानसाम् । ··· निजगाराजगर: क्षुधातुर: Nalābhyu. 7.58.

अतिदीनरयत्व (atidīnaraya-tva) *n.* the state of having a very poor speed अतिदीनरयत्वाच्च रोदस्योरन्यतरस्मिन्नपि विषये विहर्तुमसमर्थ: YaśasCam. ii. 180.3.

अतिदीनवक्त्रा (atidīna-vaktrā) *adj.* (*f.*) having an extremely dejected face एवं ब्रुवाणामतिदीनवक्त्राम्···परमेष्ठिपुत्र: ···तां (दितिम्) स सान्त्वयन्नाह BrahmP. 124.7.

अतिदीनवत् (atidīna-vat) *adv.* like an extremely humble person बभूव संपुटाञ्जलि: । पुलकाङ्कितसर्वाङ्ग: साश्रुनेत्रोऽतिदीनवत् BrahmVaiP. iv. 20.26.

अतिदीनवदना (atidīna-vadanā) *adj.* (*f.*) having a very pitiable or miserable face आलिङ्ग्य भरतं साध्वी राममाता यशस्विनी । कृशातिदीनवदना AdhyāRā. ii. 7.83.

अतिदीनवाच् (atidīna-vāc) *f.* very pitiable words तामातुराम् ··· इति ब्रुवाणामतिदीनवाचम् । हत्वासिना···रात्रिचरश्चचार RāmC. (App. 2) 39.8.

अतिदीनात्मन् (atidīnātman) *adj.* whose mind is greatly distressed विश्वामित्र: ··· अतिदीनात्मा निन्दन्क्षात्रबलं महत् DevīBhāP. iii. 17.23; कंस: ··· चिन्ताविष्टोऽतिदीनात्मा चिन्तयित्वैव तं पुन: DevīBhāP. iv. 23.53; विललापातिदीनात्मा पुत्रशोकेन रावण: AdhyāRā. vi. 9.59.

अतिदीनानन (atidīnānana) *adj.* whose face is very miserable तं (प्रेतम्) वृद्धतापस: । अतिदीनाननं कस्त्वमिति धैर्येण पृष्टवान् SkandP. iv. 54.22.

अतिदीनाश (atidīnāśa) *adj.* whose hopes have become very much frustrated (दक्ष उवाच) मया दुरुक्तविशिखै: प्रविद्ध: परमेश्वर: । अमरानतिदीनाशान् मदनुग्रहकारक: ŚivaP. ii(2). 42.40 (122B.2)

अतिदीनेश (atidīneśa) *adj.* who is lord of the very poor or distressed त्राहि माम् ··· दीनबन्धोऽतिदीनेश करुणासागर प्रभो BrahmVaiP. iv. 25.94.

अतिदीप् (ati-dīp-) IV. A. to shine exceedingly हनूमानंशुमानिव ··· । अत्यदीपि RāmC. 16.107; (मौक्तिकम्) सहजं चातिदीप्यते YuktiKa. 116.16; DvyāśraKā. 8.1.

अतिदीपन (ati-dīpana) *adj.* extremely stimulating (the digestive fire) अन्नव्यञ्जनसूपकम् । ··· अतिदीपनं पाचनं हितम् RasRaSa. 5.214; नृपपलाण्डुलक्षणम् ··· अतिदीपन: दाहकृत् BhojanKu. 61.18; *n.* extreme stimulation (of the digestive (fire)) एरण्डतैलम्···कुरुतेऽतिदीपनम् BhojanKu. 152.8; *m.* the plant *Nauclea cadamba* अतिदीपन: ··· कदम्बपर्यायक: AbhidhāMañ. 89.1.

अतिदीपित (ati-dīpita) *adj.* greatly set ablaze तस्य क्रोधात् समुद्भूतज्वालामालातिदीपितम् । ···त्रैलोक्यम् ViṣṇuP. i. 7.11; PadmP.(Ra.) 8.476.

अतिदीप्त (ati-dīpta) *adj.* [*f.* -ā] **i** very briiliant or very severe यशश्च तेजश्च तवापि दीप्तम् (v. l. तथातिदीप्तम्) MahāBhā. iii. 26.16; स तै: परिवृत: ··· । विबभावतिदीप्तौजा: MahāBhā. iii. 80.3; चक्रराजरथं तुङ्गम् । अपश्यन्नतिदीप्ताभि: शक्तिभि: परिवारितम् BrahmāṇḍP. iii. 25.54; उन्मार्गप्रवणवितर्कज्वरेणातिदीप्तेन बाध्यमानस्तत्प्रतिपक्षान् भावयेत् YogBh. 107.6 (*on* 2.33); (अदिति:) अतिदीप्ताङ्गीं दितिं दृष्ट्वा तु दु:खिता DevīBhāP. iv. 3.27; तस्यातिदीप्तसंविज्ज्वलने···भवति होम: ParamāSā. 76; स्वरूपेण पराबीजमतिदीप्तमनुसरेत MālinīT. 12.18; **ii** greatly stimulated बलक्षय: स्यात् । तथातिदीप्ताग्नेरग्निबलेन AṣṭāSaṁ. i. 137.18 (1.27); *m.* name of god Śiva उन्मादो मदनाकार: (v. l. उन्मादनोऽतिदीप्तश्च) MahāBhā. xiii. 17.68.

अतिदीप्ततर (atidīpta-tara) *adj.* **i** much more brilliant (नारद:) ददर्श तम् । अतिदीप्ततरं बालम् GaṇeP. i. 85.41; **ii** very greatly stimulated (स्नेहबस्त्या) अतिदीप्ततराग्निना । इन्द्रियाणां प्रसाद: Hastyāyur. 613.25 (4.5)

अतिदीप्ति (ati-dīpti) *f.* **i** extreme brilliance दुर्निरीक्ष्योऽतिदीप्त्या ··· विवस्वान् BṛSaṁ. 28.3; अतिदीप्त्या ··· सुतो धरित्र्या: ···पीडां कुरुते YogYā. 3.16; **ii** excessive stimulation तेषाम् (अग्न्यंशानाम्) सादातिदीप्तिभ्यां धातुवृद्धिक्षयोद्भव: AṣṭāHṛ. i. 11.34; **iii** white-blossomed *Vitex negundo* [PW]

अतिदीप्तिन् (atidīpt-in) *adj.* very lustrous अतिदीप्तिन: ··· असृजद्रुद्रान् LiṅgaP. i. 70.311.

अतिदीप्तिमत् (ati-dīptima(n)t) *adj.* very brilliant दिवश्च्युतैर्भूरतिदीप्तिमद्भिर्नक्तं ग्रहैर्द्यौरमलेव दीप्तै: MahāBhā. viii. 68.20; आजगाम महायोगी विमानस्थोऽतिदीप्तिमान् VarāP. 7.4; अग्निपात्रमादाय ··· अतिदीप्तिमत् PāraS. 7.49; ते संस्थाप्य चास्त्राण्यतिदीप्तिमन्ति । ··· ययु: BrahmP. 110.33.

अतिदीप्य (atidīpya) *m.* the plant *Plumbago rosea* कालो व्याल: कालमूलोऽतिदीप्य: RājNi. 86.20.

अतिदीप्यक (atidīpya-ka) *m.* the plant *Plumbago rosea* चित्रक: ··· अतिदीप्यक: KalpaK. 172.351.

अतिदीप्यमान (ati-dīpyamāna) *adj.* being greatly stimulated अतिदीप्यमानमदनव्यथया शूर्पणखया ··· अभ्यभाषि (राम:) Rāgh. 8.16.

अतिदीप्र (ati-dīpra) *adj.* very refulgent तपोग्निनातिदीप्रेण दग्ध्वा कर्ममहामलम् PariPar. 6.91.

अतिदीर्घ (áti-dīrgha) *adj.* [*f.* -ā] **1A** very tall अष्टौ विरूपानालभतेऽतिदीर्घं चातिह्रस्वं च VājaS. 30.22; (K.) 34.4; TaiBr. III. iv. 19.1; नातिदीर्घं नातिह्रस्वम् ··· कचित् कुर्यात् पुरोहितम् AVPari. 3(2).3; (कन्या) नातिह्रस्वा (v. l. नातिदीर्घा) न महती MahāBhā. i. 61.96; ii. 58.32; (ददर्श ··· राक्षसस्य चरान्) नातिदीर्घान्नातिह्रस्वकान् Rāmā. v. 3.31; CaraS. i. 21.3; गर्भजातस्य वक्ष्यामि क्षेत्राधिपस्वरूपकम् । नातिदीर्घ: कृश: AgniP. 133.1; अतिदीर्घा ··· चलन्मांसचया ··· विवर्ज्या ViṣṇuDhaP. ii. 9.14; HārīS. i. 5.9; अतिदीर्घमतिह्रस्वम् ··· शरीरेष्व(रम)प्रशस्तम् KāśyaS. 48B.6; CāndraVṛ. *on* iii. 2.82; अतिदीर्घा (कन्यका वर्जनीया) RatiRaha. 11.5; 1.14; चित्ररेखा प्रकीर्तिता । ···गौराङ्गी नातिदीर्घा PadmP. iv. 77.25; अतिदीर्घा यस्मिन्कुले तदत्युच्चम् SmṛtiCan. i. 204.6; अतिदीर्घा खर्वा वा (सा ज्ञेया कर्मणा कृत्या) ŚārṅgaP. 3106; 3119; खर्वातिदीर्घा (विवाहकर्मणि सदा त्याज्याबला) AnaṅgaRa.

8.4; 4.4; **1 B** very long (स्रुवः) नातिदीर्घो नातिह्रस्वः … स्यात् AVPari. 27(2).2; अतिदीर्घे चेत्तिर्यङ्ङ्यान्यापच्छिद्य KātyS'uS. 3.3; (धनंजयः) पृष्ठतो द्रौणिमभ्ययात् । नातिदीर्घमिवाध्वानम् MahāBhā. vii. 114.92; अतिदीर्घमतिह्रस्वम् … इति शस्त्रयन्त्रदोषाः SuśruS. i. 7.19; KāśyaS. 163A.32; वृत्तानुपूर्वे च न चातिदीर्घे जङ्घे … तदीये KumāSaṁ. 1.35 = Subhāṣi. 1567; नातिदीर्घं नातिह्रस्वम् … तन्नाम कुर्यात् ViṣṇuP. iii. 10.11; KāmSū. 3.4 (120.14); नातिदीर्घां वहन्तो ग्रीवाम् (शशाः स्युः) RatiRaha. 3.31; PauṣkS. 16.35; अतिदीर्घेण लोचनयुगलेन परितो महामण्डलमिव … आलिखन्तम् … भैरवाचार्यं ददर्श HarṣaC. 155.8; गृहमेवेदमस्त्यतिदीर्घम् DaśKuC. 88.9; मात्रा त्वं परिवर्जितः … यान्त्यातिदीर्घां भुवम् TāpaVa. 2.11 = VakroJi. 151.15; (ते) नातिदीर्घैः प्रयान(? ण)कैः । … ताम्रलिप्तीमनेषत BṛKathāS'loSaṁ. 18.419; अतिदीर्घेऽपि वारिधि(? धे)रध्वनि … न चस्खाल TilaMañ. 147.2; कामिनीनेत्रकटाक्षैरिवातिदीर्घविशदच्छविभिः YaśasCam. i. 401.1; अतिदीर्घैः … भूषणांशुभिः NavaSāC. 4.48; शास्त्रकाव्येऽतिदीर्घाणां वृत्तानां न प्रयोजनम् SuvṛTi. 3.8; अवान्तरवाच्ये समस्तद्विपदा नातिदीर्घा वृत्तिः AbhinBhā. ii. 336.19 (*on* 16.100); नातिदीर्घं समं पृष्ठम् … शुभम् AśvaVai. 3.25; नातिदीर्घा नातिह्रस्वा … । यष्टिः प्रशस्यते … मत्स्यकर्षणे Mānaso. iv. 14.1418; नातिदीर्घसमासा च वैदर्भी रीतिः PratāYaBhū. 64.2; तस्यातिदीर्घा जटाः PrabaK. 40.26; नातिस्वल्पा नातिदीर्घाः सर्गाः (इह) SāhiDa. 372.14; विलसति सदा चक्रचापेऽतिदीर्घे PavaDū.(Vā.) 72; मध्यं दारु नातिह्रस्वं नातिदीर्घमित्यर्थः SiddhāKau. 255A.2; नातिदीर्घो न चाल्पः … रक्तमत्स्यः BhojanKu. 174.1; **2** very long (temporally) अतिदीर्घे जीविते को रमेत KāṭhU. 1.28; (नलः) कुण्डिने कालं नातिदीर्घमिवावसत् MahāBhā. iii. 76.19; (भ्रातुः) अतिदीर्घस्य कालस्य परितुष्टोऽस्मि कीर्तनात् Rāmā. iv. 1169*(1); नातिदीर्घेण कालेन ते गता रत्नपर्वतम् HariVaṁ. 42.2; (संगीतम्) गमकेनातिदीर्घेण … सृष्टम् BrahmVaiP. iv. 34.10; कालमतिदीर्घं रुरोद HarṣaC. 330.20; एक एवायमतिदीर्घः … प्रतिभासः NyāyMañ. i. 316.15; अतिदीर्घस्तपःक्षयः (मन्त्रः) KulārT. 15.55; जीवितं चातिदीर्घम् SaraKaṇṭhā. 344.19; रजनि हे दीर्घातिदीर्घा भव SubhāRaK. 22.40; BṛBrahmS. i. 2.41; *n.* name of a metre च्लृतावतिदीर्घं ढजैः । चतुर्मात्रनवकं त्रिमात्रश्च Chandonu. 7.55.

अतिदीर्घक (atidīrgha-ka) *adj.* very long (कुक्कुटः) कृष्णपक्ष्मातिदीर्घकः (सर्पजातिः प्रकीर्तितः) Mānaso. iv. 7.1009; *n.* name of a metre चत्वारिंशन्मात्रायामेकोनायां निष्णातोऽकार्षीदतिदीर्घकम् Chandaḥśekhara. 221.

अतिदीर्घकाल (atidīrgha-kāla) *m.* very long period of time जन्मान्तरानुभूतमतिदीर्घकालव्यवहितं स्मर्तुमशक्यम् NyāyRa. 90.15 (*on* 2.149); अतिदीर्घकालप्रोषितस्य सद्भावाज्ञानतः कृते विभागे SmṛtiCan. iv. 712.16; v. 258.2.

अतिदीर्घकालम् (atidīrgha-kālam) *adv.* for a very long period of time (चैत्यगृहम्) यथा गमिष्यत्यतिदीर्घकालं तथा कुरुष्व VarāṅgaC. 23.88; दश वा नव वा मासानतिदीर्घकालमन्तः शयित्वा ChāndoUBh. 291.4 (*on* v. 9.1); (तया) निजस्तनमण्डन(? ल)स्य कृत्वातिदीर्घकालं मण्डनम् TilaMañ. 43.13; 410.23.

अतिदीर्घकेशी (atidīrgha-keśī) *adj.* (*f.*) with very long hair स ताम् … आनीय कृष्णामतिकृष्ण(v. l. दीर्घ)केशीम् … चकर्ष MahāBhā. ii. 60.24.

अतिदीर्घखड्ग (atidīrgha-khaḍga) *n.* very long sword हींकार एव कोशस्तस्य असिलता अतिदीर्घखड्गमित्यर्थः LalitāTriBh. 348.16 (*on* 56)

अतिदीर्घग्रीव (atidīrgha-grīva) *adj.* having a very long neck धिक्करभमतिदीर्घग्रीवं प्रलम्बचपलौष्ठम् TattvCin. iii. 61.4; MaṇiKa. 64.11.

अतिदीर्घजिह्वा (atidīrgha-jihvā) *adj.* (*f.*) with a very long tongue (गावः) श्यामातिदीर्घजिह्वा गुल्फैरतितनुभिरतिमहद्भिर्वा … नेष्टाः S'ārṅgaPa. 2829.

अतिदीर्घजिह्वी (atidīrgha-jihvī) *adj.* (*f.*) whose tongue is very long कृश्यकण्ठोत्कण्ठी हलचिबुकातिदीर्घजिह्वी … प्रेत्य आविरासन् DvyāśraKā. 4.61.

अतिदीर्घजीवित (atidīrgha-jīvita) *n.* very long life निपीय पीयूषम् … अक्षयकायतां गताः । … सुराः सदैव निन्दन्त्यतिदीर्घजीवितम् DaśāvaC. 3.6.

अतिदीर्घजीविदोष (atidīrghajīvi-doṣa) *m.* the fault of one having a very long life अतिदीर्घजीविदोषाद् व्यासेन यशोऽपहारितं हन्त Āryā-SaS'a. 33*.

अतिदीर्घतमश्मश्रु (atidīrghatama-śmaśru) *adj.* having a very long beard (दैत्योऽथ ब्राह्मणो भूत्वा) अतिदीर्घतमश्मश्रुराजगाम नृपान्तिकम् GaṇeP. ii. 18.6.

अतिदीर्घता (atidīrgha-tā) *f.* great length अतः परमध्यायानुसन्तानेऽतिदीर्घता स्यादित्यपर्यवसित एव प्रतिज्ञानार्थेऽध्यायमुपसंहरति ManvaVi. 1116.12 (*on* 8.420); नेत्रे … अतिदीर्घतया कस्य न कर्णोपान्तमागते Subhāṣi. 1494.

अतिदीर्घत्व (atidīrgha-tva) *n.* **i** great length स्विष्टकृदनुयाज्यायास्त्वतिदीर्घत्वान्मध्येऽवाननं नित्यमेव प्रसक्तम् BhāṭṭCan. 120.7 (*on* xvi. 3.15); ग्रीष्मकालेऽह्नामतिदीर्घत्वात्तत्र पादाधिकषोडशघटिकात्मके काले आवर्तनं भवति SmṛtiCan. ii. 41.7; **ii** great height तां त्यजन्ति कुमारिकां पुरुषा अतिदीर्घत्वयुक्ताम् SkandP. vi. 135.8.

अतिदीर्घदूर्वा (atidīrgha-dūrvā) *f.* very long *dūrvā* (grass) काशेषु राजदूर्वासु अतिदीर्घदूर्वासु पिण्डनिर्वपणं कार्यं कुशाभावे विचक्षणैः SmṛtiCan. ii. 366.17; कुशाभावे काशा अतिदीर्घदूर्वा वा BālamBha. i. 527.26 (*on* 1.242)

अतिदीर्घनयना (atidīrgha-nayanā) *adj.* (*f.*) having very long eyes दीर्घातिदीर्घनयना वरसुन्दरी या … किल शङ्खिनी सा RatiMañ. 6.

अतिदीर्घप्रयोग (atidīrgha-prayoga) *adj.* having a very lengthened utterance (of a part of a Rāga) अतिदीर्घप्रयोगाः स्युः स्थाया ये ते ध्वनेर्मताः SaṁgīRa. ii. 176.19 (3.131)

अतिदीर्घबाहु (atidīrgha-bāhu) *adj.* possessing very long arms चिक्षेप चक्राण्यतिदीर्घबाहुः स कालरात्रेरिव कङ्कणानि NavaSāC. 17.61.

अतिदीर्घम् (ati-dīrgham) *adv.* for a very long (time) स्थित्वा च क्षणं समाश्वस्ता निःश्वस्य चातिदीर्घम् … गदितमनया TilaMañ. 29.10.

अतिदीर्घवक्रग्रीव (atidīrghavakra-grīva) *adj.* possessing a very long and crooked neck धिक् करभम् … अतिदीर्घवक्रग्रीवम् … अपसदं पशूनाम् TātpaṬ.(Vā.) 198.17 (*on* i. 1.6)

अतिदीर्घविषाण (atidīrgha-viṣāṇa) *adj.* having very long horns असौ महिषो जातः … । अतिदीर्घविषाणश्च अञ्जनाद्रिरिवापरः SkandP. vi. 119.14.

अतिदीर्घसंख्या (atidīrgha-saṅkhyā) *f.* very large number तथा ह्ययं स्वधर्मातिशेन परित्यक्तस्वगतिकत्वेनाच्छादिततद्रूपोऽप्यतिदीर्घसंख्याविशेषानाचष्टे ManuBh. i. 493.24 (*on* 5.157)

अतिदीर्घसमास (atidīrgha-samāsa) *m.* very long compound अतिदीर्घसमासयुता बहुलैर्वर्णैर्युता महाप्राणैः । कठिना सा गौडीयेत्युक्ता RasāSu. 68.12 (1.239) *adj.* [*f.* -ā] having long compounds, PratāYaBhū. 64.2.

अतिदीर्घसुभाषण (atidīrgha-subhāṣaṇa) *n.* pleasant talk for a long time समणितैरतिदीर्घसुभाषणैः … वनितया रमयन्ति विलासिनः S'ṛṅgāDī. 3.1.

अतिदीर्घसूत्र (ati-dīrghasūtra) *adj.* very slow, given to delay विरक्तभृत्यान्यतिदीर्घसूत्राण्यल्पानि मित्राण्यतिदूरगानि । … कियच्चिरं तस्य नृपस्य राज्यम् VarāṅgaC. 2.30.

अतिदीर्घसूत्रिन् (ati-dīrghasūtrin) *adj.* over-dilatory, too slow न चातिदीर्घसूत्री स्यात् CaraS. i. 8.27.

अतिदीर्घस्थान (atidīrgha-sthāna) *n.* very long place तेन ग्रीवात्रिकपृष्ठपार्श्वोरुमूलबाहुषु नातिदीर्घस्थानविशेषा द्व्यङ्गुला त्र्यङ्गुला वा प्रत्यग्रशिखरनिष्पाद्या (लेखा) JayaMa. 120.16 (*on* 2.4)

अतिदीर्घाङ्गुली (atidīrghāṅgulī) *f.* very long finger मध्यस्य तानवभृतो घटते तवातिदीर्घाङ्गुलीतुलनमस्तु नितम्बभित्तेः HarVi. 27.88.

अतिदीर्घाय (ati-dīrghāya-) I. A. [denom.] to become very long अस्माकं तु कुटुम्बशम्बलकथासन्तापचिन्ताज्वरज्वालाजागरजागरूकमनसां सैवातिदीर्घायते S'atTrayī. 540.

अतिदीर्घायुर्योग (atidīrghāyur-yoga) *m.* conjunction (of planets) indicating a very long life अतिदीर्घायुर्योगे जातो मुनिवज्जितेन्द्रियो भूत्वा … करोति मन्त्रजपान् HorāSā. 6.58.

अतिदीर्घायुस् (atidīrghāyus) *adj.* having a very long life प्रायेणातिदीर्घायुषः … द्विरदगणाः AvantiKa. 84.7.

अतिदीर्घास्त्र (atidīrghāstra) *adj.* having a missile of long range नैष शक्योऽतिदीर्घास्त्रस्ते च सर्वे महारथाः । ऋजुयुद्धेन विक्रान्ता हन्तुं युष्माभिराहवे MahāBhā. ix. 60.57.

अतिदीर्घोज्ज्वल (atidīrghojjvala) *adj.* (remaining) bright for a long time अक्षीणो निचितो गुरुश्च गुटिकाकारोऽतिदीर्घोज्ज्वलः बद्धाभिधानो रसः RasRaSa. 11.84.

अतिदीर्णव्रण (atidīrṇa-vraṇa) *n.* very gaping wound अतिदीर्णव्रणानां तु विधिरन्यः प्रवक्ष्यते Hastyāyur. 374.14 (3.3)

अतिदीवन् (áti-dīvan) *adj.* [DEBRU. p. 177] superior gambler उत प्रहामतिदीवा जयति AV. vii. 50.6.

अतिदीव्या (ati-dīvyā) *grd.* [PaPā. *atidīvya*] overplaying, bidding higher अतिदीव्यां जयाति कृतं यच्छ्वघ्नी विचिनोति काले ṚV. x. 42.9.

अतिदु (ati-du-) V. P. to torment much जैवातृकी यतोऽह्नः स्याद्दूरीभूता दृशोर्मम । अहो जैवातृकी ज्योत्स्ना ततोऽह्नोऽतिदुनोति माम् SkandP. iv. 66.43.

अतिदुःख (ati-duḥkha) *n.* **A** extreme pain, great calamity, great hardship, great difficulty अथ यदास्य मानुषाणामतिधृतिमतिदुःखं वा पर्वताः स्फुटन्ति ṢaḍviBr. v(vi.) 12.2; अतिदुःखमिदं मूढ न जातु ब्राह्मणः सहेत्

MahāBhā. xii. 3.25; आस्ते गर्भेऽतिदुःखेन निजकर्मनिबन्धनः VisṇuP. vi. 5.13; तत्रोषितोऽतिदुःखेन गर्भे … देही ज्ञानवांश्चिन्तयेदिदम् ĀdiP. 7.45; जीवः … जायमानोऽतिदुःखेन AdhyāRā. iv. 8.39; (पन्थाः) अतिदुःसञ्चरः यत्रातिदुःखेन संचरते VakroJi. 58.1; **B** great misery, extreme sorrow, excessive distress (धर्मराजम्) नैनं जीवन्नापि जानाम्यजीवन्बीभत्सुं वा तन्ममाद्यातिदुःखम् MahāBhā. viii. 54.12; अतिदुःखात्तु वक्ष्यामि तन्निबोध जनाधिप MahāBhā. xii. 16.3; (नृपतिः) तदातिदुःखेन विदूयमानः शोकेन मोहेन युतो बभूव BrahmāṇḍP. ii. 40.46; परिग्रहोऽतिदुःखाय MārkP. 95.9; तत्रैव पापाधिकतोऽतिदुःखम् … उदाहरन्ति VarāṅgaC. 3.54; दारिद्र्यदुःखानां तेषां वर्षशतं गतम्। बलिष्ठारब्धकर्माणस्तेऽतिदुःखेऽपि नो मृताः SkandP. ii(9). 10.7; काशीराजः … अतिदुःखेन संतप्तः GaṇeP. ii. 15.27; (वासना) सा प्रवृद्धातिदुःखाय YogVā. iv. 27.31; मार्जारं मूषकोऽब्रवीत्। बद्धे त्वय्यतिदुःखं मे KathāSaSāg. vi. 7.121; बालत्वे चातिदुःखं मललुलिततनुस्त्रीपयःपानमिश्रम्। तारुण्ये चातिदुःखं भवति विरहजम् S'atTrayī. 529, 595; (निद्रायाः) अतिदुःखातिसौख्ये हि तस्याः प्रथमकारणम् TrisaS'aPuC. i. 1.107; यस्य नरस्य हि जन्मनि धिष्ण्ये क्रूरैर्निपीडिते खचरैः। अतिदुःखामयशोकन् … भवति VasiS. 22.4; न केवलमनिष्टादिकारिणां गतागतमात्रमतिदुःखं चान्यदस्ति TattvPrakā. 143A.3 (*on* iii. 1.14); भोजयतेऽतिदुःखम् … दरिद्रता PuruṣaPa. 52.16; (पारदभक्षकः) अतिकोपम् … नीं(? चा)तिदुःखम् … वर्जयेत् RaseCin. 3.87 (37.5); अतिदुःखं गतोऽस्मि SimhāDvā. 167.5 (9); परिणामेऽतिदुःखेन … किं न स्यात्सेवितेनामुना फलम् RājTa.(Jo.) 832; VetāPañ.(S'i.) 58.21; अतिदुःखं मोक्षे स्यात् इत्यनिष्टप्रसङ्गः Nyāyāmr. 277B.5 (*on* 1.30); सत्त्वात्सुखं स्याद्रजसोऽतिदुःखम् Vidvanmo. 6.13; क्वथः स्यादतिदुःखेऽपि निष्पाकेऽपि द्रवस्य च MediK. 76.4; S'abdaRaSaK. 168.10.

अतिदुःख (ati-duḥkha) *adj.* **i** extremely painful कर्णयोरतिदुःखानि भाषितानि PadmP.(Ra.) 35.147; नरकाण्यतिदुःखानि पच्यन्ते येषु पापिनः Īs'ānS'iPa. ii. 17.18; **ii** causing great sorrow, causing great misery विषयेष्वतिदुःखेषु सुखमानी मनागपि। नाहो विरज्यति जनः TrisaS'aPuC. i. 1.258; **iii** full of excessive misery सत्योऽयम् 'अतिदुःखो निर्दुःखः' इति लोकप्रवादः AnargharRā. 6.22 (1); अतिदुःखं च वैराग्यम् GaṇeP. ii. 142.22.

अतिदुःखकर (atiduḥkha-kara) *adj.* causing great misery, unhappiness or pain ते … उन्मार्गगामिनश्चातिदुःखकरान् … असादयन् AvantiKa. 136.9; आदित्यचन्द्रहरिशंकरवासवाद्यैः शक्ता न जेतुमतिदुःखकराणि यानि।… इन्द्रियाणि SubhāRaSam. 93; धनुर्धर निबोधेदमतिदुःखकरं वचः GaṇeP. ii. 120.2; तद्धृदयम् … तेभ्यो (असुरेभ्यः)ऽतिदुःखकरेभ्योऽप्यकम्पनीयव्यवसायम् Kāvyānu.(He.) 56.18.

अतिदुःखकृत् (atiduḥkha-kṛt) *adj.* causing great misery साध्यसिद्धेऽतिसंक्लेशात् साध्यसाध्योऽतिदुःखकृत् TantrRā. 1.50.

अतिदुःखतस् (atiduḥkha-tas) *adv.* **1** due to extreme misery or sorrow देहकर्तृत्वमीशस्य ज्ञात्वा …। निष्पाद्य बहुमानं च तदन्यत्रातिदुःखतः।… यतेतोपासनाय AnuVyā. 46B.8 (*on* 3.3); **2** with great pain or trouble शक्रेण वर्षकोटीश्च धूमः पीतोऽतिदुःखतः AnuVyā. 55B.8 (*on* 3.4)

अतिदुःखतालाभ (atiduḥkhatā-lābha) *m.* obtaining the state of being above grief or pain अथान्यपदेनात्मान्यत्वेन मनस एव बोधात्तस्य दुःखित्वं प्रतिपाद्यतामात्मनोऽतिदुःखतालाभाय GuruCandr. ii. 305.28.

अतिदुःखद (atiduḥkhada) *adj.* [*f.* -ā] **i** causing great pain (संनिपातः) ज्वर अतिदुःखदो वाजिनां वा द्विपानाम् HāriS. iii. 2.19; अकस्माद्भवत्तस्य (सोमकान्तस्य) गलत्कुष्ठोऽतिदुःखदः GaṇeP. i. 2.1; **ii** causing extreme affliction, grief, misery श्रुत्वा तावदियं जाता ममावस्थातिदुःखदा PadmP.(Ra.) 15.109; अहो दरिद्रतादुःखं तत्राप्याशातिदुःखदा BṛNāraP. 11.149; 11.152; (विद्या) अन्यथा फलहीना स्यान्निर्वीर्याप्यतिदुःखदा S'ivS. 3.11; मित्राणामतिदुःखदम्। स्त्रीभावं मनसा ध्यात्वा मामेवानुगताः KalkiP. i. 6.39; मोहयैनं रिपुं वृत्रं देवानामतिदुःखदम् DevīBhāP. vi. 5.57; गर्भवासोऽतिदुःखदः PadmP. i. 61.85; राम…यासि चित्ततामतिदुःखदाम् YogVā. v. 14.54; तथा च विरहः पूज्यैरुपतस्थेऽतिदुःखदः PrabhāC. 91.3.

अतिदुःखदर्शन (atiduḥkha-dars'ana) *adj.* sight of which causes extreme agony (माल्यवत्पर्वतस्य गुहागृहम्) तदिममतिदुःखदर्शनं नोपसर्पामि UnmaRā.(Vi.) 61 (1)

अतिदुःखपीडित (atiduḥkha-pīḍita) *adj.* suffering from excessive pain ग्राहवक्त्रपतिताङ्घ्रिमुद्धतं वारणेन्द्रमतिदुःखपीडितम्। वीक्ष्य … त्वं गरुत्मति कृतारुहक्रियः PadmP. iv. 21.23.

अतिदुःखपूर्णा (atiduḥkha-pūrṇā) *adj.* (*f.*) full of great hardship मायावशेन मनुजो जननिन्दनीयां तिर्यग्गतिं व्रजति तामतिदुःखपूर्णाम् SubhāRaSam. 54.

अतिदुःखप्रबन्ध (atiduḥkha-prabandha) *m.* series of extreme miseries or troubles संसारान्मोक्षः श्रेयान्यत्रायमियानतिदुःखप्रबन्धोऽवलुप्यते NyāyMañ. ii. 80.10.

अतिदुःखभोक्तृ (atiduḥkha-bhoktṛ) *adj.* experiencing great sorrow (रामलक्ष्मणौ) राजपुत्रावुभौ किल। वनेऽतिदुःखभोक्तारौ जातौ पूर्वकृतेन DevīBhāP. iii. 29.24.

अतिदुःखविषम (atiduḥkha-viṣama) *adj.* terrible due to excessive misery नोपात्तम् … तत्त्वं त्वया मुक्तये रे जीवात्र ततोऽतिदुःखविषमे संसारचक्रे भ्रमः VairāS'.(Pa.) 47.

अतिदुःखसंवेग (atiduḥkha-saṁvega) *m.* intensity of excessive pain सीतादेवी प्राप्तप्रसववेदनमात्मानमतिदुःखसंवेगाद् गङ्गाप्रवाहे निक्षिप्तवती UttaRāC. 3.2 (5)

अतिदुःखसमन्वित (atiduḥkha-samanvita) *adj.* extremely distressed शशाप च महातेजाः…अतिदुःखसमन्वितः MahāBhā. xii. 6.10.

अतिदुःखसार (atiduḥkha-sāra) *adj.* having severe pain as its essence अहोऽतिदुःखसारस्य शरीरस्यास्य भङ्गिनः। कृते कुकर्मप्रारम्भो मतेः BṛKathāMañ. 9 (2). 1108.

अतिदुःखहेतु (atiduḥkha-hetu) *m.* cause of great misery विस्तारमेष्यत्यतिदुःखहेतुः परिग्रहो वै ममताभिधानः VisṇuP. iv. 2.122; मा भूद्विशेषगमनं त्वतिदुःखहेतुः S'aṅkaDigVi.(Mā.) 14.20.

अतिदुःखहेतुत्व (atiduḥkhahetu-tva) *n.* the state of being the cause of extreme pain यस्त्वङ्गुलीकरच्छेदादिको वधः सोऽतिदुःखहेतुत्वादशुद्धवधः ManvaVi. 1252.20 (*on* 9.279)

अतिदुःखान्विता (atiduḥkhānvitā) *adj.* (*f.*) filled with great sorrow स्वसा नागपतेस्तु सा। अतिदुःखान्विता वाचं तमुवाच MahāBhā. i. 43.9.

अतिदुःखाभिहत (atiduḥkhābhihata) *adj.* afflicted by great sorrow किमुतातिदुःखाभिहतहृदयोऽस्मद्विधो जनः Kād. 180.15.

अतिदुःखार्त (atiduḥkhārta) *adj.* [*f.* -ā] **i** afflicted with excessive grief, very much distressed with sorrow गोपीजनः …। निशश्वासातिदुःखार्तः VisṇuP. v. 18.13; अतिदुःखार्तो रामः … प्रणामं दण्डवच्चक्रे SkandP. iii(2). 32.8; एतद्दृष्ट्वातिदुःखार्ता देवा इन्द्रादयस्तथा। विचारं परमं चक्रुः BṛNāraP. 8.80; 7.58; मानुष्यमाश्रितं दृष्ट्वा पिता मे … विललापातिदुःखार्तः LiṅgaP. i. 43.4; तेनाहमतिदुःखार्तस्तपस्तप्तुमिहागतः LiṅgaP. ii. 3.17; दृष्ट्वा गोपीजनः … निःश्वस्यातिदुःखार्तः BrahmP. 192.13; उपेक्षसेऽतिदुःखार्तं यदि मां शरणं गतम् DevīBhāP. i. 7.13; मृते पुत्रेऽतिदुःखार्ता जाता सत्यवती तदा DevīBhāP. i. 20.54; iii. 12.86; iv. 20.43; तदा शप्तोऽतिदुःखार्तो जग्राहाङ्घ्र्यश्रुशुश्रुक्षणिः PadmP. iv. 14.41; रुदन्ती सा गिरेः सुता। विललापातिदुःखार्ता S'ivaP. ii(3). 22.34 (147A.11); ततो रामोऽतिदुःखार्तो मार्गमाणोऽथ जानकीम् AdhyāRā. v. 3.8; iv. 5.61; **ii** distressed by severe pain शूले … प्रोतमचौरम् … माण्डव्यमतिदुःखार्तमन्धकारे … चालयामास कौशिकः MārkP. 16.27; ततः स दशमे मासि … निःसारितोऽतिदुःखार्तो योनिमार्गेण संकटात् ĀdiP. 7.49.

अतिदुःखित (ati-duḥkhita) *adj.* [*f.* -ā] greatly grieved, worried or distressed, very miserable एवं हि मत्स्ये न्यवसन्त पाण्डवाः … अतिदुःखिताः MahāBhā. iv. 11.13; एषान्या … निपतत्यतिदुःखिता MahāBhā. xi. 18.15; xi. 25.2; बहुशो यस्य मानस्तु सापत्न्यादतिदुःखितः। … पदा संतर्जयामास संज्ञाम् … यमः VāyuP. ii. 22.53; स विललापातिदुःखितः MārkP. 8.25; 14.11; 22.24; सः … ब्रह्मदण्डहतान्सर्वान्पितॄन्छ्रुत्वातिदुःखितः BrahmāṇḍP. ii. 56.35; ii. 59.51; सर्पेऽतिदुःखितानां मालायां जन्म सुखिनां च LaJāta. xi. 0.2; अम्ब तात न पश्यतं पापां परलोकप्रस्थितां मामेवमतिदुःखिताम् HarṣaC. 230.8; क्व भूमिगोचराः क्षुद्राः सर्वथैवातिदुःखिताः PadmP.(Ra.) 28.145; 43.99; 97.136; राजर्षे … नार्हसि दुःखयितुमतिदुःखितां देवीम् UttaRāC. 4.13(6); नानाविधामयभयादतिदुःखितानाम् … नः … का वा क्रिया KalyāKā. 1.6; दृष्ट्वातिदुःखितान्। लोकः … न बिभेति KulārT. 1.29; चक्रे मनसि वप्रा च प्रतिज्ञामतिदुःखिता BṛKathāK. 33.11; राजा … कृत्वा वक्षसि कान्तां तां रुदतीमतिदुःखिताम् BrahmVaiP. ii. 17.79; निदाघतापितो बाढुः … पादचार्यतिदुःखितः BṛNāraP. 7.43; 10.34; 38.81; एतच्छ्रुत्वा … साप्यभूदतिदुःखिता BrahmP. 92.36; 105.3; 150.13; (अधरे) विवर्णे (सति) चातिदुःखिते BhaviP. 22B.7 (i. 5.73); 176B.5 (i. 119.20); 456B.33 (iii(2). 29.6); शापाद्भीतो देवदत्तस्तमुवाचातिदुःखितः DevīBhāP. iii. 10.28; तस्य सखायोऽप्यतिदुःखिताः। वसन्तादय आगत्य SaurP. 40.11; पिता मे कुशली किं वा मां किमाहातिदुःखितः AdhyāRā. ii. 9.12; iii. 8.15; iii. 8.20; iv. 8.10; vi. 5.71; vi. 10.44; अतिदुःखितः। इन्द्रदत्तो रहः प्राह मां व्याडिम् BṛKathāMañ. i. 2.120; v. 1.201; ix. 2.1180; ततो राजा विश्वामित्रोऽतिदुःखितः। …प्रययौ तपसे पुनः RāmāMañ. 31.15; 72.15; 419.14; दृष्टाः सधनाश्चातिदुःखिताः DarpDa. 2.57; भीमभरः … ततो निराशो हा मित्रेत्याक्रन्दन्नतिदुःखितः KathāSaSāg. xii. 7.129; तस्यां विपन्नापत्यायां प्रसवान्ते-

ऽतिदुःखिता RājTa.(Ka.) 5.247; नामापि तस्या नागश्रीर्नाकार्षीदतिदुःखिता TriṣaS'aPuC. i. 1.541; वर्षीयसीमेकां सोऽद्राक्षीदतिदुःखिताम् PāṇḍaC. 12.26; तद्वृत्तं श्वेतवीनाथपुत्री ज्ञात्वातिदुःखिता MalliC. 7.875; न प्राप्ता भवतो वार्ता तेनाहमतिदुःखित: UttaKuC. 480; शक्रनन्दन: ··· धर्मसुतम् ··· अतिदुःखितमरमयत् YudhiVi. 7.124; स रुरोदातिदुःखित: VetāPañ. 64.31; 19.18; न सा बुद्धिमतां बुद्धिर्दुःखमेवातिदुःखितम् KathāKau. 2.82; प्रोक्तस्तैरतिदुःखितैरिति पुनस्तान् प्रोक्तवान् पद्मभू: MātaLī. 1.13.

अतिदुःखिततनु (atiduḥkhita-tanu) *adj.* whose body is excessively distressed (स राजा) ततोऽतिदुःखिततनु: शरणं पुनरागत: ··· भृगुम् GaṇeP. i. 8.36.

अतिदुःखितमनस् (atiduḥkhita-manas) *adj.* with a mind greatly distressed तेनातिदुःखितमना बहिरात्तदृष्टि: CaitaCa. 52.20(2)

अतिदुःखिता (atiduḥkhi-tā) *f.* the state of being very unhappy or excessively afflicted यौगन्धरायणादीनां न चैषामतिदुःखिता । दृश्यते । KathāSaSāg. iii. 2.54; अतिदुःखितया स वर्तितां यदि सत्यं पतिदेवतास्म्यहम् Nalābhyu. 7.53.

अतिदुःखिन् (ati-duḥkhin) *adj.* [*f.* -ī] excessively grieved or afflicted, very miserable or sad निवेदितो दुर्विधिनातिदुःखिना नृपाय केनापि नरेण निश्चित: PadmP.(Ra.) 21.16; अतिदुःखिन: । मित्रस्य दर्शनादेव सर्वं दुःखं विनश्यति BṛNāraP. 9.80; अप्राप्तदुःखा भवती ह्यसदर्थेऽतिदुःखिनी BṛDharmaP. i. 45.17; क्रुशोऽतिदुःखी मूढोऽहम् YogVā. iv. 11.26; एष कितवोऽतिदुःखी KalāVi. 5.30; तदानीमतिदुःखी युवराजसौख्यमीयात् S'aṅkaDigVi.(Mā.) 15.64; कालं कियन्तमप्येषा व्यतिक्राम्यातिदुःखिनी Dhūrtā. 276; ततो द्वावप्यतिदुःखिनौ KathāK. 75.22.

अतिदुग्ध (ati-dugdha) *adj.* milked (i. e. drained or taxed) too much राष्ट्रमप्यतिदुग्धं हि न कर्म कुरुते महत् MahāBhā. xii. 88.11.

अतिदुरत्यय (ati-duratyaya) *adj.* [*f.* -ā] very difficult to overcome or to destroy दूरे तिष्ठस्व कान्ताद्य लज्जा मेऽतिदुरत्यया DevīBhāP. iv. 23.19; हरत्यतिदुरत्ययं भवभयं गुरूक्ति: S'aṅkaDigVi.(Mā.) 4.86.

अतिदुरन्त (ati-duranta) *adj.* [*f.* -ā] having evil or miserable consequence अतिदुरन्तसंवादं दुःखमुपनतम् UdaySuKa. 69.35; रजनीवातिदुरन्ता (माया) PraboSu. 104; अनन्तरम् ··· अतिदुरन्तभवखेदसन्तानभीषित: YātrāPra. 7.153(1)

अतिदुरवगम (ati-duravagama) *adj.* very difficult to know अविप्रलम्भादि चातिदुरवगमम् TattvPrakā. 55A.2 (*on* i. 3.28)

अतिदुरवगाढ (ati-duravagāha) *adj.* very difficult to enter into स:··· अतिदुरवगाहमितरैरत्नगाह्य हृगबलसागरम् ĀnandaRa. 7.13(2); भो भो देव अद्वैत त्वमतिदुरवगाहगभीरोऽसि CaitaCa. 100.8(4)

अतिदुरवाप (ati-duravāpa) *adj.* very difficult to obtain अतिदुरवापम् । मदुरसि कुचकलशं विनिवेशय GītGo. xii. 23.4.

अतिदुराचार (ati-durācāra) *adj.* of very evil conduct, very wicked स्वयम् ··· चातिदुराचार: ··· पापिनामपि पापराट् SkandP. i(2). 46.109.

अतिदुरात्मन् (ati-durātman) *adj.* very wicked त्वं मे ··· अतिदुरात्मन: । प्रसादं कर्तुमर्हसि SkandP. vi. 51.61; वणिजोऽतिदुरात्मानोऽविनीता: BallāC. 107.5.

अतिदुराधर्षा (ati-durādharṣā) *adj.* (*f.*) extremely invincible वृद्धाप्यतिदुराधर्षा सा गता कुत्रचित्तदा BrahmP. 167.22.

अतिदुराप (ati-durāpa) *adj.* very difficult to obtain तस्य च राज्ञ: ··· अतिदुरापेणेतरप्रमदाभि: ··· शीलेनालंकृता ···मदिरावती नाम देव्यभवत् TilaMañ. 22.1; अतिदुरवापं (v. l. अतिदुरापं) मदुरसि कुचकलशं विनिवेशय GītGo. xii. 23.4; गोविन्दोऽतिदुराप: ChandoMa. 2.191; तत्र प्रवेशस्त्वतिदुरापोऽतिशयितानुग्रहैतरासाध्यत्वात् AṇuBh. 323.9 (*on* iv. 2.9)

अतिदुरापत्व (atidurāpa-tva) *n.* the state of being very difficult to obtain उदीर्य ··· तीर्थकृद्धर्मबोधैरतिदुरापत्वम् TilaMañ. 412.2.

अतिदुरारोह (ati-durāroha) *adj.* extremely difficult to ascend or climb राज्यं हि नाम ··· उत्तुङ्गवंशप्रतिष्ठितत्वैवातिदुरारोहम् Kād. 297.11; गिरिदुर्गं सर्वत: पृष्ठमतिदुरारोहम् NītiRa. 6; गिरिदुर्गं पर्वतपृष्ठमतिदुरारोहम्···आश्रित्य पुरं विरचयेत् ManvaMu. 260.5 (*on* 7.10); पुरो रेवापारे गिरिरतिदुरारोहशिखर: Subhāṣi. 661 = NītiRa. 5.

अतिदुरासद (ati-durāsada) *adj.* very difficult to approach (i. e. to overcome) तपसोऽतिदुरासद: । कार्तवीर्यो हतो युद्धे सपुत्रबलवाहन: BrahmāṇḍP. ii. 44.14; किं ब्रूमोऽस्मिन् महाराज संकटेऽतिदुरासदे DevīBhāP. vii. 3.32; तदीक्षणपातमात्रेण ··· अतिदुरासदमदनानलदह्यमानमानस: ··· निजं निवेशं प्राविशम् S'ṛṅgāSar. 126 (1-2)

अतिदुरित (ati-durita) *n.* great sin अतिदुरितमनागतं विचार्य PrabhāC. 66.26.

अतिदुरुद्वह (ati-durudvaha) *adj.* very difficult to rule or manage राज्यं हि नाम ··· अतिदुरुद्वहम् Kād. 297.8.

अतिदुरूह (ati-durūha) *adj.* very difficult to guess or understand अतिदुरूहग्रन्थान्तरेभ्य: सिद्धान्तज्ञाने जायमानस्य क्लेशरूपसन्तापस्य च शामकत्वेन च कौमुदीसादृश्यम् LaS'abdeS'e. i. 3.2.

अतिदुर्ग (ati-durga) *adj.* [*f.* -ā] **A** very hard to reach, very difficult of access बभूव ··· गजैरगम्या वसुधातिदुर्गा MahāBhā. viii. 68.22; जीव: ···गच्छति···दुःसहं यमपुरं च दुर्निरीक्षं दुरासदम् । ···अतिदुर्गं च VṛGautaSm. 522.4; दुरापमतिदुर्गं च पापिष्ठानां सदाहितम् । ···नीयन्ते तं महापथम् BrahmP. 214.53-54; तस्यातिदुर्गेऽपि पथि प्रयाणान्युद्यानलीलासदृशान्यभूवन् KīrtiKau. 9.13; सुलभायातिदुर्गाय नमश्चित्राय शंभवे Subhāṣi. 22; **B** excessively difficult to pass through गृहीतशस्त्रस्तमेव मार्गमतिदुर्गमनुसरन् ··· (समरकेतु:) TilaMañ. 199.14; एवं बभूवुर्दैत्यानामतिदुर्गाणि सुव्रता: पुराणि त्रीणि LiṅgaP. i. 71.23.

अतिदुर्गत (ati-durgata) *adj.* very poor, destitute सखा मे यज्ञदत्ताख्यश्चिरं भूत्वातिदुर्गत: KathāSaSāg. vi. 2.162; अपथ्यभोगेषु यथातुराणां स्पृहा यथार्थेष्वतिदुर्गतानाम् Subhāṣi. 2393.

अतिदुर्गन्ध (ati-durgandha) *adj.* very foul-smelling अहृद्यमतिदुर्गन्धमजीर्णे चाति वा बहु । यस्यानुलोमिकं पीतमूर्ध्वं याति कफावृतम् KāśyaS. 276A.1; नि:श्वासो वातिदुर्गन्धो नरो गन्धान् न वेत्ति च RugVi. 58.22; ततो द्विजापसद कदाचित्त्वयेदमतिदुर्गन्धगोर्वरोद्रवितमध्याशयं शालाजिरत्रयमशितव्यम् YaśasCam. ii. 348.23.

अतिदुर्गन्धता (atidurgandha-tā) *f.* the state of having an extremely bad odour अतिदुर्गन्धता चास्य केन वा वद कर्मणा GaṇeP. i. 5.30.

अतिदुर्गन्धवत् (atidurgandha-va(n)t) *adj.* possessing extremely bad smell अथ तस्याभवद्देहो मूको बधिर एव च । अतिदुर्गन्धवत्पूयस्राववान्कुब्ज एव च GaṇeP. i. 19.41.

अतिदुर्गन्धिन् (ati-durgandh-in) *adj.* emitting very foul odour ममांगमतिदुर्गंधि शापाच्च नृपतेरभूत् SkandP. ii(8). 7.40.

अतिदुर्गन्धिसंयुक्त (atidurgandhi-saṁyukta) *adj.* possessed of things of very foul smell विण्मूत्रैरेव पूर्णं च क्रोशमानं च कुं(?कु)त्सितम् । अतिदुर्गन्धिसंयुक्तं व्याप्तं पापिभिरेव च BrahmVaiP. ii. 33.9.

अतिदुर्गप्रतिस्तब्ध (atidurga-pratistabdha) *adj.* protected or supported by excessive fortifications अतिदुर्गप्रतिस्तब्धं वा सामन्ताटविकतत्कुलीनावरुद्धानामन्यतमेनावग्राहयेत् ArthS'ā. iii. 62.9 (9.3)

अतिदुर्गम (ati-durgama) *adj.* [*f.* -ā] [DEBRU. p. 86] **i** extremely difficult of access, very difficult to reach or traverse शैलोऽतिदुर्गमश्चायं दूरञ्चाहमिहागत: MārkP. 61.28; [जनै: ··· अतिदुर्गमम् । उपेयुषो मोक्षपथं मनस्विनस्त्वमग्रभूमि: S'iśuVa. 1.32; आलयं कल्पयाम्यत्र भूचरैरतिदुर्गमम् PadmP.(Ra.) 6.517; असहाय एव पुरुषोऽतिदुर्गमम् । अपवर्गमार्गमुपगच्छतीश यद्भवति प्रसेदुषि HarVi. 6.142; निष्ठुरतरविस्रपूतिमिश्रितरोमचयातिदुर्गमम् KalyāKā. 2.58; अस्मिन् वनान्तरे ··· मनसोऽप्यतिदुर्गमे BṛKathāK. 56.366; नमो भर्गाय देवाय देवानामतिदुर्गम SkandP. 1(1). 17.187; ब्रूहि मे गमनोपायं पुरे तस्यातिदुर्गमे DevīBhāgP. vi. 22.46; इमा: क्व विन्ध्यस्य भुवोऽतिदुर्गमा: NavaSāC. 4.54; 10.54; तावच्च राजदत्ता सा स्थाने तत्रातिदुर्गमे ।··· स्थिता KathāSaSāg. vii. 2.70; xii. 35.13; त्रिकूटाद्रि: ··· पञ्चाशतं योजनानि विस्तीर्णोऽस्त्यतिदुर्गम: TriṣaS'aPuC. ii. 5.33; पुर्यां प्राकारमतिदुर्गमम् । नानायन्त्रयुतं राजन् कारयित्वा परिव्रज PārśvC. 6.983; घुर्जरभूभृत्कटके ··· अतिदुर्गमे येन । भगदत्तकीर्तिभाजा दुष्टगज: स्वेच्छया नीत: SūktiMu. 0.11; धरणी सकलावगाहिता धनलुब्धेन मयातिदुर्गमा VairāS'.(Ja.) 6; **ii** very difficult to know, inscrutable संबन्धश्च विशेषाणामानन्त्याद‍तिदुर्गम: NyāyMañ. i. 139.9; स्त्रिया: सखे वशं मा गा: स्त्रीचित्तं ह्यतिदुर्गमम् KathāSaSāg. vii. 3.149; **iii** very difficult to be attacked अद्यप्रभृति मे नाम दुर्गेति ख्यातिमेष्यति । दुर्गदैत्यस्य समरे पातनादतिदुर्गमात् SkandP. iv. 72.71; **iv** extremely difficult to climb अहो अस्माभि: ··· अतिदुर्गमा: ··· पर्वता आरूढा: SiṁhāDvā. 153.0 (11); अतिदुर्गमं तं पर्वतमारुह्य योगिनम् ··· दृष्ट्वा नमश्चकार SiṁhāDvā. 154.9 (6); **v** very difficult to cross अतिदुर्गमाम् ··· नदीं प्रवर्तयामास MahāBhā. vii. App. I. 15 (59)

अतिदुर्गम्य (ati-durgamya) *adj.* very difficult of access ददर्श नगरं नृप: ··· दुर्लङ्घ्यमतिदुर्गम्यं रिपूणामपि पुत्रक PañcaRā.(Nā.) i. 4.55.

अतिदुर्गा (ati-durgā) *f.* **i** name of one of the five aspects of goddess Durgā अतिदुर्गामयोमुष्टिगदाहस्तां विचिन्तयेत् S'āraTi. 21.108; **ii** one of the eight-fold powers of Durgā सुलोचना सुभद्रा चातिदुर्गा दुर्गविक्रमा TantraSa.

9. 146.

अतिदुर्गामनु (atidurgā-manu) *m. mantra* of Atidurgā अतिदुर्गामनुं प्रादुर्दिनाख्यं मन्त्रवित्तमाः S'āraTi. 22. 1.

अतिदुर्गाख्या (atidurgākhyā) *adj.* (*f.*) named Atidurgā (the third *ṛk* in the Durgāsūkta) ऋक् तृतीयातिदुर्गाख्या छन्दस्तस्या विराड् भवेत् ĪśānS'i-Pa. i. 24. 3.

अतिदुर्ग्रह (ati-durgraha) *adj.* very difficult to grasp तस्मिन्मथितमात्रे तु शिरस्तस्यातिदुर्ग्रहम् । नारिकेलफलाकारं चतुर्वक्त्रोऽन्वपश्यत VarāP. 53. 15; *m.* great obstinacy or stubbornness सा रूपयौवनोत्सेका नैच्छत्कंचित्पतिं यदा । तदातिदुर्ग्रहक्रुद्धौ पितरौ शपतः स्म ताम् KathāSaSāg. ix. 2. 171.

अतिदुर्घट (ati-durghaṭa) *adj.* [*f.* -ā] **A** very difficult to reconcile, incongruous, incomprehensible अन्यत् प्रकाशते चान्यद्राह्यमित्यतिदुर्घटम् VibhraVi. 39; यद्यात्मा विषयस्तस्याश्चतुरस्रं तदाखिलम् । क्षणिकज्ञानपक्षे तु सर्वमेवातिदुर्घटम् TattvSaṁ. 230; अथ ज्ञानमिति पक्षस्तदा सर्वमतिदुर्घटम् TattvSaṁPañ. 97. 6 (*on* 237); सामानाधिकरण्यादिरेवमस्मिन्न बाधितः । परपक्षे तु सर्वेषां तद्व्यवस्थातिदुर्घटा TattvSaṁ. 1104; परामर्शोऽतिदुर्घटः NyāyMañ. i. 65. 2; ii. 15. 12; असतः कारकैः सत्त्वं जन्मनेत्यतिदुर्घटम् SaṁviSi. 84. 23; यत्किल मायापदे अतिदुर्घटं प्रतिभाति PratyabhiVi. i. 271. 4 (*on* i. 5. 16); इदं कुमारकाणामतिदुर्घटं वचः Nārāy. x. 42. 7; **B** very hard to put together, to accomplish, extremely difficult वर्तमाने वासुदेवे देवदेवे जनार्दने । पुत्रस्य सूतिकागेहाद्धरणं चातिदुर्घटम् DevīBhāP. iv. 1. 23; v. 19. 35; इदं त्वतिदुर्घटम् CaitaCa. 158. 5 (7); **C** very difficult to occur, rare यथा सौरेऽपि यातोऽसौ योगोऽयमतिदुर्घटः BhaviP. 355B. 10 (ii(2). 6. 20)

अतिदुर्घटकारित्वलक्षण (atidurghaṭakāritva-lakṣaṇa) *adj.* which is of the nature of what brings about the impossible स चायं द्वितीयः कार्यकारणभावः ··· अतिदुर्घटकारित्वलक्षणैश्वर्यविजृम्भाभावितात्भुतभावः PratyabhiVi. i. 26. 5 (*on* i. 1. 1); i. 40. 5 (*on* i. 1. 1); ii. 204. 6 (*on* ii. 4. 20)

अतिदुर्घटत्वाशङ्का (atidurghaṭatvāśaṅkā) *f.* suspicion of being very difficult to bring together इयता च उपाये अतिदुर्घटत्वाशङ्का पराकृता PratyabhiVi. i. 35. 9 (*on* i. 1. 1)

अतिदुर्जन (ati-durjana) *adj.* [*f.* -ā] very wicked सा···। जिनशासनमेकान्तात्न श्रद्धत्तेऽतिदुर्जना PadmP.(Ra.) 106. 25; सुजनस्यापि तस्यासीत्परिवारोऽतिदुर्जनः KathāSaSāg. ix. 5. 13; x. 6. 56; *m.* very wicked person अतिदुर्जन इति वक्तव्यम् UttaRāC. 1. 5 (1); अत्यशने विदूरस्थे अत्याढ्ये चातिदुर्जने । कुलहीने च मूर्खे च षट्सु कन्या न दीयते PadmP. v. 49. 97.

अतिदुर्जय (ati-durjaya) *adj.* **i** extremely invincible, very difficult to conquer पू(त्रू)[? शत्रू]णामतिदुर्जयः ··· भीमाख्यो गुणराशिरभून्(? द्भू)पः EI. xxv. 168. 1; तस्मादुर्गं करिष्यामि यदूनामतिदुर्जयम् BrahmP. 196. 11; राजा विद्याप्रभावेण स दुष्टात्मातिदुर्जयः KathāSaSāg. xiv. 3. 70; **ii** very difficult to overcome or cure पिप्पलीमधुसमन्विताभया रक्तपित्तमतिदुर्जयं जयेत् HāriS. iii. 10. 32.

अतिदुर्जर (ati-durjara) *adj.* **i** very difficult to destroy असौ पुराकृतात्पापादप्राप्यार्थं मनोगतम् । प्रत्युतानर्थमाप्नोति महान्तमतिदुर्जरम् PadmP. (Ra.) 105. 251; **ii** very difficult to digest प्रियालमज्जा ··· हृद्योऽतिदुर्जरः स्निग्धो विष्टम्भी चामवर्धनः BhāvPra.(Bhā.) 6(7). 85.

अतिदुर्जात (ati-durjāta) *adj.* very ignobly born सः ··· लोकानप्यतिदुर्जातो देशेऽस्मिन्न्यग्रहीत्तराम् RājTa.(Jo.) 868.

अतिदुर्ज्ञान (ati-durjñāna) *adj.* very difficult to know इदं तु खल्वतिदुर्ज्ञानं यद्विरोधेऽप्यविरोध इति AbhidhKoBh. 55. 19 (*on* 2. 25); नैवेदमतिदुर्ज्ञानं किं मुधे(? धै)वाकुलौ युवाम् BṛKathāS'loSaṁ. 18. 374.

अतिदुर्ज्ञानता (atidurjñāna-tā) *f.* the state of being very difficult to know भूमानमतिदुर्ज्ञानतया परमसूक्ष्मं व्युत्पादयामास Bhām. 201. 19 (*on* i. 3. 8)

अतिदुर्ज्ञेय (ati-durjñeya) *adj.* very difficult to grasp श्रीः ··· चला दीपशिखेवातिदुर्ज्ञेयगतिगोचरा YogVā. i. 13. 18.

अतिदुर्ज्ञेयत्व (atidurjñeya-tva) *n.* the state of being very difficult to grasp वेदान्तवाक्यार्थस्यातिदुर्ज्ञेयत्वात् VedāntKau. 385. 8 (*on* iv. 1. 1)

अतिदुर्णयकारिन् (atidurṇayakār-in) *adj.* which does much injustice (i. e. calamity) कुसुममप्यतिदुर्णयकारि ते किमु वितीर्य धनुर्विधिरग्रहीत् NaiṣC. 4. 91.

अतिदुर्दम (ati-durdama) *adj.* very difficult to resist तथैव प्रथयन् सैन्यसंमर्दमतिदुर्दमः । किरीटिनमनु क्रोधात्ततोऽधावत्स सिन्धुरः PāṇḍaC. 13. 336.

अतिदुर्दर्शन (ati-durdarśana) *adj.* of extremely ominous appearance युधिष्ठिरस्तु कौन्तेयो बभूवास्वस्थचेतनः । अनिष्टदर्शना(v. l. अतिदुर्दर्शना)न्घोरानुत्पातान्परिचिन्तयन् MahāBhā. iii. 176. 40.

अतिदुर्दशा (ati-durdaśā) *f.* extremely unfortunate condition अहोऽतिदुर्दशा नृणां दुर्दैवघटिता द्विजाः PadmP. i. 61. 24.

अतिदुर्दान्ता (ati-durdāntā) *adj.* (*f.*) extremely difficult to control यदा स्त्रियोऽतिदुर्दान्ताः कर्कशाः कलहे रताः । गर्हिष्यन्ति च भर्तारं तदैव प्रबलः कलिः MahNirvāT. 4. 51.

अतिदुर्दिन (ati-durdina) *n.* extremely rainy day दिव्यं क्षौमं शृतं चाम्भो भोजनं त्वतिदुर्दिने AṣṭāHṛ. i. 3. 46.

अतिदुर्दृश् (ati-durdṛś) *adj.* **i** extremely incomprehensible, very difficult to see प्रतिस्रोतोपमं मार्गं गम्भीरमतिदुर्दृशम् । न द्रक्ष्यन्ते रागरक्तास्तमस्कन्धेन चावृताः Sphuṭā. 13. 20 (*on* 2. 9); **ii** highly imperceptible (due to extreme light or lustre) सा ददर्श महाकूटं ···। भूमौ च संस्थितं भास्वज्ज्वालाभिरतिदुर्दृशम् BrahmP. 32. 19.

अतिदुर्धर (ati-durdhara) *adj.* [*f.* -ā] **i** extremely unbearable गृहाणेदं महाबाहो ··· अतिदुर्धरम् । अस्त्रं ब्रह्मशिरो नाम MahāBhā. i. 123. 74; विजृम्भत्यथ चैषीके परमास्त्रेऽतिदुर्धरे । जज्वलुर्देवसैन्यानि MatsyaP. 153. 98; **ii** very difficult to tolerate or endure (feelings, pain, old age etc.) अतिदुर्धरो बान्धवस्नेहः सर्वप्रमाथी HarṣaC. 220. 12; तस्माच्छीघ्रं प्रयाहि त्वं ज्वरां भूपातिदुर्धराम् BrahmP. 146. 14; मन्त्ररूपामिमां गाथां पठन् यस्य शिरः स्पृशेत् । शाम्येत वेदना तस्याशु मूर्ध्नोऽतिदुर्धरा PrabhāC. 30. 9; गन्धको द्रावितः ··· नाशयेत् ··· ग्रहणीमतिदुर्धराम् RasRaSa. 3. 31; **iii** very difficult to hold (i. e. to protect) राज्यं हि नाम ··· अतिदुर्धरम् Kād. 297. 12; **iv** very difficult to control or restrain or subjugate (sense-organs) येनेन्द्रियाणि विजितान्यतिदुर्धराणि SubhāRaSaṁ. 102.

अतिदुर्धरगति (atidurdhara-gati) *adj.* (the impact of) whose movement is difficult to bear त्वद्यात्रासमयेऽतिदुर्धरगतेः सैन्यस्य संमर्दतो द्राक्पिष्टेऽपि शिरोगणे गुणयुगं जज्ञे फणाभृत्पतेः Subhāṣi. 2512.

अतिदुर्धरता (atidurdhara-tā) *f.* the state of being extremely unbearable दितिजगणस्य भीतिमतिदुर्धरतां दधौ क्रियाः स वितरितुं गतोऽदयमनेकपराजयोर्जिताः HarVi. 46. 65.

अतिदुर्धरहिध्मा (atidurdhara-hidhmā) *f.* extremely unbearable hiccup पुष्पाञ्जनम् ···। अतिदुर्धरहिध्माघ्नं विषज्वरगदापहम् RasRaSa. 3. 103.

अतिदुर्धर्ष (ati-durdharṣa) *adj.* extremely invincible (सत्यव्रतः) वसिष्ठेन शप्तः ··· दुर्वेषश्चातिदुर्धर्षः सर्वलोकभयङ्करः DevīBhāP. vii. 12. 11; [very haughty, MW]

अतिदुर्निरीक्ष (ati-durnirīkṣa) *adj.* perceptible with very great difficulty दुर्गाः परेषामतिदुर्निरीक्षा वशंवदा एव वसन्ति सर्वे Raghunā. 3. 11.

अतिदुर्निवार (ati-durnivāra) *adj.* **i** very difficult to remove माने मुहुर्नतिभिरप्यतिदुर्निवारे वाचंयमव्रतमहं तरसाग्रहीषम् UjjvaNīMa. 543. 9; **ii** very difficult to control पयःप्रपूरः स्थिर एव तावत् करोति यावन्न हि सेतुभङ्गम् । भग्ने तु सेतावतिदुर्निवारः समस्तमाप्लावयितुं समर्थः CaitaCa. 101. 20(4)

अतिदुर्न्यस्त (ati-durnyasta) *adj.* very badly placed अतिदुर्न्यस्तो बतायं परप्रत्ययहार्यपेलवमतिरमीमांसको धर्मप्रियः श्रद्दधानो जनः JātaMā. 69. 5; [vacilatling in one's convictions nt.]

अतिदुर्बद्ध (ati-durbaddha) *adj.* very badly related, extremely irrelevant त्वं यच्चात्थ पठन्नास्ते तान्नलिप्यामसाविति । इदमप्यतिदुर्बद्धं सव्याजमिव वाचकम् BṛKathāS'loSaṁ. 22. 55.

अतिदुर्बल (ati-durbala) *adj.* [*f.* -ā] **i** extremely weak नातिदूरे न चासन्न अत्याढ्ये चातिदुर्बले । वृत्तिहीने च मूर्खे च षट्सु कन्या न दीयते BṛParā-Sm. 6. 27; वस्त्रनयनातिभारपीडया गर्दभोऽवसन्नः (v. l. सोऽपि धासाभावादतिदुर्बलः) PañcT. 3. 33 (286. 6); अपि च मयूरकुमारं गौरी कृष्णमतिदुर्बलं स्थूला । स्वमिव प्रच्छायाग्रकमुरसि विलग्नं वहत्येषा PādaTā. 39. 19; ईशं निर्गुणमव्ययप्रकृतिकं संसेव्य भृङ्गी चिराद्यज्जीवत्यतिदुर्बलेन वपुषा मन्ये स एवोत्सवः SaduktiKa. 228. 11; फलतूलधरा वामे सौम्ये शस्त्रासिधारिणी । खड्गस्था बभ्रुवर्णा स्यात् पिशिताशातिदुर्बला CaturCin. ii(1). 100. 6; उपवासेन ··· तमतिदुर्बलं दृष्ट्वा तन्नगरवासिनः ··· प्रोचुः PurusPa. 36. 10; **ii** completely powerless (in authority) बाध्यं तमो मितेः कृत्स्नं तज्जं चाप्यतिदुर्बलम् BṛĀraUBhVā. i. 4. 845; इवार्थः पदवेलायां गृह्यमाणोऽतिदुर्बलः TantrVā. 298. 7 (*on* i. 4. 5); कथमिव संनिधानमात्रात् श्रुत्याद्यपेक्षादतिदुर्बलात्कथंचित्प्राणविषयत्वेन शक्यं व्याख्यातुम् Bhām. 201. 13 (*on* i. 3. 8); विषयाश्चातिदुर्बलाः BhaviP. 175B. 28 (i. 119. 4); पौरोडाशिकमित्यादिसमाख्यास्त्वतिदुर्बलाः MīmāNyāPra. 229. 22.

अतिदुर्बलता (atidurbala-tā) *f.* **i** great weakness सोऽपि घासाभावादतिदुर्बलतां गतः (v. l.) PañcT. 3. 33 (286. 5); **ii** the state of being

exceedingly short विना हेमन्तमगमन्नतिदुर्बलतां निशाः KathāSaSāg. xii. 28. 16.

अतिदुर्बला (atidurbalā) *f.* kind of a tree, AbhidhāMañ. 178. 11.

अतिदुर्बलाङ्गी (atidurbalāṅgī) *adj.* (*f.*) having an extremely weak body कदाचिदुद्यानगतामपश्यत्…पुष्पस्य भङ्गेऽप्यतिदुर्बलाङ्गीम् MatsyaP. 23. 29; PadmP. v. 12. 33.

अतिदुर्बोध (ati-durbodha) *adj.* very difficult to understand, very obscure तदेतन्नातिदुर्बोधम् SaraKaṇṭhā. 247. 6; इदमपि नातिदुर्बोधमिति न व्याख्यातम् SaraKaṇṭhā. 331. 15; 397. 25.

अतिदुर्बोधता (atidurbodha-tā) *f.* extreme difficulty in understanding इत्यन्तस्य श्लोकखण्डस्यातिदुर्बोधतया पुनः संक्षेपेणार्थकथनं प्रतिजानीते Bhāsk. i. 367. 6 (*on* i. 7. 6)

अतिदुर्भग (ati-durbhaga) *adj.* [*f.* -ā] **i** very unfortunate, very unlucky अतिदुर्भगो विकलः। भवति नरो धनरहितः शशिकुजगुरुशुक्रवितनवैः Sārā. 18. 15; कुटुम्बपालनालापस्तव जातोऽतिदुर्भगः BṛKathāS'loSaṁ. 18. 639; दुर्भगा या तु नारी स्यात्पुरुषश्चातिदुर्भगः VarāP. 22. 53; अहोऽतिदुर्भगा लोकाः प्रत्यक्षे केशवे द्विजे। प्रतिमादिषु सेवन्ते PadmP. i. 61. 51; **ii** very ugly, inauspicious (भगः) रोमशो विवृतास्यश्च दृश्यनासोऽतिदुर्भगः SkandP. iv. 37. 39; **iii** (woman) of bad character (सौमिनी) एकं जघान गोवत्सं क्रोशन्तमतिदुर्भगा S'ivaP. iv. 9. 14 (*on* 358B. 12)

अतिदुर्भण (ati-durbhaṇa) *adj.* very difficult to state यः स्वर्गस्य साध्यतां कल्पयति स न नरकपातस्य इत्येतदतिदुर्भणम् TātpaṬ.(U.) 190. 2 (*on* 5. 15); ज्योतिष्टोमादितुल्यत्वं स्मृतीनामतिदुर्भणम् BālaKri. i. 14. 16 (*on* 1. 7)

अतिदुर्भरसंभावना (atidurbhara-sambhāvanā) *f.* extremely great honour अ(ल ? व)निपालमतिदुर्भरसंभावनानिपीडितकरमालिङ्ग्य … महर्षिः … रि-(? वि)धिमहितमन्वतिष्ठत् AvantiKa. 145. 11.

अतिदुर्भरसंरम्भ (atidurbhara-saṁrambha) *m.* extremely unbearable excitement अनुपलक्षितफलश्च लघूक्रियतामयमतिदुर्भरसंरम्भातिभारः SubhaDha. 4. 16 (2)

अतिदुर्भाग्य (ati-durbhāgya) *adj.* very unfortunate, very unlucky ते मन्दास्तेऽतिदुर्भाग्या रोगैस्ते समभिद्रुताः। येषां चित्ते न विश्वासो भवेदम्बार्चनादिषु DevīBhāP. iii. 18. 29; iii. 19. 3.

अतिदुर्भिक्ष (ati-durbhikṣa) *n.* extreme scarcity of food, acute famine (छत्रं) विकृतं यदि दृश्येत … अनावृष्टिभयं घोरं दुर्भिक्षमिति निर्दिशेत् (v. l. अतिदुर्भिक्षमादिशेत्) MahāBhā. ii. App. 28(68); तत्राभूदतिदुर्भिक्षं तथाप्यसासु भक्तिमान्। लोको भक्तादिकं दातुमुपाक्रंस्त PariPar. 11. 41.

अतिदुर्भिद (ati-durbhida) *adj.* very difficult to break अश्मसारमयं नूनं हृदयं मम दुर्हृदः (v. l. मेऽतिदुर्भिदम्) MahāBhā. iii. App. 31(20)

अतिदुर्मति (ati-durmati) *adj.* very ill-minded, extremely wicked महिलार्थे त्वहं विप्र … । हतवान् वाडवकुलं बुद्धिहीनोऽतिदुर्मतिः PadmP. iv. 8. 8; प्रतिक्षणं जनन्येति शिक्ष्यमाणोऽतिदुर्मतिः S'ivaP. ii(1). 17. 34 (61A. 9); तेजोहीनोऽतिदुर्मतिः । … देशान्तरं याति KulārT. 11. 93; अवश्यं दण्ड्य एव स्यात् स पापिष्ठोऽतिदुर्मतिः PāraS. 11. 371.

अतिदुर्मद (ati-durmada) *adj.* excessively arrogant दैत्यानाज्ञापयामास समरे चातिदुर्मदान् S'ivaP. ii(5). 16. 34 (238B. 7); विशङ्कनीयो यवनोऽतिदुर्मदः AlaṅkāMañ. 116. 16.

अतिदुर्मनस् (ati-durmanas) *adj.* very sad, extremely melancholy श्रुत्वा तृणावर्तवधं कंसोऽभूदतिदुर्मनाः ĀdiP. 21. 1; ततोऽशोककरीं राजा व्रणितां तां स तरस्विनीम्। किमिदं निर्भया ब्रूहीत्यपृच्छदतिदुर्मनाः KathāSaSāg. xii. 4. 227; परिस्रुतकरश्च भवति मुहुर्मुहुरतिदुर्मना द्विरदः Hastyāyur. 620. 13 (4. 7); स्वच्छन्देन … विक्रीडितम्। स्मारं स्मारं … पुण्ड्रेक्षुकाण्डादिकं नो काङ्क्षत्यतिदुर्मना बहुविधैर्दुःखैरुपेतः करी MātaLī. 11. 2.

अतिदुर्मनस्क (atidurmanas-ka) *adj.* having a very dejected mind अतिदुर्मनस्कं च दृष्ट्वा पप्रच्छ तं प्रिया KathāSaSāg. vii. 1. 28.

अतिदुर्मनाय (ati-durmanāya-) [*denom.*] to be extremely sad वत्से कैकेयि। किमेवमतिदुर्मनायसे MahāViC. 7. 33(6) (209. 1)

अतिदुर्मनायमान (ati-durmanāyamāna) *adj.* exceedingly dejected एवमतिदुर्मनायमानः पीडयति मां वत्सो माधवः MālaMā. 4. 84.

अतिदुर्मुखी (ati-durmukhī) *adj.* (*f.*) having a very ugly face अंशो नाम प्रजापतिः। मृत्योस्तु दुहिता तेन परिणीताऽतिदुर्मुखी PadmP. v. 8. 3.

अतिदुर्मेधस् (ati-durmedhas) *adj.* having a very wicked mind, of extremely evil intention, dull-witted उवाच विनतां कद्रूस्तव पुत्रोऽतिदुष्कृतम्। कृतवानतिदुर्मेधाः BrahmP. 159. 29; जडो मूकोऽतिदुर्मेधाः…। सोऽपि संजायते वाग्मी वाचस्पतिरिवापरः NityāṢoḍa. 144. 14 (*on* 4. 26); निद्रासक्तातिदुर्मेधा हीनाङ्गी व्याधिपीडिता KulārT. 7. 50.

अतिदुर्लङ्घता (atidurlaṅgha-tā) *f.* the state of being difficult to cross येनातिदुर्लङ्घतया प्रसिद्धः। … लोष्टैर्बद्धो न किं वारिधिः Rāgh. 17. 6.

अतिदुर्लडित (ati-durlaḍita) *adj.* very much pampered, greatly spoilt अतिदुर्लडितः (v. l. अतिदुर्ललितः) पित्रोरभिलषति मध्यमधिशयितुम् SubhāRaK. 5. 19.

अतिदुर्लभ (ati-durlabha) *adj.* [*f.* -ā] extremely difficult to get, very difficult to obtain तमुवाच ततः शक्रः … मतङ्ग परमं स्थानं प्रार्थयन्नतिदुर्लभम्। मा कृथाः साहसं पुत्र MahāBhā. xiii. 29. 2; तमाराध्य हरिं याति मुक्तिमप्यतिदुर्लभाम् ViṣṇuP. i. 11. 46; i. 12. 8; अन्ते श्रीललितादेव्याः सायुज्यमतिदुर्लभम् LalitāSa. 294; मुक्ता भोगास्त्वया सार्धं ये मर्त्यैरतिदुर्लभाः MārkP. 109. 20; भावानामनुमानेन प्रसिद्धिरतिदुर्लभा VākyaPa. 1. 32; विदुषीव दर्शनममुष्य युवतिरतिदुर्लभं पुनः S'is'uVa. 15. 94; अतिदुर्लभानामपि वराणां दातारो भवन्ति Kād. 62. 6; कथम् अतिसुलभः अतिदुर्लभः। पश्चादतिना समासः Kātan-Vṛ. *on* iv. 1. 25; (मेदसंसिद्धिः) सा चैकात्म्येऽतिदुर्लभा BṛĀraUBhVā. i. 4. 416; iv. 4. 1021; रसिकासुखसंभोगो निर्जने चातिदुर्लभः BrahmVaiP. iv. 30. 75; iii. 38. 79; युक्तं नाम प्रमाणस्य तदेव त्वतिदुर्लभम् NyāyMañ. i. 51. 16; i. 194. 3; वाक्यार्थबोधमतिदुर्लभमेव मन्ये SaṁkṣeS'ā. 1. 95 (i. 87. 11); इत्ययं मारिषाङ्कः स्यात्पृथिव्यां नातिदुर्लभः YuktiKa. 152. 13; निश्चयौ गलितौ यस्य ज्ञस्यासावतिदुर्लभः (मोक्षः) YogVā. iv. 57. 33; रामप्रसादाच्छबरी मोक्षं प्रापातिदुर्लभम् AdhyāRā. iii. 10. 41; जाते तत्राथ दुर्भिक्षे भिक्षाभक्तेऽतिदुर्लभे। सा रात्रौ … ययौ SamaMā. 2. 60; अमृतवृष्टिमें समायातातिदुर्लभा BṛNāraP. 11. 107; तस्यापि सप्तमी शुक्ला गङ्गायामतिदुर्लभा PadmP. iv. 85. 41; योगिनां याज्ञिकानां च तत्स्थानमतिदुर्लभम् ĀdiP. 9. 6; निःशङ्कं वरयाशु त्वं सर्वं दास्येऽतिदुर्लभम् GaṇeP. ii. 38. 54; लब्ध्वा तदर्धाध्यारोहं भर्तुः प्रेम्णातिदुर्लभम् RājTa.(Ka.) 8. 82; मातरं मूर्च्छितां पश्यन्मत्वै(? त्वे)वाम्भोऽतिदुर्लभम्। निजाभ्यामेव नेत्राभ्यामानिन्येऽम्बु युधिष्ठिरः PāṇḍaC. 7. 334; तयोर्द्वयोः प्रीतिकरः प्रदिष्टो बन्धो नराणामतिदुर्लभोऽयम् PañcSā. 5. 7; अथ भूतलिपिं वक्ष्ये सुगोप्यामतिदुर्लभाम् S'āraTi. 7. 1; सर्वान्कामानवाप्नोति मुक्तिमप्यतिदुर्लभाम् ĪśānS'iPa. i. 27. 11; कुब्जाकारातिदुर्लभा। योषिद्वृद्धापि KathāKau. 11. 41; कथं तर्हि अतिसुलभम् अतिदुर्लभमिति। यदा स्वती कर्मप्रवचनीयौ तदा भविष्यति SiddhāKau. 577B. 21; घोरेऽस्मिन्कलिकालके … मानुष्यं ह्यतिदुर्लभम् ParamāKā. 20. 141.

अतिदुर्लभतरत्व (atidurlabhatara-tva) *n.* nature of being extremely harder to obtain इदं च पुनर्यौवनमपुनरागमनेनातिदुर्लभतरत्वादत्युत्कृष्टम् RasGaṅ. 474. 8.

अतिदुर्लभत्व (atidurlabha-tva) *n.* nature of being extremely hard to obtain सायुज्यस्यातिदुर्लभत्वविशेषत्वं कैवल्यद्योतकम् LalitāSaBh. 224. 14(294)

अतिदुर्लभसूर्यभास् (atidurlabha-sūryabhās) *adj.* where the sunlight is excessively difficult to obtain अतिदुर्लभसूर्यभासि यस्मिन्…फणिनोऽरुणकान्तिभिश्शिरस्थैर्मणिभिर्बालमिवातपं वहन्ति NavaSāC. 5. 8.

अतिदुर्लम्भ (ati-durlambha) *adj.* excessively hard to obtion सुदुर्भ्यां केवलाभ्यां परस्य लभेर्नुम् न भवति। सुलभः दुर्लभः। केवलादिति किम्। अतिसुलम्भः अतिदुर्लम्भः CāndraVṛ. *on* v. 4. 22; केवलाभ्यामेवेष्यते तेन। अतिसुलम्भः अतिदुर्लम्भः KātanVṛ. *on* iv. 1. 25; अभक्तिभाजां त्वमिहातिदुर्लम्भतोऽतिदुर्लम्भ ऋतं ब्रवीमि DvyāśraKā. 10. 79; क्व कुरङ्गारिसंचारघोरकान्तारभूरियम्। पुण्यैरप्यतिदुर्लम्भः क्व चैष मुनिकुञ्जरः PāṇḍaC. 9. 367; न किंचिदतिदुर्लम्भं सत्त्वनिर्णिक्तचेतसाम् PāṇḍaC. 18. 144; केवलाभ्यां किम्। सुप्रलम्भः अतिदुर्लम्भः SiddhāKau. 577B. 21.

अतिदुर्लम्भतस् (atidurlambha-tas) *adv.* due to excessive difficulty in attainment अभक्तिभाजां त्वमिहातिदुर्लम्भतोऽतिदुर्लम्भ ऋतं ब्रवीमि DvyāśraKā. 10. 79.

अतिदुर्लम्भसंभव (atidurlambha-sambhava) *adj.* extremely difficult to beget पुत्रास्तु सत्सु युष्मासु नातिदुर्लम्भसम्भवाः PāṇḍaC. 13. 1020.

अतिदुर्ललित (ati-durlalita) *adj.* very much pampered, greatly spoilt कृष्णे रोषोक्तयस्तासां वामः … अतिदुर्ललितः UjjvaNīMa. 547. 13.

अतिदुर्ललितता (atidurlalita-tā) *f.* the state of being very much pampered or greatly spoilt अतिदुर्ललिततया जनन्याः क्रोडे स्वपिति LaṭaMe. 2. 5(5)

अतिदुर्वचस् (ati-durvacas) *n.* very bad statement क्लिष्टकल्पनयैवात्र साध्यमित्यतिदुर्वचः AnuVyā. 39A. 9 (*on* 3. 2)

अतिदुर्वर्णता (atidurvarṇa-tā) *f.* excessively bad complexion or impurity कालात्सक्रिमिरेव रोहति चिरारूढोऽतिदुर्वर्णता स्यादत्यन्तविदग्धलक्षणमिदं वक्ष्ये चिकित्सामपि KalyāKā. 21. 26.

अतिदुर्वल (ati-durvala) *adj.* very weak, feeble, emaciated कासमानो हयो दीर्घं भिन्नरोमातिदुर्वलः AśvaVai. 34. 7; cf. **अतिदुर्बल**.

अतिदुर्वह (ati-durvaha) *adj.* **i** very difficult to carry इदानीं पुनरुत्क्रान्तवायुरतिदुर्वहो देहबन्धः AnargharRā. 6. 80(1); **ii** very hard to bear अतिदुर्वहश्चायं संसारदुःखभारः NyāyMañ. ii. 78. 20; अथातिदुर्वहजराविकलस्य को नु प्रत्येतु BhāvVi. 106; उद्वोढव्यः पञ्चमहाव्रतभारोऽतिदुर्वहः TriṣaŚaPuC. iii. 3. 98.

अतिदुर्वहत्व (atidurvaha-tva) *n.* the state of being excessively hard to bear अतिदुर्वहत्वाच्छोकभारस्य न शक्नोमि प्राणान् धारयितुम् VeṇīSaṁ. 3. 218.

अतिदुर्वार (ati-durvāra) *adj.* extremely irresistible उत्तरेणातिदुर्वारं शरासारं वितन्वता । तिरश्चक्रे क्षणं शल्यस्तोयदेनेव भानुमान् PāṇḍaC. 13. 74.

अतिदुर्विदग्ध (ati-durvidagdha) *adj.* extremely ill-mannered, very arrogant अतिदुर्विदग्धेन केनापीदं वाक्यं प्रक्षिप्तमित्याशङ्कामहे BrahmSūBh. (Bhā.) 208. 28 (*on* iii. 4. 26)

अतिदुर्विध (ati-durvidha) *adj.* in a very poor condition, very miserable लोको दुर्लभदर्शन सर्वोऽनेनातिदुर्विधः । यच्छता वाञ्छितं द्रव्यं जनितः पार्थिवोपमः PadmP.(Ra.) 35. 69.

अतिदुर्विधवत् (atidurvidha-vat) *adv.* like one in a very poor condition आत्मा … अतिदुर्विधवद्देहगेहे कर्मरतः सदा YogVā. v. 35. 9.

अतिदुर्विनीत (ati-durvinīta) *adj.* excessively ill-behaved, wicked अयमेवातिदुर्विनीतो योऽसमये त्वामिहाजुहाव GopāKeCan. 50. 3.

अतिदुर्विषह (ati-durviṣaha) *adj.* extremely unbearable ब्रह्मतेजसातिदुर्विषहेण दन्दह्यमानेन वपुषा सहसोच्चचाट सैव देवी BhāgP. v. 9. 17; अस्मिन् क्षणे यदि शरं क्षिपसीह तिष्ठन्हन्यास्तदैकमतिदुर्विषहागसं तम् JānaPa. 6. 38.

अतिदुर्विषह्य (ati-durviṣahya) *adj.* very difficult to bear, extremely unbearable सोढासि वज्रविशिखानतिदुर्विषह्यान्दुःखं ममात्र सुभगे द्विगुणत्वमेति Vṛṣabhānujā 2. 13.

अतिदुर्विहित (ati-durvihita) *adj.* very badly done, wrongly enjoined अतिदुर्विहितं यत्तु कः समर्थयितुं क्षमः । अत्यन्तपूतिबीजस्य कर्षकः किं करिष्यति PramāVāBh. 397. 21.

अतिदुर्वृत्त (ati-durvṛtta) *adj.* extremely ill-behaved किं करोम्यतिदुर्वृत्तं मनो मग्नमिदं त्वयि RāmāMañ. 147. 2; इति यन्मनुवचनं तदतिदुर्वृत्तवर्णविषयम् Mitā. 283. 11; नराः । भविष्यन्त्यतिदुर्वृत्ताः सर्वथा पापकारिणः MahNirvāT. 1. 66; हिरण्याक्षोऽतिदुर्वृत्तः AdhyāRā. vi. 10. 48.

अतिदुर्वृत्ति (ati-durvṛtti) *adj.* of extremely bad behaviour श्रूयतां चातिदुर्वृत्तेः कलेर्वृत्तम् ParamāKā. 47. 72.

अतिदुश्चर (ati-duścara) *adj.* extremely difficult to practise (áti duścára) धर्मान्नातिदुश्चरम् TaiĀ. x. 62. 1 (882. 1); विश्वामित्रो महाभाग तपः कृत्वातिदुश्चरम् । … मोहितश्च … वने मेनकया DevīBhāP. i. 14. 66; ततोऽतिदुश्चरं चक्रे तपो विस्मयकारकम् PadmP. iv. 72. 36; अदितिः … तपस्तेपेऽतिदुश्चरम् BṛNāraP. 10. 35.

अतिदुःशका (ati-duśśakā) *adj.* (*f.*) quite unable, incapable चेदियं प्रेयसा हातुं क्षणमप्यतिदुश्शका । परमप्रेमवश्यत्वान्माधवीति तदोच्यते UjjvaNīMa. 141. 1.

अतिदुःशील (ati-duśśīla) *adj.* extremely ill-behaved or ill-disposed सः … पूर्वमप्यतिदुश्शीलो न दैन्यं कर्तुमर्हति MahāBhā. x. 2. 27; वदन्तमतिदुःशीलं कस्त्वमित्याह पार्थिवः MārkP. 8. 85.

अतिदुःश्रव (ati-duśśrava) *adj.* extremely painful to hear, quite unpleasant to hear येनातिदुःश्रवमसाधु कृतं तु कर्णे VeṇīSaṁ. 5. 171; अतिदुःश्रवः … परिदेवितध्वनिः PārthPa. 20(15); अमरकुलैः श्रूयमाणोऽतिदुःश्रवः । … विदधे बाहुबलिना सिंहनादः TriṣaŚaPuC. i. 5. 601; जीवयशास्तेषां वचः श्रुत्वातिदुःश्रवम् । …अखिद्यत PāṇḍaC. 12. 56.

अतिदुष् (ati-duṣ-) IV. P. to be extremely faulty, defective सर्गबन्धो महाकाव्यमारब्धं संस्कृतेन यत् । तादात्म्यमजहत्तत्र तत्समं नातिदुष्यति AgniP. 336. 25.

अतिदुष्कर (ati-duṣkara) *adj.* [*f.* -ā] very difficult to perform, practise, or achieve (áti duṣkára) दानान्नातिदुष्करम् TaiĀ. x. 62. 1 (881. 3); उपकारः सखीभर्त्रा कृतोऽयमतिदुष्करः MārkP. 72. 27; स्त्रीपतिर्भविता भूयस्तात्तैतदतिदुष्करम् MārkP. 126. 31; स्ववंशप्रभवैर्दैत्यैः कृतो द्वेषोऽतिदुष्करः ViṣṇuP. i. 16. 13; येनायं माम् … अतिदुष्करे कर्मणि समादिष्टवान् HarṣaC. 249. 6; यथेदमतिदुष्करमत्यन्तसत्वाभिधानं तथात्यन्तासत्वाभिधानमपि PramāVāSvopVṛ. 117. 28; नेदमतिदुष्करमाचार्यशस्त्रप्रभावाणाम् VeṇīSaṁ. 2. 64; कथमेतदतिदुष्करमिव मन्ये MahāvīC. 6. 37 (1); इदमतिदुष्करं प्रतिसंविधानमापतितमस्य रघुशिशोः MahāvīC. 6. 47 (4); द्वैपायनस्यापि…मातृसंबन्धभ्रातृजायापुत्रजननम् … नातिदुष्करम् TantrVā. 134. 20 (*on* i. 3. 7); यागादिकमपि … अतिदुष्करम् ŚivārkaMaDī. ii. 225. 23 (*on* iii. 2. 1); चेतः संकल्पमम्बरम् । न करोति न चाप्नोति दुर्गमप्यतिदुष्करम् YogVā. iv. 45. 8; एतच्चातिदुष्करं देव्याः यद् दुःख ? … पञ्चाग्नीं समासादयति ? TāpaVa. 4. 9(8); यत एषोऽपि संयमोऽतिदुष्करः ManuBh. i. 444. 6 (*on* 5. 53); सखे । अतिदुष्करमुपन्यस्तम् SubhaDha. 3. 6 (12); ते प्रणयी जनः । नियोजितश्चातिदुष्करे देवताराधनकर्मणि TilaMañ. 31. 14; आहितो हेलयैवातिदुष्करो मे कन्यारत्नलाभः TilaMañ. 290. 15; क्लेशेन वर्णमाला स्मर्येतापि, तदभ्यधिकपदवति तु वाक्ये सातिदुष्करा TattvBi. 89. 2; स्त्रीणां स्वत्वामिविच्छेदो मरणादतिदुष्करः BrahmVaiP. iv. 46. 2; दृष्टं च यदल्पबलवीर्यबुद्धीनामशक्यमतिदुष्करं वा Bhām. 373. 4 (*on* ii. 1. 33); इतश्च किमतिदुष्करं भविष्यति PratyabhiVi. ii. 141. 4 (*on* ii. 3. 17); पुण्यतीर्थे कृत येन तपः काप्यतिदुष्करम् Hitopa. 0. 15; अतिसाहसमतिदुष्करमत्याश्चर्यं च दानमर्थानाम् KalāVi. 2. 46; ŚārṅgaPa. 429; यस्मादसौ क्रियमाणो भवेदेव नातिदुष्करः Mitā. 369. 15 (*on* 3. 65); तपस्तप्त्वातिदुष्करम् । मृत्युकाले गतिर्या स्यात्तां गतिं याति मानवः BṛParāSm. 12. 182; तद्धृदयं येभ्यस्तेभ्योऽतिदुष्करेभ्योऽप्यकम(? म्प)नीयव्यवसायम् Loc. 111. 21 (*on* 2. 28); कृत्वातिदुष्करं कर्म … राममेवाजगाम शरः RāmāMañ. 178. 22; अवहेलया यदकरोत्स किमप्यतिदुष्करं किमपि येन विधेः PṛthvīVi. 3. 28; शिवबीजैपानमतिदुष्करं पुरा विरचय्य … वमनं व्यधीयत हिरण्यरेतसा PṛthvīVi. 9. 79; इत्थं प्रभोर्विजयसिंहमुनीश्वरस्य वृत्तं पवित्रमतिदुष्करमल्पसत्त्वैः PrabhāC. 46. 6; अत्र चित्रपटाजीवे नमस्कारोऽतिदुष्करः PrabhāC. 199. 27; 105. 31; अतिदुष्करं परपुरप्रवेशमिव योगिनामीशः MohaRāPa. 5. 44; चारित्रं चातिदुष्करम् SamarāSaṁ. 1. 298; श्रामण्यमतिदुष्करम् SamarāSaṁ. 3. 181; अतिदुष्करमन्यदप्युदग्रं कृतवन्तो मनुजात् कथं बिभीमः Rāgh. 15. 43.

अतिदुष्कर (ati-duṣkara) *n.* very difficult task कष्टमतिदुष्करं करोति Nāgā. 4. 4(13); अपि पाशुपतास्त्रेण विद्धश्चैन्न ममार यः । निष्फलेषुविनुन्नाङ्गो नह्युपतील्यतिदुष्करम् BṛĀraUBhVā. i. 4. 833; नृपः प्राह कुमारातिदुष्करं भवता कृतम् SamarāSaṁ. 9. 316.

अतिदुष्करकारिता (atiduṣkarakāri-tā) *f.* performance of a very difficult task तत् … मुनेरतिदुष्करकारितया कमपि प्रभावप्रकर्षमवद्योतयति VyaktiVi. 46. 9; Kāvyānu.(He.) 211. 22.

अतिदुष्करकारिन् (atiduṣkarakār-in) *adj.* [*f.* -iṇī] doing a very cruel act त्वयापविद्धा सा दूरमतिदुष्करकारिणा JātaMā. 160. 2 (20. 27); **ii** doing a very difficult thing अतिदुष्करकारिणीश्चैनामवगच्छामि PādaTā. 31. 14.

अतिदुष्करकार्य (atiduṣkara-kārya) *n.* extremely difficult task अतिदुष्करकार्याणां भवत्येव विचक्षणा MalliC. 7. 309.

अतिदुष्करत्व (atiduṣkara-tva) *n.* the state of being very difficult to perform तितिक्षायाश्चातिदुष्करत्वेन राजधर्मेषु विशिष्योपादानम् VīraMi. (Rājanīti.) 135. 23.

अतिदुष्करदुष्कर (atiduṣkara-duṣkara) *adj.* which is most difficult among difficult ones वत्स माभिग्रहं कार्षीरतिदुष्करदुष्करम् PariPar. 8. 143.

अतिदुष्करवस्तु (atiduṣkara-vastu) *n.* very difficult thing to do अतिदुष्करवस्तुसंपादनाप्रतीघातरूपा परमेश्वरस्य मायाशक्तिः PratyabhiVi. ii. 234. 4 (*on* iii. 1. 8)

अतिदुष्कृत (ati-duṣkṛta) *n.* great sin तव पुत्रोऽतिदुष्कृतम् । कृतवान् BrahmP. 159. 29.

अतिदुष्कृतकर्मन् (atiduṣkṛta-karman) *adj.* committing a great sin अतिदुष्कृतकर्माहं कथं भोक्ष्ये कथं स्वपे PadmP. iv. 110. 459.

अतिदुष्कृतवत् (atiduṣkṛta-va(n)t) *adj.* who has committed a very heinous sin or crime काश्यामतिदुष्कृतवानपि । यायात् … विष्णोः परमं पदम् SkandP. iv. 30. 16.

अतिदुष्कृतिन् (ati-duṣkṛtin) *adj.* given to wicked deeds वणिक्पुत्रः पापोऽयमतिदुष्कृती KathāSaSāg. vi. 2. 29; पीडयतीमं देशं बको नराशोऽतिदुष्कृती YudhiVi. 1. 55.

अतिदुष्ट (ati-duṣṭa) *adj.* [*f.* -ā] **1** extremely wicked, very cruel, very bad अतिदुष्टस्य तन्मात्रं त्यजेच्छित्वात्मशुद्धये BṛhaspaSm. 363. 75; VāmaP. 86. 6; मित्ररूपेण वर्तेत ह्यतिदुष्टः सदैव सः PadmP. ii. 12. 2; RājTa.(Ka.) 4. 121; या पुनरतिदुष्टा स्त्री SmṛtiCan. iv. 659. 1; PañcSā. 2. 13; AnaṅgaRa. 4. 15; Nārāy. vii. 24. 8; अतिदुष्टाङ्कुशमिता दीर्घादुष्टा ŚukraNī. 4(7). 99; **2** extremely deranged or upset दोषेभ्य एवातिदुष्टेभ्यः … वदन्त्यामस्य संभवम् AṣṭāHṛ. i. 13. 26 = AṣṭāSaṁ. i. 114. 2 (1. 21); श्लेष्मोपरुद्धगमनः । पवनोऽतिदुष्टः RasRaSa. 13. 45; *m.* *Asteracantha longifolia* [PW]

अतिदुष्टगजसंयमन (atiduṣṭagaja-saṁyamana) *n.* controlling an extremely wicked elephant आविश्य तासु पुरुषः स्थितवानयं हि मत्तातिदुष्टगजसंयमनाय नित्यम् MātaLi. 12. 18.

अतिदुष्टचित्त (atiduṣṭa-citta) *adj.* of a very wicked mind बालोऽति-

दुष्टचित्तोऽयं नानेनार्थोऽस्ति जीवता VisṇuP. i. 19. 60.

अतिदुष्टचेष्ट (atiduṣṭa-ceṣṭa) *adj.* acting very wickedly तस्यातिदुष्टचेष्टस्य लक्ष्मीः …। अभूदुद्वेगजननी RājTa.(Ka.) 4. 121.

अतिदुष्टत्व (atiduṣṭa-tva) *n.* A extreme defectiveness विकल्पस्य चातिदुष्टत्वात् समुच्चय एव SaṅkarKāBh. 150. 2 (*on* iii. 2. 68); B extreme wickedness इत्यतिदुष्टत्वादष्टगुणं दण्डं दाप्यः Aparā. 681. 6 (*on* 2. 82)

अतिदुष्टधी (atiduṣṭa-dhī) *adj.* of a very wicked thought भवतानुगृहीतोऽसि मुने पापोऽतिदुष्टधीः SkandP. ii(7). 18. 1.

अतिदुष्टमनस् (atiduṣṭa-manas) *adj.* of a very wicked mind अतिदुष्टमनाः सा तु पत्नी धूम्राक्षरक्षसः GaṇeP. ii. 14. 36.

अतिदुष्टमृग (atiduṣṭa-mṛga) *m.* very cruel beast चमरीगणोऽयमतिदुष्टमृगोपगतः PadmP.(Ra.) 42. 59.

अतिदुष्टसंहारिन् (atiduṣṭa-saṁhārin) *adj.* destroyer of very wicked persons अतिदुष्टसंहारिणः … रामलक्ष्मणभरतशत्रुघ्नाः … दिवमारूढाः VisṇuP. iv. 4. 102.

अतिदुष्टात्मन् (atiduṣṭātman) *adj.* of a very wicked nature यक्षे तुष्टेऽतिदुष्टात्मा चिन्तयामास चेतसि PariPar. 3. 35.

अतिदुष्टासृक्स्राविन् (atiduṣṭāsṛksrāv-in) *adj.* discharging extremely impure blood पूतिः पूयातिदुष्टासृक्स्राव्युत्सङ्गी चिरस्थितिः RugVi. 42. 7.

अतिदुष्पूर (ati-duṣpūra) *adj.* very difficult to fill धिगिदमतिदुष्पूरमुदरम् SubhāRaK. 42. 4.

अतिदुष्प्रवृत्ति (ati-duṣpravṛtti) *f.* very bad tendency अमी भविष्यन्त्यतिदुष्प्रवृत्तिनिवृत्तिशि(क्षा) गुरवः शरा मे RāmC. (App.) (2). 39. 33.

अतिदुष्प्राप (ati-duṣprāpa) *adj.* [*f.* –ā] very difficult to obtain, extremely inaccessible प्राप्ता क्षणेनैव (v. l. अतिदुष्प्रापा) मनःपवनगामिनी MahāBhā. iii. App. I. 6 (66); ब्रह्मैव सातिदुष्प्रापा…परा शक्तिः DevīBhāP. iii. 18. 36; YogVā. v. 24. 19; दुर्लभस्त्वतिदुष्प्रापे यवाषे तु पुमानयम् Nānārtha-Saṁ. ii. 130. 946.

अतिदुःषमा (atiduṣṣamā) *f.* (Jain.) name of one of the six divisions of time in the stage called *avasarpiṇī* (declining age) तन्नामान्यनुकीर्त्यन्ते … षष्ठ्यतिदुःषमा । भेदा इमेऽवसर्पिण्याः MahāP. 3. 18; SamarāSaṁ. 9. 482.

अतिदुस्तर (ati-dustara) *adj.* [*f.* –ā] i very difficult to cross (space) सागरश्चापि दुस्तरः (v. l. श्चातिदुस्तरः) MahāBhā. iii. 267. 24; HarṣaC. 197. 4; अन्ये संसारकान्तारं निनिन्दुरतिदुस्तरम् PadmP.(Ra.) 78. 39; SkandP. i(2). 50. 69; तीर्णो रणाम्बुधिरभूदतिदुस्तरोऽपि Jīvān. 419. 4; ii very difficult to pass or overcome (abstract things) ध्रुवे प्रत्युक्तामसुरैस्तां मायामतिदुस्तराम् BhāgP. iv. 10. 29; ParaS. 26. 81; व्यामोहजालमतिदुस्तरमेव TattvPradī.(A.) 295. 3 (*on* 3. 19); BrahmP. 139. 10; KathāSaSāg. xiii. 1. 21; अम्बुजपलाशलोचने कश्मलो भवति तेऽतिदुस्तरः GopāKeCan. 97. 5; PārśvC. 6. 429; तस्योपद्रवेऽस्माकमनुतापोऽतिदुस्तरः PrabhāC. 77. 21; MahNirvāT. 3. 121; iii very difficult to cure बालबिल्वम् …। हन्ति … ग्रहणीमतिदुस्तराम् SiddhYo. 4. 11; 41. 22; अतिदुस्तरा । लूतामयकृता व्यापदुदपद्यत मण्डले RājTa.(Ka.) 4. 524; iv very difficult to understand अतिदुस्तराणि सुतरामालोड्य शास्त्राण्यसौ SarvaDaSaṁ. 1. 9; v very difficult to escape स्ववध्याप्यतिदुस्तरा VāmaP. 17. 49.

अतिदुस्त्यज (ati-dustyaja) *adj.* extremely difficult to abandon, very difficult to discard पुरातनैरतिदुस्त्यजैर्भृत्यैरिव मलिनैः कर्मभिः HarṣaC. 297. 8; PadmP.(Ra.) 119. 35; अतिदुस्त्यजमेतस्मिँल्लोके विषयसेवनम् BṛBrahmaS. iii. 4. 39.

अतिदुःसंचर (ati-dussañcara) *adj.* very difficult to tread सोऽतिदुःसंचरो येन विदग्धकवयो गताः VakroJī. 57. 17.

अतिदुःसंपाद (ati-dussampāda) *adj.* very difficult to establish यस्य शब्दार्थसंबन्धानामनित्यत्वं तस्य तदाश्रयव्यवहारनित्यत्वं किमाधारं भविष्यतीत्यतिदुःसंपादम् TantrVā. 170. 22 (*on* i. 3. 10)

अतिदुःसह (ati-dussaha) *adj.* [*f.* –ā] very hard to bear or endure, most unbearable मुमोचाविषहं प्रभुः । भृग्वङ्गिरोमन्युभवं क्रोधाग्निमतिदुःसहम् MahāBhā. vii. 24. 86; आदत्त पार्थोऽञ्जलिकं निषङ्गात् … समानक्रव्यादमिवातिदुःसहम् MahāBhā. viii. 67. 18; वाक्यशल्यमतिदुःसहम् MahāBhā. ix. 340*(1); एनं विवेश पवनो लघु । शीतोऽतिरूक्षः … अतिदुःसहः VisṇuP. i. 19. 22; दुःखम् …। कामेर्ष्याक्रोधसम्बन्धं यौवने चातिदुःसहम् MārkP. 11. 29; AṣṭāHṛ. iii. 13. 12; शीतोष्णमतिदुःसहम् VarāṅgaC. 5. 95; संसारदुःखमतिदुःसहमश्नुवीत SaṁkṣeS'ā. 3. 6 (ii. 151. 24); अतिदुःसहं वचनम् TilaMañ. 29. 8; दुःखानि यानि नरकेष्वतिदुःसहानि…। सर्वाणि तानि मनुजस्य भवन्ति लोभात् SubhāRaSaṁ. 80; 150; 253; नैषातिदुःसहा क्षुन्माम् … बाधते BhāgP. x. 1. 13; गुटिका शमयत्याशु शूलं चैवातिदुःसहम् SiddhYo. 26. 12; दारिद्र्यम् … अतिदुःसहम् SamarāSū. 48. 39; सतीतेजोऽतिदुःसहम् BṛKathāMañ. 7. 238; 11. 25; 16. 512; RāmāMañ. 165. 4; वियोगः प्रियया चोपनतोऽतिदुस्सहो मे AlaṅkāSa. 160. 1; महाभये घोरे प्राणिनामतिदुःसहे RājTa.(Ka.) 2. 26; 7. 1182; अभूत् … तेजोभिरतिदुःसहैः । जगतोऽपि स मूर्धन्यः TriṣaS'aPuC. ii. 2. 8; (समुद्रदत्तः) स्तब्धाङ्गः कीलित इव स्मरास्त्रैरतिदुःसहैः TriṣaS'aPuC. iv. 4. 80; राक्षसाः क्रूरकर्माणः …। रामस्तान् योधयत्वित्थं युक्तिरेवातिदुःसहा YogVā. i. 8. 17; ऊर्जितं वो ध्रुवं राज्यादिदानीमतिदुःसहम् PāṇḍaC. 10. 430; आचार्यीयः शरोत्करः । … अभूदतिदुःसहः PāṇḍaC. 13. 497; (द्रोणः) लम्भितो वचनैस्तैस्तैर्दाक्षिण्यमतिदुःसहम् PāṇḍaC. 13. 501; वीराणां हि शिरश्छेदान्नासाच्छेदोऽतिदुःसहः Surath. 9. 66; शूराणां सिंहनादोऽतिदुःसहः RauhiC. 193; UttaKuC. 70; क्रोधाग्निमतिदुःसहम् PratāYaBhū. 307. 4; गलनेत्रामयाद् दुष्टविस्फोटो ह्यतिदुःसहः RājTa.(Prā.) 356; HammīMaKā. 5. 4; क्रमेलकस्य … अतिदुःसहा भैरवयातनाभूत् TristhaSe. 115. 13; KaṁVa. 6. 22 (2); युद्धान्यप्यतिदुस्सहानि … अभूवन् ParamāKā. 12. 83; Rāgh. 18. 45; दादाराघवपादैर्वो विश्लेषो नोऽतिदुःसहः AlaṅkāMañ. 118. 14; तव प्रतापः…दिवा भानुरिवातिदुःसहः AlaṅkāMañ. 234. 3; वनिताजनानामितरवनिताप्रशंसनमतिदुःसहमेव RasSa. 97 (3); 144 (3)

अतिदुःसहकर (atidussaha-kara) *m.* extremely unbearable (i. e. very heavy) taxes रविवत्र चातिदुःसहकरतापितभूः कदाचिदसि KāvyPra. 651. 4; 2 extremely unbearable rays (of the sun), KāvyPra. 651. 4.

अतिदुःसहतर (atidussaha-tara) *adj.* most unbearable अतर्कितमवेक्ष्य … सख्युर्व्यसनम् अतिदुःसहतरम् ĀnandRa. 7. 28 (2)

अतिदुःसहता (atidussaha-tā) *f.* the state of being very hard to bear, unbearableness विरहिणामतिदुःसहतां गताः…क्षपाः NemiNir. 6. 45.

अतिदुःसहत्व (atidussaha-tva) *n.* the state of being very hard to bear, unbearableness तत्र शीतलोदकस्नानस्यातिदुःसहत्वात् … भगवन्तमिदमुवाच S'aṅkaVi.(Ā.) 235. 3; तेषां विरहिदशा प्रियसंगमदशा चेति …। पूर्वस्यास्त्वस्यास्त्वतिदुःसहत्वेन सर्वेषां भावानामुपमर्देन तिरोधानेनोपदेशो न भवति AṇuBh. 324. 1 (*on* iv. 2. 10); Kuval. 88 (1); जाज्वल्यमानाग्निमध्यस्थितस्येव संसारावस्थितेरतिदुःसहत्वात् प्रपत्त्युत्तरक्षणमोक्षकाम आर्तः YatīndraDī. 77. 17.

अतिदुःसहदर्शन (atidussaha-darśana) *adj.* sight of which is extremely unbearable तदलमतिदुःसहदर्शनैः पदार्थैः SubhaDha. 3. 7 (1)

अतिदुःसाधन (ati-dussādhana) *adj.* very difficult to attain or manage राज्यं हि नाम…महासाधनप्रसाध्यतयैवातिदुःसाधनम् Kād. 297. 10.

अतिदुःसाध्य (ati-dussādhya) *adj.* [*f.* –ā] very difficult to perform कार्यं ममातिदुःसाध्यम् DevīBhāP. iv. 5. 50; आत्महत्यातिदुःसाध्या कथं त्वं कर्तुमुद्यतः DevīBhāP. v. 2. 25.

अतिदुःस्थ (ati-dussthа) *adj.* i very badly placed, most miserable पुत्रान् पिता किमपराधशतैः समेतान् संत्यज्य लोभरहितः कुरुतेऽतिदुःस्थान् DevīBhāP. v. 7. 29; ii most unlikely, inappropriate अतिदुःस्थोऽप्रबोधोऽत्र ह्यात्मैवास्य प्रबुद्धता NaiṣkaSi. 170. 3.

अतिदुःस्थता (atidusstha-tā) *f.* i extremely miserable condition, extreme poverty अतिदुःस्थतया चैष दुर्निरीक्ष्यो नृणामभूत् PārśvC. 5. 4; ii extreme inappropriateness or vulnerable position (of a theory or view) अत इमौ पूर्वपक्षराद्धान्तौ अतिदुस्स्थतया सूत्रकाराभिमताविति वक्तुमयुक्तम् S'rutaPra. iB. 219. 14 (*on* i. 1. 13)

अतिदुःस्थत्व (atidūsstha-tva) *n.* the state of being in a miserable or vulnerable position (of a theory or view), extreme inappropriateness तत्पक्षोऽतिदुःस्थत्वात् नानूद्य दूषितः S'rutaPra. iB. 234. 17 (*on* i. 1. 19)

अतिदुःस्थित (ati-dussthita) *adj.* i seated with great difficulty आरब्धे दयितामुखप्रतिसमे निर्मातुम् … पर्यङ्कपङ्केरुहः संकोचादतिदुःस्थितस्य न विधेस्तच्छिल्पमुन्मीलितम् AnarghaRā. 7. 80 = SubhāRaK. 16. 59 ii badly placed अन्ये भ्रमन्ति भगवन्नात्मन्येवातिदुःस्थिताः । अन्ये भ्रमन्ति भगवन्नात्मन्येवातिसुस्थिताः Stotrā. 10. 12.

अतिदुःस्थितवपुस् (atidussthita-vapus) *adj.* having a body which is very difficult to define or explain सा चातिदुःस्थितवपुर्दृशमद्वितीयामालिङ्गति स्म SaṁkṣeS'ā. 1. 317 (i. 237. 4) (comm. अतिदुःस्थितवपुः दुर्निरूपस्वरूपा)

अतिदून (ati-dūna) *adj.* very much distressed or agitated अतिदूनाङ्गयष्टिका । पश्यन्ती नागयूनः सा (रत्नावली) किंचिदुच्छ्वसिताभवत् SkandP. iv. 67. 97; ततोऽतिदूनमानसम् … उपकोसलमुपेत्य त्रयोऽग्नयः … अस्मै … ब्रह्मविद्यामूचिरे Bhām. 176. 1 (*on* i. 2. 15)

अतिदूर (ati-dūra) *adj.* [*f.* –ā] very distant or remote, far removed (place, object, person etc.) तस्मादतिदूरमत्यल्पमिति यजमानस्य हवमियादेव GopBr. ii. 6. 14; नातिदूरे न चासन्ने अत्याढ्ये चातिदुर्बले। वृत्तिहीने च मूर्खे च

षट्सु कन्या न दीयते BṛParāSm. 6.27; अत्यासन्ने चातिदूरे…कन्यादानं न शस्यते SkandP. i(1). 23.7; प्रात: स्तुवे परशिवाम् … निगमवाङ्मनसातिदूराम् LalitāPañ. 4; धूर्तानामतिदूरा … वार्ताली भवतु वाञ्छितार्थाय LalitāStaRa. 68; यत् पुनरिदं मीमांसकैरुक्तं नित्या वेदा: प्रमाणं चेति तदतिदूरमपभ्रष्टं चेति भाव: Kāśi. i. 77.17 (*on* 2.28); केचिदतिदूरमतिसूक्ष्मं च पश्यन्ति NyāyRa. 80.16 (*on* 2.114); अत्रान्तरेऽतिदूरासु भ्रान्त्वाखेटकभूमिषु । वत्सराजश्चिरादागात् KathāSaSāg. iii. 2.47; वाचामतिदूरमाद्यम् … सन्त: । आत्मानमानन्दरसैकसिन्धुं पश्यन्ति ते PañcaRā.(Nā.) v. 11.24; NīlaVi. 96.15; SetuBa. 105.4; cf. **नातिदूर.**

अतिदूर (ati–dūra) *n.* [P. ii. 3.35] great distance, long way दूरतरं विप्रकर्षिता–अतिदूराद् दूरतरं प्रापिता प्रत्याशा Bhask. i. 60.21 (*on* i. 1.3); **अतिदूरात्** (ati–dūrāt) [Abl.] **i** due to a great distance, due to being far away अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् । … तदनुपलब्धि: SāṁkhyaKā. 7; इह सतामप्यर्थानामतिदूरादनुपलब्धिर्दृष्टा SāṁkhyaKāBh. 5.26 (*on* 7); MāṭhVṛ. 14.21 (*on* 7); **ii** from a great distance, from afar तवातिदूरादूरुद्वयीं स्पृशति चन्द्रमस: प्रकाश: S'rīKaC. 11.49; प्रवाहम् । वीक्षिष्यन्ते क्षणमनिमिषो(? षा) व्योमभाजोऽतिदूरादेकं मुक्तागुणमिव भुव: स्थूलमध्येन्द्रनीलम् NemiDū. 50; अतिदूराद्गिरिशिखरवर्तितवादौ …यथावद्ग्रहणं नास्तीत्यर्थ: SarvaDaSaṁ. 5.43; अहम् … त्वत्समीपेऽतिदूरादायात: SūktiSu.5; **iii** at a long distance, far away तदातिदूरादपि तस्य गच्छत: । एके समूहुर्बलरेणुसंहतिं शिरोभिराज्ञामपरे महीभृत: S'iśuVa. 12.45; संपदोऽकिंपचानै: निष्ठीव्यन्तेऽतिदूरात् S'aṅkaDigVi.(Mā.) 12.88; **अतिदूरे** (ati–dūre) [Loc.] at a very long distance अ(v.l. आ)भाषणं च दूरस्थे शिरसा संप्रयोजयेत् । नातिदूरे च कण्ठेन ह्युरसा चैव पार्श्वत: NāṭyaS'a. 17.107; नातिदूरे भूमौ वृत्तास्तरणं समस्तकम् KāmSū. 45.9 (1.4); यावदनुयात्रिकानतिदूरे तपोवनस्य निवेशयामि S'āk. 1.32(19); तस्य च नातिदूरे नदी Tantrākhyā. 51.3 = PañcT. 1.164(15) (172.4); अथासौ तान् (मत्स्यान्) नातिदूरे शिलातले निक्षिप्य PañcT. 1.61(26) (69.4); 2.26(13) (212.3); 2.77(40) (253.1); शिरसि भयमतिदूरे तत्प्रतीकार: MudrāRā. 1.20(119); स भद्रमित्युक्त्वा प्रणम्य नातिदूरे समुपाविशत् HarṣaC. 85.6; यतो नातिदूर एव किलावाच्यां (v.l. °बाध्यं)…दीप्यति कौम्भसंभवं ज्योति: MahāviC. 7.13(1) (196.13); राजा — नातिदूर एव कैरपि समेधितो भगवान् पावक: TāpaVa. 6.5(27); नातिदूरे समुपविष्ट: … तुष्टाव (पार्थिव:) TilaMañ. 34.20; लोकत्रयैकतिलकस्य स नातिदूरे … न्यषीदत् NavaSāC. 18.31; मेरु: स्थितोऽतिदूरे मनुष्यभूमिं चिरात्परित्यज्य KalāVi. 8.20; शुश्राव मातृगुप्तम् …नातिदूरे कृतस्थितिम् RājTa.(Ka.) 3.287; ततस्तौ संजीवकं नातिदूरे व्यवस्थाप्य Hitopa. 2.78(1); देवदेव सरित्तीरे नातिदूरेऽस्ति काननम् PāṇḍaC. 1.77; स तु नातिदूरे वर्तते GopāKeCan. 75.25; 109.1; अतिदूरे च तौ (दानवौ) दृष्ट्वा वासुदेवश्चतुर्भुज: । दध्यौ च मनसा तत्र कारणं मरणे तयो: DevīBhāP. i. 9.31; किं कर्तव्यं गतवति हरौ मां तु हित्वातिदूरे PadyaVe. 345; ज्वलतामतिदूरेऽपि सरसा अपि नीरसा: । स्त्रियो हि नरकाग्नीनामिन्धनं चारु दारुणम् YogVā. i. 21.12; कुपितं च महीपालं कुञ्जरं च मदालसम् । अतिदूरे परित्याज्यम् VasaTi. 20.10; **अतिदूरेण** (ati–dūreṇa) [Inst.] at or from a great distanee सोऽतिदूरेण विच्छिन्न: कथमस्मान् दहेदिति BṛKathāS'loSaṁ. 20.397; अनाकुलं गणी प्रोचे हेमसूरिस्तवाङ्गणे । आयासीदतिदूरेण पादचारेण कष्टभू: PrabhāC. 208.13.

अतिदूरक (atidūra–ka) *n.* long distance or way युध्येते मेषकौ किञ्चिपद(? दप)सृत्यातिदूरकम् Mānaso. iv. 9.1255.

अतिदूरग (atidūra–ga) *adj.* [*f.* –ā] **1** reaching a long distance सुकुमारमेकमणु मर्मभिदामतिदूरगम् … । अस्त्रमपरं कतमत् … यूयमिव चित्तभुव: Kirātā. 6.40; (स्वरोचि:) चकर्ष धनुरालोक्य वराहमतिदूरगम् MārkP. 66.12; **2** found at a great distance, away from अल्पानि मित्राण्यतिदूरगानि(? णि) । …कियच्चिरं तस्य नृपस्य राज्यम् VarāṅgaC. 2.3.; जन्ममूलानां मलानामतिदूरगम् । … पार्श्वम् … प्रणम्य PadmP.(Ra.) 1.9; (पश्य) गुहा: … रत्नदीपिता: । परस्परसमाकीर्णा दीधितीरतिदूरगा: PadmP.(Ra.) 112.37.

अतिदूरगत (atidūra–gata) *adj.* **1** reaching very far तस्मादतिशयज्ञानैरतिदूरगतैरपि । किञ्चिदेवाधिकं ज्ञातुं शक्यते न त्वतीन्द्रियम् TattvSaṁ. 3169; **2** being at an immence distance अथ ब्रह्मदिनोपत्तिमाह । यदतिदूरगतो द्रुहिण: क्षिते: सततमाप्रलयं रविमीक्षते । भवति तावदयं शयितश्च तद्युगसहस्रयुगं द्युनिशं विधे: Golā. 214.12 (25.15); अतिदूरगत: शिष्यो यदेच्छा स्यात् तदा व्रजेत् KulārT. 12.119.

अतिदूरगमन (atidūra–gamana) *n.* going a long way, going further अत्यवनतशिरसोऽतिदूरगमनान्मूर्च्छा … ज्वरान् (कुर्यात्) AṣṭāSaṁ. i. 156.15 (1.29); तावतैव निश्चयोत्पादात् नातिदूरगमनम् Kāśi. i. 91.22 (*on* 2.52)

अतिदूरङ्गम (ati–dūraṅgama) *adj.* reaching a very long distance अतिदूरङ्गमा नयनरश्मयस्तिग्मकरकिरणाभिघातपरावृत्ता: … आरोपयन्ति Kiraṇā. 266.4.

अतिदूरतर (atidūra–tara) *adj.* (comp.) very far away जीवनार्थं कुलं त्यक्त्वा योऽतिदूरतरं व्रजेत् । … किं तस्य जीवितेन PuruṣPa. 14.21.

अतिदूरतरीभूत (atidūratarī–bhūta) *adj.* who is very far away अतिदूरतरीभूता: स्वदेशस्य स्वबान्धवा: । के नाम मम YogVā. v. 47.12.

अतिदूरतस् (atidūra–tas) *adv.* **i** due to a great distance, due to being far away एकस्तु पुरुषाकारो दृश्यते चातिदूरत: । स्थाणुर्न पुरुषोऽयम् PadmP.(Ra.) 33.59; महत्त्वे सर्ववस्तूनामणुत्वं ह्यतिदूरत: । पश्यति AparoAnu. 20; **ii** at a long distance, far away आगच्छतं ममाभ्याशमलं स्थित्वातिदूरत: BṛKathāS'loSaṁ. 14.58; नगरस्य बहिश्चोदक्पूर्वे वाप्यतिदूरत: । चामुण्डालयं [च] कुर्यात् MānSā. 9.204; अथ वृन्दावनतोऽतिदूरतो वनं गतस्त्वं खलु गोपगोकुलै: Nārāy. x. 61.1; **iii** from a great distance, from afar अतिदूरत एव दृश्यतेऽयं त्वमिवाभ्युन्नतिमानितो नगेन्द्र: NavaSāC. 5.55; बलीवर्दं तिरोधाय परिभ्रम्यातिदूरत: Mānass. iv. 15.1608; **iv** after a long time नाथ निर्गमनस्यायं काल: कालोऽतिदूरत: SkandP. iv. 76.52.

अतिदूरता (atidūra–tā) *f.* the state of being far away उत्पतन् वियति पतत्त्री अतिदूरतया सन्नपि प्रत्यक्षेण नोपलभ्यते SāṁkhyaTaKau. 213.5 (*on* 7); क्षीण: क्षीण: समीपत्वं पूर्ण: पूर्णोऽतिदूरताम् । उपैति मित्राच्चन्द्रो युक्तं तन्मलिनात्मन: S'ārṅgaPa. 757; Subhāṣi. 546 = PadyāTa. 186.

अतिदूरत्व (atidūra–tva) *n.* the state of being far away (अव्यक्तता) प्रथमं ह्यतिदूरत्वं कृत्वा सोक्ता AbhinBhā. i. 53.16 (*on* 2.20) वियति गच्छत: पतत्त्रिणो ग्रहणे अतिदूरत्वमेव प्रतिकूलम् SāṁkhyaTaPra. 155.7.

अतिदूरत्वादि (atidūratvādi) *adj.* the state of being far away etc. नन्वतिदूरत्वादिषु मध्ये प्रकृत्याद्युपलम्भे किं प्रतिबन्धकम् SāṁkhyaPraBh. 52.34 (1.109); विद्यमानोऽप्यर्थ इन्द्रियाणां कालभेदेन विषयोऽप्यविषय: भवति अतिदूरत्वादिदोषात् SaṁkhyaPraBh. 52.25 (1.108); अदृश्यत्वं न तुच्छत्वातिदूरत्वादिना किं तु सुसूक्ष्मत्वात् S'rutaPra. 76.27 (*on* i. 1.1)

अतिदूरदर्शितादर (atidūra–darśitādara) *adj.* who has shown respect from a great distance नृपति: …अतिदूरदर्शितादरै: प्रधानदौवारिकै: प्रविश्य …शुद्धान्तमगच्छत् TilaMañ. 71.5–6.

अतिदूरदर्शिन् (atidūradarś–in) *adj.* far sighted, capable of seeing very far (मन्त्री) अतिदूरदर्शी चिरं परीक्ष्यैतदवोचदर्थम् VarāṅgaC. 12.16.

अतिदूरनिपात (atidūra–nipāta) *m.* falling down from a great height जलधौ निपेतुरतिदूरनिपातदलज्जलचरजीवजोवनदगन्धमहौषधय: (गिरय:) RāmāCam. 6.27.

अतिदूरनिरस्त (atidūra–nirasta) *adj.* completely refuted (thrown very far off) प्रतीयमानत्वाद्वैचित्र्यमनयोर्घुष्यमाणमतिदूरनिरस्तम् KhaṇḍanKhā. 362.24.

अतिदूरपथ (atidūra–patha) *m.* very long way प्राध्वं तु बन्धने प्रह्वेऽप्यतिदूरपथे तथा ViśvaLoK. 362.15.

अतिदूरपात (atidūra–pāta) *m.* fall from a great distance (height) मां तु…अतिदूरपातादायासितशरीरम्…पिपासा परवशमकरोत् Kād. 34.23.

अतिदूरपार (atidūra–pāra) *adj.* the other side of which is very far away, which is very difficult to cross संसार इवातिदूरपारेऽस्मिन्महाकान्तारे … सरो दृष्टम् TilaMañ. 226.1.

अतिदूरप्रवृद्ध (atidūra–pravṛddha) *adj.* **i** grown very high अतिदूरप्रवृद्धस्य पुण्यतरो: कुसुममञ्जरीभिरिव Kād. 42.1; **ii** increased excessively अतिदूरप्रवृद्धेन मधुना जगति को वा न विक्रियते VāsaDa. 136.1; अतिदूरप्रवृद्धस्य शृंगारजलधि:(? धे:) समदसारसक्रोञ्चकलविलायया काञ्चिलतया TilaMañ. 246.17.

अतिदूरप्रसारिताक्ष (atidūra–prasāritākṣa) *adj.* **1** having the Akṣa trees spread over a long distance असंस्कृततरुणैरिवातिदूरप्रसारिताक्षै: … उपवनपादपैरुपशोभितम् VāsaDa. 120.5; **2** with eyes wide open (i. e. staring), VāsaDa. 120.5.

अतिदूरप्रसृता (atidūra–prasṛtā) *adj.* (*f.*) reaching very far अतिदूरप्रसृतया प्रज्ञया सम्यग्ज्ञातहेयोपादेयविभाग: … राजा मेघवाहन: TilaMañ. 13.6.

अतिदूरभाज् (atidūra–bhāj) *adj.* living at a remote place आकेतितादप्यतिदूरभाज: क्षेत्रेश्वरा: सत्वरमभ्युपेयु: RāmC. 38.81.

अतिदूरभ्रमण (atidūra–bhramaṇa) *n.* wandering a very long distance स: (राम:) … अतिदूरभ्रमणावसन्नो निनाय बाणामिषतामथैनम् (मारीचम्) Rāgh. 9.65.

अतिदूरम् (atidūram) *adv.* **i** at a great distance, far away (in space) अतिदूरमेवेदं हल्ग्रहणमनुसृतम् MahāBh. iii. 281.7 (*on* vii. 2.3); तावका राजन्नातिदूरमवस्थिता: MahāBhā. x. 1.17; (अहम्) गिरिनदीरोधसा ··· विहतवानतिदूरम् HarṣaC. 321.20; मत्सुता … वेलापथेन चातिदूरं परिभ्रम्य … वने

पृथुकमेकं प्रसूतवती AvantiKa. 191. 18; त्वयातिदूरं गमिता तपस्विनी RāmC. 4. 30; (मे) प्रेम्णातिदूरं प्रसारिताभ्यां भुजाभ्यामाकृष्याङ्क(ङ्क)मारोपयत् (क्षितिपतिः) TilaMañ. 101. 10; तदयमद्यापि यावदतिदूरं न याति TilaMañ. 243. 7; अतिदूरं कुरङ्गेण निन्ये राम इवापरः NavaSāC. 2. 41; (कपिः) नरेन्द्रमतिदूरमाचकर्ष UdaySuKa. 127. 26; अतिदूरं समुत्प्लुत्य निपतद्भिः स शीकरैः VikraDeC. 4. 65; न सदनं मम चातिदूरम् GopāKeCan. 116. 31; गतोऽयमतिदूरम् ··· म्लेच्छाधिपतिः HammīMaMa. 4. 15 (1); अतिदूरं गतौ यावत् ··· वल्गां मुमुचतुः PārśvC. 3. 508; अतिदूरमारूढः प्रौढप्रतापस्तपनः KamVa. 4. 32 (2); अतिदूरमेका दासी धान्यानि कुट्टयति VetāPañ.(Jam.) 74. 1; तदलमतिदूरं गत्वा VīraMi.(Vyavahāra.) 20. 33; नभः। अतिदूरमपास्तमावभौ Rāgh. 3. 46; **ii** very much, excessively, greatly भक्त्यातिदूरमवनावनवन्नमौलेः Nāgā. 5. 12 (*v. l.*); अतिदूरं संकोचः क्रियेत TantrVā. 1129. 8 (*on* iii. 7. 4); अतिदूरमतिक्रान्तो मात्रां लोकेऽतिमात्र इत्यर्थः Kāvyālaṅ.(Ru.) 11. 17 (comm. अतिदूरमत्यर्थम्); वृद्धालापैः प्रहृष्टा भवति गतवया गौरवेणातिदूरम् RatiRaha. 4. 4; अतिदूरं कुपिता देवी MohaRāPa. 2. 51 (8); इत्थं मानद नातिदूरमुभयोरप्यावयोरन्तरम् S'ārṅgaPa. 204.

अतिदूररोपण (atidūra-ropaṇa) *n.* planting at a great distance वातभीतिरतिदूररोपणात् S'ārṅgaPa. 2147.

अतिदूरलक्षणादोष (atidūralakṣaṇā-doṣa) *m.* fault of farfetched implication विकारावर्तीत्यादिसूत्रद्वयवैयर्थ्यातिदूरलक्षणादोषः S'rutaPra. ii. 654. 24 (*on* iv. 4. 22)

अतिदूरलक्ष्य (atidūra-lakṣya) *n.* target at a very great distance आदानसंधानदृढातिदूरलक्ष्येषु दत्ताद्भुतलक्षशिक्षः Daśāvac. 6. 9.

अतिदूरलुठित (atidūra-luṭhita) *adj.* rolled down for a very long distance (उर्वीपतिः) अतिदूरलुठितमपि रक्तासवकपालम् ··· आददानम् (वेतालमद्राक्षीत्) TilaMañ. 47. 11.

अतिदूरवत् (atidūra-vat) *adv.* as in the case of a great distance अतिदूरवदतिसामीप्यस्याप्यदर्शनहेतुत्वात् NyāyMa. 77. 11.

अतिदूरवर्तिन् (atidūravart-in) *adj.* [*f.* -ī] **A** far exceeding or excelling (सः) मनोरथानामप्यतिदूरवर्ती ··· सत्कारः S'āk. 7. 1 (1); **B** being very far away अतिदूरवर्ती ··· विमानहंसकुलपालः ··· उच्चैरगायत् HarṣaC. 28. 6; नातिदूरवर्ती वन्दी ··· आर्यायुगलमगायत् HarṣaC. 132. 2; (अहम्) नातिदूरवर्तिनः ··· तमालविटपिनो मूलदेशमविशम् Kād. 34. 14; सरसो नातिदूरवर्तिनि तपोवने जाबालिः ··· प्रतिवसति स Kād. 36. 8; अतिदूरवर्तीन्यपि योग्यानि ··· आहरति NyāyMañ. i. 303. 7; इतरथासम्बन्धमतिदूरवर्ति च ग्राह्यम् Kāśi. ii. 171. 14 (*on* v. 3. 200); श्रोत्रम् ··· पुंसामतिदूरवर्तिनामपि शब्दं बोधयेत् NyāyRa. 748. 17 (6); अतिदूरवर्तिनोऽस्य···स्वसंनिधिमध्यस्यन्तो देशमेदं मन्यन्ते S'āstrDī. 139. 1 (*on* i. 1. 6); नातिदूरवर्तिनि ··· क्षेत्रखलके ··· कुटीरम् UdaySuKa. 32. 2; अतिदूरवर्ति यत् ··· न सुभिदं [ब]भूव न तदस्य धन्विनः PṛthvīVi. 9. 62; अतिदूरवर्तिचन्द्रनक्षत्रध्रुवादिप्रासिर्झटिति न सिध्येत् VivaPraSam. 87. 23; यस्तु पित्रोरतिदूरवर्ती सः ··· तीर्थयात्रादि कुर्यादेव VīraMi.(Tīrtha.) 20. 10; सुदृष्टिः ··· नातिदूरवर्तिन्यां चासन्द्यां निषसाद HarṣaC. 131. 5; नदीपूरस्तु ··· अतिदूरवर्तिनीं वृत्तां वृष्टिम् (अनुमापयति) NyāyRaMā. 57. 18.

अतिदूरवर्त्मन् (atidūra-vartman) *n.* very long way प्राध्वम्···चातिदूरवर्त्मनि बन्धने ViśvaPra. 163. 20; MediK. 172. 19.

अतिदूरविकृष्ट (atidūra-vikṛṣṭa) *adj.* drawn to a very long distance अतिदूरविकृष्टनागकन्याचकितोदञ्चितदीर्घनेत्रमालः NavaSāC. 5. 36.

अतिदूरविप्रकृष्ट (atidūra-viprakṛṣṭa) *adj.* taken to a very long distance मिथोग्रहणाचानतिदूरविप्रकृष्टसु वधे दोष एव ManuBh. ii. 182. 7 (*on* 8. 236)

अतिदूरविसृष्ट (atidūra-visṛṣṭa) *adj.* abandoned far awayअद्राक्षुः (ते) ··· अतिदूरविसृष्टदृष्टानुश्रविकविषयामिषरिंसागन्धपरमहंसावतंसितषष्ठकक्ष्यम् NīlaVi. 40. 9 (2)

अतिदूरविस्तृत (atidūra-vistṛta) *adj.* spread very far and wide अतिदूरविस्तृतप्रतानप्रवालोपसंच्छन्नपादपः (सः) AṣṭāSam. i. 99. 23 (1. 18)

अतिदूरवृत्ति (atidūra-vṛtti) *adj.* situated at a long distance अतिदूरवृत्तिरपि येन दृश्यसे HarVi. 6. 186.

अतिदूरवृत्तिमत् (atidūravṛtti-ma(n)t) *adj.* found at a great distance, being very far away श्वसितैरवि(v. l. ति)दूरवृत्तिमद्भिः परिवारैरिव तत्यजे त्रसद्भिः Yādavā. 15. 106.

अतिदूरव्यवधान (atidūra-vyavadhāna) *n.* very long intervention अनङ्गवाक्य(? क्या)नां त्वतिदूरव्यवधानम् NyāySu.(So.) 24. 21 (*on* i. 2. 7)

अतिदूरव्यवस्थित (atidūra-vyavasthita) *adj.* that remains very far away शङ्कादिदृष्टिदोषाणामतिदूरव्यवस्थितः PadmP.(Ra.) 20. 151.

अतिदूरव्यवहितधी (atidūravyavahita-dhī) *f.* knowledge of (a thing) very far removed न चातिदूरव्यवहितधीः NayaVi. 72. 1 (*on* i. 1. 4)

अतिदूरस्थ (atidūra-stha) *adj.* situated at a very long distance स्निग्धपत्रा यथा वृक्षा यथा क्षान्ता मृगद्विजाः। आश्रमो नातिदूरस्थो महर्षेर्भावितात्मनः Rāmā. iii. 10. 76; अज्ञानाचातिदूरस्थं ज्ञानात्संभाव्यते हृदि JayāS. 4. 91; तदेनं नातिदूरस्थं कदम्बमुरुशाखिनम्। अधिरुह्य पतिष्यामि ViṣṇuP. v. 7. 10 = BrahmP. 185. 10; अत्यासन्नातिदूरस्थं विप्रियं विकृतादि च। यदक्ष्णा वीक्ष्यते रूपं मिथ्यायोगः स दारुणः AṣṭāHr. i. 12. 36; तदितो नातिदूरस्थं वसुदत्तपुरं व्रज KathāSaSāg. vi. 3. 134; xii. 34. 150; वैवस्वतपुरम् ··· भाति नराणाम् ··· पापानामतिदूरस्थम् BhaviP. 285A. 14 (i. 192. 10); अतिदूरस्थे तु पात्रे पक्षद्वयेऽपि त्यक्तमन्नमग्नौ क्षिपेत् SmṛtiCan. v. 415. 21; अतिदूरस्थ(? स्थ)स्मारकत्वोक्तेरतिसाहसत्वात् SetuBa. 105. 4.

अतिदूरस्थतीर्थ (atidūrastha-tīrtha) *n.* sacred place situated at a very long distance (मुनीश्वरः) अतिदूरस्थतीर्थानि ··· हित्वा ··· शृणोति च कथाम् SkandP. ii(7). 14. 10.

अतिदूरस्थत्व (atidūrastha-tva) *n.* the state of being very remote न च वेदाधिकरणे 'वेदांश्चैके संनिकर्षम्' इति सूत्रगतवेदपदादतिप्रसङ्गपरिहारः वेदाधिकरणस्यातिदूरस्थत्वात् VivaPraSam. 163. 23.

अतिदूरस्थित (atidūra-sthita) *adj.* staying at a very long distance अतिदूरस्थितः शिष्यो यदेच्छा स्यात्तदा व्रजेत् BrahmāṇḍP. iii. 43. 66; अतिदूरस्थितो वापि द्रष्टव्यः कुलदेशिकः KulārT. 9. 96.

अतिदूरहारित (atidūra-hārita) *adj.* dragged or carried to a very remote place अतिदूरहारितानां प्राणहारिभिः क्षुत्पिपासाभिवर्धनैः ··· अन्यैश्चाभ्युपायैरश्मकेन्द्रप्रयुक्तास्तीक्ष्णरसदादयः···अनन्तवर्मकटकं जर्जरमकुर्वन् DaśKuC. 137. 10.

अतिदूरागमन (atidūrāgamana) *n.* coming from a very long distance अथ तेनानीयमानमतिदूरागमनगुरुजडजङ्घाकाण्डम् ··· प्रविशन्तमद्राक्षीत् HarṣaC. 85. 1.

अतिदूरान्तर (atidūrāntara) *n.* very long gap or distance इत्यनुप्रासमिच्छन्ति नातिदूरान्तरश्रुतिम् Kāvyāda. 1. 58; तमतिदूरान्तरगतमपि दुरात्मानमेषा सीरकोटिरनासाद्य न निवर्तते SubhaDha. 4. 14 (2); आवृत्तिर्या तु वर्णानां नातिदूरान्तराश्रिता SaraKaṇṭhā. 228. 16.

अतिदूरान्तरित (atidūrāntarita) *adj.* far removed (from each other) अतिदूरान्तरितयोर्युगपद् दृष्टेरेकीभूयापि हेतुता NayaVi. 72. 3 (*on* i. 1. 4)

अतिदूरापयात (atidūrāpayāta) *adj.* gone away a very long distance नातिदूरापयातं तु कृतबुद्धिं पलायने। दुर्योधनः स्वकं सैन्यमब्रवीत् MahāBhā. ix. 18. 55.

अतिदूराभिप्राय (atidūrābhiprāya) *m.* farfetched intention परं नाप्नुवन्ति, सगुणेऽपि न निरवग्रहैश्वर्यमिति···चेत्–अतिदूराभिप्रायकल्पनमेव दोषः S'rutaPra. ii. 654. 3 (*on* iv. 4. 22)

अतिदूरावनत (atidūrāvanata) *adj.* bent very much low अतिदूरावनतेन ··· शिरसा कृतप्रणामम् ··· तं पिता ··· आलिलिङ्ग Kād. 92. 20.

अतिदूरोक्त (atidūrokta) *adj.* stated at a very remote place or context अतिदूरोक्तग्रहणे कथं न भीतिः TattvPrakā. 51B. 1 (*on* i. 3. 23)

अतिदूरोत्सारित (atidūrotsārita) *adj.* completely set aside यत् ··· सन्मात्रविषयं प्रत्यक्षमिति साधितं तदतिदूरोत्सारितम् PrakaPañ. 100. 4.

अतिदूरोन्नता (atidūronnatā) *adj.* (*f.*) rising to a very great height अतिदूरोन्नताभिर्जीर्णतया शिराभिरिव परिगतो व्रततिभिः ··· शाल्मलीवृक्षः Kād. 23. 17.

अतिदूरोर्वी (atidūrorvī) *f.* very distant place चक्रिणो नातिदूरोर्व्यां तस्थुर्भद्रासनेषु ते TriṣaS'aPuC. i. 4. 680.

अतिदूरोल्लसित (atidūrollasita) *adj.* raised very high अतिदूरोल्लसितेन भ्रुकुटिविलिलेखात्रयेण ··· अनुमीयमानहृदयप्रदीप्तमन्युरभिमन्युरिव ··· राजसमूहस्य ··· अविशन्मध्यम् (नृपकुमारः) TilaMañ. 88. 22.

अतिदूरोल्लासित (atidūrollāsita) *adj.* raised very high वारंवारमतिदूरोल्लासितेन ··· करदण्डेन TilaMañ. 185. 6.

अतिदूर्वा (ati-dūrvā) *f.* name of a kind of grass (*dūrvā*), KalpaK. 288. 354.

अतिदूषण (ati-dūṣaṇa) *n.* great fault बिल्वपत्रस्य ··· तथा होमे छिन्नेभिन्नेऽतिदूषणम् BhaviP. 343B. 4 (ii(1). 18. 18)

अतिदूषित (ati-dūṣita) *adj.* [*f.* -ā] **i** much disturbed व्याधयः संप्रवर्धन्ते कायाग्नावतिदूषिते BhelaS. 3. 24 (1. 5); **ii** much damaged क्ष्माभङ्गैर्जलपूर्वैस्तु दोषैर्या चातिदूषिता(प्रतिमा)। उद्धृत्य योजनान्यत्र स्थाने तु शुभलक्षणे। सम्यक् संस्थापनाद् भूयःसंस्थापनमुदाहृतम् PauṣkS. 43. 26; विद्युत्प्रपातपूर्वैश्च दोषैर्या चातिदूषिता (मूर्तिः) PāraS. 19. 490; 15. 48; **iii** much spoilt or defiled अनुलोमव्यवाये गर्भे द्विगुणं यदि सा अतिदूषिता न प्रतिलोमगा भवति तदैव

Mitā. 463. 4 (*on* 3. 265)

अतिदृढ (ati-dṛḍha) *adj.* [*f.* -ā] **A i** deep set न चाप्यलब्धं लिप्सेत मूले नातिदृढे सति MahāBhā. xii. 95. 2; SūktiRa. 156. 7; अतिदृढस्य चाभिभवायोगात् TattvPrakā. 193B. 6 (*on* iii. 4. 36); लुनीमः संस्कारानपि हृदि तदीयानतिदृढान् CaitaCa. 36. 5(2); **A ii** very rigid, inviolable इति नियमः प्रतिबन्धाभावमपेक्ष्यैव न त्वतिदृढः TattvPrakā. 164B. 6 (*on* iii. 3. 4); **B i** very hard, unbreakable रज्जुमादाय … । त्रिवृत्कृतैस्तु कार्पाससूत्रैरतिदृढैः कृताम् PāraS. 16. 441; अतिदृढेन … ग्रैवेयेणोपपन्नम् … हेमकूटमारुरोह (हस्तिनम्) AvantiKa. 99. 3; S'ivaP. ii(4). 13. 27; संस्थाप्योपरि पीठस्य कुम्भिकामतिदृढाम् SamarāSū. 31. 178; विशति दुर्जनतन्तुरन्तश्छिद्रं सुतीक्ष्णवदनोऽतिदृढः UdaySuKa. 2. 8; Kiraṇā. 188. 4; वपुरतिदृढम् … तव … बडिश SuvṛTi. 2. 29; Rasā. 15. 166; **B ii** impenetrable संनाहेऽतिदृढे गृहे च गदितो न स्त्री निवातः KośaKaTa. 2. 5504; **B iii** enduring वसुन्धरे सत्यमतिदृढासि UttaRāC. 4. 4(1); (शरीरम्) यदतिदृढमलौकिकदुःखसहिष्णु ManuBh. ii. 459. 27 (*on* 12. 16); **B iv** mighty, powerful तान् दृष्ट्वातिदृढान् धृष्टान् प्राप्तान् परिवृढाज्ञया Bhaṭṭi. 9. 18; BālaKrī. i. 238. 11 (*on* 2. 112); UdaySuKa. 2. 8; **B v** very strong, irrefutable अस्ति च सर्वलोकप्रसिद्धमतिदृढमव्यवहिता सूची भिनत्ति न व्यवहितेति NyāyKa. 158. 16; [given as synonym of साधिष्ठ in ViśvaPra. 42. 12; MediK. 41. 17; of वृत्त in NānārthaMa. 641]

अतिदृढतर (atidṛḍha-tara) *adj.* much stronger or firmer परोक्षं हि ज्ञानमतिदृढतराज्ञानतमोग्रन्थिगुण्ठनान्निमीलितस्य (आत्मनः)…अर्हति TattvPradī. (A.) 73. 3 (*on* 1. 55)

अतिदृढत्व (atidṛḍha-tva) *n.* characteristic of being very strong or irrefutable व्याप्तिग्राहकस्य प्रमाणस्यातिदृढत्वात् NyāyKa. 158. 19.

अतिदृढपीडन (atidṛḍha-pīḍana) *adj.* in which there is very hard pressing (of the limbs) असिन्नभून्ममातिदृढपीडनैरपि न तृप्तिरालिङ्गनैः MālaMā. 9. 237.

अतिदृढप्रहारिन् (atidṛḍha-prahārin) *adj.* striking very hard परीक्ष्यकारी न विकत्थनश्च दृढप्रतिज्ञोतिदृढप्रहारी YogYā. 2. 11.

अतिदृढम् (ati-dṛḍham) *adv.* very strongly or deeply अतिदृढमनुरक्तया वितीर्णम्…उरसि निहितबन्धुजीवम् NavSāC. 3. 59.

अतिदृढव्रत (atidṛḍha-vrata) *adj.* whose vow is very firm न यो मांसं खादत्यतिदृढव्रतः । तस्य वक्ष्यामि यत्पुण्यम् PadmP.(Ra.) 26. 97.

अतिदृढावलम्बित (atidṛḍhāvalambita) *adj.* held very firmly (i. e. with devotion) (विधिः) अतिदृढावलम्बितगुरुचरणैः (महाभागैः) … भगवन्तम् इत्थमस्तावीत् NīlaVi. 54. 14.

अतिदृढीकरण (ati-dṛḍhīkaraṇa) *n.* excessive strengthening, making very firm वैराग्यस्यातिदृढीकरणमानुषंगिकं प्रयोजनान्तरम् S'ivārkaMaDī. ii. 225. 11 (*on* iii. 2. 1)

अतिदृढीकृत (ati-dṛḍhīkṛta) *adj.* well strengthened, very firmly established वैराग्येऽतिदृढीकृते सति यतः प्राज्ञो यतिर्मन्यते SaṁkṣeS'ā. 3. 57 (ii. 181. 19)

अतिदृप् (ati-dṛp-) IV. P. to become very proud एवं विजिग्ये तां सेनां प्रहस्तोऽतिददर्प च Bhaṭṭi. 14. 106.

अतिदृप्त (ati-dṛpta) *adj.* **1** highly conceited, very haughty or proud of oneself (राजा) अतिदृप्तमपि शत्रुबलं निहन्ति YogYā. 4. 7; BṛĀraUBhVā. ii. 1. 29; अतिदृप्तोऽसि चेत्पुत्र तत्त्रिनेत्रस्य लङ्घनम् । एकस्य रक्षेः KathāSaSāg. iii. 6. 65; ParamāKā. 95. 96; पञ्चवर्षमतिदृप्तम् … नमत गोपबालकम् PañcaRā.(Nā.) v. 1. 60; **2** (name of) a type of defective *mantra* अतिदृप्तोऽङ्गहीनश्च (दुष्टो मन्त्रः) S'āraTi. 2. 69.

अतिदृप्यत् (ati-dṛpyat) *adj.* being extremely haughty or arrogant क्वाप्यतिदृप्यदुल्बणगणग्रामे ननामेव भूस्तद्भूयः करपार्ष्णिघट्टनशताविर्भावगोष्ठीभरैः S'rīKaC. 18. 55.

अतिदृप्यद्दोर्दण्ड (atidṛpyad-dordaṇḍa) *m.* mighty (*lit.* extremely haughty) massive arm उत्खातस्त्रिभुवनकण्टकोऽतिदृप्यद्दोर्दण्डाञ्चितमहिमाप्ययं निकारः MahāvīC. 7. 8.

अतिदृश् (ati-dṛś-) I. P. **A** to see beyond रात्र्यांश्चिदन्धो अति देव पश्यसि ṚV. i. 94. 7; सूर्यं आपोऽति पश्यति AV. xiii. 1. 45; xviii. 2. 32; **B** to see what does not exist व्याधितो मृत्युमृच्छति । अतिपश्यतीति संबन्धः AdbhuS'āg. 524. 25.

अतिदृश् (ati-dṛś) *adj.* wise or learned (*lit.* far-sighted) पण्डिते… प्रदर्श्यतिदृगित्यपि ParyāS'aRa. 2. 204.

अतिदृश्य (ati-dṛśya) *adj.* [*f.* -ā] **1** very transparent सूर्यवर्चस स्थेत्यतिदृश्याः BaudhS'S. ii. 97. 10; **2** extremely worth-seeing उपवनम्… । कुसुमितमतिदृश्यम् S'ṛṅgāMañ.(A.) 38. 28.

अतिदेव (ati-deva) *adj.* surpassing the gods अतिदेवैरमानुष्यैः कर्मभिः सोऽनुमीयते HariVaṁ. 65. 25; अतिदेवाः देवेभ्योऽप्यतिशयिताः VīraMi. (Āhnika.) 442. 23; *m.* supreme or highest god (an epithet of Brahmā) देवदेवोऽतिदेवश्च…एवं स्तुतस्तु रामेण ब्रह्मा PadmP. v. 35. 179.

अतिदेवदानव (ati-devadānava) *adj.* surpassing (both) the gods and the demons अथ भोजपतिर्जगत्पतेरवतारं भुवि नारदान्मुनेः । श्रुतवानतिदेवदानवम् Yādavā. 9. 1.

अतिदेवपद (atideva-pada) *n.* status of the supreme deity धारयत्योजसातिदेवपदं माता पृथिवी AVPari. i. 40. 2.

अतिदेवमानुष (ati-devamānuṣa) *adj.* surpassing gods and human beings अपेतभारामतिदेवमानुषैर्विहारभेदैरवनीं विधास्यसि Yādavā. 14. 34.

अतिदेवासुर (ati-devāsura) *adj.* surpassing (the act of) the gods and the demons अतिदेवासुरं कर्म कृतमेतत्त्वया रणे MahāBhā. iii. 170. 66.

अतिदेविन् (atidev-in) *adj.* who gambles in an extraordinary way शकुनिः … राजातिदेवी कृतहस्तो मताक्षः MahāBhā. ii. 52. 13.

अतिदेश (ati-deśa) *m.* [defined अतिदेशो नाम ये परत्र विहिता धर्मास्तमतीत्यान्यत्र तेषां देशः S'ābaBh. 1534. 13 (*on* vii. 1. 12); तद्वदिदं कर्तव्यमित्यतिदेशः NyāyRaMā. 169. 5; अन्यत्रैव प्रणीतायाः कृत्स्नाया धर्मसंततेः । अन्यत्र कार्यतः प्राप्तिरतिदेशोऽभिधीयते NyāyMāVi. 374. 8 (*on* vii. 1. 1); अन्यधर्मत्वेनावगतानां तत्संबन्धादरेणान्यत्र प्रदेशे प्रापणं येन व्यापारेण भवति सोऽतिदेशः । अतीत्य देश(:)- अतिदेशः MayūMāli. 526. 25 (*on* vii. 1. 1); अतिदिश्यतेऽनेनेत्यतिदेशः Nyās. ii. 253. 20 (*on* vi. 1. 85); अतिदिश्यते इत्यतिदेशः PadMañ. *on* KāśiVṛ. *on* P. vi. 1. 85; अतिदेशः एकत्र श्रुतस्यान्यत्र संबन्धः यथा स्तोकं पचति मृदु पचतीत्यादौ स्तोकमृद्वादौ क्रियाविशेषणानां कर्मत्वमित्याद्यनुशासनेन कर्मत्वातिदेशः NyāyK. 6; (varieties or types) अतिदेशोऽनेकप्रकारः (1) निमित्तातिदेशः (2) व्यपदेशातिदेशः (3) शास्त्रातिदेशः (4) रूपातिदेशः (5) कार्यातिदेशः Nyās. i. 101. 12 (*on* i. 1. 56); अतिदेशोऽयम् । स च निमित्तरूपव्यपदेशशास्त्रकार्यभेदात् पञ्चधा भिद्यते KātanVṛ. *on* ii. 2. 60 (p. 490); त्रिविधश्चातिदेशः (1) प्रत्यक्षवचनात् (2) नामधेयात् (3) चोदनालिङ्गानुमितिवचनाच्चेति S'āstrDī. 527. 2 (*on* vii. 1. 1) अतिदेशः षोढा निमित्तव्यपदेशतादात्म्यशास्त्रकार्यरूपातिदेशभेदात् S'abdakaustubha. i. 209. 9 (*on* P. i. 1. 56)]; **1** (Mīmāṁsā) transference (of features, acts etc. to other performances from the one where they are originally enjoined) सिद्धैरहोभिरह्नामतिदेशः ĀśvaS'S. II. iii. 1. 2; विधेः प्रकरणान्तरेऽतिदेशात्सर्वकर्म स्यात् MīmāSū. x. 1. 1; सामान्यस्यातिदेशोऽयम् VākyaP. 2. 80; नैष दोषः संभवतोऽतिदेशात् NyāyVār. 163. 1 (*on* i. 2. 43); एवमेवाप्रमाणकमित्यतिदेशः TātpaṬ.(U.) 254. 21 (*on* 5(4). 56); तत्सर्वं बुद्धवाक्यानामतिदेशेन गम्यते TantrVā. 168. 23 (*on* i. 3. 10); 865. 11 (*on* iii. 3. 14); 921. 15 (*on* iii. 4. 11); न पृथग्विद्यते स्त्रीणां त्रिवर्गविधिसाधनम् । भावतो ह्यतिदेशाद्वा इति शास्त्रविधिः परः VedavyāSm. 2. 19; इयमप्यधिका शङ्कातिदेशेन निवर्त्यते BrahmSūBh.(S'aṅ.) 288. 1 (*on* ii. 1. 3); 367. 12 (*on* ii. 2. 11); 435. 11 (*on* ii. 3. 8); 650. 18 (*on* iii. 3. 22); 792. 1 (*on* iv. 1. 16); IṣṭaSi. 3. 22; (ऐक्यं) यथा बुद्धौ पूर्वयोरेवमात्मनीत्यतिदेशेन बुद्धिसाधर्म्यविधानान्नानात्वप्रसक्तौ तदपवादार्थमाह NaiṣkaSi. 117. 3; यद्यप्युत्तरेषां चैतदविरोधीत्यतिदेशेन ब्रह्मचारिधर्मोऽपि पुरुषमात्रविषयः स्यात् फलं तु न स्यात् ManuBh. i. 102. 8 (*on* 2. 52); i. 183. 20 (*on* 2. 206); i. 466. 6 (*on* 5. 90); अतिदेशाच्छ्रौत एवार्थोऽतिदिश्यते न गम्यमानः NyāyMañ. ii. 152. 4; तदीयकरणे च यमतिदेशमाचक्षते PrakaPañ. 485. 5; 498. 6; ननु च असादृश्याशङ्कायां सादृश्यप्रतिपादनमतिदेशः BrahmSūBh.(Bhā.) 88. 21 (*on* ii. 1. 3); एवमित्यतिदेशो यथा पापस्य तथेतरस्य पुण्यस्येति भोगार्थत्वाद्विरोधोऽविशिष्टः BrahmSūBh. (Bhā.) 224. 15 (*on* iv. 1. 14); तस्यैतावता दशनच्छेद्यस्य तुल्यत्वादित्यतिदेशः JayaMa. 116. 25 (*on* 2. 4); 121. 24 (*on* 2. 4); अत एव निर्वापमन्त्रेऽतिदेशाद् विकृतिं गते प्राकृतदेवताया अभावात् तत्पदनिवृत्तौ तस्य स्थाने सूर्यायेति पदमूह्यते Kāśi. iii. 184. 20 (*on* 5(7). 78); अतिदेशेन चेदं दर्शयति AbhinBhā. ii. 166. 13 (*on* 12. 183); ii. 431. 7 (*on* 18. 48); i. 189. 17 (*on* 4. 285); अतिदेशेन स्मृत्याचाराभ्यां श्रुत्यर्थादिभिश्च यथायथं तेन द्वारेण समर्पितम् … अङ्गजातं…शुष्कत्वादिवत् स्वीक्रियते NyāyRaMā. 211. 23; 172. 19; 'तेषामेकैक एव तावान् यावानसौ पूर्वः' इत्यतिदेशेनेष्टकाचिताग्नेः स्वशेषिभूतक्रतुद्वारेण यत्फलम् VedāntDī. 192. 24 (*on* iii. 3. 44); स्वतो ह्यप्राप्तावतिदेशेन प्राप्त्यपेक्षा S'rīBh. 631. 16 (*on* iii. 3. 22); 723. 7 (*on* iv. 1. 14); अतिदेशस्योपदेशेन बाधोपपत्तेरित्याशयः NyāySu.(So.) 888. 11 (*on* ii. 3. 1); रवदित्यतिदेशात्सप्तभिर्यैः प्रचितः ChandaśCū. 2. 389(1); एतदेवेत्यनेन दशरात्रत्रिरात्रयोरतिदेशः HārLa. 83. 14; 86. 13; प्राणादिहेतुतादृष्टेरतिदेशो हि तादृशः AnuVyā. 10B. 2 (*on* i. 1. 23); उपदिष्टोपनिधिधर्माणामतिदेशोऽयं युक्तः SmṛtiCan. iv. 425. 18; 'ब्रह्मोपास्व … यथा ते त्वामवन्तु' इति पौष्यायणश्रुतावतिदेशाच्च BrahmSūBh. (Ma.) 57B. 11 (*on* iii. 3. 47); PrakaVi. 381. 21; अस्यातिदेशस्य जन्मादिसूत्रेण

आक्षेपसङ्गतिं दर्शयन् अध्यायसंगतिमाह VedāntKa. 228.2 (*on* i. 4.28); 7.3 (*on* i. 1.1); अथेदानीं सर्वेषां वेदान्तानां ब्रह्मणि समन्वयमतिदेशेन भगवान् सूत्रकारो दर्शयति VedāntKau. 146.6 (*on* i. 4.28); 342.6 (*on* iii. 3.45); विधानमेतद्धेतूनां सर्वासामपि पठ्यते इति सामान्येनातिदेशात् CaturCin. i. 401.1; अथोक्तलक्षणस्य पक्षेऽतिदेशे कर्तुमुचितेऽपि S'rutaPra. iA. 80.6 (*on* i. 1.1); 'परीत्य लोकान् परीत्य भूतानि' इत्यादिश्रुतिनिर्दिष्टविरक्तपुरुषवत्। सर्ववासनात्यागेन परशिवपरमात्मप्राप्तिरतिदेशादुपदिष्टत्वाच्च S'rikarBh. 390.1 (*on* iii. 3.45); अधिकारोऽतिदेशश्च सामान्येन विशेषतः।... उदिता: क्रमात् NyāyMāVi. 5.4 (*on* 1. 1.0); तद्वत्कुर्यादित्यतिदेशः VivaPraSam. 138.19; 135.8; तत्र कतिपयाङ्गानामतिदेशेन प्राप्तत्वात् ArthSam. 53.10; 56.2; तादृशो ह्यतिदेशो यदाशङ्काया आधिक्ये सति परिहारस्य समानत्वम् NyāySu.(Ja.) 149B.13 (*on* i. 1.9); एवमभ्यधिकाशङ्कया पूर्वपक्षितेऽतिदेशेन सिद्धान्तयन् सूत्रमवतार्य व्याचष्टे TattvPrakā. 109A.8 (*on* ii. 3.8); शब्दलिङ्गस्य द्रव्यस्य द्रव्यत्वनित्यत्वेऽतिदेशेन साधयन्नाह Upask. 102.6 (*on* ii. 1.28); येषु पुनः स्तेनत्वमृषिभिरतिदिष्टं तेषां दण्ड एव उपदेशादतिदेशस्य तदेकार्थत्वात् DaṇḍaVi. 81.12; दशमे बाधनिरूपणम्। सामान्यतोऽतिदेशेन प्राप्तो धर्मो विशेषेण बाध्यते SarvaDaKau. 104.3; 'वैश्वानरो न ऊत्या' इत्यादिमन्त्रैर्देवताया महाभूताग्नेर्वा वाक्यार्थतेति कस्यचिद्बुद्धिः स्यात् तदप्यतिदेशेन परिहरति AṇuBh. 70.6 (*on* i. 2.27); 160.11 (*on* ii. 4.8); अथवा अतिदेशोऽयं तद्वत्त्वमसीत्यर्थः Nyāyāmr. 595A.8; करणोत्पत्त्यपूर्वैः परमापूर्वे जनयितव्ये सामग्रीमेलनरूपस्य सर्वाङ्गनिष्पाद्यस्याखण्डस्योपकारस्य प्रथममतिदेशः TantrRaha. 53.7; प्रकृतौ सन्तश्चाश्यतिग्राह्या सर्वासु विकृतिष्वतिदेशेनैव प्राप्नुवन्ति VidhiRa. 7.14 (2); गृहमेधीयेष्टौ दर्शपूर्णमासतोऽतिदेशात् संभवत्प्राप्तिकयोः आज्यभागयोः पुनर्विधानं क्रियते PūrvottaVāNaMā. 21.14; तथा गृहमेधीयस्य दर्शपूर्णमासप्रकृतिकत्वात् अतिदेशादेवाज्यभागौ नित्यं प्राप्नुत इति न तत्र विधिः SiddhāLeSam. 6.12; 359.1; अत्रातिशयोक्तौ रूपकविशेषणं रूपके प्रदर्शितानां विधानामिहापि संभवोऽस्तीत्यतिदेशेन प्रदर्शनार्थम् Kuval. 36 (10); अतश्च तत्र शावाशौचस्य दशाहादेरतिदेशः सपिण्डेषु क्रियते VīraMi.(S'uddhi.) 18.30; (Saṁskāra.) 944.14; एतद्विध्यभावे आक्षेपणातिदेशेन वावहननस्य षोडशिग्रहणस्य च पक्षप्राप्तत्वात् BhāṭṭDī. i. 12.17 (*on* i. 1.6); ii. 30.3 (*on* iii. 6.7); प्रबलेनोपदेशेन धर्माणां प्रकृत्यङ्गत्वावगमेऽपि विकृत्याकाङ्क्षानुच्छेदाद् दुर्बलस्यापि अतिदेशस्य न बाधनम् MīmāKau. i. 13.12 (*on* i. 3.3); iii(1). 26.16 (*on* i. 2.7); तथा च तत्र यथा भाष्यरीत्या भूयोऽनुग्रहानुरोधेन उत्तमन्त्ररूपमुख्यधर्मांशे अतिदेशस्य बाधः GuruCandr. i. 279.13; नाप्यतिदेशेन तत्प्राप्तिः यागीयानां धर्माणां तावन्नातिदेशो यागत्वेन होमत्वेन वैलक्षण्यात् MīmāNyāPra. 225.1; न च कुशकार्यस्येव कुशानामपि अतिदेशेनैकेन प्राप्तिः। पदार्थविशिष्टस्यैवोपकारकस्यातिदेशात् LaCandr. 369.22; न च प्राप्ति विना सः। न चातिदेशं विना प्राप्तिः NirṇaSi. 265.11; वैदिकं च विधिमन्त्रार्थवादभेदेन उपदेशातिदेशभेदेन च बहुविधं इत्यादि तु परिमितकथया न बोधयितुं शक्यते इति उपरम्यते MānaMe. 108.1; अत्रातिदेशेनाज्यभागतदितराङ्गयोर्गृहमेधीये मन्त्रे च मन्त्रलिङ्गेनाश्वगर्दभरशनादानसंबन्धयोर्नियतप्राप्ततया तद्विधेरितरनिवृत्तिफलकत्वात् BhāṭṭCin. i. 71.18 (*on* i. 1.4); i. 137.9 (*on* i. 1.24); दशमाद्याधिकरणन्यायेनोपकारमुखेनैव पदार्थानामतिदेशो न स्वरूपेण MayūMāli. 11.11 (*on* i. 2.2); यन्नाम तन्नामेति नाम्नोऽतिदेशात् नामप्रवृत्तिनिमित्तत्वेन सर्वपापोदयोऽपि तत्र प्राप्नुयादिति चेन्न S'ivārkaMaDī. i. 356.13 (*on* i. 2.13); i. 249.32 (*on* i. 1.21); एतेन समातिदेशयोः पादोनकल्पनम् ब्रह्महत्यायामेव महापातकमध्ये तस्यागुरुतरत्वादिपाठाच्च BālamBha. iii. 157(?149).21 (*on* 3.256); **2** (feature or act) conveyed by the rule of transference 'अभिशप्तपतितभ्रूणघ्नान् स्त्रीरभिचारिणीर्नातिदिशेत्' । अतिदेशः सपिण्डनम् Aparā. 533.6 (*on* 1.253); अतिदेशः पितृभिः सह संसर्जनम् CaturCin. iii(1). 1640.1; **3** (Gr.) transference (of the application of a grammatical rule) to other similar cases अथवा नेदं संज्ञाकरणं तद्वदतिदेशोऽयम्। बहुगणवतुडतयः संख्यावद्भवन्ति MahāBh. i. 81.17 (*on* i. 1.23); तद्वदतिदेशस्तर्ह्ययम्।... स तर्हि वतिनिर्देशः कर्तव्यो न ह्यन्तरेण वतिमतिदेशो गम्यते MahāBh. i. 191.18 (*on* i. 2.1); i. 469.9 (*on* ii. 3.69); संख्याविहितस्य प्रत्ययस्यातिदेशो न प्रकल्पते MahāBh. ii. 343.15 (*on* v. 1.19); किमर्थं बहोर्नञ्वदतिदेशः क्रियते MahāBh. iii. 137.15 (*on* vi. 2.175); असहायस्याचन्तोपदिष्टानि कार्याणि न सिध्यन्तीत्ययमतिदेश आरभ्यते KāśiVṛ. *on* P. i. 1.21; *on* P. i. 1.56; *on* P. i. 2.1; *on* P. iii. 4.85; व्यञ्जनान्तस्य यत्सुभोः। व्यञ्जनान्तस्य लिङ्गस्य युक्तार्थस्य लुप्तासु विभक्तिषु सुभोर्यदुक्तं तद्भवति।...अतिदेशोऽयम् KātanVṛ. *on* ii. 5.4; न चाभावे व्यक्तिवचनयोः शक्यतेऽतिदेशः कर्तुम् Nyās. i. 192.25 (*on* i. 2.51); i. 556.7 (*on* iii. 1.87); कालात्कार्ये च भववदत्यतिदिदेशात् कथाकालाट्ठञ् इति ठञ् GaṇRa. 3.165 (200); वचनादतिदेश आश्रीयते PadMañ. *on* P. KāśiVṛ. *on* P. viii. 2.1; अथवा पर्युदासे अधातुरिति नेदं शास्त्रीयं कार्यम्। अतः तत्कर्तव्यतायां न प्रकृतिवदित्यतिदेशः PariVṛ.(Si.) 38.3; 173.18; 'सेडपिच्च' इति ज्ञापकात् अनुबन्धकार्याणामत्विधित्वेऽप्यतिदेशः स्यादेव Prasā. i. 43.11; i. 269.13; ii. 49.21; सकर्मकाभावादत्रातिदेशो न प्रवर्तते इति चेत् तदेव तु भवन्मते दुर्वचम् VaiyāBhū. 28.15 (*on* 5); 136.15 (*on* 30); तेनाशास्त्रीयस्याप्येकाच्त्वादेरतिदेशात् LaS'abdeS'e. i. 51.8; i. 40.2; i. 33.8; केचित्तु आर्धधातुकाधिकारोक्तस्यैवातिदेशमाहुः SiddhāKau. 395A.9; **4** one of the thirty-two *tantrayuktis* proving or establishing (a thing) with what is already said उक्तेन साधनमतिदेशः 'दत्तस्याप्रदानमृणादानेन व्याख्यातम्' इति ArthS'ā. iii. 243.6 (15.1); प्रकृतस्यानागतस्य साधनमतिदेशः SuśruS. vi. 65.17 (F. N. हाराणचन्द्रस्तु 'इतरत्र विहितस्य विधेरितरत्र प्रयोगायोपदेशोऽतिदेशः। यथा एष एव विधिः कार्यः शिशिरे समुदाहृतः' इति पठति अयमेव साधुः पाठः); AṣṭāSaṁ. ii. 418.1 (6.50); CaraS. viii. 12.42 (1941 Ed.); ViṣṇuDhaP. iii. 6.1 (310A.4); **5** a particular mode of statement (agreeing with someone else's statement as if it were one's own) संदेशश्चातिदेशश्च निर्देशः स्यात्तथापरः NāṭyaS'ā. 22.53; यत्त्वयोक्तं मयोक्तं तत्सोऽतिदेश इति स्मृतः NāṭyaS'ā. 22.57; तत्त्वदेशोऽतिदेशोऽयम् AgniP. 338.53; (वागारम्भा इमे) अतिदेशस्तदुक्तं यत्तन्मदुक्तमितीरितम् BhāvPra.(S'ā.) 11.7(1); 10.22(1); अथातिदेशः सोऽतिदेशो मदुक्तानि तदुक्तानीति यद्वचः। 'तनयां तव याचते हरिर्जगदात्मा पुरुषोत्तमः स्वयम्। गिरिगह्वरशब्दसंनिभां गिरमस्माकमवेहि वारिधे' RasāSu. 63.3; RasāSu. 63.4 (1.224) = UjjvaNiMa. 326.2; **6** command, order आकर्ण्य वाक्यं मकरध्वजस्तु उवाच देवेन्द्रमथैनमेवम्। तवातिदेशादहमागतो वै PadmP. ii. 55.15; (ऋषीणां यदृषित्वं हि तद्वक्ष्यामीह लक्षणैः) (अतस्त्वृषीणां वक्ष्यामि ह्यार्षस्य तु समुद्भवम्) अतिचारे तु देवानामतिदेशे तयोर्यथा। अबुद्धिपूर्वकं तद्वै चेतनार्थं प्रवर्तते VāyuP. i. 59.64; [Maṅkha gives *atideśa* as the meaning of *tathā*, AnekāK. 989]

अतिदेशक (atideśa-ka) *adj.* causing the transference (of a feature) or extension of a rule तत्र यौगिकं नातिदेशकम् कथं येनैव योगेन द्वादशाहे प्रायणीयशब्दस्तेनैव गवामयनेऽपि TupṬ. 156.8 (*on* vii. 1.5); विधिवाक्यगतं च नामधेयमतिदेशकम् BrahmSūBh.(Bhā.) 192.5 (*on* iii. 3.41); विधायकमपि द्विविधम् उपदेशकमतिदेशकं च S'āstrDī. 72.6 (*on* i. 1.5); सौर्यंचरावतिदेशकानि निर्वापः तद्धितेन देवतानिर्देशः एकदेवतत्वम् औषधद्रव्यकत्वम् इत्यादीनि स्पष्टाग्नेयलिङ्गानि NyāyMāVi. 7.15; 387.26 (*on* vii. 3.10); तद्वाक्यम् ... लोहितोष्णीषत्वादीनामतिदेशकम् S'ivārkaMaDī. i. 372.16 (*on* i. 2.19); अर्थवादगतं नाम न द्रव्यस्यातिदेशकम् NayaMañ. III. iii. 26.52; *m.* one of the twelve types of verbal representation, agreement संदेशश्चातिदेशकः ... एवं द्वादशधा प्रोक्ता वागारम्भा विचक्षणैः RasāSu. 60.13 (1.220)

अतिदेशकत्व (atideśaka-tva) *n.* the state of causing the transference (of features) or extension of a rule अन्यधिकरणकत्वस्य तु मासाग्निहोत्रेऽपि यदाहवनीये जुहोतीत्यनेनैव प्राप्तेः प्रायणीयपदवदतिदेशकत्वानुपपत्तिप्रसङ्गादुपेक्षितम् MīmāKau. i. 210.3 (*on* i. 4.4); यद्वादृष्टसंस्कारवाचकेन यूपशब्देन तज्जनकक्रियाणामाक्षेपाभिप्रायातिदेशकत्वोक्तिः MayūMāli. 542.5 (*on* vii. 3.11); 569.2 (*on* viii. 4.1)

अतिदेशकप्रमाण (atideśaka-pramāṇa) *n.* authority for the use of the rule of transference (of details) ननु तत्राप्यतिदेशतः तत्प्राप्तिरिति चेत् न ... अतिदेशकप्रमाणाभावाच्च। प्रकृतिविकृतिभावो ह्यतिदेशमूलम्। नात्र तत्क्लृप्तिः TantrRaha. 44.26.

अतिदेशकल्पकत्व (atideśakalpaka-tva) *n.* the state of being the cause of assumption of the rule of transference न च तथाप्युपदिष्टोपहोमैरेव विकृतेः निराकाङ्क्षत्वादतिदेशकल्पकत्वाभावेन नारिष्ठाप्राप्तिः BhāṭṭDī. iii. 270.13 (*on* x. 4.1); iv. 83.15 (*on* x. 7.9)

अतिदेशकल्पन (atideśa-kalpana) *n.* assumption of the rule of transference (of details) विकृतौ च ... सन्निहितैरुपहोमैरेव निराकाङ्क्षत्वोपपत्तेर्नातिदेशकल्पनापत्तिः BhāṭṭDī. i. 251.9 (*on* iii. 3.4); प्रकृतेः पूर्णतां परिकल्प्य पवमानेष्टिष्वतिदेशकल्पनात् BhāṭṭDī. ii. 25.14 (*on* iii. 6.6); क्लृप्तोपकाराङ्गग्रहणार्थं पूर्वमतिदेशकल्पनावश्यंभावात् BhāṭṭDī. ii. 55.13 (*on* iii. 7.20); तावतैव ... अतिदेशकल्पनप्रतिबन्धात् MīmāKau. ii. 58.16 (*on* ii. 3.19); विधिवाक्ये एव लक्षणाभिया विनियोगभङ्गातिदेशकल्पनादिदोषभिया च ... देवताविशिष्टं ग्रहणमेव यागोद्देशेन विधीयते MīmāKau. ii. 62.19 (*on* ii. 3.20); नातिदेशकल्पनापादको विशेषविध्यङ्गीकारो युक्तः MīmāKau. i. 246.6 (*on* i. 4.13); अनेन हि वाक्येन फलसंबन्धे बोधिते पश्चात् कथंभावाकाङ्क्षायामतिदेशकल्पनात् MīmāNyāPra. 226.23.

अतिदेशकल्पनवत् (atideśakalpana-vat) *adv.* like the assumption of the rule of transference अङ्गानां प्रकृत्यर्थत्वेन निराकाङ्क्षाणामपि विकृत्याकाङ्क्षयैवातिदेशकल्पनवदिन्द्राद्याकाङ्क्षयैव लिङ्गस्य श्रुतिकल्पकत्वोपपत्तिः BhāṭṭDī. i. 255.18 (*on* iii. 3.7)

अतिदेशकल्पना (atideśa-kalpanā) *f.* assumption of the rule of transference उपहोमन्यायेन यूपादिग्रहणेऽपि नातिदेशकल्पनाप्रतिबन्धः BhāṭṭDī. iii. 4.2 (*on* viii. 1.3)

अतिदेशकल्पनोत्तरम् (atideśakalpanottaram) *adv.* subsequent to

the assumption of the rule of transference इह तु अतिदेशकल्पनोत्तरम् … कौत्सादिविधानात् BhāṭṭDī. iii. 284. 5 (*on* x. 4. 10)

अतिदेशकल्प्य (atideśa-kalpya) *adj.* liable to be assumed through the rule of transference तथा चातिदेशकल्प्यैर्मन्त्रैस्तुल्यबलत्वान्न बाध्यबाधकता NyāyMāVi. 518. 15 (*on* x. 3. 4); वेदः … अखिलः … अतिदेशकल्प्यश्च VīraMi. (Paribhāṣā.) 8. 24.

अतिदेशकारण (atideśa-kāraṇa) *n.* cause of the rule of transference तस्याप्यतिदेशकारणं सारूप्यं नास्ति TantrVā. 1119. 4 (*on* iii. 6. 43)

अतिदेशकार्य (atideśa-kārya) *n.* (grammatical) operation due to the rule of transference or extension of application ननु यदतिदेशकार्येण अविरुद्धं स्वाश्रयं कार्यं तन्मा निवृतत् Pradī. vii. 120. 20 (*on* viii. 2. 46)

अतिदेशकाल (atideśa-kāla) *m.* time of (hearing of) the statement of analogy (i. e. the *gayal* is like the cow) अयं गवयपदवाच्यो गोसदृशत्वात् अतिदेशकालावगतपिण्डवदिति TattvCin. iii. 81. 3.

अतिदेशकृत (atideśa-kṛta) *adj.* caused by the rule of transference यस्तु मन्त्रेषु तत्प्रक्षेपः सोऽतिदेशकृतो भविष्यति TantrVā. 419. 19 (*on* ii. 1. 34)

अतिदेशक्रम (atideśa-krama) *m.* order of transference or extension of application अतिदेशक्रमात्स्वाङ्गसमर्पकतयोच्यते BhāvPra.(S'ā.) 222. 1(8)

अतिदेशग (atideśa-ga) *adj.* got by the rule of transference (मीमांसा) अङ्गैर्विचित्रैरनियोजयन्ती प्राप्तोपदेशैरतिदेशगैश्च PraboCan. 6. 18 (109. 16)

अतिदेशगति (atideśa-gati) *f.* attainment of the result of the extension of application निर्ज्ञाते भेदे तत्कार्यप्राप्तये तद्रूपारोपणमिति अतिदेशगतिः Pradī. ii. 3A. 8 (*on* i. 2. 1) (comm. अतिदेशफललाभः)

अतिदेशचिन्ता (atideśa-cintā) *f.* inquiry about transference or extension of application एवं चातिदेशचिन्तारूपत्वाभावादध्याये प्रसङ्गात्सङ्गतिर्द्रष्टव्या MayūMāli. 558. 14 (*on* viii. 1. 14)

अतिदेशज्ञापन (atideśa-jñāpana) *n.* indication of the rule of transference शून्यवादिनिरासेनैव मायावादोऽपि निरस्तो वेदितव्य इत्यतिदेशज्ञापनाय मायी चेत्युक्तम् NyāySu.(Ja.) 409B. 1 (*on* ii. 2. 8)

अतिदेशतस् (atideśa-tas) *adv.* due to the rule of transference तेषामतिदेशतोऽपि लब्धेः PrakaPañ. 5. 13; भेदव्यपदेशश्च … अतिदेशतः Bhām. 569. 12 (*on* iii. 2. 31); तथा हि किमपि स्फुटीकृतमिह स्फुटेऽप्यर्थतः सकष्टमतिदेशतो विविधवाचनातोऽपि यत् JñātāDhaṬ. 254A. 1; जुहुयात्पितृयज्ञवत् इत्यतिदेशतः प्राप्तौ होममन्त्रौ मदालसया दर्शितौ SmṛtiCan. v. 319. 8; v. 330. 16; अतिदेशतः अप्राप्ते मीमांस्यमाने दोषोऽपि NyāySu.(So.) 38. 32 (*on* i. 2. 7); प्रकृतिवदित्यतिदेशात एव प्रकृतिभूतदर्शपूर्णमासतः प्रणयनमात्रस्य प्राप्त्या तद्विध्यानर्थक्यापत्तेः BālamBha. ii. 198. 9 (*on* 2. 135); तस्य तेष्वतिदेशतः प्राप्तिसंभवात् S'ivārkaMaDī. i. 58. 31 (*on* i. 1. 1); i. 143. 27 (*on* i. 1. 1); i. 304. 17 (*on* i. 2. 1); प्रकृतावङ्गस्याग्नेर्वि(? कृति)ष्वतिदेशतः प्राप्तिसंभवात् तास्वग्निविधयो न तत्प्राप्त्यर्थाः VidhiRa. 32 (175. 6); यद्यपि चाग्निष्टोमस्तोत्रभावनोत्तरकालाद्यतिदेशतः संभवत्प्राप्तिकम् MīmāKau. iii(2). 279. 10 (*on* ii. 2. 26); उद्देश्योक्थ्यादिसंबन्धेनातिदेशतश्चयनादिप्राप्तेः BhāṭṭCin. i. 72. 1 (*on* i. 1. 4); नाद्यः। इष्टयङ्गार्थतया आहवनीयातिदेशेऽतिदेशतः साक्षात्संबन्धालाभप्रसङ्गात् MayūMāli. 203. 21 (*on* iii. 1. 12); ननु तत्राप्यतिदेशतस्तत्प्राप्तिः TantrRaha. 44. 21; अतिदेशतः प्रत्ययज्ञानसत्त्वेन व्यभिचारात् LaS'abdeS'e. i. 87. 3.

अतिदेशत्रैविध्य (atideśa-traividhya) *n.* threefoldness of the rule of transference ततश्च प्रकृतस्याप्यतिदेशस्य चोदनालिङ्गनिमित्तकातिदेश एवान्तर्भावान्नातिदेशत्रैविध्यविरोधः MayūMāli. 313. 15 (*on* iii. 6. 16)

अतिदेशत्व (atideśa-tva) *n.* the state of being the rule of transference अतिदेशत्वाभावे न काचित्क्षतिः BhāṭṭDī. ii. 349. 19 (*on* vii. 2. 1); व्यापारस्यातिदेशत्वे तद्वतः शास्त्रस्य करणव्युत्पत्त्या शास्त्रेऽतिदेशत्वव्यवहारः MayūMāli. 526. 25 (*on* vii. 1. 1); अनेनास्यातिदेशत्वं बोधयति LaS'abdeS'e. i. 410. 1.

अतिदेशत्वव्यवहार (atideśatva-vyavahāra) *m.* usage as *atideśa* (transference or extension of application) अत्र च … अतिदेशत्वव्यवहारो भाक्तः BhāṭṭDī. ii. 361. 17 (*on* vii. 3. 9); व्यापारस्यातिदेशत्वे तद्वतः शास्त्रस्य करणव्युत्पत्त्या शास्त्रेऽतिदेशत्वव्यवहारः MayūMāli. 526. 25 (*on* vii. 1. 1)

अतिदेशद्वार (atideśa-dvāra) *n.* [Inst.] by means of the rule of transference or extended application अथ त्र्यश्रस्यातिदेशद्वारेण लक्षणं कर्तुमुपक्रममाह AbhinBhā. i. 70. 11 (*on* 2. 104); पूर्वोक्तमेवातिदेशद्वारेण सारयितुमाह Kāvyānu.(He.) 382. 10.

अतिदेशधी (atideśa-dhī) *f.* knowledge of the rule of transference कार्ये ज्ञातेऽधिकारः स्यादुपदेशेऽतिदेशधीः TantrVā. 337. 3 (*on* ii. 1. 1)

अतिदेशन (ati-deśana) *n.* the act of transference (of details) (आदिशास्त्रम्) भूषितम् … तन्त्रावापातिदेशनैः AhirbuS. 11. 29; ततोऽवान्तरकार्याणां नाङ्गानामतिदेशनम् NyāyRaMā. 181. 21; समुच्चयो वा विषये सर्वत्वं बह्वपेक्षया। न तु द्वयोरतः षण्णां पृष्ठानामतिदेशनम् NyāyMāVi. 382. 15 (*on* vii. 3. 3)

अतिदेशनिमित्त (atideśa-nimitta) *n.* cause of transference अतिदेशनिमित्तस्य च चोदनालिङ्गस्य जुह्वोत्यर्थस्य दर्शनात् TantrVā. 553. 16 (*on* ii. 2. 26)

अतिदेशनियामक (atideśa-niyāmaka) *adj.* criterion for the application of the rule of transference प्रकृतिसंबन्धित्वमेव ह्यतिदेशनियामकं नाङ्गत्वमपि प्रमाणाभावात् MayūMāli. 556. 17 (*on* viii. 1. 13)

अतिदेशनिरूपक (atideśa-nirūpaka) *adj.* conditioner of the rule of transference अत्र च प्रकृतिशब्दो नातिदेशनिरूपकपरः BhāṭṭDī. iii. 186. 11 (*on* x. 1. 1)

अतिदेशनिरूपण (atideśa-nirūpaṇa) *n.* exposition of the rule of transference अतिदेशनिरूपणोपोद्घातत्वेनेदं निरूप्यते BhāṭṭDī. ii. 338. 5 (*on* vii. 1. 1); नवमान्तैरेवोपदेशातिदेशनिरूपणसमाप्तेः MayūMāli. 793. 4 (*on* xi. 1. 1) 793. 5 (*on* xi. 1. 1)

अतिदेशनिर्मुक्ता (atideśa-nirmuktā) *adj.* (*f.*) free from (the scope of) the rule of transference or extension of application तस्मादतिदेशनिर्मुक्तायां प्रकृतावेव निवेशः TantrVā. 1072. 22 (*on* iii. 6. 4)

अतिदेशनिवृत्ति (atideśa-nivṛtti) *f.* cessation of (the operation of) the rule of transference आज्यभागातिदेशे व्यापृतस्य चोदकस्य को नामातिदेशनिवृत्तिरूपविरुद्धधर्मप्रसङ्गः NyāyMāVi. 590. 27 (*on* x. 7. 9); प्राधान्ये सति तदपचारे प्रधानविस्मरणादिप्रायश्चित्तप्राप्तिर्विकृतिषु चातिदेशनिवृत्तिः VidhiRa. 9 (72. 18); न हि तेन पशावतिदेशनिवृत्तिस्सिध्यति BhāṭṭDī. iv. 101. 16 (*on* x. 8. 2)

अतिदेशन्याय (atideśa-nyāya) *m.* principle of the rule of transference पुनरतिदेशन्यायोपन्यासादसंबद्धत्वम् TantrVā. 553. 11 (*on* ii. 2. 26)

अतिदेशपक्ष (atideśa-pakṣa) *m.* the view (upholding) the rule of transference एतेनातिदेशपक्षः प्रत्युक्तः TantrVā. 1119. 3 (*on* iii. 6. 43); अतिदेशपक्षे तस्य…पदार्थविशेषितोपकारविषयकत्वकल्पनात् GuruCandr. i. 300. 13.

अतिदेशपरता (atideśapara-tā) *f.* dependence on the rule of transference तावन्मात्रे इष्टापत्तेरतिदेशपरतया लभ्यं तात्पर्यमाह BālamBha. ii. 77. 29 (*on* 2. 62)

अतिदेशपरंपरा (atideśa-paramparā) *f.* a series of rules of transference या त्वतिदेशपरंपरा तत्र तत्रोदाहृता तत्र सर्वत्र प्रबलं लिङ्गमुपन्यस्तम् NyāyMāVi. 412. 17 (*on* viii. 3. 6)

अतिदेशपरिलोपकत्व (atideśaparilopaka-tva) *n.* the state of cancelling the rule of transference आज्यभागविध्यभावेनातिदेशपरिलोपकत्वानुपपत्तेः BhāṭṭDī. iv. 89. 9 (*on* viii. 7. 13); iv. 117. 17 (*on* x. 8. 11)

अतिदेशपर्युदास (atideśa-paryudāsa) *m.* exclusion of the rule of transference अतिदेशपर्युदासेन … प्रायणीयादिविधीनां दीक्षोत्तरकालभाविनां शेषो भवत्ययं पर्युदासः S'āstrDī. 779. 8 (*on* x. 8. 7); अतिदेशपर्युदासार्थमाज्यभागश्रवणम् MayūMāli. 761. 10 (*on* x. 7. 9)

अतिदेशप्रकार (atideśa-prakāra) *m.* mode of transference (of details) इत्थं प्रयोक्तव्यमित्यतिदेशप्रकार एव चिन्त्यते ṬupṬ. 152. 12 (*on* vii. 1. 1); अतिदेशप्रकारोऽयमथान्तरे शब्दविनिवेशो नाम VyaktiVi. 24. 6.

अतिदेशप्रतिपत्ति (atideśa-pratipatti) *f.* understanding the extension of application क्वचित्…सामानाधिकरण्येन निर्देशः क्रियते … तत्र सामर्थ्यादतिदेशप्रतिपत्तिः Pradī. v. 285B. 20 (*on* vi. 4. 22)

अतिदेशप्रतिबन्ध (atideśa-pratibandha) *m.* restraint on the rule of transference अवदानांशेऽतिदेशप्रतिबन्धात्…वपासंस्कारकस्यैवावदानस्य हृदयाद्युद्देशेन विधिः BhāṭṭDī. iv. 94. 10 (*on* x. 7. 18)

अतिदेशप्रतिबन्धकत्व (atideśapratibandhaka-tva) *n.* nature of being a restraint on the rule of transference तत्र तद्विषयेऽतिदेशप्रतिबन्धकत्वायोगात् BhāṭṭDī. iv. 50. 12 (*on* x. 6. 4); iii. 182. 15 (*on* ix. 4. 12); गृहमेधीयाङ्गत्वप्रतीतेः अतिदेशप्रतिबन्धकत्वोपपत्तावपि MīmāKau. ii. 58. 19 (*on* ii. 3. 19)

अतिदेशप्रतीति (atideśa-pratīti) *f.* knowledge of the transference (of details) एवं स्थिते प्रणयनविधिः प्रतीयते न सौमिकवदित्यतिदेशप्रतीतिः Subodhi. 68. 20 (*on* 2. 135); सौमिकवदित्यतिदेशप्रतीत्या तत्रत्यसकलधर्मप्राप्तौ उत्तरवेदेरपि प्राप्तत्वात् BālamBha. ii. 198. 13 (*on* 2. 135)

अतिदेशप्रत्यासन्नत्व (atideśapratyāsanna-tva) *n.* proximity of the rule of transference ऊहस्यातिदेशप्रत्यासन्नत्वात्तदुत्तरं निरूपणे कृत एवावसर इति ऊहेनापि सङ्गतिः BhāṭṭDī. iii. 187. 20 (*on* x. 1. 1)

अतिदेशप्रमाण (atideśa-pramāṇa) *n.* authority of the rule of transference अतिदेशप्रमाणैः प्रथमं प्राकृत उपकारे…पदार्थानां वैकृतभावनाशेषत्वमपि… प्रधानविधित एव भवति TantrRaha. 52. 26; (अत्र) वचननामधेयचोदनालिङ्गानामतिदेशप्रमाणानाम्…ग्रहणम् S'ivārkaMaDī. i. 37. 30 (*on* i. 1. 1); BhāṭṭCin.

i. 11. 27 (*on* i. 1. 3); मन्त्रप्राप्तिः। नाप्यतिदेशप्रमाणेनोहितस्य MīmāKau. ii. 279. 6 (*on* iii. 2. 27); अतिदेशप्रमाणावगताङ्गभावानामेव ऋचाम् BhāṭṭDī. iii. 283. 22 (*on* x. 4. 10); कार्यापत्तिरप्यतिदेशप्रमाणप्रकारभेद एव MayūMāli. 311. 16 (*on* iii. 6. 13)

अतिदेशप्रमाणक (atideśapramāṇa-ka) *adj.* having the rule of transference for its authority अतिदेशप्रमाणकस्येहाविचार्यत्वात् BhāṭṭDī. i. 181. 15 (*on* iii. 1. 1); उपदेशातिदेशप्रमाणकान्याङ्गप्राप्तिवदाचमनादीनामपि स्मृत्याचारप्रमाणकानां प्राप्तेः MīmāKau. i. 30. 25 (*on* i. 3. 5)

अतिधनयुक्त (atidhana-yukta) *adj.* very rich बीजान्यतिधनयुक्ताः फलमूलैर्यै च वर्तन्ते BṛSaṁ. 177. 6 (15. 17)

अतिधनलुब्धात्मन् (ati-dhanalubdhātman) *adj.* very greedy for wealth द्विजगुरुपरिभवकारी यो नरपतिरतिधनलुब्धात्मा । ध्रुवमिह निपतति पापोऽसौ फलमिव पवनहतं वृन्तात् MṛtaSaṁ. *on* 6. 25.

अतिधनाढ्य (ati-dhanāḍhya) *adj.* very much wealthy राजराज-

-सदृशोऽतिधनाढ्यः … । तैलमेतदुपयुज्य मनुष्यो नाशयेदखिलवातविकारान् KalyāKā. 12.22.

अतिधनाय (ati-dhanāya-) (*denom.*) to wish for excessive wealth विषयैर्विप्रलब्धोऽयम् अतिधनायति । …जन्तुः MahāP. 11.205.

अतिधनिन् (ati-dhanin) *adj.* very rich इमे च नातिधनिनो धनार्थश्च महान्मम MahāBhā. iii. 97.10; AgniP. 27.60.

अतिधनुर्भृत् (ati-dhanurbhṛt) *adj.* surpassing (other) archers, distinguished archer तेन वो दर्शनीयेन वीरेणातिधनुर्भृता । माद्रीपुत्रेण कौरव्य पाण्डवा अभ्ययुञ्जत MahāBhā. v. 49.27.

अतिधनुष्मत् (ati-dhanuṣma(n)t) *adj.* distinguished archer अतिधनुर्भृ(v. l. ष्म)ता । माद्रीपुत्रेण … पाण्डवा अभ्ययुञ्जत MahāBhā. v. 49.27.

अतिधन्य (ati-dhanya) *adj.* [*f.* -ā] very blessed, very fortunate अतिधन्योऽहम् … प्राप्तः साधुसमागमम् PadmP.(Ra.) 33.113; KuṭṭaMa. 666; अतिधन्येन केनापि … । वरेण सह तारुण्यं निर्विशन्ती गृहे वस KāvyālaṅSāSaṁ. 6.6*; NāgaSa. 13.10; देवि त्वमतिधन्यासि सुन्दरि KālīViT. 22.33; PadmP. iv. 64.109; Rāvaṇā. 13.63; सोऽतिधन्यः … विनिहितकुचकुम्भा पृष्ठतो यन्मृगाक्षी SubhāRaK. 17.31; सैव भवेदतिधन्या यां परिचुम्ब्य प्रगल्भते मधुपः GopāKeCan. 74.10; SaṅkaDigVi.(Mā.) 8.49; BhaktiRaSi. i. 3.4.

अतिधन्व (atidhanva) *m.* name of a Sāmaveda teacher तद् हातिधन्वश्शौनकः प्रसुप्त आस JaimiBr. 1.190.

अतिधन्वन् (atidhanvan) *m.* name of a Sāmaveda teacher उदरशाण्डिल्योऽतिधन्वनश्च शौनकान्मशकाच्च गार्ग्यात् VaṁśBr. 2.8; (उद्गीथम्) तं हैतमतिधन्वा शौनक उवाच ChāndoU. i. 9.3; *adj.* **i** who surpasses bows (i. e. other weapons) अतिधन्वनः । धनुरित्यायुधमात्रस्य उपलक्षणम् । तदतिक्रान्तं येन तन्नामकात् comm. on VaṁśBr. 2.8; **ii** which surpasses a desert [Apte]

अतिधर्म (ati-dharma) *m.* great merit जम्बूर्येन प्ररोपिता । … सः … अतिधर्मेण युज्यते SārṅgaPa. 2102; [Inst.] with great piety अनापद्यतिधर्मेण याज्यतः …। गृह्णन् प्रतिग्रहं विप्रो न धर्मात् परिहीयते CaturCin. i. 54.20.

अतिधर्मज्ञ (ati-dharmajña) *adj.* fully knowing the religion अतिधर्मज्ञः … ददौ दानं स साधुषु PadmP.(Ra.) 32.185.

अतिधर्मपर (ati-dharmapara) *adj.* greaty given to righteousness अतिधर्मपरः स नेक्षते किमिमं धर्मपथव्यतिक्रमम् JātaMā. 117.10 (20.6)

अतिधर्मपरायणा (ati-dharmaparāyaṇā) *adj.* (*f.*) greatly devoted to righteousness पत्नी च शैब्या तस्याभूदतिधर्मपरायणा ViṣṇuP. iii. 18.53.

अतिधर्मरत (ati-dharmarata) *adj.* greatly devoted to righteousness ते शूद्रजातयो जाता नातिधर्मरताश्च ये SamarāSū. 7.16.

अतिधर्मात्मन् (ati-dharmātman) *adj.* greately righteous प्रह्लादोऽप्यतिधर्मात्मा … विष्णुतत्परः DevīBhāP. iv. 7.20; iii. 15.55; मम पुत्रोऽतिधर्मात्मा वदान्यो यज्ञकारकः GaṇeP. i. 59.3.

अतिधर्मिन् (ati-dharmin) *adj.* greatly righteous उपदिष्टो हि मे धर्मः कपोतेनातिधर्मिणा MahāBhā. xii. 143.5.

अतिधर्मिष्ठ (ati-dharmiṣṭha) *adj.* very righteous नातिधर्मिष्ठान् … अपश्यं सप्त वै द्विजान् HariVaṁ. 16.3; सर्वसामन्तकनृपानथ । वशे चक्रेऽतिधर्मिष्ठान् … नृपः DevīBhāP. iii. 25.37.

अतिधवल (ati-dhavala) *adj.* [*f.* -ā] extremely white अतिधवलजलचरच्छेदशुचिना दुकूलपट्टपल्लवेन कृतशिरोवेष्टनः Kād. 16.14; 38.20; विश्रब्धप्रसुप्तामतिधवलोत्तरच्छदनिमग्नप्रायैकपार्श्वतया … शरदम्भोधरोत्सङ्गशायिनीमिव सौदामिनीं राजकन्यामपश्यम् DaśKuC. 62.15; SivaKePāSt. 7; मध्ये च तस्यातिधवलवृत्तातपत्रस्य मूले लक्ष्मीरिव चन्द्रमसो मण्डलाद्गलिता … युवतिः UdaySuKa. 66.17; 62.27; ĪśānSiPa. i. 19.13; अतिधवलासु सिकतासु प्रवहति नदीजले नीलद्रव्यसंनिधानाभावात् PūrvottaVāNaMā. 340.6; SivārkaMaDī. ii. 66.15 (*on* ii. 2.10); SiddhāLeSaṁ. 204.3.

अतिधवलता (atidhavala-tā) *f.* the state of being extremely white परिधाय…कलधौते इवातिधवलतया विभाव्यमाने दुकूलवाससी TilaMañ. 34.13.

अतिधामन् (ati-dhāman) *adj.* very refulgent (अयोध्या) आयोजनाद्वा भूयो वा सातिधामा व्यकाशत Rāmā. i. 248*(43); स्वगिरा योऽत्येति देवगुरुमतिधामा ĀnandRa. 3.65.

अतिधार (ati-dhāra) *adj.* which surpasses showers अतिधारानिपूनस्य वर्षतः शुचिनामुना । शङ्के द्वेषो भवेन्नो चेत् कथमस्यायमन्तकृत् HammīMaKā. 13.209.

अतिधार्मिक (ati-dhārmika) *adj.* very righteous, religious-minded अपि तु त्वा मृदुम् … अतिधार्मिकम् । … न लोको बहु मन्यते MahāBhā. xii. 76.19; i. 854*; xiii. 12.3; भ्राता मम … अतिधार्मिकः (कुशध्वजः) Rāmā. i. 69.2; तस्य …। पुत्रः…अतिधार्मिकः (वीर्यसहः) Rāmā. vii. 65.10; vii. 100.18; सर्वे वैशालिका नृपाः ।… अतिधार्मिकाः ViṣṇuP. iv. 1.61; तेषाम् …। अनुरागवतां तत्र महीपालेऽतिधार्मिके MārkP. 109.48; VāyuP. ii. 37.125; मनुः … अतिधार्मिकः BrahmVaiP. v. 41.104; पालयामास राज्यम् … धर्मगुप्तोऽतिधार्मिकः SkandP. iii(1). 32.60; iii(1). 16.33; iii(1). 36.186; iii(1). 47.44; v(3). 209.58; प्राप्तः कश्चिद्विप्रोऽतिधार्मिकः BṛNāraP. 9.120; ManuBh. ii. 134.5 (*on* 8.142); KulārT. 13.50; BrahmP. 78.3; द्विजोऽतिधार्मिकः …। ध्यानायोपवने तस्थौ PadmP. iv. 102.144; BṛDharmaP. 48.54; RauhiC. 28.

अतिधार्मिकत्व (atidhārmika-tva) *n.* the state of being very righteous दम्भोऽभिमानोऽप्यतिधार्मिकत्वम् (कुर्वन्त्यवश्यं सिद्धिविघ्नम्) NītiSā. 15.26 (BI. Ed., VP. Ed.)

अतिधार्ष्ट्य (ati-dhārṣṭya) *n.* great impudence नैष मम क्षेत्रे भवत्यान्यस्य सुतो धार्यः समुत्सृजैनमलमतिधार्ष्ट्येन ViṣṇuP. iv. 6.21; कृष्णस्याग्रेऽतिधार्ष्ट्येन तद्भक्तेष्ववहेलया । स्वाभीष्टदेवतोऽन्यत्र परमोत्कर्षवीक्षया । मर्यादातिक्रमाद्यैश्च प्रीतोपरसता मता BhaktiRaSi. iv. 9.5.

[1]अतिधाव् (áti-dhāv-) I. P. **Ai** to overcome एष देवो विपा कृतोऽति ह्वरांसि धावति । पवमानः ṚV. ix. 3.2; **Aii** to overrun अति धावतातिसरा इन्द्रस्य वचसा हत AV. v. 8.4; AV.(P.) vii. 18.4; **B** to run speedily अतिधावति । पतति … मत्तः पानेन BhelaS. 216.24 (6.30)

[2]अतिधाव् (ati-dhāv-) I. P. to clean excessively वर्णी … नातिधावेच्च वासांसि SkandP. ii(9). 21.7; [caus.] to clean excessively (वर्णी) दन्तान्नैवातिधावयेत् SkandP. ii(9). 21.6.

अतिधिषण (ati-dhiṣaṇa) *adj.* possessed of great intellect विशारदोऽतिधिषणे … निगद्यते SabdaRaSaK. 179.7.

अतिधी (ati-dhī) *f.* name of a woman सुयोधननृपस्तत्र सामन्तः …। तस्यातिधीः प्रिया BṛKathāK. 76.160.

अतिधीमत् (ati-dhīma(n)t) *adj.* very intelligent (नरः…पीतोद्भवायाः प्रकृतेः सकाशात्) शिल्पप्रवीणः कुशलोऽतिधीमान् … स्यात् KalyāKā. 3.22.

अतिधीर (ati-dhīra) *adj.* [*f.* -ā] very firm, steady, resolute, brave अहोऽतिधीरं बलवच्च ते मनश्चलेषु कामेषु च सारदर्शिनः BuddhaC. 4.97; रिपुसमरविमर्दं मानवीर्यप्रदीप्तं सुतशतमतिधीरं वीरमुत्पाद्य ŪruBha. 1.39; व्यनक्त्यन्तस्तापं तदयमतिधीरोऽपि विषमम् MālaMā. 3.92; MahāvīC. 5.11 (298.2); सम्यक्प्रयोगनिपुणः कुशलोऽतिधीरः (वैद्यो भवेत्) KalyāKā. 1.29; तस्या ह्यतिधीराया अतिपरिचयेन गौरवाभिमानौ कृच्छ्रयन्स्फुटयति JayaMa. 272.19 (*on* 5.3); अतिधीरा प्रसन्नाङ्गी गौरी प्रहसितानना PadmP. ii. 12.79; RāmāMañ. 82.6; कोऽपि सप्ताब्ददेशीयोऽप्यतिधीरोऽद्भुताकृतिः (द्विजार्भकः) KathāSaSāg. xii. 27.96; RājTa.(Ka.) 7.448; क्रोधेन वृकोदरोऽतिधीरो धरतः । द्रौणिम् … समाद्रवत् YudhiVi. 8.85; CaitaCa. 214.14 (9); दृष्ट्वा त्वामतिधीरश्चित्तोन्मादं सदा तनुते KandaCū. v. 4.12.

अतिधीरकनीनक (atidhīra-kanīnaka) *adj.* in which the pupils are very steady स च तानसुरान्सर्वानतिधीरकनीनकैः । संभावयन्समालोकैः कियन्तं चित्क्षणं स्थितः BrahmāṇḍP. iii. 21.30.

अतिधीरगिर् (atidhīra-gir) *adj.* of bold speech इत्युक्त्वा विरराामासौ द्विजव्यूहोऽतिधीरगीः PrabhāC. 188.3.

अतिधीरता (atidhīra-tā) *f.* great courage or fortitude (राज्यवर्धनहर्षौ) अतिधीरतया हृदयनिहितां स्वामिभक्तिमिव निश्चलां दृष्टिं धारयन्तम् … ददृशतुः HarṣaC. 198.4; शौर्यं सुदाक्ष्यं व्यसनेष्वदैन्यमुत्साहसम्पत्स्वतिधीरता च NītiSā. 16.33; BṛKathāSloSaṁ. 17.92; दशमुखः … प्लवगसेनाधिपतीनतिधीरतया सावधारणमवेक्षमाणः RāmāCam. 6.29 (6)

अतिधीरत्व (atidhīra-tva) *n.* great fortitude सौदामिनीसमच्छायामतिधीरत्वयोगिनीम् ।… आयान्तीमन्तिकं किंचिद्वैदेहीम् PadmP.(Ra.) 79.43.

अतिधीरधी (atidhīra-dhī) *adj.* of a very steady or firm mind जनयन्ति च विस्मयमतिधीरधियामप्यदृष्टपूर्वा दृश्यमाना जगति स्रष्टुः सृष्टयतिशयाः HarṣaC. 40.4; एवमुक्तो जगादासौ सितं कृत्वातिधीरधीः PadmP.(Ra.) 24.101; नृपागारात्पुरस्कृत्य प्रेयसीमतिधीरधीः । नलोऽचलत् PāṇḍaC. 6.350; अतिधीरधीरपि । दुःसहव्यथतया रघूत्तमः प्रावृषं कथमपि व्यजीगमत् Rāgh. 11.26.

अतिधीरप्रकृति (atidhīra-prakṛti) *adj.* whose nature is serene or composed अतिधीरप्रकृतेरपि चन्द्रापीडस्य परपर्श विस्मयो हृदयम् Kād. 80.5.

अतिधीरप्रवृत्ति (atidhīra-pravṛtti) *adj.* whose behaviour is serene or composed अथ रथाङ्गपाणिः …गान्दिनीनन्दनेन समाहूतः …शताङ्गमतिधीरवृत्तिरधिरुह्य … गोकुलात् … प्रतिष्ठमानः ĀnandRa. 1.30 (5)

अतिधीराक्षरोच्चार (ati-dhīrākṣaroccāra) *n.* very deep or sonorous articulation of sounds अतिधीराक्षरोच्चारबधिरीकृतपुष्करैः MalliC. 7.287.

अतिधीवरी (ati-dhīvarī) *adj.* [Debru. p. 901, MahāBh. iii. 208.4]

who has surpassed the clever one इदं तर्हि । अतिधीवरी अतिपीवरी MahāBh. ii. 205. 18–19 (*on* Vār. 2 on P. iv. 1. 14); धीवानमतिक्रान्ता अतिधीवरी JaineVyā. 150. 28 (*on* iii. 1. 4); 151. 13 (*on* iii. 1. 7); CāndraVr̥. *on* ii. 3 15; एतदेव ज्ञापकं भवत्यस्मिन्प्रकरणे तदन्तविधिरिति तेनातिधीवरी अतिपीवरी अतिभवती इति भवति KāśiVr̥. *on* iv. 1. 4; Nyās. i. 809. 25 (*on* iv. 1. 4); अतिधीवरीति धीवानमतिक्रान्तेति तत्पुरुषः Pradī. iv. 43A. 25 (*on* iv. 1. 14); PadMañ. *on* KāśiVr̥. *on* P. iv. 1. 4; SiddhāKau. 112A. 1; LaS'abdeS'e. i. 382. 1.

अतिधीवृत्ति (ati-dhīvr̥tti) *adj.* which is beyond the scope of intellect तेजोऽभावस्तम इति मतं खण्डयन्तीव तेषामासीदक्षणामतिथिरतिधीवृत्तिरप्यात्मभाजाम् ĀnandRa. 1. 14 (comm. 'अप्राप्य मनसा सह' इति श्रुतेः बुद्धिव्यापाराविषयः)

अतिधूपन (ati-dhūpana) *n.* excessive fumigation शुष्कोष्ठकण्ठहृदयताल्वामेतेषामतिधूपनाच्छोषितवलानां पयसोपसेचनं पुनः पुनः प्रसादनमाहुराचार्याः Hastyāyur. 634. 3 (4. 13)

अतिधूपायदर्क (ati-dhūpāyadarka) *adj.* surpassing the blazing sun सोऽतिधूपायदर्कं तं पनायत्रुचितं व्यधात् DvyāśraKā. 7. 75 (comm. प्रतापातिशयेन संतापयन्तं सूर्यमतिक्रान्तम्)

अतिधूम (ati-dhūma) *m.* name of S'iva अतिधूम्रो (v. l. अतिधूमो) हुतो हविः MahāBhā. xiii. 17. 79; *adj.* giving out much smoke कृतेऽपि यत्नेऽतिकृशः कृशानुः…वामीकृतावर्तशिखोऽतिधूमः YogYā. 8. 9.

अतिधूमक (atidhūma-ka) *m.* too much haziness (before the eyes) (तृष्णायां) पित्तान्मूर्च्छास्यतिक्तता । रक्तेक्षणत्वं प्रततं शोषो दाहोऽतिधूमकः Aṣṭā-Hr̥. iii. 5. 51.

अतिधूमपान (ati-dhūmapāna) *n.* inhaling too much smoke नागानामतिधूमपानोल्लेखाजर्जरीभूतशरीराणां प्रलेपमिवोष्णेनाभिष्यन्दी भवति श्लेष्मा Hastyāyur. 620. 10 (4. 7)

अतिधूमोद्गतायन (atidhūmodgatāyana) *m.* name of S'iva अतिज्वालो महाज्वालो अतिधूम्रो हुतो हविः (v. l. अतिधूमोद्गतायनः) MahāBhā. xiii. 17. 79.

अतिधूम्र (ati-dhūmra) *m.* name of S'iva (अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु) अतिधूम्रो हुतो हविः MahāBhā. xiii. 17. 79; *adj.* excessively smoky मृगगतिरतिधूम्रो वायुबिम्बे स पायात् … वायवीयः … वो यकारः ĪśānS'iPa. i. 3. 54.

अतिधूम्रवर्ण (ati-dhūmravarṇa) *adj.* excessively smoke-coloured बिम्बे तु वायोरतिधूम्रवर्णे यङ्कारमुद्भाव्य तु चण्डवायुम् । ध्यायेत् … आत्मदेहम् ĪśānS'iPa. i. 10. 29; ii. 4. 29.

अतिधूर्त (ati-dhūrta) *adj.* [*f.* -ā] extremely cunning, very deceitful नियतमतिधूर्तेन चाणक्यबटुना जनितमयशः प्रमार्ष्टुमेषा लोकप्रसिद्धिरुपचिता MudrāRā. 2. 15 (27); अर्थो नाम जनानां जीवितमखिलक्रियाकलापस्य । तमपि हरन्त्यतिधूर्ताः श्लक्ष्णगला गायना लोके KalāVi. 7. 1; S'ārṅgaPa. 4046; वक्रक्रियां वासुकिरादधानः । आकर्णयोग्यं हृदयग्रहेण चक्रे गिरिं मुग्धमिवातिधूर्तः DaśāvaC. 2. 14; नायं त्वमित्यसौ । त्याज्यते ग्राह्यते चान्यदहो श्रुत्यातिधूर्तया NaiṣC. 17. 54; कम्बूः परद्रव्यहरेऽतिधूर्ते KośaKaTa. 2. 6895.

अतिधूर्तधी (atidhūrta-dhī) *adj.* whose mind is very cunning or deceitful अथैषां हन्त धूर्तानामतिधूर्तधिया जयः RatnaCūKa. 195; अतिधूर्तधियां स्थानं विचिन्त्य गणिकागृहम् RatnaCūKa. 196.

अतिधूसर (ati-dhūsara) *adj.* very grey कादम्बास्तु कलहंसाः पक्षैः स्युरतिधूसरैः AbhidhāCin. 1327.

अतिधृति (ati-dhr̥ti) *f.* **1** extreme fortitude or endurance अथ यदास्य मानुषाणामतिधृतिमतिदुःखं वा पर्वताः स्फुटन्ति निपतन्त्याकाशाद् भूमिः कम्पते महाद्रुमा उन्मूलन्ति … तान्येतानि सर्वाणि सूर्यदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति ṢaḍviBr. v(vi). 12. 2; **2** name of a metre with 76 syllables (19 in each quarter) धृतिः पूर्वा द्विसप्ततिः षट्सप्ततिस्त्वतिधृतिः R̥Prāti. 16. 55; धृतिरष्टादशाक्षरा । एकोनविंशातिधृतिः NāṭyaS'ā. 14. 50; अतिधृत्यां सहस्राणि चतुर्विंशतिरेव च । तथा शतसहस्राणि पञ्चवृत्तशतद्वयम् । अष्टाशीतिश्च वृत्तानि वृत्तज्ञैः कथितानि तु NāṭyaS'ā. 14. 66; Jānāśra. 1. 2(6); 4. 90; Liṅgānu.(Ha.) 12. 12; MrtaSaṁ. 41. 4 (*on* 4. 7); VrttaRa. 1. 20; DevīBhāP. xii. 1. 17; ĪśānS'iPa. i. 1. 86; Mānaso. iv. 2. 220; अतिधृत्यां म्सौ स्सौ तौ गः Chandonu. 2. 321; अस्य मन्त्रस्यातिधृतिः स्वर्णगर्भ ऋषिस्ततः VasiS. 18. 149; करुणे शक्वरी ज्ञेया तथैवातिधृतिर्भवेत् BhāvPra.(S'ā.) 273. 17(9); ChandoMañ. 2. 313(2); अतिधृतिः क्लीबे त्वातिधृतं मतम् KośaKaTa. 1. 1408; cf. KalpaK. 78. 90 **3** nineteen वियच्चन्द्रातिधृतयः (= 1910) SūryaSi. 2. 18; BrāhmSphuSi. 2. 8; 16. 31; स्त्रोधिष्ण्यतो वेददिगादिविश्वानृपातिधृत्याकृतितत्त्वतुल्ये । पुंभे सति प्रीतिरतीव … वधूवरस्य VasiS. 32. 179; उत्सेधेऽत्रैकविंशत्यतिधृतितिथिविश्वाङ्कभक्ते TantrSa. 2. 27; 2. 126; **4** great joy जिनवपुः … अमरा निदद्दृशुरतिधृतिविमुकुलनयनाः MahāP. 23. 167.

अतिधृतिसंख्य (atidhr̥ti-saṅkhya) *adj.* nineteen in number अष्टयस्त्वष्टिधृत्यतिधृतिसंख्या वा दर्भाः ĪśānS'iPa. ii. 9. 11(1)

अतिधृतिस्वार्ण (atidhr̥ti-svārṇa) *m.* nineteenth syllable बीजं चातिधृतिस्वार्णो लकुली बिन्दुमान्स्मृतः ĪśānS'iPa. i. 35. 6.

अतिधृतोद्यमा (atidhr̥todyamā) *adj.* (*f.*) who maintained zeal for quite a long time अथ ताम्…संध्याम्…तपसेऽतिधृतोद्यमाम् । प्रोवाच … वसिष्ठः S'ivaP. ii(2). 5. 59 (73A. 12)

अतिधृत्यंश (atidhr̥ty-aṁśa) *adj.* having nineteen divisions or parts अतिधृत्यंशपीठोच्चे भागो भूगतमंशकौ ĪśānS'iPa. ii. 39. 42; स्तम्भार्धादिसमुच्छ्रये प्रकृतिभक्ते प्रस्तरे वातिधृत्यंशे TantrSa. 2. 53 (comm. एकोनविंशतिधा च वा कृते)

अतिधृत्यंशित (atidhr̥ty-aṁśita) *adj.* divided into nineteen parts पञ्चांशैर्वाथ कर्तव्यमतिधृत्यंशिते तथा S'ilpaRa. i. 17. 20; ii. 27. 35.

अतिधृष्ट (att-dhr̥ṣṭa) *adj.* [*f.* -ā] very daring, bold or impudent तां राजपुत्रः प्रसमीक्ष्य शूरश्चुक्षोभ शार्दूल इवातिधृष्टः VarāṅgaC. 14. 26; इयमतिधृष्टा किं प्रलपति GopāKeCan. 78. 16; 89. 13; एकमिदं सूत्रमन्यथा योजयन्नतिधृष्ट इत्यलं विस्तरेण AṇuBh. 124. 17 (*on* ii. 1. 14); [अतिधृष्ट is given as one of the meanings of पीठमर्द, पीठमर्दोऽतिधृष्टे स्यान्नाट्योक्तौ नायकप्रिये Viśva-Pra. 81. 45; MediK. 82. 50; ViśvaLoK. 175. 48; S'abdaRaSaK. 178. 16]

अतिधृष्टता (atidhr̥ṣṭa-tā) *f.* extreme boldness तं चैवं पिङ्गलकमधृतिपरीतं दृष्ट्वातिधृष्टतया शनैः शनैरुपसृत्य दमनकोऽब्रवीत् Pañcā. 124. 5.

अतिधृष्टत्व (atidhr̥ṣṭa-tva) *n.* extreme boldness or courageousness धृष्टत्वादतिधृष्णुत्वात् (v. l. अतिधृष्टत्वात्) … धृष्टद्युम्नः कुमारोऽयं द्रुपदस्य भवत्विति MahāBhā. i. 155. 49.

अतिधृष्णुत्व (atidhr̥ṣṇu-tva) *n.* extreme boldness or courageousness धृष्टत्वादतिधृष्णुत्वात् … धृष्टद्युम्नः कुमारोऽयं द्रुपदस्य भवत्विति MahāBhā. i. 155. 49.

अतिधेनु (ati-dhenu) *adj.* who has excellent cows; who has many cows; who has surpassed a cow अतिधेनवे ब्राह्मणाय MahāBh. i. 314. 19 (*on* i. 4. 3); अतिधेन्वै ब्राह्मण्यै MahāBh. i. 314. 19(*on* i. 4. 3)

अतिधैर्य (ati-dhairya) *n.* serious demeanour, excessive courage, fortitude न चाप्युन्मत्तवद्धसेत् । न चातिधैर्येण चरेद् गुरुतां हि व्रजेत्तथा MahāBhā. iv. 4. 30; कदाचिदतिधैर्याद्विहभावैव प्रवृत्तिं दर्शयति JayaMa. 275. 10 (*on* 5. 3); अत्युत्साहमतिख्यातिमतिधैर्यं च साधय SkandP. iii(3). 11. 28; दाशकन्या । उवाच तं सात्त्विकभावयुक्ता कृत्वातिधैर्यं नृपतिं सुगन्धा DevīBhāP. ii. 5. 23; नातिधैर्यं प्रदातव्यं नातिभीतिश्च रोगिणे KaliVid. 24.

अतिधैर्यतस् (atidhairya-tas) *adv.* with great fortitude त्वं तु हस्तं समावेश्य कीलरन्ध्रेऽतिधैर्यतः । स्थितवती AdhyāRā. ii. 2. 68.

अतिधैर्यभार (atidhairya-bhāra) *m.* burden of great firmness लतानामणूदरीणामतिधैर्यभारम् । बालानिले मुष्णति पल्लवेषु बभूव चित्तेषु च रागबन्धः YātrāPra. 3. 11.

अतिधैर्याङ्कुश (atidhairyāṅkuśa) *m.* goad of exceeding courage तयातिधैर्याङ्कुशवारितेर्ष्यया द्विजातिकन्यां परिणायितः पतिः BrKathāS'loSaṁ. 22. 310.

अतिधौता (ati-dhautā) *adj.* (*f.*) well tempered, well polished अधुनीत भटः कश्चिदतिधौतां कृपाणिकाम् BrahmāṇḍP. iii. 22. 7.

अतिध्मा (ati-dhmā-) I. P. to blow (a conchshell) too often or frequently धमेद्धमेवातिधमेदतिध्मातं न शोभते PariPar. 2. 717.

अतिध्मात (ati-dhmāta) *n.* blowing (a conchshell) too often ध्मातेनोपार्जितं यत्तदतिध्मातेन हारितम् PariPar. 2. 717.

अतिध्यान (ati-dhyāna) *n.* excessive brooding (as a symptom of paralysis of the thighs) प्राग्रूपं तस्य (ऊरुस्तम्भस्य) निद्रातिध्यानं स्तिमितता ज्वरः RugVi. 24. 6.

अतिध्यायत् (ati-dhyāyat) *adj.* thinking about intensely, meditating deeply (प्रमदारत्नम्) अनारतमतिध्यायन्नशने शयने न च । न प्रासादे न चोद्याने धृतिं भामण्डलोऽगमत् PadmP.(Ra.) 28. 47; ततोऽभिध्यायतस्तस्य [अतिध्यायतः PW] जज्ञिरे मानसाः प्रजाः ViṣṇuP. i. 7. 1.

अतिध्रुव (ati-dhruva) *adj.* most enduring or firm सर्वतः परमात्मानमक्षयं परमं पदम् । अनादिनिधनं देवं महाज्योतिरतिध्रुवम् MahāBhā. vi. App. I. 3(7); संसारार्णवमज्जमानमनुजैः पोतः स्थिरोऽतिध्रुवः कार्यः VarāP. 17. 19.

अतिध्वंस् (ati-dhvaṁs-) I. P. to envelope in dust श्यावीरतिध्वसन् पथश्चक्षुषा चन संनशे R̥V. viii. 55. 5.

अतिनतत्व (atinata-tva) *n.* (Astron.) excessive declination (of a planet) य उद्गमे याम्यनता मृगाद्या: स्वस्वापमेनापि निरक्षदेशे । याम्याक्षतस्तेऽतिनतत्वमाप्ता उद्यन्ति कालेन ततोऽल्पकेन Golā. 215. 2 (25. 17)

अतिनत्य (atinát-ya) *ger.* holding away अतिनुत्येव पात्राण्युवधूनोति S'atBr. I. i. 4. 4.

अतिनदीष्ण (ati-nadīṣṇa) *adj.* very deft or skilful (with Loc.) विदर्भो नाम जनपद: । तस्मिन् ··· अतिनदीष्ण: कलासु ··· पुण्यश्लोक: पुण्यवर्मा नामासीत् (राजा) DaśKuC. 129. 16.

अतिननामिन् (ati-nanāmin) *adj.* *w. r.* for **अतिनमामिन्** [pw] [Viśva **अतिनमामि**]

अतिनन्द् (ati-nand-) i. p. to be extremely glad or happy, to rejoice very much गृहेषु ते कोमलरूपहासमिथ:कथासङ्कुलिता: कमन्य: । वृत्तेषु कृत्येषु भवन्निरीक्षासमागता: प्रत्यहमत्यनन्दन् Nāray. x. 41. 7; आलोक्यातिननन्द भूपतिरसौ नारायणक्ष्माभृतम् ĀnandRa. 2. 44.

अतिनन्दन (ati-nandana) *adj.* **1** surpassing Nandana (Indra's garden) अभ्रान्तमतिशय्येह (पर्वते) विराजिततमागमे । निशामयालीनघनं सालौघमतिनन्दनम् Yādavā. 6. 77 (comm. नन्दनातिशायिनम्); **2** extremely pleasant or satisfying, Yādavā. 6. 77 (comm. अत्यर्थतोषणम्)

अतिनप्तृ (ati-naptṛ) *adj.* surpassing the grandson (of the sun, i. e. king Ikṣvāku) अतिनप्तारमुष्णगो: । अमुं भूपप्रशास्तारं लब्ध्वा मुमुदिरे प्रजा: Dvyāśrakā. 1. 186 (comm. सूर्यस्य पुत्रो मनुस्तस्य पुत्र इक्ष्वाकु: सूर्यस्य पौत्र:)

अतिनभोरत्न (ati-nabhoratna) *adj.* surpassing the sky-jewel (i. e. the sun) नृप: । तेजसातिनभोरत्नं मणिरत्नं न्यवेशयत् TriṣaS'aPuC. i. 4. 432.

अतिनम् (ati-nam-) i. p. to bend down too much or stoop low तस्मात् प्रणमेन न चातिनमेत् PañcT. 3. 4 (277. 13); (*caus.*) to cause (time) to pass, to spend (time) निशामप्यतिनामये: Saund. 14. 20; (स:) तमहोरात्रमतिनामयामास JātaMā. 36. 4 (*on* 7. 7); cf. **अतिनत्य.**

अतिनमत् (ati-namat) *adj.* bending or stooping very low पुंसां छाया ··· । क्षयमेति चातिनमताम् PañcT. 3. 4 (277. 10)

अतिनमन (ati-namana) *n.* excessive bending or stooping ज्यायान्न नमेदसमेऽसमोपनमनमहो महत् कष्टम् । गर्हितमेतत् पुंसामतिनमनं साहसधनानाम् Tantrākhyā. 91. 25 = PañcT. 3. 3 (277. 13)

अतिनमामिन् (ati-namāmin) *adj.* standing beyond *namāmi* 'I bow down' स एतत्सर्वं निरूह्य प्रत्यूह्य ··· अतिमृत्युमृत्युरतिनमाम्यत्यहं भूत्वा स्वे महिम्नि सदा समासते NṛsiṁhoUTāU. 7.

अतिनम्र (ati-namra) *adj.* [*f.* -ā] **i** extremely humble, submissive or subdued अयत्नेनैवातिनम्रे साधौ धनुषीव गुण: परां कटि(? कोटि)मारोहति विश्रम्भ: HarṣaC. 40. 3; येनोज्झिता युधि दयामृदुनातिनम्रा याथार्थ्यमापुरमरा: प्रथितस्य नाम्न: HarVi. 33. 14; BṛKathāK. 102(10). 27 (p. 255); रदततिमतिनम्रा वन्दते कुन्दराजी UjjvaNīMa. 598. 10; **ii** bent very low ददर्श पथि कुब्जाम् ··· अतिनम्राम् BrahmVaiP. iv. 72. 16; अनङ्गबाणाकुलितस्य शंभो: शिरो भवानीचरणेऽतिनम्रम् PadyaVe. 821.

अतिनम्रकंधर (atinamra-kandhara) *adj.* whose neck is bent very low, bowing low तं (विष्णुम्) तुष्टुवु: ··· योगिन: । सनन्दनाद्या ह्यतिनम्रकन्धरा: ViṣṇuP. i. 4. 30.

अतिनम्रता (atinamra-tā) *f.* **i** excessive modesty or condescension तातातिनम्रतैव ते कथयति गुणानां गौरवम् HarṣaC. 158. 15; **ii** the state of being too much bent, excessive bending (of the body) नादित्यमभिमुखो न जघनेनेति ··· प्रसक्तस्य जघनसांमुख्यस्य निषेधोऽयम् । यद्वातिनम्रतया स्वस्यैव जघनसांमुख्यं निषिध्यते BālamBha. i. 395. 19 (*on* 1. 134)

अतिनम्रपूर्वकाय (atinamra-pūrvakāya) *adj.* (an animal) having the fore-part of the body bent very low वाहेन्द्र: ··· । आनम्रीभवदतिनम्रपूर्वकाय: Acyutarā. 11. 55.

अतिनम्रप्रकृति (atinamra-prakṛti) *adj.* of a very modest or humble nature अतिनम्रप्रकृतिभि: कृती कुर्वन् वार्ता: ··· मयूरप्रभृतिभि: । ··· प्रणालाद्रेमौलिं धरणिमणिरारुह्य शुशुभे ParamāKā. 79. 47.

अतिनम्रम् (ati-namram) *adv.* very modestly or humbly इदमभिदधेऽतिनम्रं सुन्दरसेन: शुभावसरे KuṭṭaMa. 370.

अतिनम्रवदना (atinamra-vadanā) *adj.* (*f.*) whose face is bent very low, looking down भीतातिनम्रवदना त्वश्रुपूर्णमुखी तदा । कष्टमापतितं पापमित्युक्त्वा निपपात च PadmP. iv. 108. 49.

अतिनम्रशिरोधरा (atinamra-śirodharā) *adj.* (*f.*) whose neck is bent very low, bending very low सा मुदावती पस्पर्श मुषलश्रेष्ठमतिनम्रशिरोधरा MārkP. 116. 51.

अतिनम्रानन (atinamrānana) *adj.* whose face is bent very low, looking down very much इति रामस्य वचनं वीतक्रोधो निशम्य स: । ··· अतिनम्राननोऽवदत् RāmāMañ. 203. 8.

अतिनयत् (ati-nayat) *adj.* neglecting, missing सप्तमीं (रात्रीम्) नातिनयेत् सप्तमीमतिनयन्न ब्रह्मचारी भवति GopBr. i. 2. 6.

अतिनयन (ati-nayana) *adj.* (*mantra*) recited while leading (a cow as sacrificial fee) beyond or across एतत्ते राध इति दक्षिणातिनयन: (मन्त्र:) ĀpaS'S. xiii. 6. 9; *n.* secret conveying (of troops and spies) वणिक्पथेन हि दण्डगूढपुरुषातिनयनम् ··· क्रियते ArthS'ā. ii. 334. 2 (7. 14) [nt.'s reference to KauśiSū. 43. 3 is *w. r.* for **°निनयन°**]

अतिनयपरता (atinayapara-tā) *f.* attachment or devotion to good polity नृवर ··· अतिनयपरता ··· त्वयि जयति ChandaśCū. 2. 245(3)

अतिनरकाङ्क्षिणी (ati-narakāṅkṣiṇī) *adj.* (*f.*) hankering too much after men (for sexual pleasure) सा स्यादचरणा कण्डूा तयातिनरकाङ्क्षिणी CaraS. vi. 30. 18 (1941 Ed.)

अतिनर्दत् (ati-nardat) *adj.* bellowing or roaring loudly वृषभाश्चातिनर्दन्तस्सतोया जलदा इव ViṣṇuP. v. 10. 46.

अतिनर्म (ati-narma) *n.* excessive mirth or pleasantry cf. **अतिनर्मन्**, अतिनर्माज्जायते संप्रहारो यतो विनाश: समुपैति पुंसाम् MahāBhā. ii. 56. 5.

अतिनर्मता (atinarma-tā) *f.* excessive mirth or pleasantry प्रायशो हि कुलस्त्रीणां शीलविध्वंसहेतव: । दुष्टयोगो रहो नित्यं स्वातन्त्र्यमतिनर्मता BhaviP. 31A. 16 (i. 10. 15)

अतिनर्मन् (ati-narman) *n.* excessive mirth or pleasantry देवरै: पतिमित्रैश्च परिहासक्रियोचितै: । विविक्तदेशावस्थानं वर्जयेदि(? द)तिनर्म च BhaviP. 31A. 14 (i. 10. 14)

अतिनवीन (ati-navīna) *adj.* very modern (school of thought) अतिनवीनास्तु यादृशस्येत्यादौ अविगीतत्वं तत्कृतौ विशेषणमाहु: TattvCin. iv(2). 141. 4.

अतिनश्वर (ati-naśvara) *adj.* extremely perishable or transitory जलबुद्बुदवत् सर्वं संसारमतिनश्वरम् BrahmVaiP. i. 25. 32; ii. 17. 82; एवंभूतं शरीरम् ··· । जन्मादिभि: षड्विकारैरध्यस्तमतिनश्वरम् ĪśānS'iPa. ii. 65. 14.

अतिनष्ट (ati-naṣṭa) *adj.* completely destroyed पापिष्ठैरतिनष्टेऽस्मिन् त्रिदशादिप्रतिष्ठिते । बिम्बादौ वैष्णवे चिह्ने PāraS. 19. 488; हतेषु तेषु दैत्येषु ··· महाहवे । अतिनष्टेषु पापेषु गोविन्देन महात्मना PadmP. ii. 5. 38.

अतिनाकसुख (atināka-sukha) *n.* happiness surpassing heaven (heavenly bliss) अतिनाकसुखभरतरङ्गितो गिरम्···साध्वीमिमामभाषत YātrāPra. 9. 27(2)

अतिनाद (ati-nāda) *adj.* making a very loud sound अतिनादस्य नादेन तेन तस्य दुरात्मन: Rāmā. vi. 91. 16.

अतिनादिन् (atinād-in) *adj.* making a very loud sound ततो गजकुलप्रख्यास्तडित्वन्तोऽतिनादिन: । उत्तिष्ठन्ति (घना:) ViṣṇuP. vi. 3. 31; SkandP. ii(9). 25. 36.

अतिनादृत (ati-nādṛta) *adj.* not very much interested सङ्गीतान्त:पुरासक्तो युद्धादिष्वतिनादृत: BhāvPra.(S'ā.) 92. 22(4)

अतिनामन् (ati-nāman) *m.* name of a Ṛṣi in the 6th (*cākṣuṣa*) *manvantara* अतिनामा सहिष्णुश्च सप्त एते महर्षय: HariVaṁ. 7. 27; ViṣṇuP. iii. 1. 28 = MārkP. 76. 54; अतिनामा च पौलस्त्य: ··· इत्येते सप्त वै चाक्षुषेऽन्तरे BrahmāṇḍP. i. 36. 78.

अतिनामित (ati-nāmita) *adj.* spent or passed (time) एभिर्न पठितम् ···संगणिकाभिरतै: कौसीद्येनातिनामितम् GilMs. iii(1). 72. 18.

अतिनाम्य (atinām-ya) *ger.* having spent (time) पूर्वं यामं त्रियामाया: प्रयोगेणातिनाम्य तु Saund. 14. 32.

अतिनाश (ati-nāśa) *m.* complete eradication (i. e. cure) सुवैद्य उपलभ्य रुजोऽतिनाशं शीघ्रं करोति HāriS. i. 1. 26; मांसीमुराचोरकनागपुष्पै: सनागदानैरतिनाशकारि ViṣṇuDhaP. ii. 107. 17.

अतिनाष्ट्र (ati-nāṣṭrá) *adj.* beyond destruction, beyond danger तुर्हि वा अतिनाष्ट्रो भवितास्मीति S'atBr. I. viii. 1. 3.

अतिनासा (ati-nāsā) *adj.* (*f.*) having a very big nose स ददर्श विदूरस्था राक्षसी: ···अनासा अतिनासाश्च तिर्यङ्नासा विनासिका: Rāmā. v. 15. 12.

अतिनास्तिक (ati-nāstika) *m.* extreme atheist तुङ्गं वपु: ··· अतिनास्तिक इव स्फुटसाधनश्री: । विस्तारिचक्रमिव राशिमयं बिभर्ति HarVi. 31. 33.

अतिनास्तिक्य (ati-nāstikya) *n.* extreme atheism वैषम्यं वातिनास्तिक्यम्···प्रत्येतव्यं तमस्त्वेतैर्लक्षणै: सर्वथा बुधै: DevīBhāP. iii. 8. 10.

अतिनिकट (ati-nikaṭa) *adj.* very near अतिनिकटमविक्रियं मुरारेः परमपदं प्रणयादभिष्टवीमि SaṁkṣeS'ā. 1. 1 (i. 1. 3); अतिनिकटविटङ्कोपविष्टशुकशावसन्दिह्यमानहरितारुणमणिभिः YaśasCam. i. 20. 1.

अतिनिकटता (atinikaṭa-tā) *f.* close proximity, extreme nearness क्षुद्याः पृष्ठेऽङ्घ्रुपतैरतिनिकटतया दत्तदाहातिरेकैः (सूर्यस्य अश्वाः) SūryaS'. 45; त्रिदशगजघटानाम् ... दिनकरकरतापोपप्लवादाकुलानाम् । अतिनिकटतयोच्चैः पुस्फुटुः कर्णशङ्खाः HarVi. 41. 43.

अतिनिकटपठित (atinikaṭa-paṭhita) *adj.* uttered very near इतरदतिनिकटपठितमपि पराणुद्य दवीयसापि तेनैव सम्बन्धमनुभवति NyāyMañ. ii. 167. 15.

अतिनिकुरुम्बतर (atinikurumba-tara) *n.* very large multitude सभामण्डपादतिनिकुरुम्बतरेण निस्सरत्सु लोकेषु (बभूव महानास्थानसंक्षोभः) UdaySuKa. 39. 19.

अतिनिकृष्ट (ati-nikṛṣṭa) *adj.* [*f.* -ā] of a very inferior quality, of a very low class नात्युत्कृष्टः नातिनिकृष्ट इत्यतोऽयं मध्यदेशः ManuBh. i. 79. 15 (*on* 2. 21); ii. 379. 3 (*on* 11. 37); कृतपापकचेष्टः कामवशः पुरुषोऽतिनिकृष्टः SubhāRaSaṁ. 585; यो हि चुम्बति मुखं गणिकाया नास्ति तस्य सदृशोऽतिनिकृष्टः S'ubhāRaSaṁ. 612; (या) मद्यमांसनिरतातिनिकृष्टा ... तां भजन्ति गणिकां न विशिष्टाः SubhāRaSaṁ. 604; अतिनिकृष्टानां तिर्यगादीनामपि सिद्धिम् ... ददाति LalitāTriBh. 314. 1 (*on* 35); ततोऽप्यतिनिकृष्टस्तत्सादृश्यादृद्धपक्षो निराक्रियते VedāntKau. 191. 7 (*on* ii. 2. 18)

अतिनिकृष्टाशय (atinikṛṣṭāśaya) *adj.* having a very mean thought आदिष्टश्च तेनायमतिनिकृष्टाशयेन DaśKuC. 120. 17.

अतिनिक्षेप (ati-nikṣepa) *m.* big deposit or pledge प्रणिधिः पुमान् । अतिनिक्षेपचरयोः NānārthaMa. 920.

अतिनिगूढ (ati-nigūḍha) *adj.* very well concealed अतिनिगूढदृढपर्वा-(? र्वं)भिः ... अङ्गुलीभिरुपेतेन ... चरणाब्जयुगेन ... बालिकामपश्यम् TilaMañ. 246. 6.

अतिनिगूढम् (ati-nigūḍham) *adv.* very secretly यदयमपडक्षीणं किमपि विज्ञपयति संदेशहरो दुर्मुखस्तदचिरादतिनिगूढमादधीथाः KaumuMi. 6. 14(13)

अतिनिग्रह (ati-nigraha) *adj.* surpassing (other) controls असतामतिसाङ्कर्यंजातीनामतिनिग्रहं करिष्यसि ... निग्रहम् ParamāKā. 74. 84.

अतिनिघृष्टा (ati-nighṛṣṭā) *adj.* (*f.*) roughly used, very much harassed सार्थसंग्रहपरातिनिघृष्टा ... तां श्रयन्ति गणिकां किमु शिष्टाः SubhāRaSaṁ. 605.

अतिनिचित (ati-nicita) *adj.* **i** excessively accumulated or grown मलेऽतिनिचिते पुनश्चातिव्यवायतः ... कुपितो वायुः AṣṭāHr. iii. 7. 10; पुराकृतादतिनिचितात्समुत्कटाञ्जनः परां रतिमनुयाति कर्मणः PadmP.(Ra.) 51. 51; दोषेऽथवातिनिचिते तन्द्रास्तैमित्यकारिणि AṣṭāSaṁ. ii. 3. 22 (4. 1); **ii** thickly packed तथातिनिचितं तेने किरीटी शरदुर्दिनम् PāṇḍaC. 13. 432.

अतिनिचृत् (ati-nicṛt) *f.* name of a variety of Gāyatrī metre (a twenty-syllabic metre which has a pāda of six syllables between two of seven syllables) षट्कः सप्तकयोर्मध्ये स्तोतॄणां विवाचीति । यस्याः सातिनिचृन्नाम गायत्री द्विर्दशाक्षरा ṚPrāti. 16. 14; अजोऽस्यर्षिरतिनिचृच्छन्दः गौरी च देवता ĪśānS'iPa. i. 23. 67.

अतिनिज (ati-nija) *adj.* very close or intimate (friend etc.) कार्यशेषस्य चाखिलाम् । धुरं क्रियां चातिनिजे रघुनाथाभिधे द्विजे । निधाय (शिवः प्रणालाद्रिमुपागमत्) ParamāKā. 79. 41.

अतिनिद् (ati-nid-) I. P. to overcome तदाहुरति वा एता वर्त्रं नेदन्त्यति वाचं मनो वावैता नातिनेदन्तीति TaiS. I. vi. 8. 1 (comm. अतिनेदन्ति अतिक्रामन्ति)

अतिनिदर्शन (ati-nidarśana) *n.* complete explanation यथोक्तमृषिभिस्तात सांख्यस्यातिनिदर्शनम् BrahmP. 243. 3.

अतिनिदर्शिता (ati-nidarśitā) *adj.* (*f.*) fully explained केनैषातिनिदर्शिता (व्रतचर्या) PadmP. v. 17. 61.

अतिनिदेशकर (ati-nideśakara) *adj.* carrying out orders fully अन्ते त्वमप्यतिनिदेशकरोऽभ्युपैषि ब्रह्मन् (विष्णोः परं पदम्) BṛBrahmaS. iii. 5. 42.

अतिनिद्र (ati-nidra) *adj.* **1** given to excessive sleep एवमप्यतिनिद्रस्तु यदा नैव प्रबुध्यत (कुम्भकर्णः) Rāmā. vi. 48. 42; अतिनिद्रायानिद्राय (v. l. अतिनिद्रानिद्रयोश्च) भेषजम् ...। ... तत्सर्वमत्रिजः । ... व्याजहार CaraS. i. 21. 61 (1941 Ed.); बोधनं चातिनिद्राणाम् (मद्यम्) CaraS. vi. 24. 63 (1941 Ed.); तमोऽधिको वञ्चयिता परेषां मूर्खोऽलसः क्रोधपरोऽतिनिद्रः (भवति) BṛSaṁ. 69. 9; नष्टनिद्रातिनिद्रेभ्यो हितं पित्तास्रदूषणम् (मद्यम्) AṣṭāSaṁ. i. 27. 11 (i. 6) = AṣṭāHr. i. 5. 64 = BhojanKu. 169. 7; सुधांशुकल्पे मृदुनि स्वतल्पे प्रियेऽतिनिद्रेऽनुकल्यय कोऽपि । आलिङ्ग्य चैकामपरां निगूह्य मनोजसंजीवनमाततान PadyaVe. 329; **2** without sleep, sleepless [Apte]; *m.* name of a serpent अतिनिद्रोऽतिवह्नमुक् (एते ... नागेशाः कीर्तिता मया) NīlaP. 902.

अतिनिद्रता (atinidra-tā) *f.* the state of being excessively sleepy निद्रानाशोऽतिनिद्रता ।... बहुदोषस्य लिङ्गानि CaraS. i. 16. 14 (1941 Ed.); बुद्धेर्मोहोऽतिनिद्रता । धूमपानात् प्रशाम्यन्ति CaraS. i. 5. 31 (1941 Ed.); अग्निसादोऽतिनिद्रता ।... विद्याद् दुर्वान्तलक्षणम् KāśyaS. 150A. 24; गुरुगात्रत्वं चालस्यमालस्यादतिनिद्रता AṣṭāSaṁ. i. 58. 24 (1. 9); श्लेष्माग्निसदनप्रसेकालस्यगौरवम् । श्वैत्यशैत्यश्लथाङ्गत्वं श्वासकासातिनिद्रताः (करोति) AṣṭāHr. i. 11. 8; श्लेष्मणः ...। बन्धोपलेपस्तैमित्यशोफापक्त्यतिनिद्रताः (कर्माणि) AṣṭāHr. i. 12. 53; गौरवं शीतमुत्क्लेदो रोमहर्षोऽतिनिद्रता (कफजे ज्वरे) RugVi. 2. 13; कफस्य विंशतिः प्रोक्ता रोगास्तन्द्रातिनिद्रता S'ārṅgaS. i. 7. 122.

अतिनिद्रम् (ati-nidram) *adv.* in the manner of untimely sleep नायं निद्राकालोऽतिनिद्रम् PrakriKau. i. 476. 1; निद्रा सम्प्रति न युज्यत इत्यतिनिद्रम् SiddhāKau. 162A. 2; निद्रा संप्रति नाहैवमतिनिद्रं प्रकीर्तितम् (अव्ययम्) KośaKaTa. 2. 3099; सम्प्रति न युज्यत इति । वृत्तौ युजिक्रियान्तर्भावेनैकार्थीभावः । अतिनिद्रमासीदित्यादौ तथाव्यवहारविषयेऽतिनिद्रशब्दस्य लक्षणेति बोध्यम् LaS'abdeS'e. i. 533. 8.

अतिनिद्रा (ati-nidrā) *f.* excessive sleep अत्याहारमतिक्रोधमतिनिद्रामतिश्रमम् ... सर्वदा परिवर्जय SkandP. iii(3). 11. 26; अतिनिद्रा तु जन्तूनां श्लेष्मण्युच्छ्रायमागते BhelaS. 204. 5 (6 25); अतिनिद्रातिसेवे च विद्यार्थी ह्यष्ट वर्जयेत् CāṇaNiDa. 11. 10; धूमो हि शिरोऽक्षिकर्णशूल°...°अतिनिद्रा°...°प्रशमाय प्रयुज्यते AṣṭāSaṁ. i. 158. 12 (1. 30); योजयेदतिनिद्रायां तीक्ष्णं प्रच्छर्दनाञ्जनम् AṣṭāHr. i. 7. 62; °मथातिनिद्राः ।... कफप्रमेहेषु भवन्त्युपद्रवाः KalyāKā. 11. 22; KāśyaS. 100B. 10; निद्रानाशेनातिनिद्रा दिवापि योगैश्चैतैर्मृत्तिकाभक्षणेन (पाण्डुर्जायते) HārīS. iii. 8. 4; दशमूलीरसः पेयः ... अतिनिद्रायाम् SiddhYo. 1. 139; वाक्चेष्टितं मन्दमरोचकश्च नारीविविक्तप्रियतातिनिद्रा ।... कफात्मके स्यात् (उन्मादे) RugVi. 20. 12; S'ārṅgaS. ii. 2. 39; नीलोत्पलं शिग्रुबीजं नागकेशरकं तथा । एतत्कल्कैः कृता वर्तिरतिनिद्रां निवारयेत् S'ārṅgaS. iii. 13. 82; त्वम् ...धत्से सुखी क्षीब इवातिनिद्राम् DaśāvaC. 7. 106; अतिनिद्रातिजागरम् । ... विवर्जयेत् Rasā. 18. 118; (मलबद्धे) अतिनिद्रां प्रजागरम् । ... विवर्जयेत् RaseCin. 3. 86; KalpaK. 58. 346.

अतिनिद्रान्ध (atinidrāndha) *adj.* blind (i. e. not attentive) because of excessive sleep शयानमतिनिद्रालुं (v. l. अतिनिद्रान्धम्) कुम्भकर्णमबोधयत् MahāBhā. iii. 270. 20.

अतिनिद्रालु (ati-nidrālu) *adj.* given to excessive sleep शयानमतिनिद्रालुं कुम्भकर्णमबोधयत् MahāBhā. iii. 270. 20.

अतिनिद्रालुता (atinidrālu-tā) *f.* the state of being given to excessive sleep दिवातिनिद्रालुतया श्रमालसम् । नरं प्रमेहो हि भविष्यति KalyāKā. 11. 6.

अतिनिद्रित (ati-nidrita) *adj.* fast asleep, given to excessive sleep निद्रामाप रमापतिः । श्रान्तत्वाद्दैवयोगाच्च जातस्तत्रातिनिद्रितः DevīBhāP. i. 5. 8; नातिभुञ्जन् सदा योगी नाभुञ्जन् नातिनिद्रितः । नातिजाग्रत् सिद्धिमेति GaṇeP. ii. 142. 12.

अतिनिधन (ati-nidhana) *n.* great number of deaths भौमाष्टमेशावेकत्र तदातिनिधनं नृणाम् (युद्धे) TājiNi. 3 (1. 6). 54 (382)

अतिनिन्द् (ati-nind-) I. P. to blame excessively नारदः ...। पश्चात्तापमवाप्यातिनिनिन्द स्वम् S'ivaP. ii(1). 4. 21 (41A. 2); आरोहमङ्गलविधौ मनसः प्रसादं प्रासादसङ्गमतिनिन्दति नाम पङ्गुः Ḍamaru. 14; उद्वेजते जनः क्रौर्यात् कार्पण्यादतिनिन्दति S'ukraNi. 3. 219.

अतिनिन्दत् (ati-nindat) *adj.* blaming excessively मन्थ्यादयोऽपि ते स्वामिपुत्रव्यापत्तिसाक्षिणम् । आत्मानमतिनिन्दन्तो रुरुदुः करुणस्वरम् TriṣaS'aPuC. ii. 6. 174; तमित्थमतिनिन्दतः ... नृपशोस्तव SubhaDha. 4. 18.

अतिनिन्दनीय (ati-nindanīya) *adj.* greatly condemnable स्थूलः कृशश्चाप्यतिनिन्दनीयौ (देहौ) KalyāKā. 3. 40.

अतिनिन्दा (ati-nindā) *f.* excessive condemnation or censure दूरेण ह्यतिनिन्दायाः दुःखहेतुरतिस्तुतिः BṛKathāS'loSaṁ. 23. 74.

अतिनिन्दित (ati-nindita) *adj.* [*f.* -ā] **A** greatly censured, greatly condemned न करोमि स्तुतिं स्वस्य सा हि लोकेऽतिनिन्दिता:(? ता) PadmP.(Ra.) 12. 102; भूमिगोचरदूतत्वं यत्प्राप्तोऽस्यतिनिन्दितम् PadmP.(Ra.) 53. 236; कल्पोऽतिनिन्दितस्तस्मिन् विशेषानादरः सताम् AgniP. 336. 29; अलम् -- कामोद्भूतैः सुखैः... सतामतिनिन्दितैः SubhāRaSaṁ. 270; नराः ... चिपिटैर्विकृतैर्भग्नैरङ्गुष्ठैरतिनिन्दिताः BhaviP. 54B. 28 (i. 24. 23); तामसस्त्वं कथं जातः कृतं कर्मातिनिन्दितम् । अवध्या स्त्री त्वया विष्णो हता कस्मान्निरागसा DevīBhāP. iv. 12. 4; किमेवमतिनिन्दितम-

कस्माद्व्याहरसि TripuDi. 2.6 (1); अत ऊर्ध्वं प्रवक्ष्यामि रोमजानतिनिन्दितान् (हयान्) AśvaVai. 3.39; रूक्षाश्चरणास्त्वतिनिन्दिताः PārśvC. 7.598; आहारबुद्ध्या तु भक्षणमतिनिन्दितम् (मांसस्य) ManvaVi. 609.13 (*on* 5.34); गणिकादानमतिनिन्दितम् Prasā. ii. 454.14; अतिनिन्दिताम् । पैशुन्यहिंसाविषयमोहाहंकारदर्पताम् ।··· साध्वी विवर्जयेत् SukraNī. 4 (4). 20; **B** very inauspicious सर्वाणि कृष्णान्यतिनिन्दितानि गोहस्तिवाजिद्विजदेववर्ज्यम् BrahmVaiP. iv. 77.37; तिथयः पक्षरन्ध्राख्या दुष्टास्ता अतिनिन्दिताः NāraS. 4.20; एका चतुर्थी संत्याज्या कृष्णपक्षे च मध्यमा । आपञ्चम्यास्तु तिथयः पराः स्युरतिनिन्दिताः NāraS. 24.10; स्त्रीधिष्ण्याद्यानवके स्त्रीदूरमतिनिन्दितम् NāraS. 29.125; अवमा तिथीः । तिथिर्वारत्रयेऽप्येका त्रिद्युस्पृक् द्वेऽतिनिन्दिते VasiS. 12.38; अभिमासोऽतिनिन्दितः SmrtiCan. v. 104.19; कुक्षावावर्तास्त्वतिनिन्दिताः SārṅgaPa. 1665; सुश्वेतफालतिलको विद्धो वर्णान्तरेण च । स वाजी दलभञ्जी तु यस्य सैवातिनिन्दितः SukraNī. 4 (7). 117 [*sandhi*]; मङ्गलेष्वतिनिन्दितः (पातकालः) SiddhāTaVi. 363.6.

अतिनिन्दितत्व (atinindita-tva) *n.* the state of being excessively blamed or censured अत्र च कानिचिन्मरणान्यतिनिन्दितत्वेनाशौचाभावकारणानि ManvaVi. 653.10 (*on* 5.95); अत्र संक्रान्तिष्विल्यनेनैवायनादीनामपि लाभे पुनस्तदभिधानं तत्कालकृतस्य पिण्डदानस्यातिनिन्दितत्वद्योतनार्थम् CaturCin. iii(1). 334.22.

अतिनिन्द्य (ati-nindya) *adj.* **A** very much reproachable अश्वैः खरैः··· प्राप्तः सदा भवति दूतगणोऽतिनिन्द्यः KalyāKā. 1.34; यतु स जिनपतिर्वोऽतिनिन्द्यामविद्याम् JinaS. 1.12; इहातिनिन्द्यः सर्वत्र नाधिकारी स्वकर्मसु BrahmVaiP. iv. 30.87; अतिनिन्द्यो हि पापस्य कारकादुपदेशकः PārśvC. 1.167; वैपरीत्यमतिनिन्द्यमनिष्टम् ··· कथयन्ति Subhāṣi. 2123; **B** very inauspicious सौम्योऽपि पापाधिकवर्गयोगान्नेष्टोऽतिनिन्द्यः खलु पापखेटः TājiNī. i. 1.47 (69)

अतिनिन्द्यजीवित (atinindya-jīvita) *adj.* of very condemnable means of livelihood विकटः करटस्तु···अतिनिन्द्यजीविते च···पितृकर्मभोक्तरि स्यात् KośaKaTa. 2.4501.

अतिनिपीडयत् (ati-nipīḍayat) *adj.* pressing hard, giving excessive pain पित्तश्लेष्मक्षये वायुर्मर्माण्यतिनिपीडयन् । प्रणाशयति संज्ञाम् CaraS. i. 17.61 (1941 Ed.)

अतिनिपीडिताङ्गी (atinipīḍitāṅgī) *adj.* (*f.*) whose body is excessively tormented निशाकरेणातिनिपीडिताङ्गी दिवाकरं क्वापि परं निनिन्द BhāvS. 63.

अतिनिपुण (ati-nipuṇa) *adj.* [*f.* -ā] **A** very skilful or expert कृपणरक्षातिनिपुणस्त्वदन्यः कः ··· शरण्यः SivāL. 13; मातङ्गबन्धुर्मुनिस्त्वायुर्वेदपरायणोऽतिनिपुणः MātaLī. 1.14; सर्वेषामस्तु काव्ये मतिरतिनिपुणा AlaṅkāSe. 1(0). 38; श्रीमद्दुर्गपुरातनेऽतिनिपुणः श्रीपद्मनाभात्मजः RasPraSu. 13.16; एताश्च विकृतयोऽतिनिपुणेनान्यथासिद्धयोऽवतारिता भङ्गस्यानुमापिका: VīraMi. 423.1 (*on* 2.16); अत एवातिनिपुणैः शास्त्रैः शस्त्रावेव विश्रान्तिः कृता Bhāsk. i. 229.16 (*on* i. 5.7); अतिनिपुणोऽयमैन्द्रजालिकः RasSa. 204 (1); **B** very clever or shrewd न ह्यलमतिनिपुणोऽपि पुरुषो नियतिलिखितां लेखामतिक्रमितुम् DaśKuC. 57.3; न चातिनिपुणाः सख्योऽस्य संबोधने SṛṅgāTi.(Ru.) 2.12; पितृष्वसा इत्थमामन्त्र्यते । केनाप्यतिनिपुणेन Loc. 119.26 (*on* 2.34 (?32)); कृपणसमृद्धीनामपि भोक्तारः सन्ति केचिदतिनिपुणाः SārṅgaPa. 383 = Subhāṣi. 484; न चातिनिपुणाः सख्योऽपि संबोधने SārṅgaPa. 3578; SūktiMu. 58.3; एकोऽतिनिपुणो दृष्टो राज्ञा निकटवर्तिनाम् KathāKau. 6.6; खलोऽतिनिपुणो राजन्ननेकगुणवान् कृती AlaṅkāMañ. 111.2; **C** very subtle or noble शोभनस्तेऽतिनिपुणः प्राणिधर्मो विज्ञातः Tantrakhyā. 109.22; क्वाहं सुमन्दमतिरप्रतिमप्रभावः क्वायं तवातिनिपुणो मयि सुप्रसादः DevīBhāP. i. 12.45.

अतिनिपुणतर (atinipuṇa-tara) *adj.* exceedingly sharp ईदृशेष्वतिनिपुणतरदृष्टयोऽन्तःपुरदास्यः Kād. 197.17.

अतिनिपुणतस् (atinipuṇa-tas) *adv.* very carefully, very skilfully तस्मिंश्च लब्धे (पङ्क्तिपावने)···अन्ये नातिनिपुणतः परीक्षिताः त्रिपुरुषं यावत् ManuBh. i. 285.9 (*on* 3.173)

अतिनिपुणता (atinipuṇa-tā) *f.* great skill, sharpness or cleverness मेघस्यास्मिन्नतिनिपुणता MeghDū. *19.

अतिनिपुणदृश् (atinipuṇa-dṛś) *adj.* possessed of great insight विवरणकाराश्च नातिनिपुणदृशः NyāyMañ. i. 385.24.

अतिनिपुणदृष्टि (atinipuṇa-dṛṣṭi) *adj.* very sharp-sighted, very intelligent तेन त्वीदृशेष्वतिनिपुणदृष्टिना गोपितोऽपि गाढमवगाढस्त्वदीयालापस्य तात्पर्यार्थः TilaMañ. 59.8.

अतिनिपुणबुद्धि (atinipuṇa-buddhi) *f.* very sharp intellect अतिनिपुणबुद्धिग्राह्यो महानहङ्कारः MahāviC. 2.38(6)

अतिनिपुणम् (ati-nipuṇam) *adv.* **A** very carefully, very cleverly, in minute detail अतिनिपुणमपि चिन्तयन्न पश्यामि खलु स्खलितम् Kād. 61.1; एतत् परमात्मनिरूपणे अतिनिपुणमुपपादयिष्यामः ĀtmaSi. 36.13; युवाभ्याम···तिनिपुणं विमृश्य यथोचितम् ··· अनुष्ठातव्यम् AdbhuDa. 2.21 (7); आधोरणेनातिनिपुणमुल्लुत्य पादाङ्गुष्ठे ग्रासेन प्रहृतोऽयं मतङ्गजः RasSa. 115(4); **B** completely, satisfactorily स्वाधीनेति न चुम्बितातिनिपुणम् Subhāṣi. 1370.

अतिनिपुणसेवा (atinipuṇa-sevā) *f.* service of a very clever person हीनानार्यातिनिपुणसेवां विग्रहमुत्तमैः (त्यजेत्) AṣṭāSaṁ. i. 13.5 (1.3); AṣṭāHṛ. i. 2.41.

अतिनिपुणमति (atinipuṇa-mati) *adj.* of exceedingly sharp intellect अतिनिपुणमतयः ··· सुसचिवाश्च ··· चरन्तु समन्तात् समन्तपञ्चकम् VeṇīSaṁ. 6.14; प्रत्युतास्तिक्यमुपहन्ति यो नातिनिपुणमतिः ManuBh. ii. 14.4 (*on* 7.43)

अतिनिपुणिमन् (ati-nipuṇiman) *m.* great skill, experience उपकरणानामतिनिपुणिमानमुपपादयन्नवतरुणिमा वपुः ··· असेवत YātrāPra. 2.59(4)

अतिनिबन्धय् (atini-bandhay-) (*caus.*) to bind or restrain excessively किं नाम षोडशसहस्रशतार्धकाश्च तं स्त्रीकृतं शुकमिवातिनिबन्धयन्ति DevīBhāP. v. 1.32.

अतिनिबिड (ati-nibiḍa) *adj.* [*f.* -ā] **i** very thick, dense, compact तमसा चातिनिबिडं नल्वमात्रं सुसंकटम् MatsyaP. 119.4; निजरजोनिकरमतिनिबिडनीलरोममण्डलनिचितम् ··· हृदयदेशे दधानम् ··· भैरवाचार्यं ददर्श HarṣaC. 156.4; अतिनिबिडेन प्रज्ञालोहनिगडेन निरवग्रहो विचरति TilaMañ. 112.5; अत एव चिता एकघनम् अतिनिबिडम् PratyabhiVi. i. 398.4 (*on* i. 8.1); मालिन्याम् ··· आद्यमक्षरपञ्चकम् ··· अतिनिबिड KāvyKaVṛ. 17.31 (1.3); अतिनिबिडा ऋक्षव्याघ्रनिषेविता । ··· वर्जनीयाटवी नृपैः Mānaso. iv. 15.1434; **ii** very firm, very strong व्यक्तविवेकयाप्यतिनिबिडया ··· प्रज्ञया सम्यग्ज्ञानहेयोपादेयविभागः ··· राजा मेघवाहनो नाम TilaMañ. 13.5.

अतिनिबिडता (atinibiḍa-tā) *f.* **1** great intensity (of the fight) अतिनिबिडतया तवात्र किम् DvyāśraKā. 18.37; **2** looking down upon, turning up one's nose, DvyāśraKā. 18.37 (comm. अरुच्यात्यन्तं नक्रमोटनेन)

अतिनिबिडत्व (atinibiḍa-tva) *n.* the state of being very thick, compact without spaces or interstices अथ तत्र सूक्ष्मरन्ध्रसंभवान्नातिनिबिडत्वम् SyādvāMañ. 14(145)

अतिनिबिडनिबद्ध (atinibiḍa-nibaddha) *adj.* tied very firmly अतिनिबिडनिबद्धैः कल्पवृक्षेषु सेनाद्विरदपतिभिरापे न त्रिपद्या विलासः HarVi. 41.14.

अतिनिबिडप्रदेश (atinibiḍa-pradeśa) *m.* place that has no intermediate space यच्चास्य पौद्गलिकत्वनिषेधाय स्पर्शशून्याश्रयत्वात् अतिनिबिडप्रदेशे ··· इति पञ्च हेतवो योगैरुपन्यस्तास्ते हेत्वाभासाः SyādvāMañ. 14(136)

अतिनिबिडम् (ati-nibiḍam) *adv.* very firmly or tightly अतिनिबिडमापीडितशिरोधरा ··· अहम् TilaMañ. 307.2; श्रीमोहमहाराजः ··· कलिकन्दलमतिनिबिडमालिङ्ग्य समादिशति MohaRāPa. 4.2(7)

अतिनिबिडविग्रह (atinibiḍa-vigraha) *m.* excessively close fight अतिनिबिडविग्रहनिपीडितो द्रविडदेशाधिपतिः TilaMañ. 325.21.

अतिनिबिडसन्धि (atinibiḍa-sandhi) *adj.* excessively tight joint अतिनिबिडसन्धिसंनिवेशे शिलान्तरालप्रदेशे गीतिमिमामशृणोत् NalaCam. 6.33(6)

अतिनिबिडसूत्रबन्ध (atinibiḍa-sūtrabandha) *m.* very tight or firm band of the thread अतिनिबिडसूत्रबन्धनिर्मितान्तरालकृतलेखव्यवच्छेदया लेखमालिकया परिकलितमूर्धानं प्रविशन्तमद्राक्षीत् HarṣaC. 85.

अतिनिबिरीसता (atinibirīsa-tā) *f.* despleasure, disrespect किं न्वतिनिबिरीसतयान्यदुर्जनानाम् DvyāśraKā. 18.37 (comm. नक्रमोटनेन)

अतिनिभृत (ati-nibhṛta) *adj.* very well-concealed सः ··· अतिनिभृतपदः ··· उपसृत्य माम् ··· अप्राक्षीत् Kād. 148.16; पृष्ठतोऽतिनिभृतं महीभृतामातपः कटकमाशु नोज्झति RamC. 2.20; मत्स्यभक्ष्यातिनिभृतैः कङ्कादिभिरुपासिताम् । ययौ KīcaVa. 3.1; उपेत्य यथाकालमतिनिभृतैः प्रतिबोधितो वैतालिकैः ··· नृपतिनन्दनः ĀnandRa. 8. 0(1); कार्यं चातिनिभृतं करभकहस्तेन संदेष्टव्यमिति MudrāRā. 2.22(59)

अतिनिभृतम् (ati-nibhṛtam) *adv.* very secretly, very quietly ध्वान्ते यान्त्या यदतिनिभृतं बाल्यात्मप्रकाशत्रासात् पाणिः पथि फणिफणारत्नरोधी व्यधायि SārṅgaPa. 3494; अतिनिभृतं चर्वितं ताम्बूलीयं रसयति जनः ···कदायम् StavMā. 109.23 (comm. गुप्तं यथा स्यात् तथा); अतिनिभृतमपि शब्दोच्चारे निकटतरवर्तिपरश्रवणमपि स्यादिति सशब्दतापत्तिरेव ParāTri. 72.2.

अतिनिभृतसमस्ताङ्ग (atinibhṛta-samastāṅga) *adj.* whose entire body is steady अतिनिभृतसमस्ताङ्गतया महामहीधर इव YaśasCam. i. 486.3.

अतिनिमेषिणी (ati-nimeṣiṇī) *adj.* (*f*) blinking excessively चला नातिनिमेषिणी । ··· मत्स्यसत्त्वा जलप्रिया NāṭyaŚā. 22.127.

अतिनिम्न (ati-nimna) *adj.* extremely low, deeply depressed तदूर्ध्वे कमलं कुर्यान्नातिनिम्नं च नोन्नतम् JayāS. 20.86; सीत्कारोत्पतितस्तनी स्तनतटोत्क्षे-

पातिनिम्नोदरी DhūrtaViSaṁ. 12.13; निम्नातिनिम्नरिपुहृतिरिपुगृहदशासु । … स्वभृत्यभृत्यो भवेत्पुरुष: Sārā. 40.69; समा स्वभावान्नातिनिम्नोन्नतेत्यर्थ: AbhinBhā. i. 55.11 (*on* 2.25); अतिनिम्नमध्यसंक्रमदारुनिभ: … तव हार: (हृदयं चालयति) ĀryāSaS'a. 135; उद्धृतशब्देनातिनिम्नदेशनिमग्नोद्धरणमप्यभिदधता S'rutaPra. iA. 8.21 (*on* i. 1.0); जलम् … अतिनिम्नमाभिरन्ध्रैश्चुलुकितम् Nalābhyu. 6.56; महीदुर्गम् । तच्च द्विविधम् । अतिनिम्नोन्नतभूमिरूपमेकम् VīraMi.(Rājanīti.) 200.14; BālamBha. i. 619.7 (*on* 1.321)

अतिनिम्नता (atinimna-tā) *f.* the state of being very deep or low सुदृशोऽदृश्यत गण्डमण्डली । गमिताश्रुजलप्लवैरिव कृशिमाकीर्णतयातिनिम्नताम् HarVi. 24.22; SaduktiKa. 133.4; तत्र नातिनिम्नतया खन्य: कार्य: SmṛtiCan. iv. 556.2.

अतिनियता (ati-niyatā) *adj.* (*f.*) too much regulated or controlled वन्यासु तरणिसरणिजेवेन गम्यं नयत्यनियतापि । न सहजकुटिलेषु पुनर्नदीप्रवाहेष्वतिनियतापि CaitaCan. 62.5(3)

अतिनियम (ati-niyama) *m.* very strict rule or restriction अपर्वास्वनिषिद्धासु रात्रिष्वप्यनृतौ व्रजेत् । रात्रौ च नातिनियमो न वै ह्यनियमो भवेत् MahāBhā. xiii. 203*(4)

अतिनिरन्तरा (ati-nirantarā) *adj.* (*f.*) very close or intimate पूर्वकर्मानुभावेन तयोरतिनिरन्तरा । त्रिविष्टपेऽभवत्प्रीति: परमर्द्धिसमेतयो: PadmP.(Ra.) 85.148.

अतिनिरपाया (ati-nirapāyā) *adj.* (*f.*) entirely free from danger तन्मित्रेऽस्मिन्नन्तरायकारिणि कार्यासिद्धिनौ नातिनिरपाया MahāviC. App. A. 5.59 (282.2)

अतिनिरपेक्षा (ati-nirapekṣā) *adj.* (*f.*) most detached, totally disinterested एवं विदिततत्त्वा सा बुद्ध्यातिनिरपेक्षया । बालकं विपिने त्यक्त्वा तापसी वीतमत्सरा PadmP.(Ra.) 11.149.

अतिनिरर्गल (ati-nirargala) *adj.* absolutely unhindered उपाय(?) श्चिन्त्यतां नयमार्गोऽतिनिरर्गलागम: Kapphiṇā. 5.43.

अतिनिरवग्रह (ati-niravagraha) *adj.* completely free from restraint अतिनिरवग्रहात्मन: कृतिन: … विभोस्तव कर्तृतां समगिरन्त सूरय: HarVi. 6.74.

अतिनिरस्तनीर (atinirasta-nīra) *adj.* absolutely devoid of water, completely dried up मार्गं समीक्ष्यातिनिरस्तनीरम् ṚtuSaṁ. 4.9 [F. N.]

अतिनिराकुल (ati-nirākula) *adj.* absolutely unperturbed कुटुम्बभरणं तत्र चकारातिनिराकुल: DevīBhāP. iii. 27.32.

अतिनिरामय (ati-nirāmaya) *adj.* absolutely free from any disease अव्यक्तप्रभवो ब्रह्मा शाश्वतो नित्य अव्यय: (v. l. शाश्वतोऽतिनिरामय:) Rāmā. i. 69.17.

अतिनिरालम्ब (ati-nirālamba) *adj.* having no support whatsoever अतिनिरालम्बस्तपस्विन्या: प्रवास: KundaMā. 3.3(2)

अतिनिराश (ati-nirāśa) *adj.* utterly hopeless or frustrated मित्रमुज्झितवतातिनिराशम् … । ईदृशेन नभसा महतान्त:शून्यता प्रकटितातिशयेन Subhāṣi. 1896.

अतिनिरूढ (ati-nirūḍha) *adj.* excessively grown, very deep-rooted अतिनिरूढनिबिडवासनानुबद्धा अविद्या न शक्या निरोद्धुम् Bhām. 24.24 (*on* i. 1.1); 25.7 (*on* i. 1.1); अतिनिरूढनिबिडवासनानुबद्धमज्ञानम् NyāySu.(Ā.) 316A.2 (*on* ii. 2.1); **ii** subjected to excessive (unlubricated) enema यान्येव प्राज्ञयोक्तानि लिङ्गान्यतिविरेचिते । तान्येवातिनिरूढेऽपि विज्ञेयानि विपश्चिता SuśruS. iv. 38.10.

अतिनिरूपण (ati-nirūpaṇa) *n.* elaborate argument or explanation स चायमस्मत्पक्ष एवायुष्मताप्यतिनिरूपणेन समर्थित: स्यात् NyāyMa. 205.10.

अतिनिरूपित (ati-nirūpita) *adj.* very well indicated यस्यामात्मन: सक्तोऽतिनिरूपित: JayaMa. 299.16 (*on* 5.6)

अतिनिरूहित (ati-nirūhita) *adj.* subjected to excessive treatment of (unlubricated) enema लिङ्गं यदेवातिविरेचितस्य । भवेत्तदेवातिनिरूहितस्य CaraS. viii. 1.43.

अतिनिरोधज (atinirodha-ja) *adj.* arising out of total obstruction गोविन्द … गोचक्षुषां चातिनिरोधजेन पापेन मे नाशय आन्ध्यमेतत् CaturCin. i. 735.2.

अतिनिर्गुण (ati-nirguṇa) *adj.* **A** absolutely devoid of good qualities or merits दशाहं निर्गुणे प्रोक्तमाशौचं वातिनिर्गुणे KūrmaP. 617.15 (2.23); एतच्च … कृतविवाहोऽसाविति भ्रान्त्या कृते परिवेदनेऽतिनिर्गुणे वा ज्येष्ठे द्रष्टव्यम् Aparā. 1115.27 (*on* 3.268); ManvaVi. 892.3 (*on* 8.33); **B** absolutely devoid of attributes लीलात्मा गुणवानेष विचारादतिनिर्गुण: SkandP. iv. 88.11; मायाभरैर्विरहितोऽप्यतिनिर्गुणोऽयम् (गिरिजाधिनाथ:) ParamāKā. 120.51.

अतिनिर्घृण (ati-nirghṛṇa) *adj.* [*f.* -ā] extremely merciless or cruel ततोऽपरे महावीर्या: दारुणास्त्वतिनिर्घृणा: ViṣṇuP. i. 21.10; हत्वा हत्वा तृतीयं तु भक्षयत्यतिनिर्घृणा (जातहारिणी) MārkP. 76.19; चन्द्रगुप्तोऽतिनिर्घृण: BrahmāṇḍP. ii. 29.8; पुत्र … किमर्थमेवं मामतिनिर्घृणामनुगृह्णासि DaśKuC. 87.20; येऽतिनिर्घृणा: । खादका मधुमांसस्य … प्रविशन्ति रसातलम् MahāP. 10.26; VāmaP. 6.39; 79.48; BrahmP. 164.25.

अतिनिर्घृणहृदया (atinirghṛṇa-hṛdayā) *adj.* (*f.*) extremely cruel hearted किमनेनातिनिर्घृणहृदयाया: … श्रुतेन Kād. 136.2.

अतिनिर्जन (ati-nirjana) *adj.* extremely deserted or desolate पुष्पोद्यानेऽतिनिर्जने (स रेमे रमया सह) BrahmVaiP. ii. 16.144; iv. 46.13; तेन तासामहं हस्ताद् भ्रष्टो देशेऽतिनिर्जने KathāSaSāg. xiv. 4.44; SaduktiKa. 40.18.

अतिनिर्जर (ati-nirjara) *adj.* surpassing gods (जह्नुप्रभृतय:) व्यालानपि वशीचक्रु: कुञ्जरांस्तेऽतिनिर्जरा: TriṣaS'aPuC. ii. 5.39.

अतिनिर्जरकुञ्जर (ati-nirjarakuñjara) *adj.* surpassing the elephant of gods (Airāvata) मदोद्धुरै: कुञ्जरैरप्यतिनिर्जरकुञ्जरै: ।… द्यां क्ष्मां च छादयन् TriṣaS'aPuC. iv. 1.591.

अतिनिर्जलता (atinirjala-tā) *f.* extreme scarcity of water मरुदुर्गं यत्रातिनिर्जलतया तद्देशवासिभिरेव कथंचिज्जलं लभ्येत ManvaVi. 790.3 (*on* 7.70)

अतिनिर्णय (ati-nirṇaya) *adj.* extremely firm, of firm conviction केवलं क्षीणमनन आस्तेऽद्वैतेऽतिनिर्भय: (v. l. अतिनिर्णय:) SarvaVeSāSaṁ. 965 (Mysore Ed. 940); *m.* conclusive decision प्रवृत्ते पञ्चरात्रे हि साधनस्यातिनिर्णय: AnuVyā. 63A.9 (*on* 3.4)

अतिनिर्दय (ati-nirdaya) *adj.* exceedingly merciless or cruel परत्र लोको न तथातिनिर्दय: प्रवर्तते MaYānaSū. 20.3 (5.3); यून: स्थविरान् … हत्वा हत्वा प्रचिक्षेप सरय्वामतिनिर्दय: BrahmāṇḍP. ii. 51.65; रजकोऽतिनिर्दयोऽतिभारेण मां दमयति PañcT. 4.17 (387.33); Pañcākhyā. 237.5; अतिनिर्दय: …। एनामीदृशीं त्यक्त्वा गतोऽन्यस्या निकेतनम् S'ṛṅgāMañ.(A.) 22.15.

अतिनिर्दयम् (ati-nirdayam) *adv.* in an extremely cruel or merciless manner प्रकामकामैर्युवभि: सनिर्दयं (v. l. सुरतेऽतिनिर्दयम्) निशासु दीर्घास्वभिरामिताश्चिरम् ṚtuSaṁ. 5.7; गदापाणिभि: पुरुषैरतिनिर्दयं ताड्यमाना: (तर्कविद्या:) PraboCan. 6.23 (113.5)

अतिनिर्दयहृदयम् (atinirdaya-hṛdayam) *adj.* in a manner (exhibiting) extremely merciless heart अवरोधविलासिनीभिश्च … अतिनिर्दयहृदयं प्राणप्रयाणपर्यन्तजर्जरितकाय: YaśasCam. ii. 190.5.

अतिनिर्दलत्व (atinirdala-tva) *n.* the state of having no alternative सदसत्त्वेन गृह्णातीति न विकल्पितमतिनिर्दलत्वात् (भ्रान्तज्ञानम्) NyāyVārPari. 413.4.

अतिनिर्दिश् (atinir-diś-) VI. P. to extend an argument एतेन प्रधानमतनिराकरणन्यायेनानेन अतिनिर्दिश्यते BrahmSūBh.(Bhā.) 92.16 (*on* ii. 1.12)

अतिनिर्दोषत्व (atinirdoṣa-tva) *n.* the state of being exceedingly flawless or perfect अयमेव वेदान्तवादोऽतिनिर्दोषत्वादादरणीय: VivaPraSaṁ. 102.6.

अतिनिर्धन (ati-nirdhana) *adj.* [*f.* -ā] extremely poor or penniless दीर्घाङ्गुलीभि: कुलटा कृशाभिरतिनिर्धना SkandP. iv. 37.16; निहतोऽसौ मुनि: … प्रशान्तोऽप्यतिनिर्धन: DevīBhāP. vii. 6.15.

अतिनिर्धनत्व (atinirdhana-tva) *n.* excessive poverty, absolute pennilessness अतिनिर्धनत्वात्तं पुरं परित्यज्य … ग्रामे परिवसति KathāK. 1.10.

अतिनिर्धूतदोष (atinirdhūta-doṣa) *adj.* who is completely freed from all defects (of the humours) अतिनिर्धूतदोषस्य संनिरुद्धमार्गप्रचारस्य (गजस्य) कर्णशूलो भवत्यतिमात्रम् Hastyāyur. 620.3 (4.7)

अतिनिर्बन्ध् (ati-nirbandh-) IX. P. to insist too much (on) ननु कर्मविषये किं कश्चित्संशयोऽप्यस्ति येन पूर्वै: पूर्वतरं कृतमित्यतिनिर्बध्नासि Gūḍhārthadīpikā on BhagGī. 4.16.

अतिनिर्बन्ध (ati-nirbandha) *m.* **Ai** too much of insistence, great emphasis तत्रातिनिर्बन्धो न लाभ: MahāBh. iii. 321.9 (*on* vii. 3.14); (सीता) अतिनिर्बन्धं चकार परिपृच्छती PadmP. iv. 59.15; अलमतिनिर्बन्धेनात्रभवत: JātaMā. 25.16 (5.22); नैवातिनिर्बन्धान्निवर्तन्ते स्म ते यदा BṛKathāS'loSaṁ. 15.112; अतिनिर्बन्धेन पुन: पुनरावर्तनव्यसनितया न विहिता अप्रयत्नविरचितेत्यर्थ: VakroJī. 84.2; अलममुना प्रतिपन्नार्थविघातिना वादेनातिनिर्बन्धेन PrakaPañ. 304.10; अतिनिर्बन्धो यदि ते वच्मि तच्छृणु KathāSaSāg. viii. 6.101; अतिनिर्बन्धे तु क्षणिकनैरात्म्यादिप्रतिपादकानां तर्काभ्यास: ĀtmaTaVi. 909.20; CaṇḍaKau. 3.17 (3); NyāyRaMā. 63.4; अतिनिर्बन्धेन विभागजत्वेन

अतिपीडाकर (ati-pīḍākara) *adj.* very troublesome, causing great pain सुष्ठु दुःखेन तपश्चर्यंते अतिपीडाकरम् ManuBh. i. 26. 6 (*on* 1. 34); व्यसनमाघातम्। घोरमतिपीडाकरम् DīpKa. 52. 29 (*on* 2. 113); एतद्वादिनोऽतिपीडाकरमहापातकादिविवादविषयम् DaṇḍaVi. 338. 3; 342. 1; मर्माणि अल्पाभिघातेऽप्यतिपीडाकराणि स्थानानि बस्त्यादीनि VīraMi. 861. 1 (*on* 3. 102)

अतिपीडाकृत् (ati-pīḍākṛt) *adj.* very troublesome, causing great pain किमज्ञानम् …। यत्परस्यातिपीडाकृदसद्दोषाधिरोपणम् PārśvC. 8. 148.

अतिपीडावती (atipīḍā-vatī) *adj.* (*f.*) consisting of great trouble (वृद्धिः) प्रतिषिध्यते कायिकाप्यतिपीडावती SmṛtiCan. iv. 369. 8.

अतिपीडित (ati-pīḍita) *adj.* [*f.*-ā] **i** very much pressed कृष्णस्तु तत्स्तनं गाढं कराभ्यामतिपीडितम्। गृहीत्वा प्राणसहितं पपौ ViṣṇuP. v. 5. 9; BrahmP. 184. 9; बस्तिः कण्ठं प्रधावेदतिपीडितः AṣṭāSaṁ. i. 150. 19 (1. 20); **ii** pressed down with weight (द्वारम्) अतिपीडितमन्तर्विनतं भवेदभावाय BṛSaṁ. 53. 81; **iii** greatly afflicted, rubbed hard नाशक्नुवं स्थापयितुम्…स्ववाहिनीम्। शरक्षताङ्गश्च भृशं व्यपयातोऽभि(v. l. ति)पीडितः MahāBhā. iii. 236. 12; xii. 90. 23; तारकादतिपीडितम् (जगत्) MatsyaP. 61. 38; BrahmāṇḍP. ii. 34. 12; द्यौस्तत्सटोत्क्षिप्तविमानसंकुला…क्ष्मा च पदातिपीडिता BhāgP. vii. 8. 33; i. 13. 33; जगन्नाथ … मां रक्ष राक्षसेनातिपीडितम् SkandP. iii(1). 3. 91; एभिः शिरोभिरतिपीडितपादपीठः … दशास्यः RāghPāṇ.(Dha.) 11. 38; SiddhYo. 75. 25; श्रयिष्यन्ति च देवास्त्वां दानवैरतिपीडिताः DevīBhāP. iii. 13. 40; अतिपीडितोऽहम् … तृष्णाक्षुधाभ्याम् BrahmP. 117. 10; तैलचौर्येण भवति नरः कण्ड्वातिपीडितः PadmP. iv. 48. 53; तव भारेण नृत्येन मम देहोऽतिपीडितः GaṇeP. ii. 88. 38; आर्तोऽप्यतिपीडितोऽपि अपवदेत् ManvaVi. 572. 10 (*on* 4. 235); (स्नेहः दीयते) कर्मणा चातिपीडिते Hastyāyur. 674. 4 (4. 19)

अतिपीडितता (atipīḍita-tā) *f.* the state of being greatly pressed अतिपीडितता ··· भूयो भूयोऽवपीडनम् ··· पीडनदोषाः SuśruS. iv. 35. 32.

अतिपीडितम् (ati-pīḍitam) *adv.* very pressingly ऊर्ध्वग्रीवस्योर्ध्वतो हस्तं कृत्वावसेचयेदशिथिलमनतिबद्धमतिपीडितम् Hastyāyur. 633. 8 (4. 13)

अतिपीडिनी (ati-pīḍinī) *adj.* (*f.*) extremely painful or troublesome तस्याजायत मध्याह्ने शिरोरुगतिपीडिनी VarāP. 122. 34.

अतिपीड्यमान (ati-pīḍyamāna) *adj.* being greatly afflicted स दुर्मनाः अतिपीड्यमानहृदयो भोक्तुं नेच्छति Hastyāyur. 94. 1 (1. 13)

[1]**अतिपीत** (ati-pīta) *adj.* [*f.* -ā] **i** partaken excessively अति-बी(पी)तं च तद्विधि (वृद्धि) तत्रा (तन्यात्) BhelaS. 32. 14 (1. 19); सकलनृपतिमौलिमालास्वतिपीतं पद्मरागरत्नातपमिव वमन्तौ (चरणौ) HarṣaC. 114. 4; रसोऽतिपीतः कुरुते ज्वरम् KāśyaS. 213A. 19; हीनमिथ्यातिपीतेन यो व्याधिरुपजायते AṣṭāSaṁ. ii. 48. 13 (4. 9) = AṣṭāHṛ. iv. 7. 2; अकाले चातिपीतश्च धूमः कुर्यादुपद्रवान् S'ārṅgaS. iii. 9. 7; अतिपीतां तमोराजीम् ··· । वमतीव ··· प्रदीपः SubhāRaK. 26. 2; SaduktiKa. 165. 5; **ii** who has partaken excessively अतिपीतं तथा भुक्तं व्यायामं नैव कारयेत् NāṭyaS'ā. 10. 102; नातिपीताम् । विश्रमकरत्वात् JayaMa. 178. 9 (*on* 2. 10); S'ukraNī. 4 (7). 116.

[2]**अतिपीत** (ati-pīta) *adj.* [*f.* -ā] deep yellow पित्तं नीलातिपीतं हरिततमम् KalyāKā. 3. 67; अतिपीताभः पित्तपाण्डुामयी नरः RugVi. 8. 5; 52. 20; अतिपीत सुवर्णाभ ··· नागराजेन्द्र BhaviP. 396A. 26 (ii(3). 2. 61); अतिपीतम् ··· स्मरतु ··· स्तम्भनं स्वर्णचूडम् ĪśānS'iPa. i. 3. 23; अतिपीता प्रशस्ता तु ज्ञेया दारुनिशा BhāvPra.(Bhā.) 6 (1). 118; लसतातिपीतदाम्ना शुशुभे ग्रन्थिः प्रियानीव्याः PadyaVe. 201; *m.* name of a root अत्ति(? ति)पीतः श्वेतवल्ल्या मूले ApūNā. 23B. 4.

अतिपीन (ati-pīna) *adj.* [*f.* -ā] very fat अतिपीनाङ्गः क्षाममध्यो वृकोदरः ViṣṇuDhaP. iii. 85. 67; अतिपीना द्विरदमदविगन्धिः (हस्तिनी) Rati-Raha. 1. 18; विघ्नेशम् ··· विरचयेत् ··· अतिपीनाङ्गकम् TantrSa. 2. 115 = S'ilpa-Ra. ii. 14. 29.

अतिपीनस (ati-pīnasa) *n.* excessive catarrh अल्पङ्गसादनविपाकविहीनतातिकासातिपीनस° ··· °कण्ठकण्डूः । श्लेष्मज्वरे ··· लक्षणानि KalyāKā. 9. 58.

अतिपीयूषगण्डूष (ati-pīyūṣagaṇḍūṣa) *adj.* which surpasses draughts of ambrosia अतिपीयूषगण्डूषैर्वचोभिः प्रतिभाष्य ताम् । विससर्ज महीनाथः TriṣaS'aPuC. ii. 4. 134.

अतिपीयूषोद्गारा (ati-pīyūṣodgārā) *adj.* (*f.*) which surpasses the emissions of ambrosia अजितस्वामी ···। सगरं व्याजहारातिपीयूषोद्गारया गिरा TriṣaS'aPuC. ii. 3. 156.

अतिपीवन् (ati-pīvan) *adj.* [*f.* -varī] [DEBRU. p. 895] **i** very fat or big नातिपीवा न संहननाङ्गो जरसा चोपद्रुतो भवान् BhāgP. v. 10. 6; (नागाधिराजः) अतिपीव्ना देहेन ··· उर्वीं बिभर्ति AnargharaRā. 6. 73; यथा यथातिपीवानो बभूवुस्तिमिरोर्मयः PāṇḍaC. 10. 158; **ii** surpassing a fat person इदं तर्हि अतिधीवरी अतिपीवरी MahāBh. ii. 205. 19 (iv. 1. 14); PadMañ. *on* KāśiVṛ. *on* P. iv. 1. 4.

अतिपीवर (ati-pīvara) *adj.* [*f.* -ā] very plump, very thick (देवी) खड्गं व्यापारयामास कण्ठे तस्यातिपीवरे SkandP. vi. 121. 54; वटस्य बीजमल्पं तत्कार्यमतिपीवरम् PramāVāBh. 42. 6; RāmāMañ. 492. 21; तनुतरपाणिपद्मम् ··· कथमतिपीवराङ्गुलीयं तन्वङ्ग्याः सपदि विभूषयेन्मदीयम् GopāKeCan. 140. 10; पतिरिव ···। आलिङ्गत्यतिपीवरां स्तनतटीम् MūkaPañ. 2. 52.

अतिपीवरवक्षोज (atipīvara-vakṣoja) *m.* very plump breasts (पारिजाततरोर्मूले कान्ता काचिददृश्यत) अतिपीवरवक्षोजभारभङ्गुरमध्यभूः BrahmāṇḍP. iii. 10. 62; iii. 37. 73.

अतिपीवरस्कन्ध (atipīvara-skandha) *adj.* **1** possessing very stout shouldes (person) (तस्याः पतिः) सालपादप इवातिपीवरस्कन्धः AvantiKa. 7. 19; **2** having a very big trunk or stem (tree), AvantiKa. 7. 19.

अतिपुंसी (ati-puṁsī) *adj.* (*f.*) surpassing a man (उगिद् वर्णः) पुमांसमतिक्रान्ता अतिपुंसी JaineVyā. 151. 5 (*on* iii. 1. 6)

अतिपुंस्त्व (atipuṁs-tva) *adj.* of excessive virility इयं वृद्धस्य कस्यचिद्वणिजो नातिपुंस्त्वस्य···गृहिणी DaśKuC. 116. 4.

अतिपुण्य (ati-puṇya) *n.* great merit अतिपुण्यम् ··· अतिथैर्यं च साधय SkandP. iii(3). 11. 28; अतिपुण्यान्मानवोऽपि याति स्वर्गम् GaṇeP. 54. 9 (1); अतिपुण्येन दृष्टं ते विराड्रूपं सुरेश्वर GaṇeP. ii. 61. 39; ii. 79. 10; ii. 152. 44; ये तु धनलाभेच्छां विनैव ··· (श्राद्धादिकं) कुर्वन्ति तेषामतिपुण्यम् BālamBha. ii. 243. 1 (*on* 2. 133–36); *adj.* [*f.* -ā] very meritorious, extremely virtuous, highly sacred, प्रज्ञाप्रासादमारुह्य ··· प्रेक्षन्तो लोकवृत्तानि ··· अतिपुण्यानि पापानि MahāBhā. iii. 198. 93; धन्योऽहमतिपुण्योऽहं कोऽन्योऽस्ति सदृशो मया MārkP. 23. 89; सत्रं हि तेऽतिपुण्यं च सहस्रपरिवत्सरान् BrahmāṇḍP. i. 2. 5; एवं दिशाप्रवाहेण ह्यतिपुण्या सरस्वती VāmaP. 42. 9; अनुचितमिदं भक्त्या विश्रासेनागतस्याद्य । समुपेक्षणं ममैषा प्रकृतिर्नैवातिपुण्या नाम GopāKeCan. 90. 22.

अतिपुण्यकृत् (atipuṇya-kṛt) *adj.* doing highly meritorious deeds अतिपुण्यकृतां प्राप्यॉल्लोकान् प्राप्य ··· शुचीनां श्रीमतां···कुले योगोपक्रमे भ्रष्टो योगमाहात्म्याज्जायते GītāBh.(Rā.) 354. 7 (*on* 6. 41)

अतिपुण्यचय (atipuṇya-caya) *m.* stock of excessive merit उपनतमतिपुण्यचयैः संपूर्णं रक्षितं च यत्नेन ।··· भवति निधानं हि मित्रं च KalāVi. 2. 42.

अतिपुण्यतम (atipuṇya-tama) *adj.* most holy कोऽतिपुण्यतमः श्रेष्ठः प्रदेशः पापदारकः SkandP. v(1). 40. 9; (संकष्टचतुर्थीमहिमा) अतिपुण्यतमश्चायं स्मरणादपि सिद्धिदः GaṇeP. i. 73. 30.

अतिपुण्यतर (atipuṇya-tara) *adj.* extremely sacred or holy सः ··· अतिपुण्यतरपुरुषोत्तमक्षेत्रे ··· स्वर्लोकसोपानपरम्परासु सुखेनैव पदक्षेपणम् ··· स्वयं चकार ParamāKā. 154. 49 (20)

अतिपुण्यतस् (atipuṇya-tas) *adv.* on account of great merit तथा सप्तापि मन्त्राणां सिद्धान्यस्यातिपुण्यतः BṛKathāK. 97. 78.

अतिपुण्यता (atipuṇya-tā) *f.* excessive sanctity स्वामिसङ्गात्तदम्भोऽगात् पुण्यमप्यतिपुण्यताम् TriṣaS'aPuC. ii. 2. 440.

अतिपुण्यतोय (atipuṇya-toya) *adj.* having very sacred water गिरिवरगहनेऽतिपुण्यतोये यतमनसो निवसन्ति विन्ध्यपृष्ठे MārkP. 3. 85.

अतिपुण्यद (atipuṇya-da) *adj.* [*f.* -ā] giving great merit, extremely holy कश्चिद् विशेषनियमः पालनीयः प्रयत्नतः । यावदेकादशी शुक्ला कार्तिकस्यातिपुण्यदा JayāS. 21. 114 = PāraS. 12. 494; रूपोला परमं स्थानं पवित्रमतिपुण्यदम् SkandP. iii(2). 39. 220; तस्माद्बिल्वतलाद्यातं गाङ्गं वार्यतिपुण्यदम् BrahmP. 115. 14; रामं दृष्ट्वा कृतार्थः स्यामहं यज्ञेऽतिपुण्यदे PadmP. iv. 28. 75; जले पतन्ति यास्तत्र शिवास्तास्त्वतिपुण्यदाः S'ivaP. ii(5). 41. 62 (268B. 3)

अतिपुण्यभाज् (atipuṇya-bhāj) *adj.* sharing great merit अहो वयमतिपुण्यभाजः यदिमाममानुषीमस्याकृतिम् ··· पश्यामः Kād. 82. 20.

अतिपुण्यभू (atipuṇya-bhū) *f.* excessively holy land यतः कमलापतिः वसति नित्यमसावतिपुण्यभूरिति च चेतसि काममम्यत ĀnandRa. 2. 49.

अतिपुण्यवत् (atipuṇya-va(n)t) *adj.* highly meritorious अतिपुण्यवतो लोके साधुशब्दः प्रयुज्यते GaṇeP. i. 78. 19; तयोरेकः ··· चक्रवर्त्यत्र भविता देव एवातिपुण्यवान् KathāSaSāg. viii. 1. 13; कथय ··· यश्चातिपुण्यवानपि प्रागनुभूय सौख्यानि पश्चाद् दुःखं प्राप्तः TilaMañ. 346. 18.

अतिपुण्यसंभार (atipuṇya-saṁbhāra) *m.* stock of great merit विना यज्ञैर्विना दानैर्विना व्रतजपादिभिः । विनातिपुण्यसंभारैः कः काशीं प्राप्तुमीहते SkandP. iv. 42. 53.

अतिपुण्यात्मन् (ati-puṇyātman) *adj.* highly pious-minded तस्यासीदतिपुण्यात्मा वृषभानुः परोदयः ĀdiP. 12. 5.

अतिपुण्याश्रमपद (ati-puṇyāśramapada) *n.* extremely holy hermitage (रामः) तत्राक्षयवटं दिव्यं ददर्श ··· अतिपुण्याश्रमपदं परम् BrahmVaiP. iii. 33. 31.

अतिपुण्यैकरसिक (ati-puṇyaikarasika) *adj.* solely interested in (acquiring) good deal of merit सुराणां पातासौ स पुनरतिपुण्यैकरसिकः ··· तृणमिव सुरेशं विजयते Subhāṣi. 2631.

अतिपुण्यैकहृदय (ati-puṇyaikahṛdaya) *adj.* with a heart set in great piety only सुराणां पातासौ स पुनरतिपुण्यैकहृदयः ··· तृणमिव सुरेशं विजयते VāsaDa. 123. 1 = SubhāRaK. 46. 10.

अतिपुत्रवत्सला (ati-putravatsalā) *adj.* (*f.*) very much fond of a son वसुदेवः — अयि अतिपुत्रवत्सले (देवकि) BālC. 1. 10 (12)

अतिपुत्रा (ati-putrā) *adj.* (*f.*) who is not able to deliver a male child (safely) आकाङ्क्षेताष्ट वर्षाणि भर्तातिप्रसवां स्त्रियम् ·· अतिप्रसवाऽतिपुत्रा ViraMi.(Saṁskāra.) 873. 25.

अतिपुपुवान (ati-pupuvāná) *adj.* one who has purged (himself) through (Soma) सोमेनातिपुपुवानं याजयेत् MaiS. ii. 4. 1.

अतिपुर् (ati-pur) *f.* excellent city अतिपूः शोभनपुरम् KośaKaTa. 1. 2625.

अतिपुर (ati-pura) *n.* name of Viṣṇu's abode स्वर्गतोऽपि स राजर्षिः क्षीणे वैवस्वतेऽन्तरे । प्रविश्यातिपुरं विष्णोश्चन्द्रमण्डलमध्यगम् ViṣṇuDhaP. i. 156. 38.

अतिपुरम् (ati-puram) *adv.* on the outskirts of the city विलम्बितगतिर्मैनागतिपुरं जनैर्गीयते AlaṅkāRa. 29. 61.

अतिपुरन्दर (ati-purandara) *adj.* surpassing Indra त्रिपृष्ठोऽभाषिष्ट स्थामतोऽतिपुरन्दरः TriṣaS'aPuC. iv. 1. 389.

अतिपुरा (ati-purā) *adv.* much earlier, long ago भवद्गुणग्रामयशः ···

विलोचने । विषीदतः सातिपुराधुना पुनः सुधाम्बुधावातनुतोऽवगाहनम् Vidvanmo. 8. 126.

अतिपुराण (ati-purāṇa) *adj.* very old (सुरामैरेये) कदाचित् प्रच्युतमद्यभावे। यदा अतिपुराणे भवतः Sphuṭā. iv. 45. 24 (*on* 4. 34); पुनर्मुहूर्तमात्रमतिपुराणकपिलपनलीलातुल्यतामनुशीय क्षणादुपशान्तवयसि समस्तसंध्यारागतेजसि Yaśas-Cam. ii. 8. 5; ii. 43. 3; घृतस्यातिपुराणस्य तस्य पानञ्च शस्यते AśvaVai. 62. 2.

अतिपुरीषबन्धन (ati-purīṣabandhana) *n.* excessive constipation प्रक(? क)म्पशूलातिपुरीषबन्धनम् KalyāKā. 11. 24.

अतिपुरुष (ati-puruṣa) *m.* **i** superior person or man अथैष एव पुरुषो योऽयं चक्षुषि । य आदित्ये सोऽतिपुरुषः JaimiUBr. i. 27. 2; (तिकुप्रादयः) तिसंज्ञाः कुशब्दः प्रादयश्च समर्थेन नित्यं षसो भवति ।··· स्वती पूजार्थकम् ।··· अतिपुरुषः JaineVyā. 61. 2 (*on* i. 3. 81); कुगतिप्रादयः समर्थेन शब्दान्तरेण सह नित्यं समस्यन्ते, तत्पुरुषश्च समासो भवति । कुः पापार्थे । कुपुरुषः ।···स्वती पूजायाम् । सुपुरुषः । अतिपुरुषः KāśiVr. *on* P. ii. 2. 18; **ii** name of a former Buddha [DBHS]

अतिपुरुषात्मक (atipuruṣātma-ka) *adj.* of the nature of a superman कोटिपाठेन भवति तथातिपुरुषात्मकः BrBrahmaS. i. 12. 113.

अतिपुष्कल (ati-puṣkala) *adj.* abundant, very much एवमस्त्विति संभाष्य नृपोऽन्नमतिपुष्कलम् । अखेदयद्वरं तस्मै चारुव्यंजनपानकम् PadmP.(Ra.) 33. 197.

अतिपुष्ट (ati-puṣṭa) *adj.* [*f.* -ā] **i** well nourished, very much robust or strong अतिपुष्टा गावो गोष्ठया आसेदुष्यः···भवन्ति SāmaraU. 276. 2; शरीरेणातिपुष्टेन किमनेन प्रयोजनम् BrKathāMañ. 16. 351; **ii** well-equipped (with), very rich (in) सुन्दरकः ··· वसुना नातिपुष्टोऽभवत् DaśKuC. 46. 14.

अतिपुष्टता (atipuṣṭa-tā) *f.* the state of being well-fed तस्याश्चास्याः प्रायश्चित्तेष्वनधिकारः अशक्ततयातिपुष्टतया वा तस्या अपि वस्त्रादिदानं कर्तव्यमिति श्लोकार्थः ManuBh. ii. 430. 20 (*on* 11. 187)

अतिपुष्टपुष्करिणि (atipuṣṭa-puṣkariṇi) *adj.* having well-fed lotus-ponds आधिदैविकं स्थानं वृन्दावनं अतिपुष्टपुष्करिणि SāmaraU. 246. 7.

अतिपुष्टाङ्ग (ati-puṣṭāṅga) *adj.* whose body is well nourished बलिपुष्टैः ··· बलिभिश्चातिपुष्टाङ्गैरवलाश्चक्षुभिर्हृताः SkandP. iv. 68. 53.

अतिपुष्टाङ्गयुक्त (atipuṣṭāṅga-yukta) *adj.* **1** endowed with strong equipments जातमात्रं न यः शत्रुं व्याधिं वा प्रशमं नयेत् । अतिपुष्टाङ्गयुक्तोऽपि स पश्चात्तेन हन्यते BhojPra. 3. 19; **2** endowed with a strong body, BhojPra. 3. 19.

अतिपुष्टि (ati-puṣṭi) *f.* excessive growth or increase पदातिमातङ्गतुरङ्गमाणां पुरा कृशानाममुना नृपेण । निदाघसंतप्तसरोवराणां धाराधरेणापि कृतातिपुष्टिः Rāṣṭrau. 10. 32.

अतिपुष्टितस् (atipuṣṭi-tas) *adv.* due to excess दौर्गन्ध्यं गद्गदत्वं च भवेन्मेदोऽतिपुष्टितः AṣṭāSaṁ. i. 125. 14 (1. 24)

अतिपुष्टिदा (atipuṣṭi-dā) *adj.* (*f.*) providing excessive nourishment नारिकेरोद्भवा क्षीरी स्निग्धा शीतातिपुष्टिदा BhojanKu. 30. 9.

अतिपुष्पक (ati-puṣpaka) *adj.* superior to the Puṣpaka (chariot), surpassing the Puṣpaka आतिथ्यम् ··· आनशे ··· भूपतिः । आनन्दादतिपुष्पकं रथमधिष्ठाय प्रियायौतके प्राप्तं तैरवरागतैरविदितप्रासादतो निर्गमः NaiṣC. 19. 66.

अतिपू (ati-pū-) I. Ā. **A** to purify तं त्वां सहस्रचक्षसमथो सहस्रभर्णसम् । अति वारमपाविषुः RV. ix. 60. 2; स सहस्रतमे संवत्सरे । सर्वोऽत्यपवत SatBr. X. iv. 4. 3; **B i** to flow through (said of the woollen filter), to purify पवस्व देववीरति पवित्रं सोम रंह्या । इन्द्रमिन्दो वृषा विश RV. ix. 2. 1; ix. 36. 2; स्वादुः पवाते अति वारमव्यम् RV. ix. 97. 4; ix. 106. 13; **B ii** to pass through (without digestion) तस्मादनु सवनं पुरोडाशानां प्राश्नीयादात्मन्नेवारमणं कुरुते नैन ᳲ सोमोऽति पवते TaiS. VI. v. 11. 4; MaiS. ii. 4. 1; KāṭhS. 12. 10; छिद्र इव वा एष यं सोमोऽतिपवते PañcBr. xviii. 5. 4; यᳲ सोमोऽतिपवते । पितॄणां याज्यानुवाक्याभिरुपं तिष्ठते TaiBr. I. viii. 6. 6; यत्र वै सोम इन्द्रमत्यपवत स यत्ततः शार्दूलः समभवत् SatBr. V. iii. 5. 3 = V. iv. 1. 11; V. v. 4. 13; V. v. 4. 18; V. v. 4. 33; अप वा एतस्मात् । तेज इन्द्रियं वीर्यं क्रामति यᳲ सोमोऽतिपवतऽऊर्ध्वं वावाञ्चं वा SatBr. XII. vii. 2. 1; BaudhSS. ii. 190. 7; **C** to depart विड् वा एतमतिपवते यो राजावरुध्यते PañcBr. xviii. 5. 6 (Sāy. अत्यन्तं परित्यजति); xviii. 5. 8; प्रजाकामो यजेत प्रजा वा एतमतिपवते योऽलं प्रजायाः सन् प्रजां न विन्दते PañcBr. xviii. 5. 9; xviii. 5. 10; xviii. 5. 11; (*caus.*) to purify or cleanse न प्राणानतिपावयेत् MānSS. 59. 10; द्रोणे वालं वितत्य प्रतिप्रस्थाता पुनाति ते परिस्रुतमिति सुरामतिपावयति MānSS. 128. 22; VārāSS. III. i. 1. 15; III. ii. 7. 11; तं गृहीत्वा राजानमतिपावयति यावन्तं माध्यंदिनाय सवनायाप्तं मन्यते HirSS. ix. 1. 14; ix. 3. 32.

अतिपूजनीयवपुस् (atipūjanīya-vapus) *adj.* whose body is highly admirable भूमौ नोपविशन्ति ये खलु रजःसंपर्कतर्कादिव । तेषामप्यतिपूजनीयवपुषां नूनं पिकानाम् ··· परपुष्टता SaduktiKa. 274. 26.

अतिपूजा (ati-pūjā) *f.* excessive worship or honour अतिपूजां तथा लाभं गौरवं निन्दनं तथा । इच्छन् यतिर्याति पापमिन्द्रियाणां सुखस्पृहाम् BrDharmaP. ii. 7. 26.

अतिपूजित (ati-pūjita) *adj.* **i** strongly recommended or prescribed (*lit.* highly honoured) लावकः···तथा विपाके मधुरः संनिपातेऽतिपूजितः HāriS. i. 21. 2; सक्तवः शर्करासर्पिर्युक्ता ग्रीष्मेऽतिपूजिताः BhojanKu. 23. 17; 127. 24; **ii** highly honoured or adored or auspicious येनेन्द्रियाणि विजितानि ···। श्लाघ्यं च जीवितमनर्थविमुक्तमुक्तं पुंसो विविक्तमतिपूजिततत्त्ववृत्तैः SubhāRaSaṁ. 102; (आवर्तः) रोमजश्चातिपूजितः AśvaVai. 3. 38; अविलम्बि सुवृत्तं च उदरञ्चातिपूजितम् AśvaVai. 3. 25.

अतिपूजिततारा (atipūjita-tārā) *adj.* (*f.*) **1** having an excellent pupil (of the eye) अतिपूजिततारेयं दृष्टिः ··· कं न मोहयति ĀryāSaSa. 21 (comm. अतिपूजिता श्रेष्ठेति यावत् । तारा नेत्रकनीनिका); **2** where the goddess Tārā is highly worshipped, ĀryāSaSa. 21 (comm. अत्यन्तपूजिता ताराख्या देवता यत्र)

अतिपूजितलाभ (atipūjita-lābha) *m* acquisition of excessive honour अतिपूजितलाभांस्तु जुगुप्सं चै(? सेचै)व सर्वतः । अतिपूजितलाभैस्तु यतिर्मुक्तोऽपि बध्यते BrahmP. 222. 52.

अतिपूज्य (ati-pūjya) *adj.* highly adorable, highly honourable वास्त्वीशनामा ··· देवैः पुरा दत्तवरोऽतिपूज्यः । शेते स्म भूम्याम् ĪśānSiPa. i. 11. 6; देवेभ्योऽप्यतिपूज्यस्तु स्वगुरुर्ब्रह्मचारिणा ··· स यज्ञपुरुषः BhaviP. 157B. 20 (i. 103. 51); VīraMi.(Vyavahāra.) 116. 1.

अतिपूत (ati-pūta) *adj.* [*f.* -ā] **i** purged (person) स सोमातिपूतो मङ्क्षुरिव चचार SatBr. V. v. 4. 11; स हैतयापि सोमातिपूतं भिषज्येत् SatBr. V. v. 4. 13; V. v. 4. 33; अग्निचित्सोमयाजिसोमातिपूतसोमवामिनाम् KātySS. xix. 1. 2; xv. 10. 21; xxii. 9. 15; **ii** extremely purified or pure (ओदनस्य ··· सर्पिर्मिश्रस्य जुहोति) तद्ब्राह्मणैरतिपूतमनन्तमक्षय्यं मे अस्तु स्वधा नमः पितृभ्यः स्वाहा BhārGS. 2. 17 (49. 10); ĀgniGS. iii. 2. 6 (128. 19); वृत्तमतिपूतमिदमुक्तटसुभावाः । श्रोतवचसो विषयतामुपनयन्ते PadmP.(Ra.) 39. 236; (गङ्गा) ततः स्वभावतः पूताप्यतिपूता भविष्यति BrahmVaiP. ii. 6. 87; **iii** very holy अतिपूतैः प्रियसखी हृता ते दृग्भङ्गीषुभिः UjjvaNīMa. 178. 7.

अतिपूतात्मन् (atipūtātman) *adj.* **i** having a very pure or holy soul श्रद्धधानोऽतिपूतात्मा ··· शूद्रः कर्माणि मे यः ··· सममाचरेत् VarāP. 115. 32; **ii** of most sacred form अस्ति ··· हिमवान् ··· पर्वतः ।··· तपःस्थानोऽतिपूतात्मा SivaP. ii(3). 1. 19 (124A. 15)

अतिपूति (ati-pūti) *adj.* smelling very badly, extremely putrid अतिपूतिपर्युषितविसालसान्द्रोत्तरारम्भम् YaśasCam. i. 404. 5; पत्रिकाशासनानि च । वेष्टयित्वोपरि स्पष्टं पुरीषेणातिपूतिना BrKathāK. 9. 24.

अतिपूतिक (atipūti-ka) *adj.* extremely putrified (व्रणः) रक्तः कृष्णोऽतिपूतिकः CaraS. vi. 25. 24.

अतिपूतिगन्धवत् (atipūtigandha-va(n)t) *adj.* excessively foul-smelling श्लेष्मा विविधवर्णश्च सान्द्रोऽतिपूतिगन्धवान् AśvaVai. 64. 12.

अतिपूतिपूय (atipūti-pūya) *m. n.* very foul-smelling pus अहम् ··· अतिपूतिपूयपिहितनासिकसविधसंचरत्परिवाराम् ···(अमृतमतिं) विदित्वा YaśasCam. ii. 223. 2.

अतिपूतिशरीर (atipūti-śarīra) *adj.* whose body is extremely putrid छिन्नायाः स्वरसं वापि सेवमानः ··· अतिपूतिशरीरोऽपि दिव्यमूर्तिर्भवेन्नरः SiddhYo. 51. 52.

अतिपूर (ati-pūra) *m.* overwhelming or heavy flood विलुलितमतिपूरैर्बाष्पमानन्दशोकप्रभवमवसृजन्ती···। स्नपयति हृदयेशं···ते···दृष्टिः UttaRāC. 3. 24; ततोऽतिपूरागमखण्डतीरा रेवा क्रमेणाप्यत पार्थिवेन Rāvaṇā. 4. 18; भूयोऽविशन्नदीम् । अन्तराले गतस्तावदतिपूरेण पातितः PārśvC. 2. 803.

अतिपूरण (ati-pūraṇa) *n.* excessive filling (स्रोतसाम्) अतिपूरणात् (उदराण्युपजायन्ते) CaraS. vi. 13. 14; प्रतिचयोऽतिपूरणम् AṣṭāSaṁ. i. 108. 13 (1. 20)

अतिपूरित (ati-pūrita) *adj.* over-filled, overflowing हरः ··· कपाले दृष्टिमावेश्य त्रिनेत्रैश्च जनार्दनम् । अङ्गुल्या घटयन् प्राह कपालं चातिपूरितम् SkandP. v(1). 3. 21; यद्यपि चातिपूरितमित्युच्यते तथापि यजमानप्रवेशेन यथा तन्न बहिरुच्छलति तथा पूरणीयम् CaturCin. i. 219. 13.

अतिपूरुष (áti-pūruṣa) *m.* [AltGr. II. 1. 248] overlord, hero अश्वमेध्यमालभत क्रिवीणामतिपूरुषः पाञ्चालः परिवक्रायाम् SatBr. XIII. v. 4. 7;

adj. superhuman, extraordinary स चकार कर्माण्यतिपूरुषाणि । यानीश्वर: कीर्तय तानि मह्यम् BhāgP. iii. 5. 16.

अतिपूर्ण (ati-pūrṇa) *adj.* **i** completely full or filled विद्यादेकपथं रोगं नातिपूर्णचतुष्पदम् CaraS. i. 10. 16; अनेककोट्यब्दविखण्डितं तत्तस्यातिपूर्णं निचितं समन्तात् VarāṅgaC. 27. 20; विषाणे ते परिच्छिद्य संहरिष्यामि तद्बलम् । यद्बलेनातिपूर्णस्त्वं जातोऽसि बलदर्पित: DevīBhāP. v. 3. 21; नन्दोऽतिपूर्ण: सम्पत्त्या··· चक्रे महोत्सवम् ĀdiP. 15. 58; गम्भीरेणातिपूर्णेन तेजसा रञ्जितप्रभम्···मुनिमालोक्य YogVā. i. 6. 20; अतिपूर्णं स्फुटत्येव सत्यं लोकवचो यत: MalliC. 7. 87; महोदधिं नद्य इवातिपूर्णं तं संपद: सत्पुरुषं व्रजन्ति SūktiRa. 163. 148; सर्वजीवोत्तमेऽतिपूर्णे वायौ प्रविष्टौ···तौ TattvPrakā. 32B. 10 (*on* i. 2. 11); **ii** very wealthy, very rich कदर्यस्यातिपूर्णस्य पिटकस्येव पीडनम् Deśopa. 2. 5; सिद्धा शुष्कातिपूर्णा जयति भगवती कुट्टनी SamaMā. 6. 30; **iii** overfull with pus (boil etc.) Deśopa. 2. 5.

अतिपूर्णता (atipūrṇa-tā) *f.* heaviness शिरसोऽतिपूर्णता ··· उपद्रवा: ··· प्रतिश्यायपुर:सरा: स्मृता: RugVi. 58. 15.

अतिपूर्णाशय (atipūrṇāśaya) *adj.* with mind completely filled with satisfaction श्रुत्वाख्यानमिदं व्यास: षडर्णविधिमप्यथ । पुनरूचे विधातारं नातिपूर्णाशयो यथा GaṇeP. i. 19. 1.

अतिपूर्व (ati-pūrva) *adj.* [*f.* –ā] preceded by *ati* तिष्ठतेरतिपूर्वस्यायं शब्द: ManuBh. i. 251. 9 (*on* 3. 92); शक्करी सातिपूर्वा स्यात् VṛttaRa. 1. 19; युष्मदस्मदोरतिपूर्वयोर्गौणतायां सत्याम् Prasā. i. 254. 21.

अतिपूर्वक (atipūrva-ka) *adj.* preceded by *ati* अतिपूर्वकं सुरतं वदन्ति तत् S'ṛṅgāDī. 3. 35; सर्वदोषहरं पथ्यं मिलितं त्वतिपूर्वकम् (तक्रम्) BhojanKu. 146. 20.

अतिपूर्वकथक (atipūrva-kathaka) *adj.* narrating very old incidents स्थूलप्रावरणोऽतिपूर्वकथक: ··· वृद्धो गृहे ग्लायति S'āntiS'. 2. 29.

अतिपूर्वकाल (atipūrva-kāla) *m.* very ancient times सत्रेषु पुराणेष्वतिपूर्वकालेषु मृगपक्षिमांसेन पुरोडाशा बभूवु: ManvaVi. 600. 23 (*on* 5. 23)

अतिपूर्वबला (atipūrva-balā) *f.* *balā* preceded by *ati* (=atibalā) *Sida rhombifolio* पिबेत्तथा नागबलातिपूर्वबलातिचूर्णं पयसा प्रभाते KalyāKā. 6. 51.

अतिपूर्वरहस्या (atipūrva-rahasyā) *f.* *rahasyā* preceded by *ati*, (=ati-rahasyā) name of an Āvaraṇa śakti (spiritual power) अतिपूर्वरहस्यास्तु मध्यस्था: स्थूलविग्रहा: TantrRā. 5. 13.

अतिपूर्विका (atipūrvi-kā) *adj.* (*f.*) preceded by *ati* तदाष्टिरतिपूर्विका यतिरपि स्वभावाद्यथा NāṭyaS'ā. 15. 115 (=aty-aṣṭi)

अतिपॄ (ati-pṛ-) III. P. **i** to carry over, to take across, to rescue, to protect against स न: सिन्धुमिव नावयाति पर्षा स्वस्तये ṚV. i. 97. 8 = AV. iv. 33. 8; स न: पर्षदति दुर्गाणि विश्वा ṚV. i. 99. 1 = AV. vii. 63. 1; पिपर्तु नो अदिती राजपुत्राति द्वेषांसि ṚV. ii. 27. 7; अहमात्यपीपर: AV. xvii. 1. 25; तन्न: पर्षदति द्विष: TaiBr. III. vii. 8. 1; (*caus.*) द्विषो नो विश्वतोमुखाति नावेव पारय ṚV. i. 97. 7 = AV. iv. 33. 7; अग्ने त्वं पारया नव्यो अस्मान्स्वस्तिभिरति दुर्गाणि ṚV. i. 189. 2; TaiS. I. i. 14. 4; रध्रं पारयथात्यंह: ṚV. ii. 34. 15; एतानि हीन्द्रं रात्रेस्तमसो मृत्योर्बिभ्यतमत्यपारयन् AitBr. 16. 5 (447); यथा नावातिपारयेदेवमेवैभ्य एतदग्निर्हैव्यं नवमादह्नो दशममहर् अभ्यत्यपारयत् JaimiBr. 3. 269 (10); अहर्नो अत्यपीपरत् रात्रिर्नो अतिपारयत् MantrBr. ii. 5. 13; **ii** to fulfil, to carry out completely य: स्वां प्रतिज्ञां नातिपिपर्त्यसभ्य: BhāgP. iii. 18. 12.

अतिपृच्छत् (ati-pṛcchat) *adj.* inquiring too much नक्षत्रमतिपृच्छन्तं बालमर्थोऽतिवर्तते । अर्थो ह्यर्थस्य नक्षत्रं किं करिष्यन्ति तारका: ArthS'ā. iii. 71. 3 (9. 4); SūktiRa. 156. 23.

अतिपृथु (ati-pṛthu) *adj.* **i** very broad or thick नो संगते नातिपृथू न लम्बे शस्ते भ्रुवौ बालशशाङ्कवक्रे BṛSaṁ. 70. 8; **ii** which surpasses king Pṛthu (i. e. the story of his life) मुनिगीतमतिपृथु ··· हर्षचरितादभिन्नं प्रतिभाति हि मे पुराणमिदम् HarṣaC. 132. 4; **iii** very large प्रसन्नतां प्रापुरतिपृथुदृशां सहसा हृदयानि चाच्छमणिभाजनानि च NavaSāC. 15. 63.

अतिपृथुल (ati-pṛthula) *adj.* very broad आबद्धाहीन्द्रकाञ्चीगुणमतिपृथुलम् ··· तद्वो नि:श्रेयसे स्याज्जघनमतिघनं बालशीतांशुमौले: S'ivaKePāSt. 20; अतिपृथुलेन वक्ष:स्थलेन ग्रस्तसागरागस्त्यजठरस्य ख्यातिदु:खोनवक्षीणकुक्षिमंसलम् ···नाविकयुवानमद्राक्षम् TilaMañ. 125. 15; दृष्टवती च तस्यैकदेशे दृढतरग्रन्थिसंयतमतिपृथुलताडीपत्रसंचारितसुरेखाक्षरं लेखमेकम् (अहम्) TilaMañ. 338. 9; वेत्रपुटभेदनाधीशतिरुवेङ्कटनृपतिनन्दन: ··· अतिपृथुलभुजशिखरनिवेशितसङ्घटितरङ्गुलिकनलिकै: ··· हूणयोधै: ··· प्रविश्य हूणराजभवनम् ĀnandRa. 8. 0 (37)

अतिपृथुलकुचा (atipṛthula-kucā) *adj.* (*f.*) **i** having very large breasts ननु वनराजी राजति मन्त्रिन्नतिपृथुलकुचा मृदुलवलीका । दिव्यस्त्रीणामपि ततिरस्मिन्नतिपृथुलकुचा मृदुलवलीका VasaViKā. 12. 26; **ii** (atipṛthu-lakucā) having very big Lakuca trees, VasaViKā. 12. 26.

अतिपेलव (ati-pelava) *adj.* [*f.* –ā] **i** extremely feeble or soft अहो धिगस्तु भोगाङ्गम् ··· । विलीयते शरन्मेघविलायमतिपेलवम् MahāP. 8. 67; तस्मादयत्नत: स्थानमात्मनीत्यतिपेलवम् TaiUBhāVā. 8. 8(1); तस्मादिदमतिपेलवं दर्शनम् । तस्मादस्ति जाति: S'astrDī. 104. 9 (*on* 1. 1. 5); **ii** very delicate अतिपेलवमतिपरिमितवर्णं लघुतरमुदाहरति शठ: KāvyPra. 324. 1; पल्लवतुल्योऽतिपेलव: पाणि: SāhiDa. 508. 1; अङ्गान्यप्यतिपेलवा वहति या क्लेशेन तस्यामपि न्यस्त: शोकभर: Subhāṣi. 1092.

अतिपेशल (ati-peśala) *adj.* [*f.* –ā] **i** very pleasant (to hear), very sweet अगृह्णाच्चाकारत: प्रभृत्यग्रामतया तैस्तैरतिपेशलैरालापै: सावित्रीसरस्वत्योर्मनसी HarṣaC. 58. 8; वपुरि(?) हंसरवानतिपेशलान् स्वरवतोऽपि निशम्य शिखण्डिन: । स्मयम् ··· अत्यजन् VasaViKā. 6. 31; **ii** very attractive (to look at), very beautiful सर्वस्याप्रार्थितेऽपि प्रभवत्येवातिपेशलश्चक्षुष्यो जन: HarṣaC. 55. 11; न चिरादलङ्कृतिविशेषविहितरुचयोऽतिपेशला: । ··· कविपुङ्गवोक्तय इवाङ्गना बभु: NavaSāC. 15. 37; अतिपेशलैर्गमगणैस्तरङ्गिते यत्र सर्वदा क्षणदृष्टनष्टतनुभि: कुदृष्टिभिर्बुद्बुदायितम् ChandaśCū. 2. 320. 4 (comm. सदृशपाठसमूहै:); मम हि रागमिवातिकोमलावरुणयोस्तलयोरतिपेलशम् । चरणयोर्निहितौ करपल्लवौ मनसि चित्रममुत्र निषिञ्चत: SubhaDha. 2. 14; **iii** very pleasant (in taste), very delicious वद भद्र कुत: प्राप्तं मांसमेतत्त्वयेदृशम् । अनास्वादितपूर्वोऽयं रसो यस्यातिपेशल: PadmP.(Ra.) 22. 140; वटकाश्चातिपेशला: TriṣaS'aPuC. iii. 1. 44; **iv** very clever, very well-behaved, very shrewd परिहासस्मेरमुखीभिश्च नारीभि: कौतुकगृहे यद्यत्कार्यते जामाता तत्तत्सर्वमतिपेशलश्चकार HarṣaC. 207. 11; अतथ्यान्यपि तथ्यानि दर्शयन्त्यतिपेशला: PadmP. v. 18. 330; **v** (ironically) very good (i. e. not valid) पित्रादय एव यथोक्तक्रमेणाधिकारिण इत्याहु: । तदतिपेशलम् VīraMi. (Vyavahāra.) 519. 11.

अतिपेशलतर (atipeśala-tara) *adj.* very beautiful यस्यातिपेशलतरावधिकौ च कर्णौ ··· तस्याधिकं धनमतीव च दीर्घमायु: KalyāKā. 1. 42.

अतिपेशलता (atipeśala-tā) *f.* extreme delicacy सुकुमारतातिपेशलता परपुरुषदर्शनासहिष्णुतेति यावत् SāṁkhyaTaKau. 471. 8 (*on* 61)

अतिपोत्रवक्त्र (ati-potravaktra) *adj.* with mouth (uglier) than that of a hog or a plough अतिदात्रदंष्ट्रैरतिपोत्रवक्त्रै: पिशिताशनै: स्तोत्रबलैर्बलेषु ···नष्टेषु नृपश्चुकोप DvyāśraKā. 12. 48.

अतिपोषकता (atipoṣaka-tā) *f.* the state of being extremely nourishing इतरेषां (व्यभिचारिणाम्) मदादीनां नातिपोषकता भवेत् BhaktiRaSi. iii. 2. 38.

अतिपौरुष (ati-paurauṣa) *adj.* [*f.* –ī] **1** of great valour, superhuman यस्तु राजन् कृपो नाम···रुद्राणां तं गणाद्विद्धि संभूतमतिपौरुषम् MahāBhā. i. 61. 71; हत्वा ··· राक्षसांश्चातिपौरुषान् । प्रादा: पाञ्चालकन्यायै पद्मानि सुबहून्यपि MahāBhā. iv. 27*(3); शान्तं कुरु परिक्लेशं कृष्णाया: ··· हत्वा शत्रुं रणेऽश्लाघ्यं गर्जन्तमतिपौरुषम् MahāBhā. viii. 774*(2); उमोवाच मम प्राणा गमिष्यन्ति विना तं सर्वसुन्दरम् । अतिक्लेशेन संलब्धमतिपौरुषमीश्वरम् GaṇeP. ii. 91. 33; अहो बत प्रभावोऽयं राघवस्यातिपौरुष: । केन दृष्टं कदा नाम महाब्धौ सेतुबन्धनम् RāmāMañ. 310. 1; **2** with (each side measuring) more than one *puruṣa* (i. e. 120 *aṅgulas*) in length वेदिमष्टादशोत्सेधां हिरण्यस्यातिपौरुषीम् । रामस्य जामदग्न्यस्य प्रतिजग्राह काश्यप: MahāBhā. ii. App. 1. 21(471); *n.* great valour दुद्रुवुस्ते भयग्रस्ता दृष्ट्वा तस्यातिपौरुषम् KūrmaP. 244. 1 (1. 22)

अतिप्रकट (ati-prakaṭa) *adj.* [*f.* –ā] **i** very vivid तत्रापि दृश्यमाना नातिविवृता प्रकटा । पण्यसधर्मत्वादिति । अतिप्रकटस्यादुर्लभत्वादित्यर्थ: JayaMa. 307. 1 (*on* 6. 1); **ii** extremely manifest ईदृशरहस्यरूपापि पृथ्वीवदतिप्रकटेत्याह । मही LalitāSaBh. 150. 9 (*on* 190)

अतिप्रकटपाटव (atiprakaṭa-pāṭava) *adj.* whose skill is very obvious अवनीसाधनविधावतिप्रकटपाटवौ । मिथो धीविक्रमौ तस्य व्यभूष्येतां भुजाविव TriṣaS'aPuC. iv. 1. 163.

अतिप्रकटम् (ati-prakaṭam) *adv.* quite openly भट्टभयेन न खेलति भट्टसुत: किन्त्वतिप्रकटम् KuṭṭaMa. 80.

अतिप्रकटवीर्य (atiprakaṭa-vīrya) *adj.* whose valour is quite manifest अतिप्रकटवीर्यस्य लक्ष्मीनिलयवक्षस: । भवतां तस्य न ज्ञातं किं वा बलमनुत्तमम् PadmP.(Ra.) 56. 24.

अतिप्रकटित (ati-prakaṭita) *adj.* very vivid विनिवार्यमाणापि ··· अतिप्रकटितकरुणामयम् ··· पादयोर्निपत्य मामेवमभ्यर्थितवती YaśasCam. ii. 131. 1.

अतिप्रकर्षधी (atiprakarṣa-dhī) *f.* conviction of great supremacy एषु च यत्र यत्र येषामतिप्रकर्षधी: ते तं तमेवैवं वदन्ति यथाश्रुति इन्द्रं मित्रम् ··· इत्यादि ManvaVi. 1541. 4 (*on* 12. 123)

अतिप्रकाश् (ati-prakāś-) I. Ā. to shine brightly राजसत्काररहिता विद्या नातिप्रकाशते । प्रियोपभोगशून्येव नारी सर्वाङ्गसुन्दरी SūktiRa. 163. 59; (*pass.*) to be illumined संवित्सखीजयत्येका कापि शुद्धा सरस्वती । यया स्वतःप्रबुद्धानां प्रकाशोऽतिप्रकाश्यते Mānaso.i. 1. 2.

अतिप्रकाश (ati-prakāśa) *adj.* **i** very much shining, radiant or bright ततो हरीशः सहसा जगाम तं रावणं योद्धुमतिप्रकाशम् Rāmā. vi. 967*(2); विज्ञानकोशोऽयमतिप्रकाशः प्रकृष्टसांनिध्यवशात्परात्मनः । अतो भवत्येष उपाधिरस्य ViveCū. 190; हस्ते गलेऽथ धृतमेतदतिप्रकाशम् …मणिमावहन्ति YuktiKa. 133. 12; भूम्यर्कयोश्छिद्रमतिप्रकाशं शशाङ्कमर्कं त्वथ शीतरश्मिम् । तदार्धमासेन च त ंप्रयान्ति AdbhuSāg. 521. 16; लोकः कुञ्जमतिप्रकाशमकरोत्सानुं सतोयोद्गमम् RājTa.(Prā.) 723; **ii** very clear, manifest अतिप्रकाशोऽयमर्थो यथा निवृत्तस्वीकरणा जानकीति AnarghaRā. 4. 10(21); शाखाभिरष्टादशसंख्यकाभिरध्यायरूपाभिरतिप्रकाशः। …संकीर्तितो जातकपारिजातः JātaPā. 18. 174; यत् किञ्चिदत्र अनिरुक्तमतिप्रकाशं शास्त्रस्य लक्षणमिह स्वयमेव बुद्ध्या । विज्ञाय YuktiKa. 176. 5; **iii** very famous, well known नूनमार्ये सर्वस्वत्यागादतिप्रकाशादाशङ्कनीयचर्मरत्नलाभा तदनुयोगायाङ्गराजेन समाहूयसे DaśKuC. 55. 22.

अतिप्रकाशता (atiprakāśa-tā) *f.* **i** high renown उदन्वतः कुक्षिमिव प्रविश्य यां न भूभृतः प्रापुरतिप्रकाशताम् Kapphiṇā. 2. 9; **ii** great splendour, Kapphiṇā. 2. 9.

अतिप्रकाशत्व (atiprakāśa-tva) *n.* **i** the state of being very clear अत्र रोमाञ्चमुखसाचीकरणपर्यस्तविलोचनत्वादिविकारैश्चित्तव्यापारस्यातिप्रकाशत्वेन हेला RasāSu. 50. 2 (1. 194); **ii** the state of being excessively luminous ब्रह्मज्ञानेनातिप्रकाशत्वादातपत्वं विदुषः AṇuBh. 59. 11 (*on* i. 2. 11)

अतिप्रकाशम् (ati-prakāśam) *adv.* very openly शुकनासः … नातिप्रकाशमाबभाषे Kād. 67. 7.

अतिप्रकाशमान (ati-prakāśamāna) *adj.* very vivid कुसुम्भरागः स ज्ञेयो यश्चित्ते सज्जति क्षणात् । अतिप्रकाशमानोऽपि क्षणादेव विनश्यति RasāSu. 153. 21 (2. 118)

अतिप्रकुपित (ati-prakupita) *adj.* **A** extremely angry, extremely agitated (अहम्) तस्कर इति तैरभिहन्यमानोऽपि नातिप्रकुपितः क्रीडन्निव … अपतम् DaśKuC. 57. 11; **B** extremely disturbed or morbific अतिप्रकुपितं रक्तं तीक्ष्णैरन्नैर्विदाहिभिः । व्रणं विसापः कुरुते Mānaso. i. 19. 269.

अतिप्रकृष्ट (ati-prakṛṣṭa) *adj.* [*f.* -ā] **i** very long (road etc.) यदा पुरुषो दुर्बलो हि सन् … अतिप्रकृष्टं वाध्वानं द्रुतमभिपतति CaraS. ii. 6. 4 (1922 Ed.); **ii** extremely intense अतिप्रकृष्टाप्यरुणप्रभायां विलीयते साधु यथा तमिस्रा ViveCū. 320; **iii** being far away अतिप्रकृष्टादृष्टचरेन्धननिवहसंबन्धिना हुतवहविशेषेण महानसादौ धूमस्य वा किं संबन्धो दृष्टः ĪśvaSi.(Yā.) 78. 20; **iv** very excellent लोकार्थमष्टावपि मूर्तयोऽमूरतिप्रकृष्टा तु य एष मूर्तिः PṛthvīVi. 6. 73.

अतिप्रकृष्टदोषत्व (atiprakṛṣṭadoṣa-tva) *n.* the state of having a very great defect दुर्जनवचसां हालाहलेनातिप्रकृष्टदोषत्वादुपमानभावमप्यसहमानेन साम्यनिबन्धनं प्रतीपम् CitraMī. 11. 16.

अतिप्रकृष्टम् (ati-prakṛṣṭam) *adv.* very excessively शोणितादीन्धातूनतिप्रकृष्टं दूषयन्तः CaraS. vi. 19. 9 (1941 Ed.)

अतिप्रकृष्टशक्ति (atiprakṛṣṭa-śakti) *f.* very superior efficacy यैरष्टविधं तैरपि चैवमतिप्रकृष्टशक्तियुक्तानामशेषौषधगुणसारभूतानामष्टानामेव गुर्वादीनां वीर्यसंज्ञा AṣṭāSām. i. 93. 15 (1. 17)

अतिप्रकृष्टशील (atiprakṛṣṭa-śīla) *adj.* having a very excellent character कुमुदेष्वधिकं भान्ति पतिताश्चन्द्ररश्मयः । अतिप्रकृष्टशीलेषु कुलेष्विव समृद्धयः SūktiMu. 72. 22 = S'ārṅgaPa. 3643 = Subhāṣi. 1958.

अतिप्रकृष्टान्धकारा (atiprakṛṣṭāndhakārā) *f.* name of a hell (otherwise called Mahātamaḥprabhā) ये सदा प्राणिघातैः … यान्ति योगम् … तके मृत्युमाप्य प्रपद्यन्त्यधस्तान्महीरत्नप्रभाशर्करावालुकापङ्कधूमप्रभाध्वान्तभातिप्रकृष्टान्धकाराभिधास्ताश्च नित्यं महाध्वान्तयुक्ताः PadmP.(Ra.) 78. 62(25)

अतिप्रकोपित (ati-prakopita) *adj.* **i** very much aggravated प्रकोपणैः पित्तमतिप्रकोपितं करोति रक्तां पिडकां गुदाश्रिताम् RugVi. 46. 3; **ii** very much provoked अलमतिप्रकोपितैः श्रोत्रियद्विजन्मभिः NyāyKa. 181. 23.

अतिप्रगल्भ् (ati-pragalbh-) I. Ā. to be too bold, to vaunt or boast very much, to be insolent जनार्दन । विशृङ्खलः खल इव प्रह्वेष्वतिप्रगल्भसे RāmāMañ. 415. 13; कथमतिप्रगल्भसे PrasaRā. 1. 39(4); 4. 29(7); नीचेयमतिप्रगल्भते NaiṣC. 12. 51; सरमासूनुरतिप्रगल्भते PadyāTa. 199.

अतिप्रगल्भ (ati-pragalbha) *adj.* [*f.* -ā] **i** very bold, ready-witted extremely wise or mature, very confident (सः) अतिप्रगल्भैः कालविद्भिः … राजपुत्रैः सह रममाणः प्रथमे वयसि सुखमतिचिरमुवास Kād. 7. 6; अतिलघुपतनैरतिप्रगल्भैः … प्लवगभटैरयमावृतो विभाति RāmC. 6. 17; (कुष्ठम्) सन्मण्डलं किटिभमाहुरतिप्रगल्भाः KalyāKā. 11. 68; पाञ्चरात्राः … मुनिशिष्यवरैरतिप्रगल्भैः … प्रभग्नाः S'aṅkaDigVi.(Mā.) 15. 75; अतिप्रगल्भैरथ पारसीकैः …कर्ना(? र्णा)टरक्षाकरणे नितान्तं विचारवान्वेङ्कटदेवरायः Raghunā. 7. 43; एषा … सखीजनैः सार्धमतिप्रगल्भा … विभाति PadyaVe. 312; **ii** extremely arrogant किंतु राक्षसीवातिप्रगल्भा वृद्धा च LaṭaMe. 1. 16(8); **iii** very violent, tumultuous हरिकुञ्जराय । आवेदयन्तीव गजालिराभादालीयसंग्राममतिप्रगल्भम् Raghunā. 9. 63; **iv** very noble भवतः … अतिप्रगल्भम् । आकर्ण्य वाक्यममराः … शङ्के भवन्ति सविशेषरणाभिलाषाः HarVi. 11. 17.

अतिप्रगल्भभावा (atipragalbha-bhāvā) *adj.* (*f.*) very bold in nature or thought मुनिर्त्र्यर्थधेनुः । विनिर्ममे…स्त्रीभिः…अतिप्रगल्भभावाभिः …। …परितः परीतम् … नगरम् BrahmāṇḍP. ii. 27. 9.

अतिप्रगल्भम् (ati-pragalbham) *adv.* very courageously, very boldly सभाम् … समेत्य … वंशानुपूर्वीं वसुधासुधांशोरशंसतां वाग्भिरतिप्रगल्भम् Raghunā. 6. 1; भूमीरमणः … अगात्पटागारमतिप्रगल्भम् Raghunā. 9. 30.

अतिप्रगल्भललना (atipragalbha-lalanā) *f.* very bold or very clever woman अतिप्रगल्भललनाकटाक्षचपलाः श्रियः PadmP. iv. 95. 28.

अतिप्रगल्भवचस् (atipragalbha-vacas) *adj.* whose speech is excessively bold or effective राज्ञः परमसंमतामतिप्रगल्भवचसं वसंतसेनाभिधानां विलासिनीमवदम् TilaMañ. 279. 19.

अतिप्रगाढ (ati-pragāḍha) *adj.* very deep व्याकुर्वती रागमतिप्रगाढम् । …सन्ध्या वियद्भूरुहमारुरोह RāmC. 3. 68.

अतिप्रगाढपुट (atipragāḍha-puṭa) *adj.* having a very thick layer अहो महानुभाव गृहाण … अमुं कवचप्रायमतिप्रगाढपुटं वल्कलपटम् UdaySuKa. 112. 3.

अतिप्रगाढम् (ati-pragāḍham) *adv.* excessively, very intensely अतिप्रगाढमुदकपानात् … शरीरस्य श्लेष्मा … प्रकोपमापद्यते CaraS. ii. 3. 14 (1922 Ed.); पुरुषः … उत्सादनपदाघातने वातिप्रगाढमासेवते CaraS. ii. 6. 4 (1922 Ed.)

अतिप्रगुण (ati-praguṇa) *adj.* very much increased वायुर्न चातिप्रगुणो यस्य प्राणश्च हीयते Hastyāyur. 548. 24 (4. 1)

अतिप्रगे (ati-prage) *adv.* at early dawn, very early in the morning नातिप्रगे नातिसायम् (भुञ्जीत) ManuSm. 4. 62; ViṣṇuSm. 68. 48; नातिप्रगेऽतिसायं वा न नभोमध्यगे रवौ (व्रजेत्) AṣṭāSaṁ. i. 9. 19(1. 3); नातिसायं नातिप्रगे (हितमन्नमश्नीयात्) AṣṭāSaṁ. i. 65. 9 (1. 10); अतिप्रगे प्राह्णे प्रथमोदित एव सूर्ये न भुञ्जीत ManuBh. i. 353. 29 (*on* 4. 62); नातिप्रगे नातिप्रातः सङ्गवे (भुञ्जीत) ManvaVi. 486. 8 (*on* 4. 62); अतिप्रगे अचिरोदितसूर्ये VīraMi. (Āhnika.) 476. 2.

अतिप्रचण्ड (ati-pracaṇḍa) *adj.* [*f.* -ā] **i** very strong, very fierce, very furious, very formidable, very violent अतिप्रचण्डाद्द्विद्वेषात्पाण्डवानाम् … कृष्णामानिन्यिरे सभाम् MahāBhā. viii. 1. 6; तद्राक्षसानीकमतिप्रचण्डमालोक्य रामः उवाच Rāmā. vi. 47. 11; vi. 53. 48; (स जहार) यथानिलो मेघमतिप्रचण्डः Rāmā. vi. 55. 50; वातोद्धतश्चरति वह्निरतिप्रचण्डः BṛSaṁ. 19. 7; भार्याः … वायुनातिप्रचण्डेन लता इव प्रकम्पिताः VarāṅgaC. 15. 35; तद्योगिनीचक्रमतिप्रचण्डम् … चण्डीं पुरस्कृत्य SkandP. i(1). 25. 22; दृष्ट्वा तमायान्तमतिप्रचण्डमव्याकुलं षण्मुखमप्रमेयम् । दैत्यो बभाषे S'ivaP. ii(4). 9. 13 (203A. 14); **ii** very severe सः … अतिप्रचण्डनिजतपोऽनलज्वालाकलापपरिप्लोषमलिनितैः … रुद्राक्षमणिभिरभिवेष्टितम् … तापसमद्राक्षीत् NīlVi. 12. 3.

अतिप्रचर्च्यमान (ati-pracarcyamāna) *adj.* being highly debated or discussed तदेतदतिप्रचर्च्यमानमतिगहनं संपद्यत इत्यास्तां तावत् HetuBiṬ. 43. 4.

अतिप्रचिन्त्या (ati-pracintyā) *adj.* (*f.*) beyond consideration or highly dubious तथैकतो जातिरतिप्रचिन्त्या BhaviP. 81B. 34 (i. 41. 46)

अतिप्रचुर (ati-pracura) *adj.* **i** too much, excessive, abundant अतिप्रचुरसलिलपानादिभिः … पित्तं प्रकोपमुगच्छति Hastyāyur. 385. 1 (3. 5); प्रवेशकस्य पाठ्यं यत्तन्नातिप्रचुरं भवेत् BhāvPra.(S'ā.) 217. 5(7); नानाविधानसंयुक्तो नातिप्रचुरपद्यवान् । … अङ्क इति कीर्तितः SāhiDa. 275. 8; अतिप्रचुरं भूरि प्रभूतं बहुलं बहु ParyāRaMā. 532; **ii** very frequent, very common क्वचित्तु बाधकावसानस्तृतीयज्ञानोदयोऽपि नातिप्रचुरः Kāśi. i. 95. 15 (*on* 2. 60)

अतिप्रचुरकृतान्न (atipracura-kṛtānna) *n.* very abundant cooked food यत्तु कृतान्नं च कृतान्नेन परिवृत्य विभज्यत इत्याद्युक्तं बृहस्पतिना तदतिप्रचुरकृतान्नादेरपि तन्मात्रधनैर्विभागः कार्यः ManvaVi. 1227. 29 (*on* 9. 219)

अतिप्रचुरतरमूल्य (atipracuratara-mūlya) *adj.* whose cost is very high, very expensive अतिप्रचुरतरमूल्यं सक्त्वादि ManvaMu. 405. 12 (*on* 9. 219)

अतिप्रचुरोदकता (atipracurodaka-tā) *f.* great abundance of water अब्दुर्गमतिप्रचुरोदकतया दुर्गम् ManvaVi. 790. 4 (*on* 7. 70)

अतिप्रच्छ् (ati-pracch-) VI. P to question too much यद्वै ब्रह्मचारिन्प्राणमत्यप्रक्ष्यः । मूर्धा ते व्यपतिष्यत् TaiBr. III. x. 9. 5; अतिपृच्छसि गार्गि मातिप्राक्षीः S'atBr. XIV. vi. 6. 1; स होवाचानतिप्रश्न्यां वै मा देवतामत्यप्राक्षीः JaimiBr. 2. 77; 3. 101; मैव नोऽति प्राक्षीरिति JaimiUBr. i. 59. 13; मातिप्राक्षीः स्वं प्रश्नं न्यायप्रकारमतीत्य आगमेन प्रष्टव्यां देवताम् अनुमानेन मा प्राक्षीरित्यर्थः BrĀraUBh. 425. 9-10 (*on* iii. 6. 1); इति पृष्टोऽब्रवीद्गार्गि मातिप्राक्षीः कथंचन BrĀraUBhVā. iii. 6. 21; KośaKaTa. 2. 2222.

अतिप्रच्छन्न (ati-pracchanna) *adj.* very much concealed or disguised तत्समस्त्वहम् । निवसाम्यतिप्रच्छन्नो मरुतादतिभीतवत् SkandP. i(2). 13. 55.

अतिप्रच्यु (ati-pracyu-) I. Ā. to go beyond, pass by, exceed, slip from द्वादश देयाः ··· यदि द्वादशातिप्रच्यवेत चतुर्विंशति दद्यात् KāṭhS. 8. 8; तदिन्द्रं यशो आच्छैत् । तदेनं नाति प्राच्यवत । ··· नैनं यशोऽतिप्रच्यवते TaiBr. II. iii. 2. 5; सव्येनानुनिष्क्रामति । अत्रैव सप्तमं पदं विक्रमते । नाग्निमतिप्रच्यवते ĀgniveGS. 1. 6 (38. 21); (*caus*) to cause to slip इमां लोकान्प्रत्येत्य नातिप्रच्यवेत ··· तदादित्यमिमाँल्लोकानतिप्रच्यावयति S'atBr. VIII. viii. 2. 5.

अतिप्रजनन (ati-prajanana) *n.* excessive procreation अतिप्रजननाद्वापि तथाप्रजननेन वा ··· रक्तमाध्मापयेत्ततः BhelaS. 56. 1 (2. 3)

अतिप्रजविन् (ati-prajavin) *adj.* extremely swift, very rapid in movement क्षिप्रपातिनो दीर्घाध्वगानतिप्रजविनश्चोष्ट्रपालान्प्राहिणोत् HarṣaC. 223. 5.

अतिप्रजागर (ati-prajāgara) *m.* extreme wakefulness, excessive sleeplessness तालुकण्ठौष्ठशोषे च रोदितेऽतिप्रजागरे । ··· मद्यमाहुर्यथाऽमृतम् KāśyaS. 136B. 1; रूक्षशीताल्पलघ्वन्नव्यवायातिप्रजागरैः । ··· अनिलो बली करोति विविधान् व्याधीन् RugVi. 22. 1.

अतिप्रज्ञ (ati-prajña) *adj.* extremely wise नातिप्रज्ञोऽसि विप्रर्षे योऽस्मानं त्वक्तुमिच्छसि MahāBhā. v. 110. 20.

अतिप्रज्ञा (ati-prajñā) *f.* excessive wisdom अतिद्युतिरतिप्रज्ञा ··· प्रकृतेविक्रियापत्तिः षण्मासान्मृत्युलक्षणम् MahāBhā. xii. 305. 11; अतिप्रज्ञापि दोषाय मे जाता PrabaK. 55. 7.

अतिप्रज्ञाबल (ati-prajñābala) *n.* extra-ordinary power of wisdom अतिप्रज्ञाबलात्सोऽभूदभूमिः परवादिनाम् PrabhāC. 47. 19.

अतिप्रज्वल् (ati-prajval-) I. P. to blaze exceedingly क्रोधेनाभिप्रजज्वाल (v. l. °नातिप्रजज्वाल) दिधक्षन्निव पावकः MahāBhā. vi. 90. 6.

अतिप्रणत (ati-praṇata) *adj.* very humble, modest अच्युतोऽप्यतिप्रणतात्तस्मादग्राह्यमपि तन्मणिरत्नम् ···जग्राह ViṣṇuP. iv. 13. 57; प्रह्वोऽतिप्रणतस्तस्मै प्राञ्जलिर्वाक्यमब्रवीत् BrahmāṇḍP. ii. 73. 1; [अतिप्रणतः is given as a meaning of प्राध्व: AnekāK. 861]

अतिप्रणम्यमान (ati-praṇamyamāna) *adj.* being bowed very much कथमप्युत्क्षिपति स्म पादयुग्मम् । ··· सुत्रेव भाविवध्वा प्रतिविन्यासमतिप्रणम्यमानम् PṛthviVi. 7. 38.

अतिप्रणय (ati-praṇaya) *m.* **i** intense love, affection, kindness or confidence न चातिप्रणयः कार्यः कर्तव्योऽप्रणयश्च ते Rāmā. iv. 22. 23; न च ताभिः (स्त्रीभिः) संव्यवहारमतिप्रणयं वा कुर्यात् KāśyaS. 60B. 1; महानुभावामेनामामन्त्रये वत्स इत्यतिप्रणयः HarṣaC. 324. 18; अतिप्रणयाच्च यद्विकृतवचने मास्मिन् क्रोधश्चिरं क्रियतां त्वया VeṇiSaṁ. 5. 353; भक्त्यातिप्रणयस्यापि चञ्चलत्वान्मनो यदि । ··· कुरु मद्रूपिणीं तनुम् BhaviP. 111A. 16 (i. 62. 23); किं त्वतिप्रणयादेतन्मयोक्तमसमञ्जसम् KathāSaSāg. iii. 3. 51; विहर त्वमतिप्रणयं स्वजने प्रणयम(? म्न)यि ··· कलये:···करुणाम् StavMā. 239. 6; **ii** carrying forward ततश्चैवातिप्रणयः GobhiGS. iv. 4. 6; ततः दक्षिणाग्नेः सकाशात् अतिप्रणयः अतिप्रणयनम् VīraMi. (Saṁskāra.) 907. 23.

अतिप्रणयकोपा (atipraṇaya-kopā) *adj.* (*f.*) angry due to excessive love (किमु) अग्रतः पलायमानं तमतिप्रणयकोपा···अनुसरन्ती कुत्र चिरंजगाम UdaySuKa. 106. 12.

अतिप्रणयन (ati-praṇayana) *adj.* to be carried forward अथेध्मयोरतिप्रणयनादादायाध्वर्युः स्वमिध्ममपक्रम्यैव तिष्ठति BaudhS'S. iii. 228. 8; पात्नीशालोऽग्निः केषाञ्चिद्गार्हपत्यादतिप्रणयनो भवति LāṭyāS'S. ii. 2. 22 (comm.); *n.* excessive use हरितकातिप्रणयनया(? यना)त् ··· मारुतेन प्रकोपमापद्यते CaraS. ii. 3. 10 (1941 Ed.)

अतिप्रणयपीडित (atipraṇaya-pīḍita) *adj.* overwhelmed with excessive affection मित्रं वा बन्धुं वा नैवातिप्रणयपीडितं कुर्यात् PañcT. 4. 11 (379. 12) = Subhāṣi. 2893.

अतिप्रणयभर (atipraṇaya-bhara) *m.* abundance of extreme affection पथिषु च ··· अतिप्रणयभरहृदयः कार्पण्यात्स्कन्धेनोद्वहति BhāgP. v. 8. 13.

अतिप्रणयसंयुता (atipraṇaya-saṁyutā) *adj.* (*f.*) endowed with intense love मामुवाच तथारूपामतिप्रणयसंयुता ĀdiP. 13. 45.

अतिप्रणयिन् (ati-praṇayin) *adj.* extremely affectionate नृपतिरनुययौ वने विहङ्गं नृपतिम् अभिप्रणयी (v. l. अतिप्रणयी) रमाङ्गदोऽपि NavaSāC. 3. 43.

अतिप्रणश् (ati-praṇaś-) IV. P. to be entirely deprived of, to lose नेदिमांल्लोकानतिप्रणश्यानीत्यूर्ध्वमेवाग्निमुद्गृह्णाति S'atBr. VI. vii. 2. 16; स्वर्गं लोकमतिप्रणश्येत् S'atBr. VI. vii. 4. 11.

अतिप्रणी (ati-praṇī-) I. P. to bring or carry forward इध्ममेवातिप्रणयेयुरिति शालीकः BaudhS'S. iii. 75. 16; वैश्वकर्मणान्तानामुत्तरवेद्यामतिप्रणयेद्यथा वरुणप्रघासेषु MānS'S. 47. 9; तत्र द्वावग्नी अतिप्रणयन्ति LāṭyāS'S. v. 4. 12; x. 11. 11 = DrāhyS'S. xiii. 4. 6; तत एवातिप्रणयेत् DrāhyGS. iii. 5. 35.

अतिप्रणीत (ati-praṇīta) *adj.* **A** brought forward or led beyond अतिप्रणीते वा जुहुयात् ĀpaS'S. i. 10. 19; ĀśvaS'S. I. ii. 7. 15; अर्वागतिप्रणीतात् (अग्नेः) स्फ्येन लेखामुल्लिखेत् ĀśvaS'S. I. ii. 6. 9; होताग्रेणातिप्रणीतं परिक्रम्योपविशति MānS'S. 48. 5; अतिप्रणीते तूष्णीं दण्डमन्ववदधाति MānS'S. 133. 11; नातिप्रणीतेषु प्रणीता स्यात् अन्यत्र वचनात् MānS'S. 57. 8; अतिप्रणीतस्यार्धं व्रजति GobhiGS. iii. 7. 11; अतिप्रणीतादनतिप्रणीतस्यार्धं गत्वा DrāhyGS. iii. 2. 6; अतिप्रणीतेऽग्नावप्सु वा तान् क्षिपेद्य LaghvāśvāSm. 23. 84; अतिप्रणीतस्य रक्षोहननार्थत्वमेव विज्ञायते SaṁkarKāBh. 21. 8 (*on* i. 2. 24); व्यतिषङ्गपक्षे अतिप्रणीतेऽयं होमोऽन्यथा मुख्ये NirṇaSi. 312. 18; **B** highly expanded अतिप्रणीतो विस्तारितो रश्मिस्तेजः BhārArthaPra. *on* MahāBhā. v. 75. 14.

अतिप्रणीतचर्या (atipraṇīta-caryā) *f.* performance of (Agnipraṇayana or arrangement of fires) which is brought forward अतिप्रणीतचर्यायां च वैगुण्यं दर्शपूर्णमासयोः ĀśvaS'S. II. vi. 4. 14.

अतिप्रणीतबुद्धि (atipraṇīta-buddhi) *adj.* who has carried too far his intellect नातिप्रणीतरश्मिः (v. l. नातिप्रणीतबुद्धिः) स्यात्तथा भवति पर्यये MahāBhā. v. 75. 14.

अतिप्रणीतरश्मि (atipraṇīta-raśmi) *adj.* who has over-stretched his means (*lit.* string or rope) नातिप्रणीतरश्मिः स्यात्तथा भवति पर्यये MahāBhā. v. 75. 14 (BhārArthaPra. अतिप्रणीतो विस्तारितो रश्मिस्तेजो यस्य, विग्रहमात्रेच्छुरिति यावत्)

अतिप्रणीतसङ्कल्प (atipraṇīta-saṅkalpa) *adj.* having an intensely formed desire तस्य चातिप्रणीतसङ्कल्पस्य मैथुनमापद्यमानस्य न शुक्रं प्रवर्ततेऽतिमात्रोपक्षीणरेतस्त्वात् CaraS. ii. 6. 8 (1941 Ed.)

अतिप्रणीतसमीप (atipraṇīta-samīpa) *adj.* [Loc.] near (the fire) that is brought forward साग्निरतिप्रणीतसमीपे NirṇaSi. 320. 28; अतिप्रणीतसमीपे तत्रैवास्तीर्णबर्हिषीत्यर्थः BālamBha. i. 527. 11 (*on* 1. 242)

अतिप्रणीताग्नि (atipraṇītāgni) *m.* fire that has been brought forward अतिप्रणीताग्नेरौपासनाग्नेर्वोपस्थानम् SaṅkarKā. xiii. 2. 15; अतिप्रणीताग्नौ विहितस्याहवनीयानधिकरणत्वेऽपि प्राधान्यदर्शनात् NyāySu. (So.) 780. 19 (*on* ii. 2. 16)

अतिप्रणीय (ati-praṇīya) *ger.* having brought forward, having led beyond अप्रयित्वातिप्रणीय जुहुयात् ĀśvaS'S. I. ii. 7. 19; दक्षिणाग्नेरग्निमतिप्रणीय पित्र्या ĀśvaS'S. I. ii. 19. 1; श्रावण्यां पौर्णमास्यां गृह्यादग्निमतिप्रणीय प्रतिदिशमुपलिम्पेदधिके प्रक्रमे DrāhyGS. iii. 2. 1.

अतिप्रणुद्य (ati-praṇudya) *ger.* having pressed, having pleaded strongly इत्यसकृदतिप्रणुद्य ··· स एव तपस्वी तस्करत्वेनार्थपतिरग्राह्यत DaśKuC. 56. 12.

अतिप्रतन् (ati-pratan-) VIII. U. to elaborate excessively, to discuss in detail संज्ञाभिरेव विस्पष्टा ततो नातिप्रतन्यते MahāP. 3. 40; स तु शोभान्तराभावादिह नातिप्रतन्यते VakroJī. 86. 14; तत्स्वरूपमतोऽस्माभिरिह नातिप्रतन्यते VyaktiVi. 32. 19.

अतिप्रतप् (ati-pratap-) I. Ā. to give forth excessive heat, to burn excessively रजः···अतिप्रतेपे दहनाहतैरिव S'ivLī. 16. 36.

अतिप्रतप्त (ati-pratapta) *adj.* excessively hot, burning intensely अतिप्रतप्ताः प्रतिपन्थिदुर्गप्राकारपाषाणचयाः करालाः Rāṣṭrau. 20. 74.

अतिप्रतान्तकाल (atipratānta-kāla) *adj.* remaining for a very long time अतिप्रतान्तकालमनुदीरितमवशेषितमौषधं वमनीयम् KāśyaS. 157A. 22.

अतिप्रताप (ati-pratāpa) *m.* excessive heat [nt.], *adj.* possessing great valour यः ··· गौडेश्वरप्रतिशरीरमतिप्रतापः केदाररायमवगच्छति दारतुल्यम् DaṇḍaVi. 1. 16.

अतिप्रतापिनी (ati-pratāpinī) *adj.* (*f.*) possessing great valour रणे विजित्य तान् सर्वान् सिंहिकातिप्रतापिनी ··· ननाम PadmP. (Ra.) 22. 116.

अतिप्रताम्यत् (ati-pratāmyat) *adj.* with great distress, with great difficulty योऽतिप्रताम्यन् श्वसिति प्रसक्तं भिन्नस्वरः ···। ज्ञेयः स रोगः श्वसनात् स्वरघ्नः SuśruS. ii. 16. 61.

अतिप्रतिपन्न (ati-pratipanna) *adj.* knowing thoroughly, seeking refuge or asylum मामतिप्रतिपन्नं च अन्तस्थो वेत्ति यद्यपि । कृतार्थमतिभक्तत्वात् अमुं मन्ये तदा गुरुम् PauṣkS. 30. 199.

अतिप्रतिपादन (ati-pratipādana) *n.* complete offering पादक्रमेणातिप्रतिपादनमर्घ्यदानम् CaturCin. ii(1). 631. 2.

अतिप्रतिलोम (ati-pratiloma) *adj.* completely opposed, quite contrary अश्रौषमिन्द्रादरिणीर्गिरस्ते सतीव्रतातिप्रतिलोमतीव्रा: NaiṣC. 6. 95.

अतिप्रतिलोमतस् (atipratiloma-tas) *adv.* due to very adverse or disagreeable attitude नात्यन्तमानुलोम्येन न चातिप्रतिलोमत: । सिद्धिं गच्छन्ति कन्यासु RatiRaha. 11. 19.

अतिप्रतिहत (ati-pratihata) *adj.* exceedingly opposed or obstructed अतिप्रतिहतपरस्परगतिमतिकुण्डलिनम् (वातं विद्यात्) CaraS. iii. 3. 7.

अतिप्रतिहन् (ati-pratihan-) II. P. (pass.) to be destroyed, to be lost इमेऽपि कर्मक्षयकारकव्रता विचिन्वतेऽतिप्रतिहन्यते रुचि: SubhāRaSaṁ. 177.

अतिप्रतीक्ष्यता (atipratīkṣya-tā) *f.* the state of being respected or regarded highly कृतार्थोऽसि नमस्तुभ्यं प्राप्तायातिप्रतीक्ष्यताम् PadmP.(Ra.) 38. 23.

अतिप्रतीत (ati-pratīta) *adj.* [*f.* -ā] **A** excessively pleased or glad मनसाभिप्रतीतेन (v. l. अतिप्रतीतेन) कन्यामिदमुवाच ह MahāBhā. v. 117. 20; **B** excessively pleasing or cheerful एषा नातिप्रतीता मे पुण्योद्याना यशस्विनी । अयोध्या दृश्यते दूरात् Rāmā. ii. 65. 15.

अतिप्रत्यक्षरूप (atipratyakṣa-rūpa) *adj.* possessing a form which is beyond perception अतिप्रत्यक्षरूपाय ध्यानसाध्याय योगिनाम् । …नम: BrahmVaiP. iv. 21. 211.

अतिप्रत्यक्षा (ati-pratyakṣā) *adj.* (*f.*) beyond perception सा दुर्गा …कृपारूपातिप्रत्यक्षा योषितामिष्टदेवता BrahmVaiP. ii. 44. 6.

अतिप्रत्यय (ati-pratyaya) *m.* (Gr.) the suffix *ati* महि वृद्धौ । मंहते । महान् । वर्तमाने पृषद्बृहन्महदिति (Uṇā. 2. 22) अतिप्रत्यय: DhātuPra. 1. 635 (47. 12); अतिप्रत्ययान्ता इति शेष: LaS'abdeS'e. i. 344. 8.

अतिप्रत्यायित (ati-pratyāyita) *adj.* greatly trusted, very confidant (हृद्य: स्वाप्तैरधिष्ठित: कोष:) स्वाप्तैरतिप्रत्यायितैरधिष्ठितो रक्षित: RājNiRa. 31. 7.

अतिप्रत्यासङ्ग (ati-pratyāsaṅga) *m.* extreme proximity, excessive nearness पुराकल्पे दूरोत्पतनखुरलीकेलिजनितादतिप्रत्यासङ्गात्परितपति गात्राणि तपने MahāvīC. 5. 5.

अतिप्रत्यासत्तितृष्णा (atipratyāsatti-tṛṣṇā) *f.* desire for extreme nearness यत्तावदिदमतिप्रत्यासत्तितृष्णयैकत्वं प्रमाणफलयो: । तदनन्तरमेव निराकरिष्याम: Kāśi. i. 236. 9 (*on* 4. 73)

अतिप्रत्यासन्न (ati-pratyāsanna) *adj.* [*f.* -ā] very close, very proximate सत्यपि सम्बन्धत्वे यो नातिप्रत्यासन्न: स गृह्यते ManuBh. ii. 106. 17 (*on* 8. 70); न पुनर्यजि: साध्यरूप: …कर्मतामतिप्रत्यासन्नामनारुह्य दूरवर्तिनीं करणतामधिरोढुमर्हति NyāyMañ. i. 310. 20.

अतिप्रत्यूषस् (ati-pratyūṣas) *n.* very early day-break नातिप्रत्यूषसि (अध्वानं प्रपद्येत) ViṣṇuSm. 63. 6.

अतिप्रथ् (ati-prath-) I. Ā. to spread abroad exceedingly, to become very well known [DBHS]

अतिप्रथन (ati-prathana) *n.* spreading out very much एतावदेव नानाप्रथने चातिप्रथने च BaudhS'S. iii. 325. 7.

अतिप्रथित (ati-prathita) *adj.* [*f.* -ā] very well-known, widely known गीतवाद्यं लोके चेष्टास्वतिप्रथितम् AbhinBhā. i. 38. 9 (*on* 1. 107); अनुममार न मार कथं नु सा रतिरतिप्रथितापि पतिव्रता NaiṣC. 4. 79.

अतिप्रदग्ध (ati-pradagdha) *adj.* very much burnt नीलातिकृष्णमतिपित्तमतिप्रदग्धम् … मनुजमाशु निहन्ति वान्तम् KalyāKā. 9. 17.

अतिप्रदा (ati-pradā-) I. P. to give over (something else) तद् विष्णवेऽति प्रायच्छत् TaiS. II. iv. 12. 7; TaiBr. I. i. 3. 9 (comm. हिरण्यमतीत्य अन्यत्किञ्चिद्ददाति); एकैकमाधायाधाय रजतं द्वेष्यायातिप्रयच्छति BhārS'S. v. 5. 13 cf. **यम्**.

अतिप्रदान (ati-pradāna) *n.* excessive gift सुहृन्मनस्तापकरीमवस्थामिमामुपेतस्त्वमतिप्रदानै: JātaMā. 24. 9 (5. 8); अतिप्रदाननिर्बन्ध: … छिनत्त्यन्यार्थिवैकल्याद्धर्मवृक्षं क्रियाफलम् DaśāvaC. 5. 149.

अतिप्रदानार्थ (atipradānārtha) *adj.* which is intended for being given as a gift सौवर्णा उपासनार्था राजता अतिप्रदानार्था: BaudhS'S. iii. 198. 14.

अतिप्रदाय (ati-pradāya) *ger.* having completely handed over राजानं हरेत्युक्त: पूर्वेणाग्निमेकस्मा अतिप्रदाय तान् प्रसव्यं परीत्य … अनुगच्छेत् LāṭyāS'S. v. 9. 5.

अतिप्रदीप्त (ati-pradīpta) *adj.* **i** highly stimulated or aggravated तदिदमद्य भृशसंभृतं मे चिरार्जितं रोषमतिप्रदीप्तम् MahāBhā. viii. App. I. 34; अतिप्रदीप्तैर्भुजगैर्भोक्तुमन्नं न शक्यते VāyuP. ii. 15. 90 = BrahmāṇḍP. ii. 13. 91; **ii** very sharp or brilliant न ह्येताभ्यामतिप्रदीप्तप्रज्ञामेधाभ्यामस्मदादे: सहाध्ययनयोगोऽस्ति UttaRāC. 2. 3 (17)

अतिप्रधान (ati-pradhāna) *adj.* very prominent, of a very high order कैलासकम्पोऽपि समेत्य लङ्कां विधाय सन्मानमतिप्रधानम् । महाप्रभां चन्द्रनखातनूजां ददौ समीरप्रभवाय कन्याम् PadmP.(Ra.) 19. 102.

अतिप्रधावन (ati-pradhāvana) *n.* the act of driving too much, over-working मृत्युस्थानानि चैतानि गवामतिप्रधावनम् BṛParāSm. 8. 134.

अतिप्रधावितदोष (atipradhāvita-doṣa) *adj.* in which defects are excessively accumulated अधोभागिकेऽपि च सावशेषौषधमतिप्रधावितदोषमतिबलम् … एवं वामयेत् SuśruS. iv. 34. 6.

अतिप्रनष्टसेतु (atipranaṣṭa-setu) *adj.* the landmark on which is completely lost अतिप्रनष्टसेतूनि … रजतस्वर्णरत्नादिधनान्याहृत्य सर्वत: TriṣaS'aPuC. i. 3. 20.

अतिप्रनृत्यत् (ati-pranṛtyat) *adj.* engaged in excessive dancing तूर्णं चातिप्रनृत्यत: । … विक्षते वक्षसि व्याधिर्बलवान् समुदीर्यते CaraS. vi. 11. 7 (1941 Ed.)

अतिप्रपञ्च (ati-prapañca) *m.* too much elaboration, excessive expo-*ition* अलमतिप्रपञ्चेन Bṛha. 189. 4 (*on* i. 1. 5); AvantiKa. 216. 9; प्राधान्याच्चायमुपनिषदामतिप्रपञ्च: BālaKrī. ii. 68. 19 (*on* 190–191); अत: क्वाचित्कमेवेदमाशौचसंकोचविधानं न पुन: सर्वसंव्यवहारादिगोचरमित्यलमतिप्रपञ्चेन Mitā. 351. 18 (*on* 3. 28); हेतुफलविषयव्यापारावान्तरभेदादीनतिप्रपञ्चेनोक्त्वा NyāyPari. 336. 7; अलमतिप्रपञ्चेन SarvaDaSaṁ. 5. 241; 7. 151; 12. 212; नातिप्रपञ्चधृतभूषणचारुवेषौ … स युवां ददर्श Nāray. x. 72. 9.

अतिप्रपञ्चित (ati-prapañcita) *adj.* excessively expanded, very large दत्त्वा काञ्चनरत्नदानमतुलं धर्मैकरागान् तथा येनैश्वर्यमतिप्रपञ्चितमहो पुण्यद्विजा: प्रापिता: EI. xiv. 302. 41.

अतिप्रपञ्चिन् (ati-prapañcin) *adj.* indulging in too much elaboration (of arguments) एवं सति स्वयूथ्या न: केचिन्नातिप्रपञ्चिन: S'lokaVār. 5(5). 44 (417. 9)

अतिप्रपञ्चेतिवृत्त (atiprapañcetivṛtta) *adj.* having very elaborate narration (अयं गर्भाङ्क ईरित:) नातिप्रपञ्चेतिवृत्तस्वाधाराङ्कान्तशोभित: RasāSu. 284. 21 (3. 209)

अतिप्रपञ्चयमाना (ati-prapañcyamānā) *adj.* (*f.*) being greatly elaborated अत एवातिप्रपञ्चयमानेयमतिप्रसङ्गाय भविष्यतीति संक्षिप्यैव व्याख्याता Parimala an Mahārthamāñjarī. 1 (9. 13)

अतिप्रपीडित (ati-prapīḍita) *adj.* very much pressed अतिप्रपीडित: कोष्ठे तिष्ठत्यायाति वा गलम् AṣṭāSaṁ. ii. 165. 7 (5. 7); अतिप्रपीडितो बस्ति: प्रक्रम्यामाशयं तत: । वातेरितो नासिकाभ्यां मुखतो वा प्रवर्तते SiddhYo. 6. 22.

अतिप्रपीडयमान (ati-prapīḍyamāna) *adj.* being very much troubled or harassed वातपित्तश्लेष्माणोऽभ्यवहारेणातिमात्रेणातिप्रपीड्यमाना: सर्वे युगपत् … प्रकोपमापद्यन्ते CaraS. iii. 2. 7 (1941 Ed.)

अतिप्रबन्ध (ati-prabandha) *m.* **1** complete continuity अतिप्रबन्धप्रहितास्त्रवृष्टिभिस्तम् … शशाक निर्वापयितुं न वासव: RaghuVa. 3. 58; अतिप्रबन्धादिषुजालवृष्टे: … आसीत्तमिस्रा जयदा रिपूणाम् NīlaVi. 20. 16; अतिप्रबन्धाचरिताध्वराणां मनीषिणां मन्त्रविधोपहूतम् । वज्राङ्कितं वासवमेक्ष्य भीत्या नगा: स्थितिं नैव भजन्ति यस्याम् Raghunā. 1. 71; **2** name of a particular mode of binding an elephant सोऽतिप्रबन्धो विज्ञेयो बन्धो यो दुष्प्रमादत: Hastyāyur. 429. 7 (3. 8)

अतिप्रबन्धतस् (atiprabandha-tas) *adv.* due to excessive continuity or flow तापितासु नयनाग्निहेतिभिस्तज्जटासु पतितास्तदूर्मय: । अम्भसां पुनरतिप्रबन्धत: क्लेदमात्रमदिशन् कथंचन Gaṅgāva. 5. 62.

अतिप्रबल (ati-prabala) *adj.* [*f.* -ā] **i** very strong, very powerful तस्य तैरभवद् युद्धमतिप्रबलदण्डिन: MārkP. 81. 5; SkandP. i(1). 17. 217; अतिप्रबल: संस्कार: स्पर्शवद्द्रव्यसंयोगेनापि … न विनश्यति NyāyKa. 300. 6; तस्य तैरभवद् युद्धमतिप्रबलदारुणै:…क्षेपणै: परिघायुधै: BhaviP. 453A. 25 (iii(2). 26. 3); तथा सत्यप्यायु:कर्मादौ अतिप्रबलाशुभकर्मवशात् … प्राणवियोग:; DīpKa. 89. 27 (*on* 3. 165); **ii** of great intensity अतिप्रबलपिपासावसन्नानि गन्तुमल्पमपि मे नालमङ्गकानि Kād. 36. 5; अतिप्रबलया … प्रसववेदनया जननी मे लोकान्तरमगात् Kād. 25. 5; ततोऽस्यातिप्रबलमोहज्वरपरीतसर्वगात्रस्य … परिषेकं कुर्यात् AṣṭāSaṁ. ii. 170. 4 (6. 1); नयनरश्मय: … प्रतिमुखै: सूर्यरश्मिभिरतिप्रबलवेगैराहता:…रूपज्ञानम् …जनयन्ति NyāyKa. 179. 10; **iii** extremely violent अतिप्रबलो वह्निर्दहत्यार्द्रानपि द्रुमान् AtriSm. 3. 2; मार्गे वृष्टिरतिप्रबला समभूत् Siṁha-

Dvā. 69. 3(13); स्नावान्विताः स्फोटगणाः सुतीव्राः सन्धिष्वतिप्रबलमांसगतोरुकुष्ठे KalyāKā. 11. 73; **iv** with great amount of, in great quantity शोकादतिप्रबलशोणितमिश्रमुष्णम् … मलमुत्सृजन्तम् … कुक्ष्यामयः क्षपयति KalyāKā. 9. 88.

अतिप्रबलता (atiprabala–tā) *f.* the state of being very powerful यत्रातिप्रबलतया विवक्ष्यते पूर्वमेव जन्यस्य । प्रादुर्भावः … तद्भवेत् पूर्वम् Kāvyālaṅ. (Ru.) 9. 3; यत्रातिप्रबलतया गुणः …अर्थान्तरं पिदध्यात् …तत्पिहितम् Kāvyālaṅ. (Ru.) 9. 50; अनिलोद्धतैः … अतिप्रबलतयाकालनीहारवृष्टिमिव दर्शयद्भिः कुसुमधूलिपटलैर्धवलीकृतविग्रहः (समरकेतुः) … कल्पतरुखण्डमपश्यत् TilaMañ. 213. 13.

अतिप्रबुद्ध (ati–prabuddha) *adj.* very wise, very learned को वा करिष्यत्यपरः प्रबन्धमतिप्रबुद्धोऽप्यपशब्दशून्यम् Surath. 1. 63.

अतिप्रभ (ati–prabha) *adj.* [*f.* –ā] having great splendour स गत्वाचष्ट तेभ्यश्च सारस्वतमतिप्रभम् । स्वाध्यायममरप्रख्यं कुर्वाणं विजने जने MahāBhā. ix. 50. 42; अतिप्रभाभिः … स्त्रीभिः … परितः परीतम् । … नगरम् BrahmāṇḍP. ii. 27. 4; अपश्यद्धृदये दीपं दीर्घाकारमतिप्रभम् PadmP. iv. 101. 220; दृष्ट्वा च तमतिप्रभम् । सहस्राक्षो मुमोचाशु तस्मै वज्रम् BṛKathāMañ. iii. 1. 360; सतीमतिप्रभां प्रणमन्तो हरयः स्वयंप्रभाम् । … ययुरम्बुवेष्टितम् Rāgh. 11. 77.

अतिप्रभाढ्य (atiprabhāḍhya) *adj.* endowed with great splendour अतिप्रभाढ्योऽयम् TilaMañ. 218. 21.

अतिप्रभात (ati–prabhāta) *n.* early morning भस्मपूर्णो दिगम्बराः । अतिप्रभातसमये चित्रः पश्यामि सस्मितः BrahmVaiP. iv. 63. 19; एवं चानेनोक्ता …अतिप्रभातचन्द्रनिष्प्रभं वदनमुद्वहन्ती PādaTā. 3. 19.

अतिप्रभाव (ati–prabhāva) *adj.* **i** of great efficacy ततः प्रभृत्येतदतिप्रभावं तीर्थं महासिद्धिदम् BrahmP. 143. 17; **ii** very valiant, mighty अन्यो न जेष्यति भवन्तमतिप्रभावाद्रत्नेश्वरात् पुनरुदेष्यति चक्रवर्ती KathāSaSāg. v. 3. 282; *m.* great valour, KathāSaSāg. v. 3. 282.

अतिप्रभावत् (atiprabhā–va(n)t) *adj.* very lustrous, very bright तत्रातिप्रभावतां दृश्यानामतिमात्रं दर्शनमतियोगः CaraS. i. 11 37; एष किल … क्षीरोदेन … अतिप्रभावन्ति … मुक्ताफलान्यादाय स्वयं ग्रथितः TilaMañ. 43. 6.

अतिप्रभावती (atiprabhāvatī) *f.* name of a *surāṅganā* [nt.]

अतिप्रभावयुक्ता (atiprabhāva–yuktā) *adj.* (*f.*) endowed with great efficacy मोक्षदं मुनयः स्नानं गङ्गायां स्वर्गदं विदुः । अतिप्रभावयुक्तासि त्रैलोक्यस्यापि पावनी NīlaP. 312.

अतिप्रभु (ati–prabhu) *m.* superior or perfect master भूतभव्यभविष्याद्यैर्विभज्य जरयन् प्रजाः । अतिप्रभुरिति स्वैरं वर्तते … कालः S'ivaP. vii(1). 7. 4 (510A. 3)

अतिप्रभुता (atiprabhu–tā) *f.* great authoritativeness भ्रुकुटिरारचिता गतमग्रतो हृतमथाननमुक्तमसाधु वा । इयमतिप्रभुता क्रियते बलादकुपितोऽपि हि यत्कुपितो जनः SaraKaṇṭhā. 499. 6.

अतिप्रभूत (ati–prabhūta) *adj.* [*f.* –ā] **i** quite ample, profuse, very much, in excess आर्तवम् … पश्यन्ति … याः । अतिप्रभूतम् KāśyaS. 186A. 23; अन्नैरतिप्रभूतैश्च … इष्ट्वा PāraS. 16. 367; अतिप्रभूतेध्माहरणाच्च यस्येध्मवाह इति पिता द्वितीयं नाम चकार Kād. 21. 4; नातिप्रभूतप्रवृत्तगतागताप्रहतभुवम् … वनग्रामकं ददर्श HarṣaC. 304. 9; अतिप्रभूतैः । अतिवितत्तगुणैर्गणैरिवोग्रः प्लवगभटैरयमावृतो विभाति RāmC. 6. 17; (मणयः) केचिदाश्रितरोहणाद्रयः समन्तादात्मानमतिप्रभूतया मृदा प्रच्छाद्य तिरोबभूवुः UdaySuKa. 132. 4; हिरण्यादेरतिप्रभूतस्यापि … रक्षायाः सुकरत्वात् DaṇḍaVi. 275. 4; **ii** numerous, too many दक्षस्य प्रजापतेरतिप्रभूतानां कन्यकानां मध्ये द्वे सुते Kād. 136. 13; *n.* what is quite abundant शुचिर्भैक्षं कारुहस्तः …। अतिप्रभूतं बालं च वृद्धातुरविचेष्टितम् MārkP. 35. 14.

अतिप्रभूतकोश (atiprabhūta–kośa) *m.* very ample treasure सोऽपि तव प्रसादादतिप्रभूतकोशस्यश्च सहसैव तन्महदैश्वर्यमवाप्य MudrāRā. 3. 24 (26)

अतिप्रभूततरा (atiprabhūta–tarā) *adj.* (*f.*) more numerous एवम् अनेन प्रकारेण अवान्तरभेदगणनेऽतिप्रभूततरा गणना KāvyPra. 215. 4.

अतिप्रभूतता (atiprabhūta–tā) *f.* great abundance दशुरद्रिविघट्टनेषु ये (करिणः) पतितैर्मूर्धनि निर्झरैरिव । कलयन्तमतिप्रभूततां क्षतधाराजलदुर्दिनं मदम् VikraDeC. 15. 27.

अतिप्रमत्त (ati–pramatta) *adj.* [*f.* –ā] greately infatuated पितुः … अस्यातिप्रमत्तस्य राघवात्क्षयमिच्छसि RāmāMañ. 299. 18; (शूर्पणखा) अतिमत्तेति (v. l. अतिप्रमत्तेति) वक्तव्यम् PrasaRā. 5. 33 (10) (N. S. Ed. 1892)

अतिप्रमद (ati–pramada) *adj.* having great joy, feeling elated विरराज ततः सोऽतिप्रमदः …गिरिः S'ivaP. ii(3). 6. 4 (129A. 16); *m.* great joy, elation प्रियताविषयं हि वस्तु यत्क्षणनष्टं पुनरेति दृष्टताम् । तदतिप्रमदाय योषितां विरहानन्तरजेव संगतिः RasSa. 38.

अतिप्रमनस् (ati–pramanas) *adj.* very delighted पाञ्चालाश्च सवार्ष्णेयाः पाण्डवाश्च विशां पते । रामे द्वारवतीं याते नातिप्रमनसोऽभवन् MahāBhā. ix. 59. 27; नृपोऽपि नातिप्रमनाः प्रभाते तां मन्यमानः कुलदेवताज्ञाम् । यथायथं मातृगृहाणि गन्तुं कथंचिदन्तःपुरमादिदेश Surath. 2. 9.

अतिप्रमर्दित (ati–pramardita) *adj.* completely pounded, thoroughly powdered शिलागन्धकसिन्धूत्थरसैश्चातिप्रमर्दितैः । रीतिपत्राणि लेप्यानि RasPraSu. 4. 110.

अतिप्रमा (ati–pramā) *adj.* (*f.*) beyond measure, very vast कोऽलं व्योमाङ्गुलैर्मातुं मलः को मितयेऽम्बुधेः । अतिप्रमाश्चमूस्तस्य कोऽवधारयितुं क्षमः Kapphiṇā. 16. 76.

अतिप्रमाण (ati–pramāṇa) *adj.* [*f.* –ā] **i** very huge, gigantic, of unusual size स पथि गच्छन्नपश्यदृषभमतिप्रमाणं तमधिरूढं च पुरुषमतिप्रमाणमेव MahāBhā. i. 3. 101; गिरिं य इच्छेत तलेन भेत्तुं शिलोच्चयं श्वेतमतिप्रमाणम् तस्यैव पाणिः सनखो विशीर्येन्न चापि किंचित्स गिरेस्तु कुर्यात् MahāBhā. v. 47. 66; (तां दृष्ट्वा) अतिप्रमाणामायान्तीं रामो लक्ष्मणमब्रवीत् Rāmā. i. 678*; iv. 46. 13; अतिप्रमाणा बलिनः … महाद्रयः Rāmā. v. 54. 23; ह्रस्वान्यतिप्रमाणानि स्थावराणि चराणि च । … आहुर्वेदविदो विप्रा यं यज्ञं शाश्वतं विभुम् HariVaṁ. 31. 8; BrahmP. 213. 17; PadmP. v. 16. 45; अतिप्रमाणशरीराः प्राणहरकर्माणो हस्तिनः ArthS'ā. i. 118. 4 (2. 2); सर्वस्य धातारमचिन्त्यरूपमणोरणीयांसमतिप्रमाणम् ViṣṇuP. iv. 2. 126; तस्या ह्यतिप्रमाणानि स्वादूनि च मृदूनि च । फलानि VāyuP. i. 35. 28; अतिप्रमाणाभिश्च … सिंहीभिरिव कौलेयककुटुम्बिनीभिरनुगम्यमानम् (शबरसेनापतिमपश्यम्) Kād. 31. 2; अतिप्रमाणपादानुमीयमानतृषितकात्यायनीसिंहावतारमार्गं दक्षिणं तीरमासाद्य तुरगादवततार Kād. 125. 9; महान्तमतिप्रमाणमप्रमेयमस्य प्रजापतेर्महिमानम् … आहुर्ब्रह्मविदः ChāndoUBh. 217. 6 (*on* iv. 3. 7); रूपं महदतिप्रमाणं ते तव बहुवक्त्रनेत्रम् GītāBh.(S'aṅ.) 314. 1 (*on* 11. 23); क्षपाचरी । अतिप्रमाणमपरं कुम्भकर्णमजीजनत् RāmāMañ. 417. 23; अतिप्रमाणं तत्रैकं वराहं घोरमैक्षत KathāSaSāg. ii. 3. 44; xvii. 5. 76; अतिप्रमाणं मरकतरत्नं समुल्लसति SamudraMa. 1. 66 (9); तेजःसारैरलङ्कारैः…अतिप्रमाणैः…अलंकृतः (सः) S'āliC. 6. 41; अतिप्रमाणलिङ्गेन नातस्तासां सुखं भवेत् AnaṅgaRa. 3. 8; **ii** exceeding the limits, ample, abundant दानेनातिप्रमाणेन यस्य … भ्रमति स्वेच्छया यशः RāmāMañ. 447. 25; **iii** of great authority यानि प्रणीतानि धर्मशास्त्राणि वै पुरा । तान्येवातिप्रमाणानि न हन्तव्यानि हेतुभिः CaturCin. ii(1). 19. 6; तथा च योगियाज्ञवल्क्यः … सांख्यं योगः पाञ्चरात्रं वेदाः पाशुपतं तथा । अतिप्रमाणान्येतानि हेतुभिर्न विरोधयेत् VīraMi.(Paribhāṣā.) 21. 2; **iv** beyond the (prescribed) measurements वेश्मस्य वर्धयेद् गेहमर्धपञ्चमभूमिकम् । अतिप्रमाणे तत्रास्य धनबन्धुपरिक्षयः SamarāSū. 39. 22; *n.* **i** huge size अश्वश्चातिप्रमाणयुक्तः (दृष्टः) MahāBhā. i. 3. 170; **ii** large quantity श्लेष्मनिमित्तानां प्रमेहाणामाश्वभिनिर्वृत्तिकराः । तद्यथा … °सुगन्धकानां नवानामतिवेलमतिप्रमाणेनोपयोगः CaraS. ii. 4. 6 (1922 Ed.)

अतिप्रमाणम् (ati–pramāṇam) *adv.* excessively कथमतिचपलभावानाम् अतिप्रमाणमनपेक्षहरणीय° … °प्लवनीयेषु हस्तियुद्धविमर्दापगमा(ता)नां च … विकाराः संभवन्ति Hastyāyur. 618. 26 (4. 7)

अतिप्रमाणवत् (atipramāṇa–va(n)t) *adj.* huge in dimension तदाननं विवृतमतिप्रमाणवत् समभ्ययुर्गगनमिवार्दिताः खगाः MahāBhā. i. 24. 13.

अतिप्रमाणविषय (ati–pramāṇaviṣaya) *adj.* beyond the sphere of the means of knowledge अतिप्रमाणविषयं ब्रह्म सर्वत्र विश्रुतम् BṛĀraUBhVā. iii. 9. 172.

अतिप्रमाणवृद्ध (atipramāṇa–vṛddha) *adj.* grown to excessive size (प्लीहा) अतिप्रमाणवृद्धस्तु न सिध्यति कथंचन BhelaS. 210. 15 (6. 27)

अतिप्रमाथशील (atipramātha–śīla) *adj.* having extremely destructive nature, extremely malevolent दुर्बलाग्निं सलिलकाममतिप्रमाथशीलमस्निग्धं विद्यात् Hastyāyur. 586. 21 (4. 4)

अतिप्रमाथित्व (atipramāthi–tva) *n.* the state of being extremely destructive सत्त्वेष्वतिप्रमाथित्वं व्यालकर्म BhelaS. 128. 6 (6. 4)

अतिप्रमाथिन् (ati–pramāthin) *adj.* [*f.* –ī] **A** extremely tormenting समुत्थितं महद्भयम् । अतिप्रमाथि दारुणम् MahāBhā. xii. 309. 33; अतिप्रमाथि च तदा तपो महत्सुदारुणम् SkandP. v(3). 28. 93; शोकेनातिप्रमाथिना । धृतिवल्लीकुठारेण न स्पृशन्ति मनीषिणः RāmāMañ. 85. 23; पटोलयवधान्याकमधुकम् …। हन्ति पित्तज्वरं दाहं तृष्णां चातिप्रमाथिनीम् BhāvPra.(Bhā.) 8.(1). 346; **B** extremely malevolent स एष सर्वशस्त्राणामवध्यः पाण्डुनन्दन । त्रिदेहोऽतिप्रमाथी च हरदत्तश्च दानवः HariVaṁ. 8158 (Cal. Ed.); ते नानाविधरूपाश्च प्रमथातिप्रमाथिनः MatsyaP. 140. 3.

अतिप्रमाद (ati–pramāda) *adj.* extremely erroneous or careless संक्लिष्टकर्माणमतिप्रवादम् (v. l. अतिप्रमादम्) MahāBhā. v. 37. 33.

अतिप्रमाद (ati–pramāda) *m.* great mistake, extreme inattention

अतिप्रमादात् [Abl.] on account of extreme inattention, by great mistake षड्भिः प्रकारैः सतां भावानामनुपलब्धिर्भवति ··· अतिप्रमादात् MahāBh. ii. 197. 10 (*on* iv. 1. 3); अतो व्यासस्तु – अतिप्रमादाद्राजेन्द्र गजयोर्मध्यगं बलम्। चालयेन्न च पुण्यार्थी CaturDī. 5. 8.

अतिप्रमादभाज् (atipramāda-bhāj) *adj.* committing many mistakes विशालया रसनया प्रमदातिप्रमादभाक् SkandP. iv. 37. 103.

अतिप्रमादिन् (ati-pramādin) *adj.* extremely erroneous, highly imprudent सङ्क्लिष्टकर्माणमतिप्रवादम् (v. l. अतिप्रमादिनम्) MahāBhā. v. 37. 33; नाल्पकालोषितायैतद्देयं नातिप्रमादिने MṛgendraT. iii. 1. 64; प्रत्यक्षगोचरं देवं लोकं चातिप्रमादिनम् । दृष्ट्वा श्रुतिः ··· अनुक्रोशति BṛĀraUBhVā. iv. 3. 952; अतिप्रमादिनम् ।··· न भजन्ति नृपं प्रजाः S'ukraNī. 1. 140.

अतिप्रमुग्ध (ati-pramugdha) *adj.* extremely dull or silly हीनाधिकं चारुकथाप्रबन्धख्यातं यदस्माभिरतिप्रमुग्धैः । मात्सर्यहीनाः कवयः ··· तच्छोधयन्तु BṛKathāK.(Praśasti) 9.

अतिप्रमुदित (ati-pramudita) *adj.* extremely delighted श्रीपत्तनं प्राप्तस्य ··· श्रीहेमचन्द्रमुनीन्द्रमिलनादतिप्रमुदितस्य PrabaCin. 84. 28.

अतिप्रमोद (ati-pramoda) *m.* great delight नाभिस्तु ··· अतिप्रमोदभरविह्वलः ··· निर्वृतिमुपगतः BhāgP. v. 4. 4; राज्ञश्चातिप्रमोदोऽभूत्पुत्रजन्मसमुद्भवः DeviBhāP. vii. 14. 54; सहजस्य शास्त्रार्थत्वेन ज्ञानेऽतिप्रमोदो दार्ढ्यं च AṇuBh. 245. 4 (*on* iii. 3. 36); **अतिप्रमोदात्** [Abl.] on account of (i. e. with) great delight जिनम् ··· अतिप्रमोदात् ··· अर्चयामास MahāP. 23. 114.

अतिप्रमोदतस् (atipramoda-tas) *adv.* with great delight ध्वजाश्च भ्रेजिरे तत्र भूदेव्यातिप्रमोदतः। उत्तम्भिता इव भुजाः TriṣaS'aPuC. i. 3. 430.

अतिप्रमोदिता (ati-pramoditā) *adj.* (*f.*) extremely happy सन्ति देशा अनेकशः। ···प्रजाश्चातिप्रमोदिताः PadmP. ii. 85. 48.

अतिप्रयच्छत् (ati-prayácchat) *adj.* handing over something instead अ॒ति॒प्र॒यच्छ॒न्दुरि॑तिं तरेयम् TaiBr. I. ii. 1. 5.

अतिप्रयत (ati-prayata) *adj.* [*f.* -ā] striving very much, trying one's best प्रकुपितमतिप्रयतः CaraS. i. 12. 10; शक्रं पुत्रो निहन्ता ते यदि गर्भं शरच्छतम्। समाहितातिप्रयता शौचिनी धारयिष्यसि ViṣṇuP. i. 21. 33.

अतिप्रयत्न (ati-prayatna) *m.* great effort लक्ष्मीः ··· अतिप्रयत्नविधृतापि ··· परिस्खलति Kād. 104. 23; इमां तु सर्वसन्देशसङ्ग्रहकारिकां कारिकामतिप्रयत्नेन भगवान्भवन्तमनुस्मारयति AnargharRā. 1. 16(5); महतातिप्रयत्नेन ह्युदर्केऽपि प्रवक्ष्यते BṛĀraUBhVā. i. 4. 203; JīvanVi. 114. 10; तयोर्नातिप्रयत्नो वेदार्थव्याख्याने ManuBh. i. 241. 14 (*on* 3. 68); ii. 405. 17 (*on* 11. 115); CaturCin. iii(1). 409. 10; VīraMi. 277. 16 (*on* 1. 203); (आसीद्रणाङ्गणम्) अतिप्रयत्नापहृतम्रियमाणनरामिषम् YogVā. iii. 39. 27; सन्तोष्यातिप्रयत्नेन योगोऽयं गृह्यते बुधैः S'ivS. 5. 52; निष्पेषः ··· अतिप्रयत्नेन साध्यः AbhinBhā. ii. 59. 14 (*on* 9. 140); तस्मादतिप्रयत्नेन शान्तिकर्म समाचरेत् VasiS. 45. 116; अतिप्रयत्नसाध्येऽर्थे SaṁgīRa. iv. 55. 7; (7. 201); सबलैरबलाजनः। त्रातव्योऽतिप्रयत्नेन MalliC. 1. 48.

अतिप्रयत्नतस् (atiprayatna-tas) *adv.* with great effort चरैश्चारयेत् साक्षात्प्रकाशं चातिप्रयत्नतः ManuBh. ii. 201. 13 (*on* 8. 302); ii. 483. 27 (*on* 12. 103); एवं श्रुतिरियं कैश्चिद्व्याख्यातातिप्रयत्नतः BṛĀraUBhVā. ii. 1. 255; एवं सति स्वयूथ्या नः केचिन्नातिप्रपञ्चिनः (v. l. नातिप्रयत्नतः) S'lokaVār. 5(5). 44 (417. 9); एवमनुमानेभ्यो वेदानुमानमिति किमतिप्रयत्नतो भेदप्रतिपादनेनेति Kāśi. iii. 119. 23 (*on* 5. (5). 44) वाराहे तां समुद्धृत्य लुप्तां मग्नां रसातलात्। विष्णोर्वराहरूपस्य द्वारा चातिप्रयत्नतः BrahmVaiP. i. 5. 14.

अतिप्रयत्नवत् (atiprayatna-va(n)t) *adj.* which requires great effort यत्त्वनतिकाठिन्यादतिप्रयत्नवत्खण्डनानपेक्षं चर्वयित्वैव निगीर्यते तद्भोज्यम् CaturCin. iii(1). 601. 9.

अतिप्रयत्नसाध्यत्व (atiprayatnasādhya-tva) *n.* the state of being achieved with great effort निदिध्यासनस्यातिप्रयत्नसाध्यत्वानुभवात् Nyāyāmṛ. 625A. 10; अतिप्रयत्नसाध्यत्वस्यानुभवसिद्धत्वात् AdvaiSi. 873. 19.

अतिप्रयास (ati-prayāsa) *m.* great strain or effort तस्माच्च दिङ्मात्रमतिप्रयासात्संसूचितं लोकहिताय तस्याः BrahmP. 174. 30; तदेवमेतदनेकातिप्रयासपरम्परा° ··· °वर्ध्यमानम् AvantiKa. 41. 5; बहिरङ्गलाभाय नातिप्रयासः कर्तव्यः JīvanVi. 97. 18; क्वचन ··· अतिप्रयासरहिते धनव्ययरहिते कुत्रापि वस्तुनीत्यर्थः Bhāsk. ii. 79. 18 (*on* ii. 3. 2); नारी ··· रतान्ते ··· शक्नोति नो किमपि सोढुमतिप्रयासम् AnaṅgaRa. 3. 11.

अतिप्रयुक्त (ati-prayukta) *adj.* **A** very frequently used अतिप्रयुक्तं देशभाषापदम् KāvyālaṅSū. v. 1. 13; v. 1. 14; **B** too much employed (for work) नागानां स्थानमुपपन्नानामतिकर्मणि चातिप्रयुक्तानाम् Hastyāyur. 683. 14 (4. 26)

अतिप्रयुक्ति (ati-práyukti) *f.* superior performance द्वे द्वे॑ पुरोऽनुवा॒क्ये॑ कु॒र्या॑द॒ति॒प्र॒यु॑क्त्यै TaiS. II. ii. 9. 2; BaudhS'S. ii. 128. 9.

अतिप्रयुज् (ati-prayuj-) VII. Ā. to go beyond the performance (of the unfinished rite) अथ या दक्षिणा ददति ताभिरतिप्रयुञ्जते JaimiBr. 1. 348; [to separate from (with Inst.), MW]

अतिप्रयोक्तव्य (ati-prayoktavya) *adj.* which is to be administered excessively तस्य नातिप्रयोक्तव्यो रसो यत्नाद्भिषग्वरैः RasRaSa. 18. 94.

अतिप्रयोग (ati-prayoga) *m.* **i** excessive employment or use (for work) अध्वनोऽतिप्रयोगाद् वा गमनाच्छोणितस्य वा। ··· भवन्ति धातवः क्षीणाः Hastyāyur. 295. 4 (2. 60); 308. 2 (2. 61); **ii** respectable usage पूज्यप्रयोगो ह्यतिप्रयोगः। पूज्यता चाविवेकपूर्वकत्वाभावः NyāySu.(Ja.) 145B. 7 (*on* i. 1. 6)

अतिप्रयोगतस् (atiprayoga-tas) *adv.* because of or from frequent usage (बहुलातिप्रयोगतो हेतोः शब्दजातं हरौ रूढम्) अज्ञातमुख्येष्वमुख्येष्वपि बहुलप्रयोगोऽस्तीत्यतोऽतिप्रयोगत इत्युक्तम् NyāySu.(Ja.) 145B. 7 (*on* i. 1. 6)

अतिप्रयोजन (ati-prayojana) *n.* additional purpose गङ्गातटे घोष इति शब्दो मुख्यार्थभागपि । पावनत्वं लक्षयति धर्मस्यातिप्रयोजनात् BhāvPra.(S'ā.) 163. 11(6)

अतिप्रयोजनत्व (atiprayojana-tva) *n.* the state of being additionally purposeful बहुदोषाभ्युपगमात् वरमेकस्यैव 'अनेन' इति इदंशब्दस्य 'अयमहमागच्छानि' इत्यादाविव न अतिप्रयोजनत्वाभ्युपगमः PūrvottaVāNaMā. 220. 9.

अतिप्रयोज्य (ati-prayojya) *adj.* liable to be excessively used or employed (in literary composition) द्वीपान्तराणां ये देशाः पर्वताः सरितस्तथा। नातिप्रयोज्याः कविभिरिति गाढं न चिन्तिताः KāvyMī. 94. 22.

अतिप्ररिक्त (ati-prarikta) *adj.* excessively purged (of sin) स (ऋषिः) हातिप्ररिक्तो न शशाकोत्थातुम् JaimiBr. 2. 83.

अतिप्ररूढ (ati-prarūḍha) *adj.* very much grown, deep-rooted, firmly established (कृष्णस्य) तच्च रूपम् ··· अतिप्ररूढवैरानुभावात् ··· नान्यत्रोपययावस्य (चेदिराजस्य) चेतसः ViṣṇuP. iv. 15. 13; तथा चतुर्मासकदर्थनावशादतिप्ररूढं तव तानवं तनौ RāmC. 5. 61.

अतिप्ररोध (ati-prarodha) *m.* prolonged confinement तत्रातिप्ररोधदौर्बल्याद् दुःस्थानशयनात् कटुकषायरूक्षभोजनादतिकर्मसेवनाच्च प्रकुप्यति पवनः (हस्तिनः) Hastyāyur. 120. 24 (1. 17)

अतिप्रलपित (ati-pralapita) *n.* excessive talk सूत्रधारः — अलमतिप्रलपितेन LaṭaMe. 1. 6(3)

अतिप्रलम्ब (ati-pralamba) *adj.* very long or pendulous ईषदावक्रघोणमतिप्रलम्बैककर्णपाशम् ··· मस्करिणमद्राक्षीत् HarṣaC. 153. 2; अतिप्रलम्बश्रवणदेशदोलायमानस्फारसुवर्णकर्णिकाकिरणकोटिकमनीयमुखमण्डलतया कपोलस्थलीपरिकल्पितप्रफुल्लकर्णिकारकाननमिव ··· इदम् ··· द्रामिलं बलम् YaśasCam. i. 463. 5.

अतिप्रलाप (ati-pralāpa) *m.* **i** excessive talking or delirious speech कुपितस्तु (वायुः)···भयशोकमोहदैन्यातिप्रलापाञ्जनयति CaraS. i. 12. 8; i. 20. 11 (1941 Ed.); **ii** too much irrelevant talk (परिवादोऽतिवादश्च) अतिवादः निरर्थकोऽतिप्रलापः SanatBh. 253. 8 (*on* 2. 22); **iii** excessive lamentation अयि किमिति मर्मच्छेददारुणैरतिप्रलापैः ··· दहसि माम् UttaRāC. 3. 40(6); **iv** excessively long talk [nt.] [cf. **अतिप्रलपित**]; *adj.* affected by delirious speech उष्णं सकोथबहुमांसमतिप्रलापम् ··· मनुजमाशु निहन्ति वान्तम् KalyāKā. 9. 17.

अतिप्रलोभितकर्ण (atipralobhita-karṇa) *adj.* whose ears have been very much lured or enticed (with sweet words) अतिमनोहरवनितादिजनालापेष्वतितरामतिप्रलोभितकर्णम् ··· आत्मानमहो राजन् भिन्नहृदयं द्रष्टुमर्हसि BhāgP. iv. 29. 54.

अतिप्रवण (ati-pravaṇa) *adj.* greatly inclined or sloping प्रागुदक्प्रवणं यथा चात्वालसारिणीरापः स्युर्नातिप्रवणम् BaudhS'S. iii. 233. 1.

अतिप्रवणमति (atipravaṇa-mati) *adj.* whose mind is greatly devoted स (पूरुः) चातिप्रवणमतिः सबहुमानं पितरं प्रणम्य ··· जरां जग्राह ViṣṇuP. iv. 10. 16.

अतिप्रवदना (ati-pravadanā) *adj.* (*f.*) speaking very eloquently इयं यूनां चेतःप्रहरणधरा सम्यगधरा प(? व)राका(? की)रा[के]न्दुप्रतिमवदनातिप्रवदना SūktiMu. 89. 49.

अतिप्रवयस् (ati-pravayas) *adj.* very old or aged अतिप्रवयसां शुक्रं प्रायशः क्षीयते नृणाम् CaraS. vi. 30. 177 (1941 Ed.)

अतिप्रवरण (ati-pravaraṇa) *n.* excess in the choice of *Pravaras* न हि चतुर्णां प्रवरोऽस्ति न पञ्चानामतिप्रवरणम् ĀśvaS'S. II. vi. 13. 5.

अतिप्रवर्तन (ati-pravartana) *n.* excessive flow or discharge त्वक्स्थे ···कुष्ठे···रोमहर्षश्च स्वेदस्यातिप्रवर्तनम् RugVi. 49. 26.

अतिप्रवर्तमान (ati-pravartamāna) *adj.* flowing profusely मलं सदा । अतिप्रवर्तमानं च साधयेदतिसारवत् SuśruS. vi. 39.123; AṣṭāSaṁ. ii. 9.1 (4.2)

अतिप्रवर्तिता (ati-pravartitā) *adj.* (*f.*) greatly caused or produced अत्र ते दर्शनात् प्रीतिर्मनसातिप्रवर्तिता ĀdiP. 9.67.

अतिप्रवर्तिन् (ati-pravartin) *adj.* indulging in too much धर्मं विचरत: पीडा सापि द्वाभ्यां नियच्छति । अर्थ: स्यादर्थलुब्धस्य कामस्य(? श्चा)तिप्रवर्तिन: MahāBhā. i. App. I. 81 (142) [cf. MahāBhā. ix. 59.17 अतिप्रसङ्गिन:]

अतिप्रवर्धित (ati-pravardhita) *adj.* **A** caused to grow large, over-sized (कर्णमले) सौकुमार्याच्चिरोत्सृष्टे सहसातिप्रवर्धिते । कर्णशोथो भवेत् पाल्यां सरुज: परिपोटवान् RugVi. 57.16; **B** maintained for a long time क्ष्माभुजां क्षिप्यते लक्ष्मीर्धूर्तैर्मधुरवादिभि: । अतिप्रवर्धितैर्भृत्यैर्वल्लभैश्च निरङ्कुशै: PāṇḍaC. 15.41.

अतिप्रवस् (ati-pravas-) I. P. to stay away from home beyond (a particular period) न द्वादशीमतिप्रवसति BaudhS'S. i. 83.17; नवमीं चेदतिप्रवसेन्मित्रो जनान् यातयति प्रजानन्निति … आहुतिं जुहुयात् ĀpaS'S. vi. 26.7 (comm.)

अतिप्रवसत् (ati-pravasat) *adj.* going on a journey for a long period सैषा संवत्सरमतिप्रवसत: ĀśvaS'S. I. ii. 12.10.

अतिप्रवह् (ati-pravah-) I. P. to flow beyond, to extend beyond एत उ ह वै छन्द:प्रवाहा अवरं छन्द: परं छन्दोऽतिप्रवहन्ति KauṣīBr. 11.5 (51.2); एतौ वै छन्द:प्रवाहाववरं छन्द: परं छन्दोऽतिप्रवहत: GopBr. ii. 3.11.

अतिप्रवाच् (ati-pravāc) *adj.* extremely garrulous or talkative निष्ठुरमतिप्रवाचं शमितारातिं च दाम्भिकं चापि । जनयत्युत्तमचेष्टं बुधदृष्टो भास्करि: शशिने Sārā. 29.46.

अतिप्रवात (ati-pravāta) *m.* very strong wind पुरोवातातपावश्यायातिप्रवाताञ् जह्यात् CaraS. i. 8.19; क्रोधशोकहिमातपावश्यायातिप्रवातान्…मनसाप्यसेवमान: सर्वमहो गमयस्व CaraS. i. 15.15 (1941 Ed.) [cf. AṣṭāSaṁ. i. 190.10 (1.39)]

अतिप्रवाद (ati-pravāda) *adj.* extremely bragging or boastful संक्लिष्टकर्माणमतिप्रवादं नित्यानृतं चादृढभक्तिकं च । विकृष्टरागं बहुमानिनं चाप्येतान्न सेवेत नराधमान् षट् MahāBhā. v. 37.33.

अतिप्रवायत् (ati-pravāya(n)t) *adj.* blowing violently (wind) पर्वतोत्तम: । कम्पित: सहसा तेन वायुनाभिप्रवायता (v. l. अतिप्रवायता) MahāBhā. xii. 315.54.

अतिप्रवाह (ati-pravāha) *m.* excessive flow (of ichor) राजवाह्यो गज: –स्रवत्यष्टासु सर्वदा । … अतिप्रवाहवापाभ्यां निर्मांसश्चास्थिभूषण: Mānaso. iv. 3.500.

अतिप्रविद्ध (ati-praviddha) *adj.* greatly pierced, greatly hurt प्लवमानै: कपिवरैरप्रमत्तै: प्रवेगितै: । सत्त्वान्यतिप्रविद्धानि त्रासितानि हतानि च Rāmā. iv. 78*(6)

अतिप्रविलम्बित (ati-pravilambita) *adj.* bent very low तत्र हीनातिमात्रातिशीतोष्णसहसाप्रदानादतिप्रविलम्बितशिरस उच्छिङ्घतो विचलतोऽभ्यवहरतो वा प्रतिषिद्धप्रदानाच्च व्यापदो भवन्ति (नस्यात्) SuśruS. iv. 40.48.

अतिप्रविलीनदोष (atipravilīna-doṣa) *adj.* in which the (three) humours are completely merged together or mixed up ग्रीष्मे पुन: … शरीरम् … अतिस्विन्नमतिशिथिलमतिप्रविलीनदोषं भवति AṣṭāSaṁ. i. 122.7 (1.23)

अतिप्रविष्ट (ati-praviṣṭa) *adj.* [*f.* –ā] **i** deeply penetrating (intellect) कर्मोदये बुद्धिमतिप्रविष्टाम् । प्रज्ञां च देवीं सुभगे विमृश्य पृच्छामि त्वां कासि चारुरूपे MahāBhā. iii. 184.16; **ii** deeply sunk (in the sockets) (the eye) तस्य चेच्चक्षुषी प्रकृतिहीने … अतिप्रविष्टे…तदा परासुरिति विद्यात् CaraS. v. 3.6 (1941 Ed.); vi. 19.7; (यस्य) नयने चातिप्रविष्टे निर्गते विस्तृते संक्षिप्ते संक्षिप्तभ्रूणी (स गतायु:) AṣṭāSaṁ. i. 243.15 (2.9)

अतिप्रविसृत (ati-pravisṛta) *adj.* fully spread (all over the body) तस्मान्नातिप्रविसृते विषे कुर्याच्चिकित्सितम् Hastyāyur. 169.6 (2.8)

अतिप्रवीण (ati-pravīṇa) *adj.* [*f.* –ā] very skilful नटस्यातिप्रवीणस्य कर्मैत्वान्नाट्यमुच्यते RasāSu. 209.3 (3.1); भवत्योरुभयोर्मध्ये या नृत्ये गीते चातिप्रवीणा सा … तत्तपोवनं गच्छतु SiṁhāDvā. 15.0(4)

अतिप्रवृ (ati-pravṛ-) IX. Ā. to choose more (than the prescribed number) न चतुरो वृणीते न पञ्चातिप्रवृणीते ĀpaS'S. ii. 16.8.

अतिप्रवृत् (ati-pravṛt-) I. Ā. **i** to be intensely intent upon or occupied with (loc.) स तयानुगतो नित्यमभीष्टेऽतिप्रवर्तते BṛKathāMañ. vii. 1.354; **ii** to issue violently (as blood from a wound) [MW]; **iii** to have an intense effect (as venom) [MW] cf. **अतिप्रवृत्त, अतिप्रवृत्ति.**

अतिप्रवृत्त (ati-pravṛtta) *adj.* [*f.* –ā] **i** gone out of the way or bounds, behaving wickedly चीरे गृहीते तु तया (सीतया) … । निवार्य सीतां कैकेयीं वसिष्ठो वाक्यमब्रवीत् । अतिप्रवृत्ते दुर्मेधे कैकेयि कुलपांसनि । … न प्रमाणेऽवतिष्ठसे Rāmā. ii. App. 1.15(15) (comm. मर्यादातिक्रमेण प्रवृत्ते); पानमत्ता च सा हर्तुं जपतो मेऽक्षमालिकाम् । प्रावर्तत… । अतिप्रवृत्ता च मया क्रुद्धेन जघनस्थले । अङ्किता सा त्रिशूलेन KathāSaSāg. xii. 8.176; **ii** gone too far, excessively active त्यज बुद्धिमिमामतिप्रवृत्ताम् BuddhaC. 5.36; **iii** discharging or flowing profusely (blood, urine etc.) अथातिप्रवृत्ते (रक्ते) रोध्र° … °गोधूमचूर्णै: शनै: शनैर्व्रणमुखमवचूर्ण्याङ्गुल्यग्रेणावपीडयेत् SuśruS. i. 14.36; अतिप्रवृत्ते रक्ते तु रक्तमेवानुपाययेत् BhelaS. 251.23 (8.4); KāśyaS. 292B.12 (9.85); (शकृन्मूत्रम्) तमतिप्रवृत्तमाशु पूर्वोक्तैरेव निर्वापणै: पुन:पुनर्निर्वापयेत् AṣṭāSaṁ. i. 192.14 (1.39); ii. 15.10 (4.3); वमनेऽतिप्रवृत्ते च हृद्यं कार्यं विरेचनम् SiddhYo. 73.24; 9.32; S'ārṅgaS. iii. 12.31; **iv** excessively excited (humour of the body) पवनोऽतिप्रवृत्तो हि स्वे स्थाने लभतेऽधिकम् । बलं तस्य सपित्तस्य जयार्थे बस्तिरुत्तम: CaraS. vi. 19.97 (1941 Ed.); **v** occurring or taking place to a large extent, excessively manifested कलत्रपुत्रक्षयप्राणनाशे तस्मिन् पुरे युद्धमतिप्रवृत्ते । महासुरा: … कोपवृता: प्रतीयु: MatsyaP. 138.30; प्रसादकोपैर्भवति क्षमापतेरतिप्रवृत्तैरधरोत्तरं जगत् S'ivLī. 5.22; **vi** set out too fast यदा तु वारणोऽत्यर्थं द्रुतमध्वनि युज्यते त्वरयातिप्रवृत्तस्य न मूत्रमतिवर्तते Hastyāyur. 258.24 (2.48); **vii** issued violently (a sound of belching etc.) उद्गार: । अतिप्रवृत्तो ध्वनिशब्द: Prasā. ii. 652.20.

अतिप्रवृत्तरक्त (atipravṛtta-rakta) *adj.* (a disease) in which blood flows out profusely अर्शांसि … उपाचरेत् । … अतिप्रवृत्तरक्तानि रक्तपित्तातिसारवत् AṣṭāSaṁ. ii. 61.19 (4.10)

अतिप्रवृत्तसंभाषण (atipravṛtta-sambhāṣaṇa) *adj.* used to conversing very much अतिप्रवृत्तसंभाषणयोस्तु न सिद्धमेव JayaMa. 98.18 (*on* 2.2)

अतिप्रवृत्ति (ati-pravṛtti) *f.* **1** excessive discharge or flow (of blood, urine etc.) आर्तवमङ्गमर्दमतिप्रवृत्तिं दौर्गन्ध्यं च SuśruS. i. 15.16; लालास्वेदयोरतिप्रवृत्ति: SuśruS. v. 4.39; i. 12.10; iv. 31.54; अतिप्रवृत्ति: सङ्गो वा सिराणां ग्रन्थयोऽपि वा । विमार्गगमनं चापि स्रोतसां दुष्टिलक्षणम् CaraS. iii. 5.24 (1941 Ed.); AṣṭāSaṁ. i. 232.16 = AṣṭāHṛ. ii. 3.45 (2.6); (मलस्य) अतिप्रवृत्तौ जीर्णेऽस्मिन् (औषधे) स्तम्भनीयैरुपक्रमेत् KāśyaS. 276A.43 (9.7); (मूत्रपुरीषयो:) विबन्धोऽतिप्रवृत्तिर्वा … । अजीर्णलिङ्गं सामान्यं AṣṭāHṛ. i. 8.30; SiddhYo. 6.16; (अशीतिर्वातजा रोगा:) अतिप्रवृत्ति: शुक्रस्य कार्श्यं नाशश्च रेतस: S'ārṅgaS. i. 7.113; **2** excessive activity (of the organs) कर्म वाङ्मन:शरीरप्रवृत्ति: । तत्र वाङ्मन:शरीरातिप्रवृत्तिरतियोग: CaraS. i. 11.39; तत्र कायादिकर्मणोऽतिप्रवृत्तिरतियोग: AṣṭāSaṁ. i. 116.20 (1.22); (न चातिप्रातिलोम्यत: सिद्धिं गच्छति कन्यासु) प्रातिलोम्येनातिप्रवृत्तौ तु तदानीमेव विरक्तत्वात् कथं तद्विषया सिद्धि: JayaMa. 206.16 (*on* 3.2); **3** excessive inclination to act (beyond the normal limit) न (विचारस्य) ह्यस्यातिप्रवृत्ति: फलम् । गगनास्वादने नातृप्ते: ĀtmaTaVi. 496.8.

अतिप्रवृत्तिज (atipravṛtti-ja) *adj.* produced by excessive discharge (of urine) निदानलक्षणैरूर्ध्वं वक्ष्यन्तेऽतिप्रवृत्तिजा: (मूत्ररोगा:) AṣṭāSaṁ. i. 283.17 (3.9)

अतिप्रवृत्तितस् (atipravṛtti-tas) *adv.* due to excessive discharge अर्शस: स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तित: RugVi. 5.26 (comm. अतिप्रवृत्तित: अतिक्षयात्)

अतिप्रवृद्ध (ati-pravṛddha) *adj.* [*f.* –ā] **i** greatly increased, greatly extended, very well grown, very well developed आयुषोऽतिप्रवृद्धस्य भार्यार्थेऽर्धं ह्रसत्विति MahāBhā. i. 9.16; तमुवाच खगश्रेष्ठं तत्र रोहिणपादप: । अतिप्रवृद्ध: MahāBhā. i. 25.31; अतिप्रवृद्धे युद्धे (सति) MahāBhā. ix. 22.18; अतिप्रवृद्धानिलबर्हिणाम् । … द्रुतं रवा: सम्प्रति संप्रनष्टा: Rāmā. iv. App. i. 16.62; क्षीणस्य या छर्दिरतिप्रवृद्धा … तां प्रवदन्त्यसाध्याम् CaraS. vi. 20.19 (1941 Ed.); तस्मादतिप्रवृद्धेषु शीर्षरोगेषु बुद्धिमान् (दहेत्) BhelaS. 198.12 (6.23); आगन्तुरन्वेति निजं विकारं निजस्तथागन्तुमतिप्रवृद्धम् AṣṭāSaṁ. i. 119.4 (1.22); अनीकरुधिरधाराभिरतिप्रवृद्धवीरपाणगोष्ठीमहोत्सवा: समन्तादभिद्रवन्ति यातुधाना: प्लवङ्गमयूथपतीन् AnargharRā. 6.38(3); नखानि रोमाणि च … अतिप्रवृद्धानि तु नापितेन कारयेत् ManuBh. i. 356.1 (*on* 4.69); i. 492.16 (*on* 5.155); इमं ममाम्भोनिधिलङ्घनार्थमतिप्रवृद्धं न शरीरभारम् RāmC. 17.41; किमात्मनो न पश्यसि चर्मितरुत्वचमिवातिप्रवृद्धविश्र:(? स्र:) YaśasCam. ii. 348.19; अतिप्रवृद्धा श्री: कं नाम न दर्पयति NītiVā. (Bombay Ed.) 123.12; यदा चानयोरतिप्रवृद्धो रागस्तदा तद्वशाददृष्टश्रुता अपि प्रयोगा भवन्ति JayaMa. 155.4 (*on* 2.7); 155.12 (*on* 2.7); गव्यं घृतं सैन्धवसंप्रयुक्तम् … निहन्ति

कौरण्डमतिप्रवृद्धम् SiddhYo. 40. 18; ध्यायतो विषयान्पुंसः पुनरपि सङ्गोऽतिप्रवृद्धो जायते GītāBh.(Rā.) 147. 1 (*on* 2. 62); अतिप्रवृद्धे श्वयथौ प्रच्छन्नं तस्य कारयेत् Hastyāyur. 318. 21 (2. 66); 429. 12 (3. 8); स्त्रीणामप्यात्महननस्य प्रतिषिद्धत्वात् अतिप्रवृद्धस्वर्गाभिलाषायाः प्रतिषेधशास्त्रमतिक्रामन्त्या अयमनुगमनोपदेशः श्येनवत् Mitā. 28. 24 (*on* 1. 86); मन्वादयो मुनिवराः खलु धर्मशास्त्रे धर्मादि संकुचितमाहुरतिप्रवृद्धम् S'aṅkaDigVi.(Mā.) 14. 12; यः … अवारयद्वृष्टिमतिप्रवृद्धाम् S'ivLī. 22. 69; **ii** possessing extremely overbearing behaviour, extremely haughty सर्वथातिप्रवृद्धोऽसौ रावणो राक्षसाधिपः Rāmā. v. 57. 4; iii. 89*(1); क्षत्रस्यातिप्रवृद्धस्य ब्राह्मणान्प्रति सर्वशः। ब्रह्मैव संनियन्तृ स्यात् ManuSm. 9. 320; मण्डलं वा प्रोत्साहयेत् … अतिप्रवृद्धोऽयं मध्यमः ArthS'ā ii. 359. 7 (7. 18)

अतिप्रवृद्धतर (atipravṛddha-tara) *adj.* extremely grown, extremely intense तथैव 'श्येनेन हिंस्याद्भूतानि' इत्यधिकारस्यातिप्रवृद्धतरद्वेषान्धतया सत्यामपि प्रवृत्तौ न धर्मत्वम् ManuBh. i. 492. 15 (*on* 5. 155)

अतिप्रवृद्धभाव (atipravṛddha-bhāva) *adj.* whose good mental state has greatly increased अतिप्रवृद्धभावोऽसौ … आयुःक्षये … त्रिदशोऽजनि MalliC 7. 837.

अतिप्रवृद्धरोष (atipravṛddha-roṣa) *adj.* whose wrath is greatly increased स्ववृत्तिमननुष्ठाय (v. l. अतिप्रवृद्धरोषस्य) धर्ममुत्सृज्य तत्त्वतः (शिष्यस्य न क्षन्तव्यम्) MahāBhā. i. 746*(1)

अतिप्रवृद्धवृद्धता (atipravṛddha-vṛddhatā) *f.* extreme old age, the state of being very old अतिप्रवृद्धवृद्धतासुधाधवलितशिरःश्मश्रुजटाजालत्विषम् … जमदग्निमवलोक्य YaśasCam. ii. 286. 9.

अतिप्रवृद्धव्याधि (atipravṛddha-vyādhi) *m.* disease which is excessively grown अतिप्रवृद्धव्याधेरन्यव्याध्युक्तानामपि यथासन्नं व्यधः AṣṭāSaṁ. i. 177. 8 (1. 36)

अतिप्रवृद्धाग्निशिखा (atipravṛddhāgniśikhā) *f.* very much grown flame of fire अतिप्रवृद्धाग्निशिखामिवोल्काम्। समीक्ष्य राजा … विरागतां तत्क्षणतो जगाम VarāṅgaC. 28. 25.

अतिप्रवृद्धोत्साह (atipravṛddhotsāha) *adj.* whose eagerness or enthusiasm has greatly increased अतिप्रवृद्धोत्साहाः … समरोत्कवाहाः HammīMaKā. 11. 78.

अतिप्रवृध् (ati-pravṛdh-) I. Ā. **i** to grow excessively, to overgrow एकः कृष्टीः …। पूर्वीरति प्र वावृधे विश्वा जातान्योजसा Ṛ.V. viii. 62. 2; त्यक्तव्यायामचिन्तानां संशोधनमकुर्वताम्।… मेदश्च मांसं चातिप्रवर्धते CaraS. i. 17. 79; **ii** to extend (to the next day) अपि वोपवसथ एवातिप्रवर्धेतेति BaudhS'S. iii. 5. 8.

अतिप्रवेदन (ati-pravedana) *adj.* causing extreme pain (श्वयथुः) स दाहरागबहुळो(? लो) वर्धतेऽतिप्रवेदनः BhelaS. 185. 19 (6. 19)

अतिप्रवेपन (ati-pravepana) *n.* excessive movement नातिप्रवेपनं वायोर्मया गोपायिते वने Bhaṭṭi. 9. 107.

अतिप्रवेश (ati-praveśa) *m.* entering frequently, repeatedly meeting अतिप्रवेशात्खरमार्गणोऽसौ निरस्यमानो विफलत्वमेति SevyaSev. 46; स्वेच्छयातिप्रवेशो यो न धर्मः सेवकस्य सः KathāSaSāg. x. 4. 35 = PañcT. 1. 18 (22. 7) (v. l.)

अतिप्रव्रजित (ati-pravrajita) *adj.* superior to an ascetic (पक्षिणः) अतिप्रव्रजिताः परस्परगोष्ठीयुक्ता आसतेऽतितराम् SāmaraU. 262. 19.

अतिप्रशंसत् (ati-praśaṁsat) *adj.* praising excessively गायन्तोऽतिप्रशंसन्तः …। अदित्या आश्रमपदं कुसुमैः समवाकिरन् BhāgP. viii. 18. 10.

अतिप्रशंसार्थ (ati-praśaṁsārtha) *adj.* meant for excessive praise पृथङ्निर्देशस्त्वतिप्रशंसार्थः VīraMi. 101. 25 (*on* 1. 44)

अतिप्रशंसित (ati-praśaṁsita) *adj.* greatly praised ततोऽश्विनीकुमाराभ्यां निजरूपमाविर्भूय वाग्भटोऽतिप्रशंसितः PurāPraSaṁ. 96. 28.

अतिप्रशंसिन् (ati-praśaṁsin) *adj.* praising excessively इत्युक्ता तेन सा देवी पतिनातिप्रशंसिना DevīBhāP. vi. 9. 7.

अतिप्रशस्त (ati-praśasta) *adj.* [*f.* -ā] **i** extremely good, excellent कृतं त्वया … कार्यं पुण्यं महत्सद्भिरनुप्रशस्तम् (v. l. अतिप्रशस्तम्) MahāBhā. v. 27. 12; नातिप्रशस्तपार्ष्णिनखदन्तोत्सङ्गोदरशिखरोष्ठीक्य(?)श्रवणाः … महावंशाः … समाहृताः AvantiKa. 81. 8; नरपतेः … अतिप्रशस्तललितललाटलेखाक्षरम् … अर्पय मे कपालकर्परम् TilaMañ. 51. 10; नीलीरसं दुग्धरसं जलं वा ये रञ्जयन्ति द्विशतं प्रमाणम्। ते ते यथापूर्वमतिप्रशस्ताः YuktiKa. 91. 23; स्वाभिधेयस्यातिप्रशस्तप्रतिपादनपरत्वेन वा अर्थवत्त्वं वक्तव्यम् CaturCin. iii(2). 574. 4; पुष्पादिकासीसमतिप्रशस्तम् RasRaSa. 3. 53; ब्राह्मणे पूजा अतिप्रशस्ता VīraMi.(Pūjā.) 9. 4; रक्तचन्दनबीजादिभिरतिप्रशस्ता माला बोद्धव्या TantrSā.(K.) 20. 21; पक्षसम्मानापेक्षया अतिप्रशस्तमपि वेदिसम्मानं यूपैक्यापेक्षया अप्रशस्तमेवेत्येवं स्तुतिः MīmāKau. ii. 127. 21 (*on* ii. 4. 26); वीर्यप्रदं क्षीरमतिप्रशस्तम् BhojanKu. 128. 5; कालशाकोऽतिप्रशस्तः BālamBha. i. 524. 8 (*on* 1. 240); i. 160. 6 (*on* 1. 29); **ii** very auspicious स्वप्ने पयःपानमतिप्रशस्तम् HāriS. ii. 2. 12; राजा बलाधिकृतं बलाहकनामानमाहूय … अतिप्रशस्तेऽहनि प्राहिणोत् Kād. 77. 7; प्रस्थानकालोऽयमतिप्रशस्तः RāmC. 3. 3; तत्र चातिप्रशस्तेऽहनि यथायोग्यमर्चितसमस्तपूज्यवर्गः (पार्थिवः) TilaMañ. 34. 4; तेष्वपि मखा(? °घा)नक्षत्रयुक्ता त्रयोदशी अतिप्रशस्तेत्यर्थः SmṛtiCan. v. 86. 9; आमरणमपि गयायां वासोऽतिप्रशस्तः TristhaSe. 343. 23; (वैशाखशुक्लचतुर्दशी) इयमेव योगविशेषेणातिप्रशस्ता NirṇaSi. 75. 18; 102. 4; 105. 5.

अतिप्रशस्ततर (atipraśasta-tara) *adj.* extremely auspicious रामकृष्णयोरतिप्रशस्ततरो यात्रामुहूर्त उपस्थेव समुपस्थितः KaṁVa. 4. 6 (5)

अतिप्रशस्ततरत्व (atipraśastatara-tva) *n.* the state of being extremely auspicious संभवति चातिप्रशस्ताग्नेयसाहित्यैन्द्राग्नस्यातिप्रशस्ततरत्वम् MīmāKau. ii. 98. 9 (*on* ii. 3. 29)

अतिप्रशस्तनृत्त (atipraśasta-nṛtta) *n.* very excellent dancing अवन्तिदेवस्यात्मनाटकीयाम् … चन्द्रपालितादिभिरतिप्रशस्तनृत्तकौशलामाहूयानन्तवर्मा नृत्तमद्राक्षीत् DaśKuC. 138. 12.

अतिप्रशस्य (ati-praśasya) *ger.* praising very much स तमतिप्रशस्याशंसत् DaśKuC. 116. 6.

अतिप्रशान्त (ati-praśānta) *adj.* extremely calm अतिप्रशान्तगम्भीराकारारोपितबहुमानश्च सादरम् … ववन्दे HarṣaC. 318. 8; बहूनि कल्पसहस्राणि तत्रातिप्रशान्तो विपाको भवति Sphuṭā. ii. 22. 20 (*on* 2. 14)

अतिप्रशान्ताकारा (atipraśāntākārā) *adj.* (*f.*) whose form is extremely serene अतिप्रशान्ताकाराभिः … जरत्प्रव्रजिताभिर्विनोद्यमानाम् … मातरं ननाम Kād. 93. 12.

अतिप्रशान्ताकृति (atipraśāntākṛti) *f.* extremely noble appearance (भगवन्तमैक्षन्नारायणं सः) अतिप्रशान्ताकृतिदर्शनीयम् SkandP. ii(9). 17. 13.

अतिप्रशृध् (ati-praśṛdh-) I. P. (*caus.*) to strengthen greatly स्तोता यत्ते विचर्षणिरतिप्रशर्धयद्गिरः Ṛ.V. viii. 13. 6.

अतिप्रश्न (ati-praśna) *m.* unjustifiable question, unreasonable question, a question which is difficult to answer अतिप्रश्नान् पृच्छसि PraśnaU. 3. 2; प्राण एव तावद्दुर्विज्ञेयत्वाद्विषमप्रश्नार्हः, तस्यापि जन्मादि त्वं पृच्छसि अतः अतिप्रश्नान् पृच्छसि PraśnaUBh. 261. 5 (*on* 3. 2); अतिप्रश्नोऽयमुद्गीर्णः AVPari. 69 (1). 3; वर्तते यस्तमुल्लङ्घ्य सोऽतिप्रश्नोऽनुमोच्यते BṛĀraUBhVā. iii. 6. 23; विषमोऽयमतिप्रश्नो भवता समुदाहृतः YogVā. iii. 10. 5.

अतिप्रश्न्या (ati-praśnyā) *adj.* (*f.*) (a deity) that should not be reasoned about (*lit.* beyond the scope of legitimate question) स होवाचातिप्रश्न्यां वै मा देवतामत्यप्राक्षीः JaimiBr. 2. 77; देवतायाः स्वप्रश्न आगमविषयः। तं प्रश्नविषयमतिक्रान्तो गार्ग्याः प्रश्नः आनुमानिकत्वात्। स यस्या देवतायाः प्रश्नः सा अतिप्रश्न्या BṛĀraUBh. 425. 15 (*on* iii. 6. 1); या तमर्हति पूर्वोक्ता सातिप्रश्न्येह देवता BṛĀraUBhVā. iii. 6. 24.

अतिप्रश्रय (ati-praśraya) *m.* excessive modesty, excessive civility एषैवातिप्रश्रयादतिविश्रब्धनवोढा RasMañ. 8 (1–2); इयमेवाविश्रब्धनवोढातिप्रश्रयादतिविश्रब्धनवोढा PadyaVe. 305.

अतिप्रश्रु (ati-praśru-) V. Ā. (*pass.*) to become well-known यस्ते अग्ने सुमतिं मर्तो अक्षत्सहसः सूनो अति स प्र शृण्वे Ṛ.V. x. 11. 7.

अतिप्रसक्त (ati-prasakta) *adj.* [*f.* -ā] **Ai** over-pervasive, over-extended, over-applied एवं च कृत्वा तपराः क्रियन्ते। आकृतिग्रहणेनातिप्रसक्तमिति MahāBh. i. 18. 25 (*on* S'ivSū.(Gr.) 1); तेनातिप्रसक्तमिति कृत्वा नियमोऽयं विज्ञायेत MahāBh. ii. 145. 11 (*on* iii. 3. 19); iii. 131. 16 (*on* vi. 2. 80); नन्वनैकान्तिकः स्व(? स)व्यभिचारः इत्येवमादिसूत्रानारम्भः नातिप्रसक्तस्य नियमार्थत्वात् NyāyVār. 123. 7 (*on* i. 1. 34); न त्वतिप्रसक्तं पक्षलक्षणं व्यवच्छिन्नम् HetuBiṬ. 213. 3; पूर्वेणातिप्रसक्तः स्थानिवद्भाव एतेषु विधिषु प्रतिषिध्यते KāśiVṛ. *on* P. i. 1. 58; पूर्वेणातिप्रसक्ता नदीसंज्ञा प्रतिषिध्यते KāśiVṛ. *on* P. i. 4. 4; एवकारेण यद्व्यवच्छिन्नं तद्दर्शयति। अतिप्रसक्तस्यापवादमाह अशब्दसंज्ञेत्यादि Nyās. i. 128. 7 (*on* i. 1. 68); सर्वेभ्यो वा कारणविशेषादित्यस्यातिप्रसक्तस्यापवादः क्रियते TantrVā. 1035. 2 (*on* iii. 5. 1); यैस्तु द्रव्यं न चिकीर्ष्यत इति दृष्टोपकाराभावः प्राधान्यलक्षणमुक्तं तच्च संमार्जनादिष्वतिप्रसक्तं तेषामपि प्राधान्यप्रसङ्गात् S'āstrDī. 108. 6 (*on* ii. 1. 4); अथ पश्चात्करणमनुकरणम्। तल्लोकेऽप्यनुकरणात्मतातिप्रसक्ता Kāvyānu.(He.) 72. 16; 10. 1; 382. 18; विशेष्यमात्रं परिशिष्टं तच्च केवलमतिप्रसक्तम् KhaṇḍanKhā. 952. 4; अतिप्रसक्तयोः क्षेत्रटीकयोर्व्यावृत्तिमात्रेण चरितार्थत्वम् NyāySu.(Ja.) 208B. 6 (*on* i. 4. 6); ईश्वरेच्छा नातिप्रसक्ता इति चेन्न तदिच्छामन्तरेणापि गङ्गादिपदात्तीराद्युपस्थितेः Upask. 403. 7 (*on* ix. 2. 4); Prasā. i. 47. 3; ब्रह्मण्यतिप्रसक्तस्य चित्त्वस्याधिकरणतावच्छेदकत्वात् Nyāyāmṛ.

344B. 6 (*on* 1. 51); अभावाधिकरणयोर्विशिष्टबुद्धावतिप्रसक्तश्चेदमवच्छेदकं तथा पीतं सुवर्णम् S'ivārkaMaDī. ii. 73. 24 (*on* ii. 2. 12); ननूक्तं ज्ञानार्थयोरापरोक्ष्यं हृदयादिगोचरशाब्दवृत्तिशाब्दविषययोरतिप्रसक्तम् SiddhāLeSaṁ. 404. 3; विषयितामात्रेण तु सर्पोऽतिप्रसक्तः GuruCandr. ii. 28. 2; i. 225. 10; (जातकर्मसंस्कारः) स च यद्यपि मुखदर्शनस्नाननान्दीश्राद्धादावतिप्रसक्तः VīraMi.(Saṁskāra.) 187. 14; सा च (युक्तिः) वणिगादिष्वतिप्रसक्तेत्यनवाचयमात्रम् VīraMi. (Vyavahāra.) 25. 27; शक्त्यार्थप्रतिपादकत्वं गाव्यादिष्वतिप्रसक्तम् MīmāKau. i. 110. 7 (*on* i. 3. 24); i. 169. 4 (*on* i. 4. 2); अत एवार्थलक्षणमपि आरोपितार्थाश्रयत्वरूपं लतापुष्पेऽतिप्रसक्तम् MīmāKau. i. 274. 16 (*on* i. 4. 23); iii(2). 252. 16 (*on* ii. 2. 21); भाष्यकारोक्तमपि बाधलक्षणमतिप्रसक्तमपि नातीवासङ्गतम् BhāṭṭDī. iii. 187. 6 (*on* x. 1. 1); iii. 195. 17 (*on* x. 1. 3); न च गोत्वमतिप्रसक्तम् S'aktiVā. 78. 9; ग्रन्थान्तरगतानि लक्षणान्यतिप्रसक्तान्येव RasGaṅ. 613. 14; 37. 17; धात्वर्थानुकूलव्यापाराश्रयत्वं च कारकमात्रेऽतिप्रसक्तम् VaiyāBhū. 38. 19 (*on* 7); 22. 11 (*on* 2); 86. 7 (*on* 22); प्रसिद्धनानार्थविषयकबोधजनकत्वमेव नानार्थत्वमिति नातिप्रसक्तं नानार्थत्वम् VaiyāSiMañ. 118. 24; यद्यपि अहरहरिति सामान्यविधेरतिप्रसक्तं तथाप्युपनयनोत्तरमस्य प्रायो बहुधूक्त्या तदनन्तरमेव BālamBha. i. 101. 11 (*on* 1. 24); **A ii** used beyond (the normal limit) बहुतरसमवाये एक एव रसः स्थायी । अन्ये तदुपकारगता व्यभिचारिणो भवन्ति । तत्र च आक्षिप्य सव्याजमतिप्रसक्तं रसं रसज्ञः पुनराददीत NāṭaLaRaK. 1967; **B i** very much attached, extremely addicted to (विचित्रवीर्यः) दारेष्वतिप्रसक्तश्च यक्ष्माणं समपद्यत MahāBhā. v. 145. 23; व्याधिर्बलवान् समुदीर्यते स्त्रीषु चातिप्रसक्तस्य vii. 11. 8 (1941 Ed.); RugVi. 10. 25; (प्रमदाः) अतिप्रसक्तैः पुरुषैर्यतस्ताः क्रीडन्ति Pañcā. 30. 23; **B ii** very much absorbed in श्रीमदेऽतिप्रसक्तानां नूनं नरकयातनाः ĀdiP. 29. 20; आपादमाचूडमतिप्रसक्तैरापीयमाना यमिनां मनोभिः । गोपीजनज्ञातरसावताद्गो गोपालभूपालकुमारमूर्तिः KṛṣṇaKa. 3. 51; **B iii** very insistent, very persistent (कृष्णसंकर्षणौ) अतिप्रसक्तौ तौ दृष्ट्वा सर्वव्रजविचारिणौ HariVaṁ. 51. 12; आः जामदग्न्य किमेवमतिप्रसक्तः संन्यस्तशस्त्रानस्मानपि बलाद् धनुर्ग्राहयसि AnargharRā. 4. 41(2); क्षीणस्य या छर्दिरतिप्रसक्ता ··· तां प्रवदेदसाध्याम् RugVi. 15. 14; 16. 10; अतिप्रसक्तं च स्त्रीषु स्वातन्त्र्यं करपत्रमिव पत्युर्नाविदार्य हृदयं विरमति YaśasCam. ii. 86. 5; सहसातिप्रसक्तस्यातिमात्रयोगादध्वनो मार्गमूर्च्छा भवति Hastyāyur. 96. 8 (1. 13); 100. 23 (1. 14)

अतिप्रसक्तता (atiprasakta-tā) *f.* the state of being over-applied, over-applicability रासभं विना न घटोत्पत्तिरिति न प्रयोगः । अतिप्रसक्ततया रासभाभावस्य VyutpaVā. 150. 1; न च गोत्वस्य वृषभादिसाधारणस्यातिप्रसक्ततया शक्तौ नावच्छेदकतासंभव इति वाच्यम् S'aktiVā. 78. 3.

अतिप्रसक्तत्व (atiprasakta-tva) *n.* the state of being over-applied, over-applicability यदि कुर्यादसत्कालानियतं नियतं परः । तत्स्यादतिप्रसक्तत्वमन्यथा चानियन्तृता KhaṇḍanKhā. 1094. 2 (*on* 4. 29); क्षित्यादेरपि जन्यप्रयत्नजन्यत्वाद् विवादसन्देहयोश्चातिप्रसक्तत्वेन पक्षतानवच्छेदकत्वात् Upask. 94. 15 (*on* ii. 1. 19) संकेतस्यापि इच्छामात्रत्वेनातिप्रसक्तत्वात् Upask. 403. 6 (*on* ix. 2. 4); मरणफलकत्वमात्रस्य···अतिप्रसक्तत्वेऽपि विशिष्टस्य अनतिप्रसक्तत्वात् PūrvottaVāNaMā. 34. 13; यत्किञ्चिदुपादानगोचरत्वस्य ध्वंसकारणज्ञानादिष्वतिप्रसक्तत्वेन तत्तदुपादानगोचरत्वस्याननुगमेन च तत्रापि तत्प्रवेशासम्भवात् S'ivārkaMaDī. i. 140. 4 (*on* i. 1. 3); i. 152. 29 (*on* i. 1. 3); ii. 73. 21 (*on* ii. 2. 12); अवस्थात्वस्यातिप्रसक्तत्वेन ज्ञानप्रयुक्तविरहप्रतियोगितानवच्छेदकत्वात् GuruCandr. i. 97. 6; अवच्छेदकाभेदे प्रकारभेदेन प्रकारत्वस्याभेदपक्षे तस्यातिप्रसक्तत्वात् LaCandr. 342. 21; न चेच्छात्वादीनामतिप्रसक्तत्वेन प्रवर्तकमात्रनिष्ठत्वाभावान्न तेषां प्रवृत्तिहेतुत्वकल्पनाशङ्का शक्तेरपि लिङादिष्वतिप्रसक्तत्वस्य तुल्यत्वात् MīmāKau. iii(1). 23. 6 (*on* i. 2. 7); ii. 148. 4 (*on* iii. 1. 10); न च योगस्य फलोद्देशनकारित्वस्यातिप्रसक्तत्वात् अपूर्वे कर्मणि रूढिकल्पने सोमादिपदानामपि तदापत्तिः BhāṭṭDī. i. 61. 18 (*on* i. 4. 2); iii. 68. 4 (*on* ix. 1. 11); (गोत्वस्य) तस्यातिप्रसक्तत्वेऽपि शक्यत्वोपगमे क्षतिविरहात् S'aktiVā. 78. 12; गौश्चलति ··· इत्यादावतिप्रसक्तत्वेनाप्रयोजकत्वात् RasGaṅ. 9. 5; वाचकतायाः शक्ततावच्छेदकत्वे आत्माश्रयात्। बोधकतारूपत्वे शक्तिभ्रमेण द्विवचनादीनामपि एकत्वबोधकतया अतिप्रसक्तत्वात् VyutpaVā. 94. 4; अत्र श्रीमण्यादिशब्दानां श्रीकण्ठार्धशरीरिणी मणिपूराब्जनिलयेत्यादावतिप्रसक्तत्वेऽपि गणनासान्निध्येनैव भ्रमो निरस्तव्यः LalitāSaBh. 197. 5 (*on* 233); राज्ञः सुतस्य धनमित्यादौ अतिप्रसक्तत्वैन राजपुरुषः धान्येन धनी ··· इत्यादावप्रसक्तेश्चास्यातन्त्रत्वात् VaiyāBhū. 14. 13 (*on* 2); 30. 1 (*on* 5); 188. 12 (*on* 36); गर्भधारणस्य पोषणस्य चातिप्रसक्तत्वेनाकिञ्चित्करत्वात् BālamBha. ii. 213. 27 (*on* 2. 135–136); i. 2. 13 (*on* 1. 1)

अतिप्रसक्तधर्म (atiprasakta-dharma) *m.* over-pervasive quality or feature वस्तुतस्तु कपालं प्रति स्वोष्मजन्यपाकत्वेनेव पिण्डसंयवनत्वेनैवोद्देश्यता अतिप्रसक्तधर्मेण तदङ्गीकारे प्रमाणाभावात् BhāṭṭDī. ii. 114. 14 (*on* iv. 2. 5); अतिप्रसक्तधर्मप्रकारेण भासमाने चावच्छेदकत्वपर्याप्तिभानानुपगमात् S'aktiVā. 89. 11; आधेयताया अतिप्रसक्तधर्मावच्छेद्यत्वे VyutpaVā. 148. 9.

अतिप्रसक्तभाव (atiprasakta-bhāva) *m.* extreme or intense addiction यदा वा पुरुषोऽतिहर्षादतिप्रसक्तभावः स्त्रीष्वतिप्रसङ्गमारभते तस्य···रेतः क्षयमेति CaraS. ii. 6. 8 (1941 Ed.)

अतिप्रसक्तलक्षणा (atiprasakta-lakṣaṇā) *f.* secondary significance which is over-extended पूर्वत्रातिप्रसक्तलक्षणायां प्रमाणाभावेन व्रीहिमात्रजन्यव्यापारकसाधनत्वलक्षणा युक्ता MīmāKau. ii. 153. 14 (*on* iii. 1. 11); ii. 155. 1 (*on* iii. 1. 11)

अतिप्रसक्तानुप्रसक्ति (atiprasaktānuprasakti) *f.* adherence to that which is far-fetched or over-stretched अलमतिप्रसक्तानुप्रसक्त्या द्राघीयसी चर्चेयम् प्रकृतान्तरायकारिणीति न प्रतन्यते NyāyMañ. i. 344. 1.

अतिप्रसक्ति (ati-prasakti) *f.* **1** excessive attachment or addiction अतिप्रसक्तिं चैतेषां (इन्द्रियाणाम्) मनसा संनिवर्तयेत् ManuSm. 4. 16; क्वासौ मम दयितः किं बहिः करोत्यतिप्रसक्त्या PañcT. 4. 1 (373. 5); अतिप्रसक्तिं नियन्तुमशक्यां प्रवृत्तिम् ManvaVi. 461. 9 (*on* 4. 16); एष्वष्टादशव्यसनेषु अतिप्रसक्तिरेव निषिद्धा RājNiRa. 7. 6; न प्रसज्येत नातिप्रसक्तिमत्यन्तसेवनात्मिकां कुर्यात् ManvaMu. 147. 9 (*on* 4. 16); 256. 27 (*on* 7. 53); **2** over-extension, over-pervasion, application beyond limit न कर्मणान्यधर्मत्वादतिप्रसक्तेश्च Sāṁkhya-PraSū. 1. 16; अतिप्रसक्तिरन्यधर्मत्वे SāṁkhyaPraSū. 1. 53; सामान्यश्रुतौ नियमः येन वाक्येन समानश्रुत्यानेकार्थो गम्यते तत्रातिप्रसक्तावतिप्रसङ्गनिराकरणार्थमवधारणम् NyāyVār. 113. 16 (*on* i. 1. 33); एवं चातिप्रसक्तावाह पर्वाण्यमावास्यादीनि (संविशेत्) BālaKrī. i. 81. 2 (*on* 1. 78); घटाभावः किं कुर्वन् घटं विरुन्ध्यात् अकिञ्चित्करस्य विरोधित्वेऽतिप्रसक्तिः NyāyMañ. i. 52. 2; ननु लक्षणपरत्वे सूत्रस्य अतिप्रसक्तिरुक्ता Kāśi. ii. 20. 20 (*on* 5(1). 20); (इन्द्रियैः) तैश्चासन्निहितमवर्तमानं वा न प्राप्यत इति नातिप्रसक्तिः Kāśi. ii. 121. 21 (*on* 5(3). 64); एवं सति अतिप्रसक्तिरपि चार्वाकनन्दिनी नोपालम्भाय NyāyKuA. i. 172. 1; न च ब्रूमो यत्र सारूप्यं तत्र विभ्रम इति येनातिप्रसक्तिश्चोद्येत TātpaṬ.(Vā.) 84. 1 (*on* i. 1. 2); 164. 16 (*on* i. 1. 5); सत्त्वेऽपि समानाधिकरणाविशेषणनियमान्नियमः Kiraṇā. 330. 22; व्यवहाराङ्गम्यत्वं हि वाचकत्वं नास्मदिच्छाधीनम् अतो यथादर्शनं तदभ्युपगमान्न काचिदतिप्रसक्तिः NyāyRa. 527. 22 (*on* 5(11). 69); भगिन्यादिगमनेऽपि तदविरोधदर्शनादतिप्रसक्तेः Aparā. 83. 4 (*on* 1. 53); ब्रह्मविचारं प्रति ··· तर्कस्यातिप्रसक्तेः ··· वेद एव प्रमाणीकर्तव्ये S'rutaPra. i(A). 72. 25 (*on* i. 1. 1); अन्यस्मिन्नन्यधर्मान् घटयतु वियदाद्यत्र नातिप्रसक्तिः TattvMu. 1. 49; 4. 17; अतिप्रसक्तेर्न तु केवलस्य विशेषणत्वस्य तदभ्युपेयम् S'aṅkaDigVi.(Mā.) 8. 95; कारणमिति···तेन···गोत्वादौ नातिप्रसक्तिः Upask. 27. 14 (*on* i. 1. 8); सत्तया साम्यस्य चातिप्रसक्तेः Nyāyāmṛ. 58A. 6; 175B. 6; न हि विहितनिषिद्धकर्मणापि पुरुषस्य बन्धः···अतिप्रसक्तेश्च SāṁkhyaPraBh. 12. 11 (*on* 1. 16); बन्धतत्कारणयोर्भिन्नधर्मत्वेऽतिप्रसक्तिर्मुक्तस्यापि बन्धापत्तिः SāṁkhyaPraBh. 23. 33 (*on* 1. 53); गृह्यन्ते तेऽपि लक्ष्या यदि तदपि विधौ सर्वथातिप्रसक्तिः VidhiRa. 23. (123. 1–2); तदर्थमाधुनिकसंकेतितपर्यायप्रसिद्धपदग्रहणं तादृशस्यापि गुणे सांकेतिकेषु डित्थादिपदेषु अतिप्रसक्तिमाशङ्क्य प्रसिद्धार्थत्यागेनेति विशेषितम् MīmāKau. i. 270. 13 (*on* i. 4. 23); नूनं मुखं चन्द्रः इत्याद्युत्प्रेक्षायां तथाप्यतिप्रसक्तेः RasGaṅ. 304. 10; 274. 12; *adj.* (?) who is greatly attached अतिप्रसक्तेः स्त्रीषु स्वातन्त्र्यं करपत्रमिव पत्युर्नाविदार्य हृदयं विश्राम्यति NītiVā. 24. 40.

अतिप्रसक्तितस् (atiprasakti-tas) *adv.* on account of over-extension or over-application नापि चतुर्थः ··· रासभेऽतिप्रसक्तितः TattvPradī.(Ci.) 322. 15; मध्यमोऽतिप्रसक्तितः(न) TarkSāṁ.(Ā.) 11. 4.

अतिप्रसक्तिनिवारण (atiprasakti-nivāraṇa) *n.* prevention of excessive attachment नाङ्गुलिच्छेदमाप्नोति । किंत्वतिप्रसक्तिनिवारणाय द्विशतं दण्डं दाप्यः ManvaMu. 355. 4 (*on* 8. 368); BālamBha. ii. 337. 19 (*on* 2. 288)

अतिप्रसक्तिनिवृत्ति (atiprasakti-nivṛtti) *f.* abstaining from excessive indulgence or addiction अतिप्रसक्तिनिवृत्त्युपायमाह ··· विषयाणाम् ··· 'श्रेयोविरोधित्वादिभावनया मनसा सम्यङ् निवर्तयेत् ManvaMu. 147. 10 (*on* 4. 16)

अतिप्रसक्तिनुद् (atiprasakti-nud) *adj.* preventing from going beyond the desired limit तत्सदृक्प्रत्यभिज्ञानं यत्ते संस्कारबोधकम् । सहकारि तदेवास्तामक्षस्यातिप्रसक्तिनुत् KhaṇḍanKhā. 309. 17.

अतिप्रसक्तिवत् (atiprasakti-va(n)t) *adj.* too frequently used or over-administered दुःसंप्रयुक्तैरौषधैरतिप्रसक्तिवन्तै(द्भि)र्वा व्याधिरप्रतिक्रियया ··· भवत्युपधाव्यापत् Hastyāyur. 118. 24 (1. 16)

अतिप्रसक्तिवारण (atiprasakti-vāraṇa) *n.* avoidance of excessive indulgence अनुग्रहेऽप्यतिप्रसक्तिवारणार्थमाह 'न च तृप्येत्' Aparā. 956. 23 (*on* 3. 57)

अतिप्रसक्तृ (ati-prasaktṛ) *adj.* very much attached, greatly loving गेहे तेऽसौ विरहघटिकां नैव सोढुं समर्थो मासं किंवा परकरगतायास्त्वतिप्रसक्ता PavaDū.(Vā.) 92.

अतिप्रसक्त्युदाहरण (atiprasakty-udāharaṇa) *n.* instance of going beyond the limit तदनेन न्यायेनान्यत्राप्यतिप्रसक्त्युदाहरणान्यत्वेन व्यावर्तनं लक्षणवादिनो भग्नस्य शरणमस्त्रं निरसनीयम् KhaṇḍanKhā. 956. 13.

अतिप्रसङ्ख्य (ati-prasaṅkhya) *adj.* beyond counting, innumerable रुषितानि कपालिनां कुलानि … अनुना प्रहितान्यतिप्रसङ्ख्यान्यभियातानि समुद्यतायुधानि S'aṅkaDigVi.(Mā.) 15. 17.

अतिबहुपादक (atibahupāda-ka) *adj.* (an incision) with many wedges न काकपदकं कुर्यान्न चातिबहुपादकम् । तत्र शस्त्रपदं कुर्यात् Hastyāyur. 383. 19 (3. 4)

अतिबहुप्रज (atibahu-praja) *adj.* [*f.* -ā] having many children सम्मदो नामातिबहुप्रजः … मीनाधिपतिरासीत् ViṣṇuP. iv. 2. 70; प्रजाः … अतिबहुप्रजाश्शीतवातातपवर्षसहाश्च भविष्यन्ति ViṣṇuP. iv. 24. 96.

अतिबहुप्रलाप (atibahu-pralāpa) *adj.* very garrulous or talkative मनुष्याः शीतद्विषश्चलधृतिस्मृतिबुद्धिचेष्टासौहार्ददृष्टिगतयोऽतिबहुप्रलापाः BhāvPra. (Bhā.) 4. 61.

अतिबहुबालक (atibahu-bālaka) *adv.* having too many children स दरिद्रश्च मूर्खश्च वृत्त्यभावेन दुःस्थितः । पूर्वदुष्कृतभोगाय जातोऽतिबहुबालकः KathāSaSāg. vi. 4. 93.

अतिबहुभुज् (atibahu-bhuj) *adj.* eating very much, gluttonous (नारी) अतिबहुभुक्…पिशाचसत्त्वा RatiRaha. 4. 17; S'ārṅgaPa. 3119; *m.* name of a serpent नागाः कश्मीरायां कृतालयाः … अतिबहुभुग् … नागः NīlaP. 902.

अतिबहुमत्सर (atibahu-matsara) *adj.* extremely envious or jealous अध्यास्ते हृदयमकृत्रिमप्रियाणां कान्तानामतिबहुमत्सरो ह्यनङ्गः HarVi. 17. 75.

अतिबहुमान्या (atibahu-mānyā) *adj.* (*f.*) extremely respectable यस्तु नार्याः प्रियो भवति तस्य नातिबहुमान्या प्रिया भवति DhūrtaViSaṁ. 16. 1.

अतिबहुरूप (atibahu-rūpa) *adj.* having very many forms अमितोऽतिबहुरूपः … परादिः TattvPrakā. 123B. 9 (*on* ii. 3. 48)

अतिबहुल (ati-bahula) *adj.* **i** abundant, plentiful, very much अतिबहुलतिमिरपटलान्धकारः कुसुमरहितः केशपाशः Kād. 60. 20; चिन्तयित्वा चातिबहुलदुःखतां स्नेहस्य … स्थाणुमाश्रिता Kād. 172. 4; पचेद् घृतेऽतिबहुले सैषा स्याच्छर्करोदरी BhojanKu. 44. 1; पर्यन्तेष्वतिबहुलं स्वल्पं मध्ये तमस्तमोऽन्त्याख्ये । सस्यानामीतिभयम् BṛSaṁ. 5. 52; कथमतिबहुलमीदृशं फलम् BālamBha. ii. 86. 24 (*on* 2. 73–75); (राज्यलक्ष्मीः) मदनफलप्रयुक्तिरिव भुक्तमाहारमतिबहुलहृदयखेदमुद्वमयति YaśasCam. i. 285. 2; नैवातिबहुलात्यल्पमार्तवं शुद्धमादिशेत् RugVi. 61. 6; **ii** good many, great many केशैर्न चातिबहुलैर्मृदुभिः पार्थिवो भवेत् BhaviP. 60B. 22 (*on* i. 27. 27); अतिबहुलप्रयोगाभावस्य तत्र विवक्षितत्वात् NyāySu.(Ja.) 186A. 6 (*on* i. 4. 6); अतिबहुलोऽयं पदार्थधर्मसमूहः NyāySu.(Ja.) 361A. 4 (*on* ii. 2. 6); न हि बलदेवयुधिष्ठिरादीनामतिबहुलतीर्थयात्रायां किंचिदेकं मुख्यमासीदित्यत्र साधकमुपलभामहे VīraMi. (Tīrtha.) 326. 13; अहंमदशाहुधरणीसार्वभौमेन … सन्ततमतिबहुलदानप्रीणिताश्रितालिमता प्रेषितानि…उपायनानि ĀnandRa. 8. 31 (3)

अतिबहुलत्व (atibahula-tva) *n.* great abundance अनयोरुत्प्रेक्षानिमित्तं च तमसोऽतिबहुलत्वम् … अधःसंयोगश्च यथासङ्ख्यम् SāhiDa. 544. 2.

अतिबहुलाकृति (atibahulākṛti) *adj.* having great many forms जना यतन्ते स्वफलपाकेऽतिबहुलाकृतौ YogVā. v. 49. 13.

अतिबहुवक्त्र (atibahu-vaktra) *adj.* speaking too much, very talkative, garrulous हितवक्ता मितवक्ता संस्कृतवक्ता न चातिबहुवक्ता । अर्थाद्विमृश्य वक्ता वक्तायं सर्ववस्तूनाम् Tantrākhyā. 98. 21.

अतिबहुविस्तृत (atibahu-vistṛta) *adj.* very large, very extensive कपयः … झम्पां ददुः शीतजलकुम्भेऽतिबहुविस्तृते RauhiC. 430.

अतिबहुशस् atibahu-śas) *adv.* very often, a good many times यदतिबहुशः पृष्टा किंचिद्ब्रवीति … वधूः Kāvyālaṅ.(Ru.) 7. 33.

अतिबहूदक (atibahūdaka) *n.* very great quantity of water यथा न सर्वोदकहानिस्तथा खन्यः कार्यः । यथा च नातिबहूदकस्थितिस्तथा बन्ध्यः कार्यः SmṛtiCan. iv. 556. 8.

अतिबह्वर्थ (atibahv-artha) *m.* good many meanings (of *prakaraṇas*) स्थानस्यातिबह्वर्थकथनेनाभिप्रायतोऽर्थानुमितिजनकस्य ततोऽपि दौर्बल्यम् TattvPrakā. 52A. 12 (*on* i. 3. 24)

अतिबह्वशन (atibahv-aśana) *n.* too much eating, gluttony ज्ञेया विकारा जन्तूनामतिबह्वशनोद्भवाः KāśyaS. 258A. 28.

अतिबाढ (ati-bāḍha) *adj.* very firm, very strong, very well साधीयानतिबाढः स्यात् DharK. 2726; ViśvaPra. 179. 60; AnekāSaṁ. 3. 753; MediK. 190. 66.

अतिबाढप्ररूढ (atibāḍha-prarūḍha) *adj.* excessively grown अतिबाढप्ररूढदंष्ट्राङ्कुराग्रलग्नघनसंघातनिर्जितवराहवेषविष्णुसमुद्धृतधराशोभाभिः … महायोगिनीभिरापूर्यमाणपरिसरम् … देवतायतनम् YaśasCam. i. 46. 4.

अतिबाध् (ati-bādh-) I. Ā. to trouble or oppress exceedingly, to affect very much राजा - प्रियंवदे कच्चित्सख्यौ वो नातिबाधते शरीरतापः S'āk. 3. 21(5); स तापः …। काशीविरहजन्मात्र यथा मामतिबाधते SkandP. iv. 52. 10; उवाच चार्यपुत्रेह धर्मो मामतिबाधते PariPar. 2. 516; (pass.) नृणां मध्ये स धन्यो वै दुष्कृतैर्नातिबाध्यते PauṣkS. 36. 65.

अतिबाधतस् (atibādha-tas) *adv.* because of being strongly invalidated or absolutely set aside (by better proofs) सिद्धैककालसृष्ट्यादेर्द्वैविध्यस्यातिबाधतः । अर्कवद् ब्रह्मपक्षेऽपि कल्पोऽयमधुनातनः SiddhāTaVi. 8. 21.

अतिबाल (ati-bāla) *adj.* [*f.* ā] A very young, who is in early childhood (कन्यां) नातिबालां वहन्त्यन्ये अनित्यत्वात् प्रजार्थिनः । वहन्ति कर्मिणस्तस्यामन्तःशुद्धिव्यपेक्षया MahāBhā. xiii. 305*; अतिबालां (स्त्रियं) वर्जयेत् CaraS. iv. 8. 6; अतिबालो ह्यसंपूर्णसर्वधातुः स्त्रियं व्रजन् । उपशुष्येत CaraS. vi. 2(4). 41 (1922 Ed.); AṣṭāSaṁ. i. 60. 17 (1. 9); स चास्माभिरतिबाला कन्येत्यपदेशमुक्त्वा सुपूजितो विसर्जितः Avimā. 1. 9(9); इयमतिबाला व्यक्तमार्तस्वरेण निहन्यान्मे मनोरथम् DaśKuC. 62. 20; अतिबालस्य तु शिशोर्धात्री सर्वं समाचरेत् KāśyaS. 135A. 24; स्रावणपाटनदहनसीवनैषणसाहसादीन्यतिबालेषु न कुर्यात् KāśyaS. 124A. 40; ग्लानातिबालस्थविराङ्गनानां मर्यादया पश्यति कार्यजातम् VarāṅgaC. 11. 52; नातिह्रस्वः नातिवृद्धो नातिबालः (ऋत्विग् ब्राह्मणः) ManuBh. ii. 24. 28 (*on* 7. 78); अत एव मदालसापत्यान्यतिबालानि मातुरुपदेशादेव विवेकख्यातिमन्ति मुक्तानि बभूवुः

SāmkhyaTaKau. 431. 1 (*on* 50); अतिबालं च वृद्धं तु वर्जयेत् ... बलीवर्दम् MānaSā. 5. 22; अतिबालः स्तनं पीत्वा ... आनन्दैकस्वभावभाक् PañcDa. 11. 50.

अतिबालक (atibāla-ka) *m.* very small child, very young boy अतिबालकाः। निक्षिप्ता अपि तोयेषु नाम्रियन्त SkandP. iii(1). 22. 59; व्याघ्रसिंहादिभिर्हिंस्रैर्गृहीतो नातिबालकः DevīBhāP. vi. 20. 2; मम हृदयमन्यथा करोतीति मनसा वितर्क्यातिबालकं ग्रहीतुमारभत PadmP. iv. 112. 12(17]; *adj.* childish, puerile [Apte]

अतिबालता (atibāla-tā) *f.* i the state of being very young, extreme youthfulness याति सुचिरमतिबालतया धृतिमेक एव परिवारितो जडैः(लैः) S'iśuVa. 15. 10; ii extreme ignorance or foolishness, S'iśuVa. 15. 10.

अतिबालत्व (atibāla-tva) *n.* the state of being a very small child (boy) न वदाम्यतिबालत्वाद्वाच्यमानो निरन्तरम् ĀdiP. 19. 58.

अतिबाला (ati-bālā) *f.* cow which is two years old वर्षमात्रा तु बाला स्यादतिबाला द्विवार्षिकी [Apte]

अतिबालिशदश (atibāliśa-daśa) *adj.* in a very young age अतिबालिशदशमपि श्लाघनीयशीलैः ... वरीयसामपि ... आचरिताश्चर्यचित्तचमत्कारं (मुनिकुमारकयुगलम्) YaśasCam. i. 137. 5.

अतिबालिश्य (ati-bāliśya) *n.* extreme childishness मयातिबालिश्यादिदमाचरितं विभो MahāP. 41. 32.

अतिबाल्य (ati-bālya) *n.* early childhood अतिबाल्ये दन्तोत्पादवेदनया पीडिता न सम्यक्संपूर्णधातुबला भवन्ति AṣṭāSaṁ. ii. 179. 13 (6. 2); अतिबाल्य एव कृतसंन्यसनः ... असौ तदनेन सम्प्रति जयेयमहम् S'aṅkaDigVi.(Mā.) 9. 67; संस्कारस्योपनयनादेरतिबाल्यकृतत्वादिना विशेषात् ManvaVi. 1278. 28 (*on* 10. 3)

अतिबाल्यदशा (atibālya-daśā) *f.* the state of early childhood अत्रातिबाल्यदशायां प्रवृत्तस्य स्तनचिन्तनस्य ... तारुण्येऽप्याविर्भावः AlaṅkāRa. 85(17); अतिबाल्यदशाया बालक्रीडनके प्रवर्तयतामेव पित्रादीनां तस्यैवाध्ययनाधिकारे तादृशक्रीडायां ताडनकर्तृत्वदर्शनात् SetuBa. 2. 14.

अतिबाष्पायित (ati-bāṣpāyita) *adj.* profusely tearful तत्किमिति बाष्पायितं (v. l. किमित्यतिबाष्पायितं) भगवता MahāvīC. 2. 44(2)

अतिबाहु (ati-bāhu) *adj.* having long arms वेनम् ... अतिबाहुम् ... ददृशुस्ते महात्मानः PadmP. ii. 27. 40; *m.* i name of a Gandharva अतिबाहुश्च विख्यातौ च हहाहुहू। तुम्बुरुश्चेति चत्वारः स्मृता गन्धर्वसत्तमाः MahāBhā. i. 59. 49; ii name of one of the ten sons of the first (i. e. Svāyambhuva) Manu अग्नीध्रश्चातिबाहुश्च ...। मनोः स्वायम्भुवस्यैते दश पुत्रा महौजसः VāyuP. i. 31. 17; ViṣṇuDhaP. i. 176. 5; iii name of one of the seven sages of the fourteenth (i. e. Bhautya) Manvantara अग्नीध्रः काश्यपश्चैव ...। भार्गवो ह्यतिबाहुश्च ... अन्त्याः सप्तर्षयश्च ते HariVaṁ. App. 1(51); ViṣṇuDhaP. i. 189. 3.

अतिबाहुल्य (ati-bāhulya) *n.* A great abundance, great density तमसामतिबाहुल्याद् घनत्वात् मूर्तसमुचितं सूचिभेद्यत्वमुपचरितम् VakroJī. 101. 13; B excess, profusion भेषजस्यातिबाहुल्यात् SiddhYo. 1. 49; रजसश्चातिबाहुल्यात वासस्ते रक्ततां ययौ Rasā. 7. 61; RasRaSa. 3. 6.

अतिबाह्य (ati-bāhya) *adj.* very external यो हि संभाव्यमानसंसर्गैराधारैरपि न भेत्तुं पार्यते स दूरवर्तिभिरलब्धसम्बन्धैरतिबाह्यैः कथं भिद्येत NyāyMañ. i. 278. 15.

अतिबिभ्यती (ati-bibhyatī) *adj.* (*f.*) much afraid तत्पत्नी रतिलालसम्। पतिं निवारयामास वैधव्यादतिबिभ्यती SkandP. iii(3). 2. 53; S'ivaP. iv. 10. 26 (360A. 4)

अतिबीज (ati-bīja) *m.* the tree *Mimosa arabica* [PW]

अतिबीभत्स (ati-bībhatsa) *adj.* extremely hideous, very disgusting, extremely loathsome (act etc.) बीभत्सुरतिबीभत्सं कर्मेदमकरोत्कथम् MahāBhā. xi. 24. 13; कष्टमतिबीभत्समाचरितं दैवेन VeṇiSaṁ. 4. 358; (appearance etc.) स यं यं देशमभिजगाम ततस्तत एवैनमतिबीभत्सविकृततरदर्शनं मानुष इत्यश्रद्धेयरूपम् ... प्रवासयामासुः JātaMā. 161. 4 (24. 35); दृष्ट्वा तदतिबीभत्सं (अन्नम्) SamaMā. 4. 102; (state) हा प्रिये मालति कष्टमतिबीभत्समापन्नासि MālaMā. 9. 343; धिक् अतिबीभत्समेतत् CaṇḍaKau. 4. 20(1); (person) तं तथाप्यतिबीभत्सं सर्वश्रेष्ठममन्यत MārkP. 16. 18; *m.*~*n.* name of a hell सः ...। अतिबीभत्सनरके पाल्यते यमकिङ्करैः SkandP. ii(1). 12. 28 = iii(1). 30. 40.

अतिबीभत्सकर्मकृत् (atibībhatsakarma-kṛt) *adj.* performer of a very dreadful act बीभत्सुरतिबीभत्सकर्मकृद्भैरिदारणे PāṇḍaC. 11. 281.

अतिबीभत्सकर्मन् (atibībhatsa-karman) *adj.* who has done an extremely hideous act अतिबीभत्सकर्मा नृशंसोऽस्मि संवृत्तः UttaRāC. 1. 44(3)

अतिबीभत्सित (ati-bībhatsita) *adj.* extremely loathsome, very nauseating ते ... तदेवातिबीभत्सितमश्नन्ति BhāgP. v. 26. 23.

अतिबुद्ध (ati-buddha) *m.* extremely wise, very learned मुग्धबुद्धातिबुद्धानां लोके सिद्धा सुखात्मता PañcDa. 11. 53.

अतिबुद्धिमत् (atibuddhi-ma(n)t) *adj.* highly intelligent सोऽतिबुद्धिमतां श्रेष्ठो विष्णुः DevīBhāP. v. 7. 54; पुत्रेभ्यो योऽसौ माख्योऽतिबुद्धिमान् KathāKau. 9. 3.

अतिबुद्धिमनस् (ati-buddhimanas) *adj.* which is beyond intellect and mind शब्दशक्तिः। शक्या ग्रहीतुमतिबुद्धिमनस्यपीति SaṁkṣeS'ā. 1. 358 (i. 264. 24)

अतिबुद्धीन्द्रियात्मन् (ati-buddhīndriyātman) *adj.* whose nature is beyond intellect and sense-perceptions अतिबुद्धीन्द्रियात्मानं तं प्रपद्ये प्रजापतिम् MahāBhā. xii. 47. 21.

अतिबुभुक्ष् (ati-bubhukṣa-) [*desid.*] to wish to eat too much अन्नमन्नाभिलाषेऽपि दत्तं नातिबुभुक्षते AṣṭāSaṁ. ii. 189. 18 (6. 3); AṣṭāHṛ. vi. 3. 39.

अतिबुभुक्षत् (ati-bubhukṣat) *adj.* very hungry पिपासिताय श्रान्ताय भ्रान्तायातिबुभुक्षते। तस्मै सत्कृत्य दातव्यम् VāyuP. ii. 17. 19; BrahmāṇḍP. ii. 15. 19.

अतिबुभुक्षा (ati-bubhukṣā) *f.* great hunger क्रन्दतोऽतिबुभुक्षया। लब्धं कथंचिदन्नादि पुत्रस्य न ददौ पिता TrisaS'aPuC. iii. 1. 28; अतिबुभुक्षया पीडिता ... मर्कटी तं मौक्तिकं कर्णनासिकादिषु विलूरयामास Bharaṭ. 7A. 1; अतिबुभुक्षयात्मपीडा न कार्येत्यर्थः VīraMi. (Āhnika.) 477. 6.

अतिबुभुक्षित (ati-bubhukṣita) *adj.* very hungry सुशीलः ... द्विजं शान्तं पप्रच्छातिबुभुक्षितः DevīBhāP. iii. 27. 35; ग्लानिर्मुखस्यातिबुभुक्षितस्य KāśyaS. 202B. 43; (अहम्) अतिबुभुक्षितः क्षेत्रं शालेयमासाद्य ... अधिप्राप्तो महतीं पामरकरग्रहापदम् UdaySuKa. 37. 23; बालकः पाणिं चिक्षेपातिबुभुक्षितः PariPar. 8. 292; जगामान्वभयं सोऽपि तस्करोऽतिबुभुक्षितः RauhiC. 2446); अतिबुभुक्षितैर्मौक्तिकैः सर्वतो भक्ष्ये विलोक्यमाने एकम् ... धान्यक्षेत्रम् ... दृष्टम् Bharaṭ. 27B. 8.

अतिबुभुक्षुता (atibubhukṣu-tā) *f.* excessive desire to eat, great appetite रसानपि ... षट् सेवमानस्य मे तेष्वेवातिबुभुक्षुता ... जायते Jīvān. 329. 8.

अतिबुभूषत् (ati-bubhūṣat) *adj.* intending to surpass ऐन्द्रमत्यन्याः प्रजा बुभूषन् ĀśvaS'S. II. iv. 3. 12; II. v. 6. 8.

अतिबृंहण (ati-bṛṁhaṇa) *adj.* greatly nourishing श्वभिर्हतं पीतरक्तं नातिबृंहणमुच्यते KāśyaS. 363A. 19; यन्मांसं स्वामिना पक्वं तन्मेद इति कथ्यते। तदतीव गुरु स्निग्धं बलकार्यतिबृंहणम् BhāvPra.(Bhā.) 3. 150; *n.* excessive nourishment अथ खल्वतिबृंहणात् ... वमनविरेचनौषधानां दुर्योगातियोगात्पद्येते KāśyaS. 156A. 33; आस्यास्वप्नसुखाजि(?जी)र्णदिवास्वप्नातिबृंहणैः (श्लेष्मा प्रकुप्यति) AṣṭāHṛ. iii. 1. 18.

अतिबृंहणरोग (atibṛṁhaṇa-roga) *m.* disease of excessive fattiness मदनम् ...। सपाठारग्वधं पीतमतिबृंहणरोगजित् AṣṭāSaṁ. i. 126. 6 (1. 24)

अतिबृंहित (ati-bṛṁhita) *n.* over-nourishment रूपं तैरेव च ज्ञेयमतिबृंहितलङ्घिते AṣṭāHṛ. i. 14. 19; AṣṭāSaṁ. i. 125. 10 (1. 24)

अतिबृह् (ati-bṛh-) vi. p. to push through, to increase तां खे रथस्यात्यबृहत्। सा गोधाभवत् JaimiBr. 1. 221; वृषभः प्रजां वर्षतीति वा। अतिबृहति रेत इति वा Nir. 9. 22 (165. 14)

अतिबृहत् (ati-bṛhat) *adj.* very big, excessively large (गावः) श्यावातिदीर्घजिह्वा गुल्फैरतितनुभिरतिबृहद्भिर्वा BṛSaṁ. 61. 4.

अतिबृहत्तर (ati-bṛhattara) *adj.* very big, excessively large स्वतपोवृक्षो मनोरथफलैरलम्। शिवभक्त्यम्बुना सिक्तः फलितोऽतिबृहत्तरैः SkandP. iv. 52. 29.

अतिबृहत्प्रमाण (atibṛhat-pramāṇa) *adj.* of a very big size सूक्ष्मातिसूक्ष्मातिबृहत्प्रमाणगरीयसामप्यतिगौरवात्मन्। ... भगवन् प्रसीद ViṣṇuP. v. 1. 56.

अतिबृहत्फल (atibṛhat-phala) *m.* *Artecarpus integripholia* पनशः कण्टकिफलः पलसोऽतिबृहत्फलः BhāvPra.(Bhā.) 6(7). 25; BhāvPraNi. 91. 25.

अतिबृहत्स्कन्ध (atibṛhat-skandha) *adj.* of a very huge or large stem or trunk (द्रुमान् वर्जयेत्) बुभ्रतोऽतिबृहत्स्कन्धान् SamarāSū. 16. 14.

अतिबोधिसत्त्व (ati-bodhisattva) *adj.* surpassing a Bodhisattva वन्द्या त्वमेव जगतः स्पृहणीयसिद्धिरेवंविधैर्विलसितैरतिबोधिसत्त्वैः MālaMā. 10. 151.

अतिब्रह्मचर्य (ati-brahmacarya) *n.* excessive celibacy तत्रातिमैथुनादतिब्रह्मचर्याद्वा ... मेढ्रमागम्य प्रकुपिता दोषाः SuśruS. ii. 12. 7; *adj.* one who has violated the student life, one who cohabits with women [Apte]

अतिब्रह्मचारिणी (ati-brahmacāriṇī) *adj.* (a woman) leading an excessively celibate life तथातिब्रह्मचारिणीम् ... नारीमत्यर्थमुपसेवमानस्य ... मेढ्रमागम्य प्रकुपिता दोषाः SuśruS. ii. 12. 7.

अतिब्रह्मन् (ati-brahman) *m.* name of a king [PW]

अतिब्राह्म (ati-brāhma) *n.* name of a mystic formula अस्त्रं सप्ताक्षरं परम् । अतिब्राह्मं समुद्दिष्टमस्य स्वरविलोमजम् AhirbuS. 57. 27.

अतिब्राह्मण (ati-brāhmaṇa) *m.* excellent Brahmin अतिब्राह्मण: अतिवृषल: MahāBh. i. 416. 10 (*on* ii. 2. 18)

अतिब्रुवत् (ati-bruvat) *adj.* **i** arguing beyond the limit सावयवा: परमाणव इत्यतिब्रुवता कार्यविशेष: परमाणुरित्युक्तम् TātpaṬ.(Vā.) 650. 19 (*on* iv. 2. 24); **ii** abusing, insulting एवं शिवेऽतिब्रुवति ब्रह्मण: पञ्चमं शिर: ।··· प्रोवाच BhaviP. 51B. 18 (i. 22. 13); **iii** crying aloud धावन्तोऽतिब्रुवन्तश्च··· गजाश्वरथमर्दिता: । निपेतु: प्रधने वीरा: KalkiP. iii. 8. 30.

अतिब्रू (ati-brū-) II. U. **i** to insult, to abuse, to speak arrogantly, to dispute महारथानधिक्षिपन् (v. l. अतिब्रुवन् MW.) मूढ न लज्जसे कथम् MahāBhā. iii. 252. 2; (वानरा:) परस्परं केचिदतिब्रुवन्ते Rāmā. v. 59. 15; **ii** to speak too much न वृद्धान्न गुरून्न गणान्न नृपान् वाधिक्षिपेत्, न चातिब्रूयात् CaraS. i. 8. 25 (1941 Ed.)

[1]**अतिभक्त** (ati-bhakta) *adj.* divided, shared अतिभक्तं त्वया सार्धं राज्यं यच्चापि मे वसु Rāmā. vii. 11. 33.

[2]**अतिभक्त** (ati-bhakta) *adj.* extremely devoted, staunch devotee येनातिभक्त: संसारादुत्तारयति संकटात् PauṣkS. 31. 154; 36. 22; भृत्येषु चातिभक्तेषु मित्रवर्गे तथा मृते । भद्रे दु:खमपारं मे भविष्यति MārkP. 110. 16; अतिभक्तानां नादेयं विद्यते मम SūrySi. 12. 11; प्रणेमुरतिभक्ताश्च गोपा: BrahmVaiP. ii. 11. 28; अतिभक्तस्य गुह्यस्य कुलज्ञानं प्रकाशते KulārT. 2. 33; दर्शितं तेन ···। मुद्गलस्यातिभक्तस्य ··· आश्रमम् GaṇeP. i. 21. 7; विष्णुना मेऽतिभक्तेन यदिदानीमुदीरितम् S'ivaP. ii(2). 19. 43 (91B. 4); सुकुमारोऽतिभक्तो मे भरत: AdhyāRā. vi. 13. 43; कुलीनोऽस्म्यतिभक्तोऽस्मि PariPar. 7. 92.

अतिभक्तत्व (atibhakta-tva) *n.* great or extreme devotion कृतार्थमतिभक्तत्वादमुं मन्ये तदा गुरुम् PauṣkS. 30. 200.

अतिभक्ति (ati-bhakti) *f.* great or extreme devotion अतिश(v. l. भ)-क्त्या पितॄनर्चन्देवांश्च प्रयत: सदा MahāBhā. i. 70. 30; अतिभक्त्या च मासमेकं शृणोति य: BrahmVaiP. i. 19. 75; (महामुनि:) अतिभक्त्या तु तीर्थस्य प्रवणीकृतमानस: VāmaP. 43. 14; भक्तो न गणयामीदमतिभक्तिश्च नेष्यते MahāP. 1. 167; अतिभक्तिं तु संचिन्त्य नृपस्य जगदीश्वरं BrahmP. 59. 13; आराध्यतेऽतिभक्त्येति त्वया ब्रह्मन् विमर्शितम् PadmP. iv. 71. 100; (भूशुण्ड:) अतिभक्त्या मृत्युलोके सादृश्यं प्रापितो मम GaṇeP. ii. 16. 13; विलोक्य मिश्रं शिवयो: स्वरूपं सर्पाधिराजो मिलितोऽतिभक्त्या RājTa.(Prā.) 2; न द्वेषो नातिभक्ति: प्रियेष्वपि BhaktıRaSi. iii. 1. 19; अतिभक्तिमेव करिणस्त्वमग्रही: YātrāPra. 3. 231; अतिभक्तिमधिगम्य बिभीषणस्य ।···अभ्यषेचयत् MahāN. 6. 73; श्रद्धातिभक्तौ KośaKaTa. 2. 6012; *m.* प्रसादितात्तथा देवैर्गौतमादतिभक्तिना Dhūrtā. 361; *adj.* full of great devotion or attachment (तया) इक्षुलतामेकां प्रार्थितेनातिभक्तिना ।··· समर्प्यत PrabhāC. 147. 8.

अतिभक्तितस् (atibhakti-tas) *adv.* with great devotion, out of excessive faith श्राद्धस्य मन्त्रा: श्रद्धा च उपयोज्यातिभक्तित: MatsyaP. 19. 4; (कान्ताम्) मांसादिभक्ष्यभोज्याद्यैस्तोषयेद् देवि (v. l. अति)भक्तित: KulārT. 10. 43; जिनं नत्वातिभक्तित: BṛKathāK. 93. 7; करोतु पूजामतिभक्तितोऽर्हताम् SubhāRaSaṁ. 143; सोऽपि सततं माम् उपास्तेऽतिभक्तित: DevīBhāP. vi. 22. 56; दृष्ट्वा ननाम भरत: साष्टाङ्गमतिभक्तित: AdhyāRā. ii. 8. 42; आहूय गन्धमाल्याद्यैर्विधिना चातिभक्तित: CaturCin. i(1). 613. 13; अतिभक्तित: । विचक्रे पञ्चधात्मानं द्वितीयस्वर्गवासव: TriṣaS'aPuC. ii. 2. 482; किरणवेगस्तं नमश्चक्रेऽतिभक्तित: PārśvC. 2. 40; एताभ्यां वन्दितो दूरं वीक्षितश्चातिभक्तित: SamarāSaṁ. 8. 313; श्राद्धा: ··· प्रणेमुरतिभक्तित: PrabhāC. 31. 21; श्राद्धं कृत्वातिभक्तित: MahāNirvāT. 10. 92.

अतिभक्तिता (atibhakti-tā) *f.* nature of having great affection or devotion अतिभक्तितया मां त्वं मोक्षेऽपि न जिहासि BṛĀraUBhVā. ii. 4. 67.

अतिभक्तितोषित (atibhakti-toṣita) *adj.* propitiated with great devotion अतिभक्तितोषितहरलब्धवर: (वीरसेन:) NalaCam. 4. 9 (41)

अतिभक्तिप्रकाशन (atibhakti-prakāśana) *n.* name of Bālakṛṣṇa अतिभक्तिप्रकाशन: (इति नामसहस्रं विष्णोर्बालकत्वमुपेयुष:) PañcaRā.(Nā.) iv. 8. 12.

अतिभक्तिप्रभाव (atibhakti-prabhāva) *m.* power of great devotion अतिभक्तिप्रभावाच्च वाञ्छितं संप्रयच्छति PauṣkS. 38. 58.

अतिभक्तिभाज् (atibhakti-bhāj) *adj.* greatly devoted निमेषमात्रमपि यो ह्यतिमुक्तेऽतिभक्तिभाक् ।··· तेन तप्तं महातप: SkandP. iv. 25. 60.

अतिभक्तिमत् (atibhakti-ma(n)t) *adj.* having deep devotion शान्तचित्तोऽतिभक्तिमान् ।··· प्रविशेच्छनै: KulārT. 12. 83; अतिभक्तिमानसावनुपलब्धकुमारकुशलवृत्तान्तो न जाने किं व्यवस्यति TilaMañ. 195. 13; राजा संभृतसंभार: सपत्नीकोऽतिभक्तिमान् GaṇeP. i. 75. 4; वैश्योऽतिभक्तिमान् । जुहावासौ निजं मांसम् DevīBhāP. v. 35. 28.

अतिभक्तिवश (atibhakti-vaśa) *m.* [Abl.] on account of deep devotion उपदेशमेनमतिभक्तिवशादुपशृण्वतां शमवतां सविधे S'ivLī. 17. 43.

अतिभक्षण (ati-bhakṣaṇa) *n.* over-eating लवणातिभक्षणाद्वा ··· शोफा: प्रादुर्भवन्ति CaraS. i. 18. 5 (1922 Ed.); शुण्ठ(? ण्ठ्य)म्भसोऽनुपानं स्यादाम्राणामतिभक्षणे BhāvPra.(Bhā.) 6 (7). 14.

अतिभक्ष्यचारिन् (atibhakṣyacār-in) *adj.* wandering for more food कपालपाणय: पिशाचयक्षराक्षसा: । वदन्ति देहि ··· ममातिभक्ष्यचारिण: MatsyaP. 153. 144.

अतिभग्न (ati-bhagna) *adj.* utterly shattered नातिभग्नं पीडयेत् NitiVā. 30. 66.

अतिभङ्ग (ati-bhaṅga) *m.* total destruction तृष्णास्रोतोवि(v. l. ऽति)-भङ्ग: ··· श्रेयसामेष पन्था: S'atTrayī. 3; *n.* extremely bent pose (of an idol) अतिभङ्गमिहोच्यते । पार्ष्ण्यन्तरं शराङ्गुल्यं तत्पादाङ्गुष्ठयोरग्रके । तद्वयोर्मध्यमे विंशदङ्गुल्यं द्व्यन्तरं भवेत् । तज्जानुद्वयोर्मध्ये द्व्यन्तरं द्वादशाङ्गुलम् । ··· एवमतिभङ्गं स्यात् MānaSā. 67. 59; ĪśānS'iPa. ii. 43. 50; *adj.* having the bent pose समभङ्गोऽतिभङ्गो वा भवेद्वृषभवाहन: ।···वामपादोऽथ कुञ्चित: ĪśānS'iPa. ii. 43. 29.

अतिभङ्गुर (ati-bhaṅgura) *adj.* [*f.* -ā] **i** extremely transcient or perishable (ज्ञात्वा) संपत्तिमतिभङ्गुराम् SkandP. iv. 26. 73; PadmP.(Ra.) 113. 33; (वासना) विद्युद्वदतिभङ्गुरा YogVā. iii. 113. 24; स च विशिष्टादिरस्थिर: क्षण: प्रकृतेरेवातिभङ्गुर: YogS'ā. 74. 13 (4); **ii** extremely tremulous or wavy (सद्रापीमपश्यत्) भ्रूक्षेपानिव कुर्वाणां तरङ्गैरतिभङ्गुरै: PadmP.(Ra.) 8. 94; Mugdhopa. 47.

अतिभजनकृत् (atibhajana-kṛt) *adj.* greatly devoted स्वान्ते योऽन्त:पुरीयत्यतिभजनकृतस्तं कुमारीयति द्राक् । तं भजामि CitraMī. 26. 12.

अतिभजमान (ati-bhajamāna) *adj.* excessively enjoying स्त्रियमतिभजमाने भवत्यवश्यं तृतीया प्रकृति: NitiVā. 16. 5.

अतिभणित (ati-bhaṇita) *adj.* entreated greatly तेनातिभणितोऽप्येवं भीभो(? मो) नामुञ्चदाग्रहम् PārśvC. 2. 213.

अतिभद्र (ati-bhadra) *adj.* very auspicious स: ··· स्वात्मानमेषां ददाति ··· अतिभीषणोऽतिभद्र: NṛsiṁhoTāU. 7; (देव्या) न तया । ख्याति यया जनता ··· अतिभद्रकालीनतया DeviS'. 43; भीमाकारोऽप्यतिभद्र: ··· वीरभद्र: ĪśānS'iPa. ii. 12. 70; *n.* front projection (दिशास्वस्तिकसंस्थानम्) मुखेऽमुखेऽतिभद्रांशं शिरश्चायतमण्डलम् MayaMa. 24. 118; सो(? शा)लाया: पार्श्वत: कुर्यादतिभद्रद्वयम् SamarāSū. ii. 74. 6(57)

अतिभद्रक (atibhadra-ka) *adj.* very docile लम्बै: कूर्चैर्दीनैर्वक्त्रैर्मुनय इव शमदमरता भवन्त्यतिभद्रका: Subhāṣi. 2405.

अतिभद्रता (atibhadra-tā) *f.* great nobility सौजन्यपरतन्त्रा चेयं देवानां प्रियस्यातिभद्रता HarṣaC. 40. 6.

अतिभय (ati-bhaya) *n.* great fear एतदौत्पातिकं ग्रामे यस्मिन्··· । तस्मिन् ··· अतिभयं महत् AVPari. 64(8). 2; 70B(21). 1; 64(2). 4; (ब्रह्मण: पञ्चमं शिर:) अपश्यत्···रौद्रमतिभयात् SkandP. v(1). 2. 68; Kād. 29. 18; S'ivāL. 32; RāmC. 16. 9; KalāVi. 7. 21; GītGo. iii. 7. 3 (comm. अतिशयितभीत्या); द्विजा व्योमाध्वगं तं च दृष्ट्वातिभयतोऽनशन् PrabhāC. 36. 17; RājTa.(S'rī.) 4. 636; CaitaCa. 183. 10(8); व्यलोकि धृष्टो मयाप्यतिभयात् PadyaVe. 407; 434; *adj.* [*f.* -ā] **1** very dreadful (वनम्···संपरिक्षिप्तम्) पिशितादैरतिभयैर्महोग्राकृतिभिस्तथा MahāBhā. xi. 18*(7); वैष्णव्योऽतिभयाश्चान्या: क्रूररूपा भयंकरा: MahāBhā. ix. 272*(1); विमुक्तोऽतिभयात् ··· संसारसंकटात् DevīBhāP. iii. 12. 78; GītGo. iii. 7. 3; **2** full of great fear मामियं चलिता विलोक्य वृतं वधूनिचयेन । सापराधतया मयापि न वारितातिभयेन GītGo. iii. 7. 3 (Rasikapriyā मयेत्यस्य विशेषणम् । अतिक्रान्तं भयमिति वधूनिचयविशेषणं वा)

अतिभयंकर (ati-bhayaṅkara) *adj.* [*f.* -ā, -ī] very fierce, very terrible, very dreadful (living being) अतिभयंकर: । प्रवृद्ध: सहसा पक्षी महाकाय: MahāBhā. i. 20. 5; राक्षसी वा पिशाची वा यक्षी वातिभयंकरी MahāBhā. iii. App. 11(61); द्वारपालौ ददर्शातिभयंकरौ BrahmāṇḍP. ii. 32. 12; ii. 35. 27; iii. 23. 33; iii. 24. 50; (रुद्र:) अर्धनारीनरवपु: ··· अतिभयंकर: KūrmaP. 99. 1 (1. 11); VarāP. 2. 49; सा तैलाभ्यङ्कितं मां च करोत्यतिभयंकरी BrahmVaiP. iv. 63. 18; द्वीपिनोऽतिभयंकरा: PadmP. iv. 59. 6; दुर्निरीक्ष्यस्तदा रामो बभूवातिभयंकर: BṛDharmaP. i. 22. 48; i. 60. 64; आधारशक्तिं स ततोऽप्यतिभयंकराम् । दृष्ट्वा चकम्पे GaṇeP. ii. 52. 51; AdhyāRā. vi. 8. 26; BṛKathāMañ. 5. 116; अतिभयंकरम् राक्षसमेकमपश्यत् SiṁhāDvā. 108. 12(15); 35. 4(6); 154. 9(2); (inanimate object) परशुम् ··· जग्राहातिभयंकरम् Rāmā. vi. 1955*(2); अगा-

धातिभयंकरेषु …कूपेषु जलं सुदुर्लभम् KalyāKā. 2. 23; संसारविषवृक्षः …अतिभयंकरः SaurP. 32. 44; (निमित्तानि) नाशहेतूनि … मेघा अतिभयंकराः AdhyāRā. vi. 5. 28; RāmāCam. 3. 13(16); (action desire etc.) नमो भगवते चण्डप्रतापहनुमते … अतिभयंकरज्वरमाहेश्वरज्वर° … °श्रमिकापस्मारांश्च भेदय LāṅgU. 214. 23; संग्रामो बभूवातिभयंकरः MahāBhā. ii. 24. 25; vi. 53. 11; ix. 50. 34; BrahmāṇḍP. ii. 24. 80; VāmaP. 9. 31; परदाराभिलाषः … अतिभयंकरः PadmP.(Ra.) 46. 123; RāmāCam. 6. 41; RāmāMañ. 117. 18; (नरकान् प्राप्य) घोरानति तीव्रवेदनापादकत्वेनातिभयंकरान् Mitā. 400. 20 (*on* 3. 206); अत्यद्भुतमतिभयंकरं नृत्यम् LalitāSaBh. 72. 12 (*on* 103); राक्षसोऽतिभयंकररूपः SiṁhāDvā. 109. 12 (30); 116. 14(20)

अतिभयंकरम् (ati-bhayaṅkaram) *adv.* very terribly (दानवस्य शिरः) चक्रच्छिन्नम् … ननादातिभयंकरम् MahāBhā. i. 281*.

अतिभयचकित (atibhaya-cakita) *adj.* [*f.* –ā] startled with great fear नीत्वा गीर्वाणबालानतिभयचकितानुच्चकैर्धावमानः … सिन्धुरास्यः PadyaVe. 9; अतिभयचकिताप्यागता केलिकुञ्जे…नताङ्गी PadyaVe. 414.

अतिभयजनक (atibhaya-janaka) *adj.* causing great fear लोकशिक्षार्थं यद्यपि भवतामिदमुचितमेव तथापि नोऽतिभयजनकमेतत् CaitaCa. 183. 10(8)

अतिभयजनन (atibhaya-janana) *adj.* causing great fear अतिभयजननम् … शबरसैन्यमद्राक्षम् Kād. 29. 18.

अतिभयद (atibhaya-da) *adj.* causing great fear or panic सकलामरातिभयदः क्ष्वेलः … कण्ठदेशे भृतः … शंभो S'ivāL. 32; अतिभयदेषु भयार्तम्। सानुसंधिषु पपात … कुञ्जरयूथम् RāmC. 16. 9; KalāVi. 7. 21; शस्त्रममुना … परिकलितमेतदतिभयदम MohaRāPa. 5. 63; राज्यविपर्ययोऽतिभयदः RājTa.(S'rī.) 4. 636; अतिभयदो भीषणास्यः … अघोरः S'ilpaRa. ii. 22. 189.

अतिभयदायक (atibhaya-dāyaka) *adj.* causing great fright भवदीयमिदं रूपं दृष्ट्वातिभयदायकम्। भयोद्विग्ना वयं सर्वे SkandP. ii(1). 38. 30.

अतिभयप्रदा (atibhaya-pradā) *adj.* (*f.*) causing great fear सा वीराशंसनं युद्धभूमिर्यातिभयप्रदा AmaK. 16. 67.

अतिभयभ्रान्त (atibhaya-bhrānta) *adj.* rolling due to great fear न यत्र स्थेमानं दधुरतिभयभ्रान्तनयनाः … करटिनः BhāmiVi. 1. 30.

अतिभययुत (atibhaya-yuta) *adj.* having great fear क्वचिदतिभययुतरुरुहितगगनम् … दयिते वनं पश्य PadmP.(Ra.) 42. 47.

अतिभयविह्वल (atibhaya-vihvala) *adj.* perturbed with great fear कृशोऽतिभयविह्वलः। मन्दिरं स्वं जगामाशु न लेभे दानवः सुखम् DevīBhāP. iv. 23. 14.

अतिभयसमय (atibhaya-samaya) *m.* association with great fear वृक्षेष्वद्यापि बाणासनचकितभिया रामनामादिवर्णे राकारामादिशब्देष्वतिभयसमयान्न क्वचिन्निर्वृतिर्मे DaśāvaC. 7. 124.

अतिभयाकुल (atibhayākula) *adj.* [*f.* –ā] full of great fear ब्रह्माण्डक्रमणं कृत्वा निर्विण्णोऽतिभयाकुलः।… ब्रह्माणं शरणं ययौ BrahmVaiP. iv. 25. 56; कंसश्च चण्डिकावाक्यमाकर्ण्यातिभयाकुलः।…हितं मेने पापो बालादिहिंसनम् ĀdiP. 6. 11; सप्तद्वीपान्विता पृथ्वी चचालातिभयाकुला S'ivaP. ii(2). 35. 17.

अतिभयातुर (atibhayātura) *adj.* [*f.* –ā] troubled with great fear ततस्तमतिघोराक्षमवेक्ष्यातिभयातुराः। गोपा गोपस्त्रियश्चैव कृष्ण कृष्णेति चुक्रुशुः ViṣṇuP. v. 14. 7; BrahmP. 189. 51.

अतिभयानक (ati-bhayānaka) *adj.* [*f.* –ā] extremely terrifying, very dreadful कबन्धा नर्तनं चक्रुः शतशोऽतिभयानकम् PadmP.(Ra.) 62. 55; AvantiKa. 42. 12; पलायनपराः केचित्तां दृष्ट्वातिभयानकाम् GaṇeP. ii. 21. 54; नाहं बिभेम्यजित तेऽतिभयानकास्यजिह्वार्कनेत्रभ्रुकुटीरभसोग्रदंष्ट्रात् BhāgP. vii. 9. 15; मेघा वर्षन्त्यतिभयानकाः SkandP. ii(9). 25. 50; तयोः परस्परं युद्धं बभूवातिभयानकम् DevīBhāP. v. 31. 51; रथकारोऽपि तमतिभयानकं सिंहं दृष्ट्वा … प्रोवाच Pañcā. 81. 6; भैरवोऽतिभयानकः VīraMi. (Lakṣaṇa.) 32. 11.

अतिभयाभिपीडिता (atibhayābhipīḍitā) *adj.* (*f.*) afflicted with great fear इतीव सर्वा रजनीचरस्त्रियः …। विषेदुरार्तातिभयाभिपीडिताः Rāmā. vi. 82. 39.

अतिभयावह (atibhayāvaha) *adj.* [*f.* –ā] bringing great fear, very dreadful भवत्यग्निरधूमो वा तथैवातिभयावहः AVPari. 70B(21). 1; सप्ताहाभ्यन्तरे कम्पे मारुतेऽतिभयावहे AVPari. 64(2). 4; ईदृशी प्रमदा दृष्टा मया चातिभयावहा MatsyaP. 131. 30.

अतिभयोद्विग्न (atibhayodvigna) *adj.* dejected with great fear दृष्ट्वा तां दैत्यनिर्मिताम्। बभूवातिभयोद्विग्नः DevīBhāP. v. 6. 9.

अतिभर (ati-bhara) *m.* great burden, heavy load संभाव्य त्वामतिभरक्षमस्कन्धं स बान्धवः। सहायमध्वरधुरां धर्मराजो विवक्षते S'iśuVa. 2. 103; यो वै ममातिभरमासुरवंशराज्ञामक्षौहिणीशतमपानुददात्ममन्त्रः BhāgP. i. 16. 34; अतिभरेण विस्फुटितशेफालिकाकुसुमैः स्वीकृतास्रवन्मधुरसाकारेण सततवृष्टिः UdaySuKa. 26. 17; गत्वोपभूपमालोक्य कुमारं वेदनातुरम्। विनष्टनासिकं कुष्टरोगस्यातिभरादिव MalliC. 7. 513; रात्रेर्मध्यभरे भरत्यतिभरात् भेरीभरे निर्भरे गर्जति…शास्ताखानसमान आसुरवरश्रेटीचपेटीकृतः ParamāKā. 4. 29; *adj.* heavily burdened, carrying a great load धरस्योद्धर्तासि त्वमिति ननु सर्वत्र जगति प्रतीतस्तत्किं मामतिभरमधः प्रापिपयिषुः S'iśuVa. 5. 69; मालवेश्वरः … त्वच्चरणकमलरेणुनिकरनिचितमतिभरमिव दुःखदुःखेन शिरोऽवहत् AvantiKa. 38. 9.

अतिभरविवश (atibhara-vivaśa) *adj.* helpless due to a heavy burden अतिभरविवशस्य भोगिभर्तुस्तदिव सहायदशां प्रयातुमीषुः PṛthvīVi. 10. 23.

अतिभरसहन (atibhara-sahana) *n.* bearing of a heavy burden अतिभरसहनप्रवृद्धकीर्तिद्विषमिव शेषम् … मत्वा … तत्करभकुलं हयसंघमन्वयासीत PṛthvīVi. 10. 12.

अतिभरसुरभि (atibhara-surabhi) *adj.* extremely fragrant नीत्वोच्चैर्निक्षिपन्तः … परागान् कौन्दानां नन्दितालीनतिभरसुरभीन् भूरिशो दिङ्मुखेषु। … हैमना वान्ति वाताः SūktiMu. 63. 21.

अतिभरस्फुटितोदर (atibhara-sphuṭitodara) *n.* belly split open by the heavy burden जलधिवारि निपीतवतो भृशं वनमुचो रुधिरस्रवलोहिताः। अतिभरस्फुटितोदरनिर्गता विबभुरन्त्रलता इव विद्युतः JānaHa. 11. 61 (Ceylon Ed. 1967) = SūktiMu. 61. 19.

अतिभरान्वित (atibharānvita) *adj.* accompanied with excessive burden रेणूनतिभरान्वितान्। …धमित्वा रवकांश्चरेत् RasRaS. 5. 222.

अतिभरावसन्न (atibharāvasanna) *adj.* sinking with excessive burden कृष्णस्य गर्भजगतोऽतिभरावसन्नम् …। दृष्ट्वाहिमाद्यमुपसेदुरमुष्य पत्न्यः BhāgP. x. 16. 31.

अतिभरित (ati-bharita) *adj.* [*f.* –ā] well filled, well developed अतिभरितोरुभागभारवहनखेदेनेव तनुतरजङ्घाकाण्डम् (युवानमद्राक्षीत्) HarṣaC. 36. 6; स एव विसर्गः स्वसत्तानन्तरीयकतयैव तथैवातिभरितया सत्तया प्रसरन् द्रागित्येव हकलामयः सम्पद्यते ParāTri. 197. 4.

अतिभर्जय् (ati-bharjay-) (*caus.*) cf. **अतिभ्रस्ज्.**

अतिभर्त्सयत् (ati-bhartsayat) *adj.* scolding severely पिता माता निनिन्दाथ मूर्खं तमतिभर्त्सयन् DevīBhāP. iii. 10. 61.

अतिभव (áti-bhava) *n.* loss of worldy existence भ॒वे भ॑वे॒ नाति॑भवे भजस्व॒ माम् TaiĀ. x. 43. 1 (864. 1) (Sāy. जन्मातिलङ्घननिमित्तम्) = MahānāU. 17. 1; *adj.* who has overcome mundane existence भवतु भवे भवे मम भवेऽतिभवेऽभिरतिः YātrāPra. 3. 103.

अतिभवकत् (ati-bhavakat) *adj.* who has excelled you (in a derogatory sense) अतिक्रान्तो भवकन्तमतिभवकानितिवत् SiddhāKau. 52A. 7.

अतिभवती (ati-bhavatī) *adj.* (*f.*) (woman) surpassing you भवती अतिभवती MahāBh. i. 183. 23 (*on* i. 1. 72); KāśiVṛ. *on* P. i. 1. 72; P. *on* iv. 1. 4; JaineVyā. 150. 28 (*on* iii. 1. 4); CāndraVṛ. *on* iii. 3. 15; अतिभवतीति। भवन्तमतिक्रान्ता Pradī. iv. 32B. 8 (*on* iv. 1. 4); PrakriKau. i. 323. 3; Prasā. i. 62. 18; PariVṛ.(Sī.) 109. 13.

अतिभवानीवल्लभ (ati-bhavānīvallabha) *adj.* surpassing (S'iva) the Lord of Bhavānī अतिभवानीवल्लभं रामभद्रचरितम् BālRā. 3. 77(78)

अतिभव्य (ati-bhavya) *adj.* [*f.* –ā] very noble or auspicious or handsome सा गङ्गा कस्य सेव्या न भवति भुवने सज्जनस्यातिभव्या VijñāS'. 68; अतिभव्यां भालस्थलीं बिभ्राणा (युवतिराजगाम) UdaySuKa. 67. 15; KathāSaSāg. ix. 6. 54; यस्येयं गुणसंपदस्ति महती तस्यातिभव्यस्य ते संरब्धत्वमसद्गुमद्गुकलहे नाहं सहे हंस हे S'ārṅgaPa. 813.

अतिभस्त्रका (ati-bhastrakā) *adj.* (*f.*) surpassing the bellows भस्त्रादीनामापः स्थानेऽतः के परत आप्यसुप इत्त्वं वा भवति … अतिभस्त्रिका। अतिभस्त्रका CāndraVṛ. *on* vi. 1. 72.

अतिभस्त्रिका (ati-bhastrikā) *adj.* (*f.*) surpassing the bellows, CāndraVṛ. *on* vi. 1. 72.

अतिभा (ati-bhā-) II. P. **i** to shine brightly य॒था॒ सूर्यो॑ अ॒ति॒भाति॒ य॒था॑स्मि॒न्तेज॒ आहि॑तम् AV. x. 3. 17; सा एषा विद्युत्। … अथ यत्परमतिभाति स पुण्यकृत्यायै रसः JaimiUBr. i. 30. 4; कर्णोऽपि विबभौ (v. l. कर्णस्त्वतिबभौ) MahāBhā. vii. 47. 3; राज्ञो (दशरथस्य) नातिबभौ रूपं ग्रस्तस्यांशुमतो यथा Rāmā. ii. 37. 12; कान्ते कमलनिलया श्रीधरेवातिभासि NāṭyaS'ā. 15. 110; अतिभाति विशालाक्षी … यथा षोडशवार्षिकी PadmP. ii. 19. 55; MahāP. 23. 87; ĀnandRa. 2. 48; **ii** to excel, to outshine (fig.) ज्योतिरिव ह वा एषोऽन्येषु मनुष्येष्वतिभाति यस्सूयते JaimiBr. 2. 197; सर्वान् गुणानेष गुणोऽतिभाति Mahā-

Bhā. v. 35. 46 (MahāBhārDī. अतिक्रम्य प्रकाशते)

अतिभागव्यवस्था (atibhāga-vyavasthā) *f.* settlement of share of property अतिभागव्यवस्थायाम् ··· ग्राह्यो मासस्तु सावन: BhaviP. 355A. 18 (ii(2). 6. 8)

अतिभाग्य (ati-bhāgya) *adj.* very fortunate धन्योऽहमतिभाग्योऽहं पावितोऽहं महात्मभि: DevīBhāP. i. 2. 1; *n.* great fortune य: केनाप्यतिभाग्येन जातश्रद्धोऽस्य सेवने BhaktiRaSi. i. 2. 5.

अतिभाग्यशालिन् (ati-bhāgyaśālin) *adj.* very fortunate बाहुमध्यमतिभाग्यशालिन: कस्य वा पुनरलंकरिष्यति (सा) Nalābhyu. 3. 30.

अतिभाग्यसंपद् (ati-bhāgyasampad) *f.* affluence of good fortune अहो प्रजानामतिभाग्यसंपद् यासां त्वमेवं नरदेव गोप्ता JātaMā. 87. 17 (13. 42)

अतिभाग्याधिकत्व (atibhāgyādhika-tva) *n.* excess of good fortune अतिभाग्याधिकत्वेन लघिष्ठोऽपि गुरुर्भवान् । ··· गृहाण राज्यमेतच्च तव भाग्यै: समर्पितम् PārśvC. 7. 729.

अतिभानु (ati-bhānu) *adj.* excelling the sun सैहं पीठम् ··· त्वां द्युतिमिद्धामतिभानुं तन्वानं तद् भाति विभोस्ते MahāP. 23. 147; *m.* name of one of the sons of Kṛṣṇa and Satyabhāmā अतिभानुस्तथाष्टम: । श्रीभानु: प्रतिभानुश्च सत्यभामात्मजा दश BhāgP. x. 61. 10.

अतिभानुमत् (ati-bhānuma(n)t) *adj.* excelling the sun सुतो जज्ञे ···तेजसा चातिभानुमान् PrabhāC. 28. 28.

अतिभार (ati-bhāra) *m.* **1 A** excessive weight, great load, heavy burden अतिभारोऽभवद्भूमेर्भारती तत्र निर्मिता NāṭyaŚā. 20. 11; शकटस्य चातिभारात् ··· संजीवक: ·· निषसाद Tantrākhyā. 3. 19 = Pañcā. 4. 2; PañcT. 4. 17 (387. 32); उरुजघनस्थलातिभारात् Kirātā. 10. 60; तदतिभारनामितं वा ··· शिर: AvantiKa. 57. 9; (बिभेद) भित्तिमश्मघटितामतिभारात् RāmC. 16. 55; हे नागराज ··· °पर्यङ्कबन्धनविधेस्तव कोऽतिभार: KāvyMī. 88. 20 = VakroJī. 73. 2; अतिभार: ··· पशु(? शू)नामकाले मरणकारणम् NītiVā. 8. 10; नृपातिभारेण नितम्बिनीनां विमानरत्नानि पुरो नमन्ति NavaSāC. 14. 36; BhaviP. 284A. 16 (i. 191. 12); भुवो नामातिभारोऽयम् BrahmP. 210. 23; लोका: कुकर्मण्यतिरागिण: । यदा तदातिभारो मे भवत्येव जगद्गुरो । श्रुत्वेति वाक्यं धरणे: ĀdiP. 14. 148; रजकोऽतिनिर्दयो मामतिभारेण पीडयति Pañcā. 237. 6; DvyāśraKā. 2. 72; स्तनविनिहितमपि हारमुदारम् । सा मनुते कृशतनुरिव (v. l. रति) भारम् GītGo. iv. 9. 1; हिंसया हि शरीरिण: । पोता इवातिभारेण मज्जन्ति नरकार्णवे TriṣaŚaPuC. i. 1. 586; i. 1. 590; आरोपितोऽतिभारो हि गात्रभङ्गाय जायते PariPar. 8. 145; आक्रान्तोद्यानहर्म्यस्थलमणिभवना चौर्नेनामातिभारात् RāghPāṇ. (Ka.) 11. 12; (गजदन्तहस्त:) स्तम्भग्रहेऽतिभारे च श्रीसोढलसुतोदित: SaṃgīRa. iv. 56. 6 (7. 207); SūktiRa. 102. 3; CaitaCan. 211. 16(9); स्वप्नातिभाराध्वगमनात् ··· नयनरोगा गजानाम् Hastyāyur. 138. 26 (1. 18); 246. 5 (2. 39); **1 B** heavy strain, great pressure (intellectual etc.) न बुद्धीन्द्रियाणामतिभारमादध्यात् CaraS. i. 8. 27; नातिभारोऽस्ति नो बुद्धे: BṛĀraUBhVā. iii. 1. 50; **2 A** very heavy task or responsibility नातिभारो हि पार्थस्य केशवेनाभवत्सह MahāBhā. i. 55. 36; iii. 19. 7; न दैवस्यातिभारोऽस्ति MahāBhā. iv. 19. 6 = x. 9. 10; vi. 89. 8; vii. 21. 27; प्रत्युवाच ततो राजन्नभिमन्युमिदं वच: । अतिभारोऽयमायुष्मन्नाहितस्त्वयि पाण्डवै: MahāBhā. vii. 35. 3; vii. 107. 36; भारश्चाप्यतिभारश्च शल्यानां च प्रतिक्रिया । ···सर्वमेतन्मया ज्ञेयम् MahāBhā. viii. 28. 7; xi. 25. 30; नातिभारोऽस्ति दैवस्य सर्वभूतेषु लक्ष्मण Rāmā. iii. 65. 29; न कालस्यातिभारोऽस्ति Rāmā. vi. 38. 19; अतिभारे नियुक्तं वा भङ्क्त्वा परमवस्थितम् । ···कृच्छ्रेण साध्यते मित्रम् ArthŚā. iii. 40. 6 (8. 5); DūtGha. 43; अयम् ··· सरस्वत्या अप्यतिभार: ··· क: खलु ··· शक्नुयादविकलमस्य चरितं वर्णयितुम् HarṣaC. 140. 12; कोऽतिभार: समर्थानाम् TantrāKhyā. 7. 4 = PañcT. 1. 19 (22. 10) = Hitopa. 2. 12 = Pañcā. 7. 22 = SiṃhāDvā. 154. 9; NyāyMañ. i. 376. 26; कोऽतिभारो हरेर्नाम्नि जिह्वया परिकीर्तने AgniP. 200. 17; न ह्येतन्निराकर्तुं सोऽयमतिभार इति पूर्व: पक्ष: AṇuBh. 3. 2 (*on* i. 1. 1); HaṃsSaṃ. 94; अत: परं ममातिभारो लघूभूत: CaitaCan. 116. 1(5); काम: । मधो किमत्र अतिभारमाकलयसि Manmatho. 1. 6 (421. 9); **2 B** excessive strain, heavy load (of meaning) अनेनैव प्रसङ्गोऽनेनैव निवृत्तिरिति अतिभार एकस्यैव वाक्यस्य भवति ŚābaBh. 1527. 11 (*on* vii. 1. 2); विशिष्टविधानस्य नातिभार: TantrVā. 1123. 23 (*on* iii. 6. 45); 604. 22 (*on* ii. 3. 13); 795. 12 (*on* iii. 2. 22); न ह्यस्ति वचनस्य अतिभार: BrahmSūBh.(Śaṅ.) 684. 15 (*on* iii. 3. 4); किं नु खलु ऋग्वेदादीनां ब्रह्मत्वं कुर्वतामतिभारो भवति, न ब्रूम: अतिभार इति NyāyMañ. i. 235. 19; यथाश्रुतमेव तद्व्याख्येयमित्यतिभार: NyāyMañ. ii. 120. 27; Bhām. 220. 13 (*on* i. 3. 19); AbhinBhā. 304. 4 (*on* 6. 45); TantrRa. 202. 8 न हि वचनस्यातिभारोऽस्ति Mitā. 504. 15 (*on* 3. 298); SmṛtiCan. iv. 357. 17; CaturCin. iii(1). 124. 3; NyāyMāVi. 205. 7 (*on* iii. 8. 2); VīraMi. (Samaya.) 16. 11; MayūMāli. 814. 24 (*on* xi. 2. 12); *adj.* [*f.* -ā] of heavy weight, having excessive load तदा धरातिभारा हि कृत्वा गोरूपमद्भुतम् । संप्राप्ता ब्रह्मसदनम् ĀdiP. 14. 143; किं मे ··· देहेन चातिभारेण SkandP. iii(3). 2. 44; शेषाणां (स्तम्भानाम्) चातिभाराणां कुम्भ: स्यात्प्रियदर्शन: ĪśānŚiPa. ii. 31. 52.

अतिभारग (atibhāra-ga) *m.* mule वेसरस्त्वश्वखरज: ··· मिश्रशब्दोऽतिभारग: RājNi. 267. 25; KalpaK. 321. 30.

अतिभारगुरु (atibhāra-guru) *adj.* heavy with a great burden पूर्वं वारिधरप्रसङ्गसमयेनापूरितै: कुक्षिभिर्या गर्भिण्य इवातिभारगुरवो नि:सेव्यतामागता: (नद्य:) SaduktiKa. 179. 5 = SūktiMu. 62. 21 = Subhāṣi. 1825; अद्रि: करप्रकरनिर्गमरन्ध्रमार्गनि:शूषिताभिरतिभारगुरूदरोऽर्क: AmṛUda. 3. 34.

अतिभारगुरुत्व (atibhāraguru-tva) *n.* the state of being heavy due to a great burden or load शकटस्य चातिभारगुरुत्वात् ··· संजीवको युगभङ्गं कृत्वा निषसाद PañcT. 1. 3 (10. 4)

अतिभारता (atibhāra-tā) *f.* the state of having a very heavy task युद्धे समस्तमतिभारतया विपन्नम् PratiYau. 1. 6.

अतिभारधुरंधर (atibhāra-dhurandhara) *adj.* capable of bearing a great burden य एष त्वद्गृहे वोढा ह्यतिभारधुरंधर: SkandP. v(3). 209. 162.

अतिभारप्रसङ्ग (atibhāra-prasaṅga) *m.* contingency of a great weight (i. e. difficulty of significative capacity) ननु जातिविशेषणत्वेन व्यक्तिं च विशेष्यत्वेन वक्ष्यति गोशब्द: । न शक्नोति वक्तुमतिभारप्रसङ्गात् NyāyMañ. i. 293. 1.

अतिभारभङ्गुर (atibhāra-bhaṅgura) *adj.* **i** liable to be broken under a heavy burden लघूकरिष्यन्नतिभारभङ्गुरामम् किल त्वं त्रिदिवादवातर: ŚiśuVa 1. 36; **ii** troubled by a very heavy task इत्थमतिभारभङ्गुरा: सुरासुरा यावदासेदुरन्तिकं दुग्धनिधे: NīlaVi. 75. 19.

अतिभारभूत (atibhāra-bhūta) *adj.* becoming a very heavy burden (i. e. beyond the reach of) धनस्य रत्नस्य च तस्य तस्य कृताकृतस्यैव च काञ्चनस्य । तदा हि नैकान् स निधीनवाप मनोरथस्याप्यतिभारभूतान् BuddhaC. 2. 2.

अतिभारयोग (atibhāra-yoga) *m.* bearing of a very heavy burden (गजदन्त: कर:) एष च वधूवराणामुद्वाहे चातिभारयोगे च । स्तम्भग्रहणे च तथा शैलशिलोत्पाटने चैव NāṭyaŚā. 9. 155.

अतिभारवती (atibhāravatī) *adj.* (*f.*) bearing a very heavy burden याचमानजनमानसवृत्ते: पूरणाय वत जन्म न यस्य । तेन भूमिरतिभारवतीयं न द्रुमैर्न गिरिभिर्न समुद्रै: NaiṣC. 5. 88 = Subhāṣi. 3040.

अतिभारवह (atibhāra-vaha) *adj.* carrying a very heavy burden विख्यातमल्लमोहितमतिभारवहं तथा विकृतगात्रम् । रुधिराङ्कवीक्षिततनुर्जनयति सौरो नरं बुधमे Sārā. 29. 39; अश्वे तु घोडको वाजी ··· अतिभारवहे स्थौरी ParyāŚa. Ra. 2. 297.

अतिभारवहन (atibhāra-vahana) *n.* **i** carrying of a very heavy load इत्थं व्यर्थजलातिभारवहनप्रोद्भूतखेदादिव त्वां मूर्तिं वडवानले जलनिधिर्मन्ये जुहोत्यन्वहम् Subhāṣi. 882; अस्ति कस्यचिद्रजकस्य वस्त्रनयनातिभारपीडया गर्दभोऽवसन्न: (v. l. अस्ति कस्यचिद्रजकस्यातिभारवहनसमर्थ: खर:) PañcT. 3. 31 (286. 5); **ii** putting a very heavy load लोभावेशादधिकभारारोपणमतिभारवहनम् [JainL.]

अतिभारविघटित (atibhāra-vighaṭita) *adj.* separated due to very heavy weight उर्वीपति:···अतिभारविघटिताङ्गुलीसंनिवेशगलितम् ··· रक्तासवकपालम् ··· आददानम् ··· वेतालमद्राक्षीत् TilaMañ. 47. 10.

अतिभारश्रम (atibhāra-śrama) *m.* fatigue due to a very great burden यद्दिव्याभरणोच्चयस्य महिमच्छायाविधाने तथा हर्षात्कम्पयते फणादशशतीमाशीविषग्रामणी: । पर्यस्येत यथा धृतश्रिरमद:प्रत्युप्तरत्नाङ्कुरप्रौढालोकनिरर्थकीकृतमणीवृन्दातिभारश्रम: YātrāPra. 3. 214.

अतिभाराक्रान्त (atibhārākrānta) *adj.* overcome with a very heavy load ततो धनिकेनातिभाराक्रान्तेन महद् हलमुत्पाट्य भूमौ क्षिप्तम् Bharat. 20B. 6.

अतिभारातिसंतप्ता (atibhārātisantaptā) *adj.* (*f*) greatly afflicted with a very heavy burden अतिभारातिसंतप्ता कं त्वाऽहं शरणं गता (मेदिनी) GaṇeP. ii. 6. 3.

अतिभाराधिगम (atibhārādhigama) *m.* acquisition of a very heavy load तथा पथि त्यागमयं वितीर्णवान्यथातिभाराधिगमेन मागधै: । तृणीकृतं रत्ननिकायमुच्चकैश्चिकाय लोकश्चिरमुञ्छमुत्सुक: NaiṣC. 15. 2.

अतिभाराभाव (atibhārābhāva) *m.* absence of a very heavy load (of meaning) वैदिकशब्दस्यातिभाराभावात् TantrVā. 695. 20 (*on* iii. 1. 12); 1118. 6 (*on* iii. 6. 43); वचनस्यातिभाराभावात् ŚāstrDī. 332. 17 (*on* iii. 8. 1); MīmāKau. iii. 258. 1 (*on* ii. 2. 22); MayūMāli. 393. 17 (*on* iv. 3. 18)

अतिभारारोपण (atibhārāropaṇa) *n.* placing an excessive burden or load न्याय्यभारादतिरिक्तभारवाहनमतिभारारोपणम् TattvāRāVār. vii. 25. 4; क्षुधापिपासाशीतोष्णातिभारारोपणादिना । कशाङ्कुशप्रतोदैश्च सहन्ते वेदनाममी TriṣaS'aPuC. i. 1. 575; iii. 4. 124.

अतिभारार्ता (atibhārārtā) *adj.* (*f.*) troubled by a very heavy burden मेदिनी चातिभारार्ता ब्रह्माणं शरणं गता DevīBhāP. vii. 8. 32.

अतिभारिक (atibhār-ika) *adj.* **A** of very great importance यदि न गुह्यं नातिभारिकं वा ततः श्रोतुमिच्छामि MudrāRā. 6. 15 (9); **B** too heavy सर्वं त्वतोयमरुणमशोफं नातिभारिकम् (उदरम्) AṣṭāHṛ. iii. 12. 9.

अतिभारोद्वहन (atibhārodvahana) *n.* carrying of a very heavy load अतिभारोद्वहनात्सलिलतरणात् ··· वातः प्रकोपमापन्नो नयनवहा शिरा निरुणद्धि Hastyāyur. 142. 14 (1. 18)

अतिभाव (ati-bhāva) *m.* great devotion तेन राज्ञा महापूजा जिनानाम् ··· प्रवर्तितातिभावेन BṛKathāK. 115. 3.

अतिभावतस् (atibhāva-tas) *adv.* with great devotion दक्षिणा विविधा दत्त्वा ब्राह्मणेभ्योऽतिभावतः । पाण्डुपुत्राः ···। घोरं दुःखं कथं प्राप्ताः DevīBhāP. iv. 1. 33.

अतिभावनी (ati-bhāvanī) *f.* name of a disease in the trunk of an elephant caused by the saliva of a spider अतो लूताः प्रवक्ष्यन्ते ··· अङ्गुल्यां मेदिनी नाम स्थूलहस्तेऽतिभावनी Hastyāyur. 521. 8 (3. 26)

अतिभावयत् (ati-bhāvayat) *adj.* **i** contemplating deeply (about something) साधोरजनि महेशं किमुपर्यासीत्र तेऽतिभावयतः RasiRañ. 22; शंभुभूपतिः । आबभार सुषमां महत्तरां कालिकोक्तिमतिभावयन् हृदि ParamāKā. 176. 53; **ii** experiencing to a high degree, RasiRañ. 22.

अतिभावस्वरूप (atibhāva-svarūpa) *adj.* having the essential nature which is beyond all entities अतिभावस्वरूपोऽहमहमेव सुखात्मकः TejoBiU. 3. 34.

अतिभाविक (ati-bhāvika) *adj.* possessed of extreme faith, extremely devoted ये नराः कीर्तयिष्यन्ति माहात्म्यमतिभाविकाः SkandP. v(1). 15. 6.

अतिभाष् (ati-bhāṣ-) I. P. (*caus.*) to talk ill of (some one) त्वं कपित्वान्न जानीषे महान्तो विचरन्ति यत् । लोकं पुनानाः सञ्चारैस्तस्मान्नातिभाषयेत् AdhyāRā. iv. 2. 63.

अतिभाषण (ati-bhāṣaṇa) *n.* excessive talk न मे प्रिया यद् बहुमानवर्जिता कृताप्रिया ते परुषाभि(v. l. ति)भाषणैः NāṭyaS'ā. 15. 67 [Ghosh]; अतिस्वप्नमशय्या च तथा चाप्यतिभाषणम् ।··· सर्वमेतदनायुष्यम् BhelaS. 12. 16 (1. 8)

अतिभाषा (ati-bhāṣā) *f.* superhuman language भाषा चतुर्विधा ज्ञेया ··· अतिभाषार्यभाषा च जातिभाषा तथैव च । तत्र योन्यन्तरी चैव भाषा नाट्ये प्रकीर्तिता NāṭyaS'ā. 17. 27; अतिभाषा तु देवानामार्यभाषा तु भूभुजाम् NāṭyaS'ā. 17. 28.

अतिभाषित (ati-bhāṣita) *n.* long or prolix speech प्रवचनं निगमेऽप्यतिभाषिते KośaKaTa. 2. 6584.

अतिभाषिन् (atibhāṣ-in) *adj.* very talkative पृथुनासिकोऽतिभाषी धन्व्यंशे जायते धनाधिपतिः HorāSā. 30. 17; नात्युपविष्टो नाप्यतिभाषी नातिस्थितस्तिष्ठेत् RaseCin. 8. 40 (96. 6)

अतिभाष्य (ati-bhāṣya) *n.* excessive or delirious speech संधारणाजीर्णरजोऽतिभाष्यक्रोधर्तुवैषम्यशिरोऽभितापैः । संस्त्यानदोषे शिरसि प्रवृद्धो वायुः प्रतिश्यायमुदीरयेत्तु CaraS. vi. 26. 104 (1941 Ed.); न चालिप्तमुखोऽतिभाष्यहास्यक्रोधशोकरोदनस्वेदनाश्यातपदिवास्वप्नान् सेवेत AṣṭāSaṁ. i. 161. 19 (1. 31); RugVi. 58. 13; क्षयोपवासाध्वगमातिभाष्यव्यवायवातातपपीडितानाम् । व्यायामिनां वातकफोत्तराणां यन्नारिकेरादुदकं प्रशस्तम् BhojanKu. 188. 4.

अतिभास् (ati-bhās) *adj.* very bright दीप्तं तु दग्धे ज्वलितेऽतिभासि KośaKaTa. 2. 5179.

अतिभासन (ati-bhāsana) *n.* very clear manifestation दूरेऽवभासमानस्य सन्निधानेऽतिभासनम् PramāVāBh. 19. 2.

अतिभासुर (ati-bhāsura) *adj.* [*f.* -ā] very resplendent, very refulgent, very brilliant चित्राश्चाप्यतिभास्वराः (v. l. चैत्याश्चाप्यतिभासुराः) MahāBhā. ii. 3. 15; निस्सृत्य मण्डलान्मित्राद्रश्मिवत्सोऽतिभासुरः PadmP.(Ra.) 17. 146; 19. 136; 85. 132; 118. 44; दीप्यमानेऽतिभासुरे ।···अनन्तभोगशयने शयानं पीतवाससम् PāraS. 6. 194; ददर्श दूरादतिभासुरं शुभम्···रामस्य गेहम् ··· भरतः AdhyāRā. ii. 8. 66; इलाजरंजवीभावमामोक्षमतिभासुरम् । भूयो भूयोऽनुभवति YogVā. iii. 55. 43; v. 42. 24; (सुमुखीं स्वप्नपथेन पार्थिवः ।···व्यलोकयत्) अतिभासुररत्नकुण्डलाम् NavaSāC. 12. 14; तपांसि सः । तेपेतरां तपनवत्तेजोभिरतिभासुरः PariPar. 5. 52; 7. 7; ततोऽर्कोऽप्यतिभासुरः TriṣaS'aPuC. i. 3. 246; i. 5. 701; वज्रं च ··· षट्कोणमतिभासुरम् RasRaSa. 4. 27; जनता ··· अतिभासुरया सुरया व्यहरत् Nalo. 1. 54; प्रसन्नतां सपदि भजन्ति पार्थिवाः । दिनाधिपे दिवसमुखेऽतिभासुरे महीतले Raghunā. 8. 44.

अतिभास्कर (atibhās-kara) *adj.* producing excessive lustre or light निःप्रकाशमिवाकाशे भास्करो नातिभास्करः AVPari. 64(2). 3.

अतिभास्करज (ati-bhāskaraja) *adj.* surpassing the Sun's son (Manu or Karṇa) निशाकरकुलोत्तंसः सोऽतिभास्करजः सदा । प्रभाकरोदये तातं दिवाकरमिवानमत् DvyāśraKā. 11. 60.

अतिभास्करवर्चसा (ati-bhāskaravarcasā) *adj.* (*f.*) surpassing the lustre of the sun यस्मिन् वसति तोये च साऽतिभास्करवर्चसा (जलौका) Hastyāyur. 700. 2 (4. 34)

अतिभास्वत् (ati-bhāsvat) *adj.* extremely bright or brilliant, surpassing the Sun सूक्ष्मातिदूरांतिकस्थातिभास्वद्भिरवाप्रियविकृतादिदर्शनम् ··· मिथ्यायोगः AṣṭāSaṁ. i. 116. 14 (1. 22); शोभते पद्मनाभाख्यः किरीटेनातिभास्वता PadmP. iv. 84. 93; शङ्खचक्रगदापाणेः···मनः शरीरेणातिभास्वता । इदं संचिन्तयामास त्रैलोक्याब्जमहालिना YogVā. v. 38. 6; तेजोऽतिभास्वद्वरतं दधानम् । राजा स शत्रुघ्नमनीलसर्पि प्रास्थापयत् RāghPāṇ.(Ka.) 2. 41; भूपरिक्रमणादन्या भवतामतिभास्वताम् । तमसामिव शत्रूणां निरासे कीदृशी क्रिया Yādava. 22. 16.

अतिभास्वर (ati-bhāsvara) *adj.* extremely radiant or brilliant गङ्गा तं गर्भमतिभास्वरम् । उत्ससर्ज Rāmā. i. 36. 17; दीप्यमानेऽतिभास्वरे ।···अनन्तभोगशयने शयानं पीतवाससम् PāraS. 10. 175; अत्यन्तनिर्मलः सूक्ष्म आत्मायमतिभास्वरः SarvaVeSāSaṁ. 481; (नृपकुमारः) आनन्दाश्रुबिन्दुविसरमतिभास्वरेण रत्नादर्शतेजसा जनितमिति मुहुर्मुहुरुपप्रथत् TilaMañ. 278. 20; 405. 2; अन्येषां चैव देवानां शरीरेभ्योऽतिभास्वरम् । निर्गतम् (तेजः) DevīBhāP. v. 8. 41; सः । ··· संज्वाल्य हुताशमतिभास्वरम् । जुहाव ··· मांसं स्वस्कन्धभित्तितः YogVā. iv. 48. 35.

अतिभास्वरता (atibhāsvara-tā) *f.* the state of being extremely radiant or resplendent अतिभास्वरतया तडिद्दण्डैरिव निर्मितानाम् ··· अङ्गानाम् TilaMañ. 36. 3; 152. 11; 153. 7; 158. 21.

अतिभास्वरत्व (atibhāsvara-tva) *n.* the state of being extremely resplendent or radiant (समरकेतुः) अतिभास्वरत्वादपरिस्फुटविभाव्यमानावयवशोभम् ··· आयतनं ददर्श TilaMañ. 214. 10.

अतिभास्वररोचिस् (atibhāsvara-rocis) *adj.* possessed of very brilliant lustre वर्तन्ते द्वादश कला अतिभास्वररोचिषः BrahmāṇḍP. iii. 35. 86.

अतिभास्वराकृति (atibhāsvarākṛti) *adj.* extremely radiant in form (समरकेतुः) भास्वतेव सेवागतेनातिभास्वराकृतिना प्रभामण्डलेनोद्भासिताम् ··· प्रतिमामपश्यत् TilaMañ. 217. 7.

अतिभिद् (ati-bhid-) VII. U. (*pass.*) to differ very much हिरण्यगर्भपक्षस्तु वेदान्तान्नातिभिद्यते SarvaSiSaṁ. 12. 87; (*caus.*) to cause excessive division अतिभेदयेन्नातिसामं नातिदानं न च स्त्रीषु दण्डो न च मायोपेक्षा कर्तव्या BārhaS. 1. 52.

अतिभिदा (ati-bhidā) *f.* great difference यासाम् ··· नातिभिदा तिरश्चिलः (?) AvantiKa. 125. 11; प्रणमामि चन्द्रसूर्यप्रज्ञप्ती ··· नातिभिदार्थात्मनापि ययोः SiddhāĀSta. 26.

अतिभिन्न (ati-bhinna) *adj.* **i** very different लार्टिडिन्नो नामैते नातिभिन्नाः पिशाचेभ्यः PādaTā. 16. 3; नैयायिकः ··· साधयिष्यति नश्शिवम् । नातिभिन्नं मतं यस्मादावयोर्वेदवादिनोः SarvaSiSaṁ. 5. 37; **ii** not entirely different भिन्नम्–अत्यन्तभिन्नम् अतिक्रान्तो अतिभिन्नः भेदाभेदवान् LaCandr. 678. 33; **iii** crossed over भवेतिभिन्नः कुलपामराणां भवेऽतिभिन्नः कुलपामराणाम् ĪśvaS'. 8.

अतिभिन्नता (atibhinna-tā) *f.* radical difference or complete distinction अतिभिन्नता नारायणेन मुक्तानामपि सम्यक् AnuVyā. 49B. 4 (*on* 3. 3)

अतिभिन्नपुरीष (atibhinna-purīṣa) *n.* excessively loose excrement अतिभिन्नपुरीषश्च अतिस्निग्धस्य लक्षणम् AśvaVai. 19. 9.

अतिभी (ati-bhī) *f.* **i** great fear मध्येछायगृहं बद्धभूमिकस्यातिभीर्यथा । प्रदीपेन PārśvC. 6. 371; राज्ञः ··· भाविनाशादतिभीरनुवर्तते PañcDa. 14. 26; **ii** the flames of the thunderbolt (very terrific) स्फूर्जथुर्वज्रनिर्घोषो वज्रज्वालातिभीः स्मृता AbhidhāRaMā. 1. 57; कुलिशोऽस्यार्चिरतिभीः स्फूर्जथुर्ध्वनिः AbhidhāCin. 181; Liṅgānu.(He.) 60. 2; शम्बार्चिरतिभीरुक्तः स्फूर्जथुर्वज्रनिःस्वनः ParaNā. 225; Liṅgānu.(Para.) 3539; वज्रार्चिरतिभीः स्त्रियाम् KośaKaTa. 1. 421; 2. 2465.

अतिभीत (ati-bhīta) *adj.* [*f.* -ā] very much frightened, greatly afraid of दाम्भिकस्यातिभीतस्य ··· रक्षोऽधमस्य तस्यास्ति कुतः स्वल्पापि शूरता PadmP.(Ra.) 48. 140; सातिभीताब्रवीत्कोऽसि कृपान्तःस्थोऽद्भुतस्वरः VāmaP. 91. 54; अतिभीतस्य तदा मे विस्मयोऽभवत् ĀdiP. 10. 7; किं नासौ मुरजित्सुरा न किममी येनातिभीता प्रिये UdaySuKa. 110. 28; अर्जुनः ··· भीतभीतोऽतिभीतः

भूयस्तं प्रणम्य…आह GītāBh.(Rā.) 553.7 (*on* 11.35); 609.6 (*on* 16.5) क्रोधाद्य-स्यातिभीता दिशि दिशि विहतानन्तसामन्तकान्ताः कान्तारेषु प्रविष्टाः EI. xiv. 301. 33; सा (माया) चातिभीता पुरतो यमेव स्तोतुमक्षमा PañcaRā.(Nā.) ii. 3.13; यद्याङ्गलाग्रकलनात् कुरुराजधानी धानेव धामसहिता चलितातिभीता SātvaT. 2.47; ग्रीष्मग्रासभयातिभीतजनताशौटीर्यदुर्गालयो मार्गः … जयिना प्रोत्तम्भितो मण्डपः EI. vi. 202.22; दूराद्दालोक्य तस्यास्तमाकारमतिभैरवम् । आवाभ्यामतिभीताभ्यां सेयं कृत्येति निश्चितम् PāṇḍaC. 9.321; किं करवाम धामरहिता शीतातिभीता वयम् S'atTrayī. 767.

अतिभीतवत् (atibhīta-vat) *adv.* like one who is very much frightened निवसाम्यतिप्रच्छन्नो मरुत्तादतिभीतवत् SkandP. i(2). 13.55; कद्रवास्तद्वचनं श्रुत्वा विनता ह्यतिभीतवत् । पुत्रमाह … गरुडं विहगाधिपम् BrahmP. 159.31; (सुग्रीवः) दृष्ट्वा लक्ष्मणम् … उत्पपातातिभीतवत् AdhyāRā. iv. 5.51; अतिभीतवद्द्रवति सौरभं ततः Manmatho. 1.2 (419.29)

अतिभीति (ati-bhīti) *f.* excessive fear, great fright प्रायशो भाषणेनातिभीत्या…भवेन्मारुतस्य प्रकोपः HārīS. i. 5.52; (तदनुचराः) अतिभीतिविविसितान्तकरणः(? णाः) श्रेणिकधरणीश्वरायेदं निवेदयामासुः YaśasCam. ii. 305.22; अग्रे धावत्यात्मनाथेऽतिभीत्या … यूथनाथास्तदीयाः … सर्वे प्राद्रवन् Raghunā. 10.40; नातिधैर्यं प्रदातव्यं नातिभीतिश्च रोगिणे KaliVid. 24.

अतिभीतिकर (atibhīti-kara) *adj.* causing great fear मुग्धामनुनयति …नातिभीतिकरैर्वाक्यैः S'ṛṅgāTi.(Ru.) 1.54.

अतिभीतिद (atibhīti-da) *adj.* causing great fear, very frightening सर्पो बभूव सोऽतिभीतिदः BṛKathāK. 78.140.

अतिभीम (ati-bhīma) *adj.* [*f.* -ā] exceedingly terrible or fierce or formidable अग्निः सात्विक्यकर्ता स्यात् … । अर्जुनस्यातिभीमेऽस्मिन् कुरुपाण्डुसमागमे MahāBhā. v. 59.8; vii. 953*(1); viii. 359*(2); अतिभीमा (कृत्या) समागम्य…तं (=प्रह्लादम्) जघानाशु वक्षसि ViṣṇuP. i. 18.34; भुजेऽतिभीमे सशरं शरासनं निधाय वामे JānaHa. 9.29; AvantiKa. 90.9; एष स्त्रैणकपोलकुङ्कुमलिपिस्तेयातिभीरौ (v. l. °भीमे) भुजे विभ्राणः … धनुः AnarghaRā. 4.19; अतिभीमा भैरवाश्चः … शिवस्य पार्षदाः सर्वे BrahmVaiP. ii. 61.44; SkandP. iv. 95.57; सुन्दरं चातिभीमं च रूपं कृत्वा हिमाचले । रक्षांसि भक्षयिष्यामि LakṣmīT. 9.39; पेशलेनातिभीमेन प्रसन्नेनाकुलेन च । …तेजसा रञ्जितप्रभम् (वपुः) YogVā. i. 6.20; निर्गमनं श्रियोऽतिभीमा अरु[ण]दजयमेरुगोपुरस्य … तोरणस्रक् PṛthviVi. 10.38; भीमस्ततो भीम इवातिभीमः । महीमहेलापतितां प्रपेदे VasaViKā. 3.14; वराहा वारिवाहातिभीमाः VīraBhā. 11.44; अस्या दृशि विमलायां तरलतरतारकातिभीमा Hāsyārṇa. 2.25; *m.* **i** name of one of the five *Yajñamus* ('sacrifice-stealer') gods अभीममतिभीमं च भीमं भीमबलाबलम् । एतान् यज्ञमुषः पञ्च देवानभ्यसृजत् तपः MahāBhā. iii. 210.11; (cf. TaiS. III. v. 4.1–2); **ii** lord of the Rākṣasas भीमातिभीमदाक्षिण्यात् ते चान्येऽपि वः कुले । अनुज्ञाताः सुरैः सर्वैः पूर्वमित्येवमागमः PadmP.(Ra.) 6.65.

अतिभीमदन्त (atibhīma-danta) *m.* very fierce tusk रुषा करीन्द्राः । मत्तान्यकुम्भिभ्रमतोऽतिभीमदन्ताभिघातव्यसनं वहन्ति KumāSam. 9.42.

अतिभीमदर्शना (atibhīma-darśanā) *adj.* (*f.*) of an exceedingly terrible or frightful appearance इति (राक्षसीम्) तामतिभीमदर्शनामभिवीक्ष्यो-भयतस्तपोधनम् । धनुषोरवनीभुजः सुतौ सपदि न्यस्तशरावतिष्ठताम् JānaHa. 4.62.

अतिभीमनिर्घात (atibhīma-nirghāta) *m.* extremely fearful or loud thunder-clap दिवोल्का…राजमृत्यवे स्यात् । …अतिभीमनिर्घातो राजमृत्यवे ViṣṇuDhaP. ii. 166.0 (292A. 16)

अतिभीमपराक्रम (atibhīma-parākrama) *adj.* possessing exceedingly formidable power or valour तव भीम बलेनाहमतिभीमपराक्रम । अक्षतः सह पाञ्चाल्या गच्छेयं गन्धमादनम् MahāBhā. iii. 145.2; अतिभीमपराक्रमौ…गणौ-धातृविधातारौ PāraS. 11.29.

अतिभीमवात (atibhīma-vāta) *m.* very strong or violent wind तेनातिभीमवातेन विदूरधरथोऽप्यथ । उह्यमानोऽभवत् YogVā. iii. 49.3.

अतिभीमसेन (ati-bhīmasena) *adj.* surpassing Bhīmasena अतिभीमसेनमनयोः प्राचण्ड्यं प्रेक्ष्य वेपते हृदयम् S'ṛṅgāBhū. 73.

अतिभीय (atibhī-ya) *ger.* becoming extremely frightened यत्रावदत् तामतिभीय भैमी NaiṣC. 6.68.

अतिभीरु (ati-bhīru) *adj.* extremely timid or apprehensive अतिभीरुमतिक्लीबम् … न भजन्ति नृपं श्रियः MahāBhā. iii. 239.4; एष स्त्रैणकपोलकुङ्कुमलिपिस्तेयातिभीरौ भुजे विभ्राणः … धनुः AnarghaRā. 4.19; अतिभीरुभूपालमण्डलमिव वलिभिराक्रान्तमशेषमङ्गम् … आवरीतुं न शक्यते NalaCam. 4.20(2); सुखं चन्दनवनितादिसङ्गजन्म…अतिभीरुणा त्यज्येतापि Bhām. 54.9 (*on* i. 1.1); प्रज्ञया वादिनः सर्वे स्वविकल्पविलासिनः । जयन्ति सुभटप्रख्यान् नरानप्यतिभीरवः YogVā. v. 12.33; सुवर्णरजतानि वा स्वप्ने पश्येद् यदि तदा … अकस्मादतिभीरुर्वा मासानष्टैव जीवति YogS'ā. 5.141; [**अतिभीरु** is given as one of the meanings of **अपोगण्ड**, AnekāSaṁ. 4.71; KośaKaTa. 2.4774]

अतिभीरुक (atibhīru-ka) *adj.* very timid, great coward cf. **अतिभीलुक** अपोगण्डस्तु शिशुके विकलाङ्गेऽतिभीरुके ViśvaPra. 46.39; ViśvaLoK. 96.41; S'abdaRaSaK. 101.1.

अतिभीरुता (atibhīru-tā) *f.* extreme timidity or cowardice किं वा करोतु वराको येनातिभीरुतया … न तु दृष्टान्येव … कुपितानां तेजस्विनां मुखानि HarṣaC. 259.5; सोऽतिभीरुतयात्यन्तं जायते निकृतो नरः PadmP.(Ra.) 54.39; सेयमतिभीरुता सकललोकयात्राविरोधिनी TātpaṬ.(Vā.) 625.23 (*on* iv. 1.54)

अतिभीरुमति (atibhīru-mati) *adj.* very timid or a coward at heart अतिभीरुमतिं दीर्घसूत्रं चातिप्रमादिनम् । व्यसनाद् विषयाक्रान्तं न भजन्ति नृपं प्रजाः S'ukraNī. 1.140.

अतिभीलुक (ati-bhīluka) *adj.* very timid, great coward, cf. **अतिभीरुक** प्रलपत्यतिभीलुकः पितृव्यः Rāgh. 15.62.

अतिभीषण (ati-bhīṣaṇa) *adj.* [*f.* -ā] **i** beyond or above frightfulness or terribleness स एतत् सर्वं निरूह्य प्ररूह्य … अतिभीषणोऽतिभद्रोऽतिमृत्युमृत्युः … भूत्वा स्वे महिम्नि सदा समास्ते NṛsiṁhoTāU. 7; **ii** extremely fierce or terrible or deadly (animates and personified objects) राजा कल्माषपादः … । स एषोऽस्मिन् वनोद्देशे निवसत्यतिभीषणः MahāBhā. i. 168.2. (कल्माषपादम्) तमतिभीषणं राक्षसस्वरूपमवलोक्य ViṣṇuP. iv. 4.60; सिंहव्याघ्राश्च संक्रुद्धा भीमसेनमभिद्रवन् । … विनदन्तोऽतिभीषणाः MahāBhā. iii. 146.46; पपात पूतना भूमौ म्रियमाणातिभीषणा ViṣṇuP. v. 5.10 = BrahmP. 184.10; एवंविधं खशा पुत्रं विजज्ञे सातिभीषणम् VāyuP. ii. 8.76; BrahmāṇḍP. ii. 7.42; आससाद वने घोरं शार्दूलमतिभीषणम् BrahmāṇḍP. ii. 25.52; ततो देवीशरीरात्तु विनिष्क्रान्तातिभीषणा । चण्डिकाशक्तिरत्युग्रा MārkP. 88.22; 87.15; उर्वीपतिः … यमुनाप्रवाहमिव…आवर्तद्वयेनातिभीषणम् … वेतालमद्राक्षीत् TilaMañ. 48.9; अक्षौहिणीः सप्तदशातिभीषणास्ता राम एको भगवानसूदयत् BhāgP. ix. 15.30; माल्यवानतिभीषणः रावणश्च महाबलः SkandP. i(1). 8.30; तं यान्तमनुयाति स्म ब्रह्महत्यातिभीषणा SkandP. iii(1). 24.59; iii(1). 11.63; भवो ब्रह्महत्यासंज्ञामतिभीषणां स्त्रियमुत्पाद्य तां प्रत्युवाच TristhaSe. 194.4; भगवानेक एव जनार्दनः।… राजेन्द्राखिलभूतानि भक्षयत्यतिभीषणः PadmP. v. 2.112; क्षणाच्च भूमिविवराद्भुजगामातिभीषणः । …अजगरो महान् KathāSaSāg. viii. 3.63; धूमावती देवतास्य ज्येष्ठा या चातिभीषणा ĪśānS'iPa. i. 47.58; रङ्कैः … अतिभीषणैः । श्मशानादत्यरिच्यन्त पुरराजपथा अपि TriṣaS'aPuC. iii. 1.33; पुरुषव्याघ्रैरतिभीषणा कुरुनरेश्वरसेनारण्यानी PārthPa. 38(2); सः … भ्रूभङ्गेनातिभीषणः Suratho. 9.8; गुणवानपि वक्रतां गतः पुरुषश्चाप इवातिभीषणः HammīMaKā. 10.3; चेटकास्ते समागत्य मध्यरात्रेऽतिभीषणाः TantrRā. 17.91; (inanimates, abstracts) न बाधते विषं घोरमनेकं चातिभीषणम् JayāS. 29.176; विषं दत्तमस्माभिरतिभीषणम् ViṣṇuP. i. 18.8; पुरा हि त्रेतायां देवासुरयुद्धमतिभीषणमभवत् ViṣṇuP. iv. 2.22; अभवद् रणः । …अतिभीषणः BrahmāṇḍP. iii. 29.57; वज्रं च राजतेजश्च द्वयमेवातिभीषणम् Hitopa. 2.153; चक्रमतिभीषणम् TriṣaS'aPuC. iv. 1.724; सा …अतिभीषणम् … कमपि प्रादुरभावयत कृपाणम् MadhuVi. 8.17; तस्मै चापम् …अतिभीषणम् … । स खलु ददौ YudhiVi. 3.9; लिङ्गाकारा समुद्भूता वह्नेर्ज्वालातिभीषणा MatsyaP. 60.4; वनेऽतिभीषणे कष्टं रणाभिमुखतां गतः PadmP.(Ra.) 49.16; अस्ति रामाटवी … अतिभीषणा YogVā. iii. 98.5; ययौ खरतराटवीम् । तत्रातिभीषणे … यक्षभवनं दिव्यमैक्षत PārśvC. 7.638; सा … अटवीमतिभीषणामगात् Nalābhyu. 7.67; मोक्षं सुदुर्लभं ज्ञात्वा संसारं चातिभीषणम् । …वाराणस्यां वसेन्नरः KūrmaP. 315.18 (1.31); PadmP. i. 33.22; शिवे मतिं प्रकुर्वाणः संसारादतिभीषणात् । मुच्यते SaurP. 64.20; आग्नेयीं वारयामास शंकरः । … संहृतां चातिभीषणाम् SaurP. 36.39; अशक्ताः सर्ववानराः । तर्तुं प्लवोडुपैरेनं समुद्रमतिभीषणम् SkandP. iii(1). 2.51; अकुर्वाणः पतत्याशु यममार्गेऽतिभीषणे BrahmP. 216.2; निरयानतिभीषणान् SaurP. 17.50; श्मशानमतिभीषणम् BṛKathāMañ. ix. 2.474; गिरिं प्रापातिभीषणम् SamarāSaṁ. 6.93; 6.148; त्वद्रूपमतिभीषणम् BṛKathāK. 134.10; बिभ्रता अतिभीषणं रूपम् TilaMañ. 284.1; देवोऽथ कुपितो नानारूपैस्तस्यातिभीषणैः उपसर्गं व्यधात् PārśvaC. 2.997; देहि हत्यां प्रथमतो या जाता ह्यतिभीषणा BrahmP. 123.162; निवर्तस्व संकल्पादतिभीषणात् BṛKathāS'loSaṁ. 1.78; प्रतिज्ञां त्वं शृणु रामातिभीषणाम् YogVā. iii. 4.66; अनावृष्टिरभूत् … अतिभीषणा BrahmP. 93.5; मयः … मायां च विविधामाप देवानामतिभीषणाम् BrahmP. 124.37; दुर्भिक्षमतिभीषणम् PariPar. 12.312; मोहभेदेषु मिथ्यात्वमतिभीषणम् PārśvC. 2.371; परिवेषोऽतिभीषणः । हन्ति लग्नगुणानन्याम् VasiSaṁ. 43.65; हरिद्राग्रन्थिवद् ग्रन्थिः स स्यात् कृष्णोऽतिभीषणः RaseCin. 7.12 (60.18)

अतिभीषणकाय (atibhīṣaṇa-kāya) *adj.* possessing an extremely terrifying or formidable body अतिभीषणकायांस्तांश्छिन्नभिन्नाननेकशः । दृष्ट्वा

… विक्रान्तिं परियातानि मनांसि दानवद्विषाम् GaṇeP. ii. 116. 16.

अतिभीषणदर्शन (atibhīṣaṇa-darśana) *adj.* having an extremely terrible appearance, very fierce-looking जज्ञे कृत्याचतुष्टयम् । विकरालं महावक्त्रमतिभीषणदर्शनम् MārkP. 118. 48.

अतिभीषणनामिका (atibhīṣaṇanāmi-kā) *adj.* (*f.*) bearing a very dreadful (inauspicious, harsh) name नोद्वहेत् कपिलां कन्याम् … न यक्षाहिप्रेष्यनाम्नीं चातिभीषणनामिकाम् BhaviP. 270A. 25 (i. 182. 41)

अतिभीषणम् (ati-bhīṣaṇam) *adv.* quite frightfully, formidably, terrifyingly असुराश्च ततः सर्वे जगर्जुरतिभीषणम् SkandP. i(1). 12. 6.

अतिभीषणविग्रह (atibhīṣaṇa-vigraha) *adj.* having extremely formidable body or form (सः) तेजसाऽद्रेपयत्सूर्यमतिभीषणविग्रहः GaṇeP. ii. 75. 4.

अतिभीषणाकार (ati-bhīṣaṇākāra) *adj.* having an extremely formidable form or appearance बह्वीभिर्दंष्ट्राभिरतिभीषणाकारम् … तवेदमीदृशं रूपं दृष्ट्वातीव व्यथिता भवामः GītāBh.(Rā.) 548. 23 (*on* 11. 23)

अतिभीषणाकृति (atibhīṣaṇākṛti) *adj.* having an extremely formidable form or appearance म्रियमाणश्चासावतिभीषणाकृतिरतिकरालवदनो राक्षसोऽभूत् ViṣṇuP. iv. 4. 43; अतिभीषणाकृतिमदृष्टचरीं परिपश्यति स्म स पदातिचमूम् S'ivLī. 17. 10.

अतिभीषा (ati-bhīṣā) *f.* intense fright, excessive fear यथावीर्यस्त्वया सर्पः कृतोऽयं मद्विभीषया (v. l. अतिभीषया) MahāBhā. i. 11. 4.

अतिभीषिता (ati-bhīṣitā) *adj.* (*f.*) quite frightened सलिलानां निधिनातिभीषिताः शरणं नृपतिं ययुः प्रजाः S'ivLī. 15. 2.

अतिभीष्म (ati-bhīṣma) *adj.* very dreadful, fierce सोऽतिभीष्मो विषोल्काभिर्यावद्दशति केशवम् । असौ तमग्रहीत्तावत् PāṇḍaC. 2. 348.

अतिभुक्त (ati-bhukta) *n.* excessive eating अजीर्णादतिभुक्ताच्च … व्रणा न प्रशमं यान्ति निष्क्रियत्वाच्च देहिनाम् CaraS. vi. 25. 31; *adj.* **1** who has eaten excessively अतिभुक्तं च भवता … तेनासि पतितः क्षितौ MahāBhā. xvii. 2. 25; मितं पच्येत यस्यान्नमतिभुक्तस्य(? स) उच्यते BhelaS. 69. 10 (*on* 3. 3); क्षुत्क्षामां नातिभुक्तां वा … व्यवायं पुरुषो व्रजेत् ViṣṇuP. iii. 11. 116; विप्रगणेऽप्यतिभुक्ते तृप्तिः सम्पद्यते यदि पितॄणाम् VetāPañ.(S'i.) 29. 23; अतिभुक्तोऽतिपीतोऽपि यया सादी न पीड्यते । श्रेष्ठा गतिस्तु सा ज्ञेया सः श्रेष्ठस्तुरगो मतः S'ukraNī. iv. 7. 116; **2** who has enjoyed excessively अतिभुक्तं स्नानपानादिना VīraMi.(Saṁskāra.) 870. 16.

अतिभुक्तक (atibhukta-ka) *adj.* well-fed शान्तो रसविशेषे स्यादतिभुक्तकदान्तयोः ViśvaPra. 59. 34.

अतिभुक्ति (ati-bhukti) *f.* excessive eating अतिभुक्त्याध्वनि … भवेन्मारुतस्य प्रकोपः HārīS. i. 5. 52.

अतिभुक्त्वा (ati-bhuktvā) *ger.* having eaten excessively व्यायाममग्नितापञ्चाप्यतिभुक्त्वा निषेविणाम् । … वातादयः … दूषयन्ति BhāvPra.(Bhā.) viii. 54. 2.

अतिभुग्न (ati-bhugna) *adj.* extremely crooked किमनेनातितुन्नेन (v. l. किमनेनातिभुग्नेन) वाग्भिः काष्ठसधर्मणा MahāBhā. ix. 60. 21.

अतिभुग्नक (atibhugna-ka) *n.* defect in massaging or rubbing the body (by bending wrongly) संवाहनकला द्वेधा तत्रैका कर्मसंश्रया । शय्यौपचारिका चान्या …। दोषास्तस्याः…अमार्गेण प्रघ्रातमतिभुग्नकम् PadmP.(Ra.) 24. 78.

अतिभुञ्जत् (ati-bhuñjat) *adj.* who eats too much नातिभुञ्जन्सदा योगी … सिद्धिमेति GaṇeP. ii. 142. 12.

अतिभुञ्जान (ati-bhuñjāna) *adj.* who is eating excessively अस्तं गतेऽतिभुञ्जाना अहो भानोः सुसेवकाः KumāCaSaṁ. 58. 24.

अतिभू (ati-bhū-) I. P. **1** to excel, to surpass एतेन वा इन्द्रोऽत्यन्या देवता अभवत् PañcBr. xxii. 8. 2; सप्तमेनात्यन्याः प्रजा भवन्त्योजिष्ठा भवन्ति ĀpaS'S. xxiii. 8. 6; xxiii. 13. 8; **2** to originate, to arise, to spring forth शब्दश्च घोरोऽतिबभूव MahāBhā. viii. 1038*(3); एवमुद्घोषणापूर्वं दुन्दुभिध्वनिरत्यभूत् PārśvC. 3. 1003; **3** to overcome, subdue, overpower [APTE]; *adj.* **1** who overcomes or overpowers मङ्गलानि च सर्वाणि कारयामास चाभिभूः (v. l. अतिभूः) MahāBhā. v. 147. 21; आसीत् … प्रथमस्तीर्थनाथानां नातिभूरिह भारते PāṇḍaC. 1. 8; **2** surpassing all (epithet of Viṣṇu) विभुर्भूरभिभूः (v. l. अतिभूः) कृष्णः कृष्णवर्त्मा त्वमेव च MahāBhā. xii. 43. 11 (भूः सत्तारूपः । अतिभूः अशरीरः BhārBhāDi.); **3** excessive, extreme दृष्टां शृणोषि हरिभिस्तरसाद्य सीतां चिन्तामिमामतिभुवं सहसाद्य सीताम् RāmC. 5. 85.

अतिभूत (ati-bhūta) *adj.* **1** excelling, surpassing वंशस्तव चापि कान्तो यस्य राजकुञ्जरस्यातिभूतम् … करकमलतले चक्रम् AvantiKa. 161. 12; **2** overcome, overpowered मन्दारोदयसेवितोऽपि न गिरिभ्रान्त्याऽतिभूतः क्वचिद्व्यक्तग्राहविचेष्टितोऽपि विततो नक्षत्रवीथीबलैः ।… सर्वत्राद्भुतसागरः AdbhuSāg. 2. 3.

अतिभूतप्रादुर्भाव (atibhūta-prādurbhāva) *m.* excessive or intense manifestation तथाहि भवतिरतिभूतप्रादुर्भावे । प्रकर्षगतिश्च । पुनरभिधानात्तेन येन तरतमपूर्वतयैव प्रादुर्भवति न तु क्षणं व्यवतिष्ठते AbhinBhā. i. 343. 10 (*on* 7. 1)

अतिभूतरुच् (atibhūta-ruc) *m.* extreme brilliance वनस्पान्तर्लसत्यत्र … सुरौघः स्नीसखो रत्नैरतिभूतरुचारुणः KāvyKaVṛ. 85. 13 (3. 4)

अतिभूति (ati-bhūti) *m.* **A** name of the son of Vimuci and Anukośā विमुचिस्तस्य भामिनी । अनुकोशातिभूतिश्च तनयः PadmP.(Ra.) 30. 116; अतिभूतिप्रभृतयो हिंसावादस्य शंसकाः -- दुर्गतिं गताः PadmP.(Ra.) 30. 126; **B** name of a Jain sage पराजयेन तेनाथ ह्रिया राज्यं स्वसूनवे । दत्वा गत्वा चातिभूतेः पादान्ते व्रतमाददे TriṣaS'aPuC. iv. 5. 69; **C** name of a Jain temple अतिभूतिर्महाभूतिर्विभूत्यम्बरपूर्वकम् । तिलकान्तं बभूवात्र जिनवेश्म चतुष्टयम् (= अतिभूतितिलक) BṛKathāK. 57. 134; *f.* name of the goddess Ambā अतिभूतिम् … आहुः सकलजननीमेव मुनयः DevīPañ. 5. 17.

अतिभूमन् (ati-bhūman) *adj.* very abundant, excessive, plentiful विदधे … विश्वक्सेनविमानम् … हेम्नातिभूम्ना वृतम् EI. iii. 12. 7; अतिभूमधूमचयधूम्ररुचेः सहसाकृतेर्विगलिता ललिता ।… सुतरामराजत तदीयतनुः Rāgh. 8. 3.

अतिभूमि (ati-bhūmi) *f.* [AitGr. II. 1. 258] **1** highest point, climax, culmination सर्वोत्सवानामतिभूमिमिवाधिशयाना Kād. 158. 19; प्राप्य मन्मथरसादतिभूमिं दुर्वहस्तनभराः सुरतस्य । शश्रमुः S'iśuVa. 10. 80; 9. 78; धैर्येण संस्तम्भयातिस तु स्वभावधीरः सर्वपौरुषातिभूमिः DaśKuC. 35. 17; धैर्येण संस्तम्भयातिभूमिगतविप्रलम्भमात्मानम् UttaRāC. 3. 43 (13); गतेऽतिभूमिं प्रणये … नोपचारान् स्मरातुरः संस्मरति स्म लोकः Bhaṭṭi. 11. 29; गतेऽतिभूमिं विरहेऽतिदारुणे । वने विनोदान्तरवर्जिते गताः कथं नु देवस्य नभस्यवासराः RāmC. 5. 60; मानेऽतिभूमिं गतेऽतिनिर्विण्णः प्रियतमः AmaS'. 5; SūktiMu. 56. 7; Subhāṣi. 1177; रागे यातेऽतिभूमिं … परां निर्वृतिं संतनोमि AmaS'. 100; तदातिभूमिं गतात्कोपात्रायकोऽप्यप्रसन्न इति JayaMa. 186. 22 (*on* 2. 10); अन्योन्यं हृदये तयोः स्पृहयतोर्भावेऽतिभूमिं गते पर्याप्तः कुसुमायुधः स भगवान्पारावताराय नः KarṇaSu. 1. 21; अयम् … विधाताप्यधिवसति यतो विस्मयस्यातिभूमिम् PṛthvīVi. 11. 93; अनुरागद्रवस्यैताः प्रणयस्यातिभूमयः Pañcā. 58. 2; Tantrākhyā. 22. 7; अतिभूमिं गतोऽयमस्यानुरागपरभागः किं करोमि CaitaCa. 188. 18 (8); आकर्ण्य च तां गिरमतिभूमिं मनोरथानाम् NīlaVi. 126. 20; **2** high place, superior status, great eminence अतिभूमिर्भूमिरेवासनम् … इत्यभिधाय क्षितावेवोपाविशत् HarṣaC. 319. 1; संसर्गेणावाप्तमम्भोऽतिभूमिम् … फेनहासं व्यतानीत् HarVi. 18. 39; एकवीरो हि नारीणामतिभूमिं गतः स्मरः KathāSaSāg. vii. 3. 104; अतिभूमिमभूमिमेव वा वचसां वासितवल्लवीस्तनम् । मनसामपरं रसायनं मधुराद्वैतमुपास्महे महः KṛṣṇaKa. 3. 37; किमेवमतिभूमिमारोप्यते निदेशवर्ती परिजनः PārvPa. 1. 17 (1); **3** violation of proper limits, boldness, excess, extreme state, impropriety अतिभूमिमयं गतो न शक्यते निवर्तयितुम् Kād. 156. 18; विपदि न दूषितातिभूमिः S'iśuVa. 8. 20; अत्याहिते हि साधूनां अतिभूमिर्न दूषिता PāṇḍaC. 5. 46; कथं पुनरेतावतीमतिभूमिमवगाहमानोऽपि वत्सो भवता न निवारितः PrasaRā. 3. 48 (148); मन्त्रिपुत्रोऽहमित्यवलेपादतिभूमिं गतोऽस्मि PañcT. 1. 136 (145. 5); संपातेनातिभूमिं प्रतरसि शठ हे मान्याः खलु वयम् … मा मैवं हा प्रसीद प्रिय विसृज पुरा कश्चित्प्रविशति PadmPrā. 14. 10; **4A** extensive land, region रेमे ताभिः समम् … मनोज्ञेष्वतिभूमिषु MārkP. 66. 11; **4B** place above the earth यद्विहाय धरणिं रणमेषा व्योमगेन सह तेन वितेने । तत्सरीसृपरिपुध्वजमातुर्विक्रमोऽपि गतवान् अतिभूमिम् Surath. 11. 33.

अतिभूमिका (atibhūmi-kā) *f.* highest resort (देवी) जगाद प्रणता नाथ प्रसादस्यातिभूमिका PadmP.(Ra.) 73. 43.

अतिभूमिग (atibhūmi-ga) *adj.* [*f.* -ā] going beyond bounds, one that has reached the highest point or climax या … प्रणयेनातिभूमिगा तया … दीक्ष्यता ते (युवपार्थिवाः) धृतिं दधुः MahāP. 34. 127; सोऽपि तं वीक्ष्य तपसा वपुषा चातिभूमिगम् । उवाच रचितातिथ्यो राजा मुनिकुमारकम् KathāSaSāg. vi. 2. 84.

अतिभूमिगत (atibhūmi-gata) *adj.* which has crossed the limits, excessive देव स्वेनैव लोकोत्तरेण धैर्येण संस्तम्भयातिभूमिगतविप्रलम्भमात्मानम् UttaRāC. 3. 43 (13)

अतिभूमिवर्तिन् (atibhūmivart-in) *adj.* going beyond bounds, getting eminence, [nt. S'ak. (Kaśm.) 618. 2]

अतिभूय (atibhū-ya) *ger.* **i** having covered अतिभूय तथा पृथ्वीं मनवोऽप्सु व्यवस्थिताः AhirbuS. 4. 16; **ii** having superceded संकरस्वभावोक्तिमतिभूय औपम्यं प्राधान्येन प्रतीयते SaraKaṇṭhā. 728. 17.

अतिभूयस् (ati-bhūyas) *adj.* [*f.* -ī] **i** very dense (darkness) (सेनान्यः) एकत्वमिव संप्राप्तास्तिमिरेणातिभूयसा BrahmāṇḍP. iii. 25. 45; **ii** very

much, quite abundant, in a great quantity अतिभूयसापि सुकृतेन दुरुपचर एष शक्यते। … न ग्रहीतुम् … नृभिः SisuVa. 15. 4; हरिवाहनम्…राजा…अतिभूयसा विभवेन स्वभवनमानिनाय TilaMañ. 79. 21; अस्माकं मुनिशार्दूल तच्छुश्रूषातिभूयसी SkandP. iii(1). 13. 45; अकारवर्जमावृत्तिः स्वराणामतिभूयसी AgniP. 342. 7; स चागत्य क्षुधार्तोऽपि चिकीर्षुः संचयाय तत्। क्रोडव्याधामिषात् किंचिन्न चखादातिभूयसः KathāSaSāg. x. 5. 103; xii. 6. 326; निजश्रियातिभूयस्या भूरीन् संगृह्य शल्पिनः। तत्पदे रत्नकलशं स्वभ्रातरमकारयत् RājTa.(Ka.) 7. 599; ओजः स्यात्प्रौढिरर्थस्य संक्षेपो वातिभूयसः Candrā. 4. 7; यदा तु वृद्धिरतिभूयसी तदा वृद्धिं गृह्णीयात् ManvaVi. 960. 4 (*on* 8. 144); दत्तेन किं खलु भवत्यतिभूयसा Subhāṣi. 274; अन्योन्ययोगादेवं स्याद्भेदसंख्यातिभूयसी KāvyPra. 215. 3; **iii** very large, quite extensive मुष्टिग्राह्यस्य मध्यस्य माने मन्येऽतिभूयसी PāṇḍaC. 16. 187; अथ स्तम्भैरिवोत्तुङ्गैरम्बरस्यातिभूयसः। तत्पातशङ्किना धात्रा सृष्टैस्तरुभिरावृतम् … रामो दण्डकं वनमाविशत् Rāgh. 7. 19; **iv** very long (time) न हि … अतिभूयसापि कालेन कीर्तनमीदृशं शक्यम् TilaMañ. 156. 7; [Inst.] greatly, in abundance यत्र…शृङ्गारः परिपूर्णत्वात्सूचनीयोऽतिभूयसा … सा वीथी PratāYaBhū. 130. 3; हरिवाहनः … अतिभूयसा विभवविच्छर्दे साकेतनगरान्निरगच्छत् TilaMañ. 181. 13.

अतिभूयस्ता (atibhūyas-tā) *f.* the state of being very numerous अतिभूयस्तया च राजलोकस्य कृच्छ्रलभ्यनिर्गमप्रवेशावस्थानमास्थानमण्डपमगच्छत् (भूमिपतिः) TilaMañ. 71. 3.

अतिभूयस्त्व (atibhūyas-tva) *n.* the state of being excessively abundant त्रयाणामेषां निदानादिविशेषाणां सन्निपाते क्षिप्रं श्लेष्मा प्रकोपमापद्यते प्रागतिभूयस्त्वात् CaraS. ii. 4. 9 (1922 Ed.)

अतिभूयिष्ठा (ati-bhūyiṣṭhā) *adj.* (*f.*) having an abundance of मृदुपदसमाससुभगा युक्तैर्वर्णैर्न चातिभूयिष्ठा … लाटी (रीतिः) SāhiDa. 469. 4.

अतिभूरि (ati-bhūri) *adj.* **i** exceedingly abundant, too much more जिते जगद्व्यसनसमाप्तिरम्बुधौ विराधिते भयमतिभूरि भूभुजि RāmC. 15. 20; देवी …अतिभूरिणा दुःखसंभारेण निर्भराध्मातहृदया … उत्सङ्गदेशे मलयसुन्दर्याः पर्यास्थत् TilaMañ. 416. 1; अनिन्द्यमतिभूरि च सदासीद्दासमस्माकं धनमादीयताम् BṛKathāSloSaṁ. 21. 70; 27. 79; **ii** too many in number पदातिभिः …वत्सस्वामी समायातो मारिदत्तोऽतिभूरिभिः PadmP.(Ra.) 37. 22; 58. 37; रक्षोभिर्वेष्टितं दृष्ट्वा तैस्तमतिभूरिभिः। इमे वानरवर्गीणाः …समुद्ययुः PadmP.(Ra.) 60. 51; **iii** too wide (of the mark), too lengthy, too prolix (reply) अप्रसिद्धं विरुद्धं यदत्यल्पमतिभूरि च। नोत्तरं शस्यते बुधैः KātySm. 173; अतिभूरि स्वल्पेऽर्थे वक्तव्ये महावाक्यमसंग्राह्यार्थम् (उत्तरम्) Aparā. 614. 25 (*on* 2. 7); कात्यायनेनान्येऽप्युत्तराभासा उक्ताः … गृहीतमिति वाच्ये तु कार्यं ते न कृतं मया। पुरा गृहीतं यद्द्रव्यमित्येतदतिभूरि तु VīraMi. (Vyavahāra.) 63. 16; गृहीतमित्येतावन्मात्रेण सत्योत्तरे वक्तव्ये कार्यं तेनेत्यादिकमुत्तरमतिभूरीत्यर्थः SmṛtiCan. iii. 100. 7; **iv** claiming too much अतिभूरि (उत्तरं) यथा शताभियोगे सहस्रं धारयामीति VyavaNi. 58. 6; सुवर्णशताभियोगे पञ्चशतानि धारयामीत्यतिभूरि VīraMi. (Vyavahāra.) 62. 11; **v** occurring very frequently अतिभूरिभिः। निधमैरष्टकलकं स्यान्नैषादीकपालकम् SaṁgīRa. i. 276. 11 (i 8. 9); *n.* large quantity of gold भजतीह (गिरौ) युवा गणयन् हितमतिभूरितानवसुधे वनितां तरसा Yādavā. 6. 42 (comm. अतिभूरिः बहुसुवर्णः तानो विस्तारो यस्याः सा वसुधा यस्य तस्मिन्; भूरि प्राज्यसुवर्णयोः ViśvaPra. 131. 79)

अतिभूरितर (atibhūri-tara) *adj.* extremely great, very heavy (अक्रूरः) तस्याङ्गैव पुनरीक्षितुमुद्यतस्त्वामानन्दभारमतिभूरितरं बभार Nārāy. x. 72. 2.

अतिभूरित्व (atibhūri-tva) *n.* excessive abundance अत एव द्वैगुण्येनातिभूरित्वमाह द्विशतमिति BālamBha. 13. 1 (*on* 2. 7)

अतिभूरिनि (atibhūri-ni) *adj.* having very frequent occurrence of *ni* (musical note) सौराष्ट्री टक्करागेऽतिभूरिनिः SaṁgīRa. ii. 120. 2 (ii. 2. 173)

अतिभूरिपयस् (atibhūri-payas) *adj.* yielding plentiful milk गावोऽतिभूरिपयसो निवृत्तवैराश्च भूपालाः BṛSaṁ. 32. 29.

अतिभूरिभर (atibhūri-bhara) *m.* excessive weight or load पीतमभ्युद्गमन्तमतिभूरिभरादिवाम्भः (पारिजातं ददर्श) HarVi. 31. 45.

अतिभूष् (ati-bhūṣ-) x. Ā. to deck (oneself) more (than somebody) अहं पतीन् नातिशये नात्यश्ने नातिभूषये MahāBhā. iii. 222. 36; to adorn one's self before (another); to adorn richly [MW]

अतिभूषण (ati-bhūṣaṇa) *n.* excellent decoration विभूषणानामतिभूषणेन … सा देवकन्या स्वयमागतैव VarāṅgaC. 2. 12.

अतिभूषित (ati-bhūṣita) *adj.* greatly adorned द्रौणिः … नयनानां सहस्रैश्च विचित्रैरभिभूषितम् (v. l. अतिभूषितम्) (महाकायं भूतमपश्यत्) MahāBhā. x. 6. 6.

अतिभृ (ati-bhṛ-) III. Ā. to raise oneself above, to be exalted त्वं द्यां च पृथिवीं चाति जभ्रिषे … पवमान ṚV. ix. 86. 29; त्वं द्यां च महिव्रत पृथिवीं चाति जभ्रिषे। … पवमान ṚV. ix. 100. 9.

अतिभृत (ati-bhṛta) *adj.* [*f.* -ā] **i** well-filled, filled excessively अमुना धनैः क्षितिभृतातिभृता समतीत्य भाति जगती जगती Kirātā. 5. 20; (तटिनी) क्षीणां पुनः सातिभृता निकामं प्रियापराधस्रवदश्रुपूरैः YaśasCam. i. 536. 6; **ii** plentiful सम्मित्रोपगमेन तैरतिभृतैर्भोगैरयत्नोपगैः EI. ii. 334. 7.

अतिभृशनमत् (atibhṛśa-namat) *adj.* bending down excessively हेमवसने हठादाकृष्टे सत्यतिभृशनमद्व्रातलतिका … त्वं स्मरसि … न कथम् Mukundā. 96.

अतिभृशम् (ati-bhṛśam) *adv.* **i** excessively, exceedingly, extremely प्रिये नातिभृशं हृष्येदप्रिये न च संज्वरेत् MahāBhā. iii. 198. 41 = xii. 94. 11; निर्विचेष्टं जगत्सर्वं बभूवातिभृशं तदा MahāBhā. xii. 202. 23; प्रविश्य वेश्मातिभृशं मुदान्वितम् … न चैव रामोऽत्र जगाम विक्रियाम् Rāmā. ii. 16. 61; रुजायां चातिभृशं स्वेदाश्च मृदवो हिताः SuśruS. vi. 12. 6; ततः स राजातिभृशं विषण्णः समजायत MārkP. 70. 24; गर्भाशये निमग्नं ता (वेदनाः) दहन्त्यतिभृशं तु माम् TaiUBhVā. 81. 22(2); जैत्रप्रयाणोत्थिते क्षोणीरेणुभरे नभस्यतिभृशं भूविभ्रमं बिभ्रति। जाता मर्त्यनदी … वियद्दीर्घिका PratāYaBhū. 66. 4; द्विषामतिभृशं यशः प्रकटपारदो (? यशःप्रकटपारदो) ध्मापनादुदस्फुटत तारकाकपटतो विहायस्तटे SūktiSu. 100; भूतिं चाखिलपूज्यतामतिभृशं भूभृत्सुतामाश्रितः EI. i. 363. 13; viii. 43. 8; नलिनी … विद्रुमक्षुपेन पीडितातिभृशम्। आकिरति बहु परागम् PadyaVe. 648; यन्त्रपुटे पीडितोऽतिभृशम्। आवमति रसमिहेक्षुर्मधुरम् PadyaVe. 775; **ii** very loudly पाण्डुनन्दनः। विनर्दमानोऽतिभृशं सविद्युदिव तोयदः MahāBhā. iii. 146. 40; पटहाश्च शङ्खा उद्वेजयन्तोऽतिभृशं विनेदुः VarāṅgaC. 14. 11; **iii** very frequently भेकस्तथैव … शब्दं करोत्यतिभृशं विपराशिमग्नः RākṣaKā. 15; तद्वथातिभृशं दारुणं भास्मुद्वहतो हा(ह)रतो वा … श्लेष्माभिरय(? स)न्दमुपगच्छति Hastyāyur. 619. 13 (4. 7)

अतिभृशव्यथ (atibhṛśa-vyatha) *adj.* having intense pain ऊरू … परकीयाविव गुरू स्यातामतिभृशव्यथौ RugVi. 24. 4 = BhāvPra.(Bhā.) 7(25). 4.

अतिभृशस्वर (atibhṛśa-svara) *m.* very harsh sound, ViśvaPra. 104 (given as the meaning of प्रखर)

अतिभेद (ati-bheda) *m.* variety that is beyond (the said variety) वाचं कोमलकाव्यबन्धरचनाभेदातिभेदक्रमैः ṢaṭcakraNi. 11 (comm. अतिभेदः तदितरसंस्कृतवाक्यसमुदायः)

अतिभेदक (ati-bhedaka) *adj.* causing the ultimate difference द्रव्येषु नित्येष्ववसानसंस्था नित्या विशेषा अतिभेदका स्युः Vidvanmo. 4. 37.

अतिभेदिन् (ati-bhedin) *adj.* differing very much (from) पञ्चभूतगुणान्वक्ष्ये त्रैगुण्यान्नातिभेदिनः SarvaSiSaṁ. 11. 31.

अतिभेषज (ati-bheṣaja) *adj.* having excessive medicine यस्यानुवासनो (बस्तिः) दत्तः सकृदन्वक्षमात्रजेत्। … सवातोऽतिमात्रो वा गुरुत्वाद्वातिभेषजः SiddhYo. 75. 16.

अतिभैरव (ati-bhairava) *adj.* [*f.* -ā] exceedingly terrible, extremely frightful or fierce ततो ध्वनिः … जनितोऽतिभैरवः MahāBhā. vii. 25. 57; तां नदीं पितृलोकाय वहन्तीमतिभैरवाम्। तेरुर्वाहननौभिस्ते MahāBhā. ix. 8. 33; भेरीशङ्खमृदङ्गांस्ते … अवादयन्पारिषदाः … अतिभैरवाः MahāBhā. x. 7. 37; वर्षन्तस्ते महासारांस्तमग्निमतिभैरवम्। शमयन्ति ViṣṇuP. vi. 3. 37 = BrahmP. 231. 37; ततः स्वरोचिः … चण्डास्त्रमतिभैरवं दृष्ट्वा निवेदय तद्रक्षो ददर्श MārkP. 63. 34; कपिलो मुनिः। तूर्णमेव क्षयं निन्ये क्रोधाग्निमतिभैरवम् BrahmāṇḍP. ii. 54. 3; अतिभैरवः खलु विस्तारी हाहारवः VeṇīSaṁ. 5. 115; हिमरजःप्रसरैरतिभैरवम्। धवलयन् गगनम्…शिशिरः प्रमथोऽभवत् Kapphiṇā. 8. 55; भद्रकाली… अतिभैरवा SkandP. v(2). 82. 34; संसारेऽस्मिञ्जगन्नाथ…अतिभैरवे भ्रमामि BrahmP. 178. 18; उदतिष्ठदथोद्धूतसटाभारोऽतिभैरवः KathāSaSāg. xii. 29. 40; निरुरुधुस्ते …बलैर्नृपमन्दिरं व्यवहितजनाक्रन्दं भेरीरवैरतिभैरवैः RājTa.(Ka.) 1. 366; वर्धमानोऽधरोत्तरम्। विदधे बाहुबलिना सिंहनादोऽतिभैरवः TriṣaSaPuC. i. 2. 602; दूरादालोक्य तस्यास्तमाकारमतिभैरवम्। आवाभ्यामतिभीताभ्यां सेयं कृत्येति निश्चितम् PāṇḍaC. 9. 321; मरुद्रुमे … पल्लवम् … कवलितं करभैरतिभैरवैः SaduktiKa. 266. 16; *m.* name of God Siva अभिषेकाद्भवेच्छुद्धी रण्ड(ण्डाया) अतिभैरव KulaCūT. 3. 16.

अतिभैरवत्व (atibhairava-tva) *n.* **i** the state of being excessively terrible or frightful रिक्तप्रसक्तकलहैरतिभैरवत्वात् सर्वस्थितिक्षयविधातृगुणा त्वमेव SamaMā. 4. 11; **ii** the state of being superior to Bhairava (Siva), SamaMā. 4. 11.

अतिभैरवाराव (atibhairavārāva) *adj.* causing an excessively dread-

ful noise अतिभैरवारावमतिप्रतिहतपरस्परगतिम् CaraS. iii. 3. 7 (1922 Ed.)

अतिभैरवम् (ati-bhairavam) *adv.* in a very dreadful manner, very fiercely चेकितानोऽनुविन्देन युयुधे त्वतिभैरवम् MahāBhā. vii. 13. 43; नदमानोऽतिभैरवम् । कः खल्वेष पुमान् विष्णो VāyuP. i. 24. 55 = LiṅgaP. i. 20. 61; वृकोदरेण ··· अतिभैरवम् ··· सरः समन्तादवलोडितम् VeṇīSaṁ. 6. 109; स···जुघुरे चातिभैरवम् Bhaṭṭi. 14. 82; दंष्ट्राकरालवक्त्राश्च जगर्जुश्चातिभैरवम् PadmP. ii. 18. 9; दुःसहः शूकरो राजन् गर्जते चातिभैरवम् PadmP. ii. 43. 3; अयं रिपुगणं मूर्ध्नि चर्वयत्यतिभैरवम् YuktiKa. 163. 16; हनूमता प्रवेशिता ··· विद्विषां मनःसु भीतिर्नदतातिभैरवम् RāghPāṇ.(Ka.) 8. 11.

अतिभैषज्यकर्षण (atibhaiṣajya-karṣaṇa) *n.* emaciation due to excessive use of medicine अतिस्नेहादतिभैषज्यकर्षणात् ··· । व्रणा न प्रशमं यान्ति CaraS. vi. 25. 33.

अतिभोग (ati-bhoga) *m.* **A** possession beyond the (time) limit पशुभूमिस्त्रीणामनतिभोगः । इति पश्वादीनां त्रयाणामतिभोगो नापेक्षितः । अल्पभोगेनापि स्वत्वं भवति VyavaNi. 132. 14; **B** excessive enjoyment नातिद्वेषो नातिरागो नातिभोगेषु सङ्गतिः···इति सिद्धस्य लक्षणम् TantrRā. 35. 73.

अतिभोगप्रिय (ati-bhogapriya) *adj.* who takes excessive delight in enjoyment अतिभोगप्रियाय नमो नमः SāmaraU. 261. 4.

अतिभोगभार (ati-bhogabhāra) *m.* excessive burden of enjoyment आसीदवन्यामतिभोगभाराद्दिवोऽवतीर्णा नगरीव दिव्या ।··· अयोध्या JānaHa. 1. 1.

अतिभोगिन् (ati-bhogin) *adj.* too much given to enjoyment, too much pleasure-loving यस्मिन् कृषीवला राष्ट्रे···नातिभोगिनः ।···वसेत्तत्र विचक्षणः MārkP. 34. 116.

अतिभोजन (ati-bhojana) *n.* excessive eating, overeating यदास्य··· प्रादुर्भवन्ति व्याधयो वानेकविधाः ··· अतिभोजनम् ··· यमदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति ṢaḍviBr. v(6). 4. 2; अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम् ManuSm. 2. 57; नाभोजनेन कायाग्निर्दीप्यते नातिभोजनात् CaraS. vi. 15. 21 = AṣṭāSaṁ. ii. 76. 11 (4. 12); वातातपरजोधूमावश्यायातिसेवनातिभोजन°···°मक्षिकाद्याबाधाः परिहरेत् SuśruS. i. 19. 20; वाक्पाणिपादचापल्यं वर्जयेच्चातिभोजनम् YājñaSm. 1. 112; पक्षेकं चातिभोजनम् । वर्जयेत् HārīS. iii. 2. 163; न चातिभोजनं नित्यं शस्यते सर्वगुल्मिनाम् KāśyaS. 114A. 12; अनिन्धैरामन्ध्यमाणोऽपि चातिभोजनं वर्जयेत् BālaKrī. i. 98. 15 (*on* 1. 111); मुखातिमात्रैर्यमिहातिभोजनं प्रमेहरूपाणि भवन्ति पूर्वतः KalyāKā. 11. 7; 11. 6; अतिभोजनात् ।··· हन्त्यग्निं कुपितः कफः RugVi. 4. 13; अनारोग्यमनायुष्यम् ··· अतिभोजनम् SkandP. iv. 36. 19; KūrmaP. 527. 5 (2. 12); BhaviP. 116A. 11 (i. 65. 24); PadmP. i. 51. 65; व्रती ··· अतिभोजनम् ।··· परिवर्जयेत् SaurP. 17. 16; नगरोत्सवयात्रासु विवाहेष (? ष्व)तिभोजनात् । जनता याति ··· मान्द्यम् NarmaMā. 2. 75; अतिभोजनं तृप्तौ सत्यामपि भोजनम् SmṛtiCan. v. 357. 20 = CaturCin. iii(1). 1025. 11; द्वादश मूर्च्छाः संभवन्ति । तद्यथा···अतिभोजनात् Hastyāyur. 93. 1 (1. 13); अतिभोजनादुष्णोपयोगेभ्यः पित्तं प्रकुपितम् Hastyāyur. 122. 20 (1. 17); 140. 17 (1. 18); 168. 18 (2. 7); रोगाः स्युर्विषमातिभोजनविरुद्धाजीर्णभुक्तादिभिः MātaLī. 1. 13; वारद्वयेऽप्यतिभोजनं न कुर्यात् ManvaMu. 45. 13 (*on* 2. 56); अतिभोजनम् 'जठरं ··· अवशेषयेत्' इत्यादिविहितभोजनादधिकं भोजनम् वर्जयेत् VīraMi. 203. 12 (*on* 1. 112); निषिद्धानि ··· अतिभोजनं च NityoNi. 133. 12.

अतिभोजनतस् (atibhojana-tas) *adv.* on account of too much eating अतिभोजनतो विप्र···रोगा हि सर्वे जायन्ते AgniP. 279. 31; ViṣṇuDhaP. ii. 56. 12.

अतिभोजनसमुत्था (atibhojana-samutthā) *adj.* (*f.*) arising from excessive eating एतैर्लिङ्गैरतिभोजनसमुत्थां मूर्च्छां विद्यात् Hastyāyur. 93. 6 (1. 13)

अतिभोजनादि (atibhojanādi) *adj.* too much eating etc. अतितर्पणम् । अतिभोजनादि BālamBha. iii. 104. 32 (*on* 3. 79)

अतिभ्रमण (ati-bhramaṇa) *n.* excessive wandering अतिभ्रमणखिन्नास्ते तप्ताश्च सूर्यरश्मिभिः GaṇeP. ii. 20. 48.

अतिभ्रष्ट (ati-bhraṣṭa) *adj.* extremely depraved योऽतिभ्रष्टः ···। यः संपूज्याभिरामं पठति ··· पदमिह लभते···स पूज्यम् AdhyāRā. i. 1. 56.

अतिभ्रस्ज् (ati-bhrasj-) vi. P. (*caus.*) to fry excessively समितायामर्धमितं घृतं क्षिप्त्वातिभर्जयेत् BhojanKu. 48. 10.

अतिभ्रान्तभ्रु (atibhrānta-bhru) *adj.* (*n.*) with excessively moving eye-brows संदष्टाधरमुक्तसीत्कृतमतिभ्रान्तभ्रु नृत्यत्करं वेश्यानां धृतिधाम पुष्पधनुषः प्राप्नोति धन्यो रतम् SṛṅgāTi.(Ru.) 1. 127.

अतिभ्रान्ति (ati-bhrānti) *f.* extreme confusion अतिभ्रान्तिं च नात्राहं मानये तव मानसे PrabhāC. 125. 23.

अतिभ्रुकुटी (ati-bhrukuṭī) *f.* knitting of the eye-brows दष्टौष्ठतातिभ्रुकुटीभुजास्फालनताडनाः ।··· अनुभावा इहोदिताः BhaktiRaSi. iv. 5. 11.

अतिभ्रू (ati-bhrū) *adj.* having extra-ordinary eye-brows भ्रुवै अतिभ्रुवै ब्राह्मण्यै ।··· भ्रुवे अतिभ्रुवे ब्राह्मणाय MahāBh. i. 314. 21 (*on* i. 4. 3); अतिभ्रुवां ब्राह्मणानाम् Nyās. i. 266. 1 (*on* i. 4. 5); स्त्र्याख्याविल्येव···अतिभ्रुवे देवदत्ताय JaineVyā. 35. 2 (*on* i. 2. 96)

अतिमघ (ati-magha) *adj.* which has passed through the asterism Maghā सः···क्षितिपतिः स्तुत्वेति देवम्···। उत्को ग्रीष्मवसन्तयोरतिमघाश्लेषे विधौ···निजपुरम् ··· ययौ DvyāśraKā. 5. 142.

अतिमङ्गल (ati-maṅgala) *adj.* [*f.* -ā] **i** very auspicious सः ··· पदानि । ददर्श रामस्य शुभोऽतिमङ्गलानि AdhyāRā. ii. 9. 2; तुङ्गरत्नविभूषणेन गलेन चाप्यतिमङ्गलाम् (प्रकृतिं वदन्ति) ĪśānŚiPa. i. 15. 61; **ii** extremely satisfactory विवक्ष्यते तदस्माभिः···। अध्याये हि तृतीयेऽतः सर्वमप्यतिमङ्गलम् PañcDa. 12. 88; भगवान्नारायणो जिज्ञास्य इत्यशेषमतिमङ्गलम् TattvPrakā. 224A. 12 (*on* iv. 4. 23); पुराणवचनानामर्थम् ··· तैत्तिरीयारण्यकमन्त्रतात्पर्यविषयत्वप्रदर्शनेन स्थिरीकरोतीत्यशेषमतिमङ्गलम् ŚivārkaMaDi. ii. 506. 24 (*on* iv. 4. 22); *n.* extreme happiness, extremely happy or auspicious state गन्धर्वराज वृणुषे को वा तृप्तोऽतिमङ्गले BrahmVaiP. i. 12. 21.

अतिमङ्गलप्रिय (atimaṅgala-priya) *adj.* fond of extreme auspiciousness इमं गवां प्रभवविधानमुत्तमं पठन् सदा शुचिरतिमङ्गलप्रियः MahāBhā. xiii. 76. 32.

अतिमङ्गल्य (ati-maṅgalya) *adj.* very auspicious अतिमङ्गल्यः···अतिशयमङ्गलजनके त्रि [ŚabdaKaDru.]; *m.* the Bilva tree (*Aeagle* or *Cratoeva marmelos*) पूतिवातोऽथ मङ्गल्यो (v. l. अतिमङ्गल्यो) मालूरश्च महाफलः ParyāRaMā. 27.

अतिमज्जवपुस् (atimajja-vapus) *adj.* whose body is rich in marrow मध्यान्ते सुखिनोऽतिमज्जवपुषः सक्षारमेदोधिकाः ··· नवाङ्गुलमितं लिङ्गं वृषा बिभ्रति RatiRaha. 3. 34.

अतिमञ्च (ati-mañca) *m.* seat higher than a *mañca* (a raised platform) मञ्चा मालकाः प्रेक्षणद्रष्टृजनोपवेशननिमित्तम् अतिमंचाः तेषामप्युपरि ये AupSūṬ. 116. 13; JñātāDhaṬ. 40A. 2.

अतिमञ्जु (ati-mañju) *adj.* very pleasing, very beautiful मदमन्थरगीतशेषम् । आधित्सुभिस्तदनु संधिमिवातिमञ्जुनिःश्वासमारुतहृतैरलिभिः शिशिञ्जे HarVi. 26. 90; ते (देवाः) ··· स्ववक्त्रमादर्शतलेऽथ दर्शं दर्शं बभञ्जुर्न तथातिमञ्जु NaiṣC. 10. 20; इयमतिमञ्जुलतना चिरविरहेण न खेदनीया GopāKeCan. 131. 31.

अतिमञ्जुल (ati-mañjula) *adj.* very sweet, very pleasing भामिनि ननु बहुपराद्धं भवत्या चित्तजन्मनो यद् ··· कदर्थितवती ··· परभृतरुतमतिमञ्जुलैः प्रलापैः DaśKuC. 74. 3; इयमतिमञ्जुलहृदया संकुचितपाणिनाभिमृष्टा । मधुराधरविनिवेशे पूली मूलं हि सौख्यस्य GopāKeCan. 70. 31; 63. 22; (त्वया अभिनीयमानमवलोकयामः) रम्यं नाट्यप्रबन्धमतिमञ्जुलसंविधानम् PrasaRā. 1. 7.

अतिमञ्जुलम् (ati-mañjulam) *adv.* in a very pleasing manner आकारिता स्फुटोत्तरमतिमञ्जुलमाशु दर्शयेदबला KandaCū. v. 3. 29.

अतिमञ्जुला (ati-mañjulā) *f.* *Rosa glandulifera* शतपत्री – महाकुमारी गन्धाढ्या लाक्षापुष्पातिमञ्जुला BhāvPra.(Bhā.) 6(5). 21; BhāvPraNi. 83. 22.

अतिमणि (ati-maṇi) *m.* excellent gem यदिदं भासते किंचित्तत्तस्यैव निरामयम् । कचनं काचकस्येव कान्तस्यातिमणेरिव YogVā. iii. 21. 68 (comm. अतिशयितो मणिरतिमणिः)

अतिमण्डन (ati-maṇḍana) *n.* very good ornament (गजासुर उवाच) सदैव निर्मला चास्तु सदैवास्त्वतिमण्डनम् (कृत्तिः) SkandP. iv. 68. 22; सदैव निर्मला चास्तु सदैवास्त्वतिमण्डनाम्(? नम्) (कृत्तिः) ŚivaP. ii(5). 57. 60 (292A. 8)

अतिमण्डल (ati-maṇḍala) *adj.* having a bigger orb तत्र त्वेकं महापद्मं मध्ये पद्मवनस्य च । कोटिपत्रप्रकलितं तरुणादित्यवर्चसम् । नित्यं व्याकोशमधुरं चरत्वादतिमण्डलम् VarāP. 79. 6.

अतिमत (ati-mata) *adj.* very much appreciated तरुणान् ··· स्तनितभीतपुरंध्रिनिगूहनस्थिमितोऽतिमतोऽभिदधौ घनः HarVi. 3. 54; वितीर्यात्तरामहतिमतिमते हि ते शस्यमानस्य वासम् ··· भारती तीर्थकृत् CaturJiStu. 95 (comm. अतिमते अतिशयेन अभिप्रेते)

अतिमति (ati-mati) *f.* **i** haughtiness, arrogance नि षू नमातिमतिं कयस्य चित् ṚV. i. 129. 5; **ii** (prob.) great design or thought तत्र कयाचिदतिमत्यात्यन्तमुक्तैव वृद्धिर्निश्चेतव्या ManuBh. ii. 135. 10 (*on* 8. 144); *adj.* having excellent wisdom, very wise ब्राह्मण: को भवेद्राजन् वेद्यं किं च युधिष्ठिर । ब्रवीह्यतिमतिं त्वां हि वाक्यैरनुमिमीमहे MahāBhā. iii. 177. 15.

अतिमतिमत् (atimati-ma(n)t) *adj.* possessing great wisdom, very wise, very intelligent स संदिदेशाभिमतं (v. l. संदिदेशातिमतिमान्) नीलम् Rāmā. iv. 28. 28; गजाध्यक्षोऽतिमतिमाञ्शरण्यः सुजितेन्द्रियः Hastyāyur. 43. 23 (1. 5)

अतिमतिमुनि (atimati-muni) *m.* very wise sage आयुर्वेदाब्धिमध्याद‌तिमतिमुनयो योगरत्नानि यत्नाल्लब्ध्वा स्वे स्वे निबन्धे दधुरखिलजनव्याधिविध्वंसनाय BhāvPra.(Bhā.) 2. 1.

अतिमत्त (ati-matta) *adj.* [*f.* -ā] **i** greatly in rut दृष्ट्वा हि तान्मत्तगजेन्द्ररूपान् पञ्चाभिपद्मान् (v. l. पञ्चातिमत्तान्) इव वारणेन्द्रान् MahāBhā. i. 178. 9; अतिमत्तमातङ्गमनोहरगण्डमण्डले VāsaDa. 179. 2; न जीयते तेन स तापसेन गोमायुनेव द्विरदोऽतिमत्तः RāmC. App. ii. 38. 7; वज्राङ्कुशि ··· विधत्स्व प्रयत्नम् ··· तनुमदवने ··· असि(? ति)मत्ते । अध्यारूढे ··· द्विपेन्द्रे CaturJiStu. 32; शक्यो वशीकर्तुमिभोऽतिमत्तः सिंहः फणीन्द्रः कुपितो नरेन्द्रः SubhāRaSaṁ. 206; (कोलाहलः) बृंहतामतिमत्तानां कुञ्जराणाम् YogVā. iii. 43. 11; आघ्राय गन्धं द्विरदोऽतिमत्तो मदं त्यजेत् केसरिणो यथोग्रम् S'ārṅgaPa. 1891; गजाधिराजौ ··· रदारदि चातिमत्तौ कृत्वा क्षणादगमताम् ··· नाशम् RājTa.(Jo.) 1174; KośaKaTa. 2. 5410; **ii** highly intoxicated (by passion) इमां ··· अतिमत्तां महोदरीम् । राक्षसीं पुरुषव्याघ्र विरूपयितुमर्हसि Rāmā. iii. 17. 20; अतिमत्ताङ्गनापाङ्गभङ्गतुल्याः ··· भोगास्तापोपचयकारिणः PadmP.(Ra.) 29. 75; ततोऽतिमत्ता कुलटा सदा कामातुरा ··· जगाम शरणं मुनेः BrahmVaiP. iv. 23. 141; प्राणिनः ··· बभूवुश्चातिमत्ताश्च क्रीडासक्ताः परस्परम् DevīBhāP. iv. 6. 4; (शूर्पणखा) अतिमत्तेति वक्तव्यम् PrasaRā. 5. 33(10); **iii** very arrogant, haughty ऐश्वर्यमदुष्टात्मन्नतिमत्तोऽसि वासव PadmP. v. 4. 15; तां शिबिकां वहन्त्यः नार्योऽतिमत्ता बलवत्तराश्च (अभवन्) KalkiP. ii. 2. 15; अतिमत्तासुरसमितिध्वंसाय ··· अनेन प्रभोर्मनो घटितम् YudhiVi. 3. 111; सः (विराटः) प्रजहार ··· अक्षेण धर्मजमतिमत्तायां निजबुद्धा YudhiVi. 6. 56; **iv** greatly agitated ये च मध्यस्थास्तेषाम् ··· तद् वयमियन्तं कालं प्रमाद्यन्त एवोदास्महे स्म इति निर्विद्यमानानां चित्तमतिमत्तं प्रतिष्ठते DharmoPra. 2. 16.

अतिमत्तवत् (atimatta-vat) *adv.* like a very haughty person (सः) खड्गं विधुन्वन्नुत्थाय प्रचचालातिमत्तवत् BrahmāṇḍP. iii. 27. 17.

अतिमत्य (atimat-ya) *ger.* having disregarded स एष आहुतिमतिमत्योत्क्रान्तः JaimiUBr. i. 34. 3.

अतिमत्सर (ati-matsara) *m.* great jealousy महासुरस्य द्विषतोऽतिमत्सरादिवान्तमासूचयितुं भयंकरः KumāSaṁ. 15. 17; दन्भ(:) स्तम्भोऽतिमत्सरः। ···अविमुक्ते स्थिता विघ्नाः MatsyaP. 184. 40; सहाया यत्रातिमत्सरभृताः ··· तत्राचिरात् समुदयन्ति न के ह्यनर्थाः RājTa.(S'rī.) 4. 380; अतिमत्सरोऽत्यन्तासूया VīraMi.(Tīrtha.) 152. 4.

अतिमत्सरतस् (atimatsara-tas) *adv.* because of great jealousy अभ्युत्तताम···अस्तमयाय शत्रोः। ···अतिमत्सरतः ··· अतिमायः HarVi. 34. 29.

अतिमत्सरा (ati-matsarā) *adj.* (*f.*) very jealous न वातिमत्सराभिश्च भाव्यं कौटिल्यबुद्धिभिः PadmP. v. 23. 108.

अतिमथन (ati-mathana) *n.* excessive scrutiny लक्षितानां (गुणानां) चतुर्णामतिमथने ज्ञानशक्तिविततिरूपत्वं व्यक्तम् NyāyPari. 504. 18; कश्चिद्धर्मोऽपि धर्मी स्फुटमतिमथने स्वान्यनिर्वाहकत्वम् TattvMu. 1. 9; 1. 62.

अतिमथित (ati-mathita) *n.* hole औदुम्बरस्य वीणादण्डस्य दशातिमथितानि । एकैकस्मिन्नतिमथिते दशदश मौञ्जास्तन्तून् प्रवयति ĀpaS'S. xxi. 17. 8-9; *adj.* very harmful अतिमथिते कर्तव्ये भवति खलानां अतीव निपुणा धीः। तिमिरे हि कौशिकानां रूपं प्रतिपद्यते दृष्टिः SūktiRa. 32. 55.

अतिमथितुम् (ati-mathitum) *inf.* to churn thoroughly अतिमथितुमारब्धे लोभाद्रै क्षीरसागरम् । उत्पन्नं कालकूटं तु SkandP. v(2). 14. 6.

अतिमथ्य (atimath-ya) *ger.* **i** having shattered completely सिन्धुराजमतिमथ्य हेलया खड्गमन्दरभृता युधि येन । उत्तमेन पुरुषेषु वि (? पुरुषेष्विव) लेभे श्रीर्यसो(शो) भुवनपावनशङ्खः EI. xiv. 301. 35; **ii** having churned thoroughly, EI. xiv. 301. 35.

अतिमद् (ati-mad-) IV. P. to be infatuated हा, तिलमात्रभवद्दर्शनेनानेनानेना जातोऽजातोदरहितो हितो भवन्नातिममाद CaitaCa. 39. 4(2)

अतिमद (ati-mada) *adj.* having profuse ichor ते गजा गिरिसंकाशाः क्षरन्तोऽतिमदा मदम्। ·· विमदीकृताः MahāBhā. vii. 25. 6; नन्दः। न धृतिमुपययौ न शर्म लेभे द्विरद इवातिमदो मदान्धचेताः Saund. 9. 50; *m.* **i** deep intoxication उद्धतैरिव परस्परसङ्गादीरितान्युभयतः कुचकुम्भैः। योषितामतिमदेन जुघूर्णुर्विभ्रमातिशयपुंषि वपूंषि S'iśuVa. 10. 32; या पर्युत्सुकचित्तातिमदेन मदनेन च । आत्मनाभिसरेत् कान्तं सा भवेदभिसारिका StavMā. 275. 7; **ii** excessive pride or arrogance प्रादुर्भूते हिरण्यद्विरदमतिमदध्वान्ततन्त्रं निहन्तुम्···मम भुवनगुरावस्तु भक्तिर्नृसिंहे VarivaRaha. 1; कृतमतिमददोषपोषणेन ··· प्रशममुपेहि जहीहि रामदारान् Rāgh. 14. 44; न तृप्तिं जानन्ति ध्रुवमतिमदाक्षिप्तमतयः Rāvaṇā. 23. 52; [Abl.] due to great pride प्रमादादज्ञानाद्दुरितपरिपाकादतिमदाद् विनश्यत्तावेशाद्यदपकृतमेतेन शिशुना KaṁVa. 6. 6.

अतिमदन (ati-madana) *adj.* superior to Cupid, surpassing the god of love अभिमतपददर्शनैरयत्नैरतिमदनं स्वममंस्त कम्पराजः MadhuVi. 6. 68.

अतिमदनोपनिषद् (ati-madanopaniṣad) *adj.* surpassing the secret of love or Kāmaśāstra कलमधुरगिरां कलाप्रसङ्गात् अतिमदनोपनिषत्परं रहस्यम्··· श्रुतिषु चकार Yādavā. 24. 40.

अतिमदप्रद (atimada-prada) *adj.* causing great intoxication पीडितोऽनिलः ऊर्ध्वं प्रपद्यते कोष्ठान्मद्यैर्वाऽतिमदप्रदैः CaraS. vi. 17. 38.

अतिमदभाज् (ati-madabhāj) *adj.* possessed of abundant ichor देवः सोऽयमिभाननोऽतिमदभागव्याजमव्यात्स वः Ḍamaru. 19.

अतिमदवश (atimada-vaśa) *m.* influence of great passion अत्र विभाति व्योमगवृन्दम् ··· क्वचिदतिमदवशपरिचितकलहम् PadmP.(Ra.) 42. 69.

अतिमदाकुलिता (atimadākulitā) *adj.* (*f.*) excited with deep passion इह नीचरते घटयत्यधनं जघनं प्रमदातिमदाकुलिता RatiRaha. 10. 12.

अतिमदान्वित (atimadānvita) *adj.* full of great pride, extremely arrogant स वार्यमाणो बाणौघैर्दानवोऽतिमदान्वितः। राजपुत्राय चिक्षेप दण्डम् MārkP. 127. 18.

अतिमदावलेप (atimadāvalepa) *m.* pride due to excessive arrogance बाह्यात्मनामशकुनैर्विदितोऽप्यपायः सेनाचरैर्न ददृशेऽतिमदावलेपात् RāmC. App. ii. 37. 41.

अतिमद्भक्त (ati-madbhakta) *adj.* extremely devoted to me सर्वत्र समता मम । विशेषतोऽतिमद्भक्तः कलत्रात्पर एव च BrahmVaiP. iv. 57. 31.

अतिमद्य (ati-madya) *n.* too much of liquor विच्छिन्नमद्यः सहसा योऽतिमद्यं निषेवते । तस्य पानात्ययोद्दिष्टा विकाराः संभवन्ति हि SuśruS. vi. 47. 49; अतिमद्यं हि पिबतो बुद्धिलोपो भवेत्किल S'ukraNī. 1. 114 (114); कट्वम्लतीक्ष्णोष्णविदाहिरूक्षक्रोधातिमद्यार्कहुताशसेवा । आमाभिघातः RugVi. 28. 9.

अतिमद्यपान (ati-madyapāna) *n.* excessive drinking of wine अतिमद्यपानात् ··· नेत्रे विकाराञ्जनयन्ति दोषाः RugVi. 59. 2.

अतिमधुर (ati-madhura) *adj.* **i** very sweet (taste etc.) श्लेष्मशूलिनाम् । न घनातिमधुराणि शयनं च विधेयकम् HārīS. iii. 7. 45; प्रकाशयाञ्चक्रुः क्रमेण कार्माः। ··· अतिमधुरमधुरसामोदनिर्हारिणीश्चोल्लककलशीः HarṣaC. 292. 9-10; अतिमधुरमनलशमनं भुक्तमसात्म्यं न पुष्टये वपुषः AṣṭāSaṁ. i. 69. 8 (1. 10); अतिमधुररवं कराभिघातैः ··· रघुप्रधानः सलिलमवादयदन्वितं सुगीत्या PadmP.(Ra.) 42. 82; राजसः ··· भुङ्क्तेऽतिमधुरं चार्द्रं भक्ष्यम् SarvaSiSaṁ. 11. 21; ननु गतिरियं तदीया वाणी सैवेयमतिमधुरा Kāvyālaṅ.(Ru.) 11. 23; (राजा) अध्वनीनमिदं चारुश्लोकयुगलमतिमधुरगीततरङ्गरङ्गिताक्षरं गायन्तमद्राक्षीत् NalaCam. 6. 11(53); क्षीरकदम्बकसूरिः ···नारदाभिधानाय च निखिलभुवनव्यवहारतन्त्रमागमसूत्रमतिमधुरस्वरापदेशमुपदिशन् YāśasCam. ii. 353. 14; गायन्तीः कलवीणयातिमधुरं हुंकारमातन्वतीः ··· सरस्वत्यादिकाः पूजयन् । मातङ्गीम् ··· भजे TripuMāPūSt.(S'aṅ.) 17; तेषां विशीर्यमाणानामतिमधुरसुरभिसुगन्धिबहुलारुणरसोदेनारुणोदा नाम नदी···इलावृतमुपप्लावयति BhāgP. v. 16. 17; भगवत्यपि बाणौघान्मुमोच ··· कृत्वातिमधुरं नादं देवकार्यार्थसिद्धये DevīBhāP. v. 13. 16; एवम् अतिमधुरं गोक्षीरं ··· दर्शयितव्यम् S'āstrDī. 154. 14 (*on* i. 1. 7); किमतिमधुरमम्लं भोजनान्ते प्रदेयम् VidaMuMa. 2. 41; गायन्तस्तेऽतिमधुररागवैविध्यबन्धुरं । हृषीकेशस्य हृदयं जह्रुः TriṣaS'aPuC. iv. 1. 869; धातोऽतिमधुरध्वानस्तर्जन्योन्मृष्टमुच्यते SaṁgīRa. iii. 259. 19 (8. 159); अयि तरुदेवते, इदमतिमधुरं ते पायसान्नम् GopāKeCan. 100. 18; इदमतिमधुरं गवां मुरारे दधि नलिनीदलभाजनं विधेहि GopāKeGan. 89. 2; इदमतिमधुरं निशम्य वाक्यम् YogVā. i. 6. 55; अतिमधुररसानां सेवया पत्रभङ्गैः ··· भवति मुदितचेताः कामचारेण नागः MātaLī. 9. 1; वाक्पीयूषं च सानुग्रहमतिमधुरं पायितं श्रोत्रपेयम् CaitaCan. 212. 16(9); उदाहरणे कोकिलस्य कोकिलत्वविधानमनुपयुक्तं सदतिमधुरपञ्चमध्वनिशालितया सकलजनहृद्यत्वं गर्भीकरोति Kuval. 166(3); अतिमधुरकण्ठकूजितविलासवत्या सरोजदृशा प्रेम्णा···क्रीतः प्रेयान् S'ṛṅgāMañ.(Bho.) 5. 20; हिंगूजीरकसहितं विमलामलकं कपित्थमतिमधुरं ··· मृत्युञ्जय तेऽर्पयामि MṛtyuMāPūSt. 30; माषाः पिच्छिलशीतलातिमधुरा वृष्यास्तथा बृंहणा KalyāKa. 4. 23; **ii** very agreeable (essence) मूलेऽतिमधुरेष्वपि विषयोपभोगसुखेषु काशस्तम्बेष्विव तृणबुद्धिं ··· अजीगणत् (राजा) TilaMañ. 21. 13; तत्र लिप्तो भवेन्निम्बकल्कोऽतिमधुरः स्थिरः। तस्य धारणमात्रेण विषवेगः प्रशाम्यति YuktiKa. 105. 12; तव राजोऽतिमधुरः पित्तश्रमतृषापहः BhojanKu. 164. 23; मध्येऽतिमधुरास्तथा। इक्षवस्ते BhojanKu. 157. 4; पुण्ड्रोऽतिमधुरः कफकृतपित्तनाशनः BhojanKu. 156. 11.

अतिमधुरतर (atimadhura-tara) *adj.* very much sweet उत्सङ्गे तव गङ्गे पायं पायं पयोऽतिमधुरतरम् । कदाहं चिराय शयिताहे RasGaṅ. 507. 4.

अतिमधुरत्व (atimadhura-tva) *n.* extreme sweetness औषधस्य ··· अतिमधुरत्वात्···दुर्योगातियोगावुत्पद्येते KāśyaS. 156A. 35.

अतिमधुरनिषेव (atimadhura-niṣeva) *m.* consuming too much sweet (food) अतिमधुरनिषेवात्सन्ततं वह्निसादः YaśasCam. i. 518. 7.

अतिमधुरानन (atimadhurānana) *n.* mouth with an excessive

sweet taste निद्राप्लुतारुचिरतीव शिरोगुरुत्वं मन्दोष्णतातिमधुराननरोमहर्षाः Kalyā-Kā. 9. 57.

अतिमधुरास्वाद (atimadhurāsvāda) *adj.* having a very sweet taste न तथा सुखयन्त्येताः पीयूषरसवीचयः । यथातिमधुरास्वादः संतोषो दोषनाशनः (comm. अतिमधुर: आनन्दप्रचुर: आस्वादोऽनुभवः यस्य) YogVā. ii. 15. 5.

अतिमधुव्रता (ati-madhuvratā) *adj.* (*f.*) surpassing the honey-bee अभवत् तस्य पादाब्जोपासनेऽतिमधुव्रता । कलत्रं सुव्रता नाम लोकोत्तरसतीव्रता (comm. मधुव्रतं भ्रमरमतिक्रान्ता) TriṣaS'aPuC. iv. 5. 27.

अतिमधुसंकाश (ati-madhusaṅkāśa) *adj.* resembling very much the (tawny red colour of) honey अतःपरममीषां (गजानाम्) हि वक्ष्यन्ते दन्तजातयः । स्निग्धौ सरुधिरौ दन्तौ ··· मधुसंकाशवर्णौ च नैव रूक्षौ न चेतरौ । न चातिमधुसंकाशौ Hastyāyur. 628. 27 (4. 10)

अतिमध्यंदिन (ati-madhyandina) *n.* exact mid-day or noon नातिकल्यं नातिसायं नातिमध्यंदिने स्थिते । नाज्ञातेन समं गच्छेन्नैको न वृषलैः सह ManuSm. 4. 140.

अतिमध्यमवृष्टि (atimadhyama-vṛṣṭi) *f.* showers of absolutely medium degree अनिलहतं सस्यचयं त्वतिमध्यमवृष्टिसंपन्नम् । शशितनये सस्यपतौ VasiS. 11. 28.

अतिमन् (ati-man-) IV. VIII. Ā. **i** to disdain, to despise, to disregard, to disrespect, to look down upon, to offend न हि त्वा पूषन्नतिमन्य आघृणे R̥V. i. 138. 4; किं नो भ्रातरगस्त्य सखा सन्नति मन्यसे R̥V. i. 170. 3; अति वा यो मरुतो मन्यते नो ब्रह्म R̥V. vi. 52. 2 (but Sāy. अति मन्यते अतीव स्वस्याधिक्यं मन्यते अस्मत्तोऽपि स्वयमधिक इति बुध्यते); जनंजनं जन्यो नाति मन्यते R̥V. x. 91. 2 (but Sāy. नातिमन्यते न विसृज्य गच्छतीत्यर्थः); तद् बृहत् पूर्वं ससृजानं रथंतरमत्यमन्यत AitBr. 19. 6 (524); ता एनमत्यमन्यन्त TaiBr. I. vi. 4. 1; एतदेवाहं नातिमन्य इति JaimiUBr. 1. 6. 5; तदिदं मनो वाचमत्यमन्यत क्षत्रं ब्रह्म JaimiUBr. 3. 3. 16; गायत्री छन्दांस्यत्यमन्यत TaiĀ. v. 2. 3 (594. 1); BaudhS'S. iii. 50. 15; BhārGS. 2. 27; (राधेयः) दुर्योधनमुपाश्रित्य पाण्डवानत्यमन्यत MahāBhā. i. 122. 47; मद्विधं योऽतिमन्येत धर्मनित्यं जितेन्द्रियम् Rāmā. iii. 41. 43; तस्याज्ञया समस्तार्थानहंकारोऽतिमन्यते LiṅgaP. ii. 10. 14; यः ···पुत्रदारानतिमन्यते ···तस्योद्विग्नं मण्डलमभावायोपतिष्ठते AnargharRā. 4. 14 (39) (comm. अपहरति); **ii** to consider (oneself) superior (to something), to consider with esteem, to be proud of य आर्दुतिमत्यमन्यन्त देवाः AV. x. 8. 35; स हात्येव पितरं मेने JaimiBr. 1. 42; 1. 207; भृगुर्ह वै वारुणिः । वरुणं पितरं विद्ययातिमेने S'atBr. XI. vi. 1. 1; V. i. 1. 1; यद्ध किञ्चाशुतेऽत्येनं मन्यते (एनमन्यते ?) AitĀ. II. iii. 3. 1; II. iii. 3. 3; अहं कर्तेति विदुर मावमंस्थाः (v. l. मातिमंस्थाः) MahāBhā. ii. 57. 7; मधुच्छन्दा उवाच – यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्धते । न चेदं दूषणं राजन् भूषणं चातिमन्यताम् BrahmP. 138. 13; **iii** to think high of विक्रमातिक्रमे बुद्धौ भृशार्थातिशये त्वतिः । अतिरथः । अतिक्रामति । अतिगहनम् । अतितप्तम् । अतिमनुते ज्ञानम् Prasā. i. 37. 8.

अतिमनःकान्त (ati-manaḥkānta) *adj.* extremely fascinating or attractive to the mind अन्यदातिमनःकान्ते मलये विषयान्तके । मलयाख्यगिरिं यातो भूपतिः BṛKathāK. 56. 2.

अतिमनस् (ati-manas) *n.* great attention, great care प्रेषितव्यस्त्वया पुत्रो मन्दिरे मम मानिनि । पालयिष्याम्यहं तत्र तवातिमनसा किल DevīBhāP. iv. 23. 17; *adj.* beyond the mind (i. e. with complete control of the mind) स्वातव्यमित्यतिमना भुवि संस्थितोऽसि YogVā. ii. 10. 44.

अतिमनस्विन् (ati-manasvin) *adj.* [*f.* -ī] **i** very proud मा तावत् । अतिमनस्विनि, किं न गङ्गा सागरमभियाति । अलमलं व्रीडया PadmPrā. 21. 21; सोऽयं भविष्यदाक्षेपः प्रागेवातिमनस्विनी । कदाचिदपराधोऽस्य भावीत्येवमरुन्ध यत् Kāvyāda. 2. 126; **ii** who is very spirited तद्वयं पितामहोक्तप्रकारेणैव तारकप्रहन्तारमतिमनस्विनं सेनान्यमासादयेम Manmatho. 1. 15 (423. 13)

अतिमनुज (ati-manuja) *adj.* **i** inhuman, subhuman रक्तेक्षणः···दशनपीडितदन्तवासाः । त्रासं गतोऽतिमनुजो जननिन्द्यवेषः । क्रोधेन कम्पिततनुर्भुवि राक्षसो वा SubhāRaSaṁ. 40; **ii** super-human ममानुजमतिमनुजबलमबालमबलावियुक्तं युक्तमाश्रयितुं तव RāmāCam. 3. 15 (1)

अतिमनुष्य (ati-manuṣya) *adj.* super-human, beyond human power कार्येष्वतिमनुष्येषु साहायकविधायिभिः । योगिनीपुरनाथस्य तैरभूषि निजं कुलम् RājTa. (Jo.) 508.

अतिमनुष्यकर्मन् (atimanuṣya-karman) *n.* super-human action, action beyond human power गाण्डीवधन्वा ऋषभः कुरूणामजिह्मगैः कर्णमियाय जिष्णुः । शरास्त्रवृष्ट्या निहतो महात्मा प्राडुश्चकारातिमनुष्यकर्म MahāBhā. iv. App. 44 (50); *adj.* possessed of super-human power तदस्य कर्मातिमनुष्यकर्मणः समीक्ष्य हृष्टाः कुरवोऽभ्यपूजयन् MahāBhā. viii. 62. 54.

अतिमनुष्यबुद्धि (atimanuṣya-buddhi) *adj.* possessing super-human intellect तत्प्रेक्ष्य कर्मातिमनुष्यबुद्धेर्जिष्णोः सहभ्रातुरचिन्त्यकर्मा । दामोदरः ··· हलायुधं वाक्यमिदं बभाषे MahāBhā. i. 180. 17.

अतिमनोगति (ati-manogati) *adj.* surpassing the speed of the mind, faster than the mind सः (अग्निः) ··· पृथिवीं चान्तरिक्षं च विचीयातिमनोगतिः । निमेषान्तरमात्रेण बृहस्पतिमुपागमत् MahāBhā. v. 15. 28; द्वीपाम्भोधीन् ··· अलङ्घिष्ट ··· तद्विमानवरं दिव्यं वेगेनातिमनोगति TriṣaS'aPuC. ii. 2. 325.

अतिमनोज्ञ (ati-manojña) *adj.* [*f.* -ā] **i** very pleasant, very attractive (sound) स तान्यतिमनोज्ञानि विहङ्गाभिरुतानि वै । शृण्वन् ··· अगच्छत गौतमः MahāBhā. xii. 163. 10; भुवनजैत्रमन्त्रं रतिपतेरथौते । पिकगिरा मधुश्रीरतिमनोज्ञयासौ ChandaśCū. 2. 70 (3); **ii** very beautiful, very charming अत्रातिमनोज्ञमुपवनम् ViṣṇuP. iv. 2. 104; सोऽथ ··· पर्यटन् । ददर्शातिमनोज्ञानि सानूनि हिमभूभृतः MārkP. 61. 20; सरांस्यतिमनोज्ञानि MahāP. 22. 177; कम्रः अतिमनोज्ञः ··· विग्रहः मूर्तिः यस्याः सा LalitāTriBh. 259. 14 (*on* 4); वस्त्राण्यतिमनोज्ञानि प्रभूतानि Mānaso. ii. 19. 1020; आदायातिमनोज्ञमद्भुतरसं किञ्चित्फलं पाणिना तन्मध्यं च विलोक्य BhāvS'. 59; **iii** very agreeable सततमतिमनोज्ञः क्रौञ्चमालापरीतः प्रदिशतु हिमयुक्तः कालएष: (?) सुखं वः (v. l. ⁰युक्तस्त्वेष कालः सुखं वः) R̥tuSaṁ. 4. 18; जलाशयेषु ··· तस्मिंश्चातिमनोज्ञे काले हस्तिनः ··· विविधसुखमनुभवन्ति Hastyāyur. 198. 13 (2. 13)

अतिमनोज्ञतनु (atimanojña-tanu) *adj.* having a very attractive or beautiful body कन्दर्पतोऽप्यतिमनोज्ञतनू तनूजौ HariVi. 4. 26.

अतिमनोज्ञता (atimanojña-tā) *f.* the state of being very handsome स च (बालकः) संस्कृत्योपनीतो नृपतेरतिमनोज्ञतया प्रीतेन पृष्टोऽसौ राज्ञा MohaRāPa. 3. 58 (37)

अतिमनोभीष्ट (ati-manobhīṣṭa) *adj.* very much desired or wished for किन्तु स्त्रीव्यसनेनातिमनोभीष्टेन सर्वदा । चिराय मिलितेनैव भूयोऽप्यालिङ्गितो नृपः PāṇḍaC. 1. 362.

अतिमनोरथ (ati-manoratha) *m.* extravagant wish, desire beyond limit अवहास्योऽतिमनोरथोऽक्रमश्च BuddhaC. 5. 36; अस्माकमेष सोऽतिमनोरथः । प्रद्योतस्य मनस्वितवास्वामी दुःखेषु वर्तते PratiYau. 1. 10; कौसल्यामातः ! अलमतिमनोरथैन Prati. 5. 11 (2); महेन्द्रकल्पेन सह त्वया संभाषणोत्सवः । इति दर्शितसौहार्दे कस्य नातिमनोरथः JātaMā. 140. 11 (22. 84); कदा पश्यामि तां कान्तां मोचयित्वातिसंकटात् । इति मे हृदयं चाद्य करोत्यतिमनोरथम् DevīBhāP. vi. 22. 45; *adj.* beyond the reach of desire यथावदतिमनोरथैर्वस्तुभिर्महता संमानडम्बरेण पूजितो राज्ञा (कविः) UdaySuKa. 157. 11.

अतिमनोरम (ati-manorama) *adj.* [*f.* -ā] **i** very attractive, extremely charming, very beautiful अथैव सद्यः पत्नी ते भवत्वतिमनोरमा MārkP. 97. 19; 114. 29; 127. 10; जङ्घे विरोमे सुसमे पादावतिमनोरमौ (यस्याः) ViṣṇuSm. 1. 26; सुगन्धा नाम यस्यासीत्पत्नी धर्मपरायणा । ··· अतिमनोरमा GaṇeP. i. 58. 13; मध्यायामवती ग्राह्या यौवनातिमनोरमा MayaMa. 33. 5; मध्याह्ने रत्नशैलेन्द्रशिखरेऽतिमनोरमे (कृष्णं ध्यायीत) ĪśānS'iPa. i. 34. 41; शशीवातिमनोरमः TriṣaS'aPuC. iii. 6. 21; तिलोत्तमामिवोद्दिश्य रसामतिमनोरमाम् । सुन्दोपसुन्दभङ्ग्या ते स्वयं नंक्ष्यन्ति शत्रवः PṛthvīVi. 11. 5; फलाग्रकषणोद्भवो यदयमत्र कस्तूरिकाविशेषक्रमिषात्स्फुरत्यतिमनोरमः कालिमा Subhāṣi. 1489; **ii** very pleasant (to the mind) हन्त ते कथयिष्यामि कथामेतां मनोरमाम् (v. l. कथामतिमनोरमाम्) MahāBhā. i. 160. 4; स्वाधीनपतिका प्राप्य कामानतिमनोरमान् । क्रमादापन्नसत्त्वासौ जज्ञे पुण्यजनेश्वरी PāṇḍaC. 7. 382; कोपः श्लोकसमूहस्तु स्यादन्योन्यानपेक्षकः । व्रज्याक्रमेण रचितः स एवातिमनोरमः SāhiDa. 375. 15; नानाकवितामृतनीरपूरकल्लोलभङ्ग्यातिमनोरमायाम् । श्रीपद्यवेण्यां प्रथमस्तरङ्गः PadyaVe. 52; **iii** very soft, very fine सूतगन्धकयोः पिष्टिः कार्या चातिमनोरमा RasPraSu. 4. 38; **iv** sonorous, well-sounding आद्यं तद्दिननाथार्णं गृहीत्वातिमनोरमम् । चकार निजशिष्यस्य नाम ParamāKā. 141. 87.

अतिमनोरमाङ्गी (atimanoramāṅgī) *adj.* (*f.*) having a very beautiful body अतिमनोरमाङ्गी स्यादान्ध्रकर्णाटभवा पुरन्ध्री AnaṅgaRa. 5. 5.

अतिमनोहर (ati-manohara) *adj.* [*f.* -ā, -ī] extremely charming, very attractive, very pleasant, extremely gratifying, very lovely पीतनीलाम्बरधरौ तौ दृष्ट्वातिमनोहरौ । स तर्कयामास तदा सुवं देवावुपागतौ ViṣṇuP. v. 19. 19; रूपिण्यश्च श्रिया युक्ताः सर्वाः कमललोचनाः । लीलाविलाससंयुक्तैर्भावैरतिमनोहरैः । गणैस्ताः सह मोदन्तै VāyuP. ii. 39. 259; स्वपुरतिमनोहरं हरं दधतमुदीक्ष्य ननाम पाण्डवः Kirātā. 18. 15; तत्र च ··· अतिमनोहरं शयनीयमभजत AvantiKa. 136. 19; माल्यैरतिमनोहरैः । ··· चक्रे शान्तिजिनेन्द्रस्य शान्तचेता दशाननः । पूजाम् PadmP. (Ra.) 69. 4; 81. 25; रूपेण ता द्युतिमतातिमनोहरेण । राज्ञो मनस्यधिगता वनितास्तदासन् VarāṅgaC. 1. 60; प्रासादवेशेषु वराङ्गनानां क्रीडासु रेमेऽतिमनोहरासु VarāṅgaC. 22. 18; भवनमार्गे इवातिमनोहरः । अभूत निष्कुटजां श्रियमुच्चकैः स

अतिरुष् (ati-ruṣ) *f.* extreme anger, fury विक्षेप तं गाढममृष्यमाणा प्रवेपमानातिरुषा शुभाङ्गी MahāBhā. iv. 304*(2); भेदाद्भ्रुवोः कुटिलयोरतिलोहिताक्ष्या भग्नं शरासनमिवातिरुषा स्मरस्य S'āk. 5.24 = SaraKaṇṭhā. 578.12; ततो जहासातिरुषा भीमं भैरवनादिनी। काली MārkP. 87.18; जितमहं सुकुमारतयानया प्रतिचिकीर्षु शिरीषमितीक्षितम्। अतिरुषेव वियोगवती शुचं सरसहासदलं सदलम्भयत् HarVi. 3.42; 28.98; चञ्चर्ई सद्योऽतिरुषाक्षतं बकस्तुण्डेन हन्तुं पुनरभ्यपद्यत BhāgP. x. 11.50; स दैत्यवर्योऽतिरुषं प्रविष्टः SkandP. i(1). 29.49; विभज्य देवालयमाशु यातः कल्याणवैश्योऽतिरुषा निविष्टः। स्वमन्दिरम् GaṇeP. i. 22.33; दशकन्धरः ··· अमृष्यमाणोऽतिरुषा कपीश्वरं जगाद AdhyāRā. v. 4.26; निश्शङ्कमङ्के मिलितां जनानां छायां निरीक्ष्यातिरुषा प्रतप्तः Rāṣtrau. 16.19; *adj.* who is extremely angry or furious महिषमतिरुषं पौरुषोपघ्ननिघ्नं निर्विघ्नं निघ्नती वः शमयतु दुरितं भूरिभावा भवानी CaṇdiS'. 66; 9; SaraKaṇṭhā. 247.4; SaduktiKa. 20.23; S'ārṅgaPa. 112; अज्ञानावृतचेतसामतिरुषां कोऽर्थस्तिरश्चां गुणैः Pañcā. 131.21; Subhāṣi. 458.

अतिरुष (ati-ruṣa) *m.* extreme anger, fury भ्रातापि तस्यातिरुषेण चोदितः। ··· रामेण नीतो यमसादनं क्षणात् NaraP. 53.51.

अतिरुषान्वित (atiruṣānvita) *adj.* full of excessive wrath, having great anger शक्रो मैत्रेयातिरुषान्वितः। संवर्तकं नाम गणं तोयदानामथाब्रवीत् ViṣṇuP. v. 11.1; कौशिकोऽतिरुषान्वितः। शशाप तान् MārkP. 7.64; पतितान्दानवान्दृष्ट्वा निशुंभोऽतिरुषान्वितः। प्रययौ DevīBhāP. v. 30.33; योद्धुं बलवता द्विषा। चतुरङ्गेन सैन्येन सहितोऽतिरुषान्विति(? तः) BṛKathāK. 33.109; कश्यपोऽतिरुषान्वितः ··· शिष्यान् ··· उवाच GaṇeP. ii. 9.19; नन्दी ··· अतिरुषान्वितः। अब्रवीत् ··· दक्षम् S'ivaP. ii(2). 26.20 (101B.15)

अतिरुषाविष्ट (atiruṣāviṣṭa) *adj.* extremely furious, extremely wrathful तच्छ्रुत्वातिरुषाविष्टोऽभवन्नन्दी शिवप्रियः S'ivaP. ii(2). 26.28 (102A.5)

अतिरुषित (ati-ruṣita) *adj.* extremely enraged भृशमतिरुषितः परं वृषः कुरुपृतनापतिराह मद्रपम् MahāBhā. viii. 26.70.

अतिरुष्ट (ati-ruṣṭa) *adj.* extremely angered, extremely irritated or offended दष्टोऽतिरुष्टः स च दन्तकोट्या जघान शार्दूलम् VarāṅgaC. 12.75; न तत् ··· नरपतिरतिरुष्टः ···। यदिह विषयशत्रुर्दुःखमुग्रं करोति SubhāRaSaṁ. 2; मनोऽतिरुष्टं विशते तमोऽन्धम् BhāgP. iv. 19.34; गुरुर्जगामातिरुष्टः स्वापमाने समत्सरः BrahmVaiP. iv. 59.3; समरेऽतिरुष्टास्ते सात्त्विका भूप तुरङ्गमाः स्युः YuktiKa. 196.4; ततः सौमित्रिरतिरुष्टः प्रविष्टः RāmāCam. 4.34(1); खरश्चायं भूम्नाभिमुखमतिरुष्टः कटु रटन् पुरस्तात्पश्चाद्वा विपदमतिगुर्वीं दिशति नः KaumuMi. 8.3; तदातिरुष्टस्य गृहाश्रमेशितुर्यतीश्वरस्यापि कुतूहलं भृतः ··· प्रश्नोत्तराण्यासुः S'aṅkaDigVi.(Mā.) 8.15; (मानवाः) नातिरुष्टाः ··· सर्वदानन्दमानसाः MahNirvāT. 1.26; पाण्डवनृपोऽतिरुष्टः S'ivLī. 21.70; मातङ्गैः ··· पापिष्ठः शमनभटैरिवातिरुष्टैः ··· विबोधयांबभूवे Rāgh. 18.50.

अतिरुह् (ati-ruh-) I. P. **1** to grow up यदन्नेनातिरोहति ṚV. x. 90.2; VājaS. 31.2; S'vetāU. 3.15; S'vetāUBh. 166.14 (*on* 3.15); यत एवमन्नेनान्नमदनीयममुक्तवर्गमतिरोहति अतिक्रामति NyāySu.(Ja.) 558B.6 (*on* iii. 3.29); **2** to climb, to ascend तामिति भूत्वा वापीं तत्सलिलं तदनुपट्टगर्भगतम्। छायस्तु गन्धरोभेष्वतिरोहति सर्वतो नियतम् SamarāSū. 31.154; **3** (*caus.*) to set on, to install, to superimpose त्रिविधाङ्गुलमानानां जात्यंशं नातिरोपयेत् S'ilpaRa. ii. 3.53; अङ्गुलीनिर्मिते बिम्बे जात्यंशं नातिरोपयेत् S'ilpaRa. ii. 4.20.

अतिरुहा (ati-ruhā) *f.* a kind of fragrant plant (also called *māṁsarohiṇī*) मांसरोहिण्यतिरुहा वृत्ता DhanvNi. 152.26; MadaPāNi. 19.313; S'abdaRa.(Vā.) 2970; BhāvPra.(Bhā.) 6(4).132.

अतिरूक्ष (ati-rūkṣa) *adj.* [*f.* -ā] **i** extremely dry नातिस्निग्धां नातिरूक्षां वर्तिं प्रणिदध्यात् SuśruS. i. 5.17; ii. 8.3; तत्र वातमेवंविधमनारोग्यकरं विद्यात्। ··· अतिरूक्षमत्यभिष्यन्दिनम् CaraS. iii. 3.7 (1922 Ed.); तत्रातिरूक्षेऽपि धर्मकाले ··· प्रावृट्काल इवोदभूत् नवशष्पम् ViṣṇuP. v. 6.29; BrahmP. 184.50; विवेश पवनो लघु। शीतोऽतिरूक्षः शोषाय तद्देहस्य ViṣṇuP. i. 19.22; (बस्तिः) कर्षयत्यतिरूक्षश्च मारुतं च प्रकोपयेत् KāśyaS. 282A.27; सशोकभयपीडितानतिक्रुशातिरूक्षाकुलान् ··· परिहरेद्विरेकैस्सदा KalyāKā. 8.43; 8.60; (ज्वरः) क्षीणस्य चातिरूक्षस्य गम्भीरो यस्य हन्ति तम् (v. l. हन्ति मानवम्) RugVi. 2.70; कटुतिक्तकषायातिरूक्षसंदुष्टभोजनैः। ···मारुतः कुपितः ···कुरुते गदान् RugVi. 4.5; अतिरूक्षदुर्बलानां शमयेत्तृष्णामिहाशु पयः SiddhYo. 16.15; अतिरूक्षमनाहारं युद्धं कलहमेव च। ··· केवलं वायुकारणम् BrahmVaiP. i. 16.73; हीनस्वरा चातिरूक्षा वृद्धा त्याज्या ĪśānS'iPa. ii. 36.75; (चणकः) शुष्कभृष्टोऽतिरूक्षः स्याद् वातकुष्ठप्रकोपनः BhojanKu. 13.1; **ii** excessively coarse, extremely rough दन्ता वातिरूक्षास्ताम्राः श्यामाः ··· सहसा वा पतन्ति AstāSaṁ. i. 243.21 (2.9); न चातिरूक्षा न च सान्द्रभूमयः (जनाः सुखं तत्र वसन्ति) KalyāKā. 2.35; राजियग्रन्थियुतातिरूक्षशबलस्थूले विषाणे MātaLī. 3.2; **iii** extremely harsh, very cruel अत्यन्तमापूरिता कोपेन भूत्वा पुरो निरस्तदाक्षिण्यमितरामिवातिरूक्षैरक्षरैर्मामवादीत् (तरङ्गलेखा) TilaMañ. 335.14; पुरुषान्मुक्तकेशान्भयंकरान्। अतिरूक्षांश्च पश्यामि BrahmVaiP. iv. 63.16; अतिस्निग्धं जगन्मैत्र्या मनः किं युग्मिकालवत्। निर्ममत्वेन किं चातिरूक्षं प्रान्तारवत् तयोः S'āliC. 6.185; निशाचरेन्द्रः। रोषातिताम्राक्षतयातिरूक्षो बभाण Rāgh. 9.52; 17.41; [very affectionate (अतिक्रान्तो रूक्षम्), APTE; *m.* name of a variety of grain, APTE]

अतिरूक्षता (atirūkṣa-tā) *f.* the state of being extremely dry अतिरूक्षता अतिसान्द्रता ··· इत्येकादश द्रव्यदोषाः SuśruS. iv. 35.32.

अतिरूक्षतापन (atirūkṣa-tāpana) *n.* applying heat through a very dry substance (समाचरेत्) तमप्यभीक्ष्णम् ··· अतिरूक्षतापनैः KalyāKā. 15.148.

अतिरूक्षत्व (atirūkṣa-tva) *n.* **i** the state of being extremely harsh तयोस्ततः प्रभृत्येव निष्कृष्टस्नेहयोः कृतम्। चाक्रिकैरतिरूक्षत्वं तिलपिण्याकयोरिव RājTa.(Ka.) 6.272; **ii** extreme dryness, RājTa.(Ka.) 6.272.

अतिरूक्षाङ्ग (atirūkṣāṅga) *adj.* whose body is extremely rough (ददर्शामङ्गलं राजा) कुम्भकारं तैलकारम् ···। कुचैलमतिरूक्षाङ्गम् BrahmVaiP. iii. 35.28.

अतिरूक्षाशन (atirūkṣāśana) *n.* very dry food शीताम्बुयोषिच्छिशिरावगाहचिन्तातिरूक्षाशनवेगरोधान्। ···विवर्जयेत् पीनसरोगजुष्टः SuśruS. vi. 24.22.

अतिरूढ (ati-rūḍha) *adj.* **1** very much advanced, greatly developed विरोधमतिरूढोऽपि लङ्काधिपतिना समम्। विन्यस्यात्र श्रियं जीवदयार्थं दीक्षितोऽभवत् PadmP.(Ra.) 106.199; RāmC. 6.19; अस्मिन्नपि तमोभूते नातिरूढे महागदे। चन्द्रादित्यौ ··· पश्यति RugVi. 59.39; **2** very conventional व्युत्पन्नमिति गौडीयैर्नातिरूढमपीष्यते Kāvyāda. 1.46; **3** well-established, lasting long त्रिदशानतिरूढदानवग्रहदूरीकृतसंमदानव RāmC. 13.61; [*m.* a variety of beans, PW.]

अतिरूढमान (atirūḍha-māna) *m.* deep-rooted pride अतिरूढमानभरितः पतितो भवतोद्धृतोऽसि भवकूपबिलात् S'aṅkaDigVi.(Mā.) 9.35.

अतिरूढविश्रम्भ (atirūḍha-viśrambha) *adj.* whose trust is deep-rooted तत्क्षणविमुक्तसंगतौ···चिरपरिचिताविवातिरूढविश्रम्भौ क्षणमवतिष्ठावहि DaśKuC. 74.15.

अतिरूढानुवादतस् (atirūḍhānuvāda-tas) *adv.* due to restatement of what is well-established (on the basis of other means of cognition) एकेन चरितार्थत्वात्तत्राविप्रतिपत्तितः। अलमर्थेन चेत्, नैवमतिरूढानुवादतः NyāyVi. 2.94.

अतिरूप (ati-rūpa) *n.* **A** extraordinary beauty, very splendid or charming colour or shape (सुवर्णकारः) तेन हेम्ना विनिर्मिताः। तरवः ···। अतिरूपेण संपन्ना घटयित्वा विना भृतिम् MatsyaP. 92.25; CāṇaNiDa. 3.12; तस्य भार्यातिरूपेण विजिग्ये विश्ववर्णिनी SkandP. i(2). 7.67; BhaviP. 28A.25 (i. 8.20); पद्मावती ··· श्रीकुमारपालदेवस्यातिरूपादिस्वरूपं श्रुत्वा, ततः कृतनिश्चया पित्रा विसृष्टा ··· राज्ञा परिणीता KumāPraPra. 54.26; अतिरूपाद्धृता सीता MādhavāĀ. 26; [Inst.] marked by excessive beauty किंचित्पातकशुद्ध्यर्थं चण्डालस्य च वेश्मनि। जाताहमतिरूपेण पीडिता विविधैर्गुणैः SkandP. v(2). 78.40; **B** excellent splendour न तपति रुचिमन्नातिरूपं व्यनक्ति ···। प्रातः ··· अर्कप्रकाशः SūryaS'. 28; *m.* epithet of lord S'iva (*lit.* having an extraordinary form) विरूपायातिरूपाय बहुरूपाय शम्भवे। ··· नमो नमः SkandP. ii(4). 14.13; बहुरूपाय शंभवे। विरूपायातिरूपाय रूपातीताय ते नमः S'ivaP. ii(5). 13.24 (235A.1); [Supreme Being, APTE]

अतिरूप (ati-rūpa) *adj.* [*f.* -ā] **1** extremely beautiful, very handsome बभूवेन्द्रोपमं दृष्ट्वा राक्षसी काममोहिता। ··· रामम् ··· प्रियरूपं (v. l. अतिरूपम्) विरूपा सा Rāmā. iii. 16.9; सत्यवाचमतिरूपम्। मान्यं वाग्मिनमिन्दुः करोति गुरुवीक्षितो मिथुने Sārā. 23.20; PadmP. ii. 53.64; ततः कदाचिदौर्शवं तां पित्रा प्रतिपादिताम्। क्षत्रियायातिरूपाय BṛKathāMañ. 11.24; KathāSaSāg. xii. 9.6; अकरोत् ···। अतिरूपेषु दारेषु तस्य कोष्टेश्वरः स्पृहाम् RājTa.(Ka.)

8. 1527; NaiṣC. 15. 3; अतिरूपा हृता सीता अतिगर्वेण रावणः । अतिदानाद्बलिर्बद्धः VetāPañ.(S'i.) 22. 15; PurāPraSaṁ. 124. 17; तामतिरूपां (शालभञ्जिकाम्) विलोकयन् स कन्दर्पबाणैः पीडितः KathāK. 109. 1; **2** having a huge or abnormal form (cyclone) बभूवानाविलं व्योम नीलोत्पलदलप्रभम् । वायुना चातिरूपेण कम्पिताश्चैव दानवाः SkandP. i(2). 21. 101.

अतिरूपता (atirūpa-tā) *f.* great beauty (विनायकसहस्रनामपठनेन) मेधा प्रज्ञा धृतिः कान्तिः सौभाग्यमतिरूपता (भवति) GaṇeP. i. 46. 178.

अतिरूपधारिणी (atirūpa-dhāriṇī) *adj.* (*f.*) possessing great beauty येयमभ्यर्णे आस्ते नौरतिरूपधारिण्यवनिपालनन्दिनी सा त्वदर्थे मयेत्थमभ्यर्थिता TilaMañ. 286. 18.

अतिरूपपात्र (atirūpa-pātra) *n.* receptacle (i. e. possessor) of great beauty अथ खेडामहास्थाने ··· बालकालविधवा अतिरूपपात्रं सुभगाभिधाना···अभूत् PrabaCin. 106. 25.

अतिरूपभर (atirūpa-bhara) *n.* abundance of exquisite beauty स्त्रीणां सहस्रमतिरूपभरस्फुरन्तम्(?)···। योगीश्वरोऽरमयत्···श्रीहैहयः करसहस्रतलेन गृह्णन् PadyaVe. 403.

अतिरूपम् (ati-rūpam) *adv.* in addition, additionally अथ मतं स्वात्मग्राहिणी पूर्वा बुद्धिः स्वात्माव्यतिरिक्तं स्वस्य कारणत्वमतिरूपं गोचरयति NyāyKa. 71. 25.

अतिरूपयुक्ता (atirūpa-yuktā) *adj.* (*f.*) endowed with exquisite beauty तां चैवाग्र्यां श्रियमिव रूपिणीं च (v. l. श्रियमतिरूपयुक्ताम्) । पत्नीमृद्धां दृष्टवान्पार्थिवेन्द्रः MahāBhā. i. 189. 39.

अतिरूपवत् (ati-rūpava(n)t) *adj.* [*f.* -vatī] extremely beautiful, very handsome रक्षांसि चैतानि चरन्ति पुत्र ··· । अतुल्यरूपाण्यतिघोरवन्ति (v. l. अघोररूपाण्यतिरूपवन्ति) MahāBhā. iii. 113. 1; ViṣṇuP. iv. 6. 35; अतिरूपवती तन्वी तामालोक्य महासुराः । ··· कामबाणवशं गताः SkandP. v(1). 44. 16; BhaviP. 62B. 31 (i. 29. 20); पृथ्वीरूपाभिधानोऽभूद्राजा तत्रातिरूपवान् KathāSaSāg. ix. 1. 117; v. 1. 155; xii. 34. 329; द्वादशवार्षिका अतिरूपवती कन्या संजाता VetāPañ.(S'i.) 36. 15.

अतिरूपव्यापिन् (atirūpa-vyāpin) *adj.* pervasive of extraordinary form मनसस्तदीयस्य सत्त्वबहुलत्वात् तत्कृत इन्द्रियविसर्जनलक्षणे(? णो) व्यापारो अतिरूपव्यापी AbhinBhā. i. 54. 16 (*on* 2. 22)

अतिरूपशालिन् (atirūpa-śālin) *adj.* extremely handsome बालोऽयम् ···आलोकि लोकैरतिरूपशाली । ···क्षितौ काम इवावतीर्णः YātrāPra. 2. 62.

अतिरूपसमृद्धि (atirūpa-samṛddhi) *f.* wealth or abundance of great beauty इयमतिरूपसमृद्धिः सकृदपि दृष्टा न कर्षति स्वान्तम् GopāKeCan. 74. 29.

अतिरूपस्विन् (atirūpas-vin) *adj.* [DEBRU. p. 917] possessor of the wealth of exquisite beauty, extremely handsome तत्रैव युवा ब्राह्मणो अतिरूपस्वी मदनतुल्यो मया दृष्टः VetāPañ.(S'i.) 37. 13.

अतिरूपा (ati-rūpā) *f.* **i** name of the daughter of Marīci अथ नाम्नातिरूपेति मरीचिदुहिता शुभा SkandP. vii(1). 11. 72; **ii** name of a tutelary deity mentioned in the *jayābhiṣeka* (i. e. consecration of a king for victory) प्रथमाख्यम् ··· व्यूहम् ··· कामसन्दीपनी देवी अतिरूपा मनोहरा LiṅgaP. ii. 27. 165; (प्रमथा) VīraMi.(Rajanīti.) 388. 3; **iii** name of one of the three flames of fire जिह्वास्तास्त्रिविधा प्रोक्ताः···बहुरूपातिरूपा च सात्त्विका योगकर्मसु BhaviP. 340A. 13 (ii(1). 15. 13)

अतिरूपाढ्या (atirūpāḍhyā) *adj.* (*f.*) extremely beautiful अभिरूपाढ्या (v. l. अतिरूपाढ्या) दिव्या स्त्री MahāBhā. i. 92. 21; द्वे भार्ये चातिरूपाढ्ये तस्य राज्ञो बभूवतुः DevīBhāP. i. 20. 51; KathāSaSāg. x. 7. 21.

अतिरूपाभिमान (atirūpābhimāna) *m.* pride for exquisite beauty यौवनस्था च सा···। न कंचिदैच्छद्भर्तारमतिरूपाभिमानतः KathāSaSāg. ix. 2. 57.

अतिरूपिका (atirūp-ikā) *f.* name of one of the flames of fire सुप्रभा मोदकविधौ बहुरूपातिरूपिकाः (? के) । ···वह्नेर्जिह्वाः प्रकीर्तिताः BhaviP. 340B. 8 (ii(1). 15. 24)

अतिरूपिन् (ati-rūpin) *adj.* [*f.* -ṇī] extremely beautiful, very handsome तस्मिन्नेव (आकाशे) स्त्रियमतिरूपिणीं विद्यामाजगाम KenUBh. 93. 9 (*on* 3. 12); BṛKathāK. 55. 267; 78. 198; तत्र चेन्दुमती नाम दैत्यकन्यातिरूपिणी । सा दृष्टा तेन मुनिना VarāP. 95. 16; कुले वसन्ति दुःशीला दुष्कुलाः शीलनिश्चये । वस्त्रानुलेपनैर्हीना भूषणैश्चातिरूपिणः BhaviP. 717A. 3 (iv. 79. 7); PadmP. iv. 108. 2; v. 30. 111; कदाचिदेषोऽतिबलोऽतिरूपी मद्दर्शनात् स्त्रीत्वमुपैति साक्षात् KalkiP. ii. 2. 23; VetāPañ.(S'i.) 51. 13.

अतिरेक (ati-reka) *m.* [MAYR. I. 27] **1** something left over, something in addition, something more, surplus **2 A** excess, superfluity, something more than required **B** abundance, ample measure **3** difference, distinction, distinctive quality **4** negative comcomitance, concomitant negation **5** excellence, superiority, greatness **1** something left over, something in addition, something more, surplus अवषट्कारातिरेकाच्च KātyS'S. i. 8. 47; तेषां कालातिरेकेण ज्योतिषां च व्यतिक्रमात् । पञ्चमे पञ्चमे वर्षे द्वौ मासावुपजायतः MahāBhā. iv. 47. 3; शूद्रेण च न हातव्यो भर्ता कस्यांचिदापदि । अतिरेकेण भर्तव्यो भर्ता द्रव्यपरिक्षये MahāBhā. xii. 60. 35; सर्वस्य त्रिविभागत्वाद्वेदस्योक्तेन हेतुना । उद्भिदाद्यप्रमाणत्वमतिरेकान्न सिध्यति TantrVā. 281. 8 (*on* i. 4. 1); अस्ति हि लोके द्विर्वचनादतिरेकेणापि यावत्कृत्वोऽभ्यस्ते विवक्षितार्थप्रकाशनं भवति तावत्कृत्वोऽभ्यासः TantrVā. 452. 11 (*on* ii. 2. 2); वैकल्पिके षोडशिन्यगृह्यमाणे द्वयोरतिरेकः TantrVā. 651. 9 (*on* ii. 4. 26); तस्माद्यो विहिते यस्मिन्नधिकोऽन्यो विधीयते । तस्य तं प्रति शेषत्वमतिरेकेण लक्ष्यते TantrVā. 664. 14 (*on* iii. 1. 2); अतिरेकश्चावश्यंभावी । अल्पे हि गृह्यमाणे संयवनस्याकृतत्वात्पुनः प्रणीतासंस्कारः कर्तव्य इति गौरवमापद्येत ṬupṬ. 25. 3 (*on* iv. 2. 15); TattvBi. 67. 7; न कृतिजन्ये सुखे कार्यत्वं नाम कश्चिदतिरेकः प्रत्यक्षमीक्ष्यते NyāyRaMā. 42. 14; अतो ज्ञानस्यातिरेकेण विषयाकाराभावात् सर्वेषां ज्ञानाकारत्वाद् विषयज्ञानतज्ज्ञानविशेषो न सिध्यतीति विपरीतप्रसङ्गापादनम् NyāyRa. 324. 11 (*on* 5(3). 197); न हि मिथ्यारूपसर्पभयनिवृत्ती रज्जुयाथात्म्यज्ञानातिरेकेण सर्पविनाशमपेक्षते S'rīBh. 155. 6 (*on* i. 1. 4); नापरिमितानामन्तन्यूनातिरेकाः संभवन्ति NyāyMa. 333. 1; सातिरेकाण्यष्टौ वर्षाणि जातस्य यस्य सः AupaSūṬ. 193. 14; पार्वणसंवत्सरात् षड्भिरहोभिः सावनस्य संवत्सरस्यातिरेकात् SaṅkarKāBh. 128. 3 (*on* iii. 1. 30); अनुमाने तु विज्ञानं यावत् ज्ञानस्य साधनम् । तावतो नातिरेकेण गुणः कश्चिदपेक्ष्यते NyāyKu. 37. 7; शुनः शून इति न्यूनातिरिक्तत्वं, शुन इति कर्मीभूतः शुनक उच्यते, शून इति च वृद्धिमापन्नः···अतिरेके च पदान्तरत्वमेव YuktiSneha. 156. 20 (*on* i. 1. 7); अथ यः पशुरतिरिच्यते स ऐन्द्राग्नः कार्य इत्येकस्यैव पशोरतिरेकं दर्शयति BhāṭṭDī. iv. 60. 14 (*on* x. 6. 13); **2A** excess, superfluity, something more than required सोमातिरेके स्तुतशस्त्रोपजनः ĀśvaS'S. II. vi. 7. 1; तत्र मध्य एव पदस्य नावस्येत् । अर्थाभिप्रापणा(? अर्थानभिप्रापणा)न्न्यूनीभावोऽर्थाभिप्रापणादतिरेकः NidāSū. 12. 7 (1. 8); जाम्यतिरेकनाम Nir. 4. 20 (85. 4); विहितप्रतिषेधात्पक्षेऽतिरेकः स्यात् MīmāSū. ii. 4. 27; तेन पक्षे द्वयोः स्तोत्रीययोरतिरेकः पक्षे तिसृणाम् S'ābaBh. 643. 15 (*on* ii. 4. 27); विहारे सति अतिरेकः पशूनामापद्यते S'ābaBh. 1579. 17 (*on* vii. 4. 14); 1961. 6 (*on* x. 5. 40); न च न्यूनातिरेकादिप्रसङ्गो लक्षणं प्रति S'lokaVār. 4. 24 (140. 3); अतिरेकाच्च न पञ्चविंशतितत्त्वाभिप्रायम् । अतिरेको हि भवत्यात्माकाशाभ्यां पञ्चविंशतिसंख्यायाः BrahmSūBh.(S'aṅ.) 246. 11 (*on* i. 4. 11); अथवाधिक्यमतिरेकः तद्धेतुकेऽभिभवे धातुर्वर्तते । गौरवाधिक्येनोपाध्यायानभिभवति ManuBh. i. 151. 14 (*on* 2. 145); ऊर्ध्वमिति । प्रमाणस्याधिक्यं न्यूनातिरेकाभ्यामिति मन्तव्यम् AbhinBhā. i. 52. 17 (*on* 2. 18); किमर्थमुभयं सूत्रितमित्यतिरेकं चोदयित्वा परिहृत्य सम्यक् सूत्रितमिति वक्ष्यति NyāyRa. 13. 20 (*on* 1. 41); अतिरेकाच्च । तन्त्रसिद्धेभ्यस्तत्त्वेभ्योऽत्र तत्त्वातिरेकोऽपि भवति BrahmSūBh.(Rā.) 359. 6 (*on* i. 4. 11); VedāntDī. 70. 17 (*on* i. 4. 11); अतिरेकः संख्याधिक्यम् S'rutaPra. ii. 123. 16 (*on* i. 4. 11); VedāntPāSau. 126. 11 (*on* i. 4. 11); VedāntKau. 128. 4 (*on* i. 4. 11); NyāySu.(Ja.) 194A. 11 (*on* i. 4. 3); तर्हि धर्माणां षड्भ्यः पदार्थेभ्योऽतिरेकः स्यात् । तथा च षडेव पदार्था इति नियमो भज्येत NyāySu.(Ja.) 361A. 9 (*on* ii. 2. 6); गजादिदेहगतस्य च तत्परिमाणस्य पिपीलिकादिदेहेऽतिरेकः स्यात् NyāySu.(Ja.) 413B. 13 (*on* ii. 2. 10); TattvPrakā. 104A. 7 (*on* ii. 2. 34); BrahmSūBh.(S'rī.) i. 528. 3 (*on* i. 4. 11); AṇuBh. 107. 14 (*on* i. 4. 11); यथा कर्मण्यतिरेके प्रायश्चित्तश्रवणं बाधकम् AṇuBh. 210. 11 (*on* iii. 3. 3); 215. 6 (*on* iii. 3. 5); GoviBh. 68. 7 (*on* i. 4. 11); इतरथा तन्मात्रभूतादीनां न्यूनतातिरेको वा श्रूयते भ्रान्तेरनियतरूपत्वात् GoviBh. 82. 2 (*on* i. 4. 26); **2B** abundance, ample measure प्रभूतदोषस्तमसोऽतिरेकात् संमूर्च्छितो नैव विबुध्यते यः SuśruS. vi. 46. 20; तेषां षण्णां रसानां सोमगुणातिरेकान्मधुरो रसः CaraS. i. 26 40 (1941 Ed.); तृष्णातिरेको लालसा KāśiVṛ. *on* P. vii. 1. 51; तृष्णातिरेक इति । तृष्णाया अतिरेकोऽतिशयः प्रकर्षाधिक्यमित्यर्थः Nyās. iii. 653. 6 (*on* vii. 1. 51); अचलक्षोभतुमुलजलधिगर्भमूर्च्छन्मारुतातिरेकस्वीकृतेव(? क)जातवातप्रकृतिः (लक्ष्मीः) AvantiKa. 45. 8; प्लुष्टाः पृष्ठेऽशुपातैरतिनिकटतया दत्तदाहातिरेकैः (सप्तयः सप्तसप्तेः) SūryaS'. 45; क्लेशक्षयव्ययादीनां नातिरेकोऽत्र कश्चन TantrVā. 109. 1 (*on* i. 3. 4); सत्स्वनेकतनयेषु गुणातिरेकान्मूर्धाभिषिक्तनृपसम्मतमाशु राज्यम् EI. iii. 108. 38; i. 54. 9; KāvyālaṅSū. iv. 2. 18; भास्वत्तारतरात्ति(ति)रेकविलसच्चन्द्रार्द्धचि(च्चि)ह्नीकृतम् । ··· वन्दे सुन्दरवैद्यनाथविधृतं वन्द्य(न्द्यं) जटामण्डलम् EI. i. 147. 1; स्वोपवासभीततत्प्रतिविधानप्रवृत्तमृत्युप्रत्ते वरत्रय आस्तिक्यातिरेकात्प्रथमेन वरेण स्वात्मानं प्रति पितुः प्रसादो वृतः S'rīBh. 248. 5 (*on* i. 2. 12); EI. i. 355. 9; अन्येषां सवनलिहां प्रयातः स प्राच्यः क नु निजतेजसोऽतिरेकः S'rīKaC. 17. 44; सीधुगन्धि मुखमिन्दुमुखीनाम् । षट्पदः सपदि पातुमपप्तद्दुर्लभे हि रतिरेत्यतिरेकम् Surath. 6. 94; तन्वी तापातिरेकेण धत्ते यस्माद्विहस्तताम् EI. viii. 107. 34; xi. 53. 2; i. 65. 7;

तुरगसिंहयोः कट्याः सकाशादतिरेकेण अतिशयेन वर्तिता वृत्ता कटी यस्य स तथा AupaSūṬ. 37. 7; 50. 12; 100. 11; 105. 2; एतेषां यद्रूपं ततोऽतिरेकेण आधिक्येन 'रेहन्त' इति शोभमाना JñātāDhaṬ. 21B. 12; प्रियाप्रेम्णातिरेकेण…। अनेशदाशु भीमस्य सर्वोऽपि समरश्रमः PāṇḍaC. 7. 627; अवशिष्टानि नव तत्र पुनरेकादशिनीकरणे अतिरेकः समासो वाप्येत BhāṭṭDī. ii. 370. 16 (*on* vii. 4. 2); आभ्यामभ्युदयातिरेकरुचिरं राज्यं स्वभर्तुः कृतम् EI. viii. 210. 16; xiii. 200. 2; i. 280. 9; ii. 419. 46; vi. 117. 4; इह महसामतिरेकः क्रीडति हृतनम्रतापसामतिरेकः Yātrā-Pra. 1. 95; 2. 48 (4); 3. 79; Manmatho. 1. 25 (12) (426. 23); **2C** increase, overflow, upsurge स्वच्छमानसरसातिरेकपूरिताभ्यामिव गुरुतराभ्यां पयोधराभ्यां भ्राजमाना AvantiKa. 23. 11; रेजे राजीवराजी सा जिनपत्पङ्कजोन्मुखी। आदित्सुरिव तत्कान्तिमतिरेकादधःस्तुताम् MahāP. 25. 277; °नीलकण्ठदृष्टावातिथ्यं निबिडपयोधरप्रपञ्चे। आयाते गिरिदुहितुर्वतातिरेकं तत्कालं किल सलिलाशयोऽधिशिश्ये S'rīKaC. 9. 53 (comm. स सरोवरोऽतिरेकमाधिक्यं शिश्रिये); जयसि सुधानिधिरिह हि भवे त्वं तारापतिरेकः। यस्मिन्नुदयति कोऽपि भवेऽज्झषकेतोरतिरेकः S'rīKaC. 12. 78; एकः फलविकलश्चेन्नः कर्मणामतिरेकः YudhiVi. 6. 84 (comm. अतिरेक उद्रेकः); **3** difference, distinction, distinctive quality अतिरेकश्च कार्यस्येत्यहो न्यायविवेकिता VibhraVi. 24; व्यक्तितश्चातिरेकोऽस्य स्यान्नवेति विचारिते S'lokaVār. 5(12). 75 (565. 4); भेदो भिन्नश्चातिरेकोऽतिरिक्तो भेदोऽभिन्नः संविदः स्वप्रकाशाः। इत्येतस्मिन् विद्यते नार्थभेदः SaṁkṣeS'ā. 1. 215 (i. 167. 24) (comm. जीवब्रह्मणोर्भेदाभेदसंपादकः कश्चिद्धर्मोऽतिरेकः); Kāśi. i. 129. 25 (*on* 2. 128); तथापि सदृशदर्शनजसुभयस्मरणमात्रं विधेयेति चेत्। न। उभयस्मृतेरस्यातिरेकात्। स्थाणुपुरुषावयं तत्सदृशः पाषाणस्तम्भ इति Kiraṇā. 263. 13; 143. 1; अतिरेकस्याप्रयोजकत्वात् अन्यथा परसुखस्यापि पुमर्थत्वप्रसङ्गात् PramāMā. 20. 20; PrakaVi. 3. 13; TarkSaṁ.(Ā.) 2. 12; चेतनत्वादावभ्युपगमः जीवादतिरेके विवादः S'rutaPra. iB. 192. 27 (*on* i. 1. 13); एकोक्तानतिरेकश्चेन्निष्फलं स्यात् पदान्तरम्। अतिरेके कथं नु स्यादखण्डार्थाभिधायिता NyāyKu. 138. 3; S'atDū. 53. 13; 83. 22; अग्निरुष्ण इत्यादिवत् द्रव्यं जलमिति विशेषणतया स्फुरणादतिरिक्तत्वमिति चेत् अस्त्वेवमतिरेकः NyāySiA. 257. 15; 213. 27; 230. 18; अतिरेकव्यतिरेकभेदेन द्विविधो भेदः इति। अत्रातिरेको धर्म्यन्तरेष्वसन् धर्मः NyāySiA. 263. 2; किंच सुखस्य दुःखाभावमात्रत्वे वैशेषिकमोक्षवदपुमर्थता। अतिरेके सद्वितीयत्वम् Nyāyāmṛ. 637B. 11; YuktiSneha. 74. 19 (*on* i. 1. 5); ज्ञानत्वेऽपि तस्य सेतुदर्शनपक्षान्नातिरेकः। शास्त्रविहितत्वाविशेषात् AdvaiSi. 530. 9; Bheda-Dhi. 106. 3; GuruCandr. i. 11. 13; **4** negative (concomitance) or concomitant negation तस्य निर्णयकारणं स्यादन्वयोऽतिरेकश्च S'lokaVār. 5(5). 97 (430. 4); 7. 272 (921. 1); **5** excellence, superiority, greatness व्यस्यातिरेकं कृष्णस्य … वद जन्म महाभाग जन्ममृत्युजरापहम् BrahmVaiP. iv. 7. 1; साक्षादीश्वरदयामूलत्वान्मन्वादिनिबन्धनेभ्योऽस्यातिरेकः NyāyPari. 474. 19; उपकारिणि वीतमत्सरे वा सदयत्वं यदि तत्र कोऽतिरेकः। अहिते…सघृणं यस्य मनः सतां स धुर्यः Subhāṣi. 256; [Lexicons give अतिरेक as the meaning of रेक, शङ्कातिरेकयोः रेकः NānārthaMa. 62; of कट, कटोऽतिरेकशवयोः Nānārtha-Ma. 464; लालस, लालसस्तु निगद्यते तृष्णातिरेकयाञ्चासु तथौत्सुक्येऽपि गद्यते S'abdaRaSaK. 388. 1] cf. **अतीरेक.** **अतिरेकेण** (atirekeṇa) [Instr.] **i** other than, with more, more ऐकात्म्यवस्तुयाथात्म्यप्रकाशनपटीयसः। वचसस्त्वतिरेकेण किं मानं तद्धुरं वहेत् BṛĀraUBhVā.(Sambandha.) 719 (comm. पटुतरं वचस्तत्त्वमादि ततोऽतिरेकेण नान्यत्किंचिदपि मानान्तरं तत्प्रकाशनसमर्थमस्ति); नियमादतिरेकेण यद्यत् कर्म करोति यः। न किंचिदप्यस्य फलं सिध्यति क्रमदोषतः KulārT. 6. 81; **ii** to a very great measure, excessively अत्र शशिनं प्रत्यसूया दमयन्त्याः प्रतीयतेऽतिरेकेणेति Ekāva. 3. 1 (214); (105. 1)

अतिरेककल्पना (atireka-kalpanā) *f.* **i** postulation of the addition अनुबन्धापेक्षया चातिरेककल्पना BālKri. ii. 163. 26 (*on* 3. 278); **ii** assumption of distinction क्लृप्तविद्यासामर्थ्यादेव जीवब्रह्मविभागसिद्धावतिरेककल्पनावकाशाभावात् VivaPraSaṁ. 58. 4.

अतिरेकग्रहण (atireka-grahaṇa) *n.* mention of difference एतावता चोपपत्तौ किमतिरेकग्रहणेन PramāMā. 20. 31.

अतिरेकचीवर (atireka-cīvara) *n.* extra robe निष्ठितचीवरेण भिक्षुणा उद्धृते कठिने दशाहपरमं अतिरेकचीवरमविकल्पितं धारयितव्यं ततः उत्तरि धारयेन्नैसर्गिका पायन्तिका PrātiSū. 15. 1.

अतिरेकचीवरकल्प (atirekacīvara-kalpa) [Instr.] as an extra robe लभ्यं भदन्त सुगतचीवरमतिरेकचीवरकल्पेन धारयितुम् GiMs. iii(2). 91. 11.

अतिरेकचीवराधिष्ठान (atirekacīvarādhiṣṭhāna) [Instr.] with the extra robe serving as a basis or support लभ्यं भदन्त कौशेयं चीवरं त्रिचीवराधिष्ठानेन अतिरेकचीवराधिष्ठानेन धारयितुम् GiMs. iii(2). 91. 12.

अतिरेकतरलतार (atirekatarala-tāra) *adj.* pupils of which were excessively tremulous अतिरेकतरलतारम् … नयनोत्पलद्वन्द्वमभिमुखं दर्शयन्तीम् … बालिकामपश्यम् TilaMañ. 247. 11.

अतिरेकतस् (atireka-tas) *adv.* **A** due to difference or distinction व्यापारः कारकाणां हि दृष्टो जन्मातिरेकतः S'lokaVār. 4. 54 (151. 1); जाग्रत्स्वप्नसुषुप्तेभ्यो यदि नामातिरेकतः। व्यक्तिभ्यो गोत्ववद् दृष्टम् BṛĀraUBhVā.(Sambandha.) 856; i. 4. 362; किं स्वयं तत्प्रमेयत्वमस्य चेदतिरेकतः S'ivDṛ. 4. 114; **B** especially ऋक्षेऽन्त्यसप्तस्वतिरेकतोऽन्ये वदन्ति नौकाघटनादि कर्म YuktiKa. 223. 8; **C** excessively, abundantly अतिरेकतः प्रणयपूरपूरिता हरिणाक्षि चित्तसरसी तवाधुना Acyutarā. 9. 46.

अतिरेकता (atireka-tā) *f.* the nature of being different न सतो व्यतिरेकेण सतोऽन्यो भाव ईक्ष्यते। अप्यभावो न लभते किमु भावोऽतिरेकताम् BṛĀraUBhVā. iii. 8. 21.

अतिरेकत्व (atireka-tva) *n.* the nature of being additional or surplus उपमेयस्य गुणातिरेकत्वं (? रेकित्वं) व्यतिरेकः KāvyālaṅSū. iv. 3. 22 (vṛtti गुणातिरेकत्वं गुणाधिक्यम्); आधारस्य ब्रह्मणो हि तथाकाशस्य चातिरेकत्वात् (? चातिरेकात्) VedāntPāSau. 126. 22 (*on* i. 4. 11)

अतिरेकनामन् (atireka-nāman) *n.* synonym of excess or superfluousness जाम्यतिरेकनाम Nir. 4. 20 (85. 4); *adj.* named *atireka* (i. e. difference) तथा चानन्दादीनां ब्रह्मामेदेऽपि धर्मधर्मिभावव्यवहाराय त्वयाप्यतिरेकनामा कश्चनार्थः स्वीक्रियते LaCandr. 738. 28.

अतिरेकनिर्विवेक (atireka-nirviveka) *adj.* more reckless than युवजनादतिरेकनिर्विवेकस्त्विरा भिर्निषादलोकादधिकनिर्दयद्विजातिभिः TilaMañ. 200. 1.

अतिरेकपक्ष (atireka-pakṣa) *m.* view that admits something as a different entity सादृश्यं चोपाधिः इत्यादि त्वतिरेकपक्षस्वरसमप्यतिरेकपक्षानुपपत्तेः स्वरूपमात्रपरम् NyāySiA. 266. 19; न च द्वैतादेरप्रामाणिकत्वे तद्विरहस्याप्रामाणिकत्वापत्तिः, अतिरेकपक्षे इष्टापत्तेः AdvaiSi. 804. 17.

अतिरेकपरत्व (atirekapara-tva) *n.* the state of conveying difference तस्य सम्बन्धप्रतियोगित्वानुयोगित्वयोः अभावप्रतियोगित्वादेश्च अतिरेकपरत्वात् Guru-Candr. i. 238. 9.

अतिरेकपात्र (atireka-pātra) *n.* additional vessel दशाहपरमं भिक्षुणा अतिरेकपात्रं धारयितव्यम्, तत उत्तरं परिधारयेत् नैसर्गिका पायन्तिका PrātiSū. 18. 16.

अतिरेकभय (atireka-bhaya) *n.* fear of excess विहारे सति अतिरेकः पशूनामापद्यते। अतिरेकभयाच्च द्वयोर्द्वयोः समासः S'ābaBh. 1579. 18 (*on* vii. 4. 14)

अतिरेकभाज् (atireka-bhāj) *adj.* different from प्रत्यग्याथात्म्यविज्ञानजन्मनो नातिरेकभाक् BṛĀraUBhVā. i. 4. 1555.

अतिरेकम् (atirekam) *adv.* excessively, too much तान् रसान् सप्त नारिकेलं (नातिरेकं) समाचरेत्। रसातिसेवनाज्जन्तुः सद्यो मृत्युमवाप्नुयात् BhelaS. 21. 7 (1. 12); दृष्ट्वा च तां तथाविधामतिरेकमन्तःप्रकटितप्रीतिमुत्पन्नद्रढतरसौहृदोऽहं सोद्वेगमवदम् TilaMañ. 257. 22.

अतिरेकरमणीय (atireka-ramaṇīya) *adj.* extremely beautiful चूतशाखिनः शिखरदेशादवततार शुकशकुन्तिरेकोऽतिरेकरमणीयाकृतिः TilaMañ. 194. 23.

अतिरेकरम्य (atireka-ramya) *adj.* extremely pleasing अस्य … तेषु तेष्वतिरेकरम्येषु सागरकूलवलयेषु कुलपर्वताग्रेषु … विचरतः … अचिस्कन्द परमां वृद्धिमानन्दः TilaMañ. 428. 15.

अतिरेकरम्याकृति (atirekaramyākṛti) *adj.* of a very pleasing form एकातिरेकरम्याकृतिः सुरवधूरागत्य मधुराक्षरमभाषत TilaMañ. 400. 8.

अतिरेकलक्षण (atireka-lakṣaṇa) *adj.* **A** characterised by being an addition to एतदेवातिरेकलक्षणं शेषत्वं युक्तम् TantrVā. 664. 16 (*on* iii. 1. 2); **B** characterising excellence or superiority अत्राप्युपमानादुपमेयस्यातिरेकलक्षणं यद्वस्तु वक्तुमिष्टम् VyaktiVi. 65. 25; Kāvyānu.(He.) 184. 8.

अतिरेकवचन (atireka-vacana) *n.* statement of being an addition or excess द्वयोस्तिसृणां चातिरेकवचनं कर्मैकत्वे नोपपद्यते MīmāKau. ii. 117. 9 (*on* ii. 4. 8)

[1]**अतिरेकवत्** (atireka-va(n)t) *adj.* **i** possessing excess (of merit) तस्माद्दानेन तपसा कर्मणा च शुभं फलम्। वर्धयेदशुभं कृत्वा यथा स्यादतिरेकवान् MahāBhā. xii. 36. 37; **ii** being excessive अतिरेकवान् किल गुणोऽपि कलयति कदापि दोषताम् ChandaśCū. 3. 46(3); **iii** possessed of superiority अरिष्टनीले रत्नविशेषौ गुलिका वर्णद्रव्यविशेषो गवलं माहिषशृङ्गम्, एतेभ्योऽतिरेको नीलत्यातिरेकवान् AupaSūṬ. 20. 2.

[2]**अतिरेकवत्** (atireka-vat) *adv.* as in the case of (Abhāva being considered as) a different entity अतिरेकवदनतिरेकेऽपि अविज्ञातकरणतादीन्यनुमानानि च सुलभानीति NyāyPari. 493. 16.

अतिरेकवश (atireka-vaśa) *m.* [Abl.] on account of excess (of confidence or pride) तं पुरा षोढा निर्जितमित्यवज्ञया पश्यन्नतिरेकवशात्तां सरितमुत्तीर्य

स्कन्धावारं निवेशयामास PrabaCin. 22. 29.

अतिरेकवाद (atireka–vāda) *m.* the view that (configuration) is a separate distinctive property अतिरेकवादेऽपि संस्थानस्य संप्रतिपन्नत्वाच्च संस्थानमेव जाति: S'rīBh. 32. 12 (*on* i. 1. 1)

अतिरेकविधिनिषेध (atireka–vidhiniṣedha) *m.* affirmation or negation (of action) as an additional entity तत्र भाष्यादिष्वतिरेकविधिनिषेधादर्शनात् अर्थान्तरविरोधाभावाच्च उदासितव्यम् NyāyPari. 503. 5.

अतिरेकसमाधान (atireka–samādhāna) *n.* answer to (the objection about) the excess (of the number of principles) प्रधानं त्रिधा भित्त्वा अतिरेकसमाधानादभ्युच्चयमात्रत्वमिति चेत् का तर्हि गमनिका VedāntKa. 206. 20 (*on* i. 4. 3)

अतिरेकसिद्धि (atireka–siddhi) *f.* establishment of a different nature व्यापारापरव्यपदेशसहकारिभावाभावौ हि करणाकरणे कार्यभावाभावौ वेति । अतिरेकसिद्धावपि स्वकाल एव स्वाभावप्रतिक्षेपवत् अकरणाभावमाक्षिपेत् करणं न त्वन्यदा ĀtmaTaVi. 120. 15.

अतिरेकापत्ति (atirekāpatti) *f.* contingency of something being additional or different यथाकथंचिदेकताप्रत्ययस्यार्थसाधकत्वे च वनादेरपि प्रत्येकवृक्षादिभ्योऽतिरेकापत्तेः । एकं वनमित्याद्यनुभवसाम्यादिति SāṁkhyaPraBh. 129. 21 (*on* 5. 57)

अतिरेकावकाश (atirekāvakāśa) *m.* scope for difference यद्यप्येवं नातिरेकावकाशः पूर्णे तत्त्वे तत्त्वमर्थोपपत्तेः SaṁkṣeS'ā. 1. 162 (i. 132. 18)

अतिरेकाशङ्का (atirekāśaṅkā) *f.* additional doubt अतिरेकाशङ्कापरिहाराय अत्र तु पुनरुपन्यस्तम् BrahmSūBh.(S'aṅ.) 172. 17 (*on* i. 3. 18)

अतिरेकिता (atireki–tā) *f.* the state of being different, distinct or additional भावत्वे सति तद्वत्त्वान्नाशित्वमपि सिध्यति । तत्कारणस्य चाधारनाशादेरतिरेकिता TarkSaṁ.(Ā.) 125. 13; अनुष्णाशीतवत्तुच्छा(द्) ब्रह्मणश्चातिरेकिता NyāyPari. 48. 13; यथैतेषां मिथो भेदः परेषां नातिरेकिता । तथालंकारसर्वस्वे सप्रपञ्चमदर्शयम् AlaṅkāS'e. 13. 0 (102)

अतिरेकित्व (atireki–tva) *n.* superiority उपमेयस्य गुणातिरेकित्वं व्यतिरेकः KāvyālaṅSū. iv. 3. 22.

अतिरेकिन् (atirek–in) *adj.* [*f.* –iṇī] **A** different or distinct (from) साधनानामभावस्स्यात्कर्तृकर्मातिरेकिणाम् । साधनानां नियोगो हि कर्तृव्यापार इष्यते BhāvanāVi. 135. 4; षडेते धर्मिणः प्रोक्ता धर्मास्तेभ्योऽतिरेकिणः TattvSaṁ. 574; 1902; प्रागभावादयोऽभावाः सन्तः स्युरतिरेकिणः । व्यपदेशाद्घटेनैषामन्योन्याभाववद् ध्रुवम् BṛĀraUBhVā. i. 2. 114; ब्रह्मैव परमार्थः । तदतिरेकि ··· सर्वं तस्मिन्नेव परिकल्पितं मिथ्याभूतम् BrahmSūBh.(Rā.) 13. 15 (*on* i. 1. 1); सावयवत्वातिरेकि रूपान्तरं नोपलभामहे BrahmSūBh.(Rā.) 140. 1 (i. 1. 3); यदाह भट्टः - पूर्वप्रमितिमात्रे हि जायते स इति स्मृतिः । स एवायमितीयं तु प्रत्यभिज्ञातिरेकिणी TarkBhā.(Mo.) 32. 17; **B** surpassing, excelling अस्त्रैः समानामतिरेकिणीं वा पश्यन्निषूणामपि तस्य शक्तिम् Kirātā. 17. 34 (comm. ततोऽधिकाम्); चारूरू··· तत्कान्तिमतिरेकिणीम् । जनानां दृक्पथे स्वैरं विक्षिपन्त्याविवाभितः MahāP. 16. 79; अन्यैव कान्तिस्सा सृष्टिर्विधातुर्यातिरेकिणी SkandP. iv. 25. 25; पितापि ··· तत्सुखं प्राप पीयूषसेकतोऽप्यतिरेकि यत् PāṇḍaC. 1. 121.

अतिरेकीभवत् (atirekī–bhavat) *adj.* becoming excellent or better ए ो नूतनचूतकोरकघनग्रासातिरेकीभवत्कण्ठध्वानजुषो हरन्ति हृदयं मध्येवनं कोकिलाः SubhāRaK. 8. 20.

अतिरेखा (ati–rekhā) *f.* name of a particular metre (v. l. °लेखा) Ind. St. 8. 391.

अतिरेच (ati–reca) *m.* abundance cf. **अनतिरेच** non-abundance [ut.]

अतिरेचन (ati–recana) *n.* **A** diarrhoea चन्द्रगृहे चन्द्रांशे वातोन्मादातिरेचनाद्वापि (मरणम्) HorāSā. 26. 7; **B** excessive purgation शोषमूर्च्छाभ्रमापन्नं नातिरेचनमाचरेत् HārīS. iii. 10. 21; *adj.* causing excessive purgation रसे रसायनं श्रेष्ठं निःसत्त्वं बहुवैकृतम् । कङ्कुष्ठं तिक्तकटुकं वीर्योष्णं चातिरेचनम् RasRaSa. 3. 113; इष्टिकाचूर्णसंकाशश्चन्द्रिकाढ्योऽतिरेचनः ··· कम्पिल्लकः RasRaSa. 3. 122.

अतिरेचित (ati–recita) *adj.* **1** excessively purged स उभाभ्यां तथाभीक्ष्णं स्रोतोभ्यामतिरेचितः BhelaS. 18. 10 (1. 10); **2** completely removed or dissolved पृथिव्याः पार्थिवो भावः सलिलेनातिरेचितः VarāP. 39. 22.

अतिरेचितव्य (ati–recitavya) *adj.* should be left to remain तस्मादतिरिक्तस्य प्रतिपत्तिर्न त्वतिरेचितव्यमिति शास्त्रमस्ति ṬupṬ. 25. 3 (*on* iv. 2. 15)

अतिरेच्य (ati–recya) *adj.* to be expanded अतः स्वशाखाकल्पसूत्रगृह्योक्तश्राद्धप्रयोगस्तावानेव कर्तव्यो न स्मार्तपदार्थप्रवेशेनातिरेच्यः CaturCin. iii(1). 749. 3.

अतिरेच्यमान (ati–recyamāna) *adj.* being expanded (°श्राद्धप्रयोगः) अतिरेच्यमानो हि प्रयोगविध्यभिमतौ क्रमकालौ हित्वान्यावासादयेत् CaturCin. iii(1). 749. 3.

अतिरेतस् (ati–retas) *adj.* abounding in semen शुक्रेशमर्चयिष्यन्ति शृणु तेषां तु यत्फलम् । अवन्ध्यशुक्रास्ते मर्त्याः पुत्रवन्तोऽतिरेतसः SkandP. iv. 16. 126 = S'ivaP. ii(5). 50. 50.

अतिरेवन्तमूर्ति (atirevanta–mūrti) *adj.* having a form which surpasses that of Revanta अश्वानधिष्ठिताः केचिदतिरेवन्तमूर्तयः । अध्यासीना रथान् केचिदादित्याद्या इव ग्रहाः TriṣaS'aPuC. ii. 5. 75 (F. N. सूर्यपुत्राधिकरूपाः)

अतिरोक (ati–roká) *m.* aperture परिश्रयन्तोऽतिरोकान्कुर्वन्ति MaiS. iii. 6. 1; MānS'S. 58. 10.

अतिरोग (ati–roga) *adj.* suffering from a severe disease पञ्च विद्यां न गृह्णन्ति जडास्स्तब्धाश्च ये नराः । अलसाश्चातिरोगाश्च येषां च विस्मृतं मनः YājñaS'i. 163; *m.* severe disease or consumption महाभयेऽतिरोगे चाप्याशब्दो हन्तृवाचकः । एतान्हन्त्येव या देवी सा दुर्गा परिकीर्तिता BrahmVaiP. ii. 57. 8; राजयक्ष्मा क्षयो यक्ष्मा रोगराजो गदाग्रणीः । ऊष्मा शोषोऽतिरोगश्च रोगाधीशो नृपामयः RājNi. 408. 5; तत्रातिरोगैर्विलयं प्रयान्ति कलिङ्गवङ्गाः VasiS. 6. 76.

अतिरोगपीडिता (atiroga–pīḍitā) *adj.* (*f.*) afflicted by a very severe disease पुत्री मुण्डिका । प्रतिदिनं मृत्तिकां भक्षयति । अतः अतिरोगपीडिता बभूव SamyaKau. 69. 6.

अतिरोगिन् (ati–rogin) *adj.* suffering from an incurable disease especially consumption, consuptive or tubercular (patient) वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः । ··· परिविन्दन् न दुष्यति GobhiSm. 1. 72; (तन्त्रेऽस्मिन् वर्जिता ये च प्रतिष्ठां तैर्न कारयेत्) अतिरोगी भिषक् चैव साहसी समयच्युतः PañcaRā.(Ha.) i. 3. 11; अतिरोगी अचिकित्स्यरोगवान् VīraMi.(S'rāddha.) 85. 24; BālamBha. iii. 165. 29 (*on* 3. 265)

अतिरोचनक (ati–rocanaka) *adj.* very much pleasing or charming विशिष्टं वैष्णवं नाम सर्वकर्मसु चोदितम् । हरेः परं पितुर्नाम यो ददात्यपरं सुतम् । अतिरोचनकं दिव्यं तृतीयं श्रुतिचोदितम् VṛHārīSm. 3. 13.

अतिरोचमान (ati–rócamāna) *adj.* **1** shining across or beyond दशान्तरुष्यादतिरोचमानम् ṚV. x. 51. 3; **2** having a fine whorl on the neck अश्वाः प्यधुर्वसुमतीमतिरोचमानास्तूर्णं पयोधय इवोर्मिभिरापतन्तः S'iśuVa. 5. 4 (comm. अतिशयिता रोचमानाः कण्ठावर्ता येषां ते) = SūktiMu. 102. 3.

अतिरोचयत् (ati–rocayat) *adj.* liking very much मनसा चिन्तयन् पापं कर्मणा नाभि(v. l. नाति)रोचयन् । न प्राप्नोति फलं तस्य MahāBhā. v. 91. 7; शिखण्ड्यपि महाराज पुंवद्राजकुले तदा । विजहार मुदा युक्तः स्त्रीत्वं नैवातिरोचयन् MahāBhā. v. 190. 17.

अतिरोचिष्मत् (atirociṣ–ma(n)t) *m.* name of one of the Vasus नन्दोपनन्द° ··· अतिरोचिष्मत्° ··· सुजया अन्ये च शतशो वसवः ··· एवासत SāmaraU. 252. 12.

अतिरोचिस् (ati–rocis) *adj.* excessively shining, possessing great lustre or splendour जातो ह्यङ्गारैरङ्गिरा यतः । तस्मादङ्गिरसे प्रादादात्रेयीमतिरोचिषम् BrahmP. 144. 5.

अतिरोदन (ati–rodana) *n.* excessive crying or weeping क्षीरमुपसेवमानस्य शिशोरचिरं वा कटीधारणाद् बस्तिगुदसंरोधनात् अतिरोदनात् ··· क्षीरमामोद्यते वायुना KāśyaS. 106B. 23; वसागन्धोऽतिरोदनम् । ··· अन्धपूतनया भवेत् RugVi. 68. 26; विलोचनानाम् आपाटलानामतिरोदनेन NavaSāC. 1. 87; परं सुतवियोगेन तेन तस्यातिरोदनात् । अह्नोऽपि रात्रीकरणमन्धत्वमुदपद्यत PariPar. 1. 224; *adj.* crying excessively स्मृतिमानभियोगवान् विनीतो न च बाल्येऽप्यतिरोदनो न लोलः BhāvPra.(Bhā.) 4. 75.

अतिरोध (ati–rodha) *m.* excessive obstruction (of faeces) or constipation) गुदजः (वायुः) संप्रकुप्यति । लवणकटुकषायतिक्तसंसेवनेनामितलघुतरभोज्याच्छीतलेनातिरोधात् HārīS. iii. 11. 6.

अतिरोधतस् (atirodha–tas) *adv.* with complete restraint (of the breath) येन त्यजेत् तेन पीत्वा धारयेदतिरोधतः । रेचयेच्च ततोऽन्येन शनैरेव न वेगतः HaṭhPra. 2. 9.

अतिरोधान (a–tirodhāna) *n.* non-concealment (न तिरोधीयते तस्मात् कुड्यमध्येऽपि तद् ध्रुवम्) व्योमस्वरूपाभिप्रायं चेदमतिरोधानम्, कुड्यप्रदेशे त्वस्त्येव तिरोधानम् NyāyRa. 755. 19 (*on* 6. 97); न च विषयप्रकाशाद् विप्रलब्धो ज्ञानाप्रकाशकं नानुसंदध्यात् । अर्थान्तरप्रकाशेनार्थान्तराप्रकाशस्यातिरोधानात् NyāyKu. 78. 20.

अतिरोधानवचन (atirodhāna–vacana) *n.* statement about non-concealment प्रत्यक्षमेवाकाशम् । ··· तदुपपन्नमतिरोधानवचनम् NyāyRa. 738. 20 (*on* 6. 34–35)

अतिरोधायक (a–tirodhāyaka) *adj.* not concealing or obstructing

तस्याः (प्रकृतेः) संशुद्धमंशं कमपि तमतिरोधायकं सत्त्वरूपं स त्वं धृत्वा दधासि ··· वैकुण्ठ रूपम् Nāráy. i. 1. 5.

अतिरोधायकत्व (atirodhāyaka-tva) *n.* the state of not (being an agent of) concealing उद्गीथस्यादित्यदृष्टिविषयत्वाङ्गीकारे रजतदृष्टिविषयशुक्तिस्वरूपमिवोद्गीथक्रियास्वरूपं तिरोधीयेतेत्याशङ्क्याहार्यदृष्टेरतिरोधायकत्वस्योक्तत्वात् Citra-Mī. 59. 24.

अतिरोधि (a-tirodhi) *adj.* manifest (*lit.* not being concealed) अतिरोधिरसौ ···। तनुते तनुरीश तावकी स्मरणं विस्मरणं च दुःशकम् Yādavā. 9. 62; *m.* non-concealment, non-disappearance परस्परं भूषयतः प्रतीकान् औद्वाहिकं मङ्गलमुद्वहन्त्याः। प्रायः स्वदीप्तेरतिरोधिमिच्छन्त्यावारयन्नाभरणानि तस्याः Yādavā. 12. 70.

अतिरोप्य (ati-ropya) *adj.* a variety of paddy liable to be transplanted repeatedly (व्रीहयः) रोप्यातिरोप्या लघवः शीघ्रपाका गुणोत्तराः SuśruS. i. 46. 12.

अतिरोभाविन् (a-tirobhāvin) *adj.* not disappearing or vanishing विनाशि तिरोभावि शब्दादीनां शब्दस्पर्शरूपरसगन्धतन्मात्राणां स्वकार्यमपेक्ष्य अविनाशिनाम् अतिरोभाविनाम् TattvVai. 132. 29 (*on* 3. 13)

अतिरोभूय (a-tirobhūya) *ger.* without disappearing वल्गन् कोऽप्यतिरोभूयाङ्गं तिरस्कृत्य वर्मणा।··· मध्येकृत्येभमभ्यहन् (दैत्यभटः) DvyāśraKā. 5. 22.

अतिरोमचय (ati-romacaya) *m.* too much amount of hair अतिरोमचयान्वितोत्तरोष्ठी न शुभा भर्तुः BrSaṁ. 70. 20.

अतिरोमचित (ati-romacita) *adj.* excessively covered with hair (all over the body), too much hairy भौमगृहे रविदृष्टो ह्यतिरोमचितं गुरुः कुरुते (नरम्) Sārā. 27. 25.

अतिरोमता (atiroma-tā) *f.* excessive fibrousness (hairiness) (of cloth), excessively fibrous texture सूक्ष्मतन्तूपसदनं तथा चैवातिरोमता। श्याममण्डलता चैव वस्त्राणामविशेषतः।··· एवमादीनि चिह्नानि ViṣṇuDhaP. ii. 28. 30.

अतिरोमन्थ (ati-romantha) *m.* excessive rumination बाणोऽपि ··· अतिरोमन्थमन्थरकुरङ्गकुटुम्बाध्यास्यमानम्रदिष्ठगोष्ठीनपृष्ठास्वरण्यस्थलीषु ··· निवासस्थानमगात् HarṣaC. 124. 14.

अतिरोमश (ati-romaśa) *m.* **1** wild goat वनच्छागोऽतिरोमशः Hārāv. 81; **2** a kind of monkey, [S'abdaKaDru.]

अतिरोमशा (ati-romaśā) *adj.* (*f.*) too much hairy or shaggy (पाञ्चाली) ताम्राक्षी नातिरोमशा MahāBhā. ii. 58. 36.

अतिरोमाकुला (ati-romākulā) *adj.* (*f.*) too much hairy or shaggy अतिरोमाकुला ··· त्याज्या ··· कन्या विवाहे सदा PañcSā. 4. 4.

अतिरोमाङ्ग (ati-romāṅga) *adj.* having profuse hair all over the body तत्रोदपद्यत तदा पुरुषः ··· ऊर्ध्वकेशोऽतिरोमाङ्गः BrahmP. 39. 80.

अतिरोष (ati-roṣa) *m.* extreme or excessive anger अतिहासातिरोषौ च क्रोधस्थानं च वर्जये MahāBhā. iii. 222. 28; तयातिरोषात्सोढासि न त्वद्वने वसन्ती RaghuVa. 14. 63; अतिशिशिरप्रियतातिरोषः।··· इति भाषितलक्षणानि पित्तज्वरे प्रतिदिनं प्रभवन्ति तानि KalyāKā. 9. 55; अतिरोषान्महादेवः···अब्रवीत्। आनीयतां स दुष्टात्मा GaṇeP. ii. 106. 23; यदपसरति मेषः कारणं तत्प्रहर्तुं मृगपतिरतिरोषात् सङ्कुचत्युत्पतिष्यन् SūktiRa. 84. 13; रतिपतिरतिरोषात्तारकापुष्पबाणैस्तुदति युवमनांसि ध्वान्ततदन्तावलाढ्यः KaṁVa. 4. 54; अतिरोषादतिशयितात् ··· भवति यदृच्छावशोऽनर्थः KandaCū. vi. 6. 4; ĀnandRa. 7. 25.

अतिरोषण (ati-roṣaṇa) *adj.* [*f.* -ā] extremely angry, extremely wrathful भृगवो ह्यतिरोषणाः MahāBhā. xiv. 96. 7; सत्यवतीम् ··· ताम् ··· गाधिरप्यतिरोषणायातिवृद्धाय ब्राह्मणाय दातुमनिच्छन् ViṣṇuP. iv. 7. 14; अतिरोषणश्चक्षुष्मानप्यन्ध एव जनः HarṣaC. 19. 8; 12. 5; MahāP. 8. 224; क्षत्रियाः गिरिदुर्गमनुप्राप्ताः ··· रामोऽनुपदमागम्य ताञ्जघानातिरोषणः NīlaP. 1169; माहेश्वरी ···। चकर्त दुर्धरस्याशु मूर्धानमतिरोषणा SkandP. i(3B). 19. 43; UjjvaNīMa. 83. 5.

अतिरोषभीषण (atiroṣa-bhīṣaṇa) *adj.* frightening because of great wrath अथाविशद्विसुरतिरोषभीषणश्रमूम् Raghunā. 8. 91.

अतिरोषभृत् (atiroṣa-bhṛt) *adj.* possessing excessive anger, excessively angry or wrathful स प्रतस्थे महेशस्य बाणहस्तोऽतिरोषभृत् SkandP. v(1). 3. 4.

अतिरोषरौद्र (atiroṣa-raudra) *adj.* fierce with great fury निपात्य भूमावतिरोषरौद्राः क्रमेण चक्रुस्तद(? स्तव)रोत्तरांस्तान् VarāṅgaC. 17. 62.

अतिरोषवश (atiroṣa-vaśa) *m.* [Abl.] on account of excessive anger वाचमवददतिरोषवशादतिनिष्ठुरस्फुटतराक्षरामसौ S'iśuVa. 15. 13.

अतिरोषसमन्वित (atiroṣa-samanvita) *adj.* possessing excessive anger, extremely angry इतन्नतोर्वृषरूपधारिणः ककुदि स्थितोऽतिरोषसमन्वितः ··· असुरान्निजघान (पुरञ्जयः) ViṣṇuP. iv. 2. 31.

अतिरोषसमाविष्ट (atiroṣa-samāviṣṭa) *adj.* overwhelmed with excessive anger, extremely angry दशरथः ··· अतिरोषसमाविष्टो विष्टरश्रवसमाराध्य दण्डयात्रां चकार PadmP. iv. 112. 12 (6)

अतिरोषाकुलित (atiroṣākulita) *adj.* agitated by excessive anger सोऽभ्यगादतिरोषाकुलितो नलान्तिकम् Nalābhyu. 7. 8.

अतिरोषाढ्या (atiroṣāḍhyā) *adj.* (*f.*) full of extreme anger (इन्द्राणी) वज्रहस्तातिरोषाढ्या DevīBhāP. v. 28. 24.

अतिरोषारुण (atiroṣāruṇa) *adj.* red with extreme anger चैत्रस्तारक्षवीम् ··· अतिरोषारुणस्तब्धविशालवृत्तलोचनाम् ··· तनुमास्थाय स्वप्ने प्रतिबुद्धो मानुषीमात्मनस्तनुं पश्यति Bhām. 356. 5 (*on* ii. 1. 14)

अतिरोषिता (ati-roṣitā) *adj.* (*f.*) much irritated or enraged तदातिरोषिता गोपी तत्र व्याक्रोष्टुमुद्यता ĀciP. 23. 47.

अतिरोषिन् (ati-roṣin) *adj.* very angry or wrathful पीतावभासुरवपुः पुरुषोऽतिरोषी पित्ताधिको भवति KalyāKā. 9. 4.

अतिरोह (ati-roha) *m.* an epithet of S'iva आरोहणोऽतिरोहश्च Catur-Cin. i. 210. 9.

अतिरोहत् (ati-róhat) *adj.* climbing over, ascending अति त्री सोम रोचना रोहन्न भ्राजसे दिवम् ṚV. ix. 17. 5.

अतिरोहा (ati-rohā) *f.* a kind of creeper (identified with Vanamālā) वनमाली(? ला) द्वितीया चर्मकसा रोहिणी रुहा पृक्का। अतिरोहा च विकासा मासरुहा स्याद्गन्धविलासा AbhidhāMañ. 243. 4.

अतिरोहिणीशशत्रु (ati-rohiṇīśaśatru) *adj.* who has surpassed Rāhu (*lit.* enemy of the husband of Rohiṇī) रेवत्यामतिरोहिणीशशत्रुः।··· लक्ष आगात् DvyāśraKā. 4. 47 (comm. राहुमतिक्रान्तः)

अतिरोहित (a-tirohita) *adj.* not concealed, not hidden (i. e. clear, manifest) यदयं प्राणोऽध्यात्ममतिरोहितो मदित्येव KauṣiBr. 18. 4 (80. 19); तस्माद्यथातिरोहितमपि तिरोहितमिवाभिव्यज्यत इव प्रयत्नापेक्षम्, तथात्मतत्त्वमप्यतिरोहितं तिरोहितमिव प्रयत्नादभिव्यज्यत इवेति पुष्कलम् BrahmSi. 37. 17; शेषमतिरोहितम् TātpaṬ.(Vā.) 69. 20 (*on* i. 1. 1); 312. 23 (*on* i. 1. 41); TattvVai. 76. 19 (*on* 2. 15); 97. 23 (*on* 2. 25); श्रुत्यनुगमश्चातिरोहितः Bhām. 57. 14 (*on* i. 1. 1); 75. 12 (*on* i. 1. 3); VedāntDī. 50. 5 (*on* i. 3. 13); VedāntSā.(Rā.) 96. 5 (*on* i. 3. 18); अतिरोहितस्य ब्रह्मणोऽज्ञानसाक्षित्ववदज्ञानतिरोधानाभ्यां विनाप्यज्ञानकार्याभिमतप्रपञ्चदर्शनसंभवात् NītiMā. 23. 18; तत्र क्रमसंबन्धस्यातिरोहितस्य प्रत्येयत्वात् AlaṅkāSa. 149. 5; PṛthvīVi. 3. 31; स किं ब्रह्मण्यतिरोहिते कल्पयति उत तिरोहिते S'rutaPra. iA. 80. 22 (*on* i. 1. 1); S'atDū. 140. 25; AṇuBh. 186. 4 (*on* iii. 2. 6); अतिरोहितमन्यत् Aparā. 7. 5 (*on* 1. 5); 101. 21 (*on* 1. 75); सूत्रार्थोऽतिरोहित इति नाभिहितः TattvPrakā. 129B. 8 (*on* ii. 4. 9); कुबेरस्त्वयि तुष्टः ··· लोकसमक्षमतिरोहितः RājTa.(Jo.) 48.

अतिरोहितत्व (atirohita-tva) *n.* the state of not being concealed यथासंकल्पं जगत्सृष्टिश्रवणेन सत्यसंकल्पादिगुणानामतिरोहितत्वावगमात् S'rutaPra. iB. 202. 30 (*on* i. 1. 13)

अतिरोहितदशा (atirohita-daśā) *f.* unconcealed (i. e. manifest) state अतिरोहितदशायां विषयत्वलक्षणस्वभाववैशिष्ट्येन भेदसत्यत्वप्रसङ्गाच्च S'atDū. 145. 15.

अतिरोहितभेद (atirohita-bheda) *adj.* of unconcealed or obvious difference उभये देवमनुष्या इति वर्गद्वयापेक्षमतिरोहितभेदानां वर्गिणामभिधानम् Pradī. iv. 323A. 18 (*on* v. 2. 44); iv. 329B. 37 (*on* v. 2. 48)

अतिरोहितराजवेश (atirohita-rājaveśa) *adj.* who was clad in a royal apparel अतिरोहितराजवेशम् ··· केकयसुता ·· रामं कथं नु मुनिवेशधरं चकार MahāN. 3. 33.

अतिरोहितरूप (atirohita-rūpa) *adj.* of unconcealed (i. e. manifest) form अतिरोहितरूपं यज्जगन्यव्याकृते तथा। तत्साक्षित्वाच्च BrĀraUBhVā. i. 4. 715.

अतिरोहितरूपिन् (atirohita-rūpin) *adj.* whose (original) form is not concealed, possessed of an unconcealed form आरोपविषयस्य स्यादतिरोहितरूपिणः। उपरञ्जकमारोप्यमाणं तद्रूपकं मतम् PratāYaBhū. 371. 4 = Citra-Mī. 44. 15.

अतिरोहितसंवित्क (atirohitasaṁvit-ka) *adj.* possessed of an unconcealed (i. e. clear) knowledge अतिरोहितसंवित्कं सदानस्तमितोदितम्। ··· तत् BrĀraUBhVā. i. 4. 212; ii. 3. 225.

अतिरोहितस्वभाव (atirohita-svabhāva) *adj.* possessed of an unconcealed (i. e. manifest) nature दहरवाक्ये त्वतिरोहितस्वभावापहतपाप्मत्वादिविशिष्ट एव दहराकाशः प्रतीयते BrahmSūBh.(Rā.) 306. 16 (*on* i. 3. 18)

अतिरोहितस्वमाहात्म्य (atirohita-svamāhātmya) *adj.* whose personal greatness is unconcealed मुक्तस्यातिरोहितस्वमाहात्म्यस्यानवधिकातिशयानन्दपरिपूर्णब्रह्मानुभव एव VedāntSā.(Rā.) 410. 3 (*on* iv. 4. 17)

अतिरोहितस्वरूप (atirohita-svarūpa) *n.* unconcealed (i. e. manifest) nature or form अतिरोहितस्वरूपस्यैव लाघवेनाभ्युपगन्तुमुचितत्वात् S'atDū. 106. 16; *adj.* whose nature is unconcealed दहराकाशस्त्वतिरोहितस्वरूपापहतपाप्मत्वादिगुणकः VedāntDī. 52. 6 (*on* i. 3. 18)

अतिरोहिता (ati-rohitā) *adj.* (*f.*) coloured deep red पुरोदिगतिरोहिता परितिरोहितास्तारकाः PārijāHa. 23.

अतिरोहितार्थ (a-tirohitārtha) *adj.* having an unconcealed or clear meaning (i. e. easily understandable) शेषमतिरोहितार्थम् TātpaṬ.(Vā.) 182. 11 (*on* i. 1. 5); 131. 9 (*on* i. 1. 4); शेषं सनिदर्शनमतिरोहितार्थम् Bhām. 57. 14 (*on* i. 1. 1); 28. 11 (*on* i. 1. 1); भाष्यमतिरोहितार्थम् VedāntKa. 172. 17 (*on* i. 3. 28); SiddhāBi. 84. 2; S'ivārkaMaDī. ii. 143. 8 (*on* ii. 3. 19)

अतिरोहितार्थता (atirohitārtha-tā) *f.* the state of having an unconcealed or clear meaning तदतिरोहितार्थतया न व्याख्यातम् Bhām. 93. 15 (*on* i. 1. 4)

अतिरौक्ष्य (ati-raukṣya) *n.* excessive dryness अतिरौक्ष्यात् ... दुर्योगातियोगाद्वुत्पद्येते KāśyaS. 156A. 33; अतिरौक्ष्याच्छेदो वेदना च AṣṭāSaṁ. i. 187. 12 (1. 38); व्यायामादतिरौक्ष्याच्च मारुतो जठराश्रितः । तस्माज्जठरको नाम व्याधिर्भवति हस्तिनः Hastyāyur. 252. 6 (2. 45)

अतिरौद्र (ati-raudra) *adj.* [*f.* -ā, -ī] **i** very fierce वृषभविलग्ने शूरः ...विविधव्ययोऽतिरौद्रः Sārā. 47. 8; निर्विषोऽभून्महोरगः । नीतस्तेनातिरौद्रेण पन्नगेन रसातलम् VāmaP. 7. 29; (भूपः मुनिबालकाभ्यां व्यलोकि) ज्वलन्निवान्तर्ज्वलितेन तेजसा ... आशीविषः सर्प इवातिरौद्रः YaśasCam. i. 148. 5; न तद् ... नरपतिरतिरुष्टः कालकूटोऽतिरौद्रः ... यदिह विषयशत्रुर्दुःखमुग्रं करोति SubhāRaSaṁ. 2; सर्वाङ्गसंनेह(? सन्नाह)निवेशलक्ष्यचक्षुर्द्वयीमात्रतयाऽतिरौद्राः । प्रधावमानाः सुभटा विरेजुर्लोहस्य गोला इव विस्फुरन्तः HammīMaKā. 11. 15; भूतमुत्थितम् ... स्वतेजसाऽतिरौद्रेण द्रष्टुर्दृष्टिविलोपकम् NītiPra. 3. 15; अतिकृष्णातिरौद्राभिः ... स्त्रीभिः सङ्गोपगूहनम् (स्वप्ने ... °दुःखदम्) ĪśānS'iPa. ii. 18. 41; अतिरौद्रा महादंष्ट्रा भ्रुकुटीकुटिलेक्षणा । विवर्तनयना शूरा दीर्घघोणा मदान्विता ... देवी S'ilpaRa. ii. 24. 14; **ii** very dreadful अतिरौद्रमनासाद्यं कालेनापि दुरासदम् ... शूलं जग्राह रावणः Rāmā. vi. 91. 11; निधनमुपगतैर्मही कृताभूद्गिरिशिखरैरिव दुर्गमातिरौद्रा MahāBhā. vii. 131. 134; किमिदमकार्यं भवत्या कृतमतिरौद्रं ते वपुर्लक्ष्यते VisṇuP. iv. 7. 25; दौःशील्येनातिरौद्रेण पत्नी तस्य द्विजन्मनः । तेन सा संपरित्यक्ता तमाह जगतीपतिम् MārkP. 70. 33; रौद्रोऽतिरौद्रः क्षयकृत्प्रदिष्टः (वत्सरः) BṛSaṁ. 8. 49; किं तत्सत्त्वं यस्यातिरौद्रवज्रसदृशप्रहारादहं मुक्तः PañcT. 4. 17 (390. 42); गर्जितेनातिरौद्रेण जर्जरीकृतचेतनाः । प्रोषिता विह्वलीभूता प्रमदाशाहितेक्षणाः PadmP. (Ra.) 22. 63; तेनान्तरक्षार्थमदुष्टबुद्ध्या स्वाकारितः काष्ठमयोऽतिरौद्रः । निर्भर्त्सितः VarāṅgaC. 25. 24; वरं विषं भक्षितमुग्रदोषं वरं प्रविष्टं ज्वलनेऽतिरौद्रे ... न जीवितं तत्त्वविवेकमुक्तम् SubhāRaSaṁ. 203; अतिरौद्रेण रूपेण पृथिवीतले । अवतीर्य हनिष्यामि ... महासुरान् LakṣmīT. 9. 30; रणभुवमतिरौद्रीम् ... करोमि AnargharRā. 4. 50; अतिरौद्रे काले हस्तिनः ... विविधसुखमनुभवन्ति सलिलेषु Hastyāyur. 196. 3 (2. 13)

अतिरौद्रकर्मन् (atiraudra-karman) *adj.* doer of a fierce act स (द्रौणायनिः) केशवं चार्जुनं चातितेजसा विव्याध मर्मस्वतिरौद्रकर्मा MahāBhā. viii. 12. 53.

अतिरौद्रता (atiraudra-tā) *f.* extreme fierceness स्फुरत्क्रोधानलज्वालापरीतस्यातिरौद्रताम् । अवाप विष्णोः स तदा नरसिंहाकृतेरिव BrahmāṇḍP. ii. 57. 56; परपरिवादोऽतिरौद्रताऽतुष्टिः । ... प्रख्यातैषा तु राजसी वृत्तिः TattvSa. (3)124. 11.

अतिरौद्रत्व (atiraudra-tva) *n.* extreme fierceness वेदपुरुषोऽपि रुद्रः ... तत्स्वरूपस्यातिरौद्रत्वात् ... स्तुतिमकरोत् S'aṅkaVi.(Ā.) 38. 4.

अतिरौद्रदृश् (atiraudra-dṛś) *adj.* having very dreadful eyes स पुरुषः ... । संप्रतस्थे महेशस्य बाणहस्तोऽतिरौद्रदृक् PadmP. v. 14. 6.

अतिरौद्रभूति (atiraudra-bhūti) *adj.* **i** having frightful ashes श्मशानाश्रय इवातिरौद्रभूतयः Kād. 107. 15; **ii** whose prosperities are frightening Kād. 107. 15.

अतिरौद्रमनोवृत्ति (atiraudra-manovṛtti) *adj.* having a very cruel disposition of the mind अतिरौद्रमनोवृत्तिरन्यरक्षोविचक्षणम् । तस्या भीष्मत्वमद्वैतं विख्यातं भुवनत्रये PāṇḍaC. 9. 205.

अतिरौद्ररूप (atiraudra-rūpa) *n.* extremely horrible appearance श्रूपायमानास्विवातिरौद्ररूपं बिभ्रतीषु दिक्षु ... हस्तिनः ... विचरन्ति Hastyāyur. 195. 23 (2. 13)

अतिरौद्रसर्ग (atiraudra-sarga) *m.* extremely fierce nature श्रीभूतिः ...हिरण्यरेतसि तनुविसर्गादतिरौद्रसर्गादाहयेऽन्वपाये प्रादुर्भूय YaśasCam. ii. 349. 3.

अतिरौद्रास्त्र (atiraudrāstra) *n.* very dreadful weapon तच्च विपरीतं कुर्वत्यास्तवातिरौद्रास्त्रधारणपालननिष्ठः क्षत्रियाचारः पुत्रो भविष्यति VisṇuP. iv. 7. 28.

अतिरौप्य (ati-raupya) *m.* name of a kind of rice शालयः ...रौप्यातिरौप्या लघवो मूत्रलास्ते गुणोत्तराः । छिन्नरूढा हिमा रूक्षाः पित्तघ्ना लघुपाकिनः MadaPāNi. 63. 15.

अतिरौरव (ati-raurava) *adj.* very formidable तावच्छ्रेणिक निर्वृत्ते तस्मिन्संख्येऽतिरौरवे । स्वभावावस्थितो भूत्वा रावणः क्रोधदीपितः । ... चक्ररत्नमचिन्तयत् PadmP.(Ra.) 75. 42; *m.* name of a hell तस्मात्त्वा लोहशङ्कौ वा कुम्भीपाकेऽतिरौरवे । धर्मराजाज्ञया सर्वे नेष्यामो बहुताडनैः PadmP. iv. 20. 61.

अतिरौरवा (atirauravā) *f.* one of the eight *śaktis* belonging to the first Āvaraṇa सुमत्या व्यूहमुच्यते ... सर्वाशी च महाभक्षा महादंष्ट्रातिरौरवा LiṅgaP. ii. 27. 199; VīraMi. (Rājanīti.) 389. 18.

अतिर्यक् (a-tiryak) *adv.* naturally, straight (*lit.* not sideways) अतिर्यगुपेयात् VāsiDS. 12. 22; अर्चयन्हरकरं स्मितभाजा नागकेसरतरोः प्रसवेन । सोऽयमापयदतिर्यगवाग्दिक्पालपाण्डुरकपालविभूषाम् NaiṣC. 21. 35.

अतिर्यग्विसृत (atiryag-visṛta) *adj.* spread out straight (not in various directions) गम्भीरानुगतं श्लक्ष्णमतिर्यग्विसृतं च यत् । तदविपाट्योद्धरेद् गर्भं त्वचं शुष्कां निधापयेत् CaraS. vii. 7. 11 (1941 Ed.)

अतिर्यञ्च् (a-tiryañc) *adj.* straight (*lit.* not crosswise) सर्वतः समवायो दण्डव्यूहोऽतिर्यग् भवति ManuBh. ii. 55. 17 (*on* 7. 187); *m.* other than animals तिरश्चामतिरश्चां वा चेष्टाभिर्यत्र कार्यमकार्यं वा निश्चीयते तत् पञ्चतन्त्रादिवत् ... निदर्शनम् Kāvyānu.(He.) 406. 16.

अतिल (a-tila) *adj.* having no sesame, not yielding any sesame नञ्सुभ्यामित्यस्यावकाशः । अयवः । अतिलः MahāBh. iii. 133. 19 (*on* vi. 2. 108)

अतिलक (a-tilaka) *adj.* devoid of mark on the forehead नतभ्रुवो मण्डयति स विग्रहे वलिक्रिया चातिलकं तदास्पदम् Kirātā. 8. 52.

अतिलकासङ्ग (a-tilakāsaṅga) *adj.* with no mark put on the forehead कर्णैर्विस्मृतकुण्डलैरतिलकासङ्गैर्ललाटस्थलैराकर्णैः EI. viii. 20. 67.

अतिलक्ष (ati-lakṣa) *adj.* not deviating from the target कृतास्त्रैः क्षिप्रमस्यद्भिर्दूरपातिभिरायसाः । अभिलक्ष्यै(v. l. अतिलक्षै)र्निपात्यन्ते तावच्छाम्यतु वैशसम् MahāBhā. v. 124. 11 (Arjunamiśra अतिलक्षैर्लक्षादचलद्भिः); *m.* ten lacs दश प्रभेदा लक्षम् । दश लक्षा अतिलक्षः AbhidhKoBh. 181. 9 (*on* 3. 93)

अतिलक्षण (ati-lakṣaṇa) *adj.* of excessive character कालस्तु शीतोष्णवर्षभेदात् त्रिधा मतः । स हीनो हीनशीतादिरतियोगोऽतिलक्षणः AṣṭāHṛ. i. 12. 38; *n.* the best character एतत्कृत्यतमं राज्ञो नित्यमेवेति लक्षयेत् (v. l. °वातिलक्षणम्) । यथामानं यथा पुत्रांस्तथैतान्परिपालयेत् MahāBhā. xiii. 33. 4.

अतिलक्षणसंपन्न (ati-lakṣaṇasampanna) *adj.* fully possessed of grammatical accuracy वाक्यम् ... । अतिलक्षणसंपन्नं माधुर्यगुणभूषितम् Rāmā. vi. 3181*(3)

अतिलक्ष्मी (ati-lakṣmī) *adj.* who surpasses in beauty or wealth (i. e. very beautiful or prosperous) कृत्स्त्रिया धातुस्त्रियाश्च ह्रस्वत्वं मा भूदिति । ... अतिलक्ष्मीरिति MahāBh. i. 224. 1 (*on* i. 2. 48); अतिलक्ष्म्यै ब्राह्मणाय MahāBh. i. 314. 6 (*on* i. 4. 3); लक्ष्मीमतिक्रान्ताय अतिलक्ष्म्यै JaineVyā. 34. 24 (*on* i. 2. 92); 4. 18 (*on* i. 1. 8); अतिलक्ष्मीः KāśiVṛ. *on* P. i. 2. 48; PrakriKau. i. 525. 2; MugdhaBo. 18. 2 (3. 57); लक्ष्मीमतिक्रान्तोऽतिलक्ष्मीः Prasā. i. 162. 18; अङ्यन्तत्वान्न सुलोपः अतिलक्ष्मीः SiddhāKau. 62B. 4; [*f.* extraordinary prosperity, MW.]

अतिलक्ष्य (ati-lakṣya) *adj.* not deviating from the target नोरःसु यावद्योधानां महेष्वासैर्महेषवः । ... अभिलक्ष्यै(v. l. अतिलक्ष्यै)र्निपात्यन्ते तावच्छाम्यतु वैशसम् MahāBhā. v. 124. 11.

अतिलग्न (ati-lagna) *adj.* extremely contiguous, closely touching each other आवर्तौ ... अतिलग्नौ तु दुष्फलौ S'ukraNī. 4(7). 103.

अतिलघय (ati-laghaya-) [*denom.*] to lessen very much अतिलघयसि लज्जाम् SubhaDha. 2. 2.

अतिलघिमन् (ati-laghiman) *m.* excessive levity अनेनातिलघिम्नाप्युपर्येव प्लवसे ज्ञानोदन्वतः HarṣaC. 20. 8.

अतिलघीयस् (ati-laghīyas) *adj.* (*comp.*) **i** extremely insignificant or trivial तात किमेवम् ... गरिमाणमारोप्यते बलादतिलघीयानप्यहितः HarṣaC. 253. 14; **ii** very small, very scanty सर्वथा सत्त्वशुद्धाय दानायातिलघीयसे । नमो महाफलायैव DarpDa. 6. 52.

अतिलघु (ati-laghu) *adj.* [*f.* -ghvī] **A** very small (size) ततः … अतिलघुकनकसमुद्गकगतं प्रकटीकृतवान् (मणिम्) VisnuP. iv. 13. 145; शिवेन ददृशे तावन्मदनोऽतिलघुः कृशः GaneP. i. 84. 11; (महोक्षा) यस्य … कर्णौ चातिलघू स्थिरौ । शिव इत्येष कथितः शिवं प्रकुरुते ध्रुवम् YuktiKa. 208. 12; विश्वंभराप्यतिलघुर्नरनाथ तवान्तिके नियतम् KāvyPra. 665. 2; येनातिलघुनोत्तुङ्गो लङ्घितः सत्यपादपः RāmC. 1. 89; **B** very insignificant, very trivial स सद्यः संक्षोभं नयति वनिता इत्यतिलघु त्रिलोकीमप्याशु भ्रमयति SaundL. 19; त्वदुत्सङ्गे गङ्गे पतति यदि कायस्तनुभृतां तदा मातः शान्त(? त) क्रतवपदलाभोऽप्यतिलघुः GaṅgāA. 6; मन्यन्ते स्वर्गमन्यं तृणवदतिलघुं शंकरार्यं त्वदीयाः S'aṅkaDigVi.(Mā.) 9. 42; 16. 90; विन्द्रष्टके धरणिजेऽतिलघुक्षितीशः JātaPā. 10. 20; **C** very light (weight) ये खड्गाः स्थूलधारा भृशमतिलघवः … ते दिव्याः कुर्वतेऽमी कुलधनविजयश्रीयशोवृद्धिमाशु YuktiKa. 169. 8; **D** very mild, very gentle अतिलघुकरतालजनितसुखे शिशयिषमाणे शिशुजने VāsaDa. 168. 6; **E** very short (time) कालोऽयम् … संख्यानादगुरुर्न चातिलघुरप्याद्यन्तहीनो महान् KalyāKā. 4. 2; **F** very light or easy (for digestion) शशोऽतिलघुरेतेषां गुरुश्चैवाविकस्तथा AśvaVai. 11. 34; हरति च वरपित्तं श्लेष्मला चातिलघ्वी (यवागूः) KalyāKā. 5. 17; **G** very few अतिलघुनापि च वचसा मधुमथन तव प्रणौमि महिमानम् YātrāPra. 8. 48; अल्पाङ्गेष्वतिलघवो ह्यनवेदाः Rāgh. 18. 12; **H** very weak, very feeble यद्भिण्डं प्रचयकृतं प्रभञ्जनेयं किं तिष्ठेदतिलघुचञ्चलस्वभावम् VarāṅgaC. 12. 85; **I** very short (hypotenuse) तदन्यकर्णैत्रिभुजेऽत्र भूस्थे भुजावधेये विषमैककोणात् । तद्भेदवाहौ तु विलम्बकोटौ कर्णः स्वकीयोऽतिलघुर्मतो मे SiddhāTaVi. 79. 17; **J** very little (quantity) तेष्वपि तस्यातिलघुफलत्वद्योतनार्थम् SetuBa. 97. 5.

अतिलघुता (atilaghu-tā) *f.* extreme insignificance नीतं येन यशस्विनातिलघुतामौशीनरीयं यशः MudrāRā. 7. 5.

अतिलघुत्व (atilaghu-tva) *n.* extreme insignificance यत्तु बृहच्छातातपेनोक्तम् … चान्द्रायणं चरेत् इति तदभ्यासविषयम् । निमित्तस्यातिलघुत्वात् Mitā. 490. 18 (*on* 3. 288)

अतिलघुपतन (atilaghu-patana) *adj.* jumping very lightly अतिलघुपतनैरतिप्रगल्भैः … । अतिवितततगुणैर्गणैरिवोग्रः प्लवगभटैरयमावृतो विभाति RāmC. 6. 17.

अतिलघुभूत (atilaghu-bhūta) *adj.* becoming very light अतिलघुभूतनियमविध्यापादकम् … पक्षान्तरमेव किमिति नाश्रीयते MīmāKau. iii(2). 295. 23 (*on* ii. 2. 27)

अतिलघुवाचिन् (atilaghuvāc-in) *adj.* expressing a very small thing अतिलघुवाचि पदं किम् (अणु) VidaMuMa. 3. 53.

अतिलघुवेणुशलाका (atilaghu-veṇuśalākā) *f.* very thin cane stick भार्यापुत्रादयः … अतिलघुवेणुशलाकया ताड्या भवेयुः ManvaMu. 343. 5 (*on* 8. 299)

अतिलघुश्रोणी (atilaghu-śroṇī) *f.* name of a river तथान्यातिलघुश्रोणी विपाप्मा शैवला नदी BrahmP. 27. 31.

अतिलङ्ग (ati-laṅga) *adj.* very much limping अतिलङ्गं त्र्यहादूर्ध्वमस्तब्धमपि वारयेत् AśvaVai. 41. 3.

अतिलङ्घ् (ati-laṅgh-) I. U. X. U. **A** to cross over, to go beyond, to approach न चैनमतिलङ्घयेत् BrahmāṇḍP i. 10. 49; SkandP. v(1). 69. 27; प्राकारमत्यलङ्घयम् DaśKuC. 72. 15; महान्तमध्वानमत्यलङ्घयम् AvantiKa. 174. 9; कर्णीपुत्रस्य …मदनमञ्जरिकां देवसेनाचूतयष्टिमतिलङ्घयते मदनभ्रमरः Padm-Prā. 3. 3; **B** to violate, to transgress, to disobey नातिलङ्घति न क्वापि तदुक्तं कार्यसिद्धिषु BrahmāṇḍP. iii. 19. 91; विधातुर्हि विधानं कोऽतिलङ्घयेत् ĀdiP. 21. 47; राजाज्ञां कोऽतिलङ्घते PariPar. 12. 345; 12. 110; नयत्रयम् । यतत्रयमिव व्याला मिथुनान्यत्यलङ्घयन् TriṣaS'aPuC. i. 2. 895; अथवा तां महाराजकृतां मर्यादामप्यतिलङ्घयिष्ये KirātāVyā. 46(15); समुद्रो वर्णाश्रमविषयः, तमतिलङ्घयन्ति ये ते विपरीतलक्षणया वा सामुद्राः विकर्मस्था इत्यर्थः BālaKrī. i. 216. 19 (*on* 2. 41); स तु तावत्प्रवृद्धोऽपि मर्यादां नात्यलङ्घत Gaṅgāva. 1. 80; **C** to overcome, to surpass कः कालचक्रमतिलङ्घयतीत्यपास्तः शर्वे ययौ स च भवन्तमवन्दतैव Nārāy. ix. 33. 7; **D** to set aside, to neglect प्रमाणमात्मसात्कुर्वन् प्रतीतिमतिलङ्घयेत् NyāyVi. 2. 49.

अतिलङ्घन (ati-laṅghana) *n.* **A i** violation, transgression अप्रामाण्यं च वेदानां शास्त्राणां चातिलङ्घनम् । … तद्वै नाशनमात्मनः MahāBhā. vii. 80. 18; xiii. 37. 11; न च…तस्याप्यतिलङ्घनमाशङ्कनीयम् S'ivārkaMaDī. i. 207. 11 (*on* i. 1. 13); **A ii** showing disrespect or disregard, disobeying न युक्तमत्रार्यजनातिलङ्घनं दिशत्यपायं हि सतामतिक्रमः Kirātā. 14. 9; अतिलङ्घनमभ्युपैतु को वा गुणकर्मैश्रुतशालिनाममीषाम् Yādavā. 15. 50; **A iii** going beyond, crossing over (ज्योतिष्टोमफलम्) भुक्त्वातिलङ्घनं तावद्दिनापि सुतजन्मना BrĀraUBhVā. i. 5. 246; ii. 5. 147; शिरःकपालस्यातिलङ्घनम् … निष्क्रमणमेव S'ivārkaMaDī. ii. 469. 19 (*on* iv. 3. 1); अतिलङ्घनं षोडशाद्यतिक्रमः VīraMi.(Saṁskāra.) 361. 13; सत्यं किं त्वन्वयस्यैव स्वस्थानादतिलङ्घनम् MānaMe. 77. 1; **B** excessive fasting, completely abstaining from food उपद्रवाश्च श्वासाद्याः संभवन्त्यतिलङ्घनात् SuśruS. vi. 39. 106.

अतिलङ्घनीय (ati-laṅghanīya) *adj.* **i** to be overcome, to be neglected शक्तोऽपि देह्यप्रकटीकृतात्मशक्तिः पराभूतिपदं सदैव । कारीषवह्निर्वद वत्स कस्य कस्याशु न स्यादतिलङ्घनीयः HammīMaKā. 8. 76; **ii** to be transgressed नातिलङ्घनीयं युवयोरनुशासनम् JānaPa. 7. 32(6)

अतिलङ्घयत् (ati-laṅghayat) *adj.* [*f.* -ntī] **i** transgressing स हि प्राणभृत्कर्माशयानां वृत्तिनिरोधसमयस्तमतिलङ्घयन्नयमयुक्तकारी स्यात् Bhām. 374. 16 (*on* ii. 1. 34); चारित्रमुद्रामतिलङ्घयन्ती … आन्ध्री पुरन्ध्री RatiRaha. 5. 14; **ii** overcoming मृत्युमप्यतिलङ्घयन् … अर्जुनो भानोस्तनुजन्मानमभिजगाम PārthPa. 46(7); **iii** overtaking युवराजोऽपि तत्क्षणम् । अधावत् पादचारेण पत्तीनप्यतिलङ्घयन् TriṣaS'aPuC. i. 3. 277.

अतिलङ्घयितुम् (ati-laṅghayitum) *inf.* **i** to trangress, to disobey अस्मादृशः प्रभोराज्ञां कोऽतिलङ्घयितुं क्षमः KathāSaSāg. iii. 4. 37; **ii** to escape (नन्दनन्दनः) अतिलङ्घयितुं न शक्नुयान्नगरस्त्रीजननेत्रवागुराम् Yādavā. 9. 112.

अतिलङ्घित (ati-laṅghita) *adj.* [*f.* -ā] **A i** crossed over, traversed दशमुखोऽपि शुकमुखादतिलङ्घितजलधिम् … रामं निशम्य RāmāCam. 6. 29(1); अतिलङ्घिता शबरवारिविहारवनस्थली SaduktiKa. 258. 30; अनेकसहस्रयोजनमपि पन्थानमतिलङ्घितं गणयन्तो गव्यूतिमात्रमिव … विशश्रमुः NīlaVi. 47. 13; **A ii** transgressed, violated न नीतिवर्तैन्यतिलङ्घिता मया Yādavā. 14. 42; **A iii** gone beyond, spent, passed over घोरेषु घर्मदिवसेष्वतिलङ्घितेषु छायाद्रुमान् मृगयते न हि कोऽपि मर्त्यः BhikṣāKā. 1. 11; अथवा यौवनमतिलङ्घितं नु कुवृद्धैः DhūrtaViSaṁ. 5. 21; वचनसीम्ना(? मा)तिलङ्घितकुतूहलम् … कौमारमभजत YātrāPra. 2. 42(3); **A iv** overcome, overpowered दध्रे च माद्दिषेणैष बलेनोच्छूनतां गतः । अमुना यमुनाबन्धुर्मिषजेवातिलङ्घितः Surath. 3. 43; किराट … त्वम् … किमु मनोमहानुरोधेन मोहनौषधेनातिलङ्घितः YaśasCam. ii. 346. 16; **B** abstained from food, kept on fasting, Surath. 3. 43; *n.* excessive fasting लङ्घितं मध्यलङ्घितं स्यादतिलङ्घितमेव च HārīS. iii. 1. 21.

अतिलङ्घितुम् (ati-laṅghitum) *inf.* to overcome, to cross over वालिनं विक्रमाम्भोधिं नातिलङ्घितुमीशते JānaPa. 6. 48.

अतिलङ्घिन् (atilaṅgh-in) *adj.* [*f.* -nī] **i** violating, disobeying गुरुशास्त्रातिलङ्घिनः … ते भवन्ति गतायुषः MahāBhā. xiii. 107. 11 = SūktiRa. 24. 3; नर्तकीरभिनयातिलङ्घिनीः RaghuVa. 19. 14 (comm. अभिनयेषु स्खलन्तीः); **ii** fit to be crossed over क्रमशोऽतिजगाम नर्मदाम् … अवधीरणयातिलङ्घिनीम् … प्रियामिव RāghPāṇ.(Dha.) 4. 42 (comm. अतिलङ्घनयोग्याम्)

अतिलङ्घ्य (atilaṅgh-ya) *ger.* **1 A** having crossed, having gone beyond, having scaled दृश्यन्ते…तटीभूमयः । याः कृच्छ्रादतिलङ्घ्य…लुप्तपदवीनिःशङ्कमेणीकुलम् AnarghRā. 5. 6; पूर्वपूर्वातिरेकेण त्रीन् कोशानतिलङ्घ्य च । … दर्शितः परः TaiUBhāVā. 120. 16(2); तथैव पदवीं दवीयसीमतिलङ्घ्य पुनरयोध्यासविधमासीदम् RāmāCam. 6. 102(1); तत्तेजस्त्वां धक्ष्यति, अतस्तदतिलङ्घ्य मा गच्छ VedāntKau. 107. 11 (*on* i. 3. 34); रविसुतामतिलङ्घ्य रमापतिः सपदि घोषसमीपमुपानयत् Yādavā. 3. 44; अतिलङ्घ्य धनुःशालां रङ्गद्वारमवापतुः Yādavā. 10. 21; अतिलङ्घ्य चिरन्तनीं स्वसीमामपदेष्वर्पितजीवनप्रवृत्तिः । मुहुरुत्पथगामिनी तुलुष्कानधुना ह्यनुकरोति सह्यकन्या MadhuVi. 8. 6; आसन्नमार्गमतिलङ्घ्य नतेन मूर्ध्ना … आरोपिताः -- मयि पङ्कजाक्ष्या …कटाक्षाः S'ārṅgaPa. 3471; नद्येकोभयतटमतिलङ्घयन्नेवोदका प्रवहति SiṁhāDvā. 69. 3(14); अतिलङ्घ्य तुण्डीरमण्डलम् …अहिण्डत पुण्डरीकपुरम् YātrāPra. 5. 9(5); 6. 75(3); अभिकल्पसेतुमतिलङ्घ्य सागरं नगरं रुरोध नगवैरिवैरिणः Raghunā. 4. 62; प्राप्य जानुमतिलङ्घ्य नाभिमप्यम्भसि क्षणमथास्य संमिते … तपस्विनां शुश्रुवे … वचः Gaṅgāva. 5. 18; अतिलङ्घ्य … दुर्गमं गोपुरद्वारम् NīlaVi. 18. 2; 36. 21; (जाह्नवीं) तामतिलङ्घ्य नौकया … । समदृश्यत गौतमाश्रमः (मुनिमिश्रैः) Rāgh. 3. 68; 6. 43; **1 B** having trespassed, having encroached upon अथवा ये शत्रव आटविकादयः प्राक्स्थितां मर्यादामतिलङ्घ्य देशमुत्क्रामन्ति ManuBh. ii. 28. 17 (*on* 7. 87); MadhuVi. 8. 6; **2 A** having set aside, having disregarded, having neglected or passed over कथं च मुख्यमर्थमतिलङ्घ्योपचरितो(? ते)ऽवकाशः BrahmSi. 41. 20; 94. 1; सर्वत्र सति संभवे गुणमतिलङ्घ्य प्रधानेनैव संबध्यते TantrVā. 339. 2 (*on* ii. 1. 1); व्रीह्यादीनाम् … श्रुत्या शेषित्वं प्राप्नुवदप्यतिलङ्घ्य…संबन्धो भविष्यति TantrVā. 850. 15 (*on* iii. 3. 14); तत्र पूर्वा श्रूयन्ततामतिलङ्घ्य यो गच्छेत्तेनागमो बाधितः स्यात् TupT. 279. 9 (*on* x. 7. 41); नैव हि कार्यं स्वकारणमतिलङ्घ्यान्यत्राकारक आस्पदमुपनिबध्नाति NaiṣkaSi. 93. 4; केवलाभि-

धाननिबन्धनं स्वरूपसंबन्धमतिलङ्घ्य साधनीभूतसंख्येयसंबन्धाध्यवसानम् PrakaPañ. 20.4; प्रथमभावीनि पदान्यतिलङ्घ्य, नार्थेषु वाक्यार्थबोधनशक्तिराश्रयितुं युक्ता PrakaPañ. 400.14; यच्चेदं घटाभावमतिलङ्घ्य नास्तीति व्यवहारानुमानमवस्थितं तदपि केन विशेषेणेति न विद्मः Kāśi. iii. 207.26 (*on* 5(8).38); तच्छब्दोऽनन्तरमप्याकाशमतिलङ्घ्य हृत्पुण्डरीकं परामृशति Bhām. 212.13 (*on* i. 3.14); किमपराद्धं मरीचिषु तोयविपर्यासेन सर्वजनीनेन यत् तमतिलङ्घ्य विपर्यासान्तरं कल्प्यते Bhām. 545.19 (*on* iii. 2.3); अन्वयव्यतिरेकादिकमतिलङ्घ्य दृष्टान्तमात्रेण न किञ्चित् साधयितुं शक्यम् S'rutaPra. iB. 28.22 (*on* i. 1.1); क्रियारूपस्य गुणस्य वा ज्ञानस्य स्वाश्रयमतिलङ्घ्यान्यत्र संसर्गायोगात् VivaPraSaṁ. 86.23; करणशक्तिमतिलङ्घ्य ज्ञानस्य विषयानुसारित्वे Nyāyāmṛ. 628A.1; कथं प्रकृत्यर्थो धात्वर्थः प्रत्ययार्थप्रधानमपूर्वमतिलङ्घ्य विप्रकृष्टेन फलेन प्रथमं करणतयान्वेति TantrRaha. 62.1; पशुकाम उक्थ्यं गृह्णीयादित्यादिवाक्येषूक्थ्यादिशब्दवाच्यम् … उक्थ्यादिसंस्थामतिलङ्घ्योक्थ्यादिपदलक्ष्यस्य … क्रतोः पश्चादिफलसंगतिरङ्गीक्रियते चेत् VidhiRa. 38 (194.8); ननु तर्हि गुणविधिरेवास्तु … गुणमात्रविधानमतिलङ्घ्य गुणविशिष्टकर्मान्तरविधिकल्पनायोगात् VidhiRa. 41 (206.15); विकारार्थमयट्प्रायपाठं चातिलङ्घ्य कुतः प्राचुर्यार्थत्वमवसीयते S'ivārkaMaDī. i. 214.5 (*on* i. 1.14); सर्वनाम्नाम् …प्रकरिष्यमाणपरत्वमतिलङ्घ्य प्रकृतपरामर्शित्वं व्युत्पत्तिसिद्धम् S'ivārkaMaDī. i. 275.26 (*on* i. 1.25); i. 302.16 (*on* i. 2.1); ii. 276.24 (*on* iii. 2.40); आख्यातार्थस्य विधेः प्रकृत्यर्थं निर्वापमतिलङ्घ्य … यागे संक्रान्त्यभ्युपगमात् PūrvottaVāNaMā. 128.14; प्रधानमतिलङ्घ्योपसर्जने क्रियान्वयपर्यवसानात् CitrMī. 78.14; **2 B** having transgressed or violated (a rule, a command etc.) लोकान्तरप्रणयिनं श्वशुरं प्रणन्तुमाज्ञप्तकालमतिलङ्घ्य यदि प्रयासि RāmāCam. 3.40; मम जगदखिलं वरोरु नाज्ञामिदमतिलङ्घ्य धृतिं मुहूर्तमेति PraboCan. 1.13 (7.16); ननु व्यवस्थानमतिलङ्घ्यान्यत्रापि वृत्तिर्व्यभिचारः TārkiRa. 218.5; अध्यायानां पादचतुष्टयात्मकत्वनियममतिलङ्घ्य प्रथमाध्यायस्य पादषट्कात्मकत्वेन निबन्धनीयत्वप्रसङ्गात् S'rutaPra. ii. 202.20 (*on* i. 4.29); बिभ्यत्सु श्रुतिमतिलङ्घ्य संप्रदातुं हव्यं तत्तदभिमतं द्विजर्षभेषु । … °भागान् स्वीचक्रुः … देववर्गाः S'ivLī. 6.59; **3 A** having overcome, having got over अतिलङ्घ्यासुरं भावं देवतात्मानमाप्नुमः BṛĀraUBhVā. i. 3.32; iii. 8.138; नियतं नियतिबलमतिलङ्घ्य पौरुषमेव धीरस्य पुरुषार्थान् समर्थयेत् RāmāCam. 2.28(8); मुमुक्षवो जीवाः … भगवत्प्रसादेन … तन्मायामतिलङ्घ्य…मोक्षमिच्छन्ति SarvaMaSaṁ. 39.12; **3 B** having surpassed सर्वान्तरायानतिलङ्घ्य वत्स धर्मान्तरायो गुरुतामुपैति VarāṅgaC. 29.27; अतिलङ्घ्य पुंस्त्वस्त्रैणे मिथो जल्पति तत्र राजा । तद्योगिनीवृन्दमिति व्युद्ध DvyāsraKā. 14.44; जम्बीरश्रियमतिलङ्घ्य लीलयैव … कुचौ ते स्पर्धेते खलु कनकाचलेन सार्धम् RasGaṅ. 626.10 = BhāmiVi. 2.91.

अतिलज्ज् (ati-lajj-) I. Ā. to be very much ashamed नवं कुलकलङ्कं तं हसनीयं जनेऽखिले । महालज्जाकरं पत्युः श्रुत्वा भद्रात्यलज्जत TriṣaS'aPuC. iv. 1.204; कौटिल्यं हृदि पाञ्चजन्य भवतस्तेनातिलज्जामहे SūktiMu. 29.3 = Subhāṣi. 918.

अतिलज्ज (ati-lajja) *adj.* very much ashamed दृष्ट्वा स्थितं प्रियतमं सशङ्कितं सापराधमतिलज्जम् NāṭyaS'ā. 22.275.

अतिलज्जन (ati-lajjana) *adj.* very shameful विट्कुम्भद्वितयं नीत्वा संयोगमतिलज्जनम् । विमूढमानसः शोकः सुखमित्यभिमन्यते PadmP.(Ra.) 83.59.

अतिलज्जना (ati-lajjanā) *f.* feeling of extreme shame महाकृपाचार्यसदोषितात्मनः परस्य दुःखैरुपतप्तचेतसः । परस्य कृत्ये समुपस्थिते पुनः परैः समादापनतोऽतिलज्जना MaYānaSū. 18.26 (4.27)

अतिलज्जा (ati-lajjā) *f.* great shame, extreme bashfulness जीवन्तीत्यतिलज्जेयम् RāmāMañ. 263.25; अतिलज्जया त्वयैव प्रकटः प्रेयानकारि ĀryāSaS'a. 57.

अतिलज्जान्विता (ati-lajjānvitā) *adj.* (*f.*) possessed of extreme bashfulness अतिलज्जान्वितेत्येयं(? वं) यस्तु कन्यामुपेक्षते । सोऽनभिप्रायवेदीति पशुवत् परिभूयते KāmSū. 206.24 (3.2)

अतिलज्जित (ati-lajjita) *adj.* [*f.* -ā] very much ashamed इदं सर्वे गर्गो मुक्तेऽतिलज्जितः BṛKathāK. 24.19; पश्चात्तापं करोत्येष भूयो भूयोऽतिलज्जितः BṛKathāK. 102(10).27; आयातेऽथ महादेवे वीरभद्रोऽतिलज्जितः SkandP. iv. 89.102; SkandP. iii(1). 39.33; इत्युक्ता सा तदा तेन लीलावत्यतिलज्जिता DeviBhāP. iii. 25.20; (सः) प्रतिगृहं प्रायात्…अतिलज्जितः BṛKathāMañ. 16.65; सा … प्रकृतिः … विनाशमायात्यतिलज्जितेव Vidvanmo. 6.25.

अतिलटह (ati-laṭaha) *adj.* extremely pretty, very handsome अन्यपाणिसंतन्यमानमतिलटहडमरुडात्कारकन्दलम् … आदिनटमद्राक्षीत् YātrāPra. 5.10 (11) cf. **लटभ.**

अतिलब्ध (ati-labdha) *adj.* oppressed, maltreated तस्य परिचारकजनं वाग्दण्डपारुष्यातिलब्धं मार्गेत ArthS'ā. ii. 150.10 (4.7)

अतिलभ् (ati-labh-) I. Ā. to obtain in plenty तस्मिन् जाते त्रिलोकीसुखमतिलभते VīraBhā. 7.81.

अतिलमिश्र (a-tilamiśra) *adj.* not mixed with sesame द्वया धानास्तिलमिश्राश्चातिलमिश्राश्च BaudhPiMe. i. 17.2.

अतिलम्पट (ati-lampaṭa) *adj.* extremely passionate, very much addicted to pleasures, libertine कथं दुनोषि मां लोल रतिचौरातिलम्पट BrahmVaiP. iv. 3.59; स्वयंवरविमेदं यः करिष्यत्यतिलम्पटः । स वध्यः … सर्वैः SkandP. vii(2). 17.46; उवास तत्र सुप्रीत्या तपस्वी नातिलम्पटः S'ivaP. ii(3). 35.6 (164B.5); न भविष्याम्यहं ततः । उत्तरोत्तरसौख्यानां पञ्चसेनेऽतिलम्पटः PariPar. 2.692.

अतिलम्ब (ati-lamba) *adj.* very long तद्धार्यमुपवीतं स्यान्नातिलम्बं न चोच्छ्रितम् GobhiSm. 1.3; अत्रातिलम्बात्युच्छ्रितप्रतिषेधान्मध्ये कथंचिदलाभे परिमाणान्तरमविरुद्धमिति ज्ञायते SmṛtiCan. i. 83.10; i. 83.13.

अतिलम्बिता (ati-lambitā) *adj.* (*f.*) too much hanging down तुलावदुद्धृता वल्गा नात्युच्चा नातिलम्बिता AśvaCi. 8.15.

अतिलम्बी (atilambī) *f.* *Anethum sowa* अतिलम्बी सितच्छत्रा (शतपुष्पायाः नामानि) BhāvPra.(Bhā.) 6(2).90; BhāvPraNi. 11.89.

अतिलम्बोष्ठी (ati-lamboṣṭhī) *adj.* (*f.*) having too long (i.e. hanging) a lower lip अतिलम्बोष्ठीम् … कुब्जामृज्वाननामकरोत् PraboSu. 235.

अतिलम्बौष्ठ (ati-lambauṣṭha) *adj.* having a very long or hanging lower lip धिक् करभमतिलम्बौष्ठं दीर्घग्रीवम् Upask. 339.5 (*on* vii. 2.20)

अतिलल् (ati-lal-) X. P. to fondle or caress to an excess न पीडयेदिन्द्रियाणि । न चैतान्यतिलालयेत् AṣṭāHṛ. i. 2.29; SiddhYo. 81.85; S'ukraNi. 3.16; तन्नातिलालयेत् Bārhas. 1.83.

अतिललाटंतप (ati-lalāṭaṁtapa) *adj.* excessively scorching the forehead अतिललाटंतपस्तपनः ViddhaS'ā. 4.3(3)

अतिललित (ati-lalita) *adj.* [*f.* -ā] very graceful, extremely charming मृद्वारक्तं वहन्तः करमतिललितम् … शशाः स्युः RatiRaha. 3.31; अतिललिते … विरचितावासे स्थितम् … सर्वज्ञादिकशक्तिवृन्दमनिशं वन्दे TripuMāPūSt. (S'aṅ.) 94; गानम्…कलमतिललितं कर्णपूरायतां नः S'ivPāKeSt. 38; अतिललितपदविन्यासस्सारसाधुसिन्धुरवधूस्कन्धमधिरूढा … भूपालपुत्रिका … न्यग्रोधच्छायामण्डपमशिश्रयत् NalaCam. 1.55(7); रम्याः किं न विभूतयोऽतिललिताः सच्चामरभ्राजिताः SubhāRaSaṁ. 314; श्रीजयदेवभणितमतिललितम् । सुखयतु रसिकजनं हरिचरितम् GītGo. ix. 18.8; वधूनां नयनम् … अतिललितां बिभरांबभूव शोभाम् Nalābhyu. 6.60; 6.28; यदपि कविता नातिललिता मुदं धास्यन्त्यस्यां तदपि हरिगन्धाढ्यगणाः VidaMā. 1.4; (हंसम्) वरं दूतं मेने तमतिललितम् … ललिता HaṁsDū. (Rū.) 7; पत्युर्मुखेऽतिललिता तव नाममाला S'ṛṅgāMañ.(A.) 15.28; अतिललितेन गतेन (राजानं रञ्जयामास राज्ञी) ParamāKā. 52.9; दैवज्ञशिखामणिः …सुब्रह्मण्यनामा … अतिललितवितलदक्षिणप्रघणसदनान्तरनिवेशितरत्नपर्यङ्कविलसत्कमनीयोपधानकलितसव्यभुजाञ्चितशुचिमृदुलोष्णीषभूषितशीर्षस्…उशनसः स्वपरिपन्थिजननिरसनालोचनप्रस्तावम् … विचारयन् ĀnandRa. 6.4 (36)

अतिललिततर (atilalita-tara) *adj.* extremely playful अतिललिततरं तरङ्गभङ्गैरिदमपि … वारि वाप्याः NalaCam. 4.5.

अतिललितम् (ati-lalitam) *adv.* most gracefully, most sportively त्रस्यत्कुरङ्गीदृशा … कान्तदिदृक्षयातिललितं द्वारे दृगारोपिता SaduktiKa. 93.15.

अतिललितरति (atilalita-rati) *adj.* whose amorous sport is extremely charming ज्ञातव्या पण्डितेन्द्रैरतिललितरतिर्लाटकर्णाटनारी PañcSā. 2.28.

अतिललितविलास (atilalita-vilāsa) *adj.* whose sport is extremely graceful or charming अतिललितविलासम् … नौमि कामम् AnaṅgaRa. 1.1.

अतिललिताङ्गी (atilalitāṅgī) *adj.* (*f.*) whose body (or limb) is extremely charming एतस्यामुदितायामिन्दुकलायामिवातिललिताङ्ग्याम् । अनुभवतु बन्धुलोको मकरालय इव महान्तमानन्दम् S'ṛṅgāBhū. 84; आसंस्तिरुमलनृपतेः कीर्तिश्रीद्विय इवातिललिताङ्ग्यः । पत्न्यः AnandRa. 2.35.

अतिलवण (ati-lavaṇa) *adj.* (*f.* -ā) very salty, mixed with much salt तासाम् (अपाम्) अन्यतरा अतिलवणाः … ता अशान्ता रेतः समुद्रं वृत्वातिष्ठन् GopBr. i. 1.3; (अन्नपानमेषजादिभिः) तथातिलवणक्षारैरम्लैः कटुभिरेव च ।… शोणितं संप्रदुष्यति CaraS. i. 24.5 (1941 Ed.); (भेषजम्) अतिलवणम् … वमनीयमुपकल्पितमस्य विरेचनाय संपद्यते ।… तमौषधविपर्ययमाचक्षतेऽतियोगं च KāśyaS. 157A.23; (भोजनम्) अतिलवणमचक्षुष्यं तीक्ष्णात्यम्लं जरा साक्षात् AṣṭāSaṁ. i. 69.9 (1.10); अत्यम्लं चातिलवणम् …। आसुराणीह भोज्यानि तान्यतो दूरतस्त्यजेत् BrahmP. 220.183; अतिलवणम् अतिमात्रलवणयुक्तम् CaturCin. iii(1). 609.18; अतिलवणमम्लयुक्तं कदशनशाकोत्कटं वर्ज्यम् HaṭhPra. 1.60.

अतिलवणत्व (atilavaṇa-tva) *n.* the state of being too much salty, excessive salinity औषधस्य … अतिलवणत्वात् … वमनविरेचनौषधानां दुर्योगातियोगावुत्पद्येते KāśyaS. 156A.36.

अतिलवणसात्म्य (atilavaṇa-sātmya) *adj.* used to consume too much of salt ये ह्यतिलवणसात्म्याः पुरुषास्तेषामपि खालित्येन्द्रलुप्तपालित्यानि वलयश्चाकाले भवन्ति CaraS. iii. 1. 21 (1922 Ed.)

अतिलसत् (ati-lasat) *adj.* very much shining, bright, beautiful क्रुध्यत्यद्धा ययोः स्वां तनुमतिलसतोर्बिम्बतां लक्षयन्ती ··· शैलकन्या। युष्मांस्तौ ··· अव्यातान्··· कपोलौ S'ivaKePāSt. 8; (गजाननः) गम्भीरनाभिविलसदुदरोऽतिलसत्कटिः GaṇeP. i. 63. 35.

अतिलसद्रुचि (atilasad-ruci) *adj.* having extremely bright lustre सः ··· अतिलसद्रुचि कालवनावृतेर्हरति तत्प्रतिबिम्बमहो क्षणात् RājTa.(Jo.) 1300.

अतिला (a-tilā) *adj.* (*f.*) unmixed with the seeds of *Sesamum indicum* अतिलाभिर्धानाभिस्त्रिः प्रसव्यं परिकिरति BhārPiMe. ii. 5. 3.

अतिलाघव (ati-lāghava) *n.* **1** extreme quickness, dexterity or ease चिच्छेदास्य शरव्रातान्स्वशरैरतिलाघवात् MatsyaP. 150. 120; चित्रीयमाणानतिलाघवेन ··· निचखान दूरं बाणान्स्वजिन्या हृदयेष्वरातिः Kirātā. 17. 31; प्रपन्नास्त्वां जन्तवः ···। जन्मोदधिं लघु तरन्त्यतिलाघवेन KalyāMaSt. 12; (गजः) दत्त्वा प्रहारमतिलाघवतोऽपरः पृष्ठे श्रयत्यसकृदुद्धटे भटे HammīMaKā. 12. 54; मनसोऽतिलाघवात्त्वरया ज्ञानेन्द्रियसम्बन्धात्रानाज्ञानोत्पत्तेः SiddhāMu. 53. 29 (*on* 85); सः ··· शतमन्युदूतः ··· अतिलाघवोदस्तसमस्तविटपिपटलः ··· अखिलामपि वाहिनीमेवं क्षणेन क्षोभयामास ĀnandaRa. 7. 43 (4); **2** extreme lowness, meanness, degradation जगतां पतिरर्थित्वाद्विष्णुर्वामनतां गतः। अधिकः कोऽपरस्तस्माद्यो न यात्यतिलाघवम् PadmP. ii. 66. 137; त्वयात्र सखि राधिकाश्रवसि वीक्ष्य तत्कुण्डलं मनः स्वमुदघाटि यत्तदतिलाघवायैव नः UjjvaNīMa. 246. 2; **3** extreme simplicity or economy of thought कार्यान्वितपरत्वनियमाभावे पदानामतिलाघवायान्वितपरत्वमपि त्यज्यताम् VedāntKa. 81. 21 (*on* i. 1. 4); स्फुटप्रतीयमाननिगा(निर्भागा?)हंप्रत्ययवेद्यचेतनस्य देहात् पृथग्भावमात्रमतिलाघवात् प्रत्येतव्य[म्] NyāyKu. 112. 18; (घटपटादीनामप्यैक्यमस्तु) एकत्वाभ्युपगमे चातिलाघवात् SiddhāBi. 34. 2; न चैवमतिलाघवान्नाम्ना वस्तुप्रतिपत्तिमुद्दिश्योच्चारणमुद्देश इत्येतावदेव लक्षणं स्यादिति वाच्यम् S'ivārkaMaDī. i. 102. 29 (*on* i. 1. 2); अतिलाघवात् व्यक्तावेव शक्तिः MīmāKau. i. 142. 4 (*on* i. 3. 30); iii(1). 22. 11 (*on* i. 2. 7); तथा चातिलाघवात् भावाभावयोर्विरोध एव न स्वीक्रियताम् GuruCandr. i. 86. 16; i. 148. 17; एवं चासंसर्गाविषयकतत्प्रकारकज्ञानस्य प्रवृत्तौ व्यवहारे च हेतुत्वादतिलाघवमित्याहुः BhāṭṭCin. i. 21. 3 (*on* i. 1. 4); अत एव पक्षेत्यादावपि कृतिबोधाय पृथक् शक्तिर्न कल्प्येत्यतिलाघवं स्यात् VaiyāBhū. 41. 17 (*on* 7); **4** extreme lightness (as against heaviness or weight) गुल्मप्लीहानाहशूल° ··· °अतिलाघव° ··· °वातव्याधयः AṣṭāSaṁ. i. 145. 15 (1. 28)

अतिलाङ्गलदेश (atilāṅgala-deśa) *m.* name of a country अतिलाङ्गलदेशे च लक्षः प्रोक्तः सपादकः (ग्रामाणाम्) SkandP. i(2). 39. 138.

अतिलाभ (ati-lābha) *m.* great gain, profit अतिलाभं तु मन्येऽहं यत्तेन रिपुघातिना (भीमेन)। तदैव न हताः सर्वे मम पुत्राः MahāBhā. v. 50. 15; किमतिलाभकाङ्क्षया कुड्(?टु)म्बसर्वस्वेन संगृहीतभाण्डो देशान्तरमभिगच्छन्नन्तरा चोरैरुपासादितो भवान् Ubhayābhi. 10. 11.

अतिलालन (ati-lālana) *n.* too much of fondling or caressing अतिलालनमेकके।··· पितरौ त्वयि चक्रतुः GaṇeP. i. 7. 11; अज्ञानादतिलालनादपि च ते मातर्मया माचता निर्माल्ये परदैवतस्य चलितं यत्किंचिदुच्छृङ्खलम्। तत्क्षन्तव्यम् NīlaVi. 119. 5; गुरुरलमतिवात्सल्यादतिलालनेनेत्यभिधाय NīlaVi. 63. 17.

अतिलालना (ati-lālanā) *f.* excessive fondling वरं चातितिरस्कारो बालानां नातिलालना BṛKathāS'loSaṁ. 20. 89; दक्षस्तु धातुरतिलालनया रजोऽन्धो नात्यादृतस्त्वयि Nārāy. iv. 16. 9.

अतिलालवत् (ati-lālava(n)t) *adj.* having excessive saliva (शृगालादीनाम्) यदानिलः। श्लेष्मप्रदुष्टो मुष्णाति संज्ञां संज्ञावहाश्रितः। तदा प्रस्रस्तलाङ्गूलहनुस्कन्धोऽतिलालवान्।- अन्योन्यमभिधावति SuśruS. v. 7. 44; RugVi. 69. 58.

अतिलालस (ati-lālasa) *adj.* [*f.* -ā] **i** very eagerly longing, very eager, very much devoted to या सा माहेश्वरी शक्तिर्ज्ञानरूपातिलालसा (तस्याः कार्यमिदं जगत्) KūrmaP. 101. 14 (1. 12); 106. 10 (1. 12); सर्वान्तरस्था च चिच्छक्तिरतिलालसा KūrmaP. 108. 18 (1. 12); प्रणेमुरादराद्देव्यो गायन्ति स्मातिलालसाः KūrmaP. 188. 11 (1. 16); (मानसं नाम सरः) तस्य तीरेषु सुभगां चरन्तीमतिलालसाम् (उर्वशीम्) KūrmaP. 250. 18 (1. 23); ऋषयस्तपतां वराः। आजग्मुः परमेशस्य दर्शने त्वतिलालसाः PadmP. iv. 9. 31; (विरहिणी) अङ्गान्यप्यतिलालसा वहति या क्लेशेन SūktiMu. 38. 22; **ii** very greedy शूद्रान्नसेविनो विप्रा जिह्वाला अतिलालसाः SkandP. iv. 68. 37.

अतिलालित (ati-lālita) *adj.* [*f.* -ā] excessively fondled अथवा यौवनमतिलङ्घितं(v. l. लालितं) नु कुवृद्धैः DhūrtaViSaṁ. 5. 21; भवाः परिषदीत्यासन् सुराः पारिषदाह्वयाः। ते पीठमर्दसदृशाः सुरेन्द्रैरुप(v. l. °अति)लालिताः MahāP. 22. 26; बालानां नातिलालना। दृश्यन्ते ह्यवसीदन्तो धीमन्तोऽप्यतिलालिताः BṛKathāS'loSaṁ. 20. 89; केलिमेदुरलोलिताभिरतिलालिताभिरबलालिभिः स्वैरमीश। ननु सूरजापयसि चारु नाम विहृतिं व्यधाः Nārāy. x. 69. 10.

अतिलावण्य (ati-lāvaṇya) *n.* extreme beauty (सा राक्षसी) आगतादितिरूपेण ···। अतिलावण्यनिलया GaṇeP. ii. 21. 18.

अतिलाशय (atilāśaya) *m.* name of a water-bird ठिकः पाशगडो ठिक्को जलसार्यतिलाशयः। जलपक्षी RājNi. 405. 24.

अतिलिङ्ग (ati-liṅga) *adj.* possessed of excessive characteristics (than usual) कालं तु खलु यथर्तुलिङ्गाद्विपरीतलिङ्गमतिलिङ्गं हीनलिङ्गं चाहितं व्यवस्येत् CaraS. iii. 3. 7 (1941 Ed.)

अतिलिप्सा (ati-lipsā) *f.* excessive greed परिग्रहोत्था च ममातिलिप्सा ViṣṇuP. iv. 2. 120.

अतिलिहा (atilihā) *f.* name of a Prakrit metre (of four lines, each containing sixteen *mātrās*) [PW, MW, APTE]

अतिली (ati-lī-) IV. Ā. to cling, to stick to न च धावसि नातिलीयसे GiMs. iii(1). 9. 12 [to become slack (?) DBHS] (गजस्य) समन्तात्परिलीयन्ते कृष्णा यस्य तु मक्षिकाः। शरीरे चातिलीयन्ते न स जीवति तादृशः Hastyāyur. 625. 20 (4. 9)

अतिलीढ (ati-līḍha) *f.* name of an aspirate coming after *ṣ* विवृतं प्रति या ऊष्मा विज्ञेया विकटानना। लीढातिलीढविद्युच्च शषसेषु प्रकीर्तिताः YājñaS'i. 146.

अतिलीन (ati-līna) *adj.* **A** completely absorbed in धन्यास्ते वीतरागाः ··· योगाभ्यासेऽतिलीना गिरिवरगहने यौवनं ये नयन्ति S'atTrayī. 542; **B** excessively coming closer, closely attached हेमन्तमार्जार इवातिलीनः स चेन्न निर्याति निरस्यमानः। तदेष कार्यः ··· परुषोपचारः SamaMā. 5. 79.

अतिलीनदोष (atilīna-doṣa) *adj.* whose disorder has closely stuck to तत्र साध्यमामं दुष्टमलसीभूतमुल्लिखेत्पाययित्वा सलवणमुष्णं वारि। तथा त्वच्छर्दयंतमतिलीनदोषं कृष्णानागदन्तीकल्कयुक्तं पाययेत् AṣṭāSaṁ. i. 70. 24 (1. 11)

अतिलुब्ध (ati-lubdha) *adj.* [*f.* -ā] very greedy, extremely covetous न हि ··· राज्ञा ··· अतिलुब्धेन शक्याः पालयितुं प्रजाः MahāBhā. xii. 76. 14; चपला चातिलुब्धा च परुषा कलहप्रिया NāṭyaS'ā. 22. 105; अतिलुब्धः ··· महापद्मनामा नन्दः ··· भविष्यति ViṣṇuP. iv. 24. 20; वर्धमानो महान्स्नेहः ··· अतिलुब्धेन जम्बुकेन विनाशितः Tantrākhyā. 3. 3 = PañcT. 1. 1 (7. 4); Pañcā. 3. 3; Hitopa. 2. 1; डिङ्गरातबलगुप्तयोरतिलुब्धयोः ··· अनुग्रहः कथं शक्यः MudrāRā. 3. 24 (49); वाताधिकोऽतिलुब्धादिर्जातो भूमिसुतो गृहे AgniP. 133. 3; मयातिलुब्धेन ··· धर्षिता मुनिपत्नी सा GaṇeP. i. 34. 23; अतिलुब्धेन। धूर्तेन वञ्चितोऽहम् KalāVi. 2. 52; संचयेनातिलुब्धो हि निहतो जम्बुकः पुरा BṛKathāMañ. xvi. 1. 412; गृध्रोऽतिलुब्धपक्षिणोः DharK. 1980; अतिलुब्धासि हे पापे PārśvC. 7. 172; और्वा इवातिलुब्धा भवन्ति धनलवणवारिबहुतृष्णाः S'ārṅgaPa. 431; (मानवाः) आसन् ··· नातिलुब्धाः MahNirvāTa. 1. 26.

अतिलुब्धक (atilubdha-ka) *adj.* very greedy, very covetous एवं चातिलुब्धकराजासहाशैलानामन्तरद्रोणीः प्रजास्संश्रयिष्यन्ति ViṣṇuP. iv. 24. 94; क्षिप्तोऽतिलुब्धकश्चौरः केन वा नरघातकः BrahmVaiP. ii. 25. 30; DevīBhāP. ix. 28. 27.

अतिलुब्धत्व (atilubdha-tva) *n.* the nature of being very greedy, excessive greed अतिलुब्धत्वादथो स्त्रीं पुरुषोऽवदत् PārśvC. 6. 637.

अतिलुभ् (ati-lubh-) IV. P. to be excessively tempted by स्त्रीणां मनोऽतिलुलुभे शशिनः करेषु Subhāṣi. 1990.

अतिलुलित (ati-lulita) *adj.* closely attached or adhering [MW]

अतिलेखन (ati-lekhana) *adj.* completely scrapping off (मधु) मेदःस्थौल्यापहं ग्राहि पुराणमतिलेखनम्। दोषत्रयहरं पक्वम् SuśruS. i. 45. 141; शङ्खोदधिमलौ शीतौ कषायावतिलेखनौ AṣṭāSaṁ. i. 76. 1 (1. 12); गुग्गुलुः ··· स नवो बृंहणो वृष्यः पुराणस्त्वतिलेखनः BhāvPra.(Bhā.) 6(3). 42.

अतिलेपन (ati-lepana) *n.* plastering completely, over-application of (ointment etc.) पूर्वोक्तैश्च गुणैश्चास्य प्रच्छितस्यातिलेपनम् Hastyāyur. 320. 15 (2. 66)

अतिलेहितदोष (atilehita-doṣa) *m.* defect due to too much use of an electuary अतिलेहितदोषाः के KāśyaS. 1A. 4.

अतिलोक (ati-loka) *adj.* **i** which has spread beyond this world स्वं यशः कथकचारणसङ्घैरुद्धतं निशमयन्नतिलोकम् AṣṭāSaṁ. ii. 53. 15 (4. 9); **ii** who is above (the injunctions and prohibitions of) this world अतिलोकस्य को दोषः शंभोर्ब्रह्मशिरश्छिदः RāmC. 24. 34; **iii** supernatural, extraordinary अतिलोकैः पदार्थैः स्यात् विस्मयात्मा रसोऽद्भुतः DaśRū. 4. 78 = SāhiSā. 5. 105; तव पदाम्बुजयुग्मम्। ··· प्रस्रवन्मधु किमप्यतिलोकम् Stotrā.

19. 16; मम … अतिलोकं स्वभावं शृणु GītāBh.(Rā.) 481. 1 (*on* 9. 29); वपुर्मनोहारि वचश्च रम्यं पदं च लोकादतिलोकमस्याः PārvPa. 4. 11; **iv** who excels the whole world त्वय्यनादरवतामतिलोके यामिमां वदसि वाचमनूचीम् Yādavā. 21. 26; **v** who conquers all, Yādavā. 21. 26 (comm. लोकोपद्रवकारिन्)

अतिलोकोत्तरत्व (atilokottara–tva) *n.* the state of being highly extraordinary or supernatural एतद्ग्रन्थे क्रियमाणस्यातिलोकोत्तरत्वेन … मयैव पूर्वं कामितम् LaCandr. 8. 18.

अतिलोचनसौन्दर्य (ati–locanasaundarya) *n.* extreme beauty of the eyes (बालाम्) सोऽतिलोचनसौन्दर्यान्नाम्ना चक्रे सुलोचनाम् KathāSaSāg. vi. 2. 73.

अतिलोठनता (atiloṭhana–tā) *f.* complete retreat अतिलोठनताम् … यस्याततायिपृतना युधि नायकस्य संदर्शनादभृत HarVi. 16. 31 (comm. परावृत्तिशीलत्वम्)

अतिलोभ (ati–lobha) *m.* **1** excessive greed or avarice अज्ञानं चातिलोभश्चाप्येकं जानीहि पार्थिव MahāBhā. xii. 153. 9; अतिलोभाद्वरगुणानाम् … न शक्नोमि निश्चयं गन्तुम् PratiYau. 2. 3(15); सूक्ष्मत्वादतिलोभाच्च … कामलक्ष्म तु दुर्ज्ञानं स्त्रीणाम् KāmSū. 323. 3 (6. 2); नातिलोभं च मन्येत [संप्राप्या ?] प्यापदाश्रयम् ParaS. 11. 36; अतिलोभमोहादशास्त्रविद्यः कुरुते चिकित्साम् KalyāKā. 7. 49; तथा क्षुरप्रैरनयैः क्रियाफलं मदातिलोभाविव वाजिनां युगम् RāghPāṇ. (Dha.) 6. 20; वातादिभिः शोकभयातिलोभक्रोधैः … अरोचकाः स्युः RugVi. 14. 1; अतिलोभादिति । लुब्धा हि स्वाभाविकमिव रूपयन्ति प्रवृत्त्या न ज्ञायन्त इति JayaMa. 323. 12 (6. 2); चाञ्चल्यमतिलोभश्च … वर्ज्यः SkandP. ii(9). 22. 58; निष्फलोदयः कृतोऽतिलोभादभिमानविक्रयः DaśāvaC. 3. 15; परिचारकैः … अतिलोभादतिसिद्धम् … भोजितवतः … भवत्युपधाव्यापत् Hastyāyur. 118. 21 (1. 16); अथो जगाद सा दक्षातिलोभो न शुभः प्रिय PārśvC. 6. 639; अतिरागाद्दशग्रीवो ह्यतिलोभात्सुयोधनः (गार्हितः) SūktiRa. 163. 52; अतिलोभात्प्रतिपन्नं तद्वचः सुभटैः CampaS'reKa. 299; अतिलोभेन प्रचुरकरादिग्रहणं परेषां मूलोच्छेदः ManvaMu. 272. 1 (*on* 7. 139); KandaCū. vi. 2. 39; **2** name of the third son of king Dāmodarasvāmin नृपतिः … ।सिंहविष्णुमनोरथातिलोभनाम्नस्तनूजानजीजनत् AvantiKa. 11. 8.

अतिलोभज (atilobha–ja) *adj.* arising from extreme greed अस्या अतिलोभजम् । दर्शितं फलम् PārśvC. 7. 223.

अतिलोभतस् (atilobha–tas) *adv.* through excessive greed स जाने मां प्रेरयेदतिलोभतः KathāSaSāg. vii. 9. 83; मणिकुन्तलेषु ववृतेऽतिलोभतो निजवाससा हलभृतेव गोपिता S'rīKaC. 14. 2; नास्तिक्यादतिलोभतः … उपसर्गः प्रजापतेः VasiS. 45. 2; तिरस्कारोऽतिलोभतः S'ukraNī. 3. 220.

अतिलोभता (atilobha–tā) *f.* excessive greed or greediness मूर्खत्वमतिलोभता । … स्त्रीणां दोषाः S'atTrayī. 368 = CāṇaNīDa. 2. 1; अतिलोभता शूद्रमाविशेत् VṛGautaSm. 635. 3 (22); अतिलोभताम् । वर्जयेत् PārśvC. 8. 181; मात्सर्यमतिलोभता । …गुणिनामपि दोषाय S'ukraNī. 3. 243.

अतिलोभन (ati–lobhana) *adj.* very greedy धिङ् मामतिलोभनं मूढम् S'ṛṅgāMañ.(A.) 51. 16; धनप्राणहरो राजा प्रजायाश्चातिलोभनः S'ukraNī. 4(1). 64.

अतिलोभनीय (ati–lobhanīya) *adj.* very attractive, seductive or alluring, very covetable हंसैरप्यतिलोभनीयगमने हारावलीमुज्ज्वलाम् … स्वीकुरु MantrMāSta. 250. 6; तमतिलोभनीयं दृष्ट्वा महीश्वरः परमं पिप्रिये CaitaCa. 233. 17(10); कुमारिकासंपुटिकाविहारानालोक्य यस्यामतिलोभनीयान् Raghunā. 1. 25.

अतिलोभनीयता (atilobhanīya–tā) *f.* extremely attractive nature स जानानः स्वस्य वपुषोऽतिलोभनीयताम् … मृगाणामाधिपत्यं चकार JātaMā. 167. 14(26)

अतिलोभपरा (atilobha–parā) *adj.* (*f.*) very greedy अतृप्तातिलोभपरा स्त्रं स्वेनैव व्यनाशयत् PariPar. 3. 42.

अतिलोभयत् (ati–lobhayat) *adj.* greatly alluring or attracting इदमिदमिति भूरुहां प्रसूनैर्मुहुरतिलोभयता पुरःपुरोऽन्या । अनुरहसमनायि नायकेन S'iśuVa. 7. 50.

अतिलोभान्ध (atilobhāndha) *adj.* blind (i. e. indiscriminate) due to excessive greed कासां हि नापदां हेतुरतिलोभान्धबुद्धिता KathāSaSāg. v. 1. 198.

अतिलोभान्वित (atilobhānvita) *adj.* extremely greedy (i. e. very much interested) धर्म्यो न लोभान्वितः (v. l. धर्म्येऽतिलोभान्वितः) Mṛcch. 9. 5 (52)

अतिलोभाभिभूत (atilobhābhibhūta) *adj.* overwhelmed with excessive greed अतिलोभाभिभूतात्मा कुट्टिनी रासभी भवेत् PārśvC. 7. 240.

अतिलोभार्त (atilobhārta) *adj.* suffering from excessive greed न ददुस्तेऽतिलोभार्ता नास्ति नास्तीति वादिनः DevīBhāP. vi. 16. 14.

अतिलोभाश्रय (atilobhāśraya) *m.* receptacle or abode of extreme greed देहस्येव गदोदयो गुणगुणस्येवातिलोभाश्रयः HammīMaKā. 10. 28.

अतिलोभिता (atilobhi–tā) *f.* the state of being extremely greedy अनृतं साहसम् … अतिलोभिता । …स्त्रीणां दोषाः MādhavāĀ. 197.

अतिलोभिन् (ati–lobhin) *adj.* extremely avaricious अये विशाखेऽयमतिलोभी दध्नः GopāKeCan. 87. 29.

अतिलोमन् (ati–loman) *m.* name of a demon अतिलोमा विलोमा च … । ब्रह्माणं पर्युपासन्त PadmP. v. 18. 76; *adj.* having too much hair पुरुषा निन्दिताः … अतिलोमा चालोमा CaraS. i. 21. 3; स्मरगृहमतिलोम (शङ्खिन्याः) RatiRaha. 1. 16.

अतिलोमश (ati–lomaśa) *adj.* [*f.* –ā] **i** very hairy, shaggy आलभते …अतिकुल्वं चातिलोमशं च VājaS. 30. 22; आलभते । … अतिश्लक्ष्णमतिलोमशम् TaiBr. III. iv. 19. 1; (सः) अद्राक्षीद्राक्षसं घोरम् … अतिलोमशम् SkandP. iv. 54. 21; तामसः … कृशः कृष्णोऽतिलोमशः SarvaSiSaṁ. 11. 26; योनिः … अतिलोमशा वैधव्यकरी KāśyaS. 47B. 38; अतिलोमशम् … शरीरेष्व(स्य) … प्रशस्तमुच्यते KāśyaS. 48B. 7; बभ्रुरतिलोमशो गिरिभवप्राणिविशेषः DīpKa. 102. 15 (*on* 3. 269); **ii** very woolly विमृशामि वितानं तेऽतिश्लक्ष्णमतिलोमशम् TripuVePāSt. 15.

अतिलोमशा (atilomaśā) *f.* *Convolvulus argenteus* नीलपुष्प्यतिलोमशा ParyāRaMā. 112.

अतिलोमा (ati–lomā) *adj.* (*f.*) very hairy, having much hair (on the body), shaggy नोद्वहेत्कपिलां कन्याम् … नातिलोमाम् ManuSm. 3. 8; उद्वहेत द्विजो भार्याम् … नातिलोमाम् SkandP. iv. 36. 93; NaraP. 58. 41; BhaviP. 270A. 23 (i. 182. 40)

अतिलोमाङ्ग (atilomāṅga) *adj.* having a body full of hair अजायत तदा पुरुषः … अतिलोमाङ्गः MahāBhā. xii. 274. 39.

अतिलोमिका (ati–lomikā) *adj.* (*f.*) having too much hair (on the body) नोद्वहेत्कपिलां कन्याम् … नातिलोमिकाम् LaS'ātāSm. 34.

अतिलोल (ati–lola) *adj.* **i** very fickle, very agitated, unsteady दुर्गन्धो भृशमशुचिस्तथातिलोलः … भ्रमति रुदन् पिशाचजुष्टः SuśruS. vi. 60. 15 (comm. अतिचपलः); RugVi. 20. 25; (Madhukośa सर्वस्मिन्नन्ने पाने च सतृष्णः); BhāgP. x. 87. 33; संप्रापुरतिलोलाश्च रुदन्तः शोकविह्वलाः BrahmVaiP. iv. 19. 143; iv. 23. 81; SkandP. iv. 20. 41; वरमदनमदादतिलोलम् GītGo. ii. 6. 5; अतिलोलमपि चेतः … स्थैर्यमाश्रयति YogS'ā. 12. 30; YudhiVi. 2. 84; **ii** very frail क्व बत हरिणकानां जीवितं चातिलोलं क्व च निशितनिपाता वज्रसाराः शरास्ते S'āk. 1. 10.

अतिलोलता (atilola–tā) *f.* excessive desire ऋजुमतेः किल वक्रगिरा भवान् वरतनोरतनोदतिलोलताम् Nārāy. x. 79. 11 (comm. अतिलोलतां परवशताम्)

अतिलोलुप (ati–lolupa) *adj.* **i** very eager जटीभूतकचाक्षादिपक्ष्माणं त्वतिलोलुपम् (स्नपयेत्) AṣṭāSaṁ. ii. 184. 20 (6. 2); **ii** very lustful देवोऽदेवाञ्जघनतः सृजति स्मातिलोलुपान् BhāgP. iii. 20. 23; SkandP. iii(2). 39. 314; PadmP. iv. 65. 34; vi 170. 56; DevīBhāP. i. 14. 41; vii. 10. 7.

अतिलोलुपत्व (atilolupa–tva) *n.* excessive desire (अनीश्वरज्ञाः) ते चेन्द्रियार्थेष्वतिलोलुपत्वादजातलज्जाः … भ्रमन्ति Vidvanmo. 7. 15.

अतिलोहित (ati–lohita) *adj.* [*f.* –ā, –nī] dark red, very red विद्युदातपायातिलोहिनी MahāBh. i. 449. 25 (*on* ii. 3. 13); राज्यः समन्तादतिलोहिताः …रक्ताभिपन्ने नयने भवन्ति SuśruS. vi. 6. 9; BhelaS. 98. 1 (5. 1); बभ्रुः पलाशान्यतिलोहितानि KumāSaṁ. 3. 29 = VakroJī. 49. 24 = AuciViCa. 16(12) = SuvṛTi. 3. 17(2) = SūktiRa. 184. 5 = Kuval. 35(33) = Subhāṣi. 1673; KāmSū. 126. 7 (2. 5); स मुनिः … अतिलोहितेन चक्षुषा स्वरुधिरोपहारमिवामर्षदेवतायै प्रयच्छन् HarṣaC. 15. 3; 179. 9; S'iśuVa. 17. 13; BṛĀraUBhVā. iv. 3. 1239; नाल्यः समन्तादतिलोहिताः RugVi. 59. 8; SkandP. i(2). 17. 5; JayaMa. 126. 8 (*on* 2. 5); NavaSāC. 12. 27; AbhidhāCin. 1326; VasaViKā. 8. 27; वहन्नतिलोहितं वपुरगादुदयं रजनीकरः HammīMaKā. 7. 19; LalitāSaBh. 29. 34 (*on* 53); *m.* name of a form of the deity Rudra-Vāyu अतिलोहितानां रुद्राणां स्थाने स्वतेजसा भानि TaiĀ. i. 17. 1 (120. 9); cf. **अतिलोहिती**

अतिलोहितगन्ध (atilohita–gandha) *m.* name of a plant, white thorn-apple, *daturalba* अतिलोहितगन्धश्च ध्यामा मदनकस्तथा ParyāMu. 11. 35.

अतिलोहितनेत्र (atilohita–netra) *n.* extremely red eye अतिलोहितनेत्राभ्यामाशीविष इव श्वसन् MahāBhā. v. App. 1. 12 (87)

अतिलोहिता (ati–lohitā) *f.* name of a female form of the deity Vāyu अथ वायोः … कपिला अतिलोहिताः । …वैद्युत इत्येकादश TaiĀ. i. 9. 2 (64. 1)

अतिलोहिताक्षि (atilohitākṣi) *n.* very red eye प्रतिदिशमतिलोहिताक्षिपक्ष्मपातम्…वदति न मौनमुपेयुषी (श्रीराधा) सखीभ्यः GopāKeCan. 92. 22.

अतिलोहिताक्षी (atilohitākṣī) *adj.* (*f.*) with very red eyes, whose eyes are exceedingly red मेदाद्भ्रुवोः कुटिलयोरतिलोहिताक्ष्या भग्नं शरासनम् … स्मरस्य S'āk. 5. 24; SaraKaṇṭhā. 578. 11.

अतिलोहिती (atilohitī) *f.* [DEBRU. p. 392] name of a female form of Vāyu अतिलोहितीनां रुद्राणीनां स्थाने स्वतेजसा भानि TaiĀ. i. 17. 2 (121. 9)

अतिलौकिक (ati-laukika) *adj.* [*f.* -ī] supra-mundane, transcendental संक्लेशे व्यवदाने च स्वयमश्रान्तबुद्धयः । यच्छन्ति लौकिकीं कृत्स्नां संपदं चातिलौकिकीम् MaYānaSū. 163. 4 (19. 16); PramāVār. 3. 473; आगमः पौरुषेयः स्यात्प्रमाणमतिलौकिकम्(? के) NyāyVi. 2. 405.

अतिलौल्य (ati-laulya) *n.* **1** great perturbation चूर्णम् … तृष्णातिलौल्यशमनं करोति HāriS. iii. 6. 22; **2** excessive greediness, extreme greed बकः … अतिलौल्योद्धृतेनाथ कर्कटेन निपातितः BṛKathāMañ. 16. 288; Tantrākhyā. 18. 14; PañcT. 1. 61 (66. 22); 4. 18 (392. 6); Hitopa. 4. 15; Pañcā. 36. 16; अतिलौल्यमतिस्पृहाम् । … वर्जयेत् Rasā. 18. 119; अतिलौल्यात् पुनर्लब्धमप्यर्थं हारयेत् कुधीः PārśvC. 6. 629.

अतिलौल्यतस् (atilaulya-tas) *adv.* owing to extreme greed अतिलौल्यतः कवलयन् मलिनद्युति काननं किमपि दावशिखी KāvyKaVṛ. 138. 17 (4. 5)

अतिलौल्यता (atilaulya-tā) *f.* excessive greed, over-greed अस्यातिलौल्यताध्यानादप्यनर्थः प्रजायते PārśvC. 2. 1016.

अतिलौल्यवत् (ati-laulyava(n)t) *adj.* having much greed, too greedy हास्याद्दृते किमन्यत्स्यादतिलौल्यवतां फलम् KathāSaSāg. iv. 2. 200.

अतिवक्तुम् (ati-vaktum) *inf.* to exaggerate प्रभावं शक्तोऽतिवक्तुं न गुरुः सुराणाम् EI. xxv. 15. 30.

अतिवक्तृ (ati-vaktṛ) *adj.* **i** reviler यो ब्राह्मणः … अतिवक्ता च … नरश्वानं हि तं विदुः MahāBhā. xiii. 37. 13; MatsyaP. 216. 15; ऋषीणामतिवक्तार इति । अधिक्षेप्तारोऽपवदितार इत्यर्थः Sphuṭā. 26. 25 (*on* 3. 15); **ii** talking too much वावदूकोऽतिवक्तरि AmaK. 2095; KośaKaTa. 2. 23; KalpaK. 222. 71.

अतिवक्त्र (ati-vaktra) *adj.* having a big face, big-faced चन्द्रवक्त्रश्च (v. l. अतिवक्त्रश्च) य आसीदसुरोत्तमः MahāBhā. i. 61. 26.

अतिवक्र (ati-vakra) *adj.* [*f.* -ā] **i** very retrograde वक्रातिवक्रा विकला मन्दा मन्दतरा समा (ग्रहाणां गतिः) SūrySi. 2. 12 (53); ऋज्वी हिता प्रजानां अतिवक्रार्थं गतिर्विनाशयति BṛSaṁ. 7. 16; ऋज्व्यतिवक्रा वक्रा विकला च मतेन देवलस्यैताः (बुधस्य गतयः) BṛSaṁ. 7. 15; राशिषु चतुर्षु वक्रं षट्स्वतिवक्रम् BrahmSphuSi. 2. 51; MahāBhāsk. 4. 56; **ii** very crooked, curved कलावान् वचनपरिचयो भ्रूविकारोऽतिवक्रः … सेवामेवं … विदधति सुभगे मुञ्च मानग्रहोऽयम् S'atTrayī. 629; KalyāKā. 19. 126; RāmāMañ. 93. 1; वातेन शूलेन मरुत्प्लवेन सदातिवक्रा हि शिरा वहन्ती (नाडी) NāḍīVi. 100; इहाविशचेन पथातिवक्रः शास्त्रौघनिष्यन्दसुधाप्रवाहः । सोऽस्याः श्रवः पत्रयुगे प्रणालीरेखेव धावत्यतिकर्णकूपम् NaiṣC. 7. 62; SūktiMu. 4. 107; MātaLī. 3. 2; Bharat. 7A. 10; विलासिनीनां मलिनोऽतिवक्रो वेणीकलापः परमाप बन्धम् Rāṣṭrau. 10. 10; NīlaVi. 56. 3; *m.* Mars कलावान् वचनपरिचयो भ्रूविकारोऽतिवक्रः … सेवामेवं ग्रहास्ते विदधति सुभगे मुञ्च मानग्रहोऽयम् S'atTrayī. 629.

अतिवक्रगमन (ativakra-gamana) *n.* moving in the maximum retrograde motion वक्रातिवक्रगमने विज्ञेये तन्निवृत्तिश्च MahāBhāsk. 4. 55.

अतिवक्रगा (ativakra-gā) *adj.* (*f.*) going in a maximum retrograde motion या वक्रा सातिवक्रगा (गतिः) SūrySi. 2. 13.

अतिवक्रचेष्टित (ativakra-ceṣṭita) *adj.* having exceedingly crooked behaviour केरानतिवक्रचेष्टितान् ManvaVi. 1230. 4 (*on* 9. 225)

अतिवक्रता (ativakra-tā) *f.* extreme crookedness मृषावादोऽतिवक्रता …स्त्रीवेदस्याश्रवा इमे TriṣaS'aPuC. iii. 7. 100.

अतिवक्रवचस् (ativakra-vacas) *n.* very cunning speech हीनाहं भवतोऽतिवक्रवचसा दातुं प्रवीणोत्तरम् । का ते सुन्दरि हीनता VakroPañ. 31.

अतिवक्रित (ati-vakrita) *adj.* very retrograde, being in backward motion उच्चराशौ विलोमे च वलं नान्यैरिहेष्यते । कालस्यातिबहुत्वाच्च, तस्मात्स्वोच्चेऽतिवक्रिते Sārā. 5. 14.

अतिवक्ष् (ati-vakṣ-) I. P. cf. **उक्ष्**, to grow beyond, to overgrow त्रीणि रोचना । अतीदं विश्वं भुवनं ववक्षिथ ṚV. i. 102. 8; अति विश्वं ववक्षिथ ṚV. i. 81. 5; अति तृष्टं ववक्षिथाथैव सुमना असि ṚV. iii. 9. 3 [*but* Sāy. ववक्षिथ अतिशयेन वोढुमिच्छसि]

अतिवङ्क् (ati-vaṅk-) I. Ā. to surpass, to cross वनप्रदेशान् … अयमत्यवङ्कत DhātuKā. 1. 13.

अतिवच् (ati-vac-) II. P. to censure, to blame किं मात्यवाक्षीः परुषैर्व्रणं सूच्या इवानघ MahāBhā. v. 74. 14; अथापि काममेतं ते प्रजात्यै करवाण्यलम् । यथा मां नातिवोचन्ति मुहूर्तं प्रतिपालय BhāgP. iii. 14. 21.

अतिवचोविषया (ati-vacoviṣayā) *adj.* (*f.*) indescribable (*lit.* beyond the range of speech) अपि तन्मुखाभिषवसेकमृते श्रियमुद्वहन्नतिवचोविषयाम् । अधरीचकार … मानसंस्थितिं मगो बकुलः HammīMaKā. 5. 24.

अतिवज्रघटिता (ativajra-ghaṭitā) *adj.* (*f.*) constituted of something harder than the thunder-bolt सख्यः संवृणुताश्रु…एतानप्यधुनातिवज्रघटिता नूनं सहिष्ये घनान् S'ṛṅgāTi.(Ru.) 2. 84.

अतिवञ्चक (ati-vañcaka) *adj.* very fraudulent जनैः प्रकथितम्…यथार्थं क्षुल्लकः श्रेष्ठिन् धर्मवाह्योऽतिवञ्चकः BṛKathāK. 70. 88.

अतिवञ्चन (ati-vañcana) *n.* clever cheating, great fraud बुधैरतिबलं प्रोक्तं कपटेनातिवञ्चनम् RasāSu. 227. 20 (3. 55); विज्ञायाक्षरतन्मात्रं जीवितं चातिवञ्चनम् । विहाय सर्वशास्त्राणि परलोकं समाचरेत् BhaviP. 278B. 7 (i. 187. 40)

अतिवञ्चयत् (ati-vañcayat) *adj.* deceiving greatly विशुद्धज्ञानरूपोऽपि त्वं लोकानतिवञ्चयन् । मायया मनुजाकारः सुखदुःखादिवानिव AdhyāRā. vi. 8. 35.

अतिवञ्चित (ati-vañcita) *adj.* [*f.* -ā] greatly deceived or cheated तस्थौ शय्यातले श्रेष्ठी गुणपालोऽतिवञ्चितः BṛKathāK. 72. 84; 59. 74; काव्यस्तु … चुकोपाथ शशाप च दैत्यान् … गुरुणातिवञ्चितान् DevīBhāP. iv. 14. 13; कृतककृतकैर्मायासख्यैस्त्वयास्म्यतिवञ्चिता Subhāṣi. 1628; *n.* great deception अहो पश्यत मूढत्वं लोकानामतिवञ्चितम् PadmP. iv. 35. 33.

अतिवत्सल (ati-vatsala) *adj.* [*f.* -ā] **i** very affectionate, very much attached to offspring देशकालोपसंपन्ना दोग्ध्री शान्तातिवत्सला । … गौर्मम MahāBhā. xiii. 70. 15 [Chitrashālā Ed.]; सा हि रोदिति मे माता कान्ताचाप्यतिवत्सला ViṣṇuP. v. 27. 17; BrahmP. 200. 16; किं नु तत्कारणं येन स्वपत्नी नातिवत्सला । मम चासावतीवेष्टा MārkP. 71. 24; वत्सौ तु वर्धयत्येव गङ्गेयमतिवत्सला SkandP. i(3). 18. 17; NavSāC. 5. 28; शोचामि … किं बन्धूनतिवत्सलान CaṇḍaKau. 4. 2; एकापत्यतया चातिवत्सलः स न तां वणिक् । भर्तृयुक्तां सुतां गेहात्तत्याज KathāSaSāg. xii. 28. 8; iii. 4. 260; अतिवत्सला … । अजनि विनीता गृहिणी … सपत्नीस्तनोऽद्वेदे ĀryāSaS'a. 2; PāṇḍaC. 14. 314; कुर्याद्धात्रीम्…सवत्सामतिवत्सलाम् BhāvPra.(Bhā.) 4. 25; आर्या चेदतिवत्सला मयि मुहुर्गोष्ठेश्वरी किं ततः … । दीव्यत्यत्र न चेद्युमात्रतफलं पिच्छावतंसी पतिः UjjvaNīMa. 51. 9; **ii** very kind नाथ कस्योपरि द्रुतम् । चोदयामि रथं पश्य मृत्युरद्यातिवत्सलः PadmP.(Ra.) 24. 104; अपारे व्यसनाम्भोधौ पतन्तं पाति देहिनम् । … धर्मोऽतिवत्सलः Yogśā. 4. 95; TriṣaS'aPuC. iv. 2. 31.

अतिवत्सलता (ativatsala-tā) *f.* great affection, great love for children भरतमवलोकयन्नतिवत्सलतया … देवो दशकण्ठरिपुरुत्कण्ठत RāmāCam. 6. 102(5); अत्रैकादशधा विभक्तमपि ते रूपं भवानीं च यो द्रष्टुं तुल्यमिवातिवत्सलतया धत्ते दृशो द्वादश S'rīKaC. 16. 36; सुग्रीवः–हन्त लज्जयेव मीलयति मामतिवत्सलतया देवपादानामास्थानप्रवृत्ता मुहुरुत्सुक्तिः AdbhutDa. 3. 19(2)

अतिवत्सलत्व (ativatsala-tva) *n.* great affection अस्त्येव भक्तेष्वतिवत्सलत्वाद्बलाद्गुणारोपणकौतुकत्वम् NavaSāC. 9. 31; ताताग्रजो माममिवत्सलत्वाच्चिरं चिरंजीवतयाजुहाव Vidvanmo. 1. 20.

अतिवद् (ati-vad-) I. P. **A** to speak exaggeratedly or hyperbolically यावद्दाताभिमनस्येत् तन्नातिवदेत् AV. xi. 3. 25; एष तु वा अतिवदति यः सत्येनातिवदति । सोऽहं भगवः सत्येनातिवदानीति ChāndoU. vii. 16. 1; सत्यं वदति सत्यमतिवदतीत्यर्थः S'rutaPra. ii. 16. 25 (*on* i. 3. 7); TattvPrakā. 45B. 3 (*on* i. 3. 8); सत्येन परब्रह्मणोपास्येनोपलक्षितो योऽतिवदतीत्यर्थः Vedānt-Kau. 82. 23 (*on* i. 3. 8); **B** to speak better, to excel or surpass in speech or sound तस्मात्क्षत्रं विशमतिवदति KāṭhS. 21. 10; तस्माद्राष्ट्रं विशमतिवदति TaiS. V. iv. 7. 7; अनुष्टुप्सु षोडशिसाम कुर्वीत यः कामयेत न मान्या वागतिवदेदिति JaimiBr. 1. 205; कुतो हि वाग्वाचमतिवदिष्यति तस्मादेतस्माहो यज्ञायज्ञीयमेवाग्निष्टोमसाम कार्यमिति JaimiBr. 2. 413; तस्माद्दुन्दुभिः सर्वा वाचोऽतिवदति TaiBr. I. iii. 6. 2; वज्रो वै षोडशी वागनुष्टुब् वज्रेणैवास्मै वाचं स्तृणोति नैनं वागतिवदति PañcBr. xii. 13. 16; याज्ञवल्क्येति होवाच यदिदं कुरुपञ्चालानां ब्राह्मणानत्यवादीः BṛĀraU. iii. 9. 19; **C** to speak too much or excessively विद्वानात्मनोऽन्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति । अतो नातिवदति MuṇḍUBh. 346. 20 (*on* iii. 1. 4); न हि वेदः … अतिवदति च प्रतिपिपादयिषितमर्थम् S'rutaPra. ii. 335. 20 (*on* ii. 2. 42); **D** to speak against, to revile or blame तदु विद्वांसमाहुरति नोऽवादीरिति ṢaḍBr.ii. 3. 10; गुरूनतिवदेन्मत्तः परदारान्प्रधर्षयेत् SūktiRa. 55. 4;[to ask for too much, MW]

अतिवदत् (ati-vadat) *adj.* **i** speaking better, being superior in discussion ते होचुर्जनको वा अयं वैदेहोऽग्निहोत्रेऽनुशिष्टः स नोऽतिवदन्निव

मन्यते JaimiBr. 1.22; **ii** speaking too much उच्च वै पापीयांसं सभायामतिवदन्तं सेधन्ति नि च सेधन्ति JaimiBr. 3.289; अथाजगाम…कपालहस्तो दीर्घास्यो भैरवोऽतिवदन्मुहुः MārkP. 8.83.

अतिवदन (ati-vadana) *n.* exaggerated statement परिचारकमुखा ये नायकेन प्रणिहितास्तैर्व्यस्यातिवदनम् JayaMa. 326.12 (*on* 6.3); भ्रमाभावश्चातिवदनातिरिक्तविषय इति सर्वं सङ्गतम् S'rutaPra. ii. 336.8 (*on* ii. 2.42)

अतिवदनसुभग (ati-vadanasubhaga) *adj.* excellent beautifier of the face लेपोऽतिवदनसुभगोऽप्यङ्गकलङ्कं च नाशयति RatiRaha. 15.96.

अतिवदान्यता (ativadānya-tā) *f.* excessive or great generosity साञ्जलिबन्धं किं ब्रवीषि, अलं तावदतिवदान्यतया Mukundā. 96(5)

अतिवधु (ati-vadhu) *adj.* beyond or without a bride अतिवधु कुलम् JaineVyā. 4.9 (*on* i. 1.7); ऊकारान्तपक्षे अतिक्रान्ता वधूर्येन मुनिमण्डलेन तदतिवधु KāvyKaVr. 82.20 (3.4)

अतिवनुष्य (ati-vanuṣya-) [denom.] to seek to outbid or surpass इन्द्रा॑वरुणा … दी॒र्घप्र॑यज्युमति॒ यो व॑नु॒ष्यति॑ व॒यं जये॑म॒ पृत॑नासु दू॒ढ्यः॑ ṚV. vii. 82.1.

अतिवन्द्य (ati-vandya) *adj.* most respectable यस्यातिवन्द्यवन्द्यस्य व्यापिनः परमात्मनः। एकांशेन जगत्सर्वं कस्तमेवं प्रवक्ष्यति MatsyaP. 245.39; रागीति प्रतिपत्तिभूषिते इति प्राप्तोऽतिवन्द्यं पदम् … प्रमाणपुरुषो वेश्याभिरभ्यर्च्यते Mugdhopa. 31; यावन्नैति परोपभोगहृतामेषा (वृद्धिः) ततस्तां तथा ज्ञात्वा ते हृदयं द्विधा दलति यत्तेनातिवन्द्यो भवान् S'ārṅgaPa. 1028.

अतिवमन (ati-vamana) *n.* excessive vomiting कर्णे स्वनोऽतिवमनं क्रमशूलमोहः श्वासेन गुल्ममिति (ग्रहण्याः) लक्षणमेव विद्धि HārīS. iii. 3.86.

अतिवयम् (ati-vayam) *adj.* cf. **अत्यस्मद्** who surpass me, two or all of us, KāśiVr. *on* P. vii. 2.93; प्रमाणमत्रातिवयं तथातियूयं रथाङ्गाविति कूजतो नु DvyāśraKā. 2.19.

[1]**अतिवयस्** (ati-vayas) *adj.* **i** very aged or old राजा तु … अतिवयसम् … अमात्यम् … अब्रवीत् Kād. 12.22; तस्यातिवयसश्चासीन्नाम्ना गुणवती सुता SkandP. ii(4). 13.6; ता अपि मामतिवयसं तरलदृशः शरलमीक्षन्ते SubhāRaK. 43.5; Subhāṣi. 3395; KandaCū. vii. 2.4; Nārāy. x. 80.4; Surath. 12.26; **ii** decrepit, without vigour तृतीये तु पादेऽतिक्रान्ते गतरसान्यतिवयांसि न्यूनसामर्थ्यानि भवन्ति (छन्दांसि) ManuBh. i. 95.23 (*on* 2.38); *n.* old age कन्या कापि भवानिवातिवयसि प्राप्ता हरेः सेवया। पित्रा ते वृषभानुना GopāKeCan. 67.31.

[2]**अतिवयस्** (ati-vayas) *adj.* sheltering many birds स्वापत्यानिव पवनेन वेपमानान् पार्श्वस्थानतिवयसस्तरून् दधानाम्। तां दृष्ट्वा जलजमुखीं समुद्रजायां जायां स्वामपि विमना मनाक् स दध्यौ Surath. 12.26.

अतिवयस्त्व (ativayas-tva) *n.* old age, decrepitude नार्या व्यावृत्तिकारणं वक्ष्ये। भृशमनुरागः पत्यावपत्यवात्सल्यमतिवयस्त्वं च RatiRaha. 13.18.

अतिवर (ati-vara) *m.* [AltGr. II. 1.258] **1** surplus gift, no gift गौर्वै वरोऽतिवरोऽन्यो धेनुर्वरोऽतिवरोऽन्यः ĀpaS'S. v. 11.4; **2** groom beyond the age of marriage क ते रूपं विशालाक्षि क्वासौ वृद्धो वनेचरः। कथं देया मया पुत्री तस्मै चातिवराय च DevīBhāP. vii. 3.41; *adj.* [*f.* –ā] most excellent, very superior अतिवरा विवराविघुता जहौ सफलिनीरलिनी रसताहृता Kapphiṇā. 8.58; ततोऽग्रे दर्शयेतां तौ कौबेरं लोकमुत्तमम्। … शक्रलोकादतिवरम् GaṇeP. ii. 52.19; Vaija. 56.25.

अतिवरण (ati-varaṇa) *n.* choice of an outsider priest एतेषामेकस्मिन्नतिवरणं वावरणं वा भवतीति BaudhS'S. iii. 196.2.

अतिवरा (ati-varā) *f.* the plant *Hibiscus mutabilis* पद्मावतीत्यतिवरा लक्ष्मी श्रेष्ठा सुपुष्करा AbhidhāMañ. 41.6.

अतिवरीफला (ativarī-phalā) *f.* Arabian date-palm खर्जूरिका। शिलेमानी परालोके मृदुलातिवरीफला MadaPāNi. 39.19.

अतिवरीयस् (ati-varīyas) *adj.* (comp.) [*f.* –ī] more excellent, superior जम्बूनाम्ने प्रदत्ता: सो वरायातिवरीयसे PariPar. 2.91; (राधिका) महाभावस्वरूपेयं गुणैरतिवरीयसी UjjvaNiMa. 73.9.

अतिवरेण्य (ati-vareṇya) *adj.* most excellent मलयाचलवायवः … । रतिवरेऽतिवरेण्यपुरस्सरे प्रतिदिशन्ति दिशं प्रशमाम्बुधेः VasaViKā. 6.65.

अतिवर्चस् (ati-varcas) *m.* name of an attendant of Kārttikeya सुवर्चसं महात्मानं तथैवाप्यतिवर्चसम्। हिमवान् प्रददौ राजन् हुताशनसुताय वै MahāBhā. ix. 44.42; SkandP. i(2). 30.54; सुवर्चसं च वरुणः प्रददौ चातिवर्चसम् VāmaP. 57.68; (ततः स्कन्दगणान् सर्वान् प्राग्वदावाहयेद् गुरुः) सुवर्चाश्चातिवर्चाश्च काञ्चनातिघनावपि। पश्चिमे IśānS'iPa. ii. 53.84.

अतिवर्ण (ati-varṇa) *adj.* having a deep complexion अतिवर्णोऽतिमेधावी स्वप्ने पावकदृक् तथा। … पैत्तिकप्रकृतिर्नरः BhelaS. 72.23 (3.4); कुलतोऽपवादमाह यमः – अत्युच्चमतिह्रस्वं च अतिवर्णं च वर्जयेत् SmṛtiCan. i. 204.1; अतिशयितो वर्णो यस्मिन् तदतिवर्णम् SmṛtiCan. i. 204.8; अतिवर्णमतिकृष्णमतिगौरं वा Aparā. 85.15 (*on* i. 54); VīraMi. (Saṁskāra.) 589.4.

अतिवर्णाश्रमिन् (ati-varṇāśramin) *adj.* who is beyond the scope of *varṇas* (classes) and *āśramas* (stages of life) परतत्त्वं विजानाति सोऽतिवर्णाश्रमी भवेत् NāraPaU. 6.10; अतिवर्णाश्रमी नित्यं शिवोऽहंभावनात् परात्। शिवयोगी च नियतमीशानेनापि धारयेत् S'ivaP. i. 24.37 (31A.8); स्मृतिषु जीवन्मुक्तः स्थितप्रज्ञभगवद्भक्तगुणातीतब्राह्मणातिवर्णाश्रम्यादिनामभिस्तत्र तत्र व्यवह्रियते JīvanVi. 15.14; 31.13; 34.10.

अतिवर्तन (ati-vartana) *n.* **A i** setting aside, avoidance न दैवस्यातिभारोऽस्ति न दैवस्यातिवर्तनम् MahāBhā. iv. 19.6; **A ii** avoidance (of punishment), exemption यानस्य चैव यातुश्च यानस्वामिन एव च। दशातिवर्तनान्याहुः ManuSm. 8.290; वक्ष्यमाणान्यतिवर्तनानि दण्डातिवृत्तेर्दण्डातिभावस्थानानि ManvaVi. 1048.17 (*on* 8.290); दण्डमतिक्रम्य वर्तन्त इत्यतिवर्तनानि अदण्डनिमित्तानि DaṇḍaVi. 224.9; **B** immoderate activity तथातिरोषभाष्याध्वहास्यभारातिवर्तनैः। वायुः कोष्ठगतो धावन् … हिक्कां कुर्यात् CaraS. vi. 17.39 (1941 Ed.); लिङ्गं पित्तावृतेऽपाने रजसश्चातिवर्तनम् CaraS. vi. 28.230 (1941 Ed.)

अतिवर्तमान (ati-vartamāna) *adj.* **A** flowing excessively रक्तेऽतिवर्तमाने दाहे क्लेदेऽवगाहयेचापि। मधुकामृणालपद्मचन्दनकुशकाशनिष्क्वाथे CaraS. vi. 14.215; जयति। रक्तमतिवर्तमानं वातं च पलाण्डुरुपयुक्तः AṣṭāSaṁ. ii. 63.25 (4.10); **B** going over (from one stage to another) सा तण्डुलेषु मुकुलावस्थामतिवर्तमानेषु … स्थाल्यामन्नमण्डमगालयत DaśKuC. 111.18; श्लेष्मा प्रवृद्धः स्थानात् स्थानमतिवर्तमानः। … शुद्धपाकलमभिनिर्वर्तयति Hastyāyur. 57.15 (1.9)

अतिवर्तयितुम् (ati-vartayitum) *inf.* to set aside, to deny भेदेऽपि काश्चिदेव व्यक्तयोऽस्य जननाय समर्थाः न सर्वा इत्यत्र कार्यकारणभावस्य प्रत्यक्षानुपलम्भाभ्यां दृष्टस्यातिवर्तयितुमशक्यत्वात् TarkBhā.(Mo.) 30.12.

अतिवर्तव्य (ati-vartavya) *adj.* not to be offended (by refusal) ऋतावृतौ राजपुत्रि स्त्रिया भर्ता यतव्रते। नातिवर्तव्य इत्येवं धर्मं धर्मविदो विदुः MahāBhā. i. 113.25.

अतिवर्तित (ati-vartita) *adj.* **1** violated, offended, slighted मन्देन मया निर्निमित्तम् … सुहृदश्चातिवर्तिताः DaśKuC. 114.21; धर्मनाशे विनष्टः स्याद् वर्णाचारोऽतिवर्तितः DevīBhāP. i. 18.47; कृतकक्रूतकैर्मायाशाठ्यैस्त्वयाप्यतिवर्तितम्। … भवतु विदितं नेष्टा तेऽहम् SūktiMu. 57.24; S'ārṅgaP. 3560; **B** passed through, changed अतिवर्तितवद्गुवर्णैर्द्वैरिव धवलभावपलिताढ्यैः। कृत्वा विष्णुपदाश्रयमम्बुधरैः स्थीयते यत्र UdaySuKa. 26.28.

अतिवर्तितुम् (ati-vartitum) *inf.* **A** to overcome, to subdue, to get rid of तव पुत्रस्य पौरुषम्। यदेकं सहिताः पार्था न शेकुरतिवर्तितुम् MahāBhā. ix. 18.54; xii. 22.15; मया त्वया च पूर्वैश्च न स (कालः) शक्योऽतिवर्तितुम् MahāBhā. xii. 217.56; v. 193.52; तस्य बाणचयं प्राप्य न शेकुरतिवर्तितुम्। वानरेन्द्राः Rāmā. vi. 63.28; यः प्रभुः सर्वभूतानां सुखदुःखोपपत्तये। तं नातिवर्तितुं दैत्याः पौरुषैरीश्वरः पुमान् BhāgP. viii. 21.20; भवितव्यं हि धात्रापि न शक्यमतिवर्तितुम् KathāSaSāg. vii. 3.236; xii. 34.296; ते युक्त्या मतिमतिवर्तितुं यमस्य। …व्यधिषत नूनयत्नसिद्धिम् S'rīKaC. 17.57; अतो योगिप्रत्यक्षमपि न तत्स्वभावमतिवर्तितुमर्हति NyāyRa. 141.21 (*on* 4.28); अतिवर्तितुमेनमक्षमः स वराकः समरे मुजोष्मणा S'ivLī. 15.76; दैवं पुरुषकारेण कोऽतिवर्तितुमर्हति। विधातृविहितं मार्गं न कश्चिदतिवर्तते Subhāṣi. 3112; न हि शब्दस्पृष्टं केनाप्युपायेन प्रमेयतामतिवर्तितुं शक्यम् Bhāsk. i. 54.18 (*on* i. 1.1); **B** to transgress, to violate, to disregard भ्रातरं धार्मिकं ज्येष्ठं नातिक्रमितुं (v. l. कोऽतिवर्तितुम्) मर्हति MahaBhā. ii. 61.8; सोऽहं न शक्ष्यामि पितुर्नियोगमतिवर्तितुम् Rāmā. ii. 18.35; श्रौतमागममिवातिवर्तितुं कः क्षमेत नयशास्त्रसंग्रहम् HarVi. 14.56; न्यायैकनिष्ठे राजनि … सर्वाः प्रजास्तन्मुद्रां नातिवर्तितुमीशते SyādvāMañ. 5(11); निदेशं तस्य राजानो न शेकुरतिवर्तितुम् Yādavā. 1.18; BṛBrahmS. ii. 1.42; **C** to excel, to surpass मनुष्यसंख्यामतिवर्तितुं वा। निरुत्सुकानामभियोगभाजां समुत्सुकेवाङ्कमुपैति सिद्धिः Kirātā. 3.40 = KāvyaPra. 368.5; VyaktiVi. 49.23; SāhiDa. 409.9; **D** to cross over शतपदी सति पादशते क्षमा भुवि न गोष्पदमप्यतिवर्तितुम् BhallāS'. 72; S'ārṅgaP. 1215; Subhāṣi. 939; **E** to delay, to postpone यस्यां सन्ध्यागतः सोमो मृणालमिव दृश्यते। अपराह्णे क्षयस्तस्यां पिण्डानां करणं ध्रुवम्। इति निर्देशः पिण्डपितृयज्ञं नातिवर्तितुमीहते CaturCin. iii(1). 180.4.

अतिवर्तिन् (ativart-in) *adj.* [*f.* –ī] **A** going over, crossing तेषामक्षौहिणिशतं समवेक्ष्य वनौकसाम्। लङ्कामुपनिविष्टानां सागरं चातिवर्तताम् (v. l. चातिवर्तिनाम् GORR. vi. 16.100) Rāmā. vi. 31.83; मनोजवा मेघपथेऽतिवर्तिनः। —वाजिनः RāghPāṇ.(Dha.) 1.16; **B** transgressing, violating, behaving improperly सतां धर्मातिवर्तिना। त्यक्तधर्माङ्कुशेनाहं निहतो रामहस्तिना Rāmā.

iv. 17.38; ध्रुवमहं विनिहत्य मदोद्धतं परनृपाय ददाम्यतिवर्तिनम् VarāṅgaC. 20.18; न वेद धर्मं किल पद्मयोनिर्न ब्रह्मपुत्रा: …। … ये नो निषेधन्त्यतिवर्तिनं हरम् BhāgP. vi 17.12; राजशासनानुवर्तिनां तदतिवर्तिनां च … न … °सुखदुःखयोर्भोक्तृत्वप्रसङ्ग: S'rīBh. 417.20 (*on* ii. 1.4); **C** neglecting, ignoring अहम् … प्रव्यथितप्रियतमाप्रणामाञ्जलिशपथशतातिवर्ती … असिद्वितीय: … उदचलम् DaśKuC. 57.8; **D** excelling, surpassing, transcending, going beyond (दद्दृशुः पुरुषम्) भुवनातिवर्तिना। … अश्नुवानमिव विश्वमोजसा Kirātā. 12.21; संबन्धो नैव कर्मभिः। भवेत् कालत्रये शम्भोरविद्यामतिवर्तिन: LiṅgaP. ii. 9.39; चला: सहन्ते किमिवातिवर्तिन: RāghPāṇ.(Dha.) 6.14; Yādavā. 17.29; पदार्थेषु लोकसीमातिवर्तिषु SāhiDa. 166.2; संतानका: सप्त तान्। आवृत्तान् गणनातिवर्ति कृतवान् … श्रीसाह्वतिम्मप्रभुः EI. vi. 119.53; vi. 235.37; **E** passing beyond निरीक्ष्य माद्य गच्छ त्वमृतुकालातिवर्तिनीम् Rāmā. vii. 48.19; **F** having the sixth stage of rut सोऽतिवर्तीव गन्धेभो नियमात् प्रविशेद् वनम् MahāP. 15.52; [guilty of a pardonable offence, MW]

अतिवर्तिनी (ativart-inī) *f.* the sixth stage of the rutting elephant पट्टवर्धने आर्द्रकपोलिकायाम् (अवस्थायाम्) … अतिवर्तिन्यां चर्चरीवतंस: … इत्यनीकस्थेन विनिवेदितद्विरदमदावस्था: YaśasCam. i. 495.4; (गज:) एवं निरङ्कुशो यस्यामवस्था सातिवर्तिनी Mānaso. iv. 3.501; iv. 3.628.

अतिवर्तुल (ati-vartula) *adj.* very round ततोऽजाविवराहहरिणगोमहिषान्यतमजम् … नातिवर्तुलं मृदु दृढम् … विवृताननं विवेश्य वस्तिम् AṣṭāSaṁ. i. 147.7 (1.28); *m.* a kind of grain or herb कलायस्त्रिपुटस्तस्य: सतीलश्चातिवर्तुल: ParyāRaMā. 686.

अतिवर्त्य (ativart-ya) *ger.* **i** setting aside, neglecting, ignoring स शोचत्यापदं प्राप्य यथाहमतिवर्त्य तौ MahāBhā. x. 6.19; तदनुसारिणो वयं न तमतिवर्त्य स्वेच्छया धर्मानुभवान् व्यवस्थापयितुमीहामहे TattvVai. 131.27 (*on* 3.13); नियतकारणान्वयव्यतिरेकानुविधायिभावानि हि कार्याणि न स्वकारणमतिवर्त्य कारणान्तराद्भवितुमीशते TattvVai. 200.10 (*on* 4.16); **ii** having gone beyond, having crossed तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैक: BhāgP. ii. 2.25; पश्यैष बाल्यमतिवर्त्य विवर्तमान: शृङ्गारसीमनि तरङ्गितमातनोति AlaṅkāSe. 21.2(27); **iii** having overcome तावतिवर्त्य परमार्थे तस्मिन्नसौ स्थिरीभवति GoviBh. 4.12 (*on* i. 1.1)

अतिवर्धत् (ati-vardhat) *adj.* growing excessively अतिवर्धति चाधर्मे … वेदा: प्रत्यानीता हि तेन वै BrahmP. 213.108.

अतिवर्धन (ati-vardhana) *adj.* promoting growth कौमारभृत्यमतिवर्धनमुक्तमेतत् KāśyaS. 92B.21; *n.* great augmentation or increase व्यजनानिलैरतिवर्धनं प्रभञ्जनस्य यदसह्निवै: परिबोधनमार्यस्य Kād. 289.15.

अतिवर्धयत् (ati-vardhayat) *adj.* causing to prosper greatly नतानतिवर्धयन् स: … सुखमगमयत् कालम् RāghPāṇ.(Dha.) 3.43.

अतिवर्धित (ati-vardhita) *adj.* greatly increased कृत:। श्रीमालिर्विरथो रोषात् प्रहारेणातिवर्धितान्(? त्) PadmP.(Ra.) 12.236.

अतिवर्धमान (ati-vardhamāna) *adj.* greatly increasing शमधनाधिपो विनेयैश्चिरविरहादतिवर्धमानहार्दैः … वृत: … जिगमिषुराजनि मण्डनस्य गेहम् S'aṅkaDigVi.(Mā.) 10.61; कालिन्दीमतिवर्धमानसलिलामुल्लङ्घ्य Vidvanmo. 8.13.

अतिवर्ष (ati-varṣa) *n.* excessive rain अवर्षं चातिवर्षं च व्याधिपावकमूर्च्छनम्। सर्वमेतत्तदा नासीत् MahāBhā. ii. 30.5; सततं त्वन्तःकलहं करोति सौभिक्षमतिवर्षम् VasiS. 9.60; अमानुष्योऽग्निवर्षमतिवर्षम् … इत्यापद: NītiVā. 11.3; अतिशीतं चातिवर्षम् … एषां रूपेण यो देवस्तस्याहं शरणं गत: PadmP. ii. 18.33; पिहितौ तौ दृशो (पुटौ) रुजि। सुसिमूर्छातिवर्षोष्णधूमवाताञ्जनार्तिषु SaṁgīRa. iv. 154.7 (7.444)

अतिवर्षण (ati-varṣaṇa) *n.* excessive or heavy rain अतिवर्षण° … °हवनानि BṛhaspaSm. 254.161; दुर्भिक्षमतिवर्षणात् PārśvC. 1.103; KathāK. 117.22; अवर्षणं चाप्यतिवर्षणं च देवो न जानाति कुतो मनुष्य: VetāPañ.(S'i.) 17.35; BhojPra. 28.3.

अतिवर्षीयस् (ati-varṣīyas) *adj.* (comp.) very old प्रकर्षनामातिवर्षीयान् महाप्रतीहार: सह स्वपरिवारेण भूत्वा पुरस्तादकृतविस्तरस्तामवादीत् TilaMañ. 417.1.

अतिवर्ष्मन् (ati-varṣman) *adj.* having a huge body हरवृष इवातिवर्ष्मा … तुरङ्गरत्नं भद्रवाहनो नाम AvantiKa. 88.5.

अतिवल् (ati-val-) I. P. (*caus.*) to turn over अथैतन्मेक्षणमधोऽध: स्रुचावाग्नीध्रायोत्प्रयच्छन्नाहातिवालयतादेव मानुप्रहार्षीरिति BaudhS'S. i. 168.12.

अतिवलन (ati-valana) *n.* excessive bending or twisting अलमतिवलनेन देहयष्टेः सुतनु तनुस्तव भङ्गमेति मध्य: HarVi. 28.5.

अतिवला (ati-valā) *f.* cf. **अतिबला,** MadaPāNi. 11.179; AśvaVai. 8.12.

अतिवलाकपल्लिका (ativalāka-pallikā) *f.* name of a village कार्त्तिकेयपुरे अतिवलाकपल्लिका विशाखिलपल्लिका अरिस्थाश्रम: EI. xiii. 116.23.

अतिवल्ग् (ati-valg-) I. P. to be very active किंसार एवमतिवल्गसि हंसि पासि YogVā. iii. 79.32 (comm. अतिशयेन व्यवहरसि); (*caus.*) to stroke or shake violently त्रि: स्रुचाग्निमुदञ्चमतिवल्गयति ĀpaS'S. vi. 11.3.

अतिवल्गत् (ati-valgat) *adj.* jumping violently विरथावभिवल्गन्तौ (v. l. अतिवल्गन्तौ) समेयातां महारथौ MahāBhā. vi. 70.26; चाणूरे चातिवल्गति …। प्रविष्टौ सुमहारङ्गं बलदेवजनार्दनौ BrahmP. 193.29.

अतिवल्गन (ati-valgana) *n.* excessive boasting अतिवल्गनं ममैतन्मूढत्वं यद्यपि प्रभो: पुरत: ĀryāS'. 31.

अतिवल्गुवचस् (ativalgu-vacas) *adj.* making very charming sounds तांश्चातिवल्गुवचसो रथाङ्गाह्वयना द्विजा:। अधिरोहन्ति Rāmā. ii. 89.11.

अतिवल्गुवल्गत् (ativalgu-valgat) *adj.* galloping very beautifully अतिवल्गुवल्गद्भि: स्वभावचञ्चलै: प्रधानवाजिभिरुह्यमाननायकम् (खेचरनरेन्द्रवृन्दमद्राक्षम्) TilaMañ. 153.2.

अतिवल्गुसद्गुण (ativalgu-sadguṇa) *m.* very beautiful quality or virtue तरुणि … तव। अतिवल्गुसद्गुणजुषो वपुष: कुशलं किमङ्गजनुषो धनुष: Rāgh. 8.11.

अतिवल्लभ (ati-vallabha) *adj.* [*f.* -ā] **A i** very dear or favourite इदं पवित्रम् … पितृणामतिवल्लभं च। पापहरं च पुंसाम् MatsyaP. 53.74; धन्योऽयं दयिताभीष्टो श्वेताश्चास्यातिवल्लभा: MārkP. 65.11; यमस्येवातिवल्लभानि दण्डग्रहणानि HarṣaC. 121.5; संगीतयोगिनी प्रोक्ता श्रीदेव्या अतिवल्लभा BrahmāṇḍP. iii. 19.62; रत्नवती … तस्यैव बलभद्रस्यातिवल्लभा जाता DaśKuC. 115.15; ततो नाम्ना महोत्साह: सामन्तोऽस्यातिवल्लभ: PadmP.(Ra.) 17.40; गेयानि शृण्वन्नतिवल्लभानि VarāṅgaC. 8.45; इत्थं कवि: पठन्काव्यं वाग्देव्या अतिवल्लभ: KāvyMī. 33.22; यमो यमभटानाह … भूषणैश्चातिवल्लभै:। अर्चयन्ति(ये)न ते ग्राह्या नरा: कृष्णालये गता: AgniP. 38.41; यस्मादिष्टं हि भूतानां स्मशानमतिवल्लभम् SkandP. v(1). 1.32; भगवन्काशिराजस्य सुताहमतिवल्लभा SkandP. v(2). 61.25; प्राप्तोऽयं माधवो मासो माधवस्यातिवल्लभ: PadmP. iv. 85.41; तत्रातीव रहो रम्यं वह्निध्येऽग्नेऽतिवल्लभम् ĀdiP. 10.37; चत्वारोऽमरतुल्यास्ते तेषां रामोऽतिवल्लभ: AdhyāRā. i. 4.10; अथ ब्रूमो वराटास्यम् … नागानां चातिवल्लभम् SamarāSū. ii. 83.13; तस्य चैकैव मद्रासुर्भार्या सा चातिवल्लभा KathāSaSāg. vii. 2.113; द्वितीया चन्द्रवत्येषा त्वयि रक्तातिवल्लभा KathāSaSāg. vii. 8.207; (न) केवलं तस्या भवानतिवल्लभो यावद्भवतोऽपि सा सुतरां रोचते Kāvyānu.(He.) 40.11; अभूच्चातिविनीतत्वादावलिस्तेऽतिवल्लभ: TriṣaS'aPuC. ii. 5.22; अतिवल्लभापि दुहिता प्रहिता जिनदाससार्थवाहेन PrabhāC. 43.8; वृद्धस्य तरुणीवाभूद्यात्रा तस्यातिवल्लभा RājTa.(Jo.) 421; नित्यं सहचारिणी अतिवल्लभापि सा त्वत्प्रसादेन अस्मे अस्माकमेव MīmāKau. iii(1). 99.5; **A ii** much more dear, dearer (with Abl. or Gen.) भव्यजीवा हि तस्यासन् प्राणेभ्योऽप्यतिवल्लभा: PadmP.(Ra.) 23.35; न मे ब्रह्मकुलात्प्राणा: … दाराश्चातिवल्लभा: BhāgP. ix. 9.43; त्वम् … कनिष्ठो भूर्मम भ्राता प्राणेभ्योऽप्यतिवल्लभ: PariPar. 1.431 = PāṇḍaC. 16.48; दुहिताहं तयोर्जाता प्राणेभ्योऽप्यतिवल्लभा PārśvC. 6.1125; सा महिषी राज्ञो राज्ञीनामतिवल्लभा NaraP. 31.23; **B** the plant Pāṭalā अतिवल्लभ: पाटलायाम् ApūNā. 33.3; **C** a kind of jasmine, Kunda कुन्दस्तु मकरन्दस्य सदापुष्पोऽतिवल्लभ: ṢadrasaNi. 31.18.

अतिवल्लभतर (ativallabha-tara) *adj.* much more dear, much dearer मध्येविमानमभिमानिनि पुष्पशय्या कस्यातिवल्लभतरस्य कृते कृतेयम् RāmC. 36.55.

अतिवल्लभता (ativallabha-tā) *f.* great love, great liking अतिवल्लभतया विषादं कुर्वन् यावद्विलपति PañcT. 4.47 (221.5) [KOSEGARTEN's Ed.]

अतिवल्लभत्व (ativallabha-tva) *n.* great love, great liking धीरस्यापि धाष्टर्यमारोपयति हृदयलघिमलङ्घितमतिवल्लभत्वम् HarṣaC. 338.21; इयम् … नियतं कुपितातिवल्लभत्वात्स्वयमुत्प्रेक्ष्य ममापराधम् VeṇīSaṁ. 2.126; राज्ञोऽतिवल्लभत्वेन साथ पृष्टा पुन: पुन: PārśvC. 7.43.

अतिवश्य (ati-vaśya) *adj.* extremely dependent य: स्वायुषोऽवधिमवैति स्वदेहनिष्ठं यस्यान्तको भवति मित्रतयातिवश्य: RājTa.(S'rī.) 2.90.

अतिवश्यता (ativaśya-tā) *f.* the state of being completely subjected to तां समालोक्य सौमित्रि: पुस्तनिष्कम्पलोचन:। अनन्यजस्य धीरोऽपि परिप्राप्तोऽतिवश्यताम् PadmP.(Ra.) 93.17.

अतिवस् (ati-vas-) I. P. (*caus.*) to cause to remain, to detain रूपवतीर्जनपदयोषित: प्रीत्यपदेशेन मासं मासार्धं वातिवासयन्ति KāmSū. 294.23 (5.5)

अतिवसु (ati-vasu) *n.* huge treasure (स्त्री) पुष्पवती …। अतिवसुधनभाक् स्यान्मानिनी सच्चरित्रा। … प्रोष्ठपद्याम् VasiS. 24.27.

अतिवस्तु (ati-vastu) *n.* multitude of precious objects [य]स्य[द्वा]रे-

ऽतिवस्तुप्रततमिव दिवो द्वारम् EI. i. 150. 20.

अतिवह् (ati-vah-) I. U. **1Ai** to carry over, to carry across, to carry beyond स नो॑ वक्षदनिमा॒नः सु॒वह्मेन्द्रो॒ विश्वा॒न्यति॑ दु॒र्गहा॑णि R̥V. vi. 22. 7; अ॒ग्निर्वै॑ प॒योऽति॑वोढा स॒ एना॒नति॑वहति S'atBr. XIII. viii. 4. 6; न वै नोऽयं मृत्युं न पाप्मानमत्यवाक्षीत् JaimiUBr. ii. 1. 5; स वाचं प्रथमामत्यवहत् JaimiUBr. ii. 11. 2; सा वा एषा देवतैतासां देवतानां पाप्मानं मृत्युमपहत्याथैना मृत्युमत्यवहत् BṛĀraU. i. 3. 11; i. 3. 16; BṛĀraUBh. 57. 1 (*on* i. 3. 14); मृत्युमत्यवहत् प्राण: सामान्योक्तेर्विशेषत: BṛĀraUBhVā. i. 3. 230; PrakaVi. 690. 19; विश्वाविश्वान् द्विषोऽज्ञानपापादीन् अतीत्य शक्तो विष्णु: स्वभक्तानतिवहत्येव KarmaNi. 6B. 9; (*caus.*) दुर्गेषु मार्गेषु अतिवाह्यान् अतिवाहयन्ति BrahmSūBh.(S'aṅ.) 826. 18 (*on* iv. 3. 4); प्रदीप्ते वेश्मन्यन्तर्ब्राह्मणम् … नि:सरणासमर्थं स्वमरणमङ्गीकृत्य प्रविश्यातिवाहयेत् BālaKrī. ii. 102. 17 (*on* 3. 240); श्रान्तं युद्धेषु निर्भिन्नम् …। अतिवाहयते भूपमेक एव तुरङ्गम: SūktiRa. 97. 4; लोकाल्लोकान्तरं लिङ्गदेहं अतिवाहयतीति आतिवाहिकम् SāṁkhyaPraBh. 140. 2 (*on* 5. 103); (*pass.*) अग्निस्वामिकं लोकं प्राप्त: अग्निना अतिवाह्यते BrahmSūBh.(S'aṅ.) 828. 11 (*on* iv. 3. 5; तेनार्चिराद्यधिष्ठातृदेवैरतिवाह्यन्ते इति सिद्धम् AṇuBh. 337. 8 (*on* iv. 3. 6); **1Aii** to lead over, to cover, to traverse पृष्ठ्ये रथमतिवहेयु: LāṭyāS'S. iii. 5. 1 (comm. शीघ्रं वहेयु:); (*caus.*) तमध्वशेषम् … अत्यवाहयन् । सादिन: MahāP. 27. 128; योगी … तं व्याघ्रम् … आरुरोह … सुखं तेन पन्थानमतिवाहयत् RauhiC. 380; **1Aiii** to carry away, to marry यो जपेद् दशशतं दशाक्षरम्। … नरो वाञ्छितामतिवहेत् स कन्यकाम् PañcaRā.(Nā.) v. 2. 8; **1Aiv** to remove, to exhaust (caus.) प्रवृत्तफलं कर्माशयं भोगेनातिवाहयन्तु VedāntKa. 445. 5 (*on* iii. 3. 32); **1Av** to sustain (*pass.*) राजपुत्रै: समं सख्यं कृच्छ्रादप्यतिवाह्यते KathāSaSāg. vi. 2. 111; **1B** to proceed with, to dispose of (*caus.*) धर्मस्थश्चेत् … कार्यमदेशेनातिवाहयति छलेनातिहरति … उत्तममस्मै साहसदण्डं कुर्यात् ArthS'ā. ii. 161. 3 (4. 9); (*pass.*) नयनसलिलैर्यैरेवैको व्रजन्नतिवाह्यते PādaTā. 13. 8; आयुष्मन् किमेवमतिवाह्यतेऽनुरक्तो लोक: KaṁVa. 5. 35 (7); **2** to pass (time), to spend (time) (*caus.*) पुरावृत्तकथाभिश्च शेषाहमतिवाहयेत् VedaVyāSm. 3. 73; नरपतिरतिवाहयांबभूव … त्रियामाम् RaghuVa. 9. 70; प्रियया सह मध्याह्नमतिवाहयति DhūrtaViSaṁ. 28. 21; तन्मयैव सह … कालमतिवाहयस्वेति Tantrākhyā. 79. 21; PañcT. 2. 72 (245. 9); तं दिवसम् … दु:खेनात्यवाहयत् Kād. 118. 16; अन्येद्युरप्यनेनैव क्रमेण नक्तन्दिनमत्यवाहयत् HarṣaC. 32. 8; जानश्रुति: … रात्रिशेषमतिवाहयामास ChāndoUBh.(S'aṅ.) 207. 10 (*on* iv. 1. 5); कालं प्रियया … अत्यवाहयम् BṛKaS'loSaṁ. 18. 93; शर्वरीरत्यवाहयत् MahāP. 34. 188; त्वं पुन: किमाचरन्ती दिवसानतिवाहयसि PraboCan. 4. 4; मध्याह्नसमयमतिवाहयन्तु किंनरमिथुनानि NalaCaṁ. 6. 25 (10); सकललोकलोचनघूर्णनेषु घर्मदिनेषु मदिरासमागमानिव मध्याह्नसमयानतिवाहयामास YaśasCam. i. 538. 6; क भूत्वा … कालमतिवाहयिष्यामि मन्दभाग्या TilaMañ. 21. 2; कथमपि निशीथमतिवाहयांबभूव Bhām. 268. 4 (*on* i. 3. 34); क्ष्मापतिस्तं क्षपाशेषं कृतकृत्योऽत्यवाहयत् RājTa.(Ka.) 3. 190; तत्तूर्यध्वनिघोषेण … तां रात्रिमतिवाहयेत् BhaviP. 695B. 18 (iv. 64. 40); कैर्वा विनोदविभ्रमैरतिवाहयामि दिवसान् UdaySuKa. 40. 23; अतश्च दिवैवैकवारमेव भोजनेनैवैकमहोरात्रमतिवाहयेदिति Mitā. 516. 28 (*on* 3. 318); राजा तया सह …। एकाहमिव वर्षाणां सहस्रं सोऽत्यवाहयत् TriṣaS'aPuC. i. 4. 547; नृप: जाग्रदेव यामिनीं तां कथंचिदत्यवाहयत् BallāC. 31. 2 (4); (*pass.*) कूटपण्यैरसामान्यैस्तारुण्यमतिवाह्यते SamaMā. 4. 67; क्रमात्ताभ्यामदु:खाभ्यामन्योन्यस्नेहवृत्तिभि:। केऽपि कैतववाह्याभिरत्यवाह्यन्त वासरा: VikraDeC. 4. 94; तत्र त्रिषष्टिवर्षाणां सत्रयोदशवासरा अत्यवाह्यत भूपेन तेन पृथ्वीं प्रशासता RājTa.(Ka.) i. 330; **3** to overcome, to go beyond [caus.] स्वसंस्कारविपाकं तथाजातीयकमतिवाहयन्ति (देवादय:) YogBh. 24. 2 (*on* 1. 19); (*pass.*) एषा गुणमयी माया दुर्बोधेन दुरत्यया। नित्यं सत्यावबोधेन सुखेनैवातिवाह्यते YogVā. vi(1). 67. 7.

अतिवह (ati-vaha) *adj.* excessive oozing अद्यार्द्रैसैरतिवहेष्वर्श: – स्वनिलोल्बणशरीर: CaraS. vi. 14. 207 (1941 Ed.) = AṣṭāSaṁ. ii. 63. 22 (4. 10)

अतिवहन (ati-vahana) *n.* carrying across, leading beyond अतिवहनं हि गन्तॄणां गमयितृत्वम् S'rīBh. 749. 10 (*on* iv. 3. 4); आदिष्टा(? ष्टो) विश्वनेत्रा स्वयमतिवहने देवयानाध्वगानाम् TattvMu. 2. 60; मुच्यमानानामतिवहने परमेश्वरेण नियुक्ता देवताविशेषा: S'ivārkaMaDī. ii. 474. 23 (*on* iv. 3. 4)

अतिवहिका (ati-vahikā) *f.* palanquin काम: … यस्य चेतो नृपतिपरिभवात् पुण्यपण्यं प्रवेश्य प्रायासीद्वालयित्वा शुचिमतिवहिकां देवसूरि: स नन्द्यात् PrabhāC. 180. 24.

अतिवह्निकर (ati-vahnikara) *adj.* excessively stimulating the fire of digestion (वारिशोषण:) अतिवह्निकर: श्रीदो बलवर्णाग्निवर्धन:। धन्वन्तरिकृत: सद्यो रस: परमदुर्लभ: RaseCin. 9. 308 (249. 18)

अतिवह्न्यर्क (ati-vahnyarka) *adj.* (splendour) surpassing both the fire and the sun अतिवह्न्यर्कमसौ दधच्च तेजो द्युसदां शल्यमिवोच्चकैर्बभूव SkandP. iv. 43. 113.

अतिवा (ati-vā-) II. P. to blow over न भूमिं॒ वातो॒ अति॑ वाति AV. iv. 5. 2; IV. P. to blow violently, [MW]

अतिवाक्करण (ati-vākkaraṇa) *adj.* talking too much, excessively talkative (अभिधर्षयन्ति) अतिवाक्करणं प्राय: शुक्लैकादश्यां सप्तम्यां च यक्षा: CaraS. vi. 9. 21 (1941 Ed.); AṣṭāSaṁ. ii. 205. 3 (6. 7)

अतिवाक्त्व (ativāk-tva) *n.* too much prattling उन्निद्रतातृड्भ्रमरोमहर्षा जृम्भातिवाक्त्वं च चलात्सपित्तात् AṣṭāSaṁ. i. 262. 10 (3. 2)

अतिवाक्पटुता (ativākpaṭu-tā) *f.* great eloquence नैवातिवाक्पटुतया न च काव्यदर्पात् … विधास्यते तत् (कल्याणकारकम्) KalyāKā. 1. 12.

अतिवाक्य (ati-vākya) *n.* **i** improper (insulting) words अतिवाक्यमथो तितिक्षसे परुषं पापजनैरुदीरितम् GiMs. iii(1). 11. 17; **ii** *adj.* going beyond the testimony or evidence अतिवाक्यक्रियोपेतमतिसत्त्वातिभावकम्।… नाट्यधर्मी तु सा स्मृता NāṭyaS'ā. 13. 73 (comm. इतिहासादिवाक्यमतिक्रम्य या उचितरञ्जकेतिवृत्तकल्पनात्मिका क्रिया)

अतिवाग्युता (ativāg-yutā) *adj.* (*f.*) possessing excessive talk वर्जयेत् … कन्याम् … अतिवाग्युताम् BṛParāSm. 6. 28.

अतिवाङ्मनस् (ati-vāṅmanas) *adj.* completely beyond words and thought (i. e. undescribable and unimaginable) पुण्यमाश्रममद्राक्षीद्धरद्राजस्य कौरव: …। अतिवाङ्मनसोदारं परमानन्दकारणम् SkandP. ii(1) 30. 33; अतिवाङ्मनसं भवन्तमेव प्रतिपन्नास्तु वयं प्रशासितारम् S'ivLī. 3. 77; 15. 60.

अतिवाच् (ati-vāc) *adj.* excessively talkactive अतिवाक् चैव दूषित: (विप्रा:…नाभ्यर्च्या:) BṛParāSm. 7. 13; *f.* excessive prattling स्वप्ननाशोऽतिवाग्जृम्भा वातपित्तज्वराकृति: CaraS. vi. 3. 86 (1941 Ed.)

अतिवाचक (ati-vācaka) *adj.* reciting or reading in excess (पूजार्ह:) शतरुद्रीयजापी च साग्निकश्चातिवाचक: PadmP. iv. 100. 43.

अतिवाचाट (ati-vācāṭa) *adj.* excessively talkative (प्रहसनम्) कामुकैरतिवाचाटै: षण्डदुष्पडि(ण्डि)तादिभि:।… विकृतं स्मृतम् SāhiSā. 6. 56.

अतिवाचाल (ati-vācāla) *adj.* **i** excessively talkative हहह आ: अतिवाचालोऽयं विहङ्ग: ĀścaCū. 4. 9 (1); शश्वद्धर्मातिवाचालो याति वै तद्गृहात् सती (लक्ष्मी:) BrahmVaiP. ii. 38. 46; भूपालमतिवाचालमित्यादिपरिदेवितै:। काममुद्यच्छमानं च जीवितान्ताय कर्मणे (पौरामात्यादय: … प्रसादयामासु:) PāṇḍaC. 5. 273; **ii** sounding loudly (संध्या) कुपितेव निवर्तते जवादतिवाचालविहङ्गनूपुरम् NavaSāC. 12. 37.

अतिवाचालता (ativācāla-tā) *f.* too much verbosity अथ नञा प्रतिषेध: क्रियते, तत्तद्भावभावित्वेन नञ एव तत्सामर्थ्यं, न विधेरिति कृतमतिवाचालतया TātpaṬ.(U.) 187. 16 (*on* 5. 13); कृतमतिवाचालतया चिरमपि निपुणैर्निरूप्यमाणोऽत:। अर्थस्यैव न बुद्धे: सिध्यति नीलादिराकार: NyāyMañ. ii. 114. 7; NyāyMa. 211. 5.

अतिवाचोयुक्ति (ati-vācoyukti) *adj.* beyond appropriate expression (i. e. surpassing description) प्रेषित एष: … द्वारपलाटभर्त्रा हृत्पाश्यतोहर्यधरोऽतिवाचोयुक्ति: … महेभ: DvyāśraKā. 6. 27.

अतिवाच्य (ativāc-ya) *ger.* having caused to recite देवतायां देवतायामतिवाच्याद्भिरभ्युक्ष्योदङ्ङ्युत्खिदेत् BaudhS'S. iii. 83. 3.

अतिवाञ्छित (ati-vāñchita) *adj.* greatly desired (तरणि: कुन्तीम्) भुक्त्वा जगाम देवेशो वरं दत्वातिवाञ्छितम् DevīBhāP. ii. 6. 28; यदि नान्नं मनोयोग्यं तदा दास्येऽतिवाञ्छितम् GaṇeP. ii. 105. 15.

अतिवात् (ati-vāt) *adj.* blowing severely or forcefully (मुनयोऽभितस्थु:) ऊर्ध्वा(? र्ध्वे)दिवार्के प्रदहत्यभीक्ष्णं पार्श्वे च वायौ परुषेऽतिवाति VarāṅgaC. 30. 36; एवं वायुर्घर्मार्तस्य शान्तो भवति शीतार्तस्य घोरो धूलिशर्कराविमिश्रोऽतिवान् मूढ इति SāṁkhyaKāBh. 23. 11 (*on* 38)

अतिवात (ati-vāta) *m.* strong wind, cyclone, storm (अथोपरमम्) अतिवाते S'āṅkhāGS. iv. 7. 28; अतिवाते अभ्रे वर्षति KauṣiGS. iii. 9 24; गीतवादितरुदितातिवातेषु तत्कालम् GobhiGS. iii. 3. 28; तस्मिंश्च समये तत्संभवं कलये कलिनिधनकरं निवेदयितुकामा(प्य ? ह्य)तिवातादयो दोषा दुद्रुवु: AvantiKa. 160. 6; (बुध:) यदार्काद् व्यतिरिच्येत तदातिवाताभ्रप्रायानावृष्ट्यादिभयमाशंसते BhāgP. v. 22. 13 (comm. अतिवातश्च अभ्रप्रायं च तत्समाहारम्); विधुनोत्यतिवातेन दातुरज्ञानत: कृतम्। पापं दातुर्गृहे भानुर्दिवा रात्रौ न संशय: BhaviP. 157A. 25 (i. 103. 41); DevīBhāP. viii. 16. 30; नैर्ऋतेनातिवातेन हा प्रजे क गमिष्यसि RājTa.(S'rī.) 3. 276.

अतिवातग्रह (ativāta-graha) *m.* seizure by excessive (bodily humour) wind शेषे च वातप्रकृतावतिवातग्रहान्विते।… अविश्राम्यमसृग्भवेत् Hastyāyur. 484. 30 (3. 52)

अतिवातन्धय (ati-vātandhaya) *adj.* surpassing the snake घटिंधम-

मुष्टिंधमनासिकंधमनिस्त्रपाः। लुभ्यन्ति पितृराज्येऽतिवातंधयखरिंधयाः DvyāśraKā. 11.81 (comm. वातन्धयान् सर्पान् मृगान् वा अतिक्रान्ताः)

अतिवातल (ati-vātala) *adj.* [*f.* -ā] **i** causing excess of (bodily humour called) wind कलायस्त्वतिवातलः AṣṭāHṛ. i. 6.17; राजमाषः ··· अतिवातलः AṣṭāSaṁ. i. 30.22 (1.7) = BhojanKu. 11.17; पित्तकृन्नातिवातलम्। कफप्रकोपजननं विद्याच्चणकपूरणम् BhojanKu. 49.13; **ii** extremely affected by (bodily humour called) wind निरन्तरं खरं रूक्षं मन्दश्लेष्मातिवातला (नाडी वहति) NāḍīVi. 79.

अतिवातानुलोम्य (ati-vātānulomya) *n.* quite fit or proper disposition of (bodily humour called) wind नातिवातानुलोम्यं च क्लिष्टान्त्रस्येह लक्षणम् Hastyāyur. 352.19 (3.1)

अतिवाताशन (ati-vātāśana) *n.* eating too much food causing disorder of (bodily humour called) wind अतिवात्य(? ता)शनादिभिः ··· भिनत्ति (कण्ठम्) पवनः परम् BhelaS. 198.26 (6.23)

अतिवातिका (ati-vātikā) *adj.* (*f.*) **i** very mad (possessed by Vāta) सा शालिजननीत्वेन संभाव्ये कोविदैः कथम्। याहं शस्येषु गण्यापि भद्रिकेव हि वातिका (v. l. भद्रिकेवातिवातिका) S'āliC. 6.146; **ii** grown in a windy place, S'āliC. 6.146.

अतिवात्पराग (ativāt-parāga) *m.* pollen dust which is blown strongly (i. e. scattered) (ग्रीष्मे) अस्मिन्नदृश्यन्त न वै(? बै)दगार्गलाक्षाङ्कलक्ष्माण्यतिवात्परागैः DvyāśraKā. 16.84 (comm. अतिवान्तो गाढवात्यावानेन अत्यन्तं परिभ्राम्यन्तो ये परागाः)

अतिवात्सल्य (ati-vātsalya) *n.* **i** excessive or great parental affection कथमतिवात्सल्याददतिक्रमोऽपि MahāviC. 1.55(1); तस्मिन्नप्यतिवात्सल्यात्पुत्रास्थां जननी स्थिराम्। बबन्ध DarpaDa. 2.81; बहुपुत्रोऽपि स हि मे पिता पूर्वं वसन्निह। मया विनातिवात्सल्यान्नाहारमकरोत्सदा KathāSaSāg. xii. 19.131; RājTa.(Ka.) 7.1674; TriṣaS'aPuC. i. 1.886; अलमतिवात्सल्याददतिलालनेनेत्यभिधाय, विसृज्य सामाजिकान् NīlaVi. 63.17; **ii** very great kindliness भगवन्नतिवात्सल्यादस्माकं स्निग्धचक्षुषा। ··· भवतोदितम् RāmāMañ. 101.19; सः ··· प्रवार्धितोऽतिवात्सल्यात् तथा तद्गुरुगौरवात् PrabhāC. 29.2; 178.8.

अतिवाद (ati-vā́da) *m.* **A** hypermetrical recitation अथो खल्वाहुर्गायत्री वाव प्रातःसवने नातिवाद इति TaiS. VI. iv. 5.2 (गायत्र्या एव ह्यतिवादास्त्रिष्टुबादयः Bhaṭṭabhāskara; अधिकाक्षरयुक्त्या पाठ्यमानत्वमतिवादः Sāy.); **B** name of a *ṛk* (ṚV. Khila v. 19.1 = AV. xx. 135.4 = S'āṅkhāS'S. xii. 33.4 = ĀśvaS'S. ii. 2.3) अतिवादं शंसत्यतिवादेन वै देवा असुरानत्युद्याथैनानत्यायन् AitBr. 30.7 (789); अथातिवादं शंसति वीमे देवा अक्रंसतेति GopBr. ii. 6.13; VaitāSū. 32.26; **C i** excessive talk, very opprobrious or vituperative talk, reproof, meaningless talk, sophistry यः परेषां नरो नित्यमतिवादांस्तितिक्षति MahāBhā. i. 74.1; i. 82.10; अतिवादान्मदाच्चैव मा धर्ममतिशङ्किथाः MahāBhā. iii. 32.6; iii. 199.18; xii. 269.6; अतिमानातिवादौ तमाविशन्ति द्विजाधमम् MahāBhā. xiii. 29.14; अतिच्छेदातिवादाभ्यां स्मयोऽयं समुपागतः MahāBhā. xiii. 121.9; ManuSm. 6.47; ViṣṇuSm. 96.19; MatsyaP. 28.1; 36.10; पण्डितः। वर्जयेदसतीं वाचमतिवादांस्तथैव च MārkP. 58.71; पारुष्यमतिवादः स्यात् AmaK. 338; अतिवादः निरर्थकोऽतिप्रलापः SanatBh. 253.8 (*on* 2.22); शास्त्रमतिक्रम्य यः कश्चिद्वदति सोऽतिवादः अप्रियाक्रोशः ManuBh. i. 512.24 (*on* 6.47); अतिवादानतिक्रमवादाननिष्टभाषणानि तितिक्षेत क्षमेत ManvaVi. 723.5 (*on* 6.47); विषाणि जङ्गमाद्यानि (v. l. चातिवादाश्च) मृत्योर्द्वाराणि देहिनाम् BhaviP. 617B.21 (iv. 4.87); आसुर्याः (लक्षणम्) शृणु साम्प्रतम्। अतिवादोऽभिमानश्च दर्पोऽज्ञानं सकोपता GaṇeP. ii. 147.4; ततो वादातिवादाश्च बभूवुः कुपितस्तदा। भीमसेनः BallāC. 106.1; (भूपः) स्वान् दुर्गुणान् परित्यज्य ह्यतिवादान् तितिक्षते S'ukraNī. 1.83; इति प्रवृत्तं कलहेऽतिवादमेषा सपत्न्या मम्रृषे न साध्वी SivLī. 22.43; **C ii** exaggerated statement, very boastful or vaunting talk अधर्मस्यातिवादस्य वृद्धातिक्रमणस्य च (द्रक्ष्यसि त्वं फलं तीव्रम्) MahāBhā. v. 160.18; अश्रुतवेदान्तानां कर्मण्यश्रद्धा मा भूदिति देवताधिकरणेऽतिवादाः कृताः VedāSaṁ. 157.10; स्वविवक्षितादधिकार्थान्तराकथनं विवक्षितेऽर्थे प्ररोचनार्थोऽतिवादश्च संभवतः S'rutaPra. ii. 335.19 (*on* ii. 2.42); नातिक्रौर्यं नातिशाठ्यं धारयेन्नातिमार्दवम्। नातिवादं नातिकार्यासक्तिमत्याग्रहं न च S'ukraNī. 3.218; **C iii** excessive praise कुशीलवा वर्षारात्रिमेकस्था वसेयुः। कामदानमतिमात्रमेकस्यातिवादं च वर्जयेयुः ArthS'ā. ii. 122.9 (4.1); परिभवोपघातकुत्सातिवादांश्चेषु न प्रयुञ्जीत ArthS'ā. ii. 347.4 (7.16); स्पृहामोहातिवादेषु लोकः सक्तो न बुध्यते SkandP. i(2). 21.295; *adj.* eloquent साधीयानतिसाधौ स्यादतिवादेऽपि वाच्यवत् ViśvaLoK. 395.62; *cf.* **अतीवादा.**

अतिवादतस् (ativāda-tas) *adv.* through abuse or vituperation (अति सर्वं नाशहेतुः) अपमानोऽतिवादतः S'ukraNī. 3.220.

अतिवादत्व (ativāda-tva) *n.* the state of being a statement going beyond (its own purport), exaggeration द्रव्यप्राधान्योक्तेरतिवादत्वम् अनुष्ठानविरोधात् S'rutaPra. iA. 26.26 (*on* i. 1.1)

अतिवादरूपता (ativādarūpa-tā) *f.* the state of having the nature of talking hyperbolically or exaggeratedly शैवस्तुतिवचनस्यास्य ··· अतिवादरूपतया स्वीयतन्त्राधिकारिशैवस्तुतिमात्रपरत्वं वा (कल्पनीयम्) PāñcRāRa. 28.5.

अतिवादलिङ्ग (ativāda-liṅga) *n.* mark of exaggerated talk इदं च 'तत्रापि' इत्यतिवादलिङ्गात् अपिशब्दात् सूच्यते PāñcRāRa. 41.13.

अतिवादलिङ्गत्व (ativādaliṅga-tva) *n.* the state of being the mark of exaggerated talk अपिशब्दस्यातिवादलिङ्गत्वं 'चण्डालमपि वृत्तस्थं तं देवा ब्राह्मणं विदुः' इत्यादिप्रयोगेषु प्रसिद्धम् PāñcRāRa. 41.14.

अतिवादवचन (ativāda-vacana) *n.* hyperbolic statement यानि च पाद्मपारमेश्वरादिष्वतिवादवचनानि तानि नूनम् इक्षुभक्षणचिकीर्षुभिः प्रक्षिप्तानि PāñcRāRa. 23.18.

अतिवादवादिन् (ativāda-vādin) *adj.* who is used to indulge in excessive disputation न मेऽद्य वक्ष्यस्यतिवादिमानिन् (v. l. मोक्ष्यस्यातिवादवादिन्) MahāBhā. iii. 134.2.

अतिवादसहन (ativāda-sahana) *n.* enduring slanderous talk विरोधिनी सा तद्रक्षां कुर्वीत बलिकर्मणा। तथातिवादसहनाच्छास्त्राचारनिषेवणात् MārkP. 51.31.

अतिवादातिविद्ध (ativādātividdha) *adj.* deeply hurt by slanderous talk अतिवादापविद्धस्तु (v. l. अतिवादातिविद्धस्तु) वक्ष्यामि बलमात्मनः MahāBhā. v. 74.6.

अतिवादापविद्ध (ativādāpaviddha) *adj.* deeply hurt by slanderous talk अतिवादापविद्धस्तु वक्ष्यामि बलमात्मनः MahāBhā. v. 74.6.

अतिवादित (ati-vādita) *n.* mode of playing on *paṇava* (just before playing on *murajas*) अतिवादितमनुवाद्यं समवादितमुच्यते पणववाद्यम्। तत्रातिवादितं स्यान् मुरजानामग्रतो यत्तु NāṭyaS'ā. 34.67.

अतिवादित्व (ativādi-tva) *n.* habit of speaking exaggeratedly (of something) प्राणदर्शिनश्चातिवादित्वम् 'अतिवाद्यसीत्यतिवाद्यस्मीति···' इत्यभ्यनुज्ञाय 'एष तु वा अतिवदति यः सत्येनातिवदति' BrahmSūBh.(S'aṅ.) 153.15 (*on* i. 3.8); 153.17 (*on* i. 3.8); अतिवादित्वं प्राणोपासकस्य व्रतमुक्त्वा BrahmSūBh.(Bhā.) 53.15 (*on* i. 3.8); प्राणभूयस्त्वदर्शिनोऽतिवादित्वेन Bhām. 198.21 (*on* i. 3.8); अतिवादित्वं हि स्वोपास्यपुरुषार्थाधिक्यवादित्वम् VedāntSā.(Rā.) 87.1 (*on* i. 3.7); VedāntDī. 45.5 (*on* i. 3.7); 45.13 (*on* i. 3.7); प्राणातिवादिनोऽङ्गतया सत्यवचनं विधत्ते, उत सत्यशब्दवाच्यपरोपासकस्यातिवादित्वं वदति S'rutaPra. ii. 10.23; (*on* i. 3.7); TattvPrakā. 175A. 5 (*on* iii. 3.38); VedāntKau. 82.18 (*on* i. 3.8); 82.25 (*on* i. 3.8); BrahmSūBh.(Rā.) 282.12 (*on* i. 3.7); AṇuBh. 251.15 (*on* iii. 3.44]; S'ivārkaMaDī. i. 208.11 (*on* i. 1.13); i. 411.33 (*on* i. 3.7); GoviBh. 43.7 (*on* i. 3.8); 43.13 (*on* i. 3.8)

अतिवादित्वनिमित्त (ativāditva-nimitta) *adj.* whose cause is the state of speaking hyperbolically (of something) तस्मादतिवादित्वनिमित्ततत्साक्षात्काराय तदुपायभूतं सत्योपासनं कुर्यादित्यर्थः S'rutaPra. ii. 16.26 (*on* i. 3.7); पूर्वातिवादित्वनिमित्तात् प्राणादस्यातिवादित्वनिमित्तं सत्यमधिकृतयोपदिशति VedāntKau. 82.21 (*on* i. 3.8)

अतिवादित्वरूपत्व (ativāditvarūpa-tva) *n.* the nature of the state of speaking hyperbolically (of one's object of meditation) आशाद्युपासनाफलापेक्षया अधिकफलवदुपासनाविषयत्वस्यैव भूयस्त्वरूपत्वात् तादृशप्राणवादित्वस्य च अतिवादित्वरूपत्वात् LaCandr. 824.22.

अतिवादित्ववर्णन (ativāditva-varṇana) *n.* mention of the state of speaking hyperbolically (of something) तद्दर्शिनोऽतिवादित्ववर्णनस्यासामञ्जस्यप्रसङ्गात् S'ivārkaMaDī. i. 411.32 (*on* i. 3.7)

अतिवादित्वहेतु (ativāditva-hetu) *m.* cause of the state of speaking hyperbolically (of something) ततश्चोपास्यदेवतासाक्षात्कारोऽतिवादित्वहेतुरित्यर्थः VedāntKau. 83.2 (*on* i. 3.8); तुशब्देनातिवादित्वहेतुं प्रकृतां प्राणोपास्तिं व्यावर्त्य GoviBh. 43.8 (*on* i. 3.8)

अतिवादित्वान्तर (ativāditvāntara) *n.* another type of hyperbolic mode of speaking, another (kind of the) state of one speaking hyperbolically (of something) सत्येनेति तृतीयाश्रुत्या करणत्वाभिधायिन्या सत्यज्ञानेनातिवादित्वान्तरमेव विधीयते PrakaVi. 231.26.

अतिवादिन् (ati-vādin) *adj.* [*f.* -ī] **i** speaking exaggeratedly or hyperbolically विजानन् विद्वान् भवते नातिवादी MuṇḍaU. iii. 1.4; एष एवं पश्यन्नेवं मन्वान एवं विजानन्नतिवादी भवति। तं चेद् ब्रूयुरतिवाद्यसीति। अतिवाद्यस्मीति ब्रूयात्। नापह्नुवीत ChāndoU. vii. 15.4; अतिवादी अतीत्य सर्वान्न्यान्

वदितुं शीलमस्येत्यतिवादी MuṇḍUBh. 346.15 (*on* iii. 1.4); तस्मिन्नधोमुखी विहसेत् । तां चातिवादिनीमधिक्षिपेद्विवदेच्च KāmSū. 202.23 (3.2); अतिवादिनीमित्यनुरागातिशयं कथयन्तीमधिक्षिपेत् JayaMa. 203.11 (*on* 3.2); प्राणदर्शिनोऽतिवादिनो व्यवच्छिद्य सत्येनातिवादिनं वदन् कथं प्राणस्य भूमानमभिदधीत Bhām. 200.9 (*on* i. 3.8); NayaMañ. I. iii. 2.4; अतिवादिन्यां तस्यां साक्षेपः स्याद्विवादस्तु KandaCū. iii. 2.25; S'ivārkaMaDī. i. 414.22 (*on* i. 3.7); **ii** loquacious, who speaks complainingly नासूयको न चापीर्षुर्नातिवादी न मत्सरी । भविष्यति जनस्तत्र MahāBhā. iv. 27.13; विप्रस्याजायतात्मजः । दुराचारस्य पापस्य निर्घृणस्यातिवादिनः SkandP. i(2). 13.101; (पुनरूचुश्च गोपिकाः) वयं मिथ्यातिवादिन्यो न हि सोऽयं तवात्मजः ĀdiP. 25.49; किमर्थं शिशवस्त्वां गेहे गेहेऽतिवादिनः BhaviP. 798A.6 (iv. 132.2); **iii** who excels in sophistry अनभिज्ञास्तु शान्तत्वाच्चित्तानामतिवादिनाम् DevīBhāP. vi. 6.29; यत्र वेदविदो नित्यं वेदवादबहिष्कृतान् । वादजल्पवलैर्घ्नन्ति वचोभिरतिवादिनः S'ivaP. vii (1). 3.62 (505B.10)

अतिवादिमानिन् (ativādimān-in) *adj.* who thinks himself an excellent argumentator न मेऽद्य वक्ष्यस्यतिवादिमानिन् ग्लहं प्रपन्नः सरितामिवागमः MahāBhā. iii. 134.2.

अतिवादिस्थानीय (ativādi-sthānīya) *adj.* who attains the status of one excelling in speech अतिवादिस्थानीयोऽग्निहोत्री S'rutaPra. ii. 14.15 (*on* i. 3.7)

अतिवादुक (ati-vāduka) *adj.* who excels in speech अथो खल्वाहुर्गायत्री वाव प्रातःसवने नातिवाद इत्यनतिवादुक एनं भ्रातृव्यो भवति य एवं वेद TaiS. VI. iv. 5.2.

अतिवादेन्धन (ativādendhana) *adj.* having fuel in the form of excessive (i. e. unreasonable) dispute अतिवादेन्धनो जज्ञे कलहाग्निः क्षयावहः ViṣṇuP. v. 37.40.

अतिवाद्यन्तर (ativādy-antara) *n.* another person who excels in speech अतः पूर्वातिवादिनः प्रत्यभिज्ञा नास्तीत्यतिवाद्यन्तरं प्रतिपन्नमित्यर्थः S'rutaPra. ii. 14.7 (*on* i. 3.7); ii. 13.28 (*on* i. 3.7); ii. 14.20 (*on* i. 3.7)

अतिवाद्यन्तरत्व (ativādyantara-tva) *n.* the state of being another person who excels in speech अत्र त्वतिवाद्यन्तरत्वनिमित्तमुपासनान्तरम्…प्रतीयते S'rutaPra. ii. 14.9 (*on* i. 3.7)

अतिवान्त (ati-vānta) *adj.* who has vomited excessively, suffering from excessive vomiting विक्षिप्तवस्त्रगात्रमतिवान्तविरिक्तं मदनयोगहतं विद्यात् ArthS'ā. ii. 150.4 (4.7); अतिवान्तस्य लक्ष्माणि संप्रोक्तानि निबोध मे BhelaS. 243.8 (8.1); KāśyaS. 150A.36; अतिवान्तम् … । उपाचरेत्सिताक्षौद्रमिश्रैर्लेहैश्चिकित्सकः SiddhYo. 73.23; *n.* excessive vomiting पित्तातियोगं च विसंज्ञतां च हृत्कण्ठपीडामपि चातिवान्ते SiddhYo. 73.14; अतिवान्ते भवेत् तृष्णा हिक्कोद्गारौ विसंज्ञिता S'ārṅgaS. iii. 3.23.

अतिवाप (ati-vāpa) *m.* the keeper or superintendent (of a gambling table) cf. **अक्षातिवाप**.

अतिवाम (ati-vāma) *adj.* extremely hostile प्रतिमुखस्खलितकुवलयकोपादिवातिवामानि…भामिनीनामरज्यन्त लोचनानि AvantiKa. 27.8; न काकुवाक्यैरतिवाममङ्गजं द्विषत्सु याचे पवनं तु दक्षिणम् NaiṣC. 9.93;

अतिवामचेष्टिता (ativāma-ceṣṭitā) *adj.* (*f.*) whose (outward) behaviour is very affectionate तां तीक्ष्णचित्तामतिवामचेष्टितां वीक्ष्यान्तरा कोशपरिच्छदासिवत् । वरस्त्रियं तत्प्रभया च धर्षिते निरीक्षमाणे जननी ह्यतिष्ठताम् BhāgP. x. 6.9.

अतिवामन (ati-vāmana) *adj.* [*f.* -ā, -ī] very short, dwarfed किरति मिहिरे विष्वद्रीचः करानतिवामनी स्खलकमठवद्देहच्छाया जनस्य विचेष्टते AnargharRā. 1.54 = SubhāRaK. 31.4; पादाम्बुजाभ्यामतिवामनाभ्यां कृतार्थयन्तं कृपया धरित्रीम् S'āraTi. 13.140; वर्जनीयपात्राणि … अत्युच्चाप्यतिवामना (नर्तकी) AbhinDa. 26.

अतिवामनता (ativāmana-tā) *f.* the state of being very low अतिवामनतया च जघनभागस्य पातालादिव उत्तिष्ठता … गन्धहस्तिना सनाथीकृतैकदेशम् … राजकुलं विवेश Kād. 87.19.

अतिवामनत्व (ativāmana-tva) *n.* the state of being very dwarfish आकृतिविकृतिरतिवामनत्वदन्तुरत्वादिः RasāSu. 155.12 (2.124)

अतिवामिन् (ativām-in) *adj.* causing excessive vomiting (अथ ताम्रम्) अतिवामि कठोरकम् RasRaSa. 5.45.

अतिवामोरु (ati-vāmoru) *adj.* surpassing (a woman) with beautiful thighs ङीबाद्यन्तस्याप्रधानस्य ह्रस्वो भवति । … अतिवामोरुः CāndraVṛ. *on* ii. 2.86.

अतिवामोरू (ati-vāmorū) *adj.* (*f.*) having very beautiful thighs अशिवेनातिवामोरूरजस्रं नेत्रवारिणा । स्तनावपतितौ बाला सहितावभिवर्षती । उवाच वाक्यम् MahāBhā. iii. 265.18; अहमपि अतिवामोरु पीडितः क्षुधया वने DevīBhāP. vii. 13.10.

अतिवायत् (ati-vāyat) *adj.* blowing strongly, (place or time) having excessive wind ब्रह्मविदो ब्रह्म नाधीयन्ते(? ते)ऽतिवायति MahāBhā. xii. 315.56; अतिवायति गृहादिभङ्गकारिणि चातिवाति ManvaVi. 516.19 (*on* 4.122)

अतिवायु (ati-vāyu) *m.* strong wind, storm क्रियात्मकेन रजसा लघु सत्त्वं सर्वत्र नीतं स्यादतिवायुना तूलावयववद्यदि गुरुणा तमसा नियमनं न स्यात् SāṁkhyaTaPra. 165.7; शशांकजः । अतिवायुं स्वल्पवृष्टिं करोति NāraS. 2(1).7; 2(6).9; 35.19.

अतिवायुकुमारक (ati-vāyukumāraka) *adj.* surpassing the Vāyukumāraka gods आददाते विहंगमान् । राज्ञः कुमारौ तौ वेगादतिवायुकुमारकौ TriṣaS'aPuC. ii. 3.9.

अतिवारक (ati-vāraka) *m.* plant *kuraṇḍa* कुरण्डस्त्वतिवारकः KośaKaTa. 1.4239.

अतिवारि (ati-vāri) *n.* abundant water तदा क्षमा भवति समातिवारिणा BṛSaṁ. 28.10.

अतिवारिता (ati-vāritā) *adj.* (*f.*) firmly prohibited विप्रेण मोहिताः पौरयोषितः । गृहेषु न हि तिष्ठन्ति ह्यस्माभिरतिवारिताः PadmP. vi. 202.22.

अतिवारिभय (ativāri-bhaya) *n.* fear of excessive water or floods अतिवारिभयं वियात्सौम्यायां भूरिसंपदः AVPari. 59.7.

अतिवार्त्त (ati-vārtta) *adj.* thoroughly useless यच्च संसृष्टिनस्तु संसृष्टीत्यस्य भ्रात्राधिकारावसरे विशेषविधानमात्रार्थत्वं न पत्न्याद्यपवादकत्वमित्युक्तम् तदतिवार्त्तम् ViraMi. (Vyavahāra.) 511 28.

अतिवार्धक (ati-vārdhaka) *n.* very old age प्रायश्चित्तेषु रोगपीडयातिवार्धकेन वा स्वयमसमर्थः … उपवासजपादिकं कारयेत् ĪśānS'iPa. ii. 20.37(12)

अतिवार्धकदशा (ativārdhaka-daśā) *f.* very old condition अस्तोदयाद्रिगतमर्कशशाङ्कबिम्बमह्नोऽतिवार्द्धकदशामवलम्बितस्य । ताराक्षराणि पठितुं तपनीयशैलनासावसक्तमुपनेत्रमिवाबभासे PadyaVe. 557.

अतिवार्धुषिक (ati-vārdhuṣika) *adj.* excessive usurer, who charges excessive interest वणिक् पण्योपघाती यो यश्चाप्यस्य प्रतीक्षकः । अतिवार्धुषिकश्चैव हन्यन्ते बहुरूपया KāśyaS. 191B.14.

अतिवार्यमाण (ati-vāryamāṇa) *adj.* being firmly prevented तेनातिवार्यमाणोऽपि यद्यसौ न निवर्तते । तदान्यत्र क्वचिद्गत्वा शिवमेवानुचिन्तयेत् MālinīT. 18.72.

अतिवालक (ati-vālaka) cf. **अतिबालक** *m.* an infant; *adj.* infantine [MW]

अतिवाल्य (ati-vālya) *ger.* having passed over or across अथ सकृदतिवाल्य कूर्चे स्रुचं निधाय दक्षिणावृद्गार्हपत्यं प्रतीक्षते BaudhS'S. i. 75.4; प्रस्तरे बर्हिर्यावन्मात्रं स्पन्द्यया विग्रथ्याहवनीयेऽतिवाल्याद्भिरभ्युक्ष्योत्तरतः सादयति BaudhS'S. i. 178.11; BaudhPiMe. iii. 1.16.

अतिवाल्लभ्य (ati-vāllabhya) *n.* the state of being very dear तस्मिंल्लक्ष्मीसरस्वत्योः अतिवाल्लभ्यमाश्रिते MahāP. 11.34.

अतिवास (ati-vāsa) *m.* fast on the day preceding a *śrāddha* [APTE, MW]

अतिवासवा (ati-vāsavā) *adj.* (*f.*) excelling that of Indra तस्य भूलोकचन्द्रस्य समृद्धिरतिवासवा RāghPāṇ.(Ka.) 3.19.

अतिवासुकि (ati-vāsuki) *adj.* who excels Vāsuki उपरि स्थितेन भवता जगती कथमुद्धृतेयमतिवासुकिना VasaViKā. 2.5.

अतिवाह (ati-vāha) *m.* **i** carrying across or beyond or over यस्त्रयाणां मृत्यूनां साम्नातिवाहं वेद स उद्गाता मृत्युमतिवहतीति JaimiUBr. iii. 9.10; विदुषामतिवाहे परमपुरुषेण नियुक्ता अतिवाहिका देवताविशेषा एतेऽर्चिरादयः S'rīBh. 749.8 (*on* iv. 3.4); VedāntDī. 237.18 (*on* iv. 3.4); अतिवाहे भवा अतिवाहिका: BrahmSūBh.(Bhā.) 235.11 (*on* iv. 3.4); VedāntKau. 415.18 (*on* iv. 3.4); **ii** carrying an excessive load or carrying a load excessively अतिदोहातिवाहाभ्याम् AtriS. 221; ĀpaSm. 1.23; अतिवाहे च … प्रायश्चित्तं विनिर्दिशेत् ParāSm. 9.28; अतिवाह्या(? हा) तिदोहाभ्याम् … पादोनं व्रतमाचरेत् LaS'aṅkhaSm. 53; तस्य गर्दभोऽतिवाहाद्दुर्बलो मुमूर्षुरभवत् (v. l.) PañcT. 3.33 (286.12); Hitopa. 3.9(2); योजनं हलशकटादावतिवाहादिना BālamBha. iii. 161.18 (*on* 3.263); [guide, conductor DBHS]

अतिवाहक (ati-vāhaka) *m.* the deity or spirit appointed by God to help in the conveying of the *jīva* or *sūkṣmaśarīra* [APTE]

अतिवाहन (ati-vāhana) *n.* **i** carrying away, removal अत्राननुभूतस्य क्षीरोदधेः कीर्तिप्रवाहदर्शनेनोत्कण्ठाया अतिवाहनम् AlaṅkāRa. 20(21); **ii** ex-

cessive acceleration (of motion) अपानो रूक्षगुर्वन्नवेगाघातातिवाहनैः। …कुपितः कुरुते रोगान् AṣṭāSaṁ. i. 304. 11 (3. 16); **iii** causing to carry excessively श्रमो भवति … वाहानामतिवाहनात् AśvaVai. 22. 1 [excessive toiling, MW]

अतिवाहनीय (ati-vāhanīya) *adj.* to be removed or atoned for परथा कथमतिवाहनीयमिन्द्रेण परःसहस्रैरपि वत्सरैः…इदं दुरितम् NīlaVi. 46. 6 (Vibudhānanda क्षपणीयम्)

अतिवाहयत् (ati-vāhayat) *adj.* removing, emptying (of a reservoir) सङ्कल्पप्रवृत्तमेव हि ते फलदानाय कर्माशयमतिवाहयन्तः … अन्यमन्यं देहं संचरन्तः BrahmSūBh.(S'aṅ.) 669. 12 (*on* iii. 3. 32); **ii** passing (time) (अहं) भवन्तं चिन्तयान एव कालमतिवाहयन् … आलोकितः DaśKuC. 154. 2; UdaySuKa. 40. 12; इतश्च भरतस्तस्थौ दिवसानतिवाहयन् TriṣaS'aPuC. i. 6. 257; PārśvC. 2. 1058; S'ivārkaMaDī. ii. 230. 8 (*on* iii. 2. 6)

अतिवाहयितुम् (ati-vāhayitum) *inf.* **i** to remove, to wash away, to console कामं न शक्नोति मे हृदयम् … कल्पमहापुरुषस्य विनिपातमश्रुबिन्दुभिरेव केवलैरतिवाहयितुम् HarṣaC. 248. 1; अतिवाहयितुमनङ्गमार्गणोदग्रवेदनादुःखानि UdaySuKa. 116. 7; **ii** to pass (time) तामदृष्ट्वा … प्रियाम् … । अतिवाहयितुं नाहं प्रभवामि दिनत्रयम् PadmP.(Ra.) 15. 125; राजा रजनिशेषमतिवाहयितुम् … हंस° … °तल्पमभजत् NalaCam. 6. 55(1); दुःसहमध्याह्नमतिवाहयितुमुत्पन्नमानसः (राजा विलासोद्यानं ददर्श) UdaySuKa. 46. 10; अतिवाहयितुं कष्टं दिनमासीन्महीपतेः RājTa.(Ka.) 8. 786; अतिवाहयितुं वर्षाश्चक्रे तत्रोटजान् जनः TriṣaS'aPuC. i. 1. 101.

अतिवाहिक (ativāh-ika) *adj.* (subtle body) fit for carrying the Soul तत्क्षणात्सोऽथ गृह्णाति शारीरं चातिवाहिकम् SkandP. i(2). 50. 62; ViṣṇuDhaP. ii. 116. 11; *m.* hellish creature स्युर्नारकास्तु परेतप्रेतयात्यातिवाहिकाः AbhidhāCin. 1358; AbhidhāRaMā. 3. 3; KalpaK. 367. 6.

अतिवाहिकदेह (ativāhika-deha) *m.* the (subtle) body carrying (the individual soul) beyond अतिवाहिकदेहात्तु प्रेतपिण्डैर्विना नरः । न हि मोक्षमवाप्नोति AgniP. 368. 11 = ViṣṇuDhaP. ii. 113. 15.

अतिवाहिकरूपिणी (ativāhika-rūpiṇī) *adj.* (*f.*) of the form of a guide, having a subtle form पूजयित्वा … देवताः पञ्च पूर्वोक्ता अतिवाहिकरूपिणीः S'ivaP. vi. 22. 5 (499B. 12)

अतिवाहिकारूढ (ativāhikārūḍha) *adj.* residing in the transmigrating (body) तेनातिवाहिकारूढं दृक्क्रियाशक्तितेजसा । वपुः पाशात्मकं व्याप्तं सूत्रस्थं भौवनं स्मरेत् MṛgendraT. ii. 7. 79.

अतिवाहित (ati-vāhita) *adj.* [*f.* -ā] **Ai** suffered, endured, put up with गुहाविसारीण्यतिवाहितानि मया कथंचिद्घनगर्जितानि RaghuVa. 13. 28; VakroJī. 51. 11; स दुष्कालोऽतिवाहितः RāmC. 1. 24; व्याघ्रसेन क्व युष्माभिर्मद्वियोगोऽतिवाहितः BṛKathāMañ. ix. 2. 1247; स शापस्तिष्ठता तेन वर्षे वैराटवेश्मनि । स्त्रीवेषेण महाश्चर्यरूपेणाप्यतिवाहितः KathāSaSāg. vi. 7. 91; AlaṅkāRa. 20 (6); Subhāṣi. 3278; 3373; **Aii** passed or spent (time) कथं त्वया शत्रुमध्यगतेन कालोऽतिवाहितः Tantrākhyā. 114. 4; किं वा मयापि न दिनान्यतिवाहितानि MālaMā. 6. 179; अत्यार्ति माधरजनावतिवाहितायां हेमे हिमाहतसरोजनिभं मुखं ते RāmC. 19. 22; प्रायेण पञ्चसप्ततिवर्षेष्वतिवाहितेषु अर्थतृष्णा तनूभवति TātpaṬ.(Vā.) 629. 25 (*on* iv. 1. 60); अतिवाहितश्च पुरः करकलितकार्मुकेण काल एतावान् TilaMañ. 90. 8; 168. 11; SamaMā. 4. 47; SkandP. iv. 60. 97; KathāSaSāg. xiv. 4. 14; एवं च कतिचिन्मासा नीवारेणातिवाहिताः DevīBhāP. vii. 13. 32; PraboCan. 1. 2 (2. 11); पृच्छति स च हे वत्सौ सुखं कालोऽतिवाहितः PariPar. 1. 246; तन्नाटकादिभिस्तेनाहोरात्रमतिवाहितम् Samarā-Saṁ. 1. 83; तया सह समास्तत्र मया बह्वयोऽतिवाहिताः YogVā. iii. 107. 6; ĀnandaRa. 3. 15 (4); **B** removed, drained, emptied, past दुःखमतीतमुपभोगेनातिवाहितं न हेयपक्षे वर्तते YogBh. 79. 4 (*on* 2. 16); पुञ्जीभूय मूले युगपदतिवाहिततरुणतपनातपाः … पादपच्छायाः TilaMañ. 350. 11; अथातिवाहितानागतानामपि द्रव्यपर्यायाणां तादात्विकवत् पृथक्त्वेन ज्ञाने वृत्तिमुद्योतयति Tattv-Pradī.(A.) 49. 8 (*on* 1. 37); कर्माणि व्यपगतानि ज्ञानेनैवातिवाहितानि Bhām. 638. 7 (*on* iii. 3. 32); ननु वर्तमानमुपभुज्यमानं न भोगेनातिवाहितम् TattvVai. 79. 20 (*on* 2. 16); असौ पुनरत्र निर्वर्तितावगाहविधिरतिवादि(? हि)तार्धं(? घ) निदाघसंज्वरः … पश्यति स YātrāPra. 9. 51 (1); **C** traversed, covered, crossed, conducted, driven very much अहर्देवतयातिवाहिता आपूर्यमाणपक्षदेवतां प्रतिपद्यन्ते BṛĀraUBh. 779. 12 (*on* vi. 2. 14); ChāndoUBh. 297. 9 (*on* v. 10. 3); यथाकथंचिच्छ्रोकोऽयम् … मयातिवाहितः RājTa.(Ka.) 2. 34; अवाहिता विनश्यन्ति विनश्यन्त्यतिवाहिताः AśvaCi. 7. 3; अये बंहीयानतिवाहितः पन्थाः KaṁVa. 3. 13(1)

अतिवाहितक्लम (ativāhita-klama) *adj.* who has got rid of his fatigue (i. e. rested) अतिवाहितक्लमश्च कंचित्कालमुत्थाय…पादपफलान्यभ्यवजहार (समरकेतुः) TilaMañ. 199. 9.

अतिवाहितदिवस (ativāhita-divasa) *adj.* [*f.* -ā] who has passed the day अतिवाहितदिवसः … यामिनीमपि … जाग्रदेव निन्ये Kād. 118. 16; अतिवाहितदिवसा … तस्मिँल्लतामण्डपशिलातले … सुष्वाप HarṣaC. 32. 6.

अतिवाहितवत् (ativāhita-va(n)t) *adj.* [*f.* -tī] who has passed (time etc.) सोऽपि … अपराह्णसमयमतिवाहितवान् NalaCam. 3. 21 (26); अथाहम् … शैशवमतिवाहितवती TilaMañ. 264. 4; (असौ) रात्रिमभ्युदञ्चितेन चन्द्रमसा दृषद्गोलकेनेव स्फोटयितुं हृदयमुद्यतां मन्यमाना कालमतिवाहितवती UdaySuKa. 105. 23; एकातपत्रं साम्राज्यं भुञ्जानः स महाभुजः । अतिवाहितवान् कालं पृथ्व्यामिन्द्र इव स्थितः TriṣaS'aPuC. iv. 1. 258; स्वं जन्मातिवाहितवती PrabaCin. 110. 29.

अतिवाहितशैशव (ativāhita-śaiśava) *adj.* who has passed his childhood कुमारः केलिलीलाभिः सोऽतिवाहितशैशवः PāṇḍaC. 5. 107; नृपतेस्तदासीदानन्दहेतुरतिवाहितशैशवोऽयम् AcyutaRā. 2. 53.

अतिवाहितश्रम (ativāhita-śrama) *adj.* who has got rid of fatigue (i. e. rested) (अहम्) अतिवाहितश्रमः स्वस्थचेतास्तथा शिलातलोपविष्टम् … आत्मानमवलोक्य TilaMañ. 243. 23.

अतिवाहितातप (ativāhitātapa) *adj.* who has endured the sun's heat उत्तरन्ति विनिकीर्य पल्वलं गाढपङ्कमतिवाहितातपाः । … वनवराहयूथपाः KumāSaṁ. 8. 35.

अतिवाहिताध्वखेद (ativāhitādhvakheda) *adj.* who has got rid of the fatigue of his journey (i. e. rested) (अहम्) अतिवाहिताध्वखेदो दिव्यदेवतायतनदर्शनप्रीतमनसम् … तारकमवोचम् TilaMañ. 156. 14.

अतिवाहिनी (ati-vāhinī) *f.* name of a particular state of rut (of an elephant) एतां षष्ठीं मदावस्थां जानीयादतिवाहिनीम् Hastyāyur. 693. 19 (4. 31)

अतिवाह्य (ativāh-ya) *ger.* **Ai** having endured or got through successfully, having experienced रतावसानिकं रागमतिवाह्य…पृथक्पृथगाचारभूमिगमनम् KāmSū. 179. 3 (2. 10); रागमतिवाह्य रतिमनुभूय JayaMa. 179. 16 (*on* 2. 10); किं वावसादपदवीमतिवाह्य कष्टां लब्धाविकारविभवेन विवर्जितासि SamaMā. 1. 23; **Aii** having passed (time) वणिक् सन्ध्यामतिवाह्य निशामुखे … अशनमकरोत् Tantrākhyā. 79. 3; HarṣaC. 330. 23; तत्रैव तां निशां दिवसमप्यतिवाह्य कन्दर्पकेतुश्चचाल VāsaDa. 164. 7; दिनान्तमतिवाह्याथ प्रभाते SkandP. iii(2). 36. 173; मुनिस्तु … क्लिष्टालापलीलयातिवाह्य कांश्चित्कालकलाः … मण्डलेश्वरमापृच्छ्य … अम्बरतलमुदपतत् NalaCam. 3. 17 (19); 7. 10 (24); निशामतिवाह्य प्रत्यूष एव पुनः प्रवृत्ता गन्तुम् BālRā. 6. 35 (3); (अहम्) अतिवाह्य च क्षणमेकम् … गृहीत्वा शनैस्तमवाचयम् TilaMañ. 396. 18; JayaMa. 290. 24 (*on* 5. 5); अतिवाह्य क्षपामेव विधियुक्तेन कर्मणा PadmP. v. 24. 172; UdaySuKa. 35. 22; 42. 22; KalāVi. 3. 44; अतिवाह्य निशामेकां प्रतस्थे मुनिपूजितः RāmāMañ. 11. 6; 469. 25; एवमन्योन्यमालोच्य तां रात्रिमतिवाह्य च KathāSaSāg. i. 6. 133; नृत्तगीतादिभिः श्याममतिवाह्योदिते रवौ ĪśānS'iPa. ii. 60. 36; YogVā. i. 28. 20; RājTa. (Ka.) 7. 915; ध्यानेन … आयुर्लीलयैवातिवाह्य सः TriṣaS'aPuC. i. 1. 279; वज्रोऽपि नगरीद्वारे शर्वरीमतिवाह्य च PariPar. 12. 222; PṛthvīVi. 4. 28; Aparā. 1238. 26 (*on* 3. 321); MalliC. 8. 73; CaturCin. i. 355. 6; PrabhāC. 109. 25; NāṭaLaRaK. 2536; PrabaCin. 29. 5; MadhuVi. 4. 48; S'ivārkaMaDī. i. 474. 15 (*on* i. 3. 33); **Bi** having sent off अथ बोधिसत्त्वस्तं शिष्यं सम्यगुपदेशमतिवाह्य चिन्तामापेदे JātaMā. 4. 2 (1. 20); **Bii** having carried out और्ध्वदेहिकीं पितुः क्रियामतिवाह्य AnarghaRā. 5. 2 (22); **C** having crossed or gone beyond अलकामतिवाह्यैव वसतिं वसुसंपदाम् KumāSaṁ. 6. 37; विजयशेखरं नाम करिणमारुह्यान्तःपुरानुगमग्राह्योऽतिवाह्यं(? ह्य) नगरमार्गमुपगतारामसीमसंसर्गः YaśasCam. ii. 317. 18; यदेतेनातिवाह्याहं प्राप्तवाञ्जङ्गलं क्रमात् YogVā. iii. 106. 16; यदि च सर्वलोकमतिवाह्य स्वयंकृतलक्षणैर्व्यवहारः NyāyVārPari. 668. 4 = Kiraṇā. 299. 9; पदवीमतिवाह्य भूयसीं विपिने क(? का)श्चिदपश्यतां सभाम् Nalābhyu. 7. 34; सरयूमतिवाह्य राघवौ ययतुः Rāgh. 3. 4.

अतिवाह्य (ati-vāhya) *adj.* [*f.* -ā] **A** to be passed (time) एवं क्षपातिवाह्या च MatsyaP. 69. 46; क्षपातिवाह्या वै गीतमङ्गलनिःस्वनैः PadmP. v. 23. 54; त्वया मया सह प्रीतिपूर्वं कालोऽतिवाह्यः Pañcā. 164. 4; **B** to be conducted or led through दुर्गेषु मार्गेषु अतिवाह्यान् अतिवाहयन्ति BrahmSūBh.(S'aṅ.) 826. 17 (*on* iv. 3. 4)

अतिवाह्य (ati-vāhya) *m.* name of one of the seven sages at the time of the fourteenth Manu चतुर्दशे तु पर्याये सत्यस्यैवान्तरे मनोः । … भार्गवोऽप्यतिवाह्यश्च … सप्तर्षयश्च ते S'ivaP. v. 34. 64 (446A. 2) [LaS'aṅkhaSm 53; *w. r.* for **अतिवाह**]

अतिवाह्यमान (ati-vāhyamāna) *adj.* **A** (time) which is being passed देवद्विजप्रसादादिहापि सर्वं शुभं भविष्यतीति प्रकृते योजयता राजलोकेनातिवाह्यमानदिवसम् … राजकुलमव्रजत् TilaMañ. 64. 17; तमालषण्डेषु प्रविश्य तिमिर-

रूपेण रजन्यातिवाह्यमानवासरम् (विलासोद्यानम्) UdaySuKa. 46. 24.

अतिवाह्यमानता (ativāhyamāna-tā) *f.* the state of being carried away अमराः ··· विमानैरतिवाह्यमानतया ··· अगृह्यमाणद्राघिमाणमध्वानम् ··· अतिक्रामन्तः NīlaVi. 36. 17.

अतिविःपीन (ati-viḥpīna) *adj.* more than twice big (जलौका) कृष्णवक्त्रा च या भवेत् । मस्तकश्चातिविः(? द्विः)पीनो विज्ञेया विषमाहिताः (? सविषाहिता) Hastyāyur. 699. 22 (4. 34)

अतिविकच (ati-vikaca) *adj.* very much blooming अस्ति···अतिविकचधवलकुसुमनिकरम् ··· उद्वहद्भिः पादपैरुपशोभिता ··· विन्ध्याटवी Kād. 19. 2; मृगीदृशां रुचिरकचाञ्चितैरपि सितोदयादतिविकचत्वमागतैः ।··· दधे मुखैरसदलकत्वमग्रतः Kapphiṇā. 9. 38; रक्ताशोके सशोकश्चिरमतिविकचे चम्पके कुञ्चिताक्षः पान्थः KāvyMī. 110. 16.

अतिविकट (ati-vikaṭa) *adj.* [*f.* -ā] **A** very difficult निदानदूषितात्मासौ कृत्वातिविकटं तपः PadmP.(Ra.) 106. 169; **B** very large or huge सूक्ष्मातिविकटा रूक्षा चर्मभा चर्मयूकिका HāriS. iii. 5. 4; कैकस्या बन्धुवर्गोऽयमतिविकटः MahāvīC. 6. 35; अतिविकटजटाजूटकोटरपर्यटद्गगनाटनतटिनीतरङ्गाकरकेलिकुतूहलितरा(? वा)लप्रालेयकरम् YaśasCam. ii. 300. 16; अथ समन्तादतिविकटकुक्कुटकुटुम्बारटितकटुरवोदञ्चनविनिद्रितासु ··· विलासवनविहङ्गमश्रेणिषु UdaySuKa. 114. 2; अष्टौ ते गत्वा मर्त्यलोकम् ··· गायनसृष्टिं ससर्जुरतिविकटाम् KalāVi. 7. 21; आवृणुध्वं वपुरतिविकटैः कङ्कटैः KaumuMi. 6. 19; संसारावटकोटरेऽतिविकटे मुग्धो जनः पात्यते MudriKu. 1. 21 = PrabaCin. 67. 9 = PurāPraSaṁ. 27. 20 = 127. 13; **C** very harsh अतिविकटाभिः ··· कर्णाटगौडलाटभाषाभिः SarvaDaSaṁ. 15. 560; [*m.* vicious elephant (अतिशयितो विकटः भीषणः) दुष्टहस्ती इति शब्दमाला S'abdaKaDru.]

अतिविकटपृष्ठ (ativikaṭa-pṛṣṭha) *adj.* having a very deformed back धिक् करभकम् ··· अतिविकटपृष्ठमपसदं पशूनाम् MaṇiKa. 64. 12.

अतिविकटमद (ativikaṭa-mada) *adj.* of great pride वामेऽन्यत्र प्रवीरेष्वतिविषम(v. l. विकट)मदो बोधितः कुम्भकर्णः MahāvīC. 6. 35.

अतिविकटांस (ativikaṭāṁsa) *adj.* having extremely broad shoulders अयमतिविकटांसो भासुरासिर्मभाजौ सफलयतु कृतान्ताकाङ्क्षितं बाहुदण्डः Kapphiṇā. 4. 36.

अतिविकटाकृति (ativikaṭākṛti) *adj.* having a very fierce or dreadful form निशाचरी सा । तूष्णीमप्यतिविकटाकृतिस्तदासीत् YogVā. iii. 79. 36.

अतिविकत्थन (ati-vikatthana) *n.* excessive boasting शौर्यस्यातिविकत्थनम् ··· दूषणम् Mugdhopa. 18; *adj.* extremely boastful धिगतिविकत्थनो राक्षसापशदः AdbhuDa. 7. 31 (1)

अतिविकत्था (ati-vikatthā) *f.* excessive boasting जगाद चेति किं मातरात्मनोऽतिविकत्थया PadmP.(Ra.) 7. 251.

अतिविकसित (ati-vikasita) *adj.* fully blossomed अतिविकसितकुसुममकरन्दपानमुदितमधुकरकुले NyāyMañ. i. 151. 4.

अतिविकार (ati-vikāra) *adj.* above change विश्वात्मंस्त्वमतिविकारभेदहीनः BrahmP. 192. 55.

अतिविकाल (ati-vikāla) *m.* too late a time [DBHS]

अतिविकासिन् (ati-vikāsin) *adj.* spreading widely तत(स्त)म् ··· चक्षुषोरतिविकासिनि प्रभाजले मज्जयन् पृथिवीपतिः प्रणिजगाद AvantiKa. 174. 13.

अतिविकृत (ati-vikṛta) *adj.* [*f.* -ā] **i** extremely distorted or deformed तेऽवस्थामतिविकृतामथाश्ववीरन् VarāṅgaC. 12. 87; उर्वीपतिः ··· अवयवानप्यस्थिसारानतिविकृतरूपदर्शनभयात्पलायितुकामानिव ··· दधानम् ··· वेतालमद्राक्षीत् TilaMañ. 48. 23; गच्छता ददृशे तेन मार्गे विक्रमकेसरी । मन्त्री पुंसातिविकृतेनोह्यमानो नभस्तले KathāSaSāg. xii. 8. 4; खड्गसहातिविकृता नैऋतिस्त्वमुपाभृता BhaviP. 695A. 31 (iv. 64. 32); 707B. 9 (iv. 72. 40); **ii** very much changed or spoilt तेऽपि चिरसंचिताः (दध्यादयः) अतिविकृतगन्धरसाः सन्तो न भक्षणीयाः VīraMi.(Āhnika.) 511. 19; दधि च ··· चिरसंचितमतिविकृतगन्धरसं चेदभक्ष्यम् BālamBha. 433. 22 (*on* 1. 169)

अतिविकृतदर्शन (ativikṛta-darśana) *adj.* of extremely ugly appearance जरच्छबरः ··· अतिविकृतदर्शनः ··· तरुतले मुहूर्तमिव व्यलम्बत Kād. 33. 2.

अतिविकृतास्य (ativikṛtāsya) *n.* extremely fierce or open mouth अव्यात् ··· अतिविकृतास्योल्लसत्तीक्ष्णदंष्ट्रः ··· नारसिंहश्चिरं वः S'ilpaRa. ii. 23. 9.

अतिविक्रम (ati-vikrama) *adj.* exceedingly heroic, valiant or powerful मतिमांश्च मनुष्येन्द्र ईश्वरश्चेति विश्रुतः (°श्चातिविक्रमः) MahāBhā. i. 61. 60; येनाहं त्वत्प्रसादेन भवेयमतिविक्रमः BhaviP. 177A. 26 (i. 120. 17); चक्रिणस्तदतिविक्रमक्रमं चक्रमुत्क्रममपाकरोतु वः AlaṅkāRa. 59. 8; *m.* great strength or valour काम्यता मनसस्तुष्टिर्धैर्यं तेजोऽतिविक्रमः । विधिवत्सेव्यमाने तु मद्ये संनिहिता गुणाः SuśruS. vi. 47. 8; AdhyāRā. i. 6. 12.

अतिविक्रमकर्मन् (ativikrama-karman) *n.* act of great valour दृष्ट्वा विक्रमकर्माणि (v. l. अतिविक्रमकर्माणि) कुर्वाणं च धनंजयम् MahāBhā. iii. 255. 56.

अतिविक्रय (ati-vikraya) *m.* sale (of property) to an outsider मूल्यं दातुमशक्तश्चेत् ··· संनिधिस्थस्तदान्यस्मै गृही शक्तोऽतिविक्रये (comm. संनिधिस्थभिन्नाय विक्रये) MahNirvāT. 12. 110.

अतिविक्रान्त (ati-vikrānta) *adj.* exceedingly valiant or powerful स मे भक्त्यातिविक्रान्तो दर्शनं मे करिष्यति S'ivaP. iv. 30. 30 (385. 7); पादातमतिविक्रान्तम् TrīṣaS'aPuC. ii. 6. 544; ParamāKā. 78. 35.

अतिविशदसुधापिण्ड (ativiśada-sudhāpiṇḍa) *m. n.* extremely white like a lump of lime अतिविशदसुधापिण्डपाण्डुरं (स प्रासादमद्राक्षीत्) UdaySuKa. 14. 5.

अतिविशदार्थम् (ati-viśadārtham) *adv.* very clearly तदहं वक्ष्येऽतिविशदार्थम् PraboSu. 194.

अतिविशारद (ati-viśārada) *adj.* very clever, highly skilful मन्त्रे मतिमतां श्रेष्ठौ युद्धशास्त्रविशारदौ (v. l. युद्धे त्वतिविशारदौ) MahāBhā. ii. 17. 25; आनीतो नृपतिर्विष्णोर्निदेशेऽतिविशारदैः (देवदूतैः) PadmP. iv. 97. 6; असक्तमभिनन्देत सक्तं परिभवेत्तथा । अन्यदूतानुपाते च यः स्यादतिविशारदः KāmSū. 340. 11 (6. 4) (*but* comm. अतिविशारदोऽत्यर्थमर्थदः)

अतिविशाल (ati-viśāla) *adj.* [*f.* -ā] extremely large, very extensive, extremely huge or spacious दृष्टिस्तेऽतिविशालचारुरुचिरा नैकत्र सन्तिष्ठते Ubhayābhi. 6. 15; अचलगुहामतिविशालाम् AvantiKa. 226. 2; 70. 4; अतिविशालमसृणमांसलाभोगं जघनभागमुद्वहन्तीम् ···बालिकामपश्यम् TilaMañ. 246. 15; 246. 22; 229. 3; (दितिसुतसेना) अविशदतिविशालोत्तालपातालमूलम् DaśāvaC. 3. 21; (भुवनानि)तानि चातिविशालानि तेजिष्ठानि महान्ति च ĪśānŚiPa. ii. 17. 150; विक्रमार्को राजा ··· अतिविशालं तटाकं च दृष्ट्वा ··· मनसि विचारयति SiṁhāDvā. 85. 3 (21); (तिरुवेङ्कटनृपालः) अतिविशालैः सालैः···अनेकैरनोकहनिवहैः निरन्तरीकृतान्तरम् ··· नारायणशिलोच्चयं व्यलोकयत् ĀnandRa. 2. 43 (21); 8. 0 (3)

अतिविशालत्व (ativiśāla-tva) *n.* extreme vastness आधारस्यातिविशालत्वं प्रदर्श्य ··· आधेयानां गुणानामाधिक्यं वर्णितम् Kuval. 95 (1)

अतिविशालनयन (ativiśāla-nayana) *n.* extremely large eye वेत्रपुटभेदनाधीशतिरुवेङ्कटनृपतिनन्दनः ··· सप्रणयमर्यादमतिविशालनयनाञ्चलसमुद्यदभङ्गुरकृपारसवीचीमालाभिराप्लावितः ĀnandRa. 8. 0 (62)

अतिविशालवक्षःस्थल (ativiśāla-vakṣaḥsthala) *n.* very broad chest अतिविशालवक्षःस्थलोपलवेदिकोत्तम्भनशिलास्तम्भाभ्याम् ··· ऊरुदण्डाभ्याम् ··· उपहसन्तमिवैरावतकरायामम् ··· युवानमद्राक्षीत् HarṣaC. 36. 4.

अतिविशालशालवलय (ativiśāla-śālavalaya) *adj.* having an extremely large encircling wall गृहमेवेदमस्ति ··· अतिविशालशालवलयम् DaśKuC. 88. 10.

अतिविशिष्ट (ati-viśiṣṭa) *adj.* very much distinguished, very extraordinary अतिथिमतिविशिष्टमादरादमरवधूरभि तं जगाम सा RāmC. 12. 97.

अतिविशिष्टधी (ativiśiṣṭa-dhī) *adj.* having very extraordinary intellect उदायनः ··· अभूत्तत्र भूपतिः ।··· अतिविशिष्टधीः PrabhāC. 9. 7.

अतिविशिष्टरूपा (ativiśiṣṭa-rūpā) *adj.* (*f.*) having very extraordinary or superior form तस्याजनिष्टातिविशिष्टरूपा राज्ञी च नाम्ना सुरसुन्दरीति

KālikāKa. 3.

अतिविशुद्ध (ati-viśuddha) *adj.* [*f.* -ā] **A** extremely clean, extremely pure तथैवातिविशुद्धेषु स्रोतःस्वाप्यायते शिरः BhelaS. 245.22 (8.2); ये पश्यन्ति ·· मद्भाविनो मत्समयाद् दृष्टया चातिविशुद्धया । तेषां वाच्यमिदं शास्त्रम् JayāS. 33.85; (चिच्छक्त्याम्) अतिविशुद्धायामशुभशतनिदानभूतभ्रमपरिणामासंभवात् ĀtmaSi. 40.3; अतिविशुद्धधर्ममार्गविनिविष्टदृष्टिम् ··· मामपि···अधिक्षिपसि TilaMañ. 382.6; त्वया सम्यक् प्रज्ञयातिविशुद्धया । प्रश्नोऽयमीरितः SamarāSū. 4.2; **B** extremely white चामरद्वयमदृश्यत तस्याः ।···तद्यशोयुगमिवातिविशुद्धम् S'ivLī. 8.4; **C** very distinct, very clearly articulated स्वामिन् शीतश्रमक्षुत्तृड्बाधान् नातिविशुद्धा वर्णसन्ततिर्मुखान्निःसरति GopāKeCan. 56.27.

अतिविशुद्धत्व (ativiśuddha-tva) *n.* the state of being very pure, extreme purity न च यथा श्रेण्यारोहे अनिवृत्तिबादराद्धायाः संख्येयेषु भागेषु गतेषु परतोऽतिविशुद्धत्वात् मतिज्ञानावरणादीनामेकस्थानकरसंबन्धः JñānBiPra. 4.3.

अतिविशुद्धधी (ativiśuddha-dhī) *adj.* having very pure intellect श्रीकण्ठोऽतिविशुद्धधीः । हसन् प्रोवाच SkandP. iv. 62.26.

अतिविशुद्धभाव (ativiśuddha-bhāva) *adj.* having an extremely pure mental condition (साधुगणः) अतिविशुद्धभावः सर्वज्ञबिम्बं प्रणनाम भक्त्या VarāṅgaC. 23.70.

अतिविशुद्धसत्त्व (ativiśuddha-sattva) *adj.* having a very pure mind ध्यायन्ति···मुनयोऽतिविशुद्धसत्त्वाः DevīBhāP. v. 19.27.

अतिविशुद्धस्वभावता (ativiśuddhasvabhāva-tā) *f.* the state of having an extremely pure nature अतिविशुद्धस्वभावतया ··· मनाङ्मुक्तपूर्वावस्थान्तरम् ··· परमात्मानमुपेयुषः ··· सिद्धपरमेष्ठिनः इष्टिम् ···करोमि YaśasCam. ii. 374.26.

अतिविशुष्क (ati-viśuṣka) *adj.* **A** very much dried up दुर्बलातिविशुष्काणाम् ··· न स्वेदमवतारयेत् CaraS. i. 14.19; **B** very much dry ताम्यत्यतिविशुष्कं यत् ··· तदक्षि तर्पणादेव लभेतोर्जाम् SuśruS. vi. 18.17 (comm. अश्रुरहितम्)

अतिविशेष (ati-viśeṣa) *m.* great speciality **अतिविशेषेण** (ativiśeṣeṇa) [Inst.] especially यश्च कर्ममयो योगो यश्च ज्ञानमयः पृथक् । कस्य कोऽतिविशेषेण पुरुषस्य प्रशस्यते ParaS. 10.60.

अतिविशेषतस् (ativiśeṣa-tas) *adv.* without any distinction (with one's own) वस्तु तदीयं पश्येदात्मीयादतिविशेषतो नित्यम् KandaCū. vi. 2.26.

अतिविशेषभूत (ativiśeṣa-bhūta) *adj.* which has become highly special or particular तेषामपि मते सामान्यविशेषरूपः पदार्थः संकेतविषय इत्यतिविशेषभूतो वाक्यार्थान्तर्गतोऽसंकेतितत्वादवाच्य एव KāvyPra. 223.3; Kāvyānu. (He.) 32.25.

अतिविशेषवपुस् (ativiśeṣa-vapus) *adj.* having a very specific or particular form अन्विताभिधानेऽतिविशेषवपुष इव सामान्यरूपाणां पदार्थानामन्वये RasGaṅ. 552.7.

अतिविशेषशब्द (ativiśeṣa-śabda) *m.* very particular or specific word विष्कम्भकाद् भेदमस्य दर्शयन् प्रवेशकशब्दोऽतिविशेषशब्दवाच्यपि भवतीति दर्शयति AbhinBhā. ii. 424.9 (*on* 18.34)

अतिविशोक (ati-viśoka) *m.* complete freedom from grief (न कंचिदुपलक्षये) यस्मिन्निममान्तरं तापं निवेद्य संविभक्तमिव नातिविशोकमनुभविष्यामि S'ṛṅgāTi.(Rā.) 179 (2)

अतिविशोषण (ati-viśoṣaṇa) *n.* process or act of excessive desiccation एतानि कृत्वा विकृतिं याति चातिविशोषणात् KāśyaS. 137B.18.

अतिविशोषित (ati-viśoṣita) *adj.* thoroughly dried up आम्रमामं त्वचाहीनमातपेऽतिविशोषितम् BhāvPra.(Bhā.) 6(7).4.

अतिविश्रब्ध (ati-viśrabdha) *adj.* [*f.* -ā] **i** entirely trusting or confiding in चित्रास्तरणशायिनमतिविश्रब्धप्रसुप्तमङ्गनाजनमलक्षयम् DaśKuC. 92.13; एतदसकृन्न्यायेन संगतायामतिविस्र(?श्र)ब्धायामुक्तम् JayaMa. 159.13 (*on* 2.8); **ii** very confidential तन्निभृतमावामतिविश्रब्धमुग्धवाक्यान्याकर्णयावः Manmatho. 2.21 (2) (435.2)

अतिविश्रब्धनवोढा (ativiśrabdha-navoḍhā) *f.* newly married woman who is very much confident (of her husband) (one variety of *madhyā*) एषैवातिप्रश्रयादतिविश्रब्धनवोढा । अस्याश्चेष्टा । सागसि प्रेयसि धैर्ये वक्रोक्तिरधैर्ये परुषवाक् RasMañ. 8 (1); (a variety of *mugdhā* = विश्रब्धनवोढा of RasMañ. 8) अतिप्रश्रयादतिविश्रब्धनवोढा PadyaVe. 304 (2)

अतिविश्रब्धम् (ati-viśrabdham) *adv.* quite confidently [MW]

अतिविश्रम्भ् (ati-viśrambh-) I. P. (*caus.*) to have excessive confidence or reliance (स्त्रियम्) नातिविश्रम्भयेत् CaraS. i. 8.22 (comm. नातिप्रश्रयवतीं कुर्यात्)

अतिविश्रम्भ (ati-viśrambha) *m.* great confidence or trust पतगश्चिरकाललालनादतिविश्रम्भमवापितो नु सः । ··· विदधे कुतूहलम् NaiṣC. 2.7.

अतिविश्रान्ति (ati-viśrānti) *f.* complete peace (complete desireless state) न किंचिदायाति तदर्थजातं येनातिविश्रान्तिमुपैति चेतः YogVā. i. 27.1.

अतिविश्रुत (ati-viśruta) *adj.* [*f.* -ā] widely known, very well-known मदिराक्षोऽतिविश्रुतः MahāBhā. iv. 32.30 (v. l.); हयग्रीवोऽतिविश्रुतः DevīBhāP. i. 5.86; कान्ता राधिका यातिविश्रुता ĀdiP. 14.19; S'ivLī. 18.41; (सोमकान्तः) स्नात्वा भृगुतीर्थेऽतिविश्रुते GaṇeP. i. 9.22; अस्ति गोदावरी नाम महाराष्ट्रेऽतिविश्रुता Rasā. 12.260.

अतिविश्लिष्टावयव (ativiśliṣṭāvayava) *adj.* possessing very loose grains (चरुः) अतिशिथिलः अतिविश्लिष्टावयवः VīraMi. (Paribhāṣā.) 109.7.

अतिविश्व (ati-viśva) *adj.* [*f.* - ā] surpassing all or the world तस्मै विश्वाय देहि । अतिविश्वाय CāndraVṛ. *on* ii. 1.10; KātanVṛ. *on* ii. 1.25; त्यागेऽतिविश्वस्य विधेर्विधित्सोर्यस्याङ्गुलीः पाणितलं नखांश्च HammīMaKā. 2.54; होलिकामाता । सर्वसारातिविश्वेयं पूर्वमासीत् BhaviP. 799A.8 (iv. 132.32); सृष्टातिविश्वा विधिनैव तावत् तस्यापि नीतोपरि यौवनेन NaiṣC. 7.108; *m.* name of a Muni [PW, MW]

अतिविश्वनयनानन्द (ati-viśvanayanānanda) *adj.* giving joy excessively to the eyes of all राजा ··· सौम्यः सौम्यकरोऽतिविश्वनयनानन्दः Mugdhopa. 60.

अतिविश्वस् (ati-viśvas-) II. (I.)P. to confide or trust too much, to trust excessively विश्वस्ते नातिविश्वसेत् MahāBhā. i. App. I. 81.(125) = v. 38.9; मरुताम् ··· मनो नातिविशश्वास RaghuVa. 12.101; विश्वासयेदविश्वस्तं विश्वस्तं नातिविश्वसेत् NītiSā. 5.89; SūktiRa. 108.15.

अतिविश्वसनीय (ati-viśvasanīya) *adj.* very trustworthy स राजा ··· राज्यम् ··· हृदयस्येवातिविश्वसनीयस्य···अमात्यवर्गस्यायत्तमकरोत् TilaMañ. 16.20.

अतिविश्वस्त (ati-viśvasta) *adj.* [*f.* -ā] highly trustworthy or trusted अभि(v. l. ति)विश्वस्तमथ मां हरिवाहनः । ··· इदं वचनमब्रवीत् MahāBhā. iii. 165.1; (शची) तथेत्युक्त्वातिविश्वस्ता भाविकार्ये कृतोद्यमा DevīBhāP. vi. 9.23; ऋषयः ··· दृष्ट्वा तमतिविश्वस्तं विद्वांसं लोमहर्षणम् VāyuP. i. 1.19; LiṅgaP. i. 1.10.

अतिविश्वस्तचेतस् (ativiśvasta-cetas) *adj.* whose mind is full of confidence (मोहः) येन फेनसधर्माणोऽप्यतिविश्वस्तचेतसः ViṣṇuP. iv. 24.128.

अतिविश्वस्तम् (ati-viśvastam) *adv.* in a very confident manner दृष्ट्वा नु सोमशर्माणम् ··· । शयानमतिविश्वस्तं सहदेवो व्यचिन्तयत् SkandP. v(3). 209.66.

अतिविश्वामित्र (ati-viśvāmitra) *adj.* surpassing Viśvāmitra वैश्वानरो नु प्रभयातिविश्वामित्रः ··· दन्तावलान्प्रेरयति स्म DvyāśraKā. 6.63.

अतिविश्वास (ati-viśvāsa) *m.* excessive confidence or trust अनुबन्धाः ··· अतिविश्वासात् ··· स्युः KāmSū. 352.14 (6.6); AvantiKa. 142.16; त्वयि मे त्वतिविश्वासः कार्यगौरवसाधने ĀdiP. 17.24; सर्वत्र चातिविश्वासदर्शनेन परसंख्यमानेय एष ते भ्राता TilaMañ. 102.23.

अतिविश्वासवत् (ativiśvāsa-va(n)t) *adj.* who has extraordinary confidence गुरौ अतिविश्वासवताम् ··· गुरूपदिष्टप्रकारेण उपासनारम्भः PūrvottaVāNaMā. 275.10.

अतिविश्वासाभाव (ativiśvāsâbhāva) *m.* absence of extreme trust or faith तन्नातिविश्वसेदित्याद्विवाक्यात्तस्यातिविश्वासाभावपरत्वात् RājNiRa. 54.16.

अतिविष् (ati-viṣ) *adj.* characterized by too much of faeces कर्बुरः प्रस्रवन् धातून् निष्पुरीषोऽथवातिविट् (अतिसारः) AṣṭāHṛ. ii. 5.82.

अतिविष (ati-viṣa) *adj.* **i** very poisonous हन्यात्क्रुद्धानतिविषान् MahāBhā. xii. 120.15; (वासुकिः) मुमोचातिविषो विषम् MatsyaP. 133.42; आशीविषस्त्वतिविषोऽयमरिष्टदंष्ट्रः JātaMā. 229.17 (32.31); **ii** [Alt. Gr. ii. 1.311] counteracting poison [PW]; *n.* **i** strong poison योक्त्रसर्पशिरांसि च । वमन्तोऽतिविषं तत्र ददंशुः Rāmā. i. App. 1.8(2); **ii** the plant *Aconitum heterophyllum* बिभीतकं चातिविषं भद्रमुस्तां सपिप्पलीम् BhelaS. 212.9 (6.28); चित्रकेन्द्रयवाः पाठाकटुकातिविषाभयाः SiddhYo. 22.12; कृष्णातिविषतिक्तेन्द्रदारुपाठापयोमुचाम् । क्वाथः ··· सर्वकण्ठगदापहः AgniP. 282.33; शृङ्गवेर ··· अतिविषाणि संक्षुद्य सक्षौद्रान् कवलान् भोजयेत् Hastyāyur. 79.8 (1.11); °मूर्वापटोलातिविषैः समैः ··· पचेत् AśvaVai. 21.2; तद्भस्मातिविषं विषं कृमिहरम् RasRaSa. 20.91; भल्लातकं चातिविषं चतुर्भागं च खाखसम् DhanvNi. 317.4; तेन अतिविषम् उक्त्वा अल्पं देयम् इत्युक्तम् Bharat. 13A.2; cf. **अतिविषा.**

अतिविषण्णधी (ativiṣaṇṇa-dhī) *adj.* having a very dejected mind

मृते भर्तरि सा नारी दुःखितातिविषण्णधीः S'ivaP. iv. 9. 7 (358B. 7)

अतिविषण्णा (ati-viṣaṇṇā) *adj.* (*f.*) extremely dejected शयनेऽतिविषण्णा सा (राधा) रत्नभूषणवर्जिता BrahmVaiP. iv. 88. 24.

अतिविषम (ati-viṣama) *adj.* [*f.* -ā] **1 A** very uneven, very rugged, very rough अतिविषमोऽयं निम्नगावतारः तदप्रमत्तमवतीर्यताम् KundaMā. 3. 6(1); अतिविषमं स्थानं दूरमारूढस्य प्रत्यासन्नतरः पातः PramāVāBh. 593. 12; पदातीनां भूर्नातिविषमा मता NītiSā. 20. 10; आर्यपुत्रस्य रक्षार्थे मयातिविषमेऽध्वनि। विद्या मायावती नाम प्रेषिता BṛKathāMañ. 14. 422; 'तस्य चेन्नक्षुषी ··· अतिविषमे' इति एकं संवृत्तमपरं विस्तृतम् AdbhuSāg. 536. 21; ततस्ते ··· मार्गमतिविषमं दृष्ट्वा राजानं प्रोचुः SiṁhāDvā. 154. 8(8); सख्यूर्ध्वपङ्क्तिगा दन्ता ममातिविषमा यतः। ओष्ठं लगन्ति किं कुर्वे दुर्दशो मेऽधरो व्रणैः AlaṅkāMañ. 207. 5; **1 B** irregular, dissimilar, different, rude, sluggish मन्दाति(ती)क्ष्णा(क्ष्णाऽ)तिविषमा त्रिविधं सा (ग्रहणी) प्रकुप्यति BhelaS. 162. 19 (6. 13); उद्धिद्यतेऽतिविषमा समवर्तिराजधानीभटस्य भृकुटिः प्रतिकारहेतोः HarVi. 37 47 (comm. भृकुटिशब्दः साधुत्वमतिवर्तते इत्याहुः); सेयमेकतः काश्वा कुटिलेऽतिविषमेयमृजूक्तिर्नाम वाक्योवाक्यम् SaraKaṇṭhā. 296. 19; **2** unsuitable, unfair, wrong, terrible एवं हस्तिन्या तावन्त्येव विषमाण्यतिविषमाणि चेति संक्षेपेण शशस्य त्रिचत्वारिंशशतद्वयम् JayaMa. 89. 11 (*on* 2. 1); उपेक्षा किं चेयं तव सुरसमूहेऽतिविषमा DevīBhāP. i. 5. 63; **3 A** hard, difficult (to manage, to perform), troublesome राज्यं हि नाम ·· अतिविषमम् Kād. 297. 12; तन्द्भुजौ मनसिकृत्य मयासावादृतोऽतिविषमो रणभारः RāmC. (App. 2) 40. 32; हीनं संहननं तपोऽतिविषमं कालश्च दुःखावहः सिद्धान्तः कुवितर्ककैश्च विवृतः KumāCaSaṁ. 70. 1; गोपानामयमतिविषमो धर्मो गोपालनरूपः GopāKeCan. 64. 19; खिन्ने शाकटिके भरेऽतिविषमे दूरं गते रोधसि शब्दैनैतदहं ब्रवीमि S'ārṅgaPa. 963; **3 B** (of evil effects) adverse, dangerous, very strong न चातिविषमे वाते ··· चरेत् ViṣṇuDhaP. ii. 89. 8; अहो बतातिविषमं विषं पातुं समीहसे RāmāMañ. 143. 25; येयं वह्नयमुं वटवृक्षमारोहति। सास्माकमतिविषमा। अनेनाश्रयेण कश्चिदिहारुह्य कदाचिद् अस्मान् हन्यादिति Pañcā. 92. 19; संसारावटकोटरेऽतिविषमे मुग्धो जनः पात्यते PrabhāC. 174. 17; **3 C** evil (by nature), wicked विषधरतोऽप्यतिविषमः खल इति न मृषा वदन्ति विद्वांसः VāsaDa. 5. 1 = S'ūktiRa. 603 = S'ārṅgaPa. 349 = Subhāṣi. 227; केयं भ्रूभुजगी तवातिविषमा बंभ्रम्यते यद्भिया क्रान्तः कालियमर्दनोऽपि कुरुते नाद्य प्रवेशं व्रजे UjjvaNiMa. 48. 3; स्त्रीणां चातिविषमचेष्टितत्वात्। तथाहि शस्त्रेण वेणीविनिगूहितेन विदूरथं वै महिषी जघान ManvaMu. 274. 4 (*on* 7. 153); *n.* a difficult or dangerous thing or situation इक्ष्वाकूणां कुलधनमिदं यत्समाराधनीयः कृत्स्नो लोकस्तदतिविषमे किं स वत्सः करोतु UttaRāC. 7. 6; तदतिविषममाशङ्कमानं मां वत्सरामभद्रस्नेहस्त्वरयति AnargbaRā. 5. 6 (6)

अतिविषमतपस् (ativiṣama-tapas) *n.* very difficult or severe penance अतिविषमतपोभिः शंकरं तोषयित्वा SkandP. v(2). 34. 16.

अतिविषमतर (ativiṣama-tara) *adj.* very difficult कुर्वन्कार्याणि ··· अतिविषमतराणि ··· दिङ्नीन्द्रः ParamāKā. 17. 123.

अतिविषमदुर्ग (ativiṣama-durga) *n.* extremely difficult or dangerous fort अतिविषमदुर्गबलगर्वितस्य पर्वतकनाम्नः किरातराजस्य राजधान्याम् ··· अपातयत् TilaMañ. 137. 2.

अतिविषमपत्रभङ्ग (ativiṣama-patrabhaṅga) *m.* **i** decoding a very difficult epistle दृष्टवान् ··· अतिविषमपत्रभङ्गविस्मापितप्रेक्षकजनम् ··· एकं दिव्यायतनम् TilaMañ. 155. 7; **ii** extremely complicated ornamental design, TilaMañ. 155. 7.

अतिविषममद (ativiṣama-mada) *adj.* having over-bearing pride प्रवीरेष्वतिविषममदो बोधितः कुम्भकर्णः MahāvīC. 6. 35 (175. 14)

अतिविषमरिपु (ativiṣama-ripu) *m.* very dangerous enemy (तान्) अतिविषमरिपून्निर्जय SubhāRaSaṁ. 420.

अतिविषमविषय (ativiṣama-viṣaya) *m.* extremely dangerous worldly objects (of sensual pleasures) मनुः ··· अतिविषमविषयविषजलाशयाशाया उपरराम BhāgP. v. 1. 22.

अतिविषमशीला (ativiṣama-śīlā) *adj.* (*f.*) of very cruel nature अतनुशरलीलया स्रगपि हृदि हन्ति मामतिविषमशीलया GītGo. vii. 13. 6.

अतिविषमाग्नि (ativiṣamāgni) *adj.* whose gastric fire is very irregular अर्शोऽतिविषमाग्निश्च कुष्ठश्वयथुपीडितः BhelaS. 243. 19 (8. 1)

अतिविषमाशन (ativiṣamāśana) *n.* extremely irregular or unsuitable food दुष्टाशनातिविषमाशनपानभक्ष्यम् HārīS. iii. 3. 4.

अतिविषयिन् (ati-viṣayin) *adj.* excessively indulging in sensual pleasures ततो मन्त्रिणा चिन्तितम्। यत् सूरयोऽतिविषयिणः PurāPraSaṁ. 76. 19.

अतिविषवीर्य (ati-viṣavīrya) *n.* excessive power of poison अतिविषवीर्यविलोलजिह्वमुच्चाटयिष्यदुरगं विहरन् हृदिन्याम् BhāgP. ii. 7. 28.

अतिविषा (ativiṣā) *f.* the plant *Aconitum hetrophyllum* दद्यात् सातिविषां पेयाम् CaraS. i. 2. 20 (1922 Ed.); अतिविषाम् ··· शिरसा धारयेत् SuśruS. i. 19. 29; शुण्ठी ति(?ह्य)तिविषा मुस्ता क्राथः स्यादामपाचनः BhelaS. 18. 26 (1. 10); अतिविषा बालं नागरं घनपर्पटम् HārīS. iii. 2. 168; कुटजातिविषे घनम्। ···विपचेद्भिषक् KāśyaS. 329B. 35; मुस्तं वचो हरिद्राद्रकमतिविषा इति GilMS. iii(1). 3. 7; (उपागतः देशम्) अतिविषामांसीग्रन्थिकैस्तु सुरागदैः (युक्तम्) MatsyaP. 118. 38; तत्रातिविषा° ··· °कल्कक्षीरसिद्धं सर्पिः AṣṭāSaṁ. i. 48. 1 (1. 8); विशालातिविषा वचा AṣṭāHṛ. i. 10. 30; (सः) नागरातिविषामुस्ताक्राथपानावतर्पितः BṛKathāS'loSaṁ. 22. 118; अतिविषा° ··· °सितसर्षपैः। ··· विलोड्य मथितम् KalyāKā. 8. 52; अतिविषा ··· ज्वरं जीर्णं व्यपोहति SiddhYo. 1. 249; अतिविषा काशच्छर्दिज्वरहरी शिशोः AgniP. 283. 2; अतिविषया पिप्पल्या ··· लवणेन च। ··· प्रतिपानम् AśvaVai. 31. 5; अथवा त्रिकटुक° ··· °अतिविषापिप्पल्या° ··· °सौवर्चलानि क्षोदयित्वा Hastyāyur. 79. 23 (1. 11); वचासातिविषा° ··· °रेणुकैः कषायमुपभुञ्जीत S'ārṅgaS. ii. 2. 35; पथ्या ··· हिङ्गुश्चातिविषा वचा ĪśānS'iPa. i. 45. 174; वचा चातिविषा हिङ्गु चूर्णमेतैः प्रकल्पितम् (देयम्) Mānaso. ii. 6. 591; विषशम्याकातिविषासैन्धवैश्च समांशकैः। ··· चूर्णम् RasPraSu. 4. 49; धात्री चातिविषा मुस्ता RaseCin. 9. 45 (128. 21); विषा त्वतिविषा विश्वा शृङ्गी प्रतिविषारुणा BhāvPra.(Bhā.) 6(2). 214; AmaK. 847; ParyāRaMā. 223; TrikāS'e. iii. 3. 119; ViśvaPra. 34. 28; DharK. 752; DhanvaNi. 8. 24; AbhidhāMañ. 103. 3.

अतिविषाकन्द (ativiṣā-kanda) *m.* bulb of the plant *Aconitum heterophyllum* अतिविषाकन्दाः। ··· शिरोविरेचनोपयोगीनि AṣṭāSaṁ. i. 84. 25 (1. 14)

अतिविषाद (ati-viṣāda) *m.* excessive dejection पृथिव्यां लभ्यते धीर्नात्रातिविषादः कर्तव्यः MṛtaSaṁ. 9. 7 (*on* 1. 15)

अतिविषादता (ativiṣāda-tā) *f.* the state of excessive depression or lassitude ग्लानिश्चातिविषादता ParyāRaMā. 1420.

अतिविषादवत् (ativiṣāda-va(n)t) *adj.* greatly dejected लतावलयगेहेषु भवत्यतिविषादवान् YogVā. i. 10. 14.

अतिविषादिन् (ati-viṣādin) *m.* name of a physician [PW]

अतिविषापहा (ativiṣāpahā) *adj.* (*f.*) destroyer of a very strong poison पिप्पल्यतिविषापहा ViṣṇuDhaP. ii. 52. 67.

अतिविषाभाव (ativiṣābhāva) *m.* absence of the plant *Aconitum heterophyllum* मुस्ता चातिविषाभावे शिवाभावे शिवा मता BhāvPra.(Bhā.) 6(1). 155.

अतिविषायुक्त (ativiṣā-yukta) *adj.* mixed with *Aconitum heterophyllum* कुटजत्वक्कृतः क्वाथो घनीभूतः सुशोभनः। लेहितोऽतिविषायुक्तः SiddhYo. 3. 36.

अतिविषूचिका (ati-viṣūcikā) *f.* excessive diarrhoea कण्ठस्य शोषस्तिमिरं तथा पार्श्वशूलं नाभौ तथातिकृशतातिविषूचिका च (गुल्मलक्षणम्) HārīS. iii. 3. 86.

अतिविषोल्बण (ativiṣolbaṇa) *adj.* powerful with strong poison तक्षकादयः। अदशन्त समस्तेषु गात्रेष्वतिविषोल्बणाः ViṣṇuP. i. 17. 38.

अतिविषौषधि (ativiṣauṣadhi) *f.* name of the medicinal plant *Alis betula* अरुणातिविषौषधौ NānārthSaṁ. 2. 14.

अतिविष्ठित (ati-viṣṭhita) *adj.* very stationary गृह्णन्ति सुबहून्मृगान्। प्रधावितान्वा वित्रस्तान्विस्रब्धानतिविष्ठितान् Rāmā. iv. 18. 34.

अतिविष्णु (ati-viṣṇu) *adj.* surpassing or superior to Viṣṇu सः ··· अतिविष्णुः ··· भूत्वा स्वे महिम्नि सदा समास्ते (?) NṛsiṁhoTāU. 7 (233. 23)

अतिविसंष्ठुल (ati-visaṁṣṭhula) *adj.* very disagreeable, very unsteady अतिविसंष्ठुलेनोपास्यमानोऽपि मनसिजेनाकारमेव लोकलोचनेभ्योऽरक्षन्न कुसुमशरसायकेभ्यो जीवितम् Kād. 248. 19.

अतिविसङ्कट (ati-visaṅkaṭa) *adj.* extremely large उष्णांशुः ··· शोणितक्वाथकषायितकुक्षिरतिविसंकटः कटाह इव ··· अदृश्यत HarṣaC. 341. 9.

अतिविसदृश (ati-visadṛśa) *adj.* extremely unsuitable or unworthy कमनीयदर्शनायास्तवाकृतेरतिविसदृशोऽयं व्यवहारः TilaMañ. 319. 19.

अतिविसर्गतस् (ativisarga-tas) *adv.* due to excessive discharge (विद्यात्) वृद्धिं मलानां सङ्गाच्च क्षयं चातिविसर्गतः AṣṭāHṛ. i. 11. 25.

अतिविसारिणी (ati-visāriṇī) *adj.* (*f.*) very extensive, very wide, far-reaching प्रज्ञयातिविसारिण्या यो धनेन बलेन च। धुरं वहति गोत्रस्य PañcT. 1. 155 (153. 9); Pañcā. 109. 2.

अतिविस्तर (ati-vistara) *adj.* [*f.* -ā] [P. iii. 3. 33] **A** very

extensive, very elaborate, very prolix, very detailed सर्वेषामपराधानां विस्तरादतिविस्तर: (दण्डविधि:) VisṇuSm. 5. 193; (दीक्षा) संक्षिप्ता मध्यमा सा च तृतीया चातिविस्तरा JayāS. 16. 55; पटे बिम्बविधानम्…शृणु नारद । … नातिविस्तरम् JayāS. 20. 3; सर्वात्मको विष्णुरवकाशोऽतिविस्तर: VisṇuP. i. 8. 24; शाखामृगध्वजानां च प्रज्ञप्तिमतिविस्तराम् (शृणुत सज्जना:) PadmP.(Ra.) 1. 55; यदर्थं सर्वशास्त्राणां प्रवृत्तिरतिविस्तरा BṛĀraUBhVā. i. 4. 405; महाकाव्यम् … मन्त्रदूतप्रयाणाजिनियतं नातिविस्तरम् AgniP. 337. 26; स्कान्दं (पुराणम्) चैवातिविस्तरम् SaurP. 9. 10; अयं त्वतिविस्तरो गतार्थ इति … सौगता: … मन्यन्ते S'āstrDī. 64. 7 (*on* i. 1. 5); स्नानानुलेपने चैभिर्वर्जितो नातिविस्तर: (अङ्क:) SāhiDa. 276. 1; °माघमाहात्म्यं चातिविस्तरमत्रानुसंधेयम् TristhaSe. 39. 26; **B** very extensive, greatly spread out त्वदणु प्रियमाश्रयामहे न परस्मादतिविस्तराण्यपि JānaHa. 4. 26; **C** abundant, large संभारं कल्पयामास यज्ञार्थं चातिविस्तरम् DevīBhāP. iii. 13. 32.

अतिविस्तर (ati-vistara) *m.* **A** great prolixity or elaboration व्यामोहजालमतिदुस्तरमेव नूनं निश्चितनस्य वचसामतिविस्तरेऽपि TattvPradī.(Ā.) 295. 4 (*on* 3. 19); (संहिता) अतिविस्तरमुत्सृज्य गुह्येन प्रतिसंस्कृता AhirbuS. 1. 72; BṛKathāS'loSaṁ. 18. 587; **अतिविस्तरेण** with अलम् [Instr.] अलमतिविस्तरेण S'āk. i. 1(1) = Nāga. 1. 2. (2) = LaṭaMe. i. 3(2); BṛSaṁ. 1. 8; BrahmSi. 6. 6; HetuBiṬ. 40. 25; SarvaMaSaṁ. 11. 15; अलमतिप्रसरेण (v. l. °विस्तरेण) KhaṇḍanKhā. 498. 2; इति कृतमतिविस्तरेण NyāyMañ. ii. 151. 26; अङ्गस्याप्रधानस्यातिविस्तरेण वर्णनम् KāvyPra. 441. 1; NyāyKu. 68. 5; इत: परं क्रमप्राप्तं हानोपायव्यूहमतिविस्तरेणाशास्त्रसमाप्ति प्रतिपादयति S'āṁkhyaPraBh. 26. 9 (*on* 1. 56); इत्यास्तामतिविस्तरेण ViraMi. (Saṁskāra.) 338. 12; **अतिविस्तरात्** [Abl.] तद्बुद्धे: पृथगर्थत्वमुक्तमेवातिविस्तरात् BṛĀraUBhVā. (Sambandha.) 275; इत्येवमादि यच्चोक्तं पूर्वमेवातिविस्तरात् BṛĀraUBhVā. ii. 4. 210; **B** large extent, great expanse भुवनस्यातिविस्तरो वर्ण्यते VarāP. 74. 4(12); नास्य (जगत:) वर्षशतेनापि वक्तुं शक्योऽतिविस्तर: BrahmP. 18. 10.

अतिविस्तरकथन (ativistara-kathana) *n.* very detailed narration अत्रातिविस्तरकथनयोग्यार्थस्य संक्षेपोक्ते: संक्षेप: PratāYaBhū. 331. 13.

अतिविस्तरकारिन् (ativistarakār-in) *adj.* causing excessive elaboration इत्यलमतिविस्तरकारिणा मतान्तरोपन्यासनिरासेन SmṛtiCan. iii. 285. 7.

अतिविस्तरतस् (ativistara-tas) *adv.* quite comprehensively or elaborately तत्कथय कथामतिविस्तरत: Ratnā. 4. 4(18); उपवर्णितं तदतिविस्तरत: SaṁkṣeS'ā. ii. 273. 6 (3. 209)

अतिविस्तरत्व (ativistara-tva) *n.* much expanse, great elaboration भाष्यस्य अतिविस्तरत्वात् Kiraṇā. 5. 15 (v. l. in BI. Ed.)

अतिविस्तरभय (ativistara-bhaya) *n.* fear of prolixity or lengthiness प्रत्ययसर्गभेदास्त्वतिविस्तरभयात्सन्तोऽपि न निर्दिश्यन्ते SāṁkhyaTaPra. 175. 5; अस्माभिश्च स्तोकं संबन्धमात्रयोजना कृतातिविस्तरभयात् Bhāsk. i. 258. 11 (*on* i. 5. 14)

अतिविस्तरम् (ativistaram) *adv.* **i** quite lengthily or elaborately, in great detail पुनर्भूतलविन्यासमाचरेन्नातिविस्तरम् BrahmāṇḍP. iii. 44. 16; उक्तं विद्याधरैस्तस्य यथावदतिविस्तरम् PadmP.(Ra.) 30. 154; प्रमाणादिपदार्थास्ते लक्ष्यन्ते नातिविस्तरम् TārkiRa. 3. 2; **ii** very widely (spread) मूर्खोऽभूदिति लोकेषु गता वार्तातिविस्तरम् DevīBhāP. iii. 10. 60.

अतिविस्तार (ati-vīstāra) *m.* [P. iii. 3. 33] extensive range, great expansion अतिविस्तारविस्तीर्णं तद्भवेन्न चिरायुषम् PañcT. (NSP. Ed. 1950) 5. 41 (325. 10) तनुरपि शुचिवस्त्रे कातिविस्तारमेति (कालिमा) VidaMuMa. 3. 26; अलमतिविस्तारेण KhaṇḍanKhā. 80. 6; उद्दीपिताविस्तारं याता चेद्दीप्तिरुच्यते RasāSu. 50. 21 (1. 196)

अतिविस्तारणार्थम् (ativistāraṇārtham) *adv.* for great expansion अतिविस्तारणार्थमुपर्युपरि स्थितहस्तपृष्ठे त्रिकभागं विनिवेशयेत् JayaMa. 186. 25 (*on* 2. 6)

अतिविस्तारभीति (ativistāra-bhīti) *f.* fear of excessive prolixity अतिविस्तारभीत्यात्र न प्रोक्तम् GaṇeP. i. 81. 34.

अतिविस्तारवदना (ativistāra-vadanā) *adj.* (*f.*) having a very broad mouth (काली) अतिविस्तारवदना जिह्वाललनभीषणा MārkP. 87. 7.

अतिविस्तारिणी (ati-vistāriṇī) *adj.* (*f.*) very lengthy इत्यलमतिविस्तारिण्या कथया HetuBiṬ. 103. 1.

अतिविस्तारित (ati-vistārita) *adj.* made very broad, very expansive रज्जव: … करमात्रनिम्नधरणीगर्तेऽतिविस्तारिते MātaLī. 10. 12.

अतिविस्तारिता (ativistāri-tā) *f.* excessive expansion अतिविस्तारितया कम्पयन्तमिव … कान्तारम् … श्रवणपरुषहेषाध्वनिमश्रौषीत् TilaMañ. 208. 10.

अतिविस्तीर्ण (ati-vistīrṇa) *adj.* [*f.* –ā] **A** widely covered तमसा त्वभ्यवस्तीर्णो (v. l. त्वतिविस्तीर्णो) मोह आविशतीव माम् MahāBhā. i. 1. 159; **B i** extremely broad राज्यवर्धनहर्षौ…अतिविस्तीर्णेनोरसा…अवकाशमिव प्रयच्छन्तम्…कुमारगुप्तम्…ददृशतु: HarsaC. 197. 2; जघनं त्वतिविस्तीर्णं भात्यस्या रसनावृतम् VāmaP. 7. 10; **B ii** very extensive or expansive नातिविस्तीर्णम् … देवतागृहमकारयत् TilaMañ. 33. 21; नातिविस्तीर्णा … अटवी … नृपाणां शस्यते नित्यं मृगयाकेलिकर्मणि Mānaso. iv. 15. 1437; अतिविस्तीर्णगम्भीरं गर्तमेकमखानयत् TriṣaS'aPuC. i. 5. 557; ऊर्ध्वशृङ्गोऽतिविस्तीर्णो ब्रह्मलोकस्तदग्रत: PāñcaRā. (Nā.) ii. 2. 57; **B iii** extremely detailed or elaborate आख्यानं चातिविस्तीर्णं स्तुवन्ति मुनय: DevīBhāP. iii. 11. 45; बोधायनेन ह्यतिविस्तीर्णा वृत्ति: कृता S'rutaPra. iA. 9. 17 (*on* i. 1. 1); **B iv** much spread मन्मथोन्मेषेणातिविस्तीर्णा शोभैव कान्तिरुच्यते SāhiDa. 129. 13; अतिविस्तीर्ण is given as the meaning of वरीयस् or वरिष्ठ in AnekāSa. 366; AnekāSaṁ. 3. 749; AnekāK. 187 and DharK. 2727.

अतिविस्तीर्णत्व (ativistīrṇa-tva) *n.* the state of being much extensive (स:) अतिविस्तीर्णत्वादव्यक्ततां गच्छेत् AbhinBhā. i. 53. 15 (*on* 2. 20)

अतिविस्तीर्णमान (ativistīrṇa-māna) *adj.* having very vast measurements अतिविस्तीर्णमानानां प्राकाराणां प्रकल्पयेत् । दिक्षु द्वारचतुष्कम् PauṣkS. 4. 33.

अतिविस्तृ (ati-vistṛ–) v. Ā. (*caus. pass.*) to be elaborated greatly शुद्धचैतन्याभेदध्यानरूपमुख्यभजनम् … सुकरमेवेति नातिविस्तार्यते LalitāTriBh. 254. 18 (*on* 1); cf. **अतिविस्तॄ.**

अतिविस्तृत (ati-vistṛta) *adj.* [*f.* –ā] **i** very large, extremely extensive ददर्श पुरतो वटम् ।… अतिविस्तृतम् BrahmVaiP. iv. 29. 30; ततोऽतिविस्तृतं दीर्घम् (प्रासादं निर्मितवत:) GaṇeP. i. 8. 22; BṛĀraUBhVā. iv. 4. 547; दिक्कालाद्यनवच्छिन्नरूपत्वादतिविस्तृतम् (चिद्रूपम्) YogVā. iii. 10. 33; लोभो गर्तोऽतिविस्तृत: PārśvC. 2. 88; PadyāTa. 79; सैन्यानि पान्थनिवहैरतिविस्तृतानि … संजवनानि ĀnandRa. 4. 7; **ii** very broad यस्यातिविस्तृतमुर(?:)स्तनयो: … दीर्घान्तरम् … अतीव च दीर्घमायु: KalyāKā. 1. 44; (अद्राक्षीद्राक्षसं घोरम्) अतिविस्तृतपादम् SkandP. iv. 54. 20; Mānaso. iv. 7. 1020; **iii** very vast, giving many details विप्र कर्म मन्त्रेश्वरस्य तु । कथितं नातिविस्तृतम् JayāS. 26. 133; एतच्चातिविस्तृतं भाष्ये TātpaṬ.(Vā.) 586. 2 (*on* iii. 2. 73); लिङ्गाख्यं चातिविस्तृतम् (पुराणम्) DevīBhāP. i. 3. 10; ग्रहचिकित्सात्र लिख्यते नातिविस्तृता ĪśānS'iPa. i. 41. 1; *n.* too much elaboration किमनेनातिविस्तृतेनेति NyāyVār. 109. 17 (*on* i. 1. 31)

अतिविस्तृतता (ativistṛta-tā) *f.* too much elaboration क्वचिदतिविस्तृततया बुद्ध्यनारूढस्य संक्षेप: NyāySu.(Ja.) 8B. 2 (*on* i. 1. 1)

अतिविस्तृतत्व (ativistṛta-tva) *n.* the state of being very extensive त्रिकोणमात्रवासनाया अतिविस्तृतत्वेन … वक्ष्यमाणत्वाच्च SetuBa. 188. 29; RasGaṅ. 610. 4.

अतिविस्तृति (ati-vistṛti) *f.* excessive elaboration स्पष्टार्थेष्वतिविस्तृतिं विदधति व्यर्थै: समासादिकै: RājMār. 1. 16; अङ्गस्याप्यतिविस्तृति: … रसे दोषा: स्युरीदृशा: KāvyPra. 434. 2; देवैश्च दुर्गमार्थेषु व्यापृतो नातिविस्तृतिम् । चकार AnuVyā. 4A. 8 (*on* i. 1. 1); अस्य प्रमेयस्य नातिविस्तृतिं चकार NyāySu.(Ja.) 92A. 9 (*on* i. 1. 1); अतिविस्तृतिरङ्गस्य … दोषा रसगता मता: SāhiDa. 421. 1; अतिविस्तृति is given as the meaning of पल्लव in Vaija. 261. 58.

अतिविस्तॄ (ati-vistṝ–) IX. Ā. (*caus. pass.*) to be elaborated greatly, LalitāTriBh. 254. 18, cf. **अतिविस्तृ.**

अतिविस्पष्ट (ati-vispaṣṭa) *adj.* abundantly clear, very apparent अतिविस्पष्ट एवायमन्यापोहोऽवगम्यते TattvSaṁ. 1010; नागानामतिविस्पष्टं (वच:) पुनरुक्तसमन्वितम् VisṇuDhaP. iii. 4. 9.

अतिविस्फुरविग्रहा (ativisphura-vigrahā) *adj.* (*f.*) (literary style) in which the constituent members of a compound are very obvious लाटीया (रीति:) स्फुटसंदर्भा नातिविस्फुर(?ट)विग्रहा AgniP. 338. 4.

अतिविस्मय (ati-vismaya) *adj.* full of great wonder or surprise संप्रविष्ट: पुन: कुक्षिं मार्कण्डेयोऽतिविस्मय: MatsyaP. 167. 26; न विस्मयोऽसौ त्वयि विश्वविस्मये यो माययेदं ससृजेऽतिविस्मयम् BhāgP. iii. 13. 43; तत: कंसोऽतिविस्मय: ।… उवाच ह ĀdiP. 21. 37; स दृष्ट्वा स्थगिताकाशम् … समुवाचातिविस्मय: YogVā. v. 48. 23; *m.* **i** great astonishment, surprise or wonder सर्वे नराश्च नार्यश्च मुमूर्च्छुरतिविस्मयात् PadmP.(Ra.) 4. 7; निराकाराच्च विषयाद् बुद्ध्याकारोऽतिविस्मय: S'lokaVār. 5(3). 51 (283. 1); तस्यातिविस्मयविधायि विचेष्टितं तत् HarVi. 27. 81; सोऽतिविस्मयमियाय RāmC. 40 (App. 2). 82; 11. 22; अवतीर्य च सोऽतिविस्मयविस्फारितविलोचनमवनिपालमवादीत् NalaCam. 5. 50(11); गुरुत्वाल्लोहवत् पृथ्वी द्यौरपीत्यतिविस्मय: BṛĀraUBhVā. iii. 8. 135; NyāyMañ. i.

328. 6; KathāSaSāg. i. 5. 10; xii. 5. 187; विभीषणः ··· विलोक्य कुम्भश्रवणादिदैत्यान् ··· अतिविस्मयेन।··· दशाननं प्राह AdhyāRā. vi. 2. 21; TriṣaS'aPuC. i. 1. 551; PārśvC. 6. 1107; **ii** intense regret (one of the five Aticāras of the Aṇuvrata of a Jain S'rāvaka) अतिविस्मयो धान्यादौ प्रपन्नलाभेन विक्रीते मूलतोऽप्यसंगृहीते वा तत्क्रयाणकेनाधिकेऽर्घे लब्धे लोभावेशादतिविषादः Sāgāradharmāmṛta (comm.) 4. 64.

अतिविस्मयन (ati-vismayana) *n.* great astonishment or wonder अभिनयानतिविस्मयनोचितान् बहुविधं प्रकटीकुरुते स्म सा Raghuṇā. 12. 17.

अतिविस्मयनीय (ati-vismayanīya) *adj.* most astonishing, most wonderful तेऽब्रुवन् – एवं ह्येतत् पश्यामः। एनमतिविस्मयनीयम् LaliVi. xvi. 0. 15; अरविन्दमकरन्दपरागपिङ्गलनयनम् ···अतिविस्मयनीयं कपटबटुवेषमाक्षिप्य तन्मुनिमतमुदवसितमयासीत् YaśasCaṁ. ii. 297. 18; अतिविस्मयनीयकरलाघवं राघवानुजम्··· मूर्च्छासंमीलितमुपराग इव कलाधरमाततान यातुधानपतिः RāmāCam. 6. 79 (2)

अतिविस्मयनीयकर्मन् (ativismayanīya-karman) *adj.* doing most wondrous or marvellous feats अतिविस्मनीयकर्मणो नृपतेर्यस्य विरोधि किं च न S'iśuVa. 16. 66.

अतिविस्मयमयी (ativismaya-mayī) *adj.* (*f.*) most marvellous or wondrous (आर्यस्य) निष्पन्देन मयातिविस्मयमयी सत्यस्थितप्रत्यया संहारे खरदूषणत्रिशिरसामेषैव दृष्टा स्थितिः KaviKaṇṭhā. 5. 1 (60)

अतिविस्मापनी (ati-vismāpanī) *adj.* (*f.*) causing great astonishment or surprise भूमिका भवति नोऽतिविस्मापनी CaitaCa. 166. 17 (7)

अतिविस्मि (ati-vismi-) I. Ā. to be highly astonished or surprised अभिमतमुखं वीक्षांचक्रे नवाङ्गनया तथा ललितकुशलोऽप्यालीलोको यथातिविसिस्मि-(? छि)ये S'ṛṅgāTi.(Ru.) 1. 88; चाणक्यः ···। चन्द्रगुप्तं तथाचेष्टं दृष्ट्वा चातिविसिष्मिये PariPar. 8. 244.

अतिविस्मित (ati-vismita) *adj.* [*f.* -ā] very much astonished or surprised ते ह खलु वावोर्ध्वरेतसोऽतिविस्मिता अभिसमेत्योचुः MaitrīU. 376. 7 (4); विध्वस्तं कर्म तद् दृष्ट्वा हनूमानतिविस्मितः Rāmā. vi. 898*(3); उमापि तं समावेक्ष्य ··· अतिविस्मिता BrahmāṇḍP. iii. 10. 72; विकासिनेत्रयुगलो मालाकारोऽतिविस्मितः ViṣṇuP. v. 19. 18; वायुमेव स गन्धर्वः प्रशशंसातिविस्मितः BṛĀraUBhVā. iii. 3. 165; निरीक्ष्य तद् बलं सर्वं महादेवोऽतिविस्मितः SkandP. i(1). 2. 66; अतिविस्मिता। मौद्गल्यस्य रहो भार्या भर्तारं वाक्यमब्रवीत् BrahmP. 136. 14; इति निश्चयमाज्ञाय तेषां रामोऽतिविस्मितः AdhyāRā. ii. 5. 54; श्रीरामेणोदितं सर्वं श्रुत्वा तारातिविस्मिता AdhyāRā. iv. 3. 36; तद् वचनं श्रुत्वा गताः सर्वेऽतिविस्मिताः AdhyāRā. vii. 7. 19; BṛKathāMañ. v. 1. 230; राजा ···। आखेटके यथादृष्टं तामुवाचातिविस्मिताम् KathāSaSāg. ix. 2. 133; viii. 6. 22; PāṇḍaC. 9. 120; PārśvC. 6. 1030; रूपानुरूपविज्ञानप्रकर्षात् सातिविस्मिता SamarāSaṁ. 8. 117; PrabhāC. 17. 23; सर्परूपदानवस्य वीक्ष्यातिविस्मितेन तस्य कुक्षिमाश्रितेन वत्सपालमण्डलेन नीतखेदम् ··· भवन्तमाश्रयामि StavMā. 180. 19; धान्यः ··· सुतं वीक्ष्यातिविस्मिताः ParamāKā. 181. 76.

अतिविस्मितचित्त (ativismita-citta) *adj.* very much surprised in the mind अतिविस्मितचित्तोऽसौ लज्जाहर्षसमन्वितः।··· तुनाव ब्रह्मचारिणम् GaṇeP. ii. 11. 35.

अतिविस्मितमनस् (ativismita-manas) *adj.* very much surprised in the mind अथ स युवा ··· अतिविस्मितमनसां कथयतां पदातीनां सकाशादुपलभ्य दिव्याकृति तत्कन्यकायुगलम् ··· लतामण्डपोद्देशमाजगाम HarṣaC. 39. 3.

अतिविस्मृत (ati-vismṛta) *adj.* utterly forgotten स द्वाभ्यामतिविस्मृतव्यतिकरो मानो विहस्योज्झितः AmaS'. 42; यत्रातिविस्मृतत्रासाः सन्ति संख्यातिगा मृगाः PāṇḍaC. 1. 78.

अतिविस्मृतिशीलता (ativismṛtiśīla-tā) *f.* excessively forgetful nature अतिविस्मृतिशीलता तवाहो गदितुः सर्वपदार्थसंकरस्य S'aṅkaDigVi.(Mā.) 15. 108.

अतिविस्रंसन (ati-visraṁsana) *n.* excessive purging, strong diarrhoea or dysentery अतिविस्रंसनाद् गुदभ्रंशानिलप्रकोपसंज्ञानाश ··· (परि)-कर्तिकाः KāśyaS. 157A. 9.

अतिविस्रक (ativisra-ka) *adj.* strongly smelling of raw meat पूयाभः पतते श्लेष्मा पूतिगन्धोऽतिविस्रकः HārīS. iii. 4. 18.

अतिविस्रत्व (ativisra-tva) *n.* excessive mustiness [nt]

अतिविस्रब्ध (ati-visrabdha) *adj.* [*f.* -ā] excessively confiding, having great confidence or trust, very intimate अहो बतायं हरिणकुणकः···मय्यतिविस्रब्धः BhāgP. v. 8. 9; या प्रथमसंगता कन्या च तस्या लज्जा ··· न त्वतिविस्रब्धायाः स्वैरिण्याश्च JayaMa. 160. 2 (*on* 2. 8); वियोगो विप्रलम्भः स्यादतिविस्रब्धयोर्द्वयोः SāhiSā. 5. 87; अत्र रसमञ्जरीकारः अतिविस्रब्धनवोढायां मध्यामिदमाह S'ṛṅgāMañ.(A.) 4. 24.

अतिविस्रम्भ (ati-visrambha) *m.* great confidence or trust (मृगपोतकः) भयत्यत्रातिविस्रम्भात् कृशा(? शो)पि हरिणीस्तनम् BrahmāṇḍP. ii. 51. 8; अतिविस्रम्भदत्तक्षणं तमप्राक्षं त्वदुपदिष्टेन नयेन DaśKuC. 144. 20; तदलं ह्यस्यातिविस्रम्भेण Tantrākhyā. 26. 16; अतिविस्रम्भश्च प्रगल्भायामेव S'ṛṅgāMañ. (A.) 4. 25.

अतिविस्रम्भवत् (ativisrambha-va(n)t) *adj.* having over-confidence मूर्खो जीवद्द्विभार्यश्च ह्यतिविस्रम्भवांस्तथा S'ukraNī. 4(2). 37.

अतिविस्रसा (ati-visrasā) *f.* extreme decrepitude or old age नातिविस्रसया भिन्ने देहे ना तप्यते तपः JānaHa. 10. 11.

अतिविहार (ati-vihāra) *m.* excessive ambulation अत्यशनानशने योगविरोधिनी अतिविहाराविहारौ च GītāBh.(Rā.) 335. 7 (*on* 6. 16)

अतिविह्वल् (ati-vihval-) I. P. (*caus.*) to cause much tormentation or worry दुर्धरोऽपि धरणीतलभारो नातिविह्वलयिता खलु वत्सम् Rāgh. 5. 51.

अतिविह्वल (ati-vihvala) *adj.* [*f.* -ā] **A** agitated, worried, frightened, excited or annoyed very much दृष्ट्वा···। अनार्यान्सुखिनश्चैव विह्वलामीव चिन्तया (v. l. चिन्तयाम्यतिविह्वला) MahāBhā. iii. 31. 38; हा हा क्वासाविति जनो गोपीनामतिविह्वलः।··· द्रुतप्रस्खलितं ययौ ViṣṇuP. v. 7. 21; BrahmP. 181. 14; अथ मदम्बा ···तादृशेऽपि व्यसने नातिविह्वला···राज्ञे समादिशत् DaśKuC. 87. 3; BṛKathāK. 46. 140; वर्षतीन्द्रे व्रजः कोपाद् भग्नमानेऽतिविह्वलः। गोत्रलीलातपत्रेण त्रातो भद्रानुगृह्णता BhāgP. iii. 2. 33; x. 1. 57; तमूचुर्भूपतिं गत्वा त्वरितास्तेऽतिविह्वलाः। देवक्याश्च सुतो जातः शीघ्रमेहि महामते DevīBhāP. iv. 23. 37; vii. 19. 38; पश्य पश्य प्रिय त्रस्तां तां मृगेन्द्रादिह स्त्रियम्।··· रक्षैतामतिविह्वलाम् PadmP.(Ra.) 17. 245; इतस्ततो भ्रमन् धावन् वह्निभस्मात्मजस्तदा। न विवेद गतं वस्त्रं भूषणं चातिविह्वलः GaṇeP. i. 21. 1; जगाम शोकं शैलेशो सुतां दृष्ट्वातिविह्वलाम्। रुदन्तीं शम्भुविरहात् S'ivaP. ii(3). 21. 8 (145B. 5); पीत्वा च कृत्रिमं क्षीरं मात्रा दत्तं द्विजोत्तमाः। नैतत्क्षीरमिति प्राह मातरञ्चातिविह्वलः LiṅgaP. i. 107. 10; तर्जिता राक्षसीभिः सा सीता भीतातिविह्वला।··· दुःखेन परिमूर्च्छिता AdhyāRā. v. 2. 56; iii. 7. 66; प्रणम्य शिरसा भूमौ तेजसा चातिविह्वलः। भीतः कृताञ्जलिस्तस्याः प्रोवाच परमेश्वरीम् KūrmaP. 106. 13 (1. 12); यमोऽपि दृष्ट्वा राजानं परं क्षोभमुपागमत्। चित्रस्थो ह्यभवत् सद्यः प्रेतराजोऽतिविह्वलः SkandP. i(1). 32. 24; शालिवाहनोऽपि अतिविह्वलः सन्···शेषनागेन्द्रं पितरं सस्मार SiṁhāDvā. 178. 7 (2); मा बाधिष्ट सुतं कश्चिन्मत्परो वातिविह्वलः। इति कारुणिको राजा न्यवर्तत रणाद्द्रुतम् RājTa.(S'rī.) 1(1). 171; AlaṅkāMañ. 229. 13; शरीरमपि धारयितुमक्षमः, प्रतिक्षणमतिविह्वलः कलामात्रमपि कल्पकोटिवदतिवाहयितुम् VasaTi. 25. 16; **B** very much troubled, exhausted, suffering from (hunger or thirst), afflicted शीतपवनहृद्रुग्णः कण्ठस्वेदोऽतिविह्वलः। ··· स विज्ञेयो ज्वरेश्वरः HārīS. iii. 2. 230; अश्नीतद्रुधिरं तोयमलसचातिविह्वलम्। अशीयत नृमांसादां बलं सुग्रीवबाधितम् Bhaṭṭi. 17. 77; श्राद्धं कृत्वेतरश्राद्धे यस्तु भुङ्क्तेऽतिविह्वलः। पतन्ति पितरस्तस्य LaS'aṁkhaSm. 28; उर्वशी च ···। तत्प्रदेशाद्विनिष्क्रम्य कामार्ता चातिविह्वला। भूमौ सा पतिता SkandP. v(1). 8. 46; क्षणं रटन्ती नृत्यन्ती रुदती चातिविह्वला। निःसहत्वं तदा याति RatiRaha. 3. 11; तच्च (वानरयूथम्) हेमन्तकाले शीतार्तमतिविह्वलतया (v. l. अतिविह्वलम्) खद्योतं दृष्ट्वा···ताप(मनोरथ)सुखं किलानुभवति स्म PañcT. 1. 151(4) (151. 1); Pañcā 108. 7; करवक्रोऽतिविह्वलः। वातेन संप्रदुष्टस्य रूपमेतत्प्रकीर्तितम् Hastyāyur. 181. 15 (2. 10)

अतिविह्वलगात्र (ativihvala-gātra) *adj.* whose limbs are greatly exhausted अतिविह्वलगात्रस्य तस्य रेतः प्रचस्खले GaṇeP. i. 60. 6.

अतिविह्वलगात्रत्व (ativihvalagātra-tva) *n.* state of possessing extreme exhaustion of limbs (अहम्) अतिविह्वलगात्रत्वादशक्तो भूमिधारणे GaṇeP. i. 90. 7.

अतिविह्वलतनु (ativihvala-tanu) *adj.* whose body is totally tired द्वादश्यां त्वरयातिविह्वलतनुं कुर्यात्पुमांश्चित्रिणीम् AnaṅgaRa. 2. 11.

अतिविह्वलता (ativihvala-tā) *f.* the state of undergoing extreme (physical) tormentation (वानरयूथः) कदाचिद्धेमन्तकालेऽसुखासीनोऽतिविह्वलतया Tantrākhyā. 45. 3; PañcT. 1. 151(4) (151. 1)

अतिविह्वलम् (ati-vihvalam) *adv.* in great distress पौराश्च···क्रोशन्ति स्मातिविह्वलम् Bhaṭṭi. 18. 38.

अतिविह्वलयत् (ati-vihvalayat) *adj.* causing to suffer (मदनमुन्मद्रसः) प्रमदानिवहानतिविह्वलयन्।···भवसारसुधामयमेव सुहृत् RasRaSa. 27. 25.

अतिवी (ati-vī-) II. P. to outstrip, to overcome वेत्यग्रुर्जनिवान्वा अति स्पृधः ṚV. v. 44. 7.

अतिवीक्ष्य (ati-vīkṣya) *ger.* having observed, having anticipated exhaustively or for a long time उवास तच्छुभमतिवीक्ष्य राघवस्तदा मुनीनामभयं प्रदाय Rāmā. iii. 153(A)*(3); नवनिधुवनलीलाः कौतुकेनातिवीक्ष्य।···घूर्णते दैपमर्चिः S'iśuVa. 11. 18.

अतिवीणिन् (ati-vīṇin) *adj.* possessing great skill in playing on lute विस्वरं सामगाः कुर्युर्विरक्तमतिवीणिनः NāraSi. i. 6. 20.

अतिवीत (ati-vīta) *adj.* over-clothed नातिवीतो नाङ्कं कृत्वोर्ध्वंज्ञुरनपश्रितोऽधीयीत AitĀ. V. iii. 3. 11.

अतिवीध्र (ati-vīdhra) *adj.* excessively clean or bright छत्रत्रयं तद्वरुचेऽतिवीध्रम् MahāP. 23. 44.

अतिवीप्सा (ati-vīpsā) *f.* excessive repetition अभीत्थंभूतकथनेऽप्यतिवीप्साभिमुख्ययोः VisvaLoK. 414. 48.

अतिवीर (ati-vīra) *adj.* very brave or heroic सः …अतिवीरोऽतिमहान् …स्वे महिम्नि सदा समास्ते NṛsiṁhoTāU. 7; सदायज्ञोऽतिवीरश्च … । अक्रूरः MatsyaP. 45. 27; PadmP.(Ra.) 12. 212; मुहूर्तमेवं युयुधेऽतिवीरः (ऐन्द्रसेनिः) VarāṅgaC. 18. 57; कुमारेण हतस्तोऽतिवीरः SivaP. ii(4). 10. 32 (205A. 7); RāmāMañ. 135. 23; अतिवीरः …वायुपुत्रः …चण्डोड्डीनमङ्गीचकार MahāN. 5. 33.

अतिवीर्य (ati-vīrya) *adj.* [*f.* -ā] **i** very heroic, very powerful, very courageous स इन्द्रजिन्नाम वरप्रधानः । … धन्वी रथस्थोऽतिरथोऽतिवीर्यः Rāmā. vi. 47. 16; ताभ्यस्त्वमात्मना पुत्रमेवंवीर्यं (v. l. अतिवीर्यम्) जनिष्यसि MahāBhā. iii. 126. 23; ViṣṇuP. iv. 24. 144; गणेश्वर पुरीं गत्वा शून्यां वाराणसीं कुरु । मृदुनैवाभ्युपायेन अतिवीर्यः स पार्थिवः (दिवोदासः) HariVaṁ. App. I. 7(90) = VāyuP. ii. 30. 37 = BrahmāṇḍP. ii. 67. 41; अतिवीर्यं महाविनायकप्रवराणामनुत्रादिनां वर (शाक्यपुङ्गव) GiMs. iii(1). 11. 9; शक्रादयः सुरगणा निहतेऽतिवीर्ये तस्मिन् दुरात्मनि सुरारिबले च देव्या । तां तुष्टुवुः MārkP. 84. 1; **ii** very powerful, very potent गिरिवरतटरूपा दुर्निवारातिवीर्या व्रजति नभसि शीघ्रं मेघवृन्दानुयात्रा DātVā. 48; पायासुर्त्रोऽतिवीर्यास्त्रिभुवनजयिनः पञ्चबाणस्य बाणाः SubhāRaK. 14. 2 = Subhāṣi. 1039; *n.* great valour, great might महाबलः । यः शक्रमपि वीर्येण (v. l. अतिवीर्येण) गमयेद् यमसादनम् MahāBhā. iii. 126. 20; PadmP. v. 73. 41; बालत्वं चातिवीर्यं च जन्म चास्मास्वशोभनम् । … शङ्कां कृष्ण प्रयच्छति BrahmP. 189. 8; वीरभद्रोऽतिवीर्येण गजेनैवाहनद् गजम् GaṇeP. ii. 121. 20; *m.* name of a king अतिवीर्यः सुवीर्यश्च…तथान्ये पृथिवीभृतः PadmP.(Ra.) 5. 7; इति मन्त्रयमाणस्य रामस्य मतिरुद्गता । अतिवीर्यग्रहोपाये PadmP.(Ra.) 37. 92; अतिवीर्यस्य तनया श्रीकेशिनमसूत च PadmP.(Ra.) 94. 34.

अतिवीर्यत्व (atvīrya-tva) *n.* the characteristic of possessing excessive valour बालत्वं चातिवीर्यत्वं जन्म चास्मास्वशोभनम् ViṣṇuP. v. 13. 7; दैत्येन्द्रस्यातिवीर्यत्वात् परिश्रान्ततरो यमः SkandP. i(2). 17. 63.

अतिवीर्यदर्प (ati-vīryadarpa) *adj.* possessing excessive valour and conceit शीघ्रं प्रयामि … अवनीम् … दृप्तान् जिघांसुरसुरानतिवीर्यदर्पान् BālC. 2. 21.

अतिवीर्यदिगम्बर (atvīrya-digambara) *m.* the Jaina monk Ativīrya by name अश्वैः प्रववृते द्रष्टुमतिवीर्यदिगम्बरम् PadmP.(Ra.) 38. 12.

अतिवीर्यनरेन्द्र (atvīrya-narendra) *m.* king Ativīrya दूतोऽस्मि … अतिवीर्यनरेन्द्रस्य नयन्यासमनीषिणः PadmP.(Ra.) 37. 32.

अतिवीर्यपराक्रम (ati-vīryaparākrama) *adj.* possessing excessive prowess and heroism स ददृशे … । मधुकैटभौ दुरात्मानावतिवीर्यपराक्रमौ MārkP. 81. 71; एवं मातृगणेनाजावतिवीर्यपराक्रमम् । मर्दितं दानवं सैन्यं पलायनपरं ह्यभूत् DevīBhāP. v. 28. 59; ननन्द देवस्तं दैत्यमतिवीर्यपराक्रमम् GaṇeP. ii. 102. 5.

अतिवीर्यबल (ati-vīryabala) *adj.* possessing excessive valour and strength अतिवीर्यबलं नानुगच्छामि MadhyaVyā. 1. 40(10)

अतिवीर्यबलप्रद (atvīryabala-prada) *adj.* producing much semen and strength मांसम् … अतिवीर्यबलप्रदम् BhojanKu. 170. 11.

अतिवीर्यमुनि (atvīrya-muni) *m.* monk Ativīrya अतिवीर्यमुनिं दृष्ट्वा सुघोरतपसि स्थितम् PadmP.(Ra.) 38. 17.

अतिवीर्यवत् (atvīrya-va(n)t) *adj.* **i** extremely strong or mighty (person) ततः सुह्मान्प्राच्यसुह्मान्समक्षांश्चैव वीर्यवान् (v. l. सपक्षानतिवीर्यवान्) । विजित्य युधि कौन्तेयः MahāBhā. ii. 27. 14; एषः … वासुदेवोऽतिवीर्यवान् । वाहयन्नेति तुरगान् MahāBhā. viii. App. I. 7(5); तव पुत्रोऽतिवीर्यवान् MahāBhā. ix. 204*(1); सोंऽशुमानतिवीर्यवान् । त्वरितं हयमादाय पुनरायान्महायशाः Rāmā. i. 40. 22; मकराक्षातिकायौ च त्रिशिराश्चातिवीर्यवान् Rāmā. vi. 1687*(2); पातु वासवदत्तायो महासेनोऽतिवीर्यवान् PratiYau. 1. 1; पुत्रस्तदस्याप्यतिवीर्यवान् । चिच्छेद MārkP. 21. 83; 85. 75; महिषो नाम पुत्रस्ते भविष्यत्यतिवीर्यवान् SkandP. iii(1). 6. 15; ब्रह्मासृजयतः क्षत्रमात्मनोऽप्यतिवीर्यवत् BṛĀraUBhVā. i. 4. 1603; अदित्यां मघवा पुत्रो यदाभूदतिवीर्यवान् DevīBhāP. iv. 3. 22; अङ्गदो नाम वालिपुत्रोऽतिवीर्यवान् AdhyāRā. vi. 4. 30; तस्य विष्णुः प्रकुप्येत नाशयेदतिवीर्यवान् PadmP. ii. 9. 11; **ii** extremely powerful, of high potency or efficacy (a thing) अमेयमतिवीर्यवत् । आग्नेयमस्त्रम् MahāBhā. iii. 23. 28; अतिवीर्यवतीव भेषजे बहुरल्पीयसि दृश्यते गुणः Kirātā. 2. 4; यदेव विद्यया कुर्यात्तदेव ह्यतिवीर्यवत् AnuVyā. 61B. 8 (*on* 3. 4)

अतिवीर्यविक्रम (ati-vīryavikrama) *adj.* possessing excessive valour and heroism अमात्यपुत्रानतिवीर्यविक्रमान् समादिदेशाशु निशाचरेश्वरः Rāmā. v. 42. 19.

अतिवीर्यवृत्रभिद् (atvīryavṛtra-bhid) *adj.* which sundered the highly powerful Vṛtra (i. e. Vajra) तदद्भुतं परमतिवीर्यवृत्रभित्तिरस्कृतो नमुचिशिरोधरत्वचा BhāgP. viii. 11. 32.

अतिवीर्यवृद्धि (ati-vīryavṛddhi) *f.* great increase of semen तस्य स्यादतिवीर्यवृद्धिः BhojanKu. 140. 17.

अतिवीर्यशालिन् (atvīrya-śālin) *adj.* possessing excessive valour अमितौजसामनन्तकार्यनिर्माणेनातिवीर्यशालिनाम् (तन्मात्राणाम्) ManvaMu. 9. 21 (*on* 1. 16)

अतिवीर्यसत्त्व (ati-vīryasattva) *adj.* having excessive valour and energy सर्वे भवन्तस्त्वतिवीर्यसत्त्वाः MahāBhā. iii. 181. 39.

अतिवीर्यसमुन्नति (atvīrya-samunnati) *f.* exaltation of (king) Ativīrya अतिवीर्यसमुन्नतिम् … शृणुत सज्जनाः PadmP.(Ra.) 1. 83.

अतिवीर्यसुत (atvīrya-suta) *m.* son of (king) Ativīrya अतिवीर्यसुतः प्राप्तो भवेदापातपण्डितः PadmP.(Ra.) 65. 10.

अतिवीर्या (atvīryā) *f.* name of a Buddhist Divinity [PW]

अतिवृ (ati-vṛ-) v. u. (*caus.*) to prevent, to stop लेहस्तु शस्तो मधुनापि मानुजे रक्तावाहमतिवारयत्यपि HāriS. iii. 3. 58; (*pass.*) to be denied or refuted प्रमाणबलतः सिद्धा चेतना नातिवार्यते ṢaḍdarSa.(Rā.) 170.

अतिवृंहित (ati-vṛṁhita) *adj.* cf. **अतिबृंहित** strengthened अपां फेनं समासाद्य विष्णुतेजोऽपवृंहितम् (v. l. अतिवृंहितम्) MahāBhā. v. 16. 16.

अतिवृक्षक (atvṛkṣa-ka) *m.* name of the plant *kuṭaja* ApūNā. 11B. 1.

अतिवृत् (ati-vṛt-) I. A. (P.) **1 A i** to go beyond, to transcend **ii** to escape, to avoid, to omit **B** to surpass, to excel **C i** to transgress, to violate **ii** to disregard, to disobey **D i** to neglect **ii** to elude **E** to subdue, to overcome **2 A i** to go beyond (the proper time), to exceed (the time limit), to outlive, to survive **ii** to pass away, to elapse (time) **B i** to go beyond, to cross, to go ahead **ii** to proceed further, to progress, to pass out **3 A** to be different from, to change **B** to be beyond the scope of, to be outside the reach of, to depart from **4** to outlast, to live beyond **5 A** to behave beyond limits, to misbehave **B** to go beyond facts, to exaggerate. **1 A i** to go beyond, to transcend उपासते पुरुषं ये ह्यकामास्ते शुक्रमेतदतिवर्तन्ति धीराः MuṇḍaU. iii. 2. 1; किमाचारः कथं चैतांस्त्रीन् गुणानतिवर्तते MahāBhā. vi. 36. 21 = BhagGī. 14. 21 (Sañ. केन च प्रकारेण एतान् त्रीन् गुणान् अतिवर्तते अतीत्य वर्तते); मनो बुद्धिश्च भावश्च … । न गुणानतिवर्तन्ते गुणेभ्यः परमा मताः MahāBhā. xii. 239. 13; BrahmP. 236. 52; 236. 75; यथेतरेतरविधर्माणो रूपादयो न द्वैविध्यमतिवर्तन्ते तथा रूपादिवैधर्म्याच्चेतना न द्वैविध्यमतिवर्तेत यदि शरीरगुणः स्यात् NyāyBh. 228. 7 (*on* iii. 2. 55); यदा ह्ययमात्मादि प्रमेयं विपर्ययेणाध्यवसितो भवति । अथ संसारं नातिवर्तत इति NyāyVār. 12. 18 (*on* i. 1. 1); साक्षाच्छब्देन जनितां भावनानुगमेन वा । इतिकर्तव्यतायां तां (प्रतिभाम्) न कश्चिदतिवर्तते VākyaP. 2. 148 (comm. अतिक्रम्य तिष्ठति); तद्ब्रह्म नात्येति नातिवर्तते मृदादिकमिव घटादिकार्यं कश्चन कश्चिदपि विकारः KaṭhUBh. 170. 13 (*on* 6. 1); अतिवर्तन्ति अतिगच्छन्ति धीराः … न पुनर्योनिं प्रसर्पन्ति MuṇḍUBh. 353. 11 (*on* iii. 2. 1); ChāndoUBh. 160. 11 (*on* iii. 12. 2); प्राक् च तथाभूतात्मविज्ञानात् प्रवर्तमानं शास्त्रमविद्याविषयत्वं नातिवर्तते BrahmSūBh. (Sañ.) 4. 13 (*on* i. 1. 1); गुरुणा बोधितः शिष्यः शब्दब्रह्मातिवर्तते SadācāAnu. 20; BṛĀraUBhVā. i. 4. 53; iv. 3. 449; इन्द्रियाणां वशं गत्वा संसारान्नातिवर्तते ParaS. 26. 77; कष्टो हि बान्धवस्नेहं राज्यलोभोऽतिवर्तते KathāSaSāg. vii. 7. 40; GītāBh.(Rā.) 358. 1 (*on* 6. 44); SivaP. vii. 39. 34 (598A. 2); पृथिवीं भूतजातं नातिवर्तते कर्मवश्यात्मनां नियमेन प्रतिष्ठात्वादशक्यातिक्रमणेत्यर्थः SrutaPra. iB. 263. 7 (*on* i. 1. 27); **1 A ii** to escape, to avoid, to omit कालं प्राप्य महाबाहो न कश्चिदतिवर्तते MahāBhā. ix. 63. 9; xi. 2. 5; ते पिबन्तः कषायांश्च … न मृत्युमतिवर्तन्ते MahāBhā. xii. 28. 45; विरोधोद्धारं वानुक्त्वा त्वन्मतेनाभिधीयत इति ब्रुवाणो न व्याघातमतिवर्तसे NyāyVār. 325. 14 (*on* ii. 2. 67); एतां सत्तां पदार्थो हि न कश्चिदतिवर्तते VākyaP. 3(3). 51; सत्तायां हि साध्यायां सर्वस्तद्धेतुर्न त्रयीं दोषजातिमतिवर्तते – असिद्धं व्यभिचारं विरोधं च PramāVāSvopVṛ. 63. 21; 78. 17; TattvSaṁ. 339; कार्यस्य कारणे सद्भावमुक्त्वा (? सद्भावं मुक्त्वा) नियमहेतुरुच्यमानो यः कश्चित् स सर्वः पर्यनुयोगं नातिवर्तते BrahmSūBh.(Bhā.) 101. 13 (*on* ii. 1. 18); NyāyMañ. ii. 64. 15; ii. 194. 27; पित्र्यं कर्म यद्दैत्यदानवरक्षांसि यज्ञविध्वंसकराण्यपि नातिवर्तन्ते ManuBh. i. 291. 28 (*on* 3. 186); PañcPā. 12. 17 (*on* i. 1. 1); ĀtmaSi. 33. 3; सं च विचार्यमाणः पूर्वन्यायं नातिवर्तते ĀtmaTaVi. 198. 6; Bhām. 20. 4 (*on* i. 1. 1); आपातप्रतीतोऽप्यर्थः संशयविपर्ययौ नातिवर्तेते

अतिव्यतिकृति (ati-vyatikṛti) *adj.* over-mixture (of colours) नीलेष्वतिव्यतिकृतिः (v. l. (GOS.)) पालाश इति शस्यते ViṣṇuDhaP. iii. 4o. 18.

अतिव्यतिक्रम (ati-vyatikrama) *m.* excessive delay मार्गमाणो (v. l. °णे) महादोषः कालस्यातिव्यतिक्रमः Rāmā. vi. 2039.*

अतिव्यथ् (ati-vyath-) I. Ā. to be very much unhappy प्रत्यग्दृशां श्रेष्ठो वसिष्ठो नातिविव्यथे RāmāCam. 2. 40.

अतिव्यथ (ati-vyatha) *adj.* cf. **दुरतिव्यथ** KāṭhS. 25. 1; KapiS. 38. 4 [Viśva.]

अतिव्यथन (ati-vyathana) *n.* excessive or severe pain सपत्त्रनिष्पत्त्रादतिव्यथने P. v. 4. 61 = CāndraVyā. iv. 4. 45; अतिव्यथनम् अतिपीडनम् KāśiVṛ. *on* P. v. 4. 61; KātanVṛ. *on* ii. 6. 40; SaraKaṇṭhā.(Gr.) v. 4. 74; SiddhaHe. vii. 2. 138; आभ्यां क्रिञो योगे डाजतिव्यथनेऽर्थे PrakriKau. i. 954. 5.

अतिव्यथा (ati-vyathā) *f.* excessive or severe pain तच्छ्रुत्वा व्यथनं राजा विह्वलोऽतिव्यथाकुलः । संस्तभ्याधिं नृपः प्राह वरुणम् DevīBhāP. vi. 12. 46; मृतौ चिरं भवं भ्रान्तौ सहमानावतिव्यथाम् PālaGoKa. 222; संलापस्त्वधुना सुदुर्घटतमस्तत्रापि नातिव्यथा PuṣpBāVi. 19.

अतिव्यथित (ati-vyathita) *adj.* [*f.* –ā] greatly distressed, very much pained उपह्वरेऽतिव्यथिता तस्याङ्के निषसाद ह (भागीरथी) MahāBhā. vii. App. 8 (492); (मलयवती) ततो निजमन्दिरं प्राप्य मकरकेतुना दृष्टा अतिव्यथिताभवत् VetāPañ. 85. 20; प्रत्यक्षं परोक्षं वा रिपुराजकुलनिर्भर्त्सितेन अतिव्यथितकर्णमूलहृदयः BhāgP. v. 14. 11.

अतिव्यध् (ati-vyadh-) IV. P. to pierce through, to bore holes ऐन्द्राग्नं वर्म बहुलं यदुग्रं विश्वे देवा नातिविध्यन्ति सर्वे AV. viii. 5. 19; तस्यै (वीणायै) मूले दण्डं दशधातिविध्यन्ति S'āṅkhāS'S. xvii. 3. 6.

अतिव्यध (ati-vyadha) *m.* excessive opening (of a vein) दुर्व्यधातिव्यधकुट्टित … दोषात् AṣṭāSaṁ. i. 180. 10 (1. 36)

अतिव्यपहार (ati-vyapahāra) *m.* stealing a great quantity अतिव्यपहारो व्यृद्धः ĀpaDS. i(10). 28. 4.

अतिव्यय (ati-vyaya) *m.* lavish expenditure, extravagance नन्वयमतिव्ययः PadmPrā. 12. 2; अतिव्ययमसद्व्ययं वा कुर्वाणं रहसि बोधयेत् KāmSū. 235. 16 (4. 1); अतिव्ययोऽनपेक्षा च तथार्जनमधर्मतः । …कोषव्यसनमुच्यते Hitopa 2. 84; क्रतौ विवाहे … अतिव्ययो नास्ति Hitopa. 3. 120; ताम्बूलं मदिरा माल्यं सुगन्धं च विलेपनम् । अतिव्ययेन दातव्यं रतिकालोपयोगतः ViṭVṛ. 67; अतिव्ययोऽपात्रव्ययश्चार्थस्य दूषणम् NitiVā. 16. 19; अतिव्ययमुचितव्ययादधिकं (कुर्वाणम्) रहसि बोधयेत् JayaMa. 235. 17 (*on* 4. 1)

अतिव्ययकर्तृ (ativyaya-kartṛ) *adj.* lavishly spending, extravagant (शौण्डिकादयः) अतिव्ययकर्तारमत्याहितकर्माणं च निवेदयेयुः ArthS'ā. i. 351. 5 (2. 36); i. 292. 4 (2. 25); ii. 143. 4 (4. 6)

अतिव्ययकर्मन् (ativyaya-karman) *n.* lavish expenditure, over-expenditure (गणिकायाः) अतिव्ययकर्म च वारयेत् ArthS'ā. i. 302. 7 (2. 27)

अतिव्ययकारिणी (ativyaya-kāriṇī) *adj.* (*f.*) spending too much, extravagant अतिव्ययकारिणी या भार्या भवेत्साधिवेत्तव्या तस्यां सत्यामन्यो विवाहः कार्यः ManvaMu. 378. 1 (*on* 9. 80)

अतिव्ययता (ativyaya-tā) *f.* excessive expenditure अल्पागमातिव्ययता क्षयः ArthS'ā. ii. 318. 6 (7. 12)

अतिव्ययवत् (ativyaya-va(n)t) *adj.* spending lavishly, extravagant अतिव्ययवानपीयता सुखं निर्वहिष्यते PurāPraSaṁ. 17. 4.

अतिव्ययवर्जन (ativyaya-varjana) *n.* avoidance of extravagance, abstaining from lavish expenditure षाड्गुण्यप्रयोगः अप्रमादः अतिव्ययवर्जनम् …एवमादीनि विनयः ManuBh. ii. 13. 9 (*on* 7. 42)

अतिव्ययशील (ativyaya-śila) *adj.* [*f.* -ā] spend-thrift, fond of lavish expenditure तथातिव्ययशीलैश्च परिवादरतैः शठैः । बुधो मैत्रीं न कुर्वीत VisṇuP. iii. 12. 7; MārkP. 34. 88; न चातिव्ययशीला स्यान्न धर्मार्थविरोधिनी VedaVyāSm. 2. 34; अर्थघ्नी अतिव्ययशीला भाण्डोपस्करणं न परिरक्षति ManuBh. ii. 266. 7 (*on* 9. 80); अतिव्ययशीलम् … अमात्यं न कुर्वीत NitiVā. 18. 13; गच्छेन्मैत्रीम् … । न चातिव्ययशीलैश्च पुरुषैः BrahmP. 221. 83; BhaviP. 895B. 28 (iv. 205. 16)

अतिव्ययशीलता (ativyayaśīla-tā) *f.* habitual extravagance, lavish expenditure तत्र दैवं स्वकृतप्रमादः अतिव्ययशीलता ManuBh. ii. 48. 28 (*on* 7. 166)

अतिव्यवधान (ati-vyavadhāna) *n.* long gap, long intervention, great distance अनेन हि नातिव्यवधानोक्तं पद्मावतीगृहे च यद्वासवदत्तास्थापनं तस्य गूढं प्रयोजनं व्याख्यातम् AbhinBhā. ii. 425. 4 (*on* 18. 35); अतिव्यवधानाद-संप्रयुक्तरजताकारस्यापरोक्षगोचरभावानुपपत्तिः NyāyMa. 83. 1; अतिव्यवधानेना-सक्त्यभावात् LaCandr. 423. 40; द्वितीयपदार्थानुष्ठाने त्रिंशतेत्येवमतिव्यवधानं स्यात् MayūMāli. 410. 22 (*on* v. 1. 5)

अतिव्यवहार (ati-vyavahāra) *m.* excessive use or appropriation अतिव्यप(v. l. व)हारो व्यृद्धो भवति ĀpaDS. i(10). 28. 4.

अतिव्यवहित (ati-vyavahita) *adj.* very remote, excessively intervened अतिव्यवहितस्यापरोक्षतानुपपत्तेरनिदन्तयैव बहिरवस्थानप्रतिषेधः NyāyMa. 101. 10; अतिव्यवहिते नेष्टम् । प्रत्ययते KātanVr̥. *on* iii. 6. 99.

अतिव्यवहितप्रयोग (ativyavahita-prayoga) *m.* use of widely separated (words) व्युत्क्रान्तातिव्यवहितप्रयोगान्मोहकारिणी Kāvyāda. 3. 99.

अतिव्ययादिव्यसनिन् (ativyayādi-vyasanin) *adj.* addicted to extravagance and other (vices) नरपतिः … अतिव्ययादिव्यसनी गर्भेश्वरतयाभवत् RājTa.(Ka.) 7. 143.

अतिव्ययिन् (ati-vyayin) *adj.* very extravagant अतिव्ययिनं पुत्रम् … पिता । सन्धिं दूतैरयाचत RājTa.(Ka.) 7. 488; 8. 1947.

अतिव्यवाय (ati-vyavāya) *m.* over-indulgence in sexual intercourse अतिव्यवायव्यायामवेगाघातविदाहिभिः ।… दोषाः कुपिताः SuśruS. ii. 9. 16; अतिव्यवायाद्बस्तिनेत्रासम्यक्प्रणिधानात् … प्रकुपितो वायुः CaraS. vi. 14. 9 (1941 Ed.); चिन्तयातिव्यवायात्सम्भूतिः स्यात् … राजयक्ष्मेति संज्ञितः HārīS. iii. 9. 106; अतिव्यवायमायासम् … त्यजेत् AṣṭāHr̥. ii. 1. 44; अतिव्यवाय°…°गजविग्रहैः … वायुर्गृहीत्वा कासमाचरेत् RugVi. 11. 8; अतिव्यवायाज्जायन्ते रोगाः BhāvPra. 5. 313.

अतिव्यवायतस् (ativyavāya-tas) *adv.* due to excessive sexual intercourse अतिव्यवायतः वायुः … प्रकुपितः AṣṭāHr̥. iii. 7. 10.

अतिव्यवायशील (ativyavāya-śila) *adj.* indulging in excessive sexual intercourse अतिव्यवायशीलः … ध्वजभङ्गमवाप्नोति SiddhYo. 70. 3.

अतिव्यवायिता (ativyavāyitā) *adj.* (*f.*) having excessive sexual intercourse अतिव्यवायितां गर्भिणीम् … न विपरीतव्यवाये योजयेत् AṣṭāSaṁ. i. 60. 1 (*on* 1. 9)

अतिव्यवायिन् (ati-vyavāyin) *adj.* having excessive sexual intercourse अतिव्यवायिनः … क्षीयन्ते धातवः SuśruS. vi. 41. 10; वृद्धस्यातिव्यवायिनः CaraS. vi. 17. 42 (1941 Ed.); न कुर्वीत सिरामोक्षं कृशस्यातिव्यवायिनः S'ārṅgaS. iii. 12. 19.

अतिव्यसन (ati-vyasana) *n.* **A** great misfortune, severe calamity तमतिव्यसनापातम् … अभजन्त क्रमाद् भृत्याः प्रतिपक्षसमाश्रयम् RājTa.(Ka.) 8. 791 (1835 Ed.); **B** excessive attachment, over-fondness शन्तनुरतिव्यसनादेकाकी … विललाप HarṣaC. 137. 1; VāsaDa. 276. 7; नातिव्यसनवर्तित्वं सुखिताक्लिष्टकारिता ।… इति सिद्धस्य लक्षणम् TantrRā. 35. 74.

अतिव्यसनिन् (ati-vyasanin) *adj.* [*f.* -sanī (? -saninī)] very much attached to पौरन्दरे पुष्पवती विमर्षा विनिन्दितातिव्यसनी(? व्यसनिनी) VasiS. 24. 22; ततोऽपि सोऽतिव्यसनी … दारुमयं हंसयुगं व्यधात् KathāSaSāg. vii. 9. 25.

अतिव्यस्त (ati-vyasta) *adj.* widely separated अवर्णे नाप्युपसंहृतमोष्ठहनु नातिव्यस्तम् TaiPrāti. 2. 12.

अतिव्याकुला (ati-vyākulā) *adj.* (*f.*) extremely quivering तडितो भ्राम्यन्त्यतिव्याकुलाः S'ārṅgaPa. 3887 [nt.]

अतिव्याकुलता (ativyākula-tā) *f.* much confusion or perplexity अतिव्याकुलतया प्रक्षिप्तपरादेशबहुवाक्यानाम् … ब्रह्मसंस्थतास्थेया PrakaVi. 956. 10.

अतिव्याख्या (ati-vyākhyā) *f.* very recondite exposition प्रतिपत्ता कष्टां दशामावेशितः प्रज्ञाशालिभिरतिव्याख्यया TātpṬ.(Vā.) 89. 24 (*on* i. 1. 1)

अतिव्याख्येय (ati-vyākhyeya) *adj.* requiring much exposition पञ्चभिः सन्धिभिर्युक्तं नातिव्याख्येयमृद्धिमत् Kāvyālaṅ.(Bh.) 1. 20.

अतिव्याध (ativyādha) *m.* name of an *ekāha* sacrifice अथाग्नेरतिव्याधः समानमभिचरणीयं शिल्पम् BaudhS'S. 405. 15.

अतिव्याधि (ati-vyādhi) *m.* plenty of disease प्रवर्षोष्णशीतमतिव्याधिप्रायमुपक्षीणाहारोपभोगम् … कालं परश्चेष्टिष्यते, विपरीतमहम् इति तस्मिन् विशेषे परिपणितकालं सन्धिमुपेयात् ArthS'ā. ii. 270. 10 (7. 6); वैद्योऽनवद्यः … व्याधेरतिव्याधिरिवायमेति Vidvanmo. 2. 23.

अतिव्याधिन् (ativyādh-ín) *adj.* mightily piercing through, wounding seriously आ राष्ट्रे राजन्यः शूर इषव्योऽतिव्याधी … जायताम् VājaS. 22. 22; द्वौ बाणवन्तौ सपत्नातिव्याधिनौ हस्ते कृत्वा S'atBr. XIV. vi. 8. 2 = BrĀraU. iii. 8. 2; आह वै तत्र राजन्योऽतिव्याधी जायते TaiBr. III. ix. 19. 3; यर्हि वा एतेन पुरेजिरे सर्वमेव वीर्यवदास … अतिव्याधी राजन्यः शूरः JaimiBr. 2. 266 (8); तस्मात्ततो ब्राह्मण ऋषिकल्पो जायतेऽतिव्याधी राजन्यः शूरः JaimiUBr. i. 4. 2; *m.* name of a sacrifice एष वातिव्याधी नाम यज्ञः S'atBr. XIII. iii. 7. 9 = TaiBr. III. ix. 19. 3.

अतिव्याध्य (ati-vyādhyà) *adj.* easily penetrable यत्ते काम शर्म त्रिवरूथमुद्भु ब्रह्म वर्म विततमनतिव्याध्यं कृतम् AV. ix. 2. 16 = AV.(P.) xvi. 77. 1.

अतिव्याध्यर्दित (ativyādhyardita) *adj.* suffering from severe disease अतिव्याध्यर्दिता लोकाः क्षितीशाः कलहोत्सुकाः । प्रमोदाब्दे NāraS. iii. 0. 20.

अतिव्यापक (ati-vyāpaka) *adj.* over-extensive, over-pervasive, too wide तदपि … अतिव्यापकं च व्यभिचार्यादिबोधानामित्यपेक्षणीयम् NyāyMañ. i. 100. 13; i. 385. 3; न वृक्षादीनां शरीरत्वमित्यतिव्यापकं लक्षणम् NyāyMañ. ii. 45. 16; ii. 132. 15; ii. 170. 30; अतिव्यापकमिदं लिङ्गलक्षणम् । प्रकरणसमे कालात्ययापदिष्टे च भावात् NyāyKa. 202. 13; कार्यानाश्रयो गुण इति चातिव्यापकम् । कर्मण्यपि गतत्वात् Kiraṇā. 160. 2; ध्वनिस्वरूपमनाख्येयमित्यतिव्यापकं लक्षणं स्यादिति भावः Loc. 233. 13 (*on* 3. 53 (48)); क्रत्वर्थलक्षणं यत्तु तदतिव्यापकं मतम् TarkRa. 8. 9 (*on* iv. 1. 2); NyāyRaMā. 50. 14; अतिव्यापकमिदं लक्षणमप्रमाणेऽपि स्मृत्यादौ भावात् NyāyRa. 134. 18 (*on* 4. 4); 406. 17 (5); NyāyMa. 356. 8; स्नेहस्तु स्वरूपासिद्धोऽतिव्यापकश्च । जलेऽननुभवात् घृतादौ पार्थिवेऽनुभवाच्च Upask. 70. 5 (*on* ii. 1. 2); SarvaDaKau. 5. 19; अतिव्यापकं चैतल्लक्षणं शब्दमात्रसाधारणत्वात् YuktiSneha. 72. 22 (*on* 1. 1. 5); नन्विदं धर्मलक्षणमात्मतत्त्वसाक्षात्कारेऽतिव्यापकम् VīraMi. 22. 5 (*on* 1. 8)

अतिव्यापकता (ativyāpaka-tā) *f.* the state of being over-pervasive or over-extensive चेष्टा व्यापारः स चातिव्यापकतया अव्यापकतया च न लक्षणम् TātpaṬ.(Vā.) 219. 1 (i. 1. 11); न तु सदेव विशेषणम् अतिव्यापकतया अलक्षणत्वात् NyāyVārPari. 538. 2; 651. 4.

अतिव्यापकतादोष (ativyāpakatā-doṣa) *m.* fault of over-pervasiveness तथापि स एवातिव्यापकतादोषः KhaṇḍanKhā. 632. 9.

अतिव्यापकत्व (ativyāpaka-tva) *n.* the state of being too wide, over-pervasiveness ननु चित्तोद्वेगादात्मन एव पीडोत्पद्यत इति कथमतिव्यापकत्वमित्याशङ्क्य आह TātpaṬ.(U.) 111. 21 (2. 245); तदेतदप्यतिव्यापकत्वादसमाधानमिति S'arka. 72. 6; प्रकृतमतिव्यापकत्वं लक्षणस्योपसंहरति Kāśi. i. 208. 14 (4. 14); TātpaṬ.(Vā.) 22. 2 (i. 1. 1); 375. 19 (i. 2. 25); धात्वर्थमात्रस्य चातिव्यापकत्वात् Kiraṇā. 340. 6; अतो लक्षणस्य नातिव्यापकत्वम् NyāyVārPari. 212. 1; 314. 4; परत्र पूर्वदृष्टावभास इत्यलक्षणमतिव्यापकत्वात् Bhām. 10. 6 (i. 1. 1); 'अव्ययीभावाच्च' इत्येतदतिव्यापकत्वादकृत्वा परिमुखादिभ्य एव ञ्यो विधेयः Pradī. 208A. 30 (P. iv. 3. 59); अतिव्यापकत्वं चात्र प्रसरीसर्ति । सर्वानुमानेषु तत्तत्सपक्षस्योपाधितापातात् PrakaVi. 567. 14; TarkSaṁ.(Ā.) 13. 7 (1. 5); 23. 3 (1. 10); 29. 25 (1. 14); न च कृतजातीयत्वलक्षणं शस्त्रक्रियत्वमुपाधिः । सत्तयातिव्यापकत्वात् NyāyKu. 89. 11.

अतिव्यापन (ati-vyāpana) *n.* undue extension, over-application तत्तु … तन्मूलोक्ते लिङ्गोदाहरणे अतिव्यापनाच्चोपेक्ष्यम् RasGaṅ. 154. 18 (2); 213. 6 (2); 462. 6 (2); 585. 6 (2); अप्राप्तांशस्य पूर्तिः फलमपि यदि तत्राधिकं योजनीयं शेषांशव्यर्थता स्यादखिलफलकताविध्यतिव्यापनं च VidhiRa. 109. 14 (18)

अतिव्यापिन् (ativyāp-in) *adj.* [*f.* -ī] over-extensive, unwarrantedly applicable अतिव्यापिनी शब्दार्थस्य व्यवस्था स्यात् Nyās. i. 153. 17 (*on* i. 2. 10); ननु लक्षणमतिव्यापि NayaVi. 143. 1 (*on* i. 1. 5); धर्माधर्मजनकत्वं जातेरपीति कारणत्वमतिव्यापीति चेन्न Upask. 28. 3 (*on* i. 1. 8)

अतिव्यापृता (ati-vyāpr̥tā) *adj.* (*f.*) fully engrossed रोदित्यङ्कगतां विलोक्य सुचिरं वीणामतिव्यापृता S'r̥ṅgāTi.(Ru.) 2. 22.

अतिव्याप्त (ati-vyāpta) *adj.* over-pervasive, too wide, applied beyond limit लक्षणं नातिव्याप्तम् TattvPrakā. 15A. 13 (*on* i. 1. 11); तच्चात्मन्यनिर्व-

चनीयेऽप्यस्तीत्यतिव्याप्तम् NyāySu.(Ja.) 41B. 2 (*on* i. 1. 1); न हि⋯सत्यत्वादिकं प्रत्येकमतिव्याप्तम् Nyāyāmṛ. 458B. 7; गुणक्रियाशून्यत्वमाद्यक्षणे घटादावतिव्याप्तम् SiddhāMu. 8. 4 (*on* 14); इदं व्यावहारिकलक्षणमतिव्याप्तम् AdvaiSi. 659. 7; तत्रातिव्याप्तं ब्रह्मलक्षणम् S'ivārkaMaDī. i. 234. 23; तच्चातिव्याप्तमग्नेर्विकृतिजुषि विधौ VidhiRa. 18 (109. 8) (*on* i. 1. 17); तदनुवादस्याप्रामाण्यसाधनात् ⋯ अतिव्याप्तम् MānaMe. 6. 5; तत्परकीयासामान्ययोरतिव्याप्तमिति नास्माभिरङ्गीक्रियते S'ṛṅgāMañ.(A.) 3. 20.

अतिव्याप्तत्व (ativyāpta-tva) *n.* over-pervasiveness इन्द्रियाश्रयत्वभोगायतनत्वयोः स्थावरादिषु⋯अतिव्याप्तत्वाच्च शरीरलक्षणत्वानुपपत्तेः NītiMā. 40. 2.

अतिव्याप्ति (ati-vyāpti) *f.* **i** over-applicability, over-pervasion, too wide a coverage (of a rule or definition) [one of the three faults of a definition (*lakṣaṇa*) defined as अतिव्याप्तिर्व्याप्यत्वासिद्धिः। विपक्षाद् व्यावृत्त्यभावात् सोपाधिकत्वाच्च TarkBhā.(Ke.) 93. 10; अलक्ष्ये लक्षणगमनमतिव्याप्तिः TarkKau. 21. 13; अलक्ष्यवृत्तित्वमतिव्याप्तिः। यथा गोः शृङ्गित्वम् TarkSaṁDī. (A.) 4. 8; लक्ष्यतावच्छेदकसमानाधिकरणत्वे सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसमानाधिकरण्यमतिव्याप्तिः Nyāybodhinī. 11. 3]; इदानीमतिव्याप्तिं दर्शयितुमाह TātpaṬ.(U.) 111. 20 (*on* 2. 244); अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया Dhvanyā. 1. 14; तथा चातिव्याप्तिः संशयविपर्ययबुद्ध्योरपि इन्द्रियसंप्रयोगजत्वेन प्रत्यक्षत्वप्रसङ्गात् NyāyMañ. i. 93. 19; ii. 45. 19; अयं शोध्यशोधकभावो न चानवस्था नातिप्रसङ्गो नातिव्याप्तिः ParāTri. 164. 7; न हि तत्तस्य लक्षणमतिव्याप्तेः TātpaṬ.(Vā.) 113. 17 (*on* i. 1. 3); 157. 1 (*on* i. 1. 5); संबन्धमात्रस्य वा प्रकाशत्वे ज्ञातृज्ञानज्ञेयशरीरेन्द्रियेष्वव्याप्त्यतिव्याप्ती ĀtmaSi. 64. 10; लक्षणमप्येतदतिव्याप्तेरयुक्तम् Kāśi. i. 206. 24 (*on* 4. 10); संनिहितविषयं च प्रत्यभिज्ञानं समीचीनमिति नातिव्याप्तिः Bhām. 10. 12 (*on* i. 1. 1); न हि तेनाप्यत्राव्याप्त्यतिव्याप्ती प्रसञ्जयितुं शक्येते NyāyVārPari. 168. 2; अव्याप्तिरतिसंक्षेपादतिव्याप्तिश्च विस्तरात् AśvaCi. 9. 49; सर्वत्र ध्वनिव्यवहारः स्यादित्यतिव्याप्तिमभ्युपगम्यापि ब्रूमः Loc. 54. 16 (*on* 1. 19); नापि परस्परतोऽतिव्याप्तेः Kiraṇā. 41. 4; 49. 1; न चैवमतिव्याप्तिः निर्वाच्यस्यात्मादेरबाधात् NyāyMa. 125. 1; दृष्टान्तेन दार्ष्टान्तिकं समर्थ्यते तेनास्य लक्षणस्यातिव्याप्तिः Kāvyānu.(He.) 334. 19; न च ⋯ यादृच्छिकसंवादिलिङ्गविभ्रमादिभिरतिव्याप्तिः TārkiRa. 7. 7; 248. 2; अत्र संशयविपर्ययबुद्धिजन्मनोऽपीन्द्रियसंप्रयोगे सति प्रत्यक्षत्वप्रसङ्गादतिव्याप्तिः PramāMī. 23. 22 (*on* i. 1. 29); नन्वेतावतापि न प्रकृतलक्षणखण्डनं भवत्यव्याप्तेरतिव्याप्तेर्वानुद्भावनात् KhaṇḍanKhā. 537. 15; न च केवलं कारणाभावाद्विध्यविवक्षानुचिता किन्त्वतिव्याप्तेरपि NyāySu.(So.) 48. 7 (*on* i. 2. 7); प्रदीपादेः सजातीयप्रकाशाप्रकाश्यस्यास्वयंप्रकाशत्वेन लक्षणस्यातिव्याप्तेः TattvPradī.(Ci.) 4. 6; 80. 1; एतावति लक्षणे स्मृतावतिव्याप्तिः स्यात् PrakaVi. 7. 13; 572. 21; न परिणीतायां परगामिन्यामतिव्याप्तिः RasMañ. 2 (4); मिथ्याज्ञाने⋯दर्शितलक्षणसंभवादतिव्याप्तिः TarkSaṁ.(Ā.) 7. 4; अत एव शास्त्रादावीश्वरे च नातिव्याप्तिः S'rutaPra. iA. 67. 29 (*on* i. 1. 1); नापि पृथगाश्रयाश्रयित्वम्, गुणत्वादावतिव्याप्तेः NyāyKu. 131. 2; वर्णः पदं किं वर्णौ वा वर्णा वा पदमुच्यते। अव्याप्तेरप्यतिव्याप्तेः पदं दुष्यति लक्षणे BhāvPra.(S'ā.) 176. 11 (6); संबन्धेन विना पुनरप्रस्तुतात्प्रस्तुतावगतावतिव्याप्तिः Ekāva. 8. 27 (6) (263. 8); ननु न प्रत्यक्षं तावदिन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यभिचारि। आत्मानुमितिस्मृत्योर्ज्ञानमात्रे चातिव्याप्तेः TattvCin. i. 539. 2; ईश्वरपारतन्त्र्यस्येश्वरेऽपि सत्त्वात् ⋯ ब्रह्मण्यतिव्याप्तिस्तदवस्थैवेति VedāntRaMañ. 1. 1 (15. 9); न चात्रातिव्याप्तिरव्याप्तिर्वा ततश्च लक्षणसिद्धिः NyāyPari. 223. 10; 221. 4; न च तन्निमित्तत्वमात्रं लक्षणम्, अतिव्याप्तेः NyāySiA. 193. 12; 209. 14; तस्मात्परतस्त्वेन स्वीकृताप्रामाण्यं विज्ञानसामान्यसामग्रीजन्याश्रितमित्यतिव्याप्तिरापद्येत SarvaDaSaṁ. 12. 237; 'अर्थो धर्म' इत्युक्ते ब्रह्मणि ⋯ घटादौ चातिव्याप्तिः NyāyMāVi. 15. 8 (*on* i. 1. 2); 71. 1 (*on* ii. 1. 7); वर्तमाननिषेधात्स्यादतीतादावतिव्याप्तिः TattvPrakā. 9A. 11 (*on* i. 1. 2); अतिव्याप्त्यसंभवाविवाव्याप्तिरपि हि लक्षणदोषः NyāySu.(Ja.) 246A. 10 (*on* ii. 1. 2); आकाशादौ लक्षणस्यातिव्याप्तेश्च Vādā. 18. 2; ब्रह्मलक्षणस्य प्रधानेऽतिव्याप्तिमाशङ्क्याह BrahmSūBh.(S'rī.) i. 191. 2 (*on* i. 1. 5); तत्किं वस्त्वलंकाररसादिलक्षणस्त्रिरूपो ध्वनिः काव्यस्यात्मा। उत रसादिरूपमात्रो वा। नाद्यः। प्रहेलिकादावतिव्याप्तेः SāhiDa. 18. 1; न तु सांसिद्धिकं द्रवत्वमात्रं तु पृथिव्या अद्भिः सामान्यं तु सांसिद्धिकं द्रवत्वमपीति नातिव्याप्तिः Upask. 77. 8 (*on* ii. 1. 6); SarvaDaKau. 64. 16; S'aṅkaVi.(Ā.) 109. 2; अननुसंधानं तत्प्रयोजकं चेत् स्मृतिप्रमोषप्रत्यभिज्ञयोरतिव्याप्त्यव्याप्ती TantrRaha. 7. 6; नापि बाधकज्ञानविषयत्वं ब्रह्मण्यतिव्याप्तेः Nyāyāmṛ. 15B. 8; ब्रह्मणि घटादौ चातिव्याप्तिः YuktiSneha. 35. 24 (*on* i. 1. 2); न च सप्तमीबहुवचनेऽतिव्याप्तिः Prasā. i. 127. 9; देशान्तरगमनेन च सा शक्तिर्नाश्यत इति नोक्तलक्षणेऽतिव्याप्तिः SāṁkhyaPraBh. 123. 16 (*on* 5. 31); 58. 6 (*on* 1. 124); अतस्तत्र नातिव्याप्तिः YogŚā. 2. 3 (1); सत्त्वासत्त्वरूपधर्मद्वयशून्यत्वेन तत्रातिव्याप्तिः AdvaiSi. 90. 1; अदृष्टद्वारा तद्धेतुशब्देऽतिव्याप्तिराह AlaṅkāS'e. 1. 1 (51); ब्रह्मलक्षणस्यातिव्याप्तिर्निरस्ता S'ivārkaMaDī. i. 206. 10 (*on* i. 1. 13); उपमेयोपमायां चातिव्याप्तिः CitraMī. 6. 18; तादृशशाब्दज्ञानादावतिव्याप्तिः VedāntPari. 52. 2; 68. 7; 101. 4; अन्यथा विकसत्कमलकुड्मलदलकर्मण्यतिव्याप्तेः Tarkāmṛ. 11. 19; ब्राह्मे च समयबन्धाभावान्नातिव्याप्तिः VīraMi. 123. 5 (*on* 1. 60); तज्जातीयत्वनिवेशेऽपि वेदस्थलाक्षणिकेष्वतिव्याप्तेः S'aktiVā. 11. 2; संबन्धित्वमिति चेत् निमित्तेऽतिव्याप्तेः MīmāKau. ii. 135. 12 (*on* iii. 1. 2); यथा चास्य न काप्यव्याप्त्यतिव्याप्ती तथा कौस्तुभे विस्तरः BhāṭṭDī. i. 182. 19 (*on* iii. 1. 2); अनलंकारभूतायामुपमायामतिव्याप्तिः RasGaṅ. 211. 13; 93. 1; 93. 6; तर्ह्यन्यत्रानुरागवत्यामपि पत्यावनुरागिण्यां परकीयायामतिव्याप्तिः S'ṛṅgāMañ.(A.) 3. 6; ज्ञानं प्रमेत्युक्ते शुक्तिकायामिदं रजतमिति ज्ञानेऽतिव्याप्तिः YatīndraDī. 3. 16; न चर्मवर्मादिष्वतिव्याप्तिः SiddhāKau. 667B. 17; LalitāSaBh. 61. 30 (*on* 95); अत्र लक्षणे ⋯ गुरुमुखान्मन्त्रग्रहणे नातिव्याप्तिः SetuBa. 100. 10; उपमाननिवेशाच्च ⋯ हेत्वलंकारे नातिव्याप्तिः AlaṅkāMañ. 22. 10; 167. 12; AlaṅkāKau.(Vi.) 6. 3; **ii** specific or limited pervasion अतिव्याप्तिर्नाम सर्वत्रावस्थितस्योद्गारस्योद्गीथशब्देन विशेषेऽवस्थानम् BrahmSūBh.(Bhā.) 178. 3 (*on* iii. 3. 9)

अतिव्याप्तितादवस्थ्य (ativyāpti-tādavasthya) *n.* *status quo* of over-pervasion नित्यप्रयत्नादौ अतिव्याप्तितादवस्थ्यात् TarkSaṁ.(Ā.) 72. 13.

अतिव्याप्तित्व (ativyāpti-tva) *n.* character of over-pervasion जातौ व्यक्तिलक्षणसत्त्वस्यैव तस्याप्यतिव्याप्तित्वात् S'ivārkaMaDī. i. 226. 11 (*on* i. 1. 16)

अतिव्याप्तिदान (ativyāpti-dāna) *n.* giving room for (the fault of) over-pervasion सामान्यतोऽर्थवत्त्वग्रहणेन किञ्चित्फलं प्रत्ययेष्वतिव्याप्तिदानातिरिक्तम् LaS'abdeS'e. i. 164. 16.

अतिव्याप्तिदुष्टत्व (ativyāptiduṣṭa-tva) *n.* faultiness through over-pervasion अप्राप्तिसमर्थनस्यातिव्याप्तिदुष्टत्वात्तत्परिहाराय ⋯ नियमापूर्वविधिव्यवस्थोपपादनीया VidhiRa. 4 (19. 9)

अतिव्याप्तिदोष (ativyāpti-doṣa) *m.* fault of over-pervasion सूत्रयोजनमसमीचीनमतिव्याप्तिदोषानतिवृत्तेः NyāyMañ. i. 93. 18.

अतिव्याप्तिनिरस्त (ativyāpti-nirasta) *adj.* rejected because of (the fault of) over-pervasion न तु लक्षणपरत्वं सूत्रस्य ⋯ अतिव्याप्तिनिरस्तम् NyāyRa. 214. 7 (*on* 5. 20)

अतिव्याप्तिनिराकरण (ativyāpti-nirākaraṇa) *n.* prevention of (the fault of) over-pervasion जीवे ब्रह्मलक्षणस्यातिव्याप्तिनिराकरणार्थम् S'ivārkaMaDī. i. 226. 9 (*on* i. 1. 16)

अतिव्याप्तिनिरास (ativyāpti-nirāsa) *m.* prevention of (the fault of) over-pervasion अतिव्याप्तिनिरासाय द्वितीयं विग्रहं विवृणोति TātpaṬ.(Vā.) 157. 9 (*on* i. 1. 5); येन ⋯ लक्षणस्यातिव्याप्तिनिरासोऽभिमतस्तदप्राप्तेः VidhiRa. 12 (84. 10); परमेश्वर इत्यतिव्याप्तिनिरासादधिकरणप्रयोजनसिद्धिरविशिष्टा S'ivārkaMaDī. i. 230. 15 (*on* i. 1. 16); i. 246. 20 (*on* i. 1. 20); प्रवृत्तायामुपमेयोपमायामतिव्याप्तिनिरासेऽपि CitraMī. 12. 2; ससंदेहोत्प्रेक्षासमासोक्तिपरिणामभ्रान्तिमत्स्वतिव्याप्तिनिरासः RasGaṅ. 299. 9.

अतिव्याप्तिनिरासार्थम् (ativyāptinirāsārtham) *adv.* for the purpose of rejection of (the fault of) over-pervasion आकाशप्राणाधिकरणद्वयमाकाशप्राणयोरतिव्याप्तिनिरासार्थं न भवति S'ivārkaMaDī. i. 246. 25 (*on* i. 1. 20)

अतिव्याप्तिनिवारण (ativyāpti-nivāraṇa) *n.* prevention of (the fault of) over-pervasion न हि सूत्रकारो वार्त्तिककारस्य वचनेन अतिव्याप्तिनिवारणं मन्यते Pradī. ii. 351B. 10 (*on* ii. 1. 2) = PadMañ. *on* KāśiVṛ. *on* P. ii. 1. 2.

अतिव्याप्तिनिवारणार्थम् (ativyāptinivāraṇārtham) *adv.* in order to prevent over-pervasion अतिव्याप्तिनिवारणार्थमवश्यं कर्तव्यम् Pradī. ii. 351A. 2 (*on* ii. 1. 2)

अतिव्याप्तिपर (ativyāpti-para) *adj.* referring to over-pervasion तत्रैतस्या अतिव्याप्तिपरभाष्याङ्गतिः (? सङ्गतिः) LaS'abdeS'e. i. 194. 8.

अतिव्याप्तिपराहत (ativyāpti-parāhata) *adj.* overthrown by reason of over-pervasion तदपि दुःस्वप्नादावतिव्याप्तिपराहतम् (लक्षणान्तरम्) PrakaVi. 574. 20.

अतिव्याप्तिपरिजिहीर्षा (ativyāpti-parijihīrṣā) *f.* desire to avoid (the fault of) over-pervasion अतिव्याप्तिपरिजिहीर्षयान्वयव्यतिरेकाभ्याम् ⋯ अनैकान्तिकमित्युच्यते KhaṇḍanKhā. 861. 12.

अतिव्याप्तिपरिहार (ativyāpti-parihāra) *m.* removal of the over-pervasion (of a definition etc.) विशिष्टशब्दो यदावधारणरहिताधिक्यवाच्युपात्तस्तदातिव्याप्तिपरिहाराय आह – नञ्विशिष्ट इति Pradī. ii. 403B. 36 (*on* ii. 1. 59); i. 354A. 15 (*on* i. 1. 38); PramāMī. 24. 11 (*on* i. 1. 29); युक्तिमन्तरेण लक्षणस्यातिव्याप्तिपरिहारासंभवात् PrakaVi. 40. 17; TattvPradī.(Ci.) 9. 10; प्रबलभ्रान्तिज्ञाननिवर्त्यसत्यरजतादिष्वतिव्याप्तिपरिहाराय यथावस्थितशब्दः S'rutaPra. iA. 79. 5 (*on* i. 1. 1); iB. 11. 17 (*on* i. 1. 1); iB. 285. 15 (*on* i. 2. 1); दुःखध्वंसमात्रमेकाधिकरणदुःखध्वंसो वा संसारदशायामप्यस्तीति तत्रातिव्याप्तिपरिहाराय दुःखेत्यादि SarvaDaKau. 29. 1; AdvaiSi. 673. 3; मतिचेष्टयोः पर्यायभेदेनोपमानत्व-

स्योपमेयत्वस्य च सत्त्वेनातिव्याप्तिपरिहारायैकस्मिन्पर्याये यं प्रत्युपमानत्वं तं प्रत्येव पर्यायान्तरे उपमेयत्वं विवक्षणीयम् CitraMī. 36. 16; परिगणनं कर्तव्यम् अव्याप्त्यतिव्याप्तिपरिहाराय SiddhāKau. 192B. 13.

अतिव्याप्तिप्रसङ्ग (ativyāpti–prasaṅga) *m.* contigency of the over-pervasion (of a definition etc.) किमप्राप्तयोः प्राप्तिः संयोगः ··· सर्वथापि नोपपद्यते । अन्योन्यसंश्रयापत्तेरतिव्याप्तिप्रसङ्गतः TattvPradī.(Ci.) 301. 1; तच्च यदा हरेरितरस्य स्यात्तदा प्रागुक्तलक्षणस्यातिव्याप्तिप्रसङ्गादवश्यं निर्णेयमेव TattvPrakā. 31B. 11 (*on* i. 2. 9); तदविवक्षायां हन्त्यादिनियमविधिष्वतिव्याप्तिप्रसङ्गः VidhiRa. 2 (11. 14); 6 (33. 11); वक्ष्यमाणोदाहरणे आरोपपूर्वकापह्नवेऽतिव्याप्तिप्रसङ्गात् CitraMī. 70. 19.

अतिव्याप्तिभङ्ग (ativyāpti–bhaṅga) *m.* removal of the over-pervasion (of a definition or a rule) येनातिव्याप्तिभङ्गः किल नियमविधौ किं तदात्यन्तिकत्वम् VidhiRa. 12 (84. 2)

अतिव्याप्तिमत् (ativyāpti–ma(n)t) *adj.* having the (defect of) over-pervasion (of a definition) यदि च यथाकथंचिदित्याश्रीयेत ततो विशेषणे सत्यप्यतिव्याप्तिमल्लक्षणं स्यात् S'āstrDī. 49. 8 (*on* i. 1. 5)

अतिव्याप्तिवक्त्र (ativyāpti–vaktra) *n.* mouth of the over-pervasion (of a definition) तस्मादादाय लक्ष्मक्षयकृति निहितं स्यादतिव्याप्तिवक्त्रे VidhiRa. 3 (15. 18)

अतिव्याप्तिवारकत्व (ativyāptivāraka–tva) *n.* the state of being preventive of (a definition) from being over-prevasive भावपदस्य ज्ञानप्रागभावे ज्ञानजन्यकार्यप्रागभावे चातिव्याप्तिवारकत्वेन सार्थकत्वात् AdvaiSi. 544. 22.

अतिव्याप्तिवारण (ativyāpti–vāraṇa) *n.* removal or prevention of the (defect of) over-pervasion (of a definition) प्रधानादावतिव्याप्तिवारणाय ··· सर्वज्ञत्वमर्थात्सूत्रयाञ्चकार PrakaVi. 48. 9; यागादिरेव धर्मः । तल्लक्षणं वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म इति । प्रयोजने अतिव्याप्तिवारणाय प्रयोजनवदिति ArthSaṁ. 6. 4; 6. 5; शब्दजन्ये शब्दजनके च शब्देऽतिव्याप्तिवारणाय स्वयं विजातीय इति SarvaDaKau. 31. 16; यदि एकदेशत्वमात्रमुपधेयाभेदप्रयोजकं तदा पूर्वमहं सुखीत्यादिस्मृतावतिव्याप्तिवारणाय वर्तमानत्वं विषयविशेषणं देयम् VedāntPari. 50. 2; SiddhāMu. 13. 24 (*on* 28); अत्राप्यसति निर्धर्मके ब्रह्मणि चातिव्याप्तिवारणाय सत्त्वेन प्रतीयमानत्वं देयम् AdvaiSi. 202. 1; 664. 9; किं चातिरोहितरूपिण इत्यनेन ससंदेहभ्रान्तिमतोरतिव्याप्तिवारणेऽपि नापह्नवेऽतिव्याप्तिवारणम् CitraMī. 45. 21; वाच्यापेक्षया प्रधानीभूतं व्यङ्ग्यान्तरमादाय गुणीभूतं व्यङ्ग्यमादायातिव्याप्तिवारणायावधारणम् RasGaṅ. 20. 2–3; 262. 5; 340. 10; सोमादिष्वङ्गत्वेन विहितेष्वतिव्याप्तिवारणाय तृतीयान्तम् BhāṭṭCin. i. 6. 14 (*on* i. 1. 2); i. 73. 30 (*on* i. 1. 4); न च ··· अत्र प्रमेयमितिज्ञाने अतिव्याप्तिवारणाय सामान्येति ···वाच्यम् JñānBiPra. 26. 20; 17. 27; न चात्र विशिष्टरूपकेऽतिव्याप्तिवारणाय बिम्बप्रतिबिम्बभावानापन्नोपमानतादात्म्यारोप एव निवेशनीयः AlaṅkāMañ. 23. 22; 167. 10; 241. 16; अनन्वयेऽतिव्याप्तिवारणाय उपमेयतावच्छेदकावच्छिन्नत्वाभाव उक्तः AlaṅkāKau.(Vi.) 6. 1; 18. 2.

अतिव्याप्तिविधुर (ativyāpti–vidhura) *adj.* devoid of (the fault of) over-pervasion (of a definition) न यत्किञ्चित्सादृश्यज्ञानं शब्दशक्तिग्रहणकारणं किंत्वतिव्याप्तिविधुरम् । यथा गोशब्दे सास्नादिमत्त्वमेवमन्यत्रान्यदिति भावः NyāySu.(Ja.) 495A. 13 (*on* iii. 2. 1)

अतिव्याप्तिविरह (ativyāpti–viraha) *m.* absence of (the fault of) over-pervasion (of a definition) संस्कारजनिततत्ता(v. l. तन्नाश°)स्मृतिरेव हेतुर्न तु संस्कारोऽपीत्यतिव्याप्तिविरहात् TarkKau. 6. 20.

अतिव्याप्तिव्यवच्छेद (ativyāpti–vyavaccheda) *m.* elimination of (the defect of) over-pervasion (of a definition) प्रत्यभिज्ञायामतिव्याप्तिव्यवच्छेदायाह परत्रेति PrakaVi. 7. 16.

अतिव्याप्तिव्युदास (ativyāpti–vyudāsa) *m.* exclusion of (the fault of) over-pervasion (of a definition) पर-अतिशयशब्दयोः कर्मधारयशङ्कानिवृत्त्यर्थो गतशब्दः । तेन स्वगतातिशयाधायके शेषिण्यतिव्याप्तिव्युदासः S'rutaPra. iB. 94. 27 (*on* i. 1. 1)

अतिव्याप्तिशङ्का (ativyāpti–śaṅkā) *f.* doubt about the (presence of the defect of) over-pervasion (of a definition) परब्रह्मणः ··· रूपमभिधाय तल्लक्षणस्य नामरूढिवशादन्यत्रातिव्याप्तिशङ्कायामधिकरणमारभ्यते BrahmSūBh.(S'rī.) i. 264. 3 (*on* i. 1. 23–24); CitraMī. 15. 9; 15. 6; 38. 21.

अतिव्याप्तिसंभावना (ativyāpti–sambhāvanā) *f.* possibility of (the defect of) the over-pervasion (of a definition) तदास्त्येव परिसंख्याविधिरिति नातिव्याप्तिसम्भावनापि BhāṭṭCin. i. 73. 33.

अतिव्याप्तिस्थल (ativyāpti–sthala) *n.* case of (the defect of) over-pervasion (of a definition) विषयशुद्ध्यर्थमन्यदपि नियमविधिरूपमतिव्याप्तिस्थलमुदाह्रियते VidhiRa. 13 (92. 3)

अतिव्याप्त्यनिरास (ativyāpty–anirāsa) *m.* non-removal of (the defect of) over-pervasion (of a definition) इति युगपत्प्रवृत्तायां तस्यामतिव्याप्त्यनिरासात् CitraMī. 12. 8 = AlaṅkāKau.(Vi.) 18. 7.

अतिव्याप्त्यभाव (ativyāpty–abhāva) *m.* absence of (the fault of) over-pervasion (of a definition) तथा च स्वनिष्ठसत्त्वं पुरस्कृत्यातिव्याप्त्यभावोऽस्तीत्यर्थः LaCandr. 193. 10.

अतिव्याप्त्यभिधान (ativyāpty–abhidhāna) *n.* statement of (the fault of) over pervasion (of a definition) एवं च मिथ्याज्ञानमध्यास इत्यवभासपदेन व्युत्पाद्य प्रत्यभिज्ञायामतिव्याप्त्यभिधानं शोभतेतरामित्युपहासानवसरः VedāntKa. 12. 6 (*on* i. 1. 1)

अतिव्याप्त्यादिदोष (ativyāptyādi–doṣa) *m.* defect (of the nature of) over-pervasion (of a definition) etc. न धर्मग्राहि प्रत्यक्षं प्रत्यक्षत्वादस्मदादिप्रत्यक्षवदित्येवमन्यत्रैव सूत्रतात्पर्यान्नातिव्याप्त्यादिदोषावसर इहेति NyāyMañ. i. 94. 22; लक्षणं व्यभिचारि स्यादतिव्याप्त्यादिदोषतः BhāvPra.(S'ā.) 176. 15(6); अतिव्याप्त्यादिदोषपरिहारेण लक्षणनिर्णयाय अत्रैवार्थात् सूत्रिते प्रमाणयुक्ती इत्यवगन्तव्यम् VivaPraSaṁ. 248. 13; 'तद्रूपकमभेदो य उपमानोपमेययोः' इत्यादिलक्षणेषु अतिव्याप्त्यादिदोषा यथासंभवमुन्नेयाः CitraMī. 48. 9.

अतिव्याप्त्यादिशून्य (ativyāptyādi–śūnya) *adj.* free from (the defect of) over-pervasion etc. अतिव्याप्त्यादिशून्यविष्णुलक्षणत्वाद्विष्णुरेव श्रुत्युक्तं ब्रह्म TattvPrakā. 9A. 13 (*on* i. 1. 2)

अतिव्याप्त्यापत्ति (ativyāpty–āpatti) *f.* contingency of over-pervasion पारमार्थिकत्वाकारेण निषेधेनातिव्याप्त्यापत्तेश्च Nyāyāmṛ. 37B. 8; तथा सति ··· चैत्रशरीरस्यापि मैत्रं प्रति शरीरत्वप्रसङ्गेन अतिव्याप्त्यापत्तेः PūrvottaVāNaMā. 199. 2; ब्राह्मणस्यापि मन्त्राभावे स्मारकत्वस्य पञ्चमे वक्ष्यमाणत्वेन तत्रातिव्याप्त्यापत्तेः MīmāKau. iii(2). 107. 20 (*on* ii. 1. 33); अन्यथा संमार्गादिषु प्रधानकर्मलक्षणस्यातिव्याप्त्यापत्तेः MayūMāli. 108. 10 (*on* ii. 1. 4); अथ किं भावत्वम् ? विभावानुभावभिन्नत्वे सति रसव्यञ्जकत्वमिति चेत् रसकाव्यवाक्येऽतिव्याप्त्यापत्तेः RasGaṅ. 91. 18; 509. 12; 649. 12.

अतिव्याप्त्यावहत्व (ativyāptyāvaha–tva) *n.* the state of bringing out (the defect of) over-pervasion एवमतिव्याप्त्यावहत्वादनियमेनैकानेकविध्यप्रवृत्त्योरपूर्वविध्यादिलक्षणानुप्रवेशकल्पनमयुक्तमिति भावः VidhiRa. 9 (45. 3)

अतिव्याप्त्युक्ति (ativyāpty–ukti) *f.* statement of over-pervasion (of a definition) उपहिततादात्म्येऽपि शुद्धो न सत्त्वादिधर्मक इत्याशयेनातिव्याप्त्युक्तिः GuruCandr. i. 42. 4.

अतिव्याप्त्युद्भावन (ativyāpty–udbhāvana) *n.* pointing out of the (defect of) over-pervasion एवं चासति अतिव्याप्त्युद्भावनमसङ्गतमेव GuruCandr. i. 85. 24.

अतिव्याप्त्युपन्यास (ativyāpty–upanyāsa) *m.* statement of over-pervasion (of a definition) अक्षद्यूरित्यत्रातिव्याप्त्युपन्यासानन्तरं तत्परिजिहीर्षया 'नाजानन्तर्ये' इति परिभाषाश्रयणानुपपत्तिः PāṇiTaVāNaMā. 26. 24.

अतिव्यामूढभाषित (ativyāmūḍha–bhāṣita) *adj.* utterance of an entirely confused one, a stupid utterance तदेतदतिव्यामूढभाषितम् NyāyMañ i. 198. 28.

अतिव्यामोह (ati–vyāmoha) great delusion, great mental confusion अतिव्यामोहाद्विषयेष्वेव मग्नस्य···अनर्थमूलम् NyāyVāPari. 79. 11.

अतिव्यायत (ati–vyāyata) *adj.* [*f.* –ā] very fat न चातिव्यायतां नारीं योजयेत्पुरुषायिते KāmSū. 165. 5 (2. 8) (comm. अतिस्थूलाम्); ये मन्दरागा गतवयसोऽतिव्यायताः ये च स्त्रीष्वलब्धवृत्तयः JayaMa. 173. 25 (2. 9)

अतिव्यायाम (ati–vyāyāma) *m. n.* over-exertion, too much of gymnastic exercise अतिव्यायाम°···°निद्राच्छेदादिभिः (ग्लानिः)··· समुत्पद्यते NāṭyaS'ā. 7. 48; अतिव्यायामवातातपमैथुनानि ··· वर्ज्यानि KalyāKā. 3. 46; अतिव्यायामात् ··· स म्रियते Hastyāyur. 320. 1 (2. 66); परिवर्ज्यताम् ···अतिव्यायाममर्कातपम् RasRaSa. 15. 63; अतिव्यायाम° ··· °अल्पाशनप्रभृतिभिरुपशोषितो रसधातुः SuśruS. i. 15. 33.

अतिव्यायामकर्शित (ativyāyāma–karśita) *adj.* emaciated or weak due to over-exertion अतिव्यायामकर्शितः ···तैलं पायितः सहसा तैलव्यापदमृच्छति Hastyāyur. 115. 9 (1. 16)

अतिव्यायामकृत (ativyāyāma–kṛta) *adj.* resulting from over-exertion अतिव्यायामकृतज्वरमुद्दिश्य ··· शयनपरायणः कथंचिद्वर्तते PadmPrā. 4. 1.

अतिव्यायामतस् (ativyāyāma–tas) *adv.* due to over-exertion अतिव्यायामतः कासो ज्वरच्छर्दिश्च जायते CaraS. i. 7. 33; AṣṭāHṛ. i. 2. 13; BhāvPra.(Bhā.) 5. 65.

अतिव्यायामसंभव (ativyāyāma–sambhava) *adj.* resulting from over-exertion कासशोषज्वरश्वासा अतिव्यायामसंभवाः SuśruS. iv. 24. 50.

अतिव्यायामानुपसेवन (ativyāyāmānupasevana) *n.* not practising

too much exercise अतिव्यायामानुपसेवनात् …श्लेष्मा संचयमुपगच्छति Hastyāyur. 385.7 (3.5)

अतिव्युत्पन्न (ati-vyutpanna) *adj.* very learned, great scholar [nt.]

अतिव्योमसीमन् (ati-vyomasīman) *n.* surpassing the limit of the sky, sky-scraper वसति गौरीसहचरः। कृत्वा प्रासादमाशामुखमुकुरमतिव्योमसीमानम् EI. ii. 240. 50.

अतिव्रज् (ati-vraj-) I. P. **i** to go beyond, to cross, to cross over प्रतिगृह्योत्तरेण होतारमतिव्रजेत् ĀśvaS'S. I. iii. 1. 18; नग्नो वह्निं नातिव्रजेत् PadmP. i. 55. 56; **ii** to offend, to disobey नातिव्रजेत्परं वाचा BrahmP. 235. 63.

अतिव्रजत् ((ati-vrájat) *adj.* flying over, travelling steadily तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भुज्युमूहथुः पतङ्गैः ṚV. i. 116. 4 = TaiĀ. i. 10. 3 (76. 3); **ii** passing beyond उत्तरेणाग्नीध्रीयमतिव्रजत्सु (अध्वर्युषु) ĀśvaS'S. I. iv. 10. 4.

अतिव्रज्य (ativraj-ya) *ger.* having gone beyond, crossing आहिताग्निराचम्यापरेण वेदिमतिव्रज्य दक्षिणत उपविश्य ĀśvaS'S. I. ii. 3. 11; अपरेण वेदिमतिव्रज्य दक्षिणतः शालामुखीयस्योपविशेत् ĀśvaS'S. I. iv. 10. 6; मैत्रावरुणमग्रतः कृत्वोत्तरेण हविर्धाने अतिव्रज्य … उपविशति होता ĀśvaS'S. I. iv. 11. 3; अतिव्रज्य समिध आदाय … उपतिष्ठते KauśiSū. 24. 13; ततस्त्वतिव्रज्य सुराष्ट्रमृद्धम् … उद्धवं भागवतं ददर्श BhāgP. iii. 1. 24; स एव भक्तियोगाख्य आत्यन्तिक उदाहृतः। येनातिव्रज्य त्रिगुणं मद्भावायोपपद्यते BhāgP. iii. 29. 14.

अतिव्रत (ati-vrata) *adj.* performing many vows अतिथिव्रती (v. l. अतिव्रतः) क्रियावांश्च (मुद्गलः) MahāBhā. iii. 246. 4; अत्यार्यमतिदातारमतिशूरमतिव्रतम्। … श्रोभेयाद्योपतर्पति MahāBhā. v. 39 50; SūktiRa. 167. 2; Subhāṣi. 2646.

अतिव्रतति (ati-vratati) *adj.* (a hill) full of creepers इहासमेऽतिव्रततौ समेति मरुत्तुषारः श्रमरुत्तुषारः Yādavā. 6. 37.

अतिव्रतवत् (ativrata-va(n)t) *adj.* observing vows well अधीत्य स्नात्वा गुरुभिरनुज्ञातेन खट्वारोढव्या। य इदानीमतोऽन्यथा करोति स उच्यते खट्वारूढोऽयं जाल्मः। नातिव्रतवानिति MahāBh. i. 384. 12 (*on* ii. 1. 26)

अतिव्रीड् (ati-vrīḍ-) I. Ā. to be excessively ashamed of, to feel great shame बद्धश्च वारुणैः पाशैर्नातिव्रीडे न च व्यथे BhāgP. viii. 22. 7.

अतिव्रीडाकर (ativrīḍā-kara) *adj.* very shameful प्रार्थनमतिव्रीडाकरम् TilaMañ. 59. 15.

अतिशंस् (ati-śaṁs-) I. P. **i** to recite beyond a given limit यद् बृहतीमतिशंसेत् प्राणानतिपद्येत AitBr. 17. 4 (460); न सहस्रमतिशंसेत् KauṣiBr. 18. 3 (80. 1); कस्मात्स्तोममतिशंसन्ति KauṣiBr. 28. 10 (138. 7); तदाहुः … किं नातिशंसन्ति … स ब्रूयात् … वाचम् एव नातिशंसन्ति JaimiBr. 2. 40; **ii** to continue reciting एकया द्वाभ्यां वा स्तोममतिशंसन्ति S'āṅkhāS'S. xii. 2. 10; अतिशंस्यादुक्थ्ये MānS'S. 88. 20; **iii** to omit in reciting [MW]; (*pass.*) **i** to be recited beyond a given limit न स स्तोमो देवान् गच्छति यो नातिशस्यते KauṣiBr. 28. 10 (138. 9); **ii** to be recommended highly, to excel in quality मयूरकण्ठसच्छायं भाराढ्यमतिशस्यते RasRaSa. 2. 127; सर्वरोगहरो वृष्यो जारणायातिशस्यते RasRaSa. 3. 141; मृत्तिका पाण्डुरस्थूला … मूषार्थमतिशस्यते RasRaSa. 10. 5; **iii** to be praised greatly नीलं मरकतच्छायं तेजाढ्यमतिशस्यते RasPraSu. 5. 70.

अतिशंसत् (ati-śaṁsat) *adj.* praising or speaking highly अद्युनापि धुनातीव करं मम कुचस्पृशम्। करेण कङ्कणक्वाणकैतवान्मेऽतिशंसता TārāS'a. 94.

अतिशंसन (ati-śaṁsana) *n.* continued recitation न त्वेतान्यनोप्यातिशंसनम् ĀśvaS'S. II. i. 12. 3; VaitāS'S. 35. 14.

अतिशंसना (ati-śaṁsanā) *f.* continued recitation अथो स्तोमातिशंसनाया एव AitĀ. i. 4. 1.

अतिशकटि (ati-śakaṭi) *adj.* surpassing carts अतिशकटये ब्राह्मणाय MahāBh. i. 314. 18 (*on* i. 4. 3) = PadMañ. *on* KāśiVṛ. *on* P. i. 4. 3; अतिशकटयै ब्राह्मण्यै MahāBh. i. 314. 18 (*on* i. 4. 3)

अतिशकल (ati-śakala) *n.* large piece न चातिशकलं चापि न च दन्तः प्रहीयते Hastyāyur. 627. 4 (4. 10)

अतिशक्करी (ati-śakkarī) *f.* [PW] cf. **अतिशक्करी.**

अतिशक्त (ati-śakta) *adj.* **A** very strong or powerful अशक्तश्च नराधिपः (v. l. अतिशक्ते नराधिपे) PañcT. 3. 36 (290. 7); व्यपदेशेऽपि सिद्धिः स्यादतिशक्ते नराधिपे Hitopa. 3. 13; **B** very competent or efficient दूरतोऽप्यतिशक्तः स लीलया केवलं प्रभुः AnuVyā. 11A. 3 (*on* i. 2. 1); विष्णुः … तत्तच्छक्तिप्रबोधनेऽतिशक्तः NyāySu.(Ja.) 156A. 1 (*on* i. 2. 1)

अतिशक्ति (ati-śakti) *adj.* possessing great power, excessively powerful त्रैलोक्यनाथस्य तवातिशक्तेः किमस्ति कार्यं मघवन् मयापि PārvPa. 2. 9; *f.* **i** excessive ability शक्त्या वा दक्षिणां दद्यात्। नातिशक्तिर्विधीयते KauśiSū. 74. 23; अतिशक्त्या पितॄनर्चेन् …। अन्वगृह्णात् प्रजाः सर्वा ययातिः MahāBhā. i. 70. 30; अतिशक्त्या प्रयच्छन्ति सन्तः सद्भिः समागताः MahāBhā. iii. 198. 85; **ii** excessive power (सा) सरीसृपेषु तेभ्योऽपि ह्यतिशक्त्या पतत्रिषु ViṣṇuP. vi. 7. 64; नाहारपानादिषु चातिशक्तिः YuktiKa. 199. 21; प्रचालयत्येष भगोलकोऽपि तथातिशक्त्या स्वपराम्बरस्थान् SiddhāTaVi. 25. 13; *adv.* beyond one's ability आजहुः संक्रमं द्रव्यं यथाशक्त्यतिशक्ति च Rāmā. vi. 298*(10)

अतिशक्तितस् (atiśakti-tas) *adv.* beyond one's power प्राणाचार्यं बुधः … पूजयेदतिशक्तितः CaraS. vi. 1 (4). 40 (1941 Ed.); vi. 1(4). 50 (1941 Ed.)

अतिशक्तिता (atiśakti-tā) *f.* the state of being excessively powerful अतिशक्तितयास्येमं संशयं छेत्तुमर्हसि AhirbuS. 27. 3; AmaK. 1672; KośaKaTa. 1. 1971.

अतिशक्तिभाज् (atiśakti-bhāj) *adj.* possessing excessive valour, AmaK. 420.

अतिशक्तिमत् (atiśakti-ma(n)t) *adj.* endowed with excessive power विरक्तप्रकृतिश्चैव विषयेष्वतिश(? स)क्तिमान् … विंशतिः पुरुषा अमी AgniP. 239. 11.

अतिशक्र (ati-śakra) *adj.* surpassing Indra, superior to Indra अतिशक्रमिदं सत्त्वं तव MahāBhā. iii. 164. 39; स तथा मुनिगुरुप्रकाशितोऽतिशक्रश्चक्रवर्ती AvantiKa. 217. 11; अत्रैतातिशक्रस्य राज्ञो यज्ञः सदोचितः RāmāMañ. 500. 20; मन्त्रीश्वरः श्रीरामेयजिनार्चनं विरचयाञ्चक्रेऽतिशक्रः श्रिया VasaViKā. 12. 50; तस्यातिशक्रस्य … चतुर्दश महारत्नान्यभूवन् PārśvC. 4. 97.

अतिशक्रशोभिन् (atiśakra-śobhin) *adj.* shining in a manner surpassing Indra प्रेक्ष्य दर्पणतलस्थमात्मनो राजवेषमतिशक्रशोभिनम् RaghuVa. 19. 30.

अतिशक्करिका (ati-śakvarikā) *f.* fifteen अतिशक्करिकात्यष्टिकैरैरतिधृतैर्मितैः। … स्नानमण्डपाः ĪśānS'iPa. ii. 50. 9.

अतिशक्करिकामित (atiśakvarikā-mita) *adj.* measuring fifteen रुद्रातिजगतीसङ्ख्यैरतिशक्करिकामितैः। तालैः स्तम्भा भवन्ति ĪśānS'iPa. ii. 50. 13.

अतिशक्करी (ati-śakvarī) *f.* **A** name of a metre of four lines, each containing fifteen syllables षष्टिरेवातिशक्करी ṚPrāti. 16. 54; दशपञ्चातिशक्कर्याः NāṭyaS'ā. 14. 49; छन्दसां नामानि…शक्करी। अतिशक्करी Jānāśra. 1. 2 (6); अतिशक्करी नाम षष्टयक्षरं छन्दः Jānāśra. 4. 73 (1); सर्गबन्धो महाकाव्यम्…नातिविस्तरम्। शक्कर्यातिजगत्यातिशक्कर्या त्रिष्टुभा तथा AgniP. 336. 26; अतिशक्करी च कथिता तथा पञ्चदशाक्षरा ViṣṇuDhaP. iii. 3. 4; शक्कर्यतिशक्करी च धृतिश्चातिधृतिस्तथा DevīBhāP. xii. 1. 17; ĪśānS'iPa. i. 1. 86; शक्कर्यन्या स्यादतिशक्करी।…इति संज्ञाः समाख्याताश्छन्दसां पूर्वसूरिभिः Mānaso. iv. 2. 219; °शक्करी - अतिशक्करी - अष्टि - अत्यष्टि - धृति - अतिधृतयः एकैकवृद्धाः Chandonu. 2. 4; 2. 242; KośaKaTa. 1. 1406; **ii** fifteen (cubits) प्रकृत्या चातिशक्कर्या त्रिभौमं तुङ्गविस्तृतम् ĪśānS'iPa. ii. 30. 11; शक्कर्या वातिशक्कर्या … संमितम् S'ilpaRa. i. 5. 63.

अतिशङ्क् (ati-śaṅk-) I. Ā. **i** to doubt unreasonably, to suspect falsely अनुव्याहारिषीन्मामिति यमि(? म)तिशङ्केत तस्मा अग्नीध्राय आहुतिवज्रं प्रहरेत् LāṭyāS'S. ii. 1. 10; अतिवादान्मदाच्चैव मा धर्ममतिशङ्किथाः (v. l. अतिशङ्कथाः) MahāBhā. iii. 32. 6; पापीयान् हि सः … यो धर्ममतिशङ्कते MahāBhā. iii. 32. 9; iii. 32. 17; अजानन्निव चाकस्मादर्जुनाद्याभिशङ्कसे (v. l. °द्यातिशङ्कसे) MahāBhā. v. 77. 16; v. 94. 43; श्रोतव्यं यदि वृद्धानां मातिशङ्कीर्वचो मम MahāBhā. v. 145. 40; vii. 16. 4; vii. 135. 8; viii. 23. 5; viii. 23. 18; परितुष्टा हि सा देवी वनवासं गते मयि। राजानं नातिशङ्केत मिथ्यावादीति धार्मिकम् Rāmā. ii. 46. 52; यद्वै न पश्यतीत्येवमात्मानमतिशङ्कते BṛĀraUBhVā. iv. 3. 1541; i. 3. 371; **ii** to suspect strongly, to express great doubt शङ्कास्थाने नातिशङ्कते ArthS'ā. ii. 213. 2 (5. 5); क्षेत्रज्ञो नाभि(v. l. ति)शङ्कते ManuSm. 8. 96; क्षेत्रज्ञोऽन्तर्यामी पुरुषो नातिशङ्कते किमयं सत्यं वक्ष्यत्यनृतं वेत्येवं नाशङ्कते ManuBh. ii. 114. 15 (*on* 8. 96); SmṛtiCan. iii. 198. 20; स तु … स्वब्राह्मणत्वमपि … अतिशङ्केत NyāyPari. 480. 5.

अतिशङ्कक (ati-śaṅkaka) *adj.* very suspicious (person) अतिशङ्ककमित्येवं पुरुषं सामवादिनम्। आसाधवोऽवजानन्ति …। अतिशङ्ककम्, अतिशयिता शङ्का यस्मिन् तादृशम् VīraMi.(Rājanīti.) 280. 7.

अतिशङ्कनीया (ati-śaṅkanīyā) *adj.* (*f.*) to be suspected too much or falsely न लक्ष्मणास्मिन्मम राज्यविघ्ने माता यवीयस्यतिशङ्कनीया Rāmā. ii. 19. 22.

अतिशङ्कमान (ati-śaṅkamāna) *adj.* doubting very much अथाप्याचार्यस्मृतीनां वक्ता तमतिशङ्कमानः सर्वत्रैवाशङ्केत NidāSū. 23. 6 (2. 1)

अतिशङ्का (ati-śaṅkā) *f.* strong or false suspicion, excessive doubt तथा राजन्सह संवत्सरोषितः। अतिशङ्का भवेत् स्थाने तव लोकस्य च MahāBhā.

iv. 67.4; सुहृदामतिशङ्का च त्रयो दोषाः क्षयावहाः Rāmā. vi. 74.20; शास्त्रस्यातिशङ्कायां यागादिष्वपि तत् समानम् AvantiKa. 75.15; व्रते विवादम् ··· सत्येऽतिशङ्काम् ··न करोति साधुः DaśāvaC. 7.61 = Subhāṣi. 318; अतिशङ्कायां वेदेऽप्यनाश्वासप्रसङ्गात् S'rutaPra. ii. 327.28 (*on* ii. 2.42); अतिशङ्कां सुहृत्सु च । नीतिसंदंशिना कद्धेः समुद्धरत कण्टकौ Yādavā. 22.26; यश्चैवमतिशङ्कामाद्रियते स तु स्वमातापितृचरितानवधारणेन स्वब्राह्मणत्वमपि यथार्हमतिशङ्केत NyāyPari. 480.3; कूटस्थेऽप्यतिशङ्का स्यादिति चेन्मातिशङ्क्यताम् PañcDa. 8.65; देवल, कुलिशसहाये मद्बाहौ जाग्रति किमेवमतिशङ्का क्रियते PārvāPa. 2.2 (1)

अतिशङ्काकुला (ati-śaṅkākulā) *adj.* (*f.*) extremely stricken with doubt प्रौढश्रीलका न जातपुलका लङ्कातिशङ्काकुला PrabaCin. 13.16

अतिशङ्कावकाश (atiśaṅkāvakāśa) *m.* scope for strong doubt अथ न तदा कातिशङ्कावकाशः TattvMu. 4.42.

अतिशङ्कित (ati-śaṅkita) *adj.* much suspicious of, being in great doubt, being very apprehensive, much afraid प्रत्याचख्यौ च शाल्वोऽपि चारित्रस्याभिशङ्कितः (v. l. अतिशङ्कितः) MahāBhā. v. 175.26; योगवित् । शुश्रूषामेव देवस्य चिन्तयेदतिशङ्कितः ParaS. 10.17; अतिशङ्कितमित्येवं पुरुषं सामवादिनम् । अ(? आ)साधवो विजानन्ति MatsyaP. 222.9; संतापादतिशङ्कितैर्न नगरीमार्गो नरैः सेव्यते Mṛcch. 8.11; तस्य तं निश्चयं ज्ञात्वा तुराषाडतिशङ्कितः DevīBhāP. vii. 14.22.

अतिशङ्कितव्या (ati-śaṅkitavyā) *adj.* (*f.*) to be greatly suspected न लक्ष्मणास्मिन् मम राज्यविघ्ने माता यवीयस्यतिशङ्कनीया (v. l. अतिशङ्कितव्या) Rāmā. ii. 91.22.

अतिशङ्किता (atiśaṅki-tā) *f.* extreme fear सरलहृदये शङ्काग्रस्तस्तनोत्यतिशङ्किताम् RājTa.(Jo.) 849.

अतिशङ्कितुम् (ati-śaṅkitum) *inf.* to doubt seriously विदित्वैतामवस्थां मे नातिशङ्कितुमर्हसि MahaBhā. v. 129.26; पूर्वसिद्धायाश्चोदनाया अर्थो न पश्चिमसिद्धपुरुषवचनवशेनातिशङ्कितुं शक्यते BrahmSūBh.(S'aṅ.) 284.15 (*on* ii. 1.1)

अतिशङ्किन् (ati-śaṅkin) *adj.* **A** extremely suspicious, suspecting strongly तेनातिशङ्की भारत निष्ठुरोऽसि MahāBhā. viii. 49.83; सर्वातिशङ्की नृपतिः MahāBhā.xii. 57.27 = SūktiRa. 40.12; **B** very much afraid ऊचुः सर्वे तदा विप्रा नन्दिनं चातिशङ्किनम् SkandP. i(1). 5.148; द्विजिह्वेन मुनित्यक्तो(? मुनिस्त्यक्तो) निर्विण्णेनातिशङ्किना । मां शपेत मुनि(? निः) क्रुद्धः DevīBhāP. iv. 8.16.

अतिशङ्क्य (ati-śaṅkya) *adj.* fit to be doubted धर्मो यस्यातिशङ्क्यः स्यात् ···वेदाच्छूद्र इवापेयात् स लोकादजरामरात् MahāBhā. iii. 32.7.

अतिशङ्क्य (atiśaṅkya) *ger.* doubting too much अतिशङ्क्य वचो ह्येतद्धर्मलोपो भवेत्तव MāhāBhā. iii. 189.26.

अतिशङ्खा (atiśaṅkhā) *f.* one of the sixteen S'aktis (powers) belonging to the second Āvaraṇa of S'auṇḍavyūha (शौण्डव्यूहे) द्वितीयावरणं शृणु । वज्रा शङ्खातिशङ्खा वा बला चैवाबला तथा LiṅgaP. ii. 27.157.

अतिशठ (ati-śaṭha) *adj.* [*f.* –ā] very deceitful, extremely cunning सन्ति चैषां (ब्राह्मणानाम्) अतिशठास्तथान्येऽतितपस्विनः MahāBhā. xiii. 33.10; अतिशठोऽधिको लुब्धः ··· शशिनि भौमबुधमध्ये Sārā. 13.20; व्याधिक्लिष्टो जनोऽयं किमिदमतिशठे वाह्यते धीरहस्तः PadmPrā. 26.9; (एषा) दत्ते नोत्तरमात्रमप्यतिशठा चाटूक्तिदीनस्य मे UdaySuKa. 48.31; सुहृदतिशठः इयान्सोढुं शक्यः RājTa.(Ka.) 7.616; कश्चित्तदाश्वोऽतिशठः स्वकण्ठमुत्प्लुत्य पर्याणखलीनहस्तम् । चखाद VasaViKā. 11.7; हे पक्षिन् ··· तदतिशठ महापाप मा ब्रूहि मिथ्या S'ārṅgaPa. 8.8.

अतिशतरुद्रीय (ati-śatarudrīya) *adj.* surpassing the offerings in honour of the divinity called S'atarudra तत्रातिशतरुद्रीयापांनप्त्रीयैश्च सोऽयजत् DvyāśraKā. 15.106.

अतिशत्रु (ati-śatru) *m.* great foe (i. e. the planets that are inimical to each other by nature and for the time being as well) द्वयोः सुहृत्त्वं त्वतिमित्रता भवेद् द्विधारयस्ते तु सदातिशत्रवः JātaPā. 2.46.

अतिशद् (ati-śad-) 1 Ā; VI Ā. [P. vii. 3.78 conjugational base शीय] to fall out, to go out of, to escape ये प्रत्यञ्चः शम्यामतिशीयन्ते तन्नैर्ऋतमेककपालम् MaiS. ii. 6.1; KāṭhS. 15.1; MānS'S. 185.4; 185.9; तेषां परिगृहीतानां यथा क्षुद्रा मत्स्या अक्ष्योरक्ष्यतिशीयेरन् एवमेव ये क्षुद्राः पशव आसुस्ते अतिशेरुः JaimiBr. 2.110; एतामेव नातिशीयते ChāndoU. iii. 12.3–4; मन्त्री च चिरमीशो हि राजानं चातिशीयते BṛDharmaP. ii. 3.51.

अतिशनैकैस् (ati-śanakais) *adv.* very slowly संसारध्वान्तधाराहृतिरतिशनकैर्निर्जगामाजगाम ParamāKā. 17.118.

अतिशब्द (ati-śabda) *m.* **1** the word *ati* इह पचतीत्युक्ते कश्चिच्छब्दः श्रूयते पच्शब्दश्चकारान्तोऽतिशब्दश्च प्रत्ययः MahāBh. i. 255.14 (*on* i. 3.1); i. 255.16 (*on* i. 3.1); अतिशब्द उपरिभावे वर्तते Nyās. i. 704.20 (*on* iii. 3.80) = PadMañ. *on* KāśiVṛ. *on* P. (iii. 3.80); अनेनातिशब्दोऽत्रातिक्रमे वर्तत इति दर्शयति Nyās. ii. 158.17 (*on* v. 4.46); अत्र द्वितीयं द्वितीयं शब्दरूपम् अतिशब्दात् परतः प्रयोक्तव्यम् MṛtaSaṁ. 41.3 (*on* 4.7); आधिक्येन तु दोषायैवेत्यतिशब्देनाह JayaMa. 352.19 (*on* 6.6); अश्रुतस्यातिशब्दस्य स्थानं दद्यात्कथं पुनः AnuVyā. 9B.2 (1.1); NyāySu.(Ja.) 140B.8 (*on* i. 1.6); अतिशब्दो नेदानीमित्यस्यार्थे वर्तते PadMañ. *on* KāśiVṛ. *on* P. (ii. 1.6); *on* KāśiVṛ. *on* P. (v. 4.46); **2** loud sound (रणः) ना तु शब्दे परे त्वाहुरतिशब्देऽपरे पुनः NānārthāSaṁ. i. 136.1087; *adj.* producing a loud sound यस्यानिलो नासिकया निरेति । ··· अतिशब्दः RugVi. 58.5; वृषः ··· श्वेतोऽतिशब्दः TājiNi. i. 1.3(2)

अतिशब्दक (atiśabda-ka) *adj.* verbose (verbosity one of the eighteen defects of speech) वाग्दोषान् द्विनव शृणु । ··· विरुद्धं यत् त्रिवर्गेण न्यूनं कष्टातिशब्दकम् SkandP. i(2). 45.71.

अतिशब्दद्वयार्थ (atiśabdadvayārtha) *m.* meaning of the word *ati* occurring twice द्विषोऽतीत्यातिशयेनात्मानं प्रत्योहत इत्यतिशब्दद्वयार्थः KarmaNi. 6B.11.

अतिशब्दविषय (ati-śabdaviṣaya) *adj.* beyond the sphere of words, indescribable यस्यातिशब्दविषयं चरणारविन्दमुत्तंसयन्त्यमितभक्ति ··· वराननाः AlaṅkāKau.(Vi.) 413.3.

अतिशब्दश्रवण (atiśabda-śravaṇa) *n.* hearing excessive noise ऋतौ प्रथमदिवसात् प्रभृति ब्रह्मचारिणी ··· °कथनातिशब्दश्रवणावलेखनानिलायासान् परिहरेत् SuśruS. iii. 2.25.

अतिशब्दार्थकौशल (ati-śabdārthakauśala) *n.* extreme skilfulness in explaining the meaning of words गौश्चेन्नास्ति विवादोऽयमर्थस्तु विधिलक्षणः । अगौर्गोशब्दवाच्यश्चेदतिशब्दार्थकौशलम् TattvSaṁ. 987.

अतिशब्दित (ati-śabdita) *adj.* **1** producing excessive sound (पद्मोवाच) तव ··· पुच्छमच्छमणिव्रातघर्घरेणातिशब्दितम् । ··· करोमि KalkiP. ii. 1.19; **2** denoted by the word *ati* मूर्छाशूलकफप्रायो महावेगोऽतिशब्दितः (अतिनिरूढः) SiddhYo. 76.9.

अतिशब्दोपादान (atiśabdopādāna) *n.* use of the word *ati* प्रकर्षनिमित्तमतिशब्दोपादानं विद्यते SaraKaṇṭhā. 578.14.

अतिशमाय (ati-śamāya) [*denom.*] – Ā. to destroy very much यदि सप्ताहमतिशमायेताग्ने दुःशीर्तेतन इति पुरस्ताज्जुहुयात् MānS'S. 98.12.

अतिशम्भुप्रिय (ati-śambhupriya) *adj.* excessively beloved of S'iva शैवपर्वसु ··· योऽधीते भक्तितत्परः । एतदाख्यानम् ···सोऽतिशम्भुप्रियो भवेत् S'ivaP. iii. 17.18 (316A. 15)

अतिशय (ati-śaya) *m.* **1 A** abundance, extreme (limit), plenitude, fullness, great extent **B** excess, more than necessary amount **2 A** eminence, excellence, perfection **B** superiority, excelling over, surpassing **3** efficacy, effectiveness, potency **4** being better or best, gradation **5** peculiarity, difference, distinctness **6** supernatural power or miraculous event associated with a Jain prophet **7 i** one of the 36 bhūṣaṇas of a drama **ii** one of the 36 lakṣaṇas of a drama **iii** one of the 64 alaṅkāras of a drama **8 A** heightened or exaggerated description, poetic hyperbole and a figure of speech based on it **B** a figure of speech based on adhyavasāya. **1 A** abundance, extreme (limit), plenitude, fullness, great extent जवातिशययुक्तेन खररथेन ···स्वयमेवामात्यः प्राप्तः PratiYau. 2.9(4); (भगवान् नारदः) मुक्तागुणातिशयसंभृतमण्डनश्रीः Vikramo. 5.19; निरवधिचमत्कृत्यतिशयो वराहो वा राहुः प्रभवति S'atTrayī. 412; प्रतापातिशयोपनतसमग्रसामन्तमण्डलः EI. ix. 297.11; अश्वातिशयमिन्द्रायुधमद्राक्षीत् Kād. 80.3; विहितनिखिलविद्वज्जनमनःपरितोषातिशयः EI. viii. 192.25; वामोरूरतिशयमाप विभ्रमस्य S'iśuVa. 8.24; सुदृशः··· । वपुरादरातिशयशंसि पुनः प्रतिपत्तिमूढमपि बाढमभूत् S'iśuVa. 9.77; (जामदग्न्यः) अभिजनतपोविद्यावीर्यक्रियातिशयैर्निजैरुपचितशमः MahāvīC. 2.11; 5.46 (294.5); यदृच्छासंवादः किमु किमु गुणानामतिशयः UttaRāC. 5.16; या तु श्रुतिः कपिलस्य ज्ञानातिशयं प्रदर्शयन्ती प्रदर्शिता BrahmSūBh.(S'aṅ.) 285.3 (*on* ii. 1.1); योऽसौ कुत्र चमत्कृतेरतिशयं यात्वम्बिकाकेसरी VakroJī. 18.6; सोऽर्भकः भक्तेरतिशयात् साक्षात्कृतो लम्बोदरेण सः । चक्षुष्माञ् श्रुतिसंपन्नः GaṇeP. i. 20.11; भ्रान्तेरतिशयश्च यः SaraKaṇṭhā. 366.14; ब्रह्मानन्दातिशयेयत्तां वक्तुम् S'rīBh. 208.3 (*on* i. 1.17); प्रज्ञाया अतिशयः PramāMī. 12.1 (*on* i. 1.16); अहो मतेरतिशयो भाषित्वेत्यथ भूषणः । प्राह SamarāSaṁ. 8.54; लक्ष्ये तस्यैवातिशयः फलम् SāhiDa. 55.1; वियोगशोकभयजुगुप्सादीनामतिशयाद् ग्रहावेशादेश्चोत्पन्नो व्याधिविशेषोऽपस्मारः RasGaṅ. 116.8; **1 B** excess, more than necessary amount पार्श्वतः परिकृष्यातिशयतृतीयेन सह मण्डलं परिलिखेत् ĀpaS'uS. i. 3.3; द्वे द्रव्ये पश्यन्नेकत्र विद्यमानमतिशयं गृह्णाति NyāyBh. 266.11 (*on* iv. 1.40); मा शङ्खधमक इव स्वामिन्नतिशयं कृथाः PariPar. 2.693; व्ययस्यातिशयेनाहो कोशो रिक्तत्वमागतः RājTa.(Jo.) 494; **2 A**

अतिसाधु (ati-sādhu) *adj.* [*f.* -vī] **i** very attractive or nice अहो सखे कृतमतिसाधु काननं स्वलाञ्छनैर्नवकमनीयकान्तिभि: Kapphiṇā. 9. 3; **ii** very gentle or very good इत्थं मतिर्भवति तेष्वपि तेऽतिसाध्वी MārkP. 84. 18; अतिसुस्थिरत: प्रोक्ता सातिसाध्वीति निश्चिता BṛĀraUBhVā. i. 4. 163; **iii** very virtuous मनोरमातिसाध्वी सा क्व गता सुतसंयुता DevīBhāP. iii. 16. 8; अतिसाध्वी महाभागा सत्यभूषणभूषिता । ··· शुश्रूषेयं समागता PadmP. ii. 12. 78; GaṇeP. i 53. 6; [Lexicons give अतिसाधु as the meaning of साधीयान् MediK. 190. 66; ViśvaPra. 179. 60; ViśvaLoK. 395. 62; of सत्तम NānārthSaṁ. 96. 65]

अतिसाध्य (ati-sādhya) *adj.* easily attainable ध्यायन्ति यत्पदाम्भोजम् ··· अतिसाध्यं स्वभक्तानां तदन्येषां सुदुर्लभम् BrahmVaiP. ii. 34. 17; iv. 55. 1; DevīBhāP. ix. 38. 16.

अतिसाध्वस (ati-sādhvasa) *n.* great fear or consternation पारावतं वपु: प्राप्य वेपमानोऽतिसाध्वसात् KumāSaṁ. 10. 6; RāmC. (App. 1) 38. 88; क: सुधीस्त्यजते भाण्डं शुल्कस्यैवातिसाध्वसात् Hitopa. 3. 121; KandaCū. iii. 2. 50; [अतिसाध्वस given as the meaning of अत्याहित KośaKaTa. 2. 5624]; *adj.* much dismayed or frightened अर्थं काञ्चनपात्रेण तस्य दत्त्वातिसाध्वस: । कपिध्वजाधिपोऽवोचत् कोपो यद्देन्द्र मुच्यताम् PadmP. (Ra.) 70. 90.

अतिसान्तपन (ati-sāntapana) *n.* name of a severe penance त्र्यहाभ्यस्तैश्चातिसान्तपनम् ViṣṇuSm. 46. 21; ViṣṇuDhaP. ii. 42. 33; यदा तु षण्णां सान्तपनद्रव्याणामेकैकस्य द्व्यहमुपयोगस्तदा अतिसान्तपनम् Mitā. 515. 26 (*on* 3. 315); Aparā. 1234. 6 (*on* 3. 315); cf. **अतिसंतपन.**

अतिसान्त्वयत् (ati-sāntvayat) *adj.* consoling very much तेषां तद्वचनं श्रुत्वा कंसोऽप्याहातिसान्त्वयन् ĀdiP. 19. 73.

अतिसान्त्वित (ati-sāntvita) *adj.* very much conciliated भीत: स्वदोषवित्रस्त: कृतवैरोऽतिसान्त्वित: NītiSā. 18. 36.

अतिसान्द्र (ati-sāndra) *adj.* **1** very thick or dense सक्तव: सर्पिषाभ्यक्ता: ··· नातिद्रवा नातिसान्द्रा मन्थ इत्युपदिश्यते SuśruS. i. 46. 385; BhelaS. 263. 6 (8. 7); (बस्ति:) अतिसान्द्रस्तु न वा नेत्राद्विनिष्क्रमेत् KāśyaS. 282B. 33; फलितमिवातिसान्द्रबहलच्छदवितततमालतमालकानने ··· तम: VāsaDa. 179. 3; RatiRaha. 1. 15; NalaCam. 1. 48 (5); NavaSāC. 10. 11; अबलानितम्बवलये रभसादतिसान्द्रकण्टकसमाकुलिते NemiNir. 10. 29; **2** very strong or intense हेमन्ते विषक्तावयवेऽप्यद्रव्यगतेऽतिसान्द्रे शीतस्पर्शेऽनुभूयमानेऽप्यनुद्भूतं रूपं नोपलभ्यते Bhām. 489. 11 (*on* ii. 3. 29); विस्मयेनातिसान्द्रेण मदेन मदनेन च NavaSāC. 6. 35; छायातिसान्द्रशिशिरा ··· दृष्ट्वैव ते मुखमशोक वयं विशोका: SaduktiKa. 263. 32.

अतिसान्द्रता (atisāndra-tā) *f.* the state of being very thick or dense अतिसान्द्रता अतिद्रवता इत्येकादश द्रव्यदोषा: SuśruS. iv. 35. 32; शरच्चन्द्रिका ··· । अतिसान्द्रतयेह नृणां गात्राण्यनुलिम्पतीवेयम् Kāvyālaṅ. (Ru.) 9. 12.

अतिसान्द्रद्रव (atisāndra-drava) *adj.* very thickly fluid मन्थनादिपृथग्भूतस्नेहमर्धोदकं च यत् । नातिसान्द्रद्रवं तक्रम् SuśruS. i. 45. 85.

अतिसान्द्रम् (ati-sāndram) *adv.* **i** quite soundly सा ··· अङ्गनिक्षेपमात्रेणैवातिसान्द्रं न्यद्रासीत् YaśasCam. ii. 51. 7; **ii** very densely कुसुमितमतिसान्द्रं त्वत्समीपप्रयाणात् । मम ··· देव पुण्यद्रुमेण JinaCatur. 13.

अतिसान्द्रासृज् (atisāndrāsṛj) *adj.* having very thick blood राजिलोत्थो भवेद्दंश: ··· अतिसान्द्रासृक् RugVi. 69. 18.

अतिसाम (atisāma) *m.* name of a holy man नमोऽतिसामायैतुरेताय JaimiUBr. iv. 26. 15.

अतिसाम (ati-sāma) *n.* excessive conciliation नातिसामम् ··· न च स्त्रीषु दण्ड: (कर्तव्य:) Bārhas. 1. 52.

अतिसामन् (ati-sāman) *n.* excessive conciliation, greatly pacifying words तस्य तेनातिसाम्नापि प्रसुरभ्यधिकं क्रुधा । जाज्वल्यते स्म PāṇḍaC. 7. 677; *adj.* who has gone beyond conciliation व्रज ··· पृतना: कृतवर्मणोऽतिसाम्नो व्युह्य युधे सीमानमेत्विनस्ते DvyāśraKā. 4. 40.

अतिसामर्थ्य (ati-sāmarthya) *n.* great capacity अयं बुद्धियोग: कौशलमतिसामर्थ्यमतिसामर्थ्यसाध्यमित्यर्थ: GītāBh. (Rā.) 136. 2 (*on* 2. 50)

अतिसामान्य (ati-sāmānya) *n.* too wide a universal or generic term यद् विवक्षितमर्थमाप्नोति चात्येति च तदतिसामान्यम् NyāyBh. 68. 12 (*on* 2. 13); अतिव्यापकं सामान्यमतिसामान्यम् NyāyMañ. ii. 170. 21; तस्य ब्राह्मणत्वस्यातिसामान्यस्य योगात् TātpaṬ. (Vā.) 351. 12 (*on* i. 2. 13); *adj.* [*f.* -ā] most ordinary, very common यत्रातिसामान्यजना: प्राप्ता: Bhāsk. i. 317. 18 (*on* i. 6. 5); पञ्चमूल्यतिसामान्या योज्या पित्ते कनीयसी HārīS. iii. 3. 19.

अतिसामान्ययोग (atisāmānya-yoga) *m.* association with too wide a universal or generic term अर्थस्यातिसामान्ययोगादसंभूतार्थकल्पना सामान्यच्छलम् NyāySū. i. 2. 13.

अतिसामान्ययोगतस् (atisāmānyayoga-tas) *adv.* due to the application of too wide a universal or generic term सामान्यच्छलमेतत् स्यादति-

सामान्ययोगत: TārkiRa. 242. 5.

अतिसामान्यहेतुता (atisāmānyahetu-tā) *f.* the state of being too wide or over-pervasive a reason तत्र वक्त्रभिमतामेवातिसामान्यहेतुतामारोप्य च्छलवादी प्रत्यवतिष्ठत इति NyāyMañ. ii. 170. 32.

अतिसामान्यहेतुत्व (atisāmānyahetu-tva) *n.* the state of being too wide or over-pervasive reason वक्तुरनभिप्रेतातिसामान्यहेतुत्वकल्पना NyāyMañ. ii. 170. 23.

अतिसामीप्य (ati-sāmīpya) *n.* extreme nearness, too much proximity यथा वा चक्षुरतिसामीप्यात्कज्जलं नोपलभते MāṭhVṛ. 14. 21 (*on* 7); अतिसामीप्ये दृष्टिविघातात् AbhinBhā. i. 66. 9 (*on* 2. 90); तस्मादतिदूरवदतिसामीप्यस्याप्यदर्शनहेतुत्वादग्रहणमेवोभयोरिति NyāyMa. 77. 11; अतिसामीप्यात्सूक्ष्ममपि गृह्यते S'rīBh. 99. 1–2 (*on* i. 1. 1); तथा नेत्रगतकज्जलग्रहणेऽतिसामीप्यं (प्रतिकूलम्) SāṁkhyaTaPra. 155. 8; अतिसामीप्यालोचनाञ्जनादौ ··· यथावद्ग्रहणं नास्तीत्यर्थ: SarvaDaSaṁ. 5. 43.

अतिसामीप्यतस् (atisāmīpya-tas) *adv.* due to very great closeness तज्जा रामकृति: ··· भाषाङ्गत्वेऽप्युपाङ्गत्वमतिसामीप्यतोऽत्र च । शार्ङ्गदेवेन निर्णीतम् SaṁgīRa. ii. 108. 12 (2. 145)

अतिसामीप्याभाव (atisāmīpyābhāva) *m.* absence of very great proximity दूरस्थशङ्खस्यातिसामीप्याभावात् कथं तत्रस्थं पित्तद्रव्यं गृह्यते इत्यत्राह S'rutaPra. iB. 35. 23 (*on* i. 1. 1)

अतिसामीप्यार्थता (atisāmīpyārtha-tā) *f.* the state of having the sense of very close proximity अतिसामीप्यार्थतयोपपत्ते: TattvPrakā. 209A. 7 (*on* iv. 2. 7)

अतिसाम्प्रतम् (ati-sāmpratam) *adv.* very appropriately अतिसाम्प्रतमुपदिष्टं सुहृद्देवानेन साधुना पठता KuṭṭaMa. 24.

अतिसाम्य (ati-sāmya) *n.* **i** great equality (of status) नातिसाम्येऽपि गुणैर्वध्य: ManuBh. ii. 223. 14 (*on* 8. 366); **ii** excessive resemblance, extreme similarity अतिसाम्यादुपमेयं यस्यामसदेव कथ्यते सदपि Kāvyālaṅ.(Ru) 8. 57; अतिसाम्यादनपह्नुतभेदयोरभेद: KāvyPra. 593. 2; आरोप्यमाणस्यातिसाम्यमभेद: AlaṅkāRa. 27; अतिसाम्येऽप्युपमाननिषेधात् AlaṅkāRa. 29 (77); नोपाध्यधीनताद्यैश्च नातिसाम्यं निदर्शने AnuVyā. 43A. 6 (*on* 3. 2); अतिसाम्यादनपह्नुतभेदयोरुपमानोपमेययोरभेदप्रत्ययो रूपकम् AlaṅkāS'e. 12. 0. (1); कस्यचिद्वस्तुनो लिङ्गैरतिसाम्याद्भिन्नत्वेनागृह्यमाणानां वस्त्वन्तरलिङ्गानां स्वकारणाननुमापकत्वं मीलितम् RasGaṅ. 694. 7; द्रवत्ववद्वर्णतो नातिसाम्यम् MayūMāli. 561. 12 (*on* viii. 1. 19)

अतिसाम्यतस् (atisāmya-tas) *adv.* due to close resemblance संदिहाना निजे नाथे वयमप्यतिसाम्यत: PadmP.(Ra.) 47. 68.

अतिसाम्यप्रतिपादन (atisāmya-pratipādana) *n.* statement of extreme resemblance तेन सहातिसाम्यप्रतिपादनम् ··· भेदाभावादभेदोऽलङ्कार: AlaṅkāRa. 27 (2)

अतिसाम्या (ati-sāmyā) *f.* **i** *Glycyrrhiza glabra* साम्यं समतामतिक्रान्ता ··· अतुल्यस्थलयुक्ता इति यावत् । लतायष्टिमधु इति राजनिघण्टु: [S'abdaKaDru.] **ii** *Rubia cordifolia* [PW]

अतिसाम्राज्य (ati-sāmrājya) *n.* great sovereignty राज्यादप्यतिसाम्राज्याच्चक्रवर्तिपदादपि ।··· गुरुसेवा गरीयसी TriṣaS'aPuC. ii. 3. 88.

अतिसायम् (ati-sāyam) *adv.* very late in the evening न भुञ्जीतोद्धृतस्नेहम् ··· नातिप्रगे नातिसायम् ManuSm. 4. 62; 4. 140; नातिसायम् (अश्नीयात्) ViṣṇuSm. 68. 48; 63. 7; नातिप्रगेऽतिसायं वा न नभोमध्यगे रवौ (व्रजेत्) AṣṭāSaṁ. i. 9. 19 (1. 3); i. 65. 8 (1. 10); अतिसायमस्तमयसमये न भुञ्जीत ManuBh. i. 354. 1 (*on* 4. 62); i. 379. 4 (*on* 4. 140); BhaviP. 896A. 32 (iv. 205. 81); ManvaVi. 486. 9 (*on* 4. 62); VīraMi.(Āhnika.) 476. 2.

अतिसार (atisāra) *m.* name of a son of king Nitantu नितन्तुर्नाम राजर्षिर्बभूव ··· तस्य पुत्रा: ··· तिन्दुसारोऽतिसारश्च MahāBhā. i. App. 101. 6.

अतिसार (ati-sāra) *m.* **A** diarrhoea, dysentery, purging पीनसे चातिसारे च दधि शस्यते CaraS. i. 27. 226; i. 14. 16; i. 18. 6 (1941 Ed.); शोकातिक्षारसेवनातिसार° ···°प्रभृतिभिर्विशेषैर्बन्धनान्मुच्यते गर्भ: SuśruS. ii. 8. 3; ii. 13. 61; vi. 27. 13; अतिसारभगन्दरौ ··· इत्येवमादयो रोगा: S'ātāSm. 1. 6; 6. 16; क्षयातिसारविस्फोटस्तात्वस्थिपरिपीडनम् KātySm. 458; क्षीणज्वरातिसारे च ··· पय:फेनं प्रशस्यते HārīS. i. 8. 70; मूर्च्छातिसारहिक्काभि: ··· उपद्रुता: । वर्जनीया: ··· भिषजा HārīS. ii. 4. 4; i. 22. 7; iii. 3. 5; iii. 3. 11; आमे ज्वरेऽतिसारे च ··· न लेहयेत् KāśyaS. 4A. 29; 31B. 9; पित्तं पुनर्ज्वरातिसारान्तर्दाह° ··· °भ्रमप्रलपनानि AṣṭāSaṁ. i. 30. 10 (1. 11); i. 190. 6 (1. 39); उपोदकातिसाराय AṣṭāHṛ. i. 7. 41; i. 8. 9; समान:···करोति··· विपरीततामुपगत: ··· अनग्निमतिसारमन्त्ररुजमुग्रगुल्मादिकान् KalyāKā. 8. 5; 9. 49; 9. 62; 9. 83; वेगतीक्ष्णोऽतिसारश्च निद्राल्पत्वं तथा वमि: ।··· जायते RugVi. 2. 10; 3. 4; व्याकुर्यात् ··· नातिसारे MṛgendraT. iv. 1. 30; भगन्दरातिसारांश्च ··· रोगानन्यांश्च दारुणान् AgniP. 31. 22 = ViṣṇuDhaP. i. 196. 27; Mānaso. i. 19. 235; कासश्वासातिसारज्वर° ··· °प्रमेहान् ··· अपनयति पय: पीतमन्ते निशाया: SiddhYo. 69. 29; 10. 84; अतिसारं सरक्तं च कदाचित् कुरुते हय: AśvaVai. 24. 9; 28. 2; (गज:) पीड्यते चातिसारेण वातगुल्मश्च बाधते Hastyāyur. 88. 17 (1. 12); जलोदरेऽतिसारे च ··· यानि चान्यानि द्वन्द्वानि ··· उत्पद्यन्ते BrahmP. 241. 6; अतिसारम् ··· कासं श्वासम् ··· सर्वं प्रशमयत्याशु स्तोत्रस्यास्य सकृज्जप: GaṇeP. i. 46. 190; अतिसारो मरुद्व्याधि: SamarāSū. 9. 17; मुष्टिबन्धोऽतिसारश्च चेष्टा पुत्तलिकादिभि: ĪśānS'iPa i. 41. 39; चूर्णं जयेत् ··· । छर्दिशोषातिसारांश्च S'ārṅgaS. ii. 6. 129; अतिसारेषु जातेषु पथ्यं नाश्नाति य: पुमान् । ग्रहणी जायते तस्य Mānaso. i. 19. 235; उदावर्तातिसाराणाम् ··· रोगाणां हि चिकित्सितम् । ···वक्ष्ये RasRaSa. 12. 2; पथ्या पथ्यातिसारे Ekāva. 3. 1 (159) (100. 13) = LaṭaMe. 1. 21; ग्रहणीमतिसारं च (नाशयति ताम्रेश्वरवटी) RaseCin. 9. 312 (252. 1); स दुष्टो वह्निमान्द्यातिसारगुल्मान् करोति हि BhāvPra. (Bhā.) 3. 113; 6(2). 215; प्रतिनायकस्य च यक्ष्मण: परिजना: पाण्डु° ··· °अतिसारप्रभृतय: Jīvān. 15. 4; 99. 2; °अतिसारज्वर° ··· °प्रमेहा: ··· व्याधय: ··· तान् ··· अपहरति पय: पीतमन्ते निशाया: BhojanKu. 190. 12; 120. 17; TrikaS'e. ii. 6. 15; KalpaK. 54. 311; **B** (Gr.) the word *atisāra* वातातिसारपिशाचात् कुक् च S'ākaṭāVyā. iii. 3. 165; SaraKaṇṭhā.(Gr.) v. 2. 179; **C** offence, sin, transgression [DBHS]; *adj.* extremely strong अतिसारा: ··· युष्मन्नामैव ··· ब्रूतेऽतिशयितं बलम् Jivān. 99. 2; राजत्यस्यातिसार: परसमरविधौ रक्तधार: कुठार: KhadgaS'. 25; cf. **अतीसार.**

अतिसारक (ati-sāraka) *m.* diarrhoea, dysentery, purging वातस्य रोधश्च शकृद्विभङ्गो भवन्ति सर्वेष्वतिसारकेषु HārīS. iii. 3. 30; iii. 3. 53; iii. 6. 9; माषद्वयं प्रयुञ्जीत रसस्यास्यातिसारके RaseCin. 9. 47 (130. 3)

अतिसारकयोग (atisāraka-yoga) *m.* contact with things causing diarrhoea or dysentery अतिसारकयोगात् ···। आप: सर्वशरीरस्था: क्षुभ्यन्ति RugVi. 72. 1.

अतिसारकिन् (atisārak-in) *adj.* [DEBEU. p. 542] who suffers from diarrhoea or dysentery (वातातिसाराभ्यां कुक् च *on* P. v. 2. 129 v. l.); वातातिसारयोरुपतापत्वात् पूर्वेणैवेनिप्रत्यये सिद्धे कुगर्थमेवेदं वचनम् । ··· अतिसारकी KāśiVṛ. *on* P. v. 2. 129; एभ्य एते···स्युर्वास्त्यर्थे···अतिसारकी MugdhaBo. 7. 33(70. 13); आभ्यामिनि: स्यात्कुक् चागम: PrakriKau. i. 897. 3; सातिसारोऽतिसारकी AmaK. 1192; PuryāS'aRa. 604.

अतिसारकृत् (atisāra-kṛt) *adj.* causing dysentery (शिग्रुवृक्षस्य) फलपलाशादि कण्डूपाकातिसारकृत् AṣṭāSaṁ. i. 50. 19 (1. 8); (अनुद्धृतघृतं तक्रम्) बलप्रदं तु क्षीणानामामशोफातिसारकृत् HariS. i. 8. 56.

अतिसारकृत (atisāra-kṛta) *adj.* caused by dysentery नारिकेलजलम् ··· । पीतं हन्यात्सरुधिरमतिसारकृतं गवाम् ĪśānS'iPa. i. 49. 3.

अतिसारघ्न (atisāra-ghna) *adj.* [*f.* -ī] which cures diarrhoea or dysentery पेया रक्तातिसारघ्नी (यवागू:) CaraS. i. 2. 2 (1941 Ed.); रूक्षा वम्यातिसारघ्नी छेदनी मधुशर्करा CaraS. i. 27. 238 (1922 Ed.); पाटलाकुसुमम् ··· हिध्माकफातिसारघ्नम् BhojanKu. 107. 5; (तालीसाद्यं चूर्णम्) पाण्डुज्वरातिसारघ्नम् SiddhYo. 11. 16; शिशूनामतिसारघ्नं तत्पिष्टं पाययेन्मनाक् ĪśānS'iPa. i. 46. 3.

अतिसारघ्नी (atisāra-ghnī) *f.* Aconitum heterophyllum (= Ativiṣā) अतिविषा ··· गुणप्रियातिसारघ्नी DhanvNi. 8. 26; फलतुम्बी मसूरविदलाह्वयातिसारघ्नी AbhidhāMañ. 110. 14.

अतिसारचिकित्सित (atisāra-cikitsita) *n.* treatment for dysentery अथातोऽतिसारचिकित्सितं व्याख्यास्याम: AṣṭāSaṁ. ii. 4. 11 (66. 12)

अतिसारजित् (atirāra-jit) *adj.* curing dysentery बिल्वरास्नाबलाशाकं वातघ्नमतिसारजित् AṣṭāSaṁ. i. 37. 23 (1. 7); आजं (क्षीरं) शोषज्वरश्वासरक्तपित्तातिसारजित् AṣṭāHṛ. i. 5. 24; (भूनिम्बाद्यं चूर्णम्) कामलाज्वरपाण्डुत्वमेहारुच्यतिसारजित् SiddhYo. 4. 18; BhāvPra.(Bhā.) 6(4). 32; 6(4). 185; 6(4). 308; चाङ्गेरीशाकम् ··· कफवातार्श:संग्रहण्यतिसारजित् BhojanKu. 61. 14; 115. 19.

अतिसारत्व (atisāra-tva) *n.* the state of being the very essence शुक्र इत्यतिसारत्वात्··· । आख्या जीवस्य AhirbuS. 58. 44.

अतिसारदोष (atisāra-doṣa) *m.* the illness of diarrhoea तिलकमसहास्मि सोढुं घनसारेणातिसारदोषो मे SaraKaṇṭhā. 165. 25

अतिसारनुद् (atisāra-nud) *adj.* removing dysentery चिरबिल्वस्य च त्वच: । ··· वल्कयूषोऽतिसारनुत् KāśyaS. 252B. 24; °श्वासकासातिसारनुत् ··· वातलं मधु AṣṭāHṛ. i. 5. 52; (तक्रम्) ग्रहण्यर्शोऽतिसारनुत् HāriS. i. 8. 61; अभया ··· शूलातिसारनुत् SiddhYo. 9. 24; शताह्वा ··· श्लेष्मातिसारनुत् BhojanKu.

115. 25.

अतिसारप्रणाशन (atisāra-praṇāśana) *adj.* destroying or removing dysentery सप्तरात्रस्थितं दधि । कोरदूषोदनोपेतं अतिसारप्रणाशनम् BhelaS. 252. 12 (8. 4)

अतिसारभय (atisāra-bhaya) *n.* fear of dysentery नातिसारभयं तत्र नाश्मरी न विषूचिका PadmP. v. 29. 94.

अतिसारभेद (atisāra-bheda) *m.* purging due to dysentery निर्वीर्यरूपा त्वतिसारभेदे (नाडी भवतीत्यर्थः) NāḍiVi. 97.

अतिसारयुक्त (atisāra-yukta) *adj.* afflicted with diarrhoea or dysentery अरोचकारत्यतिसारयुक्तम् । विलङ्घनैः पाचनदीपनीयैरुपाचरेत् पीनसिनं यथावत् SuśruS. vi. 24. 23.

अतिसारयुत (atisāra-yuta) *adj.* afflicted with diarrhoea or dysentery दृष्ट्वा शोकं तथाध्मानम् ··· । तथा च पाण्डुरोगार्तमतिसारयुतं त्यजेत् HāriS. iii. 3. 78; अतिसारयुते पुंसि कथितस्त्वतिसारकी S'abdaRaSaK. 46. 9.

अतिसाररुज् (atisāra-ruj) *f.* disease of diarrhoea or dysentery अत्यम्बुपानाज्जायेत सुतरामतिसाररुक् Mānaso. i. 19. 230.

अतिसाररोग (atisāra-roga) *m.* disease of diarrhoea or dysentery यष्टीकषायपरिपक्वमजापयो वा ··· पित्ताममाशु शमयत्यतिसाररोगे KalyāKā. 9. 93.

अतिसारवत् (atisāra-vat) *adv.* as in the case of diarrhoea or dysentery (मलम्) अतिप्रवर्तमानं च साधयेदतिसारवत् SuśruS. vi. 39. 123; दोषं सामं निरामं च विद्यादत्रातिसारवत् RugVi. 4. 18.

अतिसारवत् (atisāra-va(n)t) *adj.* suffering from diarrhoea or dysentery (कुटजवल्कम्) सुस्विन्नमेतदवपीड्य रसं गृहीत्वा क्षौद्रेण युक्तमतिसारवते प्रदद्यात् SiddhYo. 3. 47.

अतिसारसंयुक्त (atisāra-saṁyukta) *adj.* afflicted with diarroea or dysentery (नरम्) शोथातिसारसंयुक्तमर्शांसि क्षपयन्ति हि RugVi. 5. 40 (? 41)

अतिसारस्यनिलया (atisārasya-nilayā) *f.* store of great passion इयमतिसारस्यनिलया तत्तदङ्गेषु जिघ्नन्ती शनैरारोहति, किमिदानीं मयैवोदास्यते RasSa. 175(14)

अतिसारहन्तृ (atisāra-hantṛ) *adj.* curing diarrhoea or dysentery सौवीरपिष्टः सहकारकल्को नाभिप्रलेपादतिसारहन्ता SiddhYo. 74. 35.

अतिसारहर (atisāra-hara) *adj.* curing diarrhoea or dysentery (आम्रस्य) पुष्पं तु रुचिदीपनम् । अतिसारहरम् BhojanKu. 104. 5.

अतिसारहृत् (atisara-hṛt) *adj.* curing diarrhoea or dysentery (जीरकत्रितयम्) चक्षुष्यं पवनाध्मानगुल्मच्छर्यतिसारहृत् BhāvPra.(Bhā.) 6(2). 86.

अतिसारातिप्रवृत्ति (atisārātipravṛtti) *f.* excessive activity of diarrhoea or dysentery अतिसारातिप्रवृत्तौ च ··· वायुः ··· दुर्जयतरो भवति AṣṭāSaṁ. ii. 70. 22 (4. 11)

अतिसारादि (atisārādi) *adj.* beginning with diarrhoea or dysentery ज्वरातिसारादि च रोगजालं बाधेत चेत् तर्हि न कोऽप्युपायः S'aṅkaDigVi.(Mā.) 14. 6; अतिसारादिभिर्दोषैरौदरैः क्लेशमावहेत् TantrRā. 9. 60.

अतिसाराभिभूत (atisārābhibhūta) *adj.* overpowered by diarrhoea or dysentery येऽतिसाराभिभूताः । ··· ते मुद्गयूषस्य योग्याः KalyāKā. 5. 20.

अतिसारामय (atisārāmaya) *m.* disease of diarrhoea or dysentery रसः शीघ्रप्रभावाभिधः ··· अतिसारामये । ··· हिक्कासु च RasRaSa. 10. 94.

अतिसारार्त (atisārārta) *adj.* afflicted with or suffering from diarrhoea or dysentery शूलशोफातिसारार्तो ध्रुवं न जीवतेऽर्शसः HāriS. iii. 11. 26; गुदशोफातिसारार्तः ··· नाश्नाप्यश्च जलोदरी S'ārṅgaS. iii. 6. 5.

अतिसारार्दित (atisārārdita) *adj.* afflicted with or suffering from diarrhoea or dysentery अतिसारार्दितः शीघ्रं लवणाम्लं निषेवते Mānaso. i. 19. 266.

अतिसारिकी (ati-sārikī) *adj.* (*f.*) [*w. r.* for आतिसारिकी] curing dysentery, CaraS. iii. 5. 28 (1941 Ed.)

अतिसारित (ati-sārita) *adj.* suffering from purging or diarrhoea जलं सलोध्रं गजपिप्पली च । क्वाथावलेहौ मधुना विमिश्रौ बालेषु योज्यावतिसारितेषु SiddhYo. 66. 14.

[1]**अतिसारिन्** (atisār-in) *adj.* [*f.* -iṇī] afflicted with or suffering from (chronic) diarrhoea cf. **अतिसारकिन्, अतीसारिन्**, मा ते पुत्रं रक्षो हिंसीन्मा धेनुरतिसारिणी HirGS. ii. 4. 2; यः ··· । तनुत्वक् चातिसारी च पित्तशोथः स उच्यते CaraS. i. 18. 12 (1941 Ed.); i. 2. 20 (1941 Ed.); मेहातिसारिणां तोयपानम् SuśruS. i. 29. 69; राजघ्नो राजयक्ष्मी स्यादतिसार्यौ (? र्यु)पघातकः HāriS. ii. 1. 130; स्त्रीहन्ता चातिसारी स्यादश्वहा रोपयेद् दश S'ātāSm. 2. 43; वामयेदतिसारिणम् AṣṭāHṛ. iv. 9. 2; i. 7. 57; RugVi. 3. 17; पाण्डुर्मेही रक्तपित्ती ··· नैते स्वेद्या यश्च मर्त्योऽतिसारी SiddhYo. 72. 16; (सर्वाङ्गसुन्दरचिन्तामणिरसः) अग्निमान्द्ये ग्रहण्यां च तथा देयोऽतिसारिणि (v. l. °सारिणे) RasRaSa. 12. 66; BhāvPra.(Bhā.) 6(2). 98; ParaNā. 1884; transgressing [DBHS]

[2]**अतिसारिन्** (atisār-in) *adj.* made of the very hard pith (of a tree) काष्ठजेषु च पीठेषु नासारा नातिसारिणः (प्रशस्ताः) YuktiKa. 60. 18.

अतिसारिवा (ati-sārivā) *f.* a species of astringent-sweet twining plant or bush (? सारिवा *Hemidesmus indicus* or *Ichnocarpus frutescens*) कषायमधुरं विद्यात् खादिरं चातिसारि च (? चातिशा(? सा)रिवाम्) BhelaS. 50. 3 (1. 28)

अतिसारूप्य (ati-sārūpya) *n.* extreme or close resemblance अतिसारूप्यादैक्यं विधाय सिद्धोपमानसद्भावम् । आरोप्यते च तस्मिन्नतद्गुणादीति सोत्प्रेक्षा Kāvyālaṅ.(Ru.) 8. 32; अन्योऽन्यमतिसारूप्यादभेदभ्रमकारिणः । मम प्रीतिकराः के ते कथं च सदृशा हरेः PāṇḍaC. 17. 198.

अतिसार्थक (ati-sārthaka) *adj.* extremely purposeful or meaningful अद्य मे सफलं जन्म जीवनं चातिसार्थकम् PañcaRā.(Nā.) i. 7. 6.

अतिसार्य (ati-sārya) *ger.* having completely discharged (वान्तो विरिक्तः स्नात्वा तु) वान्तो वमनं कृत्वा विरिक्तः कोष्ठमलमतिसार्य ManvaVi. 684. 9 (*on* 5. 144)

अतिसावधान (ati-sāvadhāna) *adj.* very cautious राजप्रणिधिनिबोधे भूयादतिसावधानोऽसौ KandaCū. v. 6. 18.

अतिसाहस (ati-sāhasa) *n.* **A** extreme rashness न मे स्यादपराधोऽयं महादेवातिसाहसात् । कृतो मया यदज्ञानाद्विमर्दोऽयं त्वया सह MahāBhā. iii. 40. 59; iv. 63. 7; बाणः प्राहातिसाहसात् । हस्तौ पादौ च संछिद्य ···। मां परानयतु स्वामी PrabhāC. 115. 18; तुरगैः समं तुरगसादिनो हता दिवमुद्ययुः समाधिरुह्य तान् पुनः । अतिसाहसेन दिवमभ्युपेयुषामपि वाह्यवाहकदशा न शाम्यति S'ivLī. 18. 18; **B** extreme adventure or very bold act महाराज अलमतिसाहसेन Abhiṣe. 5 16 (1); नन्वतिसाहसमेतत् Mṛcch. 4. 20 (9); VeṇīSaṁ. 3. 209; राजवर्यप्रिये साध्वि मा कुरुष्वातिसाहसम् । तवोदरे चक्रवर्ती शत्रुहन्ता हि तिष्ठति BṛNāraP. 7. 64; यत्र सखीदर्शनेष्वकृतहस्तावलम्बनमुत्थानमतिसाहसम् Kād. 184. 3; किं कृतं दुष्कृतं कर्म शक्रेणाद्य जिघांसता । वृत्रम् ··· अयं निहतः शत्रुर्वज्रयित्वातिसाहसात् DevīBhāP. vi. 7. 29; भूपतिः प्राहातिसाहसमिदं नृणाम् । य उत्तराय नालं स्यात् स यद्वदति पर्षदि PrabhāC. 189. 10; अये, इयमवतितीर्षति मामवलोक्य मन्दारिका । अयि मन्दारिके, अलमलमतिसाहसेन S'ṛṅgāBhū. 57(2); अतिसाहसमारूढमियतैव प्रिये त्वया Mukundā. 205; **C** extreme audacity, extremely bold statement अचेत्यमानो भेदोऽपि चकास्तीत्यतिसाहसम् BrahmSi. 70. 25; किंच सर्वस्य जगतः संमोहकल्पनमतिसाहसम् TātpaṬ.(U.) 250. 16 (*on* 5(3). 41) = NyāyRa. 280. 14 (*on* 5(3). 41); चक्षुर्विषयतामेति धर्म इत्यतिसाहसम् NyāyMañ. i. 96. 27; त्यागोऽतिसाहसं मन्ये ननु यागादिकर्मणाम् BṛĀraUBhVā. (Sambandha.) 309; S'āstrDī. 40. 11 (*on* i. 1. 4); स्थानद्वयेऽप्यतः कोशा एत इत्यतिसाहसम् AnuVyā. 9B. 1 (*on* 1. 1); अबाधितस्यापि मिथ्यात्वमित्यतिसाहसम् S'atDū. 197. 4; अत एतेऽन्नमयादयः कोशा इत्येतद्व्याख्यानमतिसाहसं पूर्वोत्तरापरामर्शमूलम् NyāySū.(Ja.) 140B. 3 (*on* i. 1. 6); तत् पूर्वापरविरोधान्मन्दमित्याह । तदतिसाहसम् ViraMi.(Vyavahāra.) 81. 16; *adj.* [*f.* -ā] very adventurous (act or person) अतिसाहसमतिदुष्करमत्याश्चर्यं च दानमर्थानाम् । योऽपि ददाति शरीरं न ददाति वित्तलेशमपि KalāVi. 2. 46 = SūktiRa. 13. 16 = S'ārṅgaPa. 429; तमधः कृतवान् राजसिंहं सिंहोऽतिसाहसम् RājTa.(Jo.) 519; याश्चैवातिसाहसाः प्रथमम् । ताः स्युः स्वतो हि साध्याः KandaCū. v. 2. 4.

अतिसाहसत्व (atisāhasa-tva) *n.* the state of being highly audacious ऋषीणाम् ··· सर्वज्ञानां वेदकर्तृत्वेनादरोक्तेरतिसाहसत्वात् BhāṭṭDī. i. 14. 15 (*on* i. 1. 1); अव्यवहितपूर्वोक्तनवलक्ष्मस्मारकत्वं विहायातिदूरस्य स्मारकत्वोक्तेरतिसाहसत्वात् SetuBa. 105. 4.

अतिसाहसाध्यवसायिनी (atisāhasādhyavasāyinī) *adj.* (*f.*) resolving on a very rash act नैवमतिसाहसाध्यवसायिनी भवती भवत्वित्युक्ता सा तस्मादनुमरणनिर्बन्धाद्विरराम ViṣṇuP. iv. 3. 33.

अतिसाहसिक (ati-sāhasika) *adj.* **A** very bold त्वं चाद्भुतसिद्धिः श्रूयसे । वयं चातिसाहसिकाः । उक्तं च ··· ऋते समुद्रादन्यः को बिभर्ति वडवानलम् PañcT.(KOSEGARTEN) 241. 3; अतिसाहसिकं शूराः मन्त्रिणस्तं निरूपकम् । विनीतं गुरवो जड्धूर्तमन्तःपुराङ्गनाः SūktiRa. 39. 33; **B** extremely audacious किमिदानीमस्माभिरात्मा सुखरूपोऽनुभूयते, सत्यमिति ब्रुवाणस्यातिसाहसिकस्य नोत्तरं वाच्यम् S'āstrDī. 126. 14 (*on* i. 1. 5)

अतिसाहसिन् (ati-sāhasin) *adj.* very rash अपतत्स धरापीठे योगिनोऽग्रेऽतिसाहसी RauhiC. 398.

अतिसिंहनाद (atisiṁha-nāda) *adj.* whose cry surpasses that of a lion अतिसिंहनादः । रणेऽभिमन्युः ··· भृशं व्यराजत् MahāBhā. vii. 47. 40.

अतिसिंहस्थामन् (atisiṁha-sthāman) *n.* valour surpassing that of a lion कृत्वातिसिंहस्थाम प्राक्पश्चाच्छद्मेण पातितः। वराहो रारटीति स्म स्वभावः खलु दुस्त्यजः HammīMaKā. 4. 63.

अतिसिक्त (ati-sikta) *adj.* [*f.* -ā] **1** over-sprinkled or sprinkled profusely अतिसिक्तमेव भवता JaineVyā. 66. 15 (*on* i. 4. 8); अतिशब्दः …अतिक्रमणे: … निष्पन्नेऽपि वस्तुनि क्रियाप्रवृत्तिरतिक्रमणम् । अतिसिक्तमेव भवता KāśiVṛ. *on* P. i. 4. 95; Pradī. ii. 436B. 8 (*on* ii. 2. 18); सुसिक्तया यः सरसः पयोभिस्त्न्वातिसिक्तः(? क्तां) कुरुते धरित्रीम् Rāvaṇā. 3. 48; **2** sprinkled well पूजायाम् अतिसिक्तम्…भवता JaineVyā. 66. 16 (*on* i. 4. 8); चकारात् पूजायां च कर्मप्रवचनीयसंज्ञो भवति । अतिसिक्तं भवता KāśiVṛ. *on* P. i. 4. 95.

अतिसिक्थ (ati-siktha) *adj.* containing numerous food-particles विच्छिन्नमच्छमतिसिक्थमसिक्थकं वा। दुर्गन्धमप्स्वपि निमग्नममेध्यमामम् । पक्कातिसारमिति तद्विपरीतमाहुः KalyāKā. 9. 87.

अतिसिच्य (atisic-ya) *ger.* having sprinkled well स्वती पूजायामिति प्रादिलक्षणः सविधिः । अतिसिच्य गतः JaineVyā. 66. 17 (*on* i. 4. 8)

अतिसिञ्चत् (ati-siñcat) *adj.* sprinkling (i. e. covering) profusely शरौघैरतिसिञ्चन्तः पर्यानिन्युर्दिशोऽन्धताम् DvyāśraKā. 5. 18 (comm. अतिसिञ्चन्तः अतिव्याप्नुवन्तः); 5. 45.

अतिसित (ati-sita) *adj.* extremely white अतिसिताङ्गविहङ्गहसद्दिवम् । अकलयन्मुदितामिव … स शरदम् S'iśuVa. 6. 54; (ददर्श) क्षीरोदधेरुत्तरतो हि द्वीपः श्वेतः स नाम्ना …। देदीप्यमानो विततेन सर्वतो ज्योतिश्चयेनातिसितेन नित्यम् SkandP. ii(9). 4. 9; तरलेऽतिसितासितद्युतौ इह दोलायितमीक्षणद्वये ।… तिमिरं मूर्च्छति ते कपोलयोः NavaSāC. 12. 46.

अतिसितजलधर (atisita-jaladhara) *m.* extremely white cloud अतिसितजलधरशकलशारित इव शारदाकाशैकदेशः…पुरुष उज्जगाम HarṣaC. 165. 13.

अतिसितमहस् (atisita-mahas) *adj.* possessed of exceedingly white splendour आकृष्यमाण एव च यस्मिन्नतिसितमहसि सरभसमहासीव हरेण HarṣaC. 290. 3.

अतिसितिमन् (ati-sitiman) *m.* extreme whiteness कान्तिं कुर्वत्सुधाब्धेः क्वचिदतिसितिमद्योतिभिर्भित्तिभागैः (इदं विभाति भवनम्) YaśasCam. i. 352. 8.

अतिसिद्ध (ati-siddha) *adj.* excessively cooked अतिलोभादतिसिद्धमसिद्धं वा पर्युषितं वा भोजितवतः … भवत्युपधाव्यापत् Hastyāyur. 118. 21 (1. 16)

अतिसिद्धत्व (atisiddha-tva) *n.* the state of being very well-known or established वक्तुमिष्टस्य … अतिसिद्धत्वं वा विशेषं वक्तुं निषेध इव Kāvyānu. (He.) 321. 3.

अतिसिद्धि (ati-siddhi) *adj.* having great accomplishment ब्राह्मणद्वेषिणा नित्यं सर्वपापातिसिद्धिना । तस्य भार्या जनस्थानाद्रावणेन हृता छलात् Rāmā.(GORRE.) iv. 57. 10.

अतिसिध्य (ati-sidhya) *adj.* surpassing the Puṣya star सर्वार्थसाधने पुष्योऽतिसिध्यो वैष भास्यति DvyāśraKā. 11. 18 (comm. पुष्यनक्षत्रतुल्योऽतिसिध्यो वा पुष्यादप्यधिको वा)

अतिसिन्धु (ati-sindhu) *m.* name of a country (one of the 72 divisions of Bhārata) एकविंशतिसाहस्रो लाडदेशः प्रकीर्तितः । अतिसिन्धुश्च ग्रामाणां दशसाहस्र उच्यते SkandP. i(2). 39. 146.

अतिसिराव्यध (ati-sirāvyadha) *m.* deep cutting of vein, venesection अतिस्विन्नस्योष्णकाले तथैवातिसिराव्यधात् । अतिप्रवर्तते रक्तं तत्र कुर्यात्प्रतिक्रियाम् S'ārṅgaS. iii. 12. 30.

अतिसीद् (ati-sīd-) cf. **अतिसद्** [P. vii. 3. 78]

अतिसीदत् (ati-sīdat) *adj.* expiring, passing away शरक्षते गजे भृङ्गैः …। रुतव्याजेन रुदितं तत्रासीदतिसीदति S'iśuVa. 19. 70.

अतिसुकर (ati-sukara) *adj.* quite easy to do पयोग्रहणं सन्धिनीक्षीरमिति समासान्तवर्तिनः क्षीरपदस्य नातिसुकरः सम्बन्धो यतः ManuBh. i. 422. 27 (*on* 5. 8); उज्ज्वलनेऽपि च तेषां पातनमतिसुकरम् KalāVi. 8. 16.

अतिसुकाल (ati-sukāla) *adj.* creating a very prosperous time दर्शनानि पडपि प्रसभं दुःकालसङ्कटगमिष्यदसूनि । अन्नदानकलयातिसुकालोऽजीवयज्जिनमतैकरतो यः VasaViKā. 5. 5.

अतिसुकुमार (ati-sukumāra) *adj.* [*f* -ī] **i** very delicate or tender अतिसुकुमारकरचरणोरःस्थलविपुलबाहुंसगलवदनाद्यवयवविन्यासः … अवधूतमलिननिजशरीरेण ग्रहगृहीत इवादृश्यत BhāgP. v. 5. 31; अतिसुकुमारं च जनं सन्तापपरमाणवोऽपि मालतीकुसुममिव म्लानिमापादयन्ति HarṣaC. 26. 4; ताः कार्या न वेति वीक्षायां (अङ्गेषु) … अतिसुकुमारेषु तेषूग्रहेतुताबुद्धीनामनर्हत्वात् न कार्येति प्राप्ते GoviBh. 290. 9 (*on* iv. 1. 6); अतिसुकुमारकुसुमलोभनीयाभिनवोन्मेषयौवनभूषिताम्…स्वतनयां लोकोत्तरे पुंसि निवेश्य…वरमन्वेषयामास ĀnandRa. 4. 32 (3); **ii** very melodious or sweet धाम्नो वंशस्तस्य प्रकाशतां विभ्रदारवं शस्तस्य । अतिसुकुमारमयन्तं मधुमयतां गोपसतितमा रमयन्तम् YātrāPra. 3. 224; अहोऽतिसुकुमारी या सीता जनकनन्दिनी AdhyāRā. ii. 8. 29; अतिसुकुमारीम् … स्त्रियं गर्भिणीं दृष्ट्वा KāśyaS. 190A. 5.

अतिसुकुमारकाकली (atisukumāra-kākalī) *f.* very gentle Kākalī note (a modification of Niṣāda) चतुर्विधातोद्यवर्जितोऽतिसुकुमारकाकलीप्रायप्रमदागीतमात्रावशेषो यश्चित्तग्राही (स लौकिकः) AbhinBhā. iii. 69. 13 (*on* 19. 125)

अतिसुकुमारार्थ (atisukumārārtha) *m.* very delicate sense सेयमतिसुकुमारार्थं नातिसुकुमारसंदर्भा भारती नाम वृत्तिः SaraKaṇṭhā. 161. 25.

अतिसुकृतवत् (ati-sukṛtava(n)t) *adj.* highly meritorious, virtuous or pious इदमपि जन्म … । अतिसुकृतवदेवाद्य ज्ञातं नो दर्शनेन तव देवाद्य Yudhi-Vi. 6. 138.

अतिसुकृतवश (atisukṛta-vaśa) *m.* [Inst.] on account of great fortune, fortunately अनयाहम् … अतिसुकृतवशेन धर्ममात्रा निजकुलदेवतयेव बोधितोऽस्मि PrabhāC. 64. 26.

अतिसुकृतसार (atisukṛta-sāra) *m.* the essence (i. e. effect) of great merit or virtue मृगीदृशः … । कराब्जव्यापारानतिसुकृतसारान् रसयतो जनुः सर्वश्लाघ्यं जयति ललितोत्तंस भवतः RasGaṅ. 507. 11; BhāmiVi. 2. 53.

अतिसुकृतिन् (ati-sukṛtin) *adj.* highly meritorious, virtuous or pious अतिसुकृतिनां कर्णेष्वोंकारमत्र विवृण्वतः YātrāPra. 9. 51; मार्गे पश्यत्यतिसुकृतिनः कस्यचिद्दारयोषित् S'ṛṅgāMañ.(A.) 18. 22.

अतिसुकोमला (ati-sukomalā) *adj.* (*f.*) very tender or soft मुक्ता प्रासादमध्ये च शय्यैकातिसुकोमला RauhiC. 312.

अतिसुख (ati-sukha) *adj.* [*f.* -ā] very pleasant or agreeable तस्मिन्नतिसुखे काले धनुष्मानिषुमान् रथी । … सरयूमन्वगां नदीम् Rāmā. ii. 57. 14; अज्ञातिता नातिसुखा नावज्ञेयास्त्वतः परम् । अज्ञातिमन्तं पुरुषं परे परिभवन्त्युत MahāBhā. xii. 81. 34; *n.* great happiness or pleasure, great ease अत्यन्तविस्मृतैवातिसुखाय भ्रमदायिनी YogVā. iii(1). 113. 26; बहुतरमुपचारात् सारमाधारलोके जननमतिसुखानां वर्धनं श्रेयसां वा HārīS. i. 1. 21; विस्रम्भादतिसुखमेवानुभूयते SaraKaṇṭhā. 651. 3; बहुकालं मध्येमार्गमतिसुखस्य लाभान्न कर्मणि विरज्येत TattvPrakā. 146A. 3 (*on* iii. 1. 25); (मुरारिः) साम्राज्यं दीर्घमायुर्व्यतरदतिसुखं रामचन्द्राय हृष्टः VīraBhā. 9. 16; द्विधातिकृच्छ्रातिसुखेन साध्यम् KalyāKā. 7. 58; *m.* name of a friend of Kṛṣṇa नरो नारायणश्चान्योऽमलश्चातिसुखस्तथा । …कृष्णस्यासन् सखिप्रियाः ĀdiP. 12. 44.

अतिसुखकृत (atisukha-kṛta) *adj.* arising or resulting from great happiness अतिसुखकृतमुक्तितः पठन्तौ सुविषमसौगतशास्त्रजातमत्र । … °अर्थतत्त्वम् … अधिजग्मतुस्तौ PrabhāC. 66. 3.

अतिसुखत्व (atisukha-tva) *n.* the state of great happiness or joy मायया क्रीडायामन्यानुरोधाभावेनातिसुखत्वात् … मायामात्रमेव स्वप्नः AṇuBh. 184. 11 (*on* iii. 2. 3)

अतिसुखद (atisukha-da) *adj.* [*f.* -ā] causing extreme joy, pleasure or happiness ममता … तनुरूपातिसुखदा कोमलाङ्गी मनोहरा ĀdiP. 11. 63; अतिसुखदः … राज्ञा तेन विशेषितो निजधिया वेशोऽपि देशोऽपि वा RājTa.(S'rī.) 1(6). 32; गौराङ्गो भगवत्प्रियोऽतिसुखदः प्राप्तः सुबाहुः पुरः GopāKeCan. 60. 6.

अतिसुखदायिन् (atisukhadāy-in) *adj.* giving extreme happiness or pleasure अतिसुखदायि वाश्चर्यदर्शनम् Kād. 181. 15.

अतिसुखधी (atisukha-dhī) *adj.* desirous of great happiness शक्तोऽतिसुखधीः पातुं कः शिखामाशुशुक्षणेः PadmP.(Ra.) 46. 21.

अतिसुखपराङ्मुख (atisukha-parāṅmukha) *adj.* averse to great happiness अतिसुखपराङ्मुखेन धूर्जटिललाटलोचनाग्निनेव हृदयेनाङ्गीकृतकन्दर्पयोः (तयोः) … अतिचक्रमुः कतिपयेऽपि दिवसाः TilaMañ. 104. 5.

अतिसुखप्रद (atisukha-prada) *adj.* giving extreme happiness or great pleasure विदग्धया विदग्धेन संगमोऽतिसुखप्रदः BrahmVaiP. ii. 8. 31; अयं हि वर्तुलः स्व(? ख)ल्वो मर्दनेऽतिसुखप्रदः RasRaSa. 9. 87.

अतिसुखम् (ati-sukham) *adv.* quite happily त्वम्…अतिसुखमवसश्चित्रकूटे गिरीन्द्रे Nārāy. ix. 34. 5.

अतिसुखस्पर्श (atisukha-sparśa) *adj.* whose touch is very pleasant अनिलोऽतिसुखस्पर्शो दिशः सुरभयन् ववौ PadmP.(Ra.) 4. 19.

अतिसुखहेतु (atisukha-hetu) *m.* cause of extreme happiness or pleasure अद्य सनातनमतिसुखहेतुम् । न परिहरिष्ये विधिकृतसेतुम् StavMā. 269. 21.

अतिसुखावह (ati-sukhāvaha) *adj.* bringing great pleasure, very delightful विवाहो रमया कल्केरभूदतिसुखावहः KalKiP. iii. 10. 30.

अतिसुखासिका (ati-sukhāsikā) *f.* great comfort राज्यं पालय निश्शेषं

यच्छ मेऽतिसुखासिकाम् PadmP.(Ra.) 32.122.

अतिसुखित (ati-sukhita) *adj.* very happy चौरनाम न जानाति जनोऽतिसुखितः सदा RauhiC. 25.

अतिसुखिन् (ati-sukhin) *adj.* extremely happy or pleased अभ्युन्नताभिः (भ्रूभिः) अतिसुखिनः (जनाः) BṛSaṁ. 68.68; राजा वातिसुखी लोके प्ररूढेन्द्रियवानपि BṛĀraUBhVā. ii. 1.346; न च स्वोपकारिण्यसति प्रत्युपकारं कंचित्करोति इत्यतोऽतिसुखी प्रत्यय इत्युपहासः VedāntKa. 13.18 (*on* i. 1.1)

अतिसुखोष्ण (atisukhoṣṇa) *adj.* very agreeably warm °करीषैः। स्वेदनान्यतिसुखोष्णसुखानीत्येवमाचनिलवारणमिष्टम् KalyāKā. 12.14.

अतिसुखोद (ati-sukhoda) *adj.* (full) of very wholesome water सत्पद्मरागमणिकल्पितकर्णपूरं पूरायितामतिसुखोदसरिद्वरायाः। ··· वैकुण्ठनाथरमणीमनुनीय वाचा BṛBrahmaS. i. 9.75.

अतिसुगन्धा (ati-sugandhā) *adj.* (*f.*) very fragrant रत्नवि(? वी)-थिषु योज्यमानाः श्रेणयः सुवर्णयूथिका अतिसुगन्धा मुक्तायूथिका अतितरां राजमाना भवन्ति SāmaraU. 270.23.

अतिसुगन्धि (ati-sugandhi) *adj.* very fragrant, giving very sweet smell सहकारतैलमीषत्तिक्तमतिसुगन्धि वातकफहरम् SuśruS. i. 45.127; तस्य च पूर्वतीरे महदाम्रवनम् ··· फलैरतिसुगन्धिभिः ··· चितम् VarāP. 80.2(11); पुष्पाण्यतिसुगन्धीनि ··· यः पुमान्। प्रयच्छति हि देवेशम् BhaviP. 156A.10 (i. 103.4); 178A.21 (i. 120.47); (ऐरावणः) गण्डस्थलगलद्दानजलैरतिसुगन्धिभिः स्वर्गाङ्गणभुवं कुर्वन् कस्तूरीस्तबकाङ्कितम् TriṣaŚaPuC. i. 3.404; (विहरति हरिरिह सरसवसन्ते) नवमालिकयातिसुगन्धौ GītGo. i. 3.7.

अतिसुगन्धि(न्) (ati-sugandhi(n)) *adj.* very fragrant[nt.](?) cf. P. v. 4. 135 and SuśruS. i. 45.127.

अतिसुगम (ati-sugama) *adj.* quite easy to tread प्राप्तया सिद्धिदूत्येव शरदा दत्तसंमदः। दर्शयन्त्यातिसुगमं मार्गं स्वल्पाम्बुनिम्नगम् KathāSaSāg. iii. 5.64.

अतिसुगमार्थ (ati-sugamārtha) *adj.* meaning of which is easy to understand श्लोकेऽतिसुगमार्थे ··· मूढः कथं भवान् PārśvC. 3.370.

अतिसुगव्य (ati-sugavya) *n.* product from a very good cow निष्कादिष्वसमासग्रहणं ज्ञापकं पूर्वत्र तदन्तप्रतिषेधस्य। उगवादिभ्यो यत्। गव्यम्, सुगव्यम्, अतिसुगव्यम् KāśiVṛ. *on* P. v. 1.20.

अतिसुघटत्व (atisughaṭa-tva) *n.* the state of being very fitting or appropriate पृथिव्यादिजीवस्यैव तदन्तर्यामित्वम्। पृथिव्यादिशरीरत्वादेस्तस्मिन्नतिसुघटत्वात् TattvPrakā. 36B.10 (*on* i. 2.18)

अतिसुघनस्नेह (atisughana-sneha) *m.* very intimate affection, very deep love अथातिसुघनस्नेहनिरावरणचेष्टयोः। तयोरनयवृत्तान्तो राज्ञाकर्णि YogVā. iii(1). 89.25.

अतिसुचिरम् (ati-suciram) *adv.* for a very long time दृष्टः कातरनेत्रयातिसुचिरम् ··· दयितया ··· वल्लभः SaduktiKa. 102.24.

अतिसुजन (ati-sujana) *m.* very good person अतिसुजनेन ··· उपवनमनेनानावि Nalo. 2.35.

अतिसुत्वरी (ati-sutvarī) *adj.* [*f.*] (a woman) who has surpassed one who presses (Soma plant) सुत्वानमतिक्रान्ता अतिसुत्वरी SiddhāKau. 112A.1.

अतिसुदीप्तगात्र (atisudīpta-gātra) *adj.* having a very refulgent or lustrous body संमिश्रवर्णोऽतिसुदीप्तगात्रः ··· भोगेन युक्तः समता प्रकृत्या HāriS. i. 5.23.

अतिसुदीर्घ (ati-sudīrgha) *adj.* quite long कालेनातिसुदीर्घेण यौवनस्था वराङ्गना। प्रार्थ्यमानापि राजन् वै नात्मानं दातुमिच्छति SkandP. v(3). 33.10.

अतिसुदुःखित (ati-suduḥkhita) *adj.* [*f.* -ā] very much grieved, very greatly afflicted मनोरमा तत्र बभूवातिसुदुःखिता DevīBhāP. iii. 16.13; देहिनोऽमरतां प्राप्य निवसन्ति सुखं दिवि। ···अन्धान्निरीक्ष्यातिसुदुःखिताः ParamāKā. 23.24.

अतिसुदुर्लभ (ati-sudurlabha) *adj.* extremely difficult to get वरं वृणुष्व हे वत्स यत्ते मनसि वर्तते ··· अतिसुदुर्लभम् BrahmVaiP. ii. 63.13; कष्टं हि सुकरं पुंसां विवेकोऽतिसुदुर्लभः PārśvC. 6.65.

अतिसुदुष्कर (ati-suduṣkara) *adj.* very difficult to accomplish अतिसुदुष्करमन्यतिरिक्तदृक्छृतिभिरप्यथ दृष्टिविषैरिदम् Subhāṣi. 432.

अतिसुदृढ (ati-sudṛḍha) *adj.* very firmly set हेतुना केन हीयते। येनातिसुदृढो भावस्त्वयि PauṣkS 19.1; अतिसुदृढं हि दृष्टान्तत्वेनोपादीयते TattvPrakā. 128B.12 (*on* ii. 4.8); 129A.4 (*on* ii. 4.8)

अतिसुदृढम् (ati-sudṛḍham) *adv.* quite firmly हन्यमानं च यं माता हस्तयोः पादयोः पिता। अवष्टभ्यातिसुदृढं संनिवेश्य महीतले KathāSaSāg. xii. 27.79.

अतिसुन्दर (ati-sundara) *adj.* [*f.* -ī, -ā] **A i** very handsome, very beautiful (animates) विवाहार्थो न मे कश्चिदिमां दृष्ट्वातिसुन्दरीम् MahāBhā. iii. 248.13; कल्याणरूपा सैरन्ध्री वल्लवश्चातिसुन्दरः MahāBhā. iv. 18.5; सुमित्रानन्तरं तस्या ईक्षांचक्रेऽतिसुन्दरी। स्वप्नान् PadmP.(Ra.) 25.12; अर्भकं च ददर्शातिसुन्दरम् PadmP.(Ra.) 26.135; 73.43; नमः शिवाभ्यामतिसुन्दराभ्याम् ··· नमो नमः शंकरपार्वतीभ्याम् UmāMaSt. 6; Stotrā. 18.21; विस्तीर्णवक्षाः सुभुजोऽतिसुन्दरः···श्यामच्छविः काम इवापरो हि सः PadmP. i. 22.26; ii. 105.61; iii. 26.16; तिस्रः कन्याः ··· अतिसुन्दराः DevīBhāP. iii. 13.16; दृष्टः स्वप्ने ··· मया देवो महेश्वरः ··· अतिसुन्दरः BṛDharmaP. i. 9.17; शिरोयोजनमात्रेण बालोऽभूदतिसुन्दरः BṛDharmaP. i. 60.73; (अमात्याः) एतेऽतिसुन्दराः नानाभूषावस्त्रैरलंकृताः GaṇeP. i. 1.31; योषिद्योषित्सु रत्नभूतातिसुन्दरी। कुटुम्बिनीति स्वं नाम विदधे सार्थकं तु सा GaṇeP. i. 7.13; i. 20.31; ŚivaP. ii(1).3.26 (39B.8); ततोऽतिसुन्दरी यक्षी ···। शापातिशाद्यचतां प्राप्ता मुक्ता रामप्रसादतः AdhyāRā. i. 4.31; i. 3.35; चक्री बलाका हंसी वा यदि केतौ निलीयते। तदा नरपतिर्भार्यामाप्नोत्यतिसुन्दरीम् SamarāSū. 17.178; 57.82; कार्पासकलुषा देवी वारुणी चातिसुन्दरी CaturCin. ii(1). 87.13; अतिसुन्दरो मन्दस्मेरपूरितवदनः GopāKeCan. 99.21; पराक्रमवन्तोऽतिसुन्दरा निराश्वासा भूताः VetāPañ.(Ja.) 114.20; KathāKau. 3.58; StavMā. 48.13; 143.22; अत्र मन्मथमिवातिसुन्दरम् ··· वेङ्कटपतिम् Kuval. 171 (103); कन्यकाः ··· अतिसुन्दरेण वपुषा ··· अलभन्त जन्म ŚivLī. 17.27; 18.6; (कलिः) उग्रमप्यतिसुन्दरम् ··· ईश्वरम् (प्रत्यपद्यत) ParamāKā. 100.6; **Aii** very charming, very pleasant, very agreeable (inanimates) तारातरणिशक्तीनां समवायोऽतिसुन्दरः BrahmāṇḍP. iii. 35.21; तपःसमुचितं क्षेत्रं विशालमतिसुन्दरम्।··· सः ··· प्रविवेश PadmP.(Ra.) 29.89; DevīBhāP. v. 9.15; ता एवैताः (सुवः)। नातिदूर (v. l. नातिसुन्दर) एव तावदासां स जीर्णकन्दरः MahāvīC. 7.11(1)(195.14); किमपि संदिश वस्त्वतिसुन्दरम् RāmC. 7.47; इमान्यतिसुन्दराणि लवलीलतासदनानि TilaMañ. 166.7; (स्थलम् ··· गोलोकाभिधम्) हरिसारसुसंकृप्तसोपानैश्चातिसुन्दरैः ··· सुसंस्कृतम् BrahmVaiP. i. 28.49; ii. 16.144; आलिखेत प्रथमं चक्रम् ··· समासं चातिसुन्दरम् NityāṢoḍa. 1.132; KāliViT. 27.7; अतिसुन्दरमप्यन्तवद्भवति। तेन तदपि हेयमेव विवेकिनः TattvVai. 6.15 (*on* 1.2); पादत्रयाभ्यासस्तु नातिसुन्दरः SaraKaṇṭhā. 219.19; SamarāSū. ii. 75.5 (57); निजदोषावृतमनसातिसुन्दरमेव भाति विपरीतम्। पश्यति पित्तोपहतः शशिशुभ्रं शङ्खमपि पीतम् KāvyPra. 662.1; RasGaṅ. 638.23; भद्रकं पञ्चवर्णरजसा विलिखेदतिसुन्दरम् ĪśānŚiPa. i. 24.8; त्रिकोणमतिसुन्दरम्। ज्योतिषां निलयं दिव्यं प्राहुः PañcaRā.(Nā.) v. 11.8; ii. 2.77; ओजः समासभूयस्त्वं तद्वयेष्वतिसुन्दरम् Vāgbhaṭā. 3.12; त्रैलोक्येऽतिसुन्दरम् (तच्चैत्यम्) TriṣaŚaPuC. i. 6.614; वाहनैश्चातिसुन्दरैः (सालकेव पुरी बभौ) TriṣaŚaPuC. ii. 2.63; वामे पदे निहितमार्द्रमलक्तकं ते नान्यत्र यत्तदतिसुन्दरमेव मन्ये BhikṣāKā. 5.9; सिंहासनं सौवर्णमतिसुन्दरं स्मरेत् VīraMi(Pūjā.) 129.16; ŚivLī. 3.57; 9.56; श्रीचक्रम् ··· कुर्यात् स्थण्डिलपूजायां हस्तमात्रेऽतिसुन्दरम् TantrRā. 33.6 (comm. अतिसुन्दरं वक्ष्यमाणमानाद्यलङ्कितम्); 33.19; 33.25; **Aiii** [with Abl.] more handsome (than) यं कंचित्पुरुषवरं स्वभर्तुरतिसुन्दरं दृष्ट्वा। मृगयति किं न मृगाक्षी PraboSu. 32; **B** very pleasing (to hear), very sweet (to the ears) हलिना चक्रिणा च सा। आनीयत समाश्वासं वचनैरतिसुन्दरैः PadmP.(Ra.) 86.18; निष्ठ्यूतोद्गीर्णवान्तादि गौणवृत्तिव्यपाश्रयम्। अतिसुन्दरमन्यत्र ग्राम्यकक्षां विगाहते Kāvyāda. 1.95; SaraKaṇṭhā. 101.16; सा ··· सिंहवाहन इत्येवं चक्रे नामातिसुन्दरम् GaṇeP. ii. 10.29; **C** very beneficial, very good अतिसुन्दरेऽपि दुग्धादौ धातुदोषादरुचिः VedāntKa. 493.14 (*on* iii. 4.26); भवत्वेवमिदं भाविपरिणामेऽतिसुन्दरम् SamarāSaṁ. 9.205; एवं वयस औचित्याद्धर्मोऽप्याहारवद् वरः। स्वीकृतः कृतिना रुच्या परिणामेऽतिसुन्दरः ŚāliC. 5.87; हे सारङ्ग तवातिसुन्दरमिदं केनोपदिष्टं व्रतम् Subhāṣi. 656; अमलीमसमच्छिद्रमक्रेयमतिसुन्दरम्।··· अहो ज्ञानं महद्धनम् Subhuṣi. 12; **D** very auspicious तत्प्रगे मुहूर्तमतिसुन्दरं विजयवर्धनं वर्तते HariVi. 4.12; [अतिसुन्दर is given as the meaning of अमृत NānāMañ. 719; ViśvaLoK. 133.80; and of वाम in NānāMañ. 1191; ViśvaPra. 111.22]

अतिसुन्दरकाय (atisundara-kāya) *adj.* having a very beautiful body अतिसुन्दरकायस्तु मस्तकम् (पातु) GaṇeP. ii. 85.19; ii. 109.7.

अतिसुन्दरगात्र (atisundara-gātra) *adj.* [*f.* -ā] having very beautiful limbs अतिसुन्दरगात्रोऽसौ साक्षान्मन्मथमन्मथः GaṇeP. i. 77.10; अतिसुन्दरगात्रास्ताः ··· निरीक्ष्य मयूरेशं विह्वला मदनाग्निना GaṇeP. ii. 99.32.

अतिसुन्दरचेतस् (atisundara-cetas) *adj.* having a very pleasant heart (ते) यथावद् वृत्तमाचख्युरतिसुन्दरचेतसः PadmP.(Ra.) 81.96.

अतिसुन्दरतनु (atisundara-tanu) *adj.* having a very handsome body अकबरमतिसुन्दरतनुमिन्दुमुखो नायकेन्दुमालोक्य। भवति ··· स्मरपरवशमानसा सद्यः

S'ṛṅgāMañ.(A.) 49. 19.

अतिसुन्दरदेह (atisundara-deha) *adj.* having a very beautiful body मयूरेशः ··· अतिसुन्दरदेहः सन् नागकन्याभिराहृतः । गृहं स्वकीयम् GaṇeP. ii. 100. 1.

अतिसुन्दरमन्दहास (atisundara-mandahāsa) *adj.* whose gentle smile is very beautiful अतिसुन्दरमन्दहासम् ।··· अर्चयतु नन्दजम् PañcaRā.(Nā.) iii. 11. 4.

अतिसुन्दररूपा (atisundara-rūpā) *adj.* (*f.*) of a very beautiful appearance अतिसुन्दररूपा त्वं प्रलोभय महामुनिम् । इतीन्द्रकथिता रम्भा विश्वामित्राश्रमं ययौ SkandP. iii(1); 39. 45.

अतिसुन्दरवर्चस् (atisundara-varcas) *adj.* possessed of a very beautiful lustre देवालङ्कारमतुलमतिसुन्दरवर्चसम् । ··· पिबन्त्यमृतकल्पञ्च प्रीत्या जम्बूफलासवम् VarāP. 77. 19.

अतिसुन्दरा (ati-sundarā) *f.* name of a metre [pw]; a metre belonging to the class Aṣṭi (also called Citrā or Cañcalā) [MW]

अतिसुन्दराकार (ati-sundarākāra) *m.* very handsome form or figure वर्ष्मे देहे प्रमाणातिसुन्दराकारयोरपि ViśvaPra. 95. 120; DharK. 1375.

अतिसुन्दराकृति (ati-sundarākṛti) *adj.* of a very beautiful form or figure विराधकायादतिसुन्दराकृतिः ··· व्यदृश्यत AdhyāRā. iii. 1. 36; *f.* very beautiful form or figure वर्ष्मे देहप्रमाणातिसुन्दराकृतिषु स्मृतम् MediK. 97. 126 = S'abdaRaSaK. 226. 1.

अतिसुन्दराङ्गी (atisundarāṅgī) *adj.* (*f.*) of a very beautiful body अतिसुन्दराङ्गीम् ··· राजकन्याम् । मुक्त्वा द्रुतं क्वापि गतो न चेत् स्याः स्यात्तदानर्थनिपात एव PadyaVe. 427.

अतिसुन्दरी (ati-sundarī) *f.* one of the thousand epithets of Rādhā अतिसुन्दरी ।··· इति ··· राधानामसहस्रकम् PañcaRā.(Nā.) v. 5. 113.

अतिसुप्ततनुता (atisuptatanu-tā) *f.* the state of the body being extremely numb स्तब्धातिसुप्ततनुतातिहिमाप्रियत्वनिद्राक्षतिश्वसनसंभवलक्षणानि KalyāKā. 9. 54.

अतिसुप्ता (ati-suptā) *adj.* (*f.*) i over-sleeping तथा हरीणां कलहायमाना सेना सुखं दातुमपारयन्ती । सुधातिसुप्ता बहुवासराणि क्षणं न वेश्येव ययौ न तस्थौ RāghPāṇ.(Dha.) 16. 31 (comm. अतिनिद्राणा); ii enjoying cohabitation for a long time, RāghPāṇ.(Dha.) 16. 31.

अतिसुप्रतिष्ठित (ati-supratiṣṭhita) *adj.* extremely well-established जगत्याख्याते सत्कृतगुरुगणे (v. l. सुधृकेऽतिसुप्रतिष्ठिते जगति) ··· वृत्तभङ्गो भवति इत्यभिधाय गन्तुमुद्चलत् NalaCam. 5. 2 (6)

अतिसुप्रदेश (ati-supradeśa) *m.* very good place किंचिच्छूयमाणे नातिसुप्रदेशस्थिते द्वादशवर्षाणि ViraMi.(Saṁskāra.) 765. 19.

अतिसुप्रभ (ati-suprabha) *adj.* greatly lustrous or brilliant पावकादतिसुप्रभात् । आविर्बभूव चार्वङ्गी कन्यका शुभलक्षणा DevīBhāP. vi. 21. 41; तदोत्तस्थौ सुप्त इव स बालः ··· अतिसुप्रभः S'ivaP. ii(4). 17. 57 (214B. 1)

अतिसुप्रभावा (ati-suprabhāvā) *adj.* (*f.*) possessed of great prowess वेदे पुराणे ऋषिभिः प्रसिद्धा या गौतमी ···। वक्तुं कथं तामतिसुप्रभावामशेषतो नारद कस्य शक्तिः BrahmP. 174. 29.

अतिसुप्रियवादिनी (atisupriya-vādinī) *adj.* (*f.*) speaking very pleasant words अभार्यो लभते भार्याम् ··· अतिसुप्रियवादिनीम् BrahmVaiP. iv. 56. 86.

अतिसुबुद्धि (ati-subuddhi) *adj.* extremely wise or intelligent निवेदितं तु तत्सर्वं रामेणातिसुबुद्धिना SkandP. iii(2). 33. 15; क्षोणीचन्द्रचूडामणिना बलिनातिसुबुद्धिना । ··· वर्तितव्यं यथायथम् ParamāKā. 32. 36.

अतिसुबोधा (ati-subodhā) *adj.* (*f.*) very easy to understand तज्ज्ञानवासनातिसुबोधाकरत एव करणज्ञानाम् SiddhāTaVi.(S'eṣaVā.) 30. 24.

अतिसुभक्ति (ati-subhakti) *f.* great devotion पुरा हिमाचलो देवा मेना चातिसुभक्तितः । सेवां मे चक्रतुः S'ivaP. ii(3). 4. 26 (127B. 1)

अतिसुभग (ati-subhaga) *adj.* [*f.* -ā] very fortunate, very handsome, very beautiful or charming दानवगुरौ झषे विद्वानाढ्यो नृपजनितपूजोऽतिसुभगः Bṛhajjā. 18. 16; तेजस्विनमतिसुभगम् ··· निजहारो बलयुक्तो जनयति (ग्रहः) Sārā. 5. 30; 4. 26; यदतिसुभगमार्यसेवितं तच्छुभमनुसृत्य मनोज्ञभावबुद्ध्या । अधिगमय पदं सदाविशोकम् YogVā. ii. 9. 43; iv. 14. 46; तौ दम्पती अतिसुभगावतितरस्नेहसंपन्नौ निरन्तरसेवायां संयोक्ष्यमाणरती आसाताम् SāmaraU. 289. 4; कृतनाम्नो महीपतेः । अजायन्तातिसुभगाः क्रमात्सप्त कुमारिकाः KathāSaSāg. vi. 2. 13; viii. 1. 138; वन्देऽहम् ···अतिसुभगं वश्यगोपालकृष्णम् KṛṣṇaKa. 3. 97; SaduktiKa. 141. 11; क्वचिद्भवत्यतिसुभगोऽपि दुर्भगः Subhāṣi. 1945.

अतिसुभगवपुस् (atisubhaga-vapus) *adj.* having a very beautiful body or figure तदतिसुभगवपुषि न खलु विधिरपि गुणगणमिति ह निगदितुमलमलम् IśānS'iPa. i. 21. 31.

अतिसुभगशृङ्गधर (atisubhagaśṛṅga-dhara) *adj.* having very beautiful peaks प्रभवः को गङ्गाया नगपतिरतिसुभगशृङ्गधरः VidaMuMa. 2. 24.

अतिसुभगाकृति (atisubhagākṛti) *adj.* having a very beautiful figure स यौवनारम्भ एवातिसुभगाकृतिः AvantiKa. 9. 20.

अतिसुभाषित (ati-subhāṣita) *n.* very good saying (ironical) आर्हतास्त्वाहुः सूक्ष्मैः शब्दपुद्गलैरारब्धशरीरः शब्दः स्वप्रभवभूमेः निष्क्रम्य प्रतिपुरुषं कर्णमूलमुपसर्पतीति तदेतदतिसुभाषितम् NyāyMañ. i. 198. 10.

अतिसुमनोहर (ati-sumanohara) *adj.* extremely beautiful or charming (कृष्णरामौ) दृष्ट्वातिसुमनोहरौ । स तर्कयामास तदा मुदं देवावुपागतौ BrahmP. 192. 76.

अतिसुमहत् (ati-sumahat) *adj.* very great or big एवं तेन प्रतिज्ञाते शब्दोऽतिसुमहानभूत् SkandP. i(2). 31. 4.

अतिसुमुखा (ati-sumukhā) *adj.* (*f.*) having a very graceful face राम–अतिसुमुखा जानकी BālRā. 10. 53(2)

अतिसुमुखी (ati-sumukhī) *adj.* (*f.*) having a very fair or charming face तस्य भार्या वरारोहा सुन्दरी सुभगा शुभा । सदाचारातिसुमुखी DevīBhāP. v. 17. 6.

अतिसुर (ati-sura) *adj.* excelling or surpassing (that of) the gods 'सुद्(?सु)स्तु स्वञ्जाम्' इत्युच्यमाने सुरेत्यादौ यः सुशब्दो यश्चोपसर्गस्तस्यापि ग्रहणं स्यात् । ततश्चातिसुरोऽतिसुस्थित इत्यादावपि षत्वं प्रसज्येत Nyās. ii. 288. 3 (*on* vi. 1. 135); नूनं नः सुकृतं किमप्यतिसुरं गत्येह संसूच्यते GopāKeCan. 135. 26.

अतिसुरक्षत्व (atisurakṣa-tva) *n.* the state of being strongly guarded, strong protection तत्र राजकुलचारिण्य एव लक्षण्यान् पुरुषानन्तःपुरं प्रवेशयन्ति नातिसुरक्षत्वादपरान्तिकानाम् KāmSū. 301. 15 (5. 6); नातिसुरक्षत्वादिति नात्यन्तं स्वा राजकीया तत्र रक्षास्ति JayaMa. 302. 4 (*on* 5. 6)

अतिसुरत (ati-surata) *n.* excessive sexual intercourse अतिसुरतमजस्रं सेवनातिक्रमेण नयति रुधिरशोषं तेन वै पाण्डुरोगम् HārīS. iii. 8. 5.

अतिसुरभि (ati-surabhi) *adj.* very fragrant, strongly scented, having a strong smell शशधरः ··· मलयजरजश्चातिसुरभिः । ··· तदिदमखिलं रागिणि जने करोत्यन्तःक्षोभं न तु विषयसंसर्गविमुखे S'atTrayī. 134; अतिसुरभिणा ··· चन्दनवारिणा सिक्तशिशिरमणिभूमिम् ··· आस्थानमण्डपमयासीत् Kād. 17. 5; 9. 10; 15. 14; HarṣaC. 35. 2; अतिसुरभिरभाजि ··· संतानकः S'iśuVa. 6. 67; विजातीयैः पुष्पैरतिसुरभिभिर्बिल्वतुलसीयुतैश्चेमं पुष्पाञ्जलिमजित ते मूर्ध्नि निदधे BhagMāPū. 8; PāñcRā.(Nā.) v. 4. 21; जिनमुखशतदलम् ··· अतिसुरभि ··· पपुः ··· सुरयुवतिदृशः MahāP. 23. 170; तत्र च दिवसे ··· विलसितमतिसुरभिसुखस्पर्शसमीरणेन NalaCam. 4. 12(4); TattvVai. 42. 20 (*on* 1. 38); Pañcākhyā. 50. 13; PrabhāC. 43. 22; अतिसुरभिं दानेन द्विपगणम् ··· भिन्दानेन । द्रुतमावेशि ··· सैन्यम् ··· शिनिजेन YudhiVi. 7. 106; अतिसुरभिरयं प्रसूनराजिः RasSa. 89.

अतिसुरभिगन्धि (ati-surabhigandhi) *adj.* [cf. P. v. 4. 135] having a very strong smell करिघटाः । ··· मदाम्भोधिलहरीर्दधुस्तस्यै (नचै) बह्वीरतिसुरभिगन्धीः प्रियसखीः BhārCam. 9. 2.

अतिसुरभिता (atisurabhi-tā) *f.* strong fragrance or smell अतिसुरभितयानुलिम्पन्तमिव तर्पयन्तमिव ··· घ्राणेन्द्रियम् ··· कुसुमगन्धमभ्यजिघ्रम् Kād. 139. 2.

अतिसुरभिमुख (atisurabhi-mukha) *n.* very fragrant or sweet-smelling face पीनदशनच्छदमच्छिद्रविमुक्तश्लक्ष्णसृक्वसंवृतास्यमतिसुरभिमुखं दधानः AvantiKa. 88. 18.

अतिसुरमण्डलेश्वर (ati-suramaṇḍaleśvara) *adj.* excelling the lord of the host of gods (i. e. Indra) संवराट् ··· अतिसुरमण्डलेश्वरः । उत्प्रयाणमचीकरत् VasaViKā. 10. 42.

अतिसुरम्य (ati-suramya) *adj.* very charming or pleasing कोकिलाकलकूजितम् । आसीद्दतिसुरम्यं हि S'ivaP. ii(3). 18. 6 (142B. 3)

अतिसुरीश्री (ati-surīśrī) *adj.* (*f.*) excelling the beauty or charm of the goddesses पित्रा···रूपेणातिसुरीश्रियाम् ।···कन्यानां ग्राहितः करम् PārśvaC. 6. 924.

अतिसुरूप (ati-surūpa) *adj.* [*f.* -ā] having a very good form, very handsome अशोभनमिदं कार्यं युष्माभिर्यत् कृतं महत् । रुद्रस्यातिसुरूपस्य सेर्ष्या ये हन्तुमुद्यताः SkandP. vii(1). 308. 20; ममेयमतिसुरूपा दारिका Pañcākhyā. 105. 19.

अतिसुलक्षणा (ati-sulakṣaṇā) *adj.* (*f.*) having very good or charming features (हेमकूटस्य) दशभागोच्छ्रिता जङ्घा कर्तव्यातिसुलक्षणा SamarāSū. 57. 64.

अतिसुलभ (ati-sulabha) *adj.* [*f.* -ā] very easily attainable or available अतिसुलभमिति कथम्? 'अतिक्रमे चातिः' इति अतेर्गिसंज्ञाभावात् सुः केवल एव गिः JaineVyā. 341. 27 (*on* v. 1. 47); अतिसुलभमित्यत्र कर्मप्रवचनीयत्वादतेः केवल एव सुशब्द उपसर्ग इति भवति प्रतिषेधः KāśiVṛ. *on* vii. 1. 68; KātanVṛ. *on* iv. 1. 25; श्रीभूतिः ···अतिसुलभजलयवसेन्धनप्रचारम् ··· पेण्ठास्थानं विनिर्माय ··· वणिजां प्रशान्तशुक्क(? शुल्क)भाटकभागहारव्यवहारमचीकरत् YaśasCam. ii. 345. 10; Pradī. vi. 60. 19 (*on* vii. 1. 68); अधिकारं दुरापाद्यमुक्त्वाति सुलभं पुनः। अशक्यं साधनं चोक्त्वा सुशकं तत् फलाप्तये AnuVyā. 18A. 7 (*on* 2. 1); अतिसुलभम् ··· रघुपतिम् ··· प्रपद्ये AdhyāRā. iii. 8. 51; ('कलावती कलालापा') कं ब्रह्म तस्य लालावत् लक्षणया अतिसुलभ आपः प्राप्तिर्यस्याः सकाशात् (सा) LalitāSaBh. 90. 23 (*on* 125); 223. 26 (*on* 291); अशक्तस्यातिसुलभं वासनान्तरमाह SetuBa. 199. 17 (*on* 6. 22); *m.* one of the thousand names of Bālakṛṣṇa यथेष्टदोऽतिसुलभः ··· दैत्यारिः कैटभारिश्च ··· इत्येतत् कथितं देवि सहस्रं नाम ··· विष्णोर्बालकत्वमुपेयुषः PañcRā.(Nā.) iv. 8. 127.

अतिसुलभत्व (atisulabha-tva) *n.* the state of being very easily attainable, easy attainability तादृशज्ञानस्य सार्वदिकत्वेनातिसुलभत्वात् SetuBa. 137. 23 (*on* 4. 7)

अतिसुलभसाध्य (atisulabha-sādhya) *adj.* very easily achievable अथ त्रिकूटाबीजानि प्रत्येकं साधितवतामतिसुलभसाध्यानि कतिञ्चित् फलानि पञ्चभिराह SetuBa. 155. 10 (*on* 4. 55–59)

अतिसुलभ्य (ati-sulabhya) *adj.* very easily available विदित्वातिसुलभ्यानि कन्दमूलफलान्यथ। विदधुर्वसतिं तत्र कानने पाण्डुसूनवः PāṇḍaC. 8. 24.

अतिसुलम्भ (ati-sulambha) *adj.* [*f.* -ā] very easily attainable or available सुदुरोः केवलग्रहणं क्रियतेऽन्योपसृष्टान्मा भूदिति। ··· सुप्रलम्भम्। प्रेण व्यवहितत्वान्न भविष्यति। इदं तर्हि, अतिसुलम्भम् MahāBh. iii. 262. 18 (*on* vii. 1. 68); सुदुस् इत्येताभ्याम् ··· केवलाभ्यामिति किम्? सुप्रलम्भः। दुष्प्रलम्भः। अतिसुलम्भः JaineVyā. 341. 27 (*on* v. 1. 4); यदा त्वतिशब्दो न कर्मप्रवचनीयस्तदा नुम् भवत्येव, अतिसुलम्भ इति KāśiVṛ. *on* P. vii. 1. 68; CāndraVṛ. *on* v. 4. 22; KātanVṛ. *on* iv. 1. 25; Pradī. ii. 285B. 34 (*on* i. 4. 52); त्वम् (लक्ष्मीः) ···भक्तात्मनां चातिसुलम्भतोऽतिसुलम्भ ऋद्ध्यास्पदमस्यजस्रम् DvyāśraKā. 10. 79.

अतिसुलम्भतस् (atisulambha-tas) *adv.* because of being easily available त्वम् (लक्ष्मीः) ···भक्तात्मनां चातिसुलम्भतोऽतिसुलम्भ ऋद्ध्यास्पदमस्यजस्रम् DvyāśraKā. 10. 79.

अतिसुवर्णा (ati-suvarṇā) *adj.* (*f.*) (a cow) of a very bright colour नीलिकायास्तु गोर्मूत्रं कृष्णायाः शकृदुद्धरेत्। पयस्त्वतिसुवर्णायाः पीतायाश्च तथा दधि। कपिलाया घृतं तद्वत् BṛParāSm. 9. 24.

अतिसुवहा (ati-suvahā) *adj.* (*f.*) very easily bearable सद्यो भारावतारात् क्षितिरपि सुतरां (v. l. क्षितिरतिसुवहा) भोगिभर्तुर्बभूव RāghPāṇ.(Kā.) 11. 12.

अतिसुविदित (ati-suvidita) *adj.* very widely known महाज्यैष्ठीयोगे भवति भगवद्देवकुलगा पताकोदञ्चन्तीत्यतिसुविदितोऽयं जनरवः CaitaCa. 244. 5(10)

अतिसुविस्तृत (ati-suvistṛta) *adj.* excessively extensive सर्वे ··· राक्षसेन्द्र ··· अतिसुविस्तृताः VāmaP. 11. 40.

अतिसुवृत्त (ati-suvṛtta) *adj.* of very good character, very virtuous तस्य चातिसुवृत्तस्य देवसेनस्य दुर्जनी। ··· आसीज्जननी स्वामिनी गृहे KathāSaSāg. vi. 3. 72.

अतिसुवृत्तकूप (atisuvṛtta-kūpa) *m.* perfectly circular well तस्मिऽन्समीपेतिसुवृत्तकूपे साक्षाद्रसेन्द्रो निवसत्ययं हि RasPraSu. 1. 1.

अतिसुवृत्तता (atisuvṛtta-tā) *f.* the state of being extremely well-behaved इयमत्यच्छहृदये दधत्यतिसुवृत्ततां बाला NavaSāC. 16. 36.

अतिसुवृत्तभाव (atisuvṛtta-bhāva) *m.* **i** extremely virtuous conduct, the nature of being extremely well-behaved गृहीतहृदयातिसुवृत्तभावात्। वाणी सतः ··· कं कर्णिका च न हरेदिह पङ्कजस्य HarVi. 38. 6; **ii** perfect circularity, HarVi. 38. 6.

अतिसुशीलता (atisuśīla-tā) *f.* the nature of being extremely well-behaved, extremely virtuous conduct अतिसुशीलतादिस्वभावानामाजन्माप्युपेक्षायाः संभवात् VīraMi.(Vyavahāra.) 163. 2.

अतिसुशोभमान (ati-suśobhamāna) *adj.* shining very much यत्र मध्यश्रेणीषु सखीनां चारा अतिसुशोभमाना भवन्ति SāmaraU. 233. 13.

अतिसुश्यामा (atisu-śyāmā) *adj.* (*f.*) extremely dark रेखाकारातिसुश्यामा रोमालिः AlaṅkāŚe. 13. 10(17)

अतिसुश्लिष्ट (ati-suśliṣṭa) *adj.* extremely well-fixed अतिसुश्लिष्टलोहेष्टकचिताभिर्मार्गवापीभिः स्थपुटितमहावटद्रुमोपान्तस्थलाम् ··· नगरसीमामलङ्घयम् TilaMañ. 117. 9–10.

अतिस्थवीयसा हस्तार्गलदण्डेनार्गलयन्तमिव ··· ककुभां चक्रवालम् (हस्तिनम्) ··· अपश्यत् HarṣaC. 104.5; अथ तामतिरौद्रेण शशुनातिस्थवीयसा । भक्ष्यमाणामसौ दृष्ट्वा समाधानप्रदोऽभवत् PadmP.(Ra.) 64.88; **ii** superficial or very gross (argument) अतिस्थवीयानयं सर्वज्ञवादः Kāśi. i. 130.25 (*on* 2.132); i. 214.16 (*on* 4.28); सत्त्वे तद्विरोधादेव प्रागभावादेः तदानीमवस्थानासंभवात् न ततः सिद्धिरिति तदतिस्थवीयः ĀtmaSi. 22.8; यत्तु परिमितशक्तिज्ञानानैश्वर्याद्यापादनाद्धर्मिविशेषविपरीतसाधनत्वमुद्भावितं तदतिस्थवीयः ĪśvaSi.(Yā.) 77.3; अनुवादकतामात्रं वाक्यस्येति निर्णीतवन्तः। तदतिस्थवीयः NyāyKuA. ii(1). 212.6; TantrRa. 232.16; तत्र शब्दतद्व्यापारयोः प्रवर्तकत्वपक्षस्तावदतिस्थवीयानेव NyāyMa. 181.2; NyāyKu. 83.6; 133.2; तदतिस्थवीयः TattvCin. ii(2). 174.1; यच्चोपजीव्यस्यापि प्रत्यक्षस्य ज्वालाभेदानुमानेन बाधो दृष्ट इति तदप्यतिस्थवीयः S'atDū. 131.28; आप्तत्वानिश्चयेऽप्यर्थसंदेहात्प्रवृत्तिरिति चातिस्थवीयः NyāySu.(Ja.) 11B.6 (*on* i. 1.1); PūrvottaVāNaMā. 298.13; VīraMi. (Vyavahāra.) 492.23.

अतिस्थान (ati-sthāna) *n.* standing for a long time अत्याश(? °स)नमतिस्थानमतिचङ्क्रमणम् ··· असेवमानः सर्वमहो गमयस्य CaraS. i. 15.15 (1941 Ed.); अतिस्थानमतिचङ्क्रमणानि च···सर्वमेतदनायुष्यं भिषजः परिचक्षते BhelaS. 12.15 (1.8); 119.27 (6.1); अतिस्थानं च शयनम् ··· बस्तौ दत्ते न सेवेत Hastyāyur. 616.10 (4.5)

अतिस्थित (ati-sthita) *adj.* standing for a very long time नात्युपविष्टो नाप्यतिभाषी नातिस्थितस्तिष्ठेत् RaseCin. 8.40 (96.6)

अतिस्थिर (ati-sthira) *adj.* [*f.* -ā] **i** very hard or solid (अन्नम्) अतिस्थिरं मूत्रशकृद्विबन्धमतृप्तिमव्याप्तिमशीघ्रपक्तिम् । अतिद्रवं पीनसमेहकासरपन्दान् करोति AṣṭāSaṁ. i. 69.6 (1.10); स्तनयोः मण्डले···अतिस्थिरे LalitāTriBh. 300.1 (*on* 27); **ii** very firm, very stable, motionless लोक उदारः सद्गुतदारस्वामिभियातिस्थिरमभियाति RāghPāṇ.(Dha.) 8.33; अतिस्थिरा पृथु(तरा य)त्कीर्तिर्गिरि-[मास्प]द्म् EI. ii. 334.5; खड्गनारायणे यस्मिन् भवति श्रीरतिस्थिरा RasāSu. 2.1 (1.7); तन्मधो इमं मोहनबाणेन स्थिरमतिस्थिरं भावयामि Manmatho. 4.18 (646.1); या सुतरां तरुणी चाप्यतिस्थिरा Hastyāyur. 662.16 (4.19); (ताः) गजारूढास्तथा शक्तिभिरावृताः ··· स्मृत्वा लक्ष्मीमवाप्नोति राजमान्यामतिस्थिराम् TantrRā. 24.79; AbhidhāCin. 1453; Vaija. 207.79; *m.* **i** name of one of the attendants of Skanda ददावनुचरौ मेरुरग्निपुत्राय भारत । स्थिरं चातिस्थिरं चैव MahāBhā. ix. 44.44; **ii** name of one of the four lords of the north-west and belonging to Skanda अतिस्थिरश्चोच्छ्रितश्च चतुर्थस्त्वतिथिप्रियः ĪśānS'iPa. ii. 53.85.

अतिस्थिरगन्धवाह (atisthira-gandhavāha) *m.* very steady wind यत्रातिस्थिरगन्धवाहतुलितं गन्धं गृहीत्वा नवम् । भृङ्गाः ··· भ्रमन्ति UdaySuKa. 130.14.

अतिस्थिरचेतस् (atisthira-cetas) *adj.* having a very steady mind किन्तु ये शक्नुवन्त्यवधारयितुं न चातिस्थिरचेतसस्तेभ्यः अनुज्ञायन्ते (साक्ष्येषु) ManuBh. ii. 106.29 (*on* 8.71)

अतिस्थिरता (atisthira-tā) *f.* great steadiness or motionlessness युगादिजिनबिम्बस्य पुरतः ··· अतिस्थिरतया कायस्य लिखितामिव ··· विभाव्यमानाम् ···तापसकन्यकां व्यलोकयम् TilaMañ. 255.9.

अतिस्थिरत्व (atisthira-tva) *n.* **i** extreme rigidity येषां नासावसादो मुखमतिकुटिलं सन्धिभङ्गाश्च तीव्रो वाक्सङ्गोऽतिस्थिरत्वं हनुगतमपि तान्वर्जयेत्सर्पदष्टान् KalyāKā. 19.130; **ii** great stability द्रव्यभेदाङ्गीकारे अतिस्थिरत्वेन प्रसिद्धेष्वप्यर्थेषु व्यक्त्यभेदप्रत्यभिज्ञा भ्रान्ता स्यात् S'ivārkaMaDī. ii. 93.31 (*on* ii. 2.26)

अतिस्थिराशय (atisthirāśaya) *adj.* having a very firm mind सिद्धमन्त्रानतिस्निग्धान् षोडशातिस्थिराशयान् । तैरवच्छिन्नदर्पं तु होमयेत् TantrRā. 31.99.

अतिस्थिरेतर (ati-sthiretara) *adj.* very unsteady विभावनाकुला त्वयि क्रमेण देवि भावना । वपुष्यतिस्थिरेतरे नितान्तमेव पुष्यति DeviS'. 60.

अतिस्थूल (áti-sthūla) *adj.* [*f.* -ā] **A i** very big, very fat (men, animals) अथैतानष्टौ विरूपानालभते अतिस्थूलं चातिकृशं च VājaS. 30.22; नातिस्थूलं कृशं तथा । न च हीनातिरिक्ताङ्गं क्वचित्कुर्यात्पुरोहितम् AVPari. 3(2).3; मन्दोत्साहमतिस्थूलमतिस्निग्धं महाशनम् । मृत्युः प्रमेहरूपेण क्षिप्रमादाय गच्छति CaraS. ii. 4.51 (1941 Ed.); RugVi. 34.9; अतिस्थूलस्य तावदायुषो ह्रासः ··· कृच्छ्रव्यवायता···अष्टौ दोषाः CaraS. i. 21.4; चलस्फिगुदरस्तनः। अयथोपचयोत्साहो नरोऽतिस्थूल उच्यते CaraS. i. 21.9; ग्राम्यधर्मप्रवृत्तौ तु···अतिस्थूलामतिकृशां गार्भिणीं सूतिकाम् ··· वा न गच्छेत् AṣṭāSaṁ. i. 59.21 (1.9); अतिस्थूलोऽतिकृशो दुर्बलः ···व्याधिबलमेव तावदसमर्थः सोढुम् AṣṭāSaṁ. i. 120.11 (1.23); न स्वेदयेदतिस्थूलरूक्षदुर्बलमूर्च्छितान् AṣṭāSaṁ. i. 135.23 (1.26); i. 146.12 (1.28); (गर्भिणी) मधुरनित्या प्रमेहिणं मूकमतिस्थूलं वा (अपत्यं जनयति) AṣṭāSaṁ. i. 207.1 (2.2); ऋत्विजो वृणुयात् ··· गुणाश्च 'नातिस्थूलः' ManuBh. ii. 24.28 (*on* 7.78); अतिस्थूलो लघुतरो भाससे मम साम्प्रतम् GaṇeP. ii. 137.13; तदा मे वामनो भूत्वा पुत्रत्वं याहि केशव । नातिस्थूलः BṛDharmaP. i. 45.80; अतिव्यायतामतिस्थूलाम् JayaMa. 165.12 (*on* 2.8); अतिस्थूलाप्यतिकृशा···दर्शिता नात्यवर्जिता: AbhinDa. 26; स्थूलातिस्थूलमध्याश्च··· । वीर्यवन्तश्च ते ज्येष्ठा निर्मला बलवत्तराः Rasā. 6.74; अतिस्थूलस्य ··· न योजयेत् क्षीररसान् RasRaSa. 14.75; सिंहः प्रबलमतिस्थूलमपि दन्तावलं हन्तुमाक्रमति ManvaMu. 266.13 (*on* 7.106); पुरुषायिते ··· नातिस्थूलां युतां कुर्यात् KandaCū. ii. 8.41; अतिस्थूलोऽतितीक्ष्णश्च ··· वाजी AśvaVai. 6.11; अतिस्थूलाः कृशाश्चैव हीनाङ्गाश्चैव ये गजाः । तेषामङ्गान्यमेयानि MātaLī. 6.5; यो रक्ताङ्गो नातिदीर्घो न चाल्पो नातिस्थूलो रक्तमत्स्यः स उक्तः BhojanKu. 174.2; **A ii** very thick, very large (limbs) योनिः ··· वैधव्यायातिस्थूला अतिस्थूलघनलोमा पौंश्चल्याय KāśyaS. 47B.40; बाहू वै ललितौ यस्याः ··· नातिस्थूलौ न रोमशौ BhaviP. 22A.21 (i. 5.62); अतिस्थूलाः कृशास्तथा ···एवं बहुविधा भेदा दन्तानां दन्तिनां नृप Hastyāyur. 539.2 (3.34); नातिस्थूला नातिदीर्घा ··· ग्रीवा ··· एतैर्गुणैः समायुक्ता पद्मिनी कीर्तिता बुधैः Mānaso. iii. 20.1737; **B** very big, very thick, very coarse (objects) नातिस्थूलः कार्यः (यूपावटः) MānS'S. 177.17; अतिस्थूलमसारमतिदीर्घम् (यन्त्रम्) SuśruS. i. 7.19; i. 8.9; iv. 35.32; अतिदीर्घमतिस्थूलं जर्जरं स्फुटितं तनु । ··· वर्जयेत् (बस्तिनेत्रम्) KāśyaS. 163A.32 (7.5); अतिस्थूलातिदीर्घे यन्त्रके मर्मघट्टनम् AṣṭāSaṁ. ii. 66.3 (4.11); अवनिपतिस्तु (ताम्) अतिस्थूलमुक्ताफलघटितेन शुचिना हारेण गङ्गास्रोतसेव कालिन्दीशङ्कया कृतकण्ठग्रहाम् ··· ददर्श Kād. 11.10; तं वरद्वीपम् ··· निर्झराणामतिस्थूलैः शीकरैर्व्योमगामिभिः । हसन्तमिव तोषेण श्रीकण्ठागमजन्मना PadmP.(Ra.) 6.89; पात्रं कुर्याद्विचक्षणः । अतिसूक्ष्ममतिस्थूलं छिन्नं भिन्नं च वर्जयेत् KulārT. 5.7; PauṣkS. 29.130; ManuBh. ii. 131.25 (*on* 8.134); दिवोल्का ··· अतिस्थूला सस्फुलिङ्गाः···राजमृत्यवे स्यात् ViṣṇuDhaP. ii. 166 (292A.15); ii. 88.14; अतिस्थूलमपि महीमहीधराद्यपह्नुवानः कथमभावमङ्गीकुर्यात् NyāyRa. 307.14 (*on* 5(3).144); नातिस्थूलम् ··· कर्तितं द्विजकन्याभिर्मुख्यं सूत्रं पवित्रके ĪśānS'iPa. ii. 21.9; अतिस्थूलं मृतं हीरम् RaseCin. 9.308 (248.27); यवः ··· मध्यो नातिस्थूलो नातिकृश इत्यर्थः DaṇḍaVi. 23.18; अतिस्थूलं सदम्लं दधि ··· कस्य न प्रियम् BhojanKu. 123.7; **C** very great, very clear, very obvious, very apparent (concepts, actions etc.) व्यतीतं चिन्तयेत् । ··· सर्वज्ञमतिस्थूलम् ViṣṇuSm. 97.2; अतिस्थूलानि प्रतिपुरुषजातिकुलावस्थितसूक्ष्मधर्मव्यतिक्रमणानि त्वनन्तभेदानि···प्रायेणैव संभवन्तीति TantrVā. 128.17 (*on* i. 3.7); अत्राह अतिस्थूलः खल्वयं प्रमादः NyāyMañ. ii. 196.2; उत्सुकमनोभिश्च कर्तुमारब्धमतिस्थूलमपि कर्म नोपजायते सुसूत्रम् TilaMañ. 171.11; जातिमत्त्वादिकं त्वतिस्थूलमिति तार्किकाणामेव वक्तुमुचितं नास्माकम् NyāyRa. 352.19 (*on* 5(4).17); यत्त्वप्रयत्नपूर्वकं सर्वा ब्रह्मणो मुखान्निःसृता इति तच्छाक्यमुनिदेशनेवातिस्थूलम् BālaKrī. i. 19.6 (*on* 1.7); **D** very rough, very approximate तत्र ज्याया अभावे तत्कोटिज्यायाः परमत्वेन त्रिज्यामितान्यतरकोटिज्येयं तद्भिन्नज्यामितैक्यज्या लभ्यते तदेष्टान्यतरकोटिज्यया किमिति लब्धैक्यज्यातिस्थूला SiddhāTaVi. 73.5; **E** very broad (sound) नातिस्थूलो नातिकृशः स्निग्धश्चेहालको धनः (शब्दगुणाः) SaṁgīRa. ii. 164.8 (3.71)

अतिस्थूलजटा (atisthūla-jaṭā) *adj.* (*f.*) having very thick roots अतिस्थूलजटा याः स्युस्तासां ग्राह्यास्त्वचो बुधैः S'ārṅgaS. i. 1.60; BhāvPra. (S'ā.) 6 (1).98.

अतिस्थूलत्व (atisthūla-tva) *n.* the state of being very obvious यदा त्वतिस्थूलत्वान्नैवाभिक्रामामित्येतत्पदमात्रविच्छेदेन पूर्वपक्षः TantrVā. 749.2 (*on* iii. 1.20); उपनिध्यादि ··· प्रत्यर्पणीयमित्येतदतिस्थूलत्वात्स्मृतिकारैरुपेक्षितम् SmṛtiCan. iv. 425.4; नामधेयपक्षस्य ··· अतिस्थूलत्वेऽपि ··· उपन्यासमात्रमिह कृतम् MayūMāli. 81.9 (*on* i. 4.12)

अतिस्थूलदोष (atisthūla-doṣa) *adj.* having a very obvious defect परोक्तं साधनमतिस्थूलदोषं न सम्यगुत्तरार्हमिति मत्वा विकल्पसमं जात्युत्तरमाह NyāyRa. 101.12 (*on* 2.182)

अतिस्थूलपरत्व (atisthūlapara-tva) *n.* the state of referring to gross objects अतिस्थूलपरत्वेन स च वाग्विषये पुनः । दृश्यादृश्येषु भावेषु अभिव्यक्तिं प्रयाति च JayāS. 20.238 = PāraS. 15.465.

अतिस्थूलबिन्दु (atisthūla-bindu) *m.* very big spot अतिस्थूलबिन्दुप्रमाणकशुक्लवर्णतनूरुहकृतमण्डलशतैश्चित्रितो हरिणविशेषः SmṛtiCan. v. 250.20.

अतिस्थूलवर्त्मन् (atisthūla-vartman) *adj.* having very broad course श्वेतोऽवसन्नवर्त्मातिस्थूलवर्त्मातिपिञ्जरः ··· प्रदुष्टा द्वादश व्रणाः CaraS. vi. 25.24 (1941 Ed.)

अतिस्थूलशुक्ति (atisthūla-śukti) *f.* very big shell (महाशल्कः) अतिस्थूलशुक्तिसदृशबहुस्थिशकलान्वितो मत्स्यः SmṛtiCan. v. 257.8.

अतिस्थूलश्वास (atisthūla-śvāsa) *m.* very deep breath अतिस्थूल-

-श्वासस्फूर्जत्कुक्षिपरिसरम् … लेसिकापसदम् YaśasCam. ii. 44. 5.

अतिस्थूलस्फिच् (atisthūla-sphic) *adj.* having very big buttocks निःस्वोऽतिस्थूलस्फिच् BṛSaṁ. 68. 17.

अतिस्थूलाखिलाङ्ग (atisthūlākhilāṅga) *adj.* having the entire body very stout or fat नातिस्थूलाखिलाङ्गः प्रथमयुगवसन्तोद्भवः पाटलाभः …भवति च …शुभो भद्रनामा MātaLī. 1. 27.

अतिस्थूलात्मन् (atisthūlātman) *adj.* having an extremely gross nature द्वे ब्रह्मणी त्वणीयोऽतिस्थूलात्मन् सर्व सर्ववित् ViṣṇuP. v. 1. 36.

अतिस्थेयस् (ati-stheyas) *adj.* very strong or firm आसीत्प्रेयान् … अतिस्थेयो वर्षीयान् (भर्ता) DvyāśraKā. 20. 54.

अतिस्थैर्यकृत् (atisthairya-kṛt) *adj.* producing excessive firmness इत्थं श्रीमानतुङ्गप्रभुचरितमतिस्थैर्यकृत् PrabhāC. 117. 25.

अतिस्थौल्य (ati-sthaulya) *n.* extreme fattiness श्लेष्मविकारान् … व्याख्यास्यामः … गलगण्डश्च अतिस्थौल्यं च CaraS. i. 20. 17; i. 21. 4 (1941 Ed.); कुरुतस्तु ते (बृंहणलङ्घने) । अतिस्थौल्यातिकार्श्यादीन् AṣṭāHṛ. i. 14. 19; अतिस्थौल्याग्निसदनकुष्ठमेहहृतौजसः AṣṭāSaṁ. i. 19. 21 (1. 5); i. 108. 3 (1. 20)

अतिस्थौल्यदोष (atisthaulya-doṣa) *m.* defect characterised by excessive fattiness यवामलकचूर्णं च योगोऽतिस्थौल्यदोषजित् AṣṭāHṛ. i. 14. 24 = AṣṭāSaṁ. i. 126. 5 (1. 25) = RasRaSa. 25. 64.

अतिस्थौल्यविनाश (atisthaulya-vināśa) *m.* cure or removal of excessive fattiness (अरिष्टान्) अतिस्थौल्यविनाशाय संविभज्य प्रयोजयेत् CaraS. i. 21. 27;

अतिस्थौल्यादि (ati-sthāulyādi) *adj.* excessive thickness etc. अतिस्थौल्यादिनिबन्धनभंयानकत्वरहिताः (ब्रह्मचारिदण्डाः) ViraMi. 90. 9 (*on* 1. 29)

अतिस्नान (ati-snāna) *n.* excessive bathing दिवास्वप्नादतिस्नानावगाहनात् ।… वातादयः प्रकुप्यन्ति KāśyaS. 335B. 36.

अतिस्निग्ध (ati-snigdha) *adj.* [*f.* -ā] **Ai** extremely oily, extremely unctuous भोज्यमन्नम् …। नातिस्निग्धमसङ्कीर्णम् CaraS. i. 13. 60; ii. 4. 51 (1941 Ed.); नातिस्निग्धां नातिरूक्षां वर्तिं प्रणिदध्यात् SuśruS. i. 5. 17; अतिस्निग्धातिशुष्काणां गुरूणां चातिसेवनात् KāśyaS. 260A. 22; न च विकेशिकामौषधं वातिस्निग्धरूक्षम्…दद्यात् AṣṭāSaṁ. i. 187. 11 (1. 38); अतिस्निग्ध°…शीतलैः।…भोजनैः … नृणां भवत्यतीसारः RugVi. 3. 1; अतिस्निग्धमधुराम्ललवणभोजनात् … श्लेष्मा प्रवृद्धः Hastyāyur. 57. 13 (1. 9); **Aii** over-treated with oily substances स्निग्धास्निग्धातिस्निग्धलक्षणम् ।… इच्छामि वेदितुम् CaraS. i. 13. 6 (1941 Ed.); अतिस्निग्धस्य शूल° … °यक्ष्माणः KāśyaS. 157A. 13; अनास्थाप्यास्त्वतिस्निग्धोत्क्लिष्टदोषक्षतोरस्कातिकृशाः AṣṭāSaṁ. i. 145. 18 (1. 28); अतिस्निग्धस्य रूक्षणम् SiddhYo. 71. 23; अतिभिन्नपुरीषं च अतिस्निग्धस्य लक्षणम् AśvaVai. 19. 9; मतङ्गजम् । अतिस्निग्धं कथं विद्यात् Hastyāyur. 680. 2 (4. 24); अतिस्निग्धोत्क्लिष्टदोषौ क्षतोरस्कः कृशस्तथा SārṅgaS. iii. 6. 4; अतिस्निग्धक्षतक्षीणामयार्दिताः। … न विरेच्या विजानता RaseCin. 9. 228 (217. 7); **Aiii** extremely watery, marshy, wet (i. e. not dry) (स्नाने … आरामं रोपयेत्) अनूपे अतिस्निग्धे CaturCin. i. 1044. 20; SūktiRa. 18. 17; **Aiv** extremely sticky देशधातिरसस्पर्शेषु च अतिस्निग्धेषु अल्परसीकृतेषु JñānBinPra. 4. 22; **Av** extremely soft or smooth अतिस्निग्धमधुरधवलविशालतया पीतक्षीरोदेनेव पिबन्नीक्षणयुग्मायामेन दिशामायामम् …स्कन्दगुप्तः HarṣaC. 266. 16; AvantiKa. 78. 2; अविच्छिन्नमतिस्निग्धमजर्झरमनाकुलम् । लक्षणोद्धारणं कुर्यात् ĪśānŚiPa. ii. 38. 44; इदमतिस्निग्धसान्द्रिसकलद्रुमगहनम् … धर्मारण्यम् TilaMañ. 182. 1; जुष्टं ललाटम् …अतिस्निग्धलम्बालकान्तैः JinaS. 3. 5; **Bi** extremely affectionate or loving तस्य कन्या… ममातिस्निग्धा सखी DaśKuC. 114. 7; अतिस्निग्धो जनः … मुद्रिकां दातुं नेच्छति GopāKeCan. 130. 11; अतिस्निग्धं जगन्मैत्र्या मनः किं युग्मिकालवत् ŚāliC. 6. 185; उत्तारकमतिस्निग्धम् …। सदा मुखस्थं मित्रं चेत् SūktiRa. 88. 17; सुन्दोपसुन्दयोरतिस्निग्धयोर्भेदनात् सङ्ग्रात्यः RasāSu. 73. 7 (1. 266); अतिस्निग्धोऽयं चन्द्रकन्दलो नाम रसिकाग्रेसरः RasSa. 223 (6); सिद्धमन्त्रानतिस्निग्धान् … होमयेत् TantrRā. 31. 99; **Bii** extremely soft, tender, pleasing (words) (राघवः) अतिस्निग्धं च गाढं च वचनं चेदमब्रवीत् Rāmā. iii. 14. 25; अतिस्निग्धमनुरूपं चाभिहितं तत्रभवत्या SvapnVā. 6. 11 (15); PañcRā. 3. 4 (1)

अतिस्निग्धकाय (atisnigdha-kāya) *adj.* whose body is extremely unctuous न चातिस्निग्धकायस्य दद्यात्स्नेहविरेचनम् SiddhYo. 74. 29.

अतिस्निग्धकेश (atisnigdha-keśa) *adj.* having extremely glossy hair अपश्यच्च नरश्रेष्ठम् …। नीलकुञ्चितसूक्ष्मातिस्निग्धकेशम् PadmP. (Ra.) 49. 51.

अतिस्निग्धता (atisnigdha-tā) *f.* excessive unctuousness or greasiness (of enema etc.) आमता हीनता … अतिस्निग्धता अतिरूक्षता … अतिद्रवता इत्येकादश द्रव्यदोषाः SuśruS. iv. 35. 32.

अतिस्निग्धभृत्य (atisnigdha-bhṛtya) *m.* very affectionate or devoted servant or attendant राज्ञः सर्वार्थकारिण्यतिस्निग्धभृत्ये 'ममात्मा भद्रसेनः' इति व्यवहारो गौणत्वेनोदाहृतः VivaPraSaṁ. 113. 23.

अतिस्निग्धम् (ati-snigdham) *adv.* very softly or friendly को नु खल्वयमस्मिन् नगरापणालिन्दे सशङ्कितमतिस्निग्धं च सम्भाषते Avimā. 3. 7 (5)

अतिस्निग्धमधुरत्व (atisnigdhamadhura-tva) *n.* the characteristic of being extremely soft and sweet (वाग्गुणाः) आभिजात्यमतिस्निग्धमधुरत्वं प्रशस्यता AbhidhāCin. 68; (पंचत्रिंशद् वचनातिशेषाः। संस्कारवत्त्वम् …अतिस्निग्धमधुरत्वम्) अतिस्निग्धमधुरत्वं घृतगुडादिवत् सुखकारित्वम् AupaSūT. 41. 1.

अतिस्निग्धलक्षण (atisnigdha-lakṣaṇa) *n.* symptom of over-oleation पाण्डुतागौरवं जाड्यं पुरीषस्याविपक्वता। तन्द्रीररुचिरुत्क्लेशः(?°क्लेशः) स्यादतिस्निग्धलक्षणम् CaraS. i. 13. 59.

अतिस्निग्धलिङ्ग (atisnigdha-liṅga) *n.* symptom of over-oleation गौरवजाड्योत्क्लेशाध्मानानि पुरीषमविपक्वम्। अरुचिरपि पाण्डुतन्द्रे वदन्त्यतिस्निग्धलिङ्गानि KāśyaS. 21B. 2.

अतिस्निग्धवपुस् (atisnigdha-vapus) *adj.* having an extremely charming form अतिस्निग्धवपुर्श्रेष्ठ शङ्खमुक्तानिभाननः (मृगः) Rāmā. iii. 790*(62)

अतिस्निग्धवर्ण (atisnigdha-varṇa) *adj.* having a very soft colour अतिस्निग्धवर्णैः … खुरमण्डलैरुपेतः…तुरंगरत्नं भद्रवाहनो नाम AvantiKa. 89. 10.

अतिस्निग्धशरीर (atisnigdha-śarīra) *adj.* (a person) whose body is very oily नातिस्निग्धशरीराय विदध्यात् स्नेहसंयुतम् KāśyaS. 271B. 26.

अतिस्निग्धशाख (atisnigdha-śākha) *adj.* having very glossy or soft branches नृत्तारम्भग्रहिलहृदयैरुद्धतैः केकिवृन्दैर्बद्धाभोगाः प्रतिवनमतिस्निग्धशाखाद्रुमौघाः MayūSaṁ. 2. 81.

अतिस्निग्धसंसेवन (atisnigdha-saṁsevana) *n.* partaking of a very oily or greasy substance अतिस्निग्धसंसेवनैर्भोजनेषु प्रदिष्टः कफस्य प्रकोपो वसन्ते HārīS. i. 5. 62.

अतिस्निग्धाशिन् (atisnigdhāśin) *adj.* partaking of very oily or greasy substance अतिस्निग्धाशिनस्तन्द्रीतृष्णाजीर्णोदरामयाः। भवन्ति KāśyaS. 258A. 23; अतिस्निग्धाशिनो ह्युभयमार्गसंसर्गात् स्नेहो मदमूर्च्छाग्निसादहृल्लासान् जनयति AṣṭāSaṁ. i. 148. 6 (1. 28)

अतिस्निह्यत् (ati-snihyat) *adj.* very affectionate or devoted अयं खलु…अतिस्निह्यदनुचरघटासमावृतः YātrāPra. 7. 5 (1)

अतिस्नेह (ati-sneha) *m.* **1** great affection, intense love or attachment अतिस्नेहोऽप्यकालेऽस्मिन् मरणायोपपद्यते Rāmā. vi. 36. 31; अतिस्नेहेन च तथापरः । बलाद् गृहीतो बद्धश्च …। नवैते पुत्रवत् पाल्याः BṛYamaSm. 5. 17; अलमतिस्नेहेन Prati. 4. 27 (5) = Avimā. 6. 20 (1); PratiYau. 2. 3 (15); अतिस्नेहः खलु कार्यदर्शी Vikramo. 2. 8 (4); अतिस्नेहे च सूक्ष्मैला जातिफललवङ्गकम् NāgaSa. 7. 1; BrahmVaiP. ii. 16. 53; सख्युर्ममातिस्नेहेन तत् सर्वं वक्तुमर्हति BṛNāraP. 9. 77; BhaviP. 88A. 4 (i. 47. 12); अतिस्नेहम् … पितरौ त्वयि चक्रतुः GaṇeP. i. 7. 11; SaraKaṇṭhā. 659. 9; KathāSaSāg. vii. 4. 40; स तदानीमतिस्नेहा(? स्नेहात्) कुलप्रलयकातरः ।… तपःसुतमवोचत PāṇḍaC. 11. 262; तथ्यमतिस्नेहः पापशङ्कीति UnmaRā.(Vi.) 52. (2); NāṭaLaRaK. 2377; नातिशोको नातिहर्षो नातिस्नेहो न मत्सरः ।… इति सिद्धस्य लक्षणम् TantrRā. 35. 73; RasSa. 235; **2i** excessive quantity of oil (for burning a lamp) अतिस्नेहपरिष्वङ्गाद् वर्तिरार्द्रापि दह्यते Rāmā. iv. App. 1. 2 (25); **2ii** excessive oleation मिथ्याबन्धादतिस्नेहाद्रतिभैषज्यकर्षणात् ।… व्रणा न प्रशमं यान्ति CaraS. vi. 25. 33 (1941 Ed.); अतिस्नेहात् क्लेदः AṣṭāSaṁ. i. 187. 12 (1. 38); **2iii** excessive stickiness or unctuousness वैवर्ण्यं वैगन्ध्यम् … गौरवमतिस्नेहश्च अष्टौ रेतोदोषाः CaraS. i. 19. 4 (1941 Ed.)

अतिस्नेहकातर्य (atisneha-kātarya) *n.* fear due to excessive affection अलमतिस्नेहकातर्येण MahāvīC. 4. 52 (7)

अतिस्नेहनिबन्धनी (atisneha-nibandhanī) *adj.* (*f.*) **1** based on excessive attachment or love प्रदीपशान्तिष्विव मुक्तभूरिदशास्वतिस्नेहनिबन्धनीषु । संसारमालासु चलाचलासु न ज्ञायते तत्त्वमतात्त्विकीषु YogVā. i. 27. 26; **2** soaked in excessive quantity of oil, YogVā. i. 27. 26.

अतिस्नेहनिर्भर (atisneha-nirbhara) *adj.* filled with great affection or love ततश्चातिस्नेहनिर्भरेण मदनकुमारेण सा निजजननी गृहीता KathāK. 36. 11.

अतिस्नेहपर्याकुलहृदय (atisnehaparyākula-hṛdaya) *adj.* whose heart is full of excessive affection कथमयं महाराजो जानन्नपि स्वजनसंबन्धमतिस्नेहपर्याकुलहृदयेन भवता वत्सौ रामकृष्णावुपनिनीषति KaṁVa. 3. 3 (2)

अतिस्नेहपीत (atisneha-pīta) *adj.* (an elephant) which has taken excessive quantity of oil पीतोदकाय च पयो न देयं स्यात् कदाचन । न चाति-

स्नेहपीताय मद्यपीताय चैव हि Hastyāyur. 669. 2 (4. 21)

अतिस्नेहवती (atisneha-vatī) *adj.* (*f.*) full of great affection माता न ताडयति मां क्वचित्। अतिस्नेहवती यस्मादेकपुत्रपरायणा ĀdiP. 21. 67.

अतिस्नेहवश (atisneha-vaśa) *m.* [Abl.] due to great affection पुत्रसुखदुःखाभ्याम् 'अहमेव संस्पृष्टः' इति पिता अभिमन्यते। अथातिस्नेहवशादभिमानो नाध्यासवशादिति मन्येथाः, तत्र VivaPraSaṁ. 113. 17.

अतिस्नेहविरेकिन् (atisneha-virekin) *adj.* using excessively oily or greasy purgative अत्यश्नतामजीर्णेन अतिस्नेहविवे(रे)किणाम्।…ग्रहणी जन्तोर्दूष्यते BhelaS. 162. 14 (6. 13)

अतिस्नेहविह्वलमानस (atisnehavihvala-mānasa) *adj.* whose mind is agitated by great affection लुठन्तीं भूतले सुताम्। उत्थाप्याङ्के वि(नि)धायातिस्नेहविह्वलमानसः। भानुरप्याययौ PadmP. iv. 71. 33.

अतिस्नेहसमन्वित (atisneha-samanvita) *adj.* possessed of great affection ततः पिता कुमारौ तावतिस्नेहसमन्वितः। योजयामास वात्सल्याद् बहुभिः साधनैस्तथा BṛNāraP. 33. 15.

अतिस्नेहाकुल (atisnehākula) *adj.* agitated by great affection जाने जन्मान्तरे चाभून्नूनं सख्यं ममैतया। एतद्धि मे वदत्यस्यामतिस्नेहाकुलं मनः KathāSaSāg. vi. 2. 104; हंसीं तावन्मृतां दृष्ट्वा…। अतिस्नेहाकुलः सोऽपि हृदयस्फोटतो मृतः CitraPaC. 119.

अतिस्नेहापकृष्टा (atisnehāpakṛṣṭā) *adj.* (*f.*) carried away by intense love अतिस्नेहापकृष्टोमा देहार्धे शूलिनः श्रिता BṛĀraUBhVā. ii. 4. 69.

अतिस्नेहाभिनय (atisnehābhinaya) *m.* show of great affection स तावदतिस्नेहाभिनयेन त्रिचतुराणि वासराणि प्रत्यहमन्यमन्यमुपहारमुपाहरत् S'ṛṅgāSar. 75 (2)

अतिस्नेहार्द्रचित्त (atisnehārdra-citta) *adj.* whose mind is melted with great affection अतिस्नेहार्द्रचित्तस्य जनेतुश्चेति भाषितम्। निशम्य धूतपापा सा प्रोवाच SkandP. iv. 59. 47.

अतिस्नेहार्द्रचेतस् (atisnehārdra-cetas) *adj.* whose mind is melted with great affection कृतं छेकगणस्यापि त्वया संभाषणं प्रभो। यियासुना परं देशमतिस्नेहार्द्रचेतसा PadmP.(Ra.) 16. 93.

अतिस्नेहित (ati-snehita) *adj.* treated with excessive oleation, extremely lubricated मन्दाग्न्यतिस्नेहितबालवृद्धस्थूलक्षतक्षीणभयोपतप्ताः … अविरेचनीयाः स्नेहादिभिर्ये त्वनुपस्कृताश्च SiddhYo. 74. 26.

अतिस्पद (atispada) *m.* *Feronia elephantum* अतिस्प(?स्य)दः कपित्थेः-(?त्थे) ApūNā. 25B. 2.

अतिस्पर्ध् (ati-spardh-) I. Ā. to compete excessively यया विस्पर्धसे (v. l. अतिस्पर्धसे) सह MahāBhā. i. 14. 18.

अतिस्पर्धिन् (atispardh-in) *adj.* vying or competing excessively तावपि स्पर्धिनौ (v. l. तावतिस्पर्धिनौ) राजन् पृथगास्तां परस्परम् MahāBhā. xiv. 5. 5.

अतिस्पर्श (ati-sparśa) *m.* too much contact (of the tongue and palate in pronunciation) अतिस्पर्शो बर्बरता च रेफे ṚPrāti. 14. 8; [slight contact or absence of contact of the tongue or palate in pronunciation; epithet of the semi-vowels and vowels, APTE]; *adj.* not liberal, niggardly, mean-spirited [APTE]

अतिस्पर्शकर (atisparśa-kara) *adj.* causing too much contact ततो दशनच्छेद्यमतिस्पर्शकरम् (चुम्बनम्) JayaMa. 132. 19 (*on* 2. 5)

अतिस्पर्शकारिन् (atisparśakār-in) *adj.* causing too much contact ततोऽपि सर्वाङ्गिकमालिङ्गनमतिस्पर्शकारि JayaMa. 132. 21 (*on* 2. 5)

अतिस्पर्शनिवृत्त्यर्थम् (atisparśa-nivṛttyartham) *adv.* meant for the sake of avoidance of too much contact स्तनमुकुलयोरिति मुकुलग्रहणमतिस्पर्शनिवृत्त्यर्थम् JayaMa. 204. 3 (*on* 3. 2)

अतिस्पर्शवत् (atisparśa-va(n)t) *adj.* having a hard touch स्वशयनीयसंनिधावतिस्पर्शवद्भिर्वल्कलांशुकैस्तल्पमुपकल्पयता … स्वविरतापसीसमूहेन विसारितसकलबन्धुविरहदुःखा … कंचित्कालमनयम् TilaMañ. 331. 10.

अतिस्पष्ट (ati-spaṣṭa) *adj.* [*f.* -ā] **i** very true or actual स्थित्यर्थमित्यतिस्पष्टमुक्षिप्य भुजमुच्यते MaBhāsk. 5. 37; मनैक्यार्थादधिके नातिस्पष्टा स्फुटोक्तिरतः BrahmSphuSi. 9. 20; **ii** very clear, very distinct विहंगराजः … अतिस्पष्टवर्णस्वरसंस्कारया गिरा … आर्यामिमां पपाठ Kād. 12. 18; अतिस्पष्टं ब्रह्मलिङ्गमत्र प्रतीयते Bhām. 277. 15 (*on* i. 3. 41); S'ivārkaMaDī. ii. 444. 30 (*on* iv. 1. 16); अतिस्पष्टस्य प्रतिषेधनिबन्धनबाधस्यास्मिन् पादे निरूपणम् MayūMāli. 773. 21 (*on* x. 8. 1)

अतिस्पष्टकल्पित (atispaṣṭa-kalpita) *adj.* arranged very clearly अक्षराभ्यामतिस्पष्टकल्पिताभ्यां प्रपूरितम् SāhiSā. 2. 158.

अतिस्पष्टतरम् (atispaṣṭa-taram) *adv.* much more clearly वृद्धत्वाद्धतेन्द्रियत्वाच्च नातिस्पष्टतरं शृणोम्यहम् Tantrākhyā. 102. 10.

अतिस्पष्टता (atispaṣṭa-tā) *f.* the state of being very clear, extreme clarity विश्वपतित्वादीनाम् … पूर्वपक्षदशायां नातिस्पष्टता S'ivārkaMaDī. i. 332. 3 (*on* i. 2. 8)

अतिस्पष्टत्व (atispaṣṭa-tva) *n.* the state of being very clear, extreme clarity तदतिस्पष्टत्वान्न व्याख्यातम् TātpaṬ.(U.) 16. 19 (*on* 1. 68) = 20. 21 (*on* 1. 89); तदतिस्पष्टत्वान्न वार्तिककृता व्याख्यातम् NyāySu.(So.) 17. 27 (*on* i. 2. 5); वस्तुनो निर्विकारत्वस्य अस्मदभीष्टस्य अतिस्पष्टत्वात् TarkSaṁ.(Ā.) 133. 5.

अतिस्पष्टपरिकर (atispaṣṭa-parikara) *adj.* details of which are very clear (अहं च) रात्रावतिस्पष्टपरिकरं स्वप्नमद्राक्षम् UdaySuKa. 58. 13.

अतिस्पष्टम् (ati-spaṣṭam) *adv.* very clearly or precisely, in very clear words राजा…जगाद तामतिस्पष्टम् BṛKathāK. 56. 310; JīvanVi. 60. 6; भाष्यकारोऽप्यतिस्पष्टं मुक्तस्य सगुणेश्वरभावापत्तिमाह SiddhāLeSaṁ. 459. 3; एवमानयनं चक्रे पूर्वं स्वीयशिरोमणौ।…अतिस्पष्टम् SiddhāTaVi. 64. 8; (S'eṣaVā.) 43. 15.

अतिस्पष्टवर्णता (atispaṣṭavarṇa-tā) *f.* the state of having very distinct letters तस्य वातायनस्य … स्फटिकशिलापट्टे … अतिस्पष्टवर्णतया तद्दिनोत्कीर्णमिव प्रशस्तिमैक्षत् (समरकेतुः) TilaMañ. 219. 14.

अतिस्पष्टवर्णव्यक्ति (atispaṣṭa-varṇavyakti) *f.* very distinct manifestation of sounds अत्रान्तरेऽन्तरिक्षमण्डलादतिस्पष्टवर्णव्यक्तिमनोहारिणी वागश्रूयत NalaCam. 2. 22 (4)

अतिस्पष्टस्वरूप (atispaṣṭa-svarūpa) *adj.* whose form is very clear or distinct तौ चाकारहकारौ न वैखरीरूपाविवातिस्पष्टस्वरूपौ SetuBa. 190. 15.

अतिस्पष्टीकर्तुम् (atispaṣṭī-kartum) *inf.* to make very clear तमेवार्थमतिस्पष्टीकर्तुं प्रकरणमिदमारभ्यते VidhiRa. 1 (2. 18)

अतिस्पष्टीकृत (atispaṣṭī-kṛta) *adj.* which is made very clear उक्त एवायमर्थः पूर्वश्लोके नातिस्पष्टीकृतः ManuBh. ii. 263. 2 (*on* 9. 73)

अतिस्पृश् (ati-spṛś-) VI. P. to touch very closely (*pass.*) दुःस्पृष्टः स रेफोऽतिस्पृश्यते Uvaṭa *on* ṚVPrāti. 14. 8.

अतिस्पृहयालु (ati-spṛhayālu) *adj.* very avid नरेन्द्रोऽपि … प्रकृतिनिःस्पृहोऽपि परोपचारेष्वतिस्पृहयालुरिव सत्वरम् … तं जग्राह TilaMañ. 45. 10.

अतिस्पृहयालुता (atispṛhayālu-tā) *f.* excessive desire or greed कीनाशस्तु यः परं बीभत्समपि शरीरिणमतिस्पृहयालुतया गिलति YaśasCam. ii. 68. 5 (comm. वाञ्छकशीलतया)

अतिस्पृहा (ati-spṛhā) *f.* excessive desire or avidity अतिकोपं चातिहर्षमतिलौल्यमतिस्पृहाम्।… वर्जयेत् Rasā. 18. 119; RaseCin. 3. 87 (37. 5)

अतिस्फार (ati-sphāra) *adj.* very many तावज्जनाः प्राकृताः। यावन्नैव नयन्ति कर्मभिरभिध्येयप्रकर्षप्रथैश्चित्रप्रायदशैश्च निर्मलमतिस्फारं जनं रञ्जनम् RājTa.(Jo.) 31.

अतिस्फारशोकभू (atisphāra-śokabhū) *f.* abode of excessive grief इत्याकर्ण्यामराजस्य पौत्रोऽतिस्फारशोकभूः। भोजः … विललाप च PrabhāC. 110. 1.

अतिस्फालम् (ati-sphālam) *adv.* in an excessively disturbed manner (समरकेतुः) उभयश्रेणिविद्याधरेन्द्रसुन्दरीणाम् …नितम्बमण्डलैरतिस्फालमास्फालितम् (सरो दृष्टवान्) TilaMañ. 204. 3.

अतिस्फिर (ati-sphira) *adj.* very much agitated or tremulous [S'abdaKaDru. PW]

अतिस्फीत (ati-sphīta) *adj.* [*f.* -ā] **i** very abundant लभतेऽसावतिस्फीतान् लाभान् लोकस्य पूजितः PadmP.(Ra.) 32. 153; प्रभो प्रीतिरतिस्फीता कस्य जागर्ति न त्वयि PāṇḍaC. 16. 343; अथान्येद्युरतिस्फीता(?तां) पत्यौ प्रीतिमुपेयुषी। बभार गर्भं गान्धारी PāṇḍaC. 2. 1; तत्र लक्ष्मीरतिस्फीता नीरोगाश्च प्रजास्तथा TantrRā. 14. 60; मध्याह्ने ध्वाङ्क्षघोषः श्वभ्रतमतिस्फीतफेरुप्रचारः (आसीत्) MahāN. 3. 2; **ii** very many सर्वे पुनर्ब्राह्मणाः ताभ्यां संयुयुजुः शुभाशिषमतिस्फीताः समाप्तक्रियाः MahāN. 1. 19.

अतिस्फीतता (atisphīta-tā) *f.* great abundance क्वचित्सांयात्रिकप्रचारविरहादतिस्फीततां गतैः … मुक्ताफलैर्निरन्तरनिचितेषु सैकतेषु TilaMañ. 146. 20.

अतिस्फुट (ati-sphuṭa) *adj.* [*f.* -ā] **i** very clearly discernible, distinct (visible, audible) अतिस्फुटसन्धिशब्दमपि … अशिवमशान्तमनर्थमूलम् AvantiKa. 42. 19; अत्यासन्ने च सुव्यक्तं तेजस्तस्यादतिस्फुटम्। तत्राप्यदृष्टमाश्रित्य भवेद्रूपान्तरं यदि PramāVār. 3. 413; तत्र मन्त्रपवितं हविः क्रतावश्नतो न वपुरेव केवलम्। वर्णसंपदमतिस्फुटां दधन्नाम चोज्ज्वलमभूद्धविर्भुजः S'iśuVa. 14. 26; क्रुद्धयेव भ्रुकुटिरतिस्फुटा ललाटे शाल्वस्य प्रसरदमर्षमुल्ललास Kapphiṇā. 3. 28; तानि (चुम्बनादीनि) रतस्यारम्भे नातिव्यक्तानि नातिस्फुटानि JayaMa. 105. 16 (*on* 2. 3);

भगवानपि मार्तण्डः ··· दध्रे नातिस्फुटं वपुः BrahmP. 32. 47; अथैतां देवदेवस्य श्रुत्वा वाचमतिस्फुटाम् MāliniT. 12. 1; तद्दम्पतिश्रुतिमधून्यथ चाटुगाथावीणास्तथा जगुरतिस्फुटवर्णबन्धम् NaiṣC. 21. 120; नातिस्फुटाः करजाङ्कुराः···मृगपतिशिशोः Sadukti-Ka. 251. 23; ii very clear, very plain (to understand), S'iśuVa. 14. 26 (comm. अतिस्फुटा अतिव्यक्तार्था); किं त्वस्य राघवशिशोः सहजानुभावगम्भीरभीषणमतिस्फुटमेव वृत्तम् AnargharRā. 3. 28; प्रदोषस्तोत्रे ईशताण्डवनर्तनवर्णनमतिस्फुटमिति नेह लिख्यते LalitāTriBh. 278. 15 (12); तस्मात्कर्मप्रयोगाणां शास्त्रमेतददतिस्फुटम् TantrVā. 166. 3 (on i. 3. 10); सस्मारासुररिपुकेलिकोलघूर्णद्रोणाग्रप्रहतिमतिस्फुटां फणीन्द्रः Kapphiṇā. 3. 37; विध्यावृत्तिलक्षणो वाक्यभेदोऽतिस्फुटः Bhām. 160. 22 (on i. 1. 31); 281. 9 (on i. 4. 1); तावत्येव वा स्मृतिः आभासान्तरैरपि व्यामिश्रा अतिस्फुटेति PratyabhiVi. i. 160. 1 (i. 4. 2); अत्र हि द्रव्यगतया संख्यया नातिस्फुटः कर्मभेदः S'āstrDī. 143. 5 (on ii. 2. 7); एकैवालंकृतिर्यत्र शाब्दत्वार्थत्वभेदतः। द्विरुच्यते तां मन्यन्ते पुनरुक्तिमतिस्फुटाम् VyaktiVi. 74. 23; स्पष्टशब्दादियुक्तेषु भौतिकत्वमतिस्फुटम् PañcDa. 2. 17; अविचारसारवचनैरतिस्फुटैः···कुपितेव भासि कुटिले Raghunā. 12. 53; अतिस्फुटमेव त्रैलोक्यवीरत्वमस्य जनस्थानचोरस्य AdbhuDa. 7. 15 (23); स्फुटतमः ··· सर्वधर्मग्रहणेनातिस्फुटो यो विषयः Bhāsk. i. 185. 15 (on i. 4. 7); (मनः) तदेकमक्षयं स्थूलं सूक्ष्मं दुर्ज्ञमतिस्फुटम् TantrRā. 36. 23.

अतिस्फुटकररुह (atisphuṭa-kararuha) *adj.* having very clearly visible nails पाणी नातिस्फुटकररुहौ ग्राण्वि कण्डूयमानाः।··· सिंहशावाः ··· व्योम निर्मा(? र्भा)लयन्ति SaduktiKa. 251. 19.

अतिस्फुटकान्ति (atisphuṭa-kānti) *adj.* having a very clear radiance शीतदीधितिरसौ ··· अतिस्फुटकान्तिः। भाति तत्त्वविदुषामिव बोधः S'aṅkaDigVi. (Mā.) 5. 142.

अतिस्फुटक्वणितनूपुरम् (atisphuṭakvaṇita-nūpuram) *adv.* with very clearly sounding anklets (अदर्शि फणिराजसुता) नातिस्फुटक्वणितनूपुरमाकुलानि ··· दधती त्रपया पदानि NavaSāC. 18. 37.

अतिस्फुटता (atisphuṭa-tā) *f.* perfect clarity (in understanding) इदं त्वतिस्फुटतयानभिधाय ··· मार्गान्तरं दर्शितमिति मन्तव्यम् TātpaṬ.(Vā.) 178. 11 (on i. 1. 5); अगूढः अतिस्फुटतया सर्वजनसंवेद्यः SāhiDa. 53. 1.

अतिस्फुटत्व (atisphuṭa-tva) *n.* extreme or perfect clarity (in understanding) सुषुप्त्यादौ प्रत्यगात्माश्रयस्याज्ञानस्य प्रतीयमानत्वेऽपि (v. l. अतिस्फुटत्वेऽपि) स्फुटतरप्रतीत्यभावात् PañcPra. 68. 2; तदेतदतिस्फुटत्वाच्छिष्यैर्गम्यत एव TātpaṬ.(Vā.) 133. 11–12 (on i. 1. 3); क्वचिदतिस्फुटत्वेन यथा – श्रीपरिचयाज्जडा अपि भवन्त्यभिज्ञा विदग्धचरितानाम् Kāvyānu.(He.) 128. 6; रूपभेदस्य सुवर्णादौ अतिस्फुटत्वात् TarkSaṁ.(Ā.) 39. 4; सुखदुःखे तीव्रसंवेगितयातिस्फुटत्वादुक्ते Upask. 245. 11–12 (on v. 2. 15); 317. 13 (on vii. 2. 7); अग्रे बहुशो वार्तिकप्रत्याख्यानेन विरोधस्यातिस्फुटत्वादिति ध्येयम् MayūMāli. 45. 5 (on i. 3. 9)

अतिस्फुटम् (ati-sphuṭam) *adv.* i very clearly (audible or visible) यथैताः कोमलाङ्गुलितलाभिहन्यमाना नातिस्फुटं क्वणन्ति तन्त्र्यः Nāgā. 1. 12 (3); लसति हास्तिकमेतदतिस्फुटं ध्वजपटम् RāmC. (App.) I. 37. 70; अतिस्फुटम् ··· उच्चलन्तीभिः किञ्जल्क(ग)लच्चूर्णराजिभिर्भरन् भूरिशो रङ्गावलिविशेषान् ··· आवाति ··· समीरणः UdaySuKa. 114. 19–20; प्रवेशिताः स्फाटिककन्दरोदरम् ··· अपत्रपन्ते बहिरासिताः सखीरवेक्ष्य नैर्मल्यवशाददतिस्फुटम् Gaṅgāva. 3. 68; तेन मानेन च तथा कृत्वा वृत्तमतिस्फुटम् TantrRā. 29. 42; ii very clearly (understandable) ऐश्वर्यवर्णनमतिस्फुटमेव कृत्वा SaṁkṣeS'ā. i. 152. 9; अन्धं तमो विशन्तीति प्राह श्रुतिरतिस्फुटम् AnuVyā. 49B. 6–7 (on 3. 3); वचनानन्तरं सापि तथैवाधाददतिस्फुटम् PrabhāC. 197. 9; शिवस्य शम्भोरनुरागिणीरलं दिनेषु गच्छत्सु तयोरतिस्फुटम्।··· विरुद्धतामङ्कुरयाञ्चकार ParamāKā. 8. 57.

अतिस्फुटविवेक (atisphuṭa-viveka) *m.* very clear discrimination तत्रैवं प्रधानकार्याणां स्वरूपं विस्तरतो वक्तव्यं तेभ्योऽपि पुरुषस्यातिस्फुटविवेकाय SāṁkhyaPraBh. 74. 20 (on 2. 1)

अतिस्फुटाक्षरम् (atisphuṭākṣaram) *adv.* with each sound very clearly pronounced अनेन ··· इयमार्या मामुद्दिश्यातिस्फुटाक्षरं गीता Kād. 13. 7.

अतिस्फुटीकरण (atisphuṭī-karaṇa) *n.* act of making very clear उक्तमपि विमर्शरूपत्वमतिस्फुटीकरणाय पुनः कथयति विमर्शनात्मा इति Bhāsk. i. 265. 14 (on i. 5. 14)

अतिस्फुटीभूत (atisphuṭī-bhūta) *adj.* which has become very clear न हि वासुदेवः स्मरणीय इति प्रतिपत्तिः। अपि तु तदुपायद्वारेणातिस्फुटीभूतसंकल्पगोचरो देवताविशेषो ध्यायिनां फलकृत् AbhinBhā. i. 287. 15 (on 6. 31)

अतिस्फुटोच्चारा (atisphuṭoccārā) *adj.* (*f.*) with very clear pronunciation (सेनाधिपतिः) अतिस्फुटोच्चारया गिरा सादरमवादीत् TilaMañ. 194. 10.

अतिस्फैयकृत (ati-sphaiyakṛta) *adj.* surpassing (in qualities) Sphaiyakṛta (descendant of Sphyakṛta) मांसान्यतिस्फैयकृतोऽत्र नैयग्रोधं कषायं नु न भोक्तुमैच्छत् DvyāśraKā. 20. 32.

अतिस्मय (ati-smaya) *m.* great pride or arrogance अस्य···नातिस्मयोष्मापस्मारविस्मृतस्थैर्याणि स्थानकानि HarṣaC. 88. 3; युधि निघ्नन् ··· अतिस्मयाचितः। अभयं तैरसौ सेनां कां क्षिणोति स्म याचितः HarVi. 43. 15.

अतिस्मर (ati-smara) *adj.* surpassing the god of love सुतो जज्ञे सुलक्षणः। रूपेणातिस्मरः PrabhāC. 28. 28.

अतिस्मरश्री (atismara-śrī) *adj.* whose beauty surpasses (that of) the god of love अथान्यमुद्दिश्य नृपम् ··· दमस्वसारं वदति स्म देवता गिराम् ··· अतिस्मरश्रियम् NaiṣC. 12. 52 (comm. अतिक्रान्तस्मरा श्रीर्यस्य तम्)

अतिस्मराकृति (atismarākṛti) *adj.* whose form surpasses (that of) the god of love विस्मयस्फुरणपक्ष्म काचन। वीक्षते स्म तमतिस्मराकृतिम् Tārā-S'a. 16.

अतिस्मरातुर (ati-smarātura) *adj.* [*f.* -ā] greatly love-sick रामः ···। शूर्पणखां विरूपां वै चकारातिस्मरातुराम् DevīBhāP. iii. 28. 22; प्राणिनो विह्वलाः सर्वे ··· अतिस्मरातुराः DevīBhāP. iv. 6. 10.

अतिस्मृ (ati-smṛ-) I. P. to remember too long तद्वियोगं च राघवः। प्रयतिष्ये तथा कर्तुं यथा नातिस्मरिष्यति Rāmā. ii. 906*(16)

अतिस्मृति (ati-smṛti) *f.* strong memory अतिपुण्यमतिस्मृतिम्।··· साधय SkandP. iii(3). 11. 28.

अतिस्मेर (ati-smera) *adj.* very much smiling, full of smiles अतिस्मेरमुखमहोत्पलमवलोक्य देवदत्तमुत्पन्नप्रमोदमनुमिमीते Bhām. 101. 8 (on i. 1. 4); *m.* broad smile (विष्णुम्) अतिस्मेरविकाशाद्भावभावितम् SkandP. ii(8). 6. 19.

अतिस्य (ati-sya) *Pron.* cf. **अतित्यद्** superior person त्यदादिविकारः। अतिस्यः उत्तमस्यः MahāBh. iii. 222. 9 (on vi. 4. 130 Vār. 6); अतिस्य इति। शोभनः स्यः इत्युत्तरपदार्थप्रधानस्तत्पुरुषो द्रष्टव्यः Pradī. v. 349B. 37 (on vi. 4. 130); तेन तदोः सत्वम् अतिस्य इत्यत्र न PariVṛ.(Nī.) 4. 4.

अतिस्रंस् (ati-sraṁs-) I. P. to lay aside, to escape राय: सूनो सहसो वावसाना अति स्रसेम वृजनं नांहः ṚV. vi. 11. 6.

अतिस्रव (ati-srava) *m.* excessive flow or discharge कषाययोगैरथवा विपक्वमेतैः पिबेत्सर्पिरतिस्रवे च CaraS. vi. 4. 87 (1941 Ed.)

अतिस्रवण (ati-sravaṇa) *n.* excessive discharge (from bowels) यूपश्चेत् सुषिरवान्स्यात् अतिस्रवणेनोदरस्य यजमानो म्रियेत Rudradatta's comm. on ĀpaS'S. ix. 20. 1.

अतिस्रवत् (ati-sravat) *adj.* flowing too much अतिस्रवति तु रक्ते तत एवाक्षमात्रं प्राशयेत् AṣṭāSaṁ. i. 213. 14–15 (2. 4)

अतिस्रवा (ati-sravā) *f.* the plant *Sanseviera roxburghiana* [pw]

अतिस्रष्टुम् (ati-sraṣṭum) *inf.* to give away (in donation) इच्छाम्यहम् ··· खिलक्षेत्रकुल्यवापचतुष्टयं क्रीत्वातिस्रष्टुम् EI. xxiii. 54. 4.

अतिस्राव (ati-srāva) *m.* excessive discharge स्तैमित्य° ··· °अतिस्रावैः कफजं विद्यात् (व्रणम्) KāśyaS. 123B. 28; 131A. 54; *adj.* oozing excessively अन्नं च सविषम् ···। तथा भवत्यतिस्रावं पक्वं पर्युषितोपमम् ViṣṇuDhaP. ii. 28. 23.

अतिस्रावित (ati-srāvita) *n.* excessively oozing wound स्यात्सरुक् स्रावबहुलं तदतिस्रावितं विदुः SuśruS. vi. 13. 13.

अतिस्रु (ati-sru-) I. P. i to overflow यस्य सोमग्रहो गृहीतोऽतिस्रा(? स्र)वेत् का तत्र प्रायश्चित्तिः Atharva-Prāyaścitta. 2. 5; ii to flow excessively कुञ्जरस्य ··· कटाभ्यामतिसुस्राव ··· शोणितम् HariVaṁ. 74. 35.

अतिस्रुत (áti-sruta) *adj.* i which has flowed over प्रत्यङ् सोमो अतिस्रुतः VājaS. 10. 31; ii excessively discharging वातबहुलान्यर्शांसि भवन्त्यतिस्रुते रक्ते AṣṭāSaṁ. ii. 64. 5 (4. 10)

अतिस्रुतरक्त (atisruta-rakta) *n.* blood flowing excessively क्षौममषीलाक्षासमुद्रफेनचूर्णं वा ··· अतिस्रुतरक्तव्यापत्प्रतीकारोपकरणम् AṣṭāSaṁ. i. 177. 15 (1. 36); i. 176. 10 (1. 36)

अतिस्रोतस् (ati-srotas) *n.* big stream तेन ··· विद्यामदः श्रीमदो रूपमद इत्यनेकमुखान् ··· मदा(न्) मुञ्चतातिस्रोतोमदमुचः कदर्थिता इव गन्धकरिणः AvantiKa. 149. 19.

अतिस्रौघ्नीरदा (ati-sraughnīradā) *adj.* (*f.*) surpassing (in respect of whiteness) the teeth of women from Srughna नवमालिकातिस्रौघ्नीरदा सेव्यमभूत्रिदाघे DvyāśraKā. 16. 79.

अतिस्वच्छ (ati-svaccha) *adj.* [*f.*-ā] i very clean, highly transparent अतिस्वच्छचेलाम् ··· त्वाम् ··· भावयन् भारतीवल्लभः स्यात् DevīBhuSt. 13; पित्तद्रव्यस्य काचस्यैवातिस्वच्छस्य पीतत्वं गृह्यते पित्तं तु न गृह्यते TātpaṬ.(Vā.) 88. 20 (on i. 1. 2); उपस्पृशेत् ··· अतिस्वच्छाभिरद्भिश्च SkandP. iii(2). 5. 49; सः ··· ययौ। कासारम् ··· अतिस्वच्छजलम् GaṇeP. ii. 8. 17; 53. 5; अतिस्वच्छं तदा-

गच्छ वत्स स्वं दर्शयास्यकम् PrabhāC. 12. 10; अतिस्वच्छदर्पण इव किंचित्स्वच्छताम्रादावपि मुखसंस्थानविशेषप्रतीत्यापाताच्च Nyāyāmṛ. 609B. 11; या दृष्टैव पुनाति विश्वमखिलं सेयं पुनर्जाह्नवी विच्छिन्ना क्वचिदाविला क्वचिदतिस्वच्छा SaduktiKa. 240. 4; SiddhāBi. 56. 4; **ii** very bright or white गजवदनस्कन्दधृतेनातिस्वच्छेन चामरयुगेन । गलदलकाननपद्मं मृत्युंजय भावयामि हृत्पद्मे Mṛtyu-MāPūSt. 18; चन्द्रमसो बिम्बमतिस्वच्छम् ··· अवलोक्यते Bhām. 214. 8 (*on* i. 3. 15); **iii** very pure (i. e. free from blemishes) तदेष संप्रति ··· अवाप्य ··· त्वाम् ··· त्रासविरहितमपेतत्रासः स्वच्छाशयमतिस्वच्छो गुणवन्तमतिशयोज्ज्वलगुणः प्राप्नोतु सदृशवस्तुसंयोगजां प्रीतिम् TilaMañ. 43. 20; भवत इवातिस्वच्छं कस्याभ्यन्तरमगाधमतिशिशिरम् । काव्यामृतरसमग्नस्त्वमिव सदा कः कथय सरसः VidaMuMa. 2. 20; 4. 59; यत्र प्रकाशरूपस्यातिस्वच्छस्य नितान्ताभिभूतरजस्तमस्तथा विवेकख्यातिरूपेण परिणतस्य बुद्धिसत्त्वस्यात्यन्तिकश्चैतन्यादसंकरः TattvVai. 158. 19 (*on* 3. 35); किमादेयं हेयं किम् ··· सहजानन्दजलधावतिस्वच्छे तुच्छीकृतसकलमाये परशिवे S'aṅkaDigVi.(Mā.) 5. 128.

अतिस्वच्छतर (atisvaccha-tara) *adj.* very clean (कीदृशं तत्सरः) अतिस्वच्छतरं शीतम् ··· जलं तस्य SkandP. iii(2). 15. 69.

अतिस्वच्छता (atisvaccha-tā) *f.* great clarity, high transparency स्फटिकमणावतिस्वच्छतया जपाकुसुमप्रतिबिम्बोद्ग्राहिण्यरुणः स्फटिक इत्यारुण्यविभ्रमः Bhām. 4. 7 (*on* i. 1. 0); अतिस्वच्छतयान्तर्दृश्यमानव(गि ?)लितानु(न्ध ?)-कारशकलानीव संक्रान्तासन्नविटपदलबिम्बकान्युद्वहन्तम् (राजा मणिमपश्यत्) Uday-SuKa. 131. 18; नेत्रविरोधिकज्जलकालिमवैलक्षण्येनातिस्वच्छतया तदनिरोधिपित्तपीतिमग्रहणमुपपादयन् NyāyMa. 77. 3.

अतिस्वच्छत्व (atisvaccha-tva) *n.* great clearness, high transparency काचादीनां केषांचिदतिस्वच्छत्वात् ··· चाक्षुषतेजःप्रसरनिरोधकौशलं नास्ति Nyāy-Mañ. ii. 51. 14; अन्तःकरणस्यातिस्वच्छत्वाच्चैतन्यं तत्राभिव्यज्यते VivaPraSaṁ. 88. 7; SiddhāBi. 57. 6; अत्र तूक्तप्रकारम् । अणुत्वं परिच्छिन्नत्वे सत्यतिस्वच्छत्वम् S'rutaPra. ii. 393. 24 (*on* ii. 4. 6)

अतिस्वच्छन्द (ati-svacchanda) *adj.* very free अतिस्वच्छन्दरत्नाङ्कुरश्रेणीशोणभुजंगनायकफणाचन्द्रोल्लसत्पल्लवम् । भूयादभ्युदयाय···प्रत्यूहप्रशमैकपूर्णकलशप्रायं शिरो धूर्जटेः SaduktiKa. 8. 32.

अतिस्वच्छन्दशायिनी (atisvacchanda-śāyinī) *adj.* (*f.*) sleeping very freely अतिस्वच्छन्दशायिनीम् । तामजागरयन्नूचे नीचकैर्निषधापतिः PāṇḍaC. 6. 385.

अतिस्वच्छमानस (atisvaccha-mānasa) *adj.* having a very pure mind तारक त्वं समागच्छ गच्छातिस्वच्छमानस SkandP. iv. 53. 98.

अतिस्वच्छोज्ज्वलाकृति (atisvacchojjvalākṛti) *adj.* having a very clean and bright form माल्यानुलेपनादीच्छुरतिस्वस्थो(v. l. स्वच्छो)ज्ज्वलाकृतिः SarvaSiSaṁ. 11. 19.

अतिस्वद् (ati-svad-) I. Ā. to taste very well, to be very pleasant to taste यत्करोषि यदश्नासि शमशीतलया धिया । तत्रातिस्वदते स्वादु नेतरत्तात मानसे YogVā. ii. 13. 64; अत्र नीचगता निद्रा भावकेभ्यो नातिस्वदते RasāSu. 143. 3 (2. 99)

अतिस्वन् (ati-svan) *m.* cf. **अतिश्वन्** name of a man (one who has a superior dog), GaṇPā. 132. 17; KāśiVṛ. *on* P. iv. 2. 80.

अतिस्वपन (ati-svapana) *n.* excessive sleep, sleeping out of time प्रजागरातिस्वपनाम्बुशीतैः ··· संस्त्यानदोषे शिरसि प्रवृद्धो वायुः प्रतिश्यायमुदीरयेत्तु CaraS. vi. 26. 104 (1941 Ed.) = RugVi. 58. 13.

अतिस्वप्न (ati-svapna) *m.* sleeping too much, excessive sleep अतिस्वप्नातिजागरम् ··· नित्यं योगी विवर्जयेत् AmṛNāU. 28; अतिस्वप्नाव्यायामादिभिश्च श्लेष्मा प्रकुपितः ··· शोथं जनयति CaraS. i. 18. 6 (3) (1941 Ed.); i. 8. 19; vi. 19. 8 (1941 Ed.); *n.* यदास्य ··· प्रादुर्भवन्ति व्याधयो वानेकविधा अतिस्वप्नम् ··· यमदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति ṢaḍviBr. vi. 4. 2; आलस्यमतिस्वप्नं गौरवम् ··· उपजनयति CaraS. i. 26. 42 (1); अतिस्वप्नम(श)य्या च तथा चाप्यतिभाषणम् ··· कुरुते नरः BhelaS. 12. 16 (1. 8); **B** remaining awake, wakeful state स्वप्नेऽपि, आस्तां तावत् अतिस्वप्नेऽपि, मे मम विप्रलम्भनकराः ··· प्रवृत्तयो न वर्तन्ते YaśasCam. ii. 26. 26 (comm.); *adj.* indulging in excessive sleep पथिकोत्पथिकाश्च ··· देवगृहपुण्यस्थानवनश्मशानेषु ··· अतिस्वप्नमध्वक्लान्तमपूर्वं वा गृह्णीयुः ArthS'ā. i. 352. 4 (2. 36); ii. 147. 8 (4. 6)

अतिस्वप्नशील (atisvapna-śīla) *adj.* habituated to excessive sleeping नात्यश्नतस्तु योगोऽस्ति···न चातिस्वप्नशीलस्य MahāBhā. vi. 21. 16 = BhagGī. 6. 16; GītāBh.(S'aṅ.) 194. 9 (*on* 6. 16)

अतिस्वमृदुत्व (atisvamṛdu-tva) *n.* one's own excessively gentle nature साधुभ्योऽतिस्वमृदुत्वं नीचाः संदर्शयन्ति हि S'ukraNī. 1. 375.

अतिस्वर्य (ati-svarya) *m.* name of a note (last of the seven notes, the lowest one) छन्दोगानां क्रुष्टप्रथमद्वितीयतृतीयचतुर्थमन्द्रातिस्वर्यलक्षणाः सप्त स्वराः MayūMāli. 599. 10 (*on* ix. 1. 17)

अतिस्वल्प (ati-svalpa) *adj.* [*f.* -ā] **i** very little (in degree) न क्षाम्यत्यतिस्वल्पमप्यार्यपरिभवपीडापावकः प्रणयविलम्बम् HarṣaC. 267. 13; अतिस्वल्पोऽपि सद्भावो मय्यस्ति यदि वा कृपा PadmP.(Ra.) 104. 69; यत्सत्यमधुना तत्संदर्शनेनातिस्वल्पोऽपि न विशेषः MālaMā. 5. 56; मूलाज्ञानविनाशेन कारणाभासचेष्टितैः । बन्धो न मेऽतिस्वल्पोऽपि SarvaVeSāSaṁ. 952; उत्तमानामतिस्वल्पप्रचारो हस्ताभिनयः AbhinBhā. ii. 65. 12 (*on* 9. 164); इत्यादिना अतिस्वल्पप्रायश्चित्तविधानेन क्षतिविरहादिति सुधीभिर्विभाव्यम् VaiyāBhū. 94. 17 (*on* 22); **ii** very little (in quantity) अष्टांशवंशरोचनसुकलितमतिस्वल्पशर्करासहितम् ··· मुखवासो भूमिपालानाम् NāgaSa. 4. 9; धृतिः सन्तोषः । यस्मिन्नतिस्वल्पेनापि जीव्यन्ते(? ते) SmṛtiCan. ii. 475. 11; **iii** very young (in age) कन्याशब्दं प्रथमवयोवचनमाश्रित्य परोक्षे प्रार्थयमानस्य ब्रूयात्किं तावन्नासौ कन्या अतिस्वल्पा वृद्धा वा ManuBh. ii. 177. 14 (*on* 8. 225); **iv** very small (in size) अतिस्वल्पौ पाणी स्तनभरनिरोधान्न मिलितौ S'ārṅgaPa. 3943; नातिस्वल्पा नातिदीर्घाः सर्गा अष्टाधिका इह SāhiDa. 372. 14; अतिस्वल्पे आकाशे···किमन्वेष्टव्यम् UpaParā. 48. 4; मध्यमा (सूची) नातिस्वल्पा नात्यधिकेत्यर्थः VīraMi.(Saṁskāra.) 262. 12; **v** much less (in strength) बहवोऽन्येऽपि चाजग्मुः ··· कश्चिद्रथानामयुतैः ··· कश्चिद्योऽतिस्वल्पोऽयुतेन सु: KathāSaSāg. viii. 3. 40.

अतिस्वल्पतनु (atisvalpa-tanu) *adj.* having a very tiny form तं कदाचिदतिस्वल्पतनुः ··· उवाच तलसंलीनः ··· मत्स्यशिशुः DaśāvaC. 1. 20.

अतिस्वल्पत्व (atisvalpa-tva) *n.* **i** the state of being very short अन्यथा हेमन्तकालेऽतिस्वल्पत्वादह्नां तत्र किंचिदूनचतुर्दशघटिकामात्र आवर्तनं भवति SmṛtiCan. v. 41. 1; **ii** the state of being very little भृतित्वं च न धान्यानां स्वरूपतः । अतिस्वल्पत्वात् ··· पञ्चभिर्व्रीहिभिः परिक्रीत इत्यव्यवहाराच्च MayūMāli. 688. 10 (*on* x. 3. 11)

अतिस्वल्पसुभाषित (atisvalpa-subhāṣita) *adj.* having very little of good expression प्रतिभादारिद्र्यदैन्यादतिस्वल्पसुभाषितेन कविना वर्णसावर्ण्यरम्यतामात्रमत्रोदितम् VakroJī. 7. 20.

अतिस्वस्थ (ati-svastha) *adj.* very healthy माल्यानुलेपनादीच्छुरतिस्वस्थोज्ज्वलाकृतिः SarvaSiSaṁ. 11. 19.

अतिस्वादु (ati-svādu) *adj.* extremely delicious, very tasty, very sweet अतिस्वादु ··· अपूर्वमङ्गनारक्तं पिबन्तु रणपूतनाः BrahmāṇḍP. iii. 22. 81; गव्यं क्षीरमतिस्वादु LiṅgaP. i. 107. 6; सर्वेऽपि ··· पिपासिताश्च···अतिस्वादुसलिलम् ··· जलाशयमधिश्रयन्ति UdaySuKa. 128. 25; सरस्वत्याः स्रोतः ··· विजयते । अतिस्वादुन्यन्तःपिहितरसरम्ये ··· मज्जन्ति निपुणाः SaduktiKa. 51. 10; मार्गे ··· अतिस्वादुफलावलिं च । ताम्बूलपर्णक्रमुकप्रसन्नान्यादाय पौराः क्षितिपं प्रणेमुः Rāṣṭrau. 9. 3.

अतिस्वादुकर (atisvādu-kara) *adj.* making very sweet or delicious अतिस्वादुकरं चैव नैवेद्यं प्रतिगृह्यताम् DevīBhāP. ix. 42. 22.

अतिस्वादुभाविन् (atisvādu-bhāvin) *adj.* becoming extremely sweet अद्वैतोपायनमिदमतिस्वादुभावीति कार्यम् CaitaCa. 238. 5 (10)

अतिस्वाधीन (ati-svādhīna) *adj.* very much at one's disposal, easily available अतिस्वाधीननीवारफलमूलसमित्कुशम् । मुनिस्तपोवनं चक्रे Nava-SāC. 11. 64.

अतिस्वान (ati-svāna) *n.* loud noise, rattle नानायुद्धाश्च संक्रुद्धा बलिनस्तमयूयुधन् । सोऽयं सोऽयमतिस्वानं कुर्वाणाः PadmP.(Ra.) 47. 120.

अतिस्वान्तप्रमोद (ati-svāntapramoda) *m.* great delight of heart प्रातस्त्यः पवनो वहत्ययमतिस्वान्तप्रमोदप्रदः Hāsyārṇa. 2. 2.

अतिस्वापरति (atisvāpa-rati) *f.* delight in excessive sleep दीर्घनिद्रा मृतिस्तथा । अतिस्वापरतिश्चाथ AnekāK. 788.

अतिस्वाभाविक (ati-svābhāvika) *adj.* very natural असौ तु सायमागत्य नातिस्वाभाविकाकृतिः ।··· विनीतवदुक्तवान् BṛKathāS'loSaṁ. 25. 3.

अतिस्वामित्व (atisvāmi-tva) *n.* overlordship जितं त इति शब्दोऽयमतिस्वामित्वसूचकः AhirbuS. 53. 54.

अतिस्वार (ati-svāra) *m.* last note in the Sāma scale अर्धेडा शक्करीणामतिस्वारो रेवतीनाम् PañcBr. viii. 9. 14; मन्द्रकर्षणसंयुक्तमतिस्वारं प्रशंसति BṛDe. 8. 113; मन्द्रः क्रुष्टो ह्यतिस्वार एतान्कुर्वन्ति सामगाः NāraS'i. i. 1. 12; अतिस्वारस्य नीचस्य हृदि स्थानं विधीयते NāraS'i. i. 7. 2; अतिस्वारेण नीचेन जगत्स्थावरजङ्गमान् NāraS'i. i. 7. 7; अतिस्वारे तृतीये च क्रुष्टे तु करुणा श्रुतिः NāraS'i. i. 7. 10.

अतिस्वार्य (ati-svārya) *m.* last note in the Sāma scale मित्रावरुणयोरतिस्वार्यः SāmaViBr. i. 1. 14 (comm. अतिस्वार्यः षष्ठः); विकर्षेण तु मन्द्रस्य युक्तोऽतिस्वार्य उच्यते BṛDe. 8. 120; मन्द्रादिषु त्रिषु स्थानेषु सप्त सप्त यमाः ।

क्रुष्टप्रथमद्वितीयतृतीयचतुर्थमन्द्रातिस्वार्याः TaiPrāti. 23. 13.

अतिस्विन्न (ati-svinna) *adj.* i undergoing over-fomentation दाहः स्वराङ्गदौर्बल्यमतिस्विन्नस्य लक्षणम् CaraS. i. 14. 14 (1941 Ed.); स्वेदद्वेषोऽङ्गराग-श्चेत्यतिस्विन्नस्य लक्षणम् BhelaS. 35. 21 (1. 22); स्वराङ्गहानिर्वैह्वल्यमतिस्विन्नस्य लक्षणम् KāśyaS. 25B. 2 (1. 25); अतिस्विन्नस्य मृदुत्वग् भवति Hastyāyur. 231. 21 (2. 30); 131. 5 (1. 18); ii perspiring greatly, sweating very much ग्रीष्मे ··· अतिस्विन्नं भवति (शरीरम्) AṣṭāSaṁ. i. 122. 6 (1. 23); अतिस्विन्नोऽपि न सहसा शीतोदकमनुप्रविशेथाः AṣṭāSaṁ. i. 135. 2 (1. 26); अतिस्विन्नमथाश्वास्य शीताम्बु-त्रासनं हितम् SiddhYo. 72. 12; अतिस्विन्ने च प्रदेहः Hastyāyur. 134. 14 (1. 18)

अतिस्विन्नतनु (atisvinna-tanu) *adj.* with a body perspiring greatly छर्दतीसारदुष्टानामतिस्विन्नतनोरपि ··· सिरामोक्षो न विद्यते S'ārṅgaS. iii. 12. 21.

अतिस्वृ (ati-svṛ-) I. P. i to overtune, to pass over a musical tone (skipping the intermediate one) अर्द्धेडामतिस्वरति PañcBr. xiii. 12. 11; यन्निधनमतिस्वरति तत् साम्न ऋच्यायतनम् JaimiBr. 1. 326 (4); ii to have a *Svaranidhana* (making a low and deep sound) beyond the normal अथ यद् ऋचमतिस्वरति तद् बार्हतम् JaimiBr. 1. 299 (9); iii to end in a sound यदा वा ऋचमाप्नोत्योमित्येवातिस्वरति ChāndoU. i. 4. 4.

अतिस्वेद (ati-sveda) *m.* i excessive perspiration अतिस्वेदश्च ··· °मूत्रवर्चस्त्वं चेति चत्वारिंशत्पित्तविकाराः CaraS. i. 20. 16 (1922 Ed.); (वृद्धस्तु कुरुते) स्वेदोऽतिस्वेददौर्गन्ध्यकण्डूः AṣṭāHṛ. i. 11. 14; पित्तविकाराः पुनः। ओषः ··· अतिस्वेदोऽङ्गगन्धः AṣṭāSaṁ. i. 107. 19 (1. 20); अतिस्वेदोऽङ्गदाहकः KāśyaS. 43B. 4; अतिस्वेदातिघर्मेण ··· जायते मारुतक्षयः HāriS. iii. 9. 8; ii treatment by excessive fomentation अतिस्वेदं प्रयुञ्जीत अज्ञानादल्पमेधसः Hastyāyur. 680. 23 (4. 24)

अतिस्वेदन (ati-svedana) *n.* excessive perspiration अस्वेदनमतिस्वेद-नम् ··· कुष्ठानां पूर्वरूपाणि भवन्ति CaraS. ii. 5. 8 (1922 Ed.)

अतिस्वेदार्द्र (ati-svedārdra) *adj.* wet or moist with excessive perspiration अतिस्वेदार्द्रगण्डस्थलम् ।··· गोविन्दम् ··· पश्यामि GītGo. ii. 6. 10.

अतिहठ (ati-haṭha) *m.* [Abl.] with great force, very forcibly वेग-मतिहठादाच्छोटयितुमिव रंहसा प्रसिद्धेषु प्रविष्टलोकहृदयेषु ··· विश्वमतिक्रमितुमीश्वरा ··· तुरगी UdaySuKa. 124. 3; अध्यन्तःपुरमाविशद्भिरमरैः ··· निजयोषितामतिहठा-द्गर्भा अपि स्रंसिताः Manmatho. 3. 4 (631. 17)

अतिहत (áti-hata) *adj.* A firmly fixed इमां वशावाचमाहुर्वशेति तिस्रो वशा अतिहताः सधस्थे AV.(P.) xiii. 5. 2; यश्चायं दक्षिणेऽक्षन्पुरुषस्तस्य हैतस्य हृदये पादावतिहतौ S'atBṛ. X. v. 2. 13; B very much injured अतिहतानां तु मर्मणां यथास्वं पूर्वं पूर्वं च कर्म ईषदंते वा हतानामुत्तरमेव AṣṭāSaṁ. i. 236. 8 (2. 7)

अतिहतव्रीड (atihata-vrīḍa) *adj.* completely devoid of modesty, utterly shameless अतिहतव्रीडोऽहर्निशं मां विडम्बयति Hāsyārṇa. 1. 26 (7)

अतिहन् (ati-han-) II. P. i to continue to slay, not to stop killing तच्चेदतिहन्यात् ··· सायंप्रातराज्येन जुहुयात् ĀpaS'S. vi. 14. 12; ii to strike down तान् ··· मध्यमेषायां अतिहन्यात् MānS'S. 122. 14; iii to accentuate नीचं तु स्वरपूर्वं तु नीचावग्रहमेव च। हन्तव्यं तद्विजानीयात् उच्चावग्रहवर्जितम्। नातिहन्यान्न निर्हन्यात् MāṇḍūS'i. 6. 6; (Desid.) to try to escape अत्यजिघांसत् AitĀ. ii. 4. 3.

अतिहनन (ati-hanana) *n.* striking hard ईषत्स्पर्शनपीडनातिहननान्यु-त्क्षिप्य संपीडनम् ··· इति सृणेस्तोदक्रमो दर्शितः MātaLī. 12. 21.

अतिहन्यमान (ati-hanyamāna) *adj.* being attacked hard दैत्यराजेन तेनातिहन्यमानाः···पलायन्त दिशो दश सवासवाः S'ivaP. ii(5). 15. 63 (238A. 10)

अतिहरत् (ati-harat) *adj.* i avoiding अथैनदुरसा संस्पृश्य दक्षिणं भागमात्मनोऽतिहरञ्जपति S'āṅkhāĀ. 1. 7 (3. 31); ii carrying beyond समया-हवनीयं प्रस्तरमतिहरन् MānS'S. 65. 16.

अतिहरितपत्त्र (atiharita-pattra) *n.* very dark green leaf अतिहरित-पत्त्रपरिकरसंपन्नस्पन्दनैकविटपस्य ··· कुसुम्भकुसुमायते तरणिः SubhāRaK. 27. 19.

अतिहरितवर्ण (atiharita-varṇa) *adj.* of dark blue or green colour तं तस्मिन्नवसरे चैत्यम् ··· अतिहरितवर्णमद्राक्षम् UdaySuKa. 28. 16.

अतिहरिता (ati-haritā) *adj.* (*f.*) dark green अतिहरितया देहत्विषा सिक्त इव ··· मुख्यं रागमावहन् (शुकः) UdaySuKa. 29. 1.

अतिहरिद्राद्रव (ati-haridrādrava) *m.* abundant paste of turmeric पयःपूरैः पीतीकृतममतिहरिद्राद्रवमयैः। दुकूलम् VidaMā. 6. 1.

अतिहर्ष (ati-harṣa) *m.* 1 great or excessive joy अतिहर्षोऽयमस्थाने तवाद्य मधुसूदन MahāBhā. vii. 155. 6; कस्मात्पौरजनस्यायमतिहर्षोऽद्य शंस मे Rāmā. ii. 118*(1); उद्भूतरोमांच इवातिहर्षात् पुष्पाङ्कुरैरास नवैरशोकः JānaHa. 3. 7; त्वयाद्य लङ्काभिभवेऽतिहर्षाद् दुष्टोऽतिमात्रं विवृतोऽन्तरात्मा Bhaṭṭi. 12. 80; अतिहर्षविस्मयकौतुकोत्तानितचक्षुश्चिन्तितवानहम् NalaCam. 7. 19 (31); यदातिहर्षो-त्पुलकाश्रुगद्गदं प्रोत्कण्ठ उद्गायति BhāgP. vii. 7. 34; अतिहर्षादभूदस्याम्भः पृषतौघ-मौक्तिकमयो गुम्फः सहस्रेक्षणः AnargharRā. 5. 55; आह्वयत्यतिहर्षेण AdhyāRā. i. 3. 48; तत्र स्तुत्यातिहर्षोऽभूत् PadmP. iv. 22. 38; अतिहर्षो मे लक्ष्मीः सा ह्यागतेह नः KathāSaSāg. vi. 7. 8; अतिहर्षेण विकसिताक्षिः UdaySuKa. 51. 28; स्पर्शा-तिहर्षाद्रुतसत्यमत्या प्रवृत्य मिथ्याप्रतिलब्धबाधौ···न श्रद्दधाते NaiṣC 6. 53; (गुरुः) तत्काव्यान्यतिहर्षेण प्राशंसत् PrabhāC. 150. 22; भावेऽनिष्टे भवन्ति ··· नातिहर्षो न कुत्सनम् BhāvPra.(S'ā.) 141. 22 (6); अपश्यदतिहर्षेण समस्तान् ParamāKā. 147. 57; अतिहर्षादिव जहौ नाभिरस्या गभीरताम् YātrāPra. 2. 12; नातिशोको नातिहर्षः ··· इति सिद्धस्य लक्षणम् TantrRa. 35. 73; 2 too much of excitement अतिहर्षादतिप्रसक्तभावः स्त्रीष्वतिप्रसङ्गमारभते CaraS. ii. 6. 8 (1941 Ed.); क्रोधभयातिहर्षात् ··· पित्तप्रकोपो भवति KalyāKā. 3. 57; अतिकोपं चातिहर्षम् ··· वर्जयेत् Rasā. 18. 119; अतिहर्षात् (भवति) ··· अनर्थः KandaCū. vi. 6. 3; *adj.* very happy, greatly delighted अतिहर्षं च तं दृष्ट्वा···नारदः पृष्टवान् SkandP. iii(2). 1. 56.

अतिहर्षगद्गद (atiharṣa-gadgada) *adj.* faltering with excessive joy राढीयैरतिहर्षगद्गदगलैः प्राभाकरः श्रूयते LaṭaMe. 2. 16.

अतिहर्षजा (atiharṣa-jā) *adj.* (*f.*) resulting from excessive pleasure क्रीडा यैषातिहर्षजा BṛKathāS'loSaṁ. 12. 67.

अतिहर्षतस् (atiharṣa-tas) *adv.* very joyfully अतिहर्षतः। ते प्राहुः PrabhāC. 51. 5; 81. 15.

अतिहर्षद (atiharṣa-da) *adj.* giving great delight आश्चर्यमतिहर्षदम्। अकस्मादपि जायेत JayāS. 16. 327.

अतिहर्षनिरुत्तर (atiharṣa-niruttara) *adj.* who gives no reply due to extreme joy अतिहर्षनिरुत्तरेण सार्धं रथवासी पवनेश पाहि मां त्वम् Nārāy. x. 73. 10.

अतिहर्षपरीतत्व (atiharṣaparīta-tva) *n.* being filled with great joy अतिहर्षपरीतत्वाद्वितन्त्रीपरिवादिनोः। ताडयन्ति स्म गन्धर्वाः BṛKathāS'loSaṁ. 5. 80.

अतिहर्षभर (atiharṣa-bhara) *m.* burden of great joy सातिहर्षभरस्त-ब्धनिःश्वासा पञ्चतामगात् KathāSaSāg. xii. 28. 74.

अतिहर्षभू (atiharṣa-bhū) *f.* place of extreme joy श्रुत्वातिहर्षभूः श्रेष्ठी PrabhāC. 161. 26; मेने स्वजन्म भूपालः कृतार्थमतिहर्षभूः PrabhāC. 194. 24.

अतिहर्षम् (ati-harṣam) *adv.* very joyfully, with great joy अतिहर्षम् (उत्प्लुत्य) सिंहेनाक्रान्तो(ऽपि) गर्दभः PañcT. 4. 17 (389. 1); अतिहर्षमुपरि-भागेनातिक्रान्तः सिंहो गर्दभेन Tantrākhyā. 128. 22.

अतिहर्षसमन्वित (atiharṣa-samanvita) *adj.* very much delighted ते ···। काष्ठानि चालयामासुरतिहर्षसमन्विताः NīlaP. App. 1309.

अतुच्छपदस्थिति (atucchapada-sthiti) *adj.* **i** not found at a low place त्वया मुक्तगिरि: पाणौ ममातुच्छपदस्थिति: । निधीयतामधीराक्षि रागिधातुपरिच्छद: VidaMā. 6. 2; **ii** without the letters *tu*, *ccha*, *pa* and *da*; VidaMā. 6. 2.

अतुच्छपार्थवात्सल्य (atuccha-pārthavātsalya) *n.* great affection for Arjuna (son of Pṛthā) जल्पन्तं तम् …। अतुच्छपार्थवात्सल्यविवशो गुरुरब्रवीत् PāṇḍaC. 3. 312.

अतुच्छपुच्छ (atuccha-puchha) *n.* big tail अतुच्छपुच्छदण्डेन प्रचण्डेन स केसरी । भूतलं ताडयामास वज्रेणेन्द्र इवाचलम् TriṣaS'aPuC. iv. 1. 384.

अतुच्छबल (atuchha-bala) *adj.* having great strength स तु लक्ष्मणस्तव यश:सदृशं मम चाच्छिदच्छ्रुतिमतुच्छबल: Rāgh. 8. 60.

अतुच्छम् (a-tuccham) *adv.* significantly इत्थं सवात्सल्यमतुच्छमिच्छानुरूपम्…। उदीर्य देवी सपरिच्छदापि गिरोऽधिभू: क्वापि तिरोबभूव VasaViKā. 1. 73.

अतुच्छमत्सर (atuccha-matsara) *m.* excessive jealousy अतुच्छमत्सराक्रान्त: कियद्भिर्वासरैस्तत: । भूपतिर्दण्डकारण्ये संप्राप भयभीषणे CitraPaC. 426.

अतुच्छमनस् (atuccha-manas) *adj.* noble-minded किमिति चेत्थमतुच्छमनसापि भवता कृपास्पदमारब्धेयं तपस्विनी UdaySuKa. 84. 1.

अतुच्छमूर्च्छा (atuccha-mūrccha) *f.* intense or deep swoon श्रीदत्त:… प्रसूतिदु:खेनातुच्छमूर्च्छापाश्रयां धनश्रियमाकलय्य YaśasCam. ii. 339. 25; मन्दं वदन्नेवातुच्छमूर्च्छाभिराकुल: । क्रौर्यंत्रस्तैरिव प्राणैस्त्यज्यते स्म सुयोधन: PāṇḍaC. 13. 996; आपृच्छय गच्छति प्रेयस्यन्यया संज्ञया विना । अतुच्छमूर्च्छयादर्शि स्वानुरागस्य चेष्टितम् SamarāSaṁ. 5. 443; सा…अतुच्छमूर्च्छापगमात्स्वस्था तस्थौ कथंचन MalliC. 2. 511.

अतुच्छरुच् (atuccha-ruc) *adj.* having great lustre अथादर्शि मया…। अर्हन्नजितदेवाख्य: समागच्छन्नतुच्छरुक् SamarāSaṁ. 3. 52.

अतुच्छरूप (atuccha-rūpa) *n.* what is not void किं चायमपरस्त्वदीये पक्षे दोष: येनातुच्छरूपेणापोहे वस्तुमात्राक्षेपोऽपि न सिध्यति, तद्रूपस्य शशविषाणेऽपि संभवात् S'arka. 65. 4.

अतुच्छवत् (atuccha-vat) *adv.* like what is not void अतस्तदुभयं तुच्छमेव अतुच्छवद् भ्रान्तौ ख्यातिसामानाधिकरण्यवदिति मायावादिनापि भ्रान्तौ तुच्छख्यातिरेष्टव्या IṣṭaSi. 158. 1.

अतुच्छवात्सल्य (atuccha-vātsalya) *n.* great affection ततोऽतुल्यवात्सल्याच्छम्भल्या दास्या कालविलम्बेनेक्षुरसपूर्ण: करक: … उपानीयत PrabaCin. 48. 5; 87. 26; सङ्घस्यातुच्छवात्सल्यं कृत्वा स्वीयं च मन्दिरम् । अर्थिभिर्मुषितं चक्रे KumāDeC.(So.) 27. 12; अतुच्छवात्सल्यभरं दधान:…पृथ्वीराजेति नामाधित तस्य भूप: HammīMaKā. 2. 75.

अतुच्छविक्रम (atuccha-vikrama) *adj.* of great valour शकाधिप: …। तुष्टस्तवोपरि हमीरभूपते याचस्व वाञ्छितमतुच्छविक्रम HammīMaKā. 12. 5.

अतुच्छशब्द (atuccha-śabda) *m.* superfluous word शतार्धपञ्चांशभुजो द्वादशार्धार्धलोचन: ।… इति तुच्छमेवाभिधेयमतुच्छशब्दैरुक्तमिति अपुष्टार्थम् SaraKaṇṭhā. 8. 8.

अतुच्छशोकमूर्च्छाला (atucchaśoka-mūrcchālā) *adj.* (*f.*) fainting with great grief (मातर:) अतुच्छशोकमूर्च्छालास्तास्तत: कथमप्यगु: PāṇḍaC. 7. 88.

अतुच्छसार्थ (atuccha-sārtha) *adj.* accompanied by a large caravan गच्छन्नतुच्छसार्थोऽसौ भीष्मां पञ्चाटवीं ययौ PārśvC. 8. 86.

अतुच्छसुतवात्सल्य (atuccha-sutavātsalya) *n.* great affection for a son अतुच्छसुतवात्सल्यपिच्छलीभूतचेतसा । सोममूर्ति: क्षमी व्याघ्रो जनन्या मन्यते ध्रुवम् KāvyKaVṛ. 152. 6 (4. 7)

अतुच्छहर्षभाज् (atucchaharṣa-bhāj) *adj.* full of great delight आचार्योऽपि हि तं बालं पप्रच्छातुच्छहर्षभाक् PariPar. 5. 72.

अतुच्छात्मन् (atucchātman) *adj.* noble-minded कुमार: … अगच्छदतुच्छात्माभिवन्दितुम् । …मुनीश्वरम् PārśvC. 3. 28.

अतुच्छार्थ (atucchārtha) *m.* entity which is not void न चातुच्छार्थविवक्षायां मां प्रत्ययं नास्तिशब्द: प्रयोक्तव्य: IṣṭaSi. 162. 11.

अतुच्छार्थता (atucchārtha-tā) *f.* the state of having a non-void (i. e. significant) entity for its meaning तस्य अतुच्छार्थतासिद्धेर्मम IṣṭaSi. 162. 12.

अतुच्छालम्बन (atucchālambana) *adj.* not clinging to insignificant things अतुच्छालम्बनं धीरं प्रबुद्धं गुणहारि च । तवापि हि मन: YogVā. iii. 105. 14.

अतुच्छेच्छ (atuccheccha) *adj.* **A** having a strong desire, very eager क्व नाम भगवत्पादा नयनानन्ददायिन: । इत्यपृच्छदतुच्छेच्छ: सर्वानुद्यानपालकान् TriṣaS'aPuC. i. 3. 368; **B** for which there is a strong desire, strongly desired अतुच्छेच्छं किं तन्मे यस्य नेशिषे । तद् ब्रूहि PāṇḍaC. 1. 487.

अतुच्छोत्सव (atucchotsava) *m.* great festivity पुरं प्राविशदुर्वीन्दुरतुच्छोत्सवसच्छवि: HammīMaKā. 9. 52.

अतुञ्ज (a-tuñja) *adj.* not hurting or injuring, not ferocious जहर्ष … असौ वृषैरतुञ्जै: … वृतम् । वजन् व्रजम् DhātuKā. 1. 33.

अतुण्डक (a-tuṇḍaka) *adj.* not hurting, not violent (i. e. calm and peaceful) प्रहुण्डितानैक्षत…। स भण्डिल: …तत्र जनानतुण्डकान् DhātuKā. 1. 36.

अतुण्डा (a-tuṇḍā) *adj.* (*f.*) mouthless अमानुषा ह्यतुण्डाश्च… । हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा स्त्रिय: । … विनाशं तस्य देशस्य कुलस्य च विनिर्दिशेत् MatsyaP. 235. 2.

अतुदत् (a-tudat) *adj.* not hurting or striking, not giving trouble अस्यूतनासिकाभ्यां समुष्काभ्यामतुदन्नारया (अनडुह:) मुहुर्मुहुरभ्युच्छन्दयन् (विलिखेत् भूमिम्) BaudhDS. ii. 2. 74 = iii. 2. 2; धुर्यै: … विनीतैस्तु व्रजेन्नित्यं प्रतोदेनातुदन् भृशम् ManuSm. 4. 68; अद्यापि पश्यार्यमणं विधुं वातुदन् निवर्तेत विधुंतुदो न HammīMaKā. 8. 102.

अतुन्द (a-tunda) *adj.* not stout or bulky, thin, lean [MW, Apte]

अतुन्दपरिमृज (a-tundaparimṛja) *adj.* [cf. P. iii. 2. 5; SiddhaHe. v. 1. 143] not lazy, active, smart (*lit.* not stroking the stomach) कथं स शोकापनुद: पुत्र: स्तम्बेरमोर्गपि । अप्यतुन्दपरिमृज: DvyāśraKā. 11. 101 (comm. निरालस्योऽपि)

अतुन्दिक (a-tundika) *adj.* not corpulent (thin or lean) अतुन्दिकं क्वापि जिगाय तुन्दी DvyāśraKā. 18. 68.

अतुन्दिल (a-tundila) *adj.* not having a protuberant belly, not corpulent (lean or thin) व्याघ्रकेतु: … अतुन्दिलमपि तुण्डिभम् … शबरयुवानमादायाजगाम HarṣaC. 310. 7; अतुन्दिल: क्वापि च तुन्दवन्तम् … जिगाय DvyāśraKā. 18. 68.

अतुबन्त (atub-anta) *adj.* (word) ending in a suffix called *-atup* (e. g. the suffix *matup*, *ḍmatup*) पकारलोपे कृते नातुबन्तं भवत्यत्वन्तमेव MahāBh. iii. 183. 25 (*on* vi. 4. 14); उपदेशे चैतदतुबन्तं नात्वन्तम् MahāBh. iii. 184. 7 (*on* vi. 4. 14); iii. 184. 1 (*on* vi. 4. 14); एतेन तदाश्रयणे अतुबन्तमेतत् नात्वन्तमित्यपास्तम्, तदाश्रयणाभावात् LaS'abdeS'e. i. 345. 1.

अतुम्पक (a-tumpaka) *adj.* not hurting or killing, non-violent, peaceful अतुम्पकान् वितुफती … पृतना स्थिता DhātuKā. 2. 74.

अतुम्बर (atumbara) *m.* name of a kind of plant (उपागत: ।… मेघश्यामं च तं देशं द्रुमखण्डैरनेकश:) जात्या चम्पकजात्या च तुम्बरैश्चाप्यतुम्बरै: MatsyaP. 118. 14.

अतुर् (a-tur) *adj.* having no barriers or obstructions, having none to overpower or suppress मोर्मेमूर्तिरिव तोर्मेचमूपै: । प्रागतू: स वह उज्झति फेनं तूर्णं उग्रविधिपाकनियोगात् DvyāśraKā. 8. 104 (comm. अविद्यमाना: तुरस्तूर्वन्त: सेतुबन्धेन पीडका यस्य)

अतुर (á-tura) *adj.* not quick, not alert तुराणामतुराणां विशामवर्जुषीणाम् । समैतु विश्वतो भगो अन्तर्हस्तं कृतं मम AV. vii. 50. 2 [not rich, not liberal PW, MW]

अतुर्मुह्य (atur-muhyá) *n.* [Roth अन्तर्मुह्य internal confusion; Debru. p. 830] यदि कामयेतातुर्मुह्यं स्यादिति पूर्वार्धेऽन्यां जनताया गां निदध्यात् … ते संगछेते तावदतुर्मुह्यं भवति MaiS. ii. 1. 9; MānS'S. 121. 9.

¹अतुल (a-tula) *adj.* [*f.* -ā] having no equal or parallel, incomparable, matchless (excessive, immense), incalculable, unique (huge) विहाय स्त्रीरूपमतुलं हरि: ।… दानवान् समकम्पयत् MahāBhā. i. 17. 9; प्रहर्षमतुलं लेभे MahāBhā. i. 92. 36; जलदै: सुमहाद्भुतै: । सृजद्भिरतुलं तोयमजस्रम् MahāBhā. i. 22. 3; भिन्नानामतुलो नाश: क्षिप्रमेव प्रवर्तते MahāBhā. 25. 14; कृत्वा स्वकार्यमतुलम् MahāBhā. i. 53. 16; अनया सह संप्रीतिमतुलां समवाप्स्यसि MahāBhā. i. 76. 33; तत: सुरा: … उत्पेतुर्नादमतुलमुत्सृजन्त: MahāBhā. i. 218. 23; ii. 20. 14; शोकावेग इवातुल: MahāBhā. iii. 12. 14; iii. 23. 30; उपायो विहितश्चायं त्वदर्थमतुलोऽनया MahāBhā. iii. 75. 13; वेदनामतुलां प्राप्य । प्रजायन्ते सुतान्नार्य: MahāBhā. iii. 196. 10; महाभ्रजालमतुलं मातरिश्वेव संततम् MahāBhā. vi. 98. 32; अथ राष्ट्रमुपायेन भुज्यमानं सुरक्षितम् । जनयत्यतुलां नित्यं कोशवृद्धिम् MahāBhā. xii. 72. 18; प्रत्युवाच कंसारिरतुलं वच: HariVaṁ. 86. 26; विद्याद्वयमधीयाने यशश्चाप्यतुलं भुवि Rāmā. i. 21. 15; i. 23. 9; i. 62. 20; ii. 2. 23; अकीर्तिरतुला लोके ध्रुव: परिभवश्च मे Rāmā. ii. 11. 6; ii. 21. 5; तवापमानप्रभव: क्रोधोऽयमतुलो मम Rāmā. iii. 21. 2; लङ्कायामतुलां गुप्तिं कारयामास Rāmā. vi.

27. 16; स्त्रियः पवित्रमतुलं नैता दुष्यन्ति कर्हिचित् BaudhDS. ii. 2. 57; AtriSm. 5. 4; MahāBhā. i. 673*(1); PāṇiS'i. 60; ततो ययुर्मुदमतुलां दिवौकसः BuddhaC. 12. 121; धर्ममतुलमधिगम्य मुनेः Saund. 3. 27; 3. 8; 8. 62; Abhiṣe. 3. 21; विजयि भुजयोर्वीर्यमतुलम् S'atTrayī. 72; सा गङ्गा ह्यतुलामलोर्मिपटला VijñāS'. 69; PauṣkS. 25. 36; JayāS. 6. 164; PāraS. 5. 95; स्वर्गाक्षयत्वमतुलं दाम्पत्यमतिदुर्लभम् । प्राप्तम् ViṣṇuP. iii. 18. 95; बालक्रीडेयमतुला गोपालत्वं जुगुप्सितम् ViṣṇuP. v. 13. 3; BrahmP. 189. 3; प्रश्नभारोऽयमतुलस्त्वयास्मासु निवेशितः MārkP. 10. 7; 45. 15; LakṣmīT. 18. 10; स्वर्गेऽपि दुःखमतुलम् MārkP. 11. 26; प्राप्य योगर्द्धिमतुलां परं निर्वाणमाप्तवान् MārkP. 44. 29; 26. 37; 81. 53; अतुलमिह महातमःप्रणाशं शिवकथितं परमं विधिं विदित्वा BrahmāṇḍP. i. 27. 95; ii. 27. 12; कुर्वन्ति भास्करशनैश्चरराहुभौमा दारिद्र्यदुःखमतुलं नियतं द्वितीये BṛSaṁ. 103. 2; Kirātā. 12. 39; अब्दुर्गमतुलं लब्ध्वा तथापि चकितोऽभवत् Tantrākhyā. 61. 10; राज्ञारोपितराज्यभारमतुलं यश्चावहल्लीलया EI. iii. 354. 61; तेनास्मै ददतः स्वसारमतुलां तुष्टिर्विषादश्च मे Nāgā. 2. 10; बृहत्तुलैरप्यतुलैः ... रेजे विचित्रैरपि या सचित्रैर्गृहैः S'iśuVa. 3. 50; बहुसैन्यं दुरालोकमसिरत्नगदाधरम् । अतुलं संशयतुलां ततो नारोढुमर्हसि PadmP.(Ra.) 9. 76; SūryaS'. 26; 63; EI. xi. 285. 31; xi. 526. 32; ViveCū. 577; तुला उपमानमस्य न विद्यते इति अतुलः ViṣṇuSaBh. 72. 15 (*on* 52); विज्ञानं तच्च बुद्धौ समुदितमतुलम् S'atS'lo. 97; SaundL. 95; कनककमकृतप्रसवः पुनः समधिरुह्य तुलामतुलामपि । अकिरतार्थमपाकृतकल्मषो द्विजदरिद्रसुरायतनेषु यः EI. xvii. 299. 23; RāghPāṇ.(Dha.) 15. 12; 17. 9; सुतलैरप्यतुलैर्दैवकुलैः संकुलम् ... कुण्डिनं नाम नगरम् NalaCam. 2. 27 (20); TilaMañ. 226. 24; SubhāRaSaṁ. 335; PañcaRā.(Nā.) i. 1. 3; अतुलम् ... चकार ... प्रशान्ताश्रमम् EI. xxi. 149. 9; x. 23. 19; xii. 60. 10; BhāgP. ix. 4. 15; BrahmVaiP. i. 20. 64; SkandP. i(1). 9. 65; v(3). 4. 51; VāmaP. 2. 30; 85. 34; प्रोक्ता चातिशयोक्तिस्तु ह्यतुलैरुपमागुणैः ViṣṇuDhaP. iii. 14. 10; जय इव विक्रमनीत्योः कृतदक्षिणयोरिवातुलस्वर्गः । तनयस्तयोश्च जज्ञे EI. xv. 61. 63; तेन त्वं भवता च कीर्तिरतुला कीर्त्या च लोकत्रयम् KāvyPra. 350. 4; AlaṅkāSa. 142. 6; AlaṅkāS'e. 13. 61; Kuval. 107 (7); PadyāTa. 101; PadyaVe. 152; EI. xi. 150. 25; xiv. 299. 18; MāliniT. 13. 52; अलक्ष्मीरतुला चेयं ज्येष्ठा इत्यभिशब्दिता LiṅgaP. ii. 6. 17; BhaviP. 551A. 9 (iii(4). 6. 55); PadmP. ii. 28. 46; iv. 72. 30; जाज्वल्यमानं तिलकं रोचनाया इवातुलम् BṛDharmaP. i. 20. 29; YogVā. ii. 15. 4; AdhyāRā. v. 5. 64; अतुलं तेषां द्विजानां सभां तत्र द्रष्टुमुपासितुं च लभते कः स्वल्पपुण्यो जनः EI. xv. 354. 57; (मनुः) लोकानामेकबन्धुः प्रविदधदतुलं शर्म धर्मप्रपञ्चैः (श्लोः) EI. xviii. 34. 63; EI. i. 145. 27; RājTa.(Ka.) 2. 78; NaiṣC. 3. 26; दिवा चेन्मेषसंक्रान्तिरनर्थकलहप्रदा । रात्रौ सुभिक्षमतुलम् NāraS. 11(0). 5; 24(0). 32; VasiS. 2. 8; 3. 10; PāṇḍaC. 1. 127; 15. 129; सुधातुलसितद्युतिः । सुधावदतुला सिता शुभ्रा Kāvy-KaVṛ. 70. 7 (3. 3); VasaViKā. 11. 71; PrabhāC. 132. 16; RasRaSa. 2. 108; S'aṅkaDigVi.(Mā.) 4. 20; 9. 87; जलवत्सुधातत्त्वाभ्यामुदिताभ्यां सौम्यकार्यमतुलं स्यात् S'ārṅgaPa. 2808; अतुलं शुद्धं प्रमाणं स मे भूयात् NyāySu.(Ja.) 1A. 5 (*on* i. 1. 1); KumāCaSaṁ. 52. 30; EI. ii. 413. 13; ii. 417. 37; RājTa.(S'rī.) i. 3. 1; i. 3. 98; चातक तात कियद्भवता पातकमतुलमकारि Subhāṣi. 684; 2401; पूरयेदतुलां दिव्यां सुषुम्णां पश्चिमे मुखे HaṭPra. 4. 46 (comm. अतुलां निर्मलां निरुपमाम्); तस्यासीत्तनयस्तपोभिरतुलैरन्वर्थनामा बुधः EI. i. 363. 6; प्राचीनानां भजनमतुलं दुष्करं शृण्वतो मे ... ज्वलति हृदयम् StavMā. 51. 5; Nāray. x. 88. 12; तन्वी ... अतुलां साम्राज्यलक्ष्मीमधरीचकार BhāmiVi. 2. 31; वारं वारमहो नु वर्ण्यमतुलं किं तद्यशो निर्मलम् ParamāKā. 3. 17; Raghunā. 4. 23; प्रायः प्राप्तो भवनमतुलां पुष्टितामानयन्ति PavaDū.(Vā.) 4; 11; PadyaVe. 464; परस्य पदरत्नानि किंचार्थमतुलं हरन् । ज्ञास्यत्यन्य इति त्रस्तो दुष्कविस्तस्करायते Damaru. 51; MadaKeC. 77; MahāN. 9. 137; देवः स वः शिवशतानि तनोतु शौरिर्यः शैशवेऽपि तुलयन्नतुलं नगेन्द्रम् ...गोपीजनैः सरभसं परिरभ्यते स्म Pārtha-Pa. 1; *m.* **1i** name of S'arva (नाम्नां शर्वस्य मे शृणु) बलवीरो बलो गणः (v. l. बलवीर्योऽतुलो गुणः) MahāBhā. xiii. 17. 40; **1 ii** name of Viṣṇu अतुलः शरभो भीमः ViṣṇuSaNā. 72. 52; **1iii** name of a Nāyaka अतुलो दुष्टहाऽचिष्मान् PāraS. 11. 181; **1iv** name of Vṛṣabhadeva अतुलोऽचिन्त्यवैभवः MahāP. 25. 140; **1v** name of a poet (किं नोज्ज्वलः किमु कलाः सकला न धत्ते ... सत्यं सतामहृदयेषु गुणास्तृणानि) अतुलस्य SubhāRaK. 40. 32; **2** sesamum plant तिलवृक्षः । इति शब्दचन्द्रिका [S'abdaKaDru.]

²अतुल (a-tula) *adj.* having no beams बृहत्तुलैरप्यतुलैः ... रेजे विचित्रैरपि या सचित्रैर्गृहैः S'iśuVa. 3. 50 (comm. तुला उपरिस्थाप्यदार्वाधारभूतानि स्तम्भाग्रपीठानि); NalaCam. 2. 27 (20)

³अतुल (atula) *num.* [*m.* PW] three hundred and sixty मातुलपातालातुलविमलवराङ्गानि वत्सराः क्रमशः ... एवमतुलशब्दः षष्ट्यधिकशतत्रयसंख्यामाह । तावत्सूर्योदयपरिमितस्सावनः संवत्सरः VīraMi.(Samaya.) 10. 3; 10. 10; मातुलातुलविमलसंख्याकाः हि सौरसावनपार्वणसंवत्सराणां दिवसाः BhaṭṭCan. 75. 4 (*on* xv. 1. 18)

अतुलकर्कश (atula-karkaśa) *adj.* **1** extremely rugged क्षोणीभृतामतुलकर्कशविग्रहाणाम् ...। पक्षच्छिदामयमुदग्रबलो विधाय मग्नं विपज्जलनिधौ जगदुज्जहार NaiṣC. 13. 5 (comm. अतुला अत्युच्चाः कर्कशाश्च); **2** killing a peerless white charger, NaiṣC. 13. 5 (comm. अतुलानत्युच्चान् सलक्षणांश्च कर्काञ् श्वेताश्वान् द्यन्ति मारयन्ति)

अतुलकर्मन् (atula-karman) *adj.* of unparalleled deeds शुश्रुवुर्मधुरां गिरम् ।... विष्णोरतुलकर्मणः SkandP. v(1). 30. 34.

अतुलकान्ति (atula-kānti) *adj.* of peerless lustre अवयवेषु परस्परबिम्बितेष्वतुलकान्तिषु राजति यत्तनोः । अयमयं प्रविभाग इति स्फुटं जगति निश्चिनुते चतुरोऽपि कः S'ārṅgaPa. 3367; *f.* peerless beauty मत्प्रेयसीमतुलकान्तिभरामिदानीमाभ्यामियं समवलोक्य समागतेति । मल्लोचने सुतनु चुम्बितवान् प्रियस्ते S'ṛṅgāMañ.(A.) 27. 13.

अतुलखेचरत्व (atulakhecara-tva) *n.* unequalled capacity to move in the air or sky ततस्त्वतुलखेचरत्वमजरामरत्वं भवेत् KalyāKā. 24. 4.

अतुलख्याति (atula-khyāti) *f.* unequalled fame औदार्ये समवेक्ष्य रूपमतुलख्यातिं प्रतापोदयं कन्यां दास्यति सज्जनोऽद्य भवते GopāKeCan. 112. 21.

अतुलगति (atula-gati) *adj.* (argument) having an uneven course स्थाने स्थाने परेषां मतमतुलगति क्षिण्वता तार्किकाणाम् ।... निर्णीताः ... मया षोडशैते पदार्थाः NyāyMañ. ii. 208. 19.

अतुलगद (atula-gada) *m.* unequalled (i. e. severe) illness or disease तस्माद् वक्ष्यामि चादौ ज्वरमतुलगदं वाजिनां कुञ्जराणां मानुष्याणां पशूनाम् ... प्राणापहारी ज्वरः HāriS. iii. 2. 26.

अतुलगन्ध (atula-gandha) *m.* matchless (i. e. very sweet) fragrance आकारयन्ति पथिकान् नलिनीनिबद्धचित्तानलीनतुलगन्धबहुप्रचारैः BṛBrahmaS. iii. 5. 14.

अतुलगुण (atula-guṇa) *adj.* **A** possessing matchless qualities or virtues पारावारो गुणानामयमतुलगुणः पातु वो मैथिलेशः PārijāHa. 3; प्रयत्नादयमतुलगुणः (खड्गः) पूजनीयो नरेन्द्रैः S'ārṅgaPa. 4649; श्रीमान् नित्यमहोज्ज्वलोऽतुलगुणः सत्तन्त्रसंपत्तिभृद्राज्ञा तेन विशेषितो निजधिया वेशोऽपि देशोऽपि वा RājTa(S'rī.) 1(6). 32; **B** (cloth or dress) made of matchless yarn, RājTa.(S'rī.) 1(6). 32.

अतुलगुणगण (atulaguṇa-gaṇa) *m.* multitude of matchless qualities or virtues त्वं चात्माराम एवेत्यतुलगुणगणाधार शौरे नमस्ते Nārāy. i. 1. 9.

अतुलचारी (atula-cārī) *f.* matchless step (in dance) तटभुवि नटराजक्रीडया भानुपुत्र्या विदधदतुलचारीर्भाति कुञ्जेविहारी StavMā. 33. 2.

अतुलता (atula-tā) *f.* the state of being incomparable or matchless गच्छत्यतुलताम् । गिरां मार्गे पादौ गिरिवरसुते लङ्घयति ते MūkaPañ. 3. 45.

अतुलतेजस् (atula-tejas) *adj.* possessed of incomparable splendour (भारद्वाजकिरीटिनौ) उभौ दिव्यास्त्रविदुषावुभावुत्तम(v. l. अतुल°)तेजसौ MahāBhā. iv. 53. 21; त्रीन्विक्रमान्प्रक्रमतो विष्णोरमित(v. l. अतुल°) तेजसः । ... तत्ते भवतु मङ्गलम् Rāmā. ii. 581 (3); शिवाय ... नित्यायातुलतेजसे ... नमः KūrmaP. 287. 15 (1. 26); वैकुण्ठभुवने रम्ये विष्णोरतुलतेजसः SkandP. v(1). 52. 14; (देवी तापसी) त्यक्तवाङ्गानि च सर्वाणि विष्णोरतुलतेजसः । निर्गता DevībhāP. i. 7. 49; कलाः सर्वे भगवतो विष्णोरतुलतेजसः BṛBrahmaS. iv. 9. 61; अङ्गात्षण्मुखस्योद्बभूवतुः । पुत्रौ शाखविशाखाख्यावुभावतुलतेजसौ Kathā-SaSāg. iii. 6. 92; ix. 3. 84; कामदेवादभवदतुलतेजा नाम हेमाद्रिसूरिः Catur-Cin. II. i. 2. 5.

अतुलत्व (atula-tva) *n.* **i** matchlessness, the incomparable state राशीनशेषाञ्जहता सहेलं क्रमादुदारेण विधो युवानः । त्वयातुलत्वं गमितेऽनुरागे नान्योन्यमानग्रहमुत्सहन्ते S'rīKaC. 11. 72; **ii** immeasurableness, S'rīKaC. 11. 72 (comm. तुलोन्मेयत्वाभावोऽपि)

अतुलदिव्यप्रभावा (atuladivya-prabhāvā) *adj.* (*f.*) having incomparable and divine power काशीपुरीमतुलदिव्यप्रभावाम् । ये कल्पयन्त्यपरतीर्थसमां समंतात् ते पापिनः SkandP. iv(1). 30. 86.

अतुलदुःस्थ (atula-dussthа) *adj.* difficult (to be compared) because of the absence of a weighing instrument तुल्यस्यातुलदुःस्थस्य भावकैः किल तोलनम् ।... जगत्सत्ता तथैव हि YogVā. iii. 11. 7.

अतुलद्युति (atula-dyuti) *adj.* having incomparable brightnesss or splendour महासने मुनिवरो निषसादातुलद्युतिः MatsyaP. 154. 122; नवोद्याने ...। वत्सेश्वरः समभ्यायात्तं देशमतुलद्युतिम् BṛKathāMañ. 7. 347; स प्राप प्रतोलीमतुलद्युतिः (पाण्डुः) PāṇḍaC. 4. 50.

अतुलधरणिपाल (atula-dharaṇipāla) *m.* incomparable king मालि-

न्यामेव यथा – अतुलधरणिपालश्रेणिवेणिप्रसूनप्रसमरमकरन्दस्नातपादारविन्दः Kāvy-KaVr. 10.29 (1.2)

अतुलधर्मन् (atula-dharman) *adj.* of incomparable quality जगत्सु तुल्यधर्मैभिर्मिथुनैर्मिथस्तन्वतोर्मिथो विजयितां भजे व्रजनवीनयूनोर्युगम् StavMā. 83.19.

अतुलधामभू (atuladhāma-bhū) *adj.* (*f.*) abode of incomparable splendour अतुलधामभूः…परशुराममिश्रोऽजनि VīraMi.(Saṁskāra.) 123.17.

अतुलधी (atula-dhī) *adj.* having incomparable intelligence प्रददौ स कन्याम् । सीरायुधाय … अतुलधीर्नरेन्द्रः ViṣṇuP. iv. 1.94; जन्मार्णवं कथमयं तरतीति योऽत्र संभावयत्यतुलधीः VarāṅgaC. 1.12; अतुलधियां वीक्ष्य तादृक्प्रबन्धान् वक्ति … संग्रहं धर्मशास्त्रे VīraMi.(Paribhāṣā.) 7.13.

अतुलनिर्घोष (atula-nirghoṣa) *adj.* having an incomparable rumbling sound (भीमस्य) तस्याप्यतुलनिर्घोषः … महारथः MahāBhā. vii. 151.14.

अतुलपराक्रम (atula-parākrama) *m.* incomparable valour अतुलपराक्रमचमत्कारिताखिलभारतस्य … पर्षदा प्रहितं पत्रकम् PārthPa. 3(4)

अतुलपरिताप (atula-paritāpa) *m.* incomparable sorrow अवश्यं यातारश्चिरतरमुषित्वापि विषयाः … व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः Śat-Trayī. 157 = Subhāṣi. 3386.

अतुलप्रताप (atula-pratāpa) *adj.* possessed of unparalleled valour (पुरीम्) तामीक्षमाणः स पुरं पुरस्तात्प्रापत्प्रतोलीमतुलप्रतापः (हरिः) ŚiśuVa. 3.64; *m.* incomparable valour देव त्वय्यतुलप्रतापमहसि प्राप्ते प्रतिक्ष्मापतिव्याकोशासिलतासितोत्पलवनीमानद्विरेफप्रथाम् AlaṅkāRa. 38 (53)

अतुलप्रतापतस् (atulapratāpa-tas) *adv.* due to incomparable prowess (तस्य) नलता च तथाश्वशिक्षयानलता वाप्यतुलप्रतापतः VīraBhā. 8.24.

अतुलप्रतिज्ञा (atula-pratijñā) *f.* incomparable (i.e. very difficult) vow हन्तैष पन्नगपतेरतुलप्रतिज्ञाप्राग्भारसागरसमुत्तरणैकपोतः NavaSāC. 18.12.

अतुलप्रभ (atula-prabha) *adj.* [*f.* -ā] having incomparable splendour तानि सर्वाणि संनह्य …। आयुधानि कपालांश्च निस्त्रिंशांश्चातुलप्रभान् MahāBhā. iv. 158*(2); राजा दशरथः … पुरीमावासयामास … श्रीमतीमतुलप्रभाम् Rāmā. i. 5.11; ततो वै यजमानस्य पावकादतुलप्रभम् । प्रादुर्भूतं महद्भूतम् Rāmā. i. 15.9; iii. 70.10; अध्यास्ते वानरः श्रीमान्किष्किन्धामतुलप्रभाम् Rāmā. iv. 11.21; देवावतारसमये विमानमतुलप्रभम् ।… अग्निमध्यात्समुत्थितम् JayāS. 1.124; *m.* name of a Kalpa [DBHS]

अतुलप्रभा (atula-prabhā) *f.* name of Pārvatī शैला शार्कमयैतुलप्रभा KalpaK. 395.137.

अतुलप्रभाव (atula-prabhāva) *adj.* having unparalleled prowess प्रसादये त्वामतुलप्रभावम् MahāBhā. vi. 4.12; द्यावापृथिव्योरतुलप्रभावं यदन्तरं तद् वपुषा तवैव । व्याप्तम् ViṣṇuP. i. 4.37; नृसिंहः । दृष्टः स दैत्यैरतुलप्रभावः ŚivaP. ii(5). 43.29 (271.2)

अतुलप्रवाह (atula-pravāha) *m.* incomparable current सैकतं लिङ्गमतुलप्रवाहाल्लयमेष्यति SkandP. i(3). 4.27.

अतुलप्राण (atula-prāṇa) *adj.* whose life is incomparable पातकी ननु कोऽस्ति भोः । निद्राणमतुलप्राणं योऽवधीन्मम बान्धवम् PāṇḍaC. 18.32.

अतुलफलयुज् (atulaphala-yuj) *adj.* granting unparalleled fruit प्रेक्ष्य प्राप्तेप्सितार्थैर्भुवि बलवदवाक्फपवृक्षाः किमेवं विद्वद्भिः शङ्क्यतेऽङ्घ्रीनतुलफलयुजो यस्य सोऽर्हन् मुदेऽस्तु JinaS. 1.8.

अतुलबल (atula-bala) *adj.* i possessed of matchless strength or power यदयमतुलबलस्त्वयाद्य (इन्द्रजिता) त्रिदशपतिस्त्रिदशाश्च निर्जिताः Rāmā. vii. 29.38; पुत्रशतान्यतुलबलपराक्रमसाराण्यासन् ViṣṇuP. iv. 9.1; अतुलबलेन … सम्राजेव वपुषा जिताशेषभुवनम् … उर्वीपतिकुमारमद्राक्षम् TilaMañ. 276.16; अतुलबलैर्हैयैश्च नागैः LiṅgaP. i. 97.33; (कपीश्वरः) संदिदेशातुलबलं नीलं सेनासु नायकम् RāmāMañ. 191.10; अतुलबलहनूमत्कल्पितस्यन्दनश्रीः … असौ (अर्जुनः लक्ष्मणो वा) वैरिकक्षं विगाह्य ।… एनम् (कर्णं इन्द्रजितं वा) प्रसभमकृत बाह्वोर्विक्रमाणां निकर्षम् RāghPāṇ.(Ka.) 12.17; PrabaK. 52.5; स चातुलबलपराक्रमः … लाखाकं नृपं जितवान् KumāPraPra. 37.12; हत्वा सुग्रीवघातोद्यतमतुलबलं वालिनं व्याजवृत्त्या Nārāy. ix. 35.1; कथा यत्रोदग्रस्यतुलबलधैर्यस्य भवतः (रामस्य) RasGaṅ. 430.9; ii having a very powerful (*lit.* unequalled) army अतुलबलेन … सम्राजेव TilaMañ. 276.16; रोहिण्यामतुलबलं निहन्ति केतुश्च शूरसेनेशम् VasiS. 10.42; 6.55; *n.* i unrivalled strength, power (श्लोकान् पठेद्यः) मतिमतुलबलं कान्तिमायुःप्रकर्षम् …लभते SūryaS. 101; ii unequalled or very powerful army अर्णोराजः सादाशिवमनिशमनुध्याय रूपं प्रसन्नादसादत्रैव जन्मन्यतुलबलमिव प्राप्य पञ्चाननत्वम् PṛthvīVi. 5.193.

अतुलबलता (atulabala-tā) *f.* unequalled power अहो … अतुलबलता कुसुमधन्वनः Abhiṣe. 5.5 (2)

अतुलबलसीमन् (atula-balasīman) *adj.* limit of whose strength is unparalleled अतुलबलसीमा येन भीमादपीह:(ह) VīraBhā. 11.2.

अतुलबलौघ (atulabalaugha) *adj.* possessing a flow of matchless strength वेदाङ्गेष्वतुलबलौघ गीयसे MahāBhā. i. 21.17.

अतुलभक्ति (atula-bhakti) *adj.* having unequalled or matchless devotion पुरुषसिंहः … हिरण्यरेतसमतुलभक्तिः प्रदक्षिणीकृत्य … सौम्यां दिशमभिप्रातिष्ठत AvantiKa. 222.5; *f.* unparallelled or matchless devotion अतुलभक्तिप्रसाधितया लक्ष्मीकृतलिङ्गया द्वितीययेव पुण्डरीकमालया दृष्टया संभावयन्तीं भूतनाथम् … कन्यकां ददर्श Kād. 130.5.

अतुलभुजबल (atula-bhujabala) *adj.* possessed of matchless strength of arms बृहद्रथः … अतुलभुजबलम् … तनयं लेभे Kād. 62.8; पाण्डुपुत्रैः कृतानि प्रत्याशं मुक्तकेशान्यतुलभुजबलैः पार्थिवान्तःपुराणि VeṇīSaṁ. 6.628; *n.* unequalled power of arms तदा अतुलभुजबलप्रथितोपक्रमे दृष्टे तन्मित्रेऽस्मिन्नन्तरायकारिणि कार्यसिद्धिर्नो नातिनिरपाया MahāvīC. App. A. 5.58 (282.1)

अतुलभोगद (atulabhoga-da) *adj.* granting incomparable enjoyments उन्नतो मांसलोऽङ्गुष्ठो वर्तुलोऽतुलभोगदः SkandP. iv. 37.14.

अतुलम् (a-tulam) *adv.* in an unequalled manner, in a matchless way सायं प्राप्तो वनान्तादतिकठिनलताजालनिर्यापणेन खिन्नो भोक्तुं निविष्टो युवतिभिरतुलं याचितो दोहनाय GopāKeCan. 119.2; आचन्द्रतारमतुलं रघुनाथभूपे विश्वम्भरामवति विश्वजनीनकीर्तौ । आसन् प्रजाः … °भासमानाः Raghunā. 12.88.

अतुलमङ्गलावसर (atulamaṅgalāvasara) *m.* extremely auspicious occasion इहातुलमङ्गलावसरे तद्वक्तुं न युक्तम् PrabaCin. 100.12.

अतुलमति (atulamati) *adj.* possessed of unequalled intellect इति व्यासो ब्रूते … गलितभवबन्धोऽतुलमतिः VijñāS. 74.

अतुलमहस् (atūla-mahas) *adj.* extremely glorious, possessed of unequalled lustre अतुलमहसि वृन्दारण्यराज्येऽभिषिक्ताम् … राधिकामर्चयामि StavMā. 71.12.

अतुलमहानन्द (atula-mahānanda) *m.* extremely great joy, superb bliss (अभिचिन्तयेत्…अच्युतम्) मज्जन्तम् … अतुलमहानन्दसंदोहसिन्धौ PañcaRā.(Nā.) v. 3.21.

अतुलमहिमन् (atula-mahiman) *m.* unequalled greatness नृत्यत्यन्योऽप्यतुलमहिमश्लाघ्यभूमिः Subhāṣi. 845.

अतुलमान (atula-māna) *m.* unequalled haughtiness, excessive pride करैः … हृदयमुकुरं भङ्गुरदृशाम् । समुत्सृज्याशेषं मलमतुलमानग्रहमयं मृगाङ्कस्तत्कालप्रतिफलितकन्दर्पमकरोत् ŚrīKaC. 10.58.

अतुलमायाबल (atula-māyābala) *n.* extraordinary power of magic अभिव्यञ्जन् व्योमस्थलमतुलमायाबलमदः पुरा मारीचोऽयं युधि भयमनैषीद् दिविषदः JainaPa. 1.37.

अतुलमाहात्म्य (atula-māhātmya) *n.* unequalled glory or greatness सदाचारविधिर्देव भवता वर्णितः प्रभो तस्याप्यतुलमाहात्म्यम् DevīBhāP. xii. 1.1.

अतुलमोक्षभाज् (atulamokṣa-bhāj) *adj.* possessing incomparable liberation अर्हन्त एवातुलमोक्षभाजः (v. l. °भाजः) VarāṅgaC. 25.90.

अतुलमोक्षभास् (atulamokṣa-bhās) *adj.* shining with incomparable liberation अर्हन्त एवातुलमोक्षभासः VarāṅgaC. 25.90.

अतुलरम (atula-rama) *adj.* possessed of unequalled wealth वच्मि ममातुलरम ते रुजम् YudhiVi. 3.62 (comm. अतुला तुलारहिता रमा लक्ष्मीर्यस्य)

अतुलरसास्वाद (atularasāsvāda) *m.* flavour of excellent juice जातं त्वत्सङ्गवल्ल्यां फलमतुलरसास्वादहृद्यम् ŚārṅgaPa. 1234 = Subhāṣi. 2588.

अतुलराग (atula-rāga) *m.* i unparalled affection or attachment हरिकरसङ्गादधिकं रमणीयाप्यतुलरागसंवलिता । सुन्दरि तवाननाग्रे कमलाभा विगलितप्रतिभा RasGaṅ. 525.7; ii extremely red colour, RasGaṅ. 525.7.

अतुलरुचि (atula-ruci) *adj.* possessed of peerless splendour एकराशीभवदतुलरुचौ काकतीन्द्रस्य कीर्तौ । एतैः … °क्षीराम्भोराशिमुख्यैः प्रकटितमधुना तद्धनीभावरूपम् PrātaYaBhū. 422.5.

अतुलरूपा (atula-rūpā) *adj.* (*f.*) having an unequalled form तुलस्यतुलरूपासि TulU. 70.18.

अतुलरूपाङ्ग (atula-rūpāṅga) *adj.* having branches (*lit.* limbs) of incomparable beauty तान् (कनकशाखिनः) दृष्ट्वा मनोरथफलाङ्कुरान् । अन्यानतुलरूपाङ्गानुपचक्राम खेचरः MahāBhā. i. 25.29.

अतुलवर्चस् (atula-varcas) *adj.* possessed of matchless lustre भविष्यतो महावीर्यौ शिष्यौ तेऽतुलवर्चसौ BrahmāṇḍP. i. 35.35.

अतुलवाजिमेध (atula-vājimedha) *m.* matchless horse-sacrifice रघुपतिः – अयजदादिदेवान् । मखैः … अतुलवाजिमेधैस्त्रिभिः KalkiP. iii. 3.53.

अतुलवारि (atula-vāri) *n.* incomparable water (जम्बूद्वीप इति ख्यातां विपुलां तत्र कर्णिकाम्) नभसेव चतुर्दिक्कं व्याप्तामतुलवारिणा YogVā. iii. 25. 30.

अतुलविक्रम (atula-vikrama) *adj.* **i** of incomparable stride एतत्ते सर्वमाख्यातममृतं मथितं यथा । यत्र सोऽश्वः समुत्पन्नः श्रीमानतुलविक्रमः MahāBhā. i. 18. 1; **ii** possessed of matchless valour or strength (परिक्षित्) ररक्ष पृथिवीं देवीं श्रीमानतुलविक्रमः MahāBhā. i. 45. 8; ii. 16. 13; iv. 53. 21; (लङ्काम्) दद्यादतुलविक्रम (कुबेर) Rāmā. vii. 11. 24; vii. 83. 15; vii. 91. 11; कन्यापुरे स (श्रीकृष्णः) कन्यानां षोडशातुलविक्रमः । शताधिकानि ददृशे सहस्राणि VisnuP. v. 29. 31 = BrahmP. 202. 31; निहते शुम्भे देवरिपौ युधि । … अतुलविक्रमे MarkP. 91. 31; (सुदर्शन) नमो जयायातुलविक्रमाय AhirbuS. 44. 44; ज्येष्ठशुक्लचतुर्दश्यां सावित्रीं यो हि पूजयेत् । पुनर्मही समागत्य श्रीमानतुलविक्रमः (भवेत्) BrahmVaiP. ii. 2. 101; SkandP. i(2). 18. 9; VāmaP. 91. 31; VarāP. 25. 43; LiṅgaP. i. 69. 82; (सुग्रीवः) भीतभीतः सदा यत्र तिष्ठत्यतुलविक्रमः AdhyāRā. iii. 10. 37; vi. 1. 36; vi. 11. 6; हरेरतुलविक्रमप्रणयलालसस्याहवे … भवति … सखा … करः MālaMā. 8. 97; संग्रामैः खण्डशः कुर्वन् स तानतुलविक्रमः RājTa.(Ka.) 8. 653; 8. 712; नृपोऽपि तं गृहीत्वा तु प्रायादतुलविक्रमः BṛKathāMañ. 9(2). 1161; काश्मीराधिपतिर्वीरोऽमान्यतुलविक्रमः … पतितः पृथिवीतले Citra-PaC. 205; *m.* name of a king तस्मात् (क्रोधदानात्) अतुलविक्रमः BhaviP. 416A. 18 (iii(1). 2. 36)

अतुलविस्मय (atula-vismaya) *m.* unparalleled astonishment, great wonder श्रुत्वैतदतुलविस्मयलोलितमौलिः स तद्गृहं गत्वा । द्वारे स्वगितस्तिष्ठति Kalā-Vi. 2. 25.

अतुलविहृति (atula-vihṛti) *f.* matchless sport अतुलविहृतिभिः प्रीणयन्नेणनेत्राः । … त्वं (कृष्ण) व्यलासीः Nāray. x. 88. 10.

अतुलवीर्य (atula-vīrya) *adj* **i** possessed of incomparable might एवं सा धर्मराजस्य वध्यमाना महाचमूः । भीष्मेणातुलवीर्येण व्यशीर्यत सहस्रधा MahāBhā. vi. 55. 32; क एषोऽतुलवीर्यो हि यस्य दूराद् द्रवन्ति च । विघ्नाः PauṣkS. 20. 53; आज्ञापयस्वातुलवीर्य शंभो VāmaP. 6. 47; **ii** marked by matchless valour प्रयच्छन्ति शुभानि च । कर्माण्यतुलवीर्याणि अन्ते तु परमं पदम् JayāS. 27. 218.

अतुलवेगा (atula-vegā) *adj.* (*f.*) having incomparable speed शतधनुरप्यतुलवेगाम् … वडवामारुह्यापक्रान्तः VisnuP. iv. 13. 91.

अतुलवैभव (atula-vaibhava) *adj.* having unequalled glory अहो दानं महादानं सुदानमिदमस्य हि । प्रभावात्तरक्षणं दाता भवत्यतुलवैभवः TrisaS'a-PuC. ii. 3. 295.

अतुलव्यतिवर्तमानवेग (atula-vyativartamānavega) *adj.* with matchless velocity of revolving अतुलव्यतिवर्तमानवेगम् । भ्रमयसि …°कालचक्रम् AmṛUda. 4. 35.

अतुलव्यय (atula-vyaya) *adj.* spending on an unparalleled scale पार्थिवः संग्रहीतुं प्रववृते पदातीनतुलव्ययः RājTa.(Ka.) 8. 726.

अतुलशक्ति (atula-śakti) *f.* **i** incomparable weapon called *śakti* जयातुलशक्तिदीधितिपिञ्जर भुजदण्डचण्डरणरभस…कुमार जय MatsyaP. 159. 40; **ii** unequalled power रागादियोग एव सर्वज्ञता अविनाशितातुलशक्तियोगश्चेति स एव प्रमाणम् PramāVāBh. 34. 18–19.

अतुलश्वासोष्मन् (atula-śvāsoṣman) *m.* matchless (excessive) warmth of the breath सापश्यद्धरिम् । चित्तोत्तम्भितनेत्रयुग्ममतुलश्वासोष्मणा भूयसा GopāKeCan. 132. 6.

अतुलशौण्डि (atula-śauṇḍi) *adj.* incomparably skilful बलं च कृत्स्नं मथितं बालेनातुलशौण्डिना PadmP. iv. 60. 65.

अतुलसन्नाद (atula-sannāda) *adj.* having unequalled good (big) sound अतुलसन्नादाय … वरविशिखानमुञ्चदस्मै (अर्जुनः) YudhiVi. 4. 56 (*but* comm. अनुलसन्नादाय अनुलसन् नादो शब्दो यस्य स तस्मै)

अतुलसांनिध्यद (atulasānnidhya-da) *adj.* giving incomparable (closest) proximity or presence विधानं तद् ब्रूमो वयमतुलसान्निध्यदमथ Pañca-Rā.(Nā.) iii. 6. 1.

अतुलसुखरति (atulasukha-rati) *adj.* taking delight in matchless (highest) bliss मार्कण्डेयः … पुष्पभद्रातीरे निन्ये तपस्यन्नतुलसुखरतिः षट् तु मन्वन्तराणि Nāray. xii. 97. 5.

अतुलसुन्दर (atula-sundara) *adj.* incomparably handsome, of peerless beauty [nt.]

अतुलस्नेहविक्लव (atulasneha-viklava) *adj.* distressed on account of matchless affection मातुलानतुलस्नेहविक्लवान् विस्मृतक्षमाः । …नमस्यन्ति स पाण्डवाः PāndaC. 11. 13.

अतुलस्पर्श (atula-sparśa) *adj.* which has an incomparable (extremely delightful) touch अतुलस्पर्शं तदर्धासनम् । वेश्याभ्यः प्रणयादृतेऽपि लभते ज्ञातोपचारो जनः DhūrtaViSam. 3. 16; अतुलस्पर्शम् … सुरताख्यं सुखान्तरमनुभूय Kād. 301. 5.

अतुलहासकला (atula-hāsakalā) *f.* matchless (very beautiful) art of smiling यत्र … योषितामतुलहासकला भवन्ति BṛBrahmaS. iii. 5. 9.

अतुला (atulā) *f.* name of Gaṅgā (नाम्नां सहस्रं गङ्गायाः) अजरातुलानन्तामृतस्रवा SkandP. iv. 29. 17; epithet of Gaurī [pw]

अतुलाग्निभीति (atulāgni-bhīti) *f.* fear from incomparable (terrible) fire अजाग्निवीभ्योरतुलाग्निभीतिः VasiS. 7. 8.

अतुलात्यन्तसुख (atulātyanta-sukha) *adj.* having incomparable and extreme happiness तेभ्योऽतुलात्यन्तसुखास्तु सिद्धाः VarāṅgaC. 10. 48

अतुलाधर्मत्व (atulādharma-tva) *n.* the state of not being the property of a balance सोऽयं व्यधिकरणः अवनमनविशेषाभावस्यातुलाधर्मत्वात् Nyāy-Vār. 236. 13 (*on* ii. 1. 31)

अतुलानलाभ (atulānalābha) *adj.* resembling a matchless fire वेतालानतुलानलाभविकटान् झोटिङ्गचेटानपि जित्वा KumāPraPra. 43. 2.

अतुलानुभाव (atulānubhāva) *adj.* of incomparable prowess तस्यातुलानुभावस्य … । (ऐश्वर्यम्) अस्मद्विधः … नावगच्छति DevīBhāP. viii. 19. 28.

अतुलामयभीति (atulāmaya-bhīti) *adj.* (causing) fear of an unique disease व्यत्ययकेतुस्त्वतुलामयभीतिरीतिकरः VasiS. 10. 39.

अतुलार्चिष्मन् (atulārciṣma(n)t) *adj.* possessed of incomparable (terrible) flames हुतभुक् … प्रजज्वालातुलार्चिष्मान् MahāBhā. i. 218. 18.

अतुलार्थयुक्ता (atulārtha-yuktā) *adj.* (*f.*) having unequalled wealth अतुलार्थयुक्ता पुष्पवती क्रमाद्भास्करवासरेषु VasiS. 24. 33.

अतुलावृत्तित्व (atulāvṛtti-tva) *n.* the state of not subsisting in a balance असिद्धस्तावदयं हेतुरवनमनविशेषानाधारत्वस्यातुलावृत्तित्वात् NyāyVār. 236. 16 (*on* ii. 1. 31)

अतुलाश्रिता (atulāśritā) *adj.* (*f.*) not supporting a comparison (i. e. unparalleled, unrivalled) भवता…स्वमित्रोद्धारिणाभीता पृथ्वी यमतुलाश्रिता Kāvyāda. 3. 68.

अतुलास्त्रगौरव (atulāstra-gaurava) *adj.* teeming with unrivalled weapons रवेण भौमो ध्वजवर्तिवीरवेवेजि संयत्यतुलास्त्रगौरवे Kāvyāda. 3. 47.

अतुलित (a-tulita) *adj.* [*f.* -ā] **i** unequalled, unrivalled, immense (rich with) पुंसः श्रीसद्गुरूणामतुलितकरुणापूर्णपीयूषदृष्ट्या S'atS'lo. 91; (सुदत्तस्य) वेधसाप्यतुलितं बाहुबलविजृम्भितमेव वप्रः YaśasCam. ii. 240. 1; शैलोद्यानवनारामफलैरतुलिता मही … जयाब्दे NāraS. 3. 44; निःसाराः सप्रजाः क्षितिपाः । अतुलितसस्यसमृद्धां भूमिं मुक्त्वा पराभवाब्देऽपि VasiS. 6. 68; EI. xiv. 358. 7; **ii** immeasurable (great many) तारणाब्दे त्वतुलिता अर्थवन्तो हि जन्तवः NāraS. 3. 34; **iii** not weighed (*hence* copious amount) अतुलितकनकाभिषेकमुख्यैः सपदि वधूः समभावयन्महीन्दुः Raghunā. 12. 28.

अतुलितघनभोग (atulita-ghanabhoga) *adj.* having an incomparable intense enjoyment कुसुमितवनमध्ये पद्मिनीं सौधभागेऽप्यतुवि(? लि)तघनभोगः कामिनीं संयमेत S'ṛṅgāDī. 2. 40.

अतुलितत्व (atulita-tva) *n.* the state of not being compared with ब्रह्मणः … केनाप्यतुलितत्वम् … चाह S'vetāUBh. 198. 4 (*on* 4. 19)

अतुलितप्रभाव (atulita-prabhāva) *adj.* having unequalled valour सः … समुत्पपातातुलितप्रभावः S'aṅkaDigVi.(Mā.) 11. 39; 16. 101.

अतुलितमहिमन् (atulita-mahiman) *adj.* of incomparable majesty दिश्याल्लक्ष्मीमपारामतुलितमहिमेवापरो मन्दराद्रिः SūryaS'. 72.

अतुलितसुरकुमार (atulita-surakumāra) *adj.* unequalled (i. e. superior) to a god स रूपसंपदातुलितसुरकुमारः … इमामेव नगरीम् … आगच्छत् TilaMañ. 127. 7.

अतुलिताकाशस्वरूप (atulitākāśa-svarūpa) *adj.* (Brahman) having the form of incomparable (huge) ether अतुलिताकाशस्वरूपं रूपमाविश Yog-Vā. v. 50. 15.

अतुलितात्मन् (atulitātman) *adj.* whose mind is not balanced तस्माद्ज्ञातहेयोपादेयस्यातुलितात्मनः । गृहवासपरित्यागः कर्तुं समुचितो न ते Samarā-Sam. 6. 325.

अतुलितोरुविक्रम (atulitoruvikrama) *adj.* of great valour which is matchless विद्विषत्यतुलितोरुविक्रमे विक्रमेत सहसा न नीतिमान् HarVi. 14. 55.

अतुलीकृत (atulī-kṛta) *adj.* rendered matchless कयापि भक्तिपरया सौभाग्यमतुलीकृतम् BhaviP. 654A. 26 (iv. 28. 35)

अतुलेभेश (atulebheśa) *m.* incomparably excellent elephant गच्छन्नतुलेभेशं गर्वेण वृकोदरोऽपि न तु लेभे शम् YudhiVi. 7. 58.

अतुलोदग्र (atulodagra) *adj.* incomparably terrible प्रसादमतुलोदग्रं

प्रतिग्रहदृढां क्षितिम् ।… संजहार पदे पदे RājTa.(S'rī.) 1 (3). 67 (Hoshiarpur Ed.)

अतुलोन्नति (atulonnati) *adj.* of matchless height (महेन्द्रम्) स्थिरमतुलोन्नतिमूढतुङ्गमेघम् Bhaṭṭi. 10. 48.

अतुलोपकृत (atulopakṛta) *adj.* showing incomparable favour गौरी …तामरसभास्यतुलोपकृतम् … वदनं दधती … अस्य तु लोपकृतम् CaturJiStu. 80.

अतुलोपम (atulopama) *adj.* having no suitable comparison ते कुञ्जभवने ददृशाते हरिं प्रियम् … किशोरमतुलोपमम् ĀdiP. 13. 102.

अतुल्य (a-tulya) *adj.* [*f.* –ā] **i** incomparable, unequal, matchless अतुल्यानामनूहेन S'āṅkhāS'S. v. 19. 4; अथादाह्यान् व्याख्यास्यामः । न दाह्योऽतुल्यो भवति VaikhāGS. 5. 11; विष्णुना तु तदाकाशे वैनतेयः समेयिवान् । तस्य नारायणस्तुष्टस्तेनालौल्येन(v. l. अतुल्येन)कर्मणा MahāBhā. i. 29. 12; सेनासमुद्योगः …। तुमुलः (v. l. अतुल्यः) तव सैन्यानां युगान्तसदृशोऽभवत् MahāBhā. vii. 100. 5; यस्यायं विजिते स्थितो बोधिसत्त्वो अद्य अतुल्यां प्राप्स्यति बोधिमग्राम् MaVastuAva. ii. 300. 1; अतुल्याः स्युः परिक्रये MīmāSū. x. 3. 55; अतुल्येषु तु भेदः MīmāSū. xii. 1. 1; पितृयज्ञेनातुल्यमेतत् S'ābaBh. 1510. 20 (*on* vi. 8. 10); 2079. 11 (*on* x. 8. 29); TātpaṬ.(U.) 375. 14 (*on* 5(7). 5); भुक्ते चान्ने विदाहस्त्वधृतिरपि सदा हृद्यतुल्या च पीडा SuśruS. vi. 45. 9; MaYānaSū. 25. 17 (7. 3); SāṁkhyaKāBh. 6. 15 (*on* 8); NyāyVār. 311. 1 (*on* ii. 2. 44); AṣṭāSaṁ. i. 63. 4 (1. 9); VarāṅgaC. 10. 7; संकलितव्यवकलिते पृथगतुल्यानाम् BrahmSphuSi. 18. 41; NītiSā 18. 36; RugVi. 9. 11; देवग्रामभवा तस्य पत्नी वव्वाभिधाभवत् । अतुल्या चलया लक्ष्म्या सत्या चाप्य[नपत्य]या EI ii. 163. 17; YaśasCam. i 306. 9; बलं विक्रमसिंहस्य तदतुल्यमभज्यत KathāSaSāg. x. 2. 9; DvyāśraKā. 17. 114; Līlā. 272; ChandaśCū. 6. 14 (3); SmṛtiCan. iv. 649. 20; NyāyPari. 307. 4; NyāyMāVi. 187. 25 (*on* iii. 6. 14); संतस्तत्तापसंतप्ता धर्मैशाखिनमाश्रिताः … जिनवाक्कुल्ययाजस्रं सिच्यमानमतुल्यया SamarāSaṁ. 8. 536; सत्यमार्तण्डनामासीदतुल्यबलविक्रमः EI. v. 110. 14; PrabhāC. 209. 14; (तौ मुनी) अतुल्यौ धर्मसौधस्य तुल्यकुड्याविव स्थितौ S'āliC. 6. 134; तुल्यानतुल्यान् संस्थाप्य तुल्यातुल्याख्यभावना SiddhāTaVi. 388. 23; **ii** not similar अतुल्यदूष्यदेशर्तुप्रकृतिः पादसंपदि । ग्रहेष्वनुगुणेष्वेकदोषमार्गो नवः सुखः AṣṭāHṛ. i. 1. 30 (comm. अतुल्या न सदृशाः); ChāndraVṛ. *on* v. 3. 84; MugdhaBo. 3. 9 (11. 18); PrakriKau. i. 140. 2; *m.* a name of S'iva अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु … अतुल्यः MahāBhā. xiii. 17. 61; *n.* a high number न खलु कुलपुत्र एकसत्त्वारम्बणतया बोधिसत्त्वानां बोधाय चित्तमुत्पद्यते यदुत परिपाकविनयाय । न सत्त्वशतस्यार्थाय … न सत्त्वातुल्यस्य GaṇḍVyū. 83. 17; 1. 3. 30.

अतुल्यक (atulya-ka) *adj.* unequal बाहू … अतुल्यकौ SiddhāTaVi. 60. 3.

अतुल्यकक्ष (atulya-kakṣa) *adj.* having no equal counterpart आस्तां तवान्यदपि तावदतुल्यकक्षमैश्वर्यमीश्वरपदस्य निमित्तभूतम् YaśasCam. ii. 255. 11.

अतुल्यकक्षत्व (atulyakakṣa-tva) *n.* the state of having an unequal counterpart, not being of equal status तदतुल्यकक्षत्वाद्बाध्यत्वं सुवचं भवति NyāyMañ. i. 240. 11; PadMañ. *on* KāśiVṛ. *on* P. i. 1. 53.

अतुल्यकक्ष्य (a-tulyakakṣya) *adj.* which does not belong to one and the same class तेषामतुल्यकक्ष्याणां प्राथम्यं न विशेषायोपयुज्यते TattvBi. 154. 7; AlaṅkāRa. 44 (11)

अतुल्यकक्ष्यता (atulyakakṣya-tā) *f.* the state of not belonging to one and the same class दर्शिता त्वतुल्यकक्ष्यता TattvBi. 154. 10; Kāvyānu. (He.) 342. 15.

अतुल्यकर्ण (atulya-karṇa) *m.* unequal diagonal अतुल्यकर्णाभिहतिर्द्विभक्ता फलं स्फुटं तुल्यचतुर्भुजे स्यात् Līlā. 174.

अतुल्यकल्प (atulya-kalpa) *adj.* having an unequal procedure ततो न किंचिन्न बाध्यते … तुल्यकल्पमतुल्यकल्पं वा TantrVā. 1112. 14 (*on* iii. 6. 42)

अतुल्यकल्पत्व (atulyakalpa-tva) *n.* the state of being of unequal procedure स्मार्तमात्रेण वाल्पव्ययायासतया स्मार्तादप्यूनेन वैशेषिकेण वा गुरुतरदुरितनिराकरणासंभवादतुल्यकल्पत्वाच्च TristhaSe. 124. 29.

अतुल्यकान्ति (atulya-kānti) *adj.* possessed of matchless brilliance महागृहाणि … पृथग्विधैर्न्यस्तबलिप्रकारैरतुल्यकान्तीन्यनिशं विभान्ति VarāṅgaC. 9. 23.

अतुल्यकारणत्व (atulyakāraṇa-tva) *n.* the state of having a dissimilar cause अतोऽतुल्यकारणत्वाद्वैलक्षण्यमेव न्याय्यम् S'ābaBh. 1684. 5 (*on* ix. 1. 39)

अतुल्यकार्यत्व (atulyakārya-tva) *n.* **i** the state of having a dissimilar purpose वेदान्तराणामतुल्यकार्यत्वकारितः समुच्चयोऽवगम्यते TantrVā. 642. 11 (*on* ii. 4. 9); ṬupṬ. 205. 5 (*on* ix. 1. 55); **ii** the state of producing dissimilar effects शक्तस्य त्वाश्रमित्वमेवोपादेयमित्यर्थः । भूयोधर्मकाल्पधर्मकयोरतुल्यकार्यत्वात् BrahmSūBh.(Rā.) 703. 4 (*on* iii. 4. 39); S'rutaPra. ii. 557. 27 (*on* iii. 4. 39); SaṅkarKāBh. 77. 5 (*on* ii. 1. 82)

अतुल्यकालज (atulyakāla-ja) *adj.* recorded at different times (of the day) बिन्दुभिस्त्रिभिरतुल्यकालजैः संलिखेच्छफरिके विधानतः MaBhāsk. 3. 3.

अतुल्यकालत्व (atulyakāla-tva) *n.* the state of not being simultaneous अन्यप्रयुक्तस्य पश्चादवगतफलद्वाराप्यैश्वर्यवीपूर्वकमधिकारपरत्वमित्यतुल्यकालत्वेऽप्यन्तरङ्गं बलीय इत्यर्थपरत्वमध्ययनविधेर्युक्तम् NayaVi. 33. 4 (*on* i. 1. 1)

अतुल्यकालम् (a-tulyakālam) *adv.* not simultaneously यथेन्द्रियार्थान्युगपत्समस्तान्नावेक्षते कृत्स्नमतुल्यकालम् । यथाबलं संचरते MahāBhā. xii. 196. 2.

अतुल्यकुलसंबन्ध (atulyakula-sambandha) *m.* (nuptial) relation with a family of unequal rank अतुल्यकुलसंबन्धः सैषा किं वापराध्यति KathāSaSāg. iv. 1. 80.

अतुल्यकेलि (atulya-keli) *f.* incomparable sport अतुल्यकेलिसौन्दर्यप्रेष्ठवंशीत्वनाङ्कितः (गुणाः कृष्णस्य कीर्तिताः) UjjvaNīMa. 8. 6.

अतुल्यक्रम (a-tulyakrama) *adj.* not of similar sequence यद् द्वयोः स्वरव्यञ्जनसमुदाययोः … तुल्यक्रमयोरतुल्यक्रमयोर्वा परस्परसाम्यं छेकानुप्रासः AlaṅkāRa. 3 (2)

अतुल्यक्रियता (atulyakriya-tā) *f.* the state of having dissimilar effect or function कर्मापि यद्यस्य धातोः … तत्तदासेव्यम् ।… अतुल्यक्रियतया ह्रासकरं भेदार्थेन AṣṭāSaṁ. i. 103. 5 (1. 19)

अतुल्यगन्धर्द्धि (atulya-gandhardhi) *adj.* possessed of abundance of incomparable perfume अतुल्यगन्धर्द्धिरसौजसं शुभां सुधां किलोत्सृज्य वराप्सरोधृताम् JātaMā. 69. 17 (10. 14)

अतुल्यगा (atulya-gā) *adj.* (*f.*) which moves on incomparably अवस्कन्दसमापत्तिरानिरोधमतुल्यगा AbhisaAlaṅ. 5. 25

अतुल्यगुण (atulya-guṇa) *m.* incomparable quality विपुलपुण्यवृद्धि तस्याः … अतुल्यगुणमहात्मताम् MaYānSū. 53. 11 (10. 14); जगतामतुल्यगुणयोगिना प्राणिवर्गेण संभृतः … पातालनामा तृतीयो लोकः UdaySuKa. 93. 24.

अतुल्यगोत्र (a-tulyagotra) *adj.* [*f.* –ā] not belonging to the same lineage अतुल्यगोत्रस्य … मिथुनीकृतस्य । किं स्यात् … यत् स्त्रीषु गर्भत्वमुपैति पुंसः CaraS. iv. 2. 3; vi. 2 (1). 15; कन्यामतुल्यगोत्राम् … उद्वहेत् AṣṭāSaṁ. i. 195. 6 (2. 1)

अतुल्यगोत्रीय (atulya-gotrīya) *adj.* (born) of hetero-linear (union) अतुल्यगोत्रीयं शारीरं व्याख्यास्यामः CaraS. iv. 2. 1.

अतुल्यजातीय (a-tulyajātīya) *adj.* [*f.* –ā] not belonging to the same class अतुल्यजातीययोरपि पौर्वापर्यं भवति TantrVā. 616. 7 (*on* ii. 3. 22); KenUBh. 47. 4 (*on* 2. 4); असंभिन्नशक्तिप्रविभागास्तुल्यजातीयातुल्यजातीयशक्तिभेदानुपातिनः YogBh. 82. 7 (*on* 2. 18) (TattvVai. तुल्यजातीयातुल्यजातीयेषु … ये शक्तिभेदास्ताननुपतितुं शीलं येषां ते); गुणकार्याणां तुल्यजातीयाश्चातुल्यजातीयाश्च याः शक्तयः Bhāsvatī. 196. 4 (*on* YogSū. 2. 18)

अतुल्यता (atulya-tā) *f.* **A** incomparability, the state of being unequal अचिन्त्यातुल्यत्वे(v. l. ते)मेयसंख्ययोः समतिक्रमौ (विशेषमार्गः) AbhisaAlaṅ. 4. 24 = AbhisaAlaṅĀ. 357. 1;; कातुल्यता । व्रीहीणां विहिता न नीवाराणाम् । इयमतुल्यता S'ābaBh. 1058. 5 (*on* iii. 6. 37); 1114. 17 (*on* iii. 8. 8); TantrVā. 305. 21 (*on* i. 4. 10) = AbhisaAlaṅĀ. 503. 16; अतुल्यतयोपजनितध्वाङ्क्षः KuṭṭaMa. 133; ननु जैमिनेरपि निष्प्रमाणिका … अपौरुषेयत्वकल्पना अस्त्येवैलक्ष्यः । स्वाधीनामपि सरसां परिहरति मृणालिकांवेति कथमतुल्यता NyāyRa. 91. 15 (*on* 2. 153); SaṅkarKāBh. 77. 5 (*on* ii. 1. 82); पैतामहे पैतृके च जन्मनैव स्वाम्यमिति का तत्र तुल्यातुल्यता ।… पैतृके तु जीवति पितरि निर्दोषे तस्यैव स्वातन्त्र्यमिति अतुल्यता SmṛtiCan. iv. 650. 3.

अतुल्यतुल्यकरुणायन (atulyatulya-karuṇāyana) *n.* showing of mercy towards an unequal or an equal person करुणामहाकरुणयोः किं नानाकरणम् । … अपरित्राणपरित्राणतः अतुल्यतुल्यकरुणायनाच्च AbhidhKoBh. 415. 10 (*on* 7. 33)

अतुल्यत्व (atulya-tva) *n.* dissimilarity, incomparability अवर्णमध्य आकार एकादेशे विशेषः । स्वरकृतोऽनुपलक्ष्यः सर्वैर्विज्ञानस्यातुल्यत्वात् APrāti. 6; त्रिदिवि यस्य सदृशो नास्ति रूपेण कश्चन । अतुल्यत्वात् कृतो देवैर्नाम्ना कामस्तु पावकः MahāBhā. iii. 209. 23; AbhisaAlaṅ. 4. 24; अतुल्यत्वात्तु वाक्ययोर्गुणे तस्य प्रतीयेत MīmāSū. ii. 2. 26; तस्या यदबहुलमाशीर्ब्रह्मचर्यमतुल्यत्वात् MīmāSū. vi. 1. 24 (S'ābaBh. अतुल्यत्वादसमानविधाना पत्नी); ix. 4. 35; x. 8. 29; अतुल्यत्वे ह्यभिप्रेतेऽस्य वस्तुनः TattvSaṁ. 1711; सोमवाक्येऽपि विशिष्टविधौ प्रत्यक्षोपात्ते सत्यानुमानिकासंभवादेवातुल्यत्वम् TantrVā. 513. 16 (*on* ii. 2. 18); 807. 8 (*on* iii. 2. 37); दृष्टान्तदार्ष्टान्तिकयोरतुल्यत्वात् BrahmSūBh.(S'aṅ.) 455. 15 (*on* ii. 3. 24); 641. 12

(*on* iii. 3. 17); GītāBh.(S'aṅ.) 361. 8 (*on* 13. 2); BṛĀraUBh. 284. 12 (*on* ii. 3. 3); NayaVi. 128. 8 (*on* i. 1. 5); वेदस्य व्यापाराभावे निष्फलत्वापत्तेरतुल्यत्वम् NyāySu.(So.) 58. 12 (*on* i. 2. 10); नानयोर्विकल्पो युक्तः अतुल्यत्वात् PrakaPañ. 224. 26; ĀgaPrā. 61. 15; Anuvyā. 56A. 3 (*on* 3. 4); अतुल्यत्वाशङ्काया-मतिदेशः स्यात् VedāntKa. 234. 16 (*on* ii. 1. 12); DaṇḍaVi. 266. 6; सर्वशरीरा-णामतुल्यत्वात् AṇuBh. 137. 5 (*on* ii. 2. 34); MayūMāli. 855. 12 (*on* xii. 1. 17); तयोर्जनकानामास्यभवानां वायुसंयोगानामतुल्यत्वात् LaS'abdeS'e. i. 28. 8.

अतुल्यदण्ड (atulya-daṇḍa) *m.* unequal punishment लोभमोहयोर-तुल्यदण्डनिमित्तत्ववचनं तत्साक्षिविषयम् Aparā. 603. 22 (*on* 2. 4)

अतुल्यदूष्य (atulya-dūṣya) *adj.* not contaminated by a similar disorder (of humour) अतुल्यदूष्यदेशर्तुप्रकृतिः पादसंपदि (व्याधिः) AṣṭāSaṁ. i. 6. 13 (1. 2) = AṣṭāHṛ. i. 1. 30.

अतुल्यदेश (atulya-deśa) *adj.* (disease) produced in a dissimilar (i. e. unsuitable) place अतुल्यदेशो व्याधिर्यथा । अनूपदेशे पित्तसंभूतः comm. *on* AṣṭāHṛ. i. 1. 30.

अतुल्यद्वारकत्व (atulyadvāraka-tva) *n.* the state of having dissimilar intermediary न द्विवचनापत्तिरेकत्वविरोधो वा अतुल्यद्वारकत्वात् TattvCin. iv(2). 797. 1.

अतुल्यधी (atulya-dhī) *adj.* possessed of an incomparable intellect अतुल्यधीः … प्रविवेश सभागृहं नरेन्द्रो मतिमद्भिर्वरमन्त्रिभिः VarāṅgaC. 24. 13.

अतुल्यनाद (atulya-nāda) *adj.* having an incomparable twang विस्फारयंश्चापमतुल्यमानम् (v. l. अतुल्यनादम्) Rāmā. vi. 47. 16.

अतुल्यनामन् (atulya-nāman) *adj.* [P. vi. 3. 63] named Atulyā धृति-षेणराजा । अतुल्यनामा किल तस्य भार्या VarāṅgaC. 2. 11.

अतुल्यपरिवर्त (atulya-parivarta) *m.* square of *atulya* (a high number) [DBHS]

अतुल्यपात (atulya-pāta) *m.* unequal fall (at different times) तदेवं कारणभेदानुविधायीनि गुरुत्ववन्ति द्रव्याणि चिराशुपातविधानभाञ्जि भवन्तीत्यहेतुर-तुल्यपातः NyāyVār. 420. 12 (*on* iii. 2. 14)

अतुल्यपार्श्वद्वय (atulya-pārśvadvaya) *adj.* whose both flanks are not symmetrical अतुल्यपार्श्वद्वयः … पूज्यो न चार्यं गजः MātaLī. 3. 1.

अतुल्यपौरुष (atulya-pauruṣa) *adj.* possessed of incomparable prowess सुरोत्तमः प्रवरवराहरूपधृक् । … समुद्धरद् धरणिमतुल्यपौरुषः MatsyaP. 248. 79.

अतुल्यप्रकृति (atulya-prakṛti) *f.* different material or substance न, अतुल्यप्रकृतीनां विकारविकल्पात् NyāySū. ii. 2. 44; *adj.* having dissimilar constitution (of humour) अतुल्यप्रकृतिर्यथा पित्तप्रकृतेः श्लेष्मोद्भवो व्याधिः comm. *on* AṣṭāHṛ. i. 1. 30.

अतुल्यप्रत्यय (atulya-pratyaya) *m.* dissimilar notion श्यामलोहितादि-वर्णवैलक्षण्येन जायमाना अतुल्यप्रत्ययहेतवः TattvSaṁPañ. 121. 19 (*on* 323)

अतुल्यप्रभाव (atulya-prabhāva) *adj.* possessed of incomparable prowess क्षेमकारोऽङ्घ्रिपद्मो यस्या दुर्वार एवम् (v. l. क्षेमकारो हि यस्याः पादोऽ-तुल्यप्रभावः) CaṇḍīS'. 93; PrabhāC. 39. 13.

अतुल्यबल (a-tulyabala) *adj.* not equally strong (i. e. valid, authoritative) अतुल्यबलयोः स्पर्धा न भवति JaineVyā. 34. 5 (*on* i. 2. 90); कथं पुनः प्राकरणिकेन … सहातुल्यबलस्य विकल्पोऽभिधीयते TantrVā. 1076. 5 (*on* iii. 6. 9); NyāyRaMā. 183. 24; अन्तरङ्गानपि विधीन् बाधमानो लुक् बलवान् इत्य-तुल्यबलेन लोपेन स्पर्धां नार्हति Pradī. v. 72A. 24 (*on* vi. 1. 69); TarkBhā. (Ke.) 92. 2; अतुल्यबलयोर्विरोधे हीनस्य निग्रहावश्यंभावात् NyāyPari. 351. 18.

अतुल्यबलता (atulyabala-tā) *f.* the state of having unequal validity विरुद्धयोरतुल्यबलतया न विकल्पः Bhām. 69. 18 (*on* i. 1. 2)

अतुल्यबलत्व (atulyabala-tva) *n.* the state of having unequal validity नेमौ विधी विकल्प्येते … स्वयमतुल्यबलत्वात् TantrVā. 100. 10 (*on* i. 3. 3); 531. 18 (*on* ii. 2. 23); 539. 11 (*on* ii. 2. 23); 1076. 26 (*on* iii. 6. 9); अतुल्यबलत्वे तु यत्कृतकमन्यतरस्य दौर्बल्यम् NyāyMañ. i. 215. 25; असमर्थविशेषण-त्वेनासिद्धभेदस्यातुल्यबलत्वात् ĀtmaTaVi. 834. 19; दुर्बलत्वादितरस्य बलीयस्त्वाद-तुल्यबलत्वम् S'āstrDī. 65. 18; (*on* i. 1. 5); NyāyMa. 342. 1; विधिनिषेधयोः … अतुल्यबलत्वमाशङ्क्य VedāntKa. 437. 23 (*on* iii. 3. 26); PadMañ. *on* KāśiVṛ. *on* P. i. 1. 12; श्रुतिस्मृत्योरतुल्यबलत्वात् AdvaiSi. 744. 6; PāṇiTaVāNaMā. 92. 21; 111. 14; अतुल्यबलत्वाद्विकल्पो न युक्तः GuruCandr. i. 267. 15; प्रत्यक्षानु-मानयोरतुल्यबलत्वेन MayūMāli. 13. 24 (*on* i. 2. 3); 598. 6 (*on* ix. 1. 16); 872. 25 (*on* xii. 3. 7)

अतुल्यबलवत्त्व (atulyabalavat-tva) *n.* the state of having unequal authority असंभवे त्वतुल्यबलवत्त्वे बलवदनुसारेण निश्चयोपपत्तेः एतद्वाक्यव्याख्या न युक्ता CaturCin. iii(2). 211. 2.

अतुल्यभुजवैभव (atulya-bhujavaibhava) *adj.* whose strength of the arms is incomparable आस्तां तावद्भवान् शल्योऽप्यतुल्यभुजवैभवः PāṇḍaC. 13. 81.

अतुल्यम् (a-tulyam) *adv.* matchlessly, incomparably यत्रायमारोपण-तुल्यकालं तत्प्रेमशाखी फलवानतुल्यम् CaitaCa. 234. 17(10)

अतुल्यमधुरप्रेमन् (atulyamadhura-preman) *m. n.* incomparably sweet love अतुल्यमधुरप्रेममण्डितप्रियमण्डलः (श्रीकृष्णः) BhaktiRaSi. ii. 1. 33.

अतुल्यमहस् (atulya-mahas) *adj.* having unequal strength अतुल्य-महसा सार्धं रामेण मम विग्रहः Bhaṭṭi. 5. 29.

अतुल्यमान (atulya-māna) *adj.* having none equal in size विस्फारयं-श्चापमतुल्यमानम् Rāmā. vi. 47. 16.

अतुल्यरूप (atulya-rūpa) *adj.* **i** having an unequalled or incomparable form रक्षांसि … अतुल्यरूपाण्यतिघोरवन्ति … विघ्नं सदा तपसश्चिन्तयन्ति MahāBhā. iii. 113 1; अतीव रूपं (v. l. अतुल्यरूपं) बभूव युद्धं रविभीम-सून्वोः MahāBhā. vii. 154. 17; viii. 882*(4); **ii** having dissimilar form न चातुल्यरूपेऽनुमानमित्यनुकारः संभवति Bhām. 225. 12 (*on* i. 3. 22); हस्तादि-च्छेदसहस्रदण्डप्रवासनवधानामतुल्यरूपाणां संग्राह्यस्त्रीप्रातिलोम्यमात्रेण समञ्जयितु-मशक्यत्वादियमत्र व्यवस्था DaṇḍaVi. 161. 4; अतुल्यरूपे न्यायातिदेशो युक्तः MayūMāli. 529. 5 (*on* vii. 1. 4)

अतुल्यरूपता (atulyarūpa-tā) *f.* the state of being of dissimilar form प्रायश्चित्तानामतुल्यरूपतया सहोपदेशस्तत्र ManuBh. ii. 370. 3 (*on* 11. 2)

अतुल्यरूपिन् (atulya-rūpin) *adj.* possessed of unequalled form देयं किमस्माभिरतुल्यरूपिणे SkandP. i(1). 19. 43.

अतुल्यलक्षण (atulya-lakṣaṇa) *adj.* having a dissimilar characteristic पादचतुष्टये … अतुल्यलक्षणं विषमम् AbhinBhā. ii. 236. 14 (*on* 14. 43)

अतुल्यलक्ष्मी (atulya-lakṣmī) *f.* unparalleled good fortune, unequalled glory आयुः परं वपुरभीष्टमतुल्यलक्ष्मीः … भवन्ति तुष्टात्त्वत्तः BhāgP. viii. 17. 10.

अतुल्यलम्बक (atulya-lambaka) *adj.* having unequal perpendiculars अतुल्यलम्बकं क्षेत्रमिदं पूर्वैरुदाहृतम् Līlā. 188.

अतुल्यवर्तित्व (atulyavarti-tva) *n.* the state of behaving in a dissimilar manner इत्यतश्चक्षुरिन्द्रियपरमाणुभिस्तद्विषयपरमाणूनामतुल्यवर्तित्वात् पृथ-क्स्थानावस्थितत्वात् Sphuṭā. i. 53. 16 (*on* 1. 20)

अतुल्यवात्सल्य (atulya-vātsalya) *n.* matchless affection, unparalleled love or affection धर्मैश्चातुल्यवात्सल्यसंपूर्णहृदयः पिता PārśvC. 6. 1245; तत्रानीयातुल्यवात्सल्यादिभिर्भूषणादिदानैश्च संतर्प्य PrabaCin. 87. 26; 124. 8.

अतुल्यवात्सल्यता (atulyavātsalya-tā) *f.* the state of having unparalleled affection or love ततोऽतुच्छवात्सल्यात् (v. l. पयसि याच्यमानेऽतुल्य-वात्सल्यतया) PrabaCin. 48. 5.

अतुल्यवात्सल्यत्व (atulyavātsalya-tva) *n.* the state of having unparalleled affection or love श्रीसिद्धराजस्य प्रजापालनपाण्डित्यं सेवकेष्वतुल्य-वात्सल्यत्वं चेत्यादीन् गुणान् वर्णयन् PrabaCin. 72. 2.

अतुल्यविषय (atulya-viṣaya) *adj.* having a dissimilar topic न हि दुर्बल इत्येव बाधः किं तु अतुल्यविषयो दुर्बलः CaturCin. iii(1). 1329. 15.

अतुल्यवीर्य (atulya-vīrya) *adj.* possessing unequalled power or valour रक्षांसि … अतुल्यरूपाणि (v. l. अतुल्यवीर्याणि) MahāBhā. iii. 113. 1.

अतुल्यव्यक्तित्व (atulyavyakti-tva) *n.* the state of having unequal or dissimilar individual द्रव्यत्वेन अतुल्यव्यक्तित्वम् TarkSaṁ.(Ā.) 68. 1.

अतुल्यष (atulyaṣa) *m.* name of a snake in Kāśmīra नागाः कश्मीरायां कृतालयाः … नामतस्तु समाचक्ष्व (तान्) … कुशकुण्डोऽतुल्यषश्च NīlaP. 929.

अतुल्यसाहस (atulya-sāhasa) *adj.* of incomparable courage वसुन्ध-राम् … दंष्ट्रैकया विष्णुरतुल्यसाहसः समुद्दधार स्वयमेव देवः SkandP. v(3). 19. 43.

अतुल्यस्थान (atulya-sthāna) *adj.* having a dissimilar place of articulation वर्णान्तराणां यथायोगमतुल्यस्थानप्रयत्नत्वात् Nyās. i. 21. 19 (*on* i. 1. 0 (PraSū. 5)); अतुल्यस्थानेन घकारेण सह भेदोऽपि SaraKaṇṭhā. 232. 4.

अतुल्याख्यभावना (atulyākhya-bhāvanā) *f.* peculiar combination (of figures in arithmetic) called *atulyā* (i. e. of unequal terms) तुल्यान-तुल्यान् संस्थाप्य तुल्यातुल्याख्यभावना । कार्या SiddhāTaVi. 388. 23.

अतुल्याख्या (atulyākhyā) *f.* synonym of dissimilar or different तस्य चातुल्याख्यायामवकाशो महापुरुष इति Nyās. i. 374. 10 (*on* ii. 1. 68)

अतुल्याच् (atulyāc) *adj.* (words) having unequal (number of) vowels अतुल्याचामल्पाचः पूर्वनिपातः CāndraVṛ. *on* ii. 2. 48.

अत्यनुसारिणी (aty-anusāriṇī) *f.* hiatus (*vivṛti*) between a long and a short syllable पूर्वं ह्रस्वं परं दीर्घमक्षरं यत्र दृश्यते । सा वत्सानुसृता ज्ञेया व्यत्यासेऽत्यनुसारिणी MāṇḍūŚi. 9.4.

अत्यनुसृ (aty-anusṛ-) I. P. (*caus.*) to cause to pursue excessively जितां च भूमिं रक्षेत भग्नान्नात्यनुसारयेत् MahāBhā. xii. 100.12; पुनरावर्तमानानाम् … न वेगः सुसहो राजंस्तस्मान्नात्यनुसारयेत् MahāBhā. xii. 100.13.

अत्यनूक्त (aty-ánūkta) *adj.* excessive Anuvacana (अनुवषट्कार ? or अनुवाचनप्रैष ?) वषट्कृतमत्यनूक्तं च यद्वै TaiBr. III. vii. 11.1

अत्यनूर्जित (aty-anūrjita) *adj.* in which one experiences lack of power परिभवभवनं श्रमास्पदं सुखपरिवर्जितमत्यनूर्जितम् … धनविकलत्वमतीव दारुणम् JātaMā. 77.17 (12.4)

अत्यन्त (aty-anta) *adj.* [*f.* -ā] [AltGr. II. 1.310] **i** excessive, very great, very much, extreme यास्समुद्रादुच्चरन्त्युत्सेभ्यो या नदीभ्यः । अत्यन्तस्सर्पो वैद्युतो अशनिं यावयादितः AV.(P.) xv. 23.13; अत्यन्त उत्सवो रमण एव भवति भजनप्रेमानन्दसुखप्राप्तौ SāmaRaU. 251.2; 280.4; 288.21; तं समासाद्य कृष्णा … अदृष्टपूर्वं संत्रासात् (v. l. अदृष्टपूर्वमत्यन्तम्) विषादमगमद्भृशम् MahāBhā. iii. 12.16; यद्भूतहितमत्यन्तं तत्सत्यमिति धारणा MahāBhā. iii. 200.4; Subhāṣi. 2969; विषस्य विषयाणां च दूरमत्यन्तमन्तरम् Śat-Trayī. 751; Subhāṣi. 3368; Hitopa. 1.36; प्रतिपत्ता विषभक्षणानुज्ञानादेव तद्गृहभोजनस्यात्यन्तमकरणीयत्वमनुमातुमर्हति VyaktiVi. 27.7; इक्षुधन्वा … आचारमालोक्य पुनस्त्वदीयं विषादमत्यन्तमवाप चित्ते BhāvŚ. 76; अत्यन्तमानुकूल्यं प्रतिकूलत्वं तथा च नात्यन्तम् । कन्यासिद्धौ हेतुः KandaCū. iii. 2.46; व्युत्क्रमेण त्वनुष्ठाने केषांचिदङ्गानां स्वैः प्रधानैरत्यन्तमव्यवधानमन्येषामत्यन्तं व्यवधानं स्यात् MīmāNyāPra. 238.15; स्वदानात्फलमत्यन्तं परदानानुपालने EI. viii. 142.25; SamarāSū. 31.31; 45.43; अनुचितमिदं गुरूणां पुरतः प्रागल्भ्यमत्यन्तम् GopāKeCan. 113.20; कुरङ्गाक्षीषु नात्यन्तः प्रसङ्गः सङ्गतः सताम् PāṇḍaC. 1.338; 9.6; (extremely) अत्युच्चका स्थिरात्यन्ता या चेयं मांसवाहिनी (नाडी) NāḍīVi. 30; ArthSaṁ. 83.3; उक्त्वा चात्यन्तमुत्कर्षमत्युत्कृष्टस्य वस्तुनः SāhiDa. 610.8; AnaṅgaRa. 3.8; MūkaPañ. 1.37; तन्त्रस्वीकारे त्वत्यन्तं ज्ञानगौरवम् LaŚabdeŚe. i. 238.17; **ii** beyond limit or end, limitless, eternal यत्र कुत्र

स्थितो वापि सुखमत्यन्तमश्नुते YogaU. 102; अत्यन्तं सख्यमिच्छामीत्याह तं स सुयोधनः MahāBhā. i. 126. 38; सुखदुःखे हि पुरुषः पर्यायेणोपसेवते । नात्यन्तमसुखं कश्चित्प्राप्नोति पुरुषर्षभ MahāBhā. iii. 245. 13; विजित्य च महीं राजा सोऽत्यन्तं सुखमेधते MahāBhā. ii. 5. 92; ManuSm. 5. 46; भर्तुस्ते नूनमत्यन्तमवैधव्यं न रोचते DūtGha. 7; कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा MeghDū. 106; एवमर्थं च कामं च धर्मं चोपाचरन्नरः । इहामुत्र च निःशल्यमत्यन्तं सुखमश्नुते KāmSū. 25. 22 (1. 2); BrahmāṇḍP. iii. 3. 112; सुखमात्यन्तिकं अत्यन्तमेव भवति इत्यात्यन्तिकम् । अनन्तमित्यर्थः GītāBh.(S'aṅ.) 196. 15 (*on* 6. 21); अमनोविषयेऽत्यन्तं तमानन्दं प्रचक्ष्महे TaiUBhāVā. 110. 24 (2); विवर्तैरत्यन्तैर्भरितभुवनाभोगविभवैः YaśasCam. i. 3. 9 (comm. अत्यन्तैः पर्यन्तरहितैः । नतै (? अनन्तै)रित्यर्थः); सुखमत्यन्तमपरिमितम् ··· अश्नुते GītāBh.(Rā.) 343. 6 (*on* 6. 28); न विद्यते अन्त इत्यत्यन्तं ते परं कालम् ··परिभ्रमन्ति TātpaVr̥. 362. 18 (*on* 3. 71); Subhāṣi. 668; **iii** absolute, total, complete, perfect अत्यन्तस्तत्परित्यागः सत्यात्मनि न विद्यते BuddhaC. 12. 73; मधुरिपुः ··· बिलेऽत्यन्तं नाशमवाप्तो भविष्यति ViṣṇuP. iv. 13. 48; सा चात्यन्तमदर्शनं नयनयोर्यातेति कोऽयं विधिः Vikramo. 4. 2 = KāvyPra. 427. 5; ṬupṬ. 8. 18 (*on* iv. 1. 12); कथं नोच्यतेऽत्यन्तमात्मन एकत्वमद्वितीयत्वं च ब्रुवता BrahmSūBh.(S'aṅ.) 315. 8 (*on* ii. 1. 14); अत्यन्तः निवृत्तस्य दुःखस्य पुनरनुत्पादः SāṁkhyaTaKau. 24. 2 (*on* 1); PārthPa. 30 (1); **iv** highest, excellent, best यत्र गत्वा न शोचन्ति न व्यथन्ति चलन्ति वा । तदहं स्थानमत्यन्तं मार्गयिष्यामि केवलम् MahāBhā. iii. 247. 40; लेभे स करमत्यन्तं गन्धर्वनगरात्तदा MahāBhā. ii. 25. 6; तत्र ह्यत्यन्ता श्रुतिरुत्सृष्टा वाक्यानुरोधेन स्यात् S'ābaBh. 1251. 7 (*on* iv. 3. 7); (केशिध्वजः) अवाप सिद्धिमत्यन्तां तापक्षयफलां द्विज ViṣṇuP. vi. 7. 106; अत्यन्तम् अन्तमतीत्य वर्तते इत्यत्यन्तम् उत्कृष्टं निरतिशयम् GītāBh.(S'aṅ.) 200. 10 (*on* 6. 28) (*but* अत्यन्तमपरिमितम् GītāBh.(Rā.) 343. 6) (*on* 6. 28)

अत्यन्त (aty-anta) *m.* extreme end, farther end अन्तात्यन्ताध्वदूरपारसर्वानन्तेषु डः P. iii. 2. 48; अवारपारात्यन्तानुकामं गामी P. v. 2. 11; अत्यन्तं गामी अत्यन्तीनः JaineVyā. 239. 10 (*on* iii. 4. 136); CāndraVyā. iv. 2. 17; S'ākaṭāVyā. iii. 3. 55; SiddhaHe. vii. 1. 100; SaraKaṇṭhā.(Gr.) i. 4. 65; **अत्यन्ताय** (atyantāya) [Dat.] **i** for ever, always तस्मात्कल्याणवृत्तः स्यादत्यन्ताय नरो भुवि MahāBhā. iii. 191. 23; नात्यन्तायाज्ञानं शरणं भवितुमर्हति MahāBh. i. 2. 25 (*on* i. 1. 0); नात्यन्ताय निवर्तन्ते नरा वैषम्यतो विधेः SabhāS'. 61; BālaKrī. ii. 21. 3 (*on* 3. 45); **ii** absolutely, completely, entirely इमे पुनर्वर्णा अत्यन्तायैवानर्थकाः MahāBh. i. 220. 21 (*on* i. 2. 45); i. 364. 15 (*on* ii. 1. 1); AhirbuS. 51. 72; तत्र नात्यन्ताय स्वार्थः परित्यक्तो भवति S'ābaBh. 1367. 18 (*on* vi. 1. 22); नात्यन्ताय मिमीते यत् सामान्ये समवस्थितम् । सादृश्यादुपमेयार्थः समीपे परिकल्प्यते VākyaPa. 3 (14). 391; सत्त्वादत्यन्ताय कारकव्यापारवैफल्यम् NyāyMañ. ii. 64. 7; ii. 76. 25; तद् यदि तान्यप्यनुरुध्यन्ते ततोऽत्यन्ताय वेदबाधः Kāśi. i. 48. 23 (*on* 1. 98); i. 131. 12 (*on* 2. 133); TātpaṬ.(Vā.) 498. 4 (*on* iii. 1. 1); ĀtmaTaVi. 544. 18; अयं स्वार्थं नात्यन्तायोत्सृजति SaraKaṇṭhā. 658. 9; NyāyKu. 88. 7; **iii** very or too much एतच्च शास्त्रान्तरे विस्तरेणाभियुक्तैर्युक्तिभिरुपपादितमिति नेहात्यन्ताय प्रतायते NyāyMañ. i. 236. 17.

अत्यन्तक (atyanta-ka) *m.* God Viṣṇu अत्यन्तकोऽपकारेण निरास्यन्न तदानवम् RāghPāṇ.(Dha.) 18. 83 (comm. अत्यन्तको विष्णुः)

अत्यन्तकटु (atyanta-kaṭu) *adj.* extremely bitter सर्वात्मनात्यन्तकटुं विदित्वा तं निम्बमेव त्यज दूरतोऽपि SṛṅgāVaiTa. 29.

अत्यन्तकटुक (atyanta-kaṭuka) *adj.* **i** extremely bitter ततो धिगिदमत्यन्तकटुकं विषयामिषम् MahāP. 5. 126; **ii** very pungent तीव्रमत्यन्तकटुके ViśvaLoK. 284. 43.

अत्यन्तकठिन (atyanta-kaṭhina) *adj.* very hard अत्यन्तकठिने द्रव्ये नीरं षोडशिकं मतम् S'ārṅgaS. ii. 9. 4; व्यामूढात्मन् किमेतस्मिन्नत्यन्तकठिनेऽश्मनि । सहस्रैरपि यत्नानां प्ररोहति सरोजिनी PāṇḍaC. 18. 60; BhaktiRaSi. ii. 4. 120.

अत्यन्तकठोर (atyanta-kaṭhora) *adj.* very hard तं भृत्याधममवैक्षत ··· घृणाजनकमत्यन्तकठोरमनसामपि PārśvC. 1. 273.

अत्यन्तकण्डूति (atyanta-kaṇḍūti) *f.* excessive itch गण्डूलं कण्डूलाफलं अत्यन्तकण्डूतिजनकं बहुरोमयुक्तं वर्षाकालभवम् SmṛtiCan. v. 230. 19; CaturCin. iii(1). 566. 15; अत्यन्तकण्डूतिपरो नराणां विरोधकारी शुनकः सदैव S'ārṅgaP. 2627.

अत्यन्तकमनीया (atyanta-kamanīyā) *adj.* (*f.*) very attractive ललनाश्चात्यन्तकमनीयाः Vāgbhaṭā. 4. 136.

अत्यन्तकराल (atyanta-karāla) *adj.* very dreadful मध्येऽत्यन्तकरालवाडवशिखाशोषेऽपि वारांनिधेः कल्लोलाः प्रकटीभवन्ति सततं मुक्ताफलोद्गारिणः SūktiMu. 6. 27.

अत्यन्तकरुण (atyanta-karuṇa) *adj.* very pitiable इत्थं विलापैरत्यन्तकरुणैर्मर्मभेदिभिः PāṇḍaC. 3. 76.

अत्यन्तकरुणा (atyanta-karuṇā) *f.* extreme compassion यद्युपदेष्टा ते ··· अत्यन्तकरुणाक्रान्तः ··· यतिः YogVā. iv. 53. 41.

अत्यन्तकर्कशा (atyanta-karkaśā) *adj.* (*f.*) **1** very rough सोऽवोचदुपलैरम्ब क्षितिरत्यन्तकर्कशा PadmP.(Ra.) 31. 179; **2** very harsh मानेऽत्यन्तकर्कशा UjjvaNīMa. 126. 6.

अत्यन्तकर्मनिवृत्ति (atyanta-karmanivṛtti) *f.* complete or total abstention from doing (religious) rites ब्रह्मविदामप्यत्यन्तकर्मनिवृत्तेर्दूषितत्वात् S'atDū. 228. 15.

अत्यन्तकर्शिता (atyanta-karśitā) *adj.* (*f.*) very much emaciated सा तस्य ब्राह्मणी भार्या शोकेनात्यन्तकर्शिता YogVā. iii. 19. 25.

अत्यन्तकलुषा (atyanta-kaluṣā) *adj.* (*f.*) very much impure अत्यन्तकलुषा जन्मसहस्रैर्ज्ञानभागिनी YogVā. iii. 94. 6.

अत्यन्तकल्याण (atyanta-kalyāṇa) *n.* absolute bliss तदेवाभयमत्यन्तकल्याणं परमामृतम् । सद्रूपं परमं ब्रह्म KaṭhRuU. 27.

अत्यन्तकष्ट (atyanta-kaṣṭa) *adj.* **i** very difficult (for learning) इह पुनरत्यन्तकष्टं व्याकरणं प्रणयता सूत्रकारेण न कस्यचित् प्रयोजनत्वमाश्रितम् TantrVā. 196. 2 (*on* i. 3. 18); **ii** very difficult or miserable (condition) चाक्रायणः···अत्यन्तकष्टावस्थां प्राप्तः सन् S'ivārkaMaDī. ii. 401. 21 (*on* iii. 4. 28); *n.* great trouble अत्यन्तकष्टं प्राप्तोऽस्मि SiṁhāDvā. 167. 5 (2)

अत्यन्तकातर (atyanta-kātara) *adj.* [*f.* –ā] **i** very perplexed or alarming अत्यन्तकातरं वाक्यं येनेदं भाषितं त्वया PadmP. (Ra.) 12. 173; जानास्येव हि मे चित्तं त्वदृतेऽत्यन्तकातरम् PadmP.(Ra.) 99. 61; **ii** greatly frightened विलोभनयनां वेण्यां गृहीत्वात्यन्तकातराम् । आचकर्ष PadmP.(Ra.) 71. 71.

अत्यन्तकान्त (atyanta-kānta) *adj.* very lovely रूपं च ते दिव्यमत्यन्तकान्तम् MahāBhā. iii. 184. 18; एताः स्थानपरिग्रहेण शिवयोरत्यन्तकान्तश्रियः प्रालेयाचलमेखलावनभुवः पुष्णन्ति नेत्रोत्सवम् SubhāRaK. 47. 17 = SaduktiKa. 283. 7; *n.* name of a type of house for a Brāhmaṇa अत्यन्तकान्ताधिष्ठानं चतुरश्रं हि तस्य तु ĪśānS'iPa. ii. 29. 78.

अत्यन्तकान्तक (atyantakānta-ka) *n.* name of a type of house for a Brāhmaṇa यथार्हं भूषयेच्छेषमेतदत्यन्तकान्तकम् ĪśānS'iPa. ii. 29. 81.

अत्यन्तकाम (atyanta-kāma) *m.* **i** boundless or extreme pleasure भूयादत्यन्तकामाय जगतां काममर्दनः EI. x. 8. 20(1); x. 10. 21(1); **ii** excessive love तत्र यद्यप्यत्यन्तकामाकृष्टचेतनः ··· अत्यन्तायोद्वाहकर्मणा स्वीकुर्यात् BālaKrī. ii. 21. 2 (*on* 3. 45); **iii** a *biruda* (title) of the Pallava kings Narasiṁha, Parameśvara etc. अत्यन्तकामः EI. x. 6. 5; अत्यन्तकामो नृपतिर्निर्जितारातिमण्डलः EI. x. 9. 20 (5); x. 11. 21(5); श्रीमतोऽत्यन्तकामस्य द्विषद्‌र्पापहारिणः EI. x. 9. 20(8); x. 12. 23(1)

अत्यन्तकामदा (atyantakāma-dā) *adj.* (*f.*) giving great pleasure सुलोचनेति विख्याता पत्युरत्यन्तकामदा KalkiP. iii. 14. 14.

अत्यन्तकामिन् (atyanta-kāmin) *adj.* [*f.* –ī] very passionate अत्यन्तकामिना चैव पत्नीहीनेन चैव हि । एषामनुज्ञामादाय कुर्याद्वैतानिकी[:] क्रियाः AVPari. xxiii. 12. 5; अलक्ष्मीस्तद्ग्रामपार्श्वाद्बभूवात्यन्तकामिनी BrahmVaiP. i. 8. 10; अत्यन्तकामिनश्चैव संकीर्यन्ते परस्परम् NaraP. 54. 44.

अत्यन्तकामुक (atyanta-kāmuka) *adj.* very passionate अत्यन्तकामुकस्यापि वृत्तिः कुण्ठति मातरि ViveCū. 446.

अत्यन्तकार्यिक (atyanta-kāryika) *adj.* having a very urgent purpose तन्नास्ति यन्न कुरुते लोको ह्यत्यन्तकार्यिकः । एष शर्वोऽपि भगवान्बटूभूय स वर्तते KāvyālaṅSāSaṁ. 2. 4(3*)

अत्यन्तकार्श्य (atyanta-kārśya) *n.* extreme leanness अत्यन्तकार्श्यं वनजायताक्ष्या मध्यो जगामेति ममैष तर्कः JānaHa. 1. 32 = SūktiMu. 53. 59 = S'ārṅgaPa. 3344; यदात्यन्तकार्श्यं प्रतिपन्नः जरादिनिमित्तैस्तदोर्ध्वोच्छ्वासी भवति BṛĀraUBh.(S'aṅ.) 597. 2 (*on* iv. 3. 36)

अत्यन्तकाल (atyanta-kāla) *m.* [Loc.] for a long time [DBHS]

अत्यन्तकालभेद (atyanta-kālabheda) *m.* total difference in time ननु अत्यन्तकालभेदान्नैतत्प्रसज्यते । वक्ष्यत्यस्योत्तरमर्थस्याविकृतत्वादिति TantrVā. 369. 16 (*on* ii. 1. 5)

अत्यन्तकीट (atyanta-kīṭa) *m.* insect par excellence सर्पाणां मूत्ररेतःशवमलरुधिराण्डास्रवोऽत्यन्तकीटाश्चान्ये संमूर्च्छिताद्या अनलपवनतोयोद्भवास्ते त्रिधोक्ताः KalyāKā. 19. 138.

अत्यन्तकुटिल (atyanta-kuṭila) *adj.* very curly अत्यन्तकुटिलै रूक्षैः ··· रोमैः केशैश्चापि तथाविधैः । अत्यन्तपिङ्गला नारी विषतुल्येति निश्चितम् BhaviP. 21A. 15 (i. 5. 25)

अत्यन्तकुत्सित (atyanta-kutsita) *adj.* very disgusting अत्यन्तकुत्सिते क्षिष्णुर्णान्तो निराकरिष्णुके S'abdaRa.(Su.) 3. 12.

अत्यन्तकुरूप (atyanta-kurūpa) *adj.* very ugly दामरसन्धिविग्रही । अत्यन्तकुरूपः PurāPraSaṁ. 119. 1.

अत्यन्तकुशल (atyanta-kuśala) *adj.* very clever, very skilful एतद्वेदितुमिच्छामः अत्यन्तकुशलो ह्यसि VāyuP. i. 7. 3; MatsyaP. 48. 104; यदिदं जगदत्यन्तकुशलशिल्पिभिरपि दुर्निर्माणं °प्रयत्नपूर्वकं भवितुमर्हतीति KenUVāBh. 86. 19 (*on* 3. 1)

अत्यन्तकुष्ठिन् (atyanta-kuṣṭhin) *adj.* suffering from severe leprosy दस्युर्ददर्श ताम् ··· । स्वयं स्नानाङ्गरागाद्यं कस्याप्यत्यन्तकुष्ठिनः । नानोपचारं परमम् ···कुर्वतीम् PārśvC. 2. 625.

अत्यन्तकुसीदिकुलीन (atyanta-kusīdikulīna) *adj.* born in the family of great usurers मगन्दः कुसीदी । ··· तदपत्यं प्रमगन्दः अत्यन्तकुसीदिकुलीनः Nir. 6. 32 (129. 13)

अत्यन्तकृच्छ्रतस् (atyantakṛcchra-tas) *adv.* with great difficulty चिरेण निद्रया लब्धं पद्ममत्यन्तकृच्छ्रतः PadmP.(Ra.) 8. 351.

अत्यन्तकृपा (atyanta-kṛpā) *f.* great mercy पद्मनाभपरायणः । अत्यन्तकृपया युक्तं चेतस्तत्र तदाकरोत् PadmP. iv. 20. 65.

अत्यन्तकृश (atyanta-kṛśa) *adj.* extremely emaciated अन्तर्वर्त्नीं सतीमेतामत्यन्तकृशविग्रहाम् । भर्तापृच्छत् PadmP.(Ra.) 7. 3.

अत्यन्तकृशता (atyantakṛśa-tā) *f.* extreme leanness अत्यन्तकृशतया तै रङ्क इति दत्ताभिधानस्तार्णमुटजं विधाय तदवष्टम्भेन यावत्तस्थौ PrabaCin. 108. 5.

अत्यन्तकृशत्व (atyantakṛśa-tva) *n.* extreme thinness यदा त्वत्यन्तकृशत्वात् तक्षणादिरहितोऽपि खदिरो नियोजनेऽप्ययोग्यः तदापि मुख्यत्वात्खदिर एवोपादेयः NyāyMāVi. 328. 3 (*on* vi. 3. 20)

अत्यन्तकृष्ण (atyanta-kṛṣṇa) *adj.* very dark अत्यन्तकृष्णः स विनिर्मलस्त्वम् ··· विष्णुः कथं वीर तवोपमानम् Subhāṣi. 2538.

अत्यन्तकोप (atyanta-kopa) *m.* extreme wrath अलमत्यन्तकोपेन तात मन्युमिमं जहि ViṣṇuP. i. 1. 16; LiṅgaP. i. 64. 108; स छिन्नधन्वा विरथः ··· । अत्यन्तकोपमापन्नः स्यन्दनं परमाविशत् PadmP. iv. 41. 16; अत्यन्तकोपज्वलितान्मुखाद्विष्णोः ··· निश्चक्राम महत्तेजः SkandP. iii(1). 6. 33; BrahmVaiP. ii. 16. 95; अत्यन्तकोपः कटुका च वाणी ···चिह्नानि देहे नरकस्थितानाम् CāṇaNīDa. 7. 17.

अत्यन्तकोपकार (atyantakopa-kāra) *adj.* causing severe anger अत्यन्तकोऽपकारेण निरास्थन्न तदानवम् । अत्यन्तकोपकारेण निरास्थं नतदानवम् RāghPāṇ.(Dha.) 18. 83.

अत्यन्तकोपन (atyanta-kopana) *adj.* very irascible, extremely wrathful दुर्वालः खल्वाटकः कपिलकेशो वात्यन्तकोपनो वा SmṛtiCan. v. 169. 21; गच्छन्नेव स नभसि···अनसूयागर्भसंभवमप्यत्यन्तकोपनं दुर्वाससं नाम तापसमद्राक्षीत् NīlaVi. 12. 13; नामलिङ्गानि···चण्डस्त्वत्यन्तकोपनः AgniP. 366. 8; AmaK. 2088; *n.* extreme wrath चण्डानि प्रचण्डानि ··· अत्यन्तकोपनचिह्नभूतनेत्रशोणिमादिव(? म)न्ति वा मुण्डानि येषामसुराणां तान्निषूदनी(? ती)ति वा LalitāSaBh. 154. 20 (*on* 196)

अत्यन्तकोपाकरण (atyantakopākaraṇa) *n.* not showing great anger नायकापराधाधिक्येऽत्यन्तकोपाकरणं खण्डितायां हितकारिणीत्वम् ··· संभोगार्थप्रयत्नश्च SṛṅgāMañ (A.) 39. 17.

अत्यन्तकोपिन् (atyanta-kopin) *adj.* extremely irascible चण्डस्त्वत्यन्तकोपी स्यात् KośaKaTa. 2. 124.

अत्यन्तकोमल (atyanta-komala) *adj.* very delicate or beautiful अत्यन्तकोमलान्यत्र सदा विकसितानि च ··· बहुशः सन्ति पद्मानि BrahmāṇḍP. iii. 35. 78; एतत्सर्षपवत्रं स्याच्छाणे वह्निं वमत्यपि । अपि कुण्डलिकां याति एतदत्यन्तकोमलम् YuktiKa. 151. 5.

अत्यन्तकोविदा (atyanta-kovidā) *adj.* (*f.*) very expert, highly skilled क्रीडायां बहुभेदायामस्यां सात्यन्तकोविदा PadmP.(Ra.) 24. 69.

अत्यन्तकौलीन (atyanta-kaulīna) *n.* extremely noble family प्रार्थनाशब्दोऽप्यतितरां रमणीयः । यस्मात्काकतालीययोगेन तत्समागमः कदाचिन्न वाच्यतावहः । प्रार्थना पुनरत्रात्यन्तकौलीनकलङ्ककारिणी Kāvyānu.(He.) 167. 25.

अत्यन्तकौशल (atyanta-kauśala) *n.* great skill or dexterity अत्यन्तकौशलेऽपि किंचिन्न्यूनाधिकभावस्यावश्यकत्वाभावात् (? श्यकत्वात्) ··· अधिकानां ग्रहणमवर्जनीयम् MayūMāli. 370. 19 (*on* iv. 2. 5)

अत्यन्तक्रुद्धा (atyanta-kruddhā) *adj.* (*f.*) exceedingly enraged शपथैः प्रतियाचितैः पादपतनैश्च (स्त्रियं) ग्राहयेत् । व्रीडायुक्तापि योषिदत्यन्तक्रुद्धापि न पादपतनमतिवर्तते KāmSū. 200 (3. 2)

अत्यन्तक्रोध (atyanta-krodha) *m.* extreme wrath or ire तदा विकर्तनं(नः) कुकर्मकर्मठेऽत्यन्तक्रोधादिव सुयोधने । कर्मसाक्षी तदा मङ्क्षु जज्वाल PāṇḍaC. 7. 27.

अत्यन्तक्रोधसक्त (atyanta-krodhasakta) *adj.* excessively given to anger, over-irate अत्यन्तक्रोधसक्तोऽपि कदाचित्कीर्तयेद्धरिम् । सोऽपि ··· मुक्तिं लभेत् BrahmP. 216. 89.

अत्यन्तक्लिष्ट (atyanta-kliṣṭa) *adj.* [*f.* -ā] extremely laboured or strained विधौ च लक्षणात्यन्तक्लिष्टा समाश्रिता स्यात् SāstrDī. 60. 9 (*on* i. 4. 3); रुद्रादिमुक्तादिशब्दानां लब्धात्मकरूढिपरित्यागेनात्यन्तक्लिष्टयोगकल्पनादनल्पमेवाज्ञानमापद्यते TristhaSe. 314. 7; अत्यन्तक्लिष्टगौण्याश्रयणं श्रुतिबाधश्च न दोषः MayūMāli. 69. 11 (*on* i. 4. 5)

अत्यन्तक्लिष्टत्व (atyantakliṣṭa-tva) *n.* far-fetchedness, state of being excessively laboured अत्रत्यवाक्यस्य ··· पक्षान्तरपरत्ववर्णनमत्यन्तक्लिष्टत्वादयुक्तमिति MayūMāli. 65. 6 (*on* i. 4. 4)

अत्यन्तक्लेश (atyanta-kleśa) *m.* excessive hardship (भिक्षा) अत्यन्तक्लेशनिर्माणा समानीतातिदूरतः । तया पृष्ठं तु मे भग्नम् BṛKathāK. 63. 71; उक्तयावकभोजनस्यात्यन्तक्लेशावहत्वादुपवासतुल्यत्वम् BālamBha. iii. 189. 4 (*on* 3. 323); व्रतस्यात्यन्तक्लेशयुक्तत्वेन···अष्टौ गावः (देयाः) BālamBha. iii. 198. 1 (*on* 3. 327)

अत्यन्तक्षय (atyanta-kṣaya) *m.* **A** total destruction सा समस्तमहामोहमूर्धाभिषिक्तस्कन्धावारस्यात्यन्तक्षये संभूतत्वात् TattvPradī.(A.) 58. 8 (*on* 1. 45); यत्र संस्कारस्य अत्यन्तक्षयेण चित्तस्य विलयात् मोक्षो भवति YogVār. *on* 1. 1; **B** total decrease or loss अत्यन्तक्षयपक्षे तु परेद्युर्नापराह्णगा BṛNāraP. 27. 31; हेमाद्रिस्त्वपराह्णसंध्याव्यापि परदिने प्रतिपत्तुर्थांशे चन्द्रोदये च सति द्वितीयादिष्वत्यन्तक्षये सति पूर्वेद्युर्याग: NirṇaSi. 37. 11.

अत्यन्तक्षीणकोश (atyantakṣīṇa-kośa) *adj.* whose treasury is very much exhausted शिलोञ्छेनापि जीवतोऽत्यन्तक्षीणकोशस्य विस्तीर्यते यशः (नृपतेः) ManuBh. ii. 10. 25 (*on* 7. 33)

अत्यन्तक्षुद्र (atyanta-kṣudra) *adj.* utterly mean or low अत्यन्तक्षुद्र निर्लज्ज परस्त्रीसंगलोलुप । ··· परलोकं व्रजाधुना PadmP.(Ra.) 95. 19.

अत्यन्तक्षुधार्त (atyanta-kṣudhārta) *adj.* extremely afflicted with hunger वयमत्यन्तक्षुधार्ताः Tantrākhyā 66. 14 = PañcT. 2. 29(49) (229. 6)

अत्यन्तखर (atyanta-khara) *adj.* very hard or harsh प्रखरम् ··· त्रिष्वत्यन्तखरे MediK. 146. 177.

अत्यन्तखिन्न (atyanta-khinna) *adj.* greatly dejected मुनिः ···अत्यन्तखिन्नो निजयोगभूम्ना प्राविक्षदङ्गं पृथुकस्य तस्य SaṅkaDigVi.(Mā.) 13. 37.

अत्यन्तखिन्नधी (atyantakhinna-dhī) *adj.* of greatly dejected mind इत्युक्तो ब्रह्मणा सौरिः पुनरत्यन्तखिन्नधीः । उवाच SkandP. ii(7). 13. 16.

अत्यन्तखेद (atyanta-kheda) *m.* extreme distress or exhaustion अङ्गानामनुलेपनस्मरणमप्यत्यन्तखेदावहम् । हन्ताधीरदृशः किमन्यदलकामोदोऽपि भारायते Kuval. 42 (5)

अत्यन्तखेदित (atyanta-khedita) *adj.* extremely distressed अत्यन्तखेदितोऽप्यासीत् ··· । दर्पं हन्तुं नृपस्तस्य संनद्धो न तु जीवितम् RājTa.(Ka.) 7. 604.

अत्यन्तग (atyanta-ga) *adj.* [*f.* -ā] **i** reaching the farthest end गमेर्डो भवति सुबन्ते वाचि ··· अत्यन्तगः JaineVyā. 106. 17 (*on* ii. 2. 46); CāndraVṛ. i. 2. 35; अन्त अत्यन्त ··· इत्येतेषु ··· गमेर्डो भवति । अन्तगः अत्यन्तगः KāśiVṛ. *on* P. iii. 2. 48; **ii** attaining the highest limit दूरगैरन्तगैर्बाणैर्भवानत्यन्तगः श्रियः (v. l. °अत्यन्तगश्रियः) । अपि संक्रन्दनस्य स्यात् क्रुद्धः Bhaṭṭi. 6. 110 (comm. अत्यन्तगा अतिभूमिं गता श्रीर्यस्य)

अत्यन्तगत (atyanta-gata) *adj.* [*f.* -ā] **A** always applicable, universal अनत्यन्तगतस्त्वेष उद्देशो भवति Nir. 12. 4 (219. 10); **B** departed forever (i. e. dead) कथमत्यन्तगता(त्वं) न मां दहेः RaghuVa. 8. 56 (comm. पुनरावृत्तिरहिता)

अत्यन्तगति (atyanta-gati) *f.* (Gr.) **A** contact covering the whole, complete contact अनत्यन्तगतौ क्तात् P. v. 4. 4; अत्यन्तगतिरशेषेण संबन्धः तदभावोऽनत्यन्तगतिः ··· भिन्नकः । छिन्नकः KāśiVṛ. *on* P. v. 4. 4; **B** utmost speed, motion or velocity ये त्वेतेऽत्यन्तगतियुक्तास्तत्र कथम् । धावतः पततः MahāBh. i. 327. 17 (*on* i. 4. 24)

अत्यन्तगभीर (atyanta-gabhīra) *adj.* very deep or profound सुरेश्वरार्यो गुरुमात्मदेशम् । शारीरकेऽत्यन्तगभीरभावे वृत्तिं स्फुटं कर्तुमना जगाद SaṅkaDigVi.(Mā.) 13. 1.

अत्यन्तगमन (atyanta-gamana) *n.* final departure (i. e. death) आयुर्नासाग्रसञ्चारि निःश्वासोच्छ्वासकैतवात् । अत्यन्तगमनायेव सदाभ्यासे कृतोद्यमम् PārśvC. 1. 749.

अत्यन्तगमनोत्सुक (atyanta-gamanotsuka) *adj.* extremely eager to depart इदानीमत्यन्तगमनोत्सुकोऽहम् TilaMañ. 171. 11.

अत्यन्तगम्भीरा (atyanta-gambhīrā) *adj.* (*f.*) extremely deep अवतेरुरत्यन्तगम्भीरां तां महापगाम् PadmP.(Ra.) 32. 52.

अत्यन्तगरिष्ठद (atyantagariṣṭha-da) *adj.* vanquisher of the most

formidable (foe) करालाक्षश्च भूभर्ता षष्ठोऽत्यन्तगरिष्ठदः (दैत्यः) । वज्रनिष्ठुरघोषश्च प्राचलत्प्रेतवाहनः BrahmāṇḍP. iii. 24. 52.

अत्यन्तगरीयसी (atyanta-garīyasī) *adj.* (comp.) (*f.*) very much more important वसतां गुरुगेहेषु क्षमात्यन्तगरीयसी । ··· कृता सा हि हितात्यन्तम् PadmP.(Ra.) 8. 334.

अत्यन्तगर्जन (atyanta-garjana) *adj.* roaring very loudly (यः) अत्यन्तगर्जनान् मत्तान् मातङ्गानजयद्रणे PṛthvīVi. 5. 113.

अत्यन्तगर्व (atyanta-garva) *adj.* having excessive pride अत्यन्तगर्वमनधीतसमस्तशास्त्रम् (पुरुषम्) । ··· कामाक्षि नैव तव काङ्क्षति दृष्टिपातः Mūka-Pañ. 1. 99.

अत्यन्तगर्विता (atyanta-garvitā) *adj.* (*f.*) excessively arrogant or proud यद्विवाहोत्सवे मत्ता नृत्यस्यत्यन्तगर्विता PāṇḍaC. 2. 168; प्रेष्याभियाति चेटीभिः प्रियमत्यन्तगर्विता BhāvPra.(S'ā.) 101. 15 (4)

अत्यन्तगर्हणीय (atyanta-garhaṇīya) *adj.* very despisable अत्रात्यन्तगर्हणीयचरितं पदार्थान्तरं प्रतीयमानतया चेतसि निधाय ··· सलिलनिधिः वाच्यतयोपक्रान्तः VakroJī. 59. 12.

अत्यन्तगर्हित (atyanta-garhita) *adj.* greatly condemned, utterly censured न पातव्यमपेयं च द्विजैरत्यन्तगर्हितम् BṛParāSm. 6. 249; युगपद्विलयं प्राप्ताः ··· सद्भिरत्यन्तगर्हिताः (सगरात्मजाः) BrahmāṇḍP ii. 53. 43; तैरयं पशुधर्मः स चात्यन्तगर्हितो मनुष्याणामपि प्रोक्तः प्रवर्तितः ManuBh. ii. 261. 6 (*on* 9. 66); Aparā. 1047. 24 (*on* 3. 229); BālamBha. ii. 164. 29 (*on* 2. 127)

अत्यन्तगर्हितत्व (atyantagarhita-tva) *n.* the state of being utterly condemned or censured चौरस्य ··· अत्यन्तगर्हितत्वात्पृथङ्निर्देशः ManvaVi. 169. 25 (*on* 4. 133); एवं पञ्चरात्राख्यैकशास्त्रावान्तरसंहितासंकरस्यात्यन्तगर्हितत्वे वैखानसपञ्चरात्रसंकरः कैमुत्यनिषिद्धः PāñcRāRa. 20. 12.

अत्यन्तगहन (atyanta-gahana) *adj.* very profound तदुपासनमत्यन्तगहनमपि ··· यो मनोलयं करोति स मुक्तः S'aṅkaVi.(Ā.) 182. 3.

अत्यन्तगहनीकृत (atyantagahanī-kṛta) *adj.* made greatly dense or thick गगनं वृक्षसंघातैरत्यन्तगहनीकृतम् PadmP.(Ra.) 74. 106.

अत्यन्तगह्वरा (atyanta-gahvarā) *adj.* (*f.*) extremely deep लङ्का अगम्या ··· सुभीमात्यन्तगह्वरा PadmP.(Ra.) 48. 245.

अत्यन्तगाढ (atyanta-gāḍha) *adj.* very deep सात्यन्तगाढप्रेम्णा तल्लोकसेवनात् स्वोच्छिष्टं मुञ्जानान् तान् प्रति तद्भावाभवत् SāmaraU. 246. 20.

अत्यन्तगामिन् (atyantagām-in) *adj.* A constantly moving on मन्ये पर्यायधर्मोऽयं कालस्यात्यन्तगामिनः । चक्रे प्रधिरिवासक्तो नास्य शक्यं पलायितुम् MahāBhā. v. 50. 58; B going very fast or very far अत्यन्तीनोऽत्यन्तगामिनि AbhidhāCin. 495; ParaNā. 1959; KośaKaTa. 1. 2611 (cf. अत्यन्तं गामी, भृशं गन्ता SiddhāKau. 294B. 3)

अत्यन्तगुणदैव (atyantaguṇa-daiva) *adj.* having fortune with excellent qualities स एव यदापच्चगुणदैवेनानुष्ठीयते तदा क्लेशेन विनैकान्तेन समग्रफलसाधको भवति (v. l. यदात्यन्तगुणदैवे GHARPURE Ed.) ManuBh. ii. 63. 26 (*on* 7. 205)

अत्यन्तगुणभूत (atyanta-guṇabhūta) *adj.* completely subordinate or ancillary तत्रात्यन्तगुणभूता अध्वर्य्वादयः न फलं प्राप्नुवन्ति S'ābaBh. 973. 1 (*on* iii. 4. 35); एवमिहाप्यत्यन्तगुणभूत एव कर्ता प्रतीयते ṬupṬ. 81. 21 (*on* vi. 1. 1)

अत्यन्तगुणभूतत्व (atyantaguṇabhūta-tva) *n.* the state of being wholly subordinate न संस्कारक्रिया (केनचिद्रूपेणेप्सिता) अत्यन्तगुणभूतत्वात् TantrVā 411. 15 (*on* ii. 1. 28)

अत्यन्तगुणयोग (atyantaguṇa-yoga) *m.* possession of very high qualities यदि तु निरुपाधिस्तादृशश्चेदत्यन्तगुणयोगात्स्यादुपेयादेवासौ एक एव संवादकत्वम् ManuBh. ii. 75. 3 (*on* 8. 3)

अत्यन्तगुणवत् (atyanta-guṇava(n)t) *adj.* [*f.* -vatī] **i** perfectly meritorious, most virtuous, endowed with excellent qualities नात्यन्तगुणवान्कश्चिन्नचाप्यत्यन्तनिर्गुणः । उभयं सर्वकार्येषु दृश्यते साध्वसाधु च MahāBhā. xii. 15. 50; गौतमीयमपि शूद्रायामनात्रेय्यामेवात्यन्तगुणवत्यां वधे द्रष्टव्यम् BālaKrī. ii. 159. 9 (*on* 3. 265 (272)); यदा पुनर्निमित्यत्यन्तगुणवान् आत्मघाती चात्यन्तनिर्गुणस्तदैकवर्षमेव ब्रह्महत्याव्रतं कुर्यात् Mitā. 420. 28 (*on* 3. 243); 427. 5 (*on* 3. 249); एतदमतिपूर्वकमत्यन्तगुणवतस्तद्गमने वीर्योत्सर्गात्प्राङ्निवृत्तौ द्रष्टव्यम् Aparā. 1118. 13 (*on* 3. 268); अत्यन्तगुणवत्प्रव्रजितागमनविषयम् ··· नारदवचनम् Subodhi. 108. 6 (*on* 2. 293); BālamBha. ii. 342. 3 (2. 293); अयं च भ्रातृसद्भावे पत्यधिकारोऽत्यन्तगुणवत्पत्नीविषयः DīpKa. 57. 19 (*on* 2. 136); 98. 31 (*on* 3. 257); इदं चात्यन्तगुणवतो निर्धनस्य निर्गुणब्राह्मणवधे ViraMi. 939. 14 (*on* 3. 249); **ii** well equipped with favourable conditions उद्यानानि पुरा भान्ति ···। जनानां रतिसंयोगेष्वत्यन्तगुणवन्ति च Rāmā. ii. 1662*(2)

अत्यन्तगुणाधिक (atyantaguṇādhika) *adj.* superior in endless qualities अत्यन्तगुणाधिको विशिष्टः KāvyālaṅSū. iv. 3. 24.

अत्यन्तगुणिन् (atyanta-guṇin) *adj.* having extraordinary qualities, [MW]

अत्यन्तगुप्त (atyanta-gupta) *adj.* **i** well protected, well controlled मुनयः ···भीतकूर्मवदत्यन्तगुप्तेन्द्रियकदम्बकाः PadmP.(Ra.) 14. 175; **ii** completely secret, extremely concealed इदं कवचमत्यन्तगुप्तं कुत्रापि नो वदेत् PañcaRā.(Nā.) iv. 5. 7; श्रीमूलस्थानमाहुः सरसिरुहदृशामङ्गमत्यन्तगुप्तम् RasSa. 7.

अत्यन्तगुरु (atyanta-guru) *adj.* **i** very great (i. e. unbearable), intense स तादृशोऽपि बद्धमूलोऽप्यत्यन्तगुरुरेकपद एवास्य ननाश शोकावेशः HarṣaC. 251. 17; **ii** very great, superior दृढा शिरोधि दधदंसलोऽसौ राजानमत्यन्तगुरुं चकार VīraBhā. 1. 81; **iii** very heavy, huge कथं चात्यन्तगुरुभिः पर्वतैरलमुन्नतैः सेतुः शाखामृगैर्बद्धो यः सुरैरपि दुर्घटः PadmP.(Ra.) 3. 22; कर्कशः ··· येऽत्यन्तगुरवः स्निग्धास्ते शूद्राः प्रस्तराधमाः YuktiKa. 139. 12; अत्यन्तगुरुदेहस्तु गजो भित्त्वा च मेदिनीम् Hastyāyur. 245. 8 (*on* ii. 38. 6); **iv** very severe कामतो मोहात्कृतं पापं प्रायश्चित्तैः पृथग्विधैरत्यन्तगुरुभिरपगच्छति BālaKrī. ii. 81. 25 (*on* 3. 212 (222)); **v** extremely complicated, difficult तेनात्यन्तगुरुः सत्रयमुपायस्स्तुत्यर्थमेव लघुरित्युपचरितः TantraVā. 209. 20 (i. 3. 18)

अत्यन्तगुरुतर (atyanta-gurutara) *adj.* very grave, heinous (sin) अत्यन्तगुरुतरमहापातकविषयं चैतत् Aparā. 1218. 4 (*on* 3. 311)

अत्यन्तगुरुभक्त (atyanta-gurubhakta) *adj.* very much devoted to the teacher अत्यन्तगुरुभक्ताय शुद्धाय यदि कथ्यते । तदाष्टवर्णं वक्तव्यम् Kula-CūT. 7. 5.

अत्यन्तगुह्य (atyanta-guhya) *adj.* great secret नामानि त्रिपुरे भवन्ति खलु यान्यत्यन्तगुह्यानि ते DevīPañ. 1. 19; सरहस्यम् अत्यन्तगुह्यतदर्थव्याख्यासहितम् ManvaVi. 204. 26 (*on* 2. 140)

अत्यन्तगुह्यतम (atyanta-guhyatama) *adj.* extremely secret अत्यन्तगुह्यतमम् अत्यन्तरहस्यम् ··· शृणु मे ··· वचः GītāBh.(S'aṅ.) 547. 6 (*on* 18. 64)

अत्यन्तगूढ (atyanta-gūḍha) *adj.* **i** concealed extremely well प्रागात्मानं निगमशिरसामन्तरत्यन्तगूढम् । बुद्धौ कर्तुं निजपदजुषामब्धिमध्येऽशयिष्ठाः MayūSam. 1. 27; देवाः स्वाहासमीपं निभृतमुपगतास्तरथुरत्यन्तगूढाः SvāhāSu. 19; **ii** entirely hidden (hence) unintelligible तत्रापेऽत्यन्तगूढाविशदविशदतच्छायजीवादिवाचः NyāyPari. 481. 9.

अत्यन्तगेय (atyanta-geya) *adj.* very melodious or musical अत्यन्तगेयरवदत्तमना वराकः श्रोत्रेन्द्रियेण समवर्तिसुखं प्रयाति (कुरङ्गः) SubhāRa-Saṁ. 87.

अत्यन्तगोपन (atyanta-gopana) *n.* great secret बीजानां च ध्यानभेदमत्यन्तगोपनं महत् KāliViT. 31. 2.

अत्यन्तगौरव (atyanta-gaurava) *n.* A very high reverence तस्यामत्यन्तगौरवस्य प्रसिद्धत्वात् ChāndoUBh. 159. 10 (*on* iii. 12. 1); B extreme cumbrousness तैश्च स्तोत्रे विधीयमानेऽत्यन्तगौरवम् S'āstrDī. 60. 9 (*on* i. 4. 3); अध्वर्योः परिक्रेतृत्वस्यात्यन्ताप्राप्त्या तत्प्रापकत्वे विधेरत्यन्तगौरवप्रसङ्गात् । स्वामिकर्तृकत्वे तु विधेर्नात्यन्तगौरवम् MayūMāli. 332. 30 (*on* iii. 8. 1); अनेकादृष्टानुविद्धकर्मान्तरत्वकल्पनायामत्यन्तगौरवापत्तिः MīmāKau. 90. 8 (*on* i. 3. 12)

अत्यन्तगौरवम् (atyanta-gauravam) *adv.* with very great respect वशी ··· पौरैरीक्षितोऽत्यन्तगौरवम् RaghuVa. 15. 38.

अत्यन्तग्रह (atyanta-graha) *m.* full or complete perception अत्यन्तग्रहे अत्यन्ताग्रहे च नाध्यासः Bhām. 21. 21 (*on* 1. 1. 1)

अत्यन्तघन (atyanta-ghana) *adj.* **i** very solid निरूहं संप्रदापयेत् ···नैवात्यन्तघनं तथा AśvaVai. 16. 22; **ii** extremely firm अत्यन्तघनबन्धेन तमसा भूयसापि किम् PadmP.(Ra.) 28. 147; **iii** very strong, intense स्वसात्यन्तघनस्नेहात्पारम्पर्याच्च तत्पतिः PadmP.(Ra.) 10. 28; **iv** full of many clouds घनाध्वनोऽत्यन्तघनस्य लङ्घनात्परिश्रमं प्राप्य पिपासयाकुलाः । ··· अद्रिमुर्युयुव्रजाः NemiNir. 5. 32.

अत्यन्तघर्माम्भस् (atyanta-gharmāmbhas) *n.* profuse perspiration अत्यन्तघर्माम्भःकणिकामौक्तिकोज्ज्वलः ··· स्नातुमिच्छामीत्याह ViṣṇuP. v. 25. 8 = BrahmP. 198. 8.

अत्यन्तघोर (atyanta-ghora) *adj.* very terrible, extremely dreadful very severe अत्यन्तघोरो व्यचरंस्तापसांस्तान् प्रधर्षयन् Rāmā. iii. 37. 4; उग्रमत्यन्तघोरं यद्भीषणं भयदायि च AhirbuS. 54. 41; कृत्वा तपोऽत्यन्तघोरम् ··· सिद्धा ··· सौख्यं ···परिप्राप्नुवन्ति PadmP.(Ra.) 78. 62 (36); अत्यन्तघोरैः कर्मभिः असंबद्ध एवायं वर्तते BṛĀraUBh. 573. 15 (*on* iv. 3. 22); मनुष्यः ··· व्रजति कथमनन्तं दुःखमत्यन्तघोरम् SubhāRaSaṁ. 12; अत्यन्तघोरं भगवन्नरसिंह वपुस्तव LiṅgaP. i. 96. 24; PariPar. 1. 371; यानि चात्यन्तघोराणि तै रक्षांसांस्तथा भुवम्

S'ārṅgaPa. 1900.

अत्यन्तचञ्चल (atyanta-cañcala) *adj.* [*f.* –ā] **i** extremely fickle, very unsteady न बबन्धाम्बरे स्थैर्यं विद्युदत्यन्तचञ्चला VisṇuP. v. 6. 42; पतितोऽहम् ··· संसारसागरे ··· निःसारेऽत्यन्तचञ्चले BrahmP. 49. 25; अत्यन्तचञ्चलस्येह पारदस्य निबन्धने । कामं विज्ञायते युक्तिर्न स्त्रीचित्तस्य काचन KathāSaSāg. vii. 3. 232; किंकराः ··· एहिरेयाहिरां चक्रुर्नृत्यन्तोऽत्यन्तचञ्चलाः S'āliC. 6. 161; **ii** very tremulous अत्यन्तचञ्चलोद्वृत्ततारका दृष्टिर्भयानका SaṁgīRa. 7. 390; अत्यन्तचञ्चलमकृत्रिममञ्जनं किम् ··· कामाक्षि नेत्ररुचिनीलिमकन्दली ते MūkaPañ. 1. 83.

अत्यन्तचटुल (atyanta-caṭula) *adj.* very nimble नकुलैर्दृश्यमानानामत्यन्तचटुलं वपुः । मुहुः कुण्डलितैर्भोगैः पन्नगानां व्यचेष्टत BrahmāṇḍP. iii. 23. 61.

अत्यन्तचन्द्रमस् (atyanta-candramas) *m.* name of a Bodhisattva [DBHS]

अत्यन्तचपल (atyanta-capala) *adj.* [*f.* –ā] **i** extremely wanton or unrestrained भिक्षो मे हृदयकपिमत्यन्तचपलं दृढं भक्त्या बद्ध्वा शिव भवदधीनं कुरु S'ivāL 20; स च सहचरोऽत्यन्तचपलः SaduktiKa. 109. 33; **ii** very unsteady, very fickle आयुरत्यन्तचपलं मृत्युरेकान्तनिष्ठुरः YogVā. i. 26. 9; **iii** very tremulous दृष्टिरियम् ···यासीत्पुरा कुरङ्गाक्षि नित्यमत्यन्तचपलैव ChandaśCū. iv. 5. 28.

अत्यन्तचल (atyanta-cala) *adj.* **i** very swift, extremely speedy (मारुतेन) पश्यात्यन्तचलेन सद्म महतामाकाशमारोपिताः (जरत्तृणाद्यवयवाः) BhallS'. 59; Subhāṣi. 1010; **ii** very unsteady or unreliable, BhallS'. 59; Subhāṣi. 1010.

अत्यन्तचापल्य (atyanta-cāpalya) *n.* extreme fickleness or wantonness अत्यन्तचापल्यमसत्क्रियां च । कुमारभावे ··· विचार्य को वा विरतिं न याति SarvaVeSāSaṁ. 29.

अत्यन्तचारु (atyanta-cāru) *adj.* [*f.* -u or –vī] extremely beautiful or charming, very much attractive सरसो मानसाख्यस्य तटेऽथात्यन्तचारुणि । गुरुभ्यां वाञ्छितं कर्तुं तयोर्वैवाहमङ्गलम् PadmP.(Ra.) 15. 91; 46. 139; एवमत्यन्तचार्वीभिरत्युर्वीभिर्विभूतिभिः । महेन्द्रोदयमुद्यानं जातं नन्दनसुन्दरम् PadmP.(Ra.) 95. 47; अप्सरोभिरिवात्यन्तचारुभिः परिशोभितः TriṣaS'aPuC. i. 4. 593; तमप्रतिममत्यन्तचारुवपुषम् (तुष्टाव शौरिम्) Yādavā. 4. 124.

अत्यन्तचारुत्व (atyantacāru-tva) *n.* great charm or beauty इत्यादिश्लेषसंपृक्तत्वमस्या अत्यन्तचारुत्वनिबन्धनम् AlaṅkāSa. 155. 1.

अत्यन्तचित्तैकाग्र्य (atyanta-cittaikāgrya) *n.* complete concentration of mind ध्यानरूपोपासना ··· मानाद्विलक्षणेति तस्यामत्यन्तचित्तैकाग्र्यमपेक्षितम् S'ivārkaMaDī. ii. 436. 21 (*on* iv. 1. 8); i. 187. 15 (*on* i. 1. 4); i. 403. 21 (*on* i. 3. 3)

अत्यन्तचित्र (atyanta-citra) *adj.* **i** very strange or wonderful एतत्ते पूर्वजन्मप्रभृति निगदितं वृत्तमत्यन्तचित्रम् PadmP.(Ra.) 20. 249; **ii** very variegated माल्यान्यत्यन्तचित्राणि प्रापितानि प्रसारणम् PadmP.(Ra.) 95. 45.

अत्यन्तचिन्ता (atyanta-cintā) *f.* too much worry, great anxiety एवमत्यन्तचिन्ताकुलाः (जन्तवः) ··· दैवमाक्षिपन्ति BṛNāraP. 30. 5(1); प्रेताः ··· तर्कयामासुरत्यन्तचिन्ताकुलितचेतसः BṛBrahmaS. i. 5. 109; सः ··· अत्यन्तचिन्ताचकितो निद्रां नापत् RājTa.(Jo.) 888.

अत्यन्तचिरकाल (atyanta-cirakāla) *m.* very long time अतीतेऽब्देऽपि अत्यन्तचिरकालादूर्ध्वम् SmṛtiCan. vi. 55. 6; v. 252. 12.

अत्यन्तचिरकालग (atyantacirakāla-ga) *adj.* lasting for a very long time पशुभूम्यादिकं दत्तम् ··· ददाति परमान् भोगानत्यन्तचिरकालगान् PadmP. (Ra.) 14. 78.

अत्यन्तचिराध्वगा (atyantacirādhva-gā) *adj.* (*f.*) travelling for a very long time गमागमपरिश्रान्ता तत्रात्यन्तचिराध्वगा YogVā. iii. 70. 47.

अत्यन्तचिरोज्झित (atyantacirojjhita) *adj.* given up for a very long time कृष्णात्यन्तचिरोज्झिते च कबरीबन्धे करोतु क्षणम् VeṇīSaṁ. 6. 145.

अत्यन्तचूर्ण (atyanta-cūrṇa) *adj.* crushed to fine powder अस्थि गृहीत्वा हीरकसहितमत्यन्तचूर्णं कृत्वा पायसे प्रक्षिप्य ··· भोजयेत् HārLa. 200. 1.

अत्यन्तच्छवि (atyanta-cchavi) *f.* great lustre or beauty अत्यन्तच्छविसंयुक्ता श्यामकर्णं (°वर्णा) मनोरमा । ··· किन्नरांशकसंभवा Mānaso. iii. 20. 1792.

अत्यन्तच्छिन्न (atyanta-cchinna) *adj.* very precipitous न सुमेर्वादयः पर्वता अत्यन्तच्छिन्नतटाः समुच्छ्रायघनाः भवन्ति Sphuṭā. iii. 87. 11 (*on* 3. 55)

अत्यन्तजघन्य (atyanta-jaghanya) *adj.* extremely low, of a very inferior authority प्रयोगवचनाधीना तु समाख्याऽत्यन्तजघन्यपक्षाश्रयणं तावदेको दोषः MīmāKau. i. 164. 4 (*on* i. 4. 2)

अत्यन्तजघन्यत्व (atyantajaghanya-tva) *n.* very low authority, very inferior value समाहारद्वन्द्वस्यात्यन्तजघन्यत्वात् BhāṭṭDī. iii. 274. 21 (*on* x. 4. 2); अनीप्सितद्वितीयातः तस्यात्यन्तजघन्यत्वात् MayūMāli. 371. 14 (*on* iv. 2. 26)

अत्यन्तजड (atyanta-jaḍa) *adj.* **i** extremely insentient गुणात् अत्यन्तजडात् जानामि-इति-वपुः चित्स्वभावतामभ्येति PratyabhiVi. i. 73. 1 (*on* i. 1. 4); **ii** quite dull, completely devoid of lustre अत्यन्तजडाज्जलाद्द्युतिमतो ज्वालाध्वजस्योद्भवः RājTa.(Ka.) 4. 41.

अत्यन्तजनानुराग (atyanta-janānurāga) *m.* great affection for men (दिनेशः) आर्द्राप्रवेशे ··· कुरुते ··· अत्यन्तजनानुरागम् VasiS. 2. 10.

अत्यन्तजरासंयोग (atyantajarā-saṁyoga) *m.* union with excessive old age (i. e. decrepitude) अत्यन्तजरासंयोगे 'जरया ह वा' इत्यनर्थकम् NyāyBh. 279. 11 (*on* iv. 1. 60)

अत्यन्तजलभार (atyanta-jalabhāra) *m.* excessive weight of water अत्यन्तजलभारेण पतिता जलदा इव PadmP.(Ra.) 22. 57.

अत्यन्तजातिभेद (atyanta-jātibheda) *m.* extreme difference in the essential nature (of the probandum in the present case and of the earlier cases) प्रसिद्धसाध्ययोरत्यन्तजातिभेदे लिङ्गानामनुमेयधर्मसामान्यानुवृत्तितोऽनुमानं सामान्यतो दृष्टम् PadārthaSaṁ. 206. 1; अत्यन्तजातिभेदे सति ··· लिङ्गसामान्यस्य साध्यसामान्येन सहाविनाभावाद्यनुमानं तत्सामान्यतो दृष्टम् Kiraṇā. 305. 16.

अत्यन्तजात्यभेद (atyanta-jātyabheda) *m.* complete identity of essential nature (between the probandum of the present and of the earlier cases) तत्र दृष्टं प्रसिद्धसाध्ययोरत्यन्तजात्यभेदेऽनुमानम् PadārthaSaṁ. 205. 20; प्रसिद्धं यत्पूर्वलिङ्गेन सह दृष्टं साध्यं यत्संप्रत्यनुमेयं तयोरत्यन्तजात्यभेदे सति यदनुमानं तद् दृष्टम् Nyāyka. 212. 6 = Kiraṇā. 305. 5.

अत्यन्तजितेन्द्रियत्व (atyantajitendriya-tva) *n.* the state of completely conquering the senses स्त्र्यादिसंदर्शनादत्यन्तजितेन्द्रियत्वेऽपि प्रमादो मा भूदित्यप्रमत्तश्चरेत् BālaKrī. ii. 26. 16 (*on* 3. 59)

अत्यन्तजीर्णता (atyantajīrṇa-tā) *f.* the state of being very old or dilapidated अत्यन्तजीर्णतया च खण्डस्फुटितमायतनमद्राक्षम् UdaySuKa. 60. 27.

अत्यन्तज्ञान (atyanta-jñāna) *n.* excellent knowledge तेऽत्यन्तज्ञानसंपन्ना न चक्रुः सृष्टिमुत्तमाम् GaṇeP. i. 16. 7.

अत्यन्ततत्पर (atyanta-tatpara) *adj.* very much devoted to (something) तस्याः ··· परिचर्यां स्वयं शक्रश्चकारात्यन्ततत्परः Rāmā. i. 974*(2); सुबुद्धिर्विदधे नित्यं तत्तथात्यन्ततत्परः TriṣaS'aPuC. i. 1. 421.

अत्यन्ततत्परता (atyantatatpara-tā) *f.* great or extreme devotion or attachment प्रकृष्टप्रसङ्गेनात्यन्ततत्परतया अर्थान् नेहेतोद्यमेन न साधयेत् ManvaVi. 460. 19 (*on* 4. 15)

अत्यन्ततनु (atyanta-tanu) *adj.* very thin (i. e. too much diluted) कषाये कल्कमालोड्य निरूहं संप्रदापयेत् । नैवात्यन्ततनुम् AśvaVai. 16. 22.

अत्यन्ततनुतस् (atyantatanu-tas) *adv.* due to being very minute or subtle अत्यन्ततनुतो ह्यन्तर्विन्ध्यादेरीक्षणं कुतः BṛĀraUBhVā. iv. 3. 1212.

अत्यन्ततपस्विन् (atyanta-tapasvin) *m.* great ascetic अभवन् प्रजाः । ···तदात्यन्ततपस्विनाम् VisṇuP. i. 15. 80; शुक्रस्यास्याभवन्पुत्राः पञ्चात्यन्ततपस्विनः KūrmaP. 218. 9 (1. 19)

अत्यन्ततप्त (atyanta-tapta) *adj.* extremely hot or boiling घृतेनात्यन्ततप्तेन तदा तैलेन तन्मुखम् । ··· भृशमापूर्य हन्यते S'ivaP. v. 9. 19 (416A. 13)

अत्यन्ततरम् (atyanta-taram) *adv.* exceedingly, very much स्पर्शरसेऽत्यन्ततरमुत्कण्ठितोऽस्मि ते Stotrā. 10. 15.

अत्यन्ततरोक्त (atyantatarokta) *adj.* repetedly told यो ह्यत्यन्ततरोक्तश्च पुराकल्पः स उच्यते VāyuP. i. 59. 112.

अत्यन्ततस् (atyanta-tas) *adv.* **i** always, invariably, permanently दृष्टे सापार्था चेन्नैकान्तात्यन्ततोऽभावात् SāṁkhyaKā. 1; यत एकान्ततोऽवश्यमत्यन्ततो नित्यं दृष्टेन हेतुनाभिघातो न भवति SāṁkhyaKāBh. 2. 8 (*on* 1); एकान्तात्यन्ततश्च पुनस्ते ह्युपायाः ··· तुल्या एव संभवन्ति RaseCin. 1. 11 (3. 22); **ii** absolutely, completely (essentially) सास्नादिभ्यस्तु पिण्डस्य भेदो नात्यन्ततो यदा S'lokaVār. 5(16). 46 (557. 3); सर्वेषां पदार्थानां ब्रह्मात्मकत्वादत्यन्ततो नानाभावो नास्ति VedāntKau. 127. 21 (*on* i. 4. 11); **iii** extremely, excessively ये सुकुमारमतयः ··· ये चात्यन्ततोऽपि जडमतयः ··· उभयेऽपि ··· प्रवर्तयितव्याः VyaktiVi. 20. 25.

अत्यन्तता (atyanta-tā) *f.* [Inst.] absolutely [DBHS]

अत्यन्ततात्पर्यता (atyantatātparya-tā) *f.* total attentiveness or intentness (i. e. being completely given to some aim or object) ताच्छील्यप्रत्ययोपादानात् अत्यन्ततात्पर्यतयैव तन्मयत्वम्, न तु तत्कर्ममात्रेणेत्याशङ्क्याह पुण्यः पुण्येन कर्मणा भवति BṛĀraUBh. 614. 4 (*on* iv. 4. 5)

अत्यन्ततादात्म्य (atyanta-tādātmya) *n.* absolute identity अत्यन्ततादात्म्ये गमनानुपपत्तेः BrahmSūBh.(S'aṅ.) 836. 8 (*on* iv. 3. 14)

अत्यन्ततान्ता (atyanta-tāntā) *adj.* (*f.*) very much exhausted or languishing अत्यन्ततान्ता न शक्नोम्यहमन्तःपुरं गन्तुम् TilaMañ. 308. 14.

अत्यन्तताप (atyanta-tāpa) *adj.* causing excessive trouble or suffering मातृभोजनैः। अत्यन्ततापैरत्यर्थं वर्धमानातिवेदनः (जन्तुः) VisṇuP. vi. 5. 11; *m.* A excessive trouble or suffering ननु इव शब्दोऽप्यत्यन्ततापाभावेऽनुपपन्नः PrakaVi. 488. 16; B excessive heat अत्यन्ततापे सत्युदकपरिक्षयात् NyāyKa. 197. 2; C fiercely burning heat (of the sun) तत्र भूमिः ··· अत्यन्ततापविषमा निस्तृणा VisṇuDhaP. i. 162. 5.

अत्यन्ततापित (atyanta-tāpita) *adj.* excessively troubled or distressed गृहिणीवृत्तदोषेण गौतमोऽत्यन्ततापितः SabhāS'. 94.

अत्यन्ततामसी (atyanta-tāmasī) *f.* one of the fourteen births of *jīva* (pertaining to very deep ignorances) संदिग्धमोक्षा यदि तत्प्रोच्यतेऽत्यन्ततामसी YogVā. iii. 98. 8 = iii. 94. 19.

अत्यन्तताम्रास्य (atyantatāmrāsya) *adj.* having a very red face कपयः पिंगललोचनाः। क्रोधेनात्यन्तताम्रास्याः प्रत्येकं हनुमत्समाः BrahmāṇḍP. iii. 29. 118.

अत्यन्ततावि‍रहितत्व (atyatatāvirahita-tva) *n.* absence of permanence, temporariness स्रक्चन्दनवनितानाम् ···अनैकान्तिकत्वादत्यन्ततावि‍रहितत्वाच्च परिहरणीयम् RaseCin. 1. 10 (3. 18)

अत्यन्ततिथिवृद्धि (atyanta-tithivṛddhi) *f.* continuation of the (new moon) day (to the *pratipadā* exceeding the limit of late afternoon) (*lit.* excessive increase of the lunar day) अमावास्या प्रतीता चेन्मध्याह्नात्परतो यदि। भूतविद्धेति विख्याता ··· अत्यन्ततिथिवृद्धौ तु भूतविद्धां परित्यजेत् BṛNāraP. 27. 33.

अत्यन्ततिरस्कार (atyanta-tiraskāra) *m.* i total concealment or cover-up सर्वात्मतारूपस्य विक्षेपस्यात्यन्ततिरस्कारादनुत्पत्तिरतीतेऽध्वनि प्रवेशः क्षयः RājMār. 46. 5; ii complete disregard (i. e. total abandonment) अत्र च वाच्यस्यात्यन्ततिरस्कारः पूर्वोक्तमनुसृत्य योजनीयः Loc. 123. 24 (*on* 3. 1)

अत्यन्ततिरस्कृत (atyanta-tiraskṛta) *adj.* [*f.* -ā] i greatly discarded or neglected तथाविधे हि भये नात्मात्यन्ततिरस्कृतो न विशेषत उल्लिखितः AbhinBhā. i. 279. 9 (*on* 6. 31); ii completely abandoned नन्वत्र लक्षणात्यन्ततिरस्कृता Loc. 18. 14 (*on* 1. 4); अत्यन्ततिरस्कृतस्तादृशो वाच्यो यत्र सः Ekāva. 3. 1 (21) (83. 7); तदेवानुपपत्त्यादेः काप्यत्यन्ततिरस्कृतम् BhāvPra.(S'ā.) 173. 2 (6)

अत्यन्ततिरस्कृतत्व (atyantatiraskṛta-tva) *n.* the state of being completely abandoned तत्र मुख्यार्थस्यात्यन्ततिरस्कृतत्वादत्यन्ततिरस्कृतवाच्यत्वम् SāhiDa. 209. 2.

अत्यन्ततिरस्कृतवाच्य (atyantatiraskṛta-vācya) *adj.* (a type of poetry) in which the expressed meaning is completely abandoned तद्भेदा यथा अर्थान्तरसंक्रमितवाच्यः अत्यन्ततिरस्कृतवाच्य इति अविवक्षितवाच्यस्य Loc. 48. 17 (*on* 1. 16); अत्र लिप्तेति पयोदसुहृदामिति च अत्यन्ततिरस्कृतवाच्ययोः संसृष्टिः KāvyPra. 188. 6; अत्यन्ततिरस्कृतवाच्यस्तु पदार्थोपचार एव VyaktiVi. 36. 15; अत्र शंसनस्यात्यन्ततिरस्कृतवाच्यस्यातिप्रसिद्धत्वादगूढत्वम् Ekāva. 4. 1. (6) (131. 1); ध्वनिरर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्चेति द्विविधः SāhiDa. 208. 4; AlaṅkāSa. 14. 3; RasGaṅ. 25. 8.

अत्यन्ततिरस्कृतवाच्यध्वनि (atyantatiraskṛtavācya-dhvani) *m.* variety of poetry based on suggestion in which the expressed meaning is completely discarded [*f.* (in rhetoric) a metaphoric or hyperbolic use of depreciatory language, MW ?]

अत्यन्ततिरोधान (atyanta-tirodhāna) *n.* complete hiding पक्षेऽन्यपदार्थेऽवयवानामत्यन्ततिरोधानान्नास्ति पूरण्याः प्राधान्यम् Pradī. v. 231B. 16 (*on* vi. 3. 34)

अत्यन्ततिरोभाव (atyanta-tirobhāva) *m.* complete or total disappearance उपलब्धिलक्षणप्राप्तस्यात्यन्ततिरोभावोऽनित्यतेत्यन्ये NyāyVār. 285. 20 (*on* ii. 2. 12–13); एवं सत एवात्यन्ततिरोभावो विनाशः इति अनित्यतेति चाख्यायते TātpaṬ.(Vā.) 442. 23 (*on* ii. 2. 13)

अत्यन्ततीक्ष्ण (atyanta-tīkṣṇa) *adj.* i very pungent अत्यम्लानि फलानि···अन्तर्बाह्यमलातिशोधनकराण्यत्यन्ततीक्षणा(? क्ष्णा)नि च KalyāKā. 4. 43; ii very sharp नागराजाविवात्यन्ततीक्ष्णनाराचदन्तुरौ। पृष्ठे निषङ्गौ बिभरांचक्रे विश्वंभराधवः TrisaS'aPuC. i. 5. 409; मृद्व्यप्यत्यन्ततीक्ष्णाग्रा निर्झरोर्मिरिवोत्थिता (वासना) YogVā. iii. 113. 14.

अत्यन्ततीक्ष्णता (atyantatīkṣṇa-tā) *f.* extreme sharpness तस्य (खड्गवरस्य) शाणेऽप्यशाणे खरता मूर्ध्नि चात्यन्ततीक्ष्णता YuktiKa. 159. 20.

अत्यन्ततीव्र (atyanta-tīvra) *adj.* very intense अत्यन्ततीव्रो दर्पदाहज्वरोष्मा Kād. 102. 20.

अत्यन्ततीव्रता (atyantatīvra-tā) *f.* very high-pitched state अत्यन्ततीव्रताद्यापन्नेषु शब्देषु ··· स्थिरत्वम् NyāySiA. 248. 1.

अत्यन्ततुङ्गा (atyanta-tuṅgā) *adj.* (*f.*) very great (*lit.* tall) वयम्··· पूजिता यन्नरेन्द्रेण श्रद्धयात्यन्ततुङ्गया PadmP.(Ra.) 4. 113.

अत्यन्ततुच्छ (atyanta-tuccha) *adj.* i absolutely non-existent, extremely fictitious अत्यन्ततुच्छगगननलिननरविषाणादिव्यावृत्ताः सत्त्वहेतव उदाहर्तव्याः TattvVai. 129. 17 (*on* 3. 13); ii extremely useless संभारोऽयं भुवनभवनव्याप्तिपर्याप्तभोगः सर्वाशासु प्रततजनतापूरणेऽत्यन्ततुच्छः DarpDa. 6. 37.

अत्यन्ततुच्छता (atyantatuccha-tā) *f.* the state of being totally non-existent or fictitious नात्यन्ततुच्छता येनैकान्ततोऽनित्यं स्यात् TattvVai. 129. 17 (*on* 3. 13)

अत्यन्ततुच्छत्व (atyantatuccha-tva) *n.* the state of being totally non-existent or fictitious न हि लोके मृत्तिकाविकाराणामत्यन्ततुच्छत्वं सिद्धं येन दृष्टान्तता स्यादिति SāṁkhyaPraBh. 159. 7 (*on* 6. 52)

अत्यन्ततुमुल (atyanta-tumula) *adj.* extremely tumultuous युद्धम् ··· अत्यन्ततुमुलं चासीच्छक्तीनां सैनिके महत् BrahmāṇḍP. iii. 25. 69.

अत्यन्ततुल्य (atyanta-tulya) *adj.* extremely similar, equal in all respects यश्चान्योऽन्यमत्यन्ततुल्येषु मुक्तात्मादिषु ··· विशेषाख्यः पदार्थः कल्प्यते NyāyPari. 497. 17.

अत्यन्ततुल्यता (atyantatulya-tā) *f.* complete equality, the state of being equal in all respects नात्यन्तमेव बाध्यत्वं न चाप्यत्यन्ततुल्यता TantrVā. 114. 19 (*on* i. 3. 4)

अत्यन्ततुल्यत्व (atyantatulya-tva) *n.* complete equality or similarity 'सीम्नो विवादे क्षेत्रस्य' इत्यादिना यो न्यायोऽभिहितः तस्यारामादीनामत्यन्ततुल्यत्वेन तेष्वतिदेशानपेक्षत्वात् आरामायतनेऽपि च वक्ष्यमाणं वचनं निष्प्रयोजनम् Subodhi. 80. 21 (?22) (*on* 2. 154); BālamBha. ii. 278. 4 (*on* 2. 154)

अत्यन्ततुष्ट (atyanta-tuṣṭa) *adj.* extremely satisfied एतेषु देशेषु दत्तेन कृतेन श्राद्धेनात्यन्ततुष्टाः पितरो भवन्तीति ManuBh. i. 296. 6 (*on* 3. 197)

अत्यन्ततृप्ति (atyanta-tṛpti) *f.* complete satisfaction उपादेयाः श्राद्धेऽत्यन्ततृप्त्यर्थम् DīpKa. 29. 27 (*on* 1. 259)

अत्यन्ततृप्तिद (atyantatṛpti-da) *adj.* giving complete satisfaction खड्गमांसमतीवात्र कालशाकं तथा मधु। शस्तानि कर्मण्यत्यन्ततृप्तिदानि नरेश्वर VisṇuP. iii. 16. 3.

अत्यन्ततृषित (atyanta-tṛṣita) *adj.* very thirsty स्पृशंस्तु विमलं शीतमुदकं द्विरदः सुखम्। अत्यन्ततृषितो वन्यः प्रतिसंहरते करम् Rāmā. iii. 280*; दृष्ट्वा मेघमुखान्नागकुमारान्नभसि स्थितान्। तेऽबध्नन्नञ्जलीन् भालेष्वत्यन्ततृषिता इव TrisaS'aPuC. i. 4. 413.

अत्यन्ततृष्णावती (atyanta-tṛṣṇāvatī) *adj.* (*f.*) extremely affectionate एषा ते माता न स्नेहवती द्वितीये पुत्रेऽत्यन्ततृष्णावती कनकमयमङ्गुलीयकं रहसि तस्मै दत्तवती ManuBh. ii. 192. 29 (*on* 8. 275)

अत्यन्ततेजस्विन् (atyanta-tejasvin) *adj.* extremely bright or lustrous पुण्डरीकमत्यन्ततेजस्वि ChāndoUBh. 48. 11 (*on* i. 6. 7); कपेर्मर्कटस्यासः पृष्ठभागोऽत्यन्ततेजस्वी PrakaVi. 125. 17; इति दक्षवचने सूर्यपदं नक्षत्रपदं चात्यन्ततेजस्विसूर्यनक्षत्रपरम् VīraMi.(Āhnika.) 262. 8.

अत्यन्ततेजोऽभाव (atyanta-tejo'hhāva) *m.* absolute non-existence of light तमोऽञ्जनपुञ्ज इव श्याममिति ज्ञानमत्यन्ततेजोऽभावे सति सर्वत्रारोपितरूपमात्रविषयमप्रत्यक्षमपि प्रत्यक्षमिव पश्यति NyāyKa. 179. 17.

अत्यन्ततोष (atyanta-toṣa) *m.* extreme joy सा चात्यन्ततोषाच्चन्दनतरोर्निरुपमं गर्भखण्डं दत्त्वा यथास्थानं प्रपेदे BhojPra. 49. 2.

अत्यन्ततोषभाज् (atyantatoṣa-bhāj) *adj.* highly satisfied or pleased इति शय्यम्भवस्तस्मै सर्वमत्यन्ततोषभाक् सुवर्णताम्रपात्रादि यज्ञोपकरणं ददौ PariPar. 5. 37.

अत्यन्तत्याग (atyanta-tyāga) *m.* complete abandonment पापरोगा अपस्माराद्यास्तदाक्रान्तं पतिं द्विषन्त्या नार्या न त्यागोऽत्यन्तत्यागः ManvaVi. 1156. 10 (*on* 9. 79); ब्रह्मोज्झता वेदस्यात्यन्तत्यागोऽनध्ययनम् ManvaVi. 1371. 7 (*on* 11. 56)

अत्यन्तत्याज्य (atyanta-tyājya) *adj.* to be absolutely abandoned or discarded तत्रान्त्यानां वाससामत्यन्तत्याज्यानां त्यागः Aparā. 885. 18 (*on* 3. 16)

अत्यन्तत्रयीविरुद्ध (atyanta-trayīviruddha) *adj.* absolutely contrary to or extremely opposed to the three Vedas (i. e. Vedic prescriptions) बाभ्रव्यादीनाम् ··· अत्यन्तत्रयीविरुद्धाचारान्वये चानुपपन्ने सति S'rutaPra. ii. 320. 22 (*on* ii. 2. 38)

अत्यन्तत्वरित (atyanta-tvarita) *adj.* extremely quick or nimble

विद्रवन्तमिवाभान्तमत्यन्तत्वरितैः पदैः ··· तं राजनन्दनः ··· पप्रच्छ VikraDeC. 4. 40.

अत्यन्तदक्षिण (atyanta-dakṣiṇa) *adj.* extremely courteous अत्यन्तदक्षिणो लोकदाक्षिण्येन जगत्पतिः । प्रतीयेष निरीहोऽपि मङ्गलानि पदे पदे TrisaS'aPuC. ii. 3. 240.

अत्यन्तदक्षिणता (atyantadakṣiṇa-tā) *f.* extreme skill or compliance आवर्ज्यतेऽवसर एव हि चित्तवृत्तिरत्यन्तदक्षिणतया सुजनस्य वाग्भिः HarVi. 38. 14.

अत्यन्तदग्ध (atyanta-dagdha) *n.* one of the four kinds of medical treatment by cauterizing स्पृष्टं चैव समं च दग्धमथवा दुर्दग्धमत्यन्तदग्धं चेत्तत्र चतुर्विधं ह्यभिहितं तेषां यथानुक्रमात् KalyāKā. 21. 24.

अत्यन्तदयान्वित (atyantadayānvita) *adj.* extremely compassionate (पुरुषः) धीरोऽत्यन्तदयान्वितोऽपि ··· दुष्टानाम् ··· सङ्गं सदा चेद्भजेत् AdhyāRā. ii. 2. 82.

अत्यन्तदयापर (atyantadayā-para) *adj.* extremely compassionate वैश्यात्यन्तदयापरैर्न विहिता वन्ध्यार्थिनां प्रार्थना Subhāṣi. 3200.

अत्यन्तदयित (atyanta-dayita) *adj.* [*f.* –ā] very dear अत्यन्तदयितो भृत्यः कृतानेकाद्भुतक्रियः PadmP.(Ra.) 33. 75; अत्यन्तदयिता त्वं मे किमन्यस्त्रीभिरुत्तमे PadmP.(Ra.) 73. 86.

अत्यन्तदरिद्र (atyanta-daridra) *adj.* very poor रत्नापहारी चात्यन्तदरिद्रः AtriSm. 4. 4; कुतस्ते ब्राह्मणभोजनस्य शक्तिरत्यन्तदरिद्रस्य Tantrākhyā. 63. 22; PañcT. 2. 27 (219. 6); अहम् ··· ब्राह्मणः ··· अत्यन्तदरिद्रः ··· देशान्तरमागतः SiṁhāDvā. 161. 5(3); अत्यन्तदरिद्रस्यापि अतिथिपूजाव्यतिक्रमो न युक्तः ManuBh. i. 249. 27 (*on* 3. 90)

अत्यन्तदर्पित (atyanta-darpita) *adj.* very proud दण्डधरः प्रभुः ··· नियमयत्येव ··· अत्यन्तदर्पितान् BrahmāṇḍP. iii. 33. 58.

अत्यन्तदर्शनगोचर (atyanta-darśanagocara) *m.* absolute range of perception एनम् अत्यन्तदर्शनगोचरप्राप्तं विमूढा ··· नानुपश्यन्ति GītāBh.-(S'aṅ.) 439. 10 (*on* 15. 10)

अत्यन्तदर्शिता (atyanta-darśitā) *adj.* (*f.*) shown to a great extent भवेदभिभवायैव क्षमा ह्यत्यन्तदर्शिता PariPar. 7. 58.

अत्यन्तदवीयस्ता (atyantadavīyas-tā) *f.* the state of being very distant काली कराली च मनोजवा चेति मन्त्रे ब्रह्मविद्याप्रस्तावे अत्यन्तदवीयस्तयोपयुक्तमग्निजिह्वानिरूपणमपि दृश्यते S'ivārkaMaDī. i. 382. 22 (*on* i. 2. 22)

अत्यन्तदारिद्र्य (atyanta-dāridrya) *n.* extreme poverty तद्द्वारं विधातव्यम् ··· आध्मातेऽत्यन्तदारिद्र्यम् ··· नृणाम् ··· भवेत् SamarāSū. 39. 53; भो यजमान अहमत्यन्तदारिद्र्यपीडितः ··· ब्राह्मणः SiṁhāDvā. 148. 5(5)

अत्यन्तदारुण (atyanta-dāruṇa) *adj.* **i** extremely dreadful or frightful उत्पातास्तत्र वै यथा । तेषां तीव्रतमं ज्ञेयं फलमत्यन्तदारुणम् ViṣṇuDhaP. ii. 156. 3; मुमुचुः शरजालानि राक्षसा देवतागणे । देवाश्च राक्षसानीके संग्रामेऽत्यन्तदारुणे BṛNāraP. 10. 13; **ii** very cruel अत्यन्तदारुणः पापो वह्निना दह्यतामसौ PadmP.(Ra.) 98. 93; **iii** very severe or acute अक्षिदुःखं हृदो दुःखं सर्पेतेऽत्यन्तदारुणाः KathāK. 26. 15.

अत्यन्तदार्ढ्य (atyanta-dārḍhya) *n.* complete or absolute certainty तद्यत्र दुष्टाशयत्वस्यात्यन्तदार्ढ्याभावस्तद्विषयम् SmṛtiCan. iii. 283. 20.

अत्यन्तदाह (atyanta-dāha) *m.* **i** excessive burning sensation चूर्णितं सर्वमेतत् । व्यामिश्रं भक्षयित्वा जयति नरवरो रक्तपित्तक्षयासृक्तृष्णाश्वासोरुहिक्काज्वरमदकसनारोचकात्यन्तदाहान् KalyāKā. 10. 22; **ii** complete burning यस्य यज्ञस्य पुरोडाशावाग्नेयाग्नीषोमीयौ क्षायतोऽत्यन्तदाहेन भस्मीभवतः NyāyMāVi. 331. 27 (*on* vi. 4. 5); क्वचिच्चैकस्यार्धस्यात्यन्तदाहादर्धान्तरस्यादनीयत्वम् MayūMāli. 484. 7 (*on* vi. 4. 5)

अत्यन्तदीन (atyanta-dīna) *adj.* extremely pitiable or sad (पद्मः) अत्यन्तदीनवदनः कृत्वा निष्वां(? निर्ज्यां) धनुर्लताम् PadmP.(Ra.) 44. 148; SiṁhāDvā. 201. 1(4); गिरिगह्वरगुहायां लीनमत्यन्तदीनं स्वजनकममुनैव प्राणहीनं करोषि RasGaṅ. 690. 10.

अत्यन्तदीनत्व (atyantadīna-tva) *n.* the state of being extremely pitiable तान् दृष्ट्वा स बलीयसः । जगामात्यन्तदीनत्वं स्वभोगभ्रंशकातरः PadmP. (Ra.) 11. 312.

अत्यन्तदीनम् (atyanta-dīnam) *adv.* very pitiously अत्यन्तदीनमेतस्यां रुदन्त्याम् ··· मृगीभिरपि निर्मुक्ताः ··· बाष्पबिन्दवः PadmP.(Ra.) 17. 79.

अत्यन्तदीप्त (atyanta-dīpta) *adj.* extremely bright श्रुतिसहजविवेकं-(? क)ज्ञानसंसर्गदीपाः ··· अत्यन्तदीप्ताः । ··· यस्य SubhāRaSaṁ. 20.

अत्यन्तदीप्तिमत् (atyantadīpti-ma(n)t) *adj.* extremely refulgent or radiant (यः) अत्यन्तदीप्तिमान् ··· । दृष्ट्वा तं तादृशं शेषो भीत्या भ्रान्त इवाभवत् GaṇeP. i. 90. 47; पुण्डरीकं यथात्यन्तदीप्तिमदेवमस्य पुरुषस्याक्षिणी अत्यन्तदीप्तिमती PrakaVi. 125. 17.

अत्यन्तदीप्रा (atyanta-dīprā) *adj.* (*f.*) extremely refulgent वक्षस्तस्य तया भिन्नम् ··· शक्त्या दिव्ययात्यन्तदीप्रया PadmP.(Ra.) 62. 82.

अत्यन्तदीर्घ (atyanta-dīrgha) *adj.* [*f.* –ā] **1** very long वक्त्रश्रोत्रशिरोधराधररदैरत्यन्तदीर्घैः कृशैः (उपलक्षिताः अश्वजातीयाः पुरुषाः) RatiRaha. 3. 35; **2** continuing for a very long time दुःखायात्यन्तदीर्घाय बालता YogVā. i. 19. 26; इत्थम् ··· मया ··· नेष्यन्ते कति वा प्रजागरभरैरत्यन्तदीर्घाः क्षपाः MahāN. 4. 31.

अत्यन्तदीर्घता (atyantadīrgha-tā) *f.* great height or tallness अत्यन्तदीर्घतया दीर्घं त्रिविक्रमादपि ··· राक्षसं ददर्श UdaySuKa. 75. 27.

अत्यन्तदीर्घिका (atyanta-dīrghikā) *adj.* (*f.*) continuing for a very long time कथा मे मन्दभाग्याया इयमत्यन्तदीर्घिका PadmP.(Ra.) 98. 32.

अत्यन्तदुःकथा (atyanta-duḥkathā) *adj.* (*f.*) extremely painful to narrate गत्वा वैश्रवणाय ··· तेन वेदिता । दशग्रीवाद्विनिष्क्रान्ता वाणी चात्यन्तदुःकथा PadmP.(Ra.) 8. 193.

अत्यन्तपापिन् (atyanta-pāpin) *adj.* most sinful (person) पित्रैव योद्धुमारब्धा बलिनोऽत्यन्तपापिन: BṛNāraP. 8. 79.

अत्यन्तपापीयस् (atyanta-pāpīyas) *adj.* (comp.) most wicked (person), great sinner तिर्यक्प्रभृतीनामत्यन्तपापीयसां च सारूप्यम् TristhaSe. 304. 32.

अत्यन्तपामर (atyanta-pāmara) *adj.* greatly foolish अत्यन्तपामर: कश्चित् पुत्र आत्मेति मन्यते SarvaVeSāSaṁ. 522.

अत्यन्तपारतन्त्र्य (atyanta-pāratantrya) *n.* complete subservience, complete dependence स्वर्दृक्कुशब्दे तु सोपपदो दृशि: … न च कर्ता प्रत्याय्यमानो वीक्षणलिङ्गत्वेन कल्प्यते, दृशेरत्यन्तपारतन्त्र्यात् S'ābaBh. 1987. 27 (*on* x. 6. 3); दस्यु: भृतिदास: वैतनिक: … तस्य च दिवसभृतत्वान्नात्यन्तपारतन्त्र्यमस्ति ManuBh. ii. 104. 14 (*on* 8. 66); 'स यथा शकुनि'रित्याद्यग्रिमवाक्येन वर्ण्यमानस्याप्येतुरत्यन्तपारतन्त्र्यस्य … अग्रिमखण्डयोरुच्यमानस्याज्ञानस्य च तत्रानन्वयप्रसङ्गात् S'ivārkaMaDī. i. 201. 20 (*on* i. 1. 10)

अत्यन्तपारार्थ्य (atyanta-pārārthya) *n.* **i** the state of being meant completely for another त्वत्पक्षे तु … धातोरत्यन्तपारार्थ्यं स्यात् TantrVā. 612. 2 (*on* ii. 3. 19); फले तावद् विधीयमाने गुणे परपदसंबन्धविधानात् धातोरत्यन्तपारार्थ्यं स्यात् S'āstrDī. 57. 10 (*on* i. 4. 2); 390. 8 (*on* iv. 3. 16); 390. 15 (*on* iv. 3. 17); अस्मिन् दर्शने संज्ञापरिभाषाणां ह्यत्यन्तपारार्थ्यान्न स्वातन्त्र्येण कार्यावगमहेतुत्वम् Pradī. vii. 76. 20 (*on* viii. 2. 1); UpaParā. 35. 22; नापि गुणफलसंबन्धविधानं संभवति … धातोरत्यन्तपारार्थ्यापत्तेश्च MīmāNyāPra. 247. 14; 248. 5; BhāṭṭDī. iv. 86. 12 (*on* x. 7. 11); केवलप्रत्ययस्य प्रयोगानर्हत्वात् तदर्थं धातूच्चारणमित्यत्यन्तपारार्थ्यमित्यर्थ: MayūMāli. 57. 20 (*on* i. 4. 2); 390. 8 (*on* iv. 3. 15); 667. 5 (*on* x. 2. 12); **ii** complete dependence on others (for livelihood) स्वतन्त्रस्यात्मन: परार्थत्वेन दानाद् दासत्वम् …। अनेनात्यन्तपारार्थ्यमासाद्य शुश्रूषका दासा: SmṛtiCan. iv. 460. 15 = VīraMi.(Vyavahāra.) 317. 9.

अत्यन्तपार्थक्य (atyanta-pārthakya) *n.* complete difference or separation इह तु जिज्ञासाशब्दो न विचारे रूढ:, ज्ञानेच्छालक्षणाद् यौगिकार्थाद् विचारस्यात्यन्तपार्थक्याभावात् VivaPraSaṁ. 171. 12.

अत्यन्तपावन (atyanta-pāvana) *adj.* [*f.* -ī] most purifying, very pure or holy सप्तर्षय: … अथर्वरूपैर्मन्त्रैश्च वर्धयन्तो जयश्रियम् । हविषेव महावह्निशिखामत्यन्तपावि(? व)नीम् BrahmāṇḍP. iii. 20. 104; यद्यहं मानवे वंशे जातोऽस्म्यत्यन्तपावने SkandP. iv. 19. 53; सम्यक् प्राप्स्यसि विश्रान्तिमात्मन्यत्यन्तपावने YogVā. v. 24. 69.

अत्यन्तपिङ्गला (atyanta-piṅgalā) *adj.* (*f.*) excessively tawny अत्यन्तपिङ्गला नारी विषतुल्येति निश्चितम् BhaviP. 21A. 17 (i. 5. 26)

अत्यन्तपिपासा (atyanta-pipāsā) *f.* excessive thirst अत्यन्तपिपासया । स पीड्यमानो ब्रह्माणं कृताञ्जलिरभाषत BhaviP. 866B. 17 (iv. 177. 32)

अत्यन्तपीडन (atyanta-pīḍana) *n.* extreme oppression सपत्राकृतिनिष्पत्राकृती त्वत्यन्तपीडने Vaija. 195. 38 = AbhidhāCin. 13. 72; वैश्यानाम् … अन्यथाशौचसमाप्तिप्रतीक्षायामुपसर्गव्याध्यादिभिरत्यन्तपीडने वृत्ते रक्षाकालोऽतिक्रमेत् HārLa. 109. 15; ParaNā. 1371.

अत्यन्तपीडा (atyanta-pīḍā) *f.* excessive suffering or affliction रोगोऽत्यन्तपीडाकर: ManuBh. ii. 123. 22 (*on* 8. 108) = BālamBha. ii. 90. 28 (*on* 2. 80); यावज्जीवशब्दस्य तदीयजीवनेऽपि कृतार्थत्वेनात्यन्तपीडाभावात् अग्निमान् जीवन् जुहुयादित्येवमाश्रीयते NyāyRaMā. 116. 17; यद्यप्युच्यते शरीरं पीड्यते येन … अत्यन्तं तन्न कर्तव्यम् … इति तदत्यन्तपीडानिवारकं न तु पीडामात्रस्य CaturCin. iii(2). 168. 13.

अत्यन्तपीडित (atyanta-pīḍita) *adj.* extremely pained or afflicted स विद्धो वाक्शरैस्तीक्ष्णै: …। मनस्यत्यन्तपीडित: PadmP.(Ra.) 66. 61; (रोगी) व्याधिनात्यन्तपीडित: ManuBh. i. 147. 21 (*on* 2. 138); सर्पोऽसौ श्येनेनात्यन्तपीडित: BṛKathāMañ. ix. 2. 684; Aparā. 1058. 17 (*on* 3. 245); अमुना मर्माभिघाते-

नात्यन्तपीडितस्तुरुष्कपार्थिवः पृथ्वीराजम् … संजहार PrabaCin. 118. 2.

अत्यन्तपीडितव्रत (atyantapīḍita-vrata) *n.* religious vow observed by one severely afflicted (with diseases etc.) पयःपानादीनामव्रतघ्नत्वं स्त्री-बालात्यन्तपीडितव्रतविषयम् CaturCin. ii(1). 333. 18.

अत्यन्तपीतिमन् (atyanta-pītiman) *m.* deep yellow colour सुवर्णं तैजसमेवास्तु शुद्धसुवर्णे दृश्यमानस्यात्यन्तपीतिम्नः … लौहित्य एव अवान्तरविशेषत्वोपपत्तेः PūrvottaVāNaMā. 81. 6.

अत्यन्तपीन (atyanta-pīna) *adj.* **i** extremely robust or muscular राज्ञामत्यन्तपीनत्वमुच्चता दीर्घबाहुता AlaṅkāS'e. 14. 1; **ii** extremely corpulent or swollen निम्नं क्वाप्युन्नतं क्वाप्यतिकृशमपरत्रान्यतोऽत्यन्तपीनम् … अङ्गम् (स्त्रीणाम्) MadaKeC. 54.

अत्यन्तपीवर (atyanta-pīvara) *adj.* very great or abundant लभ्यतेऽयमुपाध्यायः पुण्यैरत्यन्तपीवरैः PāṇḍaC. 3. 218.

अत्यन्तपुण्य (atyanta-puṇya) *n.* great religious merit अत्यन्तपुण्यकारिणः … कल्पान्तरे पूर्वजातिस्मरणपूर्वकं जन्म VivaPraSaṁ. 266. 22; मदीयं मतमत्यन्तपुण्यदम् S'aṅkaVi.(Ā.) 164. 12; शिवस्योपासनमत्यन्तपुण्यवर्धनम् S'aṅkaVi.(Ā.) 265. 14; 184. 7.

अत्यन्तपुरुषार्थ (atyanta-puruṣārtha) *m.* highest goal or aim of human beings अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः SāṁkhyaPraSū. 1. 1; दृष्टसाधनजन्यायां दुःखनिवृत्तावत्यन्तपुरुषार्थत्वमेव नास्ति SāṁkhyaPraBh. 8. 10 (*on* 1. 3); 41. 22 (*on* 1. 82)

अत्यन्तपूति (atyanta-pūti) *adj.* very putrid अत्यन्तपूतिबीजस्य कर्षकः । किं करिष्यति PramāVāBh. 397. 21; MahāP. 4. 147.

अत्यन्तपूर्णता (atyantapūrṇa-tā) *f.* extreme fulness or plenitude पूर्णपूर्णेति वीप्सयात्यन्तपूर्णतोच्यते SetuBa. 332. 4.

अत्यन्तपेलवा (atyanta-pelavā) *adj.* (*f.*) very delicate मन्ये मौर्ख्यमयी सृष्टिरियमत्यन्तपेलवा YogVā. v. 13. 109.

अत्यन्तपेशल (atyanta-peśala) *adj.* very tender न्यस्तं मयि मनः पाल्यमेतदत्यन्तपेशलम् BṛKathāMañ. ix. 2. 823; xvi. 189; Mānaso. iii. 15. 1633.

अत्यन्तपैत्तिक (atyanta-paittika) *adj.* very bilious (person) अत्यन्तपैत्तिको वापि कदुष्णं पातुमर्हति KāśyaS. 177B. 12.

अत्यन्तपोषण (atyanta-poṣaṇa) *n.* excessive nourishment अपोषितो भवेत् क्षीणो (वाजी) रोगी चात्यन्तपोषणात् S'ukraNī. 4(7). 121.

अत्यन्तपौनरुक्त्य (atyanta-paunaruktya) *n.* excessive repetition अत्यन्तपौनरुक्त्यं मा भूदिति कश्चिद्विशेष आश्रयितव्यः ManuBh. ii. 97. 23 (*on* 8. 55)

अत्यन्तप्रकर्ष (atyanta-prakarṣa) *m.* complete superiority ननु भवत्वभ्यासः स तु कथमत्यन्तप्रकर्षनिष्ठः । किंचिन्मात्रस्य विशेषस्य दर्शनात् PramāVāBh. 105. 32; Bhām. 133. 19 (*on* i. 1. 12); VedāntKa. 109. 24 (*on* i. 1. 12); S'rutaPra. ii. 197. 5 (*on* i. 4. 29)

अत्यन्तप्रकाश (atyanta-prakāśa) *adj.* very bright आदित्यादिषु हि सत्त्वं अत्यन्तप्रकाशम् अत्यन्तभास्वरम् GītāBh.(S'aṅ.) 441. 6 (*on* 15. 12)

अत्यन्तप्रकृतिपरिशुद्ध (atyanta-prakṛtipariśuddha) *adj.* extremely pure by nature आलयविज्ञानसंशब्दितः … नित्यमव्युच्छिन्नशरीरः प्रवर्ततेऽनित्यतादोषरहित आत्मवादविनिवृत्तोऽत्यन्तप्रकृतिपरिशुद्धः LaṅkāSū. 6. 0 (90. 11)

अत्यन्तप्रक्षीयमाणा (atyanta-prakṣīyamāṇā) *adj.* (*f.*) exceedingly diminishing अत्यन्तप्रक्षीयमाणा अविद्या BṛĀraUBh. 566. 10 (*on* iv. 3. 20)

अत्यन्तप्रगुण (atyanta-praguṇa) *adj.* exceedingly capable पाण्डवानां स विग्रहः । अरातिश्रियमादातुमत्यन्तप्रगुणोऽभवत् PāṇḍaC. 13. 520.

अत्यन्तप्रचण्ड (atyanta-pracaṇḍa) *adj.* very fierce अत्यन्तप्रचण्डौ तौ दुष्टौ रक्तकलोचनौ । … सुयक्षेण निरीक्षितौ PadmP.(Ra.) 109. 98.

अत्यन्तप्रचलिता (atyanta-pracalitā) *adj.* (*f.*) greatly shaken अक्षरस्य …ईषत्प्रचलितावस्था अन्तर्यामी अत्यन्तप्रचलितावस्था क्षेत्रज्ञः BṛĀraUBh. 453. 7 (*on* iii. 8. 12)

अत्यन्तप्रतिकूल (atyanta-pratikūla) *adj.* exceedingly unfavourable अयं परामर्शः ·– ते अत्यन्तप्रतिकूलः S'atDū. 81. 29.

अत्यन्तप्रतिपत्ति (atyanta-pratipatti) *f.* extreme knowledge अत्यन्तप्रतिपत्त्या तु दुर्लभोऽलङ्कृतो जनः PañcT. 1. 156 (153. 12); Pañcā. 109. 5.

अत्यन्तप्रतिभासलय (atyanta-pratibhāsalaya) *m.* total loss of knowledge देहाद्यनुबन्धः … स्वयमेव च कदाचिच्चक्रभ्रमस्वप्नादिवदत्यन्तप्रतिभासलयमेष्यति S'atDū. 137. 5.

अत्यन्तप्रतियोगिभिन्नत्व (atyantapratiyogibhinna-tva) *n.* total difference from the counter-correlative (निवृत्तेः) तस्या अत्यन्तप्रतियोगिभिन्नत्वात् GuruCandr. ii. 188. 21.

अत्यन्तप्रतिषेध (atyanta-pratiṣedha) *m.* **i** absolute negation सद्रूपप्रतीतस्य वा कथमत्यन्तप्रतिषेधोपपत्तिः TantrVā. 323. 14 (*on* i. 4. 22); **ii** complete prohibition तत्तयोरत्यन्तप्रतिषेधार्थं न वैश्यादिप्राप्त्यर्थम् Aparā. 87. 18 (*on* 1. 56); CaturCin. iii(2). 334. 4; SaṅkarKāBh. 33. 12 (*on* i. 3. 29)

अत्यन्तप्रत्यासत्ति (atyanta-pratyāsatti) *f.* very close proximity अत्यन्तप्रत्यासत्त्युपस्थितधात्वर्थातिक्रमकारणाभावात् … विजायते TantrVā. 354. 7 (*on* ii. 1. 1); Kāśi. i. 235. 27 (*on* 4. 73); BhāṭṭDī. ii. 162. 20 (*on* v. 1. 6)

अत्यन्तप्रत्यासन्न (atyanta-pratyāsanna) *adj.* [*f.* –ā] very close or proximate संख्यादयः शेषाः संभवेयुस्ते त्वत्यन्तप्रत्यासन्नप्रधानभूतेन कारकेणापहृत्य क्रियायै नीयन्ते TantrVā. 930. 19 (*on* iii. 4. 12); विधेरत्यन्तप्रत्यासन्ना भावनैव विधेयतया धर्मशब्दवाच्यतामश्नुवीत Kāśi. i. 158. 20 (*on* 2. 192); ii. 127. 6 (*on* 5(3). 69); NyāyRa. 508. 17 (*on* 5(10). 41)

अत्यन्तप्रदीप्त (atyanta-pradīpta) *adj.* set ablaze intensely ततो यातौ वह्नयमा(? पा)नौ प्राणमुष्णस्वरूपकम् । तेनात्यन्तप्रदीप्तेन ज्वलनो देहजस्तथा YogKuU. 1. 44; तेनात्यन्तप्रदीप्तस्तु ज्वलनो देहजस्तथा HaṭPra. 3. 67.

अत्यन्तप्रदेश (atyanta-pradeśa) *m.* general rule तत्रैषोऽत्यन्तप्रदेशः BhārS'S. i. 1. 9; ĀpaS'S. xii. 7. 12; xv. 2. 8; ĀpaS'uS. i. 3. 17.

अत्यन्तप्रबल (atyanta-prabala) *adj.* very powerful सेवयात्यन्तप्रबलं नत्या चारिं प्रसाधयेत् S'ukraNī. 4(7). 187.

अत्यन्तप्रयत (atyanta-prayata) *adj.* exceedingly purified or pious अध्येषामाणोऽन्नमश्नन्नित्यत्यन्तप्रयतसाध्यकर्मारम्भोपलक्षणम् ManvaVi. 679. 24 (*on* 5. 138)

अत्यन्तप्रलय (atyanta-pralaya) *m.* complete dissolution अत्यन्तप्रलयं कृत्वा मोहनीयस्य कर्मणः । (सः) अवाप केवलज्ञानम् PadmP.(Ra.) 87. 15; VedāntRaMañ. 1. 3 (27. 17)

अत्यन्तप्रवणा (atyanta-pravaṇā) *adj.* (*f.*) greatly devoted अत्यन्तप्रवणां सतीम् … परित्यज्य भूभार्याम् … प्रतिपेदे विशुद्धात्मा श्रामण्यम् PadmP.(Ra.) 11. 287.

अत्यन्तप्रवृत्त (atyanta-pravṛtta) *adj.* exceedingly inclined तत्पुण्यपापयोरत्यन्तप्रवृत्तजीवविशेषविषयम् NyāyKu. 121. 3.

अत्यन्तप्रवृद्धद्वेष (atyantapravṛddha-dveṣa) *m.* hatred which has grown excessively योऽत्यन्तप्रवृद्धद्वेषो न हिंस्याद्भूतानीत्यतिक्रान्तनिषेधाधिकारः ManuBh. i. 62. 7 (*on* 2. 6)

अत्यन्तप्रशस्त (atyanta-praśasta) *adj.* very commendable or laudable अत्यन्तप्रशस्तयोरपि वाङ्मनसयोः स्तेनानृतवादयोगाद् हिरण्यादूनत्वम् MīmāKau. iii(1). 34. 2 (*on* i. 2. 11)

अत्यन्तप्रसन्नता (atyantaprasanna-tā) *f.* extreme limpidity, great pellucidity अपां कतकसंपर्काद्यथात्यन्तप्रसन्नता BṛĀraUBhVā. iv. 3. 975.

अत्यन्तप्रसन्नास्वाद (atyantaprasannāsvāda) *adj.* who greatly relishes the taste प्रसन्नास्वादमत्यन्तप्रसन्नास्वादमेककम् । विधायाथ निजं स्थानं गम्यतेऽथ विरम्यते PrabhāC. 192. 19.

अत्यन्तप्रसिद्ध (atyanta-prasiddha) *adj.* [*f.* –ā] very well-known इत्यत्यन्तप्रसिद्धेऽपि सिद्धे सर्वागमैरपि । दृष्टेऽप्यकालमरणे विचिकित्सेत् कथं बुधः AṣṭāSaṁ. i. 63. 7 (1. 9); या त्वादिमती नात्यन्तप्रसिद्धा नासौ शास्त्रेणानुगम्यते TantrVā. 701. 14 (*on* iii. 1. 8); ब्रह्मवित्परिषद्यत्यन्तप्रसिद्धाम् उपलभमानाः … पृच्छन्ति AitUBh. 287. 4 (*on* 5. 0); अतिस्थवीयानयं सर्वज्ञवादः येनात्यन्तप्रसिद्धैरपि प्रमेयत्वादिहेतुभिः शक्यते निराकर्तुमित्याह Kāśi. i. 130. 25 (*on* 2. 132); तत्रैवात्यन्तं प्रसिद्धं निदर्शनमाह TattvVai. 81. 14–15 (*on* 2. 17); इत्यनुमानवैधर्म्यमत्यन्तप्रसिद्धमेव NyāyKu. 9. 1; उदाहरणभूतानामत्यन्तप्रसिद्धानां षड्विधत्वादुभयत्र षड्ग्रहणम् SmṛtiCan. iv. 731. 7.

अत्यन्तप्रसिद्धत्व (atyantaprasiddha-tva) *n.* the state of being very well-known द्वित्वश्रवणाविशेषात् अत्यन्तप्रसिद्धत्वाच्च हुतप्रहुते इति प्रथमः पक्षः BṛĀraUBh. 170. 17 (*on* i. 5. 2); प्रथमदिनेऽत्यन्तप्रसिद्धत्वान्मनुना स्नानं नोक्तम् HārLa. 157. 21; गोमहिषयोरिवार्थभेदस्यात्यन्तप्रसिद्धत्वान्नामत्वं न युक्तम् NyāyMāVi. 55. 1 (*on* i. 4. 13); सोमादिपदवत् अर्थान्तरे अत्यन्तप्रसिद्धत्वात् LaCandr. 372. 15; 375. 33.

अत्यन्तप्रसिद्धविषय (atyantaprasiddha-viṣaya) *m.* very well-known or commonplace subject अत्यन्तप्रसिद्धविषयसत्याभिधानमात्रेण प्रज्ञाप्रकर्षदुरवगाहगहनेऽपि निरत्ययिनां साधयितुकामो बन्धकीमपि प्रागल्भ्येन विजयते PramāVāSvopVṛ. 117. 18.

अत्यन्तप्रसिद्धार्थ (atyantaprasiddhārtha) *m.* most popular or well-known meaning अत्रात्यन्तप्रसिद्धार्थभेदादाग्नेयशब्दो न ब्राह्मणस्य नामधेयम् NyāyMāVi. 55. 12 (*on* i. 4. 14)

अत्यन्तप्रहाण (atyanta-prahāṇa) *n.* complete abandonment or total

relinquishment चतुर्विधा प्रहाणसंपत् । सर्वक्लेशप्रहाणम् अत्यन्तप्रहाणं सर्ववासनप्रहाणं सर्वसमाधिसमापत्त्यावरणप्रहाणं च AbhidhKoBh. 416. 1 (*on* 7. 34)

अत्यन्तप्रहृष्टधी (atyantaprahṛṣṭa-dhī) *adj.* whose mind was exceedingly delighted श्रुत्वा हनूमतो वाक्यं रामोऽत्यन्तप्रहृष्टधीः AdhyāRā. v. 5. 59.

अत्यन्तप्रागल्भ्य (atyanta-prāgalbhya) *n.* extreme boldness or adventurousness प्रौढनायकेष्वत्यन्तप्रागल्भ्यात्तासामपि कतिपयोऽप्यनुरागो वर्तेत इति प्राचीना लिखितवन्तः S'ṛṅgāMañ (A.) 6. 18.

अत्यन्तप्राच्य (atyanta-prācya) *adj.* very old व्यथन्ते तद्विनात्यन्तप्राच्यान्यपि फलानि माम् PāṇḍaC. 1. 143.

अत्यन्तप्रातिलोम्य (atyanta-prātilomya) *n.* excessively inverse order (of castes) उत्तरश्चण्डालः । स प्रतिलोमोऽत्यन्तप्रातिलोम्यात् सत्यपि क्षेत्रप्राधान्ये पितृदोषात् ManuBh. ii. 350. 7 (*on* 10. 68); BālamBha. i. 284. 22 (*on* 1. 94)

अत्यन्तप्राप्ति (atyanta-prāpti) *f.* full knowledge पूर्ववत्त्वाद्बवनुवादो भवेदत्यन्तप्राप्तावित्यर्थः TantrVā. 912. 10 (*on* iii. 4. 3)

अत्यन्तप्रायश्चित्तभेद (atyantaprāyaścitta-bheda) *m.* great difference of atonement or expiation सत्यम् । यदि सुरामद्ययोर्मद्यपानेऽत्यन्तप्रायश्चित्तभेदो न स्यात् ManuBh. ii. 415. 6 (*on* 11. 146)

अत्यन्तप्रायसाधर्म्य (atyantaprāya-sādharmya) *n.* complete or near complete similarity अत्यन्तप्रायसाधर्म्यविकल्पादिनिबन्धनः । क्षिप्तः सूत्रकृतः साक्षादुपमानस्य विप्लवः NyāyMañ. i. 132. 1.

अत्यन्तप्राशस्त्यार्थम् (atyantaprāśastyārtham) *adv.* for the purpose of excessive praise सर्वत्रीजपदेन यवप्राप्तेः पुनरुपादानमत्यन्तप्राशस्त्यार्थम् ViraMi.(Pūjā.) 251. 10.

अत्यन्तप्रिय (atyanta-priya) *adj.* extremely dear, very much pleasing राज्ञोऽत्यन्तप्रियस्त्वं हि तारापुत्रोऽतिवल्लभः AdhyāRā. iv. 7. 12; ध्यानार्चनप्रणामस्तुतिकीर्तनादीनि स्वयमेवात्यन्तप्रियाणि प्राप्य समानि कुर्वन्तः मामुपासत इत्यर्थः GītāBh.(Rā.) 563. 8 (*on* 12. 6); राजन्नभिनिविष्टोऽसि कष्टेऽत्यन्तप्रियोऽसि च KathāSaSāg. xii. 12. 4; चणकाः अश्वानामत्यन्तप्रियाः SmṛtiCan. v. 213. 16.

अत्यन्तप्रियतम (atyantapriya-tama) *adj.* extremely dear सः ··· राज्ञोऽत्यन्तप्रियतमः परोपकारी सर्वलोकस्यातिप्रियः SiṁhāDvā. 128. 0(6)

अत्यन्तप्रियदर्शन (atyantapriya-darśana) *adj.* of very agreeable looks, of pleasing appearance ददर्श सुतमात्मनः । ··· दीर्घबाहुं महासत्त्वमत्यन्तप्रियदर्शनम् । ··· गुणैः प्रद्योतयन्तं तम् Rāmā. ii. 29(A.)*. 4.

अत्यन्तप्रीत (atyanta-prīta) *adj.* very much delighted विवाहविधिरत्यन्तप्रीतलोकसमाकुलः PadmP.(Ra.) 12. 17; इत्युक्तवन्तमत्यन्तप्रीतस्तं पवनात्मजः । पप्रच्छ PāṇḍaC. 8. 141.

अत्यन्तप्रीति (atyanta-prīti) *f.* great satisfaction or pleasure तृतीयस्य विधा योऽसौ संयमो नाम वर्णितः । (उपायः) भोगैः शुद्धैस्त्रिधोद्भूतैरत्यन्तप्रीतये मम LakṣmīT. 16. 40; अत्यन्तप्रीतिकरत्वात् ManuBh. i. 329. 5 (*on* 4. 5); गयाख्ये च देशविशेषे क्रियमाणे पार्वणेऽत्यन्तप्रीतिजनकेऽपि मातुरंशहारित्वमस्ति SmṛtiCan. v. 99. 4; अत्यन्तप्रीतिविषयः आनन्दः LalitāTriBh. 318. 1 (*on* 38)

अत्यन्तप्रीतिद (atyantaprīti-da) *adj.* giving great delight देवानां च पितृणां च ऋषीणां राजसत्तम । अत्यन्तप्रीतिदं सत्यं प्रपादानं न संशयः SkandP. ii(7). 2. 15.

अत्यन्तप्रीतिमानस (atyantaprīti-mānasa) *adj.* whose mind is greatly pleased केवलिरविणो[द्]द्योतितमत्यन्तप्रीतिमानसाः समशंसन् PadmP. (Ra.) 105. 267.

अत्यन्तप्रेतोपकार (atyanta-pretopakāra) *m.* great service to the departed प्रेतेषु दुर्लभमित्यनेनात्यन्तप्रेतोपकार इति प्रदर्शितम् HārLa. 160. 7.

अत्यन्तप्रेमन् (atyanta-preman) *n.* great or deep love सर्वेषामङ्गेषु ब्रह्मस्वरूपतया अत्यन्तप्रेमविषयत्वेन सुन्दरपदार्थवदविनाभाववान्छाविषयत्वात् LalitāTriBh. 295. 12 (*on* 25); अत्यन्तप्रेमसंभारसंसक्तमनसोस्तयोः । बभूव लकुचः पुत्रो युवराजो विचक्षणः BṛKathāK. 50. 2; अत्यन्तप्रेमाविच्छेदप्रदायिनि परात्परे । कन्यां प्रदाय देवाय त्वं कृती भव पर्वत BrahmVaiP. iv. 42. 74; पुत्रकाङ्क्षयैव दुःखं तु तस्यात्यन्तप्रेमास्पदत्वात् Nyāyāmṛ. 397A. 9.

अत्यन्तप्रौढवाक्य (atyantapraudha-vākya) *adj.* whose utterances are very ostentatious or flamboyant अत्यन्तप्रौढवाक्याः परिलब्धधृतयः क्रोधना मध्यवेगा उक्षाणः (नायकाः) PañcSā. 2. 9.

अत्यन्तफल (atyanta-phala) *adj.* conducive to great reward, yielding eternal fruit शिवे दत्तं हुतं जप्तम् ···। एकान्ततोऽत्यन्तफलं तद्भवेन्नात्र संशयः SaurP. 47. 37; (कुपुत्राः) एतेन नात्यन्तफला एवेत्युक्तम् ManvaVi. 1197. 31 (*on* 9. 161)

अत्यन्तफलद (atyantaphala-da) *adj.* [*f.* -ā] yielding great (permanent) fruit शीर्षोदये लग्नगते ···। अत्यन्तफलदा यात्रा तदीशश्चेच्छुभग्रहः VasiS. 37. 67; तदुपासनमत्यन्तफलदमिति कृत्वा S'aṅkaVi.(Ā.) 220. 5.

अत्यन्तफलप्रदा (atyantaphala-pradā) *adj.* (*f.*) yielding great (permanent) fruit गजच्छाया तदा ज्ञेया श्राद्धेऽत्यन्तफलप्रदा NāraS. 4. 35.

अत्यन्तफलप्रदायिन् (atyantaphala-pradāyin) *adj.* habitually giving great (permanent) fruit हेमाद्रिरत्यन्तफलप्रदायि नानातिथीनां व्रतवृन्दमाह CaturCin. ii(2). 258. 5.

अत्यन्तफलभूयिष्ठ (atyantaphala-bhūyiṣṭha) *adj.* plentiful or abundant in great results स तु पैतामहो धर्मो बहुवित्तक्रियान्वितः । नात्यन्तफलभूयिष्ठः क्लेशायाससमन्वितः S'ivaP. vii. 10. 20 (555A. 2)

अत्यन्तफलसमृद्धम् (atyantaphalasamṛddham) *adv.* full of endless consequences अत्यन्तफलसमृद्धं भ्रमन्ति TātpaVṛ. 362. 17 (*on* 3. 71)

अत्यन्तफलसंपत्ति (atyantaphala-sampatti) *f.* opulence in the form of abundant produce (corn) अत्यन्तफलसंपत्तिनम्रशाल्यादिभूषिता । धरणी जायते तस्मिन् समेते सस्यकारणम् PadmP.(Ra.) 2. 99.

अत्यन्तबल (atyanta-bala) *adj.* having great strength ऊर्जस्व्यूर्जस्वलोऽत्यन्तबलपर्यायवत्यपि KalpaK. 116. 246.

अत्यन्तबलवत् (atyantabala-va(n)t) *adj.* very strong or powerful अत्यन्तबलवन्तोऽपि पौरजानपदा जनाः।··· बाध्यन्ते TantrVā. 863. 9 (*on* iii. 3. 14); यस्मान्नायं नियमो दृश्यते यो जयति सोऽत्यन्तबलवानवश्यम् ManuBh. ii. 59. 26 (*on* 7. 199); अत्यन्तबलवतोद्देश्यसामर्थ्येन निर्णयो दुरपह्नवः MīmāKau. i. 299. 25 (*on* i. 4. 30)

अत्यन्तबलिन् (atyanta-balin) *adj.* very strong or powerful भवन्तोऽत्यन्तबलिनः शूराश्च कृतविक्रमाः AdhyāRā. iv. 9. 4.

अत्यन्तबलीयसी (atyanta-balīyasī) *adj.* (*f.*) (*comp.*) very strong or compelling तत्त्वज्ञानवासनया अत्यन्तबलीयस्यास्याः समूलकाषं कषितत्वात् TātpaṬ.(Vā.) 94. 24 (*on* i. 1. 2); यत्त्वत्यन्तबलीयस्या श्रुत्या संयुक्तम् S'āstrDī. 581. 11 (*on* ix. 1. 5)

अत्यन्तबहिर्भूत (atyanta-bahirbhūta) *adj.* completely external अतो मनुष्योऽहमित्यत्यन्तबहिर्भूतमनुष्यत्वादिविशिष्टपिण्डात्माभिमानवज्ज्ञातृत्वमप्यध्यस्तम् S'rīBh.(Rā.) 26. 9 (*on* i. 1. 1)

अत्यन्तबहिर्मुद्र (atyanta-bahirmudra) *adj.* totally outside authentication, having absolutely no aunthentication °वचनव्याख्यानं तत्त्वत्यन्तबहिर्मुद्रम् ViraMi.(Vyavahāra.) 17. 30.

अत्यन्तबहु (atyanta-bahu) *adj.* **i** very many, innumerable (यमकानाम्) अत्यन्तबहवस्तेषां भेदाः सम्भेदयोनयः Kāvyāda. 3. 3 = SaraKaṇṭhā. 198. 14; अत्यन्तबहवोऽप्येते भोगा हि न सुखावहाः YogVā. v. 22. 47; **ii** very abundant योषिद्ग्राह्यापेक्षयात्यन्तबहुधनो यः पुत्रस्तस्य धनग्राह्यानन्तर्यार्थम् SmṛtiCan. iv. 403. 6.

अत्यन्तबहुत्व (atyantabahu-tva) the state of being extremely abundant एकविषयत्वे विकल्पः प्राप्नोति । स च न युक्तो द्विगुणस्यात्यन्तबहुत्वात् ManuBh. ii. 133. 12 (*on* 8. 139)

अत्यन्तबहुल (atyanta-bahula) *adj.* very frequent or profuse कार्मारव्याम् ··· गान्धारोऽत्यन्तबहुलः SaṁgīRa. i. 252. 3 (1(7). 102)

अत्यन्तबहुव्याप्ति (atyantabahu-vyāpti) *f.* very large coverage or inclusion एकैकश इति शसप्रत्ययाद्वीप्सात्यन्तबहुव्याप्तिप्रदर्शनार्था NyāyKa. 27. 7.

अत्यन्तबाध (atyanta-bādha) *m.* **i** complete denial (of one's nature) गुणादीनां च नात्यन्तबाधः SāṁkhyaPraSū. 5. 26; सदसद्भ्यां भिन्नमेव जगद् भवतु तथाप्यत्यन्तबाधप्रतिषेधानुपपत्तिः SāṁkhyaPraBh. 127. 24 (*on* 5. 54); **ii** complete annulment or sublation, complete contradiction इतरथा हि प्रैषेऽत्यन्तबाध एव स्यात् TantrVā. 1176. 5 (*on* iii. 8. 24); पृष्ठशब्दश्रुतिवृत्ते गृह्यमाणेऽत्यन्तबाध आत्मने(पदस्य स्यात्) ṬupṬ. 162. 4 (*on* vii. 3. 36); तत्र (पीलुशब्दविषये) म्लेच्छोक्तस्यात्यन्तबाधः NyāyRa. 643. 20 (*on* 5(15). 17); आहवनीयवत्तं बाधित्वा ··· होमस्तत्रानादरे सत्याहवनीयविधेरत्यन्तबाधप्रसङ्गात् NyāyRaMā. 116. 16; तत्र श्रुतेरप्यत्यन्तबाधो वाक्यस्य च S'āstrDī. 242. 22 (*on* iii. 3. 7); PadMañ. *on* KāśiVṛ. *on* P. i. 1. 21; प्रतिषिद्धं परित्यज्यान्यत्रापि शक्यं कर्तुमिति प्रतिषेधेऽपि नात्यन्तबाधः Aparā. 558. 10 (*on* 1. 260); परेणोद्गात्रापच्छेदनिमित्तादक्षिण्येन बाधेऽपि नात्यन्तबाधः Nyāyāmṛ. 115B. 7; काम्येनाग्निनोत्तरवेद्या बाधेऽपि नात्यन्तबाधः VidhiRa. 32 (177. 23); तस्मादत्यन्तबाधादपि पापीयान्विकल्पः S'ivārkaMaDī. i. 118. 22 (*on* i. 1. 2); न निषेधेन विधेरत्यन्तबाधो युक्तः MīmāNyāPra. 265. 7; ननु तत्राप्येकत्वस्य नात्यन्तबाधः MayūMāli. 711. 16 (*on* x. 4. 18)

अत्यन्तबाधक (atyantabādha-ka) *adj.* extremely obstructive (आबाधकः) अभिव्याप्तो बाधकोऽत्यन्तबाधकः JīvanVi. 160. 16; *n.* great impediment

अथ प्रश्नोत्तराभ्यामत्यन्तबाधकं प्रदर्श्य तद्वर्जनमाह JīvanVi. 160. 10.

अत्यन्तबाधन (atyanta-bādhana) *n.* total annulment S'lokaVār. 5. (15) 17 (643. 5); न बहुवचनस्यात्यन्तबाधनं युक्तम् S'āstrDī. 287. 13 (*on* iii. 5. 7); भूयसां शेषकार्याणां मा भूदत्यन्तबाधनम् S'āstrDī. 480. 14 (*on* vi. 3. 21)

अत्यन्तबाधानुपपत्ति (atyantabādhānupapatti) *f.* impossibility of complete sublation or rejection निषेधस्य प्राप्तिसापेक्षत्वेनोपजीव्यत्वादत्यन्तबाधानुपपत्तेः BhāṭṭDī. i. 259. 1 (*on* iii. 3. 7)

अत्यन्तबाधापत्ति (atyantabādhāpatti) *f.* contingency of total sublation or rejection न चैवमाचमनादिभिः क्रमादिबाधे श्रुतेरत्यन्तबाधापत्तिरिति वाच्यम् MīmāKau. i. 33. 14 (*on* i. 3. 7)

अत्यन्तबाधायोग (atyantabādhāyoga) *m.* impropriety of total annulment or rejection अनपनीतस्य च शास्त्रस्यात्यन्तबाधायोगाद्विकल्पो दुःपरिहरः NyāySu.(So.) 8. 25 (*on* i. 2. 2); दुर्बलप्रमाणप्रापितस्यापि च प्रबलप्रमाणप्रापितेनात्यन्तबाधायोगादुभयोरपि … विकल्पः BhāṭṭDī. iv. 91. 6 (*on* x. 7. 15); तस्य च शास्त्रत्वेनात्यन्तबाधायोगात् MīmāKau. iii. 264. 70 (*on* ii. 2. 23); शास्त्रेण … शास्त्रान्तरस्यात्यन्तबाधायोगात् MīmāNyāPra. 264. 27; निर्दोषशास्त्रकारितत्यात्यन्तबाधायोगात्तदानीमपि विकल्पो दुर्वारः MayūMāli. 881. 10 (*on* xii. 4. 10); 508. 14 (*on* vi. 5. 19)

अत्यन्तबाधित (atyanta-bādhita) *adj.* [*f.* -ā] completely annulled or rejected समाख्या … इतरथा प्रैषेऽत्यन्तबाधिता स्यात् S'āstrDī. 339. 9 (*on* iii. 8. 12); बुभुक्षुत्वादिकं हि जाठरेऽत्यन्तबाधितम् S'rutaPra. iB. 344. 13 (*on* i. 2. 27)

अत्यन्तबाल (atyanta-bāla) *adj.* [*f.* -ā] very young स यथा कुमारो वा अत्यन्तबालो वा … अतिघ्नीम् … प्राप्य गत्वा शयीत BṛĀraUBh. 245. 5 (*on* ii. 1. 19); अत्यन्तबालम् अत्यन्तवृद्धं च वर्जयित्वा … न कश्चित्पुरुषोऽस्ति यः स्त्रीभिर्नाकृष्यते ManuBh. i. 186. 15 (*on* 2. 214); स्पृहा यस्या नोत्पन्ना सा चाष्टवर्षा षड्वर्षा वा न त्वत्यन्तबालैव ManuBh. ii. 268. 8 (*on* 9. 88); अत्यन्तबालम् … श्रीमदिन्दीवराक्षम् (दुग्धेन संप्रीणयेत्) SkandP. ii(5). 16. 3; PañcaRā.(Nā.) iii. 10. 17; नात्यन्तबालवृद्धांश्च श्रुतवृत्तादिभूषितान् ।…अष्टौ वरयित्वा ĪśānS'iPa. ii. 45. 45; अत्यन्तबालम् … कृष्णं नमामि KṛṣṇaKa. 2. 19; प्राचीनैरुपदेशैस्तावदवगन्तुमसमर्थोऽत्यन्तबालः S'ivārkaMaDī. i. 174. 20 (*on* i. 1. 4)

अत्यन्तबालकपुत्र (atyantabālaka-putra) *m.* very young son देशान्तरस्थेऽत्यन्तबालकपुत्रेऽपुत्रपत्नीसंभवे पुत्रिण्याः पत्न्या जलमात्रं विधत्ते HārLa. 174. 13.

अत्यन्तबाह्य (atyanta-bāhya) *adj.* extreme stranger to (completely ignorant of) (स्वामी) युष्मद्विधैः … षाड्गुण्योपायेऽत्यन्तबाह्यैः …असमीक्ष्य मन्त्रयते Tantrākhyā. 44. 17; PañcT. 1. 147 (149. 7); Pañcā. 102. 20.

अत्यन्तबीभत्स (atyanta-bībhatsa) *adj.* exceedingly hideous or disgusting अनेकाशुचिसंघातत्वादत्यन्तबीभत्सं कुलायं नीडं शरीरम् BṛĀraUBh. 550. 12 (*on* iv. 3. 12); कृमिकुलनिलयेऽत्यन्तबीभत्सरूपे रज्यत्यङ्गे वधूनां व्रजति गतमतिः श्वभ्रगर्भे क्रमित्वम् SubhāRaSaṁ. 122.

अत्यन्तबीभत्सित (atyanta-bībhatsita) *adj.* exceedingly hideous अत्यन्तबीभत्सितमपि स्त्र्यादिदेहम्…गृध्यन्तः…धावन्ति SanatBh. 199. 18 (*on* 1. 14)

अत्यन्तबुद्धि (atyanta-buddhi) *adj.* extremely intelligent विप्रयोगात् प्रियस्य च । मनुष्या मानसैर्दुःखैर्युज्यन्ते येऽल्पबुद्धयः (v. l. क्लिश्यन्तेऽत्यन्तबुद्धयः) MahāBhā. xi. 2. 18.

अत्यन्तबुद्धिमान्द्य (atyanta-buddhimāndya) *n.* extreme dullness of intellect अत्यन्तबुद्धिमान्द्यात् …। यो विचारं न लभते ब्रह्मोपासीत सोऽनिशम् PañcDa. 9. 54.

अत्यन्तभक्त (atyanta-bhakta) *adj.* [*f.* -ā] extremely devoted प्रह्लादः …। अत्यन्तभक्तो देवेशं जगाम मनसा हरिम् MatsyaP. 245. 8; विजयतां ममात्यन्तभक्ता दयिता Tantrākhyā. 111. 3; PañcT. 3. 69 (336. 8); (रामः) जनकस्य नरेन्द्रस्य सुतयात्यन्तभक्तया । जानकं पालयत्(न्) सत्यम् … प्राविक्षद्दण्डकं वनम् PadmP.(Ra.) 102. 17; सोदरौ । अत्यन्तभक्तौ च पितुर्व्यवर्तेतां पदातिवत् TriṣaS'aPuC. iv. 5. 86; प्रारब्धकर्मण्येवात्यन्तभक्तेन भवता … पुरुषप्रयत्नस्य वैयर्थ्यं मनसापि चिन्तयितुमशक्यम् JivanVi. 10. 18; त्वं तु यदि तयोर्विरोधेऽत्यन्तभक्तः GuruCandr. i. 81. 17.

अत्यन्तभक्ति (atyanta-bhakti) *f.* extreme devotion अन्यार्चने स्वेष्टेश्वरेऽत्यन्तभक्तिप्राप्तिपूर्वकान्येशप्रीतिद्वारा … अर्चयिष्य एवं संकल्पयेत् PārāSū. 47. 6; त्रिपुरकुमारः परमगुरुचरणकमलयुगलमत्यन्तभक्त्या … प्रणम्य दिग्विजयार्थम् … ययौ S'aṅkaVi.(Ā.) 271. 5.

अत्यन्तभक्तिभाज् (atyantabhakti-bhāj) *adj.* extremely devoted तत्रापि धारिणी सा च पत्यावत्यन्तभक्तिभाक् । तल्पं प्रकल्पयामास PariPar. 1. 112.

अत्यन्तभक्षण (atyanta-bhakṣaṇa) *n.* eating too much एषामन्यतमस्यात्यन्तभक्षणाभ्यासे प्रत्येकं भक्षणसमुदाये वैतत् Aparā. 1165. 25 (*on* 3. 289)

अत्यन्तभग्न (atyanta-bhagna) *adj.* completely destroyed राज्यम् … सेवस्व मुदितोऽत्यन्तभग्ननिःशेषकण्टकम् PadmP.(Ra.) 47. 95.

अत्यन्तभङ्ग (atyanta-bhaṅga) *m.* **i** complete destruction होमस्य … अत्यन्तभङ्गे संस्कार्याभावात् … कपाले घृष्टे सत्ययं होमः NyāyMāVi. 331. 5 (*on* vi. 4. 4); **ii** great humiliation, defeat तुण्डीराणामीशिता दुर्नयेन प्राप्यैवं पाण्ड्यमत्यन्तभङ्गम् Raghunā. 10. 35.

अत्यन्तभद्रा (atyanta-bhadrā) *adj.* (*f.*) extremely blessed or happy (सूर्यः) नृणां दृष्टिं विजिह्मां विदधदपि करोत्यन्तरत्यन्तभद्राम् SūryaS'. 86.

अत्यन्तभय (atyanta-bhaya) *n.* excessive fear (राजकुमारोऽपि) पूर्वारूढं भल्लूकं दृष्ट्वा पुनरत्यन्तभयं प्राप्तः SiṁhāDvā. 35. 4(10)

अत्यन्तभयदायक (atyantabhaya-dāyaka) *adj.* greatly awe-inspiring अत्यन्तभयदायकम् … तमालोक्य जगन्नाथं भूयोभूयो ववन्दिरे SkandP. ii(1). 38. 14.

अत्यन्तभयसंपत्ति (atyantabhaya-sampatti) *f.* good deal of excessive fear अत्यन्तभयसंपत्तिरेतस्माज्जायते मम SkandP. ii(3). 2. 40.

अत्यन्तभवनिवृत्ति (atyanta-bhavanivṛtti) *f.* total cessation of worldly life तर्हि मिथ्याभूतस्य मोक्षो नामात्यन्तभवनिवृत्त्यात्मा स्वरूपनिवृत्तिपर्यवसितः S'atDū. 194. 23.

अत्यन्तभवभीत (atyanta-bhavabhīta) *adj.* exceedingly afraid of worldly life अत्यन्तभवभीतानां भक्तानां भावितात्मनाम् । इदं रहस्यं वक्तव्यम् JayāS. 12. 136 = PāraS. 5. 183.

अत्यन्तभागिनी (atyanta-bhāginī) *adj.* (*f.*) ever sharing, always suffering दुःखानामेव पुत्राहं विहितात्यन्तभागिनी Rāmā. ii. 430*(2)

अत्यन्तभारत्व (atyantabhāra-tva) *n.* excessive heaviness क एनान्धारयति यतोऽग्नीषोमविष्णुतेजःकूटात्मकत्वेनात्यन्तभारत्वात् S'aṅkaVi.(Ā.) 48. 8.

अत्यन्तभाव (atyanta-bhāva) *m.* eternality, unending (perpetual) existence (सर्गस्य) अकारणत्वे ह्यत्यन्ताभावोऽत्यन्तभावो वा स्यात् Sāṁkhya-TaKau. 460. 6 (*on* 56)

अत्यन्तभावन (atyanta-bhāvana) *n.* very deep contemplation स्नेहस्यैव विकारः प्रिययोरत्यन्तभावनादनिशम् BhaktiRa. 2. 59.

अत्यन्तभावम् (atyanta-bhāvam) *adv.* totally, completely, absolutely अत्यन्तभावं नष्टास्ते MahāBhā. iv. 24. 13.

अत्यन्तभाष्यानुग्रह (atyanta-bhāṣyānugraha) *m.* complete favour or concurrence of the Bhāṣya एवं 'ज्ञोऽविदर्थस्य' इति सूत्रेऽपि तत्संबन्धेनात्यन्तभाष्यानुग्रहः LaS'abdeS'e. ii. 8. 18–19.

अत्यन्तभासुर (atyanta-bhāsura) *adj.* very shining, splendid भवनद्वारे … गजान् । … अत्यन्तभासुरान् ।… दृष्ट्वा पादचरास्त्रस्ताः PadmP.(Ra.) 71. 19; तदेतदत्यन्तभासुरम्…अविविधाय रूपं नैशाचरमनेन गगनाध्वनैव धावितः पृष्ठे Uday-SuKa. 112. 18; 77. 28.

अत्यन्तभास्वर (atyanta-bhāsvara) *adj.* [*f.* -ā] very brilliant, excessively shining अत्यन्तभास्वरा स्वच्छा तयोर्मध्ये स्थली मुने BrahmāṇḍP. iii. 33. 51; आदित्यादिषु हि सत्त्वम् अत्यन्तप्रकाशम् अत्यन्तभास्वरम् GītāBh.(S'aṅ.) 441. 6 (*on* 15. 12)

अत्यन्तभिदा (atyanta-bhidā) *f.* [P. iii. 3. 104] entire difference, difference in every respect अग्रहोऽनतिभेदाच्चेदंशेऽत्यन्तभिदा क्व वः IṣṭaSi. 268. 11.

अत्यन्तभिन्न (atyanta-bhinna) *adj.* [*f.* -ā] entirely or radically different, totally distinct अत्यन्तभिन्नावात्मानौ तावितौ व्यवसीयते TattvSaṁ. 704; तेन नात्यन्तभिन्नोऽर्थः सारूप्यमिति वर्णितम् S'lokaVār. 5(12). 76 (565. 6); अत्यन्तभिन्नमपि मीमांसकस्यासिद्धम् TātpaṬ.(U.) 218. 17 (*on* 5(2). 61); 208. 22 (*on* 5(2). 61); यद्यपि जातिर्व्यक्तेरत्यन्तभिन्ना नोपलभ्यते TantrVā. 268. 24 (*on* i. 3. 26); 269. 5 (*on* i. 3. 26); यदि अत्यन्तभिन्ना एव एताः सृतयः स्युः BrahmSūBh.(S'aṅ.) 822. 10 (*on* iv. 3. 1); 89. 10 (*on* i. 1. 31); कथं च अत्यन्तभिन्नानां रूपरूपिभावः IṣṭaSi. 19. 15; पराधीनं यस्य कर्तृत्वं निरूपितं किमसौ ततोऽत्यन्तभिन्नः BrahmSūBh.(Bhā.) 140. 21 (*on* ii. 4. 43); यद्येवं निमित्तान्तरमनपेक्ष्यैकव्यवहारोऽत्यन्तभिन्नैः … किं न साध्यते ĀtmaTaVi. 388. 12; एवं चेदत्यन्तभिन्नोऽसंबद्धः कथं संबन्धिनौ संबन्धयेत् Bhām. 401. 8 (*on* ii. 2. 13); अत्यन्तभिन्नयोरैक्यं येषां चित्तशरीरयोः । … नमस्तास्ते सुपण्डिताः YogVā. iii. 110. 37; ते च क्रिये शास्त्रादत्यन्तभिन्ने NyāyRa. 7. 17 (*on* 1. 22); 632. 17 (*on* 5(14). 75) = YuktiSneha. 4. 27 (*on* i. 1. 1); किं पुनरत्यन्तभिन्नशब्दप्रत्याय्यमानस्य लिङ्गभेदावगतिर्न स्यात् Pradī. iv. 120B. 35 (*on* iv. 1. 92); किमयं जीवः परस्मादत्यन्तभिन्नः S'rī-Bh. 539. 9 (*on* ii. 3. 42); तस्मादत्यन्तभिन्नं चिदचिद्वस्तुशरीरकं ब्रह्म NītiMā. 41. 16; तथा ह्यत्यन्तभिन्नयोरश्महिषयोरिव नोपादानोपादेयभावः TattvPradī.(Ci.) 335. 4; गुणगुणिनोः … अत्यन्तभिन्नयोस्तदनुपलम्भात् TarkSaṁ.(Ā.) 59. 17–18; अत्यन्त-

भिन्नयोः प्रकारप्रकारिभावरहितयोरित्यर्थः S'rutaPra. iB. 63.24 (*on* i. 1.1); न खल्वत्यन्तभिन्नयोः क्वचिदपि विशेषणविशेष्यभावो दृश्यते NyāyKu. 129.14; नायं जीवः श्रीपुरुषोत्तमादत्यन्तभिन्नः VedāntKau. 236.3 (*on* ii. 3.42); अत्यन्तभिन्नधात्वर्थसंबन्धे तु तेनैव णमुल् भवति PadMañ. *on* KāśiVr. *on* P. iii. 4.37; अस्तु तर्हि परस्परमत्यन्तभिन्नानां द्रव्यजातिगुणादीनां ··· स्वरूपमात्रग्रहणं निर्विकल्पकम् S'atDū. 84.7; 179.7; अत्यन्तभिन्नधर्मपरम्पराया अप्यप्रामाणिकत्वात् NyāySu.(Ja.) 363A.8 (*on* ii. 2.6); ननु वृत्तितद्वोधौ यदि घटदीपाविवात्यन्तभिन्नौ YogVār. *on* 1.4; अथ तादृशविशिष्टरूपमत्यन्तभिन्नं तर्हि भाषान्तरेणातिरिक्तविषयैव स्वीकृता GuruCandr. i. 232.2; अर्थेन ज्ञानादत्यन्तभिन्नेन घटादिरूपेण विषयेणाभिन्नो धियां विशेषः LaCandr. 40.4; 678.33.

अत्यन्तभिन्नता (atyantabhinna-tā) *f.* absolute or total difference अत्यन्तभिन्नतास्माभिर्नैव कस्यचिदिष्यते S'lokaVār. 5(3).105 (297.7); 7.192 (899.2); तस्माद्यथैव सूर्यादेरिन्द्रादत्यन्तभिन्नता TantrVā. 398.15 (*on* ii. 1.17); विकारे सांख्यसिद्धान्त आरम्भेऽत्यन्तभिन्नता BṛĀraUBhVā. iv. 3.656; अत्यन्तभिन्नतयैतावन्तं कालमनुभूतेषु सर्वेष्वात्मसु ··· समदर्शनरूपो योगः GītāBh.(Rā.) 349.3 (*on* 6.33)

अत्यन्तभिन्नत्व (atyantabhinna-tva) *n.* the state of being entirely different, total difference तस्याप्यत्यन्तभिन्नत्वं न स्यादवयवैः सह S'lokaVār. 5(14).75 (632.5); अत्यन्तभिन्नत्वाद् द्रव्यादिषूपचारो न युक्तः TantrVā. 1183.5 (iii. 8.43); अत्यन्तभिन्नत्वमङ्गीकृत्य ··· धर्ममभ्युपगच्छति PrakaVi. 508.18; तत्र न डित्थशब्दो जातिवदर्थस्यात्मा अत्यन्तभिन्नत्वात् S'āstrDī. 42.7–8 (*on* i. 1.4); तयोरत्यन्तभिन्नत्वेऽपि तत्कल्पनाया पदार्थान्तरधर्माणामपि विवक्षितधर्मधर्मित्वापत्तेः Syādvā-Mañ. 7 (9–10); कार्यस्य कारणानन्यत्वमस्ति न त्वत्यन्तभिन्नत्वम् VedāntPāSau. 159.18 (*on* ii. 1.14); 188.4 (*on* ii. 2.13); तदा जडेभ्योऽत्यन्तभिन्नत्वात् जडधर्मत्वं वक्तुमशक्यम् LaCandr. 335.13.

अत्यन्तभिन्नत्वसाम्य (atyantabhinnatva-sāmya) *n.* similarity in complete difference (being completely different) समवायः ··· संबध्येतात्यन्तभिन्नत्वसाम्यात् VedāntKau. 188.18 (*on* ii. 2.13)

अत्यन्तभिन्नमति (atyantabhinna-mati) *adj.* having entirely different view, having widely different opinion अत्यन्तभिन्नमतयः ··· निरीश्वरमिदं प्राहुः SivS. 1.13.

अत्यन्तभिन्नरूप (atyantabhinna-rūpa) *adj.* having a totally different form अत्यन्तभिन्नरूपयोरभिन्नस्वभावत्वमसंभावयन् पृच्छति Nyās. iii. 976.1 (*on* viii. 2.18);

अत्यन्तभिन्नरूपत्व (atyantabhinnarūpa-tva) *n.* the state of being of an entirely different form अत्यन्तभिन्नरूपत्वाल्लक्ष्याणां लक्षणाद्विना नैकमालम्बनम् TantrVā. 197.18 (*on* i. 3.18)

अत्यन्तभिन्नविषय (atyantabhinna-viṣaya) *adj.* having an entirely different object अयं गौरिति प्रत्यक्षमपि यद्यत्यन्तभिन्नविषयं स्यात्तर्हि इदं गोत्वे इति प्रतीतिः स्यात् MānaMe. 43.1.

अत्यन्तभिन्नार्थ (atyantabhinnārtha) *adj.* having an entirely different meaning रूपादिशब्दाश्चन्दनशब्दादत्यन्तभिन्नार्थाः NyāyVār. 170.6 (*on* i. 2.45); न चात्यन्तभिन्नार्थेन आमन्त्रवाच्यस्यार्थस्य संबन्धिनः साधनादयः शक्यन्तेऽभिव्यक्तुम् Nyās. i. 532.22 (*on* iii. 1.40); सामानाधिकरण्यं चात्यन्तभिन्नार्थयोः ···न संभवति MayūMāli. 56.3 (*on* i. 4.2)

अत्यन्तभिन्नार्थत्व (atyantabhinnārtha-tva) *n.* the nature of having a totally different meaning अत्यन्तभिन्नार्थत्वस्य···दूषितत्वात् न्यूनबोधनमवशिष्यते S'atDū. 192.8.

अत्यन्तभिन्नैकनिष्ठत्व (atyantabhinnaikaniṣṭha-tva) *n.* the nature of being present only in absolutely different things साहित्यस्यात्यन्तभिन्नैकनिष्ठत्वात् NyāyKu. 135.14.

अत्यन्तभीकर (atyantabhī-kara) *adj.* causing excessive fear, extremely terrific अथ क्रुद्धो दानवेन्द्रः खड्गं विक्षेप···अत्यन्तभीकरम् S'ivaP. ii(5). 38.21 (364B.6)

अत्यन्तभीत (atyanta-bhīta) *adj.* [*f.* -ā] extremely afraid of, terribly frightened लोकत्रयं सर्वं प्रव्यथितमत्यन्तभीतम् GītāBh.(Rā.) 547.22 (*on* 11.20); मा मा पतेति चात्यन्तभीताः प्राद्रुद्विजातयः BṛKathāMañ. ii. 2.127; तच्छ्रुत्वात्यन्तभीतेन तेन मुक्तो वृषः क्षणात् PārśvC. 2.646; दृष्टिर्भयानकात्यन्तभीता ज्ञेया भयानके BhāvPra.(S'ā.) 126.5(5)

अत्यन्तभीतमनस् (atyantabhīta-manas) *adj.* greatly afraid of in the mind त्वां दृष्ट्वा प्रव्यथितान्तरात्मा अत्यन्तभीतमना धृतिं न विन्दामि GītāBh. (Rā.) 549.11 (*on* 11.24)

अत्यन्तभीम (atyanta-bhīma) *adj.* very dreadful, extremely terrific दृष्ट्वा दक्षिणतोऽत्यन्तभीमनिःस्वानकारिणो भल्लका(?न्) गगने गृध्रा भ्रमन्ति छन्नभास्कराः PadmP.(Ra.) 74.14; मृतिजननजरावर्तमत्यन्तभीमं ··· व्याधिसिन्धुप्रवाहम् । नीयन्ते प्राणिवर्गाः ··· यैः SubhāRaSaṁ. 643; 74; अत्यन्तभीमा नरकाः सुघोराः ViṣṇuDhaP. ii. 119.55.

अत्यन्तभीरु (atyanta-bhīru) *adj.* extremely timid यैरगृहीतसंबन्ध एव लिङ्गादिः स्वरूपसामर्थ्येनैव प्रेरक इष्यते तेऽत्यन्तभीरव इत्युपेक्षणीयाः NyāyMañ. i. 320.14; अदृष्टद्वारेणोपयोगस्तु अत्यन्तभीरुभिः परैः ··· परित्यक्तः S'rutaPra. iB. 152.28 (*on* i. 1.4)

अत्यन्तभीरुता (atyantabhīru-tā) *f.* extreme timidity अपि भर्तुः प्रभावज्ञा कथं मिथ्या विमूर्छसि । स्वभावसुलभा सत्यं स्त्रीणामत्यन्तभीरुता Rāmā-Mañ. 317.25.

अत्यन्तभीषण (atyanta-bhīṣaṇa) *adj.* [*f.* -ā] very dreadful, extremely terrific नेष्यामो भवतीरद्य प्रेतनाथनिकेतनम् ।···बाणैरत्यन्तभीषणैः BrahmāṇḍP. iii. 24.25; यावच्च तत्तयोर्युद्धं वर्ततेऽत्यन्तभीषणम् PadmP.(Ra.) 6.465; अन्येनाशीविषेणेव पततात्यन्तभीषणा । दृष्टिरुल्कानिभाक्षेपि प्रतिपक्षस्य विग्रहे PadmP.(Ra.) 12.294; (ताक्ष्यः) उपसंहृत्य देहमत्यन्तभीषणम् ···मातुरन्तिकमगात् SkandP. iii(1). 38.25; भुजङ्गमः ·· तत्रैवाजनि दृष्टश्च स मयाऽत्यन्तभीषणः SamarāSaṁ. 4.370; सा (सरित्) ··· कल्लोलकलिता त्यक्तमर्यादात्यन्तभीषणा SamarāSaṁ. 8.499.

अत्यन्तभूतत्व (atyantabhūta-tva) *n.* absolute past तदर्थश्चेदवयवो भाविनो भूततागतिः । न स्यादत्यन्तभूतत्वमेवैकं तत्र संभवेत् VākyaP. iii. 9.94 (95)

अत्यन्तभूयसी (atyanta-bhūyasī) *adj.* (comp.) much more perfect, complete in all aspects अत्यन्तभूयसी किल योगवशादात्मसंवित्तिः RasRaSa. 1.48.

अत्यन्तभेद (atyanta-bheda) *m.* **i** absolute or total difference (between two or more entities) प्रत्येकं व्यञ्जका भिन्ना वर्णवाक्यपदेषु ये । तेषामत्यन्तभेदेऽपि सङ्कीर्णा इव शक्तयः VākyaP. 1.88; एकत्वं तु स्वरूपत्वाच्छब्दयोगौणमुख्ययोः । प्राहुरत्यन्तभेदेऽपि भेदमार्गानुदर्शिनः VākyaP. 2.259; एवमत्यन्तभेदेऽपि केचिन्नियतशक्तितः । तुल्यप्रत्यवमर्शादेर्हेतुत्वं यान्ति नापरे TattvSaṁ. 726; परार्थानुमानं शब्दात्मकम्, स्वार्थानुमानं तु ज्ञानात्मकम् । तयोरत्यन्तभेदात् नैकं लक्षणमस्ति NyāyBiṬ. 87.5 (*on* 2.1); अत्यन्तभेदाद्धि स्तोत्रशस्त्रापूर्वयोः ··· सम्बन्धवचनम् TantrVā. 411.10 (*on* ii. 1.27); अत्यन्तभेदस्तु घटतज्ज्ञानयोरस्माभिर्नेष्टः TātpaṬ.(U.) 257.16 (*on* 5(4).69); अत्यन्तभेदो विज्ञेयः संसारीश्वरयोरतः BṛĀraUBhVā. i. 4.1240; वस्तुनोरत्यन्तभेदे सति शब्दसाधारणतामात्रेण तदनुमानमुपपद्यते NyāyMañ. i. 179.11; गौरिवाश्व इति । अत्यन्तभेदविवक्षायामिदमुच्यते Pradī. ii. 394A.19 (*on* ii. 1.54); एवमेव हि लोके निमित्तोपादानयोरत्यन्तभेदो दृश्यते S'rīBh. 384.5 (*on* i. 4.23); 161.4 (*on* i. 1.4); तत्र न तावत्तादात्म्यं शब्दार्थयोः अत्यन्तभेदेन प्रतिभासनात् TarkBhā.(Mo.) 4.18; न च साधनस्य कर्मणः क्रियया सादृश्यमुपपद्यते । अत्यन्तभेदात् Nyās. i. 554.26 (*on* iii. 1.87); प्रमाणान्तरे गोवाहीकयोरत्यन्तभेदमवगम्य व्यपदेश्यगौणत्वमवसीयते Aparā. 1003.20 (*on* 3.144); न च प्रयोजनसहितमेव लक्ष्यं लक्षणाया विषयः विषयप्रयोजनयोरत्यन्तभेदात् Kāvyānu.(He.) 49.10; अत्यन्तभेदः अभेदासह्यो भेद इत्यर्थः SrutaPra. iB. 156.34 (*on* i. 1.4); न गोपुरुषवदत्यन्तभेदो जीवपरयोः BrahmSūBh.(Bhā.) 74.1 (*on* i. 4.5); यत्तन्निवृत्यात्यन्तभेदनिवृत्तिस्स्यात् NyāyKu. 130.15; यावद् ब्रह्मणः परस्परं च जीवानामत्यन्तभेदः पारमार्थिको नाङ्गीक्रियते S'atDū. 173.29; जगद्ब्रह्मणोरत्यन्तभेदे कथं त्रिविधपरिच्छेदराहित्यम् NyāySiA. 229.18; इयं च श्रुतिरत्यन्तभेददर्शननिन्दापरा भवतु NyāySu.(Ja.) 452A.4 (*on* ii. 3.14); अत्यन्तभेदेऽत्यन्ताभेदे च सामान्याधिकरण्यानुपपत्तेः Upask. 286.13 (*on* vii. 1.6); तार्किकादिपक्षवदत्यन्तभेदनिषेधाय पुनरुक्तः (जीवपुरुषोत्तमयोः संबन्धः) VedāntKau. 291.19 (*on* iii. 2.28); अत्यन्तभेदसत्त्वे ज्ञानानन्दयोरैक्यासंभवेन नाखण्डार्थत्वम् LaCandr. 806.37; एकोदुम्बरबीजोपादेयानामपि फलपत्रक्रमिकाष्ठादीनामत्यन्तभेददर्शनात् SetuBa. 236.16; अत्यन्तभेदेऽश्वपुरुषयोरिव तद्व्यवहाराभावात् Vaiyā-SiMañ. 38.12; वृत्तिवाक्ययोरत्यन्तभेदात् LaS'abdeS'e. ii. 400.2; **ii** (between a thing and its attributes etc.) अत्यन्तभेदात् स्तुतिस्तुत्ययोः S'ābaBh. 2004.11 (*on* x. 6.35); पर्यायेणाथ कर्तृत्वं स किं तस्यैव वस्तुनः । अत्यन्तभेदाभेदौ तु स्यातां तद्वति वस्तुनि PramāVār. 1.177; न त्वष्टाकपालस्तुत्या द्वादशकपालस्य स्तुतिः, विशेषणविशेष्ययोरत्यन्तभेदात् TantrVār. 312.15 (*on* i. 4.16); धर्मधर्मिणोरत्यन्तभेदे च कौटस्थ्याविरोधः NyāyKuA. i. 55.6; केन वा धर्मेभ्योऽत्यन्तभेदो धर्मिण उपेयते Kāśi. i. 265.10 (*on* 4.152); अत्यन्तभेदेऽपि च स्वभावनियमादेव धर्मधर्मिभावनियमोपपत्तेः Kiraṇā. 258.20; संस्थानतद्वतोः संस्थानयोश्चात्यन्तभेदात् NyāyKu. 149.17; तत्र प्रकारप्रकारिणोः प्रकाराणां च मिथोऽत्यन्तभेदेऽपि NyāySiA. 187.14; किं च धर्मधर्मिणोरत्यन्तभेदे गवाश्ववत् सामानाधिकरण्यप्रत्ययो न स्यात् SarvaDaKau. 91.1; **iii** (between cause (means) and effect (result)) साध्यसाधनयोरत्यन्तभेदात् Pradī. iii. 117A.40 (*on* iii. 1.87); अत्यन्तभेदो ग्राह्यग्राहकयोरिष्ट एव Kāśi. ii. 126.22 (*on* 5(3).69); उपादानेऽपि हि कार्यकारणयोरत्यन्तभेद एव दृश्यते S'atDū. 209.15; पूर्वत्र कार्यकारणयोरत्यन्तभेदो निराकृतः

VedāntKau. 161. 19 (*on* ii. 1. 20); **iv** (between general and particular) तेन नात्यन्तभेदोऽपि स्यात्सामान्यविशेषयोः S'lokaVār. 5(11). 11 (*on* 548. 4); वक्त्रौदुम्बरीजातिव्यक्तिस्पर्शानामत्यन्तभेदात् TantrVā. 98. 19 (*on* i. 3. 3); अस्तु वात्यन्तभेद एव जात्यादेः YuktiSneha. 39. 32 (*on* i. 1. 4); **v** (between part and whole) न च ब्रह्मांशानां ब्रह्मणोऽत्यन्तभेदं वा ब्रह्माध्यस्तत्वं वा स्वप्नेऽप्यङ्गीकरोषि S'atDū. 202. 12; अवयवानामवयविना सहात्यन्तभेदो नास्ति S'arka. 14. 2; किमभेदांश एव जीवः किं वा भेदांश एव । ··· न द्वितीयः । अत्यन्तभेदप्रसङ्गात् VivaPraSam̐. 312. 12; उपकार्योपकारकभावस्य दर्शपूर्णमासप्रयाजादौ भिन्नायतनत्वेनात्यन्तभेदात् SarvaDaSam̐. 15. 169; **vi** (between a thing and its modifications) सांख्या हि प्रकृतिविकारयोरत्यन्तभेदमनिच्छन्तः···सङ्गिरन्ते Kāśi. ii. 148. 18 (*on* 5(3). 123); न तूदकं कूपस्य विकृतिः । अत्यन्तभेदात् Prasā. i. 840. 20.

अत्यन्तभेदकता (atyantabhedaka-tā) *f.* nature of causing total or absolute difference तथा च मिलितयोरुपाध्योर्भेदकत्वेऽपि नात्यन्तभेदकता अमिलितयोस्तु सा LaCandr. 468. 26.

अत्यन्तभेदकत्व (atyantabhedaka-tva) *n.* nature of causing total or absolute difference अनिरपेक्षोपाध्योरत्यन्तभेदकत्वमेतद्ग्रन्थविरुद्धम् LaCandr. 468. 34; मिलितोपाध्योर्नात्यन्तभेदकत्वम् GuruCandr. ii. 90. 8.

अत्यन्तभेदग्राहक (atyantabheda-grāhaka) *adj.* causing the cognition of absolute difference न च जगद्ब्रह्मणोरत्यन्तभेदग्राहकं किं चन प्रमाणमस्ति Aparā. 1003. 21 (*on* 3. 144)

अत्यन्तभेदतस् (atyantabheda-tas) *adv.* **A** on account of absolute difference एकस्य कार्यमन्यस्य न स्यादत्यन्तभेदतः PramāVār. 1. 165; प्रत्यक्षो गम्यते मात्रा प्रतीचोऽत्यन्तभेदतः BṛĀraUBhVā. iv. 3. 184; **B** by total removal or destruction निकृत्या परिबद्धस्य पाशस्यात्यन्तभेदतः । ···चैतन्यं स्वच्छं मन्येत S'ivaP. vii(2). 18. 17 (566B. 13)

अत्यन्तभेदपक्ष (atyantabheda-pakṣa) *m.* view subscribing to absolute difference धर्मधर्मिणोरत्यन्तभेदपक्षः ··· निरस्तः Nyāyāmṛ. 274B. 8; अत्यन्तभेदपक्षेऽपि विशेषोऽङ्गीकार्यः AdvaiSi. 807. 14.

अत्यन्तभेदवत् (atyantabheda-va(n)t) *adj.* absolutely different बद्धः पुनरत्यन्तभेदवत् (मेयं मन्यते) ĪśvaPraSū. iv. 1. 13.

अत्यन्तभेदवाद (atyantabheda-vāda) *m.* theory or doctrine of absolute difference अत्यन्तभेदवादः प्रबन्धेन निरस्तः PrakaVi. 444. 16; अत्यन्तभेदवादे भेदाभेदवादे वा 'शुक्लो घटः' इति प्रथमं तादात्म्यं प्रतिपाद्य VivaPraSam̐. 46. 24.

अत्यन्तभेदवादिन् (atyantabheda-vādin) *adj.* upholder of the theory of absolute difference तयोरत्यन्तभेदवादिनश्च कथं तर्हि 'नीलो घटः' इत्यादिप्रतीतिव्यवहारौ इत्याशङ्क्य PūrvottaVāNaMā. 78. 2.

अत्यन्तभेदव्यापक (atyantabheda-vyāpaka) *adj.* pervading absolute difference ननु न पृथगनुपलम्भोऽत्यन्तभेदव्यापकः NyāyKu. 130. 14.

अत्यन्तभेदसाम्य (atyantabheda-sāmya) *n.* equality in having absolute difference एवं समवायोऽपि समवायिभ्योऽत्यन्तभिन्नः सन् समवायलक्षणेनान्येन संबन्धेन समवायिभिः संबध्येत, अत्यन्तभेदसाम्यात् BrahmSūBh.(S'aṅ.) 371. 8 (*on* ii. 2. 13) = VedāntPāSau. 188. 5 (*on* ii. 2. 13)

अत्यन्तभेदाभाव (atyantabhedābhāva) *m.* absence of total or absolute difference आकृतिव्यक्त्योरत्यन्तभेदाभावात् ··· द्रव्यमभिधीयते TantrVā. 279. 2 (*on* i. 3. 26); वाच्यवाचकयोरत्यन्तभेदाभावात् विश्वम् ··· ब्रह्म VisṇuSaBh. 32. 16 (*on* 14); अंशान्तराग्रहोऽपि इदमंशाग्रहः, तयोरत्यन्तभेदाभावात् IṣṭaSi. 268. 13; अत्यन्तभेदाभावादिति वक्ष्यमाणोऽभिसन्धिः TattvVai. 128. 23 (*on* 3. 13); सामान्यम्···विकल्पाकारेभ्योऽत्यन्तभेदाभावेनाभावरूपम् NyāyKa. 319. 4; व्यापारस्य च व्यापारवतोऽत्यन्तभेदाभावात् NyāySu.(So.) 31. 25 (*on* i. 2. 7); संयोगाप्राप्त्यभावश्चात्यन्तभेदाभावादुपपत्स्यते NyāySu.(Ja.) 319B. 11 (*on* ii. 2. 1); प्रयोजनविषयसंबन्धानां स्वरूपतोऽत्यन्तभेदाभावात् पृथग्वक्तव्यत्वाभावः VivaPraSam̐. 226. 6; द्रव्यस्य क्रियातोऽत्यन्तभेदाभावात् BhāṭṭDī. ii. 252. 13 (*on* vi. 3. 3); व्रीह्यवयविनः स्वावयवैरत्यन्तभेदाभावात् BhāṭṭDi. ii. 263. 3 (*on* vi. 3. 11); MayūMāli. 624. 20 (ix. 3. 5); शरीरशरीरिणामत्यन्तभेदाभावेन BhāṭṭCin. i. 131. 4 (*on* i. 1. 5); कार्यकारणयोरत्यन्तभेदाभावात् GuruCandr. iii. 155. 22; अत्यन्तभेदाभावात् अत्यन्ताभेद उपचर्यते LaCandr. 468. 32; आहारांशेऽत्यन्तभेदाभावात् BālamBha. ii. 280. 13 (*on* 2. 160)

अत्यन्तभेदावसिति (atyantabhedāvasiti) *f.* ascertainment of absolute difference अनेकदेहानुस्यूतमात्मानं पश्यतः स्वस्य ततोऽत्यन्तभेदावसितिरेव युक्ता NyāySu.(Ja.) 491A. 4 (*on* iii. 2. 1)

अत्यन्तभेदाश्रय (atyanta-bhedāśraya) *m.* locus of absolute difference (i. e. absolutely different) स्तोकप्रविभागापेक्षं नैवेदमत्यन्तभेदाश्रयसदृशमभिधीयमानं शोभते TantrVā. 202. 24 (*on* i. 3. 18)

अत्यन्तभेदिन् (atyanta-bhedin) *adj.* absolutely different (in nature) अत्यन्तभेदिनोऽप्येते तुल्यप्रत्यवमर्शिने । शक्ताः शब्दास्तदर्थाश्चेत्यसङ्कचर्चितं पुरा TattvSam̐. 2612.

अत्यन्तभेदोक्ति (atyanta-bhedokti) *f.* statement of absolute difference विवक्षा नैगमोऽत्यन्तभेदोक्तिः स्यात्तदाकृतिः Laghīya. 1. 68.

अत्यन्तभेदोपलक्षण (atyantabhedopalakṣaṇa) *n.* adventitious mark of absolute difference युष्मद्ग्रहणमत्यन्तभेदोपलक्षणार्थम् Bhām. 3. 20 (*on* i. 1. 1)

अत्यन्तभैक्ष (atyanta-bhaikṣa) *n.* continual alms अरण्यं व्रजति मूलफलभक्षोऽत्यन्तभैक्षभक्षो वा MānS'S. 183. 20.

अत्यन्तभैरव (atyanta-bhairava) *adj.* very dreadful or formidable अयम् ··· वारणः ··· अत्यन्तभैरवाकारः PadmP.(Ra.) 85. 153.

अत्यन्तभोग (atyanta-bhoga) *m.* great enjoyment or pleasure अत्यन्तभोगौपयिकमैश्वर्यमिव देहिनाम् Gaṅgāva. 1. 14.

अत्यन्तभोजन (atyanta-bhojana) *n.* excessive eating उष्णादत्यन्तभोजनात् ··· नागानां कुप्यते वातशोणिते Hastyāyur. 125. 12 (1. 17)

अत्यन्तभ्रान्ति (atyanta-bhrānti) *f.* too much rotation (सा गङ्गा) न सत्तादार्थमत्यन्तभ्रान्तिश्रान्तेव मूर्च्छिता RāmāMañ. 22. 18.

अत्यन्तम् (atyantam) *adv.* **A i** for ever, during the whole life, to the end of life **ii** till the end or completion of a ritual act etc. **iii** necessarily **iv** for a very long time **B** absolutely, perfectly, completely, entirely **C** exceedingly, excessively, extremely, immensely **A i** for ever, during the whole life, to the end of life देवमीड्यं विदित्वा निचाय्येमां शान्तिमत्यन्तमेति KāṭhU. 1. 17 (*but* comm. अतिशयेन) = S'vetāU. 4. 11; तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् ChāndoU. ii. 23. 1; S'vetāU. 4. 14; अत्यन्तं तु गतश्रियः ĀśvaS'S. I. ii. 1. 36; परीक्ष्यकारिणं धीरमत्यन्तं श्रीर्निषेवते MahāBhā. v. 34. 56 = KātySm. 3 = Subhāṣi. 2649; स्वर्गं गच्छेयुरत्यन्तं सर्वे मे प्रपितामहाः Rāmā. i. 41. 18; सर्वेषामपि तु न्याय्यं दातुं शक्त्या मनीषिभिः । ग्रासाच्छादनमत्यन्तं पतितो ह्यददद्भवेत् ManuSm. 9. 202; अत्यन्तमेव सदृशेक्षणवल्लभाभिराहो निवत्स्यति समं हरिणाङ्गनाभिः S'āk. 1. 26; सत्यमत्यन्तमुदितं धर्मशास्त्रेषु धीमताम् । तारणाय MārkP. 8. 20; (ते खल्वत्यन्तं व्यावृत्तिहेतुत्वाद्विशेषा एव) 'अत्यन्तं' सर्वदा NyāyKa. 14. 4; अत्यन्तमिति । ··· अथवान्तमतिक्रान्तमिति ··· क्रियाविशेषणं चैतत् Nyās. ii. 62. 10 (*on* v. 2. 11); कस्यात्यन्तं मित्रमेकान्ततो वा शत्रुः कृत्यं शत्रुमित्रत्वहेतुः RāghPāṇ. (Dha.) 11. 8; दग्धे बीजे यथात्यन्तं प्रादुर्भवति नाङ्कुरः YaśasCam. ii. 399. 9; अत्यन्तं यावज्जीवम् VīraMi. (Vyavahāra.) 559. 7 = VyavaMa. 165. 1 = BālamBha. ii. 175. 3 (*on* 2. 132); ii. 186. 30 (*on* 2. 134); अत्यन्तं शान्तिमात्यन्तिकीं दुःखनिवृत्तिम् S'ivārkaMaDī. i. 97. 29 (*on* i. 1. 1) **A ii** till the end or completion of a ritual act etc. अप्यत्यन्तं गुणभूतानाम् ĀśvaS'S. I. iii. 14. 5; क्रतुपशवो वात्यन्तम् ĀśvaS'S. II. vi. 7. 2; **A iii** necessarily इति प्रागाथौ पूर्वाह्णे काण्वीमपराह्णेऽन्यतरां वात्यन्तं ĀśvaS'S. I. iv. 7. 4; सुब्रह्मण्या त्वत्यन्तम् ĀśvaS'S. II. vi. 4. 19; अत्यन्तमेके सुवर्णप्राशनमुदके निघृष्य VārāGS. 2. 8; **A iv** for a very long time कथं जीवेयुरत्यन्तं कथं वर्धेयुरित्यपि MahāBhā. iii. 10. 22; आत्मा ···दुःखसहस्रैः सदा अभिभूतो भ्रमत्यत्यन्तम् TattvPradī(A.) 14. 5 (*on* 1. 12); TātpaVṛ. 15. 11 (*on* 1. 12); **B** absolutely, perfectly, completely, entirely अर्थमप्रतियतो नात्यन्तं स्वरसंस्कारोद्देशः Nir. 1. 15 (37. 17); नात्यन्तमेवानुवृत्तिः श्रूयते पुत्ररक्षणे MahāBhā. i. 1. 185; यथा नोऽत्यन्तमव्ययम् । राज्यं निर्द्वन्द्वम्···चिरं भवेत् MahāBhā. iv. 25. 7; अत्यन्तभावं नष्टास्ते (v. l. अत्यन्तं वा नष्टास्ते) MahāBhā. iv. 24. 13; जयत्वजितमत्यन्तम् ArthS'ā. i. 47. 4 (1. 9); अत्यन्तमपि संहारो नाहारस्य प्रशस्यते Saunda. 14. 8; युञ्ज्यात् य एनमत्यन्तमायुषा च सुखेन च CaraS. i. 16. 12; नात्यन्तं संस्कृतेनैव नात्यन्तं देशभाषया । कथां गोष्ठीषु कथयँल्लोके बहुमतो भवेत् KāmSū. 60. 9 (1. 4) = SaraKaṇṭhā. 142. 20; योऽत्यन्तं न विनश्यति ViṣṇuP. ii. 7. 20; अपरिग्रहाच्चात्यन्तमनपेक्षा BrahmSū. ii. 2. 16; तदेवमेकस्यानेकशरीरयोगः शरीरादिवियोगश्चात्यन्तं न स्यादिति NyāyBh. 53. 14 (*on* i. 1. 40); 225. 9 (*on* iii. 2. 47); वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन VākyaP. 1. 73 = VaiyāBhū. 66 (249. 5); शब्देष्वत्यन्तमाश्रितः VākyaP. 2. 104; 2. 218; अत्यन्तं यानभिज्ञा क्षणमपि तमसा साकमेकत्र वस्तुम् SūryaS'. 24; अत्यन्तमसदार्याणामनालोचितचेष्टितम् Kāvyāda. 2. 250 = SaraKaṇṭhā. 327. 20; आशातन्तुर्न च कथयतात्यन्तमुच्छेदनीयः MālaMā. 9. 152; S'lokaVār. 5(17). 30 (696. 1); 5(8). 19 (479. 4); प्रवृत्तिः शुक्तिशकले तथा च रजतार्थिनः । आभासते कथंचिच्च तन्नात्यन्तं न भासते VibhraVi. 80; भिन्नधर्मत्वे भेदोऽत्यन्तं प्रसज्यते TattvSam̐. 134; 266; 560; यथाकामित्वं तु विदुषोऽत्यन्तमप्राप्तम् AitUBh. 248. 8 (*on* 1. 0); ऋक्सामनी नात्यन्तं भिन्ने अन्योन्यम् ChāndoUBh. 45. 13 (*on* i. 6. 1); 238. 13 (*on* iv. 11. 1); क्रियाणां तत्साधनानां च अत्यन्तमेव निवृत्तिः BṛĀraUBh. 321. 12 (*on* ii. 4. 14); अत्यन्तमेव अस्पृष्टं समम् एकम् अविक्रियं तद्ब्रह्म GītāBh.(S'aṅ.) 168. 17 (*on* 5. 18);

अत्यन्तसक्त (atyanta-sakta) *adj.* **i** very much addicted to यः पुनर्दत्तादाने चौर्ये निरतोऽत्यन्तसक्तः … स्थावरेषु … जायते Aparā. 998.7 (*on* 3.135); **ii** absolutely attached to (worldly pleasures) ये तु नात्यन्तसक्ता नाप्यत्यन्तं विरक्तास्त्वयि च धृतरसा भक्तियोगो ह्यमीषाम् Nārāy. xi. 96.4.

अत्यन्तसंकट (atyanta-saṅkaṭa) *adj.* very narrow गर्भवासेऽत्यन्तसंकटे मातुर्जठरे मूत्रपुरीषपूर्णे (वेदनामनुभवतः) Aparā. 967.22 (*on* 3.62)

अत्यन्तसंकर (atyanta-saṅkara) *m.* excessive intermixing चतुर्णां यत्र वर्णानां मैत्रेयात्यन्तसंकरः ।… साधुवृत्तीनामुपघाताय जायते ViṣṇuP. iii. 18.49; [Inst.] with excessive intermixing सद्भूतासद्भूततामायान्तो ये यावन्तः पर्यायास्ते तावन्तस्तात्कालिका इवात्यन्तसंकरेणाप्यवधारितविशेषलक्षणा एकक्षण एवावबोधसौधस्थितिमवतरन्ति TattvPradī.(A.) 50.4 (*on* 1.37)

अत्यन्तसंकीर्ण (atyanta-saṅkīrṇa) *adj.* excessively mixed, very much indistinct किं पुनरतीन्द्रिया मिथो मिश्रीभूता अत्यन्तसंकीर्णाः कालाकाशादयः Kiraṇā. 6.6.

अत्यन्तसंकुचित (atyanta-saṅkucita) *adj.* very much shrunk, extremely limited कृष्णबहुले कर्मणि स्थावरादौ तमोमये ज्ञानमत्यन्तसंकुचितं भवति SiddhāSi. i. 149.5; अत्यन्तसंकुचितज्ञानत्वान्नानुभूयते प्रत्यगात्मतत्त्वम् VedāntRaMañ. 1.2 (20.21)

अत्यन्तसंकुलता (atyantasaṅkula-tā) *f.* extreme disorderliness or perplexity अत्यन्तसंकुलतया न विज्ञातपरस्पराः शक्रयः BrahmāṇḍP. iii. 23.23.

अत्यन्तसंकोच (atyanta-saṅkoca) *m.* extreme contraction or abridgement (hence too limited application) वाक्यस्यात्यन्तसंकोचप्रसङ्गात् S'āstrDī. 316.12 (*on* iii. 7.1); एवं सति वाक्यस्यात्यन्तसंकोचो न भविष्यति NyāyMāVi. 190.22 (*on* iii. 7.1)

अत्यन्तसंक्षिप्त (atyanta-saṅkṣipta) *adj.* (building) very much reduced (in height and expanse) (वेश्म) तदेवात्यन्तसंक्षिप्तमट्टालीति निगद्यते SamarāSū. 18.46.

अत्यन्तसंक्षेप (atyanta-saṅkṣepa) *m.* [Abl.] very concisely, very briefly इत्यादि शास्त्रजातानां लक्षणं भोजभूभुजा । प्रोक्तमत्यन्तसंक्षेपाल्लिखितं मयकात्र तु YuktiKa. 176.2.

अत्यन्तसंगविलय (atyanta-saṅgavilaya) *m.* complete disappearance of attachment (to the world) अत्यन्तसङ्गविलयाय भवत्प्रणुन्नः … तं शंकरं परिहसन्नुमयाभिशेषे Nārāy. vi. 23.9.

अत्यन्तसजातीय (atyanta-sajātīya) *adj.* very similar, belonging to the same category, having the same characteristics (प्रकाशकत्वम्) किमत्यन्तसजातीयमाहो सजातीयमात्रम् TātpaṬ.(Vā.) 372.9 (*on* ii. 1.19); अत्यन्तसजातीयेष्वपि एकजातीयत्वेनाबाधितप्रत्यभिज्ञाने जातेरेव भङ्गप्रसङ्गात् NyāySiA. 207.29.

अत्यन्तसत् (atyanta-sat) *adj.* existing for all the time, absolutely real न तावदत्यन्तसतो गगनस्योत्पादः NyāyKa. 65.1; अत्यन्तसतो जन्मासंभवात् NyāySu.(Ja.) 432A.7 (*on* ii. 3.1); अत्यन्तसतोऽपि गुणादेर्भानं न युक्तम् SāṁkhyaPraBh. 127.19 (*on* 5.53)

अत्यन्तसत्त्व (atyanta-sattva) *n.* absolute existence अनुन्मूलने वा मरणत्रासस्य स्यादत्यन्तसत्त्वम् TattvVai. 66.21 (*on* 2.9); कार्यस्य … सत्त्वमात्रं साध्यमुतात्यन्तसत्त्वम् NyāySu.(Ja.) 319A.12 (*on* ii. 2.1); *adj.* possessing excessive strength अत्यन्तसत्त्वे यदि लग्ननाथे … सद्भागयुग् जीवति दीर्घमायुः JātaPā. 4.71.

अत्यन्तसत्याभिधान (atyantasatyābhidhāna) *n.* statement of absolute truth यथेदमतिदुष्करमत्यन्तसत्याभिधानं तथात्यन्तासत्याभिधानमपि PramāVāSvopVṛ. 117.28.

अत्यन्तसदृश (atyanta-sadṛśa) *adj.* very much similar अत्यन्तसदृशमेव प्रतिनिधेयम् NyāyMāVi. 324.11 (*on* vi. 3.12); न हि त्र्यणुकादिपरिमाणमत्यन्तसदृशम् TattvPrakā. 98A.7 (*on* ii. 2.11); ब्राह्मणेनात्यन्तसदृशौ क्षत्रियवैश्यौ परित्यज्य शूद्र एव वृत्त्ययोगात् S'ivārkaMaDī. i. 484.21 (*on* i. 3.37); ii. 86.6 (*on* ii. 2.21)

अत्यन्तसद्भक्ति (atyanta-sadbhakti) *adj.* having everexisting devo-

tion इत्युक्तेऽत्यन्तसद्भक्तिः प्रणम्य चरणौ गुरोः। जग्राह भरतो धर्मं सागारम् PadmP.(Ra.)32.184.

[1]**अत्यन्तसद्वृत्ति** (atyanta-sadvṛtti) *adj.* of very righteous conduct (हे विराट) भवतोऽत्यन्तसद्वृत्ते रक्षाकौशलसंभृतम् । प्राप्तं मया शिवं नित्यम् KīcaVa. 3.8.

[2]**अत्यन्तसद्वृत्ति** (aty-antasadvṛtti) *adj.* having conduct very much like that of a low person (हे युधिष्ठिर) भवतोऽत्यन्तसद्वृत्तेरक्षाकौशलसंभृतम् प्राप्तं मयाशिवं नित्यम् KīcaVa. 3.8 (comm. अन्ते सीदन्तीति अन्तसदो नीचाः। अतिशयेन तेषामिव वृत्तिर्यस्य ईदृशस्य भवतः)

अत्यन्तसंतुष्ट (atyanta-santuṣṭa) *adj.* [*f.* -ā] very much pleased, extremely satisfied सौवीरराजश्चासावत्यन्तसन्तुष्टः प्रीतिसदृशीः क्रियाः कृत्वा विष्णुसेन इति संज्ञामकरोत् Avimā. 6.14 (31); सा तु ··· विष्णुगृहे सती नृत्यत्यत्यन्तसन्तुष्टा BṛNāraP. 18.59.

अत्यन्तसंतोष (atyanta-santoṣa) *m.* great satisfaction एवमत्यन्तसंतोषजनकमतम् ··· परित्यज्य मूर्खजनाः ··· कथं बोधं वहन्ति S'aṅkaVi.(Ā.) 140.1; 267.11.

अत्यन्तसंदिह्यमानता (atyantasandihyamāna-tā) *f.* the state of being extremely doubtful ततः ··· शिवानन्देन तमुदन्तमत्यन्तसन्दिह्यमानतयात्यदिदृक्षुणा मनसि कृतम् CaitaCa. 207.13 (9)

अत्यन्तसंदुष्ट (atyanta-sanduṣṭa) *adj.* very wicked ततोऽभ्ययान्महावीर्यो द्वीपी ··· श्वार्थमत्यन्तसंदुष्टः MahāBhā. xii. 117.11.

अत्यन्तसंनिकर्ष (atyanta-sannikarṣa) *m.* very close or extreme proximity न ह्यत्यन्तसंनिकर्ष एवैकं संबन्धकारणम् TantrVā. 831.24 (*on* iii. 3.11); इदं रूपमनयोर्नियतमित्यत्यन्तसंनिकर्षमात्रेण नियमे संबन्धाभिधानम् Kāśi. iii. 227.19 (*on* 5(10).15); अन्तिमपक्षोः प्रथमद्वितीयपदार्थानुष्ठानेऽत्यन्तसंनिकर्ष उपान्त्यादिष्वेकद्वित्रादिमात्रान्तरितः MayūMāli. 410.23 (*on* v. 1.5); 416.8 (*on* v. 1.12)

अत्यन्तसंनिकृष्ट (atyanta-sannikṛṣṭa) *adj.* [*f.* -ā] **i** very close, being in great proximity (शक्तयः) अत्यन्तसंनिकृष्टास्ताः श्रीकामेश्वरसुभ्रुवः BrahmāṇḍP. iii. 37.43; अत्यन्तसंनिकृष्टानामपि भिन्नात्मनां मितेः । लोचनस्थाञ्जनादीनां न दृष्टिपथतेष्यते BṛĀraUBhVā. ii. 1.353; एवं चात्यन्तसंनिकृष्टार्थविधानाच्छ्रुत्यनुग्रहः क्षौमवसानसंबन्धविधावत्यन्तमनुपपन्नं वाक्यं स्यात् S'āstrDī. 452.1 (*on* vi. 1.5); MayūMāli. 452.2 (*on* vi. 1.5); **ii** very intimate अये प्रियवयस्य इत्याह । अत्यन्तसंनिकृष्टः संबन्धः MudrāRā. 6.15 (21)

अत्यन्तसंनिधान (atyanta-sannidhāna) *adj.* which is very close, very proximate अत्यन्तसंनिधानानां दोषाणां दूषणात्मनाम् । अहितैर्दूषणं भूयो न विद्वान् कर्तुमर्हति AṣṭāHṛ. i. 7.50; *n.* great proximity प्रतिपत्तुरत्यन्तसंनिधानं त्वस्य प्रतिपत्त्रात्मकं कुतस्त्यम् Bhām. 14.18 (*on* i. 1.1); स एव भोगोऽत्यन्तसंनिधानेन विवेकाग्रहणात् अभोक्तुरपि पुरुषस्य भोग इति व्यपदिश्यते RājMār. 76.24; S'āstrDī. 198.12 (*on* iii. 1.10); यदेतदित्यत्यन्तसंनिधानात्पूर्वश्लोकोदितं परामृश्यते ManvaMu. 243.31 (*on* 6.82)

अत्यन्तसंनिधि (atyanta-sannidhi) *m.* great proximity एवंविधे विषये अत्यन्तसंनिधिरप्यतिक्रमप्रयोजको न भवति CaturCin. iii(1). 457.5; अन्यथा यस्यैव पाठतोऽत्यन्तसंनिधिः तस्यैव राजसूयपदेन विधानम् ···स्यात् MīmāKau. i. 166.17 (*on* i. 4.2); ii. 341.5 (*on* iii. 3.12)

अत्यन्तसंनिहित (atyanta-sannihita) *adj.* **i** very close एवमत्यन्तसंनिहितस्यापि देशान्तरत्वे 'देशान्तरस्थे प्रेते' इत्यादिवसिष्ठवचनेन नात्रैकरात्रं भवितुमर्हति SmṛtiCan. vi. 53.13; अनन्तरः ··· अत्यन्तसंनिहितः TantrRa. 72.6; मातुः स्वपुत्रान्प्रत्यसाधारणत्वेन पित्रपेक्षयात्यन्तसंनिहितः संनिकर्षः Subodhi. 71.9 (*on* 2.135-136); BālamBha. ii. 208.23 (*on* 2.135-136); **ii** very intimate सहायोऽत्रात्यन्तसंनिहितो विवक्षितः । बान्धवाश्च ये साहसकर्तारं ज्ञात्वापि न तं परित्यजन्ति DaṇḍaVi. 76.18.

अत्यन्तसंनिहितत्व (atyantasannihita-tva) *n.* close proximity यजेत इत्यत्र ··· धात्वर्थो भाव्य इति वाच्यम्, एकपदोपात्तत्वेनात्यन्तसंनिहितत्वात् VivaPraSaṁ. 162.19.

अत्यन्तसम (atyanta-sama) *adj.* [*f.* -ā] **i** thoroughly even यथा चित्रमत्यन्तसमायामपि भित्तावविद्यमाननिम्नोन्नतादिभ्रमान् जनयति IṣṭaSi. 36.2; **ii** absolutely neutral, undisturbed or unruffled (गुणलक्षणानि) तानि प्रलयदशायामत्यन्तसमानि सृष्ट्यादौ विषमाणि NyāySiA. 247.6; **iii** exactly similar जीवानाम् ··· ज्ञानरूपतया अत्यन्तसमस्वरूपाणां कर्मकृतदेहोपाधिकदेवत्वादिभेदस्य स्वरूपानुबन्धित्वप्रतिक्षेपे तात्पर्यम् S'atDū. 150.29; द्वयमिदमत्यन्तसमं नीचप्रभविष्णुता शरच्चैयम् । क्षेत्रेभ्योऽपास्य फलं खलेषु विक्षिप्यते यस्याम् SūktiMu. 62.23; S'ārṅgaPa. 3909; Subhāṣi. 1813.

अत्यन्तसमता (atyantasama-tā) *f.* the state of being quite similar, close similarity एकत्ववादा अप्येवं द्वन्द्वरूपेणात्यन्तसमतया प्रकारैक्येन ··· निर्वाह्याः NyāySiA. 233.21.

अत्यन्तसमतिक्रमण (atyanta-samatikramaṇa) *n.* complete crossing over, complete crossing beyond (द्रव्यतः षोडशाकाराः) अत्यन्तसमतिक्रमणानैर्याणिकः AbhidhKoBh. 400.78 (*on* 7.13)

अत्यन्तसमाकुल (atyanta-samākula) *adj.* [*f.* -ā] **i** greatly excited सा विनीतान्तिकं भर्तुर्गत्वात्यन्तसमाकुला।···जगौ स्वप्नान् ···मनोहरान् PadmP.(Ra.) 25.5; (लक्ष्मणः) परिदेवनमेवं च चक्रेऽत्यन्तसमाकुलः PadmP.(Ra.) 99.90.

अत्यन्तसमान (atyanta-samāna) *adj.* exactly the same, very much the same संप्लववादे त्वत्यन्तसमानविषयानेकप्रमाणबाध्यत्वमप्यन्वमंसत NyāyPari. 307.2; को वा···प्रत्यभिज्ञाम् ··· अभिज्ञया सह···अत्यन्तसमानविषयामभिमन्येत S'atDū. 180.6; 179.23; जीवन्मात्मामहवर्गस्यापि दर्शनात्यन्तसमानदेवतेन प्रत्याब्दिकस्य तन्त्रप्रसङ्गो नेत्यवधेयम् BālamBha. i. 538.30 (*on* 1.249)

अत्यन्तसमानविषयत्व (atyantasamānaviṣaya-tva) *n.* the nature of having exactly the same sphere or topic वषट्कर्तृप्राथम्यविशिष्टापूर्वभक्षविधानमेतत् । तयोश्च परस्परनियमादत्यन्तसमानविषयत्वम् TantrVā. 1053.6 (*on* iii. 5.31); न चाभाववचनं वैषयिकाभिप्रायम्, इतरत् (= आनन्दवचनम्) तु स्वाभाविकाभिप्रायमिति शक्यं वक्तुम् । उभयत्रापि सामान्योपादानादत्यन्तसमानविषयत्वात् S'āstrDī. 130.24 (*on* i. 1.5)

अत्यन्तसमानार्थ (atyanta-samānārtha) *adj.* having exactly the same meaning सूयतिर्जिनिनात्यन्तसमानार्थः ManuBh. ii. 339.23 (*on* 10.30)

अत्यन्तसमानार्थत्व (atyantasamānārtha-tva) *n.* the state of having exactly the same meaning स नामानुवादो भवति, योऽत्यन्तसमानार्थत्वेनावधार्यते TantrVā. 937.20 (*on* iii. 4.13)

अत्यन्तसमालक्ष्य (atyanta-samālakṣya) *adj.* clearly noticeable हेलात्यन्तसमालक्ष्यविकारः SāhiDa. 128.14.

अत्यन्तसमास (atyanta-samāsa) *m.* frequent or excessive (use of) compounds दीर्घसमासोऽत्यन्तसमासश्च विषमता तद्विपर्ययेण समता AbhinBhā. ii. 336.13 (*on* 16.100)

अत्यन्तसमीप (atyanta-samīpa) *adj.* very near (देवाः) प्रणम्यादरतो मुनिम् । नातिदूरे न चात्यन्तसमीपे स्थितिमाश्रिताः PadmP.(Ra.) 6.270.

अत्यन्तसमुच्छ्रित (atyanta-samucchrita) *adj.* very tall तं वृक्षमदशत्तक्षकस्तदा । अभवद्भस्मसात्सोऽपि वृक्षोऽत्यन्तसमुच्छ्रितः SkandP. ii(1). 11.38.

अत्यन्तसमुदित (atyanta-samudita) *adj.* closely stated together (राजशब्दः) यदि हि जात्यभिषेकयोरत्यन्तसमुदितयोरेव प्रयुज्यते TantrVā. 589.9 (*on* ii. 3.3)

अत्यन्तसमुद्घात (atyanta-samudghāta) *m.* complete destruction तत्र अनुशयानामरिप्रख्याणां मूषिकाविषवत्प्रकोपधर्मिणामत्यन्तसमुद्घातादर्हद्भवो भवति LaṅkāSū. 3.2 (57.2); कथमवधार्यते आर्या एव प्रहीणक्लेशा इति । अत्यन्तसमुद्घातवचनादेवमुक्तम् Sphuṭā. ii. 65.24 (*on* 2.36)

अत्यन्तसमुपेक्षित (atyanta-samupekṣita) *adv.* completely disregarded यदा प्रमादिभिः पूर्वमत्यन्तसमुपेक्षितः । जन्तुर्जन्मसहस्रेभ्यो ह्येकस्मिन् मानुषो यदि । तत्राप्यतिविमूढात्मा किं भोगानभिधावति AgniP. 200.13.

अत्यन्तसमृद्ध (atyanta-samṛddha) *adj.* very rich पुष्पफलयोर्वृद्ध्यनिवृत्तिः प्रतिदानवेलायामत्यन्तसमृद्धाधमर्णविषये वेदितव्या SmṛtiCan. iv. 375.3; BālamBha. i. 507.8 (*on* 1.228)

अत्यन्तसंपन्न (atyanta-sampanna) *adj.* very rich येऽत्यन्तसंपन्ना गोऽजाविधनधान्यैस्तेभ्यः प्रतिग्रहीतव्यम् ManuBh. i. 344.4 (*on* 4.33)

अत्यन्तसंपर्क (atyanta-samparka) *m.* close association यदा तु कामतोऽत्यन्तसंपर्कं करोति तदा 'अन्त्यजेन तु संपर्के भोजने मैथुने कृते । प्रविशेत् संप्रदीप्तेऽग्नौ ' ··· इत्युशनसोक्तं द्रष्टव्यम् Mitā. 465.28 (*on* 3.265)

अत्यन्तसंपीडित (atyanta-sampīḍita) *adj.* firmly pressed कण्ठे जीर्णलताप्रतानवलयेनात्यन्तसंपीडितः । ··· मुनिः S'āk. 7.11.

अत्यन्तसंप्रीति (atyanta-samprīti) *f.* great pleasure, great joy तच्छेदखण्डान्यायाः स्युः ··· गजायेऽत्यन्तसंप्रीतिर्ध्वाङ्क्षे वित्तविनाशनम् NāraS. 25.9.

अत्यन्तसंबन्ध (atyanta-sambandha) *m.* close relation विशेषणस्य च विशेष्येणात्यन्तसंबन्धात् TantrVā. 253.23 (*on* i. 3.26); कल्याणगुणेन कालस्य मासस्यात्यन्तसंबन्धः Prasā. i. 403.22.

अत्यन्तसंभावित (atyanta-sambhāvita) *adj.* highly honoured अत्यन्तसंभावितयोरग्निमारुतयोस्तृणदहनादानाशक्त्या आत्मसंभावना शातिता भवेत् KenUVāBh. 93.2 (*on* 3.10)

अत्यन्तसंभृतस्नेह (atyanta-sambhṛtasneha) *adj.* greatly cherishing love जानामि बालमित्रं त्वामहमत्यन्तसंभृतस्नेहम् KalāVi. 2.44.

अत्यन्तसंमद (atyanta-sammada) *adj.* greatly delighted प्रतीन्दोर्व-

चनं श्रुत्वा राघवोऽत्यन्तसंमदः PadmP.(Ra.) 65. 1.

अत्यन्तसंमिश्रता (atyantasammiśra-tā) *f.* the state of being thoroughly mixed नाट्ये च रस एव ··· अत्यन्तसंमिश्रतया प्रतिभासनाद्धर्मैधर्मिव्यवहारो युक्तः Loc. 182. 21 (*on* 3. 33)

अत्यन्तसरल (atyanta-sarala) *adj.* **i** very straight नात्यन्तसरलैर्भाव्यं गत्वा पश्य वने तरून्। छिद्यन्ते सरलास्तत्र कुब्जाः सन्ति पदे पदे Subhāṣi. 2758; **ii** very simple, very straightforward, Subhāṣi. 2758.

अत्यन्तसरसता (atyantasarasa-tā) *f.* the state of being richly endowed with sentiments नीरसप्रायमप्यत्र निबद्धमद्भुतरसपरिपोषकतयात्यन्तसरसतावहम् Loc. 176. 24 (*on* 3. 26)

अत्यन्तसरसहृदय (atyantasarasa-hṛdaya) *adj.* **i** which has abundant water inside नितरां नीचोऽस्मीति त्वं खेदं कूप मा कदापि कृथाः। अत्यन्तसरसहृदयो यतः परेषां गुणग्रहीतासि RasGaṅ. 538. 13; BhāmiVi. 1. 7; PadyāTa. 252; **ii** whose heart is full of feelings, RasGaṅ. 538. 13; BhāmiVi. 1. 7; PadyāTa. 252.

अत्यन्तसरूप (atyanta-sarūpa) *adj.* very similar (i. e. very fitting) एतदपरितोषेणात्यन्तसरूपं दृष्टान्तमाह Bhām. 137. 21 (*on* i. 1. 17)

अत्यन्तसहचरित (atyanta-sahacarita) *adj.* closely associated अत्यन्तसहचरिते लोकविज्ञाते द्वन्द्वमित्युपसंख्यानम् Vār. (*on* P. viii. 1. 15); MahāBh. iii. 371. 1 (*on* viii. 1. 15); CāndraVyā. vi. 3.13; KāśiVṛ. *on* vi. 3. 26; PadMañ. *on* KāśiVṛ. *on* P. vi. 3. 26; Prasā. i. 637. 13.

अत्यन्तसहचरितता (atyantasahacarita-tā) *f.* close association इह त्वग्नीषोमस्यात्यन्तसहचरिततया संबन्धस्य क्लृप्तत्वेन लक्षणासंभवात् MayūMāli. 713. 13 (*on* x. 4. 22)

अत्यन्तसहचरितत्व (atyantasahacarita-tva) *n.* close association अत्यन्तसहचरितत्वेन लोकविज्ञानमत्राभिव्यक्तिः LaS'abdeS'e. ii. 418. 10.

अत्यन्तसहर्षक (atyantasaharṣa-ka) *adj.* extremely glad or delighted इति तस्य (मुनेः) वचः श्रुत्वा राजात्यन्तसहर्षकः। चक्रे पूर्णाहुतिं यज्ञे PadmP. iii. 12. 50.

अत्यन्तसहाभिधान (atyanta-sahābhidhāna) *n.* mentioning very closely together तेनात्यन्तसहाभिधानमेव प्रतिपन्नोत्कर्षावगतिः VakroJī. 212. 17.

अत्यन्तसहित (atyanta-sahita) *adj.* closely associated धान्यकक्षयोः सहोत्पन्नयोरत्यन्तसहितयोरपि नैपुण्येन धान्यं रक्षति कक्षमुद्धरति ManuBh. ii. 36. 4 (*on* 7. 110)

अत्यन्तसहृदय (atyanta-sahṛdaya) *adj.* excellent connoisseur अत्यन्तसहृदयो यो न भवति तस्यैष स्फुटसंवेद्य एव क्रमः Loc. 31. 22 (*on* 1. 10)

अत्यन्तसाकाङ्क्ष (atyanta-sākāṅkṣa) *adj.* very expectant एवं त्वत्यन्तसाकाङ्क्षमेव वाक्यं क्लेशगम्यार्थं भवति S'āstrDī. 64. 10 (*on* i. 1. 5)

अत्यन्तसाङ्कर्यकार्य (atyanta-sāṅkaryakārya) *adj.* whose work is greatly confused मुक्त्वाप्युच्चैर्यामसंसृप्तवृत्तिभ्रंश्यत्यन्तेऽत्यन्तसाङ्कर्यकार्यः Kapphiṇā. 20. 13.

अत्यन्तसाजात्य (atyanta-sājātya) *n.* absolute homogeneity न हि धर्मिधर्मयोरत्यन्तसाजात्यमभेदनियामकम् VedāntRaMañ. 1. 1 (4. 21); S'atDū. 213. 29; VedāntPari. 255. 3.

अत्यन्तसात्त्विक (atyanta-sāttvika) *adj.* thoroughly endowed with the quality of *sattva* (goodness) स्वाभाविकमिदं रूपं नित्यमत्यन्तसात्त्विकम् AhirbuS. 44. 29.

अत्यन्तसात्मता (atyantasātma-tā) *f.* the state of possessing one's perfect essential nature कृपा स्वबीजप्रभवा स्वबीजप्रभवैर्न चेत्। विपक्षैर्बाध्यते चित्ते प्रयात्यत्यन्तसात्मताम् PramāVār. 2. 129.

अत्यन्तसादृश्य (atyanta-sādṛśya) *n.* extreme similarity किमत्यन्तसादृश्यादिविकल्पैः NyāyMañ. i. 132. 3; PañcPā. 25. 17 (*on* i. 1. 1); PrakaPañ. 214. 19; अत्यन्तसादृश्यादेकस्मिन्पक्षे प्रसिद्धेर्विपर्यासः NyāyRa. 285. 15 (*on* 5 (3). 56); NyāyMa. 92. 13; PavaDū.(Dha.) 71; CaturCin. iii(1). 303. 14; अत्यन्तसादृश्यं प्रतिबंधकम् NyāySu.(Ja.) 491B. 8 (*on* iii. 2. 1); Vādā. 46. 3; VedāntKau. 154. 13 (*on* ii. 1. 7); Nyāyāmṛ. 607A. 8; न चात्यन्तसादृश्यं विवक्षितम् BhāṭṭCin. i. 19. 21 (*on* i. 1. 4)

अत्यन्तसाद्यस्कबल (atyanta-sādyaskabala) *n.* army of very raw recruits गच्छेदपि जेतुमरिं लघुम्। महतात्यन्तसाद्यस्कबलेनैव सुबुद्धियुक् S'ukraNī. 4 (7). 177.

अत्यन्तसाधक (atyanta-sādhaka) *adj.* very deligent or helpful अत्यन्तसाधकाः शान्ताः ··· शिष्याः स्युः कार्यसिद्धये RasRaSa. 6. 7.

अत्यन्तसाधकतमत्व (atyantasādhakatama-tva) *n.* the state of being the most efficient भवतस्त्वपूर्वविधानादत्यन्तसाधकतमत्ववर्तमानन्वयोः क्रियां प्रत्युपादानात् TantrVā. 48. 2 (*on* i. 2. 29)

अत्यन्तसाधन (atyanta-sādhana) *n.* efficient means अत्यन्तसाधनं तस्य यत् तद्द्वेधा व्यवस्थितम् AhirbuS. 13. 12; ṬupṬ. 23. 21 (*on* iv. 2. 10)

अत्यन्तसाधर्म्य (atyanta-sādharmya) *n.* absolute similarity अत्यन्तसाधर्म्यादुपमानं न सिध्यति NyāyBh. 111. 13 (*on* ii. 1. 45); NyāyVār. 258. 5 (*on* ii. 1. 42); TātpaṬ.(Vā.) 409. 14 (*on* ii. 1. 44)

अत्यन्तसाधारण (atyanta-sādhāraṇa) *adj.* very common आत्मनः संनिकर्षादयस्त्वत्यन्तसाधारणा विजातीयव्यवच्छेदायापि नालमिति नोपात्ताः TātpaṬ. (Vā.) 259. 21 (*on* i. 1. 23)

अत्यन्तसाधुता (atyantasādhu-tā) *f.* extreme goodness दुर्जनाः ···। त एव बलहीनाश्चेद्भजन्तेऽत्यन्तसाधुताम् BṛNāraP. 8. 43.

अत्यन्तसाध्वस (atyanta-sādhvasa) *n.* extreme fear (अर्जुनः) अत्यन्तसाध्वसावनतः सर्वतो नमस्करोति GītāBh.(Rā.) 555. 7 (*on* 11. 40)

अत्यन्तसानुबन्ध (atyanta-sānubandha) *adj.* closely connected अग्निहोत्रिब्राह्मणसुवर्णापहारे ब्राह्मणोऽत्यन्तसानुबन्धद्यूतादिसिद्धये हर्ता क्षत्रियादिर्वाल्पानुबन्धः Aparā. 1082. 19 (*on* 3. 258); 1146. 1 (*on* 3. 84)

अत्यन्तसानुरागा (atyanta-sānurāgā) *adj.* (*f.*) closely attached सुरतान्ते च सात्यन्तसानुरागा जगाद तम् KathāSaSāg. ix. 2. 271.

अत्यन्तसान्निध्य (atyanta-sānnidhya) *n.* close proximity अत्रैकशाखापदमत्यन्तसान्निध्योपलक्षणार्थम् VīraMi.(Āhnika.) 209. 11.

अत्यन्तसामञ्जस्य (atyanta-sāmañjasya) *n.* absolute propriety अस्य श्लोकस्य वाच्यार्थविषये यद्यपि नात्यन्तसामञ्जस्यम् ··· तथापि विवक्षितप्रस्तुतार्थतायां न किंचिदसामञ्जस्यम् Kuval. 72 (29); S'ivārkaMaDī. i. 180. 22 (*on* i. 1. 4)

अत्यन्तसामीप्य (atyanta-sāmīpya) *n.* close vicinity प्रधानकालाबहिर्भावश्च संभावयितव्यो, नात्यन्तसामीप्यम् TantrVā. 473. 22 (*on* ii. 2. 3); ĀtmaSi. 65. 20; NyāyMāVi. 633. 20 (xi. 2. 7); घोषस्यात्यन्तसामीप्ये गङ्गादौ तीरधर्माधारत्वारोपो गौतमोक्तः VaiyāSiMañ. 148. 23; LaS'abdeS'e. i. 479. 3.

अत्यन्तसाम्य (atyanta-sāmya) *n.* absolute or very close resemblance न हि दृष्टान्तदार्ष्टान्तिकयोरत्यन्तसाम्येन भवितव्यमिति नियमोऽस्ति BrahmSūBh. (S'aṅ.) 127. 5 (*on* i. 2. 21); 697. 10 (*on* iii. 3. 51); (एकत्ववादाः) तेऽप्यत्यन्तसाम्याद्वैलक्षण्याभावाच्च S'āstrDī. 113. 22 (*on* i. 1. 5); S'atDū. 159. 3; S'ivārkaMaDī. ii. 484. 24 (*on* iv. 4. 4); यदा तु पूर्णमासशब्दस्यात्यन्तसाम्याभावेऽपि MīmāKau. iii(2). 155. 9 (*on* ii. 2. 3); BhāṭṭCin. i. 29. 23 (*on* i. 1. 4)

अत्यन्तसारभूत (atyanta-sārabhūta) *adj.* forming the very essence एते रोहितादिविशेषा रसा अत्यन्तसारभूता इत्यर्थः ChāndoUBh. 147. 8 (*on* iii. 5. 4); अमृतशब्दाभिधेयोऽत्यन्तसारभूतः सूक्ष्मोऽन्नरस ऊर्गुच्यते NyāyMāVi. 24. 8 (*on* i. 2. 2)

अत्यन्तसारूप्य (atyanta-sārūpya) *n.* very close similarity अत्यन्तसारूप्ये च प्रकृतिविकारभाव एव प्रतीयेत BrahmSūBh.(S'aṅ.) 294. 16 (*on* ii. 1. 6); अतः ··· अत्यन्तसारूप्यं चैतन्येन TattvVai. 158. 28 (*on* 3. 35); अनित्यशब्दवादिनोऽपि हि अत्यन्तसारूप्यापोहरूपं नित्यमेव वाचकं मन्यन्ते NyāyRa. 820. 11 (*on* 6. 354); भेदाग्रहस्त्वत्यन्तसारूप्यात् TattvCin. i. 626. 4; न भेदेनोपालम्भः अत्यन्तसारूप्यात् Upask. 317. 12 (*on* vii. 2. 7)

अत्यन्तसालक्षण्य (atyanta-sālakṣaṇya) *n.* absolute similarity (*lit.* commonness of characteristics) कार्यकारणयोरत्यन्तसालक्षण्यस्य नविलक्षणत्वाधिकरणे निरस्तत्वात् S'atDū. 211. 10.

अत्यन्तसावधान (atyanta-sāvadhāna) *adj.* very attentive अत्यन्तसावधानाध्येतृकाणां वाक्योत्सादासंभवाच्च BhāṭṭCin. ii. 17. 2 (*on* i. 3. 1)

अत्यन्तसाहचर्य (atyanta-sāhacarya) *n.* close association लोकज्ञातेऽत्यन्तसाहचर्ये S'ākaṭāVyā. ii. 3. 12; SiddhaHe. vii. 4. 84; Pradī. vi. 169. 12 (*on* vii. 2. 102)

अत्यन्तसाहस (atyanta-sāhasa) *n.* very daring act अगृहीते च देशादौ तद्व्याप्तिर्गृह्यते कथम्। तस्याग्रहे नानुमानं चैतदत्यन्तसाहसम् PramāVāBh. 24. 23.

अत्यन्तसिद्ध (atyanta-siddha) *adj.* firmly established अत्यन्तसिद्धः सिद्ध इति MahāBh. i. 6. 26 (*on* i. 1. 0); Pradī. vi. 146. 12 (*on* vii. 2. 67); सुखमत्यन्तसिद्धं च ध्यानं मे दर्शयस्व ह PadmP. ii. 8. 95.

अत्यन्तसुकर (atyanta-sukara) *adj.* very easy to do सिद्धवस्तुषु शब्दस्य बोधकत्वशक्तिग्रहणमत्यन्तसुकरम् VedāSaṁ. 146. 3.

अत्यन्तसुकुमार (atyanta-sukumāra) *adj.* [*f.* -ā] very delicate अत्यन्तसुकुमारस्य ··· कच्चिदद्य शरीरं ते भूमौ न परितप्यते MahāBhā. xi. 20. 11; (देवी) अत्यन्तसुकुमारा ··· जगाद PadmP.(Ra.) 73. 43; अत्यन्तसुकुमारौ द्वौ शृङ्गारकरुणौ मतौ PratāYaBhū. 58. 12 (2); *m.* name of the plant *Panicum*

itadicum [MW]

अत्यन्तसुकुमारता (atyantasukumāra-tā) *f.* extreme delicacy देवताभिः प्रदत्तमभूदेकमत्यन्तसुकुमारतया कटाक्षटङ्किकाभिरिव घटितं परमेष्ठिना (पुत्रिकारत्नम्) UdaySuKa. 96.12; मार्गोल्लङ्घनपरिश्रमादत्यन्तसुकुमारतया रुधिरपूरितत्वात् PrabaCin. 111.13.

अत्यन्तसुकुमाराङ्गा (atyantasukumārāṅgā) *adj.* (*f.*) of very delicate limbs सात्यन्तसुकुमाराङ्गा गुणैर्दिव्यैरलंकृता PadmP.(Ra.) 123.88.

अत्यन्तसुकुमाराङ्गी (atyantasukumārāṅgī) *adj.* (*f.*) of very delicate limbs अत्यन्तसुकुमाराङ्गी श्यामा पद्मदलेक्षणा।... किमवस्थाय सा सती Rāmā. ii. 1324*(12); 1325*(1)

अत्यन्तसुख (atyanta-sukha) *adj.* very comfortable, very pleasant अत्यन्तसुखसंचारा मध्याह्ने ... दिवसाः Rāmā. iii. 15.10; (पीत्वा पानीयं) अत्यन्तसुखसंस्पर्शम् Rāmā. iii. 1318*(1); गृहेऽत्यन्तसुखेऽप्येतत् कुर्यात् प्रश्नोत्तरोत्तरम् BhelaS. 217.16 (6.30); तस्मिन् पुरे ... उद्यानमत्यन्तसुखप्रदेशम् VarāṅgaC. 3.5; SūktiRa. 188.2; *n.* extreme or great happiness सर्वं प्रसन्नमेवासीदत्यन्तसुखसंयुतम् MahāBhā. vii. App. 8.471A (3); घसो भवति। अत्यन्तं सुखमत्यन्तसुखम् JaineVyā. 50.36 (i. 3.26); अन्नदोऽत्यन्तसुखं प्राप्नोति ManvaMu. 187.11 (*on* 4.229); धर्मामृतमिदं पातुमत्यन्तसुखकारणम् SamarāSam. 3.313.

अत्यन्तसुखकारिन् (atyantasukhakār-in) *adj.* very much pleasant अतिपीडनं हि मांसस्थानेऽत्यन्तसुखकारि स्यात् JayaMa. 102.10 (2.2)

अत्यन्तसुखप्रसुप्त (atyantasukha-prasupta) *adj.* very pleasantly fallen asleep समालिङ्गयेतरेतरमत्यन्तसुखप्रसुप्तयोर्युवयोर्दैवदत्तोत्साहः DaśKuC. 38.4.

अत्यन्तसुखभागिनी (atyantasukha-bhāginī) *adj.* (*f.*) extremely happy ब्रह्मंस्त्वं मां प्रभाषसे ... अत्यन्तसुखभागिनीम् MahāBhā. v. 11.17.

अत्यन्तसुखभाज् (atyantasukha-bhāj) *adj.* very happy (ईश्वरः) कांश्चिदत्यन्तसुखभाजः करोति BrahmSūBh.(Śaṅ.) 341.16 (*on* ii. 1.34)

अत्यन्तसुखभोगिनी (atyantasukha-bhoginī) *adj.* (*f.*) enjoying great pleasure ब्रह्मंस्त्वं मां प्रभाषसे ... अत्यन्तसुखभागिनीम् (v. l. °भोगिनीम्) MahāBhā. v. 11.17.

अत्यन्तसुखलेश (atyanta-sukhaleśa) *adj.* having a very small bit of pleasure अत्यन्तसुखलेशो हि बहुदुःखो भवाम्बुधिः BṛKathāMañ. ix. 3.43.

अत्यन्तसुखसंवृद्ध (atyantasukha-saṁvṛddha) *adj.* [*f.* -ā] reared up in great luxury पौत्रं तु तव दुर्धर्ष लक्ष्मणम् ...अत्यन्तसुखसंवृद्धम्...आससाद रणे कार्ष्णिः MahāBhā. vii. 45.12; vii. 35.4; सोऽत्यन्तसुखसंवृद्धः ... एको बहून् समासाद्य कच्चिन्नासीत्पराङ्मुखः MahāBhā. vii. 100.25; सोऽत्यन्तसुखसंवृद्धः किमशिष्यति मे सुतः Rāmā. ii. 1248*(3); अत्यन्तसुखसंवृद्धा लालिता पितृवेश्मनि। ... किमवस्थाय सा सती Rāmā. ii. 1324*(11); पश्य ... मम भार्याम् ... अत्यन्तसुखसंवृद्धाम् Rāmā. iii. 2.16; iii. 15.28.

अत्यन्तसुखसेविनी (atyantasukha-sevinī) *adj.* (*f.*) accustomed to great pleasure (भरतः) गृहाय प्रतिनेष्यति। इमां वाप्येष वैदेहीमत्यन्तसुखसेविनीम् Rāmā. ii. 91.11.

अत्यन्तसुखावह (atyantasukhāvaha) *adj.* bringing extreme happiness लिङ्गं रते द्रावकरं वधूनां संजायतेऽत्यन्तसुखावहं च ŚārṅgaPa. 3210.

अत्यन्तसुखित (atyanta-sukhita) *adj.* very much comforted सोऽत्यन्तसुखितः सूत किमशिष्यति राघवः Rāmā. ii. 52.4.

अत्यन्तसुखिन् (atyanta-sukhin) *adj.* used to great comfort, extremely happy बालमत्यन्तसुखिनं विचरन्तमभीतवत्। कृतास्त्रा बहवो जघ्नुः MahāBhā. vii. 32.23; तमहम् ... अत्यन्तसुखिनं देवमनघं शरणं व्रजे MahāBhā. xiii. 151*(8); एवमत्यन्तसुखिनः सर्वदुःखविवर्जिताः VāyuP. i. 45.50; देवेषु सत्त्वमुत्कटं रजस्तमसी उदासीने तेन तेऽत्यन्तसुखिनः SāṁkhyaKāBh. 12.28 (*on* 16); अत्यन्तसुखिनं पुत्रं कथं शत्रुमभाषतम् PadmP. iv. 106.9; गुरुराख्यदिदं सत्यं किन्त्वत्यन्तसुखी भवेत् (नृपः) SamarāSam. 8.434.

अत्यन्तसुखैकहेतु (atyantasukhaikahetu) *m.* only cause of extreme happiness नखं प्रयुक्तं प्रणयाद्रसज्ञैर्यदेतदेवास्ति मनोभवस्य। सर्वस्वमत्यन्तसुखैकहेतुर्नातोऽस्ति किंचिद्रकामिनीनाम् AnaṅgaRa. 9.29.

अत्यन्तसुखोचित (atyantasukhocita) *adj.* deserving extreme comfort गात्राणि चात्यन्तसुखोचितानि MahāBhā. viii. 68.30.

अत्यन्तसुगम (atyanta-sugama) *adj.* easily understandable भोः स्वामिन् मदीयं मतमत्यन्तसुगमं श्रूयताम् ŚaṅkaVi.(Ā.) 154.4.

अत्यन्तसुजन (atyanta-sujana) *m.* very good person (भार्गवः) अत्यन्तसुजनः ... असौ दृष्टः MahāviC. 2.15; AdbhuDa. 8.7.

अत्यन्तसुतेजस् (atyanta-sutejas) *adj.* very brilliant सहस्रं तस्य दाराणां यदत्यन्तसुतेजसाम् PadmP.(Ra.) 10.66.

अत्यन्तसुधास्वभाव (atyanta-sudhāsvabhāva) *adj.* of extremely nectar-like nature अत्यर्थं(v. l. अत्यन्त°) सुधास्वभावं श्रुत्वा बलिः DaśāvaC. 5.199.

अत्यन्तसुन्दर (atyanta-sundara) *adj.* [*f.* -ī] very beautiful नित्या कलान्तरादूर्ध्वं धिष्ण्यमत्यन्तसुन्दरम् BrahmāṇḍP. iii. 36.73; लोकस्य पूजनीयोऽसौ जायतेऽत्यन्तसुन्दरः PadmP.(Ra.) 32.160; तनया वनमालेति तयोरत्यन्तसुन्दरी PadmP.(Ra.) 36.15; तेऽमी प्रयोगमार्गेषु गौणवृत्तिव्यपाश्रयाः। अत्यन्तसुन्दरा दृष्टास्तदुदाहृतयो यथा Kāvyāda. 2.254; तस्य भार्या ... अत्यन्तसुन्दरी GaṇeP. i. 62.7; (इन्दुलेखा) अत्यन्तसुन्दरी कान्ता वावदूका विलासिनी ĀdiP. 11.56; NānārthSaṁ. 53.16.

अत्यन्तसुन्दरतर (atyantasundara-tara) *adj.* extremely beautiful नाथ त्वं तादृशो मह्यं भासि यादृग्वयोः पतिः। अत्यन्तसुन्दरतरं वपुर्बिभ्रत्सुकोमलम् PadmP. iv. 55.31; तस्य पुत्रः ... अत्यन्तसुन्दरतरः GaṇeP. i. 76.3.

अत्यन्तसुन्दराकारा (atyantasundarākārā) *adj.* (*f.*) of very beautiful form मुद्राः। अत्यन्तसुन्दराकाराः BrahmāṇḍP. iii. 36.62.

अत्यन्तसुप्त (atyanta-supta) *adj.* **i** defunct वृत्तित्यागविलीनेन किंचित्स्फुरता बहिः। अन्तरत्यन्तसुप्तेन चेतसा तिष्ठ विज्वरः YogVā. vi(2). 29.21; **ii** being in deep sleep न च त्वदुक्तमर्थं न जानामीत्यादिव्यवहारोऽत्यन्तसुप्ते ज्ञायमाने चाज्ञायमाने सम्भाव्यमानोऽज्ञानं गमयतीति युक्तम् Vādā. 29.5.

अत्यन्तसुप्रसिद्ध (atyanta-suprasiddha) *adj.* very widely known रुद्रस्य संहर्तृत्वेऽत्यन्तसुप्रसिद्धेऽङ्गीकृते TattvPrakā. 112B.12 (*on* ii. 3.13)

अत्यन्तसुरभि (atyanta-surabhi) *adj.* **i** characterised by great fragrance अत्यन्तसुरभिः ... शस्यमानः पुरस्त्रीभिर्याति यो वन्दितुं जिनम् PadmP. (Ra.) 14.219; 73.4; **ii** very fragrant अत्यन्तसुरभिणा श्वासपवनेन ... मधुकरकुलानि स्तम्भयन्तीं बालिकामपश्यम् TilaMañ. 247.18; महार्हगन्धमत्यन्तसुरभि ... स्वीकुर्यादित्यर्थः JayaMa. 269.15 (*on* 5.2)

अत्यन्तसुरसास्वादा (atyantasurasāsvādā) *adj.* (*f.*) having (water) of very delicious taste नद्यः ... अत्यन्तसुरसास्वादाः PadmP.(Ra.) 3.58.

अत्यन्तसुलभ (atyanta-sulabha) *adj.* [*f.* -ā] very easily attainable उत्तमगुणानां ब्रह्मात्यन्तसुलभमित्याह GītāBh.(Rā.) 316.7 (*on* 5.26); आनतिश्चैवं सत्यत्यन्तसुलभा NyāyMāVi. 525.16 (*on* x. 3.14)

अत्यन्तसुसदृशत्व (atyantasusadṛśa-tva) *n.* great similarity अत्यन्तसुसदृशत्वेन त्वाकारविवेको न लक्ष्यते Kāśi. ii. 116.9 (*on* 53(3).56)

अत्यन्तसुसूक्ष्मवृत्ति (atyantasusūkṣma-vṛtti) *f.* very subtle function (of the mind) (परमात्मतत्त्वम्) समाधिनात्यन्तसुसूक्ष्मवृत्त्या ज्ञातव्यमार्यैः ViveCū. 362.

अत्यन्तसुहृद् (atyanta-suhṛd) *m.* close friend य एवात्यन्तसुहृदस्त एनं पर्युपासते MahāBhā. v. 134.4.

अत्यन्तसूक्ष्म (atyanta-sūkṣma) *adj.* **i** very minute, very fine केशः ... अत्यन्तसूक्ष्मो भवति BṛĀraUBh. 509.8 (*on* iv. 2.3); (चिरायुः) वैडङ्गं वा चूर्णमत्यन्तसूक्ष्मम् ... सेवमानः KalyāKā. 6.43; अन्यदपि यदत्यन्तसूक्ष्मम् ... ऊष्मण उपजायते ManuBh. i. 28.20 (*on* 1.45); **ii** extremely subtle जगदत्यन्तसूक्ष्मात् ...सतो जायते ChāndoUBh. 393.16 (*on* vi. 11.3); शब्दस्तु ... मां अत्यन्तसूक्ष्मं अविषयम् ... गोचरीकृत्य स्प्रष्टुं नैवार्हति UpadeSā. 107.114; घृतसारवत् ... अत्यन्तसूक्ष्मं ज्ञात्वा ŚvetāUBh. 193.19 (*on* 4.16); प्रज्ञावानपि पण्डितोऽपि चतुरोऽत्यन्तसूक्ष्मार्थदृक् व्यालीढस्तमसा न वेत्ति ViveCū. 116.

अत्यन्तसूक्ष्मत्व (atyantasūkṣma-tva) *n.* extreme smallness, extreme minuteness व्रीहेर्वा यवाद्वा इत्यादि अत्यन्तसूक्ष्मत्वप्रदर्शनार्थम् ChāndoUBh. 177.5 (*on* iii. 14.3); एवमर्धमासान्तस्याप्यत्यन्तसूक्ष्मत्वाद्दर्शपूर्णमासप्रयोगसमर्थकालत्वम् Aparā. 217.17 (*on* 1.154); वालाग्रशतभागस्य इत्यनेनात्यन्तसूक्ष्मत्वप्रतिपादनमिति युक्तम् ŚivārkaMaDī. i. 450.31 (*on* i. 3.23)

अत्यन्तसूक्ष्मधी (atyantasūkṣma-dhī) *adj.* of a very subtle intellect मन्त्रिवर्गः ... चकार संशयापन्नो मन्त्रमत्यन्तसूक्ष्मधीः PadmP.(Ra.) 89.39.

अत्यन्तसेनासंमर्द (atyanta-senāsammarda) *m.* great clash of armies अत्यन्तसेनासंमर्दाद्रथचक्रैर्विचूर्णिताः BrahmāṇḍP. iii. 29.26.

अत्यन्तसेवन (atyanta-sevana) *n.* **i** excessive enjoyment or addiction असेवनादथैतस्य तथैवात्यन्तसेवनात्। रोगग्रामो नृणां देहे संभवति ViṣṇuDhaP. ii. 62.14; **ii** long service अप्रधानं प्रधानस्स्यात् काले चात्यन्तसेवनात् ŚukraNī. 2.249.

अत्यन्तसेवित (atyanta-sevita) *adj.* very much frequented सरस्वतीतीर्थवरम् ... अर्हिस्तैर्धर्मपरमैर्नृभिरत्यन्तसेवितम् MahāBhā. ix. 36.62; **ii** excessively practised तपसा चात्यन्तसेवितेन कामं बाधित्वा शरीरक्षयादर्थमुपहन्ति JayaMa. 27.5 (*on* 1.2); **iii** excessively consumed रसैरत्यन्तसेवितैः। रक्तम् ...शिरोरोगाय जायते AśvaVai. 31.23.

अत्यन्तसैन्यसंबाध (atyanta-sainyasambādha) *m.* great crowding of the army अत्यन्तसैन्यसंबाधं वेत्रसंताडनैः शतैः । निवारयन्त्यो वेत्रिण्यः Brahmāṇḍ-P. iii. 16. 34.

अत्यन्तसोल्लास (atyanta-sollāsa) *adj.* excessively joyful हंसीनां यूथान्यत्यन्तसोल्लासानि SāmaraU. 282. 4.

अत्यन्तसौकर्य (atyanta-saukarya) *n.* great facility or ease क्रियासु ···अत्यन्तसौकर्ययुक्तास्वपि अकौशलम् BṛĀraUBh. 607. 8 (*on* iv. 4. 2)

अत्यन्तसौक्ष्म्य (atyanta-saukṣmya) *n.* great subtlety लिङ्गलिङ्गिसंबन्धविशेषाणामत्यन्तसौक्ष्म्यात् दुरवबोधतां मन्यते BṛĀraUBh. 515. 17 (*on* iv. 3. 2); TātpaṬ.(Vā.) 669. 24 (*on* iv. 2. 51)

अत्यन्तसौजन्य (atyanta-saujanya) *n.* extreme courtesy लज्जयति मामत्यन्तसौजन्यमेषाम् MālaMā. 10. 163.

अत्यन्तसौन्दर्यवती (atyantasaundarya-vatī) *adj.* (*f.*) possessing great beauty ललिता ···अत्यन्तसौन्दर्यवती LalitāTriBh. 279. 13 (*on* 13)

अत्यन्तसौम्य (atyanta-saumya) *adj.* very pleasing असौ ··· अत्यन्तसौम्यास्यः ··· नयवत्सलः PāṇḍaC. 3. 107.

अत्यन्तसौष्ठव (atyanta-sauṣṭhava) *n.* extreme well-formedness अत्यन्तसौष्ठवाद् बाह्वोर्जायते दृढवेधिता S'ārṅgaPa. 1844.

अत्यन्तस्तवन (atyanta-stavana) *n.* great praise तद्दर्शनेन योग्यतां प्राप्ता अत्यन्तस्तवनं चक्रुः SāmaraU. 246. 22.

अत्यन्तस्तिमित (atyanta-stimita) *adj.* extremely paralysed or stupefied अत्यन्तस्तिमिताङ्गानां व्यायामेन सुखैषिणाम् । भ्रान्तिज्ञानावृताक्षाणां दुःखमेव सुखायते ViṣṇuP. i. 17. 61; SkandP. ii(2). 38. 50.

अत्यन्तस्तोकजीविन् (atyantastokajīv-in) *adj.* living for a very short period केचिद्दीर्घायुषः केचिदत्यन्तस्तोकजीविनः PadmP.(Ra.)

अत्यन्तस्त्रीसेवापर (atyanta-strīsevāpara) *adj.* excessively indulging in sexual pleasure विषमदोषः सुरतक्षतजोऽत्यन्तस्त्रीसेवापरो रागी न स्यात् शुक्रक्षयतः PramāVāBh. 123. 6; JñānBiPra. 22. 4.

अत्यन्तस्थविर (atyanta-sthavira) *adj.* **i** very much advanced (in age) अत्यन्तस्थविरे काले तनयोऽयं बभूव BrahmVaiP. iv. 14. 18; **ii** very old अत्यन्तस्थविरः ··· । चित्तग्रहं न जानेऽहं तारुण्यतरलस्य ते DaśāvaC. 5. 54.

अत्यन्तस्थूल (atyanta-sthūla) *adj.* excessively gross कथम्···अत्यन्तस्थूलं पृथिव्यादि ··· अत्यन्तसूक्ष्मात् ··· सतो जायते ChāndoUBh. 393. 15 (*on* vi. 11. 2)

अत्यन्तस्थूलत्व (atyantasthula-tva) *n.* extreme obviousness or grossness उद्देशक्रमेणोत्तरस्य बाह्यत्वेन अत्यन्तस्थूलत्वेन स्थूलतमप्रक्रमेण विकारदर्शनम् Subodhi. 8. 7 (*on* 2. 13); BālamBha. ii. 20. 24 (*on* 2. 13)

अत्यन्तस्निग्ध (atyanta-snigdha) *adj.* [*f.* -ā] **A** very greasy or smooth (पश्यति तं नागम्) द्राघिष्ठकरमत्यन्तस्निग्धपिङ्गनखाङ्कुरम् PadmP.(Ra.) 8. 419; 34. 34; **B** very affectionate अवोचद्दशग्रीवः ···। हनूमन्तं मुहुः पश्यन्नत्यन्तस्निग्धया दृशा PadmP.(Ra.) 19. 26.

अत्यन्तस्नेह (atyanta-sneha) *m.* extreme affection भाव्यमानादेव दीपकादत्यन्तस्नेहास्पदत्वप्रतिपत्त्या चारुत्वनिष्पत्तिः Loc. 116. 6 (*on* 2. 28); Kāvyānu.(He.) 53. 17; यस्यां रसिकानन्दोऽत्यन्तस्नेहाविष्टमना भवति SāmaraU. 288. 22; *adj.* very affectionate (राधारसिकानन्दौ) अत्यन्तस्नेहावभवताम् SāmaraU. 251. 2.

अत्यन्तस्फुटीभाव (atyanta-sphuṭībhāva) *m.* extreme obviousness अत्यन्तस्फुटीभावेऽपि तदानींतनकालता न त्रुट्यति PratyabhiVi. i. 160. 2 (*on* i. 4. 2)

अत्यन्तस्वच्छता (atyantasvaccha-tā) *f.* **i** extreme transparency चित्यासंपृक्तमपि बुद्धिसत्त्वमत्यन्तस्वच्छतया ··· शब्दाद्यनुभवति TattvVai. 79. 30 (*on* 2. 17); **ii** extreme guilelessness स्तनयोरिव नारीणामत्यन्तस्वच्छता हृदि AlaṅkāS'e. 14. 3; **iii** extreme obviousness, AlaṅkāS'e. 14. 3.

अत्यन्तस्वतन्त्र (atyanta-svatantra) *adj.* absolutely independent सर्वशक्तिः पुमानत्यन्तस्वतन्त्रः NyāyRa. 663. 7 (*on* 5(15). 83); 52. 18 (*on* 2. 25)

अत्यन्तस्वार्थहानि (atyanta-svārthahāni) *f.* complete loss of the real sense किं चानन्दशब्दस्य दुःखाभावपरत्वेऽत्यन्तस्वार्थहानिः स्यात् S'āstrDī. 126. 9 (*on* i. 1. 5)

अत्यन्तस्वार्थिक (atyanta-svārthika) *adj.* absolutely pleonastic इदमेव निषेधसूत्रमत्यन्तस्वार्थिकमपि कनं ज्ञापयति SiddhāKau. 320A. 7; शसः ··· अत्यन्तस्वार्थिकत्वात् MayūMāli. 3. 18 (*on* i. 2. 1); नित्यग्रहणम् ··· अत्यन्तस्वार्थिकायज्विधानार्थम् LaS'abdeS'e. i. 211. 8; अत्यन्तस्वार्थिककान्तेऽपि नित्यमेवेत्वम् । अकचोऽत्यन्तस्वार्थिकापवादत्वाभावात् LaS'abdeS'e. i. 379. 7; अस्यात्यन्तस्वार्थिकतरज्ज्ञापकत्वमिति तु न युक्तम् LaSabdeS'e. ii. 130. 7.

अत्यन्तस्वेदक (atyanta-svedaka) *adj.* excessively perspiring नात्यन्तस्वेदकानि ··· गात्राणि यासां ताः पूजिताः स्त्रियः BhaviP. 23A. 23 (i. 5. 99)

अत्यन्तहरित् (atyanta-harit) *adj.* extremely green अत्यन्तहरिद्वर्णम् ··· लक्ष्यते यच्च (मरकतरत्नम्) YuktiKa. 129. 5.

अत्यन्तहरित (atyanta-harita) *adj.* extremely green असावम्बरतलाद्त्तफालमत्यन्तहरितदूर्वास्तम्बोपरि पपात UdaySuKa. 124. 16; SāmaraU. 282. 6.

अत्यन्तहर्ष (atyanta-harṣa) *m.* great joy अत्यन्तहर्षसंपन्नावावां सम्यगनृत्यताम्(? °नृत्याव) BṛNāraP. 18. 97; PadmP.(Ra.) 97. 106; गाढालिङ्गितवत्यपि प्रियतमे नात्यन्तहर्षोन्नता । ··· मध्या स्मृता सा वधूः S'ṛṅgāDī. 1. 12.

अत्यन्तहर्षित (atyanta-harṣita) *adj.* excessively gladdened अंमृतमश्नन्ति पितरोऽत्यन्तहर्षिताः MahāBhā. xiv. App. 4 (1940); VṛGautaSm. 575. 16 (10); S'ivaP. ii(2). 17. 72 (89B. 4)

अत्यन्तहानि (atyanta-hāni) *f.* complete loss or harm खदिरोपादाने संस्काराणां बहूनामत्यन्तहानिः स्यात् S'āstrDī. 479. 22 (*on* vi. 3. 19) (comm. बहूनामत्यन्तहान्यपेक्षया वरं प्रधानस्यैकस्य); तस्यैवात्यन्तहानेर्निरुपधिकसुखस्तादृशो धीविकासः TattvMu. 5. 74; NāraS. 31. 4.

अत्यन्तहारिन् (atyantahār-in) *adj.* greatly attractive अद्रेः कुक्षिष्वत्यन्तहारिषु । स्थास्यामः PadmP.(Ra.) 35. 33; अत्यन्तहारिषु हरिन्मणिकुट्टिमेषु Kapphiṇā. 1. 15.

अत्यन्तहिंस्र (atyanta-hiṁsra) *adj.* excessively harmful or cruel अत्यन्तहिंस्रमनसोऽपि तवानतानां नक्तंचराः ···गौरि वहन्ति मैत्रीम् HarVi. 47. 161.

अत्यन्तहित (atyanta-hita) *n.* perfect welfare हा भ्रातः ···ममात्यन्तहितोद्यतः । कथमेतामवाप्नोसि(? षि) बन्धावस्थाम् PadmP.(Ra.) 64. 2; शूरोऽसि रघुशार्दूल ममात्यन्तहिते रतः AdhyāRā. ii. 4. 18; v. 4. 15; अत्यन्तहितैषिणः ··· पित्रादेर्वचने कस्यचिद्दोषं गुणत्वेन गुणं वा दोषत्वेन प्रदर्शयति S'ivārkaMaDī. i. 156. 32 (*on* i. 1. 3); सखीषु कथमिति चेत् अत्यन्तहिताभिलाषिण्युत्तमा S'ṛṅgāMañ.(A.) 41. 1.

अत्यन्तहिमाभिभूत (atyantahimābhibhūta) *adj.* obsessed by excessive snow देवालयम् ··· शीतातपात्यन्तहिमाभिभूतम् (वर्ज्यम्) KalyāKā. 3. 29.

अत्यन्तहिमोत्किर (atyanta-himotkira) *adj.* scattering snow excessively निनाय सात्यन्तहिमोत्किरानिलाः सहस्यरात्रीः KumāSaṁ. 5. 26.

अत्यन्तहृष्ट (atyanta-hṛṣṭa) *adj.* very much delighted मानिनोऽत्यन्तहृष्टाः (प्रमथगणाः) YogYā. 6. 22; (सीता) अत्यन्तहृष्टचेतस्का बभूव सुमुखेक्षणा PadmP. iv. 59. 76.

अत्यन्तहेय (atyanta-heya) *adj.* to be thoroughly avoided, discarded or rejected ततश्चारित्रलवस्याप्यभावादत्यन्तहेय एवायमशुभोपयोगः TattvPradī.(A.) 14. 7 (*on* 1. 12); TātpaVṛ. 14. 12 (*on* 1. 12); अश्मकाष्ठलोष्टतृणादीनामत्यन्तहेयानाम् ··· अचिद्विशेषाणाम् S'rīBh. 454. 12 (*on* ii. 1. 23); अत्यन्तहेयं न क्वापि शास्त्रं किंचन विद्यते LakṣmīT. 28. 35; Aparā. 1034. 19 (*on* 3. 206); SmṛtiCan. iv. 631. 8.

अत्यन्तहेयत्व (atyantaheya-tva) *n.* the state of being completely discarded द्वयोरपि रजस्तमसोरत्यन्तहेयत्वेऽप्येतदर्थं रजसः प्रथममुपादानम् Rāj-Mār. 3. 14.

अत्यन्ताकरण (atyantākaraṇa) *n.* total or absolute non-production or non-operation एकान्तासामर्थ्यप्रयुक्तत्वादत्यन्ताकरणस्य सामर्थ्ये सति सहकारिसंनिधिप्रयुक्तत्वात्करणनियमस्य ĀtmaTaVi. 154. 15.

अत्यन्ताकर्तृगामित्व (atyantākartṛgāmi-tva) *n.* the state of going to one who is absolutely a non-performer संहत्य प्रयुक्तं कर्म प्रत्येकं फलं साधयतीत्यभ्युपगन्तव्यम् । न चैवमत्यन्ताकर्तृगामित्वं तेष्वेव व्यासज्यवृत्तिकर्तृत्वं प्रत्येकवृत्तिफलमिति प्रकारभेदमात्रम् S'āstrDī. 460. 1 (*on* vi. 2. 1)

अत्यन्ताकारणत्व (atyantākāraṇa-tva) *n.* the state of being absolutely a non-cause उत्तरस्य ज्ञानस्य जगत्कारणत्वाभावान्नान्योन्याश्रयणमिति चेन्न, अत्यन्ताकारणत्वेऽसत्त्वप्रसङ्गात् NyāySiA. 231. 28.

अत्यन्ताकुल (atyantākula) *adj.* [*f.*-ā] very much excited, agitated or occupied एवं संकोच्य चरणमत्यन्ताकुलमानसः। स्थितः शुष्कद्रुमस्याग्रे ··· ध्वाङ्क्षः PadmP.(Ra.) 7. 43; 102. 129; गोप्यः। विगलितगृहकृत्या विस्मृतापत्यभृत्या मुरहर मुहुरत्यन्ताकुला नित्यमासन् Nāray. x. 45. 7.

अत्यन्ताकुलता (atyantākula-tā) *f.* great excitedness तृष्णाव्यक्तिभिरुपेतत्वात् अत्यन्ताकुलतया दुःखमेव भवति TattvPradī.(A.) 97. 1 (*on* 1. 76);

अत्यन्ताकृतक (atyantākṛtaka) *adj.* which is totally or altogether not created or produced (eternal) यथा महत्यां खातायां मृदि व्योम्नि महत्त्वधीः । अल्पायां वाल्पधीरेवमत्यन्ताकृतके मतिः TattvSaṁ. 2230; S'loka-Vār. 6. 218 (785. 3); किञ्चात्यन्ताकृतकेऽपि व्योम्न्यस्त्येव व्यञ्जकानुविधायिनी महत्त्वा·

ल्पत्वबुद्धिः NyāyRa. 785. 11 (*on* 6. 218)

अत्यन्ताकृति (atyantākṛti) *f.* whole or complete form न चात्यन्ताकृतिर्नश्येत् TantrVā. 908. 17 (*on* iii. 3. 43)

अत्यन्ताक्लृप्त (atyantākḷpta) *adj.* totally unestablished पदानां त्वत्यन्ताक्लृप्तमेवान्वितप्रत्यायकत्वं कल्प्यम् NyāyRaMā. 96. 6; वाक्यं त्वत्यन्ताक्लृप्तमेव सर्वं कल्प्यम् NyāyRa. 947. 20 (*on* 7. 358); MayūMāli. 711. 16 (*on* x. 4. 18)

अत्यन्ताक्षम (atyantākṣama) *adj.* absolutely incapable मूर्च्छादशायामत्यन्ताक्षमस्य च जीवस्य S'ivārkaMaDī. i. 308. 11 (*on* i. 2. 1)

अत्यन्तागतिकता (atyantāgatika-tā) *f.* the state of being absolutely without a way out, complete helplessness तथा च सति सकृदाम्नातरूपव्याघातादत्यन्तागतिकतया तदाश्रयणात् S'āstrDī. 397. 4 (*on* iv. 4. 4)

अत्यन्तागम्यत्व (atyantāgamya-tva) *n.* the state of being absolutely unknowable or unattainable सुदूरे विप्रकृष्टतरे देशे वर्ततेऽविदुषामत्यन्तागम्यत्वात्तद् ब्रह्म MuṇḍUBh. 350. 2 (*on* iii. 1. 7)

अत्यन्तागृहीत (atyantāgṛhīta) *adj.* totally ungrasped हेतुरत्यन्तागृहीतार्थविषयैः प्रत्यक्षादिभिरनेकान्तः TātpaṬ.(U.) 39. 17 (*on* 3. 6); वासना … न सांवृतं घटादिकमत्यन्तागृहीतं ग्राहयति NyāyRa. 261. 11 (*on* 5(2). 181)

अत्यन्ताग्निकर (atyantāgnikara) *adj.* promoting very good digestion, excellent stomachic रसायनम् । अत्यन्ताग्निकरम् RaseCin. 9. 50 (132. 12)

अत्यन्ताग्निसंयोग (atyantāgnisaṁyoga) *m.* excessive contact with fire न च घृतादिद्रवत्ववदेवात्यन्ताग्निसंयोगादेतद् द्रवत्वं क्षीयेत Kiraṇā. 77. 11; सुवर्णादिकमपार्थिवम् अत्यन्ताग्निसंयोगेऽपि अनुच्छिद्यमानद्रवत्वाधिकरणत्वात् Lakṣaṇā. 5. 6; 9. 16; TarkSaṁ.(Ā.) 39. 7; पार्थिवेऽत्यन्ताग्निसंयोगस्य पूर्वरूपविजातीयरूपजनकत्वनियमात् TattvCin. i. 746. 8; Upask. 77. 12 (*on* ii. 1. 7); SarvaDaKau. 92. 4; पृथिवीद्रवत्वस्य जन्यजलद्रवत्वस्य चात्यन्ताग्निसंयोगनाश्यत्वात् SiddhāMu. 20. 25 (*on* 42); PūrvottaVāNaMā. 350. 17.

अत्यन्ताग्रह (atyantāgraha) *m.* total non-perception अत्यन्तग्रहेऽत्यन्ताग्रहे च नाध्यासः Bhām. 21. 21 (*on* i. 1. 1)

अत्यन्ताग्रहिन् (atyantāgrah-in) *adj.* extremely intent on, having great obstinacy तथा यो वितथाभिनिवेशी वितथे प्रमाणरहिते बौद्धचार्वाकादिसिद्धान्तादावभिनिवेशत्यन्ताग्रही तादृशेषु प्रत्यवाय(? प्रत्यय)वानन्त्यासु चण्डालादियोनिषु जायते Aparā. 997. 17 (*on* 3. 133)

अत्यन्ताघटमानता (atyantāghaṭamāna-tā) *f.* the state of being extremely unsuited or unfitting पुनः पुनर्नञः प्रयोगोऽत्यन्ताघटमानतादर्शनार्थः SyādvāMañ. 27(8)

अत्यन्ताघटित (atyantāghaṭita) *adj.* absolutely unfitting or unsuited अत्यन्ताघटितमिदं घटयतो जगन्नाथस्य … युक्तैव NyāySu.(Ja.) 435B. 2 (*on* ii. 3. 13)

अत्यन्ताचरिता (atyantācaritā) *adj.* (*f.*) followed or practised very closely or scrupulously योऽत्यन्ताचरितां वृत्तिं क्षत्रियो नानुवर्तते । … क्षत्रधर्मादपैति सः MahāBhā. xii. 94. 5.

अत्यन्ताचिन्त्यमूर्ति (atyantācintya-mūrti) *adj.* whose form is exceedingly inconceivable अत्यन्ताचिन्त्यमूर्तेश्चिरतरमजितस्यान्तरिक्षस्वरूपे तस्मिन्नस्माकमन्तःकरणमतिमुदा क्रीडतात्क्रोडभागे ViṣṇuPādāSt. 25.

अत्यन्ताच्छस्वभावत्व (atyantācchasvabhāva-tva) *n.* the state of having an extremely clear nature अत्यन्ताच्छस्वभावत्वात् स्फटिकादिर्यथा मणिः । उपरक्तो जपाद्यैस्तु स्वेन रूपेण नेक्ष्यते LakṣmīT. 14. 36.

अत्यन्ताज्ञ (atyantājña) *adj.* extremely ignorant नाना पश्यन्नत्यन्ताज्ञः S'rutaPra. iA. 77. 16 (*on* i. 1. 1); ManvaVi. 1528. 1 (*on* 12. 103)

अत्यन्ताज्ञातता (atyantājñāta-tā) *f.* the state of being absolutely unknown न चास्यात्यन्ताज्ञातता स्वतोऽपरोक्षार्थगोचरत्वस्योपाधेरवधारणात् S'atDū. 66. 11.

अत्यन्ताढ्य (atyantāḍhya) *adj.* very rich अत्यन्ताढ्यास्तपोभूत्या सिद्ध्याकांक्षणतत्पराः (मुनयः) PadmP.(Ra.) 14. 177.

अत्यन्ताणु (atyantāṇu) *adj.* extremely atomic नात्यन्ताणोर्महत्तास्त्यवयविनि हते मध्यमं क्वास्तु मानम् TattvMu. 5. 48.

अत्यन्तातङ्क (atyantātaṅka) *m.* great pain रोगाः समुद्भवन्त्यस्मिन्नत्यन्तातङ्कदायिनः TrisaS'aPuC. i. 1. 254.

अत्यन्तातथ्यत्व (atyantātathya-tva) *n.* extremely unreal nature अद्भुतत्वमत्यन्तातथ्यत्वरूपं द्रष्टव्यम् AlaṅkāMañ. 218. 2.

अत्यन्तातिरिक्त (atyantātirikta) *adj.* [*f.* -ā] totally different न धात्वर्थादत्यन्तातिरिक्ता भावना S'āstrDī. 101. 4 (*on* ii. 1. 1); TristhaSe. 19. 21.

अत्यन्तातिरेकिणी (atyantātirekiṇī) *adj.* (*f.*) totally different एवं यदि ज्योतिष्टोमत्वादीनि देशकालादिभेदाच्च तद्व्यक्त्योऽत्यन्तातिरेकिण्यो भवन्ति तथाप्यदोषः TantrVā. 456. 19 (*on* ii. 2. 2)

अत्यन्तातिशय (atyantātiśaya) *m.* extreme or maximum excellence or speciality एवं यावदत्यन्तातिशयवानन्त्यः कारणकलापो जातः ततः कार्यस्योत्पत्तिः HetuBiṬ. 130. 18; महान्तश्च ते ऋषयश्च तेषामेव गुणानामत्यन्तातिशयेन महान्तो भवन्ति ManuBh. i. 3. 17 (*on* 1. 1)

अत्यन्तातिशयित (atyantātiśayita) *adj.* most excellent, having exquisite excellence तत् कस्यचित् पुरुषवर्यस्य ज्ञानमत्यन्तातिशयितं सर्वविषयं भविष्यति NyāyRa. 80. 8 (*on* 2. 114)

अत्यन्तातिशयोक्ति (atyantātiśayokti) *f.* a kind of hyperbole (hyperbole of the highest degree) अत्यन्तातिशयोक्तिस्तु पौर्वापर्यव्यतिक्रमे Candrā. 5. 42 = Kuval. 43; AlaṅkāMañ. 58. 10.

अत्यन्तातिशोभित (atyantātiśobhita) *adj.* very much beautified यदक्षरं तृतीयान्ते तदत्यन्तातिशोभितः (v. l. °शोभितः) पादश्चतुर्थः दृश्येत बहिर्वलयमण्डले SāhiSā. 2. 159.

अत्यन्तातिसूक्ष्मतमत्व (atyantātisūkṣmatama-tva) *n.* the state of being extremely subtle परस्यात्यन्तातिसूक्ष्मतमत्वम् S'vetāUBh. 193. 1 (*on* 4. 16)

अत्यन्तातीन्द्रिय (atyantātīndriya) *adj.* [*f.* -ā] completely beyond the senses इह त्वत्यन्तातीन्द्रियत्वाद्यथाश्रुतादीषदप्यन्यथात्वे पौरुषेयत्वमापद्येत TantrVā. 11. 2 (*on* i. 2. 7); अत्यन्तातीन्द्रिये वस्तुनि साध्यमाने यावन्तो धर्मा दृष्टान्ते अन्वयव्यतिरेकपरिशुद्धाः सम्भवन्ति ते सर्वे प्रसज्यमानाः केन वार्यन्ते BrahmSūBh. (Bhā.) 8. 28 (*on* i. 1. 2); 92. 12 (*on* ii. 1. 11); अर्थापत्तिस्त्वत्यन्तातीन्द्रिये शक्त्यादौ प्रवर्तमाना कथं प्रत्यक्षपूर्विका NyāyRa. 162. 9 (*on* 4. 89); मूलप्रकृतिर्नाम … अत्यन्तातीन्द्रियाणि … समतामुपेतानि सत्त्वरजस्तमांसि द्रव्याणि S'rīBh. 465. 19 (*on* ii. 2. 1); S'rutaPra. ii. 277. 26 (*on* ii. 2. 1); NyāyPari. 97. 5; 150. 6; NyāySu.(Ja.) 111A. 12 (*on* i. 1. 3); केवलान्वयिन्यन्वयव्यतिरेकिणी चात्यन्तातीन्द्रियार्थगोचरता निरस्ता YatīndrDī. 20. 1; प्रकृतिः … अत्यन्तातीन्द्रियापि तत्कार्येणानुमीयते GoviBh. 114. 3 (*on* ii. 2. 1)

अत्यन्तात्महिता (atyantātmahitā) *adj.* (*f.*) highly beneficial to oneself कश्चिदासन्नभव्यः शिवकुमारनामा … धर्मार्थकामेभ्यः सारभूतामत्यन्तात्महितामविनश्वराम् … मुक्तिश्रियमुपादेयत्वेन स्वीकुर्वाणः … प्रतिज्ञां करोति TātpVṛ. 2. 11 (*on* 1. 0)

अत्यन्तात्मेच्छा (atyantātmecchā) *f.* absolutely one's own wish or will नयन्ति स्वगृहं प्रति । अत्यन्तात्मेच्छया चैव ĀdiP. 25. 65.

अत्यन्तान्तिक (atyantāntika) *adj.* extremely close, very near अत्यन्तान्तिकदेशे यूपाद्युत्पत्त्यसंभवाच्चात्र देशे यूपो दृष्टिपथमवतरति तद्देशत्वेनैव प्रयोजकत्वात् MayūMāli. 825. 15 (*on* xi. 3. 11)

अत्यन्तादर (atyantādara) *m.* highest regard, greatest care अतः प्रत्यवायगुरुत्वादत्यन्तादरः कर्तव्य इत्यर्थः HārLa. 99. 13; सर्वोत्कृष्टत्वसिद्धावेवात्यन्तादरकृतेनाभिमुख्येन ध्यानं भवति S'ivārkaMaDī. ii. 309. 26 (*on* iii. 3. 14)

अत्यन्तादरणीयत्व (atyantādaraṇīya-tva) *n.* the state of being very much worthy of regard पाशुपतमतस्य क्वचिदविरोधेऽपि नात्यन्तादरणीयत्वम् S'rutaPra. ii. 336. 24 (*on* ii. 2. 42)

अत्यन्तादर्शन (atyantādarśana) *n.* complete absence of perception अस्तित्वं च प्रतिज्ञाय सदादर्शनमिच्छतः । अत्यन्तादर्शने न स्यादसत्त्वं प्रति निश्चयः VākyaP. 3 (13). 11; दर्शनाभावोऽत्यन्तादर्शने भवति BālamBha. i. 261. 3 (*on* 1. 89)

अत्यन्तादुर्बला (atyantādurbalā) *adj.* (*f.*) not very weak अपरिक्लिष्टां अत्यन्तादुर्बलां गां दत्त्वा दाता स्वर्गे महीयते पूज्यते Mitā. 71. 23 (*on* 1. 208)

अत्यन्तादृत (atyantādṛta) *adj.* very much honoured अत्यन्तादृतसत्कविर्गुरुकृपाधारः … विजयतामानन्दरङ्गः क्षितौ ĀnandaRa. 8. 38.

अत्यन्तादृष्ट (atyantādṛṣṭa) *adj.* [*f.* -ā] absolutely unperceived or uncognised यथा न योगजाद्धर्मादशुक्ले शुक्लप्रत्ययः सञ्जायते अत्यन्तादृष्टे च प्रत्यभिज्ञानम् PadārthaSaṁ. 322. 6; NyāyKa. 323. 26; अत्यन्तादृष्टा हि वाचकशक्तिः TantrVā. 225. 19 (*on* i. 3. 23); अत्यन्तादृष्टे वासनानुपपत्तेः PraśnaUBh. 276. 5 (*on* 4. 5); दृष्टानुसारेण कथंचिदुपपत्तौ अत्यन्तादृष्टकल्पनाया अयोगात् TātpaṬ. (Vā.) 72. 4 (*on* i. 1. 1); अथ कर्मस्वरूपमप्यनुमानेनैव गृह्येत न अत्यन्तादृष्टेन तेन कस्यचिल्लिङ्गस्य संबन्धग्रहणासंभवात् NyāyRa. 371. 10 (*on* 5(4). 75); तत्रात्यन्तादृष्टमपूर्वम् S'āstrDī. 798. 9 (*on* xi. 1. 3); SarvaDaSaṁ. 9. 102; MānaMe. 62. 5; MayūMāli. 25. 12 (*on* i. 3. 3)

अत्यन्तादृष्टचर (atyantādṛṣṭa-cara) *adj.* never perceived before नित्यज्ञानादिकं ह्यत्यन्तादृष्टचरं सो(? नो)त्प्रेक्षामप्यर्हतीति NyāyKu. 98. 18.

अत्यन्तादृष्टचरत्व (atyantādṛṣṭacara-tva) *n.* the state of having never been perceived before तथात्वस्यात्यन्तादृष्टचरत्वेन लक्षणासंभवित्वात् Tattv-

Pradī.(Ci.) 107. 8.

अत्यन्तादृष्टत्व (atyantādṛṣṭa-tva) *n.* the state of being absolutely unperceived तदा यजमानफलोत्पत्तेरत्यन्तादृष्टत्वात्तदाशङ्का TantrVā. 1014. 6 (*on* iii. 4. 41)

अत्यन्तादृष्टपूर्व (atyantādṛṣṭa-pūrva) *adj.* never seen before, absolutely unperceived before न चात्यन्तादृष्टपूर्वाणां कल्पनाजालगोचरत्वमिति चोपपादितम् TātpaṬ.(Vā.) 172. 21 (*on* i. 1. 5); 413. 4 (*on* ii. 1. 52); आर्द्रमरिचमञ्जर्यादिष्वत्यन्तादृष्टपूर्वेषु … झटिति निश्चयोत्पादादर्शनात् VivaPraSaṁ. 124. 17.

अत्यन्तादृष्टार्थ (atyantādṛṣṭārtha) *adj.* which is intended for an absolutely unperceived result इतरथा दीर्घेण कर्त्रा विशेषणमत्यन्तादृष्टार्थं भवेत् TantrVā. 894. 4 (*on* iii. 3. 27); यश्च ग्रहेषु देवतोद्देशः सोऽत्यन्तादृष्टार्थ एव S'āstrDī. 699. 3 (*on* x. 4. 2)

अत्यन्तादृष्टार्थत्व (atyantādṛṣṭārtha-tva) *n.* the state of having an absolutely unperceived purpose अत्यन्तादृष्टार्थत्वमेव केवलं शास्त्रप्रत्ययाधीनम् TantrVā. 228. 21 (*on* i. 3. 25)

अत्यन्ताद्भुत (atyantādbhuta) *adj.* extremely wonderful तया सह विवदमानोऽत्यन्ताद्भुतमिति ब्रूयात् KāmSū. 268. 13 (5. 2)

अत्यन्ताद्भुतरूपा (atyantādbhuta-rūpā) *adj.* (*f.*) having an extremely wonderful appearance or form अत्यन्ताद्भुतरूपां तां दृष्ट्वा कापि पणाङ्गना RatnaCūKa. 354.

अत्यन्ताद्भुतवीर्य (atyantādbhuta-vīrya) *adj.* with extremely wonderful virility or strength अत्यन्ताद्भुतवीर्येण येनाष्टौ कर्मशत्रवः। क्षपिताः क्षणमात्रेण हरिणेवेह दन्तिनः (जिनेन्द्रः) PadmP.(Ra.) 114. 24.

अत्यन्ताद्वैत (atyantādvaita) *n.* absolute non-duality (i. e. absolute monism) श्रुत्यनुसारिकाशकृत्स्नमतादत्यन्ताद्वैतसिद्धौ … तदालोचनेन तन्निर्देश इत्यर्थात्स्थितम् VedāntKa. 220. 19 (*on* i. 4. 22)

अत्यन्ताधम (atyantādhama) *adj.* very low or vile स्थाणुम् … अन्ये अत्यन्ताधमाः … अनुसंयन्ति KāṭhUBh. 163. 9 (*on* 5. 7); श्वकाकादयोऽप्यत्यन्ताधमा देवैः सह संस्पर्धेरन् ManuBh. ii. 7. 1 (*on* 7. 21); PārśvC. 7. 760; VīraMi.(Tīrtha.) 180. 2.

अत्यन्ताधार्मिक (atyantādhārmika) *adj.* extremely unjust or unrighteous एतच्च प्रमादस्खलिताधर्मविषयत्वे न त्वत्यन्ताधार्मिकसन्धिकारस्तेनादिविषये ManvaMu. 308. 2 (*on* 8. 104)

अत्यन्ताधिक (atyantādhika) *adj.* very much more, too much श्राद्धार्थमुपकल्पितमप्यन्नादिकमत्यन्ताधिकं दाता न दद्यात् भोक्ता न च प्रतिगृह्णीयात् CaturCin. iii(1). 1020. 11; सर्वमूलनाशस्तु नास्मिन् विषये विकल्प्यते। अत्यन्ताधिकहानित्वात् SmṛtiCan. iv. 324. 7; v. 87. 20.

अत्यन्ताधिकप्रखरा (atyantādhika-prakharā) *adj.* (*f.*) (a kind of lady-friend) very much sharp (सखी) तत्रात्यन्ताधिकप्रखरा UjjvaNīMa. 190. 9.

अत्यन्ताधिकमध्या (atyantādhika-madhyā) *adj.* (*f.*) (a kind of lady-friend) falling very much in the middle (in between the sharp and the soft ones) (सखी) तत्रात्यन्ताधिकमध्या UjjvaNīMa. 191. 1.

अत्यन्ताधिकमृद्वी (atyantādhika-mṛdvī) *adj.* (*f.*) (a kind of lady-friend) very much soft (सखी) तत्रात्यन्ताधिकमृद्वी UjjvaNīMa. 191. 7.

अत्यन्ताधिक्य (atyantādhikya) *n.* too much excess (व्यायामः) अत्यन्ताधिक्यान्वितो हन्ति मर्त्यम् KalyāKā. 6. 9; दण्डेऽप्यत्यन्ताधिक्यमाह कात्यायनः SmṛtiCan. iv. 553. 6.

अत्यन्ताध्मानक (atyantādhmāna-ka) *adj.* very much puffing अत्यन्ताध्मानकश्चैव जलपूर्णमिवोदरम्। कृशस्य यस्य वाहस्य भवेत्तस्योदकोदरम् AśvaCi. 52. 11.

अत्यन्ताध्यारोप (atyantādhyāropa) *m.* exessively incorrect attribution तत्र यद्वृत्तिकारेणोदाहरणम् … दत्तं तदत्यन्ताध्यारोपाभिभवाभिप्रायप्रयुक्तमित्यनादृतम् TantrVā. 178. 23 (*on* i. 3. 10)

अत्यन्ताध्रुव (atyantādhruva) *adj.* highly transient or impermanent स विद्वान् ध्रुवान् नित्यान् अत्यन्ताध्रुवापेक्षया … अभिप्राप्नोति ChāndoUBh. 428. 10 (*on* vii. 4. 3)

अत्यन्तानतिक्रम (atyantānatikrama) *m.* complete non-transgression (something which cannot at all be set aside) प्रकृतिग्रहणम् … औपदेशिकत्वाद्धात्यन्तानतिक्रमार्थम् TantrVā. 887. 12 (*on* iii. 3. 19)

अत्यन्तानतिदूर (atyantānatidūra) *n.* [Loc.] very near (*lit.* not very much afar) यत्रात्यन्तानतिदूरे पात्रलक्षणान्वितो विप्रोऽस्ति SmṛtiCan. v. 415. 15.

अत्यन्तानतिरेकिणी (atyantānatirekiṇī) *adj.* (*f.*) absolutely not exceeding, absolutely not different पदैक्येऽप्यविरुद्धेयमत्यन्तानतिरेकिणी (जातिः) S'lokaVār. 7. 192 (899. 1)

अत्यन्तोच्छेदकत्व (atyantocchedaka-tva) *n.* the nature of complete destroyer देहादेरत्यन्तोच्छेदकत्वस्याप्यात्पत्या अविद्याया अत्यन्तोच्छेदे मुच्यमानकर्मैव प्रतिबन्धकं कल्प्यते LaCandr. 892. 17.

अत्यन्तोच्छेदरूप (atyantoccheda-rūpa) *adj.* of the nature of complete annihilation दुःखान्तो द्विविधः अनात्मकः सात्मकश्च। तत्रानात्मकः सर्वदुःखानामत्यन्तोच्छेदरूपः SarvaDaSaṁ. 6. 49.

अत्यन्तोच्छेदानुसरण (atyantocchedānusaraṇa) n. resorting to or following utter annihilation अत्यन्तोच्छेदानुसरणपीडनाभ्यां सहसा निष्कार्यः (रिपुः) ManuBh. ii. 60. 5 (*on* 7. 200)

अत्यन्तोच्छेदायोग (atyantocchedāyoga) *m.* impossibility of total destruction भास्करमते अस्तु बुद्ध्युपाधेः सत्त्वादत्यन्तोच्छेदायोगात् PrakaVi. 1110. 9.

अत्यन्तोत्कट (atyantotkaṭa) *adj.* increased excessively, very intense अत्यन्तोत्कटदोषेषु विसंज्ञेषु च दीयते चूर्णं प्रधमनम् ŚārṅgaS. iii. 8. 17; योऽत्यन्तोत्कटरागादिवशात्सभ्यः स्मृत्याचारविरुद्धं वादनिर्णयं विदधाति तस्य दण्डमाह

SmṛtiCan. iii. 49. 20; iii. 182. 17; यदा तु सर्वथात्यन्तोत्कटरागता पशुभक्षणे भवति तदापि … न तु पशुहिंसा युक्ता ManvaVi. 611. 1 (*on* 5. 37)

अत्यन्तोत्कर्ष (atyantotkarṣa) *m.* great excellence तथ्येनापि ब्रुवन्दाप्यो दण्डम् … तदाक्षेप्तुरत्यन्तोत्कर्षे … ग्राह्यम् Aparā. 806. 28 (*on* 2. 204); अत्यन्तोत्कर्षरूपेण विसजातीयस्य पुरुषोत्तमत्वं वक्तुमारभते GītāBh.(Rā.) 598. 1 (*on* 15. 1); प्रमाणं च तत्र ज्ञानत्वमत्यन्तोत्कर्षवद्वृत्ति … इत्याद्यनुमानमेव JñānBiPra. 19. 16.

अत्यन्तोत्कृष्ट (atyantotkṛṣṭa) *adj.* [*f.* –ā] very much excellent ज्ञानतश्चात्यन्तोत्कृष्टापकृष्टरूपेण वर्तमानेषु सर्वेषु भूतेषु समाश्रयणीयत्वेन समोऽहम् GītāBh.(Rā.) 481. 5 (*on* 9. 29); 482. 2 (*on* 9. 29); यद्यपि शिलोञ्छवृत्तिरत्यन्तोत्कृष्टा तथाप्यस्ति प्रतिग्रहेण किंचित्साम्यम् ManuBh. ii. 362. 14 (*on* 10. 112); षण्मासपर्यन्तं सद्यःशौचं, एतच्च … मातापित्रोरत्यन्तोत्कृष्टगुणयोः HārLa. 37. 13; 9. 20; विष्णूक्तस्तु पञ्चाशत्पणोऽत्यन्तोत्कृष्टमृगपक्षिवधविषयः DaṇḍaVi. 223. 6; 241. 9; अत्यन्तोत्कृष्टस्य …विप्रपरिचर्यापरशूद्रस्य दशरात्रमिति NirṇaSi. 369. 28.

अत्यन्तोत्तम (atyantottama) *adj.* very much superior धर्मरत्नमहाराशिमत्यन्तोत्तमयोगिनम् … हनूमानाससार तम् PadmP.(Ra.) 113. 24; तिक्ता बिंबलता…पटोलात्यन्तोत्तमकारवेल्लिसहिता पंचैव वल्यः स्मृताः। … पित्तघ्नाः KalyāKā. 4. 38; Aparā. 700. 10 (*on* 2. 99)

अत्यन्तोत्तुङ्ग (atyantottuṅga) *adj.* exceedingly tall अत्यन्तोत्तुङ्गवर्ष्माणम् …महादेवी समारूढा हयं ययौ BrahmāṇḍP. iii. 16. 23.

अत्यन्तोत्त्रासितत्रप (atyantottrāsita–trapa) *adj.* extremely shameless कुर्वाणौ कलहं नित्यमत्यन्तोत्त्रासितत्रपौ … तौ महीपतिरन्वशात् PāṇḍaC. 4. 452.

अत्यन्तोत्साह (atyantotsāha) *m.* very great enthusiasm अन्तराया इति ख्याता योगस्यैते हि योगिनाम्। अत्यन्तोत्साहयुक्तस्य नश्यन्ति न च संशयः LiṅgaP. i. 9. 13.

अत्यन्तोत्सिक्तमत्सर (atyantotsikta–matsara) *adj.* whose envy is greatly increased (*lit.* flowing beyond limits) तौ नितान्तमयुध्येतामत्यन्तोत्सिक्तमत्सरौ PāṇḍaC. 4. 458.

अत्यन्तोत्सुक (atyantotsuka) *adj.* extremely eager मनसा कान्तसक्तेन सकलं च सखीजनम्। न्यवर्तयन्निगद्यैवमत्यन्तोत्सुकमानसा PadmP.(Ra.) 97. 69; अत्यन्तोत्सुकचेतसां खलु नृणां कुत्रापि वस्तुन्यहो क्रोधः केवलमाधिहेतुरनिशम् RasSa. 84.

अत्यन्तोदात्तचरित (atyantodātta–carita) *adj.* whose conduct is extremely noble मन्त्रिणामपि स्वतंत्रमृद्धिमन्तमत्यन्तोदात्तचरितम् …क्षत्रियकुमारमुद्दिशतां न लेशोऽप्यस्ति निर्वादस्य TilaMañ. 299. 16.

अत्यन्तोदार (atyantodāra) *adj.* extremely generous धनत्यागेनात्यन्तोदारस्यापि गृहजनः पीड्यते TantrVā. 27. 1 (*on* i. 2. 10); MīmāKau. iii(1). 32. 16 (*on* i. 2. 10)

अत्यन्तोदासीन (atyantodāsīna) *adj.* completely unrelated निरन्वयोऽत्यन्तोदासीनः संबन्धाभासेनापि रहितः ManvaVi. 1000. 11 (*on* 8. 198); DaṇḍaVi. 326. 15.

अत्यन्तोदितभाव (atyantodita–bhāva) *m.* the state of being grown very tall *or* clearly visible symptoms (of ailment) वने दोषा न (दोषान्न) गच्छन्ति विधालवणवर्जिताः। अत्यन्तोदितभावाद्धि मातङ्गानां तृणं हितम् Hastyāyur. 564. 18 (4. 3)

अत्यन्तोद्ग्रन्था (atyantodgranthā) *adj.* (*f.*) totally outside or beyond the text न चात्यन्तोद्ग्रन्था सामानाधिकरण्येऽपि स्मृतिरुपेया NayaVi. 91. 5 (*on* i. 1. 5)

अत्यन्तोद्भट (atyantodbhaṭa) *adj.* very prominent यत्र बहुतरधर्मसाधारण्यनिबन्धनं सादृश्यमत्यन्तोद्भटं तत्रैव शीघ्रं स्मृत्युपपत्तेः PrakaPañ. 409. 16.

अत्यन्तोद्रिक्तवृत्ति (atyantodrikta–vṛtti) *adj.* having an excessively conspicuous presence or function तदलङ्कारमहिमैव तथाविधोऽत्र भ्राजते, तस्यात्यन्तोद्रिक्तवृत्तेः स्वशोभातिशयान्तर्गतमलङ्कार्यं प्रकाश्यते VakroJī. 60. 19.

अत्यन्तोद्वेजनकरी (atyantodvejana–karī) *adj.* (*f.*) causing great anguish मर्मस्पर्शिनीर्वाचोऽत्यन्तोद्वेजनकरीराक्रोशवाचो यो वदति ManuBh. i. 157. 1 (*on* 2. 161)

अत्यन्तोन्नत (atyantonnata) *adj.* very high or lofty अत्यन्तोन्नतपूर्वपर्वतमहापीठे हरस्पर्धया … । नूनं पञ्चशरोऽकरोच्छशिमिषात् स्वं ज्वाललिङ्गम् Subhāṣi. 1996.

अत्यन्तोन्नति (atyantonnati) *f.* great height मण्डितं शक्रचापेन गगनं चित्रतेजसा। अत्यन्तोन्नतियुक्तेन तोरणेनेव चारुणा PadmP.(Ra.) 22. 60.

अत्यन्तोन्मग्नस्वभावत्व (atyantonmagnasvabhāva–tva) *n.* the state of having a completely emergent nature अत्यन्तोन्मिश्र(v. l. °न्मग्न)स्वभावत्वे सति तद्धर्मन्वादिति विशेषणमस्माभिः कृतम्। उन्मग्नरूपता च न रूपवज्जात्यत्वस्य। अत्यन्तलीनस्वभावत्वात् Loc. 182. 25 (*on* 3. 33)

अत्यन्तोन्मत्तदुश्चेष्ट (atyantonmatta–duśceṣṭa) *adj.* who misbehaves and is extremely intoxicated तम् …। अत्यन्तोन्मत्तदुश्चेष्टं रत्नचूडो निरैक्षत SkandP. iv. 67. 122.

अत्यन्तोन्मुक्ति (atyantonmukti) *f.* complete freedom from ज्ञानसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराणां नवसंख्यावसराणामात्मगुणानामत्यन्तोन्मुक्तिर्मुक्तिः इति काणादाः YaśasCam. ii. 270. 2.

अत्यन्तोन्मूलन (atyantonmūlana) *n.* complete uprooting यथोक्तधर्माणामेषां संभाव्यो यदि वा मलः। अत्यन्तोन्मूलने दक्षः प्रतिपक्षस्तथैव हि TattvSaṁ. 3418.

अत्यन्तोपकारक (atyantopakāraka) *adj.* [*f.* –ikā] **i** very much obliging or beneficient (person) लोके ह्यत्यन्तोपकारकौ मातापितरौ प्रथितौ ManuBh. i. 150. 22 (*on* 2. 144); Aparā. 438. 2 (*on* 1. 220); **ii** highly beneficial (thing) यदि पुनर्विवादविषयीभूता सीमाभूमिरेकस्य ग्रामस्य क्षेत्रादेरत्यन्तोपकारिका तया विना तद् ग्रामादि न भवत्येव Aparā. 764. 4 (*on* 2. 153); 578. 22 (*on* 1. 315)

अत्यन्तोपकारित्व (atyantopakāri–tva) *n.* characteristic of being very obliging or beneficient मातुर्गर्भधारणपोषणद्वारेणात्यन्तोपकारित्वात् SmṛtiCan. iv. 688. 4.

अत्यन्तोपकारिन् (atyantopakārin) *adj.* [*f.* –iṇī] **i** very much obliging or beneficient (person) राक्षसेनास्माकमत्यन्तोपकारि मित्रं घातितस्तपस्वी पर्वतक इति MudrāRā. 1. 15(4); तन्मे त्वमत्यन्तोपकारिणी PāṇḍaC. 6. 845; **ii** highly beneficial (object) ते हि (मारुताः) घर्मदोषवारकत्वादत्यन्तोपकारिणः AbhinBhā. i. 31. 16 (*on* 1. 84)

अत्यन्तोपघात (atyantopaghāta) *m.* excessive defilement, impurity or dirt अतस्तयोः स्वयोन्या स्वेनोत्पत्तिकारणेनाग्निना अत्यन्तोपघाते उदकेन च (निर्णेकः गुणवत्तरः) ManuBh. i. 475. 15 (*on* 5. 112); ManvaVi. 664. 24 (*on* 5. 113); गृहं रजस्वलादिवासदूषितं (उपहतमुच्यते)। अत्यन्तोपघातादयो यथायथं बोद्धव्याः DīpKa. 23. 19 (*on* 1. 188); क्षुमातसी तत्सूत्रनिर्मितं श्वेतसर्षपपिष्टसहितैरुदकगोमूत्रैः शुद्ध्यति। इदं चात्यन्तोपघाते VīraMi. 258. 17 (*on* 1. 186); *adj.* which destroys completely तयोः स्वेन कारणेनैव जलेनात्यन्तोपघातेनाग्निना निर्णेकः शुद्धिहेतुर्गुणवत्तरः ManvaMu. 217. 30 (*on* 5. 113)

अत्यन्तोपचय (atyantopacaya) *n.* excessive accumulation आस्वादितैर्वनफलैरसदीयैर्महारसैः। अत्यन्तोपचयादेते जायेते हृदि च स्थले PariPar. 1. 155.

अत्यन्तोपचरितार्थत्व (atyantopacaritārtha–tva) *n.* the state of having a highly secondary or figurative sense द्युशब्दश्रवणस्य प्रजापतिसभावेश्मशब्दयोश्च विकारास्पृष्टे ब्रह्मण्यत्यन्तोपचरितार्थत्वप्रसङ्गः PrakaVi. 1076. 4.

अत्यन्तोपचित (atyantopacita) *adj.* gathered excessively together अत्यन्तोपचितान्वा त्वं मानयन्भ्रातृबान्धवान्। कृतवर्माणमासाद्य न नेष्यसि यमक्षयम् MahāBhā. viii. 51. 56.

अत्यन्तोपद्रुतत्व (atyantopadruta–tva) *n.* the state of being excessively afflicted क्षयरोगिणामत्यन्तोपद्रुतत्वात् SmṛtiCan. iv. 394. 18.

अत्यन्तोपपन्ना (atyantopapannā) *adj.* (*f.*) highly appropriate or suitable अत्र तु सिद्धान्तानुरूप्यान्नमस्यात्यन्तोपपन्ना S'rutaPra. iA. 10. 9 (*on* i 1. 1)

अत्यन्तोपयुक्त (atyantopayukta) *adj.* very useful or appropriate तृतीये 'दर्शनस्पर्शनाभ्यामेकार्थग्रहणात्' इत्यादिकं बाह्यान्तरेन्द्रियनिरूपणादिकं चात्यन्तोपयुक्तम् NyāyPari. 22. 5; अयमर्थो ब्रह्मजिज्ञासाकर्तव्यतायामत्यन्तोपयुक्तः NyāySu.(Ja.) 90B. 8 (*on* i. 1. 1)

अत्यन्तोपयुक्तता (atyantopayukta–tā) *f.* the characteristic of being very useful पूर्वैर्ग्रन्थेष्वनिवेशितं मन्त्रार्थचिन्तनं अत्यन्तोपयुक्ततया स्वयमेवाभिधाय… समाराधनं च विहितम् (पराशरभट्टारकैः) PāñcRāRa. 53. 21.

अत्यन्तोपरति (atyantoparati) *f.* absolute cessation or termination अत्यन्तोपरतिर्यत्र दुःखस्य च सुखस्य च BhāgP. iii. 25. 23.

अत्यन्तोपरम (atyantoparama) *m.* absolute cessation or termination यथाविधे शरीरे चेतना गृह्यते तथाविध एवात्यन्तोपरमश्चेतनाया गृह्यते NyāyBh. 226. 1 (*on* ii 2. 47); प्रयोजनं परं निःश्रेयसं सहेतुकस्य संसारस्य अत्यन्तोपरमलक्षणम् GītāBh.(S'aṅ.) 3. 5 (*on* 1. 0)

अत्यन्तोपवन (atyantopavana) *n.* very near or close garden उमामहेश्वरोपेते समृद्धे नगरे शुभे। कर्तव्यं साधनं तत्र रसराजस्य धीमता। अत्यन्तोपवने रम्ये चतुर्द्वारोपशोभिते RasRaSa. 6. 14.

अत्यन्तोपहत (atyantopahata) *adj.* excessively defiled (by dirt), very impure उत्सर्गो वात्यन्तोपहतानां (पदार्थानाम्) GautDS. i. 1. 33; अत्यन्तोपहतस्य वस्त्रस्य यत्प्रक्षालितं सद्विरज्यते तच्छिन्द्यात् ViṣṇuSm. 23. 6; 23. 1; 23. 42;

मृतपञ्चनखात्कूपादत्यन्तोपहताच्चोदकं पीत्वा ब्राह्मणस्त्रिरात्रमुपवसेत् VisnuSm. 54. 2; MārkP. 34. 55 = BrahmP. 221. 54; (शौचं तैजसवत् स्मृतम्) अग्नेरपां च संयोगादत्यन्तोपहतस्य च LiṅgaP. i. 89. 60; Mitā. 491. 16 (*on* 3. 289); अत्यन्तोपहतं सर्वं लोहभाण्डमग्नौ प्रक्षिप्तं शुध्येत् CaturCin. iii(1). 819. 1; अत्यन्तोपहतमाह शारीरैर्मलैः सुरामिश्च यदुपहतं तदत्यन्तोपहतमिति DīpKa. (*on* 1. 185); ViraMi. (Āhnika.) 212. 1.

अत्यन्तोपहतात्मन् (atyantopahatātman) *adj.* whose mind is extremely distressed or subdued तस्मै विभीषणायाग्रे दास्यामो नु किमुत्तरम्। का वा शोभाधुनास्माकमत्यन्तोपहतात्मनाम् PadmP. 118. 64.

अत्यन्तोपादेय (atyantopādeya) *adj.* fully acceptable एवंभूतमत्यन्तोपादेयं सत्कतिपयसमुचितजनानुग्राहकं कृतमिति Loc. 218. 17 (*on* 3. 41); परस्य च श्रोतृजनस्य ··· उत्साहजननेनैव भूतमत्यन्तोपादेयं सत् कतिपयसमुचितजनानुग्राहकं कृतम् Kāvyānu. (He.) 316. 13.

अत्यन्तोर्जितविक्रम (atyantorjita-vikrama) *adj.* having an extremely powerful valour विध्वस्य शब्दमात्रेण शत्रुलोकं मघोर्गृहम्। सुप्रभातनयोऽविक्षदत्यन्तोर्जितविक्रमः PadmP. (Ra.) 89. 62.

अत्यन्तोल्लासिन् (atyantollāsin) *adj.* emerging greatly अत्यन्तोल्लासिहर्षाश्रुसलिलप्लुतलोचनः। भूत्वा ··· । शिरसा तं नमश्चक्रे संविग्नात्मा मुनिं गजः PārśvC. 1. 839.

अत्यन्त्य (aty-antya) *m.* extremely low caste, outcaste of the lowest degree अत्यन्त्यः = श्वपाक इति वाचस्पतिः NirṇaSi. 373. 27.

अत्यन्धकार (aty-andhakāra) *m.* extreme darkness अत्यन्धकारव्याप्तं यत्कूपाकारं च वर्तुलम्। ··· अन्धकूपं प्रकीर्तितम् BrahmVaiP. ii. 33. 104; *adj.* [*f.* -ā] very dark अत्र (श्लोके) ··· रात्रिरत्यन्धकारा पतिः प्रोषितः ··· इति विध्यन्तरं प्रतीयते Kāvyānu. (He.) 36. 11.

अत्यन्नलिप्सा (atyanna-lipsā) *f.* excessive greed for food देही मुक्त इवेक्ष्यते। नात्यन्नलिप्साग्लानिभ्यां शिरसो गौरवेण च KāśyaS. 228B. 40.

अत्यन्नाद (atyannāda) *adj.* consumer of excessive food अग्निरत्यन्नादो भवति यस्यैते उपधीयेते MaiS. iii. 2. 6.

अत्यन्य (aty-anya) *adj.* excelling others अत्यन्यान्पुरुषांश्चापि कृत्वा तत्कर्मसंयुगे MahāBhā. i. 181. 1883* (comm. JñānDī.: अत्यन्यान् अन्यानतिक्रान्तान्)

अत्यपकर्ष (aty-apakarṣa) *m.* extreme reduction, the lowest limit मितमष्टग्रासनियमस्यात्यपकर्षेण परिमाणत्वात्तावन्नियतम् ··· अश्नीयात् ManvaVi. 1401. 11–12 (*on* 11. 109); अकृते तु टिलोपे द्वयजेव अत्यपकर्षे क्रियमाणे तदर्थं यस्य तस्मात् Prasā. i. 952. 11.

अत्यपतर्पण (aty-apatarpaṇa) *n.* extreme underfeeding; starvation रौक्ष्यादत्यपतर्पणात् ··· प्रवर्तन्ते गदाविमौ CaraS. vi. 7. 12 (1941 Ed.); अत्यपतर्पणेन हि प्रमेहिणो मूत्रकृच्छ्र ··· भ्रमादीनां संभवः AṣṭāSaṁ. ii. 82. 20 (4. 14); अवात्सल्याद्भयाच्छोकात्क्रोधादत्यपतर्पणात्। स्त्रीणां स्तन्यं भवेत्स्वल्पम् BhāvPra. (Bhā.) 4. 10.

अत्यपराध (aty-aparādha) *m.* grave offence अत्यपराधादेकलोष्टवधेनाप्येनं हन्युरित्यभिप्रायः BālaKrī. i. 192. 17 (*on* 1. 337 (336))

अत्यपाया (aty-apāyā) *adj.* (*f.*) who has crossed over all difficulties or evils यामानिना वपतु वो वसु सा ··· अत्यपाया Kāvyālaṅ. (Ru.) 5. 21.

अत्यपूर्व (aty-apūrva) *adj.* very extraordinary सावधानं निशामय। अत्यपूर्वं च चरितं पुराणेषु पुरातनम् BrahmVaiP. i. 9. 47; iv. 131. 1; अत्यपूर्वस्य रागस्य पूर्वपक्षाय पल्लवाः। पद्यानि पादयुग्मस्य प्रत्युदाहरणानि च VikrDeC. 8. 11; अम्ब त्वया भेषजमत्यपूर्वमशिक्षि YātrāPra. 7. 180.

अत्यपूर्वम् (aty-apūrvam) *adv.* in a very extraordinary manner लास्ययोग्यबहुतालक्षणान्यत्यपूर्वमनिशं वधूततेः। कल्पयन्तमधिपम् ··· प्रास्तुवन्सकलशास्त्रकोविदाः Raghunā. 5. 57.

अत्यप्रसिद्ध (aty-aprasiddha) *adj.* very unknown, उभयगुणयोगाच्चात्यप्रसिद्ध उपनागरः SaraKaṇṭhā. 233. 20.

अत्यप्सरस् (aty-apsaras) *adj.* who has surpassed nymphs पञ्चो राजा ···अत्यप्सरोभिर्वारस्त्रीजनैश्च परिवारितः TriṣaS'aPuC. iii. 6. 5; इत्येतयालोपि दिवोऽपि पुंसां वैमत्यमत्यप्सरसा रसायाम् NaiṣC. 10. 113.

अत्यबाध्यता (atyabādhya-tā) *f.* state of being extremely non-sublatable or non-stultifiable साक्षात्कारः···गृह्यात्वेवात्यबाध्यताम् Nyāyāmṛ. 140B. 10

अत्यब्ज (aty-abja) *adj.* superior to a lotus (in beauty) संज्ञाप्य नः स्वध्वजभृत्यवर्गान् दैत्यारिरत्यब्जनलास्यतुर्यैः ··· विलज्जं रमते रमायाम् NaiṣC. 3. 34.

अत्यब्दम् (aty-abdam) *adv.* for more than a year अत्यब्दमिति योऽभ्यस्येत्प्रतिधस्त्रमनन्यधीः। स व्योममूर्तिः SkandP. iv. 36. 45.

अत्यभिगा (aty-abhigā-) III. P. to pass by fast क्षिप्रं तत्प्रतिपद्यस्व न कालोऽत्यभ्यगाद्यथा VarāP. 172. 54.

अत्यभिघात (aty-abhighāta) *m.* heavy blow, severe hurt भोजननिरोधोऽत्यभिघातात् भोक्तुमशक्तिः BālaKrī. i. 278. 8 (*on* 2. 225)

अत्यभिजातत्व (atyabhijāta-tva) *n.* extreme nobility गुणोऽप्यत्यभिजातत्वं जातो दोषाय दैवतः KathāSaSāg. xii. 18. 32.

अत्यभिधान (aty-abhidhāna) *n.* excessive talk 'आहुतोढायां पुनरादधीत' इत्यलमत्यभिधानेन BālaKrī. i. 92. 19 (*on* 1. 96)

अत्यभिनन्द् (atyabhi-nand-) I. P. to relish very much धात्रीमालीयतेऽकस्मात् स्तन्यं नात्यभिनन्दति KāśyaS. 33B. 38.

अत्यभिनिवेश (aty-abhiniveśa) *m.* excessive adherence to न मन्त्रौषध्यादावत्यभिनिवेशः कार्यः BālaKrī. ii. 62. 3–4 (*on* 3. 161–4) (171. 74?); ii. 45. 14 (*on* 3. 103–4 (113–14?))

अत्यभिन्नता (atyabhinna-tā) *f.* complete identity, non-difference निदर्शनत्वयेणातो भगवानत्यभिन्नताम्। गुणानामादरेणाह AnuVyā. 45A. 10 (*on* 3. 2)

अत्यभिन्नपद (atyabhinna-pada) *n.* complete non-duality अत्यभिन्नपदे तस्मिंस्तन्वाना भेदमाततम्। संसारमाया YogVā. iv. 41. 19.

अत्यभिमान (aty-abhimāna) *m.* excessive self-conceit or pride उत्पत्तिकारणान्याह – ते बुद्धिदौर्बल्यात् ··· अत्यभिमानात् ··· दैवयोगाच्च स्युः KāmSū. 352. 14 (6. 6); मगधराजः ··· अत्यभि(वा ? मा)नादनन्यगतिः ··· श्रीगर्भे ससार AvantiKa. 113. 11.

अत्यभिमानिन् (aty-abhimānin) *adj.* having excessive attachment मूढस्य स्वदेहेऽत्यभिमानिनः। कामासक्तस्य नो सिद्धमैहिकं पारलौकिकम् ĀdiP. 7. 25.

अत्यभियोग (aty-abhiyoga) *m.* excessive perseverance, intense application (आत्मज्ञानं कार्यं) आमरणेन च यावज्जीवमत्यभियोगेनेत्यर्थः BālaKrī. ii. 62. 6 (*on* 161–64 (171–74?))

अत्यभिरामाङ्ग (aty-abhirāmāṅga) *adj.* having very charming limbs or body क्षीणमत्यभिरामाङ्गं क्षीयमाणं निरङ्कुशम्। वियोगवह्निना नागं दावेनै(? ने)-वाकुलीकृतम् (पद्मं वातिरुपासर्पत्) PadmP. (Ra.) 54. 7.

अत्यभिषुत्य (atyabhi-ṣutya) *adj.* involving additional pressing (of Soma) अत्यभिषुत्यं वा। दक्षिणाभिर्वा वर्षीयांसं यज्ञक्रतुं कुर्वीत ĀpaS'S. xiv. 20. 3.

अत्यभिष्यन्दिन् (aty-abhiṣyandin) *adj.* 1 causing extreme flow or effusion वातमेवंविधमनारोग्यकरं विद्यात्। तद्यथा ··· अत्यभिष्यन्दिनमतिभैरवारावम् CaraS. iii. 3. 7(1) (1941 Ed.); AṣṭāSaṁ. i. 55. 21 (1. 9); SiddhYo. 40. 20; BhojanKu. 135. 19; 2 causing excess of cough or phlegm आविकं दधि··· रूक्षमुष्णं कषायं स्यादभिष्यन्दि दोषलम् HāriS. i. 8. 38.

अत्यभिसृत (aty-abhisṛta) *adj.* passed by विमूढा हि वयं सर्वे प्रच्छन्नमृषिसत्तमम्। संध्यां वसिष्ठमासीनं तमत्यभिसृताः पुरा MahāBhā. i. 91. 12.

अत्यभिहत (aty-abhihata) *adj.* greatly struck विशल्यप्राणहराणि वैकल्यकराणि च कदाचिदत्यभिहतानि मारयन्ति SuśruS. iii. 6. 23.

अत्यभीष्ट (aty-abhīṣṭa) *adj.* extremely desired पुत्रमित्रकलत्रेषु रत्नस्वर्णधनेषु च। प्राणेभ्योऽप्यत्यभीष्टेषु मूर्च्छावान् दण्डकोऽभवत् TriṣaS'aPuC. i. 1. 434.

अत्यभुक्ता (aty-abhuktā) *adj.* (*f.*) not having taken food excessively or overeaten (स्त्रियम्) सुक्षामामत्यभुक्तां च ··· पुरुषो व्रजेत् BhaviP. 897B. 26 (iv. 205. 125)

अत्यभ्यवहृत (atyabhyava-hṛta) *adj.* excessively partaken of, overeaten or drunk सहसात्यभ्यवहृतैः पानान्नैः पीडितोऽनिलः। ऊर्ध्वं प्रपद्यते CaraS. vi. 17. 38 (1941 Ed.)

अत्यभ्यस्त (atyabhyasta) *adj.* [*f.* -ā] i excessively used सोऽत्यभ्यस्तस्तनोः कुर्याच्छैथिल्यम् AṣṭāHṛ. i. 10. 11; ii often repeated अत्यभ्यस्ता यान्या सुरतविधौ विविधचाटुपरिपाटी KuṭṭaMa. 384.

अत्यभ्यास (atyabhyāsa) *m.* excessive use (कषायो रसः) अत्यभ्यासात् सोऽपि शुक्रोपरोधम् ··· कुर्यात् AṣṭāSaṁ. i. 98. 10 (1. 18)

अत्यभ्युदयकाल (atyabhyudaya-kāla) *adj.* later than the time of the rising sun अत्यभ्युदयकाल[म]स्य पूजनम् ParaS. 3. 15.

अत्यमङ्गल (aty-amaṅgala) *n.* extremely inauspicious object अमङ्गलानां सर्वेषां विधवा ह्यत्यमङ्गलम् SkandP. ii(9). 22. 11.

अत्यमर (aty-amara) *adj.* surpassing the gods चित्रमिदमत्यमरं राजत्वम् HarṣaC. 121. 8.

अत्यमरावतीश (aty-amarāvatīśa) *adj.* surpassing the lord of Amarāvatī ज्ञातापि राजात्यमरावतीशभोगावतीशं सुतमुत्सुकोऽयम्। शरावतीशाजिरवत्यलंकारवत्यधीशांश्च युधे दिदेश DvyāśraKā. 6. 62.

अत्यमर्ष (aty-amarṣa) *m.* excessive anger ततस्तेनात्यमर्षान्धेनात्मना

पश्चमेन ते । अयुध्यन्त प्रभासाद्यास्त्रयोऽत्र श्रुतशर्मणा KathāSaSāg. viii. 5. 98; PārśvC. 8. 218; HammīMaKā. 10. 61; Rāgh. 15. 48.

अत्यमर्षण (aty-amarṣaṇa) *adj.* [*f.* -ā] extremely angry ह्रदात्समुत्थितो यत्र धार्तराष्ट्रोऽत्यमर्षणः MahāBhā. i. 157*(6); iii. 34. 1; कृष्णायसस्येव च ते हृदयं कृतम् । मम मातस्त्वकरुणे वैरप्रज्ञे ह्यमर्षणे (v. l. अत्यमर्षणे) MahāBhā. v. 133. 1; vii. 44. 17; BhāgP. x. 37. 3; S'ivaP. ii(5). 54. 21 (287B. 3); TriṣaS'aPuC. ii. 4. 210; PāṇḍaC. 12. 270; उल्लुखानोऽत्यमर्षणः । प्रतस्थे HammīMaKā. 9. 106.

अत्यमर्षित (aty-amarṣita) *adj.* extremely enraged, made very angry विलोक्य तं वज्रधरोऽत्यमर्षितः···महागदाम् । चिक्षेप BhāgP. vi. 11. 9; viii. 21. 9; SkandP. i(3B). 19. 65; S'ivaP. ii(5). 55. 7 (288B. 12)

अत्यमर्षिन् (aty-amarṣin) *adj.* very angry दुर्योधनः ··· युधि सोऽत्यमर्षी राजा विनिःश्वस्य बभूव तूष्णीम् MahāBhā. iv. 61. 23; v. 22. 15; viii. 46. 45; BhāgP. iii. 1. 37; (सुग्रीवः) अत्यमर्षी रुषाक्रान्तस्तं हन्तुं नगमाददे PadmP. iv. 64. 28.

अत्यमलतर (atyamala-tara) *adj.* extremely bright or pure नेत्रमताभ्रमत्यमलतररुचिविसरम् । यस्य विभाति ··· तं जिनमवनमत सुधियः MahāP. 23. 174.

अत्यमितानन्द (atyamitānanda) *adj.* characterised by immeasurable bliss अत्यमितानन्दं चिद्ब्रह्म VarīvaRaha. 139.

अत्यमृतम् (aty-amṛtam) *adv.* surpassing nectar मन्दिरमत्यमृतमङ्गसुखदायि शोभायमानमभ्येति SāmaraU. 264. 13.

अत्यम्बुकाम (atyambu-kāma) *adj.* having great desire for water कुञ्जराः ··· नात्यम्बुकामाः ··· ज्ञेया बुधैर्वामिनवंशजाताः YuktiKa. 199. 11.

अत्यम्बुद (atyambu-da) *adj.* giving plenty of water नात्यम्बुदा जलमुचोऽचलसंनिकाशाः BṛSaṁ. 19. 2.

अत्यम्बुदुर्दिन (atyambuda-durdina) *n.* rainy day having many clouds तदेनदत्यम्बुददुर्दिनेषु विशेषतः कोपमुपैति नित्यम् KalyāKā. 11. 132.

अत्यम्बुपान (atyambu-pāna) *n.* drinking excessive water अजानाम् ··· नात्यम्बुपानात् ··· सर्वव्याधिहरं पयः SuśruS. i. 45. 53 = Hastyāyur. 668. 24 (4. 21) = BhojanKu. 132. 14; अत्यम्बुपानाद्विषमाशनाद्वा···अन्नं न पाकं भजते नरस्य SuśruS. i. 46. 500; RugVi. 6. 7; BhāvPra.(Bhā.) 5. 227; अत्यम्बुपानावश्यायग्राम्यधर्मातपांस्त्यजेत् SuśruS. vi. 64. 11; AṣṭāSaṁ. i. 70. 21 (1. 11) जन्तोरत्यम्बुपानाच्च वातविण्मूत्रधारणात् ।··· न सम्यक् परिपच्यते KāśyaS. 260A. 23 (9. 5);; ViṣṇuDbaP. ii. 56. 123; अत्यम्बुपानाशनसेवनाच्च । ··· वायुः प्रकुप्याशु करोति शूलम् Hastyāyur. 274. 9 (2. 52); अत्यम्बुपानाज्जायेत सुतरामतिसाररुक् Mānaso. i. 19. 230; RasRaSa. 16. 4; अत्यम्बुपानान्न विपच्यतेऽन्नमनम्बुपानाच्च स एव दोषः BhāvPra.(Bhā.) 5. 158 = BhojanKu. 192. 13; अत्यम्बुपानाद्विषमाशनाच्च षड्भिः प्रकारैः प्रभवन्ति रोगाः SiṁhāDvā. 172. 7; BhojanKu. 114. 13.

अत्यम्बुपानतस् (atyambupāna-tas) *adv.* due to excessive drinking of water अतीसारः स सुतरां जायतेऽत्यम्बुपानतः AṣṭāHr. iii. 8. 1; अत्यम्बुपानतो घस्रशयनान्निशि जागरात् ··· भवेद्रोगः PārśvC. 7. 383.

अत्यम्बुप्लुत (atyambu-pluta) *adj.* soaked in excessive water विदाहि शुष्कमत्यम्बुप्लुतं चान्नं न जीर्यति AṣṭāHr. i. 8. 32.

अत्यम्ल (aty-amla) *adj.* [*f.* -ā] extremely sour or acid दधि तु मधुरमम्लमत्यम्लम् SuśruS. i. 45. 65; अत्यम्लं शुक्तमाख्यातं निन्दितं ब्रह्मवादिभिः BṛbaspaSm. 339. 86; अत्यम्लकटुतीक्ष्णोष्णलवणैर्मातृभोजनैः । (जन्तुः) वर्धमानातिवेदनः ViṣṇuP. vi. 5. 11; BṛSaṁ. 76. 12; अत्यम्लानि फलानि वातशमनान्युद्रिक्तरक्तान्यपि KalyāKā. 4. 43; (श्राद्धकर्मणि वर्ज्यानि) न दातव्यं अत्यम्लं पिच्छिलम् BrahmP. 220. 178; 220. 183; वर्जयेन्मधु मांसं च अत्यम्लं च खगाधिप BhaviP. 287B. 29 (i. 195. 8); तिन्तिणीफलमत्यम्लं लवणेन युतं यदा । तदाम्लस्य तिरस्कारादीषदम्लं यथा तथा PañDa. 12. 79; (आम्रफलं) तरुणं तु तदत्यम्लं रूक्षं दोषत्रयास्रकृत् BhāvPra.(Bhā.) 6 (7). 3; 6 (7). 144; अम्लं चतुर्थमत्यम्लं पञ्चमं दधि पञ्चधा BhojanKu. 135. 12; 136. 1; चिञ्चात्यम्ला भवेदामा पक्वा तु मधुराम्लिका BhojanKu. 98. 4; AbhidhāMañ. 194. 14; *n.* **A** name of a plant (वृक्षाम्ल), *Spondias magnifera* [APTE] श्रेष्ठाम्लमत्यम्लमथाम्लबीजं फलं च चुक्रादि गजेन्दुसंख्यम् RājNi. 89. 11; **B** very sour substance यद् ··· अतिगुरुद्रव्यमत्यम्लयुक्तम् ··· तत्तद्वातघ्नमुक्तम् KalyāKā. 10. 19.

अत्यम्लकाञ्जिक (atyamla-kāñjika) *adj.* very sour gruel अत्यम्लकाञ्जिकं पश्चात् पचेद्यामचतुष्टयम् RasRaSa. 20. 123.

अत्यम्लतक्र (atyamla-takra) *n.* very sour butter-milk अत्यम्लतक्रमनिलामयुतातिसारे प्रातः पिबेत् KalyāKā. 9. 92.

अत्यम्लत्व (atyamla-tva) *n.* extreme sourness औषधस्य··· अत्यम्लत्वात् ··· दुर्योगातियोगात्पच्येते KāśyaS. 156A. 36.

अत्यम्लपर्ण (atyamla-parṇa) *adj.* possessing very acid leaves [pw]

अत्यम्लपर्णी (atyamlaparṇī) *f.* *Asclepias acida* (?) [PW] अत्यम्लपर्णी तीक्ष्णाम्ला प्लीहशूलविनाशिनी BhojanKu. 70. 19; RājNi. 332 22; KalpaK. 298. 441.

अत्यम्लपान (atyamla-pāna) *n.* very sour drink अत्यम्लपानैरतिशीतलान्नैः श्लेष्म प्रकोपं समुपैति नृणाम् KalyāKā. 3. 60.

अत्यम्लरसा (atyamla-rasā) *f.* a kind of medicinal plant (बीजपूरा) KalpaK. 261. 118.

अत्यम्लवेत (atyamlaveta) *n.* a kind of sovrel (acid leaved herb) अत्यम्लवेतश्च तथा च कोलम् (यवानिकाखण्डविकाचूर्णम्) HāriS. iii. 6. 27.

अत्यम्ला (atyamlā) *f.* name of a plant, a kind of wild citron (वनबीजपूर) मातुलुङ्गी अत्यम्ला देवदूती च ParyāRaMā. 152; RājNi. 174. 17; अथात्यम्ला मातुलुङ्गी NāmaMāli. 197; ParyāMu. 8. 11; Vaija. 47. 34; KośaKaTa. 1. 3244.

अत्यम्लित (aty-amlita) *adj.* soaked many times in sour substances अत्यम्लितमुद्रर्तिततारादिष्टादिपत्रमतिशुद्धम् RaseCin. 3. 56 (comm. आम्लवर्गैर्बहुशो भावितम्)

अत्यम्लीभाव (atyamlī-bhāva) *m.* extremely sour nature यानि मधुरसान्यपि कालात्ययेन द्रव्यान्तरसंसर्गेण वात्यम्लीभावमापद्यन्ते CaturCin. iii(1). 616. 14.

अत्यम्लीभू (atyamlī-bhū-) I. P. to become very sour शुक्तं यदन्यरसं द्रव्यान्तरसंसर्गादिनात्यम्लीभवति VīraMi.(Āhnika.) 497. 10.

अत्यय (aty-ay-) I. Ā. to pass away, to become past यथैकरूपव्यासक्तचक्षुर्मनसोः यानि रूपाणि शब्दगन्धरसस्प्रष्टव्यानि चात्ययन्ते तदालम्बनैः पञ्चभिर्विज्ञानकायैर्न शक्यं पुनरुत्पत्तुम् AbhidhKoBh. 4. 13 (*on* 1. 6)

अत्यय (aty-aya) *m.* [also *n.* S'abdaBhePra.(Ma.) 4. 18; included in *Vinayādi gaṇa* GaṇPā. 211. 16; CāndraVyā. iv. 4. 17; KāśiVṛ. *on* P. v. 4. 34; JaineVyā. 272. 12 (*on* iv. 2. 40); SaraKaṇṭhā.(Gr.) v. 4. 36; GaṇRa. 3. 193 (236); Prasā. i. 944. 21]; **1Ai** end, closure, termination **Aii** death, passing away **Aiii** departure, absence **Bi** destruction, ruin, perishing, **Bii** total disappearance **Biii** loss (of money) **C** danger, harm, calamity **D** non-existence **E** suffering, disease **2i** going beyond, crossing over, overstepping **2ii** overcoming, mastering **3A** transgression, offence, crime **3B** punishment, fine **4A** lapse (of time), missing or passing over (stipulated time) **4B** emergency, urgent matter **5** going in various directions, variety, type **6** Lexicons *add* portent, attack **1Ai** end, closure, termination शुक्रात्यये पौर्णमास्यामिवेन्दुः MahāBhā. i. 71. 49; शालीन् सयवगोधूमान् सेव्यानाहुर्घनात्यये CaraS. i. 6. 43 (1941 Ed.); i. 6. 44; दोषचयम् ··· विशोधयन् ··· । घनात्यये वार्षिकमाशु सम्यक् प्राप्नोति रोगानृतुजान्न जातु AṣṭāHr. i. 4. 35; सम्यक्कृवर्धितमण्डलं समुदयैर्दोषात्ययै(?यै)र्भासितम् EI. xii. 16. 21; iv. 341. 26; समजनि वाजिनां गतिरपास्तरयास्तगिरावहरहरत्ययेऽपि परिवृद्धिमिवानयताम् Kappiṇā. 11. 6; 15. 8; यदि योगी धनिष्ठायां कुर्यात् कालं दिनात्यये BṛKathāK. 46. 28; कृतस्तु दासविशेषो दास्यावधित्वेन परिभाषितकालस्यात्ययाद् विमुच्यते SmṛtiCan. iv. 467. 12; अतिशब्दाद्रवेः राहुमेघागमहेमन्तकालदिनात्ययाः KāvyKaVṛ. 110. 1 (4. 1); अत्ययेऽत्र शरदां जिनमोक्षात् ViviTīKa. 47. 8; बाह्याः शरीरे किल शैशवीया भावा यथात्याजिषतात्ययेऽस्य । ह्रातुं तथाभ्यन्तरगानपीमान् उदासते हन्त किमत्र सन्तः HammīMaKā. 8. 41; प्रादुर्भवन्ती बहिरङ्गिजनीनां संवर्त्तिकासंहतिराबभासे । नीहारवर्षात्ययनिर्णयाय प्रसारिता पाणिपरम्परेव YātrāPra. 3. 8; **1Aii** death, passing away अथैकोद्दिष्टं व्याख्यास्यामः । ··· अत्यये गुरूणां त्रिशुक्लाः ··· ब्राह्मणाः पात्रमित्यामनन्ति VaikhāGS. 5. 13; स भुक्त्वा विपुलान् भोगान् ··· कालान्तरेऽत्यये प्राप्ते प्राप्तं यात्यच्युतं पदम् PāraS. 18. 440; (उद्दातम् । ··· नास्ति ममात्ययाद्दातुम्) नास्तीदं दानं ममात्ययादस्य भविष्यति GiMs. iii(2). 124. 8; पितुरत्ययादचिराधिष्ठिताधिकारः · कान्तको नाम नागरिकः DaśKuC. 58. 18; पश्यन्त्यपि यथा पत्युरत्यये न ममार सा RāmC. 31. 45; 33. 1; ज्ञातीनामत्यये वित्तमदत्तमपि संमतम् YaśasCam. ii. 344. 12; यद्भक्तियुक्ताः पुरुषास्तु नित्यं दारिद्र्यमोहात्ययसंभवादीन् । न प्राप्नुवन्ति S'ivaP. ii(5). 26. 23 (251B. 8); तदपत्यमत्यये । कुमारपाल उ अविता महीम् DvyāśraKā. 15. 123; (विवाहात्ययवृद्धिषु) अत्ययो मरणम् SmṛtiCan. ii. 316. 10; ii. 622. 20; CaturCin. iii(1). 239. 17; iii(1). 860. 1; लेखकसाक्षिणामत्यये तल्लिखितैः इतराक्षरैः संशयनिरासमाह बृहस्पतिः VyavaNi. 90. 1; VīraMi.(Āhnika.) 166. 14; (पञ्चता, मरण, अपगम etc.) AmaK. 1699; AbhidhāRaMā. 3. 6; Vaija. 239. 1; AbhidhāCin. 323; NānārthāSaṁ. ii. 11. 2; S'abdaRa.(Vā.) 2113; 3761; S'abdaRaSaK. 241. 13; KośaKaTa. 1. 6383; **1Aiii** departure, absence कृत्वा सायं पृथग्याति भूतेभ्यस्तमसोऽत्यये । प्रकाशं किरणैः कुर्वंस्तेनैनं केशिनं विदुः BṛDe. 2. 65; अव्ययं विभक्तिः···

°अत्ययासम्प्रति° · °वचनेषु P. ii. 1. 6; इयं कदम्बानिलभर्तुरत्यये न दिग्वधूनां कृशता न राजते Kirātā. 4. 24; अत्ययोऽभूतत्वमतिक्रमः । अतीतानि हिमानि निर्हिमम् KāśiVr. *on* P. ii. 1. 6; SākaṭāVyā. ii. 1. 18; अथात्यये गगनविहारभूमुर्जा गिरम्(? गिराम्) …। महीपतिः … वनावनीं व्यहृत Kapphiṇā. 9. 1; PrakriKau. i. 475 6; SiddhaHe. iii. 1. 39; **1 B i** destruction, ruin, perishing कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च BrahmSū. iii. 1. 8; iv. 3. 9; कर्मणामुत पुण्यानां पापानां च फलोदयः । प्रभवश्चाप्यय(v. l. °त्यय)श्चैव MahāBhā. iii. 32. 33; मा गमः ससुतामात्योऽत्ययम् MahāBhā. v. 35. 32; v. 70. 33; v. 144. 5; vii. 75. 25; xiii. 41. 25; अत्ययमप्यविगणय्य दिशन्ति सत्पुरुषाः JātaMā. 19. 1; प्रभवश्चाप्ययश्चैव भूतानां तेन भास्करः VāyuP. i. 31. 37; फणिनोऽभिमुखागमोऽरिसङ्गं कथयति बन्धवधात्ययं च यातुः BṛSaṁ. 88. 19; तेनैव नाथ प्रथमं निसृष्टः … अहमत्ययाय RāmC. 32. 11; श्रुतं च दृष्टवद्दृष्टं स्पर्शा(? र्धा)सूयात्ययव्ययैः BhāgP. xi. 10. 21; (S'rīdhara – अत्ययो नाशः । व्ययोऽपक्षयः तैर्दुष्टम् । यद्वा व्ययो नाशः । अत्ययोऽन्यस्यातिशयः); (कृतात्यये) कृतस्य यागादेः अत्यये भोगेन क्षये सति BrahmSūBh.(Bhā.) 154. 18 (*on* iii. 1. 8); 237. 5 (*on* iv. 3. 9); विश्वसर्गविधौ … । तदत्ययविधावीशस्तं वन्दे परमेश्वरम् YuktiKa. 1. 6; कार्यस्य ब्रह्मलोकस्यात्यये BrahmSūBh.(Rā.) 751. 21 (*on* iv. 3. 9); VedāntDī. 144. 18 (*on* iii. 1. 8); 239. 10 (*on* iv. 3. 9); VedāntKau. 261. 2 (*on* iii. 1. 8); अथ … पचतीतिवत् क्रतेरत्ययेऽग्रिमक्रतेरनुत्पादे च मध्येऽप्यपाक्षीत्पक्ष्यतीति च स्यात् TattvCin. iv(2) 833. 2; नैवेच्छत्ययमत्ययं गुणिसखः कस्यापि तेजोनिधिः Subhāṣi. 577; 1187; AṇuBh. 173. 12 (*on* iii. 1. 8); हिमस्यात्ययः अतिहिमम् । अत्ययो ध्वंसः SiddhāKau. 162A. 1; (निरपाया) अपायोऽत्ययो नाशस्तद्रहिता LalitāSaBh. 66. 11 (*on* 101); GoviBh. 186. 5 (*on* iii. 1. 8); 310. 16 (*on* iv. 3. 10); (नाश, विनाश) AnekāSa. 248; ParyāRaMā. 1625; AnekāSaṁ. 3. 468; S'abdaBhePra.(Ma.) 4. 18; DharK. 1885; AnekāK. 650; NānārthSaṁ. 4. 34; MediK. 125. 67; AnekāTi. 3. 9; NānārthaMa. 1328; ParaNā. 2633; VisvaLoK. 264. 69; KośaKaTa. 2. 7405; S'abdaRaSaK. 241. 13; Kośāva. 37. 6; **1 B ii** total disappearance अशनायापिपासे यस्तद्धेतोरत्ययात्सदा । अत्येति BṛĀraUBhVā. iii. 5. 56; यः स्वकारणसंसर्गः कार्याणामत्ययो भवेत् BṛĀraUBhVā. iii. 5. 69; **1 B iii** loss (of money) (गोऽभिशापात्यये) अत्यये द्रव्यविनाशे DīpKa. 38. 25 (*on* 2. 12); अत्ययः प्राणधनातिपातस्तस्मिन् Mitā. 140. 16 (*on* 2. 12); VīraMi. (Vyavahāra.) 104. 6; **1 C** danger, harm, calamity सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् BrahmSū. iii. 4. 28; न चामृत्युर्भविता वै हतेऽस्मिन् को वात्ययः स्यादहतेऽस्मिन् जनस्य MahāBhā. xiii. 1. 16; xiii. 10*(2); उद्वाहकाले … प्राणात्यये … अनृतं वदेयुः पञ्चानृतान्याहुरपातकानि VāsiDS. 16. 36; हेतुलक्षणकालज्ञो बलशोणितवर्णवित् । कालं तावदुपेक्षेत यावन्नात्ययमाप्नुयात् CaraS. vi. 14. 181 (1922 Ed.); प्रोक्षितं भक्षयेन्मांसम् … । यथाविधि नियुक्तस्तु प्राणानामेव चात्यये ManuSm. 5. 27; 10. 99; अतिचक्रमणेनापि … । अत्ययं प्राप्नुयाद् घोरं देहान्तकरणं महत् KāśyaS. 85B. 42; 71B. 21; सोऽयमधुना स्वामिनो महानत्ययो वर्तते Tantrākhyā. 43. 3; शरीरस्यात्यये प्राप्ते वदन्ति नियमं तु ये । …ते तस्य विघ्नकर्तारः ParāSm. 6. 57; इतरेषां वै मन्त्रमुद्रादिकं स्वकम् । नाख्येयमत्यये प्राप्ते PauṣkS. 32. 7; शरीरस्यात्यये कार्यः सदैव नियमो द्विजैः LaS'ātāSm. 169; साहसस्तेयपारुष्यगोऽभिशापात्यये स्त्रियाम् । विवादयेत्सद्य एव कालोऽन्यत्रेच्छया स्मृतः YājñaSm. 2. 12; BrahmSūBh.(Bhā.) 211. 10 (*on* iii. 4. 28); अधिरोपयामि न भवन्तमत्ययं दयितं यशो यदि निह्नुयतामरिः RāmC. 20. 38; देवाः … । यत्र तत्रापि तुष्यन्ति न पश्यन्ति पुरोऽत्ययम् RāmC. 28. 29; मिथ्याभियोगाद् द्विगुणमभियोगाद्धनं हरेत् । साहसस्तेयपारुष्येष्वभिशापात्यये स्त्रियः AgniP. 252. 41; यथाविधि नियुक्तं च प्राणानामपि चात्यये । भक्षयेदेव मांसानि KūrmaP. 572. 10 (2. 17); एवमादिशल्येष्वनुद्धृतेष्वेव देवालयगृहादिकं यदि कुर्यात् … अनभ्युदयात्ययरोगप्रवासनैर्धन्यविनाशपरिक्लेशादयो दोषा भवन्ति ĪśānS'iPa. ii. 29. 91(15); अत्यये सर्वयुद्धं स्याच्चौकायुद्धं जलप्लुते YuktiKa. 9. 7; एतदेव महत्त्वं च महतामुच्यते बुधैः । प्रतिपन्नादचलनं प्राणानामत्ययेऽपि च KathāSaSāg. xii. 32. 8; Aparā. 618. 26 (*on* 2. 12); क्ष्मात्यये जायमाने । भर्तारं यं धरित्री…उपेता…स क्ष्मापतिश्चन्द्रदेवः EI. ii. 359. 2; आतरेष्वत्यये सेतोर्गृहीता पट्टशती त्वया RājTa.(Ka.) 8. 136; वदनगभंगतं न निजेच्छया शशिनमुज्झति राहुरसंशयम् । अशित एव गलत्ययमत्ययं सखि विना गलनालबिलाध्वना NaiṣC. 4. 65 (Malli. अकृच्छ्रेण, Nārāyaṇa नाशं विना); प्राणानामत्यये तदभक्षणे मरणनिश्चये ManvaVi. 605. 11 (*on* 5. 27); CaturCin. iii(1). 575. 6; रात्रौ सुप्तश्च पार्श्वे यत्तस्य तेन सहात्ययः PrabhāC. 11. 8; एवं रतिसंमर्दे … । असमीक्ष्यात्ययमेतौ जायेते चण्डवेगौ द्वौ KandaCū. ii. 7. 31; NirṇaSi. 32. 24; BālamBha. i. 378. 24 (*on* 1. 121); (आपद्) AmaK. 2635; (कृच्छ्र) AmaK. 2635; AnekāSa. 248; ParyāRaMā. 1625; AgniP. 361. 32; AbhidhāRaMā. 5. 40; Vaija. 239. 1; AnekāSaṁ. 3. 468; S'abdaBhePra.(Ma.) 4. 18; DharK. 1885; AnekāK. 650; NānārthSaṁ. 4. 34; NānārthāSaṁ ii. 11. 2; MediK. 125. 67; AnekaTi. 3. 9; NānārthaMa. 1328; ParaNā. 2633; VisvaLoK. 264. 69; S'abdaRaSaK. 241. 13; Kośāva. 37. 6; **1 D** absence, non-existence यथोक्तदोषदुष्टत्वान्नात्ययो बोधतोऽन्यतः BṛĀraUBhVā. iii. 3. 132; शुद्धबोधात्मकत्वेऽपि येषां नोत्तमकर्तृता । निर्मिताः स्वात्मनो भिन्नाः भर्त्रा ते कर्तृतात्ययात् ĪśvaPraSū. iii. 2. 6 (PratyabhiVi. कर्तृताया उत्तमस्वातन्त्र्यलक्षणाया अत्ययात् अभावात्); अर्थे हि सति साकारं निराकारं तदत्यये । … ज्ञानम् NyāyMañ. i. 15. 17; मुक्तौ स्वापे मलोत्सर्गे यः संबाधसमाकुलः । निःशङ्कस्यात्ययात्तस्य के के न स्युर्मेहामयाः YaśasCam. i. 511. 2 (comm. निःशङ्कस्यात्ययात् निःशङ्कत्वाभावात्); **1 E** suffering, injury, harm प्रागेवैनमत्ययभयादिति CaraS. i. 12. 10 (1922 Ed.); संरक्षणार्थं जन्तूनां रात्रावहनि वा सदा । शरीरस्यात्यये चैव समीक्ष्य वसुधां चरेत् ManuSm. 6. 68 (ManvVi. अत्यये पीडायाम्); आमच्छेदेऽत्ययो ह्यत्र कुवेधाद्वोपजायते KāśyaS. 15A. 36; 129A. 11; तत्र योऽभ्युषिते पाने त्वजीर्णे पिबते नरः । तत् पानमत्ययं याति तस्मात्पानात्ययो मतः KāśyaS. 135B. 42; अत्ययं चातिदारुणम् AṣṭāHṛ vi. 2. 23 (comm. अत्ययं विनाशहेतुः); अन्नपानविधानेन मुञ्जीतान्नं विनात्ययात् AṣṭāSaṁ. i. 11. 8 (1. 3); i. 152. 23 (1. 28); ii. 179. 4 (6. 2); विरहातुरस्य मम पत्युरत्ययं मणिरत्न यत्नपरमो निवारय RāmC. 20. 42; न ममात्ययः क्वचिदपीह कश्चन RāmC. 29. 67; अनिर्हृतो दोषः … महात्ययम् । विषमं वा ज्वरं कुर्यात् SiddhYo. 1. 67; ViṣṇuDhaP. ii. 131. 35; **2 A** going beyond, crossing over, overstepping क्षुरस्य धारा निशिता दुरत्यया KāṭhU. 3. 14 (comm. दुःखेन अत्ययो यस्याः सा दुरत्यया); GītāBh.(S'aṅ.) 220. 15 (*on* 7. 14); अत्ययो वाथ सम्प्राप्तिः संक्रान्तिः स्यात्परात्मनः TaiUBhāVā. 108. 12(2); न चेद्भुक्तं फलं तस्य तदभावेऽपि चात्ययः BṛĀraUBhVā. i. 5. 248; **2 B** overcoming बुद्धिश्च ते महाप्राज्ञ देवैरपि दुरन्वया (v. l. सर्वलोके दुरत्यया) Rāmā. iii. 62. 18; **3 A** transgression, offence, crime क्षेत्रिकस्यात्यये दण्डयो भागाद्दशगुणो भवेत् ManuSm. 8. 243 (ManuBh. अत्ययोऽतिक्रमोऽपराधः); खरं ते वावकर्म निश्चारितम् । अत्ययमत्ययतो देशय Divyāva. 3. 14 = S'ikṣāSa. 58. 16; अत्ययं वयं भगवन् देशयामः SaddhaPuṇ. 134. 19; तस्य मम भगवन्नत्ययं जानतोऽत्ययं पश्यतोऽन्यत्ययमत्ययतः प्रतिगृह्णीष्वानुकम्पामुपादाय GiMs. iii(1). 43. 3–5; अत्ययमत्ययत्वेन प्रतिगृह्णन्तु नायकाः BodhiCa. 2. 66; अति यतति अनेन नरकादिषु इत्यत्ययः, अशुभकर्म । तमत्ययत्वेन दोषत्वेन प्रतिगृह्णन्तु BodhiCaPañ. 36. 16; (अतिक्रम) AmaK. 2635; AbhidhāRaMā. 5. 40; AgniP. 361. 32; Vaija. 239. 1; AnekāSaṁ. 3. 468; S'abdaBhePra.(Ma.) 4. 18; DharK. 1885; AnekāK. 650; NānārthāSaṁ. ii. 11. 2; MediK. 125. 67; AnekāTi. 3. 9; NānārthaMa. 1328; S'abdaRa. (Vā.) 4072; ParaNā. 2633; VisvaLoK. 264. 69; KośaKaTa. 2. 7405; KalpaK. 130. 374; S'abdaRaSaK. 241. 13; (दोष) AmaK. 2635; AnekāSa. 248; ParyāRaMā. 1625; AnekāMañ. 115; Vaija. 239. 1; AnekāSaṁ. 3. 468; S'abdaBhePra.(Ma.) 4. 18; DharK. 1885; AnekaK. 650; NānārthSaṁ. 4. 34; NānārthāSaṁ. ii. 11. 2; MediK. 125. 67; AnekāTi. 3. 9; NānārthaMa. 1328; ParaNā. 2633; VisvaLoK. 264. 69; KośaKaTa. 2. 7405; S'abdaRaSaK. 241. 13; Kośāva. 37. 6; **3 B** punishment, fine शुल्कस्थानं परिहरन्नकाले क्रयविक्रयी । मिथ्यावादी च संस्थाने दाप्योऽष्टगुणमत्ययम् ManuSm. 8. 400; मूलं भागो व्याजी परिघः क्लृप्तं रूपिकमत्ययश्चायमुखम् ArthS'ā. i. 137. 7 (2. 6); i. 161. 2 (2. 9); i. 204. 2 (2. 12); i. 246. 2 (2. 17); i. 261. 7 (2. 19); i. 270. 5 (2. 21); i. 296. 8 (2. 25); ii. 251. 10 (7. 3); iii. 146. 8 (11. 1); अत्ययोऽतिक्रमनिमित्तो दण्डः Aparā. 834. 15 (*on* 2. 262); अत्ययं राज्ञोपचितं शुल्कम् ManvaVi. 1106. 7 (*on* 8. 400); DīpKa. 10. 15 (*on* 1. 66); (दण्ड) AmaK. 2635; AnekāSa. 248; ParyRaMā. 1625; AnekāMañ. 115; Vaija. 239. 1; AnekāSaṁ. 3. 468; S'abdaBhePra.(Ma.) 4. 18; DharK. 1885; AnekāK. 650; NānārthāSaṁ. ii. 11. 2; NānārthSaṁ. 4. 34; MediK. 125. 67; AnekāTi. 3. 9; NānārthaMa. 1325; ParaNā. 2633; VisvaLoK. 264. 69; KośaKaTa. 2. 7405; S'abdaRaSaK. 241. 13; **4 A** lapse (of time), missing or passing over (stipulated time) कालात्ययेन प्रायश्चित्तशेषकथनम् ĀśvaS'S. I. iii. 12. 19; प्रातराहुतिं चैके सायमाहुतिकालेऽत्ययान्मन्यन्ते S'āṅkhāGS. i. 3. 8; संनिधातृसमाहर्तॄः संनिधाता कृतविदूषणात्ययाभ्यां पीडयति ArthS'ā. iii. 29. 8 (8. 4); सायंहोमात्यये प्रातर्हुत्वा तां सायमाहुतिम् GobhiSm. 2. 137; 2. 138; 2. 150; 3. 2; 3. 121; ViraMi. (Saṁskāra.) 898. 10; आपद्युन्मार्गगमने कार्यकालात्ययेषु च । अपृष्टोऽपि हितान्वेषी ब्रूयात्कल्याणभाषितम् NītiSā. 5. 28; गन्धपुष्पधूपतैलेज्यादिक्रियोपवर्तनार्थं तथा कालात्ययात्खण्डस्फुटितसंस्कारार्थं च विहारस्य प्रतिपादितस्त[? स्य] … संघस्य … न परिपन्थना कार्या EI. xxii. 75. 52; **4 B** emergency, urgent matter न … कर्म विदध्यादन्यत्रात्ययात् KāśyaS. 160A. 8; अत्ययः कालप्रतीक्षणासमर्थं कार्यम् BālaKrī. i. 206. 21 (*on* 2. 12); (आत्ययिके कार्ये) अत्ययोऽतिक्रमणं शीघ्रसंपादनं प्रयोजनमस्य AbhinBhā. ii. 139. 19 (*on* 12. 38); cf. **आत्ययिक**; **5** going to various directions, of various types बहव इमेऽस्मिन् पुरुषे कामा नानात्ययाः ChāndoU. iv. 10. 3 (comm नाना अत्ययः अतिगमनं येषां व्याधीनाम् … ते नानात्ययाः); यथा सोम्य…मधुकृतः … नानात्ययानां

वृक्षाणां रसान् समवहारमेकतां रसं गमयन्ति ChāndoU. vi. 9.1 (comm. नानात्ययानां नानागतीनां नानादिक्कालानाम्); NānārthāSaṁ. ii. 11.3 [attack, assault PW, MW, Apte; surpassing Gold; portent (उत्पात) KośaKaTa. 2.7405; Kośas give अत्यय as one of the meanings of *gṛhya* (*n.*) DharK. 1934; *upa* AnekāSaṁ. 7.35; VisvaPra. 189.37; KośaKaTa. 2.3194]

अत्ययकर्मन् (atyaya-karman) *n.* obsequial rite अत्ययकर्मणि ··· दानं प्रशस्तम् ··· निशि ParāSm. 12.26.

अत्ययका (atyayakā) *f.* name of a river सङ्कुणात्ययकाप्तत: (? अत्ययका तथा) ··· एता: ··· नद्यस्त्वाम् ··· अभिषिञ्चन्तु ViṣṇuDhaP. ii. 22.176.

अत्ययकारण (atyaya-kāraṇa) *n.* cause of destruction ज्ञायते नित्यगस्येव कालस्यात्ययकारणम् CaraS. i. 16.32.

अत्ययत् (aty-ayat) *adj.* surpassing, excelling जयति भुवि वीरश्रीनृसिंहक्षितीन्द्र: । नृगनहुषययातीनत्ययन् EI. xiv. 239.62.

अत्ययत्व (atyaya-tva) *n.* the state of being a sin or evil अत्ययमत्ययत्वेन प्रतिगृह्णन्तु नायका: BodhiCa. 2.66.

अत्ययदेशना (atyaya-deśanā) *f.* confession of sin or guilt स राजा ··· अस्य पादयोर्न्यपतत्तदत्ययदेशनां च चक्रे JātaMā. 127.13 (21.35); अधुना यथाप्रधानमत्ययदेशनामाह BodhiCaPañ. 29.22 (*on* 2.30)

अत्ययद्वार (atyaya-dvāra) *n.* [Inst.] through destruction मोहकलिलात्ययद्वारेण लब्धात्मविवेकप्रज्ञ: GītāBh.(S'aṅ.) 58.9 (*on* 2.53)

अत्ययन (aty-ayana) *n.* passing beyond, crossing तयोर्वा (समुद्रयो:) एतयोरत्ययनमस्ति JaimiBr. 1.5.

अत्ययभय (atyaya-bhaya) *n.* fear of harm प्रागेवैनमत्ययभयादिति CaraS. i. 12.10 (1922 Ed.)

अत्ययभाज् (atyaya-bhāj) *adj.* which is delayed or has crossed (the proper time) उपेक्षमाणाद्वात्ययभाजि कार्ये पुंस: प्रयासो विफल: समस्त: YaśasCam. ii. 154.3.

अत्ययभेद (atyaya-bheda) *m.* difference in guilt or sin आश्रयपरिवृत्तेस्त्रिविधतथतापरिवृत्तिर्वस्तु तदत्ययभेदात् MaYānaSū. 190.11 (App.)

अत्ययभ्रान्ति (atyaya-bhrānti) *f.* false notion of death तस्मिंस्तु मायापिहितस्वरूपे (मकराक्षे) मन्येऽत्ययभ्रान्तिरमीभिरापे RāmC. (App. 2) 33.6.

अत्ययवर्जित (atyaya-varjita) *adj.* free from harm कल्कप्रयोगेऽल्पगुणं तथा चात्ययवर्जितम् । क्रियावसाने दातव्यं शालिषष्टिकपायसम् AśvaVai. 66.16.

अत्ययवादिन् (atyaya-vādin) *adj.* speaking about death तमित: ··· नरा इहानयन्तु वचनान्नृपस्यात्ययवादिन: Rāmā. ii. 1577*(2)

अत्ययवेदिन् (atyayaved-in) *adj.* aware of death तमित: ··· नरा इहानयन्तु वचनान्नृपस्यात्ययवादिन: (v. l. नृपस्यात्ययवेदिन:) Rāmā. ii. 1577*(2)

अत्ययशङ्किन् (atyayaśaṅk-in) *adj.* apprehensive of death अत्ययशङ्किभिरितरैरपत्यै: सह विचित्य ··· विषीदन्त्या: कुन्त्या: ··· प्रभञ्जनभू: ··· दृशौ रञ्जयामास BhārCam. 2.5 (2)

अत्ययशस्कर (aty-ayaśaskara) *adj.* causing great infamy परस्त्रीसेवनं शक्र इहैवात्ययशस्करम् BrahmVaiP. iv. 61.41.

अत्ययस्थान (atyaya-sthāna) *n.* occasion for penalty or fine स्थानस्याशुद्धि: ··· अतीर्थेऽवतारणं तरुषण्ड इत्यत्ययस्थानानि ArthS'ā. i. 336.2 (2.32)

अत्ययाभाव (atyayābhāva) *m.* absence of danger अनत्ययमत्ययाभावात् (परीक्षेत) JayaMa. 255.12 (*on* 5.1)

अत्ययावह (atyayāvaha) *adj.* causing danger or suffering तत्रैकस्य ज्ञानपरिष्कृतत्वाद्रतिजनन एवोत्पद्यन्ते अन्यस्य ज्ञानवैकल्यादत्ययावहा अपीति JayaMa. 155.12 (*on* 2.7)

अत्ययावेदिन् (atyayāvedin) *adj.* indicating danger मरुतोऽपि ··· मारुतेरत्ययावेदि तद्वाक्यमुपतुष्टुवु: RāmC. 21.92.

अत्ययिक (atyayika) *n.* very important or urgent matter, pressing affair साहसेऽत्ययिके सदा । न कालनियमस्तत्र S'ukraNī. 4(5).54.

अत्ययिन् (atyay-in) *adj.* going astray or surpassing, exceeding अत्ययी KāśiVṛ. *on* P. iii. 2.157 = SiddhāKau. 513A.16 = Prasā. ii. 591.15; इत्येतेभ्य इन् भवति । ··· अत्ययी JaineVyā. 116.20 (*on* ii. 2.140); अत्ययी मदनेनेव वीचिबाहुर्जलाशय: । आलिङ्गत्यव्यथी नारी: Rāvaṇā. 11.36.

अत्ययीभाव (atyayībhāva) *m.* state of being dead यथा हि कृष्णेन बलं धार्यं वै फाल्गुने हते । तथा कर्णात्ययीभावे त्वया धार्यं महद्बलम् MahāBhā. viii. App. 5(47)

अत्ययुक्त (aty-ayukta) *adj.* very much improper, disagreeable, not at all standing to reason इति मतद्वयमपीदमत्ययुक्तम् VīraMi. (Vyavahāra.) 163.7.

अत्ययोदति (aty-ayodati) *adj.* who surpasses (in cruelty) a demoness with iron-teeth अत्ययोदति: ··· यमकिङ्करो यथा प्राणिभिन्मयि नृपेऽपि ही जन: DvyāśraKā. 20.16.

अत्यराति (atyarāti) *m.* name of a Brāhmaṇa (son of Janantapa) वासिष्ठ: सातहव्योऽरातये जानंतपये प्रोवाच तस्माद्धत्यरातिर्जानंतपिरराजा सन् AitBr. 39.9 (954); अत्यरातिर्ब्राह्मण: VīraMi. (Rājanīti.) 107.5.

अत्यराल (atyarāla) *m.* **i** elephant beyond the stage of rutting सप्तारत्निना तुल्यभोजनोऽष्टारत्निरत्यराल: ArthS'ā. i. 331.8 (2.31); **ii** a kind of elephant, the measurement of whose body exceeds the usual measurement by two *aratnis* अरत्निमात्रेणाधिक्यादराल: परिकीर्तित: । अत्यरालो द्वयाधिक्यात् Mānaso. ii. 3.223.

अत्यराला (atyarālā) *f.* female elephant of the same status as of Arāla अत्यराला भवेद्धेनुररालस्य प्रमाणत: Hastyāyur. 561.2 (4.3)

अत्यरिभवन (atyari-bhavana) *n.* (Astrol.) mansion of an extremely opposed planet अत्यरिभवनं प्राप्तै: पञ्चादिभिरस्तगैश्च गगनचरै: । नाशं प्रयाति राजा Sārā. 38.21.

अत्यरिष्ट (aty-ariṣṭa) *adj.* most inauspicious निमित्तान्यत्यरिष्टानि काले त्वनुगते नृणाम् BhāgP. i. 14.5.

अत्यरुण (aty-aruṇa) *adj.* of deep-red complexion पाशाङ्कुशाढ्योऽत्यरुणस्तु ध्येय: ··· गणेश: ĪśānS'iPa. i. 16.84.

अत्यरुणेक्षण (atyaruṇekṣaṇa) *adj.* with extremely red eyes सख्य: पश्यत कृष्णस्य मुखमत्यरुणेक्षणम् ViṣṇuP. v. 20.54; तामन्वधावत्तद्वैन्य: कुपितोऽत्यरुणेक्षण: BhāgP. iv. 17.15.

अत्यरुन्धति (aty-arundhati) *adj.* (*n.*) surpassing Arundhati अत्यरुन्धति च स्त्रैणमापाणिग्रहणात्तव । रामो जानकि जानाति RāmC. (App. 1) 40.40.

अत्यर्क (aty-arka) *adj.* **1** surpassing the Sun अत्यर्कमत्यग्नि च ते तेजो व्योम्न्यतितारकम् SkandP. iv. 16.120; **2** the white *Colotropis gigantea* राजार्को वसुकोऽत्यर्क: DhanvNi. 137.8; AbhidhāMañ. 92.13; ṢaḍrasaNi. 21.11; KalpaK. 274.233.

अत्यर्कवाजिन् (aty-arkavājin) *adj.* superior to the horses of the Sun केचिद् (तस्मै) विश्राणयामासुर्वाजिनोऽत्यर्कवाजिन: TriṣaS'aPuC. i. 4.278.

अत्यर्कानलदीप्त (aty-arkānaladīpta) *adj.* brighter than the sun and fire अत्यर्कानलदीप्तं तत्स्थानं विष्णोर्महात्मन: MahāBhā. iii. 160.19.

अत्यर्केन्दुकुलप्रशस्ति (atyarkendukula-praśasti) *adj.* possessing fame surpassing that of the solar and lunar dynasties पद्मभू: । अत्यर्केन्दुकुलप्रशस्तिमसृजद्यं काकतीयान्वयम् PratāYaBhū. 12.10.

अत्यर्घ (aty-argha) *m.* very high price or value वज्रमणिमुक्ताप्रवालहेमरूप्यधातुर्हि प्रभूतमल्पसारमत्यर्घेण ग्रसते इत्याचार्या: ArthS'ā. ii. 316.2 (7.12); *adj.* very precious, of very high value असावत्यर्घो न: सुकृतमुपचेतुं सुमहत् NīlaVi. 62.15.

अत्यर्घासन (aty-arghāsana) *n.* most precious seat अनर्होऽपि च सर्वेभ्यस्त्वत्यर्घासनमिच्छति S'ukraNī. 3.93.

अत्यर्घित (aty-arghita) *adj.* valued greatly अत्यर्घितबलात्कारमतिसंस्तुतसाहसम् (रावणास्थानम्) RāmC. 21.13.

अत्यर्ज् (aty-arj-) I. A. (P.) **i** to lead to, to let pass or through स्वस्ति हैनमत्यर्जन्ति स्वर्गं लोकमभि य एवं वेद AitBr. 2.4(45); अथैनमुत्क्रान्तमत्यर्जन्त AitBr. 6.8 (176); अति नोऽर्जस्याकाशं न: कुर्विति AitBr. 14.4 (404); अति ह वा एवमर्जते स्वर्गं लोकमभि य एवं वेद AitBr. 14.4 (407); 6.8 (177); **ii** to admit तथेति तं तुरीयेऽन्यार्जत AitBr. 9.1 (238); (caus.) to bring across, to convey across, to let pass तं हात्यर्जयन्ते JaimiBr. 1.18; 1.50; 1.210; तद्यथा द्वारफलके प्रतिनिहिते स्यातामेवमेवैतेऽहोरात्रे प्रतिनिहिते अनत्ययनाय । ते उ ह त्वैवंविदमेवात्यर्जयत: JaimiBr. 3.344.

अत्यर्जुन (aty-arjuna) *adj.* which surpasses (the valour of) Arjuna सेहे सोऽपि न सौप्तिकं विनिपतद्द्रौणेस्तदत्यर्जुनम् PārthaPa. 8.

अत्यर्जुनम् (aty-arjunam) *adv.* in the manner surpassing Arjuna अत्यर्जुनं धनुर्विद्यावेदिनामपि विद्विषाम् । कोदण्डस्थं करस्थं च गुणं चिच्छेद पार्थिव: HammīMaKā. 13.217.

अत्यर्ति (aty-arti) *f.* severe pain महाशयात्यर्तिसतोदनान्विता स जालिनी KalyāKā. 11.14.

अत्यर्थ (aty-artha) *adj.* exeessive, very great, abundant, exhorbitant अत्यर्थं हिमं निपतति ṢaḍviBr. v(vi). 9.2; लेभे स करमत्यन्तं (v. l. अत्यर्थं) गन्धर्वनगरात्तदा MahāBhā. ii. 25.6; v. 125.6; xv. 4.15; यदि ते दु:खमत्यर्थम् ViṣṇuP. i. 11.23; i. 13.73; i. 17.51; तदिदं दु:खमत्यर्थमनिवार्यं मनोगतम् BrahmāṇḍP. ii. 51.18; अहोऽत्यर्थेऽप्यर्थे, श्रुतिशतगुरुभ्यामवगते ··· मन: VijñāS'. 26; अत्यर्थैर्विनोदैर्वितथविहसितैर्गोपयाञ्चक्रिरे ता: (अरतय: रावणेन)

RāmC. (App. 2) 39. 96; हरिम् । देवाः सत्रैर्महद्भिः ··· तोषयामासुरत्यर्थम् VarāP. 10. 3; AdhyāRā. vii. 7. 41; रहस्यमिदमत्यर्थं न श्राव्यं पापकर्मणाम् VṛGautaSm. 629. 12 (20); तत्र च व्यवहारेण सोऽर्थमत्यर्थमार्जयत् PariPar. 2. 277; S'rīKaC. 1. 13; अत्यर्थं शपथं कृत्वा वृत्रः शक्रेण सूदितः Pañca. 131. 32; विदूरमणिः । वैदूर्यम् । पक्षे विशेषेण दूरमत्यर्थं मणिः KāvyKaVṛ. 72. 14 (3. 3); 72. 10 (3. 3); 74. 23 (3. 3); सामकः कायिको दोषः प्रायोऽत्यर्थस्तु वाचिकः PārśvC. 6. 361; SūktiRa. 187. 6; तद्दूरं प्रिययात्यर्थमसतां हतया तया । दैत्येषु निहितम् HariC.(Pa.) 58; यदा तु भोज्यते नागो विषमं परिचारकैः । रूक्षमत्यर्थमशनं यवसं वाप्ययोगतः ··· विषमाग्निः प्रजायते Hastyāyur. 82. 17 (1. 12); MātaLī. 8. 18; अतिवेलभृशात्यर्थातिमात्रोद्गाढनिर्भरम् । क्लीबे शीघ्राद्यसत्त्वे स्यात् त्रिष्वेषां सत्त्वगामि यत् AmaK. 132; AnekāSa. 675; Vaija. 211. 131; अत्यर्थक्षौमयोरट्टः TrikāS'e. iii. 3. 91 (comm. अत्यर्थः अतिशयः); iii. 3. 465; AbhidhāCin. 1505; तीव्रं कटूष्णात्यर्थेषु AnekāSam. 2. 418; 3. 341; सुष्ठु प्रशंसनेऽपि स्यादत्यर्थेऽपि च कथ्यते VisvaPra. 186. 13; 37. 14; 190. 53; अट्टमत्यर्थगेहयोः DharK. 477; AnekāK. 163; अट्टं भक्ते च शुष्के ना क्षौमेऽत्यर्थे गृहान्तरे MediK. 35. 1; 196. 23; अत्यर्थेऽति हि भोः पदम् NāṭaLaRaK. 2242; अट्टं भित्तिचतुष्के स्यात् क्षा(? क्षौ)मेऽत्यर्थे गृहान्तरे NānārthaMa. 441; ParaNā. 1604; उत प्रश्ने वितर्केऽर्थेऽप्युतात्यर्थविकल्पयोः VisvaLoK. 409. 22; 408. 16; 416. 58; S'abdaRaSaK. 83. 4; [Loc.] extremely, excessively अल्पोऽपि वर्धतेऽत्यर्थे SūktiRa. 156. 57; [Inst.] extremely, excessively अत्यर्थेन जगन्नाथ भूयो भूयः प्रशंससि । भोगेभ्यो धूपदानं च PauṣkS. 34. 13; *n.* one of the defects of shampooing (संवाहनकलायाः) दोषास्तस्याः ··· आदेशाहतमत्यर्थमवसुप्तप्रतीपकम् PadmP.(Ra.) 24. 78; *m.* meaning of *ati* न च तस्यात्यर्थं प्रत्युपसर्जनत्वे कथं स्त्रीप्रत्ययान्तत्वम् LaS'abdeS'e. i. 530. 13.

अत्यर्थकठिन (atyartha-kaṭhina) *adj.* very hard हस्तिदन्तम् ··· अत्यर्थकठिने चापि शोथे पाचनभेदनम् SiddhYo. 44. 19.

अत्यर्थकदर्थित (atyartha-kadarthita) *adj.* very much troubled नीतः शान्तिम् ··· येनात्यर्थकदर्थितार्थिनिवहो दारिद्र(? द्रय)दावानलः CaturCin. ii(2). 1003. 3.

अत्यर्थकदर्थ्यमान (atyartha-kadarthyamāna) *adj.* being greatly troubled पश्य ··· अत्यर्थकदर्थ्यमानशङ्खिनीयूथम् ··· उदन्वन्तम् BālRā. 7. 28 (2)

अत्यर्थकर्मन् (atyartha-karman) *n.* too much work (गजः) अत्यर्थकर्मणातिव्यायामात् ··· अवसीदति Hastyāyur. 250. 27 (2. 44)

अत्यर्थकलि (atyartha-kali) *m.* great quarrel क्षितिपात्मजानां तदर्थमत्यर्थकलिर्बभूव ViṣṇuP. iv. 2. 93.

अत्यर्थकान्त (atyartha-kānta) *adj.* extremely lovely रूपं च ते दिव्यमत्यन्तकान्तम् (v. l. अत्यर्थकान्तम्) MahāBhā. iii. 184. 18; रूपाण्यत्यर्थकाम्यानि (v. l. अत्यर्थकान्तानि) द्विरदाश्वनृपाणाम् ···प्रापुर्दुर्दर्शताम् MahāBhā. viii. 16. 38.

अत्यर्थकाम्य (atyartha-kāmya) *adj.* very covetable, very desirable रूपाण्यत्यर्थकाम्यानि द्विरदाश्वनृणाम् ···प्रापुर्दुर्दर्शताम् MahāBhā. viii. 16. 38.

अत्यर्थकारिन् (atyarthakār-in) *adj.* overdoing (इतश्च देहः सस्नेहं मनोराजं महौजसम् ।··· अवदत्) मा ज्ञासीः ··· नैवाहारकमेव माम् । जानीह्यौदरिकं मात्राधिकमत्यर्थकारिणम् S'āliC. 5. 43.

अत्यर्थक्रुद्ध (atyartha-kruddha) *adj.* very angry [APTE]

अत्यर्थगाढ (atyartha-gāḍha) *adj.* very important कार्येणात्यर्थगाढेन बाह्लीकेषूषितं मया MahāBhā. viii. 30. 13.

अत्यर्थगुरु (atyartha-guru) *adj.* very heavy for digestion (कायाग्निर्मन्दः) सोऽन्नैरत्यर्थगुरुभिरुपयुक्तैः प्रशाम्यति SuśruS. iv. 39. 4.

अत्यर्थघोर (atyartha-ghora) *adj.* very ferocious, extremely terrible यानि चात्यर्थघोराणि तै रक्षांस्यान् MārkP. 84. 25.

अत्यर्थचपल (atyartha-capala) *adj.* very fast अत्यर्थचपलोत्तुङ्गतरङ्गशतमालिनम् ।··· जलधिं पश्यन्मुनिगणैः सह ··· विशश्रमे BrahmāṇḍP. ii. 57. 31.

अत्यर्थचिराय (atyartha-cirāya) *adv.* [Dat.] for a very long time समधत्त कर्णः ··· रौद्रं शरम् ··· पार्थार्थमत्यर्थचिराय गुप्तम् MahāBhā. viii. 66. 5.

अत्यर्थजातविस्रम्भ (atyartha-jātavisrambha) *adj.* in whom a good deal of confidence has arisen, greatly confident (दूरगतभावोऽपि हि कन्यासु न निर्वेदेन सिध्यतीति घोटकमुखः ।) दूरेति अत्यर्थजातविस्रम्भोऽपि न सिध्यति JayaMa. 220. 17 (*on* 3. 4)

अत्यर्थजुगुप्सा (atyartha-jugupsā) *f.* great dislike नातिहृष्टेन मनसा न चात्यर्थजुगुप्सया । मध्यस्थेनैव भावेन मध्यस्थमभिनिर्दिशेत् NāṭyaS'ā. 22. 92.

अत्यर्थतपःप्रयुक्त (atyarthatapaḥ-prayukta) *adj.* produced by great penance अथात्र नारायणगीतमाहुर्महर्षयस्तात महानुभावाः । महार्थमत्यर्थतपःप्रयुक्तं तदुच्यमानं हि मया निबोध MahāBhā. xiii. 61. 13.

अत्यर्थतर्पित (atyartha-tarpita) *adj.* excessively treated with oily substances गुर्वाविलमतिस्निग्धम् ···। ज्ञेयं दोषसमुत्क्लिष्टं नेत्रमत्यर्थतर्पितम् SuśruS. vi. 18. 14.

अत्यर्थतस् (atyartha-tas) *adv.* thoroughly, completely, excessively स्रष्टुः सर्गमहो तनोति मदनो व्यस्तार्थमत्यर्थतः PadyaVe. 474.

अत्यर्थताप (atyartha-tāpa) *m.* 1 great affliction अलमत्यर्थतापेन भर्त्रा त्वमपि रंस्यसे ViṣṇuP. v. 32. 12; 2 too much heat (उपारूढो मध्याह्नः) सौधान्यत्यर्थतापाद् वलभिपरिचयद्वेषिपारावतानि Mālavikā. 2. 12.

अत्यर्थतीक्ष्ण (atyartha-tīkṣṇa) *adj.* very sharp, very strong अत्यर्थतीक्ष्णोष्णरूक्षाः ··· आदित्यपवनाः सौम्यान् क्षपयन्ति गुणान् AṣṭāHṛ. i. 3. 3; (मद्यम्) पेयम् ··· नात्यर्थतीक्ष्णमृद्वल्पसंभारं कलुषं न च AṣṭāHṛ. i. 5. 66.

अत्यर्थतृषित (atyartha-tṛṣita) *adj.* very thirsty [APTE]

अत्यर्थदर्शनद्वेष (atyartha-darśanadveṣa) *m.* excessive hatred against the religion or doctrine अत्यर्थदर्शनद्वेषात् ··· सः ··· तमवधीच्छरैः RājTa.(Jo.) 1127.

अत्यर्थदान (atyartha-dāna) *n.* extraordinary gift अत्यर्थदानप्रथमप्रयोगं पुपोष पुष्पायुधबोधिसत्त्वः S'rīKaC. 1. 13.

अत्यर्थदीपन (atyartha-dīpana) *adj.* stimulating (the digestive fire) a good deal रम्भाफलं नात्यर्थदीपनम् BhojanKu. 88. 13.

अत्यर्थदीप्त (atyartha-dīpta) *adj.* burning fiercely नात्यर्थदीप्तेन हुताशनेन नात्यन्तमन्देन च साध्यमन्नम् ViṣṇuDhaP. ii. 63. 13.

अत्यर्थदुःखिता (atyartha-duḥkhitā) *adj.* (*f.*) very much grieved परित्यज्य मकामत्यर्थदुःखिताम् । यातोऽसि कतमामाशाम् PadmP.(Ra.) 81. 9.

अत्यर्थदुर्गन्ध (atyartha-durgandha) *adj.* very foul-smelling द्रवत्यत्यर्थदुर्गन्धं पुरीषम् ··· गजः Hastyāyur. 283. 11 (2. 56)

अत्यर्थदुर्दिन (atyartha-durdina) *adj.* very cloudy, very rainy अश्वानाम् ··· अत्यर्थदुर्दिने काले स्नानमेकं प्रशस्यते ViṣṇuDhaP. ii. 46. 45.

अत्यर्थदुष्ट (atyartha-duṣṭa) *adj.* much morbific, quite disordered अत्यर्थदुष्टास्तु दोषा दुष्टामबद्धखाः ।··· तनुं सर्वां दण्डवत्स्तम्भयन्ति AṣṭāHṛ. i. 8. 12.

अत्यर्थदुष्प्राप्य (atyartha-duṣprāpya) *adj.* very difficult to obtain एतत्तस्य परं कार्यम् ···। कर्तुमत्यर्थदुष्प्राप्यमीश्वरैः किमुतेतरैः MārkP. 23. 23.

अत्यर्थदूरजात (atyarthadūra-jāta) *adj.* growing very far away क्षोभितः स महाह्रदः । अत्यर्थदूरजातांश्च तांश्चासिञ्चन् महीरुहान् BrahmP. 185. 12.

अत्यर्थधर्मयुक्ता (atyartha-dharmayuktā) *adj.* (*f.*) very meritorious अलमन्याभिस्तेषां कथाभिरत्यर्थधर्मयुक्ताभिः । येषां न क्षणमपि रुचितो हरचरणस्मरणविच्छेदः MahāBhā. xiii. 109*(5)

अत्यर्थनक्तस्नान (atyarthanakta-snāna) *n.* bathing very late in the night अत्यर्थनक्तस्नानेषु ग्रहा गृह्णन्ति मानवान् ViṣṇuDhaP. i. 231. 10.

अत्यर्थनिषिद्ध (atyartha-niṣiddha) *adj.* strictly prohibited ज्ञानिनोऽत्यर्थनिषिद्धनिरोधवासनाबलादेव बुद्धिपूर्वनिषिद्धनिवृत्तिरिति चेन्न S'atDū. 233. 20.

अत्यर्थनिष्ठुर (atyartha-niṣṭhura) *adj.* very harsh अत्यर्थनिष्ठुरं वाक्यं प्रत्यक्षं वज्रमुच्यते SāhiSā. 1. 81.

अत्यर्थनिस्त्रिंश (atyartha-nistriṁśa) *adj.* extremely cruel पीडितोऽत्यर्थनिस्त्रिंशैस्तोत्रहस्तैर्नरैः ··· प्राणांस्त्यजति कुञ्जरः Hastyāyur. 197. 27 (2. 13)

अत्यर्थनेत्रप्रस्राव (atyartha-netraprasrāva) *m.* excessive discharge from the eyes मूर्छा चास्य भवति तृष्णा चात्यर्थनेत्रप्रस्रावः Hastyāyur. 97. 25 (1. 14)

अत्यर्थपक्व (atyartha-pakva) *adj.* too much baked or over-cooked विरुद्धं पाकतश्चापि ···। अपक्वतण्डुलात्यर्थपक्वदग्धं च यद्भवेत् CaraS. i. 26. 101 (1922 Ed.); तासामत्यर्थपक्वानां भङ्गो भवति रूपके ViṣṇuDhaP. iii. 91. 7.

अत्यर्थपरिश्लथाङ्गी (atyarthapariślathāṅgī) *adj.* (*f.*) whose body is extremely weak, feeble or tired अत्यर्थपरिश्लथाङ्गीमार्तामिव लक्षयित्वा ··· आत्मानमपि तया समानार्थमापादयम् DaśKuC. 74. 12.

अत्यर्थपरीतगात्र (atyarthaparīta-gātra) *adj.* whose limbs are totally affected (by poison) तत् सप्तमेऽत्यर्थपरीतगात्रं व्यापादयेन्मर्त्यमतिप्रवृद्धम् SuśruS. v. 8. 82.

अत्यर्थपित्त (atyartha-pitta) *n.* excessive bilious humour अत्यर्थपित्ताभिपरीतदेहान् विरेचयेत्तानपि मन्दमन्दम् SiddhYo. 74. 27.

अत्यर्थपुष्कल (atyartha-puṣkala) *adj.* immensely vast, exceedingly abundant शाखाकेसरिचिह्नानां बलमत्यर्थपुष्कलम् ।··· समालोक्य PadmP.(Ra.) 60. 64.

अत्यर्थपूति (atyartha-pūti) *adj.* excessively stinking, putrid कृष्णीभूतं क्लिन्नमत्यर्थपूति शीर्णं मांसं यात्यजस्रं क्षताच्च SuśruS. v. 5. 57; RugVi. 69. 13.

अत्यर्थप्रचुर (atyartha-pracura) *adj.* very plentiful अत्यर्थप्रचुरद्रव्येषु

कूष्माण्डादिषु दोषश्रवणाभावे निवृत्तिर्न भवति SmṛtiCan. v. 222. 15.

अत्यर्थप्रसाद (atyartha-prasāda) *m.* great favour or boon न च ज्ञानं विनात्यर्थप्रसाद: BrahmSūBh.(Ma.) 2B. 10 (*on* i. 1. 1); TattvPrakā. 5B. 11 (*on* i. 1. 1); अत्यर्थप्रसादद्वारा मोक्षसाधनापरोक्षज्ञानोत्पादिका ब्रह्मजिज्ञासा कर्तव्या TattvPrakā. 5B. 12 (*on* i. 1. 1)

अत्यर्थप्रिय (atyartha-priya) *adj.* [*f.* -ā] extremely dear or favourite परमपुरुष: ··· अत्यर्थप्रियं ज्ञानिनं लब्ध्वा न कदाचिदावर्तयिष्यति S'rīBh. 776. 12 (*on* iv. 4. 22); साक्षात्काररूपा स्मृति: ··· अत्यर्थप्रिया यस्य स एव परेणात्मना वरणीयो भवति S'rīBh. 10. 18 (*on* i. 1. 1); अत्यर्थप्रियमिह मन्मना भवेति विधीयते GītāBh.(Rā.) 690. 1 (*on* 18. 65); मय्यतिमात्रप्रह्वीभावमत्यर्थप्रियं कुरु GītāBh.(Rā.) 690. 5 (*on* 18. 65); प्रणामादिरत्यर्थप्रियस्तप्राप्तिफल: VedāSaṁ. 73. 9; निवृत्तकल्मषस्यात्मनो भगवानत्यर्थप्रिय इति NītiMā. 74. 14.

अत्यर्थप्रियत्व (atyarthapriya-tva) *n.* the state of being very much dear, extreme fondness or attachment विद्या वेदितुर्वेद्यात्यर्थप्रियत्वेन स्वयमपि निरतिशयप्रिया सती S'rīBh. 722. 13 (*on* iv. 1. 13); स्मर्यमाणविषयस्यात्यर्थप्रियत्वेन ··· स्मृतिसंतानमेवोपासनशब्दवाच्यम् GītāBh.(Rā.) 369. 1 (*on* 7. 1); स्वयमप्यत्यर्थप्रियत्वमापन्नम् ··· वेदनमपवर्गसाधनतया विधीयते NītiMā. 64. 24; अत्यर्थप्रियत्वे प्रमाणं दर्शयति S'rutaPra. ii. 653. 21 (*on* iv. 4. 22)

अत्यर्थप्रियरूप (atyarthapriya-rūpa) *adj.* of extremely dear or pleasing nature स्मर्यमाणविषयस्यात्यर्थप्रियत्वेन स्वयमप्यत्यर्थप्रियरूपं स्मृतिसंतानमेवोपासनशब्दवाच्यमिति हि निश्चीयते GītāBh.(Rā.) 369. 1 (*on* 7. 1)

अत्यर्थप्रियानुध्यान (atyarthapriyānudhyāna) *n.* uninterrupted meditation which is extremely dear अपि चात्यर्थप्रियानुध्यानरूपसम्यक्प्रीणने सति ब्रह्मस्वरूपं गृह्यते VedāntSā.(Rā.) 272. 4 (*on* iii. 2. 23)

अत्यर्थप्रियानुभव (atyarthapriyānubhava) *m.* extremely dear experience स्वस्वामिन्यत्यर्थप्रियानुभवरूपां परां भक्तिं लभते GītāBh.(Rā.) 686. 17 (*on* 18. 54)

अत्यर्थप्रीति (atyartha-prīti) *adj.* (*f.*) extremely dear or favourite धनयुक्तानामावली श्रेणि: ··· अमन्दस्नेहा अत्यर्थप्रीतिर्भवति PrabhāC. 90. 21.

अत्यर्थप्रीतिविरहित (atyartha-prītivirahita) *adj.* completely devoid of love or attachment अत्यर्थप्रीतिविरहितात् कर्मस्वरूपात् स्मृत्यभ्यासात् ··· तदापरोक्षज्ञानम् ··· विशिष्यते GītāBh.(Rā.) 564. 27 (*on* 12. 12)

अत्यर्थबन्धन (atyartha-bandhana) *n.* excessive binding or tying (मतङ्गज:) ग्रामेऽत्यर्थबन्धनात् ··· ग्राहेण वा स म्रियते Hastyāyur. 251. 1 (2. 44)

अत्यर्थबल (atyartha-bala) *adj.* excessively powerful अत्युच्छ्रितमत्यर्थबलम् ManvaVi. 839. 4 (*on* 7. 170); *n.* excessive strength (बिन्दवस्ते जनयन्ति) मदेन मदसंकाशमत्यर्थबलतेजसम् Hastyāyur. 697. 2 (4. 32)

अत्यर्थबृंहित (atyartha-bṛṁhita) *n.* excessive use of ' nourishing therapy ' स्थौल्यमति चात्यर्थबृंहिते CaraS. i. 22. 38 (1941 Ed.)

अत्यर्थभक्त (atyartha-bhakta) *adj.* extremely devoted to प्रह्लाद: सोऽसुरोत्तम: । अत्यर्थभक्तो देवेशं जगाम मनसा हरिम् VāmaP. 29. 8.

अत्यर्थभक्ति (atyartha-bhakti) *adj.* extreme devotion यो नित्यं परितो वृतो गणशतैरत्यर्थभक्त्युज्ज्वलै: RājTa.(S'rī.) 1(3). 120.

अत्यर्थभार (atyartha-bhāra) *m* exceedingly heavy load खरोष्ट्रहस्त्यश्वतराश्व ··· । अत्यर्थभारातिनिरोधखिन्ना: क्षुत्तृट्श्रमा: क्लेशवधं भजन्ते VarāṅgaC. 6. 15.

अत्यर्थभाविक (atartyha-bhāvika) *adj.* highly emotional उन्मादनात्समुद्भूत: कामो रतिकरो भवेत् । स्वभावोपगतो यस्तु नासावत्यर्थभाविक: (v. l. नानारत्यर्थभावक:) NāṭyaS'ā. 22. 332.

अत्यर्थभिन्न (atyartha-bhinna) *adj.* totally different इत्थमत्यर्थभिन्नार्थावभासखचिते विभौ । ··· व्यवहारोऽनुभूयते ĪśvaPraSū. i. 7. 14; अत एव अत्यर्थभिन्नै: मायाबलात् भेदैकप्राणितै: नीलसुखाद्याभासै: ··· सर्वो व्यवहारोऽनुभूयते PratyabhiVi. i. 390. 3 (*on* i. 7. 14)

अत्यर्थभोजन (atyartha-bhojana) *n.* overeating अत्यर्थभोजनान्मूर्च्छा विदग्धाच्चैव भोजनात् Hastyāyur. 32. 12 (1. 4)

अत्यर्थम् (aty-artham) *adv.* **A** extremely, excessively, very much, to a great extent (with verbs and participles) म्लायते माल्यमत्यर्थम् AV-Pari Lxiv(7). 10; Lxxb(7). 22; Lxxi(12). 4; रोगेण यद्रज: स्त्रीणामत्यर्थं हि प्रवर्तते ĀpaSm. 7. 2; तं च द्विषन्ति तेऽत्यर्थं स चापि सुमहाबल: MahāBhā. i. 32. 11; स्पर्धते हि सदात्यर्थं सूतपुत्रो मया रणे MahāBhā. v. 153. 24; सनाथमिदमत्यर्थं भवता पालितं बलम् MahāBhā. vii. 5. 2; vii. 13. 3; (अर्जुन:) अत्यर्थमिव संक्रुद्ध: प्रतिविद्धे जनार्दने MahāBhā. vii. 79. 23; ix. 367*(2); दुन्दुभीभिर्मृदङ्गैश्च ··· नादितां भृशमत्यर्थं (पुरीमावासयामास) Rāmā. i. 5. 18; i. 42. 6; सा च ते करुणं माता ···अत्यर्थं श्राम्यते वीर HariVaṁ. 99. 20; नात्यर्थमभिकाङ्क्षामि मृगयां सरयूवने Rāmā. ii. 43. 14; (ग्रहणी) एकश: सर्वशश्चैव दोषैरत्यर्थमुच्छ्रितै: । सा दुष्टा SuśruS. vi. 40. 171; (शाल्या)दीन्यपि योऽत्यर्थमश्नाति सुलघून्यपि BhelaS. 4. 10 (1. 5); हसत्यत्यर्थमेव च । उन्मादेन कृशो जन्तु: पञ्चत्वमुपगच्छति BhelaS. 103. 12 (5. 6); (लवणो रस:) अत्यर्थमुपयुज्यमान: पित्तं कोपयति CaraS. i. 26. 43; अत्यर्थमिष्टं देवानाम् NāṭyaS'ā. 28. 9; विद्वत्संसदि नात्यर्थं कथासु परिपूज्यते KāmSū. 187. 23 (2. 10); 274. 15 (5. 3); जगदेतत् ··· रागादिदुष्टमत्यर्थं भ्राम्यते भवसङ्कटे ViṣṇuP. iii. 18. 19; vi. 5. 11; भीत: प्रावेपतात्यर्थं सहसाश्वत्थपर्णवत् MārkP. 7. 15; अत्यर्थं भ्राजते यस्माद् व्योम्न्यस्यां वै निशाकर: BrahmāṇḍP. i. 28. 46; i. 23. 25; विललाप च सात्यर्थम् BrahmāṇḍP. ii. 30. 9; न चात्यर्थं विरुध्यते AṣṭāHṛ. i. 5. 69; किमिदमत्यर्थमुत्ताम्यति मे मन: Ratnā. 3. 9(32); किं विलापयसेऽत्यर्थं पार्श्वे शायय रावणम् Bhaṭṭi. 8. 83; अत्यर्थमुद्वेजयिता परेषां नाम्नापि तस्यैव स नन्दकोऽभूत् S'iśuVa. 3. 19; अयम् ··· जनोऽत्यर्थमनुगृहीत: DaśKuC. 105. 20; सर्वान् ··· सर्वगुणैरत्यर्थमत्यशेत राजवाहन: AvantiKa. 205. 6; शिरो नमयतेऽत्यर्थम् VarāṅgaC. 4. 51; तमुपागतमत्यर्थं हारलता पूजयामास KuṭṭaMa. 369; हृदि विद्ध इवात्यर्थं यया संतप्यते जन: । ···न तां वाचमुदीरयेत् NītiSā. 3. 24; तथा लेलायतीव अत्यर्थं चलतीव BṛĀraUBh. 530. 19 (*on* iv. 3. 7); स एष वृक्ष: पेपीयमान: अत्यर्थं पिबन् ··· तिष्ठति ChāndoUBh. 391. 13 (*on* vi. 11. 1); अत्यर्थं राजते ··· दन्तपङ्क्ति: S'ivaKePāSt. 10; इयं ह्युद्गीथकर्मणि अत्यर्थं व्यापृता BṛĀraUBhVā. i. 3. 128; i. 4. 1845; अलकानीव नात्यर्थं यमकानि चकासति KāvyālaṅSū. iv. 1. 7; नात्यर्थमस्मद्बहुमानयोगादुद्वेजनीय: परुषै: पुरैव RāmC. 27. 67; पित्तकृन्ति यथात्यर्थं द्रव्याण्यश्नाति पैत्तिके । तदोपजायते ··· रक्तातीसार: RugVi. 3. 20; पित्रात्मतनयस्तदा । दध्ना संतोषितोऽत्यर्थम् VāmaP. 91. 44; मुक्तश्च विधिनात्यर्थं पूर्णभद्रनिकेतने BṛKathāK. 31. 3; भूयिष्ठेष्वपि का भवत्सु गणनात्यर्थं किमुत्ताम्यते VakroJī. 61. 3; क्षतानि चात्यर्थं सहते सोऽधिकभावाच्चण्डवेग: JayaMa. 77. 4 (*on* 2. 1); इयं च माता ··· अत्यर्थमनुतप्तेयम् BrahmP. 92. 46; बीजं वै कामराजाख्यम् ··· जजाप बालकोऽत्यर्थम् DevīBhāP. iii. 17. 36; अत्यर्थं स्पर्धते सा तु देवयानी तपस्विनी PadmP. ii. 80. 3; बन्धयेदुदरेऽत्यर्थं प्राणापानौ च य: सुधी: S'ivS. 4. 38; व्यलपन्बहुधात्यर्थमनर्थक्रुतचेतस: SamarāSū. 6. 20; 48. 81; प्रकिरन्ति यदात्यर्थं सर्वं पुच्छं तुरङ्गमा: AśvaVai. 3. 170; नात्यर्थमर्थार्थनया धीमानुद्वेजयेज्जनम् CāruCaS'. 37; सदृशं शोभतेऽत्यर्थं भूपाल तव चेष्टितम् KāvyPra. 284. 4; ईर्ष्यया मोहितात्यर्थमहमेवमचिन्तयम् KathāSaSāg. vii. 8. 161; न भानुरत्यर्थमतापयज्जनम् VikraDeC. 17. 5; अलंकृताभिरत्यर्थं गोपकन्याभिरावृतम् ··· इष्ट्वा (देवम्) ĪśānS'i. Pa. i. 34. 48; वात: प्रकुपितोऽत्यर्थमेतानि लिङ्गानि दर्शयति Hastyāyur. 64. 21 (1. 9); 652. 9 (4. 15); आनन्दयति कोऽत्यर्थं सज्जनानेव भूतले (मित्रोदय:) VidaMuMa. 1. 57; 2. 2; 4. 4; सोऽत्यर्थं कथमन्यथा दहति मामेष त्वदोष्ठव्रण: SubhāRaK. 20. 13; रुरोद भग्नाशा (अरिनारी) अत्यर्थम् Kāvyānu.(He.) 252. 8; बन्धोऽयमवपाताख्यस्तेनात्यर्थं विगर्हित: Mānaso. ii. 3. 220; iv. 3. 612; राजापि दृष्टसुस्वप्न इवात्यर्थममोदत PariPar. 1. 213; 2. 172; विनयं कुर्वतात्यर्थमर्जुनेन विशेषत: । ··· गुरोरावर्जितं मन: PāṇḍaC. 3. 271; सोत्कण्ठं सेवितोऽत्यर्थं तारुण्यसमये पुरा HāsyCū. 138. 21; येनात्यर्थं बलिभिरनिशं तर्पितो नागलोक: CaturCin. ii(2). 246. 3; परमत्यर्थम् ManvaVi. 1336. 19 (*on* 10. 118); नृप: ···श्रीहेमचन्द्राचार्यं श्रीसोमेश्वरयात्रार्थमत्यर्थमभ्यर्थयन् PrabaCin. 84. 22; अनुकूलाचरणेन हि कुप्यन्ति व्याधयोऽत्यर्थम् SūktiRa. 32. 58; 171. 23; इति कथिते कुपिता (त्यर्थं) तद्वचनेन PurāPraSaṁ. 79. 19; राजा ··· अत्यर्थं तदादिष्टं समाचरत् RājTa.(Jo.) 260; सज्जनमनिशमनार्य: प्रबाधतेऽत्यर्थम् Subhāṣi. 409; स्पृष्टो वा व्यथतेऽत्यर्थं स गजोऽत्यर्थवेदन: MātaLī. 8. 19; 8. 24; (पित्रा) ईर्ष्यापरेणात्यर्थं तर्जित: KathāK. 21. 18; विधाता ··· अत्यर्थमस्तुवत्स्तोत्रैर्योगनिद्रामनुत्तमाम् ParamāKā. 119. 49; अत्यर्थं बहु मनुते स्म रामभद्र: (रावणम्) Rāgh. 18. 9; जाज्वल्यमानं अत्यर्थं ज्वलत् Bhāsk. i. 110. 14 (*on* i. 2. 8); अत्यर्थमिति । अत्यन्तमित्यर्थ: BālamBha. iii. 134. 11 (*on* 3. 243); अत्यर्थमतिमर्यादमतिवेलं च कथ्यते AbhidhāRaMā. 4. 34; NāmMā. 173; EI. ii. 59. 81; ii. 4. 18; ii. 219. 55; v. 184. 15; xii. 212. 18; xiv. 91. 26; (with adjectives) अत्यर्थं कनकास्त्वन्ये प्रतप्तकनकप्रभा: AVPari. LII(6). 2; Lxix(3). 2; सत्त्वविभ्रंशिनात्यर्थं शब्देनोद्वेगकारिणा AVPari. Lviii(2). 1; घोररूपं तदत्यर्थं यन्त्रं देवै: सुनिर्मितम् MahāBhā. i. 29. 3; युष्मानजीजनम् । दु:खायासभुजोऽत्यर्थम् MahāBhā. ii. 70. 15; अत्यर्थं कोपनो राजा जातवैरश्च पाण्डुषु MahāBhā. ix. 63. 2; xii. 2. 18; संरक्ततरमत्यर्थं मधुरं तावगायताम् Rāmā. i. 4. 18; कपिराजेन ··· वाक्यं हेतुमदत्यर्थं भवद्भिरपि तच्छ्रुतम् Rāmā. vi. 11. 23; वेनो नात्यर्थं धार्मिकोऽभवत् HariVaṁ. 5. 2; प्रवृत्तमूत्रमत्यर्थं तं प्रमेहिणमादिशेत् SuśruS. ii. 6. 23; नात्यर्थं पुष्टपृष्ठा ··· वेदी परिवृता PañcRā. 1. 6; परदु:खोत्पादने चात्यर्थं भीरु: स ··· कथम् ··· परुषं वक्ष्यति MaYānaSū. 110. 17 (16. 46(2)); अत्यर्थमेव क्षणदा च तन्वी RaghuVa. 16. 45 = SubhāRaK. 9. 3; तज्जन्मदिनमत्यर्थमाह्लाद्यमलदिङ्मुखम् ViṣṇuP. v. 3. 3; v. 30. 34; यद्वाभिमतमत्यर्थं दुर्लभं यद् वृणुष्व माम् MārkP. 24. 4; नात्यर्थं धार्मिका ये च तान् सर्वान् हन्ति सर्वश:

BrahmāṇḍP. i. 31. 80; ii. 26. 33; स्त्रीकार्यमिदमत्यर्थं गरीयः सारमेव च PañcT. 4. 12; अत्यर्थं विपुलैः स्वनीतिविभवैः संमोहमापादिताः MudrāRā. 3. 26; तत्तु नात्यर्थं तीक्ष्णमुष्णं शीतं वा ··· योजयेत् AṣṭāSaṁ. i. 163. 12 (1. 32); ii. 177. 8 (6. 2); ते दन्द्रम्यमाणाः ··· अत्यर्थं कुटिलामनेकरूपां गतिं गच्छन्तः KāṭhU. Bh. 124. 8 (*on* 2. 5); मनः चञ्चलम् अत्यर्थं चलम् GītāBh.(S'aṅ.) 199. 9 (*on* 6. 26); 222. 7 (*on* 7. 17); क्षणिकं हि तदत्यर्थम् UpadeSā. 275. 23; तामिस्रोऽत्यर्थं तमोबहुलः BālaKrī. ii. 85. 2 (*on* 3. 218 (? 224); अत्यर्थं मधुररसाः सन्तु ह्योषधयश्च नः BṛĀraUBhVā. vi. 3. 46; उत्कण्ठिता इवात्यर्थं दृष्टाः पञ्चवटीमृगाः RāmC. 10. 66; जगदाकुलमत्यर्थं तदाऽऽसीन्मुनिसत्तमाः BrahmP. 32. 87; न स्थूलो न कृशोऽत्यर्थम् BhaviP. 22A. 33 (i. 5. 68); चलच्चित्तश्च सोऽत्यर्थं विवादे चोद्यतस्तथा DeviBhāP. iii. 9. 24; अत्यर्थं लघु ··· यद्वज्रं क्वचिद् दृश्यते YuktiKa. 98. 1; अत्यर्थं सा च दृष्ट्वा त्वां जायते मदनातुरा KathāSaSāg. ii. 2. 145; शरीरं जडमत्यर्थमपवित्रं विनश्वरम् AdhyāRā. ii. 7. 96; अत्यर्थं कृशकायास्ते (चित्रगतदानवाः) Mānaso. iii. 1. 809; अत्यर्थमसमर्थः संश्छलेन च बलेन सः MalliC. 1. 81; सुसमृद्धोऽपि अत्यर्थमाढ्योऽपि CaturCin. iii(1). 1149. 1; एवं चेच्छतवाराणि पुटपाकेन साधितम् गुणवज्जायतेऽत्यर्थम् RasRaSa. 2. 45; दुर्बलं वपुरत्यर्थं बलयुक्तं करोत्यसौ RasRaSa. 27. 36; दयालुरहमत्यर्थम् BhāvPra.(Bhā.) 1. 20; हृष्टोऽत्यर्थं रजन्यां भ्रमति MātaLī. 3. 6; अत्यर्थं भयभीतोऽहं तव शरणे प्रविष्टः KathāK. 63. 10; अशाश्वतमिदं सर्वं ··· कलयन्ति किलात्यर्थं परलोकपरा नराः ParamāKā. 23. 12; 67. 95; वह्निधूमनिवहैरत्यर्थमभ्रंलिहैः EI. i. 200. 18; (with nouns) के सदस्या बभूवुश्च सर्पसत्रे···विषादजननेऽत्यर्थं पन्नगानां महाभये MahāBhā. i. 48. 2; परो वै विस्तरोऽत्यर्थं त्वया संजय कीर्तितः MahāBhā. vi. 13. 38; पुत्रस्य तव चात्यर्थं विषादः समपद्यत MahāBhā. ix. 20. 27; अपृच्छं त्वां तवात्यर्थं कीर्तिं समभिवर्धयन् Rāmā. ii. 84. 20; कृतो ह्यत्यर्थमाहारो विहन्ति च पराक्रमम् Saund. 14. 2; धूमदोषाद्विरेकः स्यादत्यर्थं शिरसश्च रुक् BhelaS'. 30. 25 (1. 18); अत्यर्थं ग्लानिश्चक्षुषोः CaraS. ii. 3. 14 (1941 Ed.); परमार्थोऽयमत्यर्थं परमार्थो न चाप्ययम् ViṣṇuP. iii. 18. 10; संक्षोभो जायतेऽत्यर्थम् BrahmāṇḍP. i. 31. 38; विशेषात्तु जृम्भात्यर्थं समीरणात् RugVi. 2. 6; क्षयप्रवृत्तिरत्यर्थम् ··· प्रतिश्यायेऽनिलात्मके RugVi. 58. 17; स्विन्नेऽत्यर्थं संधिपीडा तृषा च SiddhYo. 72. 11; अत्यर्थमन्तर्व्यथामनुभवन्ती क्वापि कालं क्षपयति UdaySuKa. 71. 13; दुर्जनाद्भीतिरत्यर्थं कस्य वा नोपजायते SāhiSā. 1. 4; **B** by going beyond an object अत्यर्थमर्थातिक्रमेण बाह्यशब्दादिविषयोल्लंघनेन AbhinBhā. iv. 5. 21 (*on* 29. 9)

अत्यर्थमण्डन (atyartha-maṇḍana) *n.* very high ornament अत्यर्थमण्डनशिखण्डिशिखः ··· वापीं निपीतसलिलो वलितं प्रयाति RājTa.(Ka.) 8. 3379.

अत्यर्थमत्प्रियत्व (atyarthamatpriya-tva) *n.* the state of my being very dear to one अत्यर्थमत्प्रियत्वेन···क्षणमात्रवियोगासहतया मत्प्राप्तिप्रवृत्तौ त्वरावान् GītāBh.(Rā.) 362. 4 (*on* 6. 47)

अत्यर्थमधुर (atyartha-madhura) *adj.* **1** very sweet sounding, very melodious सङ्गतं हृदयङ्गमम् । अत्यर्थमधुरं सान्त्वम् AgniP. 359. 66; KalpaK. 447. 74; **2** excessively sweet, containing too much sugar तोयम् ··· नागो न पिबेत् ··· अत्यर्थमधुरं यत्र श्लेष्माणमभिवर्धयेत् Hastyāyur. 652. 26 (4. 15)

अत्यर्थमनोऽनुग (atyartha-mano'nuga) *adj.* very appealing to the mind, very attractive आसेदुरत्यर्थमनोरमं (v. l. मनोऽनुगं) वै तमाश्रमाग्र्यं वृषपर्वणस्ते MahāBhā. iii. 174. 6.

अत्यर्थमनोरम (atyartha-manorama) *adj.* highly gratifying to the mind, very delightful or pleasant आसेदुरत्यर्थमनोरमं वै तमाश्रमाग्र्यं वृषपर्वणस्ते MahāBhā. iii 174. 6.

अत्यर्थमनोहर (atyartha-manohara) *adj.* very attrattive or charming स काश्यपस्यायतनम् ··· विवेश ··· अत्यर्थमनोहरं शिवम् MahāBhā. i. 64. 42.

अत्यर्थमहादुःख (atyartha-mahāduḥkha) *n.* excessively great pain or trouble सैन्यलोकः ··· सिंहकर्मभिरत्यर्थमहादु(:?)खवशीकृतः PadmP.(Ra.) 60. 41.

अत्यर्थमहापराक्रम (atyartha-mahāparākrama) *adj.* very much forceful (i. e. highly audacious) अथो पुनस्तां महिषीं महीक्षितो वचोभिरत्यर्थमहापराक्रमैः । उवाच कुब्जा भरतस्य मातरम् Rāmā. ii. 183*(4)

अत्यर्थमहाविताना (atyarthamahā-vitānā) *adj.* (*f.*) having very great expanse महापताकाः ··· महागजस्कन्धगता विरेजुः (v. l. विरेजुरत्यर्थमहावितानाः) MahāBhā. vi. 56. 4.

अत्यर्थमहित (atyartha-mahita) *adj.* exceedingly honoured भरतो भरतस्याग्नेः पावकस्तु प्रजापतेः । महानत्यर्थमहितस्तथा भरतसत्तम MahāBhā. iii. 209. 8.

अत्यर्थमहोपवास (atyarthamahopavāsa) *m.* very great fast कदाचिदत्यर्थमहोपवासैः ··· कृशीकृताङ्गो नियमैर्यमैश्च मुनिः प्रचक्रे सुतपोऽतिघोरम् VarāṅgaC. 31. 49.

अत्यर्थमूर्च्छित (atyartha-mūrcchita) *adj.* excessively increased (उन्मादः) एकैकशः समस्तैश्च दोषैरत्यर्थमूर्च्छितैः । मानसेन च दुःखेन स पञ्चविध उच्यते SuśruS. vi. 62. 4; RugVi. 4. 2 (comm. अतिवृद्धैः)

अत्यर्थमृदु (atyartha-mṛdu) *adj.* very weak अत्यर्थमृदुकायाग्नेस्तक्रमेवावचारयेत् CaraS. vi. 14. 79 (1941 Ed.)

अत्यर्थयुक्ति (atyartha-yukti) *f.* extreme reasonableness एकदेशविवर्तिरूपकमलङ्कारः । तदत्यर्थयुक्तियुक्तम् VakroJī. 186. 17.

अत्यर्थयोग (atyartha-yoga) *m.* excessive use, overdose उष्णकर्मणोऽत्यर्थयोगादत्यशनास्व(शु)गमनात् ··· पित्तं प्रकुपितं भवति Hastyāyur. 332. 17 (2. 70)

अत्यर्थरक्त (atyartha-rakta) *adj.* very red अत्यर्थरक्तमतिकृष्णमतीव पीतम् ··· विसर्पसर्पं तं वर्जयेत् KalyāKā. 9. 34.

अत्यर्थरत्नखचित (atyartha-ratnakhacita) *adj.* inlaid with many jewels (महागौर्याः प्रतिबिम्बः) अत्यर्थरत्नखचितमुकुटाञ्चितमस्तकः BrahmāṇḍP. iii. 39. 93.

अत्यर्थरथाङ्गनामन् (atyartha-rathāṅganāman) *m.* numerous Cakravāka birds रराज चारक्तदिगन्तरालं सशोणमत्यर्थरथाङ्गनाम्नः(?) ह्रदः प्रभिन्नादिव शोणितोघैर्विलिप्तवन्तः सकलं वियोगात् MahāBhā. vi. 213*(2)

अत्यर्थरम्य (atyartha-ramya) *adj.* very charming or beautiful पञ्चमं वर्षमत्यर्थरम्यं रम्यकसंज्ञितम् SamarāSū. 5. 32.

अत्यर्थरसिक (atyartha-rasika) *adj.* extremely tasty अत्यर्थरसिकं कायं कालपक्कस्य मक्षिकाः । अपि स्नातानुलिप्तस्य भृशमायान्ति सर्वशः CaraS. v. 2. 22.

अत्यर्थराग (atyartha-rāga) *adj.* most passionate (वनिता) अबलात्यर्थरागेषु(?) क्लीबं याचितदुर्गयोः । स्त्रैणे जलाशये चाथ NānāMañ. 728.

अत्यर्थरूक्ष (atyartha-rūkṣa) *adj.* excessively dry कलायमुद्गाढकिकोरदूषादत्यर्थरूक्षाध्यशनाभिघातात् (वायुः प्रवृद्धो जनयेद्धि शूलम्) RugVi. 26. 2.

अत्यर्थरौद्र (atyartha-raudra) *adj.* very cruel इह बोधिसत्त्वः प्रकृत्या मृदुना कायवाङ्मनस्कर्मणा समन्वागतो भवति अकुशलेन नात्यर्थरौद्रेण नात्यर्थसत्त्वोपघातकेन BodhiBhū. 4. 2.

अत्यर्थलवण (atyartha-lavaṇa) *adj.* very salty सदात्यर्थलवणाम्लकटुक्षारोष्णोपसेवी भवति KāśyaS. 133A. 28.

अत्यर्थलुब्ध (atyartha-lubdha) *adj.* excessively covetous धर्मः सुचरितः सद्भिः सह द्वाभ्यां नियच्छति । अर्थश्चात्यर्थलुब्धस्य कामश्चातिप्रसङ्गिनः MahāBhā. ix. 59. 17.

अत्यर्थवक्रत्व (atyarthavakra-tva) *n.* **i** very artful expression अत्यर्थवक्रत्वमनर्थकं या शून्यापि सर्वान्यगुणैर्व्यनक्ति । अस्पृश्यतादूषितया तया किं तुच्छश्वपुच्छच्छटयेव वाचा S'rīKaC. 2. 14; Subhāṣi. 174; **ii** extreme crookedness, S'rīKaC. 2. 14.

अत्यर्थवर्ण (atyartha-varṇa) *m.* excessive colour आकराध्यक्षः ··· आकरम् ··· भूमिप्रस्तररसधातुमत्यर्थवर्णगौरवम् ··· परीक्षेत ArthS'ā. i. 198. 3 (2. 12)

अत्यर्थवात (atyartha-vāta) *m.* excessive wind अत्यर्थवातेन अधःस्फुरन्ती उत्तानभेदिन्यसमाप्तिकाले (नाडी) NāḍīVi. 102.

अत्यर्थविचेतना (atyartha-vicetanā) *adj.* (*f.*) very much disinclined or disinterested प्रगल्भा स्वयमुद्भिन्नमन्मथोन्मादमन्थरा । सुरतालापलीलायामप्यत्यर्थविचेतना SāhiSā. 4. 13.

अत्यर्थविनिःसृता (atyartha-vinissṛtā) *adj.* (*f.*) exceedingly coming out ज्वालाभिरत्यर्थविनिःसृताभिरस्त्रस्य सूरस्य महेन्द्रसूनोः MahāBhā. viii. 1036*(1)

अत्यर्थविलासिनी (atyartha-vilāsinī) *adj.* (*f.*) very coquettish दृष्टमात्रे ततः कान्ते प्रद्युम्नतनये द्विज । दृष्ट्वात्यर्थविलासिन्या लज्जा क्वापि निराकृता ViṣṇuP. v. 32. 25.

अत्यर्थविवृता (aryartha-vivṛtā) *adj.* (*f.*) wide open यस्य···नासिकात्यर्थविवृता संवृता पिटिकाचिता AṣṭāHṛ. ii. 5. 8.

अत्यर्थविशारद (atyartha-viśārada) *adj.* very wise or clever अवध्यतां प्रेक्ष्य महासुरस्य तौ ··· समर्थ्य चात्यर्थविशारदावुभौ । बिले विराधस्य वधं प्रचक्रतुः Rāmā. iii. 56*(7)

अत्यर्थविषम (atyartha-viṣama) *adj.* extremely difficult or uneven अत्यर्थविषमः प्रोक्तः स मार्गो घोरदर्शनः ViṣṇuDhaP. ii. 116. 19.

अत्यर्थविसृष्ट (atyartha-visṛṣṭa) *adj.* discharged with great force अथात्यर्थविसृष्टेन द्विषतामसुभोजिना । आजघ्ने वक्षसि द्रोणो नाराचेन धनंजयम् MahāBhā. vii. 66. 22.

अत्यर्थविस्तर (atyartha-vistara) *adj.* very extensive ग्रन्थोऽयमपि बह्वर्थो भाष्यं चात्यर्थविस्तरम् । बहुज्ञा एव जानन्ति AnuVyā. 10B. 10 (*on* i. 1. 12)

अत्यर्थवीर्या (atyartha-vīryā) *adj.* (*f.*) very powerful तस्मै प्रदत्तं

दत्तेन श्रीहरेः कवचं पुरा । शक्तिरत्यर्थवीर्या च BrahmāṇḍP. ii. 32. 51.

अत्यर्थवृष्य (atyartha-vṛṣya) *adj.* productive of excessive sexual vigour पयः स्निग्धमत्यर्थवृष्यं च···जीवनीयं रसायनम् Hastyāyur. 668. 7 (4. 21)

अत्यर्थवेगवत् (atyartha-vegava(n)t) *adj.* very vigorous सेवमानो यदौचित्याद्याजीवात्यर्थवेगवान् । नारीस्तर्पयते तेन वाजीकरणमुच्यते SuśruS. iv. 26. 6

अत्यर्थवेदन (atyartha-vedana) *adj.* [*f.* -ā] **i** paining excessively कृष्णोऽरुणो वा परुषो भृशमत्यर्थवेदनः ।··· विद्रधिर्वातसम्भवः SuśruS. ii. 9. 7; ये च मर्मस्वसंभूता भवन्त्यत्यर्थवेदनाः ··· व्रणाः RugVi. 42. 14; BhāvPra.(Bhā.) vii. 46. 4; पक्वाभाः पिडकाः स्निग्धाः सूक्ष्माश्चात्यर्थवेदनाः (मसूरिकाः) RugVi. 54. 20; **ii** very sensitive नागाः प्रशस्ता ··· अत्यर्थवेदना ये च शूराः शब्दसहिष्णवः VisṇuDhaP. ii. 10. 4; स्यन्दन्ते चास्य वाश्रूणि भवेदत्यर्थवेदनः Hastyāyur 181. 12 (2. 10); 210. 26 (2. 17); प्राजनाङ्कुशदण्डेभ्यो दूरादुद्विजते हि यः । स्पृष्टो वा व्यथतेऽत्यर्थम् स गजोऽत्यर्थवेदनः MātaLī. 8. 19.

अत्यर्थवेदना (atyartha-vedanā) *f.* excessive pain शोकोपवासव्यायामरूक्षशुष्काल्पभोजनैः ।··· हृदि वातातुरे रूपं जीर्णे चात्यर्थवेदना CaraS. i. 17. 31.

अत्यर्थवेदिन् (atyarthaved-in) *adj.* of extreme sensibility धृतो धावति चात्यर्थं प्रेरितस्तु न गच्छति । अत्यर्थवेदी विज्ञेयो व्यालो मिश्रगजो मतः Mānaso. iv. 3. 612.

अत्यर्थव्यभिचारिणी (atyartha-vyabhicāriṇī) *adj.* (*f.*) extremely unchaste (woman) अत्यर्थव्यभिचारिणी तु न त्याज्या SmṛtiCan. iv. 570. 3; cf. SaṅkhaLiDS. 334.

अत्यर्थव्यय (aty-arthavyaya) *m.* **i** expenditure of immense wealth वेश्या पुनर्वातरोग इवात्यर्थव्ययमुत्पादयति DhūrtaViSaṁ. 20. 17; **ii** (atyartha-vyaya) complete destruction or ruin (of health), DhūrtaViSaṁ. 20. 17.

अत्यर्थशङ्कित (atyartha-śaṅkita) *adj.* extremely frightened अत्यर्थशङ्कितः स्याद्बहुवागथवाल्पवाग्विगतलक्ष्मीः । प्रायः प्रकृतिविकारं विषप्रदाता नरो ज्ञेयः CaraS. vi. 23. 105 (1922 Ed.)

अत्यर्थशान्तचेतस्क (atyarthaśāntacetas-ka) *adj.* who has an extremely calm mind वारणः । अत्यर्थशान्तचेतस्को निश्चलः सौम्यदर्शनः PadmP. (Ra.) 83. 125.

अत्यर्थशीत (atyartha-śīta) *adj.* extremely cool, very cold तं विसंज्ञं निपतितं सिषिचुः परिचारकाः । जलेनात्यर्थशीतेन MahāBhā. vii. 9. 2; अम्भो वा पिबेन्मधुसमायुतम् । अह्नि मेघानिलाविष्टेऽत्यर्थशीताम्बुसङ्कुले SuśruS. vi. 64. 9; शीतकाले ··· शरीरमत्यर्थशीतवातविष्टब्धबद्धगुरुदोषं भवति AṣṭāSaṁ. i. 121. 16 (1. 23)

अत्यर्थशीतल (atyartha-śītala) *adj.* extremely cold अत्यर्थशीतलाम्भोभिः प्लावयन्तौ दिशः सदा । ऋतू हेमन्तशिशिरौ आजग्मतुः BrahmP. 36. 89.

अत्यर्थशुक्ल (atyartha-śukla) *adj.* very much white अत्यर्थशुक्लमतिमाधुर्योपपन्नम् ··· श्लेष्मोपसृष्टं क्षीरमभिज्ञेयम् CaraS. iv. 8. 55 (1941 Ed.)

अत्यर्थशोभन (atyartha-śobhana) *adj.* exceedingly shining धमनीनामपूर्णानां जालमत्यर्थशोभनम् । ललाटे दृश्यते यस्य षण्मासान्न स जीवति CaraS. v. 11. 8 (1941 Ed.)

अत्यर्थशोभित (atyartha-śobhita) *adj.* exceedingly beautiful तदा विमुक्तकोणः स्यात् प्रासादोऽत्यर्थशोभितः SamarāSū. 49. 110.

अत्यर्थसक्त (atyartha-sakta) *adj.* stuck very close एषामत्यर्थसक्तानां (पाशानाम्) विभागायासिनाहुतीः । ···दद्यात् MṛgendraT. ii. 7. 86.

अत्यर्थसंगतार्थत्व (atyarthasaṅgatārtha-tva) *n.* the state of having a very closely connected meaning अत्यर्थसंगतार्थत्वाद्वाक्यं वाक्यान्तरस्थितम् SāhiSā. 2. 75.

अत्यर्थसंचित (atyartha-sañcita) *adj.* accumulated in excess यतेत च यथाकालं मलानां शोधनं प्रति । अत्यर्थसंचितास्ते हि क्रुद्धाः स्युर्जीवितच्छिदः AṣṭāHr. i. 4. 26; सश्लेष्ममेदःपवनः साममत्यर्थसंचितम् । अभिभूयेतरं दोषम् RugVi. 24. 2.

अत्यर्थसत्त्वोपघातक (atyartha-sattvopaghātaka) *adj.* excessively harmful to creatures इह बोधिसत्त्वः प्रकृत्या मृदुना कायवाङ्मनस्कर्मणा समन्वागतो भवति अकुशलेन नात्यर्थरौद्रेण नात्यर्थसत्त्वोपघातकेन BodhiBhū. 4. 3.

अत्यर्थसमयोगित्व (atyarthasamayogi-tva) *n.* the state of mixing together in higher or equal proportion एकद्वित्रिसमायोगाद्भावकल्पनया तथा । संख्यैवा(? ख्यावा)न्तरवर्णानां लोके कर्तुं न शक्यते । अत्यर्थसमयोगित्वात् VisṇuDhaP. iii. 27. 10.

अत्यर्थसमुच्छ्रिता (atyartha-samucchritā) *adj.* (*f.*) risen very high अत्यर्थसमुच्छ्रिताभिः । गङ्गोर्मिभिः ··· इद्धः सहस्ररश्मिप्रतिमो विभाति MahāBhā. xiii. 27. 80.

अत्यर्थसमुल्बण (atyartha-samulbaṇa) *adj.* very gaudy or showy

धीरोद्धतानां वेशः स्यात्र चात्यर्थसमुल्बणः VisṇuDhaP. iii. 20. 16.

अत्यर्थसंपीडित (atyartha-sampīḍita) *adj.* extremely pressed or troubled कण्ठे जीर्णलताप्रतानवलयेनात्यन्तसंपीडितः ··· मुनिः S'āk. 7. 11 = SaduktiKa. 322. 5.

अत्यर्थसुकुमार (atyartha-sukumāra) *adj.* very delicate or charming अत्यर्थसुकुमारार्थसंदर्भा कैशिकी मता PratāYaBhū. 58. 7.

अत्यर्थसुख (atyartha-sukha) *adj.* giving great happiness, extremely pleasant (किरीटम्) महार्हरूपं द्विषतां भयंकरं विभाति चात्यर्थसुखं सुगन्धि तत् MahāBhā. viii. 66. 14.

अत्यर्थसुखिन् (atyartha-sukhin) *adj.* exceedingly happy जिनालयं यः कुरुतेऽतिभक्त्या ··· अत्यर्थसुखी च लोके VarāṅgaC. 22. 47.

अत्यर्थसुधास्वभाव (atyartha-sudhāsvabhāva) *adj.* greatly consisting of the nature of nectar (i. e. very sweet) इत्युक्तमत्यर्थसुधास्वभावं तेन ··· श्रुत्वा बलिः ··· तमभ्यधात् DaśāvaC. 5. 199.

अत्यर्थसुन्दराकार (atyarthasundarākāra) *adj.* having an exceedingly beautiful form अत्यर्थसुन्दराकारा धीराश्चाप्सरसां गणाः BrahmāṇḍP. iii. 9. 71.

अत्यर्थसूक्ष्म (atyartha-sūkṣma) *adj.* extremely subtle अत्यर्थसूक्ष्मं वरदं क्षेत्रज्ञं प्रभुमीश्वरम् । ··· जीवदेव त्वमभ्येहि VisṇuDhaP. iii. 102. 5.

अत्यर्थसेवन (atyartha-sevana) *n.* excessive use लोकेऽपि दृश्यते ह्येतन्मद्यस्यात्यर्थसेवनात् BhaviP. 126B. 1 (i. 73. 29)

अत्यर्थस्निग्ध (atyartha-snigdha) *adj.* treated excessively with oily medicine अत्यर्थस्निग्धदेहस्य विशुद्धामाशयस्य वा । मारुतस्यानुलोम्यस्य यस्याधो वमनं व्रजेत् KāśyaS. 276A. 17.

अत्यर्थस्नेह (atyartha-sneha) *m.* excessive (application of) unctuous substance अत्यर्थस्नेहात् रौक्ष्यात् ···स (मतङ्गजः) म्रियते Hastyāyur. 251. 2 (2. 44)

अत्यर्थस्वादु (atyartha-svādu) *adj.* very sweet औद्दालकं तु शालाकं विषजिन्मधुराम्लकम् । छात्रं सर्वौघमत्यर्थस्वाद्विमा मधुजातयः Vaija. 134. 136.

अत्यर्थहानितस् (atyarthahāni-tas) *adv.* due to total loss मोक्षसाधनवैयर्थ्यान्मुक्तेरत्यर्थहानितः NītiMā. 27. 14.

अत्यर्थहेतिपटुता (atyarthahetipaṭu-tā) *f.* **i** extreme fury of the flames अत्यर्थहेतिपटुताकवलीभवत्तत्तत्पार्थिवाधिकरणप्रभवास्य भूतिः NaiṣC. 13. 11; **ii** extreme sharpness of the weapon, NaiṣC. 13. 11.

अत्यर्थाधिकपरिमाणत्व (atyarthādhikaparimāṇa-tva) *n.* extremely large amount यथा ··· इति धर्म्यत्वेनापि वसिष्ठविहिता प्रतिषिद्धा तथैव प्रतिषिध्यते । अत्यर्थाधिकपरिमाणत्वेनाधर्म्यत्वात् SmṛtiCan. iv. 369. 11.

अत्यर्थानलमन्दता (atyarthānalamandatā) *f.* extreme weakness of the digestive fire आरोग्यसागरो नाम रसः ··· हन्यात् ··· अत्यर्थानलमन्दताम् RasRaSa. 19. 75.

अत्यर्थानुकूलरूपा (atyarthānukūla-rūpā) *adj.* (*f.*) which is of the nature of being very favourable अत्यर्थप्रिया अत्यर्थानुकूलरूपा S'rutaPra. iA. 61. 9 (*on* i. 1. 1)

अत्यर्थानुचित (atyarthānucita) *adj.* extremely improper अत्यर्थानुचितं यत् स्यात् ··· तत् परित्यज्यताम् SāhiSā. 6. 3.

अत्यर्थानुराग (atyarthānurāga) *f.* great attachment वनिता जनितात्यर्थानुरागायां च योषिति AmaK. 2482.

अत्यर्थायास (atyarthāyāsa) *m.* extreme exertion अत्यर्थायाम(स)-सेवया । कुप्यन्ति धातवः सर्वे Hastyāyur. 632. 11 (4. 12)

अत्यर्थोपक्लिन्न (atyarthopaklinna) *adj.* greatly perspiring अत्यर्थोपक्लिन्नमवसन्नानलम् ··· आदानदुर्बलं शरीरं भवति AṣṭāSaṁ. i. 121. 21 (1. 23)

अत्यर्थोपचित (atyarthopacita) *adj.* who has accumulated abundant wealth अत्यर्थोपचिताः कामं विशेषासादनं विना । तेजस्विनो न तिष्ठन्ति दीप्रा दावानला इव KathāSaSāg. xv. 2. 14.

अत्यर्थोपहतकाया (atyarthopahata-kāyā) *adj.* (*f.*) whose body has been extremely contaminated सुराप्यात्यर्थोपहतकायया संस्पृष्टं दुष्टं भवति SmṛtiCan. iv. 586. 17.

अत्यर्थोष्ण (atyarthoṣṇa) *adj.* extremely hot अत्यर्थोष्णगभस्तिजालमण्डलोऽर्कः ··· नृणाम् (दौर्बल्यमावहति) AṣṭāSaṁ. i. 14. 22 (1. 4)

अत्यर्थोहक (atyarthoha-ka) *adj.* excessively guessing or reasoning अत्यूहः ··· त्रि त्वत्यर्थोहकादिषु NānārthāSaṁ. ii. 58. 138.

अत्यर्द् (aty-ard-) VI. P. to hurt very much अभ्यार्दीद्वालिनः (v. l. अत्यार्दीद्वालिनः) पुत्रं प्रजङ्घोऽपि समत्सरः Bhaṭṭi. 15. 115.

अत्यर्द (atyarda) *m.* name of a Sāman विश्वामित्रस्य चात्यर्दः ĀrṣeBr

iv. 11. 2.

अत्यर्दित (aty-ardita) *adj.* extremely hurt or afflicted अत्यर्दित: श्र(स्र)वेद्न्त: पूतिकं पूयशोणितम् Hastyāyur. 492. 11 (3. 17)

अत्यर्ध (atyardha) *m.* name of a Sāman विश्वामित्रस्यात्यर्ध: [pw] cf. **अत्यर्द.**

अत्यर्धगोमूत्र (atyardha-gomūtra) *n.* a type of staircase called Ardhagomūtra (because of its zigzag form) वल्लीमण्डलमत्यर्धगोमूत्रेण समाहितम् MayaMa. 21. 88.

अत्यर्धयोजन (atyardha-yojana) *n.* distance of more than half a yojana (a measure of length) (ताटका) सेयं पन्थानमावार्य वसत्यत्यर्धयोजने Rāmā. i. 23. 27 (Kataka. अतिक्रान्तोर्धमत्यर्धं ततः कर्मधारयः)

अत्यर्धहस्त (atyardha-hasta) *m.* one and a half cubits अत्यर्धहस्तमारभ्य षट्षडङ्गुलवर्धनात् MānaSā. 34. 3.

अत्यर्बुद (aty-arbuda) *n.* a number larger than an *Arbuda* अर्बुदम् । अत्यर्बुदम् । बहो: AVPari. 48. 66.

अत्यर्वाचीन (aty-arvācīna) *adj.* very low or inferior (stage) अत्यर्वाचीने पदे विविदिषासंन्यासेऽपि यदा क्रोधादयो न सन्ति तदोत्तमपदे तत्त्वज्ञाने कुतस्ते स्यु: JīvanVi. 135. 14.

अत्यर्शस् (aty-arśas) *adj.* afflicted with acute piles उष्ट्रीक्षीरम् … पित्तश्लेष्मात्यर्शसां प्रशस्तम् BhojanKu. 133. 2.

अत्यर्ह् (aty-arh-) I. P. to excel in worth, to be valued more बृहस्पते अति यदुर्यो अर्हात् ṚV. ii. 23. 15 = TaiS. I. viii. 22. 2; MaiS. iv. 14. 4; KāṭhS. 4. 16; 40. 11; VājaS. 26. 3 = VājaS.(K.) xxviii. 2. 1.

अत्यलङ्कार (aty-alaṅkāra) *m.* excessive decoration दानशय्यात्यलङ्कारपानभोजनमैथुनै: । नित्योपेतं प्रमुदितं याक्षं विद्यात् प्रभक्षणम् KāśyaS. 53A. 32.

अत्यलङ्कृत (aty-alaṅkṛta) *adj.* greatly adorned हयौ … अत्यलङ्कृतौ । … तत्र योजयेत् BṛParāSm. 10. 153.

अत्यलसवाच् (atyalasa-vāc) *adj.* very indistinct or slow in speech सवितृसुतलग्नेऽत्यलसवाक् Bṛhajjā. 20. 9.

अत्यलसशिष्य (atyalasa-śiṣya) *m.* very lazy disciple कुरडग्रामे धरडो नाम भरटकोऽभूद् मूर्खोऽत्यलसशिष्ययुत: Bharaṭ. 12A. 10.

अत्यलौकिक (aty-alaukika) *adj.* extremely uncommon तस्य स्वातन्त्र्येण जगत्कर्तृत्वेऽत्यलौकिकमाहात्म्यवत्त्वेन निरूपणं नोपपद्येत AṇuBh. 37. 2 (*on* i. 1. 15); 225. 14 (*on* iii. 3. 23)

अत्यल्प (aty-alpa) *adj.* [*f.* -ā] **A** very small, very limited, tiny (in size or dimensions) तस्मादतिदूरमत्यल्पमिति यजमानस्य हवमियादेव GopBr. ii. 6. 14; तत्र वक्रम् …अत्यल्पम् … इत्यष्टौ शस्त्रदोषा: SuśruS. i. 8. 9; वटस्य बीजमत्यल्पं तत्कार्यमतिपीवरम् PramāVāBh. 42. 6; तत्कथमत्यल्पं चक्षुरधिष्ठानं परमात्मन: परममहत: Bhām. 175. 7 (*on* i. 2. 14); किमिच्छसि पदत्रयं ननु भुवा किमत्यल्पया SubhāRaK. 6. 11; मानमुन्मानमत्यल्पं परिमाणम् VedāntKau. 225. 18 (*on* ii. 3. 22); **B** very small, very short (in duration) अत्यल्पम् … नोत्तरं शस्यते बुधै: KātySm. 173; VyavaMa. 15. 17; आयुरस्ति तवात्यल्पं गम्यतां पौर्विकी तनु: PadmP. iv. 105. 16; भूतजीवितमत्यल्पम् SūktiRa. 197. 11; **C** very small (in amount or degree), petty, insufficient (uncountable, abstract) पापान्स्वल्पेऽपि (v. l. पापेऽत्यल्पेऽपि) तान् हन्यादपराधे तथानृजून् MahāBhā. iii. 29. 27; अत्यल्पमिदमुच्यते MahāBh. i. 486. 15 (*on* ii. 4. 49) = NyāyVār. 104. 17 (*on* i. 1. 23) = Bṛha. 228. 6 (*on* i. 1. 5) = ChāndoUBh. 498. 11 (*on* viii. 5. 4) = PraśnaUBh. 274. 17 (*on* 4. 5) = BṛĀraUBh. 284. 19 (*on* ii 3. 3) = ManuBh. i. 199. 18 (*on* 3. 1) = i. 208. 16 (*on* 3. 5) = NyāyRa. 197. 18 (*on* 4. 213) = PramāMā. 21. 3 = SarvaDaSaṁ. 4. 146 = Prasā. ii. 785. 14 = S'ivLī. 14. 30 = MayūMāli. 202. 24 (*on* iii. 1. 11) = 832. 13 (*on* xi. 4. 3) = LalitāSaBh. 200. 34 (*on* 236); (आहार:) उपयुक्तस्तथात्यल्पो न सामर्थ्याय कल्पते Saund. 14. 3; क्रूरकोष्ठस्य चात्यल्पं मन्दवीर्यमभेदनम् CaraS. i. 26. 94 (1941 Ed.); हिरण्यमस्य दर्शयेदत्यल्पमिति च ब्रूयात् ArthS'ā. ii. 199. 10 (5. 2); अत्यल्पमिदमस्माकं निवापोदकभोजनम् Mṛcch. 10. 17; अत्यल्पं चेदमुच्यते BrahmSūBh.(S'aṅ.) 299. 12 (*on* ii. 1. 9); Kāśi. ii. 135. 25 (*on* 5(3). 88); अत्यल्पमपि तत्कार्यं नान्यस्त्वत्तोऽस्ति मे प्रिय: ĀdiP. 20. 4; प्रायेण प्राणिनो दु:खं सुखमत्यल्पमुच्यते VarāṅgaC. 15. 75; तदा न शूद्रस्य दशम एवांश:, किं तर्हि, अत्यल्पं नाधिकतरं धनं लभते ManuBh. ii. 290. 10 (*on* 9. 154); अत्यल्पमेतत् VedāSaṁ. 131. 13; अत्यल्पश्च कथं मुक्तस्य भोगो भवति VedāntDī. 250. 12 (*on* iv. 4. 19); अत्यल्पमिदमन्वयुङ्क्था: PramāMī. 1. 6 (*on* i. 1. 0); सुखं विषयसेवायामत्यल्पं सर्षपादपि PariPar. 2. 190; 6. 20; PāṇḍaC. 14. 15; तण्डुलादीनां च त्यागोऽत्यल्पादीनाम् Aparā. 259. 20 (*on* 1. 184); भवेत्सादृश्यमत्यल्पं तृतीयं परमात्मना AnuVyā. 36B. 6 (*on* 2. 3); धान्यानामत्यल्पानां बहुमलोपघाते त्याग: ManvaVi. 668. 19 (*on* 5. 119); सर्वो विकारो वाचारम्भणत्वादत्यल्प: PrakaVi. 143. 17; अस्मिन्नर्थे पुरायं मया जित इति वक्तव्ये पुरा मयेत्येतावन्मात्रमुत्तरमत्यल्पमित्यर्थ: SmṛtiCan. iii. 100. 3; दारिद्र्ये दानमत्यल्पमपि लाभाय भूयसे PrabaCin. 58. 9 = KumāPraPra. 42. 27; CitraPaC. 310; अत्यल्पमपि साधूनां शिलालेखेव तिष्ठति । जललेखेव नीचानां यत् कृतं तद्विनश्यति SūktiRa. 181. 3; CāṇaSāSaṁ. 3. 21; अत्यल्पमेतद्भवतेरितं मुने S'aṅkaDigVi.(Mā.) 8. 45; Jīvān. 336. 2; अत्यल्पमिदं कथितं यत्सर्वं खल्विदं ब्रह्म VarivaRaha. 146; **D** very insignificant, of very small value or importance, very low अत्यल्पं हि तदस्या: सुलक्षणस्याकृतेरमुष्येति KathāSaSāg. viii. 2. 391; यदुल्लासाय संरम्भो धीरैर्विस्तार्यते महान् । कृत्यं हिनस्ति तद्दैवमत्यल्पेनैव वस्तुना RājTa.(Ka.) 7. 917; अत्यल्पमपि तद्रक्ष्यमात्मच्छिद्रं निजे प्रभौ TriṣaS'aPuC. i. 5. 104; असंस्थानात्मकेषु वाय्वादिषु सामान्यप्रत्ययस्तूत्पद्यते । स त्वन्मते न स्यादित्यभिप्राय: । अत्यल्पं चेदम् S'arka. 82. 12; अत्यल्पमिदम् अखिलमेव कार्यजातं सत्त्वसामान्यनिर्माणं प्रसज्येत TattvBi. 39. 3; अत्यल्पमेतत् । न ह्यत्र त्रयीविदो विवदन्ते यद्वासुदेव: परमात्मा अखिलजगत्कारणमिति ĀgaPrā. 42. 9; अत्यल्पेऽपि क्रियालोपे प्रमाद्यन्तं कदाचन । आचुक्रोश मुनिर्ग्रामम् MalliC. 8. 318; **E** very few (numerically), very small, very rare संख्ये संख्यां रावणिर्वानराणां तामत्यल्पां चापहस्तश्चकार RāmC. 30. 17; अत्यल्प: परिवारोऽयं ताम्बूलप्रणयी स्थित: SamaMā. 7. 30; तच्च च्छत्रं ययौ सिद्धिमत्यल्पैरेव काञ्चनै: RājTa.(Ka.) 7. 531; मितै: परिजनैर्युतम् । यूथनाथमिवात्यल्पैर्द्विपै: RājTa.(Ka.) 8. 2130; यत्र…सोऽत्यल्पोऽष्टकलं तत्स्यात्कपालं त्वार्षभीगतम् SaṁgīRa. i. 276. 1 (1 (8). 4); अत्यल्पम् (उत्तरम्) यथा – सुवर्णशताभियोगे पञ्चाशतं धारयामीति VyavaNi. 58. 5; मिताक्षराधृतवचनम् – सन्दिग्धमन्यत्प्रकृतादत्यल्पमतिभूरि च ।… अत्यल्पम् – सुवर्णशताभियोगे पञ्च धारयामीति VīraMi.(Vyavahāra.) 62. 10; अल्पं शतधनु: प्रोक्तमत्यल्पं च तदर्धकम् (मण्डलं गतिशिक्षणे) S'ukraNī. 4(7). 131; 4(5). 140; अत्यल्पोऽयं सर्वनि:शेषभजनार्हं उपपन्न: SiddhāTaVi.(S'eṣavāsanā.) 53. 16; अत्यल्पेष्वाज्यभागादिष्वेव प्रयोगविधिव्यापारकल्पना MayūMāli. 848. 4 (*on* xii. 1. 2)

अत्यल्पक (atyalpa-ka) *adj.* [*f.* -ikā] very little, small or slight दातव्यैव यज्ञे दक्षिणा भवत्यत्यल्पिका AitBr. 30. 9 (795); अत्यल्पकेऽपि व्यसनांशलेशे न संवृतिर्यै: क्रियते प्रयत्नात् । तेषाम् … विपदो भवन्ति DaśāvaC. 7. 197; तादृक्साधुद्रुहामीदृग्गतिरत्यल्पकं फलम् PrabhāC. 24. 26; ViśvaPra. 42. 14; MediK. 41. 16.

अत्यल्पकाल (atyalpa-kāla) *m.* very short span of time, very short period अथवात्यल्पकालोऽस्य राज्यस्याज्ञायि भूभुजा RājTa.(Prā.) 106.

अत्यल्पकालभाविनी (atyalpakālabhāv-inī) *adj.* (*f.*) lasting for a very short time चण्डोऽवन्तिषु मातङ्ग: पिशितस्य निवृत्तित: । अत्यल्पकालभाविन्या: प्रपेदे यक्षमुख्यताम् YaśasCam. ii. 333. 20.

अत्यल्पजीविता (atyalpa-jīvitā) *adj.* (*f.*) extremely short-lived काश्चिदत्यल्पजीविता: YogVā. iv. 11. 71.

अत्यल्पतण्डुलक (atyalpataṇḍula-ka) *adj.* having very little rice (in it) पायसं पयोबहुलमत्यल्पतण्डुलकं परमान्नम् LalitāSaBh. 224. 28 (*on* 295)

अत्यल्पतण्डुला (atyalpa-taṇḍulā) *adj.* (*f.*) with very little rice (in it) जीर्णस्नेहं ततो नरम् । यवागूं पाययेत् … अत्यल्पतण्डुलाम् SiddhYo. 71. 9.

अत्यल्पतम (atyalpa-tama) *adj.* **i** very few केचित् … दुर्बुद्धयोऽत्यल्पतमा निनिन्दु: VarāṅgaC. 29. 56; **ii** excessively insignificant तदिदं प्रतिपादनम् … अत्यल्पतममिति धूलिपदेन ध्वन्यते LalitāSaBh. 85. 1 (*on* 119)

अत्यल्पतर (atyalpa-tara) *adj.* very few अत्यल्पतराप्रधानार्थविवादस्य प्रधानभेदकत्वाभावात् S'atDū. 56. 16.

अत्यल्पतस् (atyalpa-tas) *adv.* very scarcely, in very few cases कुष्ठस्या(त्य)ल्पतो न्याय्यं, (रेकं) बहुशश्छर्दनं स्मृतम् BhelaS. 142. 18 (6. 6)

अत्यल्पता (atyalpa-tā) *f.* the state of being very small or insignificant, extreme paucity अमानक्लृप्तिसन्मानव्यवस्थात्यल्पताभवा: । विशेषदृष्टिवाक्ये च पुंशक्ति: सुनिदर्शनम् AnuVyā. 38A. 10 (*on* 3. 2)

अत्यल्पतापादन (atyalpatāpādana) *n.* producing or effecting extreme smallness भेदस्य वस्तुस्वरूपत्वे विदारणप्रसङ्गेनात्यल्पतापादनमप्यसङ्गतमेव NyāySu.(Ja.) 382A. 11 (*on* ii. 2. 6)

अत्यल्पत्व (atyalpa-tva) *n.* **i** the state of being very unimportant, insignificant or scanty षष्ठप्रत्ययोऽप्यर्धपरिच्छित्तिरित्येके । सोऽत्यल्पत्वात् पुरुषेच्छानुविधायित्वेनानियतत्वाच्च नोक्त: MṛtaSaṁ. 237. 17 (*on* 8. 33); अन्नप्राचुर्यकथनस्यात्यल्पत्वात् TattvPrakā. 17A. 12 (*on* i. 1. 13); **ii** extreme paucity, the state of being very few in number सुखाभाववचनानामत्यल्पत्वात् तेषामेवान्यथाकरणं युक्तम् S'āstrDī. 126. 8 (*on* i. 1. 5); **iii** the state of being too small पञ्चाशतमिति । अर्धन्यूनतयात्यल्पत्वम् BālamBha. ii. 13. 1 (*on* 2. 7)

अत्यल्पत्वोक्ति (atyalpatvokti) *f.* the statement of being very small

or little भेदस्यात्यल्पत्वोक्त्या तस्य भानमात्रं न तु तत्त्वत: सोऽस्तीति ध्वनितम् SetuBa. 189. 28.

अत्यल्पदर्शिन् (aty-alpadarśin) *adj.* very much short-sighted पापेन क्रूरेणात्यल्पदर्शिना । श्रुत्वा निहतमाचार्यमश्वत्थामा किमब्रवीत् MahāBhā. vii. 166. 15.

अत्यल्पदेह (atyalpa-deha) *adj.* having a very thin or small body स्पृश्नी(? पृश्नि)स्त्वत्यल्पदेहे स्यात् ParyāS'aRa. 2. 112.

अत्यल्पद्युज्यका (atyalpa-dyujyakā) *f.* the smallest diameter of the circle (in the sky) made by an asterism in its daily revolution कदम्बमे स्फुटक्रान्तिज्यात्यल्पद्युज्यकासमा । वस्तुभूतापि तद्रीत्या नायात्येवं स्थलान्तरे SiddhāTaVi. 255. 19.

अत्यल्पधनसंपद् (atyalpa-dhanasampad) *adj.* having the acquisition of very little wealth अत्यल्पधनसंपदाम् ।···साध्वसं नियतं तेषाम् BṛNāraP. 4. 73.

अत्यल्पनरक (atyalpa-naraka) *m.* very small hell तेषामत्यल्पनरका जम्बूद्वीपसमा मता: VarāṅgaC. 5. 17.

अत्यल्पनरभेद (atyalpa-narabheda) *m.* very little difference in the altitudes अत्यल्पनरभेदो(? दे)ऽपि छायाभेदो न लक्ष्यते SiddhāTaVi. 229. 21.

अत्यल्पपक्ष्मन् (atyalpa-pakṣman) *adj.* the opening of which has very thin and scanty eyelashes नेत्रं चात्यल्पपक्ष्मास्यम् SarvaSiSaṁ. 11. 22.

अत्यल्पपण्य (atyalpa-paṇya) *n.* very small commodity अत्यल्पपण्यदानप्रश्नप्रतिवचनजल्पने मूक: SamaMā. 8. 54.

अत्यल्पपरितुष्ट (atyalpa-parituṣṭa) *adj.* satisfied with very little विपश्चित: । अत्यल्पपरितुष्टस्य संतुष्टस्य धनेन किम् DarpDa. 2. 59.

अत्यल्पपरिवार (atyalpa-parivāra) *adj.* whose retinue is very small प्रत्युद्ययौ तमत्यल्पपरिवारं कुरूद्वह: PāṇḍaC. 11. 252.

अत्यल्पप्रजा (atyalpa-prajā) *f.* very little progeny अचेतनाया अत्यल्पप्रजासर्गकर° ··· °चेतनविशेषरूपच्छागस्वभावख्यापनाय तद्रूपत्वकल्पनं विरुद्धमेव BrahmSūBh.(Rā.) 357. 11 (*on* i. 4. 10)

अत्यल्पप्रपञ्च (atyalpa-prapañca) *m.* elaboration of very few cases अन्यथा समन्वयसूत्रेणैवालम् । किमनेनात्यल्पप्रपञ्चेनेति NyāySu.(Ja.) 125A. 10 (*on* i. 1. 6)

अत्यल्पप्रयोजन (atyalpa-prayojana) *n.* very limited purpose अचेतनाया: ··· °चेतनविशेषैकरूपात्यल्पप्रयोजनसाधन° ··· °चेतनविशेषरूपच्छागस्वभावख्यापनाय तद्रूपत्वकल्पनं विरुद्धमेव BrahmSūBh.(Rā.) 357. 12 (*on* i. 4. 10)

अत्यल्पफल (atyalpa-phala) *n.* very little fruit अहो महदिदं वैचित्र्यं यदेकस्मिन्नेव कर्मणि वर्तमाना: संकल्पमात्रभेदेन केचिदत्यल्पफलभागिन: GītāBh.(Rā.) 475. 2 (*on* 9. 25); *adj.* having very little fruit यत्तु ज्ञानम् ··· एकस्मिन् कर्तव्ये कर्मणि ··· अत्यल्पफले कृत्स्नफलवत्सक्तमहैतुकम् GītāBh.(Rā.) 676. 24 (*on* 18. 22)

अत्यल्पबल (atyalpa-bala) *adj.* with a very small army अत्यल्पबला अपि दुर्गाश्रिता महाबलैररिभिर्न सहसा शक्यन्तेऽभिभवितुम् ManuBh. ii. 23. 18 (*on* 7. 73); बलीयसात्यल्पबल: शूरेण न च विग्रहम् । कुर्यात् S'ukraNī. 4(7). 251.

अत्यल्पबलवत् (atyalpabala-va(n)t) *adj.* possessing a very small army अत्यल्पबलवान् राजा स्थिरो द्वन्द्वबलाद् भवेत् YuktiKa. 17. 7.

अत्यल्पबहुग्राहिणी (atyalpabahu-grāhiṇī) *adj.* (*f.*) catching very little or more न वातिसंनिकृष्टां विप्रकृष्टामत्यल्पबहुग्राहिणीं वा सूचीं पातयेत् AṣṭāSaṁ. i. 187. 22 (1. 38)

अत्यल्पबान्धव (atyalpa-bāndhava) *adj.* having very few kinsmen अल्पमित्रो गृही हीनबाहात्यल्पबान्धव: । स्यात् SamarāSū. 48. 30.

अत्यल्पबिन्दु (atyalpa-bindu) *m.* very few dots अत्यल्पबिन्दुसहिता यदि खेचरेन्द्रा: केमद्रुयोगफलदा विबलाश्च सर्वे JātaPā. 7. 71.

अत्यल्पबीजत्व (atyalpabīja-tva) *n.* the state of possessing very little seed (semen or sperm) पित्रोरत्यल्पबीजत्वादासेक्य: पुरुषो भवेत् SuśrnS. iii. 2. 38.

अत्यल्पबुद्धि (atyalpa-buddhi) *adj.* having very little intellect तेनास्मि ··· अत्यल्पबुद्धिना ··· दूषित: Mṛcch. 10. 28 (174); (कलौ) आसनस्थान्द्विजान्दृष्ट्वा चलन्त्यत्यल्पबुद्धय: SkandP. i(2). 40. 227.

अत्यल्पबोध (atyalpa-bodha) *m.* very little cognition or consciousness स्वापे देहपरिवर्तनादिस्तु ··· अत्यल्पबोधे सति भवति S'rutaPra. iA. 104. 6 (*on* i. 1. 1)

अत्यल्पबोधन (atyalpa-bodhana) *n.* very little knowledge जन्मकाले महज्ज्ञानं शैशवेऽत्यल्पबोधनम् PadmP. iv. 110. 450.

अत्यल्पभक्षण (atyalpa-bhakṣaṇa) *n.* eating very little अन्यत्रात्यल्पहरणे कणानां नात्यल्पल(? भ)क्षणम् ManvaVi. 1427. 13 (*on* 11. 167)

अत्यल्पभाषिन् (atyalpabhāṣ-in) *adj.* speaking very little अव्यक्तजल्पी (v. l. अत्यल्पभाषी) मध्वक्षो मध्यम: पाण्डवो बली MahāBhā. v. 50. 20.

अत्यल्पभेदत्व (atyalpabheda-tva) *n.* the state of having very little difference होमयागयोरत्यल्पभेदत्वाद्धोमात्मके श्राद्धे अनास्थया यजेदित्युक्तिर्युज्यते SmṛtiCan. v. 345. 13.

अत्यल्पम् (aty-alpam) *adv.* very briefly अत्यल्पमिदमुच्यते भयेनेति MahāBh. i. 390. 21 (*on* ii. 1. 37); NyāyMañ. i. 5. 8; ii. 54. 18.

अत्यल्पमात्र (atyalpa-mātra) *adj.* of very little or very small measure अत्यल्पमात्रमपि कर्म कृतं कदाचित् NyāyMañ. ii. 117. 13.

अत्यल्पमूल्य (atyalpa-mūlya) *adj.* of very small value, costing very little अत्यल्पमूल्यो गोमेदो नोन्मानं तु यतोऽर्हति S'ukraNī. 4(2). 81.

अत्यल्पमेधस् (atyalpa-medhas) *adj.* of very poor intellect येऽत्यल्पमेधसस्तेऽपि साधवोऽध्येतुमागमम् । उपचक्रमिरे PariPar. 12. 187; अत्यल्पमेधस: सर्वे तव सब्रह्मचारिण: PariPār. 12. 213.

अत्यल्पयष्टिका (atyalpa-yaṣṭikā) *f.* the very minimum height from the horizon फलोनलम्बमौर्वी स्यात्स्वस्थानेऽत्यल्पयष्टिका । स्वदिग्लवोनलम्बज्या स्थूला वात्यल्पयष्टिका SiddhāTaVi. 198. 21.

अत्यल्पर्षभगान्धार (atyalparṣabhagāndhāra) *adj.* with very rare *ṛṣabha* and *gāndhāra* (notes) अत्यल्पर्षभगान्धारं पन्यासं मधभूरि च SaṁgīRa. i. 276. 9 (1(8). 8)

अत्यल्पलब्धा (atyalpa-labdhā) *adj.* (*f.*) received in a very small quantity ततो दुर्भिक्षमाहात्म्याद्भिक्षयात्यल्पलब्धया । सारयित्वा गुरूणां तौ भुञ्जानौ PariPar. 8. 383.

अत्यल्पविभव (atyalpa-vibhava) *m.* very little wealth or fortune भट्ट: ··· अत्यल्पविभवपरिप्लुतमात्मगोचरं भवान्तरमाकर्ण्य YaśasCam. ii. 309. 27.

अत्यल्पविषयाधिप (atyalpaviṣayādhipa) *m.* ruler of very small territory स मेने विधिरात्मानमत्यल्पविषयाधिपम् BrahmVaiP. iv. 33. 74.

अत्यल्पवृष्टि (atyalpa-vṛṣṭi) *f.* **1** too much or too little rain प्रावृष्यत्यल्पवृष्टिभ्यां कालेऽप्येवं कुत: सुखम् PadmP. ii. 66. 153; **2** very little rain शेषेषु पादत्रितयेषु भीतिरत्यल्पवृष्टिर्महती गदा च VasiSaṁ. 2. 9.

अत्यल्पशिल्पिन् (atyalpa-śilpin) *adj.* having very little skill तं नृशंसेन पापेन क्रूरेणात्यल्पदर्शिना (v. l. अत्यल्पशिल्पिना) । श्रुत्वा निहतमाचार्यम् MahāBhā. vii. 166. 15.

अत्यल्पश्रम (atyalpa-śrama) *adj.* exerting very little सोऽत्यल्पश्रम एव मण्डलयुतो गम्भीरवेदी पृथुर्मन्देभानुकृति: बलीरितवपु: स्यात्सान्द्रपर्वा नृप: YaśasCam. i. 493. 3.

अत्यल्पसत्त्व (atyalpa-sattva) *n.* possessing very little strength का कथात्यल्पसत्त्वाभिभूतां विद्यान्नजारणे PrabhāC. 58. 4.

अत्यल्पसाध्य (atyalpa-sādhya) *n.* very negligible objective ददाह तां पुरीं चक्रं सकलामेव सत्वरम् । अक्षीणामर्षमत्यल्पसाध्यसाधननिस्पृहम् BrahmP. 207. 43.

अत्यल्पसुख (atyalpa-sukha) *n.* very little pleasure अत्यल्पसुखदातृत्वात्कनिष्ठोऽयं स्मृतो बुधै: DeviBhāP. v. 16. 20.

अत्यल्पसैनिक (atyalpa-sainika) *adj.* having very few soldiers तस्मिन्नत्यल्पसैनिके । न तै: प्रहृतम् RājTa.(Ka.) 8. 252.

अत्यल्पहार (atyalpa-hāra) *m.* the smallest divisor अत्यल्पहारं प्रथमं विलिख्याधिकक्रमात्ते सकला विलेख्या: SiddhāTaVi. 406. 2.

अत्यल्पहृदय (atyalpa-hṛdaya) *adj.* extremely small-minded गोप्यं रहस्यभणितमत्यल्पहृदयातिथि । अमृतं पारतमिव नाल्पसत्त्वै: सुदुर्जरम् RājTa.(Ka.) 7. 1690.

अत्यल्पागस् (atyalpāgas) *adj.* who has committed a very slight offence मानिनि ··· अत्यल्पागसि ··· कान्ते पदान्तानते कोऽयम् ··· कोपस्त्वयालंकृत: PadyaVe. 487.

अत्यल्पान्तर (atyalpāntara) *n.* difference between the smallest visible forms of heavenly bodies (like the sun and the moon) नवत्यंशैर्नतांशैरल्पात्यल्पान्तरयोरन्तरं तदेष्टैर्नतांशै: किमिति लब्धमुदयस्थितान्तरे युतं स्वेष्टान्तरं स्याद् दृश्यादृश्यबिम्बयोस्तदर्धमिते ग्रासे ग्रस्तं न लक्ष्यं नृभि: SiddhāTaVi.(S'eṣaVā.) 35. 4.

अत्यल्पायुस् (atyalpāyus) *adj.* who has a short (span of) life अत्यल्पायुरयं बालो भावी श्रुतधर: कथम् PariPar. 5. 82.

अत्यल्पौषधत्व (atyalpauṣadha-tva) *n.* very little quantity of medicine (अ)त्यल्पौषधत्वात् (दुर्योगातियोगौ) KāśyaS. 156A. 34.

अत्यवगाढा (aty-avagāḍhā) *adj.* (*f.*) **1** very advanced or deve-

loped सरसीमिवात्यवगाढां दशां चतुर्थीमुत्सृजन्तम् …अपश्यत् (हस्तिनम्) HarṣaC. 103. 3; **ii** very much dived into, HarṣaC. 103. 3.

अत्यवधान (aty-avadhāna) *n.* extreme attention क्रियादिपरामर्शे सभ्यादीनामत्यवधानेन व्यवहारशेषविचारः VīraMi. (Vyavahāra.) 71. 27.

अत्यवनत (aty-avanata) *adj.* bent very low अत्यवनतशिरसोऽतिदूरगमनात् AṣṭāSaṁ. i. 156. 14 (1. 29); बडिशोऽत्यवनतमुखः … ग्रहणे AṣṭāSaṁ. i. 172. 7 (1. 34); i. 140. 1 (1. 27)

अत्यवपीड (aty-avapīḍa) *m.* excessive use of nasal ointment दीर्घे महास्रोतसि च ज्ञेयमत्यवपीडवत् SuśruS. iv. 36. 10.

अत्यवश्यम् (aty-avaśyam) *adv.* quite certainly [DBHS]

अत्यवसृज् (aty-avasṛj-) VI. P. to let loose. to let go, to discharge कार्मुकमादाय … । तत्राधाय शरम् … आचार्यः … अभ्य (v. l. त्य)वासृजत् MahāBhā. vii. 101. 61; स्वरश्मीनभ्य (v. l. त्य) वसृजेत् … कालवित् MahāBhā. xii. 88. 32; धेनुं सवत्सामभ्य (v. l. त्य GORR. Ed.) वासृजत् (भरतः) Rāmā. ii. 1812* (74)

अत्यवसृत्य (aty-avasṛtya) *ger.* having receded अभ्य (v. l. त्य) वसृत्यैव संग्रामादुत्तरां दिशम् । अतिष्ठदाहवे द्रोणो विधूम इव पावकः MahāBhā. vii. 161. 21.

अत्यवसेचन (aty-avasecana) *n.* causing excessive bleeding वायुः … मृत्युं चात्यवसेचनात् कुर्यात् CaraS. vi. 29. 40 (1941 Ed.)

अत्यवस्थ (aty-avastha) *adj.* transcendent of all (three) stages (wakeful, dream and sleep) वक्ष्यामि वत्स तव वाञ्छितमत्यवस्थम् SaṁkṣeŚā. 1. 93 (i. 85. 15)

अत्यवस्था (aty-avasthā) *f.* extremely (bad) condition कुमारावत्यवस्थया … आगत्यारक्षान्तिके स्थितौ PārśvC. 2. 835.

अत्यवहन (aty-avahana) *n.* complete absence of carrying (burden) वाजिनामत्यवहनात् सुदोषाः संभवन्ति हि । कृशः … जायतेऽत्यन्तवाहनात् S'ukraNī. 4(7). 120.

अत्यवहित (aty-avahita) *adj.* very harmful (वृक्कादि मांसात्) जुगुप्सया वा विपाकेऽत्यवहितं भवेत् BhelaS. 128. 20 (6. 4)

अत्यवहितत्व (atyavahita-tva) *n.* great attentiveness नन्वत्यवहितत्वे तमपि न शृणोत्येव Bhāsk. i. 378. 19 (*on* i. 7. 10)

अत्यवहेला (aty-avahelā) *f.* great disregard वीरेणात्यवहेलया विरचितोपेक्षो जडः …विश्वं तृणं मन्यते RājTa.(Jo.) 934.

अत्यवाक्शिरस् (atyavāk-śiras) *adj.* whose head is extremely bent down अत्यवाक्शिरसो नस्यम् … मस्तुलुङ्गेऽवतिष्ठति CaraS. viii. 9. 101 (1941 Ed.)

अत्यवाक्शीर्ष (atyavāk-śīrṣa) *adj.* with too low a head (of the bed) उच्चकैरत्यवाक्शीर्षम् … (शयनम्) परित्यजेत् AṣṭāSaṁ. ii. 164. 14 (5. 7)

अत्यवि (áty-avi) *adj.* [AltGr. II. i. 311] passing through the strainer (of sheep's wool) सोमः … अर्षति … अत्यविः । वायोः … निष्कृतम् ṚV. ix. 13. 1; SV. II. v (1). 3. 1; धीभिर्हिन्वन्ति … वने क्रीळन्तमत्यविम् ṚV. ix. 106. 11; SV. II. iii(1). 18. 2; ṚV. ix. 6. 5; ix. 45. 5.

अत्यवे (aty-ave-) II. P. to know excellently सर्वैरेभिः समायुक्तं सात्यवैदुक्तिकौशलम् PadmP.(Ra.) 24. 35; Kapphiṇā. 8. 10.

अत्यवेक्ष् (aty-avekṣ-) I. P. to look after well संकीर्णानि च धान्यानि नात्यवेक्षत् कुटुम्बिनी MahāBhā. xii. App. 22 (10)

अत्यव्यवस्थितत्व (atyavyavasthita-tva) *n.* the state of being disorderly or deranged पौराणिकस्य वंशानुपूर्वीमध्यगतजन्मक्रमस्यात्यव्यवस्थितत्वात् तदनुरोधेन गोत्रप्रवरनिर्णयस्याकिंचित्करत्वात् VīraMi.(Saṁskāra.) 658. 12.

अत्यश् (aty-aś-) IX. U. **i** to eat violating the prescribed order य्द्यु अश्नाति देवानत्यश्नाति … यस्य हविर्न गृह्णन्ति तेनो देवान्नात्यश्नाति S'atBr. I. i. 1. 9; अनवक्लृप्तं यो मनुष्यान् वसतोऽत्यश्नाद् अनवक्लृप्तमिदु तदसद्यो देवान् वसतोऽत्यश्नात् S'atBr.(K.) II. i. 4. 1; XI. i. 7. 1; (K.) II. i. 1. 6; (गान्धारी) बबन्ध नेत्रे स्वे … नात्यश्नीयां पतिमहमिति MahāBhā. i. 103. 13; अहं पतीन् … नात्यश्ने MahāBhā. iii. 222. 36; (पितृमातृगुरून्) नैतानतिशयेज्जातु नात्यश्नीयात् MahāBhā. xii. 109. 10; iii. 197. 13; **ii** to eat too much cf. **अत्यश्नत्.**

अत्यशक्त (aty-aśakta) *adj.* very much weak अत्यशक्तविषयमेवाशिरस्कस्नानं गौणम् BālamBha. i. 344 (? 324). 4 (*on* 1. 100)

अत्यशक्ति (aty-aśakti) *f.* excessive weakness आलस्यान्मूर्खसंयोगाद्भयाद्रोगनिपीडनात् । अत्याशक्याच्च (? अत्यशक्त्या च) मानाच्च षड्भिर्विद्या विनश्यति MāṇḍūS'i. 16. 15.

अत्यशक्य (aty-aśakya) *adj.* extremely impossible अत्यशक्ये तु निद्रादौ पुनरेव समाचरेत् AnuVyā. 49A. 9 (*on* 3. 3)

पार्श्वापवृत्तो वा। तत्रात्युन्नतस्य पृष्ठहृदयपीडा भवति AṣṭāSaṁ. i. 140. 1 (1. 27); हिरण्मयी पार्थिवबाणपङ्क्तिरत्युन्नते मूर्ध्नि महासुरस्य। रेजेतराम् NavaSāC. 17. 58; **Aiv** very thick or puffed up अत्युन्नताश्च गोधूमगोलकाः परिपाचिताः। मुद्गानां वेसवारैस्तु पूर्णा गुरुतरा मताः BhojanKu. 49. 8; **Bi** greatly elevated, very noble, very much exalted अशेषैर्दोषैरनामृष्टात्युन्नतहृदयः EI. viii. 191. 23; iv. 77. 16; i. 86. 17; अत्युन्नतं द्विजकुलं द्विजशापव्याजाद्धत्वा स्वलोकममलं तनुनाभिगन्ता SātvaT. 2. 60; सुचिरं नावतिष्ठते। उदग्रकर्मा च पुमान्निहत्यात्युन्नतं रिपुम् RājTa. (Ka.) 8. 34; प्रथमतरमेव धूर्ताः सगुणानत्युन्नतान् प्रबाधन्ते। स्त्रीणां स्तनेषु लक्ष्मीस्तेष्वेवादौ जरा पतति Subhāṣi. 2862; **Bii** very excellent, very severe, very great or high अत्युन्नतं तपश्चक्रे सामान्यजनदुःसहम् PadmP.(Ra.) 122. 1; तदा कविस्तद्दानमत्युन्नतं दृष्ट्वा ··· राजानं वदति BhojPra. 12. 23; अत्युन्नतपदारूढः पूज्यान्नैवापमानयेत् NītiMañ. 78.

अत्युन्नतकटिग्रीवा (atyunnata-kaṭigrīvā) *adj.* (*f.*) having a very high waist and neck अत्युन्नतकटी(? टि)ग्रीवा उष्ट्रसत्त्वाटवीप्रिया NāṭyaS'ā. 22. 129.

अत्युन्नतगुण (atyunnata-guṇa) *adj.* having very noble qualities अत्युन्नतगुणः शत्रुः श्लाघनीयो विपश्चिताम् PadmP.(Ra.) 78. 29.

अत्युन्नतचेष्टित (atyunnata-ceṣṭita) *n.* very noble action तेन त्वया सार्धमहं विधाय संबन्धमत्युन्नतचेष्टितेन। कृतार्थतामेमि PadmP.(Ra.) 19. 98.

अत्युन्नतत्व (atyunnata-tva) *n.* **i** great protrusion आकर्षतेवोर्ध्वमतिकृशीयानत्युन्नतत्वात्कुचमण्डलेन। ननाम मध्यः ··· अङ्गनानाम् S'iśuVa. 3. 15; **ii** great nobility निद्रा महीभारपरिग्रहश्च श्रीसंश्रयत्वं परयाचनं च। अत्युन्नतत्वं गुणहीनता च किं युक्तमेतत्पुरुषोत्तमस्य SamaMā. 4. 25.

अत्युन्नतधान्यकूट (atyunnata-dhānyakūṭa) *n.* very high heap of grains यदन्तरात्युन्नतधान्यकूटमुद्रामषीमुद्रित एव चन्द्रः। कलङ्कितां याति न चेत् सुधांशौ न गन्धतोऽप्यङ्ककथाप्रसङ्गः Raghunā. 1. 37.

अत्युन्नतपताक (atyunnata-patāka) *adj.* with a very lofty banner हीरनृपालः ··· अत्युन्नतपताकं मनोहरं हूणराजभवनमवजगाहे ĀnandRa. 7. 56 (11)

अत्युन्नतपद (atyunnata-pada) *n.* extremely high position अत्युन्नतपदारूढः पूज्यान्नैवावमानयेत्। नहुषः शक्रतामेत्य च्युतोऽगस्त्यावमाननात् CāruCaS'. 57; SiṁhāDvā. 219. 4; S'ārṅgaPa. 1522.

अत्युन्नतपुर (atyunnata-pura) *n.* very prosperous city अत्युन्नतपुराणां च स्वायत्तीकरणे मतिः ParamāKā. 178. 33.

अत्युन्नतरत्नतोरण (atyunnata-ratnatoraṇa) *n.* very lofty jewelled arch देवः ···। तामत्युन्नतरत्नतोरणशिखाप्रेङ्खोलमुक्ताफलप्रालम्बोच्छलदच्छकान्तिनिकरस्मेरामवापत्पुरीम् NavaSāC. 17. 76.

अत्युन्नतवंश (atyunnata-vaṁśa) *m.* **1** very tall bamboo दधार गर्भे तनयं धरेव सा करीरमत्युन्नतवंशवृद्धये YātrāPra. 1. 123; **2** very noble family, YātrāPra. 1. 123.

अत्युन्नतशरीर (atyunnata-śarīra) *adj.* having a very tall body अत्युन्नतशरीरस्य पीडितोऽत(? थ) बहुद्रवः Hastyāyur. 611. 14 (4. 5)

अत्युन्नतशिरस् (atyunnata-śiras) *adj.* with the head raised very high अत्युन्नतशिरसोऽपि सम्यक्शिरोऽप्रतिपद्यमानं तानेव (हीनदोषान्कुर्यात् नस्यम्) AṣṭāSaṁ. i. 156. 13 (1. 29)

अत्युन्नतसर्वलिङ्ग (atyunnata-sarvaliṅga) *adj.* having all the symptoms excessively prominent सास्रावमत्युन्नतसर्वलिङ्गं सकण्डुरं श्लेष्मयुतं विवर्ज्यम् (श्लीपदम्) RugVi. 39. 7 (comm. येन दोषेणारब्धं श्लीपदं तस्यात्युन्नतानि अतिवृद्धानि सर्वाणि लिङ्गानि यत्र तत्तथा)

अत्युन्नतस्तन (atyunnata-stana) *adj.* with the breasts extremely protruding अत्युन्नतस्तनमुरो नयने सुदीर्घे वक्रे भ्रुवावतितराम् ··· किमपि चाद्भुतयौवनायाः SāhiDa. 112. 4; 236. 3.

अत्युन्नतस्वान्त (atyunnata-svānta) *adj.* in which the heart (of the inhabitant) was very jubilant एवमत्युन्नतस्वान्तम् ··· उन्मत्तमिव संवृत्तं नगरं तत् समन्ततः PadmP.(Ra.) 120. 28.

अत्युन्नति (aty-unnati) *f.* **A** great protrusion स्तनावत्युन्नतिं प्राप्तौ श्यामलीभूतचूचुकौ PadmP. (Ra.) 17. 3; अत्युन्नतिस्फोटितकञ्चुकानि वन्द्यानि कान्ताकुचमण्डलानि VikraDeC. 1. 15; वक्षोजौ करिकुम्भविभ्रमकरीमत्युन्नतिं गच्छतः SāhiDa. 110. 14; **B** great prosperity त्यागेनात्युन्नतिं नीतो येन ··· याचकः RāmāMañ. 448. 2; अत्युन्नतिर्लोकपराभवाय येषां प्रकाशस्तिमिरं हि तेषाम् DarpaDa. 2. 9; **C** great height ते ··· यान्तु ··· परामत्युन्नतिं पादपाः Subhāṣi. 824.

अत्युन्नतिमत् (atyunnati-ma(n)t) *adj.* characterised by great prosperity or height दानपरोऽत्युन्नतिमान् ··· भवति नरेन्द्रः करीन्द्र इव Subhāṣi. 2368.

अत्युन्नतिव्यसनिन् (atyunnati-vyasanin) *adj.* addicted to attaining great prominence अत्युन्नतिव्यसनिनः शिरसोऽधुनैष स्वस्यैव चातकशिशुः प्रणयं विधत्ताम् SūktiRa. 102. 18 = Subhāṣi. 677.

अत्युन्नबोधिपतग (atyunnabodhi-pataga) *m.* bird having a very favourable intention अत्युन्न(?)बोधिपतगा अपि नः स्वपक्षच्छायाभिरुद्गतभयाः प्रियमाचरन्ति RāmC. (App. II.) 37. 42.

अत्युन्नमत् (aty-unnamat) *adj.* greatly protruding वक्त्रेन्दुना ··· अत्युन्नमद्घनपयोधररुद्धभासा पादारविन्दयुगलस्य हृता न लक्ष्मीः Subhāṣi. 1572.

अत्युन्नमय्य (aty-unnamayya) *ger.* raising or stretching up very high [DBHS]

अत्युन्मनस् (aty-unmanas) *adj.* very much disturbed in mind क्षणमप्युन्मनसा रघूद्वहेन। रुरुधे रहसि आञ्जनेयः RāmC. 8. 1; अत्युन्मनास्तदवलोकनकौतुकेन ··· अधिरुरोह पुरन्ध्रिलोकः NavaSāC. 18. 3.

अत्युन्माथिन् (aty-unmāthin) *adj.* excessively rubbed अत्युन्माथिनि चन्दनेऽपि नियतं नामाग्निरुत्तिष्ठति SubhāRaK. 21. 31.

अत्युन्माद (aty-unmāda) *m.* great madness अत्युन्मादो मरणं दश प्रकटिताः कन्दर्पचेष्टा इति PañcSā. 4. 18.

अत्युन्मादसमारम्भ (atyunmāda-samārambha) *adj.* causing great madness मन्मथस्य शरोत्कराः प्रविष्टाः ··· अत्युन्मादसमारम्भाः MahāBhā. iv. App. I. 12. 33.

अत्युन्मिषत् (aty-unmiṣat) *adj.* very much rising दुग्धसिन्धुरत्युन्मिषत्प्रचुरतुङ्गमरीचिवीचिः ··· अनिशमुल्लसतीव यस्याम् HarVi. 1. 6.

अत्युपकारहेतु (atyupakāra-hetu) *m.* cause of great favour वक्तानपेक्ष्य जगता(? द)त्युपकारहेतुम्।··· उपचिनोति फलं विशालम् VarāṅgaC. 1. 11.

अत्युपक्षि (aty-upakṣi-) v. P. to shatter completely महापुरुषः ··· अस्थीनि तस्यात्युपक्षिणोति Kāvyānu.(He.) 253. 11.

अत्युपक्षीणदेह (atyupakṣīṇa-deha) *adj.* with the body very much emaciated अत्युपक्षीणदेहानाम् ··· दोषाः प्रकुपिताः ··· जनयन्त्युन्मादम् CaraS. ii. 7. 3; ii. 8. 4 (1922 Ed.); AṣṭāSaṁ. ii. 212. 4 (6. 9)

अत्युपचार (aty-upacāra) *m.* extra service सा तस्यात्युपचारस्य कारणं परिशङ्किता। पतिं पप्रच्छ RājTa.(Ka.) 8. 1252; अत्युपचारः खल्वेषः PadmPrā. 17. 2; आदावत्युपचारचाटुविनयालंकारशोभान्वितम् ··· धिक् केनाप्यकुलीनसंगतम् ··· उत्पादितम् Pañcā. 74. 6.

अत्युपचित (aty-upacita) *adj.* grown very large अत्युपचितं वा कोपभयान्नित्यमासन्नमरिबलं वासयेत् ArthS'ā. iii. 53. 6 (9. 2)

अत्युपजातनिद्र (aty-upajātanidra) *adj.* who is very sleepy यामिनीम् ··· नात्युपजातनिद्रः प्रायेण जाग्रदेव निन्ये Kād. 118. 19.

अत्युपद्रव (aty-upadrava) *m.* great trouble स्तोत्रम् ··· अत्युपद्रवदुःखघ्नम् BrahmāṇḍP. ii. 36. 44.

अत्युपध (aty-upadha) *adj.* tried, tested शुचिः। मास्यमात्ये चात्युपधे AmaK. 2391; AnekāK. 137.

अत्युपधा (aty-upadhā) III. P. to add (to the length) अरत्निं पक्षयोरत्युपदधाति MānS'S. 148. 3.

अत्युपपन्नसंस्थान (atyupapanna-saṁsthāna) *adj.* possessing a very proportionate body or limbs अयम् ··· नात्युपपन्नसंस्थानः DaśKuC. 70. 18 (comm. अनुगुणावयवः)

अत्युपप्लव (aty-upaplava) *m.* great disturbance सम्यगरूढमूलत्वादत्युपप्लवाद्यनुवृत्त्या असत्कल्पोऽयम् PāṇiTaVāNaMā. 46. 18.

अत्युपमर्दित्व (atyupamardi-tva) *n.* the nature of destroying greatly तत्र विरहतापस्यात्युपमर्दित्वेन AṇuBh. 325. 5 (*on* iv. 2. 13)

अत्युपयज् (aty-upayaj-) I. P. to make an additional *upayaj*-offering सोऽत्युपयजति यज्ञं गच्छ स्वाहेति S'atBr. III. viii. 5. 1.

अत्युपयुक्त (aty-upayukta) *adj.* used excessively य एव ··· इष्यन्ते सुखहेतवस्त एवात्युपयुक्ताः ··· पुनर्दुःखहेतवः संपद्यन्ते AbhidhKoBh. 330. 13 (*on* 6. 3)

अत्युपयुज्यमान (aty-upayujyamāna) *adj.* being excessively used एवं गुणोऽपि स (मधुरो रसः) सदात्युपयुज्यमानः स्थौल्य° ··· °अतिनिद्राः (आवहन्) AṣṭāSaṁ. i. 97. 8 (1. 18)

अत्युपरितनभूमिका (atyuparitana-bhūmikā) *f.* the uppermost storey तत्कालमत्युपरितनभूमिकामेत्य भर्तृसुतया मलयसुन्दर्या यथा सवस्त्राञ्चलग्रन्थिमुन्मोच्य वाचितः ··· इष्टलेखः TilaMañ. 384. 2.

अत्युपसंहृत (aty-upasaṁhṛta) *adj.* brought into close contact अवर्णे नात्युपसंहृतमोष्ठहनु नातिव्यस्तम् TaiPrāti. 2. 12.

अत्युपसेवन (aty-upasevana) *n.* excessive indulgence or employment अत्युपसेवनमतियोगः CaraS. i. 11. 37; अत्युपसेवनाद्वा।··· भवन्ति शिश्ने

पञ्चोपदंशाः BhāvPra.(Bhā.) viii. 51. 1.

अत्युपसेवना (aty-upasevanā) *f.* excessive homage [nt.]

अत्युपसेवमान (aty-upasevamāna) *adj.* practising excessively व्यवायव्यायामसंतापानत्युपसेवमानस्य ... दोषाः प्रकोपमापद्यन्ते CaraS. ii. 5. 7.

अत्युपहति (aty-upahati) *f.* great damage स्नेहानामपि शुद्धिरत्युपहतिर्नो चेदभिद्योतनात् IśānS'iPa. i. 7. 32.

अत्युपहास्यता (atyupahāsya-tā) *f.* the state of being excessively ridiculed or laughed at नो चेद्वो दर्शयामि ह । स्वपराक्रममत्युग्रं यास्यथात्युपहास्यताम् S'ivaP. ii(4). 14. 20 (209A. 15); आयुःक्षतिवि(? वि)कलतात्युपहास्यता च -- स्यादेव यद्यपि रतेन पराङ्गनायाः AnaṅgaRa. 8. 9.

अत्युपादेयत्व (atyupādeya-tva) *n.* the state of being perfectly acceptable or highly suitable for acceptance अतो ब्रह्मसूत्राणामत्युपादेयत्वाद्व्याख्येयता TattvPrakā. 3A. 3 (*on* i. 1. 0); 3B. 13 (*on* i. 1. 0); शांभवम् ... °शिवसंबन्धि यत् तत्त्वम् ... तस्य याः चिन्ताः विचारणानि ता एव रत्नानि अत्युपादेयत्वेन मणयः Bhāsk. ii. 210. 18 (*on* iii. 1. 1)

अत्युपालम्भ (aty-upālambha) *m.* severe reproach or scolding अलमलमत्युपालम्भेन । इदमुचितमुत्सङ्गासनमनुगृह्यताम् PādaTā. 25. 1.

अत्युमा (aty-umā) *f.* name of one of the sixteen S'aktis अमृता नन्दिनीन्द्राणी त्वीशानी चात्युमा तथा (इति षोडश शक्तयः) BrahmāṇḍP. iii. 44. 84.

अत्युरु (aty-uru) *adj.* [*f.* -rvī] very extensive or large एवमत्यन्तचार्वीभिरत्युर्वीभिर्विभूतिभिः । महेन्द्रोदयमुद्यानं जातं नन्दनसुन्दरम् PadmP.(Ra.) 95. 47; वरिष्ठोऽतिवरेऽत्युरौ Vaija. 256. 25; वरीयान् सत्तमेऽत्युरौ Vaija. 256. 26.

अत्युर्वीश (atyurvīśa) *m.* emperor अत्युर्वीशनरेन्द्रपण्डितधनी द्रव्योनभूपो मृगे Bṛhajjā. 19. 3.

अत्युल्बण (aty-ulbaṇa) *adj.* [*f.* -ā] **i** very acute or powerful स तान्प्रमृद्याभ्यपतत् पुनरेव युधिष्ठिरम् । मन्त्रौषधिक्रियातीतो व्याधिरत्युल्बणो यथा MahāBhā. viii. 33. 8; **ii** very loud विप्रघुष्टस्वनानां च दुन्दुभीश्चापि निघ्नताम् । तेषां सुतुमुलः शब्दः (v. l. अत्युल्बणो नादः) पूरयामास तद्वनम् Rāmā. iii. 23. 21; **iii** very prominent or conspicuous, very gaudy प्रतनुश्लक्ष्णाल्पदुकूलता···नात्युल्बणमनुलेपनम् KāmaSū. 237. 6 (4. 1); मणिभिः···नात्युल्बणैर्धनिनः BṛSaṁ. 68. 13; Kāda. 299. 23; शिखाभिराश्लिष्ट इवौर्ववह्नेरत्युल्बणां पाटलतां प्रपन्नः Kapphiṇā. 12. 12; नयनयोरत्युल्बणं कज्जलं वेषोऽयं विरसः NalaCam. 6. 70; यत्र तु वेश्यादिभिर्योगोऽत्युल्बणं चाकल्पादि तत् (प्रहसनं) संकीर्णम् AbhinBhā. ii. 448. 14; Kāvyānu.(He.) 389. 8; SūktiMu. 96. 5; **iv** very powerful or strong नीलो नागपतिर्विभुः । सेव्यमानः ··· नागैश्चात्युल्बणैर्भीमैः NīlaP. 331; अत्युल्बणं हस्तिबलमश्वीयं विश्वविश्रुतम् ··· दर्पं यथा द्विषां घ्नन्ति जनयन्त्यात्मनस्तथा TriṣaS'aPuC. ii. 6. 543; **v** very fierce इत्थं सुराणां दैत्यानां संग्रामस्समभून्महान् । अत्युल्बणः S'ivaP. ii(5). 16. 44 (239A. 14); **vi** abundant, very much, in excess वर्षतां जलदानां च तोयमत्युल्बणं निशि ViṣṇuP. v. 3. 17.

अत्युल्बणकर्णबाण (atyulbaṇa-karṇabāṇa) *m.* (words acting as) piercing arrows to the ears स इत्थमत्युल्बणकर्णबाणैर्भ्रातुः पुरो मर्मसु ताडितोऽपि । ···गतव्यथोऽयात् BhāgP. iii. 1. 16.

अत्युल्बणगन्धत्व (atyulbaṇagandha-tva) *n.* the state of being too strong a smell अत्युल्बणगन्धत्वादेकांशो नित्यमेव धान्यानाम् । कर्पूरस्य BṛSaṁ. 77. 15.

अत्युल्बणजन (atyulbaṇa-jana) *m.* extremely haughty men प्रवृत्ते च पुरक्षोभे ···। अत्युल्बणजनः सर्वो धावति स धृतायुधः RājTa.(S'rī.) 4. 107.

अत्युल्बणपदा (atyulbaṇa-padā) *adj.* (*f.*) having very grandiose or pompous words समासबहुला अत्युल्बणपदा च (गौडीया रीतिः) KāvyālaṅSū. i. 2. 12.

अत्युल्बणपराक्रम (atyulbaṇa-parākrama) *adj.* of very fierce valour अमरैरमृतास्वादादत्युल्बणपराक्रमैः । पराजिता महादैत्याः BrahmāṇḍP. iii. 10. 39.

अत्युल्बणम् (atyulbaṇam) *adv.* very heavily अल्पशेषजीवितोऽयमामीलितलोचनः ··· मुहुर्मुहुरत्युल्बणं श्वसिति Kād. 38. 2.

अत्युल्बणानिला (atyulbaṇānilā) *adj.* (*f.*) having excess of wind or gases भवति क्रूरकोष्ठस्य ग्रहण्यत्युल्बणानिला CaraS. i. 13. 68.

अत्युल्लङ्घिन् (aty-ullaṅghin) *adj.* excelling to a high degree अशेषाश्च ते विश्वंभरेश्वराश्च तैः विश्वंभरेश्वरैः (? तेषां अशेषविश्वंभरेश्वराणां) अतिशायि अत्युल्लङ्घि जन्म उत्सवदिवसो यस्य सः YaśasCam. i. 319. 17 (comm.)

अत्युल्लस् (atyul-las-) I. P. **i** to shine or gleam excessively आकर्ण्य कौरवकुमारबलं प्रचण्डमत्युल्लसन्ति गुरुरोषकषायतारा: (पाण्डवानाम् दृष्टयः) BālBhā. 2. 47; **ii** to resound greatly मुदा लोकस्य सर्वस्यात्यु(? प्यु)ल्लास जयध्वनिः PāṇḍaC. 4. 307; **iii** to cause to agitate or toss very much नृत्योन्मादतरङ्गिणीर्बलवतीरानन्दवात्या क्रमादत्युल्लासयति स्म CaitaCa. 259. 10 (10)

अत्युल्लसत्पक्ष्मन् (atyullasat-pakṣman) *n.* excessively shaking or agitated eyelashes यच्चक्षुरत्युल्लसत्पक्ष्मश्रेणि ··· तेनैवेह मनो हरत्यधरितप्रौढा नवोढा न किम् SubhāRaK. 19. 5.

अत्युल्लसत्परिमल (atyullasat-parimala) *adj.* of which fragrance is very much widespread, of very striking fragrance कस्यानुभावमयमाह तवाप्यकस्मादत्युल्लसत्परिमलो मुकुले विकासः RāmC. 36. 49.

अत्युल्लास (aty-ullāsa) *m.* **i** great joy or delight शरद्यपामिव तदा प्रसादः ककुभामभूत् । अत्युल्लासश्च लोकानां कमलानामिवोषसि TriṣaS'aPuC. ii. 2. 128; छत्रप्रकाशभेदेन केश्चिदेषां (संभोगानां) द्विरूपता । इष्टाप्यत्र न हि प्रोक्ता नात्युल्लासकरी यतः UjjvaNīMa. 590. 3; **ii** great splendour, TriṣaS'aPuC. ii. 2. 128.

अत्युल्लासतुरङ्गम (atyullāsa-turaṅgama) *m.* great joy in the form of a horse निर्गच्छन्ति मुदा ··· अत्युल्लासतुरङ्गमैर्भवजये जैत्रा इवामी भटाः CaitaCa. 251. 17 (10)

अत्युशनस् (aty-uśanas) *adj.* excelling S'ukrācārya बुद्ध्योशनसमत्युशन प्रभाभिः ··· चुलुक्य ··· स्मर देवकार्यम् DvyāśraKā. 2. 2 (comm. शुक्रमतिक्रान्त)

अत्युष्ण (aty-uṣṇa) *adj.* **i** very hot or very warm अथ ग्रीष्मसमत्युष्णं विश्वामित्रोऽभ्युपागमत् MahāBhā. v. 104. 11; नैवातिशीतो नात्युष्णः कालो भवति MahāBhā. xii. 101. 10; iii. 73. 21; रुरोद कृष्णा ··· (मन्युं) द्रवीभूतमिवात्युष्णमुत्सृजद्वारि नेत्रजम् MahāBhā. v. 80. 43 (but नीलकण्ठः - अत्युष्णं वह्निम्, सर्वज्ञनारायणः अत्युष्णं दुःखम्); अत्युष्णमल्पयवसेन्धनोदकं वा देशं हेमन्ते यायात् ArthS'ā. iii. 48. 1 (9. 1); प्रत्यक्षलवणं वर्ज्यमन्नमत्युष्णमेव च MārkP. 34. 28; VāyuP. ii. 18. 53; अत्युष्णे वा दिवा पीतः (स्नेहः) ··· पिपासाम् ··· समीरयेत् CaraS. i. 13. 20; i. 14. 6; SuśruS. vi. 18. 39; BhelaS. 40. 10 (1. 25); अत्युष्णं सर्वमन्नं स्याद्भुञ्जीरंस्ते च वाग्यताः ManuSm. 3. 236; नात्युष्णं भोजने हितम् HāriS. i. 23. 40; i. 5. 58; PāraS. 18. 284; AṣṭāHṛ. i. 13. 34; AṣṭāSaṁ. i. 65. 7 (1. 10); i. 69. 4 (1. 10); VarāṅgaC. 5. 20; SarvaVedāSaṁ. 369; अत्युष्णो वायुः प्रकाशदहनः प्रवर्तते S'vetāUBh. 144. 9 (*on* 2. 11); उष्णमेवात्युष्णं अतिगतमुष्णमिति ManuBh. i. 307. 13 (*on* 3. 236); ParaS. 5. 59; RugVi. 29. 1; SiddhYo. 75. 15; BhāgP. v. 9. 18; कटुतिक्तकषायाणि चात्युष्णलवणानि च ··· गर्भिणी वर्जयेत् ViṣṇuDhaP. ii. 52. 44; PadmP. ii. 32. 20; कालेऽतिशीतेऽत्युष्णे ··· नाभ्यसेद्योगविद्योगम् GaṇeP. 142. 7; S'ivaP. v. 22. 4 (430B. 15); KathāSaSāg. xii. 20. 30; IśānS'iP. i. 45. 143; YogS'ā. 5. 51; GopāKeCan. 73. 4; Hastyāyur. 81. 23 (1. 12); RasRaSa. 5. 172; तिग्मं तीक्ष्णं खरं तप्तमत्युष्णं सोष्मवैकृतम् ParyāMu. 21. 28; **ii** very hot in effect, producing excessive heat नात्युष्णं निंबजं (तैलं) तिक्तं कृमिकुष्ठकफप्रणुत् AṣṭāHṛ. i. 5. 60; माद्वीकं लेखनं हृद्यं नात्युष्णं मधुरं सरम् AṣṭāHṛ. i. 5. 71; i. 6. 116; चणकाम्लकमत्युष्णं दीपनं दन्तहर्षणम् BhāvPraNi. 29. 251; **iii** as much warm as desired or as can be tolerated, lukewarm अत्युष्णमभिमतोष्णम् ManvaVi. 420. 16 (*on* 3. 236); अत्युष्णं कोष्णं सर्वमन्नं स्यात् ManuBhāvCan. 420. 22 (*on* 3. 236); अत्युष्णम् ईषदुष्णम् । अत्युष्णस्य भोक्तुमशक्यत्वात् VīraMi. 116. 16; **iv** forceful, full of zest, very energetic प्रपन्नपरकृत्यानामत्युष्णो हि समुद्यमः RāmC. 1. 56; सत्त्वं (? स त्वं) महत्त्वं प्रथयन् स्वदोष्णोरत्युष्णमेव ध्वजिनीसमग्रः RāmC. 32. 56; 9. 12; [अत्युष्ण is given as one of the meanings of तीव्र, ViśvaPra. 130. 67; MediK. 136. 45; S'abdaRaSaK. 255. 9]

अत्युष्णक (atyuṣṇa-ka) *adj.* very active, very busy अत्युष्णकास्तत्र न के विचेरुर्न शीतकोऽदृश्यत कश्चिदेषाम् Rāvaṇā. 16. 57.

अत्युष्णकोपन (atyuṣṇa-kopana) *adj.* aroused or aggravated by excessive heat वाताच्छिरोरुङ्नात्युष्णात्पित्तादत्युष्णकोपनात् IśānS'iPa. i. 45. 143.

अत्युष्णता (atyuṣṇa-tā) *f.* excessive heat अत्युष्णता, अतितीक्ष्णता ··· इत्येकादश (बस्तिद्रव्यदोषाः) SuśruS. iv. 35. 32; अहमम्बरमणेरत्युष्णतया गन्तुमक्षमः DaśKuC. 16. 7; यामार्धेऽत्युष्णता भवेत् RasRas. 5. 135; अत्युष्णता गुरुत्वं च शिरसो यस्य ज्ञायते AśvaVai. 31. 7.

अत्युष्णतीक्ष्ण (atyuṣṇa-tīkṣṇa) *adj.* excessively hot and sharp अत्युष्णतीक्ष्णानि यथौषधानि नाशं नयन्ते सहसैव देहम् RasRaSa. 30. 107.

अत्युष्णतृष्णा (atyuṣṇa-tṛṣṇā) *f.* thirst due to excessive heat लभेत जलधीन् सर्वान् पिबेदत्युष्णतृष्णया VarāṅgaC. 5. 98.

अत्युष्णतैलपान (atyuṣṇataila-pāna) *n.* drinking of very hot oil अत्युष्णतैलपानम् ··· सेतुस्नायी न पश्यति SkandP. iii(1). 1. 43; अत्युष्णतैलपानम् ··· एवमाद्या यातनाः BṛNāraP. 14. 18; 14. 150.

अत्युष्णत्व (atyuṣṇa-tva) *n.* excessive heat अथ ··· औषधस्य ··· अत्युष्णत्वात् -- दुर्योगातियोगावुपद्येते KāśyaS. 156A. 35; तस्मादग्निरुदकमत्युष्णत्वाद्-

दाहकत्वाद्यस्मिन्निति बहुव्रीहिः कर्तव्यः Pradi. v. 102B. 13 (*on* vi. 1. 91)

अत्युष्णदीर्घ (atyuṣṇa-dīrgha) *adj.* very hot and long अत्युष्णदीर्घैः श्वसितानुबन्धैरुरःक्षेपनिर्ह्रासकदर्थितास्याम् (दयितामपश्यत्) HarVi. 25. 56.

अत्युष्णनिःश्वास (atyuṣṇa-niśśvāsa) *m.* extremely hot breath हर्षः··· अत्युष्णनिःश्वासदग्धयेव च श्यामायमानया रसनया निवेद्यमानदारुणसंनिपातारम्भम् ··· पितरमद्राक्षीत् HarṣaC. 218. 9; प्रेङ्खोलयद्भिरत्युष्णनिःश्वासपवनोर्मिभिः । शातितः शीतिमा कैश्चित् PāṇḍaC. 4. 127.

अत्युष्णपान (atyuṣṇa-pāna) *n.* very hot drink अत्युष्णपानान्ननिषेवणेन रेतोऽसृगण्डोपचयश्च दुष्येत् KāśyaS. 205A. 33; 205B. 19.

अत्युष्णपानीय (atyuṣṇa-pānīya) *n.* extremely hot water शिलाजतुशिलाम् ··· निक्षिप्यात्युष्णपानीये यामैकं स्थापयेत्सुधीः S'ārṅgaS. ii. 11. 94.

अत्युष्णपायस (atyuṣṇa-pāyasa) *adj.* containing extremely hot food cooked in milk अस्यैव पृष्ठे विन्यस्य स्थालमत्युष्णपायसम् । भुञ्जेऽहम् TriṣaS'aPuC. iv. 7. 56; *n.* very hot food cooked in milk पृष्ठेऽस्य श्रेष्ठिनो न्यस्यात्युष्णपायसभाजनम् । चेद् भोजयसि मा राजँस्तदा भुञ्जे TriṣaS'aPuC. iv. 7. 54.

अत्युष्णबाष्प (atyuṣṇa-bāṣpa) *m.* extremely hot tears अत्युष्णबाष्पाम्बुकणप्रतानविदाहभीत्येव विकम्पमानम् ··· बिम्बाधरम् ··· उद्वहन्तीम् ··· दयितामपश्यत् HarVi. 25. 50.

अत्युष्णभस्मन् (atyuṣṇa-bhasman) *adj.* having exceedingly hot ashes कुम्भीपाकेषु पच्यन्ते केचिदत्युष्णभस्मसु VarāṅgaC. 5. 69.

अत्युष्णभोजन (atyuṣṇa-bhojana) *n.* partaking of very hot food, exceedingly hot meal अत्युष्णभोजनाज्जिह्वाकण्ठौष्ठहृदयोदरम् । ··· दह्यते KāśyaS. 258A. 6.

अत्युष्णभोजिन् (atyuṣṇabhoj-in) *adj.* one who habitually takes very hot food or meal राजसः··· अत्युष्णभोजी पानीयमन्तरा प्रचुरं पिबन् SarvaSiSaṁ. 11. 21.

अत्युष्णम् (aty-uṣṇam) *adv.* very hotly श्वसिति मुहुरत्युष्णम् ··· अयम् ĀścaCū. 4. 2; निश्वसन्ति किमत्युष्णमेताः पातालयोषितः RāmC. 24. 42.

अत्युष्णमुखमारुत (atyuṣṇa-mukhamāruta) *m.* extremely hot breath अत्युष्णमुखमारुतमार्गगतेन द्रवतेव गलितताम्बूलरागेणाधरबिम्बेनोपलक्षितम् ··· ज्येष्ठं भ्रातरमपश्यत् HarṣaC. 243. 8.

अत्युष्णमूत्र (atyuṣṇa-mūtra) *adj.* who passes very hot urine ऊर्ध्वा च दृष्टिर्न च संप्रतिष्ठा ··· अत्युष्णमूत्रो विषमस्थ एव ··· सः ··· न जीवति VāyuP. i. 19. 29 = LiṅgaP. i. 91. 32.

अत्युष्णरब्बा (atyuṣṇa-rabbā) *f.* extremely hot Rabbā (a kind of dish) बालोऽप्ययं दग्धोऽङ्गुलीष्वत्युष्णरब्बया PariPar. 8. 296.

अत्युष्णवीर्य (atyuṣṇa-vīrya) *adj.* having an extremely hot nature तैलेनात्युष्णवीर्येण जज्ञे निःसंज्ञको मुनिः TriṣaS'aPuC. i. 1. 762.

अत्युष्णशीत (aty-uṣṇaśīta) *adj.* extremely hot or cold कालश्च नात्युष्णशीतः ManuBh. ii. 53. 16 (*on* 7. 182); नात्युष्णशीतानि पयःसरांसि किञ्जल्कचूर्णैः कपिलीकृतानि । ··· ययुः सुरदन्तिमुख्याः BrahmP. 36. 96.

अत्युष्णशीतल (aty-uṣṇaśītala) *adj.* extremely hot or cold दुष्टो वायुरभिष्यन्दी स्तिमितोऽत्युष्णशीतलः AṣṭāSaṁ. i. 61. 14 (1. 9)

अत्युष्णसर्वाङ्ग (atyuṣṇa-sarvāṅga) *adj.* with the entire body excessively hot भवत्यत्युष्णसर्वाङ्गो ज्वरितस्तेन चोच्यते CaraS. vi. 3. 132.

अत्युष्णसिकतास्नान (atyuṣṇasikatā-snāna) *n.* bath with excessively hot sand अत्युष्णसिकतास्नानम् ··· इत्यादिनरकान् घोरान् सेतुस्नायी न पश्यति SkandP. iii(1). 1. 44; BṛNāraP. 14. 19.

अत्युष्णसेवन (atyuṣṇa-sevana) *n.* partaking in a very hot state विदाहिकटुकाम्लोष्णभोज्यैरत्युष्णसेवनात् । ··· पित्तं प्रकोपं यात्येभिः S'ārṅgaS. i. 2. 33 (comm. अत्युष्णसेवनादित्यातपाग्नीनाम्)

अत्युष्णाध्वगमन (atyuṣṇādhvagamana) *n.* walking on the street in extreme heat अत्युष्णाध्वगमनात् परिश्रान्तनिर्वाणात्सहसा पित्तमुदीर्णं वायुः ··· विधुनोति Hastyāyur. 78. 15 (1. 11)

अत्युष्णान्न (atyuṣṇānna) *n.* excessively hot food अत्युष्णान्नं बलं हन्ति BhāvPra.(Bhā.) 5. 140 = BhojanKu. 216. 18.

अत्युष्णावयवस्पर्श (atyuṣṇāvayava-sparśa) *m.* touch of the excessively hot limbs हर्षः ··· परिचारिकाणामत्युष्णावयवस्पर्शभस्मीभूतोदरैरिव धवलैः करैः स्पृश्यमानं लोकान्तरप्रस्थितम् ··· पितरमद्राक्षीत् HarṣaC. 217. 16.

अत्युष्णाश्रुप्रमार्जन (atyuṣṇāśru-pramārjana) *n.* wiping away of extremely hot tears मुहुर्मुहुरत्युष्णाश्रुप्रमार्जनप्रदग्धमिव करकिसलयं धुनाना ··· प्रतीहार्याजगाम HarṣaC. 227. 1.

अत्युष्णीकृत (atyuṣṇī-kṛta) *adj.* heated to a very great extent, made excessively hot चित्रगुप्तोऽपि ··· अत्युष्णीकृते विततशरावतैले क्षिप्यमाणान् दर्शयित्वा DaśKuC. 13. 13.

अत्युष्णोपक्षीण (atyuṣṇopakṣīṇa) *adj.* in which excessive heat is over (i. e. has subsided) अत्युष्णोपक्षीणे कालेऽहस्तिबलप्रायो यायात् ArthS'ā. iii. 49. 4 (9. 1)

अत्युहा (atyuhā) *f.* *Indigoferā tinctoria* अत्युहा नील्याम् ApūNā. 54. 1, cf. **अत्यूहा**.

अत्युह्य (aty-uhya) *ger.* having carried over अधोऽधोऽक्षं प्रत्यञ्चं द्रोणकलशमत्युह्योर्ध्वपर्यक्षं पवित्रमसिन्करोति KātyāS'S. ix. 2. 16 (comm. प्रेरयित्वा)

अत्यूधस् (aty-ūdhas) *adj.* (*f.*) going beyond the udder ऊधोऽतिक्रान्ता अत्यूधाः SiddhāKau. 120B. 8.

अत्यूध्नी (aty-ūdhnī) *adj.* (*f.*) having a very large udder ऊधसोऽन्यपदार्थे स्त्रियां ङीब् भवति नश्चान्तादेशः । ··· अत्यूध्नी CāndraVyā. ii. 3. 9; KāśiVṛ. *on* P. iv. 1. 26; अतिगतमूधोऽस्याः (अत्यूध्नी) PadMañ. *on* KāśiVṛ. *on* P. iv. 1. 26; Prasā. i. 345. 22; SiddhāKau. 120B. 7; KośaKaTa. 1. 6773.

अत्यूमशा (aty-ūmaśā) *Ind.* [used in comp. with verbs like *kṛ*– etc.] a word included in the Ūryādigaṇa for the designation *gati*, inserted in a list of words said to be having the general sense *hiṁsā*, GaṇPā. 31. 25 [particle of abuse, MW]

अत्यूर्ज् (aty-ūrj) *adj.* extremely vigorous or strong अश्रीयानि सुवलञ्चवल्गिसुमहांस्त्यूर्ज्यनूजिक्षणात् DvyāśraKā. 1. 200; नपुंसकस्य झलचः । ··· बहूर्जि प्रतिषेधः । बहोरन्यत्र अत्यूर्ञ्जि BhāṣāVṛ. vii. 1. 72.

अत्यूर्जस्वल (aty-ūrjasvala) *adj.* extremely powerful or mighty अहो मनुष्यपोतस्य तावदत्यूर्जस्वलं चरितम् MahāvīC. vi. 16 (6)

अत्यूर्जित (aty-ūrjita) *adj.* A extremely powerful अत्यूर्जितं कोपभयादभ्याशे तु रिपोर्बलम् । वासयेत् NītiSā. 19. 22; HarVi. 9. 7; Kapphiṇā. 5. 41; (with abstract notion) तत्सत्त्वमत्यूर्जितम् PriyaDa. 3. 7; तस्मिन्निन्द्रजिता मुहुः प्रकटितं यद्वैरमत्यूर्जितम् AdbhuDa. 5. 15; B vigorous, loud, emphatic वाक्यं जगाद ··· अत्यूर्जितं रणनयान्तरतत्त्ववेदी HarVi. 13. 8; 16. 4; (रिपुतर्जितानि) यावत्प्लवङ्गबलमध्यगयोर्नं पश्यस्यत्यूर्जितानि पतिदेवरयोरदूरे RāmC. 8. 94; अत्यूर्जितं गर्जितम् S'rīKaC. 4. 51.

अत्यूर्जितम् (aty-ūrjitam) *adv.* very loudly गर्जन्नत्यूर्जितं ··· । जनेनालक्षि स गजः PariPar. 4. 27; जगर्जात्यूर्जितं गजः SamarāSaṁ. 7. 450; [most excellent, nt.]

अत्यूर्जितश्री (atyūrjita-śrī) *adj.* with great majesty स दिव्यदृक् । आसन्नमृत्युं दैत्येन्द्रं ददर्शात्यूर्जितश्रियम् NaraP. 44. 3.

अत्यूर्जितसत्त्व (atyūrjita-sattva) *n.* great nobility अतस्त्वयात्यूर्जितसत्त्वशालिना समन्तभद्रेऽपि वचस्युदीरिते HarVi. 12. 21.

अत्यूर्जिताकार (aty-ūrjitākāra) *adj.* of very noble form संकल्पात्ससृजे दिव्यम् ··· । लोकमत्यूर्जिताकारम् BṛBrahmaS. i. 3. 61.

अत्यूर्ध्व (aty-ūrdhva) *adj.* very high or tall अत्यूर्ध्वम् ··· भवनम् ··· ददर्श रामः BrahmāṇḍP. ii. 32. 9; तन्मध्यदेशे रम्ये च ददर्श शंकरालयम् । ··· अत्यूर्ध्वम् BrahmVaiP. iii. 29. 15.

अत्यूर्ध्वगतिद (atyūrdhvagati-da) *adj.* bestowing a very noble status (सिद्धः ··· कथयामास) अत्यूर्ध्वगतिदं कञ्चिदूर्ध्वाम्नायम् ParamāKā. 140. 76.

अत्यूर्ध्वगम (atyūrdhva-gama) *m.* rising very high अतिक्रमेऽत्यूर्ध्वगमे चात्यारूढं नपुंसकम् AnekāK. 207.

अत्यूर्ध्वम् (aty-ūrdhvam) *adv.* very highly अत्यूर्ध्वं प्रापयामास जया तस्मै जयं ददौ BrahmVaiP. iv. 27. 39.

अत्यूर्ध्ववलिता (atyūrdhva-valitā) *adj.* (*f.*) curved excessively upwards अत्यु(? त्यू)र्ध्ववलिता चैव वाजिनां निन्दिता गतिः AśvaVai. 3. 95 (comm. अत्यूर्ध्वा अत्युन्नता । वलिता भङ्गीयुक्ता)

अत्यूर्ध्वाक्ष (aty-ūrdhvākṣa) *adj.* who has raised his eyes high or upwards अत्यूर्ध्वाक्षोऽतिरश्चात् । शिशिरः प्रद्दश्यते TaiĀ. i. 6. 1 (33. 1)

अत्यूर्मि (áty-ūrmi) *adj.* overcoming the waves, overblowing अत्यूर्मिः ··· सोमः पवित्रे अर्षति ṚV. ix. 17. 3; *f.* great or many ripples दग्धकुण्डम् ··· अत्यूर्मियुक्ततोयं च प्रतप्तक्षारसंयुतम् BrahmVaiP. ii. 33. 69.

अत्यूष्मन् (aty-ūṣman) *adj.* very hot अत्यूष्मभिर्निःश्वासैः S'ṛṅgāTi. (Ru.) 1. 45.

अत्यूष्मल (aty-ūṣmala) *adj.* very hot सा बाष्पमत्यूष्मलमुद्वहन्ती S'ivLī. 29. 44.

अत्यूह् (aty-ūh-) to convey across, cf. **अतिवह्** [MW]

अत्यूह् (aty-ūh) cf. **अत्योह्**.

अत्यूह् (aty-ūh-) I. P. to place before ब्रह्म वा एतत्पुरस्ताद्राष्ट्रस्यात्यौहीत् MaiS. iv. 3.8; iv. 7.8; cf. **अतिवह्, अत्योह्**.

अत्यूह (atyūha) *m.* 1 bulbul कैरात: कोकिलोऽत्यूह: CaraS. i. 27.48; 2 pea-cock अत्यूहश्चित्रमेखले AnekāSaṁ. 3.755; NānārthāSaṁ. ii. 58.138; VisvaPra. 181.19; MediK. 191.13; S'abdaRaSaK. 342.3; दात्यूह: कालकण्ठक: । अत्यूहोऽपि च दात्यौहे KalpaK. 335.162; 3 penis of an elephant अत्यूह: ककुदं मेढ्रे Vaija. 110.80; NāmaMāli. 467; अत्यूहो गजमेढ्रे ना NānārthāSaṁ. ii. 58.138.

अत्यूह (aty-ūha) *adj.* having excessive deliberation त्रि त्वत्यर्थोहकादिषु NānārthāSaṁ. ii.58.138.

अत्यूहा (aty-ūhā) *f.* *Indigofera tinctoria* अत्यूहा तु नीलिकायाम् AnekāSaṁ. 3.756; VisvaPra. 181.19; NānārthāSaṁ. ii. 58.138; MediK. 191.13; S'abdaRaSaK. 342.3.

अत्यूह्य (aty-ūhya) *ger.* having carried through तत्र विख्यातदोषेणापि विदुषा स्वातन्त्र्येण व्रतमत्यूह्य कार्यम् Aparā. 1210.8 (*on* 3.300)

अत्यृज् (aty-ṛj-) I. U. to convey across स्वस्ति हैनमत्यर्जन्ति स्वर्गं लोकमभि य एवं वेद AitBr. ii. 4(45); तथेति तं तुरीयेऽत्यार्जत AitBr. ix. 1(238); xiv. 4(404)

अत्यृद्ध (aty-ṛddha) *adj.* very much developed कथं समृद्धमप्यृद्धं (v. l. अत्यृद्धं) तपो भवति केवलम् MahāBhā. v. 43.6.

अत्यृष् (aty-ṛṣ-) I. P. to flow through मही न धारात्यन्धो अर्षति ṚV. ix. 86.44; TaiBr. III. x. 8.1; सोम: … अत्यर्व्यमर्षति ṚV. ix. 107.17.

अत्ये (aty-e-) II. P. to come over hither सर्वे देवा अत्यायन्ति AV. xi. 10.14; xi. 10.15.

अत्येतवै (áty-etavái) *inf.* to cross easily, traversable, अकुर्धन्वान्यत्येतवा उ ṚV. v. 83.10.

अत्येतु (aty-étu) *adj.* [DEBRU. p. 652] for overcoming or escaping ता भूरिपाशावनृतस्य सेतू दुरत्येतू रिपवे मर्त्याय ṚV. vii. 65.3.

अत्येतुम् (áty-etum) *inf.* **A i** to pass beyond, to go beyond न ह वै सप्त स्रवन्तीरघमत्येतुमर्हति S'atBr. XIII. viii. 4.2; न वा इमां कश्चन तिर्यङ् नोर्ध्वोऽत्येतुमर्हति S'atBr. XIII. i. 4.2; नाशक्नोदत्येतुं बाणगोचरम् … मारीचो रामहस्तिन: Bhaṭṭi. 9.134; PārthPa. 41; **A ii** to overcome न दिष्टमर्थमत्येतुमीशो मर्त्य: कथंचन MahāBhā. iii. 136.13; **A iii** to transgress, to disobey गुरो: शासनमत्येतुं न शशाक स राघव: Kāvyāda. 2.301 = SaraKaṇṭhā. 677.11.

अत्येनस् (aty-enas) *n.* great fault चक्रे सामात्येन: स्मरता मात्स्येश्वरेण YudhiVi. 6.62.

अत्येश (atyeśa) *m.* great Lord(?) अत्येशाग्रे गुरुं प्रणमेदिति कश्चित् PārāSū. 36.10.

अत्येष् (aty-eṣ-) I. P. to move across अजा रोह सुकृतां यत्र लोक: शरभो न चत्तोऽति दुर्गाण्येष: AV. ix. 5.9.

अत्येष्यत् (aty-eṣyát) *adj.* intending to cross over अग्निर्वा एष धुर्यस्तमेतदत्येष्यन्भवति S'atBr. I. i. 2.10.

अत्यैश्वर्य (aty-aiśvarya) *n.* great wealth अत्यैश्वर्यप्रदं धर्मं मनसा चिन्तयंस्तदा । तूष्णीं स्थितो भद्रमति: SkandP. ii(1). 20.21.

अत्योत (atyotá) *adj.* supported by the horses स संग्रामस्तमोद्योऽत्योत: । वाचो गा: पिपाति तत् TaiĀ. i. 10.4 (78.2)

अत्योह् (aty-oh-) I. P. [set up as ²*atyūh-* by PW, MW] to consider superior अतीदु शक्र ओहत इन्द्रो विश्वा अति द्विष: ṚV. viii. 69.14.

अत्यौग्र्य (aty-augrya) *n.* excessive fierceness लक्ष्मी: … । अत्यौग्र्याद् बिभ्यती क्षत्रे केवले नेच्छति स्थितिम् AhirbuS. 16.20.

अत्यौत्सुक्य (aty-autsukya) *n.* excessive eagerness, great anxiety अत्यौत्सुक्यं विना विप्र मनस: प्रीतये त्वपि । कामाप्तये वा PauṣkS. 38.39; अत्यौत्सुक्याच्च यागस्थमवतार्य यजेत्तत: JayāS. 20.281; ParaS. 19.312; S'ṛṅgāTi. (Ru.) 2.19; HarVi. 18.20; Kapphiṇā. 15.5; योऽयं माभूद्रक्षणायाङ्गनानामत्यौत्सुक्यं प्रत्युतासां करोति KathāSaSāg. vii. 2.134; UjjvaNīMa. 155.11.

अत्यौन्नत्य (aty-aunnatya) *n.* great height तस्यां तिष्ठन्कनकरचनाविस्फुरन्मन्दिरायामत्यौन्नत्यादिव पटुपतत्पिण्डितार्कप्रभायाम् KathāSaSāg. v. 3.285; RājTa.(Jo.) 954.

अत्यौर्ववह्निम् (aty-aurvavahnim) *adv.* crossing the submarine fire अत्यौर्ववह्निमगमज्जलधेरमन्दमास्कन्ददानरभसादिव तोयसैन्यम् HarVi. 22.5.

अत्यौषधोपयोग (aty-auṣadhopayoga) *m.* excessive use of drugs अत्यौषधोपयोगाच्च चतुर्थे वयसि स्थित: (दुर्बल:) Hastyāyur. 36.2 (1.4)

अत्यौष्ण्य (aty-auṣṇya) *n.* excessive heat अन्तर्दाहो ज्वरोऽत्यौष्ण्यम् KāśyaS. 43B.4; BhojanKu. 154.24.

¹अत्र (á-tra) (Ved. *atrā* as metrical lengthening mostly at the beginning of a *pāda*) *adv.* [fr. the pronominal base *a-* MAYR. 1.28; AltGr. III. p. 444, 512; Indian Grammarians derive it from *etad* substituting *a* in place of the base P. v. 3.5; *atra* is substituted for *etad* (Loc.) CāndraVyā. iv. 3.11 (comm. एतद्रोऽत्रेति); JaineVyā. iv. 1.72; S'ākaṭāVyā. iii. 4.16; SiddhaHe. vii. 2.93; *atra*, without accent, is also used as anaphoric (*anvādeśa*) for *etad* (P. ii. 4.33) which is illustrated in SiddhāKau. as एतस्मिन् ग्रामे सुखं वसाम: । अथोऽत्राधीमहे । Generally used in the Locative sense (P. v. 3.10); but sometimes in the sense of other cases also by implication (P. v. 3.14)]; **1 A i** here, in this place अत्राह तत्कण्व एषां कण्वतमो नाम गृणाति नृणाम् ṚV. i. 48.4; अत्राह तद् वहेथे मध्व आहुतिम् ṚV. i. 135.8; अत्रा पिता दुहितुर्गर्भमाधात् ṚV. i. 164.33; ii. 1.15; अत्रा दधे अमृतं जातवेदा: ṚV. iii. 23.1; यमत्र मित्रावरुणावथो युवम् ṚV. v. 63.1; न्यु ग्नि: सीदत् … हुवानो अत्र सुभगाय देवान् ṚV. vii. 30.3; मित्रावरुणा … प्रति वामत्र वरमा जनाय पृणीतमुद्न: ṚV. vii. 65.4; सचेतसो अभ्यर्चन्त्यत्र ṚV. x. 1.3; x. 16.13; उक्थेभिरत्र मतिभिश्च विप्रोऽपीपयद् गयो दिव्यानि जन्म ṚV. x. 64.16; x. 92.15; अत्रैव वोऽपि नह्याम्युभे आर्त्नीइव ज्यया ṚV. x. 166.3; आ वीरोऽत्र जायतां पुत्रस्ते दशमास्य: AV. iii. 23.2; वीरान् नो अत्र मा दभन् AV. iv. 7.7; यत्सम्यञ्चावभियन्तावभि क्षामत्रा मही रोधचक्रे वावृधेते AV. v. 1.5; v. 8.9; शप्तारमत्र नो जहि दिवो वृक्षमिवाशनि: AV. vi. 37.2; त्वष्टा नो अत्र वरीय: कृणोतु AV. vi. 53.3; अमित्रा येऽत्र न: सन्ति तानग्न आ द्या त्वम् AV. vi. 104.2; एतं वो युवानं प्रति दध्मो अत्र AV. ix. 4.24; नानार्षेयाणामप्यस्त्यत्र AV. xi. 1.33; न ते अत्र लोक: AV. xii. 2.1; अत्रैव दीदिहि द्यवि AV. xii. 2.18; xii. 3.17; एष भागो अङ्गिरसो नो अत्र AV. xii. 3.45; न किल्बिषमत्र नाधारो अस्ति AV. xii. 3.48; दिष्टं नो अत्र जरसे नि नेषत् AV. xii. 3.55; पुण्यं पूर्वा फल्गुन्यौ चात्र हस्त: …मे अस्तु AV. xix. 7.3; अत्र रमेथां वर्ष्मन् पृथिव्या: TaiS. I. ii. 13.2; किमत्र भद्रं तन्नौ सह TaiS. I. iii. 2.1; ओषधय: प्रतिमोदध्वमग्निमेत ᳵ शिवमायन्तमभ्यत्र युष्मा: VājaS. 11.47; येऽत्र स्थ पुराणा ये च नूतना: VājaS. 12.45; यदत्र शिष्टं रयिन: सुतस्य … सोम राजानमिह भक्षयामि TaiBr. I. iv. 2.3; यद्वेवास्यात्र होता वाध्वर्युर्वा ब्रह्मा वा S'atBr. I. i. 1.15; तद् यज्ञमेवैतदत्र दधाति S'atBr. I. i. 2.16; III. iii. 4.28; अत्रैव मा भगवानमूमुहन्न प्रेत्य संज्ञास्तीति S'atBr. XIV. v. 4.13; नात्राग्निं होत्रादित्याह KauṣīBr. 10.23 (3.4); तस्मादस्य नाम गृह्णात्यत्र हि जायते KauṣīBr. 13.13 (3.8); एतावतो ह्यत्राश्विनौ कामान् ददृशतु: AitBr. 4.4(90); नात्र भुवनम् न पूषा TaiĀ. i. 2.4; तावब्रूताम् … ग्रहं एव नावत्रापि गृह्यतामिति TaiĀ. v. 1.6; अभवत् परमत्र जन्माग्ने MantrBr. i. 1.2; अत्र पितरो मादयध्वम् MantrBr. ii. 3.6; अत्रैव त्वा क्रिमे (घातयिष्यामि) MantrBr. ii. 7.1; न चात्र नामादेश: ĀśvaS'S. I. iv. 2.10; अहमर्थे नियुज्येयमत्रेति प्रथमं वच: । भरद्वाजोऽब्रवीत्तस्मादृषिभि: स नियोजित: CaraS. i. 1.8 (but comm. अत्रेतिशब्दो यस्मादर्थे); कुर्वन्ति चात्र पिशितार्द्रमुखा विहङ्गा: राज्ञां शरीरशिथिलानि विभूषणानि ŪruBha. 7; क: कोऽत्र भो: UttaRāC. 1.12(3); 2.14(1); तदत्र सालप्रच्छाये मुहूर्तमासनपरिग्रहं करोतु तात: UttaRāC. 6.22(1); किं त्वत्र वस्तुनि परवानस्मि MahāviC. 1.56(9); अर्थोऽत्र लोके पुरुषस्य बन्धु: PañcT. 232.9 (2.33); आगतोऽत्राहमुदकार्थी PañcT. 251.4 (2.77); अहमत्र गङ्गातीरे नित्यस्नायी … तिष्ठामि Hitopa. 1.43(1); तत्किं मयात्रावस्थाय कर्तव्यम् Hitopa. 1.76(2); अत्र कुक्षावस्या विद्यत इत्यात्रेयी S'ābaBh. 1358.11 (*on* vi. 1.7); अत्र हि मन्त्रे … रज:सत्त्वतमांस्यभिधीयन्ते BrahmSūBh.(S'aṅ.) 240.12 (*on* i. 4.8); अस्त्यत्र भरतक्षेत्रे मध्यखण्डविभूषणम् RatnaCūKa. 5; अत्र श्लोके देवीस्तुति: प्रतिज्ञाता SetuBa. 13.2; शाखामृगेणात्र किम् SubhāRaK. 6.6; कुतोऽत्र सलिलम् Subhāṣi. 67; बभूव सूत्रधारोऽत्र EI. i. 248.21; निर्माप्य प्रतिमात्र बाहुबलिन: EI. vii. 110.12; सप्तार्चिरत्रागत: EI. xxi. 281.1; **1 A ii** there, in that place विदन्तीमत्र नरो धियंधा: ṚV. i. 67.4; अत्राह तदुरुगायस्य वृष्ण: परमं पदमव भाति भूरि ṚV. i. 154.6; अत्रा ते भद्रा रशना अपश्यम् ṚV. i. 163.5; i. 163.7; स मा धीर: पाकमत्रा विवेश ṚV. i. 164.21; किमत्र दस्रा कृणुथ: ṚV. i. 182.3; अश्वस्यात्र जनिम ṚV. ii. 35.6; सना अत्र…सप्त वाणी: ṚV. iii. 1.6; iii. 39.3; अस्माकमत्र पितरो मनुष्या अभि प्र सेदु: ṚV. iv. 1.13; अत्रा पुरंधिरजहादराती: ṚV. iv. 26.7; अत्रा न हार्दि क्रवणस्य रेजते ṚV. v. 44.9; शतैरपद्रन्पणय इन्द्रात्र दशोणये कवयेऽर्कसातौ ṚV. vi. 20.4; अत्रेव त्वमिह वयम् ṚV. x. 18.9; विश्वाहास्मै शरणा: सन्त्वत्र ṚV. x. 18.12; अत्रा यम: सादना ते मिनोतु ṚV. x. 18.13; अत्रा जहाम ये असन्नशेवा: ṚV. x. 53.8; अत्रा सखाय: सख्यानि जानते ṚV. x. 71.2; अवर्धन्वाजा उत ये चिदत्र ṚV. x. 73.3; अत्रा नो विश्पति: पिता पुराणाँ अनु वेनति ṚV. x. 135.1; अत्रा दधेते अमृतानि नाम AV. v. 1.3; देवा: सधस्था विद लोकमत्र AV. vi. 123.2; अत्रैवेधि पितृषु जागृहि त्वम् AV. xii. 2.10; ये पाशिन

उपतिष्ठन्त्यत्र AV. xvii. 1. 8; योऽत्रासदजीवन: AV. xviii. 2. 30; पितृणां लोकं प्रथमो यो अत्र AV. xviii. 3. 73; अत्रादधुर्यजमानाय लोकम् AV. xviii. 4. 7; उप तिष्ठन्तु त्वात्र AV. xviii. 4. 33; xviii. 4. 49; येऽत्र पितर: पितरोऽत्र यूयं स्थ AV. xviii. 4. 86; यदि त्वमत्र मनसा जगन्थ VājaS. 23. 49; अत्र रमेथां वर्ष्मन् पृथिव्या: TaiS. I. ii. 13. 2; तन्मे राध्यतामिति नात्र तिरोहितमिवास्ति S'atBr. 1. i. 1. 2; द्वादशविधा वा इमे प्राणा: … अत्र वै प्राणा आप्यन्तेऽत्र संस्क्रियन्ते AitĀ. I. v. 1. 9; I. v. 1. 10; अथात्रैव तिष्ठन्नग्निं यथाङ्गमुपतिष्ठते नमो नम इति S'āṅkhāĀ. 3. 11 (1. 5); धनंजयसखा चात्र नित्यमास्ते स्म तुम्बुरु: MahāBhā. ii. 4. 30; ववर्ष चात्र पर्जन्य: MahāBhā. vi. 1. 21; यस्मादत्र च भूतानि प्रमुह्यन्ति महान्त्यपि BuddhC. 12. 35; **1 Bi** now, at this time, at this moment, on this occasion देवो नो अत्र सविता न्वर्थं प्रासावीत् R̥V. i. 124. 1; वज्रिन्नत्र विश्वे देवास: … वृणते R̥V. iv. 19. 1; अग्न्युपस्थानवदत्र समिधो दिशां चोपस्थानम् ĀpaS'S. vi. 26. 6; अत्र यजमानो वरं ददाति ĀpaS'S. vii. 21. 5; अत्रापि मेषं मेषीं च करोतीति वाजसनेयकम् ĀpaS'S. viii. 6. 4; अत्र राजानमाहृत्य … क्रैयात् ĀpaS'S. x. 3. 7; अर्धव्रतमत्र वाजसनेयिन: समामनन्ति ĀpaS'S. xi. 15. 7; अत्रेडाया निरवदानमेके समामनन्ति ĀpaS'S. xii. 25. 8; (अबला:) प्रयन्ति कालेऽत्र जनस्य सेव्यताम् R̥tuSaṁ. 5. 2; अद्यात्राह्नि AgniP. 360. 36; **1 Bii** then, at that time, on that occasion अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् R̥V. i. 84. 15; प्र वामत्र विधते दंसना भुवत् R̥V. i. 119. 7; अत्रा पूष्ण: प्रथमो भाग एति … अज: R̥V. i. 162. 4; मो षु त्वामत्र बहवो हि विप्रा नि रीरमन् R̥V. ii. 18. 3; उत श्रवो विविदे श्येनो अत्र R̥V. iv. 26. 5; iv. 30. 7; इन्द्रा नो अत्र वरुणा स्याताम् R̥V. iv. 41. 6; वन्वानो अत्र सरथं ययाथ R̥V. v. 29. 9; अत्रा दासस्य नमुचे: शिरो यदवर्तय: R̥V. v. 30. 7; v. 30. 10: विश्वे ते अत्र मरुत: सखाय: R̥V. v. 31. 10; अदेवो यदभ्यौहिष्ट देवान्त्स्वर्षाता वृणत इन्द्रमत्र R̥V. vi. 17. 8; वृणाना अत्र … सख्यं त्वायन्तो ये अमदन् R̥V. vii. 18. 12; vii. 18. 19; vii. 85. 2; अत्रा वि नेमिरेषामुरां न धूनुते वृक: R̥V. viii. 34. 3; अत्रादेदिष्ट पौंस्यम् R̥V. viii. 45. 26; अत्रा सं जिघ्रते युजा R̥V. ix. 14. 4; ix. 73. 9; स्वधावो भागं नो अत्र वसुमन्तं वीतात् R̥V. x. 11. 8; मध्वा नो अत्र पितरा शिशीताम् R̥V. x. 12. 4; x. 17. 9; अत्रा युक्तोऽवसातारमिच्छात् R̥V. x. 27. 9; अत्रेदु मे मंससे सत्यमुक्तम् R̥V. x. 27. 10; स्त्रीभिर्यो अत्र वृषणं पृतन्यात् R̥V. x. 27. 10; अत्राह त्वं वि जहुर्वेद्याभि: R̥V. x. 71. 8; अत्रा वो नृत्यतामिव तीव्रो रेणुरपायत R̥V. x. 72. 6; त्वामिदत्र वृणते त्वायवो होतारमग्ने विदथेषु वेधस: R̥V. x. 91. 9; x. 93. 15; अदेवस्य शूशुवानस्य माया: । वि धृष्णो अत्र धृषता जघन्थ R̥V. x. 111. 6; विश्वे ते अत्र मरुत: सह त्मनावर्धन्नुग्र महिमानमिन्द्रियम् R̥V. x. 113. 3; इन्द्रस्यात्र तविषीभ्यो विरप्शिन ऋघायतो अरंहयन्त मन्यवे R̥V. x. 113. 6; x. 134. 7; तद् यदेता देवता यजत्यत्राग्नि: … प्रीतो भवति KauṣīBr. 1. 1 (1. 8); सदृशोऽत्र बाष्प: Saund. 6. 42; अत्र … एतस्मिन् काले … स्वप्नान् न पश्यति PraśnaUBh. 276. 18 (*on* 4. 6); **1 C** thereby, therein, in the case, in this respect देवो नो अत्र सविता … अनागसो वोचति R̥V. i. 123. 3; अत्र कवीन् पृच्छामि R̥V. i. 164. 6; i. 165. 11; यो वृत्राय सिनमत्राभरिष्यत् R̥V. ii. 30. 2; मो षू णो अत्र जुहुरन्त देवा: R̥V. iii. 55. 2; iii. 57. 2; अत्राह ते … अवोभिरिन्द्र स्तवन्त स्वसार: R̥V. iv. 22. 7; v. 41. 17; अत्र श्रवांसि दधिरे R̥V. v. 61. 11; मित्रो नो अत्र वरुणश्च पूषार्यो वशस्य पर्येतास्ति R̥V. vi. 24. 5; स मा नो अत्र जुहुर: सहस्व: R̥V. vii. 4. 4; इमा उ त्वा … अत्र मन्द्रा गिर: R̥V. vii. 18. 3; अस्माकेभिर्नृभिरत्रा स्वर्जय R̥V. viii. 15. 12; ऋतमत्र नकिरस्मा अपीपेत् R̥V. x. 31. 11; अवर्धन्निन्द्रं मरुतश्चिदत्र R̥V. x. 73. 1; न त्वत्र स्थायि वैरूपं तृतीये ĀśvaS'S. II. ii. 7. 19; स्रुवाहुतिमत्र वाजसनेयिन: समामनन्ति ĀpaS'S. ix. 13. 15; असिद्धवदत्रा भात् P. vi. 4. 22 = JaineVyā. iv. 4. 21; अत्र लोपोऽभ्यासस्य P. vii. 4. 58; नात्र चिन्ता कार्या SvapnVā. 1. 3 (11); भवति चात्र श्लोक: KāmSū. 73. 8 (1. 5); तदनन्तरमत्रैव ते यत्नाद्विनिवारिता: KāmSū. 370. 23 (7. 2); अलं प्रयत्नेन तवात्र RaghuVa. 3. 50; भवन्तमेवात्र गुरुलाघवं पृच्छामि S'āk. 5. 29 (3); अत्र लोकचरितं नानारसं दृश्यते Mālavikā. 1. 4; अथ किमत्र प्राप्तकालं भवान् मन्यते PañcT. 1. 56 (60. 2); अत्रातीतविपर्यास: VākyaP. 1. 17; निघातोऽत्र तथा सति VākyaP. 2. 5; देव किमत्र चित्रम् Kād. 13. 10; तदत्र भगवती कामन्दकी न: शरणम् MālaMā. 1. 394; तत्किमत्र मन्दभाग्य: करोमि UttaRāC. 1. 40 (1); प्रकीर्यते काव्यबन्ध एषोऽत्र VeṇīSaṁ. 1. 5; अत्र अथशब्द: आनन्तर्यार्थ: BrahmSūBh.(S'aṅ.) 5. 12 (*on* i. 1. 1); अत्र केचिदुदाहरन्ति BrahmSūBh.(S'aṅ.) 73. 1 (*on* i. 1. 23); अत्रानुरूपं राजर्षे विमृशस्व मनीषया BhāgP. i. 17. 20; अत्र स्फुटो न कश्चिदलङ्कार: KāvyPra. 18. 1; आद्यमत्र कथापीठं कथामुखमत: परम् KathāSaSāg. i. 1. 4; तात: प्रमाणमत्र PurāPraSaṁ. 13. 15; स्वानुभव एवात्र साक्षी PratyabhiHr̥. 2. 11 (1); अथवा किमत्र मया प्रतिज्ञातव्यम् Ubhayābhi. 2. 16; सनोऽत्र नार्धधातुकत्वम् PrakriKau. ii. 130. 1; भवन्ति चात्र श्लोका: EI. x. 99. 27; दूतकोऽत्र राजपुत्र: सामन्तशीलादित्य: EI. xxi. 184. 42; मुनयोऽत्र प्रशंसन्ति EI. xxv. 60. 49; **1 D** in this world, on this earth को न्वत्र मरुतो मामहे व: R̥V. i. 165. 13; नि षीमिदत्र गुह्या दधाना: R̥V. iii. 38. 3; अत्र वसवो रन्त देवा: R̥V. vii. 39. 3; न ह्याचारविहीनस्य सुखमत्र परत्र वा MārkP. 34. 6; आनन्दकार्ये यात्रायां स जयी परतोऽत्र च BrDharmP. i. 26. 14; स्वनामसंकीर्तनमत्र मुक्तम् Surath. 1. 47; अत्रामुत्र च सुखं नास्तीत्यर्थ: S'rutaPra. ii. 417. 18 (*on* iii. 1. 17); स्वर्गे हत: पूज्यते वै हन्ता त्वत्रैव पूज्यते SūktiRa. 99. 9; वरं पुण्यं कृतं यत्नात् परत्रात्र फलप्रदम् CitraPaC. 326; धर्म इवात्र योऽवतीर्ण: EI. i. 198. 4; परत्र चात्र तस्मै हरिर्यच्छतु वाञ्छितार्थम् EI. ii. 231. 12; **1 E** in or on that object or thing नात्रावखादो अस्ति व: R̥V. i. 41. 4; आ वां रथं युवतिस्तिष्ठदत्र R̥V. i. 118. 5; अत्रापश्यं विश्पतिं सप्तपुत्रम् R̥V. i. 164. 1; i. 164. 11; द्यौर्मे पिता जनिता नाभिरत्र R̥V. i. 164. 33; मो षू ण इन्द्रात्र पृत्सु देवै: R̥V. i. 173. 12; अहिं यदघ्नन्नोजो अत्रामिमीथा: R̥V. v. 31. 7; वस्वीर्नो अत्र पत्नीरा धिये धु: R̥V. v. 41. 6; मात्र पूषन्नाघृण इरस्य: R̥V. vii. 40. 6; viii. 31. 18; ब्रध्नश्चिदत्र … नरं दात् R̥V. ix. 97. 52; दुर्मन्त्वत्रामृतस्य नाम R̥V. x. 12. 6; मित्रो नो अत्रादितिरनागान्त्सविता देवो वरुणाय वोचत् R̥V. x. 12. 8; नेदेव मा युनजन्नत्र देवा: R̥V. x. 51. 4; x. 102. 7; अत्र पितरो मादयध्वम् VājaS. 2. 31; प्रयाजानेवात्र यजन्ति AitBr. 3. 6 (78); तद् यज्ञमेवैतदत्र दधाति S'atBr. I. i. 2. 16; तस्मादेनामत्र शंसति AitĀ. I. iv. 2. 23; **2** representing locative case (in Gr.) तदस्यात्र स्यादिति CāndraVyā. iv. 1. 21 (comm. प्रथमान्तात् षष्ठ्यर्थे सप्तम्यर्थे च छयतौ भवत:); CāndraVyā. iv. 2. 98; तदत्रास्मै वा शुल्कम् … देयम् S'ākaṭāVyā. iii. 2. 156; SiddhaHe. vi. 2. 70; vi. 4. 158; अस्मिन्नर्थेऽव्ययं चात्र S'abdaRaSaK. 250. 7 [अत्र is given as the meaning of अदस् in the कोषs अद: परस्मिन्नत्रापि ViśvaPra. 174. 5; AnekāK. 932; NānārthāSaṁ. i. 40. 3; MediK. 186. 15; अदोऽत्र परत्र च AnekāTi. 2. 7; AnekāSaṁ. 2. 561]

[2]**अत्र** (á-tra) *n.* [attra] food, nourishment अत्राण्यस्मै: पड्भि: सं भरन्ति R̥V. x. 79. 2; देवा: अत्रं न मम BālamBha. i. 556. 11 (*on* 1. 249)

[3]**अत्र** (atrá) *m.* a kind of demon स्वयं सा रिषयध्यै या न उपेषे अत्रै: R̥V. i. 129. 8 (Sāy. भक्षकै: अस्मद्विरोधिभि:); अपादमत्रम् … नि … आवृणक् R̥V. v. 32. 8 (Sāy. अमत्रम् अमात्रं परिमाणरहितम्); देवजना गुदा मनुष्या आन्त्राण्यत्रा उदरम् AV. ix. 7. 16; आन्त्रेभ्यो जज्ञिरे अत्रा: AV. x. 10. 21.

[4]**अत्र** (atra) *n.* [अमत्र- with म dropped] vessel, pot वर्णस्य वर्णयोर्लोपो बहूनां व्यञ्जनस्य च । अत्राणीति BrDe. 2. 116; अत्रम् – अमत्रम् – अत्राण्यस्मै पड्भि: संभरन्ति इत्यादाविवात्रापि मध्यमवर्णलोपश्छान्दस: BhāBhāDī. *on* iv. 55. 19.

[5]**अत्र** (a-tra) *adj.* requiring no (other) protector, needs no protection (from others) (i. e. fearless) प्र क्षत्रमत्रमाप्नोति BrĀraU. v. 13. 4; प्र क्षत्रमत्रम् न त्रायते अन्येन केनचिदित्यत्रम् BrĀraUBh. 723. 13 (*on* v. 13. 4); प्राप्नोत्यत्रमसौ क्षत्रमत्रातृकमनीश्वरम् BrĀraUBhVā. v. 15. 9.

[6]**अत्र** (atra) *nu.* **i** eighth house in a horoscope अत्र शुभदृग्योगे राजप्रेष्य: JaimiUpaSū. iii. 1. 26; **ii** eighth zodiacal sign (i. e. वृश्चिक) अथ स्वांशो ग्रहाणाम् … अत्र जलसरीसृपा: स्तन्यहानिश्च JaimiUpaSū. i. 2. 9 (comm. अत्रेति पदेन (20/12) अष्टसंख्योच्यते)

[7]**अत्र** (a-tra) (Gr.) except the suffix *tra* वलादेरिडत्र वषुणादे: S'ākaṭāVyā. iv. 2. 134; स्ताद्यशितोऽत्रोणादेरिट् SiddhaHe. iv. 4. 32.

[8]**अत्र** (-atra) (Gr.) formans forming both substantives and adjectives [DEBRU. p. 170], cf. **अत्रन्, कत्रन्.**

अत्रकृतानुयोग (atrakr̥tānuyoga) *adj.* who has raised objection in this (work) अजयं चात्रकृतानुयोगमेनम् S'aṅkaDigVi.(Mā.) 14. 156.

अत्रग (atra-ga) *adj.* what is present here अन्यस्य मुख्यवाच्यत्वमिति तन्नात्रगस्य हि AnuVyā. 10B. 6 (*on* 1. 1)

अत्रतस् (atra-tas) *adv.* from here onwards कथयध्वं ममात्मानमत्रतस्तदनन्तरम् VarāP. 172. 24.

अत्रत्य (atra-tya) *adj.* [*f.* -ā] **i** belonging to or connected with this place, residing here दौरात्म्याद्रक्षसस्तां तु नात्रत्या: श्रद्दधु: प्रजा: RaghuVa. 15. 72; माम् … अत्रत्यायैव कस्मैचिदिभ्यकुमारायान्वजानाद्भार्यां मे पिता DaśKuC. 49. 2; 94. 12; EI. ii. 346. 7; अत्रत्यमक्षयं यस्मात् सुकृतं सुकृतेतरम् SkandP. iv. 64. 67; अत्रत्य: प्राणिमात्रोऽपि रक्षणीय: प्रयत्नत: SkandP. iv. 96. 19; अत्रत्यै: किलार्जुनसकाशाद्विष्णोरन्त:पुरमाच्छिन्नमिति JayaMa. 130. 10 (*on* 2. 5); अत्रत्यो हि नदीपूर: NyāyRa. 454. 12 (*on* 5 (7). 17); तत्राजायत सख्यं मे राज्ञात्रत्येन KathāSaSāg. viii. 6. 196; अव्ययात् त्यप् ।… अत्रत्य: BhāṣāVr̥. iv. 2. 104; राजानं प्रार्थय द्रुतम् । चन्द्रशेखरमत्रत्यम् PārśvC. 3. 815; अस्ति तावदत्रत्या काचित् … मयि निबद्धभावा … कन्यका SubhaDha. 1. 3 (3); ग्रन्थमत्रत्याय राज्ञे माधवदेवनाम्ने दर्शयत PrabaK. 56. 10; मोघाशो मघवान्देव: स्यादत्रत्यस्य सादने Yādavā. 6. 65; अहमत्रत्य:, अस्मिन् काले वर्तमान: एवमाकार: Bhāsk. ii. 42. 21 (*on* ii. 2. 3); अत्रत्या: प्रकृतयोऽप्यनुरक्ता आर्यस्य प्रसादेन MadaKeC. 13 (13); KośaKaTa. 2. 324; **ii** mentioned in this section or in this context, occurring in this topic or expression etc. वस्तुतो हि अत्रत्योऽयं प्रमातापि प्रमेय

एव PratyabhiVi. ii. 240. 7 (*on* iii. 1. 10); येऽपि चान्तरमार्गा इत्यत्रत्यान् नृत्ते सूच्यान् परिहर्तुम् AbhinBhā. ii. 141. 19 (*on* 12. 42); ते यचत्रत्यमभिधानमङ्गीकृत्य तथा मन्यन्ते TantrRa. 37. 6; 300. 17; अत्रत्य आचार्य: TātpaVr̥. 353. 14 (*on* 3. 61); अत्रत्य: पित्रादिशब्दप्रयोगोऽपि CaturCin. iii(1). 1256. 5; विदेहमुक्तिरित्यत्रत्येन देहशब्देन कृत्स्नं देहजातं विवक्षित्वा JīvanVi. 44. 16; 93. 18; अत एवात्रत्यमुत्थानं च न स्वापानन्तरभावि PañcRāRa. 129. 10; अत्रत्यस्य यत्किंचिच्छब्दस्य Nyāyāmr̥. 102B. 7; विशेषान्तरमत्रत्यं विवाहप्रकरणे वक्ष्याम: VīraMi. (Saṁskāra.) 315. 4; MīmāKau. iii. 47. 15 (*on* i. 2. 23); YuktiSneha. 88. 31 (*on* i. 1. 5); MayūMāli. 188. 19 (*on* iii. 1. 4); 491. 3 (*on* vi. 4. 14); 531. 1 (*on* vii. 2. 1); कर्मकालोच्चारणमत्रत्य: पूर्वपक्षी मन्यते NyāySu.(So.) 20. 9 (*on* i. 2. 6); 85. 31 (*on* i. 2. 26); अत्रत्यं धर्मपदं वेदार्थमात्रोपलक्षणं पर्यवस्यति SivārkaMaDi. i. 15. 11 (*on* i. 1. 1); i. 401. 33 (*on* i. 3. 2); i. 487. 5 (*on* i. 3. 39); ii. 109. 11 (*on* ii. 2. 38); ii. 374. 26 (*on* iii. 3. 54); अत्रत्यो नामशब्दो भयापहेत्यादिनामविशेषपरत्वेन व्यवतिष्ठते LalitāSaBh. 21. 33 (*on* 52); तदनुरोधेनात्रत्यस्य ··· पदस्य ··· अविवक्षितार्थकतैव युक्ता SetuBa. 36. 19; 176. 2; अत्र ग्रन्थकृतोऽत्रत्यं पद्यमुदाहरति Bhāsk. i. 36. 6 (*on* i. 1. 1); ‘एकाच उपदेशे’ इत्यात्रत्य: कैयटोऽपि चिन्त्य एव LaS'abdeS'e. i. 22. 18; ii. 141. 15; अत्रत्यं तत्त्वं कलातोऽवगन्तव्यम् BālamBha. i. 29. 23 (*on* 1. 11–12); **iii** belonging to this world and life अत्रत्योऽपि मनुजस्तथा भावमुपेयिवान् SkandP. ii(9). 4. 29; किं स्वर्गेण ··· मरणव्यवहितेन, वरमत्रत्यमेव भोजनशय्यादिसुखमिति NyāyRa. 3. 8 (*on* 0. 7); वृत्त्यादीनामत्रत्येष्ववचनजनेष्वकार्यकरत्वं सूचितम् S'rutaPra. iA. 9. 16 (*on* i. 1. 0)

अत्रत्यचिन्ता (atratya-cintā) *f.* deliberation on this topic इति शिक्षार्थमत्रत्यचिन्तां तत्राकरोन्मुनि: VedāntKa. 209. 14 (*on* ii. 4. 14)

अत्रत्यजन्तु (atratya-jantu) *m.* creature of this place (i. e. Kāśī) अत्रत्यजन्तुरक्षार्थमसत्यमपि भाषयेत् SkandP. iv. 96. 18.

अत्रत्यटीका (atratya-ṭīkā) *f.* gloss on this portion (comment made here) अत एव नात्रत्यटीकाया: वार्तिकान्तेन विरोध: NyāyVārPari. 11. 9.

अत्रत्यत्रिभुजद्वय (atratya-tribhujadvaya) *n.* two triangular figures occurring herein तच्चतुरस्रेऽत्रत्यत्रिभुजद्वयफलयुतिर्गणितम् ĀryaSi. 15. 68 (164)

अत्रत्यन्यायातिदेश (atratyanyāyātideśa) *m.* transference of the maxim (argument) set forth here ‘द्वा सुपर्णा’ इति वाक्ये अत्रत्यन्यायातिदेशश्चानुपपन्न: S'rutaPra. iB. 307. 14 (*on* i. 2. 12)

अत्रत्यपरिभाषा (atratya-paribhāṣā) *f.* terminology used here अत्रत्यपरिभाषा भिन्ना BālamBha. ii. 267. 18 (*on* 2. 145)

अत्रत्यपाठक्रम (atratya-pāṭhakrama) *m.* textual order found here श्रुत्यन्तरसिद्धश्रौतक्रमेणात्रत्यपाठक्रमबाधात् संवत्सरादूर्ध्वं क्रमेण विनिवेश: BrahmSū-Bh.(S'rī.) ii. 473. 3 (*on* iv. 3. 3)

अत्रत्यपाप (atratya-pāpa) *n.* sin committed here (i. e. in Kāśī) अत्रत्यपापेन वासस्यैव वैगुण्ये TristhaSe. 124. 24.

अत्रत्यपापनाश (atratyapāpa-nāśa) *m.* destruction of the sin committed here (i. e. in Kāśī) यत्तु वैशेषिकमात्रादेवात्रत्यपापनाशो विशेषविधिवशादिति तदपि न TristhaSe. 125. 1.

अत्रत्यपूर्वपक्ष (atratya-pūrvapakṣa) *m.* prima facie view referred to here तथाप्याधुनिका वेदान्तिनोऽत्रत्यपूर्वपक्षजातमेव ब्रह्ममीमांसासिद्धान्ततया कल्पयन्ति SāṁkhyaPraBh. 131. 31 (*on* 5. 65); अत्रत्यपूर्वपक्षवादिमतेऽस्य मन्त्रस्य प्रैषत्वाभावेन ··· आग्नीध्रकर्तृकत्वानुपपत्ते: समाख्याया आध्वर्यवत्वात् MīmāKau. ii. 239. 23 (*on* iii. 2. 10)

अत्रत्यबलिदान (atratya-balidāna) *n.* offering of oblation stated here नामभिरेवात्रत्यबलिदानं दृष्टं कुतोऽत्र मन्त्रैर्दीयते इत्याह VīraMi. (Saṁskāra.) 945. 23.

अत्रत्यबहुवचन (atratya-bahuvacana) *n.* (use of) plural in the present context (word) प्रकृतेऽपि तन्मते ··· अत्रत्यबहुवचनस्य द्वित्वसंख्याबोधकत्वावश्यंभावाच्च SetuBa. 248. 24.

अत्रत्यभाष्य (atratya-bhāṣya) *m.* explanation in the Bhāṣya quoted here अत्रत्यभाष्यस्य साधारण्यं शङ्कते YuktiSneha. 88. 31 (*on* i. 1. 5); एवं च यत्कैश्चिद्याज्ञिकैरुद्धृत्य भक्षणमुक्तं तदत्रत्यभाष्यवार्तिकविरोधादुपेक्ष्यम् MayūMāli. 286. 23 (*on* iii. 5. 6); एवं रीत्या साधुत्वेऽत्रत्यभाष्यमेव मानम् LaS'abdeS'e. ii. 512. 10; i. 400. 12; ii. 229. 8.

अत्रत्यभाष्यविरोध (atratyabhāṣya-virodha) *m.* opposition to the explanation in the Bhāṣya given here न च “आशित: कर्ता” इत्यत्रत्यभाष्यविरोध: LaS'abdeS'e. ii. 795. 16.

अत्रत्यमण्डल (atratya-maṇḍala) *n.* **1** region referred to here तैरूचे सहकाराणां करो नात्रत्यमण्डले KumāDeC.(So.) 14. 17; **2** mystic diagram in the present context अत्रत्यमण्डलप्रकृतिपञ्चाशद्रेखाणां च पदानां द्वादशाङ्गुलप्रमाणत्वोक्त्या प्रत्येकं तावदन्तरत्वात् VīraMi. (Rājanīti.) 375. 9.

अत्रत्यमुनि (atratya-muni) *m.* sage of this place त्वत्संनिधानादत्रत्यमुनीनां भयनाशनम् । इत: परं भवत्वार्य SkandP. iii(1). 4. 47.

अत्रत्ययाग (atratya-yāga) *m.* sacrifice referred to in the present context अत्रत्ययागानाम् ··· उदयोत्तरमेव सर्वनिर्वापस्यातिदेशप्राप्तत्वाच्च BhāṭṭDī. iv. 156. 15 (*on* xi. 2. 3)

अत्रत्ययुक्ति (atratya-yukti) *f.* reasoning advanced in the present context अत्रत्ययुक्तीनां श्रुत्यादिसिद्धत्वेन प्राबल्यात्पादभेद: TattvPrakā. 126A. 2 (*on* ii. 4. 1); तद्युक्तिभिरत्रत्ययुक्तीनां विरोधेनोभयोरेव दुर्घटं प्रामाण्यम् Sāṁkhya-PraBh. 1. 29 (*on* 1. 0)

अत्रत्ययुवराज (atratya-yuvarāja) *m.* prince of this kingdom अत्रत्ययुवराजेनास्या एव जनन्या: केलियात्रामहमधिकृत्य कृतं किमपि भाणम् RasSa. 11(2)

अत्रत्यरीति (atratya-rīti) *f.* method adopted in this context अत्रत्यरीत्या तु तत्रापि वाचकलुप्तत्वं स्यादिति स्वग्रन्थविरोधोऽपि दुष्परिहर इति दिक् AlaṅkāKau.(Vi.) 83. 1.

अत्रत्यविदिग्विभाग (atratya-vidigvibhāga) *m.* division of the intermediary directions stated here अत्रत्यविदिग्विभागवशादेव दिग्विभागोऽपि वक्ष्यमाणायुधन्यासादावुन्नेय: SetuBa. 292. 18.

अत्रत्यविशेषण (atratya-viśeṣaṇa) *n.* adjective in this context अत्रत्यविशेषणानां यथाकथंचिदन्यथानयनमपि न स्वरसमित्युपेक्ष्यम् SetuBa. 34. 3.

अत्रत्यवृत्तान्त (atratya-vr̥ttānta) *m.* local happening (or event) देशान्तरिणो वयमनभिज्ञा अत्रत्यवृत्तान्तस्य KaumuMi. 1. 13(16); 4. 9(7); मत्सर: – इममेव मत्सरमत्रत्यवृत्तान्तहारिणं करिष्याम इति निगृह्य स्थापितोऽस्मि Jīvān. 268. 3.

अत्रत्यवेशवनिता (atratya-veśavanitā) *f.* harlot of this locality or region न खल्वयं जनो मूर्खजनेष्वन्यतम: किं त्वत्रत्यवेशवनिताजनविस्रम्भसर्वस्वभाजनं रसिकाग्रेसर: पल्लवक: RasSa. 189(11)

अत्रत्यव्यक्ति (atratya-vyakti) *f.* an individual member here व्यक्तिपक्षे तत्रत्यात्रत्यव्यक्त्योर्भेदेन प्रकृते प्रत्याहारघटकद्वितीयवर्णादौ चोच्चारितस्यैव ग्राहकत्वादप्रवृत्तेरिति चेत् न LaS'abdeS'e. i. 39. 12.

अदन्मार्जारि (adan-mārjāri) *f.* female cat which eats (flesh etc.) अदन्मार्जारिभीष्मान्तरम् … कात्यायनीमन्दिरम् KaumuMi. 4.12.

अदब्ध (á-dabdha) *adj.* [*f.* –ā] **i** undeceived, never deceived अदब्धो वि मुमोक्तु पाशान् R̥V. i. 24.13; अदब्ध: सु पुरएता भवा न: R̥V. i. 76.2; अदब्धो होता R̥V. i. 128.1; अदब्धासो दिप्सन्त: R̥V. ii. 27.3; ii. 27.9; ii. 27.13; ii. 28.3; नासत्या … रक्षेथे अकवैरदब्धा R̥V. iii. 54.16; कवयोऽदब्धा: R̥V. iv. 2.12; उदु त्यच्चक्षुर्महि मित्रयोराँ एति प्रियं वरुणयोरदब्धम् R̥V. vi. 51.1; vi. 51.9; सन्ति स्पशो अदब्धासो अमूरा: R̥V. vi. 67.5; अदब्धस्य स्वधावतो दूतस्य रेभत: सदा । अग्ने: सख्यं वृणीमहे R̥V. viii. 44.20; viii. 67.13; viii. 78.6; viii. 101.6; सं त्वा शिशामि जागृह्यदब्धं विप्र मन्मभि: R̥V. x. 87.24; **ii** unviolated, not tempered with अदब्धानि वरुणस्य व्रतानि R̥V. i. 24.10 = TaiĀ. i. 11.2 (86.2); R̥V. iii. 54.18; अदब्धस्य व्रतस्य ये । महो राजान ईशते R̥V. vii. 66.6; **iii** unassailed, uninjured पूषा नो यथा वेदसामसद् वृधे रक्षिता पायुरदब्ध: स्वस्तये R̥V. i. 89.5 = VājaS. 25.18; विश्वेभिरग्ने … अदब्धेभि: पायुभि: पाह्यस्मान् R̥V. i. 95.9; i. 143.8 = VājaS. 33.69; R̥V. i. 173.1; अदब्धो गोपा: R̥V. ii. 9.6; वव्राजा सीमनदतीरदब्धा: R̥V. iii. 1.6; भवा पायुर्विशो अस्या अदब्ध: R̥V. iv. 4.3 = TaiS. I. ii. 14.1 = VājaS. 13.11; अभि ये नस्ततस्रे ।… अदब्धमूर्वं बृहस्पते रक्षतादस्य योनिम् R̥V. iv. 50.2; अदब्ध: शश्वतो दभ: R̥V. v. 19.4; परि यो विश्वा भुवनानि पप्रथेऽदब्धो गोपा अमृतस्य रक्षिता R̥V. vi. 7.7; vi. 8.7; vi. 51.4; अदब्धेभि: सवित: पायुभिष्ट्वं शिवेभिरद्य परि पाहि नो गयम् R̥V. vi. 71.3 = TaiS. I. iv. 23.1; R̥V. viii. 18.2; अदब्धो वरुणो ह्रुरुग्युते R̥V. ix. 77.5; ix. 85.3; ix. 97.19; ix. 97.57; अदब्धा सिन्धु: R̥V. x. 75.7; अदब्धस्य स्वयशसो विरप्शिन: R̥V. x. 75.9; x. 128.6; वैश्वानरो नो अदब्धस्तनूपा अन्तस्तिष्ठाति दुरितानि विश्वा AV. vi. 53.2; xvii. 1.9; अदब्धो दिवि पृथिव्यामुतासि … अदब्धेन ब्रह्मणा वावृधान: … इन्द्र AV. xvii. 1.12; अग्ने सपत्नदम्भनमदब्धासो अदाभ्यम् TaiS. I. i. 10.2 = VājaS. 3.18; दब्धिरस्यदब्धो भूयासम् TaiS. I. vi. 2.4 = KāṭhS. 5.1; अदब्धो गोपा उत न: … अग्ने TaiS. IV. vi. 1.5; VājaS. 4.15; वैश्वानरो मेऽदब्धस्तनूपा: TaiĀ. ii. 2.5 (218.4); S'āṅkhāS'S. ii. 11.3; MānS'S. 26.16; 87.21; MantrBr. i. 6.35; **iv** unimpaired अदब्धेन त्वा चक्षुषाऽवेक्षे TaiS. I. i. 10.3; अदब्धेन वश्चक्षुषावपश्यामि KāṭhS. 1.6 (3.13) = KapiKaS. 1.6; अदब्धेन त्वा चक्षुषावपश्यामि VājaS. 1.30 = S'atBr. I. iii. 1.19; S'āṅkhāS'S. iv. 8.1;

BhārS'S. ii. 6. 6; **v** pure, true, reliable, sure आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासः RV. i. 89. 1 = VājaS. 25. 14; उभे यथा नो अहनी निपात उषासानक्ता करतामदब्धे RV. iv. 55. 3; पर्षि तोकं तनयं पर्तृभिष्ट्वमदब्धैः RV. vi. 48. 10; यो वामदब्धो अभि पाति चित्तिभिः RV. viii. 59. 3; सहस्रधारः सुरभिरदब्धः परि स्रव RV. ix. 97. 19; ix. 85. 3; ix. 107. 2; अदब्धं मनः S'āṅkhāĀ. 7. 1 (Keith's Ed.)

अदब्धक्षत्र (adabdha-kṣatra) *n.* undeceivable or uninjurable sovereignty or rulership मित्रावरुणा शरदाह्नां जिगत्नू अदब्धक्षत्रमिदमस्त्वोजः KāṭhS. 22. 14.

अदब्धचक्षुस् (ádabdha-cakṣus) *adj.* of unimpaired sight, of undamaged vision पृथिवीप्रो महिषो नाधमानस्य गातुरदब्धचक्षुः परि विश्वं बभूव AV. xiii. 2 44.

अदब्धधीति (ádabdha-dhīti) *adj.* of undeceivable thoughts *or* who does not deceive the thoughts (of men) स्तुष उ ... अर्यमणं भगमदब्धधीतीन् RV. vi. 51. 3.

अदब्धनीति (adabdha-nīti) *adj.* whose lead is not deceitful (i. e. sure) [PW's reading for अदब्धधीति RV. vi. 51. 3 cf. nt.]

अदब्धमनु (adabdha-manu) *m.* undeceivable Manu अग्नेऽदब्धायोऽदब्धमनो पाहि मा दिवः VārāS'S I. iii. 7. 12.

अदब्धव्रत (ádabdha-vrata) *n.* unviolated law अदब्धव्रतप्रमतिः ... शुचिजिह्वो अग्निः RV. ii. 9. 1 = TaiS. IV. i. 3. 3 = VājaS. 11. 36 = S'atBr. VI. iv. 2. 7.

अदब्धायु (adabdhāyu) *adj.* whose life or vigour is unimpaired अग्नेऽदब्धायोऽशीततनो पाहि मा TaiS. I. i. 13. 3; KāṭhS. 1. 12; KapiKaS. 1. 12; VājaS. 2. 20; TaiBr. I. ii 1. 25; BhārS'S. iii. 9. 5.

अदब्धासु (ádabdhāsu) *adj.* having undeceivable or unharmed spirit अदब्धासुर्भ्राजमानोऽहेव AV. v. 1. 1.

अदभ (á-dabha) *adj.* not injuring, without harm ता वृधन्तावनु द्यून्मर्ताय देवावदभा RV. v. 86. 5. (Sāy. अदभा अहिंस्यौ)

अदभायु (a-dabhāyu) *adj.* not deceiving कविर्देवो अदभायुः स्वधावान् AV.(P.) v. 2. 7.

अदभ्नुवती (a-dabhnuvatī) *adj.* (*f.*) free from deceit, straightforward किं चादभ्नुवतीमिमाम् । (कुब्जाम्) अमुचत् समृद्धकरुणः DhātuKā. 2. 70

अदभ्र (á-dabhra) *adj.* [*f.* –ā] **A** abundant, not little, plentiful, ample (in quantity) देवा अदभ्रमाश वो यमादित्या अहेतन RV. viii. 47. 6; अदभ्रदर्भामधिशय्य स स्थलीम् Kirātā. 1. 38; यन्नः सुतप्तं तप एतदीश निरन्धसां कालमदभ्रमप्सु BhāgP. iv. 30. 40; अदभ्रेयं सुधावृष्टिरनया मे महोत्सवः S'ivaP. iii. 9. 51 (306 A. 4); विष्वङ् मर्मुरनर्मे बिभ्रति पथां गर्भेष्वदभ्राः पटुज्योतिर्मुक्तनिरभ्रदीधितिघटानिर्धूपिता धूलयः SubhāRaK. 31. 11; क्षरददभ्रजला ...। दिवि चचाल नवाम्बुदमण्डली गजघटेव NemiC. 8. 39; आत्मप्रभाभिरदभ्रेऽपि तमसि दूरादाविर्भवन्तम् ... कापालिकमपश्यम् UdaySuKa. 61. 24; **B** intense, ardent (in quality) अदभ्रप्रभावस्तम्भितजम्भारिभुजस्तम्भस्य ... च्यवनस्य HarṣaC. 41. 10; अदभ्रसंभ्रमभ्रमितपक्षपालिभिः AvantiKa. 15. 7; (गणाधिपः नगरीमाविशत्) अदभ्रां बिभ्रतीं श्रियम् HarVi. 32. 15; 5. 68; (ब्रह्माण्डम्) अकालकल्पान्तकरालमासीत् ... क्रन्दद्भिरापतितसिंहरवैरदभ्रैः YogVā. iv. 28. 26; त्वम् ... भद्रम् ... अप्राशुरदभ्रमुग्र तनु मे SaraKaṇṭhā. 276. 20; चिराददभ्रं बिभ्राणः पराजयपराभवम् । ... प्रययौ ... दुर्योधनः PāṇḍaC. 3. 185; अदभ्रसत्राजितभक्तियंत्रितः प्रसेदिवान् प्रादुरभूत् दिवाकरः Yādavā. 14. 1; कीर्तिमदभ्रां तेन स्मरता ... पार्थकथा ... यमिता YudhiVi. 1. 10; 2. 55; अदभ्रं दिशतु स कुशलं दाशरथ्याशुगेशः RāmBāṇSta. 21; **C** big, large, huge (in size) अदभ्राभ्रनिर्घोषगम्भीरेण स्वरेणाभ्यधात् DaśKuC. 38. 15; अदभ्रभीमभ्रश्यत्तडिन्मुसलमांसलघोरधारम् । दैत्येन मुक्तमथ दुस्तरवारि KalyāMaSto. 32; व्योम्नि भ्राम्यति दुष्प्रभञ्जनजवादभ्रेऽप्यदभ्रे मुहुः । ... क्षपा यत्रासीत् क्षपिता MahāvīC. 7. 12 (196. 2); HarVi. 37. 16; शारदाभ्रमिवादभ्रं श्वेतिताखिलदिङ्मुखम् ।... नागमैरावतं व्यधात् MahāP. 22. 17; तत्र त्रिवेदीविद्वद्भ्यः काञ्चनप्रचयान् बहून् ।... अदभ्रान् प्रत्यपादयत् DaśāvaC. 5. 74; चेलुः कलहाय बलमदभ्रमवन्तः ।... भोजाः YudhiVi. 2. 34; गोवर्धनम् ... अदभ्रं तमभ्रंलिहं शैलराजम् ... बिभ्रतम् (नमस्कुर्महे) StavMā. 232. 19; भ्रमराणामिवादभ्रे भ्रमतां भवकानने । शरीरिणामवश्यं हि भवत्येव समागमः BṛKathāMañ. ix. 1. 445; शुभ्रैरभ्रैरदभ्रैः किमपि कपिपतिर्वेगगामी रराज RāmāMañ. 233. 14; अष्टार्धनासिकमदभ्रमथाद्यमष्टौ ... सुहावहमिदं सुरमन्दिरम् MayaMa. 22. 52; उद्ययुः पादयोस्तस्य ... अदभ्रा दर्भसूचयः TriṣaS'aPuC. i. 5. 773; अगाराणि ... तत्र च । अदभ्राणीव सन्ध्याभ्राण्यवतीर्णानि भूतले TriṣaS'aPuC. iii. 6. 15; शुभ्रैरभ्रैरदभ्रैः शरदि तत इतो व्योम विभ्राजमानम् SudarS'. 72; राजा ... अदभ्रतोरणस्तम्भम् ... कुमारभवनमकारयत् TilaMañ. 79. 23; UdaySuKa. 112. 18; PrabhāC. 155. 1; शुभ्रैरभ्रैरदभ्रैरुपरिविरचितैर्मुक्तपीयूषवर्षैरानन्दी नः पुनीयात् ... मुकुन्दः S'ilpaRa. ii. 23. 17; **D** numerous, many अथानयोः ... अदभ्राः पटहाश्च शङ्खाः ... विनेदुः VarāṅgaC. 14. 11; यो भीष्मकर्णगुरुशल्यचमूष्वदभ्रराजन्यवर्यरथमण्डलमण्डितासु । अग्रेचरः BhāgP. 15. 15; पक्वान्नराशयोऽदभ्राः ... बिभ्रत्यभ्रभ्रमच्छुभ्रशरदभ्रश्रियोपमाम् RājTa.(S'rī.) i. 5. 50; भ्रान्त्वाप्यदभ्रेषु धराधरेषु कुत्राप्यनासादितयोग्ययोगाः ... गुणाः स्म दिवानिशं यस्य पुरे वसन्ति HammīMaKā. 1. 84; **E** complete, entire आभाच्छत्रमस्य ... श(स)मशुकृत्वाधिपत्यमिव बिभ्रददभ्रम् DvyāśraKā. 18. 4; (AmaK. 2150; AbhidhāRaMā. 4. 16; Vaija. 208. 85; AbhidhāCin.(He.) 1426; NāmMā. 191; S'abdaRa.(Vā.) 3349; ParaNā. 1479; KośaKaTa. 2. 412; KalpaK. 227. 119; S'abdaRaSaK. 263. 7]

अदभ्रकरुण (adabhra-karuṇa) *adj.* who is full of great mercy, extremely merciful or kind सोऽसावदभ्रकरुणो भगवान् ... विषादम् ... अपनयतात् BhāgP. iii. 9. 25; दृश्याददभ्रकरुणेन विलोकनेन यच्छ्रीनिकेतममलं क्षिपतारविन्दम् BhāgP. iv. 1. 57; iv. 22. 47.

अदभ्रकर्तृ (adabhra-kartṛ) *adj.* of manifold actions यदुह वाव तव पुनरदभ्रकर्तरिह समाहूतः BhāgP. v. 3. 15.

अदभ्रकर्मन् (adabhra-karman) *adj.* of multifarious actions पुरीमिमाम् ... अर्हस्यलङ्कर्तुमदभ्रकर्मणा (मया) BhāgP. iv. 25. 29.

अदभ्रकीर्ति (adabhra-kīrti) *adj.* of abundant fame पत्यौ गढायाश्च पलायमाने कृत्वा यश(:)पुञ्जमदभ्रकीर्तिः VīraBhā. 2. 58.

अदभ्रगुणसंदर्भ (adabhra-guṇasandarbha) *adj.* possessing numerous qualities अदभ्रगुणसंदर्भं श्रीगर्भं हर्षनिर्भरः (अदर्शत् तम्) S'rīKaC. 25. 50.

अदभ्रघोरध्वनि (adabhraghora-dhvani) *adj.* producing loud and terrific sound धाराधराः ... अदभ्रघोरध्वनयोऽनुचक्रुः सप्तस्तुतां शक्रमतङ्गजानाम् Yādavā. 7. 42.

अदभ्रचक्षुस् (adabhra-cakṣus) *adj.* having abundant knowledge त्वयात्मनोऽर्धेऽहमदभ्रचक्षुषा निरूपिता BhāgP. iv. 3. 14; *n.* gnostic sight, great knowledge पश्यन्त्यदो रूपमदभ्रचक्षुषा BhāgP. i. 3. 4.

अदभ्रजघना (adabhra-jaghanā) *adj.* (*f.*) with massive hips मुदा रमणमन्वीतम्° ... कर्तुमदभ्रजघनाः क्षमाः Kāvyāda. 3. 30; SaraKaṇṭhā. 205. 25.

अदभ्रतर (adabhra-tara) *adj.* **i** very intense or loud उदभूच्च तत्र तैरेव सप्रमोदमास्फालितानामदभ्रतरो दुन्दुभीनां निनादः UdaySuKa. 147. 19; **ii** very massive चित्राभिश्चित्रः ... अदभ्रतरसंध्याभ्ररेखाभिरिव (वैजयन्तीभिरभूद्भूपालभूधरः) ParamāKā. 98. 35.

अदभ्रदय (adabhra-daya) *adj.* [*f.* –ā] of great compassion स त्वं ... अदभ्रदयया दृष्ट्या आपन्नानर्हसीक्षितुम् BhāgP. iii. 15. 9; किं त्वाशिषो रात्यपि देहमव्ययं करोतु मेऽदभ्रदयो विमोक्षणम् BhāgP. viii. 3. 19.

अदभ्रदर्भ (adabhra-darbha) *adj.* [*f.* –ā] abounding in *darbha* grass अदभ्रदर्भामधिशय्य स स्थलीम् Kirātā. 1. 38; *m.* plenty of *darbha*-grass ददर्श मेरुं मरुतां पतिः ... अदभ्रदर्भाञ्चितमेखलाभुवम् NemiNir. 5. 21.

अदभ्रदर्भाग्र (adabhradarbhāgra) *n.* tip of a big *darbha* blade गणितस्कन्धसंदर्भोऽदभ्रदर्भाग्रधीमतः । उचितोऽनुचितो यन्मे धाष्ट्यं तत् क्षम्यतां विदः Golā. 280. 5 (31. 59)

अदभ्रदृष्टिच्छटा (adabhradṛṣṭic-chaṭā) *f.* shower of numerous glances तामपि ... अदभ्रदृष्टिच्छटाभिरभितोऽपि नृपः सिषेच UdaySuKa. 137. 22

अदभ्रनाद (adabhra-nāda) *adj.* making a loud noise अदभ्रनादो जलधिर्यथैव ... सेनार्णवः सोऽतिभृशं चकम्पे VarāṅgaC. 17. 38.

अदभ्रनास (adabhra-nāsa) *adj.* having a prominent nose नानाधिष्ठानाङ्घ्रिवेद्यादियोगं मूर्धन्यष्टार्धं तथादभ्रनासम् MayaMa. 21. 10.

अदभ्रपटमण्डप (adabhra-paṭamaṇḍapa) *m.* big tent भर्तृदारिकापि सविषादहर्षा विनिःसृत्य सिद्धायतनमण्डपाददभ्रपटमण्डपं गत्वा ।... निवासहर्म्यमगमत् TilaMañ. 413. 8.

अदभ्रपयोद (adabhra-payoda) *adj.* having large clouds अभ्रवर्त्मनि ... शुभ्रदीधितिरदभ्रपयोदे । न प्रकाशनमवाप S'aṅkaDigVi.(Mā.) 5. 131.

अदभ्रबभ्रु (adabhra-babhru) *m.* large ichneumon अयम् ... कुण्डली । अदभ्रबभ्रोरभ्यर्णे निषीदति वयस्यवत् TriṣaS'aPuC. i. 3. 548.

अदभ्रबुद्धि (adabhra-buddhi) *adj.* having ample intellect स वै महाभागवतः परीक्षित् ... अदभ्रबुद्धिः ... भेजे खगेन्द्रध्वजपादमूलम् BhāgP. i. 18. 16.

अदभ्रभीतिद (adabhrabhīti-da) *adj.* causing great fear अदभ्रभीतिदे ... समरे (ब्राह्मी श्रियमासदत्) HarVi. 43. 113.

अदभ्रम् (adabhram) *adv.* copiously, plentifully, much, not little

श्यामलाकाशखङ्गांशुभूषित: स बभौ मुहु:। अदभ्रमिव बिभ्राणो नीलोत्पलदलस्रजम् BṛKathāMañ. v. 1. 9; स्थितमलियोषिता … °रसिकतामदभ्रमितया सहारवपुषा HarVi. 5. 127; अदभ्रमभ्राजत सा NaiṣC. 15. 24; अदभ्रमभ्रोपलपट्टकेषु ये शितीक्रियन्ते मदनेन पत्रिण: VikraDeC. 13. 25; Subhāṣi. 1781; त्वम् …प्रपद्य पुरुषोत्तमं पदमदभ्रमुद्भ्राजित: StavMā. 10. 23.

अदभ्रमद (adabhra-mada) *m.* great pride प्रवणमदभ्रमदचलद्विपराजितमूढविमलमहिततरङ्गम् SaraKanṭhā. 220. 15; समीक्ष्य वसन्तनभ:। भ्रमदभ्रमदभ्रमदभ्रमदभ्रमरच्छलत: Nalo. 2. 16; *adj.* having great pride (पाण्डवा:) विविशु: परमेण रंहसादभ्रमदा:। … रङ्गभुवम् YudhiVi. 1. 79.

अदभ्रमहाङ्गणक (adabhramahāṅgaṇa-ka) *n.* very great courtyard तन्मुखतोऽदभ्रमहाङ्गणकं स्यादिष्टभागे तु MayaMa. 10. 71.

अदभ्रमहीध्र (adabhra-mahīdhra) *m.* great mountain किंच … व्रजौकस: … महौजस: … अदभ्रमहीध्रसारा: … निजोत्तमाङ्गे न्यवसन्नुदारा: Ānanda-Ra. 1. 42.

अदभ्रमूर्ति (adabhra-mūrti) *adj.* of big size बिभ्रत्योऽदभ्रमूर्तिस्तनभरमबला: स्वर्भुवो या: समायु:। ध्यानध्वंसं विधातुं विकृतिमकृत … तास्वेवास्यं जिनस्य प्रणुदतु तदघं व: JinaS'. 3. 4.

अदभ्रयन्ती (adabhrayantī) *adj.* (*f.*) increasing भासां भरै: … ककुब्भासमदभ्रयन्ती (श्रीशारदा … उवाच) VasaViKā. 1. 58.

अदभ्ररूपा (adabhra-rūpā) *adj.* (*f.*) of great beauty त्वं तेन मा कुरु विषादमदभ्ररूपे S'ṛṅgāS'.(Ja.) 50.

अदभ्रविक्रम (adabhra-vikrama) *adj.* of immense prowess भज वत्स वत्सरसहस्रवर्तिनीं निजराज्यसंपदमदभ्रविक्रम: Surath. 14. 25.

अदभ्रविक्रान्ति (adabhra-vikrānti) *f.* great prowess अदभ्रविक्रान्तिशालिन्य: (आज्ञाशक्तय एवैता:) BrahmāṇḍP. iii. 19. 27.

अदभ्रविभ्रममही (adabhravibhrama-mahī) *f.* abode of plentiful amorous gestures अदभ्रविभ्रममहीं नेत्रामृततरङ्गिणीम्। विलोक्य शक्तिदेवस्तां विस्मयादिति(? त्य) च्चिन्तयत् BṛKathāMañ. v. 1. 181.

अदभ्रविभ्राजमान (adabhra-vibhrājamāna) *adj.* shining excessively अदभ्रविभ्राजमानमौक्तिकदामदीव्यद्वक्षस: … केतो: ĀnandaRa. 6. 4(11)

अदभ्रविस्तार (adabhra-vistāra) *m.* vast expanse अदभ्रविस्तारतिरस्कृतेन … वियता … कृतानुप्रवेशम् … अदृष्टपाराभिधानं सरो दृष्टवान् (समरकेतु:) TilaMañ. 203. 16.

अदभ्रवीची (adabhra-vīcī) *f.* big wave अदभ्रवीचीभ्रमदभ्रकल्पगन्धर्वरेखान्वितगन्धनागा:। … चमूसमुद्र: समजृम्भताग्रे Raghunā. 9. 28.

अदभ्रवीर्य (adabhra-vīrya) *adj.* possessing enormous strength or valour भ्रातृव्यमेनं तददभ्रवीर्यमुपेक्षयाध्येधितमप्रमत्त:। … जहि BhāgP. v. 11. 17; VīraBhā. 1. 67.

अदभ्रवैभव (adabhra-vaibhava) *adj.* possessing vast power or greatness हन्त बिभ्रति विश्वमदभ्रवैभवे भगवति विश्वंभरे कमन्यमाश्रयाम्यगाधगर्धगद्गृहीत: AmṛUda. 3. 0(3)

अदभ्रशक्ति (adabhra-śakti) *adj.* possessing great power तमभ्ररुच्चिमाख्यददभ्रशक्तिं (वेदव्यासम्) श्रीशंकर: S'aṅkaDigVi.(Mā.) 7. 35.

अदभ्रशर (adabhra-śara) *m.* numerous arrows हीरक्षोणिपते: … नवीननगरी … रेजेऽदभ्रशरै: शरासलसितैरुच्चैरिव द्यौर्घनै: ĀnandaRa. 7. 57; *n.* plentiful water, ĀnandaRa. 7. 57.

अदभ्रशिखरकृत्ताभ्र (adabhraśikharakṛttābhra) *adj.* which has pierced the clouds with high peaks अदभ्रशिखरकृताभ्रं(? °कृत्ताभ्रं) भूधरमपश्यत् (राजा) UdaySuKa. 128. 10.

अदभ्रशुभ्र (adabhra-śubhra) *adj.* exteremely white अदभ्रशुभ्राभ्रंलिहप्रासादशिखरशिखाभोगभग्नरविरथतुरंगवेगम् … कुण्डिनं नाम नगरम् NalaCam. 2. 27(3); स्फुटस्फटिकशैलाभैरदभ्रशुभ्रपातिभि:। बभौ क्ष्मां क्षालयन्ती सा (= जाह्नवी) निर्घोषोद्वेलितैर्जलै: RāmāMañ. 22. 23.

अदभ्रशोभा (adabhra-śobhā) *f.* great beauty आस्पदमदभ्रशोभाया: … विलासोद्यानं ददर्श (राजा) UdaySuKa. 46. 26.

अदभ्रश्रुत (adabhra-śruta) *adj.* possessing unbounded knowledge or learning त्वमप्यदभ्रश्रुत विश्रुतं विभो: …। प्रख्याहि BhāgP. i. 5. 40.

अदभ्रश्वभ्र (adabhra-śvabhra) *m. n.* large or deep pit अदभ्रश्वभ्रविभ्रष्टं क: पयो धर्तुमीश्वर: RāmāMañ. 494. 24.

अदभ्रसंघोष (adabhra-saṅghoṣa) *adj.* producing a loud din अदभ्रसंघोषमभूतपूर्वं युगान्तसंवादि बभूव युद्धम् Yādavā. 20. 22.

अदभ्रसंभ्रम (adabhra-sambhrama) *adj.* greatly agitated or excited अदभ्रसंभ्रमै: कैश्चिदासनात् पतयालुभि:। … फाल्गुनाकृष्टकोदण्डटंकार: श्रूयते स स: PāṇḍaC. 4. 299.

अदभ्रसंमत (adabhra-sammata) *adj.* hailed or greeted largely स: (पारिषद:) …। हविश्चरुं बिभ्रददभ्रसंमत: समुज्जिहीते स नृपस्य सन्निधौ Rāgh. 1. 48.

अदभ्रसौहृद (adabhra-sauhṛda) *adj.* having unbounded compassion or friendship समुत्तीर्य … भवार्णवं भीममदभ्रसौहृदा:। … ते … याता: BhāgP. x. 2. 31.

अदभ्राजि (adabhrāji) *m.* great fight or battle भीष्मेणादभ्राजिस्तम्भितहरि जिष्णुना क्षणादभ्राजि YudhiVi. 7. 23.

अदभ्राभ्र (adabhrābhra) *n.* huge cloud अदभ्राभ्रभ्रमिखेदेन सौदामिनीसंदोहमिव लब्धनिद्रम् … आयतनं ददर्श TilaMañ. 214. 11; तत: सौमित्रिपौलस्त्यपत्रिजालैरवान्तरै:। अदभ्राभ्रैरिव भ्रान्तमेकच्छत्रमभून्नभ: RāmāMañ. 344. 22.

अदभ्रारव (adabhrārava) *adj.* making a loud noise, roaring loudly अदभ्रारवमुखकुहरस्पष्टदंष्ट्राकरालाम्। … आलक्ष्य घोरां तनुमनिलभुवो भूमिकन्या चकम्पे Rāgh. 13. 72.

अदम (a-dama) *adj.* **i** who cannot control himself आराद्दममततरा …आत्मानमीश दधती वनभू: प्रियत्वमायाति HarVi. 5. 135 (comm. दूरत एव अदमानां अवशिनां मततरा अत्यन्तरुचिता); **ii** not liable to be subdued, untamable सैन्यम् … ममादिमददो दुद्दमदमोऽददद्दीदमत् HarVi. 43. 196.

अदमयन्ती (a-damayantī) *f.* **A** (a lady who is) not Damayantī (wife of Nala) चित्रमिदम् … असुभद्रापि विजयमानुगुण्येनाकर्षति अदमयन्त्यपि लोकपालानवधूय नलसारङ्गगुरूकरोति (? नलसारमङ्गीकरोति) AvantiKa. 45. 22; **B** (a plant or creeper which is) not the jasmine, AvantiKa. 45. 22.

अदमित (a-damita) *adj.* untamed अश्वगजादिभिर्वाहनैरदमितै: … न यायात् ManvaMu. 156. 29 (*on* 4. 67)

अदमुद्र्यञ्च (adamudry-añc) *adj.* [*f.* -adamuīcī] going to that [MW based on v. l. अदमुद्र्यच् of MugdhaBo. 26. 80, BÖHTLINGK p. 299]

अदम्भ (a-dambha) *adj.* [*f.* -ā] **i** free from deceit, straightforward, sincere, honest ऋत्विजो वरयेत्पश्चात् … अदम्भानृतवर्जितान् VasiS. 18. 34; विभीषणगुणाकृष्टान् कोविदान्को बताधुना। लम्भयिष्यति विस्रम्भमदम्भै: सूनृतामृतै: RāmC. 24. 6; तत्र त्रेताग्निविधानेन निष्कामानामदम्भानां पुण्यं स्यात् AṇuBh. 176. 16 (*on* iii. 1. 13); परबल: … (? त्यक्त्वा) मायामदम्भञ्च(अदम्भश्च ?) सक्तकार्त्तस्वरा: सदा भुंजते (श्री)श्रीफलानि EI. ix. 253. 19; **ii** free from vanity, not pretentious अदम्भा हि रम्भा PadyāTa. 118; *m.* **i** absence of deceit, straightforwardness, honesty, sincerity सत्यं अदम्भ: … धर्मस्य रूपमेतत् SkandP. ii(9). 6. 30; **ii** name of S'iva दम्भो ह्यदम्भो वैदम्भ: … पशुपति: MahāBhā. xiii. 17. 76; अदम्भो महादम्भ: सर्वभूतमहेश्वर: …एवं नाम्नां सहस्रेण तुष्टाव वृषभध्वजम् LiṅgaP. i. 98. 124; *n.* absence of deceit or hypocrisy पुष्पं नानाविधं दद्यात् आत्मनो भावसिद्धये।…अदम्भं च … दश पुष्पं प्रकीर्तितम् MahNirvāT. 5. 148; **अदम्भेन** (a-dambhena) [Inst.] without deceit, without hypocricy, sincerely, honestly तं जाग्रतमदम्भेन भ्रातुरर्थाय लक्ष्मणम्। गुह: संतापसंतप्तो राघवं वाक्यमब्रवीत् Rāmā. ii. 45. 1; तं जाग्रतं गुणैर्युक्तं (v. l. जाग्रतमदम्भेन)…। भ्रातृगुप्त्यर्थम् …अब्रवम् Rāmā. ii. 80 2; अदम्भेन भजत गजवदनम् ĀryāSaS'a. *28; अरागद्वेषत: कृतं कीर्तिरागादकीर्तिद्वेषाच्च न कृतम्। अदम्भेन कृतमित्यर्थ: GītāBh.(Rā.) 677. 8 (*on* 18. 23)

अदम्भक (adambha-ka) *adj.* not a hypocrite, sincere, honest वृद्धा ह्यलोलुपाश्चैव आत्मवन्तो ह्यदम्भका: …। तानाचार्यान् प्रचक्षते VāyuP. i. 59. 29; अदम्भक: … विमुक्त: सर्वसङ्गैर्य: स तीर्थफलमश्नुते SkandP. iv. 6. 50.

अदम्भडिम्भ (adambha-ḍimbha) *m.* innocent young animal अदम्भडिम्भसंरम्भकरंभात्मंभरे हरे:। किं शैलशूकरव्याधे व्याधामेध्यामला रुचि: Surath. 3. 24.

अदम्भदूत्य (adambha-dūtya) *n.* deceitless or honest mission अदम्भदूत्येन भजन्तु वा दयां दिशन्तु वा दण्डममी ममागसा NaiṣC. 9. 131.

अदम्भवीर (adambha-vīra) *m.* unpretentious hero उत्तम्भयामास पयोनिधेर्यस्तीरे जयस्तम्भमदम्भवीर: VikraDeC. 1. 111.

अदम्भवृत्ति (adambha-vṛtti) *adj.* of sincere conduct भवन्त: … अदम्भवृत्तय: सर्वे गुरुकर्मसु चोद्यता: HariVaṁ. 65. 14; पेतुरस्खलितसिद्धबुद्धय:। भाविन: … अदम्भवृत्तय: VasaViKā. 10. 70.

अदम्भार्चन (adambhārcana) *n.* honest or sincere worship शम्भावदम्भार्चनैर्वृद्धत्वस्य विशुद्धतां जनयितुं कर्तव्यशेष: स्थित: Mugdhopa. 66.

अदम्भिता (adambhi-tā) *f.* straightforwardness or sincerity अदम्भिता त्वमात्सर्यमप्रार्थितधनागम:। … इत्यादिसत्प्रवृत्तिश्च कर्तव्या क्षेत्रवासिना SkandP. iv. 96. 79.

अदम्भित्व (adambhi-tva) *n.* lack of deceit, straightforwardness,

sincerity, honesty अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् (ज्ञानसाधनानि) MahāBhā. vi. 35.7 (= BhagGī. 13.7); BrahmāṇḍP. iii. 41.78; AgniP. 380.23; स्वधर्मप्रकटीकरणं दम्भित्वम्। तदभावोऽदम्भित्वम् GītāBh.(S'aṅ.) 375.11 (*on* 13.7); अदम्भित्वं धार्मिकत्वयशःप्रयोजनतया धर्मानुष्ठानं दम्भः तद्रहितत्वम् (Rā.) 577.16 (*on* 13.7); ध्यानपूजादिकं लोके द्रष्टर्यैव करोति ··· तथानाचरणमदम्भित्वम् SarvaVeSāSaṁ. 117.

अदम्भिन् (a-dambhin) *adj.* free from deceit, straightforward, sincere, honest योऽदम्भी (भीमभूपालः) ··· वैदर्भी मान्या या त्रिजगति कन्या बभूव भीमान्यायात् Nalo. 1.16.

अदम्य (a-damya) *m.* bull until to be tamed तदह्नोऽदम्यैर्भारोऽयमुह्यते TriṣaS'aPuC. i. 1.753.

[1]**अदय** (a-dayá) *adj.* [*f.* -ā] **1A** merciless, unkind, cruel, hard-hearted, unsympathetic or inconsiderate (towards the beloved) अदयो वीरः शतमन्युरिन्द्रः ṚV. x. 103.7; त्वामदयं मदयन्ती··· वाञ्छति VāsaDa. 213.3; मुञ्च क्षणमदय KuṭṭaMa. 158; अदयां मन्ये कथं मातरम् ĀścaCū. 1.15; महोदयानामवधीरणेन महोदयानामवधी रणेन (त्वम्) DeviS'. 61; कलियुगे ··· विप्राः··· अदयाः (भवन्ति) S'ivaP. i. 1.17 (1A. 14); हृदयमदयं (विष्णोः) DaśāvaC. 4.13; 10.28; अदय दशसि किं त्वं बिम्बबुद्ध्याधरम् AuciViCa. 35 (4); चित्तेन मेरुगिरिधीर दयालुनासि सर्वोपकारकृतधीरदया लुनासि SiPriSt. 21; छिन्नं छिन्नं हृदयमदयैश्छिद्यतेऽद्यापि यैर्मे SubhāRaK. 23.45; तद् अयमदयो मह्यं मुग्धे किमेवमसूयति SubhāRaK. 23.43; मुग्धे ··· विशसि हृदयमदये मे ĀryāSaS'a. 534; हृदयमदये तस्मिन्नेवं पुनर्वलते बलात् GītGo. vii. 16.8; S'ārṅgaPa. 3431; सः ··· अदयैः कैश्चिद्राजधान्यङ्गने हतः RājTa.(Ka.) 8.2177; अदय दयित सिञ्चस्यात्मदृग्वारिणा किं परिमलबहलानां मालतीनां न दीनाम् Golā. 249.19 (30.5); त्यक्त्वा मामदया ··· गता MohaRāPa. 3.9; वचनं मानवददयं वृष्णिश्रेष्ठः···अवदत् YudhiVi. 6.125; 8.40; कालक्षेपं यदयमदयोऽप्यद्य यावद्विधत्ते KaṁVa. 4.48; अदये ··· तनुरपि ··· तस्य ··· शीर्यति StavMā. 282.3; अस्या विदेशमदयो दयितः प्रयातः S'ṛṅgāMañ.(A.) 36.16; नयादयैनामति मा निराशतामसून्विहातेयमतः परं परम् NaiṣC. 9.128; क्रूरो नृशंसोऽप्यदये Vaija. 203.24; कर्कशः स्यात् ··· अदये AnekāK. 893; **1B** (*fig.*) very firm (*lit.* without pity) अदयैरालिङ्गनैश्च ··· शान्तिं रचयन्ति रागिण्यः ĀryāSaS'a. 332 (comm. अदयैः गाढैरित्यर्थः); **2** very sharp, merciless यदयमदयः सीताकण्ठे करोति कृपाणकः PrasaRā. 6.32.

[2]**अदय** (a-daya) *adj.* not a giver, not a doner कुमुदवनबान्धवोऽदयः ··· नास्ति दयो दानं यस्य सः अदयो अदाता VidvaMuMa. 2.12 (3)

अदयकचग्रह (adaya-kacagraha) *m.* merciless (i.e. very tight or relentless) seizure of the hair अदयकचग्रहोल्लसद्भ्रुकुटिभूषितललाटदेशम् ···रमणीयम् ··· रतसमरमाततान (राजा) TilaMañ. 17.9; हृषीकेश न समीपमदयकचग्रहग्रहिलविग्रहायाः कुटिलकुन्तलाविलविलोचनचुम्बनानाम् इति मुकुन्दम् ··· नाभिनन्दन्ती YaśasCam. i. 85.4.

अदयतस् (adaya-tas) *adv.* [for Abl.] merciless, unkind or inconsiderate किम् ऋते दयितात् ··· अदयतोऽस्ति ममेह सुखम् Nalo. 3.43.

अदयदशनदंश (adaya-daśanadaṁśa) *m.* cruel or hard bite with tooth अदयदशनदंशक्लान्तिभाजोऽधरस्य स्मितरुचिसुधयोच्चैः साधु संधाय सेकम् Kapphiṇā. 4.5.

अदयदारित (adaya-dārita) *adj.* rent cruelly उच्चैरनायिषत यस्य समाकुलत्वं विद्वेषिणामदयदारितदोर्द्रुमाणाम् (आशाः) HarVi. 37.13.

अदयन (a-dayana) *n.* cruelty सेवासर्गादुदस्तोऽदयनमदलवक्षोदमुक्ते सवादे रेमे रत्ने Kāvyālaṅ.(Ru.) 5.17 (comm. अदयनेन निर्दयत्वेन)

अदयनिपीडिताधर (adayanipīḍitādhara) *adj.* with lips pressed mercilessly अदयनिपीडिताधरम् ··· अबलामुखम् ··· तव कथयति निखिलनिशासु जागरम् YaśasCam. i. 360.6.

अदयम् (a-dayam) *adv.* **A** mercilessly, in a cruel manner अदयमिव कराग्रैरेष निष्पीड्य सद्यः शशधरम् ··· उष्णरश्मिः। अवकिरति ··· कान्तिनिर्यासम् S'iśuVa. 11.62; सखेऽदयं तामविलास खेदयन्नहीयसे Kāvyālaṅ.(Ru.) 3.54; त्रिभ्रद्वपुः सरक्तौघविस्रं सीरक्षतोऽदयम्। तेनाकारि स नागांसविस्रंसी रक्षतोदयम् HarVi. 43.306; 46.65; प्रस्वापनास्त्रमसृजत्स तामसमयोऽदयम् RāghPāṇ.(Dha.) 18.15; ममन्थुः ··· अपांनिधिम् ···देवादयोऽदयम् SkandP. ii(9). 11.27; कैकेय्याः सा हृदयमदयं मन्थरा निर्ममन्थ RāmāCam. 2.9; अयमदयं दहति मामनलशरः VyaktiVi. 85.11; प्रलयपवनैरस्तं नीतः पुरातनवारिदो यदयमदयं कीलाजालं विमुञ्चति नूतनः SūktiMu. 21.10; अदयमुभयथापि दैवयोगादपि दयितेन कृतास्मि विप्रलब्धा S'ṛṅgāMañ.(A.) 22.7; **B** ardently, fervently इच्छामि चैनमदयं परिरब्धुमङ्गैः Vikramo. 5.9; चिरमवन्मिलनादुपगूहनं द्विजपतावदयं ददति श्रियः HammīMaKā. 7.26; **C** harshly अदयं घर्ष शिलायाम् ··· हे हेमकार कनकम् SaduktiKa. 239.14; 248.25.

अदयमान (a-dayamāna) *adj.* not being compassionate, not being kind भोगेष्वदयमानस्य भूतेषु च दयावतः। वर्धते ··· विषयः MahāBhā. xii. 95.7.

अदययुद्ध (adaya-yuddha) *n.* cruel or ruthless war अयमदययुद्धोन्मर्दलीलारसोऽपि। स्फुरति तदनुरोधादेव विद्वेषिपेषी RukmiHa. 2.3.

अदयरयदलत् (adayaraya-dalat) *adj.* rending with merciless force नो कल्पापायवायोरदयरयदलत्क्ष्माधरस्यापि गम्या SūryaS'. 23.

अदयवृष्टि (adaya-vṛṣṭi) *f.* fierce shower तोयदैरदयवृष्टिविशिष्टैर्विष्टपत्रयमनीयत कष्टम् Surath. 11.27.

अदयशस्त्रपात (adaya-śastrapāta) *m.* cruel attack with weapons अदयशस्त्रपातविद्राविताखिलदस्युलोकश्च शोकलम्बालकं सबालकमादाय तदीयमन्तःपुरपुरन्ध्रिसार्थमर्थभारं च भूयः स्वशिबिराभिमुखोऽभवम् TilaMañ. 137.3.

अदयहृदय (adaya-hṛdaya) *adj.* whose heart is merciless or cruel अदयहृदयः कर्मारातौ न ते (? नते) च कृपात्मवान् ··· त्वम् YaśasCam. ii. 389.9.

अदया (a-dayā) *f.* mercilessness, unkindness, cruelty आलस्यं चाघृणादया MahāBhā. xiv. App. I. 4.1700; निर्दयस्य (v. l. निर्दयस्या)दया कर्तव्या Bārhas. 3.39; विदधे निघ्नता तेन तमस्ताराातिनादया HarVi. 43.51; अदयया दर्पांशेन हिंसया च त्यक्ते प्रमाणशास्त्रकुशले (अयम् ··· दैवं ये खण्डयन्ति तान् ··· छिनत्ति) Kāvyānu.(He.) 261.12.

अदयापात (adayāpāta) *m.* merciless attack दानतोयमनारतम्। वपुषामदयापातादिभानामभितोऽगलत् S'iśuVa. 19.68 (comm. अदयापातान्निर्दयाभियोगात्)

अदयारि (adayāri) *m.* merciless enemy अयमदयारिदारणदारुणकृपाणरुचिनिचयरचितमूर्त्तकालरात्रिप्रपञ्चः ··· अनुधावति वीरधवलः HammīMaMa. 3.15 (27)

अदयालु (a-dayālu) *adj.* cruel, ruthless तं यज्ञपशवोऽनेन संज्ञप्ता येऽदयालुना। कुठारैश्चिच्छिदुः BhāgP. iv. 28.26; निरन्तरा हता लोका विशोकेनादयालुना SkandP. v(2). 29.35; हृदयालुर्दयालुस्त्वमदयालुरिवाभवः S'āliC. 3.23; रणभुवि ··· अदयालूनां द्विषां ततिं पातयामि गदया लूनाम् YudhiVi. 6.93; गोपमूर्तिरदयालुः। दैत्यः प्रलम्बनामा प्रलम्बबाहुं भवन्तमापेदे Nārāy. x. 57.3.

अदयालुता (adayālu-tā) *f.* absence of compassion कल्पद्रुमोऽप्यदातृत्वं सुगतोऽप्यदयालुताम्। आयाति KathāSaSāg. xviii. 4.32.

अदयालुत्व (adayālu-tva) *n.* the state of being without compassion (cruelty) अदान्तत्वादातृत्वादयालुत्वैः अपराधित्वमात्मनो मन्यमानाः···प्रजापतावूषुः BṛĀraUBh. 699.6 (*on* v. 2.3)

अदयालुवत् (a-dayāluvat) *adv.* like one who is cruel स्पृहयालुं कपिं स्त्रीभ्यो निद्रालुमदयालुवत्।··· वद द्रुतम् Bhaṭṭi. 7.21.

अदयाविष्ट (a-dayāviṣṭa) *adj.* who is without compassion अदयाविष्टैः (भटैः)···मार्गेशः समरुध्यत RājTa.(Jo.) 820.

अदयित (a-dayita) *adj.* not dear मातृदोषाददयितो यदि तावदहं नृप। शत्रुघ्नमपि ··· अभिभाषितुमर्हसि Rāmā. ii. App. I. 23.87; **B** not having the beloved (with oneself) जलेजानि दुन्वन्त्यदयितं जनम् Bhaṭṭi. 6.75.

अदयोदय (a-dayodaya) *m.* Kali (*lit.* rise of cruelty) यथाप्रस्तावमयममर्षोत्कर्षहृदयोऽदयोदयो ह्यधर्मेण प्रियसखेन सममित एवाभिवर्तते CaitaCa. 7.9 (1)

अदर (a-dara) *adj.* fearless स परेण तदाजितां महीं लघु मुक्त्वा सहसादरोऽदरैः ··· प्रययौ ··· काननम् RāghPāṇ.(Dha.) 4.36; त्वमशुभान्यभिनन्दन ··· धूनय नः परमोऽदरः CaturJiStu. 13; चित्ररुचिभाजि स भोजः सोदरं स्वमदरं परिमुच्य···दिल्लीं सेवते स्म HammīMaKā. 10.11; त्रातः काकोऽदरो येन···स मेऽस्तु शरणं प्रभुः Kuval. 65 (8); *m.* absence of fear चकोरस्य दरं देवश्चक्रवाकस्य चादरम्। विवस्वान्नाभिसंधत्ते विश्वमेकं प्रकाशयन् SubhāNī. 7.3.

अदरक (adaraka) *m.* [in *gargādigaṇa*] name of a person, GaṇPā. 71.85.

अदरजठरविवर (adara-jaṭharavivara) *n.* large cavity in the stomach अदरजठरविवरविरचितासनभुवनस्ववहनासहिष्णुतयेव ··· गीर्वाणा नारायणमस्तौषुः ĀnandRa. 1.16(6)

अदरणीय (a-daraṇīya) *adj.* not to be split up यदद्रयः पर्वताः अदरणीयाः Nir. 9.9 (162.2)

अदरवेध (adara-vedha) *m.* severe piercing (by arrows) अहितं विशिखैरहन् मुकुन्दोऽदरवेधेऽपि दरव्यथाविमुक्तः Yādavā. 15.120.

अदरिद्र (a-daridra) *adj.* [*f.* -ā] **A** not poor, not in need, having no want अदरिद्रोऽस्मि सखे Mṛcch. 3.30 (? 31). (3); (लवन्यः) स तादृगपि भूपाले क्रुद्धे ···। अदरिद्रो गिरिद्रोणीश्रेणिभूसुलभाशनः RājTa.(Ka.) 8.3298; **B i** free from poverty, rich, wealthy यद्यपि च ··· साधुरदरिद्रः ··· दुर्लभः HarṣaC. 249.12; अरोगाश्चादरिद्राश्च जातौ जातौ भवन्ति ते BhaviP. 145A.9 (i. 93.53); (महादेव) तथा शुचिव्रतं विप्रमदरिद्रम् ··· ज्ञानिनं कृपयाकरोः S'ivaP. ii(5)

25.16 (250B.3); अदरिद्रा भवत्येषा सर्वार्थिजनसंहतिः KathāSaSāg. iv. 2.30; iv. 2.33; xii. 23.26; गोहेमहयरत्नादिप्रदानैः ... द्विजान् । ... अदरिद्रांश्चकार सा RājTa.(Ka.) 7.181; येनादरिद्रां जगतीं विधातुं हेमाद्रिरप्यस्य गृहेऽवतीर्णः CaturCin. ii(1). 2.10; अदरिद्रा वसामोऽत्र सर्वहेतोरिवोदरे Yādavā. 6.70; सकलां पृथिवीमदरिद्रां कुरु VetāPañ.(S'i.) 39.34; **B ii** free from misery, happy (कश्मीरमण्डलम्) करोति कद्वा अदरिद्रमन्वयम् S'rīKaC. 3.13 (comm. अदरिद्रं सुखितम्); **C i** rich in merit, noble ददर्देऽदोऽदरिद्रोऽरिरद्रिरौद्रोऽरुरादरी RāghPāṇ.(Dha.) 18.51 (comm. अदरिद्रः पुण्यवान्); **C ii** rich in, possessed of पवित्रधरः ... । धनैर्दरिद्रः स्वजनैरदरिद्रः कुलादिभिः KathāSaSāg. xii. 6.22; **D** unchangeable, firm अदरिद्रानुरागिता । द्वादशेति गुणानाहुः SaraKaṇṭhā. 569.1 (cf. f. n. 1 अदरिद्रेत्यनुरागिताया विशेषणम्, तेन स्थिरानुरागितेत्यर्थः)

अदरिद्रता (adaridra-tā) *f.* **i** the state of not being poor, absence of poverty यस्य पाणिनिबद्धेन वररुच्याश्रितश्रिया । व्यज्यते कङ्कणेनेव लक्षणेनादरिद्रता S'rīKaC. 25.63; **ii** (*fig.*) the state of not being poor (i. e. wanting in wisdom), S'rīKaC. 25.63; **iii** the state of not lacking (in courage) बहिः कोष्टकभृत्येषु विद्रुतेष्वदरिद्रताम् । परं जनकचन्द्राख्यो धैर्येणोवाह डामरः RājTa.(Ka.) 8.2331.

अदरिद्रा (a-daridrā) *adj.* other than (the root) *daridrā* आतोऽनोऽदरिद्रः MugdhaBo. 26.198 (172.15) (comm. दरिद्रावर्जादादन्तात्)

अदरिद्राणमुद् (adaridrāṇa-mud) *adj.* whose delight is not meagre (i. e. is great) एषादरिद्राणमुद्ददरिद्रायिका ददौ DvyāśraKā. 9.158.

अदरिद्राति (a-daridrāti) *adj.* other than (the root) *daridrā* अदरिद्रातेः Kātan. iv. 5.104.

अदरिद्रायक (a-daridrāyaka) *adj.* [*f.* -ikā] **i** in order to make oneself rich कोऽप्यदात् । कर्णरूपं लिखित्वास्या अदरिद्रायकोऽन्यदा DvyāśraKā. 9.157 (comm. अदरिद्रिष्यत् ईश्वरीभवितुमित्यर्थः); **ii** not poor, rich एषादरिद्राणमुद्ददरिद्रायिका ददौ DvyāśraKā. 9.158 (comm. उदारा)

अदरिद्रालय (adaridrālaya) *m.* name of S'iva (*lit.* rich abode) अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु । ... अद्रिद्र्यालयः (v. l. अदरिद्रालयः) कर्ता MahāBhā. xiii. 17.37.

अदरिद्रीकृत (adaridrī-kṛta) *adj.* [*f.* -ā] relieved from poverty मेजे च पूर्णकोषश्रीर्हेम्ना तद्युक्तिजन्मना । सावरोधोऽसमान्भोगानदरिद्रीकृतद्विजः KathāSaSāg. vii. 1.91; अदरिद्रीकृता भूमिः VikraDeC. 4.52; दानैः क्षमाभुजा । अदरिद्रीकृता विप्राः RājTa.(Ka.) 7.955.

अदरिद्रीकृत्य (adaridrī-kṛtya) *ger.* having relieved from poverty विहङ्गिके, प्रहिणु ... अदरिद्रीकृत्य वैश्रवणयाचकवृन्दम् TilaMañ. 372.10; राजा ... मुख्यचौरम् ... गजाश्वरत्नकांचनैरदरिद्रीकृत्य ... प्रस्थापयामास PuruṣPa. 53.20; 102.28.

अदरिद्रोहिका (adaridrohikā) *adj.* (*f.*) having excellent reasoning अदरिद्रोहिका । ...तव भारती जिनपते CaturJiStu. 87.

अदरिन् (a-darin) *adj.* [*f.* -ṇī] fearless हंसम् ... ग्रहीतुकामादरिणा शयेन यन्नादसौ निश्चलतां जगाहे NaiṣC. 3.4 (comm. अदरिणा निर्भयेन); करेण वाञ्छेव विधुं विधर्तुं यमित्थमात्थादरिणी तमर्थम् । पातुं श्रुतिभ्यामपि नाधिकुर्वे ...किम् NaiṣC. 3.62.

अदर्प (a-darpa) *adj.* devoid of pride अदर्प कन्दर्पम् ... कथमसि विधातुं व्यवसितः MālMā. 5.202 = VakroJi. 12.7 = SaraKaṇṭhā. 129.15 = SuvṛTi. 2.32 = SubhāRaK. 16.22; *m.* absence of pride योगमर्थं ततोऽदर्पम् ... धर्मस्तेतान् समादाय ... आगतः KalkiP. iii. 6.10; सर्वावस्थास्वकार्पण्यमदर्पः सति कारणे । ... महापुरुषलक्षणम् SūktiRa. 168.14; [given as the meaning of *vismaya*, AnekāK. 645]

अदर्पक (adarpa-ka) *adj.* **i** different from *darpaka* (i. e. Cupid) अदर्पकाः स्मः सविधे स्थितास्ते NaiṣC. 10.46; **ii** devoid of pride, NaiṣC. 10.46.

अदर्पकचित (adarpa-kacita) *adj.* shining with humility or modesty अदर्पकचितं बालं प्रौढा लक्ष्मीः ... आलिङ्गत् RājTa.(Jo.) 788.

अदर्पणस्थ (a-darpaṇastha) *adj.* not reflected in the mirror ददर्श रामोऽनुजसंज्ञमन्तिकाददर्पणस्थं प्रतिबिम्बमात्मनः RāmC. 4.68.

अदर्पविशदा (adarpa-viśadā) *adj.* (*f.*) clear due to absence of pride अदर्पविशदा विद्या भवत्युन्नतचेतसाम् DarpDa. 1.31.

अदर्पशौर्य (adarpa-śaurya) *n.* valour without pride अदर्पशौर्यस्पृहणीयसत्त्वाः ... प्रयान्ति वीराः ... अजरामरत्वम् DarpDa. 5.45.

अदर्पसंपद् (adarpa-sampad) *f.* wealth without pride सर्गारम्भान्निसर्गेण नैव दृष्टो न यः श्रुतः । अदर्पसंपत्प्रणयी ... जनः DaśāvaC. 5.47.

अदर्पित (a-darpita) *adj.* not proud, humble तैस्तथ्यकारिभिर्युक्तैः श्रद्धावद्भिरदर्पितैः VāyuP. ii. 39.6; BrahmāṇḍP. iii. 2.5.

अदर्पिन् (a-darpin) *adj.* having no pride पराभूतक्ष्माभुजा । ... राज्यं स्वमर्पणीयमदर्पिना PrabhāC. 95.19.

अदर्भकर (adarbha-kara) *m.* hand without *darbha* grass यदा यजमानो गन्धादि ब्राह्मणसात्करोति तदा सोऽप्यदर्भकरेणैव तिलकं कुर्यात् BālamBha. i. 511.21 (*on* i. 231–32)

अदर्भपाणिक (adarbhapāṇi-ka) *adj.* not having *darbha* grass in hand चण्डालभाषिणं विप्रं सदैवादर्भपाणिकम् । ...तमाहुः पशुघातकम् SkandP. ii(1). 26.21.

अदर्विहोम (a-darvihoma) *m.* oblation different from that made with a ladle आश्रुतप्रत्याश्रुते ... याज्यानुवाक्ये वषट्कारश्चादर्विहोमानाम् ĀpaS'S. xxiv. 3.13; अदर्विहोमं सन्तमित्यापद्यते S'ābaBh. 1626.27 (*on* viii. 4.3); अदर्विहोमानां वा लिङ्गात् SaṅkarKā. ii. 2.14 (81.17 Madras Ed.)

अदर्श (a-darśa) *adj.* which is without (the performance of) the new-moon sacrifice यस्याग्निहोत्रमदर्शम् ... आ सप्तमांस्तस्य लोकान् हिनस्ति MuṇḍaU. i. 2.3; अदर्शं दर्शाख्येन कर्मणा वर्जितम् MuṇḍUBh. 315.7 (*on* i. 2.3)

[1]**अदर्श** (a-darśa) *m.* **1** other than *darśa* i. e. the full-moon sacrifice इज्येते स्वर्गलोकस्य दर्शादर्शौ BṛĀraUBhVā. (Sambandha.) 128; **2** disappearance अदर्शे तु गते देवे सर्वलोकपितामहे PadmP. v. 4.86; **3** new-moon day भद्रमङ्गलवद् अदर्शे एव दर्शः TikāSe. i. 4.9.

[2]**अदर्श** (adarśa) *m.* mirror [PW]

अदर्शता (adarśa-tā) *f.* the state of being invisible कुमारो नागपूर्वकः । जगामादर्शताम् BṛKathāK. 56.410.

अदर्शत्व (adarśa-tva) *n.* **i** the state of being other than the new-moon-day sacrifice कालान्तरकरणे सत्यौत्पत्तिकरूपविसंवादाददर्शत्वमपूर्णमासत्वं च स्यात् TantrVā. 471.23 (*on* ii. 2.3); **ii** the state of being other than the new-moon day इदमप्येकादशदिनस्यादर्शत्वे BālamBha. i. 594.16 (*on* i. 255)

अदर्शन (a-darśana) *n.* **1 A** absence of sight, non-observation, not seeing, lack of perception **B** absence of knowledge, lack of experience **C** invisible state, unknown state or condition **2 A** disappearance, going out of sight, becoming invisible, concealment **B** power to become invisible **3 A** absence, non-availability, not being found **B** absence of mention, not being available in a text **4** elision, omission **5 A** destruction, end, vanishing completely **B** antecendent non-existence of perception **6 A** failure to show oneself, not available to meet **B** failure to see or meet, neglect, disregard, not taking note of **7 A** not the accepted view, not the correct stand-point or doctrine **B** nescience, erroneous knowledge **8 A** not the organ of sight **B** meaning other than 'seeing' **9** desire to see **1 A** absence of sight, non-observation, not seeing, lack of perception नादर्शनात् KātyS'S. i. 6.22; अपराह्णे पिण्डपितृयज्ञचन्द्रादर्शनेऽमावास्यायाम् KātyS'S. iv. 1.1; (सोमस्य) अदर्शनेऽरुणपुष्पाण्यर्जुनान्यभिषुणुयात् KātyS'S. xxv. 12.18; xxvi. 2.3; उपवसेत् ... अदर्शनेऽमावास्याम् MānS'S. 25.9; अदर्शने शरीराणाम् KauṣiGS. v. 6.5; स्त्रीशूद्रशवकृष्णशकुनिशुनां चादर्शनमसंभाषा च तैः PāraGS. ii. 8.3; नार्यो रामादर्शनकर्शिताः Rāmā. ii. 53.9; तवादर्शनजः शोको भूयो मां परितापयेत् Rāmā. v. 37.22; यथा प्रश्लिष्टे स्वरवर्णसंहिते तयोस्तयोरक्षरवर्णयोस्तथा । अदर्शनेऽनार्थ्यविलोप उच्यते ṚPrāti. 11.28; अन्तर्द्धौ येनादर्शनमिच्छति P. i. 4.28; SaraKaṇṭhā.(Gr.) i. 1.70; किं कारणम् । तस्यादर्शनात् । बलादेरित्युच्यते न चात्र बलादिं पश्यामः MahāBh. i. 134.13 (*on* i. 1.56); अदर्शनेन योगो नास्तीति कृत्वादर्शनसहचरितो योऽर्थस्तस्य गतिर्भविष्यति साहचर्यात् MahāBh. i. 227.25 (*on* i. 2.51); यश्चरुपुरोडाशाग्निर्वपति । तत्रादर्शनात् । न तत्र प्रत्ययो दृश्यते MahāBh. ii. 358.4 (*on* v. 1.72); सर्वशोऽदर्शनमयोगः CaraS. i. 11.37 (Ed. 1941); सा दुःखिता भर्तुरदर्शनेन Saund 6.10; मोहो नाम ... तस्य निश्चैतन्यभ्रमणपतनाघूर्णनादर्शनादिभिरनुभावैरभिनयः प्रयोक्तव्यः NāṭyaS'ā. 7.77(3); सतः परमदर्शनं विषयानागमात् MīmāSū. i. 1.13; उदितमात्रस्य लोकैरदर्शनात् BhaṭṭiCan. 16.13 (*on* xiii. 2.11); तमाहितौत्सुक्यमदर्शनेन प्रजाः ... । नेत्रैः पपुः RaghuVa. 2.73; आगते चादर्शनम् KāmSū. 331.22 (6.3); दूरभूयस्त्वाद्धूमस्याग्नेश्च चादर्शने गौणः शब्दः S'ābaBh. 128.1 (*on* i. 2.12); 404.3 (*on* ii. 1.5); 1355.16 (*on* vi. 1.4); अदर्शने दर्शनमात्रकामा S'atTrayī. 1.22; न चैषा प्रोषितभर्तृका प्रवासचिह्नस्य वेण्यादेरदर्शनात् DaśKuC. 116.3; न चात्रादर्शनं हेतुः S'lokaVār. 5(7).13 (453.6); निर्गतेष्वपि दृष्टत्वात्तद्गतेष्वप्यदर्शनात् TantrVā. 188.11 (*on* i. 3.14); घटादिष्वदर्शनादिति निरस्ते Bṛha. 217.9 (*on* i. 1.5); किन्तु अदर्शनमात्रादेव

व्यतिरेकमाहु: HetuBiṬ. 52. 26; अदर्शनाद्दर्शनं बलीय: ManuBh. ii. 332. 2 (*on* 10. 5); हीनातिरिक्तविकृतानां चात्र छायानां दर्शनमदर्शनमेव वा AṣṭāSaṁ. i. 45. 12 (1. 8); तथा हि नित्यसत्त्वोऽयं न चापेक्षास्य काचन। ध्वनिसंकेतवर्णैश्च तद्व्यक्तिर्नाप्यदर्शनात् TattvSaṁ. 2709; न चायमर्थ: संभवति यत् प्रत्यक्षादिग्रहणार्हं न भवति, वाक्यं च तत्प्रमाणमिति। कुत:। अदर्शनात् TātptṬ.(U.) 33. 11 (*on* 2. 4); 306. 19 (*on* 5(4). 5); गृहाभावावधारणोपक्षीणेऽदर्शने बहिर्भावमतिर्भवति TātpaṬ.(U.) 391. 17 (*on* 5(8). 14); हितक्रियाद्यदर्शनादन्याय्या चेतनाज्जगत्प्रक्रिया BrahmSūBh.(S'aṅ.) 327. 18 (*on* ii. 1. 21); यदि च दर्शनादर्शने वस्तुन उत्पादनिरोधौ स्याताम् BrahmSūBh.(S'aṅ.) 386. 5 (*on* ii. 2. 20); कार्यस्य हि सतो जायमानस्य कारणे सत्युत्पत्तिदर्शनात्, असति चादर्शनात् BṛĀraUBh. 14. 12 (*on* i. 2. 1); न तावद्विधिरूप:, अदर्शनात् BālaKrī. i. 14. 5 (*on* 1. 7); i. 21. 8 (*on* 1. 7); नादर्शनाभावतत्संबन्धानां प्रत्यक्षं मानम् IṣṭaSi. 348. 5; दर्शनादर्शनाभ्यां हि नियमग्रहणं यदि NyāyMañ. i. 109. 15; अग्निरेषोऽत्र धूमो वा दर्शयेन्न ह्यदर्शने S'ivDṛ. 5. 55; चक्षुर्वेदपरामृष्टं न कारणमदर्शनम् PrakaPañ. 108. 19; न च स्वाश्रयतयाभिव्यङ्ग्यप्रकाशनमभिव्यञ्जयितु: स्वभाव: प्रदीपादावदर्शनात् ĀtmaSi. 29. 2; तेषामनन्तरं फलस्यादर्शनात् JayaMa. 12. 7 (*on* 1. 2); भवतोऽदर्शनं यर्हि हृषीकाणामिवेशितु: BhāgP. i. 8. 38; प्रायो विषादजनकं भवतोर्यददर्शनम् SkandP. iv. 88. 22; न चासां दर्शनं देयं न चात्यन्तमदर्शनम् ViṣṇuDhaP. ii. 62. 36; इहापि हि स्तो दर्शनादर्शने TātpaṬ.(Vā.) 158. 22 (*on* i. 1. 5); तस्मिन् सत्यपि सुखभेदस्यादर्शनात् Bhām. 57. 19 (*on* i. 1. 1); न च वास्तवं गुणप्रधानभावमाश्रित्य पदान्तरसंबन्धो दृष्ट:। राजपुरुषेऽदर्शनात् Kāśi. iii. 3. 12 (*on* 5(4). 2); शतशोऽग्नौ धूमदर्शनमनग्नौ चादर्शनं शतशो व्याप्तिं विनानुपपन्नम् NayaVi. 126. 5 (*on* i. 1. 5); अन्यथाशुतरविनाशिनां क्षणान्तरेऽदर्शनात् NyāyVāPari. 526. 2; 569. 6; सपक्षासपक्षदर्शनादर्शनमात्रप्रमाणकत्वात् NyāyKuA. i. 169. 5; दर्शनादर्शनयोश्चार्थप्रवणत्वाप्रवणत्वोपाधिग्रस्तत्वात् ĀtmaTaVi. 869. 14; अर्थापत्तिरपि धर्मेण विनानुपपद्यमानस्य कस्यचिददर्शनादसमर्था S'āstrDī. 37. 4 (*on* i. 1. 4); तत्र सति गोप्याङ्गस्यादर्शनेन अनियन्त्रणं निधुवनविलसितमिति KāvyPra. 251. 3; Kāvyānu.(He.) 35. 17; न चोपलभ्यत इति कथमदर्शनमात्रेण नास्त्येवोच्यते TarkBhā.(Mo.) 23. 10; 24. 7; 29. 6; रात्रावदर्शनं व्यभ्रे VasiS. 45. 45; अत्र कपोलयो: प्रकृतयो: … क्षामतागमनस्य हेतुरदर्शनमुत्प्रेक्षितम् AlaṅkāSa. 62. 7; अदर्शनात्सुबद्धापि कन्दर्पप्रीतिराशयात्। राज्ञो जगाल कालेन RājTa.(Ka.) 7. 999; अत्र गौर्या: पराङ्मुखीत्वेन कपोलस्यादर्शने तत्सदृशशशिखण्डविलोकनेनोत्कण्ठातिवाहनम् AlaṅkāRa. 20 (11); चन्द्रमस: … शुक्लद्वितीयायामप्यदर्शने च नोत्पातबुद्धि: कर्तव्या AdbhuSāg. 42. 8; 277. 1; अदर्शने पादयोश्च विदेशगमनं भवेत् YogS'ā. 5. 172; न स्वेनादर्शनं दोषाभावे प्रमाणयितुमर्हति KhaṇḍanKhā. 925. 9; अदर्शनादरत्यादि: कथं तेन निवार्यते AnuVyā. 57B. 10 (*on* 3. 4); अदर्शनेऽपि विशेषमाह स एव SmṛtiCan. iii. 152. 2; तत्तु निरश(?रश)ङ्को नैच्छलक्ष्येष्वदर्शनात् SaṁgiRa. iv. 51. 7 (7. 184); विशेषवत्त्वस्यैव तत्र अदर्शनात् TarkSaṁ.(Ā.) 32. 6; अनुभावा: स्तम्भपातघूर्णनादर्शनविस्मरणादय: RasTa. 83. 4; नात्रादर्शनं क्षयोपलक्षणपरम् CaturCin. iii(1). 178. 21; जाड्यं विहाय स्वप्रकाशाभावस्य तं च त्यक्त्वा जाड्यस्य क्वचिदप्यदर्शनात् SyādvāMañ. 12 (88); 14 (27); विश्वासाद्धन्यते लोकस्तस्माच्छ्रेयो ह्यदर्शनम् SūktiRa. 108. 2; पक्षे चातीन्द्रियस्य तस्याभावस्याप्यदर्शनात् NyāyPari. 114. 15; किं परेषामदर्शनेऽपि तद्व्यामोहनम् S'atDū. 177. 9; क्रमस्य चादर्शनात् TattvPrakā. 216B. 1 (*on* iv. 3. 15); न चरम: अदर्शनादेव Subodhi. 46. 28 (*on* 2. 14); नलस्य जामातुरदर्शनेन …। भीमो नृप: सा जननी तवापि कष्टां दशामन्वहमश्नुवाते Nalābhyu. 8. 27; पटघटाद्यारम्भस्यादर्शनात् Upask. 100. 3 (*on* ii. 1. 25); न च प्रमाणबलेन तदतिरिक्ते व्याप्तिरिति वाच्यम्। अदर्शनात् AṇuBh. 133. 2 (*on* ii. 2. 15); संयुक्ताभावस्यादर्शनेन क्लृप्तै: संयोगध्वंसादिभिरेव सर्वोपपत्तौ Nyāyāmṛ. 423A. 12; यत्नेनान्विष्यमाणेऽप्युपाधेरदर्शनात् TantrRaha. 10. 23; 56. 28; अदर्शनं तु विपक्षेषु लिङ्गस्यास्त्येव YuktiSneha. 62. 24 (*on* i. 1. 5); 137. 29 (*on* i. 1. 6); दाहादिशक्तिशून्यस्याग्न्यादे: क्वाप्यदर्शनात् SāṁkhyaPraBh. 6. 27 (*on* 1. 1); 72. 4 (*on* 1. 56); उभयोरप्यन्यत: प्राप्तिसंभवात्तद्व्यतिरेकेण च क्वचित्कस्यचित्प्रापणीयस्यादर्शनात् VidhiRa. 7 (37. 2); दिवाग्नेरदर्शनादादित्यान्तर्गति: MīmāKau. iii(1). 34. 20 (*on* i. 2. 12); पुण्यपापयो: सुखदु:खभोगमात्रनाश्यतया दर्शनादर्शनाभ्याम् … पूर्वयोर्निगरणं व्यज्यते RasGaṅ. 422. 4; 696. 1; योग्यानुपलब्धिश्च दर्शनयोग्यस्यादर्शनम् BhāṭṭCin. 47. 3 (*on* i. 1. 4); सीतायाश्चादर्शनादुत्थितोऽयं शोकाम्भोधिर्वर्धते त्वत्क्षयेण JānaPa. 6. 34; भवतोरदर्शनाद् व्यथते संप्रति जम्भजित्सख: Rāgh. 3. 56; तस्य टाबेकादेशेनापहारेणादर्शनात् LaS'abdeS'e. i. 375. 12; **1B** absence of knowledge, lack of experience तेष्वदर्शनाद्विरोधस्य समा विप्रतिपत्ति: स्यात् MīmāSū. i. 3. 8; अपि वा कालमात्रं स्याददर्शनाद्विशेषस्य MīmāSū. iv. 4. 6; एवमहमित्यात्मज्ञाने तामसलीना तथाहंकारस्यादर्शनमविद्या TattvSa. 13 (132. 16); तत्र तत्र यथाभूतस्याज्ञानमदर्शनमनभिसमय: EI. xxi. 198. 9; अदृष्टशब्देनादर्शनमुच्यते NyāyVār. 446. 2 (*on* iii. 2. 69); तदेवमदर्शनं शरीरसर्गहेतु: NyāyVār. 446. 6 (*on* iii. 2. 69); तत्रान्येषामदर्शनम् VākyaP. 2. 69; तेषु क्रमकालपरिमाणेष्वदर्शनाद्विरोधस्येत्युच्यते TantrVā. 123. 10 (*on* i. 3. 7); शक्ते: शक्त्यन्तरायोगस्तत्र सत्यप्यदर्शनम् SphoṭSi. 52. 2; 240. 4; चक्षुष: संस्कारेण तिमिरे अपनीते ग्रहीतुरदर्शनात् न ग्रहीतुर्धर्म: GītāBh.(S'aṅ.) 363. 6 (*on* 13. 2) (Ānandagiri दोषाद्यनुपलम्भात्); सुषुप्तेऽदर्शनात् ज्ञानस्यापि सुषुप्तेऽभावात् PraśnaUBh. 292. 18 (*on* 6. 2); गुणे सति प्रामाण्यदर्शनात् असति चादर्शनात् TātpaṬ.(U.) 42. 8 (*on* 2. 30); यत्तव ममापि यद्येकत्र दृष्टं स्यात् न केनचिद्विरुद्धमुक्तं स्यात्। अदर्शनात्तद्विरुद्धमित्युक्तम् S'arka. 16. 23; तदयुक्तम् अदर्शनात् NyāyMañ. i. 149. 8; दर्शनादर्शनयोर्लौकिकत्वेन तुल्यतया बाध्यबाधकभावेन विषयव्यवस्थोपपत्ते: TattvBi. 64. 1; तत्रादर्शनाद् अन्यत्र च दर्शनात् VakroJī. 46. 5; तस्य तस्याध्यात्मिकादेर्दु:खस्य निवृत्तेरदर्शनात् SāṁkhyaTaKau. 25. 1 (*on* 1); ननु नित्यत्वेऽपि विषयानागमाददर्शनम् NayaVi. 232. 4 (*on* i. 1. 6); Loc. 25. 21 (*on* 1. 4); मुख्यरूपेण त्वदर्शनं सामान्यशब्दस्यापि विशेषेऽस्त्येव NyāyRa. 608. 20 (*on* 5(13). 155); 790. 11 (*on* 6. 234); स्वप्रकाशस्य कस्यचिदप्यदर्शनात् S'āstrDī. 123. 30 (*on* i. 1. 5); ज्ञानकार्यादर्शनात् S'rīBh. 155. 10 (*on* i. 1. 4); मृतशरीरे ग्रसनप्रभवादीनामदर्शनात् GītāBh.(Rā.) 581. 22 (*on* 13. 16); न हि निराश्रया: प्राणा: क्वचित्तिष्ठन्ति गच्छन्ति वा जीवतोऽदर्शनात् S'aṅkaVi.(Ā.) 231. 4; तत्र असिद्ध्यादेर्दोषान्तरस्य अदर्शनात् TarkSaṁ.(Ā.) 25. 19; S'atDū. 86. 10; इष्टानिष्टप्राप्तिपरिहारयोरदर्शनात् NyāySu.(Ja.) 12B. 3 (*on* i. 1. 1); 18A. 1 (*on* i. 1. 1); तिरश्चामविकारायोगोऽदर्शनाद्वा TattvPrakā. 52B. 12 (*on* i. 3. 26); कार्यस्य सुखस्य दु:खस्य वादर्शनात् Upask. 420. 10 (*on* x. 1. 5); अपरोक्षवृत्तौ सत्यां चिदप्रतिबिम्बनेनानिवृत्तेरदर्शनाच्च Nyāyāmṛ. 635A. 6; ज्ञानादज्ञाननिवृत्तेरन्यत्रादर्शनमकिंचित्करम् SiddhāBi. 63. 1; अदर्शनेन हि प्रायश्चित्ताभावोऽनुमेय: S'ivārkaMaDī. ii. 407. 25 (*on* iii. 4. 42); अभावस्य कारणत्वेऽपि भावसहकृतस्यैव तस्य कारणता न शुद्धस्य क्वचिदपि तथा अदर्शनात् MīmāKau. iii(2). 48. 16 (*on* ii. 1. 6); सा च व्यभिचारादर्शने सति सहचारदर्शनेन गृह्यते VedāntPari. 152. 1; निपातातिरिक्तनामार्थधात्वर्थयोरन्वयस्यादर्शनात् AlaṅkāKau.(Vi.) 68. 1; एवं रीतेरन्यत्र क्वाप्यदर्शनेन VaiyāSiMañ. 30. 6; तदर्थभूते विधेये कदाप्यदर्शनात् LaS'abdeS'e. i. 17. 2; **1C** invisible state, unknown state or condition अदर्शनादापतिता: पुनश्चादर्शनं गता:। न ते तव न तेषां त्वं तत्र का परिदेवना MahāBhā. xi. 2. 8; xiv. 42. 16; SūktiRa. 198. 2; Subhāṣi. 3268; अव्यक्तादीनि अव्यक्तम् अदर्शनम् अनुपलब्धि: आदिर्येषां भूतानाम् GītāBh.(S'aṅ.) 43. 10 (*on* 2. 28); **1D** invisibility (as a quality) अनेकद्रव्यारब्धत्वाभावात् परमाणोरदर्शनमुक्तम् NayaVi. 74. 7 (*on* i. 1. 4); **2A** disappearance, going out of sight, becoming invisible, concealment मृतादर्शनयो: KātyS'S. xx. 3. 21; शक्रो जगामादर्शनं तत: MahāBhā. iii. 38. 45; तस्य संपश्यत: … वृषभध्वज:। जगामादर्शनम् MahāBhā. iii. 42. 1; iii. 570*(3); iii. 168. 27; iii. 185. 51; iii. App. 25 (25); vii. 52. 12; vii. 303*(2); ix. 241*(2); xii. 252. 13; xiv. 14. 12; दर्शनादर्शनेनैव सोऽपाकर्षत राघवम् Rāmā. iii. 42. 8; अदर्शनमिवात्मानं भयान्नेतुं त्वमिच्छसि Rāmā. v. 18. 2; निवृत्ते हयमेधे च गते चादर्शनं हरे Rāmā. vii. 90. 20; vii. 98. 5; अदर्शनं तूपगतश्च तस्या: Saund. 4. 43; सा चात्यन्तमगोचरं (v. l. अदर्शनम्) नयनयोर्याता Vikramo. 4. 9; देवी …। जगामादर्शनम् MārkP. 23. 57; एवमुक्त्वा महादेव:…। अदर्शनमनुप्राप्त: VāyuP. i. 30. 295; जगामादर्शनं देवी खे MatsyaP. 208. 9; तेन तेऽदर्शनं नीता: सद्य एव बलाहका: BrahmāṇḍP. ii. 40. 8; उक्त्वेत्यदर्शनं याति देवी नारायणात्मिका JayāS. 27. 120; अतोऽस्माकमदर्शनमेव श्रेय: Tantrākhyā. 55. 10; तत्सर्वे हेलयोड्डीय…अदर्शनं गत्वा मुक्तिं प्राप्तुम: PañcT. 2. 1 (21) (184. 5); 2. 2 (186. 6); पुरुषस्यादर्शनमुपयाति SāṁkhyaKāBh. 32. 6 (*on* 61); आशुगा:। ऐकागारिकवद्भूमौ दूराज्जग्मुरदर्शनम् S'iśuVa. 19. 111; अदर्शनं ययौ मन्दं कृपयेव विरोचन: PadmP.(Ra.) 2. 203; इत्युक्त्वा मामसौ देवस्तत्रैवादर्शनं गत: ParaS. 1. 20; मृषा किमित्थं रसने ब्रवीषि गतैव सात्यन्तमदर्शनं मे RāmC. (App. II) 39. 16; सादर्शनमुपेयुषी LakṣmīT. 57. 26; अथ यत् … अदर्शनं जिगमिषति सवितरि तन्निधनम् ChāndoUBh. 100. 10 (*on* ii. 9. 8); यथा मरीचय: रश्मय: अर्कस्य आदित्यस्य अस्तम् अदर्शनं गच्छत: PraśnaUBh. 270. 11 (*on* 4. 2); ततश्च नष्टचर्याक्रीडयेवादर्शनमायान्तीषु दिक्कन्यकासु … शिबिरसंनिवेशमविशत् NalaCam. 6. 42 (18); देवता … जगामादर्शनं क्षणात् BṛKathāK. 16. 36; देवोऽथ … झगित्यदर्शनमगमत् TilaMañ. 45. 12; भगवान् …। अदर्शनमनुप्राप्त: KūrmaP. 167. 12 (1. 15); 515. 11 (2. 11); उदयास्तमनं ज्ञेयं दर्शनादर्शनं रवे: AgniP. 120. 27; 360. 33; काले चकार तस्याश्च सपुत्राया अदर्शनम् BrahmVaiP. iv. 58. 2; एवमुक्त्वा गतो देव: सद्योऽदर्शनम् VarāP. 3. 24; माधव:। जगामादर्शनं तस्या: NaraP. 55. 19; देवा: … जग्मुश्चादर्शनं तस्या: BrahmP. 35. 3; 40. 111; 50. 16; 51. 46; इत्युक्त्वा भगवान् ब्रह्मा जगामादर्शनं विभो BhaviP. 116A. 22 (i. 66. 1); (सूकर:) क्षणं दृष्टिपथं राज्ञ: क्षणं चादर्शनं गत: DevīBhāP. vii. 18. 40; viii. 15. 24; तस्य योगबलाद् भूप गतस्यादर्शनं तदा। दृष्ट्वा तदद्भुतं कर्म वैष्णवब्रह्मचारिण: PadmP. i. 22. 46; iv. 31. 53; जगामादर्शनं देवी व्यक्ताव्यक्तस्वरूपिणी SaurP. 49. 142; देवा जग्मुरदर्शनम् YogVā. iv. 25. 30; उक्त्वेत्यदर्शनं याते भुजङ्गे मामसूत

अदृष्टपुत्रास्य (adṛṣṭa-putrāsya) *adj.* who has not seen the face of a son (i. e. childless) त्वं युवादृष्टपुत्रास्यो नाधिकारी तपोविधौ PadmP. vi. 198.37.

अदृष्टपुरुष (adṛṣṭa-puruṣa) *m.* **i** unknown or unseen person अदृष्टपौरुषाणां (v. l. पुरुषाणाम्) च देशान्तरनिवासिनाम् । विना सङ्केतयोगेन न कुर्याद्द्रव्यसङ्गतिम् KulārT. 8.14; उक्तश्च केनाप्यदृष्टपुरुषेण TīrthaKa. 82.26; **ii** treaty in which the principal party is not seen (i. e. involved) एकेनान्यत्र यातव्यं स्वयं दण्डेन वेत्ययम् । अदृष्टपुरुषः सन्धिर्दण्डमुख्यात्मरक्षणः ArthS'ā. ii. 251.4 (7.3); त्वयैकेन मदीयार्थः सम्प्रसाध्यस्त्वसाविति । यत्र शत्रुः पणं कुर्यात् सोऽदृष्टपुरुषः स्मृतः NītiS'ā. 9.15 = Hitop. 4.122; [a treaty concluded by the parties personally (in which no third mediator is seen) MW.] cf. **अदृष्टनर.**

अदृष्टपुरुषव्यवहार (adṛṣṭa-puruṣavyavahāra) *adj.* inexperienced in the behaviour of a grown up person तेषामेको गोपः शलभनामा तत्रैव जातः तत्रैव वर्धमानोऽदृष्टपुरुषव्यवहार एव युवा बभूव PuruṣPa. 90.26.

अदृष्टपुरुषार्थ (adṛṣṭa-puruṣārtha) *m.* unseen or invisible aim of human being अदृष्टपुरुषार्थसिद्धिस्तदधीना ManuBh. i. 207.11 (*on* 3.4); न प्रत्यक्षमस्मदादीनां स्वर्गाद्यदृष्टपुरुषार्थसाधनानि कर्माणि दर्शयितुं प्रभवति NyāyMañ. i. 229.29.

अदृष्टपुष्टि (adṛṣṭa-puṣṭi) *f.* increase of unseen merit नाकं च सत्यलोकान्तमदृष्टपुष्ट्या प्राप्नोति (वेदार्थज्ञः) Aparā. 75.15 (*on* 1.51)

अदृष्टपूजित (a-dṛṣṭapūjita) *adj.* not seen and worshipped अदृष्टपूजितौ तौ (चपलेश्वर - भैरवशिवौ) हि नराणां विघ्नकारकौ SkandP. v(3). 28.142.

अदृष्टपूर्व (adṛṣṭa-pūrva) *adj.* [*f* –ā] **A i** not seen before (as a specific event) **A ii** not known or experienced before **B** who has not seen before **C i** not seen or known before (impossible) **ii** unusual, rare, strange, unnatural **iii** wonderful, unparalleled, excellent **D** not used before (words) **A i** not seen before (as a specific event) यो दद्यात् … अन्नं … श्रान्तायादृष्टपूर्वाय तस्य पुण्यफलं महत् MahāBhā. iii. 12*(4); ईदृग्गुणां नारीम् … अदृष्टपूर्वां पश्यस्व यतो जातोऽसि सूतज MahāBhā. iv. 443*(2); मोचयामास तुरगान्वितुन्नान्कङ्कपत्रिभिः । अदृष्टपूर्वं तद् दृष्ट्वा MahāBhā. vii. 75.2; अथापश्यत्स पीतोदं श्वापदं घ्राणचक्षुषम् । अदृष्टपूर्वमपि तत्सत्त्वं तेन हतं तदा MahāBhā. viii. 49.37; अदृष्टपूर्वा या नार्यो भास्करेणापि वेश्मसु MahāBhā. ix. 28.71; xi. 9.9; अदृष्टपूर्वं पश्यन्त्यो दुःखार्ता भरतस्त्रियः MahāBhā. xi. 16.14; xiii. 62.14; यथा च दीर्घमध्वानं पद्भ्यामेव प्रपद्यते । अदृष्टपूर्वं सहसा तत्त्वदर्शनवर्जितः MahāBhā. xiv. 49.21; लतां वा पुष्पशालिनीम् । अदृष्टपूर्वां पश्यन्ती रामं पप्रच्छ साबला Rāmā. ii. 1180*(10); भूमिभागान् विविधान् …। अदृष्टपूर्वान् पश्यन्तस्तत्र तत्र यशस्विनः Rāmā. ii. 48.3; अदृष्टपूर्वं दृष्ट्वा तं नानारत्नमयं मृगम् । विस्मयं परमं सीता जगाम Rāmā. iii. 40.32; अदृष्टपूर्वा भगवन् कस्यापि … पत्नी Rāmā. vii. 49.3; कुशः … अदृष्टपूर्वां वनितामपश्यत् RaghuVa. 16.4; दृश्यते(? न्ते)ऽदृष्टपूर्वाणि निमित्तान्यशुभानि च BrahmāṇḍP. iii. 6.33; समस्तमपि तच्चक्रं शक्तीनां तत्पराक्रमैः । अदृष्टपूर्वैर्देवेषु विस्मयस्य वशं गतम् BrahmāṇḍP. iii. 26.117; भवति तु सामान्यप्रत्ययोऽदृष्टपूर्वायामपि गोव्यक्तौ S'ābaBh. 303.23 (*on* i. 3.33); कथमदृष्टपूर्वा अश्रुतपूर्वा इयमाश्चर्यपरम्परावृत्तिः KundaMā. 6.25 (2); अदृष्टपूर्वं परमप्रमेयम् AhirbuS. 44.41; तिस्रो वानर्योऽदृष्टपूर्वाः प्रतिवसन्ति स्म PañcT. 4.11(2) (380.1); अदृष्टपूर्वं सत्त्वं दृष्ट्वा PañcT. 4.17 (24) (389.17); अदृष्टपूर्वं कलिकालस्यापरिचितम् … आश्रममपश्यम् Kād. 40.11; अदृष्टपूर्वं लक्ष्म्या महत्त्वे स्थितम् …हर्षमद्राक्षीत् HarṣaC. 113.7; अदृष्टपूर्वाः खल्वमी जनस्थानविभागाः MahāviC. 5.26 (4); न चादृष्टपूर्वस्यादृष्टसदृशस्य चोपमानविषयत्वम् TantrVā. 361.4 (*on* ii. 1.5); अदृष्टपूर्वं न कदाचिदपि दृष्टपूर्वं इदं विश्वरूपं … दृष्ट्वा हृषितः GītāBh.(S'an.) 329.15 (*on* 11.45); पश्येदानीं त्वयादृष्टपूर्वं विरहचारित्रम् ĀścaCū. 7.15 (21); अदृष्टपूर्वौ तौ दृष्ट्वा MahāP. 3.69; अदृष्टपूर्वा अपि खेचरौघैरलंकृताः काञ्चनमेखलाभिः HarVi. 5.71; न च तमोदृष्टिकाले तदाश्रयो गृह्यते स्मर्यते वा अदृष्टपूर्वः IṣṭaSi. 68.15; स सांगतिकशब्देन युक्तः प्रतिषेद्धुं प्रागदृष्टपूर्वोऽपि ManuBh. i. 251.16 (*on* 3.93); परिभ्रमन्नदृष्टपूर्वं गोसदृशं प्राणिनमुपलभमान एवं बुध्यते NyāyMañ. i. 133.5; काकुत्स्थः … अदृष्टपूर्वम् । अद्राक्षीत् … देवारिं दिवमपिधाय निष्पतन्तम् RāmC. 34.1; अयमभिवादनाशिषोर्विधिरदृष्टपूर्वे PārāSū. 35.4; नागरः प्रत्यक्षेणादृष्टपूर्वं पिण्डं पश्यति TātpaṬ.(Vā.) 58.21 (*on* i. 1.1); ततो नगरमालोक्यादृष्टपूर्वं मनोहरम् BṛKathāK. 19.23; भवन्ति ह्रीमानीन्द्रियाण्यदृष्टपूर्वेष्वपि प्रियजनेषु प्रायेण प्रातस्तपनतेजांसीव रागोल्बणवयांसि YaśasCam. i. 156.9; दिवसमणिमदृष्टपूर्वमाराद् द्रष्टुमागतेन पौर्णमासीहिमगभस्तिनेव … अनुगम्यमानः TilaMañ. 68.11; कदाचिददृष्टपूर्वम्…कल्पतरुखण्डमपश्यत् (समरकेतुः) TilaMañ. 213.20; युवराज दृष्टेयमदृष्टपूर्वा मानुषैः…भूमिः TilaMañ. 280.17; युद्धं समभवत् …अदृष्टपूर्वम् SkandP. iii(1). 11.20; ViṣṇuDhaP. iii. 237.17; अदृष्टपूर्वमतिथिमागतं प्राक् समर्चयेत् NaraP. 58.94; अर्थापत्तिरपि न…प्रमाणेनादृष्टपूर्वेषु प्रवर्तते Kāśi. i. 241.22 (*on* 4.89); न तारकादावदृष्टपूर्वं लिङ्गं, दृष्टैरेव कैश्चिद्रूपै रिङ्गनात् Kāśi. ii. 176.23 (*on* 5(3). 213); पर्यङ्कप्रवरे…उपविष्टा वराङ्गना । …अदृष्टपूर्वा सा दृष्टा DevīBhāP. iii. 3.40; अदृष्टपूर्वं युद्धं वै वर्ततेऽद्य सुदारुणम् DevīBhāP. iv. 9.33; बुभुजुस्ते … अदृष्टपूर्वाण्यन्नानि स्वादुमूलफलानि च GaṇeP. i. 78.11; S'ivaP. v. 11.36 (419A. 9); शून्ये ददृशतुर्व्योम महारम्भातिमन्थरम् । अदृष्टपूर्वमन्योन्यम् YogVā. iii. 24.10; वनदेवताभिरदृष्टपूर्वः … बभूव महान् … मृगयासंरम्भः UdaySuKa. 44.6; विलोक्यादृष्टपूर्वाणि पतितानि मुखानि सः RāmāMañ. 390.26; अल्पं ममैतद् दुहितुर्न योग्यं न च क्षणोऽस्ति त्वमदृष्टपूर्वः SamaMā. 3.31; न च भेदानामदृष्टपूर्वाणामन्वयग्रहणमस्ति NyāyRa. 389.10 (*on* 5.133); अधश्च तस्य रुदतीम् …। अदृष्टपूर्वाम् … स्त्रियमैक्षत KathāSaSāg. v. 2.139; अदृष्टपूर्वं विचित्रसंनिवेशं नरेन्द्रभवनमालोक्य BrahmSūBh.(Rā.) 140.6 (*on* i. 1.3); तीर्थेषु … अदृष्टपूर्वेषूदकेषु हस्तिनं … अवगाहयन्ति Hastyāyur. 66.8 (1.9); अदृष्टपूर्वो ददृशे पारिषद्यसमागमः RājTa.(Ka.) 8.902; अदृष्टपूर्वं तं दृष्ट्वा … भोजोऽयमिति मेनिरे RājTa.(Ka.) 8.3166; अदृष्टपूर्वो भावी वोऽपमृत्युर्बाढमन्यथा TriṣaS'aPuC. i. 4.445; वीरसहोदरे किमदृष्टपूर्वासि भ्रातृभुजपराक्रमाणाम् PārthPa. 17.9; बलभरोऽयमदृष्टपूर्वः AlaṅkāRa. 13 (21); गर्दभोऽपि … अदृष्टपूर्वं सत्त्वं दृष्ट्वा … तदेव नगरं जगाम Pañcā. 238.4; अदृष्टपूर्वं पश्य कन्यारत्नम् SamudraMa. 2.2 (2); अदृष्टपूर्वोऽयमिहास्ति दृश्यताम् NyāyKu. 153.8; किंनामायं तरूत्तमः । स प्राहादृष्टपूर्वोऽयं देव नाम न वेद्म्यतः SamarāSaṁ. 7.394; श्रीमज्जयसिंहनरेश्वरः । प्रवेशोत्सवमाधत्तादृष्टपूर्वं सुरैरपि PrabhāC. 168.7; स मन्त्री … नमस्करणायोपगतोऽदृष्टपूर्वमिव तं मुनिं प्रणम्य PrabaCin. 57.7; अदृष्टपूर्व श्रुतपूर्ववृत्तं दृष्ट्वातिमोदं स जगाम भट्टः S'āṅkaDigVi.(Mā.) 7.80; S'aṅkaVi.(Ā.) 19.12; अदृष्टपूर्वोऽयं देवः परमेश्वरः KumāPraPra. 91.33; अदृष्टपूर्वे प्रथमाभिभाषणं कथं विदध्याम् Nalābhyu. 4.36; अदृष्टपूर्वं नो जातु गतं श्रुतिपथं क्वचित् KathāKau. 2.42; अदृष्टपूर्वस्य हरेर्दिदृक्षोत्कण्ठितं मतम् BhaktiRaSi. iii. 2.51; सर्वे जगन्नाथदर्शनतोऽपि … अदृष्टपूर्वाः … प्राणिन उपतिष्ठन्ति CaitCa. 205.16 (9); 237.20 (10); उषा त्वत्पौत्रमेनमनिरुद्धमदृष्टपूर्वं स्वप्नेऽनुभूय … विरहातुराभूत् Nāray. x. 82.2; **A ii** not known or experienced before दृष्टो वादृष्टपूर्वो वा स यज्ञः सार्वकामिकः S'aṅkhaLiSm. 5; जनयन्ति च विस्मयमतिधीरधियामप्यदृष्टपूर्वाः … सृष्ट्यतिशयाः HarṣaC. 40.4; दिवाकरमित्रस्तु मैत्रीमयः प्रकृत्या विशेषतस्तेनापरेणादृष्टपूर्वेण … भूपतेः … प्रश्रयेण चाह्लादितश्चक्षुषि च चेतसि च युगपद्गृहीत् HarṣaC. 318.10; अदृष्टपूर्वे त्वज्ञानम् S'lokaVār. 5.102 (431.7); तच्च यद्यपि तादृशं अदृष्टपूर्वं तथापि … न तदभिधानमपेक्षते TantrVā. 255.4 (*on* i. 3.26); ननु नादृष्टपूर्वेऽर्थे क्वचिद्भवति भावना NyāyMañ. i. 99.27; °वाक्येषु पुनरतिचिरतरतिरोहिताक्षरपरम्परानुसंधानमतिक्लिष्टमदृष्टपूर्वमिति दुर्घटमेतत् NyāyMañ. i. 356.16; तद्देवैर्दिनपतिसंभवस्य भूयः संभूय स्तुतमितरेष्वदृष्टपूर्वम् RāmC. 34.31; न हि शाखाशब्दाददृष्टपूर्वस्यापि चन्द्रस्य प्रत्यक्त्वं प्रतीयते IṣṭaSi. 176.1; यस्यास्मासु … अदृष्टपूर्वा मैत्री च NalaCam. 5.2 (20); असाधारणो ह्यदृष्टपूर्वः क्वचिदपि न संशयं कर्तुमुत्सहते TātpaṬ. (Vā.) 256.20 (*on* i. 1.23); कथं ह्यदृष्टपूर्वा सा सदृशज्ञानगोचरा ĀgaPrā. 5.7; अदृष्टपूर्वमेव बुद्धिमत्कर्तारमुपस्थापयति ĪśvaSi.(Yā.) 79.3; दृष्टं चास्मिन्नदृष्टपूर्वमन्तःकरणमिव तावकीनमकृतपुण्यजनदुष्प्रवेशमिदं देवतायतनम् TilaMañ. 279.16; नेदमदृष्टपूर्वं यदनेकैरपि संबद्धं एकेनैव व्यपदिश्यते Kāśi. i. 233.20 (*on* 4.65); आगमो हि … अदृष्टपूर्वे तद्विरुद्धे च प्रवर्तितुं समर्थः Bhām. 465.13 (*on* ii. 2.38); अभिनवकविविरचितस्य वाक्यस्यादृष्टपूर्वस्याननुभूतचरवाक्यार्थबोधकत्वात् SāṁkhyaTaKau. 184.1 (*on* 5); अदृष्टपूर्वे सम्प्रति प्रत्यक्षे ज्ञानानुत्पत्तिः NyāyRa. 431.14 (*on* 5.102); न चैतस्या वेगलाघवमदृष्टपूर्वमालोचयता व्यग्रेण मया समुपलक्षितः … भूविभागः UdaySuKa. 128.16; तददृष्टपूर्वेषु नामीषु मे प्रत्यभिज्ञानम् PārthPa. 21.3; तिरोहिते नाकिपताकिनां पदैः पदे … अदृष्टपूर्वेव दिनेशसारथेर्दुरुन्नयासीदुदयास्तवर्तिनी NemiNir. 5.34; **B** who has not seen before दृष्ट्वा शुभं लिङ्गं … भवान्यदृष्टपूर्वा हि परिपप्रच्छ शंकरम् SkandP. iv. 67.9; **C i** not seen or known before (an impossible event or fact) अदृष्टपूर्वमस्तीति तृणाग्रे करिणां शतम् । यद्रूपं दृश्यतां यातं तद्रूपं प्राङ् न दृश्यते PramāVār. 2.166; PramāVāBh. 128.11; **C ii** unusual, rare, unused to, strange, unnatural तं (भीषणं रक्षः) समासाद्य … अदृष्टपूर्वं

संत्रासान्यमीलयत लोचने MahāBhā. iii. 12.16; अयमाश्वासयाम्येनां ··· अदृष्टपूर्वा दुःखस्य MahāBhā. iii. 65.25; अदृष्टपूर्वं पश्यामि शिलानामिव सर्पणम् MahāBhā. vii. 78.6; उपारमन्त ते सर्वे ··· अदृष्टपूर्वं पश्यन्तस्तद्युद्धं गुरुशिष्ययोः MahāBhā. vii. 163.23; चरन्त्यदृष्टपूर्वाश्च नानाकारा ह्यनेकशः VāyuP. ii. 8.179; BrahmāṇḍP. ii. 7.153; दृष्ट्वा च तमदृष्टपूर्वममानुषलोकोचिताकारं परस्परं विस्मयो हृदयम् Kād. 80.4; तमदृष्टपूर्वमादरातिशयम् ··· महामुनेरुपलभ्य AvantiKa. 145.14; य एवादृष्टपूर्वस्तस्मिन्समुदाये संप्रति दृश्यते स एवासाधारणतामापादयति TantrVā. 251.1 (*on* i. 3.26); अदृष्टपूर्वम् अद्भुतम् अकस्माद्दृश्यमानम् GītāBh.(S'aṅ.) 44.7 (*on* 2.29); तस्य कालेऽभवत्तेषां क्षणं पुत्रमुखेक्षणम् । अदृष्टपूर्वमायाणां महद्दुत्रासकारणम् MahāP. 3.122; तव चरितमदृष्टपूर्वमिह लोके Kāvyālaṅ.(Ra.) 9.40; दृष्ट्वा च तमदृष्टपूर्वमुपजातकुतूहलो ··· मुहूर्तमराजत TilaMañ. 25.9; सेनापतिरपि ··· अदृष्टपूर्वेण प्रत्युज्जीवनेन जनितविस्मयः TilaMañ. 96.22; 216.11; अदृष्टपूर्वा सर्वस्य जनस्य जनितस्मया (पुष्पवृष्टिः पपात) YogVā. i. 32.21; अथासौ···अदृष्टपूर्वं कुतूहलातिशयमालोक्य UdaySuKa. 16.6; अदृष्टपूर्वः पौराणां किमयं हर्षविप्लवः RāmāMañ. 54.25; अत्रान्तरे समुदभूदकस्मान्नाशसूचकः । अदृष्टपूर्वो भूभर्तुः सदाचारविपर्ययः RājTa.(Ka.) 7.695; अदृष्टपूर्वं संत्रासं तेऽप्यशश्विवदाययुः RājTa.(Ka.) 8.1397; अदृष्टपूर्वासृग्वृष्टिरुत्पातकृदिवाभवत् TriṣaS'aPuC. iv. 1.646; अदृष्टपूर्वमालस्यं किं नृसिंहस्य तेऽधुना TriṣaS'aPuC. iv. 1.892; सिंहः ··· दृष्ट्वा च तमदृष्टपूर्वं ··· भयमुपागतः Pañcā. 94.12; लुब्धकोऽपि ··· अदृष्टपूर्वमिदमिति चिन्तयन् श्लोकमपठत् Pañcā. 128.2; अदृष्टपूर्वं महदेतत्कुतूहलम् SamudraMa. 1.28 (2); 3.7 (1); किमिदमदृष्टपूर्वं दृश्यते PrabaKa. 19.3; अदृष्टपूर्वं भुवि पूतनादेरुदन्तमुत्पातमुदीक्षमाणाः Yādavā. 4.39; उपहारजातम् ··· अपि गगनचरैरदृष्टपूर्वं सममवरोधजनस्य संविभेजे Yādavā. 24.20; अदृष्टपूर्वमस्माभिर्येदेवं दृश्यतेऽधुना । विषं विषधरैः पीतं मूर्च्छिताः पथिकाङ्गनाः S'ārṅgaPa. 3896; अदृष्टपूर्वं आचारः कः KumāDeC(So.) 23.21; RājTa.(S'rī.) 4.481; Subhāṣi. 1729; अदृष्टपूर्वा खलु कान्तिरीदृशी Rāgh. 1.16; **C iii** wonderful, unparalleled, very beautiful, excellent तदप्यदृष्टपूर्वं रूपमिव नृपकुमारस्यास्य दिव्यं देवतायतनमस्याः TilaMañ. 280.6; आनीतया झटिति रूपमदृष्टपूर्वम् । अङ्गेन पुष्पशरभङ्गतरङ्गितेन NavaSāC. 18.48; अदृष्टयैव सुरलोकसंभवाकारविभ्रमधरा मनोहराङ्गी तुरगी UdaySuKa. 124.12; दृष्ट्वा चादृष्टपूर्वं तत्तस्या नेत्रामृतं वपुः KathāSaSāg. vi. 8.99; अहो अदृष्टपूर्वमद्भुतमिदं स्त्रीरूपं प्रजापतेः सर्गे SamudraMa. 2.6 (11); सा ··· जिगाय ··· अदृष्टपूर्वेण जगत्त्रयेऽपि रूपेण रम्भामपि Nalābhyu. 1.26; तव रूपगुणांश्च तत्र गत्वा कथयिष्यामि जगत्यदृष्टपूर्वान् Nalābhyu. 2.19; **D** not used before (words) गृह्णातिशब्दश्च प्रयोजकक्रियायामदृष्टपूर्वः TantrVā. 1009.10 (*on* iii. 4.37)

अदृष्टपूर्वक (adṛṣṭa-pūrvaka) *adj.* never seen before तददृष्टपूर्वकं चरितमवलोकयितुम् ··· गच्छामः ViddhaS'ā. 2.3 (55); धर्मो नानुमानगोचरः, केनचिद्वस्तुना सहादृष्टपूर्वकत्वात् असाधारणवस्तुवत् YuktiSneha. 37.24 (*on* i. 1.4)

अदृष्टपूर्वकल्याण (ardṣṭapūrva-kalyāṇa) *adj.* who has not seen or experienced anything good before अदृष्टपूर्वकल्याणो यथा दृष्ट्वा विधिं नरः । उत्सेकान्मोहमापद्य तत्त्वज्ञानमवाप्तवान् MahāBhā. xiii. App. 10 (462)

अदृष्टपूर्वचेष्ट (adṛṣṭapūrva-ceṣṭa) *adj.* acting in an unprecedented manner दृष्ट्वा च तमदृष्टपूर्वचेष्टम् ··· उत्पन्नविस्मयः ··· अतिचिरं तस्थौ TilaMañ. 185.16.

अदृष्टपूर्वता (adṛṣṭapūrva-tā) *f.* the state of not being seen before कथं सापराधस्येव साध्वसमुपजनयन्ति अप्रश्रयहरालोकान्यदृष्टपूर्वतया तपोवनानि CaṇḍaKau. 2.15(2); एकदा तु ··· कदाप्यदृष्टपूर्वतया निसर्गरमणीयतया च तस्य देशस्य चित्रीकृतहृदयस्तत्र तत्र संचरन् ··· तरुणीकदम्बमालोकयम् Mukundā. 208(10)

अदृष्टपूर्वत्व (adṛṣṭapūrva-tva) *n.* **i** the state of being never cognised before यत्राप्यदृष्टपूर्वत्वं यदभावस्य तत्र च । तदभावमतिर्दृष्टा संबन्धेऽक्षानपेक्षया S'lokaVār. 5(8).33 (485.5); 4.99 (165.1); (धर्मस्य नानुमेयत्वम्) अदृष्टपूर्वत्वाददृष्टसदृशत्वादिति यथासंख्येन हेतुद्वयम् TātpaṬ.(U.) 144.23 (*on* 4.99); **ii** the state of being not seen before (आगतस्य प्रीतिकौतुकजननम्) कौतुकं चादृष्टपूर्वत्वात् JayaMa. 313.15 (*on* 6.1)

अदृष्टपूर्वनिरूपणप्रकार (adṛṣṭapūrva-nirūpaṇaprakāra) *adj.* distinguishing character or distinctive quality that is unseen तत्कथय कीदृगस्य तत्त्वमश्रुतादृष्टपूर्वनिरूपणप्रकारस्य SāhiDa. 93.7 (comm. अश्रुतोऽदृष्टपूर्वश्च निरूपणप्रकारः इतरभेदानुमापको धर्मः)

अदृष्टपूर्वपार्वणचन्द्र (adṛṣṭapūrva-pārvaṇacandra) *m.* full moon not seen before अदृष्टपूर्वपार्वणचन्द्रदर्शनकौतुकेन युगपदुपागताभ्यामुदयास्तसंध्यातपस्तबकाभ्यामिव ··· अधरोष्ठबिम्बाभ्यामधिष्ठितमुखीम् ··· बालिकामपश्यम् TilaMañ. 247.7.

अदृष्टपूर्वप्रकोप (adṛṣṭapūrva-prakopa) *m.* extreme wrath unknown before स्वावयवैरप्यदृष्टपूर्वप्रकोपभीतैरिव कम्पमानैरुपेतः ··· परां भीषणतामयासीत् HarṣaC. 255.19.

अदृष्टपूर्वम् (a-dṛṣṭapūrvam) *adv.* in an unprecedented manner तस्मात्प्रामाणिकलोकयात्रामनुपालयता यथादर्शनं शङ्कनीयम् न त्वदृष्टपूर्वमपि TātpaṬ.(Vā.) 165.22 (*on* i. 1.5)

अदृष्टपूर्वमहिमन् (adṛṣṭapūrva-mahiman) *adj.* possessing excellence never experienced before आमोदोऽयमदृष्टपूर्वमहिमा बध्नाति मे मानसम् RasāSu. 148.22 (2.107)

अदृष्टपूर्वराक्षस (adṛṣṭapūrva-rākṣasa) *m.* demon not seen before सीताया अदृष्टपूर्वराक्षसदर्शनेन सुखदुःखव्यतिकराख्यानाद् विधानम् RasāSu. 219.6 (3.36)

अदृष्टपूर्वरूप (adṛṣṭapūrva-rūpa) *n.* beauty never seen before अदृष्टपूर्वरूपोत्पन्नाकस्मिककौतुकातिरेकास्तमितसमस्तान्यव्यापारैरेकाग्रतया ··· तेनाध्वनीनेन सह ··· सुचिरमासितमासीत् NalaCam. 1.60(4)

अदृष्टपूर्वरूपत्व (adṛṣṭapūrvarūpa-tva) *n.* the state of having a form unseen before ये चान्ये वनचारिणः । अदृष्टपूर्वरूपत्वात्सर्वे ते तव राघव । रूपं दृष्ट्वापसर्पेयुः Rāmā. ii. 660*(3)

अदृष्टपूर्वलोक (adṛṣṭapūrva-loka) *m.* people who have not seen before अदृष्टपूर्वलोकानां मनोनयनहारिभिः (कलशैः स ईशानः स्नपयामास) SkandP. iv. 33.22 (comm. न दृष्टानि पूर्वं यैस्ते)

अदृष्टपूर्ववत् (adṛṣṭapūrva-vat) *adv.* like someone never seen before अदृष्टपूर्ववद् दूरात् पौरैरुत्फुल्ललोचनैः । आलोक्यमानः (विमलवाहनः) TriṣaS'aPuC. ii. 1.245.

अदृष्टपूर्ववधूवररूप (adṛṣṭapūrva-vadhūvararūpa) *n.* beauty of the bride and the bridegroom which is never seen before अदृष्टपूर्ववधूवररूपविस्मयस्मेर इवादृश्यत विभावसुः HarṣaC. 208.7.

अदृष्टपूर्ववाग्युद्ध (adṛṣṭapūrvavāgyuddha) *n.* battle of words (i.e. disputation) never seen before अदृष्टपूर्ववाग्युद्धप्रेक्षायै सकुतूहलः PrabhāC. 96.12.

अदृष्टपूर्वव्यसना (adṛṣṭapūrva-vyasanā) *adj.* (*f.*) who has never seen grief or calamity before (मम मातरम्) अदृष्टपूर्वव्यसनां भूयः संमन्तुमर्हसि Rāmā. ii. 33.18; ii. 52.24.

अदृष्टपूर्वशक्ति (adṛṣṭapūrva-śakti) *adj.* of unknown or never established significatory power द्रव्यदेवतासंबन्धान्यथानुपपत्त्या पूर्वमस्माभिर्यजिः कल्पितो नादृष्टपूर्वशक्त्यालभत्यभिधानेन TantrVā. 607.21 (*on* ii. 3.16)

अदृष्टपूर्वसंरम्भ (adṛṣṭapūrva-saṁrambha) *m.* vehemance or flurry never experienced before अलक्षितो जहाराशु ततस्तामायतेक्षणाम् । अदृष्टपूर्वसंरम्भकम्पमानां मनोजवः BṛKathāMañ. ix. 2.671.

अदृष्टपूर्वसंस्पर्श (adṛṣṭapūrva-saṁsparśa) *m.* touch never experienced before तमालिलिङ्ग सा ··· अदृष्टपूर्वसंस्पर्शकातरम् BṛKathāMañ. 18.161.

अदृष्टपूर्वसंबन्ध (adṛṣṭapūrva-sambandha) *m.* relationship with previously unknown (author of the Vedas) अदृष्टपूर्वसंबन्धः सम्प्रत्यज्ञानहेतुकः । अनुमानविहीनोऽपि सोऽस्तीति परिकल्प्यते TattvSaṁ. 2088.

अदृष्टपूर्वसंभोगा (adṛṣṭapūrva-sambhogā) *adj.* (*f.*) who has not experienced sexual union before अदृष्टपूर्वसंभोगा ··· । नीता प्रौढेन सा तेन रतौ काममपि निर्वृतिम् BṛKathāMañ. ix. 2.1042.

अदृष्टपूर्वसर्ववित् (adṛṣṭapūrva-sarvavid) *adj.* knower of all the things never known before एवमितरेषामप्यदृष्टपूर्वसर्वविद्प्रामाण्येनेति न विशेषः Kāśi. i. 125.13 (*on* 2.116)

अदृष्टपूर्वसौन्दर्या (adṛṣṭapūrva-saundaryā) *adj.* (*f.*) possessing beauty never seen before (कामाक्षी) अदृष्टपूर्वसौन्दर्या परज्योतिर्मयी परा BrahmāṇḍP. iii. 39.6.

अदृष्टपूर्वाकृतिविशेष (adṛṣṭapūrvākṛtiviśeṣa) *m.* particular form never seen before विममर्श चादृष्टपूर्वाकृतिविशेषदर्शनदूरविकसत्तारया दृशा त्रिभुवनातिशायिनीमस्याः शरीरावयवसमुदायचारुतामतिचिरम् TilaMañ. 162.8.

अदृष्टपूर्वापरा (adṛṣṭa-pūrvāparā) *adj.* (*f.*) whose beginning and end are unknown यदृच्छया यादवधर्मपत्नी यामाह धर्मेषु परावरेषु । अदृष्टपूर्वापरयापि वाचा प्रतिश्रुता नूनमभावि तस्याः Yādavā. 2.25 (comm. अदृष्टपूर्वापरया अनालक्षितपूर्वापरकोट्या)

अदृष्टपूर्वाहव (adṛṣṭapūrvāhava) *m.* battle never seen before अदृष्टपूर्वाहवहर्षमाणैः प्रौढैः क्षितीशैः प्रतिपद्यमानम् । पाण्डवेशसप्राङ्गहतिप्रपञ्चम् Raghunā. 10.63.

अदृष्टपूर्विन् (a-dṛṣṭapūrvin) *adj.* who has not seen before बन्धुर्गजस्कन्धगतः परासुरदृष्टपूर्वीव भटेन नुन्नः Rāvaṇā. 16.59; आजन्मादृष्टपूर्वी किं वटकान्

रोरबालवत्। श्रद्धत्तेऽनुमनुवरो मनसा केन नन्वतौ TrisaS'aPuC. i. 2. 857; i. 5. 555; अदृष्टपूर्वां पितरं त्वमायुष्मन्यथा ह्यसि। त्वामप्यदृष्टपूर्व्येव तथा जनयिता तव PariPar. 5. 65.

अदृष्टपृष्ठ (adṛṣṭa-pṛṣṭha) *adj.* whose back is never seen (who is not fleeing) रथाश्च ··· अदृष्टपृष्ठैरिष्टकीर्तिभिर्वीरव्रतानुवर्तिभिः सनाथीकृताः ··· प्रावर्तन्त AvantiKa. 97. 10.

अदृष्टपृष्ठपूर्व (adṛṣṭapṛṣṭha-pūrva) *adj.* having (the word) Adṛṣṭapṛṣṭha before (it) or as (its) first part (= अदृष्टपृष्ठतुल्ल) करिहस्तागतिर्यत्र काचिन्मध्ये यथेप्सिता। ··· अदृष्टपृष्ठपूर्वं तत् तुल्लं सद्भिर्निगद्यते NṛttaSaṁ. 174.

अदृष्टपृष्ठभाग (adṛṣṭa-pṛṣṭhabhāga) *adj.* with its backside not visible अदृष्टपृष्ठभागस्य परिवारावृतस्य च। सांमुख्यं तु विभोः कल्प्यम् PauṣkS. 6. 48.

अदृष्टपौरुष (adṛṣṭa-pauruṣa) *adj.* whose valour is not seen or proved संगतिं वर्जयेत्प्रिये। अदृष्टपौरुषाणां च देशान्तरनिवासिनाम् KulārT. 8. 14.

अदृष्टप्रकर्ष (adṛṣṭa-prakarṣa) *m.* excellence of unseen merit तस्य चादृष्टप्रकर्षवशादपरोक्षतापन्नस्यापि न मनोमात्रनिबन्धनमानसप्रत्यक्षत्वमवकल्पते NyāyKu. 85. 5.

अदृष्टप्रतिकार (adṛṣṭa-pratikāra) *adj.* whose remedy or counterattack is not seen अदृष्टप्रतिकारेण अव्यक्तेनासता सता। कथं शक्यं परं प्राप्तुं धर्मेणारिविकर्शन Rāmā. vi. 70. 23.

अदृष्टप्रतिघातित्व (adṛṣṭapratighāti-tva) *n.* contradiction of which is not observed अन्यायस्त्वविकारेणादृष्टप्रतिघातित्वादविशेषाच्च तेनास्य MīmāSū. ix. iii. 10.

अदृष्टप्रतिमान (adṛṣṭa-pratimāna) *adj.* not having a compeer अदृष्टप्रतिमानं च विमानं रत्ननिर्मितम् TriṣaS'aPuC. iii. 1. 121.

अदृष्टप्रतियोगिन् (adṛṣṭa-pratiyogin) *adj.* not having a counterpositive किं कारणम्। अदृष्टप्रतियोगिनो दृष्टप्रतियोगिनो विशेषाभावात् HetuBiṬ. 215. 5.

अदृष्टप्रतिविधाना (adṛṣṭa-pratividhānā) *adj.* (*f.*) not knowing any counter-measure or remedy दृष्ट्वा च तस्यास्तथाविधां चित्तचेष्टामदृष्टप्रतिविधाना परं विषादमुपगता देवी TilaMañ. 169. 17.

अदृष्टप्रत्यवायहेतु (adṛṣṭa-pratyavāyahetu) *adj.* which is the source of unseen evil शपथस्य चात्र ··· अदृष्टप्रत्यवायहेतोरनुपयोगात् NyāyPari. 264. 5.

अदृष्टप्रभेद (adṛṣṭa-prabheda) *m.* variety of unseen cause अर्थे पूर्वानुभूते सह मितसदृशख्यात्यदृष्टप्रभेदैः संस्कारानुग्रहे या परिणमति मतिः सा स्मृतिः TattvMu. 4. 124.

अदृष्टप्रमत्त (adṛṣṭa-pramatta) *n.* unseen fault आसने शयने याने पानभोजनवस्तुषु। दृष्टादृष्टप्रमत्तेषु प्रहरन्त्यरयोऽरिषु PañcT. 3. 88 (353. 4)

अदृष्टप्रमाण (adṛṣṭa-pramāṇa) *n.* unobserved (i. e. indirect) proof दृष्टादृष्टप्रमाणेनादौ तावदात्मनः परायत्ते द्रव्ये स्वाम्यं साधयतः भागहरणेऽधिकारो भवति SmṛtiCan. iv. 713. 8; iii. 123. 11; (दिव्यस्वरूपस्य) यावद् दृष्टप्रमाणसंभावना तावददृष्टप्रमाणस्यावसराभावात् Subodhi. 11. 25 (*on* 2. 22)

अदृष्टप्रयत्नकल्पन (adṛṣṭaprayatna-kalpana) *n.* assumption of an unseen effort or activity अदृष्टस्य च सर्वकार्यनिमित्तस्य नियामकत्वे किमदृष्टप्रयत्नकल्पनप्रयत्नेन NyāySiA. 230. 15.

अदृष्टप्रयुक्त (adṛṣṭa-prayukta) *adj.* brought about by an unseen (cause) परस्मादृष्टप्रयुक्ताल्लभ्यते स प्रतिग्रहः ManuBh. i. 391. 21 (*on* 4. 186); कार्यं स्यात्कर्तृभावेऽप्यवधिभिरितरैः कालवत् ··· ते चादृष्टप्रयुक्ताः TattvMu. 3. 21.

अदृष्टप्रयोग (adṛṣṭa-prayoga) *adj.* whose usage is not seen भवति साहचर्यं विशेषहेतुरुभयत्र प्रयोगे सति, न पुनः साहचर्यमदृष्टप्रयोगाणां प्रयोगज्ञापकम् ManuBh. i. 420. 21 (*on* 5. 6); नीलोत्पलादिशब्दयोः प्रयोगो दृष्टः···तथा सत्यस्मिन्नदृष्टप्रयोगे प्रथमप्रयोगो न स्यात् NyāyRa. 194. 18 (*on* 4. 197); यः शब्दो लोकेऽत्यन्तमदृष्टप्रयोगः तन्निमित्तोऽर्थो न भवतीत्युच्यते Pradī. vi. 37. 7 (*on* P. vii. 1. 33); *m.* performance having an unseen (effect) पुत्रार्थाः प्रतिपादिताः दृष्टादृष्टप्रयोगाश्चाप्यपुत्रस्य च तद्विधिः ViraMi.(Saṁskāra.) 125. 12; 203. 18.

अदृष्टप्रयोगत्व (adṛṣṭaprayoga-tva) *n.* the state of having unknown usage वितानशब्दश्च वेदविहितत्वेनादृष्टप्रयोगत्वात्र तत्परत्वेन व्याख्येयः Aparā. 891. 16 (*on* 3. 17)

अदृष्टप्रयोजन (adṛṣṭa-prayojana) *n.* unseen purpose दृष्टादृष्टप्रयोजनानां दृष्टाभावे प्रयोजनमभ्युदयाय VaiśeSū. vi. 2. 1; ननु दृष्टप्रयोजनालाभे सति अदृष्टप्रयोजनपरिकल्पनावसरः इह च दृष्टमेव प्रयोजनम् NyāyMañ. ii. 92. 20; Subodhi. 15. 12 (*on* 2. 24); आत्मनिवेदनं कुलतः शीलतो दृष्टादृष्टप्रयोजनेनोपचारविशेषेण च स्वाभिप्रायकथनपूर्वकं तदाश्रयणम् ViraMi.(Āhnika.) 492. 19; यदि कालस्य प्रकरणं स्यात्तदा कथंचिददृष्टप्रयोजनकल्पनेनापि कालार्थता मन्त्राणां स्यात्। न च तदस्तीत्यर्थः MayūMāli. 206. 37 (*on* iii. 1. 13); पेषणस्य ··· अदृष्टप्रयोजनान्तरकल्पनेऽपि न प्रतिप्रसवत्वविघातः BhāṭṭDī. i. 286. 5 (*on* iii. 3. 14); न च तत्र प्रकरणं क्रत्वर्थताबोधकमस्ति, नात्रेति वैषम्यमिति वाच्यम्।···अदृष्टप्रयोजनापेक्षनियमसामर्थ्येन वाङ्गत्वसिद्धेः BālamBha. ii. 125. 27 (*on* 2. 113); *adj.* having an unseen purpose अदृष्टप्रयोजनम्, कीर्तिहेतुत्वात् KāvyālaṅSū.(Vā.) i. 1. 5; आरादुपकारकं द्विविधम्, अदृष्टप्रयोजनं दृष्टादृष्टप्रयोजनं च PrakaPañ. 468. 4; अस्ति तावत् ···आसंसारमनुवर्तमानो दृष्टादृष्टप्रयोजनः ··· शिष्याचार्यक्रमः S'atDū 142. 24; अदृष्टप्रयोजनानि यागदानब्रह्मचर्यादीनि Upask. 268. 9 (*on* vi. 2. 1)

अदृष्टप्रयोजनत्व (adṛṣṭaprayojana-tva) *n.* the state of being an unseen purpose पदग्रहणे पदार्थावधारणादिदृष्टसामर्थ्यानुसारेण दृष्टप्रयोजनत्वात्, न तु स्वर्गोऽदृष्टप्रयोजनत्वात् TantrRaha. 68. 27.

अदृष्टप्रयोजनरहित (adṛṣṭaprayojana-rahita) *adj.* devoid of unseen result अग्निपरिसमूहने परिषेचने च यदुपयुक्तमुदकं तच्छेषेण वृथाकर्माणि अदृष्टप्रयोजनरहितानि पादप्रक्षालनादीनि न कुर्वीत नाचामेच्च ViraMi.(Āhnika.) 71. 4.

अदृष्टप्रवासा (adṛṣṭa-pravāsā) *adj.* (*f.*) who has not seen (i. e. undertaken) any journey किं न पश्यसि माम् ··· अदृष्टप्रवासां वनवासदुःखमनुभवन्तीम् TilaMañ. 332. 11.

अदृष्टप्रवाह (adṛṣṭa-pravāha) *m.* continuous flow of the unseen (merit and demerit) अदृष्टप्रवाहस्य नित्यत्वेन नित्यसर्गप्रसङ्गः BrahmSūBh. (Rā.) 481. 5 (*on* ii. 2. 11)

अदृष्टप्रवृत्ति (adṛṣṭa-pravṛtti) *f.* activity (productive) of unseen result दृष्टादृष्टप्रवृत्त्योश्च न विशेषोऽस्ति कश्चन BṛĀraUBhVā. (Sambandha.) 418; शब्दः श्रोत्रैकगोचरः। दृष्टादृष्टप्रवृत्तीनां हेतुरिष्टो मनीषिभिः TarkSaṁ.(Ā.) 107. 17.

अदृष्टप्रसाद (adṛṣṭa-prasāda) *m.* favour of the unseen agency लक्षणज्ञत्वं लक्ष्यपरिशीलनमदृष्टप्रसादोदितस्वप्रतिभाशालित्वं चानुसर्तव्यमिति संक्षेपः Loc. 146. 25 (*on* 3. 14)

अदृष्टप्रागभाव (adṛṣṭa-prāgabhāva) *m.* antecedent negation of the unseen (merit and demerit) जन्यानि अदृष्टप्रागभावव्याप्यप्रागभावाप्रतियोग्युपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमज्जन्यानि TattvCin. ii(2). 16. 4; अदृष्टप्रागभावव्याप्यप्रागभावप्रतियोगिभिन्नेति विशेषणं क्रियते S'ivārkaMaDī. i. 140. 30 (*on* i. 1. 3); i. 140. 31 (*on* i. 1. 3)

अदृष्टप्राय (adṛṣṭa-prāya) *adj.* almost not seen दृष्टमदृष्टप्रायं दयितं कृत्वा प्रकाशितस्तनया। हृदयं करेण ताडितमथ मिथ्याव्यञ्जितत्रपया ĀryāSaS'a. 288.

अदृष्टप्रेर्यमाण (adṛṣṭa-preryamāṇa) *adj.* being impelled by the unseen (cause) परमाणवः ··· प्राणिगतसुखदुःखोपभोगसाधनभूतादृष्टप्रेर्यमाणाः परस्परं संयुज्य ··· घटादिकार्यमारभन्ते NyāyMañ. ii. 11. 30.

अदृष्टफल (adṛṣṭa-phala) *adj.* [*f.* -ā] having unseen result (having consequences that are not yet realised) सर्वोऽदृष्टफलानर्थानागमात्प्रतिपद्यते VākyaPa. 1. 142; तस्याददृष्टफलेष्विष्टमनुष्ठानं न युक्तिमत् BhāvanāVi. 21. 2; कर्मैव देव च उपासनानि दृष्टफलानि अदृष्टफलानि च उच्यन्ते BrahmSūBh.(S'aṅ.) 618. 6 (*on* iii. 3. 1); क्रिया हि द्विविधा दृष्टफला अदृष्टफला च KenUBh. 88. 5 (*on* 3. 1); अभिलषितकामधेनौ दुरितद्रुमपावके हि मन्त्रेऽस्मिन्। दृष्टादृष्टफले सति परत्र मन्त्रे कथं सजतु YaśasCam. ii. 390. 26; येऽदृष्टफलाः सन्तोऽलौकिकाः न ते प्रेक्षावद्भिः ··· प्रवर्त्यन्ते इत्यप्रवृत्ताः JayaMa. 12. 7 (*on* 1. 2); दृष्टादृष्टफलं यस्मात्प्रातःस्नानं समाचरेत् SkandP. iv(1). 35. 94; अदृष्टफलेष्वन्यप्रत्ययनियमो नास्ति PrakaVi. 1023. 23; शंकरप्रीतिहेतुत्वाददृष्टफलम् ··· नाट्यम् PuruṣPa. 133. 9; दृष्टादृष्टफला भक्तिः BhaktiRa. 2. 47; संस्कृतस्य दृष्टादृष्टफलेषु कारीरीज्योतिष्टोमादिकर्मसु अधिकारात् ViraMi.(Saṁskāra.) 133. 7; *n.* unseen result, concequence which is not yet realised, result at a future date अप्यदृष्टफलं यस्य रसस्तस्यामृतं सताम्। सोऽयं कल्पतरुर्धीराः उपास्यः YuktiKa. 2. 3; एका तावददृष्टफलमुद्दिश्य प्रवृत्ता NyāySu.(Ja.) 234B. 7 (*on* ii. 1. 1); पुरुषगतं तु प्रत्यवायपरिहाररूपमदृष्टफलं नियमस्य ··· उपस्थितम् MayūMāli. 349. 26 (*on* iv. 1. 2)

अदृष्टफलक (adṛṣṭaphala-ka) *adj.* possessing (i. e. productive of) unseen result एतेनादृष्टफलकश्रौतस्मार्तसर्वकर्मोपसङ्ग्रहः Upask. 270. 3 (*on* vi. 2. 2); तत् किं दृष्टफलकमदृष्टफलकं वा AdvaiSi. 874. 23 (LaCandr. अदृष्टद्वारा साक्षात्काररूपफले हेतुः); तीर्थसद्भावे तृष्णोदकपरोदकाभ्यां स्नानं नादृष्टफलकमित्याह ViraMi.(Āhnika.) 190. 17.

अदृष्टफलकत्व (adṛṣṭaphalaka-tva) *n.* the state of being possessed of (i. e. productive of) unseen merit तस्य चादृष्टफलकत्वेऽपि न दोषः BhāṭṭDī. i. 34. 23 (*on* i. 2. 4)

अदृष्टफलकल्पन (adṛṣṭaphala-kalpana) *n.* assumption of a result in the form of unseen (merit) सक्तुन्यायेनाश्रुतकरणत्वकल्पनमदृष्टफलकल्पनं चान्या-

व्यम् VivaPraSaṁ. 158. 14.

अदृष्टफलकल्पना (adṛṣṭaphala-kalpanā) *f.* assumption of an unseen result अदृष्टफलकल्पनानुपपत्तेः TattvPradī.(Ci.) 348. 5; अदृष्टफलकल्पनाप्रसङ्गाच्च VedāntKa. 412. 17 (*on* iii. 3. 16); अथ विधेयज्ञानस्यारोपितविषयतायामदृष्टफलकल्पना स्यात् VivaPraSaṁ. 155. 21; दृष्टफलस्य संभवे सत्यदृष्टफलकल्पनाया अन्याय्यत्वात् JīvanVi. 146. 9; संभवति दृष्टफलकत्वे अदृष्टफलकल्पनाया अन्याय्यत्वात् SiddhāMu. 1. 14 (*on* 1); दृष्टफलाभावेनादृष्टफलकल्पनायां विंशतिवर्षरूपमर्यादानुक्तावपि संभवादिति पाठः BālamBha. ii. 34. 1 (*on* 2. 24)

अदृष्टफलकामना (adṛṣṭaphala-kāmanā) *f.* desire for an unseen result दृष्टादृष्टफलकामनारहितम् ··· निवृत्तमित्युच्यते ManvaMu. 518. 14 (*on* 12. 89)

अदृष्टफलजनक (adṛṣṭaphala-janaka) *adj.* producing an unseen result ननु प्रजापालनमदृष्टफलजनकं कथं तेनार्जितम् RājNīRa. 31. 9.

अदृष्टफलजनकता (adṛṣṭaphalajanaka-tā) *f.* the nature of producing effects or results which are not visible ततः काव्यं दृष्टादृष्टफलजनकतया बहूपयुक्तम् PratāYaBhū. 6. 3.

अदृष्टफलता (adṛṣṭaphala-tā) *f.* the state of having an unseen result अदृष्टफलता वापि कल्प्याग्निष्टोमवद्भवेत् BṛĀraUBhVā.(Sambandha) 838.

अदृष्टफलत्व (adṛṣṭaphala-tva) *n.* **A i** the state of having an unseen result दृष्टादृष्टफलत्वेन तस्मान्नास्यप्रमाणता TantrVā. 237. 24 (*on* i. 3. 25); तेन देवतापरितोषद्वारेण प्रीतिं ददातीत्यदृष्टफलत्वं दर्शितम् AbhinBhā. iv. 5. 19 (*on* 28. 9); तस्यादृष्टफलत्वायुक्तं सकृदनुष्ठानम् BrahmSuBh.(S'rī.) ii. 425. 1 (*on* iv. 1. 1); न चाग्निष्टोमादिवदनावृत्तिः तस्यादृष्टफलत्वेन सकृदनुष्ठानसम्भवात् TattvPrakā. 200A. 6 (*on* iv. 1. 1); **A ii** the state of having unseen merit as the result अनर्थकानां हुम्फडित्यादिवाक्यानामध्ययनस्य ··· अदृष्टफलत्वम् ··· अभ्युपेयं स्यात् NītiMā. 4. 6; **A iii** the state of (enjoining the rite) having an unseen result विधिवाक्यानि च दृष्टादृष्टफलत्वेन द्विविधानि SarvaMaSaṁ. 9. 13; **B** the state of being an unseen result कर्मफलवन्मोक्षस्यादृष्टफलत्वम् अनित्यत्वं च इत्येवमादयो दोषाः न केनचित्परिहर्तुं शक्याः BrahmSūBh.(S'aṅ.) 595. 12 (*on* iii. 2. 21); ननु मोक्षस्यादृष्टफलत्वात् कथम् ··· प्रजापरित्यागः PrakaVi. 937. 22.

अदृष्टफलदृष्टि (adṛṣṭaphala-dṛṣṭi) *f.* concept of an unseen result उभयथाप्यदृष्टफलदृष्टिः संदेहबीजम् TattvPrakā. 197B. 9 (*on* iii. 4. 51)

अदृष्टफलप्रद (adṛṣṭaphala-prada) *adj.* [*f.* -ā] bestowing or yielding an unseen result प्रतीकोपासना कार्या दृष्टादृष्टफलप्रदा S'ivaS. 5. 32; पूजा सिद्धिकरी ज्ञेया दृष्टादृष्टफलप्रदा ĪśānS'iPa. i. 8. 1; तद्वस्तु स्थिरमेव स्यात् दृष्टादृष्टफलप्रदम् ĪśānS'iPa. ii. 34. 64; ततो दुर्गामनुं वक्ष्ये दृष्टादृष्टफलप्रदम् S'āraTi. 11. 1; अथ दुर्गामनून् वक्ष्ये दृष्टादृष्टाफलप्रदान् TantrSā.(K.) 97. 6.

अदृष्टफलप्राप्ति (adṛṣṭaphala-prāpti) *f.* attainment of the unseen result (i.e. liberation) अन्त्यप्रत्ययवशाददृष्टफलप्राप्तेः BrahmSūBh.(S'aṅ.) 785. 15 (*on* iv. 1. 12)

अदृष्टफलभाज् (adṛṣṭaphala-bhāj) *adj.* who acquires an unseen result ईदृशमेतद्विदुषे दानं यत्प्रतिग्रहीताप्यदृष्टफलभाग्भवेत् ManuBh. i. 269. 15 (*on* 3. 133)

अदृष्टफलभोजिन् (adṛṣṭaphalabhoj-in) *adj.* who enjoys or experiences an unseen result अदृष्टफलभोजिनोऽस्य यजमानस्य योऽयमदृष्टरूपः शास्त्रीयः संस्कारः सोऽयं मुख्ये कर्मणि युक्तो नाङ्गेषु NyāyMāVi. 191. 14 (*on* iii. 7. 2)

अदृष्टफलविषयत्व (adṛṣṭaphalaviṣaya-tva) *n.* the state of being what relates to (an act productive of) unseen result न च सकृत्कृतेन कृतः शास्त्रार्थः इति न्यायविरोधः। तस्यादृष्टफलविषयत्वात् GoviBh. 288. 9 (on iv. 1. 1)

अदृष्टफलसंपत्ति (adṛṣṭaphala-sampatti) *f.* acquisition of an unseen result यथा च दृष्टादृष्टफलसंपत्तिः तदपि वक्ष्यामि ManvaMu. 247. 16 (*on* 7. 1)

अदृष्टफलसंपद् (adṛṣṭaphala-sampad) *f.* occurrence of an unseen result (in the form of heaven) नन्वेवं तद्धिविश्रम्भो ह्यदृष्टफलसंपदि BṛĀraUBhVā. i. 4. 1474.

अदृष्टफलसंप्रेप्सु (adṛṣṭaphala-samprepsu) *adj.* who is desirous of attaining an unseen result अदृष्टफलसंप्रेप्सोर्दृष्टकर्मफलत्यजः। रातेर्धनस्य दातुस्तद्ब्रह्मेदं स्यात्परायणम् BṛĀraUBhVā. iii. 9. 158.

अदृष्टफलसंभव (adṛṣṭaphala-sambhava) *m.* possibility of unseen merit as fruit साधुभिर्भाषमाणानां नादृष्टफलसंभवः TantrVā. 221. 12 (*on* i. 3. 18)

अदृष्टफलसिद्धि (adṛṣṭaphala-siddhi) *f.* **i** achievement of an unseen result तस्मात्सर्वप्रयत्नेन अदृष्टफलसिद्धये। विहितं यच्च तत्कार्यम् PauṣkS. 30. 215; विध्यायत्तत्वाददृष्टफलसिद्धेः PrakaVi. 329. 19; **ii** (Astrono.) arriving at an invisible (i. e. unobservable) result (of calculation with reference to an astronomical phenomenon) अदृष्टफलसिध्यर्थं यथार्काद्युक्तितः कुरु। गणितं यद्धि दृष्टार्थं तद्दृष्ट्युद्भवतः सदा SiddhāTaVi. 49. 23; 141. 8; 145. 8.

अदृष्टफलहेतु (adṛṣṭaphala-hetu) *m.* cause of an unseen result यज्ञक्रिया नादृष्टफलहेतुः क्रियात्वान्निष्ठीवनक्रियावत् NyāySu.(Ja.) 386A. 5 (*on* ii. 2. 6)

अदृष्टफलापेक्षा (adṛṣṭaphalāpekṣā) *f.* need for an unseen result विवेकज्ञानस्य···प्रयोजनं दृष्टमेवेति नादृष्टफलापेक्षा NyāyRa. 669. 22 (*on* 5(15). 103)

अदृष्टफलाभाव (adṛṣṭaphalābhāva) *m.* absence of an unseen result न नित्यानां कर्मणामदृष्टफलाभावः कदाचिदपि उपपद्यते GītāBh.(S'aṅ.) 556. 2 (*on* 18. 66)

अदृष्टफलाभिलाषिन् (adṛṣṭaphalābhilāṣ-in) *adj.* who is desirous of an unseen result स्वामिन् ··· दृष्टफलं परित्यज्यादृष्टफलाभिलाषी कथमसि S'aṅkaVi(Ā.) 157. 4.

अदृष्टफलाशासन (adṛṣṭaphalāśāsana) *n.* desire or wish for an unseen result तदा स्वर्गादिष्वपि अदृष्टफलाशासनेन उद्यमो न स्यात् GītāBh.(S'aṅ.) 555. 17 (*on* 18. 66)

अदृष्टफलोदय (adṛṣṭaphalodaya) *m.* rise of the result in the form of unseen merit मुख्यधर्मैवि(? वि)दाप्नोति दृष्टादृष्टफलोदयात्। भोगान्मोक्षं च ĪśānS'iPa. ii. 1. 3.

अदृष्टफलोपयोगित्व (adṛṣṭaphalopayogi-tva) *n.* the state of being useful (in producing) the unseen result उपासनानाम् ··· स्वरूपसन्निधानेनैव चादृष्टफलोपयोगित्वं भविष्यति PrakaVi. 1024. 19.

अदृष्टबन्धन (adṛṣṭa-bandhana) *n.* imperceptible or unseen tie देव्यौ तच्चित्तं ज्ञात्वादृष्टबन्धनैस्तं बबन्धतुः PurāPraSaṁ. 107. 16.

अदृष्टबहिर्भावकल्पना (adṛṣṭabahirbhāva-kalpanā) *f.* assumption of the unseen presence outside (the house) एवं जीवतो देवदत्तस्य गृहेऽदर्शनेनादृष्टबहिर्भावकल्पना BhaṭṭCin. i. 46. 16 (*on* i. 1. 4)

अदृष्टबाधन (adṛṣṭa-bādhana) *n.* annulment which is not seen (i. e. absence of contradiction with the means of valid knowledge) यत्रादृष्टबाधनं प्रमाणविरोधाभावः तत्रैवायं विरोधः प्रवर्तते NyāySu.(Ja.) 643A. 13 (*on* 4. 2)

अदृष्टबाधा (adṛṣṭa-bādhā) *adj.* (*f.*) the annulment of which is not known अदृष्टबाधया ··· समाख्यया बाध इति प्राप्ते TantrVā. 875. 13 (*on* iii. 3. 14)

अदृष्टबाह्यविषय (adṛṣṭa-bāhyaviṣaya) *m.* unseen external object (i. e. object pertaining to the other world) तमात्मानम् ··· अक्रतुः अकामः दृष्टादृष्टबाह्यविषयेभ्य उपरतबुद्धिः ··· पश्यति अयमहमस्मीति KāṭhUBh. 134. 6 (*on* 2. 20)

अदृष्टबीजानुविधान (adṛṣṭa-bījānuvidhāna) *adj.* in which there is an unperceived continuity of the seed अतश्च स्फुटमदृष्टबीजानुविधानस्यापत्यस्य कार्यत्वात् ··· तद्धर्मानुविधायित्वं युक्तमभ्युपगन्तुम् ManuBh. ii. 251. 3 (*on* 9. 35)

अदृष्टबुद्धि (adṛṣṭa-buddhi) *f.* **i** thought or notion of unseen merit अदृष्टबुद्ध्या दीयमानं मन्त्रपूर्वं गृह्णतः प्रतिग्रहो भवति ManuBh. i. 329. 21 (*on* 4. 5); अनाथस्यादृष्टबुद्ध्या वहनादौ नैष कल्प इत्यर्थादुक्तम् HārLa. 82. 21; अतः सन्मर्यादाप्रवृत्तान् दानमानादिभिरभ्यर्चयन्तोऽप्यदृष्टबुद्ध्यैव प्रवर्तन्ते NyāyPari. 385. 23; **ii** thought not known (i. e. secret) (स्त्रियः) दुष्टाचाराः पापरताः असत्याः माययावृताः। अदृष्टबुद्धिबहुलाः प्रायेणेत्यवगम्यताम् MahāBhā. xiii. 286*. 2;

अदृष्टभय (adṛṣṭa-bhaya) *n.* **i** fear from the unknown यत्रादृष्टं भयं (v. l. अदृष्टभयं) ब्रह्म प्रजानां शमयत्युत। दृष्टं च राजा बाहुभ्यां तद्राष्ट्रं सुखमेधते MahāBhā. xii. 75. 2; **ii** fear of the unseen (misery) प्रमाणतो नास्ति निषिद्धकर्मणः फलस्पृहादृष्टभयं विना तव। भ्रमात् ··· प्रवर्तते SaṁkṣeS'ā. 1. 431 (i. 317. 15); **iii** fear of the unseen (demerit or sin) धनी स्वधनरक्षार्थमदृष्टभयाच्च न परद्रव्यापहरणे वर्तते ManuBh. ii. 150. 12 (*on* 8. 179)

अदृष्टभर्तृव्यसन (adṛṣṭa-bhartṛvyasana) *adj.* who has not seen or known the master's miseries आवयोः पिता। अदृष्टभर्तृव्यसनः पूर्वमेवागमद्दिवम् BṛKathaS'loSaṁ. 1. 40.

अदृष्टभार्यात्व (adṛṣṭa-bhāryātva) *n.* invisible status as a wife कान्तारोगिणी भ्रातृमतीत्यादीनाम् ··· अदृष्टभार्यात्वानुपयोगित्वेऽपि ··· न विवाहाङ्गत्वानुपपत्तिः BālamBha. iii. 39. 8 (*on* 3. 16)

अदृष्टभाव (adṛṣṭa-bhāva) *m.* existance of an unseen result पर्यूहणायज्ञनादि न स्यात्स्याद्वात्र पूर्ववत्। न स्याद् दृष्टादृष्टभावादविरोधाच्च तद्भवेत् NyāyMāVi. 513. 2 (*on* x. 2. 33)

अदृष्टभास्करोद्योत (ádṛṣṭa-bhāskarodyota) *adj.* who has not seen the sunlight (किङ्कराः) मुमुक्षुश्च घनं शस्त्रं ···। अदृष्टभास्करोद्योताः परं संघातवर्तिनः PadmP.(Ra.) 53. 193.

अदृष्टभिन्न (adṛṣṭa-bhinna) *adj.* different from the unseen (effect) बलवदनिष्टाननुबन्धित्वे सति यददृष्टद्वारा फलकरणमदृष्टभिन्नं च स धर्म इति यावत् BhāṭṭDī. i. 4. 3 (*on* i. 1. 2)

अदृष्टभूतलम् (adṛṣṭa-bhūtalam) *adv.* in which the ground was not observed तद्वदनाकृष्टदृष्टिप्रसरमचलितपक्ष्ममालमदृष्टभूतलम् ... अस्मै प्रणाममकरवम् Kād. 142. 21.

अदृष्टभेद (adṛṣṭa-bheda) *m.* difference or distinction in the unseen (effect) तस्मादभ्यसितव्यो यागः । प्रत्यभ्यासं चादृष्टभेद इति S'ābaBh. 472. 6 (*on* ii. 2. 2); अदृष्टभेदेऽपि सामान्यैक्यात् TantrRa. 32. 10; अदृष्टभेदोऽपि गुणपरिणाम एव SāṁkhyaTaKau. 359. 1 (*on* 27)) न चादृष्टभेदात्कार्यभेदः NyāySu.(Ja.) 43A. 9 (*on* i. 1. 1); फलतद्भावनाभेदाङ्गीकारे तावत् पक्षद्वयेऽप्यदृष्टभेदः स्पष्ट एव MīmāKau. iii(2). 4. 8 (*on* ii. 1. 1)

अदृष्टभोगभू (adṛṣṭa-bhogabhū) *f.* unseen place of enjoyment इष्टार्थितायामिष्टं वा विमृश्यैतेष्टकारि च । न चाप्यदृष्टमिष्टं चौरपीष्टाऽदृष्टभोगभूः *ācārya* cited by PratyabhiVi. ii. 62. 2 (*on* ii. 2. 7) (Bhāsk. अदृष्टभोगभूः अननुभूतभोगस्थानम् चौरपि इष्टा स्यात्)

अदृष्टमङ्गलवादित्र (adṛṣṭa-maṅgalavāditra) *n.* invisible auspicious musical instrument सूतीगृहे च ... उन्नदितं वियत्यदृष्टमङ्गलवादित्रैः NalaCam. 4. 12(3)

अदृष्टम् (a-dṛṣṭam) *adv.* invisibly गच्छन्न दृश्यते चैतन्मण्डलं सवितुस्तथा । अदृष्टं चलते यस्मात्तस्माद्धे पार्वतीप्रिय BhaviP. 101B. 21 (i. 55. 57)

अदृष्टमण्डल (adṛṣṭa-maṇḍala) *adj.* **i** whose orb is not visible न रात्रौ स्थापयेद्देवम् ... सूर्ये चादृष्टमण्डले ParaS. 19. 5; **ii** not perceiving group (of veins, organs or weapons etc.) अदृष्टमण्डलोऽप्येवं यः कश्चिद्वेत्ति तत्त्वतः । स सिद्धिभाग्भवेत् ParāTri. 251. 6.

अदृष्टमत (adṛṣṭa-mata) *n.* knowledge of the unseen (thing) दृष्टादृष्टमतोपदेशकृतिनः ... भवतः किं वेदितव्यं मया S'ivāL. 35.

अदृष्टमर्याद (adṛṣṭa-maryāda) *adj.* limit of which is not seen, boundless मुखरीचकार दिक्चक्रमक्रमाहतानां दिव्यतूर्याणामदृष्टमर्यादो नादः TilaMañ. 269. 17.

अदृष्टमस्तक (adṛṣṭa-mastaka) *n.* unseen head किमयमदृष्टमस्तके भार आरोप्यते NyāyMañ. i. 208. 10.

अदृष्टमातृक (adṛṣṭamātṛ-ka) *adj.* who has not seen the mother तनयः पुनः । अदृष्टमातृकः सोऽभूत्पुमानिव निरक्षरः PariPar. 1. 119.

अदृष्टमात्र (adṛṣṭa-mātra) *n.* **i** mere non-perception मम त्वदृष्टमात्रेण गमकः सहचारिणः S'lokaVār. 5(7). 40 (460. 4); BālaKrī. i. 18. 23 (*on* 1. 7); **ii** all unseen (merit and demerit) इदानीमभ्युपगम्याप्यदृष्टमात्रं प्रत्यर्थापत्तेः प्रामाण्यम् TātpaṬ.(U.) 145. 23 (*on* 4. 105); YuktiSneha. 37. 29 (*on* i. 1. 4); **iii** mere unseen (cause or effect) न चादृष्टमात्रवैकल्यादिति शङ्कनीयम् PramāMā. 14. 5; TarkSaṁ.(Ā.) 66. 18; CaturCin. iii(1). 535. 8; VivaPraSaṁ. 301. 5; NyāyMāVi. 624. 4 (*on* xi. 1. 6); BhāṭṭCin. ii. 83. 4 (*on* ii. 1. 4); LalitāSaBh. 196. 23 (*on* 234); LaS'abdeS'e. ii. 110. 15; BālamBha. i. 190. 10 (*on* 1. 53)

अदृष्टमानुषप्रचार (adṛṣṭa-mānuṣapracārā) *adj.* (*f.*) who has not seen movement of men तत्राप्यदृष्टमानुषप्रचारा गवाक्षमधिरुह्य ... अद्राक्षम् TilaMañ. 337. 11.

अदृष्टमार्ग (adṛṣṭa-mārga) *adj.* who has not seen (found) the way आग्नेयास्त्रप्रतापप्रतिहतगतयोऽदृष्टमार्गाः समन्तान्नृपालाः BrahmāṇḍP. ii. 48. 21; KuṭṭaMa. 426.

अदृष्टमुखभङ्ग (adṛṣṭa-mukhabhaṅga) *adj.* who cannot see the grimace on the face अदृष्टमुखभङ्गस्य युक्तमन्धस्य याचितुम् । अहो बत महत्कष्टं चक्षुष्मानपि याचते S'ārṅgaPa. 253 = Subhāṣi. 503.

अदृष्टमुखविकार (adṛṣṭa-mukhavikāra) *adj.* [*f.* -ā] the grimace on whose face is not seen अस्ति ... स्वभावे कोपेऽप्यदृष्टमुखविकाराभिः ... कुलप्रसूताभिरलंकृता वधूभिः ... अयोध्येति यथार्थाभिधाना नगरी TilaMañ. 9. 14; इत्यभिधाय नीत्वा च कन्यान्तःपुरप्रवेशं यावदावामदृष्टमुखविकारः प्रकृत्यैव गत्या स्वशिबिरं प्रति प्रस्थितः (कुमारः) TilaMañ. 326. 19.

अदृष्टमुद्गर (adṛṣṭa-mudgara) *m.* unseen mallet यदि तावद्रणादस्माद्यामोऽन्यत्र वयं नृप । अदृष्टमुद्गराघातैर्नूनं हन्यामहे ततः SkandP. vi. 18. 56.

अदृष्टमूर्ति (adṛṣṭa-mūrti) *adj.* whose body is not seen क्रूरान्तस्थः सूर्यश्चन्द्रो वा युगपदेव मरणाय । सौम्यैरदृष्टमूर्तिर्युवतीनां गर्भसहितानाम् Sārā. 8. 35; UdaySuKa. 144. 24; BṛKathāMañ. viii. 1. 72.

अदृष्टमूल (adṛṣṭa-mūla) *adj.* whose base is not seen परप्रत्ययस्यादृष्टमूलस्य न्यायाभासनिमित्तत्वसंभवात् S'āstrDī. 26. 13 (*on* i. 3. 3); *n.* unseen base यथा तु व्याख्यातं उपलब्धमूलैवेयं स्मृतिर्भवतीति नादृष्टमूलकल्पनाप्रसंगः ManuBh. ii. 328. 24 (*on* 10. 1)

अदृष्टयन्त्र (adṛṣṭa-yantra) *adj.* who has never employed a surgical instrument भिषजा ... अदृष्टयन्त्रेण ... न चाविपश्चिता नस्यकर्म प्रदातुमित्येतन्मे विवक्षितम् Hastyāyur. 619. 9 (4. 7)

अदृष्टरजत (adṛṣṭa-rajata) *adv.* who has never seen silver न हि पूर्वमदृष्टरजतस्य शुक्तिसंप्रयोगे रजतमवभासते PañcPā. 7. 3 (*on* i. 1. 1); अन्यथा (? अ)दृष्टरजतस्यापि शुक्तौ रजतभ्रमापत्तेः Bhāsk. ii. 125. 17 (*on* ii. 3. 13)

अदृष्टरजस् (adṛṣṭa-rajas) *adj.* who has not reached puberty कन्यां वोपवासयेददृष्टरजसमादर्शी चायमग्निः श्रेष्ठतम इत्येतेन SāmaViBr. iii. 4. 4; AbhidhāRaMā. 2. 329.

अदृष्टरदहास्य (adṛṣṭa-radahāsya) *n.* laughter in which the teeth are not seen अदृष्टरदहास्यं तु सितम् ParaNā. 522.

अदृष्टरहित (adṛṣṭa-rahita) *adj.* without the unseen effect (merit) तदेवमदृष्टरहिते समिदादिमात्रे सत्यङ्गवत्तैव नास्ति कुत उपकारः S'ābaBh. 2118. 10 (*on* xi. 1. 35)

अदृष्टराजत्व (adṛṣṭarāja-tva) *n.* the state of one who has not seen a king अस्ति राजेति । दूरस्था अदृष्टराजत्वात् (जनपदा न मर्यादामतिवर्तन्ते) JayaMa. 29. 21 (*on* 1. 3)

अदृष्टराजसभ (adṛṣṭa-rājasabha) *adj.* who has not seen the assembly of a king वैतालिककुलकलङ्क । किमदृष्टराजसभोऽपराभूतवादिवृन्दश्च कुमुदचन्द्रः MudriKu. 2. 21 (1)

अदृष्टरूप (adṛṣṭa-rūpa) *adj.* [*f.* -ā] **A i** of an invisible nature वर्मभिर्भवेद्यदि न दैवमदृष्टरूपम् (v. l. अदृश्यमानम्) MudrāRā. 2. 8; दृश्यस्वभावं किमभीष्टमेतद्ब्राह्मण्यमाहोस्विददृष्टरूपम् BhaviP. 81A. 13 (i. 41. 27); पदार्थकार्याणि यानि दृष्टादृष्टरूपाणि S'āstrDī. 646. 6 (*on* x. 1. 1); उपनीयाध्यापनेनादृष्टरूपः कश्चिदतिशयः आचार्ये जन्यते PadMañ. *on* KāśiVṛ. *on* P. i. 3. 36; दृष्टादृष्टरूपप्रयोजनान्तरमन्तरेण परार्थं स्वानर्थस्य परमकारुणिकैरप्यनभ्युपगमात् S'aṭDū. 123. 12; नाप्यत्रादृष्टरूपामहितविमथनीं शक्तिमङ्गीकरोषि TattvMu. 2. 43; यजमानस्य योऽयमदृष्टरूपः शास्त्रीयः संस्कारः सोऽयं मुख्ये कर्मणि युक्तो नाङ्गेषु NyāyMāVi. 191. 15 (*on* iii. 7. 2); तत्रापि प्रोक्षणादिजन्यः संस्कारोऽदृष्टरूपो यजमान एव SarvaDaKau. 6. 5; न हि भयं विना वाङ्मात्रेण विधर्माणः शक्या निवर्तयितुम्, अदृष्टरूपेषु, पापफलेषु श्रुतिवाक्यमश्रद्दधतां लौकिके वचसि विश्वासादरयोरसद्भावात् DaṇḍaVi. 264. 3; ईश्वरोपाधिमायापरिणामयोरदृष्टरूपयोः प्रसादकोपयोर्मायावयवमनोऽवच्छिन्नत्वात् LaCandr. 401. 42; तार्किकमते तु अदृष्टरूपौ (धर्माधर्मौ) BhāṭṭDī. i. 5. 11 (*on* i. 1. 3); i. 286. 9 (*on* iii. 3. 14); ii. 41. 17 (*on* iii. 7. 2); अदृष्टरूपवेदत्वस्वीकारेऽपि ... सर्वार्थत्वकल्पनानुपपत्तिः MīmāKau. i. 37. 19 (*on* i. 3. 7); i. 49. 10 (*on* i. 3. 7); ii. 28. 12 (*on* ii. 3. 4); ii. 138. 20 (*on* iii. 1. 3); स चावान्तरोपकारः क्वचिददृष्टरूपः यथा प्रोक्षणादिषु MīmāKau. iii. 57. 11 (*on* ii. 1. 6); iii. 66. 5 (*on* ii. 1. 9); iii. 204. 8 (*on* ii. 2. 16); अदृष्टरूपाध्वर्युत्वादिसद्भावे प्रमाणाभावेन MayūMāli. 407. 20 (*on* v. 1. 1); 611. 4 (*on* ix. 2. 10); 659. 4 (*on* x. 2. 1); **A ii** of an invisible form कथं पुनरसत्साधानविधौ तदेकोपायत्वमाहवनीयादीनामदृष्टरूपाणामवगन्तुं शक्यम् S'āstrDī. 164. 11 (*on* ii. 3. 3); प्रकृते च यूपस्यादृष्टरूपस्यालौकिकत्वेन लोकतस्तत्सम्बन्धासिद्धेः MayūMāli. 12. 8 (*on* i. 2. 2); **B** not seen before, not known before अदृष्टरूपास्तास्तेन काम्यरूपा वने स्त्रियः Rāmā. i. 9. 13; अन्धः स्वप्नं पश्यन् दृष्टपूर्वमेव पश्यति न शाकद्वीपादिगतमदृष्टरूपम् BṛĀraUBh. 522. 4 (*on* iv. 3. 6); सर्वो ह्यर्थवादभागः ... आराध्यदेवतायाश्चादृष्टरूपान् गुणान् सहस्रशो वदन् VedāSaṁ. 147. 11; केयं वृत्तिरदृष्टरूपविषमप्रस्थायिनी दृश्यते Subhāṣi. 1359; **C** becoming invisible, having an invisible form तयोश्चक्षूंषि रजसा सुपर्णस्तूर्णमावृणोत् । अदृष्टरूपः MahāBhā. i. 29. 8; (यक्षी) अदृष्टरूपा शनकैः सुदर्शना विमोचयां ग्राहभयाद्बभूव VarāṅgaC. 13. 20; सिद्धयोगेश्वरीपीठे पूजयिष्यन्ति भाविताः । अदृष्टरूपाम् ... पिङ्गलां सर्वसिद्धिदाम् । ... तेषामाविर्भविष्यति SkandP. iv. 14. 72; इन्द्रजालं स्फुटं वेत्ति मायां जानाति वा पुनः । दृष्टोऽप्यदृष्टरूपोऽभूत् PadmP. i. 22. 48; त्वया स चोक्तः कथया जनानामदृष्टरूपः प्रचरिष्यसीति S'ivaP. v. 26. 10 (436B. 3); कस्याप्यदृष्टरूपस्य वाचमश्रौषमम्बरे BṛKathāS'loSaṁ. 27. 99; **D** of the form of the unseen (i. e. merit) कर्मणः स्वयमदृष्टरूपस्य दृष्टसाधनसम्पत्तिमन्तरेण फलजननासमर्थत्वात् JīvanVi. 10. 11; तद्धर्मप्रकारकस्मृतौ तद्धर्मावच्छिन्नसम्बन्धितया गृहीतवस्तुज्ञानस्य हेतुतायामदृष्टरूपोद्बोधकजनितस्मृतौ व्यभिचारवारणाय कार्यतावच्छेदककोटौ कसंकोचस्यावश्यकतया S'aktiVā. 216. 13; पञ्चप्रयाजानामदृष्टरूपकार्यभेदात्समुच्चयः LaCandr. 695. 30; अदृष्टरूपप्रयोजनस्य सिद्धेर्विकल्पः MayūMāli. 878. 8 (*on* xii. 4. 4); **E** of the nature of the unseen excellence यत्तु पिण्डदानेऽनुज्ञावचनं तत्तत्प्रश्नवददृष्टरूपान्नसंस्कारार्थम् CaturCin. iii(1). 1052. 1; *n.* **i** unseen nature अभेदवासनाया दृष्टरूपेणादृष्टरूपेण वा ... वाक्यार्थज्ञानोपकारकत्वम् S'aṭDū. 131. 18; **ii** the

state of having invisible nature शुद्धेश्च दृष्टादृष्टरूपेणाभिषिद्धत्वान्मन्त्रपाठेनादृष्टोत्पत्तेः BālamBha. iii. 207. 9 (*on* iii. 3. 327); [अदृष्टरूपस्य NyāKa. 144. 28 *w. r.* for दृष्टरूपस्य] *m.* one of Rudra's aspects the like of whose form is not to be seen शिरश्च सशिवो बभ्रुरक्षयः शम्भुरेव च। अदृष्टरूपनामानौ तथान्यो रूपवर्धनः AgniP. 86. 6.

अदृष्टरूपऋत्विक्त्व (adṛṣṭarūpa-ṛtviktva) *n.* priest-hood of an unseen nature ऋत्विक्पदस्य ··· अदृष्टरूपऋत्विक्त्वे रूढिमङ्गीकृत्य BhāṭṭDī. ii. 53. 4 (*on* iii. 7. 16); अदृष्टरूपऋत्विक्त्वकल्पनायां गौरवात् BhāṭṭDī. ii. 53. 8 (*on* iii. 7. 16); ii. 199. 19 (*on* v. 3. 11); ii. 312. 21 (*on* vi. 6. 3); iii. 218. 19 (*on* x. 2. 11); x. 242. 13 (*on* x. 2. 31)

अदृष्टरूपत्व (adṛṣṭarūpa-tva) *n.* the state of having an unseen form वेदत्वस्य यूपत्वादिवदृष्टरूपत्वात् MīmāKau i. 37. 12 (*on* i. 3. 7); ऋत्विक्त्वस्यादृष्टरूपत्वे प्रमाणाभावस्य तृतीये साधितत्वात् BhāṭṭDī. iii. 218. 19 (*on* x. 2. 10); न च ··· यूपस्यादृष्टरूपत्वात्तेनैवोदुम्बरत्वस्य नैराकाङ्क्ष्यम् MīmāNyāPra. 220. 5; देवतापरिग्रहस्यादृष्टरूपत्वेऽपि देवतासंस्कारकत्वात् MayūMāli. 853. 28 (*on* xii. 1. 12); चमसाध्वर्युत्वस्याप्यदृष्टरूपत्वाभावेन MayūMāli 324. 20 (*on* iii. 7. 11)

अदृष्टरूपत्वाभिधान (adṛṣṭarūpatvābhidhāna) *n.* statement as being of the nature of the unseen merit स्वयमेव दीक्षाया अदृष्टरूपत्वाभिधानाच्च BhāṭṭDī. ii. 200. 5 (*on* v. 3. 11)

अदृष्टरूपविभवा (adṛṣṭa-rūpavibhavā) *adj.* (*f.*) whose wealth of beauty is not seen (before) किं त्वाश्चर्यमदृष्टरूपविभवाप्याकर्ण्यमाना सती कान्तेत्युन्नतचेतसोऽपि कुरुते नाम्नैव निम्नं मनः NalaCam. 1. 61.

अदृष्टरूपामृतत्व (adṛṣṭarūpāmṛta-tva) *n.* immortality whose nature is not seen अदृष्टरूपामृतत्वाय विहितादुपासनात्साक्षात्कारः ··· जायते VedāntKa. 67. 15.

अदृष्टरूपाविशेष (adṛṣṭarūpāviśeṣa) *m.* non-distinction regarding the nature of the unseen वेदेऽदृष्टरूपाविशेषेऽपि कदाचिद्दर्शनादलौकिकार्थता NayaVi. 17. 1 (*on* i. 1. 1)

अदृष्टरूपिन् (adṛṣṭa-rūpin) *adj.* having an invisible form अदृष्टरूपी हनुमांस्तत्र भ्रमति नित्यशः SkandP. iii(2). 40. 52.

अदृष्टरूपैकार्थत्व (adṛṣṭarūpaikārtha-tva) *n.* the state of having a single purpose of the nature of the unseen effect अनेककल्पनायोगाददृष्टरूपैकार्थत्वं परिकल्प्य MīmāKau. iii. 126. 9 (*on* ii. 1. 48)

अदृष्टलक्षण (adṛṣṭa-lakṣaṇa) *adj.* characterised by unseen merit अदृष्टायेति अदृष्टलक्षणाय फलाय, अदृष्टद्वारा स्वर्गापवर्गलक्षणाय फलाय वा Upask. 269. 12 (*on* vi. 2. 2)

अदृष्टलवणा (adṛṣṭa-lavaṇā) *adj.* (*f.*) who has never even seen salt अदृष्टलवणा भार्या प्रातिवेश्यैर्निमन्त्र्यते Deśopa. 2. 15.

अदृष्टलिङ्ग (adṛṣṭa-liṅga) *adj.* whose mark is not visible or perceptible न च दृष्टानां स्पर्श इत्यदृष्टलिङ्गो वायुः VaiśeSū. ii. 1. 10; सामान्यतोऽदृष्टलिङ्गोऽपि वायुः पक्षधर्मताबलादायात इत्यर्थः Upask. 84. 12 (*on* ii. 1. 10)

अदृष्टलिङ्गत्व (adṛṣṭaliṅga-tva) *n.* the state of being an unobserved mark वायुना सहागृहीतव्याप्तिकत्वाददृष्टलिङ्गत्वमुक्तम् Upask. 85. 2 (*on* ii. 1. 10)

अदृष्टलिपि (adṛṣṭa-lipi) *f.* invisible script विधिरपि पुरुषस्य तस्य भाले लिखितुमदृष्टलिपिं कुतः क्षमेत AmṛUda. 1. 23.

अदृष्टलोकद्वितय (adṛṣṭa-lokadvitaya) *adj.* who has not taken note of the two worlds (this and the next world) जगाम सङ्केतभुवस्तमस्वतीरदृष्टलोकद्वितयोऽसतीजनः RāmC. 18. 19.

अदृष्टलोकपर्यन्त (adṛṣṭa-lokaparyanta) *adj.* who has not seen the limit of the world अदृष्टलोकपर्यन्ता हिंसानृतपरस्विनः PadmP.(Ra.) 123. 28.

अदृष्टवज्र (adṛṣṭa-vajra) *adj.* who has not seen a diamond कतिपयव्यक्तिग्रहणे चादृष्टवज्रस्य ··· व्याप्तेरनिश्चयात् TattvPradī.(Ci.) 245. 11.

अदृष्टवत् (adṛṣṭa-va(n)t) *adj.* [*f.* -tī] **i** connected with or arising from destiny or possessing the unseen (fruit of action) अदृष्टवता पुरुषेणास्याणूनां संबन्ध इति चेत् BrahmSūBh.(Śaṅ.) 369. 17 (*on* ii. 2. 12); न चादृष्टवतात्मना तत्संयोगात् कर्मोत्पत्तिनित्यसर्गप्रसङ्गात् BrahmSūBh.(Bhā.) 114. 21 (*on* ii. 2. 12); अदृष्टवतां जीवात्मनामेव कर्तृत्वोपपत्तेः NyāySu.(Ja.) 109B. 3 (*on* i. 1. 3); तद्व्यापारश्चादृष्टवदात्मसंयोगापेक्षस्ततोऽसौ सर्वगत इति VivaPraSaṁ. 240. 22; **ii** (*pap.*) who has not seen (an object) न चार्थमदृष्टवतस्तत्स्मरणमाकस्मिकमेवोत्पद्यते ŚāstrDī. 40. 3 (*on* i. 1. 4); प्रागदृष्टवती मेने वह्निते सा विलोचने RājTa. (Ka.) 8. 3181; इयं ··· मामदृष्टवतीव गच्छति RasSa. 179. (6)

अदृष्टवत् (adṛṣṭa-vat) *adv.* **i** as though unseen, as if not seen, दृष्टं चादृष्टवत् कृत्वा क्रियामन्यां प्रयोजयन् MahāBhā. vii. 687*(2); दृष्टं त्वदृष्टवत् कुर्यात् ŚukraNī. 3. 316; **ii** like the unseen (fruit of action) न वा तेन गृह्यते तत्समवेतत्वाददृष्टवत् NyāyKuA. i. 108. 2; अदृष्टवत्तस्य विपाकापेक्षत्वाभावेन स्वर्गादेः कालान्तरभावित्वभङ्गप्रसङ्गात् ŚivārkaMaDī. ii. 273. 22 (*on* iii. 2. 37)

अदृष्टवत्ता (adṛṣṭavat-tā) *f.* the state of being possessed of an unseen fruit अदृष्टवत्तया कर्मत्वोपपत्तौ घटादीनामपि तत्कर्मत्वापत्तिः BhāṭṭCin. i. 34. 3 (*on* i. 1. 4)

अदृष्टवदात्मवत् (adṛṣṭavadātma-vat) *adv.* like the self endowed with the unseen fruit (of action) 'वह्निः दाहानुकूलाद्दिघातीन्द्रियधर्मसमवायी दाहजनकत्वात् अदृष्टवदात्मवत्' इत्यनुमानस्य ··· अप्रयोजकत्वात् BhāṭṭCin. i. 33. 13 (*on* i. 1. 4)

अदृष्टवदात्मसंयोग (adṛṣṭavadātma-saṁyoga) *m.* conjunction with the self possessing an unseen fruit (of action) अदृष्टवदात्मसंयोगश्च ज्वलनपवनादिक्रियाकरणत्वेन बोद्धव्यः Kiraṇā. 152. 11; सा (क्रिया) अदृष्टवदात्मसंयोगे रूपादिमत्तायां चेति Kiraṇā. 186. 22; अथादृष्टवदात्मसंयोगादणुषु कर्मोत्पत्तिः BrahmSūBh.(Rā.) 481. 4 (*on* ii. 2. 12); सा (क्रिया) अदृष्टवदात्मसंयोगे (प्रमाणम्) इति चेन्न NyāySu.(Ja.) 371B. 8 (*on* ii. 2. 6); अदृष्टैरदृष्टवदात्मसंयोगैश्चेति यावत् NyāySu.(Ja.) 336B. 3 (*on* ii. 2. 6); उत्पन्नेषु रक्तादिष्वदृष्टवदात्मसंयोगात्परमाणौ द्व्यारम्भणाय क्रिया SarvaDaSaṁ. 10. 118; अदृष्टवदात्मसंयोगादेव सर्गादौ परमाणूनां कर्म Upask. 215. 5 (*on* iv. 2. 7); प्रयत्नवदात्मसंयोगेऽदृष्टवदात्मसंयोगे चाभ्युपगम्यमाने AṇuBh. 132. 14 (*on* ii. 2. 12); ततोऽदृष्टवदात्मसंयोगाद् द्व्यारम्भानुगुणा क्रिया SiddhāMu. 59. 30 (*on* 105); अदृष्टवदात्मसंयोगेन ··· घटादीनामपि तत्कर्मत्वापत्तिः BhāṭṭCin. i. 34. 2 (*on* i. 1. 4)

अदृष्टवध (adṛṣṭa-vadha) *m.* murder in secret नृशंसमदृष्टवधः क्षत्रविनाशश्चेति विशालाक्षः ArthŚā. i. 84. 8 (1. 17)

अदृष्टवर्ण (adṛṣṭa-varṇa) *m.* letter which is not seen अदृष्टवर्णे प्रथमे चोदकः स्यात् प्रदर्शकः ṚPrāti. 10. 10; अदृष्टवर्णे प्रथमे प्रदर्शनं स्मरन्ति ṚPrāti. 11. 14.

अदृष्टवश (adṛṣṭa-vaśa) *m.* **अदृष्टवशेन** (adṛṣṭavaśena) [Inst.] **i** due to the unseen (i. e. merit and demerit) न च तत्रादृष्टवशेन व्यवस्थोत्प्रेक्ष्या NītiMā. 51. 14; **ii** due to the unseen (i. e. merit) नयनरश्मिभिरेकीभूतेऽपि बाह्ये तेजसि यावानेव तस्य भागोऽदृष्टवशेनोपलब्धिहेतुतयोपात्तः तावानेवोपलब्धये प्रभवति PrakaPañ. 130. 12; **अदृष्टवशात्** (adṛṣṭavaśāt) [Abl.] **i** due to the unseen (i. e. merit and demerit) न पुनः पदार्थस्थितिरदृष्टवशाद्विपरिवर्तते NyāyMañ. i. 208. 8; यथा प्रदीपान्निर्गतैरवयवैरदृष्टवशात् ··· अप्रतिघातिप्रभामण्डलमारभ्यते NyāyKa. 9. 6; 32. 18; यदि तु शुभाशुभरूपतया सरणानामदृष्टवशाद् व्यवस्थाक्रमः ĀtmaSi. 14. 17; संवेगो वैराग्यं तस्यापि मृदुमध्यतीव्रता प्राग्भवीयवासनादृष्टवशादेवोदेति TattvVai. 25. 25 (*on* 1. 21); अदृष्टवशादनुद्भूतरूपस्पर्शं हि तत् Bhām. 732. 6 (*on* iv. 2. 9); यदि च मनसो वैभवेऽप्यदृष्टवशात् क्रम उपपाद्येत तदा ··· आश्रयासिद्धिरेव वैभवहेतूनाम् NyāyKuA. i. 150. 2; ii(1). 223. 13; अदृष्टवशाद्बोधितसंस्कारसम्पत्त्या विसदृशसमारोपे च अधिकरणसम्पत्तिर्यथासम्भवमूहनीयेति NyāyKu. 66. 16; अथ तद्भावाविशेषेऽप्यदृष्टवशाद्विवक्षितशरीरोत्पादनानुगुणा नियता एव परमाणव उपसर्पन्ति SyādvāMañ. 9(73); अदृष्टवशाच्च कस्यचिदेव सरणम् NyāySu.(Ja.) 44B. 2 (*on* i. 1. 1); अदृष्टवशादपि तज्जन्मानुभूतेषु ··· यज्ज्ञानमुत्पद्यते Upask. 410. 7 (*on* ix. 2. 7); करका तु अदृष्टवशात्प्रतिबद्धद्रवं जलमेव ŚarvaDaKau. 14. 5; अदृष्टवशादर्थानामनुभूतत्वं च नाध्यवसीयते TantrRaha. 4. 11; अदृष्टवशाच्चेत् SāṁkhyaSū. 1. 30; नन्वेकदेशसम्बन्धेन विषयसंयोगसाम्येऽप्यदृष्टवशादेवोपरागलाभ इति चेत् SāṁkhyaPraBh. 18. 10 (*on* 1. 30); **ii** due to the unseen (i. e. merit) व्यक्तं जगत्यदृष्टवशाद्विशालगुणसम्पद्भिरप्यसुलभाः स्वल्पगुणैरपि सुप्रापाः प्रसिद्धयो भवन्ति TilaMañ. 212. 22; घ्राणसमवेतस्य हि गन्धस्यादृष्टवशात् तादृशो निर्माणभेदो येन सजातीयं चन्दनादिसमवेतं गन्धमभिव्यनक्ति TātpaṬ.(Vā.) 534. 14 (*on* iii. 1. 70); फलं च नाम यददृष्टवशाद्देवताप्रसादादन्यतो वा जायते Loc. 149. 6 (*on* 3. 14); वेदास्तु निःश्वासवदेवादृष्टवशादबुद्धिपूर्वका एव स्वयम्भुवः सकाशात् स्वयं भवन्ति SāṁkhyaPraBh. 126. 30 (*on* 5. 50); **iii** due to destiny or fate यदा तु दृश्यमाने कारणे एषां भङ्गः नादृष्टवशात्, तदा समाधानं कृत्वा पुनरारोपणं कर्तव्यम् VyavaNi. 156. 1.

अदृष्टवशतस् (adṛṣṭavaśa-tas) *adv.* due to the force of the unseen (merit or demerit) प्रजासृष्टिं ब्रह्मा तदनु कुरुतेऽदृष्टवशतः Vidvanmo. 4. 43.

अदृष्टवस्तुसंप्राप्ति (adṛṣṭavastu-samprāpti) *f.* acquisition of a thing not seen (before) अदृष्टवस्तुसंप्राप्तिः केषांचिद्धास्यदाभवत् RājTa.(Ka.) 7. 1573.

अदृष्टवाच् (adṛṣṭa-vāc) *f.* speech from an invisible (source) अत्र जिनबिम्बं तिष्ठतीत्यदृष्टवाचा निश्चित्य PrabaK. 85. 16.

अदृष्टवाचकत्व (adṛṣṭavācaka-tva) *n.* the state of being expressive of the unseen (effect) ऋत्विक्शब्दस्य यूपादिशब्दवददृष्टवाचकत्वावगमात् MayūMāli. 665. 13 (*on* x. 2. 10)

अदृष्टवाणादि (adṛṣṭa-vāṇādi) *adj.* [= अदृष्टबाणादि] one who has

not seen an arrow etc. अदृष्टवाणादिना ··· वा(बा)णादिविषाणित्वानुमानौचित्यापातात् KhaṇḍanKhā. 877. 16.

अदृष्टवादिता (adṛṣṭavādi-tā) *f.* declaration that (something) is not seen [SWTF]

अदृष्टवादिन् (adṛṣṭa-vādin) *adj.* who states that the unseen is the cause, who argues about the unseen (cause) अवश्यं चायं स्वाभाविकपक्षोऽदृष्टवादिनाभ्युपगन्तव्यः TātpaṬ.(U.) 145. 19 (*on* 4. 103); अदृष्टवादिभिश्चापि नादृष्टं दृष्टनुच्यते SarvaSiSaṁ. 2. 2; अतो मूढा नास्तिकाश्च अदृष्टवादिनो जनाः ĀdiP. 3. 17.

अदृष्टवारण (adṛṣṭa-vāraṇa) *n.* warding off of the unseen (effect) परिशोधनोत्तरकालं परिशोधनाभावसत्त्वेन तद्बलात्तदुत्तरमदृष्टवारणाय परिशोधनध्वंसस्य प्रतिबन्धकतायाः कल्पनीयतया भवन्मते गौरवात् VyutpaVā. 172. 12.

अदृष्टवारि (adṛṣṭa-vāri) *adj.* who did not see water धरणोऽथ द्रुमारूढोऽदृष्टवारिर्व्यचिन्तयत् SamarāSaṁ. 6. 95.

अदृष्टविग्रह (adṛṣṭa-vigraha) *adj.* whose body is invisible (i. e. having no corporeal form) महादुन्दुभयो नेदुः ···अदृष्टविग्रहैर्देवैराहताः करपल्लवैः PadmP.(Ra.) 4. 26; 119. 32; (देवाः) अदृष्टविग्रहा हृष्टा वदन्तीदं मुहुर्मुहुः BṛKathāK. 68. 65; 80. 14; अदृष्टविग्रहात् ··· शिवात् ··· समुत्पन्नं ज्ञास्त्रम् YaśasCam. ii. 255. 2 = ii. 276. 24; अदृष्टविग्रहं देवं कथं ज्ञास्यति चिन्मयम् RasRaSa. 1. 55.

अदृष्टविग्रहाद्यभाव (adṛṣṭavigrahādy-abhāva) *m.* absence of the body etc. produced by the unseen cause एवं सत्यं शरीर(? त्वशरीर)मिति त्वदृष्टविग्रहाद्यभावपरम् GoviBh. 319. 14 (*on* iv. 4. 11)

अदृष्टविग्रहेश (adṛṣṭavigraheśa) *m.* Lord whose body is not visible अदृष्टविग्रहेशेन स्वेच्छाक्रीडनका इव । धात्रा विनिर्मितः ··· बाबादमाभिधः RājTa. (Prā.) 420.

अदृष्टविधा (adṛṣṭa-vidhā) *f.* [Inst.] by way of (producing) the unseen effect त्यागांशस्यादृष्टविधया आरादुपकारकत्वम् BhāṭṭDī. ii. 92. 21 (*on* iv. 1. 7); iii. 199. 21 (*on* x. 1. 6); आज्यादीनां स्तोत्रोपकारकत्वमदृष्टविधया न विरुध्यते MīmāKau. i. 179. 8 (*on* i. 4. 3); सक्तूनाम् ··· अदृष्टविधयोपकारकत्वस्य च लौकिकप्रमाणागम्यत्वात् MīmāKau. iii(2). 77. 3 (*on* ii. 1. 12); iii(2). 226. 10 (*on* ii. 2. 19); ii. 144. 5 (*on* iii. 1. 8)

अदृष्टविधान (adṛṣṭa-vidhāna) *adj.* who has not known the method (of administering medical treatment) भिषजा ··· अदृष्टविधानेन ··· न चाविपश्चिता नस्यकर्म प्रदातुमित्येतन्मे विवक्षितम् Hastyāyur. 619. 9 (4. 7)

अदृष्टविपाक (adṛṣṭa-vipāka) *m.* ripening or maturing of the unseen merit or demerit अथादृष्टविपाककादाचित्कत्वात् ··· अन्तःकरणस्य नायं प्रसङ्गः Bhām. 491. 10 (*on* ii. 3. 32); प्रलये सृष्ट्यभावः कस्य कारणस्य वैकल्येनोपपादनीयः । न तावददृष्टविपाकस्य S'ivārkaMaDī. ii. 70. 1 (*on* ii. 2. 11)

अदृष्टविप्रयोग (adṛṣṭa-viprayoga) *adj.* which cannot be dissociated form (the word) अदृष्टविप्रयोगोऽर्थः VākyaPa. 2. 165.

अदृष्टविप्रिय (adṛṣṭa-vipriya) *adj.* [*f.* –ā] **i** wherein no unpleasantness is seen भावसूचितमदृष्टविप्रियं दार्ढ्यभाक्क्षणवियोगकातरम् । ··· तयोः प्रेम KumāSaṁ. 8. 15; **ii** who has experienced no unpleasant things गते च तस्मिन्नदृष्टविप्रिया प्रिया प्रियङ्गुसुन्दरी नाम देवी ··· जम्बुद्वीपमागच्छत् TilaMañ. 407. 10.

अदृष्टविभूति (adṛṣṭa-vibhūti) *adj.* who has not seen or experienced prosperity दधति न जनास्तन्नैराश्याददृष्टविभूतयो यदुचितसुखभ्रंशाद्दुःखं निजच्युतसम्पदः Subhāṣi. 3190.

अदृष्टवियोगदुःख (adṛṣṭa-viyogaduḥkha) *adj.* who has not seen or experienced the grief of separation अदृष्टवियोगदुःखः । ··· कनकवर्षनरेश्वरोऽथ भूमण्डलं ··· शशास KathāSaSāg. ix. 5. 238.

अदृष्टविरह (adṛṣṭa-viraha) *adj.* who has not seen or known separation सः ···कदाचिदप्यदृष्टविरहः ···प्रणयिलोकः ···कां दशामनुभविष्यति TīlaMañ. 348. 5; *m.* absence of unseen (merit) वर्णोच्चारणकरणमिन्द्रियं वाक् । मृगादिष्वदृष्टविरहात् तदभावः YatindraDī. 38. 9.

अदृष्टविरहव्यथ (adṛṣṭa-virahavyatha) *adj.* in which the grief of separation is not experienced अदृष्टविरहव्यथम् ··· धन्यं कस्यापि जीवनम् Hitopa. 1. 112.

अदृष्टविरुद्ध (adṛṣṭa-viruddha) *adj.* **i** not contrary to what is seen or perceived न सुखस्यापि तर्ह्यस्मदादेरदृष्टविरुद्धमनित्यत्वं शक्यं कल्पयितुम् NyāyVār. 89. 18 (*on* i. 1. 22); **ii** contrary to the unseen (benefit or merit) यो हि ··· परलोकसाधनैकप्रवणस्तपोदानादिप्रवृत्तः ··· स कथमिवात्मनो दृष्टादृष्टविरुद्धम् ··· परस्यार्थेऽनृतं ब्रूयात् BālaKrī. i. 226. 5 (*on* 2. 70); निषेधो दृष्टादृष्टविरुद्धक्रियासु ManvaMu. 274. 15 (*on* 7. 154)

अदृष्टविरोध (adṛṣṭa-virodha) *adj.* in which no contradiction is seen को ह्यदृष्टविरोधस्य सम्भवं प्रत्याचक्षीत । तदयं व्यतिरेकः संशयादसाधनम् PramāVāSvopVṛ. 103. 16; *m.* antagonism with the unseen (merit) राजदाराश्च चतुराश्रमगुरुभार्या दृष्टादृष्टविरोधात् (अगम्याः) JayaMa. 70. 8 (*on* 1. 5); 71. 2 (*on* 1. 5)

अदृष्टविरोधित्व (adṛṣṭavirodhi-tva) *n.* the state of being opposed to the unseen (merit) राज्ञश्चतुराश्रमगुरुत्वात् दाराः खण्डितशीला अपि दृष्टादृष्टविरोधात् (v. l. दृष्टादृष्टविरोधित्वात्) अगम्याः JayaMa. 71. 2 (*on* 1. 5)

अदृष्टविरोधिन् (adṛṣṭa-virodhin) *adj.* opposed to the unseen (effect or benefit) अज्ञो वा ··· दृष्टादृष्टविरोधि कर्म कुरुते MahāviC. 3. 35.

अदृष्टविलम्ब (adṛṣṭa-vilamba) *m.* delay of the unseen (cause) न च वैभवेऽप्यदृष्टविलम्बाद्विलम्बः TattvCin. i. 771. 11; ii(2). 88. 6.

अदृष्टविशिष्ट (adṛṣṭa-viśiṣṭa) *adj.* possessed of unseen (merit and demerit) आत्मानश्च संस्कारादृष्टविशिष्टाः (व्यवतिष्ठन्ते) TarkSaṁ.(Ā.) 43. 25.

अदृष्टविशिष्टताभिवर्त्मन् (adṛṣṭaviśiṣṭatābhivartman) *n.* course the peculiarity of which is unknown विष्णवे तामदृष्टविशिष्टताभिवर्त्मस्थितामप्यविदुषे निवेद्य तदुपसर्गापवर्गायास्मत्सर्गान्नियोजयितव्यः YaśasCam. ii. 320. 7.

अदृष्टविशिष्टत्व (adṛṣṭaviśiṣṭa-tva) *n.* the state of being charactерised by the unseen (merit and demerit) अदृष्टविशिष्टत्वेन भाव्यत्वोपपत्तिः MīmāKau. iii(2). 64. 2 (*on* ii. 1. 7)

अदृष्टविशेष (adṛṣṭa-viśeṣa) *adj.* [*f.* –ā] whose specific nature is not seen नैवं वाक्यानि दृश्यविशेषत्वात् । अदृश्यत्वेऽप्यदृष्टविशेषाणां विजातीयत्वोपगमविरोधात् PramāVāSvopVṛ. 10. 6; तेनेयं जन्मादिकालशुद्धिवददृष्टविशेषा शुद्धिर्वेदितव्या ManuBh. i. 84. 1 (*on* 2. 27); *m.* special unseen merit, specific unseen factor, particular unseen factor or principle येऽदृष्टविशेषास्तदपेक्षेभ्यस्तत्संयोगेभ्य आत्माणुसंयोगेभ्यः पवनपरमाणुषु कर्मोत्पत्तौ सत्याम् Kiraṇā. 93. 16; 203. 8; यदि त्वदृष्टविशेषो वा ··· अनुगतं कारणमुच्यते KhaṇḍanKhā. 682. 9; न च सर्वत्रादृष्टविशेषसदसद्भावकारित एव विपाकसिसृक्षादिभेद इति वाच्यम् NyāyKu. 94. 3; किं तु तादृशानुसन्धानेनादृष्टविशेषो भवति NyāySiA. 249. 23; 231. 23; स चादृष्टविशेषो योगाभ्यासतपश्चर्यादिभिर्जायते NyāyPari. 74. 8; Upask. 322. 8 (*on* vii. 2. 8); SiddhāMu. 19. 22 (*on* 40); तज्जातीयस्य ग्रहणेनादृष्टविशेषस्यापि सत्त्वाच्च BhedaDhi. 72. 1; ऋणग्रहणेनाधमर्णनिष्ठः परिशोधननाश्योऽदृष्टविशेषो जन्यते VyutpaVā. 172. 4; एतेनादृष्टविशेषात् भोगव्यवस्थेति सङ्कल्पविशेषाददृष्टव्यवस्थेति प्रत्युक्तम् GoviBh. 158. 9 (*on* ii. 3. 30)

अदृष्टविशेषज (adṛṣṭaviśeṣa-ja) *adj.* produced by a specific unseen factor (as its cause) वामदेवादितुल्यत्वे हि ज्ञानप्रदमदृष्टविशेषजं स्वजन्माप्युक्तं स्यात् VīraMi.(Bhakti.) 158. 8.

अदृष्टविशेषनियम (adṛṣṭaviśeṣa-niyama) *m.* regulation by particular unseen factor अदृष्टविशेषनियमस्तु दृष्टमुपाधिमाश्रित्य भवेत् Kiraṇā 203. 11.

अदृष्टविशेषप्रयोज्य (adṛṣṭaviśeṣa-prayojya) *adj.* caused by particular unseen factors (or force of destiny) मरणम् कस्यचिच्चिरेण कस्यचिच्छीघ्रमदृष्टविशेषप्रयोज्यम् (भवति) VīraMi. 890. 27 (*on* 3. 170)

अदृष्टविशेषरूप (adṛṣṭaviśeṣa-rūpa) *adj.* **i** having a particular unseen form लक्षण्याम् ··· अदृष्टविशेषरूपैराभ्यन्तरैश्च शुभलक्षणैर्युक्ताम् (कन्याम् उद्वहेत्) VīraMi. 108. 4 (*on* 1. 52); **ii** of the nature of particular unseen (force) पौर्वदेहिकं पूर्वदेहोपार्जितमदृष्टविशेषरूपं दैवम् VīraMi. 373. 9 (*on* 1. 349)

अदृष्टविशेषवत् (adṛṣṭaviśeṣa-va(n)t) *adj.* endowed with a specific unseen force or merit अदृष्टविशेषवदात्मसंयोगाद् धेनूपयुक्ततृणादेः क्षीरभाव इति चेन्न S'rutaPra. ii. 284. 30 (*on* ii. 2. 4)

अदृष्टविशेषलब्ध (adṛṣṭaviśeṣa-labdha) *adj.* got due to specific unseen merit मनुष्यदेहपरिमितस्य तस्यादृष्टविशेषलब्धे करिशरीरे च तथा सर्वाङ्गीणसुखदुःखानुपलम्भश्च ··· इति GoviBh. 136. 10 (*on* ii. 2. 34)

अदृष्टविशेषसंपत्ति (adṛṣṭaviśeṣa-sampatti) *f.* accomplishment of the particular unseen force or factor इहादृष्टविशेषसम्पत्तिहेतुत्वं वर्धमानादिप्रयोगस्य AbhinBhā. i. 165. 18 (*on* 4. 252)

अदृष्टविशेषसंबन्ध (adṛṣṭaviśeṣa-sambandha) *m.* association with a particular unseen merit or factor ब्राह्मण्यादिकं देवतादीनामप्यस्ति । तत्खल्वदृष्टविशेषसम्बन्धरूपम् S'rutaPra. ii. 59. 21 (*on* i. 3. 25)

अदृष्टविशेषसहकृत (adṛṣṭaviśeṣa-sahakṛta) *adj.* assisted by a certain unseen power or force अस्ति च योगिप्रत्यक्षमदृष्टविशेषसहकृतान्तःकरणजन्यम् ··· आस्तिकानाम् S'atDū. 72. 12.

अदृष्टविशेषाभिप्राय (adṛṣṭaviśeṣābhiprāya) *m.* intention regarding

a particular unseen force or merit अभ्युपगम्याप्यदृष्टमात्रं प्रत्यर्थापत्तेः प्रामाण्यम् अदृष्टविशेषाभिप्रायेण 'अथातो धर्मजिज्ञासा' इत्युक्तम् TātpaṬ.(U.) 145.23 (*on* 4.105)

अदृष्टविशेषावच्छिन्न (adṛṣṭaviśeṣāvacchinna) *adj.* delimited by a certain unseen power or merit अदृष्टविशेषावच्छिन्नस्थलविशेषस्यैवाश्युत्तरवेद्यादिशब्दाभिधेयत्वात् BhāṭṭDī. iii. 62.8 (*on* ix. 1.8); वेदिर्हि ··· अदृष्टविशेषावच्छिन्नदेशविशेषः, अदृष्टमेव वा BhāṭṭDī. iv. 224.13 (*on* xii. 1.3); iv. 224.17 (*on* xii. 1.3)

अदृष्टविशेषोपनिबद्ध (adṛṣṭaviśeṣopanibaddha) *adj.* accompanied by a certain unseen power or merit अदृष्टविशेषोपनिबद्धभूतविशेषानुपलम्भात् NyāyKuA. i. 142.1.

अदृष्टविशेषोद्बोध (adṛṣṭaviśeṣodbodha) *m.* revival of the unseen merit or force न च तदानीमदृष्टविशेषोद्बोधविलम्बादेव तज्ज्ञानविलम्ब इति वाच्यम् SiddhāMu. 53.26 (*on* 85)

अदृष्टविशेषोपगृहीतत्व (adṛṣṭaviśeṣopagṛhīta-tva) *n.* the state of being taken by a special unseen merit or power शिवत्वजातेरदृष्टविशेषोपगृहीतत्वस्य वानुगतत्वात् TattvCin. iv(2). 524.1.

अदृष्टविशेषोपग्रह (adṛṣṭaviśeṣopagraha) *m.* apprehension of a specific unseen factor तदिदम् ···अदृष्टविशेषोपग्रहानुबद्धं वा ĀtmaTaVi. 858.19 (Nārāyaṇī भोक्तॄणामदृष्टविशेषेण तद्भोगायाचेतनं तत्परमन्त्रं न तु स्वत इत्यर्थः); तद्बुद्धेरनेकविषयत्वेऽप्यदृष्टविशेषोपग्रहो नियामकः Upask. 296.5 (*on* vii. 1.9)

अदृष्टविशेषाभाव (adṛṣṭaviśeṣābhāva) *m.* absence of a specific unseen factor (as its cause) किमदृष्टविशेषाभावादस्मदादिशरीरस्य शुक्रादिपूर्वता NyāyKa. 33.15.

अदृष्टविषय (adṛṣṭa-viṣaya) *adj.* [*f.* -ā] having for its sphere an unseen object, relating to an unseen object अदृष्टविषया चेत्स्यादेतेषां साध्वसाधुता TantrVā. 191.8 (*on* i. 3.18); तच्च तादर्थ्यमदृष्टविषयमिति सर्वैः क्रियते ṬupṬ. 74.15 (*on* v. 3.29); सर्वेषां ज्ञानानामदृष्टविषयाणां हेतुर्निमित्तं वेदः ManuBh. i. 69.11 (*on* 2.7); अदृष्टविषयप्रमाणवाक्यत्वस्य चासिद्धेः NyāyKuA. ii(2). 60.1; अदृष्टविषयां वार्ताम् ···विवृणोति कः RājT.(Ka.) 5.186; निर्मातुं कुशलोऽप्यदृष्टविषये रूपे न जातु क्षमः Subhāṣi. 1469; *m.* non-perceived object यद्यप्यर्थप्रतिपत्त्यव्यभिचारद्वारेण प्रमाणस्याव्यभिचारो गम्यते दृष्टे विषये, तथाप्यदृष्टविषये न तज्जनितप्रतिपत्त्यव्यभिचारेणाव्यभिचारः शब्दस्य प्रमाणस्य शक्यो विज्ञातुम् TātpaṬ.(Vā.) 30.15 (*on* i. 1.1)

अदृष्टविषयचोदना (adṛṣṭaviṣaya-codanā) *f.* injunction relating to an unseen object अदृष्टविषयचोदनाप्रामाण्यात् आत्मकर्तव्यं गौणैः देहेन्द्रियात्मभिः क्रियत एव GītāBhā.(Śaṅ.) 559.17 (*on* 18.66)

अदृष्टविषयद्वार (adṛṣṭaviṣaya-dvāra) *m.* [Inst.] through the medium of an unseen object तद्विषया त्विच्छादृष्टविषयद्वारेणोपकरिष्यति ṬupṬ. 82.15 (*on* vi. 1.1)

अदृष्टविषयवाक्यत्व (adṛṣṭaviṣayavākya-tva) *n.* the state of being a sentence relating to an unseen object वाक्यत्वस्यादृष्टविषयवाक्यत्वस्य च विरुद्धत्वात् NyāyKuA. ii(2). 59.5.

अदृष्टविषयोपयोगिन् (adṛṣṭaviṣayopayogin) *adj.* useful in respect of an unseen object अदृष्टविषयोपयोगिवेदादिप्रमाणप्रामाण्यपरिच्छेदे पारम्पर्येणोपायत्वात् ··· तत्र सार्थकतामवलम्बते NyāyMañ. i. 158.29.

अदृष्टविष्टरम् (adṛṣṭa-viṣṭaram) *adv.* without any seat or bed being seen यद्वपुः ··· पट्टतूलशय्यामभूषयत्। तदा तत्तस्य भूपृष्ठेऽशयिष्टादृष्टविष्टरम् RājTa.(Śrī.) 3.119.

अदृष्टविस्तार (adṛṣṭa-vistāra) *adj.* who has not seen the outside world यस्तत्रैवावरुद्धो न क्वचिद्गच्छति तमेव विशिष्टं मन्यते ··· सोऽदृष्टविस्तार उच्यत उदुम्बरमशक इति Nyās. i. 360.23 (*on* ii. 1.48) = PadMañ. on KāśiVṛ. *on* P. *on* ii. 1.48.

अदृष्टविहित (adṛṣṭa-vihita) *adj.* inflicted invisibly रक्ष रक्ष प्रभो न्यक्षः शुद्धान्तो लेष्टुयष्टिभिः। अदृष्टविहितैः कैश्चित्प्रहारैर्जर्जरीकृतः PrabhāC. 33.25.

अदृष्टवृत्ति (adṛṣṭa-vṛtti) *f.* activity of the unseen (destiny) अदृष्टवृत्तिलाभेन यथा संयोग आत्मनः। क्वचित्स्वस्वामियोगाख्योऽभेदेऽन्यत्रापि स क्रमः VākyaPa. iii. 3.18; रथाधिरूढा अप्रतिमा श्रीवर्धमानप्रतिमा चादृष्टवृत्त्याधिष्ठातृबलेन संचरन्ती ··· श्रीमालपुरमलंचकार PrabaCin. 109.2.

अदृष्टवैकल्य (adṛṣṭa-vaikalya) *n.* deficiency in the unseen (cause) न च तस्यां सत्यामदृष्टवैकल्यादशक्तिःशङ्क्या, दृष्टसामग्र्युपनयार्थत्वात्सामान्यतोऽदृष्टस्य ŚatDū. 223.15; अदृष्टवैकल्ये हि बाह्यसामग्री विकला स्यात् NyāySu.(Ja.) 256B.5 (*on* ii. 1.2)

अदृष्टवैकृत (adṛṣṭa-vaikṛta) *adj.* not showing any change in attitude पितृपैतामहमविसंवादकमदृष्टवैकृतं वश्यं ध्रुवमलोभशीलम् ··· इति मित्रसम्पत् KāmSū. 71.17 (1.5); अदृष्टवैकृतं तादात्म्यककार्यस्य ··· अदृष्टव्यभिचारम् JayaMa. 71.21 (*on* 1.5)

अदृष्टवैगुण्य (adṛṣṭa-vaiguṇya) *n.* defect in the unseen (cause) तत्र न दृष्टवैगुण्यमुपलभामहे। नापि दृष्टसाद्गुण्येऽदृष्टवैगुण्यं संभावनीयम्। तस्यैतावन्मात्रार्थत्वात् NyāyKuA. i. 16.11; एतैश्चादृष्टवैगुण्यं कल्प्यं संस्काररोधिषु। एतेष्वसत्स्वस्मरणात् ज्ञानाभावोऽनुमीयते ŚrutaPra. iB. 20.19 (*on* i. 1.1); न चादृष्टवैगुण्यम्। दृष्टसाद्गुण्ये तदभावात् तस्य तदर्थत्वात् TattvCin. ii(2). 88.4; विवेकादिपूर्वकृततत्त्वादिभिरपि तस्मिन्क्वचिद्विचाराभावस्यादृष्टवैगुण्योपपाद्यत्वात् SiddhāSi. i. 15.18.

अदृष्टवैचित्र्य (adṛṣṭa-vaicitrya) *n.* variety of the unseen (cause) प्रतिशरीरं घ्राणादीनां व्यक्तिभेदेऽपि विषयवैचित्र्यादर्शनात् अदृष्टवैचित्र्यादेवमपि स्यात्। को विरोधः Kiraṇā. 108.11; न चादृष्टवैचित्र्यमेवासंभावितम् ···अनादित्वात् TattvPrakā. 124B.12 (*on* ii. 3.51); अदृष्टवैचित्र्यस्य नियामकत्वाच्च तादृशाः केचिदधिकारिणः संभवन्तीति स्वीकार्यम् GoviBh. 56.5 (*on* i. 3.33)

अदृष्टवैजात्य (adṛṣṭa-vaijātya) *n.* variation of the unseen effect न ह्यनयोः प्रयाजानूयाजवत्समुच्चयः येनादृष्टवैजात्यमावश्यकं स्यात् BhāṭṭDī. iii. 27.23 (*on* ix. 2.14)

अदृष्टवैभव (adṛṣṭa-vaibhava) *n.* power of destiny अदृष्टमप्यर्थमदृष्टवैभवात्करोति सुप्तिर्जनदर्शनातिथिम् NaiṣC. 1.39; भवताप्यदृष्टचिकित्सितेऽस्मिन्व्याधावदृष्टवैभवमन्तरेण भिषगन्तरं नान्वेषणीयमस्ति RasSa. 158(1)

अदृष्टवैलक्षण्य (adṛṣṭa-vailakṣaṇya) *n.* distinctiveness of the unseen (cause) न हि दृष्टकारणवैलक्षण्यमन्तरेणादृष्टवैलक्षण्यमात्रात्कार्यवैलक्षण्यं सिध्यति ŚāstrDī. 116.15 (*on* i. 1.5)

अदृष्टव्य (a-dṛṣṭavya) *adj.* [? अद्रष्टव्य] not fit to be seen तन्नाधीते, तस्माददृष्टव्योऽसौ PrabaK. 110.3.

अदृष्टव्यतिकर (adṛṣṭa-vyatikara) *adj.* who has not seen any calamity सुधो वन्या मग्नाः शिशुरयमदृष्टव्यतिकरः कुरङ्गो हन्तारः सविध इति संतापतरलः SaduktiKa. 257.27.

अदृष्टव्यभिचार (adṛṣṭa-vyabhicāra) *adj.* [*f.* -ā] **i** discrepancy of which is not observed आप्तवादस्याविसंवादसामान्याददृष्टव्यभिचारस्य प्रत्यक्षानुमानागम्येऽप्यर्थे प्रतिपत्तेः PramāVāSvopVṛ. 72.23; अदृष्टव्यभिचारो हेतुरनुमानाङ्गम् NyāyRa. 365.5 (*on* 5(4).59); अदृष्टव्यभिचारा अपि धर्माः व्यभिचारिणो दृष्टाः NyāySu.(Ja.) 354A.7 (*on* ii. 2.6); **ii** without any change being observed अदृष्टवैकृतं तादात्म्यककार्यस्यादिमध्यावसानेष्वदृष्टव्यभिचारम् JayaMa. 71.22 (*on* 1.5); **iii** whose infidelity is not known व्यभिचारस्वभावत्वावधारणाददृष्टव्यभिचारास्वपि स्त्रीत्वेन व्यभिचारोऽनुमास्यते पलाशत्वेनैव वृक्षत्वम् NyāySu.(So.) 12.26 (*on* i. 2.2); 13.8 (*on* i. 2.2)

अदृष्टव्यभिचारता (adṛṣṭavyabhicāra-tā) *f.* the state of not observing a discrepancy अदृष्टव्यभिचारतया ··· स्वतःप्रामाण्यमिति नानवस्था TātpaṬ.(Vā.) 13.9 (*on* i. 1.1)

अदृष्टव्यभिचारत्व (adṛṣṭavyabhicāra-tva) *n.* the state of not observing a discrepancy दृष्टव्यभिचारत्वाच्च शब्दस्य प्रत्यक्षस्य चादृष्टव्यभिचारत्वात् BrahmSi. 39.13.

अदृष्टव्यभिचारवचस् (adṛṣṭavyabhicāra-vacas) *adj.* whose words are not known to be fallible भवितव्यमेवादृष्टव्यभिचारवचसामपि पुरुषाणां वाचि शङ्कया किं यथार्था नेति PramāVāSvopVṛ. 118.16.

अदृष्टव्यभिचारसाध्यत्व (adṛṣṭavyabhicārasādhya-tva) *n.* the state of one the discrepancy of whose probandum is not seen वस्तुगत्या व्यभिचारिसाध्यस्याप्यापाततोऽदृष्टव्यभिचारसाध्यत्वसंभवात् तस्याप्युपाधित्वापत्तेः KhaṇḍanKhā. 707.18; TattvPradī.(Ci.) 242.7.

अदृष्टव्यभिचारित्व (adṛṣṭavyabhicāri-tva) *n.* the state of one in which no discrepancy is observed प्रमाणबाधे सति तददृष्टव्यभिचारित्वं न भवेत् NyāySu.(Ja.) 467B.13 (*on* iii. 2.1)

अदृष्टव्यमुख (adṛṣṭavya-mukha) *adj.* [*f.* -ā] [? अद्रष्टव्यमुख] whose face is not fit to be seen तेनोक्तम् देवाहमदृष्टव्यमुखः, मां वामपादेन हत्वा मुञ्च PurāPraSaṁ. 6.33; तामदृष्टव्यमुखासीरित्युक्त्वा दृष्टा (? ज्येष्ठा)याः सुतं राज्ये निवेश्य ··· नृपो युद्धाय निस्ससार PurāPraSaṁ. 90.5.

अदृष्टव्यवस्था (adṛṣṭa-vyavasthā) *f.* regulation of the unseen (cause) श्रोत्रव्यवस्थापि अदृष्टव्यवस्थयैवोपपद्यते Kiraṇā. 111.11; एतेनादृष्टविशेषात् भोगव्यवस्थेति संकल्पविशेषाददृष्टव्यवस्थेति प्रत्युक्तम् GoviBh. 158.10 (*on* ii. 3.30)

अदृष्टव्याकरण (adṛṣṭa-vyākaraṇa) *adj.* who is innocent of grammar शतकुम्भो नाम पर्वतः। तत्र भवं शातकौम्भं सुवर्णम्। केचिच्चादृष्टव्याकरणा लक्ष्य-

मेव केवलमनुसरन्तः शातकुम्भमित्याहुः GaṇRa. 3.164 (199)

अदृष्टव्यापार (adṛṣṭa-vyāpāra) *m.* function of the unseen (cause) सत्यपि चात्रसंभवे न ह्यभुञ्जन्तस्तृप्यन्ति…तस्मादत्रादृष्टव्यापारः ManuBh. ii. 62.25 (*on* 7.205); यत्र तु दृष्टानुपहारेणादृष्टव्यापारः तत्र तद्वैगुण्यात्कार्यानुदयः NyāyKuA. i. 150.7; रूपवन्तो वायुपरमाणवोऽदृष्टव्यापारवैगुण्याद्रूपवत्कार्यं नारभन्ते इति किं न कल्प्येत NyāyKa. 9.10.

अदृष्टव्यापिन् (adṛṣṭa-vyāpin) *adj.* pervading the unseen (effect) ईश्वरज्ञानादीनां कार्यत्वावच्छिन्नजननार्थं तत्तददृष्टापेक्षायामप्यदृष्टव्यापीश्वरज्ञानजन्यतावच्छेदककार्यत्वावच्छेदकत्वेन तदनवच्छिन्नत्वाभावात् S'ivārkaMaDī. i. 141.31 (*on* i. 1.3)

अदृष्टव्याप्तिका (adṛṣṭa-vyāptikā) *adj.* (*f.*) having an unseen invariable concomitance अदृष्टव्याप्तिकार्थापत्तिरत्यन्तपरोक्षार्थविषयत्वादप्रमाणम् VedāntKa. 468.11 (*on* iii. 3.54)

अदृष्टशक्ति (adṛṣṭa-śakti) *adj.* whose potency is unseen अदृष्टशक्तेर्हेतुत्वे कल्प्यमानेऽपि नेष्यते TattvSaṁ. 524; *f.* unseen potency सत्यपि चास्माकमप्यदृष्टशक्तिगौरवतुल्यत्वे — अर्थशक्तिः प्रमाणवती TantrVā. 701.2 (*on* iii. 1.8)

अदृष्टशक्तिक (adṛṣṭaśakti-ka) *adj.* whose potency is unseen दृष्टशक्तिकस्य प्राशस्त्यपरत्वोपपत्तौ नादृष्टशक्तिकार्थवादापेक्षणं युक्तम् MīmāKau. iii(1). 6.14 (*on* i. 2.1)

अदृष्टशक्तित्व (adṛṣṭaśakti-tva) *n.* the state of being one whose power is unknown घटादावपि न पूर्वदृष्टसामर्थ्या व्यक्तिः कार्या, न चाभिनवा अदृष्टशक्तित्वात् S'arka. 116.3; गुञ्जापुञ्जादावपि तर्हि तदाकारारोपेण दाहाद्यर्थी न प्रवर्तेत, तदाकारस्य सर्वदैवादृष्टशक्तित्वात् PramāMā. 10.3.

अदृष्टशक्तियोग (adṛṣṭaśakti-yoga) *m.* possession of unseen power तत्रादृष्टशक्तियोगो ब्रह्मणो न विरुद्धः VedāntSā.(Rā.) 157.4 (*on* ii. 1.27); BrahmSūBh.(S'rī.) ii. 39.5 (*on* ii. 1.27)

अदृष्टशतभाग (adṛṣṭa-śatabhāga) *m.* one hundredth part of the unseen thing प्रमाणवन्त्यदृष्टानि कल्प्यन्ते सुबहून्यपि। अदृष्टशतभागोऽपि न कल्प्यो ह्यप्रमाणकः TantrVā. 374.15 (*on* ii. 1.5); BṛĀraUBhVā. ii. 5.76.

अदृष्टशरणान्तर (adṛṣṭa-śaraṇāntara) *adj.* who has not known any other resort इत्युदारगुणैरेभिस्त्वमनन्यत्रभाविभिः। स्वयमेत्य वृतो नूनमदृष्टशरणान्तरैः MahāP. 25.50.

अदृष्टशरीरक (adṛṣṭa-śarīraka) *adj.* with an invisible body झटित्यदृष्टशरीरकेणागत्य हतकेनामुना पुष्पशिलीमुखेन…विध्यमानहृदयं दयावति त्वमेव मां रक्षितुमधीश्वरासि UdaySuKa. 111.26.

अदृष्टशर्मन् (adṛṣṭa-śarman) *adj.* who has never seen happiness तदा च स्वामिनिर्वाणपर्वणा समजायत। अदृष्टशर्मणां शर्म नारकाणामपि क्षणम् TriṣaS'aPuC. ii. 6.618.

अदृष्टशशिन् (adṛṣṭa-śaśin) *adj.* which has not seen the moon जनानाम् … पुनः सुखं च। वर्षास्वदृष्टशशिनामिव कैरवाणाम् RasSa. 186.

अदृष्टशाश्वतपथ (adṛṣṭa-śāśvatapatha) *adj.* who has not seen the path to eternity रामानितम्बस्थलीं मुञ्चेः …। नो चेत् … अदृष्टशाश्वतपथः प्राप्नोषि जन्माटवीम् S'ṛṅgāVaiTa. 39.

अदृष्टशास्त्र (adṛṣṭa-śāstra) *adj.* who has not studied the sciences अन्यस्य…उपास्यत्वं प्रतीयत इति…अदृष्टशास्त्राणामिदं चोद्यम् VedāSaṁ. 136.14.

अदृष्टशास्त्रव्यवहार (adṛṣṭa-śāstravyavahāra) *adj.* who does not know the practice of the sciences अपि च प्रत्यन्तवासिनामप्यदृष्टशास्त्रव्यवहाराणां स्वत्वव्यवहारो दृश्यते, क्रयविक्रयादिदर्शनात् Mitā. 216.30 (*on* 2.114)

अदृष्टशिखरदेश (adṛṣṭa-śikharadeśa) *adj.* whose topmost part is not seen जलधरपटलैरप्यदृष्टशिखरदेशः … शाल्मलीवृक्षः Kād. 23.20.

अदृष्टशिष्टव्यवहार (adṛṣṭa-śiṣṭavyavahāra) *adj.* who is not conversant with the behaviour of the cultured or learned men अनेनाप्यदृष्टशिष्टव्यवहारेण सर्वदा प्राकृतलोकसहवासिना तारकेण … संभावितम् TilaMañ. 150.10.

अदृष्टशुकावलि (adṛṣṭa-śukāvali) *adj.* who has not seen the row of parrots अदृष्टशुकावलिश्च हा क्व पुनस्तां स्वजातिमालोकयिष्यामि … इति … पलायितवान् UdaySuKa. 37.19.

अदृष्टशून्य (adṛṣṭa-śūnya) *adj.* devoid of the unseen (power) अदृष्टशून्यस्य चेश्वरस्य न देवतात्वम् TattvCin. iv(2). 524.2.

अदृष्टशेखरपद (adṛṣṭa-śekharapada) *adj.* (mountain) whose top and foot are not seen (अहमरुणाचलः) अदृष्टशेखरपदः …ताभ्यां वरमभीप्सितम्। प्रादाम् SkandP. i(3A). 4.41.

अदृष्टशोणिता (adṛṣṭa-śoṇitā) *adj.* (*f.*) whose menstrual flow is not seen अदृष्टशोणितां तु मधुकपयस्यासुरदारुभिः सिद्धं पयः पाययेत् AṣṭāSaṁ. i. 214.1 (2.4)

अदृष्टश्मश्रुभेद (adṛṣṭa-śmaśrubheda) *adj.* growth of whose beard is not (yet) visible अदृष्टश्मश्रुभेदेन (तेन) …। वज्रपाणेः कृतं राज्यमदैत्यम् BālRā. 3.20.

अदृष्टश्रुत (a-dṛṣṭaśruta) *adj.* neither seen nor heard यदि पुनरदृष्टश्रुतावेव क्त्वक्तवत् गृहीत्वा निष्ठासंज्ञोच्येत MahāBh. iii. 113.13 (*on* iii. 2.102); तस्माददृष्टश्रुतदूषणं परं भक्त्यैकयेशं भजतात्मलब्धये BhāgP. vii. 7.40.

अदृष्टश्रुतपूर्व (a-dṛṣṭaśrutapūrva) *adj.* neither seen nor heard before [SWTF]

अदृष्टश्रुतिकल्पना (adṛṣṭaśruti-kalpanā) *f.* assumption of an unknown Vedic text अदृष्टश्रुतिकल्पनापेक्षया लोभादेर्दृष्टरूपत्वाच्च MīmāKau. i. 19.23 (*on* i. 3.4)

अदृष्टश्रेष्ठदृष्टि (adṛṣṭa-śreṣṭhadṛṣṭi) *adj.* who has not taken into consideration the views of wise men दैवं संप्रेरयति मामिति दग्धधियां मुखम्। अदृष्टश्रेष्ठदृष्टीनां दृष्ट्वा लक्ष्मीर्निवर्तते YogVā. ii. 5.20 (comm. न दृष्टा श्रेष्ठानाम्… दृष्टिर्यैस्तेषाम्)

अदृष्टसंस्कार (adṛṣṭa-saṁskāra) *m.* potency producing an unknown (result) 'व्रीहीन् प्रोक्षति' इति प्रोक्षणविधेरेव व्रीहीष्वदृष्टसंस्कारावगमः प्रोक्षणविषयादपि BrahmSi. 148.13; उपासनेनोद्गीथादिषूत्पत्तिप्राप्तविकृति(? ती)नामसंभवेनादृष्टसंस्कारस्यैव वक्तव्यत्वात् S'ivārkaMaDī. ii. 359.27 (*on* iii. 3.41); यस्य त्वदृष्टसंस्कारः कार्यं परिस्तरणस्य तदत्रास्ति SmṛtiCan. v. 336.12; अस्ति हि अदृष्टसंस्कारोऽपि उपनयनजन्यः उपनेयस्य सर्वकर्माधिकारार्थः PūrvottaVāNaMā. 287.10; एवमुपनयनस्य अदृष्टसंस्कारद्वारा उपनेयार्थत्वस्य क्लृप्तत्वात् दृष्टसंस्कारद्वारापि तादर्थ्यमेवाभ्युपगन्तुं न्याय्यम् PūrvottaVāNaMā. 288.6; तमुपजीव्यादृष्टसंस्कारमात्रं कल्पनीयम् MayūMāli. 652.21 (*on* x. 1.7)

अदृष्टसंस्कारकत्व (adṛṣṭasaṁskāraka-tva) *n.* the state of producing a potency having an unseen effect संस्कारकत्वरूपे दृष्टाभावेनादृष्टसंस्कारकत्वापत्तिः BhāṭṭCin. ii. 79.22 (*on* ii. 1.2)

अदृष्टसंस्कारकल्पना (adṛṣṭasaṁskāra-kalpanā) *f.* assumption of a potency producing an unseen effect किमत्रादृष्टसंस्कारकल्पनया NyāyRa. 535.11 (*on* 5(11).98)

अदृष्टसंस्कारलक्षण (adṛṣṭasaṁskāra-lakṣaṇa) *adj.* having the characteristic of a potency producing unseen merit सत्रेऽपि तददृष्टसंस्कारलक्षणमृत्विक्त्वं यजमानेषु संपादनीयम् MayūMāli. 665.11 (*on* x. 2.10)

अदृष्टसंस्कारवत् (adṛṣṭasaṁskāra-va(n)t) *adj.* possessed of a potency productive of an unseen merit साङ्गाध्ययनविधिरदृष्टसंस्कारवद्वेदवाक्यजनितप्रमितिमत एवोत्तरविधिष्वधिकारो नान्यस्येति नियममन्तरेणानुपपद्यमानः PrakaVi. 302.25.

अदृष्टसंस्कारार्थ (adṛṣṭasaṁskārārtha) *adj.* meant for a potency productive of an unseen effect कथं पुनर्निवेदनमदृष्टसंस्कारार्थमेव न भवति ManuBh. i. 101.7 (*on* 2.51)

अदृष्टसंस्कारार्थता (adṛṣṭasaṁskārārtha-tā) *f.* the state of being meant for a potency productive of an unseen effect अर्थाभावे हि यूपत्वरूपादृष्टसंस्कारार्थतामादाय खलेवाल्यां निवृत्तिः MayūMāli. 678.10 (*on* x. 2.33)

अदृष्टसंस्कारार्थत्व (adṛṣṭasaṁskārārtha-tva) *n.* the state of being intended for a potency productive of an unseen effect सोमावसेकनिर्हरणार्थत्वानुपपत्तेरदृष्टसंस्कारार्थत्वमेवेत्याशयेन तदुदाहृतम् MayūMāli. 95.26 (*on* ii. 1.1)

अदृष्टसंस्थानभेद (adṛṣṭa-saṁsthānabheda) *m.* variety of forms which is not seen अथ चादृष्टसंस्थानभेदोपप्लवविवेकमपि बुद्ध्या भेदायोगद्वारेण स्वयं प्रतीयते BrahmSi. 26.18.

अदृष्टसंस्पर्शरहित (adṛṣṭasaṁsparśa-rahita) *adj.* devoid of a touch of unseen merit अवघातादिषु दृष्टफलेष्वपि दृष्टो विधिः। सत्यम्। न त्वदृष्टसंस्पर्शरहितः BrahmSi. 153.2.

अदृष्टसंक्षय (adṛṣṭa-saṅkṣaya) *adj.* whose end is not seen, inexhaustible धनं चादृष्टसंक्षयम् BrahmāṇḍP. ii. 28.35; *m.* exhaustion of the unseen (merit and demerit) गुणाः। जायन्तेऽथ प्रलीयन्ते सुषुप्तेऽदृष्टसंक्षयात् PañcDa. 6.90.

अदृष्टसंगति (adṛṣṭa-saṅgati) *adj.* whose relationship is not seen or known नन्वदृष्टसंगतीन्यपि चक्षुरादीनि रूपादि बोधयन्ति NyāyRa. 847.15 (*on* 7.2); YuktiSneha. 150.32 (*on* i. 1.7)

अदृष्टसंगतित्व (adṛṣṭasaṅgati-tva) *n.* the nature of having an unseen or unknown relationship तथा च (भेदः) न लिङ्गगम्योऽपि, अदृष्टसंगतित्वात् BrahmSi. 56.22; अदृष्टसंगतित्वेन पूर्वेषां तुल्यता यदा TattvSaṁ. 2241;

अदृष्टसंगतित्वेन सर्वेषां तुल्यता यतः S'lokaVār. 6. 249 (793. 3); 7. 4 (847. 5); नाप्यनुमानेन। केनचिल्लिङ्गेन सहादृष्टसंगतित्वात् TantrVā. 360. 13 (*on* ii. 1. 5)

अदृष्टसंग्रामरङ्ग (adrṣṭa-saṅgrāmaraṅga) *adj.* who has not seen the battlefield जन्मारभ्यादृष्टसंग्रामरङ्गः ··· अदुद्रुवत् Raghunā. 10. 88.

अदृष्टसत्त्य (adrṣṭa-sattya) *adj.* who does not see the truths [CONZE]

अदृष्टसत्त्याश्रय (adrṣṭasattyāśraya) *adj.* resorted to by one who has not known the truth (i. e. the Ārya Satyas) अदृष्टसत्त्याश्रयो हि तर्कः कश्चिदागमनिश्रितो भवति MaYānaSū. 5. 12 (1. 12)

अदृष्टसदृश (adrṣṭa-sadrśa) *adj.* [*f.* -ī] similar to which is not perceived न चादृष्टपूर्वस्यादृष्टसदृशस्य चोपमानविषयत्वम् TantrVā. 361. 5 (*on* ii. 1. 5); न चादृष्टस्यादृष्टसदृशस्य चोपमानप्रमेयत्वम् TātpaṬ.(U.) 445. 22 (*on* 5(11). 12); उपमानं तु अदृष्टे अदृष्टसदृशे वा न प्रवर्तते MīmāKau. i. 5. 7 (*on* i. 3. 1); अद्यापि त्वां जगति वर्णयितुं न कश्चिच्छक्नोत्यदृष्टसदृशीं च परिग्रहं मे CaurPañ. 38.

अदृष्टसदृशत्व (adrṣṭasadrśa-tva) *n.* similarity (of which) is not seen अदृष्टसदृशत्वाच्च स्वयं चानुपलम्भनात् S'lokaVār. 4. 100 (*on* 165. 3); अदृष्टपूर्वत्वाददृष्टसदृशत्वादिति यथासंख्येन हेतुद्वयम् TātpaṬ.(U.) 144. 23 (*on* 4. 100); धर्मो नोपमीयते अदृष्टसदृशत्वात् Kāśi. i. 245. 8 (*on* 4. 100); तथा नानुमेयोऽपि अदृष्टसदृशत्वात् YuktiSneha. 37. 25 (*on* i. 1. 4)

अदृष्टसदृशद्वय (adrṣṭa-sadrśadvaya) *adj.* who has not seen both the similar (objects) अस्ति चादृष्टसदृशद्वयस्यापि ··· सादृश्यविशिष्टे प्रत्ययः NyāyRa. 447. 21 (*on* 5(6). 45)

अदृष्टसदृशप्रज (adrṣṭa-sadrśapraja) *adj.* who has not seen (obtained) a befitting offspring वध्वां तवैतस्यामदृष्टसदृशप्रजम्। न मामवति ··· मेदिनी RaghuVa. 1. 65.

अदृष्टसद्भावाभाव (adrṣṭa-sadbhāvābhāva) *m.* unperceived presence and absence न चान्वयव्यतिरेकवर्ती वाच्यप्रतीतिमपह्नुत्यादृष्टसद्भावाभावौ शरणत्वेनाश्रितौ मात्सर्यादधिकं किंचित्पुष्णीत इत्यभिप्रायः Loc. 184. 24 (*on* 3. 33)

अदृष्टसंदर्शन (adrṣṭa-sandarśana) *n.* phenomenal cognition अदृष्टसंदर्शनमेवमख्यातिरूपमण्डं मायामलम् ParāTri. 250. 6.

अदृष्टसंदेहप्रकार (adrṣṭa-sandehaprakāra) *m.* unknown variety of the figure of speech called Doubtful अलमदृष्टसंदेहप्रकारकल्पनया SāhiDa. 547. 4.

अदृष्टसंनिकर्ष (adrṣṭa-sannikarṣa) *m.* contact which is not perceived नन्वदृष्टसंनिकर्षकल्पना कुतः क्रियते Upask. 360. 13 (*on* viii. 1. 4)

अदृष्टसप्ति (adrṣṭa-sapti) *adj.* who has not found the horse (सागराः सगरपुत्राः) अदृष्टसप्तयस्तत्र पाताले गन्तुमुद्यताः BrNāraP. 8. 96.

अदृष्टसमवधान (adrṣṭa-samavadhāna) *n.* connection with the unseen effect यथा कारीरीजनितसंस्काराधारपुरुषसंयोगाज्जलमुचामदृष्टसमवधानम् TattvCin. ii(2). 141. 10.

अदृष्टसमवाय (adrṣṭa-samavāya) *m.* inherence of the unseen merit एकशरीरावच्छिन्नात्मप्रदेशेऽदृष्टसमवायात् सुखादिव्यवस्था चायुक्ता S'rutaPra. ii. 386. 15 (*on* ii. 3. 52)

अदृष्टसमविषमभाग (adrṣṭa-samaviṣamabhāga) *adj.* (road) in which even and uneven regions are not seen अदृष्टसमविषमभाग इव ··· अतिक्रान्तः ··· मार्गः NalaCam. 6. 72 (5)

अदृष्टसमुपार्जन (adrṣṭa-samupārjana) *n.* obtainment of unseen merit ननु तान्यदृष्टसमुपार्जनेन करणानि NayaMañ. IV. i. 1. 1.

अदृष्टसंपत्ति (adrṣṭa-sampatti) *f.* accomplishment of unseen merit नाट्यस्य रचनाप्राधान्याद्वैचित्र्येण योजनीयमदृष्टसंपत्तये चेति मन्तव्यम् AbhinBhā. i. 220. 14 (*on* 5. 30)

अदृष्टसंपादकत्व (adrṣṭasampādaka-tva) *n.* accomplishment of unseen merit यदा तु नृत्तस्यादृष्टसम्पादकत्वे प्राधान्यं क्रियते तदा तदनुसारेण गीतकादेराश्रयणम् AbhinBhā. i. 166. 1 (*on* 4. 252)

अदृष्टसंपादन (adrṣṭa-sampādana) *n.* achievement of the unseen merit न तु पूर्वरङ्गवददृष्टसंपादनं विघ्नवारणम् Loc. 150. 13 (*on* 3. 14)

अदृष्टसंबन्ध (adrṣṭa-sambandha) *adj.* of unseen relationship, the relation with which is not seen लिङ्गं चादृष्टसंबन्धं न तेषामनुमापकम् NyāyMañ. i. 147. 26; न हि पुरुषेणादृष्टसंबन्धो दण्डः पुरुषमुपलक्षयति TārkiRa. 90. 7; *m.* connection with the unseen merit अतः स्वाश्रयसंयोगसंबन्धेनैवादृष्टसंबन्धः शुक्रादिषु वक्तव्यः SāṁkhyaPraBh. 161. 2 (*on* 6. 61)

अदृष्टसंभावन (adrṣṭa-sambhāvana) *n.* possibility of an unseen (source) कथंचित्तेनादृष्टसंभावनेऽपि तद्विशेषासिद्धेः TattvPrakā. 55A. 9 (*on* i. 3. 28)

अदृष्टसंभोगा (adrṣṭa-sambhogā) *adj.* (*f.*) who has not experienced sexual union बालामदृष्टसंभोगां मत्वा तां नरवाहनः। धूर्तो युक्तिमुपाश्रित्य प्राह निद्राकुलाक्षरम् BrKathāMañ. ix. 1. 14.

अदृष्टसंमुखाराति (adrṣṭa-sammukhārāti) *adj.* who has not met the foe face to face अदृष्टसंमुखारातेर्मामाप्यल्पतरो रिपुः। ··· प्रयातः कृच्छ्रसाध्यताम् RāmāMañ. 335. 5.

अदृष्टसर्ववृत्तान्त (adrṣṭa-sarvavrttānta) *adj.* who has not observed (i. e. known) all events अदृष्टसर्ववृत्तान्त एव विवेशोज्जयिनीम् Kād. 285. 7.

अदृष्टसव्यपेक्ष (adrṣṭa-savyapekṣa) *adj.* expectant of the unseen merit and demerit अदृष्टसव्यपेक्षादेवात्मनस्तद्विज्ञानं भवति PramāMī. 36. 5 (*on* i. 2. 4)

अदृष्टसहकारिन् (adrṣṭa-sahakārin) *adj.* having the unseen merit as auxiliary केवलपृथिव्यवयवैरदृष्टसहकारिभिर्घटितं घ्राणेन्द्रियम् NyāyMañ. ii. 57. 17; नाप्यदृष्टसहकारिसहितमिन्द्रियमेकत्वविषयम् PramāMī. 36. 4 (*on* i. 2. 4)

अदृष्टसहकृत (adrṣṭa-sahakrta) *adj.* accompanied or helped by the unseen cause अदृष्टसहकृताद्वाक्यादनुभव उत्पद्यते PrakaVi. 964. 16; 964. 21; अदृष्टसहकृतत्वगिन्द्रियेण हि मनोवहनाडीनामुपलम्भेन तद्गोचरप्रयत्नात् TattvCin. ii(2). 30. 15; ii(2). 84. 11; ततस्तैरेव हेतुभिरदृष्टसहकृतैस्तत्तत्कार्योदयसंभवात् NyāyPari. 292. 3.

अदृष्टसाजात्य (adrṣṭa-sājātya) *n.* generic sameness of unseen merit अदृष्टसाजात्येऽपि ··· तन्त्रत्वमेव BhāṭṭDī. iv. 229. 16 (*on* xii. 1. 8)

अदृष्टसाद्गुण्य (adrṣṭa-sādguṇya) *n.* good qualities (perfection) of unseen merit अदृष्टसाद्गुण्ये मुमुक्षुत्वादेव ब्रह्मजिज्ञासोपपत्तौ कर्मविचारानर्थक्यात् SiddhāSi. i. 15. 19.

अदृष्टसाधन (adrṣṭa-sādhana) *n.* supernatural means अदृष्टसाधनमाह नक्षत्रेति JayaMa. 20. 9 (*on* 1. 2); अदृष्टसाधनात्तु वैदिककर्मणः (अत्यन्तदुःखनिवृत्तिः) स्यात् SāṁkhyaPraBh. 9. 2 (*on* 1. 6)

अदृष्टसाधनता (adrṣṭasādhana-tā) *f.* the state of being the means of unseen merit अदृष्टसाधनताबोधकवाक्य उपलक्षणान्तराभावात् MayūMāli. 44. 40 (*on* i. 3. 9)

अदृष्टसाधनत्व (adrṣṭasādhana-tva) *n.* the state of being the means of unseen merit नादृष्टसाधनत्वं प्रतीयते TantrVā. 383. 20 (*on* ii. 1. 6); अदृष्टसाधनत्वस्य हि अष्टकादौ प्रत्यक्षविषयत्वात् MīmāKau. i. 127. 23 (*on* i. 3. 27)

अदृष्टसाधनरूप (adrṣṭasādhana-rūpa) *n.* nature of the means of unseen merit अदृष्टसाधनरूपेणापि भेदादावृत्तिः MayūMāli. 840. 23 (*on* xi. 4. 15)

अदृष्टसाध्य (adrṣṭa-sādhya) *adj.* [*f.* -ā] **i** to be accomplished by unseen (means) ऋत्विक्कार्यं तु कर्मनिर्वृत्तिर्दृष्टैव सा कथमदृष्टसाध्या भविष्यति TantrVā. 1147. 3 (*on* iii. 7. 33); अदृष्टसाध्यस्वर्गादिफलं निबीतवन्न कल्प्यम् MayūMāli. 264. 36-37 (*on* iii. 4. 7); **ii** to be accomplished by unknown means पश्यन्ति ये धर्ममदृष्टसाध्यम् YaśasCam. ii. 252. 23.

अदृष्टसाध्यत्व (adrṣṭasādhya-tva) *n.* the state of being accomplished by unseen (means) अदृष्टसाध्यत्वे मोक्षस्यानित्यताप्रसक्तिः NyāySu.(Ja.) 24A. 12 (*on* i. 1. 1); नियमेन शब्दोपलम्भस्यादृष्टसाध्यत्वे तदनुपलम्भस्य शब्दे सत्यपि संभवेन तदभावानुभवायोगाच्च BhedaDhi. 72. 2.

अदृष्टसापेक्ष (adrṣṭa-sāpekṣa) *adj.* [*f.* -ā] depending on the unseen effect नावरणापनयनं तस्याभिव्यञ्जकं, वायुना शब्दावरणासंभवात् किं त्वदृष्टसापेक्षेण PrakaPañ. 358. 22; द्वयोः परमाण्वोरदृष्टसापेक्षा क्रिया GoviBh. 120. 1 (*on* ii. 2. 10)

अदृष्टसापेक्षत्व (adrṣṭasāpekṣa-tva) *n.* the state of being dependent on the unseen effect वयं तु वदामः-अदृष्टसापेक्षत्वाददोषः PrakaPañ. 130. 11.

अदृष्टसामग्री (adrṣṭa-sāmagrī) *f.* assemblage of unseen means अदृष्टसामग्रीजन्यत्वे अदृष्टत्वापत्तिरिति चेत् TattvCin. ii(2). 11. 11-12; तत्रादृष्टसामग्रीवैचित्र्यमेवानुमेयम् SarvaDaKau. 30. 22.

अदृष्टसामर्थ्य (adrṣṭa-sāmarthya) *n.* **i** unperceived power or efficacy उभयत्राप्यदृष्टसामर्थ्यं कल्पनीयम् TātpaṬ.(U.) 80. 22 (*on* 2. 147); कर्मणोऽदृष्टसामर्थ्यं यज्ज्ञानापनुन्मतम् BrĀraUBhVā. iii. 3. 97; **ii** power of destiny दिङ्मोहेऽदृष्टसामर्थ्याद्दिक्स्वरूपानवग्रहात् PrakaPañ. 58. 1; *adj.* whose power is not seen or observed सकृच्छ्रुतौ च पृथगर्थेष्वदृष्टसामर्थ्यानामर्थवत्ता च न सिध्यति PramāVāSvopVr. 85. 27; क्रमकरणे तु को विरोधो येन ··· अदृष्टसामर्थ्यस्य विभागस्य विभागहेतुत्वमाश्रीयते NyāyKa. 157. 7; न ते प्रेक्षावद्भिरदृष्टसामर्थ्यौषधिवत्प्रवर्त्यन्त इत्यप्रवृत्ताः JayaMa. 12. 8 (*on* 1. 2)

अदृष्टसामर्थ्यत्व (adrṣṭasāmarthya-tva) *n.* the state of one whose power is not seen सर्वे सर्वत्र विनियुज्यते न वा किंचित् क्वचित् अदृष्टसामर्थ्यत्वात् BrahmSi. 54. 11.

अदृष्टसामर्थ्यवैकल्य (adṛṣṭasāmarthya-vaikalya) *n.* deficiency of the power of unseen (fruit) पुस्तकपाठादिलब्धवेदार्थज्ञानस्येव शास्त्रविरोधाददृष्टसामर्थ्यवैकल्यं च S'rutaPra. ii. 77. 30 (*on* i. 3. 33)

अदृष्टसामानाधिकरण्य (adṛṣṭa-sāmānādhikaraṇya) *n.* coexistence with the unseen (effect) स्थैर्याभ्युपगमात्तत्राप्यदृष्टसामानाधिकरण्यमेवास्ति SāṅkhyaPraBh. 18. 28 (*on* 1. 33)

अदृष्टसाम्य (adṛṣṭa-sāmya) *n.* similarity with the unseen (effect) अदृष्टसाम्यप्रतिपादनार्थमिति यद्युच्येत BrahmSūBh.(S'aṅ.) 494. 10 (*on* ii. 4. 1)

अदृष्टसिद्धि (adṛṣṭa-siddhi) *f.* **A** attainment of the unseen (result or fruit) धर्मानकुर्वतः प्रत्यवायेनावश्यमेव भवितव्यं, कुर्वतस्तु न कदाचिददृष्टसिद्धिः ManuBh. ii. 310. 15 (*on* 9. 249); अस्तु तर्ह्यनिर्धारितरूपादृष्टसिद्धिः Kāśi. ii. 246. 17 (*on* 4. 105); पशुना यजेतेत्यादौ पशुनिष्ठताद्दृशैकत्वस्य विवक्षितत्वादनेकपशुकरणकयागात्रादृष्टसिद्धिः VyutpaVā. 16. 3; एकयजमानप्रकाशनेऽप्यदृष्टसिद्धेर्न बहुषूह इत्यर्थः MayūMāli. 595. 2 (*on* ix. 1. 13); **B i** establishment of the unseen thing दृष्टाददृष्टसिद्धिस्तवानुमानवादिन इतरथातिप्रसङ्गात् PrakaVi. 473. 19; **ii** establishment of the unseen (cause or effect) तदिह न निगमादन्यतोऽदृष्टसिद्धिः TattvMu. 5. 77; न च जीवत्सर्वशरीरे पतितं (रेतः) कार्यकरमतस्तत्प्रेरकेश्वरादृष्टसिद्धिः TattvPrakā. 10A. 9 (*on* i. 1. 3); तत्रादृष्टसामग्रीवैचित्र्यमेवानुमेयं कारणवैचित्र्यं विना कार्यवैचित्र्यासंभवात्, अतोऽदृष्टसिद्धिरिति SarvaDaKau. 30. 23.

अदृष्टसिद्ध्यर्थ (adṛṣṭa-siddhyartha) *adj.* which is meant for the attainment of unseen (fruit) नियमः पुनरदृष्टसिद्ध्यर्थस्य वचनमन्तरेण पाक्षिकी प्राप्तिः ManuBh. i. 228. 22 (*on* 3. 45)

अदृष्टसिध्यर्थम् (adṛṣṭasiddhy-artham) *adv.* for the sake of attaining unseen (fruit) हविर्विनाशेऽपि हविरन्तरमुत्पाद्यादृष्टसिद्ध्यर्थम् स्विष्टकृद्यागः कर्तव्यः NyāyRaMā. 146. 3.

अदृष्टसीमन् (adṛṣṭa-sīman) *adj.* the limits of which are not seen धुर्यं मर्यादावतामदृष्टसीम्नां च ··· अम्भोनिधिमपश्यम् TilaMañ. 122. 18.

अदृष्टसुखलेश (adṛṣṭa-sukhaleśa) *adj.* who has not experienced (even) a bit of happiness स्वामिनिर्वाणकल्याणान्निर्वाणो दुःखपावकः। अदृष्टसुखलेशानां नारकाणामपि क्षणम् TriṣaS'aPuC. i. 6. 493.

अदृष्टसुखवाञ्छा (adṛṣṭasukha-vāñchā) *f.* desire for unseen or unknown pleasure स प्राह वञ्चितासि त्वमदृष्टसुखवाञ्छया SamarāSam. 2. 165.

अदृष्टसुखेच्छा (adṛṣṭasukhecchā) *f.* desire for unseen or unknown pleasures हित्वा साक्षाद्भवसुखं तददृष्टसुखेच्छया। तपश्रिकीर्षुस्त्वमसि PariPar. 3. 147.

अदृष्टसुतवक्त्र (adṛṣṭa-sutavaktra) *adj.* who has not seen the face of a son वृथैव चावयोः प्रीतिरदृष्टसुतवक्त्रयोः TriṣaS'aPuC. iii. 3. 30.

अदृष्टसुधाकर (adṛṣṭa-sudhākara) *adj.* during which the moon was not seen सितपक्षस्य प्रतिपद्दिनेऽदृष्टसुधाकरे ··· सोऽगान्नृपतिसंनिधौ RatnaCūKa. 282.

अदृष्टसृष्ट (adṛṣṭa-sṛṣṭa) *adj.* produced by the unseen (cause) तद्यथा कार्यत्वाददृष्टसृष्टमङ्कुरादि मीमांसकः शंसति KhaṇḍanKhā. 1288. 10; विग्रहादिकं खल्वदृष्टसृष्टं तदानीमदृष्टाभावात्तन्न संभवेत् GoviBh. 319. 6 (*on* iv. 4. 10)

अदृष्टसेवक (adṛṣṭa-sevaka) *adj.* whose servants are not seen (i. e. have disappeared) अदृष्टसेवकाः साकं धरायास्तनयैः कृताः PadmP.(Ra.) 91. 37.

अदृष्टसैन्य (adṛṣṭa-sainya) *adj.* losing sight of the army एकदादृष्टसैन्योऽसावनुगच्छन्मृगं रुरुम् BṛNāraP. 9. 11; अदृष्टसैन्य एकाकी पीड्यमानः क्षुधा तृषा BṛNāraP. 21. 59.

अदृष्टसैन्यरजस् (adṛṣṭa-sainyarajas) *adj.* who had not seen the dust raised by the army अदृष्टसैन्यरजसामबाणस्पर्शवेदिनाम्। पश्यन् कीचकमित्राणां स जिह्वाय पलायनम् Yādavā. 22. 82.

अदृष्टस्पर्शवर्जित (adṛṣṭasparśa-varjita) *adj.* devoid of contact with the unseen (effect) अवघातादिविधयो नादृष्टस्पर्शवर्जिताः BrahmSi. 152. 10.

अदृष्टस्पृष्ट (adṛṣṭa-spṛṣṭa) *adj.* in contact with the unseen (merit and demerit) अदृष्टस्पृष्टोऽपि प्रसवितसुषुप्ताविव तदा समस्तो जीवात्मा कलयति न दुःखं न च सुखम् Vidvanmo. 4. 41.

अदृष्टस्मरसंताप (adṛṣṭa-smarasantāpa) *adj.* who has not felt the pangs of love अदृष्टस्मरसंतापः स्वस्थस्त्वं किं न जल्पसि KathāSaSāg. ix. 1. 203.

अदृष्टस्वभावत्व (adṛṣṭasvabhāva-tva) *n.* the state of having unseen nature नापि कार्यकारित्वं, तस्यादृष्टस्वभावत्वात् NyāySu.(Ja.) 109B. 6 (*on* i. 1. 3)

अदृष्टस्वरूप (adṛṣṭa-svarūpa) *adj.* **i** whose nature is not perceived सुधाकाराः प्रसुते भगवति विबुधैरप्यदृष्टस्वरूपाः ··· केशाः ViṣṇuPādāSt. 33. 46; तत्रादृष्टस्वरूपाय श्रुतपूर्वाय वै विभो। स्तुतिमब्रूत BhāgP. viii. 5. 25; **ii** of the form of unseen (effect) अदृष्टार्थत्वे ह्यदृष्टस्वरूपं तस्य फलत्वमुच्चारणे जननसामर्थ्यं च कल्पनीयम् MayūMāli. 16. 14 (*on* i. 2. 4); *n.* nature or form of the unseen लोकोऽदृष्टस्वरूपेण स्वर्गार्थत्वेऽप्यानर्थक्याभावात् ··· तदर्थत्वेऽपि नानर्थक्यमिति भावः MayūMāli. 578. 8 (*on* ix. 1. 3)

अदृष्टस्वरूपत्व (adṛṣṭasvarūpa-tva) *n.* the state of having the nature of the unseen जीवः पर्जन्यवद्दैवशक्तिमानीश्वरः स्मृतः। दैवशब्दोऽदृष्टस्वरूपत्वमाह NyāySu.(Ja.) 329B. 6 (*on* ii. 2. 2)

अदृष्टस्वर्गार्थ (adṛṣṭasvargārtha) *adj.* intended for the unseen heaven दृष्टार्थज्ञानार्थत्वमेव न त्वदृष्टस्वर्गार्थमिति ··· प्रपञ्चितम् MayūMāli. 7. 13 (*on* i. 2. 1)

अदृष्टस्वलक्षण (adṛṣṭa-svalakṣaṇa) *adj.* whose distinguishing nature is not observed कथं पुनरदृष्टस्वलक्षणे संबन्धिदर्शनम् Bṛha. 98. 3 (*on* i. 1. 5); अपरे पुनरदृष्टस्वलक्षणविषयं शक्तिक्रियानुमानं सामान्यतोदृष्टमुदाहरन्ति NyāyMañ. i. 121. 17; अदृष्टस्वलक्षणेऽपि क्रियाशक्त्यादौ सामान्यरूपेण संबन्धग्रहणादेवानुमोत्पत्तेः NayaVi. 128. 10 (*on* i. 1. 5); कथं पुनरदृष्टस्वलक्षणेन संबन्धदर्शनम् Kāśi. iii. 82. 6 (*on* 5(4). 138); अदृष्टस्वलक्षणविषयमप्यनुमानं क्रियादिविषयमस्ति S'āstrDī. 69. 8 (*on* i. 1. 5); नन्वदृष्टस्वलक्षणस्यापि कर्मणः संयोगविभागाभ्यामनुमानात् NyāyRa. 370. 20 (*on* 5(7). 75); अदृष्टस्वलक्षणे तु स्वरूपदर्शनाभावाद्युक्तमेव व्यावर्तकधर्मानुमानम् MānaMe. 243. 2.

अदृष्टस्ववेदन (adṛṣṭa-svavedana) *adj.* who has not experienced his own pain परव्यथां न जानाति यो ह्यदृष्टस्ववेदनः BṛKathāMañ. ix. 1. 701.

अदृष्टहन् (adṛṣṭa-hán) *adj.* slayer of unseen (vermins etc.) उत्पुरस्तात्सूर्य एति विश्वदृष्टो अदृष्टहा ṚV. i. 191. 8; AV. v. 23. 6.

अदृष्टहननी (adṛṣṭa-hananī) *adj.* (*f.*) destroying the invisible insect अदृष्टहननी वीरुद् असि भोज्या विषासहिः AV. (P.) v. 3. 4.

अदृष्टहरण (adṛṣṭa-haraṇa) *n.* taking away without being seen अधर्मैधर्ममूर्तीनामदृष्टहरणं तथा S'ukraNī. 4(5). 241.

अदृष्टहविःसंस्कार (adṛṣṭa-havissaṁskāra) *n.* consecration of an oblation productive of an unseen (effect) न चैवं दृष्टेनैव विधेश्चारितार्थ्याददृष्टहविःसंस्कारे मानाभाव इति वाच्यम् MayūMāli. 362. 13 (*on* iv. 1. 14)

अदृष्टहस्तिजातीय (adṛṣṭa-hastijātīya) *adj.* who has not seen the elephant-species कश्चिचादृष्टहस्तिजातीयो दृष्टतज्जातीयं प्रति ब्रवीति NyāyKu. 153. 7.

अदृष्टहानि (adṛṣṭa-hāni) *f.* loss of unseen (merit) यस्तु ऋणं नोपाकरोति तस्यादृष्टहानिः पुराणे दर्शिता SmṛtiCan. iv. 376. 12; न च पाणिनिसूत्रभेदे पारायणादावदृष्टहानिः LaS'abdeS'e. i. 12. 2.

अदृष्टहारिन् (adṛṣṭa-hārin) *adj.* attractive to him who has not seen it विद्याधरगणेन वारंवारमावेद्यमाननानाविधविशेषानवनितलजुषः पूर्वदृष्टानदृष्टहारिणस्तांस्तान्देशान् TilaMañ. 386. 12.

अदृष्टहास (adṛṣṭa-hāsa) *adj.* in which no smile was seen अदृष्टहासं व्यसनिरोधात्तस्याभवद्वेश्म सशोकमूकम् DarpDa. 2. 14.

अदृष्टहास्य (adṛṣṭa-hāsya) *n.* laughter from an unseen (source) योषितः ··· अदृष्टहास्यमाध्याय क्षपिष्यन्ति बलिं ततः SkandP. vi. 189. 17.

अदृष्टहिमद्युतिबिम्ब (adṛṣṭa-himadyutibimba) *adj.* in which the disc of the moon is not seen अदृष्टहिमद्युतिबिम्बम् ··· नभः।··· अभात् S'iśuVa. 9. 12; Subhāṣi. 1925.

अदृष्टहेतु (adṛṣṭa-hetu) *adj.* having an unseen or unknown cause अदृष्टहेतुरन्योऽप्यविशिष्टः संप्रतीयते PramāVār. 1. 246; अदृष्टहेतवोऽपि हि भावास्तदन्यैः ··· समुन्नीयन्ते PramāVārSvoVṛ. 81. 10; *m.* **1** cause in the form of unseen (merit) अदृष्टहेतूनामपि सर्वसाधारणत्वात्तेनापि न नियमः VedāntSā. (Rā.) 211. 4 (*on* ii. 3. 32); BrahmSūBh.(S'rī.) ii. 148. 4 (*on* ii. 3. 32); उपह्वानमशेषाणामुत स्यादेकपात्रिणाम्। अदृष्टहेतोराद्यः स्यात् NyāyMāVi. 176. 8 (*on* iii. 5. 17); **2** unseen cause न हि संनिहितहेतुपरित्यागेनादृष्टहेतुशङ्काधियमधिरोहति S'rutaPra. iB. 90. 25 (*on* i. 1. 1); **अदृष्टहेतोः** [Abl.] for the sake of unseen or uncertain result प्रसमीक्ष्य यायान्न नाशयेद् दृष्टमदृष्टहेतोः NītiSā. 16. 14.

अदृष्टहेतुक (adṛṣṭahetu-ka) *adj.* [*f.* -ā] **i** having unseen merit as the cause (रसः) कृत्स्नं शरीरम् ··· यापयति चादृष्टहेतुकेन कर्मणा SuśruS. i. 14. 3; i. 21. 10; अतोऽदृष्टहेतुकमेव स्वप्नादिज्ञानम् Bṛha. 72. 4 (*on* i. 1. 5); अदृष्टहेतुका ··· श्वासप्रश्वासलक्षणा प्रेक्षावतां क्रिया Bhām. 372. 16 (*on* ii. 1. 33); (संयोगः) न चादृष्टहेतुकः स्पर्शः ··· पुरुषाणां कर्तृत्वानभ्युपगमेनादृष्टासंभवात् NītiMā. 44. 14; अदृष्टहेतुकं परमाणुषु तदा हि कर्म जायते VedāntKau. 187. 9 (*on* ii. 2. 12); **ii** whose cause (in the form of the purpose in view) is

not seen न दृष्टः प्रयोजनोद्देशलक्षणो हेतुरस्या इत्यदृष्टहेतुका VedāntKa. 246. 3 (*on* ii. 1. 33); 328. 12 (*on* ii. 3. 43)

अदृष्टहेतुकत्व (adṛṣṭahetuka-tva) *n.* the state of having unseen (merit) as the cause अदृष्टहेतुकत्वस्य विवरणं प्रयोजनानुसन्धानमन्तरेण इति VedāntKa. 246. 4 (*on* ii. 1. 33)

अदृष्टहेतुता (adṛṣṭahetu-tā) *f.* the state of causality of the unseen merit आत्माश्रितादृष्टहेतुतासिद्धावपि शक्तिः कल्प्या NayaVi. 134. 6 (*on* i. 1. 5)

अदृष्टहेतुभूत (adṛṣṭahetu-bhūta) *adj.* having become the cause of unseen (merit) अदृष्टहेतुभूताभिसंध्यादिष्वपि···उपाधियुक्तं ब्रह्मैवेति न कश्चिद्विशेषः VedāntDī. 131. 12 (*on* ii. 3. 51); VedāntSā.(Rā.) 222. 1 (*on* ii. 3. 51); BrahmSūBh.(S'rī.) ii. 161. 14 (*on* ii. 3. 51)

अदृष्टांश (adṛṣṭāṁśa) *m.* part or portion of the unseen (fruit) शीतवातातुरस्येव नादृष्टांशस्तु हीयते BhaktiRa. 2. 48 (comm. अदृष्टांशः अदृष्टफलभागः)

अदृष्टाकर्षसंधान (a-dṛṣṭākarṣasandhāna) *adj.* whose drawing (of the bowstring) and (fixing the arrow) are not noticed विचिच्छेद स नाराचैः समं शस्त्राणि विद्विषाम् । अदृष्टाकर्षसंधानैश्चक्रीकृतशरासनः PadmP.(Ra.) 24. 114.

अदृष्टाकारा (adṛṣṭākārā) *adj.* (*f.*) sign or indication of whose willingness is not observed नासंस्तुतादृष्टाकारयोर्दूत्यमस्तीत्यौद्दालकिः KāmSū. 280. 23 (5. 4); JayaMa. 281. 3 (*on* 5. 4)

अदृष्टाकारान्तर (adṛṣṭākārāntara) *n.* another unseen form तस्य चैकस्यादृष्टाकारान्तराभावात् । तस्मान्नानवयवमनेकदेशे युगपदाधीयते PramāVāSvopVṛ. 50. 19.

अदृष्टाकृष्ट (adṛṣṭākṛṣṭa) *adj.* drawn near by the unseen (merit) भोगायतनानामपि तत्रत्यैरेव भूतैरदृष्टाकृष्टैरारंभः संभवति S'ivārkaMaDī. ii. 196. 34 (*on* iii. 1. 1)

अदृष्टाग्रह (adṛṣṭāgraha) *m.* insistence on destiny, fatalism चेष्टमानः क्रियाः सर्वाः प्राप्नोति न पुनः स्थितः । दृष्टैवं पौरुषीं शक्तिं को ह्यदृष्टाग्रहे ग्रहः YaśasCam. i. 379. 5.

अदृष्टाजनकत्व (adṛṣṭājanaka-tva) *n.* the state of being the non-producer of the unseen (merit) प्रतिबन्धकमन्त्रपाठस्यानिषिद्धत्वेनाविहितत्वेन चादृष्टाजनकत्वात् TattvCin. ii(2). 113. 12.

अदृष्टातप (adṛṣṭātapa) *adj.* under which the sun's heat is not felt मारुतिः । ददर्श शिंशपावृक्षम् ··· अदृष्टातपम् AdhyāRā. v. 2. 8.

अदृष्टातिशय (adṛṣṭātiśaya) *m.* excellence in the form of unseen (merit) तस्यैवादृष्टातिशयोत्पादनं संस्कारः TantrRa. 34. 5 (*on* iv. 1. 3); Bhāṭṭ-Cin. i. 96. 23 (*on* i. 1. 4)

अदृष्टात्मक (adṛṣṭātma-ka) *adj.* **1** who has not seen or realised the self मिथ्यावादविचारचिन्तनमहो कुर्वन्त्यदृष्टात्मका भ्रान्ता एव Prauḍhā. 13; **2** having unseen merit as its nature तस्य च वायोः स्वभावाद्वा अदृष्टात्मकेश्वरसंकल्पाद्वा स्वारसिकं तिर्यक्प्रसरणम् NyāySiA. 199. 5; वाजपेयादियज्ञाद्यो रसः सारो विकार उत्तमो विश्वनिदानतयादृष्टात्मकः संभृतः VīraMi. 868. 27 (*on* 3. 121); शब्दोच्चारणकार्यमपि यद्यदृष्टात्मकं स्यात् तदा तत्र नियमस्योपयोगः MayūMāli. 44. 1 (*on* i. 3. 9)

अदृष्टात्मतत्त्व (adṛṣṭātmatattva) *adj.* who has not perceived the (ultimate) reality of the self स्यादेतदश्चिरेवैनं ब्रह्मभावाय वक्ष्यति । अदृष्टात्मतत्त्वमपि तच्च नैवोपपद्यते BṛĀraUBhVā. i. 4. 1667.

अदृष्टात्मन् (adṛṣṭātman) *m.* nature of unseen merit (हविर्भोक्त्री) अदृष्टात्मना सूक्ष्मरूपाणि ··· सुनक्ति LalitāTriBh. 308. 4 (*on* 32)

अदृष्टादि (adṛṣṭādi) *adj.* unseen merit etc. निद्रादिदोषोपप्लुतं मनोऽदृष्टादिसमुद्बोधितसंस्कारविशेषसहकार्यनुरूपं मिथ्याविषयं ज्ञानमुत्पादयति PañcPā. 10. 18 (*on* i. 1. 0); अदृष्टादयो धर्माः प्रधानस्यापि संभाव्यन्ते BrahmSūBh.(Bhā.) 44. 22 (*on* i. 2. 19); विवादास्पदीभूतान्यदृष्टादीनि कस्यचित् प्रत्यक्षाणि NyāySā. 6. 16; इदं मया मत्सामर्थ्येन लब्धं नादृष्टादिना GītāBh.(Rā.) 611. 10 (*on* 16. 13); निमित्तकारणं सर्वेषामेवेश्वरेच्छादृष्टादीनि SaptaPa. 190 (55); अदृष्टादेः ··· कारणत्वापातात् KhaṇḍanKhā. 1229. 2; कस्यचित् प्रत्यक्षम् अदृष्टादि TarkSaṁ.(Ā.) 92. 24; 121. 8; अदृष्टादि निमित्तकारणम् TarkBhā.(Ke.) 62. 13; वेदस्याप्तप्रणीतत्वे मूलप्रमाणेन भाव्यम् ।··· न च तत्प्रत्यक्षम् । अदृष्टादौ तदप्रवेशात् TattvPrakā. 55A. 8 (*on* i. 3. 28); आत्ममनःसंयोगनाशादपि (कर्म) संस्कारादृष्टादीनां विनाशे बहु व्याकुलं स्यात् Upask. 344. 13 (*on* vii. 2. 21); अस्मदादेस्त्वदृष्टादिसाक्षात्कारासंभवान्न प्रेरकत्वम् SarvaDaKau. 122. 10; न च प्रकृतिधर्मा एव सन्त्वदृष्टादय इति वाच्यम् YogSā. 71. 8 (4); अदृष्टादौ साधारणकारणेऽतिव्याप्तिवारणाय असाधारणेति पदम् VedāntPari. 244. 2; ब्रह्मज्ञानान्येनादृष्टादिनेत्यर्थः LaCandr. 162. 28.

अदृष्टादिक (adṛṣṭādi-ka) *adj.* unseen merit etc. अदृष्टादिकं चात्र नियामकमध्यत्रसेयम् Kiraṇā. 19. 22; अन्यदप्यदृष्टादिकमपेक्ष्य भवन्ती जिज्ञासा यस्मिन् सति भवत्येव VedāntKa. 26. 17 (*on* i. 1. 1); न हि कुलालादयोऽपि सामग्र्यन्तरभूतमदृष्टादिकम् ··· साक्षात्कुर्वन्ति NyāyPari. 285. 12; अतस्तत्साध्यमदृष्टादिकमपि नास्ति SarvaDaSaṁ. 1. 104; नन्वदृष्टादिकं कस्यचित् प्रत्यक्षं दृष्टम् SarvaDaKau. 97. 13.

अदृष्टादिकारण (adṛṣṭādi-kāraṇa) *n.* cause like unseen force etc. नाभिव्यक्तिसंस्कारोद्बोधिका । किं त्वदृष्टादिकारणवशात्तदुद्बोधे सति प्रथमाभिव्यक्तिरेव प्रत्यभिज्ञानरूपा परिणमते TantrRaha. 24. 16; अदृष्टादिकारणसत्त्वात् LaCandr. 169. 6; चिच्छक्तिः···नादृष्टादिकारणाधीननानापरिणामविशेषवती S'ivārkaMaDī. i. 160. 21 (*on* i. 1. 3)

अदृष्टादिजन्या (adṛṣṭādi-janyā) *adj.* (*f.*) arising from the unseen (merit) etc. प्रलयकाले अदृष्टादिजन्यायाः कार्यावस्थायाः तत्कालसाधकश्रुत्यादिसिद्धत्वात् LaCandr. 161. 27.

अद्धाद् (addhād) *adj.* [w. r. for **अग्धाद्**] MānS'S. 93.10.

अद्धाद्धामिश्रिता (addhāddhā-miśritā) *adj.* (*f.*) (speech) which mixes up the different periods of time [JainL.]

अद्धानशन (addhānaśana) *n.* fast lasting from one day to six months [JainL.]

अद्धापथसंचरण (addhāpatha-sañcaraṇa) *n.* treading on the path of truth वृद्धा काचिदियमद्धापथसंचरणबद्धादरपरिशुद्धान्त:करणेव ··· समागच्छति RasSa. 98.(4)

अद्धापल्य (addhā-palya) *n.* number got by multiplying by a factor of hundred all pieces of hair of a *uddhārapalya* [JainL.]

अद्धापुरुष (addhā-puruṣa) *m.* a right or true man [PW.] cf. **अनद्धापुरुष.**

अद्धाबोधेय (addhābodheya) *m.* [w. r. for अद्धा:। बौधेयाश्च CaraṇaVyūha. 2, PW. MW.]

अद्धामिश्रिता (addhā-miśritā) *adj.* (*f.*) (speech) which confuses the time of day and night [JainL.]

अद्धायुस् (addhāyus) *n.* (*karman*) which determines a particular period of life अद्धाकाल: तत्प्रधानमायु: कर्मविशेषोऽद्धायु: SthānṬ. 67A.10.

अद्धारपल्य (addhāra-palya) *n.* name of a very high number अद्धारपल्यं च पुनस्तृतीयम् VarāṅgaC. 27.15; cf. **अद्धापल्य.**

अद्धासमय (addhā-samaya) *m.* present moment [JainL.]

अद्धासागरोपम *n.* number got by multiplying *addhāpalya* by crores of crores [JainL.]

अद्धिय (addhiya) *m.* name of a ritualist, son of Satyayajña इति ह स्माहाद्धिय: सात्ययज्ञिर्कद्रुकमस्मै स्वायां जनतायां भवति JaimiBr. 1.320.

अद्धिला (addhilā) *f.* one of the ten varieties of a *prabandha* (in music) अद्धिला दशमी BṛDeśī. 142.5.

अद्धोपकार (addhopakāra) *m.* spontaneous obligation, disinterested help अद्धोपकारश्च दृष्टकारणरहित उपकार: BālaKrī. i. 24.27 (*on* 1.7)

अद्ध्यालोहकर्ण (addhyāloha-kárṇa) *adj.* [PW suggets अद्धा, pw अध्या] (goat) having excessively red ears प्लीहाकर्ण: शुण्ठाकर्णोऽद्ध्यालोहकर्णस्ते त्वाष्ट्रा: VājaS. 24.4.

अद्न (adna) (*Gr.*) substitute (for negative *na*) एकादन्नाद्नौ S̄ākaṭāVyā. ii. 2.62 (comm. एकान्नविंशति:। एकाद्नविंशति:) [Vārāṇasī. 1971] cf. P. vi. 3.76.

[1]अद्भाव (ad-bhāva) *m.* existence of the substitute *ad*(*ḍ*) प्रयोजनं डतरादीनामद्भावे Vār. 5 *on* P. i. 1.27.

[2]अद्भाव (ad-bhāva) *m.* existence of the substitute *at* (in the personal ending of the medial) अद्भावे कृते रुट् न प्राप्नोति Pradī. vi.15.10 (*on* vii. 1.3)

[3]अद्भाव (ad-bhāva) *m.* change into the short vowel *a* इटोऽदित्यद्भावस्तु लिङ्संबन्धीडपेक्षणादन्तरङ्ग: Pradī. iii. 279A.26 (*on* iii. 4.79); नाद्भावनिपातनार्थमिदं वक्तव्यम् PariVṛ.(Sī.) 111.10.

अद्भुत (ádbhuta, adbhutá in ṚV. i. 120.4) *adj.* [*f.* -ā] [Mayr. 1.30, 3.627; Renou EVP. 13.128; Debru. p. 588; Uṇā. 5.1; अद्भुतम् ··· पञ्चविंशतिर्महन्नामानि Nigh. 3.3; Nir. 6.21; इदमपीतरदद्भुतमभूतमिव Nir. 1.6; included in *Kāṣṭhādigaṇa*] **A** extraordinary, supernatural, wonderful (gods, men etc.) **B** mysterious, incomprehensible, miraculous, unknown (objects, actions, intentions etc.) **C** undeceivable, inviolable **A** extraordinary, supernatural, wonderful (gods, men etc.) सदसस्पतिमद्भुतं प्रियमिन्द्रस्य काम्यम्। सनिं मेधामयासिषम् ṚV. i. 18.6; VājaS. 32.13; TaiĀ. x. 1.4 (767.3); ṚV. i. 94.12; शुचि: पावको अद्भुतो मध्वा यज्ञं मिमिक्षति ṚV. i. 142.3; प्रत्नो होता वरेण्य:। सहसस्पुत्रो अद्भुत: ṚV. ii. 7.6; TaiS. IV. i. 9.2; MaiS. ii. 7.7; VājaS. 11.70; ṚV. ii. 26.4; v. 10.2; त्वं हि सत्यो अद्भुतो दाता वाजस्य गोमत: ṚV. v. 23.2; TaiS. I. iii. 14.7; ṚV. vi. 8.3; शुचि: पावक उच्यते सो अद्भुत: ṚV. viii. 13.19; तव वायवृतस्पते त्वष्टुर्जामातरद्भुत। अवांस्या वृणीमहे ṚV. viii. 26.21; गन्धर्व इत्था पदमस्य रक्षति पाति देवानां जनिमान्यद्भुत: ṚV. ix. 83.4; ix. 95.4; शास इत्था महाँ अस्यमित्रखादो अद्भुत: ṚV. x. 152.1; द्यावापृथिवी उर्व१न्तरिक्षं क्षेत्रस्य पत्न्युरुगायोऽद्भुत: AV. ii. 12.1; त्वष्टा तुरीपो अद्भुत इन्द्राग्नी पुष्टिवर्धना VājaS. 21.20; अदृश्योऽहमवर्णोऽहमखण्डोऽहमस्म्यद्भुत: BrahmViU. 1.7; पुरा ··· आस्तां भगिन्यौ ··· अद्भुतेऽनघे MahāBhā. i. 14.5; अपश्यन् ··· नागमद्भुतम् MahāBhā. i. 40.2; i. 26.35; viii. 4.20; ददर्श वानरानीकमद्भुतम् Rāmā. vi. 53.46; विष्णुपत्नीयमद्भुता AhirbuS. 3.26; BrahmāṇḍP. iii. 41.47; देवी ··· भर्तुरद्भुतं गर्भमाजग्राह AvantiKa. 158.11; 161.15; जयति ··· वेदात्मा पुरुषोऽद्भुत: RāmC. 9.17; अद्भुतं दारकद्वयमादाय

भगवान् कौशिकः … सीरध्वजमुपस्थितः AnarghaRā. 3.1(7); अद्भुतम् … वीक्ष्यारान्मृगम् ĀścaCū. 3.12; EI. xi. 192.14; तमद्भुतं बालकम् … शङ्खगदायुधायुधम् । … वसुदेव ऐक्षत BhāgP. x. 3.9; मत्स्यं तमद्भुतं दृष्ट्वा विस्मितः प्राब्रवीन्मनुः । को भवान् ननु वै विष्णुः AgniP. 2.9; Vāgbhaṭā. 4.71; S'ivaP. ii(1). 17.57 (62A. 11); BrahmP. 35.19; BṛDharmaP. i. 56.46; अपुनर्भवमद्भुतम् । …मनस्येवं महादेवम् … चिन्तयेत् LiṅgaP. i. 8.104; i. 14.6; UdaySuKa. 77.30; रूपवत्यद्भुतास्तीति कान्ते त्वाज्यस्त्वया मदः SamaMā. 4.124; SubhāRaK. 16.52; SamudraMa. 1.35; नमामि … मञ्जुश्रियमद्भुतं शुभम् … हरिम् VetāPañ.(Jam.) 2.11; गोकुलाख्यं महत् पदम् … शोभितं शक्तिभिः … अद्भुताभिः समन्ततः BrahmS. 5.9; समये प्रसवस्यैषा सुषुवे सुतमद्भुतम् Samarā-Saṁ. 4.15; PrabhāC. 113.20; कौसल्या सुषुवे पुत्रमद्भुतम् AdhyāRā. i. 3.13; मम कविता … यं नाराधयति सोऽद्भुतः पुरुषः PurusPa. 148 (? 146). 21; MahāN. 3.92; MūkaPañ. 4.16; B mysterious, incomprehensible, miraculous, unknown (objects) अतो॒ विश्वा॒न्यद्भु॑ता चिकि॒त्वाँ अ॒भि प॑श्यति ṚV. i. 25.11; तत्रस्तु॑रीप॒मद्भु॑तं पु॒रु वारं॒ पुरु॒ त्मना॑ । त्वष्टा॒ पोषा॑य॒ वि ष्य॑तु ṚV. i. 142.10; AV. v. 27.10; TaiS. IV. i. 8.3; ṚV. i. 170.1; मि॒त्रो न भू॒दद्भु॑तस्य र॒थीः ṚV. i. 77.3; अर्हत्तहनुरद्भुतं न रजः ṚV. x. 105.7; नवमं पर्व निर्दिष्टमेतदद्भुतमर्थवत् MahāBhā. i. 2.175; (शङ्खम्) तथैकं रौक्ममद्भुतम् MahāBhā. vi. 9.8; ददर्श सा … रणाजिरं नृवीराणामद्भुतं लोमहर्षणम् MahāBhā. xi. 16.4; xiii. 14.27; अद्भुतं लोमहर्षणम् । ददृशुः सर्वभूतानि सागरे सेतुबन्धनम् Rāmā. vi. 15.24; निदर्शनं ते पर्याप्तं जनस्थाने यदद्भुतम् Rāmā. vi. 25.21; विमानं हंससंयुक्तम् … आसीद् वेधसोऽद्भुतम् MārkP. 85.48; प्रासादः … शौद्धोदनेरद्भुतः EI. xx. 43.9; PāraS. 20.56; अस्ति वा कुतश्चिदेवंभूतमद्भुतम् … महाप्रकरणम् MālaMā. 10.186; AnarghaRā. 3.32; किं तदस्ति नाम रमणीयमद्भुतं वा जगति TilaMañ. 219.19; अद्भुतं धनुः KūrmaP. 231.16 (1.21); SkandP. ii(9). 16.42; मध्ये विलावृतो वर्षो भद्रास्यः पूर्वतोऽद्भुतः VāmaP. 13.3; अद्भुता क्षतजसिन्धुः DevīBhāP. iii. 15.7; अद्भुतानि … वक्त्राणि GaṇeP. ii. 11.30; TrisaS'aPuC. i. 4.182; ग्रीवाद्भुतैवावटुशोभितापि NaisC. 7.66; अशरणशरणाभ्यामद्भुताभ्यां पदाभ्याम् … आयाति देवः KrsnaKa. 1.81; SāhiDa. 616.3; तं राज्ञः प्रतिमापट्टमद्भुतम् । अपश्यमहम् BṛKathāMañ. i. 2.157; क्रीडास्थलम् … अद्भुतम् PañcRā.(Nā.) i. 7.39; अविचलं राज्यं प्रशास्त्यद्भुतम् EI. xxiii. 187.3; SātvaT. 2.25; PrabaCin. 63.2; कस्य हृन् न हरतीह हरे मुखपद्मकला तवाद्भुता ChandoMa. 4.6; HammīMaKā. 1.92; रचितोऽप्यद्भुतः पूर्वं ग्रन्थो देवमुखोद्गतः KathāKau. 1.39; HariVi. 5.87; दिव्यरत्नत्रयमद्भुतम् VetāPañ.(Jam.) 110.21; सुन्दरं कमलं भाति लतायामिदमद्भुतम् RasGaṅ. 301.16; अद्भुतं किमपि द्वन्द्वमस्तु तन् मम शर्मणे Gaṅgāva. 1.1; S'ivLī. 10.51; सर्वमद्भुतमज्ञानां जानतां तु न किंचन SubhāS'. 10; (actions, intentions, etc.) अ॒तस्त्वं दृ॑श्याँ अ॒ग्न ए॒तान् प॒ड्भिः प॑श्ये॒रद्भु॑ताँ अ॒र्य एवैः ṚV. iv. 2.12; आदि॑त्या अद्भु॑तैनसः ṚV. viii. 67.7; v. 87.7; उच्चानुदात्तयोर्योगे स्वरितः स्वार उच्यते, ऐक्यं तत् प्रचयः प्रोक्तः सन्निवेशो मिथोऽद्भुतः YājñaS'i. 228; शङ्खी शुश्राव तं तदा … स्थितं कर्मण्यथाद्भुते MahāBhā. iii. 43.12; अद्भुतम् … हस्तलाघवम् MahāBhā. vi. 98.16; अनतिक्रमणीयोऽयं कृतान्तस्याद्भुतो विधिः MahāBhā. vii. 62.3; गदायुद्धम् … अद्भुतम् MahāBhā. ix. 31.28; योगो भवतु मेऽद्भुतः MahāBhā. xiii. 14.59; प्रीतिरुत्पादिताद्भुता Rāmā. v. 32.7; अद्भुतं घोरं युद्धम् Rāmā. vi. 42.9; अद्भुतश्च विचित्रश्च तेषामासीत् समागमः Rāmā. vi. 31.39; वीर्यमद्भुतमेव च Rāmā. vii. 40.14; प्रयाणं बहुदेवमद्भुतम् … तस्य महात्मनः BuddhaC. 8.50; तदद्भुतं संसदि रात्रिवृत्तम् … नृपतिः शशंस RaghuVa. 16.24; तदद्भुतं शैलमिवार्कमण्डले PañcT. 4.10 (379.11); Jānāśra. 1.0(4); यच्चैवं भावि नान्यदतः परमस्ति किंचिदद्भुतम् DaśKuC. 76.9; PadmP.(Ra.) 81.22; वैष्णवं स्तोत्रमद्भुतम् PāraS. 17.452; अद्भुतं च … चरितं निबद्धम् MahāviC. 1.6; 1.40; °कौतुकमद्भुतं प्रमोदमुल्लासयति MālaMā. 2.113; हा हा धिक् परगृहवासदूषणं यद् वैदेह्याः प्रशमितमद्भुतैरुपायैः UttaRāC. 1.40; तेजोऽद्भुतम् AnarghaRā. 4.7; NītlSā. 5.39; ParaS. 25.28; तव तत्त्वमद्भुतम् HarVi. 6.39; RāmC. 35.114; अद्भुतं जन्म यस्याः BālBhā. 2.37; त्रिधा मार्गोऽयमद्भुतः LaksmīT. 2.39; सतां चरितमद्भुतम् EI. x. 21.8; x. 23.20; BhāgP. i. 11.20; अद्भुतः …प्रावृट्कालः VāmaP. 1.15; अस्य नाम … अद्भुतामेकपदे पृथक्कताम् अगादनङ्गस्य NavaSāC. 4.36; यदद्भुतं सितमवत्यीशेन तद् वश्चिरम् EI. iii. 297.3; प्रेमाद्भुतम् DevīBhāP. i. 4.8; अद्भुतमिदं तव दर्शनं वै DevīBhāP. iii. 23.47; अद्भुतस्तस्य वै शोकः BṛDharmaP. i. 25.62; i. 38.69; भाषितमाकर्ण्य … कीरस्य … अद्भुतम् … प्राह … देवी KalkiP. i. 6.12; महत्त्वमद्भुतम् UdaySuKa. 129.18; श्रुत्वा … अद्भुतां कथाम् BṛKathāMañ. ii. 1.138; KalāVi. 4.18; KathāSaSāg. v. 2.157; DaśāvaC. 1.59; अद्भुतमस्त्रकौशलम् VikraDeC. 2.20; 5.46; 6.53; दानमद्भुतम् EI. xiv. 302.43; i. 308.13; अद्भुतम् … यशः EI. i. 356.18; SubhāRaK. 32.5; तन्त्रमद्भुतमहो मनोभुवः S'riKaC. 10.27; VairāS'.(Pa.) 21; भालमत्राद्भुता तव Vāgbhaṭā. 1.25; राज्यकालोऽस्य भूपतेः । …अद्भुतोऽभवत् RājTa.(Ka.) 3.15; 6.295; सर्वास्विह क्रपाद्भुता Vītarā. 10.8; ज्योतिष्काश्च तन्वन्त्युद्योतमद्भुतम् TrisaS'aPuC. i. 1.234; रमणीयकमद्भुतम् TrisaS'aPuC. ii. 1.5; ii. 2.535; तपः सामर्थ्यमद्भुतम् PariPar. 1.69; 12.237; कृतम् … ब्रह्मव्रतमद्भुतम् PāṇḍaC. 1.223; 2.194; अद्भुताः … शम्भोर्दृशः पान्तु वः SaduktiKa. 12.10; अद्भुतं तपः Sutrath. 3.66; परमाणोरणोर्नास्ति महत्त्वेत्यद्भुतं वचः AnuVyā. 26B 3 (on 2.2); सुराः । … चक्रुरुत्सवमद्भुतम् PrabhāC. 6.17; 11.28; 21.18; 36 4; 37.13; अयं दानमहाधर्मः कल्पद्रुम इवाद्भुतः S'āliC. 7.157; 7.93; अद्भुतं क्रीडितकम् … हरेः Yādavā. 11.1; अद्भुतमध्यसितं च धीराणाम् S'ārṅgaPa. 226; श्रुतमद्भुतम् … मतम् S'aṅkaVi.(Ā.) 128.9; KumāCaSaṁ. 5.15; गिरं समुद्गिरन् मुरारिरद्भुताम् … करोतु यः कृतार्थताम् ChandoMa. 2.377; अद्भुतेयं प्रगल्भता HariC. 103; नृत्यमद्भुतम् PālGoKa. 20; अद्भुतं दुर्भिक्षं क्षोभयामास लोकम् RājTa.(Jo.) 412; RatnaCūKa. 247; अद्भुतं समभवत्सकलाशामण्डलं नवयशस्तुहिनाभम् EI. xxi. 281.3; विज्ञानामृतमद्भुतम् PraboSu. 247; VīraBhā. 4.36; अद्भुतः … दानमन्त्रः S'ivLī. 12.8; 17.87; प्रवृत्ते कोऽप्यद्भुतो मारुतः NīlaVi. 90.2; रचना चित्राद्भुतासीत् ParamāKā. 18.130; 13.91; यशःपटोऽयमद्भुतो न ते महीप कञ्चुकः SūktiSu. 42; PadyāTa. 48; युनक्त्युमानन्दनाथो यौवनोल्लासमद्भुतम् NityoNi. 29.3; TantrRā. 13.82; विधातुर्वर्ण्यते केन करकौशलमद्भुतम् VasaTi. 42.19; C undeceivable, inviolable [from *dabh*-?] त्वं रा॑जे॒व सु॑व्र॒तो गिर॒ः सोमा॑ विवे॑शिथ । पु॒ना॒नो व॑ह्ने अद्भुत ṚV. ix. 20.5; ix. 24.6; अधा॑ हि का॒व्या॑ यु॒वं दक्ष॑स्य पू॒र्भिर॑द्भुता । नि केतु॒ना जना॑नां चि॒केथे॑ ṚV. v. 66.4.

अद्भुत (adbhuta) *n.* (*m.* अद्भुतो व्याख्यातः BaudhGS. iii. 6.2; AgniveGS. ii. 5.2 (79.15)); A portent, omen, unusual phenomenon or event portending evil or rarely good B wonder, marvel, miracle, mystery, surprise, strange object C feeling or sentiment of wonder or surprise D i mysterious or esoteric teaching ii transcendental or mystic element E i names of one of the 12 *aṅgas* or divisions of the Buddhist canon ii kind of poetic composition F name of a kind of defect in shampooing or massaging G name of one of the 84 modes of sexual union H i a proportion of the height of a building ii name of a class of buildings A portent, omen, unusual phenomenon or event portending evil or rarely good अथ यदास्य … गजवाजिमुख्याः वाप्रमीया प्रमीयन्त इत्येवमादीनि सर्वाणीन्द्रदेवत्यान्यद्भुतानि प्रायश्चित्तानि भवन्ति ṢadviBr. vi. 3.2; (with कर्मन्) अथातोऽद्भुतानां कर्मणां शान्तिं व्याख्यास्यामः ṢadviBr. vi. 1.1; vi. 4.2; vi. 5.2; vi. 6.2; vi. 7.2; vi. 8.2; vi. 9.2; vi. 10.2; vi. 11.2; अद्भुते यवद्रोणं जुहुयाद्वात आ वातु भेषजमित्येतेन शाम्यति ह SāmaViBr. iii. 5.8; उत्पातेष्वाकालम् । अन्येष्वद्भुतेषु च S'āṅkhāGS. iv. 7.3; v. 5.5; KauśiGS. iii. 9.3; समुपहतेऽद्भुते वा शान्त्यै शर्मी शमुकं शाम्यवाकमश्वत्थप्लक्षन्यग्रोधोदुम्बरं दूर्वां च … सं वः सृजामीति द्वाभ्याम् KāthGS. v. 18.1; MānGS. ii. 15.6; GobhiGS. iii. 3.30; अन्येषु चाद्भुतोत्पातेष्वहोरात्रमनध्यायोऽन्यत्र मानसात् BaudhDS. i. 11.38; अद्भुतानि च दृश्यन्ते AVPari. 50(4).1; अथर्वा सृजते घोरमद्भुतं शमयेत् तथा AVPari. 2(2).2; तस्य प्रयाणे यान्यासन्नद्भुतानि महात्मनः । तानि मे शृणु दिव्यानि दैवान्यौत्पातिकानि च MahāBhā. v. 82.4; ववर्ष चात्र पर्जन्यो मांसशोणितवृष्टिमान् । … तदद्भुतमिवाभवत् MahāBhā. vi. 1.21; iii. 124.7; आकालिकमनध्यायं विद्यात् सर्वाद्भुतेषु च ManuSm. 4.118; अद्भुते तु समुत्पन्ने यदि वृष्टिः शिवा भवेत् । सप्ताहाभ्यन्तरे ज्ञेयमद्भुतं निष्फलं भवेत् MatsyaP. 229.10; 68.36; 93.84; BṛSaṁ. 32.30; अद्भुतानां च शान्तये … प्रायश्चित्तं निगद्यते ĪśānS'iPa. ii. 63.1; अभूतपूर्वं यल्लोकस्य पूर्वं भवति पूर्वं च यदन्यथा भवति तदद्भुतम् । … तच्च द्विविधम् । शुभसूचकमशुभसूचकं च AdbhuSāg. 4 21; 3.14; VasiS. 32.17; CaturCin. iii(2). 762.10; SmṛtiCan. i. 150.4; VīraMi. (Saṁskāra.) 531.3; (with निमित्त) अद्भुतेषु निमित्तेषु मासं नीत्वा शुभे व्रजेत् S'ilpaRa. ii. 1.20; B wonder, marvel, miracle, mystery, surprise, strange object चेतनारहितं काष्ठं यत्नेन निपातितम् । … तत्र किं कृतमद्भुतम् MahāBhā. ii. 38.8; तत्राद्भुतं परं चक्रे कौन्तेयः कृष्णसारथिः MahāBhā. vii. 80.34; तदद्भुतमिवाभवत् MahāBhā. i. 1.77 = iii. 20.11 = vi. 49.29 = xiv. 75.15 = KūrmaP. 246.15 (1.22); MahāBhā. xvi. 8.41; राघवः … समीपे शरभङ्गस्य ददर्श महदद्भुतम् Rāmā. iii. 4.4; vii. 97.17; Vār. 1 on P. vi. 1.147; दर्शयेदद्भुतान्यस्य (= उन्मादार्तस्य) SuśruS. vi. 62.17; CaraS. vi. 9.79 (1941 Ed.); i. 11.37; अद्भुतं खलु वृत्तम् S'āk. 5.30 (15); दोषैरन्यजनाश्रितैरपटवो जाताः स इत्यद्भुतम् S'atTrayī. 851; AmaS'. 34 = SaraKaṇṭhā. 330.23 = SāhiDa. 593.2 = AlaṅkāS'e. 13.0 (75); AlaṅkāSa. 130.8; Tantrākhyā. 116.12; महीक्षिताम् । अद्भुतानि च चत्वारि बलं धर्मः सुखं धनम् VāyuP. i. 57.74; पदे पदे तथा भूमिर्वेन्न शीर्णा तदद्भुतम् ViṣṇuP. v. 20.64; MārkP. 8.128; BrahmāṇḍP. ii. 13.59; किं नाम नालोक्यते जीवद्भिरद्भुतं येन रूपमचिन्तितोपनतमिदं

दृक्पथमुपगतम् HarṣaC. 319. 12; PriyaDa. 2. 7; S'iśuVa. 15. 38; राक्षसकर्म कुर्यादार्या सती कथमहो महदद्भुतं नः MahāviC. 4. 50; खलः खलीकरोत्येव जगदाशु तदद्भुतम् MahāP. 1. 90; अयुगार्चिरर्चिरुग्रं यदीरयति तत्र किमद्भुतं स्यात् HarVi. 16. 4; SaṁkṣeS'ā. 3. 253 (ii. 296. 14); संसर्गेण गुणा अपि भवन्ति दोषास्तदद्भुतं नैव YaśasCam. i. 113. 5; अहो अद्भुतमेतन्मे व्यापृतस्यापि नित्यदा। न ह्येधन्ते प्रजा नूनम् BhāgP. iii. 12. 50; विस्मयोऽद्भुतमाश्चर्यं चित्रम् AgniP. 359. 79; निधेराधारमात्रेण मही ज्वलति सर्वदा। तमेव मानवो भृत्वा ज्वलतीति किमद्भुतम् BṛNāraP. 8. 107; TilaMañ. 205. 14; यदि दहत्यनलोऽत्र किमद्भुतम् KāvyPra. 393. 4 = AlaṅkāRa. 16 (13); अद्भुतं त्वत्प्रभावेण स्वयमेतत् प्रदर्शितम् RāmāMañ. 408. 17; तनोति कुमुदं यशः सदृशमस्य चन्द्रो[ज्]ज्वलं सितं किमथ रञ्जकं भ्रमदनारतं किं स्थिरं सकारणमिदञ्च सत् किमिव नित्यमित्यद्भुतम् EI. xix. 281. 21; S'riKaC. 8. 18; स आनर्च्छ बहून् देशानदर्शीच्चाद्भुतानि सः DvyāśraKā. 9. 90; नो वाद्भुतमुलूकस्य प्रकृत्या क्लिष्टचेतसः। स्वच्छा अपि तमस्त्वेन भासन्ते भास्वतः कराः PrabhāC. 59. 23; ViviTīKa. 72. 5; YudhiVi. 5. 11; ईश्वराः पिशुनाञ् शश्वत् पुष्णन्तीति किमद्भुतम् DṛṣṭāKaS'. 18; एकस्तत्र भिनत्ति मित्रमपरश्चामित्रमित्यद्भुतम् Subhāṣi. 2526; HammīMaKā. 13. 58; शङ्खाद् वीणानिनादोऽयमुदेति महदद्भुतम् Kuval. 80 = RasGaṅ. 581. 20; CaitaCa. 17. 7 (1); अर्थवन्तः प्रशस्यन्ते निन्द्यन्ते तद्विनाकृताः। आगमेष्वपि चेदेवमद्भुतं किं शरीरिषु SabhāS'. 86; S'ivLī. 2. 39; PadyaVe. 564; MadaKeC. 14 (3); **C** feeling or sentiment of wonder or surprise रतिहासशोकाद्भुतान्यदिव्योत्तमप्रकृतिवद् दिव्येष्वपि KāvyPra. 443. 1; Kāvyānu. (He.) 148. 3; यद् भवद्भिरनुभूतमद्भुतं तन्माद्य ... निवेद्यताम् Nalābhyu. 3. 23; **D i** mysterious or esoteric teaching नारदाद्भुतमेतच्च कथनीयं न हि क्वचित् ĀdiP. 9. 36; साध्यजीवाद्यानयनं शृणु वक्ष्यामि तेऽद्भुतम् TantrRā. 13. 82; **D ii** transcendental or mystic element अष्टदलात्मकं पद्मम्। तदुपरि प्रकृष्टविज्ञानधामा शेषः। तदुपरि वाचः परमद्भुतम्। एवं नित्यविभूतिर्निरूपिता YatīndraDī. 55. 14; **E i** name of one of the 12 *aṅgas* or divisions of the Buddhist canon (= अद्भुतधर्म, q. v.) (dealing with miraculous events) इतिवृत्तकं जातकमद्भुतं च SaddhaPuṇ. 30. 8; **E ii** a kind of poetic composition showing apparent verbal identity in spite of the vast difference as regards gender and case लिङ्गविभक्तीनां सति भेदे महत्यपि। दृश्यते शब्दसादृश्यमिदमद्भुतमुच्यते KāvyKaVṛ. 76. 15 (3. 4); **F** name of a kind of defect in shampooing or massaging संवाहनकला द्वेधा ... दोषास्तस्याः प्रतीपं (प्रतीपं?) यल्लोम्नामुद्वर्तनं तथा। निर्मांसपीडितं वाढं केशाकर्षणमद्भुतम्। भ्रष्टप्राप्तममार्गेण प्रघातमतिभुग्नकम् PadmP. (Ra.) 24. 77; **G** name of one of the 84 modes of sexual union वक्ष्ये गौरीप्रियं च कान्दर्पं हास्यमद्भुतमेव च ... एतानि चतुरशीति बन्धानि S'ṛṅgāDī. 3. 25; **H i** one of the five proportions of the measurement of the height (of a building) where the height is twice the breadth पञ्चधोत्सेधम् ... तद् द्विगुणं चाद्भुतं कथितम् MānaSā. 11. 12; विस्तारं (? र) द्विगुणोदयम्।... पञ्चमं चाद्भू(? द्भु)तोत्सेधम् MānaSā. 35. 13; शान्तिकं पौष्टिकं जयदं चाद्भुतमुत्तुङ्गं सार्वकामिकम् MānaSā. 11. 39; MayaMa. 11. 9; 19. 3; S'ilpaRa. i. 16. 9; **H ii** name of a class of buildings (having the height called Adbhuta) द्व्यंशं गलमानं तु वेदांशं शिखरोदयम्। सार्धांशेन शिखामानमद्भुतं सदनं स्मृतम् MānaSā. App. 424A. 8; SamarāSū. 23. 35; शान्तिकं पौष्टिकं चैव जयदं त्वद्भुतं पुनः। सार्वकामिकमित्येवं पञ्चधा सदनं स्मृतम् S'ilpaRa. i. 37. 1.

अद्भुत (adbhuta) *m.* **i** epithet of Viṣṇu **ii** name of several Agnis **iii** name of a particular Indra **iv** name of a Lekha deity **v** name of a Brahmin **vi** name of the poetic sentiment Marvellous **vii** feeling of wonder **viii** name of a part of Sāman; **i** one of the thousand names or epithets of Viṣṇu अनन्तो हुतभुग् भोक्ता ... लोकाधिष्ठानमद्भुतं (v. l. °तः) (केशवस्य ... नाम्नां सहस्रम्) MahāBhā. xiii. 135. 108; **ii** name of several Agnis (sometimes identified with Viśvadeva, Sahita fire, son of Savana or Sahasa or Dahana, father of Kārttikeya, Vivici / Vividhi, Vidūratha and Devāṁśa) अद्भुतस्य प्रिया भार्या तस्याः पुत्रो विदूरथः MahāBhā. iii. 212. 25; शृणु जन्म ... कार्त्तिकेयस्य धीमतः। अद्भुतस्याद्भुतं पुत्रं प्रवक्ष्याम्यमितौजसम् MahāBhā. iii. 213. 2; iii. 212. 28; पुत्रोऽस्य (दहनस्य) सहितो ह्यग्निरद्भुतः स महायशाः।... अद्भुतस्य सुतो वीरो देवांशस्तु महान् स्मृतः MatsyaP. 51. 35; पुत्रश्च सवनस्याग्नेरद्भुतः स महायशाः। विविचिस्त्वद्भुतस्यापि पुत्रोऽग्नेः VāyuP. i. 29. 38; पुत्रश्च सहसस्याग्नेरद्भुतः स महायशाः। विविधिश्चाद्भुतस्यापि पुत्रोऽग्नेः BrahmāṇḍP. i. 12. 41; वैश्वदेवाग्निरद्भुतः Vaija. 11. 27; नाद्भुतो वैश्वदेवाग्नौ NānārthāSaṁ. ii. 51. 56; **iii** name of an Indra or king of gods (said to flourish in the 9th Manvantara under Dakṣa-Sāvarṇi / Meru Sāvarṇi; regarded as the second of the future (out of 7 past and 7 future) Indras) नवमो दक्षसावर्णिर्भविष्यति मुने मनुः।... (देवानाम्) तेषामिन्द्रो महावीर्यो भविष्यत्यद्भुतो द्विज ViṣṇuP. iii. 2. 22; MārkP. 94. 7; (दक्षपुत्रस्य मेरुसावर्णेः मन्वन्तरे) तेषामिन्द्रस्तदा भाव्यो अद्भुतो नाम नामतः VāyuP. ii. 38. 65; BrahmāṇḍP. iii. 1. 61; AgniP. 150. 14; विभुर्मनोजवश्चैव ...। अद्भुतश्च तथा शान्तिः ...। ऋतधामा च देवेन्द्रः... चतुर्दश NīlaP. 572; BṛNāraP. 37. 100; NaraP. 24. 0 (62. 11); इन्द्रस्तु ... बलिर्भाव्यस्ततः परम्। अद्भुतस्त्रिदिवश्चैव BhaviP. 186B. 4 (i. 125. 25); KalpaK. 441. 22; **iv** name of one of the eight Lekha deities मनोजवः प्रघासस्तु ... अद्भुतश्चैव वीर्यवान् ... लेखाः संपरिकीर्तिताः VāyuP. ii. 1. 64; **v** name of a Brahmin वृद्धिस्वा[मिने] द्विरंश[:]। दिवाकर-हरि-अद्भुत-त्वष्ट्र-तोष-नागेभ्यो अंश[:] EI. xix. 247 19; **vi** name of one of the 8 (or 9) *rasas* or sentiments (the sentiment of wonder or marvel) (with or without the word *rasa* in the passages) आर्षं रामायणं काव्यमिदं तावन्मया कृतम्।... करुणाद्भुतशान्तैश्च युक्तं काव्यरसैरपि Rāmā. i. 203 *(16); वीरस्यापि च यत् कर्म सोऽद्भुतः परिकीर्तितः NāṭyaS'ā. 6. 46; अद्भुतो ब्रह्मदैवतः NāṭyaS'ā. 6. 50 = BhāvPra. (S'ā.) 68. 4 (3); स्वरौ ...। षड्जर्षभौ तथा चैव वीररौद्राद्भुतेष्वथ NāṭyaS'ā. 17. 104; 6. 102; 8. 163; 18. 43; AhirbuS. 54. 12; शृङ्गारवीरकरुणाद्भुतहास्यभयानकाः। बीभत्सरौद्रौ च रसाः AmaK. 395; शृङ्गारहास्यकारुण्यवीराद्भुतभयानकाः। रौद्रवी(बी)भत्सशान्ताश्च रसास्तत्र नवोदिताः PadmP. (Ra.) 24. 22; Kāvyāda. 2. 287; S'ṛṅgāTi. (Ru.) 1. 9; 3. 28; स्यादेष विस्मयात्मा रसोऽद्भुतो विस्मयोऽप्यसंभाव्यात् Kāvyālaṅ. (Ru.) 15. 9; अतिलोकैः पदार्थैः स्याद् विस्मयात्मा रसोऽद्भुतः।... हर्षावेगधृतिप्राया भवन्ति व्यभिचारिणः DaśRū. 4. 78; कुर्यान्निर्वहणेऽद्भुतम् DaśRū. 3. 34; 4. 44; AvaLo. 109. 4 (*on* 4. 78); AgniP. 336. 20; 359. 77; ViṣṇuDhaP. iii. 30. 1; SaraKaṇṭhā. 595. 8; वीरस्य पर्यन्तेऽद्भुतः फलमित्यनन्तरं तदुपादानम् AbhinBhā. i. 267. 18 (*on* 6. 15) = Kāvyānu. (He.) 81. 13; AbhinBhā. i. 337. 13 (*on* 6. 83); वीराद्भुतयोः ... न विभावविरोधः Loc. 162. 13 (*on* 3. 19); 172. 13 (*on* 3. 24); रौद्रदीनाद्भुतत्रासबीभत्सकरुणा रसाः। न प्राणिषु प्रयोक्तव्याः SamarāSū. 34. 11; सोऽभवद् रत्नहरिणः ... रसो मूर्त इवाद्भुतः RāmāMañ. 138. 8; Vaija. 142. 77; शृङ्गारवीररौद्राश्च कृता(? करुणा)द्भुतभयानकाः। बीभत्सहास्यसंयुक्ता रसाः स्युः कुकुटाह्वे Mānaso. iv. 7. 1169; iv. 2. 172 (? 372) (2. 186); AbhidhāCin. 595; NāṭyaDa. 169. 19 (121); वीरे रौद्रेऽद्भुते रसे। विनियुक्तः ... षड्जग्रामाभिधो बुधैः (रागः) SaṁgīRa. ii. 27. 5 (ii. 2. 22); i. 96. 15 (i. 3. 59); SaṁgīMa. i. 1. 47; व्याघ्रादयो विभावा भयानकस्येव वीराद्भुतरौद्राणाम् KāvyaPra. 95. 4; दिव्यदर्शनादिविभावो नयनविस्ताराद्यनुभावो हर्षादिव्यभिचारी विस्मयोऽद्भुतः Kāvyānu. (He.) 95. 14; 79. 5; 81. 6; विस्मयात्माद्भुतो ज्ञेयः स चासंभाव्यवस्तुनः। दर्शनाच्छ्रवणाद् वापि Vāgbhaṭā. 5. 25; 5. 3; वर्णानाम् ... मध्यमानां हास्यभयाद्भुतशान्तेषु (परिपोषकत्वम्) AlaṅkāRa. 4 (6); PrasaRā. 4. 14; शृङ्गारादौ चमत्कारदर्शनात् ... मनोविकृतिः ... प्राधान्येन यत्र भासते तत्राद्भुत एव रसः RasTa. 28. 8; 157. 3; अद्भुतः कर्म वीरस्य NāṭaLaRaK. 1865; मध्यमौ वीराद्भुतौ भारतीसात्त्वतीविषयौ पाञ्चालरीतिभाजौ NāṭaLaRaK. 1973; 1957; तर्कौ विबुधश्चिन्ता च रोमाञ्चः स्तम्भवेपथू। स्वेदश्चेत्यद्भुते भावाः BhāvPra. (S'ā.) 33. 22 (2); 55. 11 (3); Ekāva. 3. 1 (87) (96. 7); RasāSu. 86. 16 (1. 287); PratāYaBhū. 221. 6; अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः। पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् SāhiDa. 191. 4; कार्यो निर्वहणेऽद्भुतः SāhiDa. 274. 2; 168. 6; BhaktiRaSi. ii. 5. 97; न कश्चिद् (? कंचिद्) द्रष्टि चाद्भुतः AlaṅkāS'e. 20. 30; 20. 1; 20. 25; RasGaṅ. 36. 2; 57. 12; AlaṅkāMañ. 226. 13; **vii** the feeling of wonder हर्षशोकाद्भुतास्तस्मात् सहसान्तः समुत्थिताः BṛKathāMañ. xiii. 1. 97; केचित्पुनर्निपाताः क्रोधाद्भुतशोकादीन् भावान् प्रदीपवत् वक्तृगतानेवाद्योतयन्ति न वाच्यगतान् VyaktiVi. 136. 24; **viii** name of the sixth or penultimate part (in a sevenfold division) of a Sāman (cf. **उपद्रव**) दिश सामानि वै तात ... पञ्चमः परिहारोऽत्र षष्ठमाहुस्तमद्भुतम्। निधनं सप्तमं साम्नां साप्तविध्यमिति स्मृतम् BhaviP. 306A. 20 (i. 211. 23)

अद्भुतक (adbhuta-ka) *n.* wonder प्रतिपत्तयस्तिमिरलुप्तदृशो यदिहोद्भवन्ति न तदद्भुतकम् SaṁkṣeS'ā. 2. 223 (i. 132. 10)

अद्भुतकण्डुर (adbhuta-kaṇḍura) *adj.* unusual itching sensation (कुष्ठानि) प्रदिष्टरूपेऽद्भुतकण्डुराणि KalyāKā. 11. 63.

अद्भुतकथा (adbhuta-kathā) *f.* marvellous tale ग्रेथुरग्र्यमितिहासमथो जग्रन्थुरद्भुतकथाश्चरितैस्ते। मागधाः DvyāśraKā. 8. 49; यदवलोकनेनाद्य ... उपरत इवाद्भुतकथाकर्णनादरः कर्णयोः TilaMañ. 155. 19.

अद्भुतकथाकन्था (adbhutakathā-kanthā) *f.* patched garment of wonderful stories किं ताभिर्विततताभिरद्भुतकथाकन्थाभिरेतावता। वन्द्योऽयं विमुरम्भसां समभवद्रत्नं यतः कौस्तुभः AnyoMuLa. 29.

अद्भुतकनकमय (adbhutakanaka-maya) *adj.* consisting of marvellous gold लोकेशः कर्णराजाद्भुतकनकम[या]त्तावकीनप्रतापाद्ब्रह्माण्डानाम् — जलनिधिरकरोत् SūktiSu. 117.

अद्भुतकर (adbhuta-kara) *adj.* [*f.* -ī] causing astonishment, wonderful सरित्स्रोतस्त्वेवं विपिनगहनैश्चाद्भुतकरं जगत्याश्चर्यं हि प्रथयति महत्कर्म महताम् EI. xxi. 150. 18; शशकलङ्कः …। तदमृतस्य तवेदृशभूतताद्भुतकरी परमूर्धविधूननी NaiṣC. 4. 55; शैलूषी तव कीर्तिरद्भुतकरी … ताराभिस्तरलीकरोति गगनम् SūktiSu. 68.

अद्भुतकर्मकारिन् (adbhutakarmakār-in) *adj.* performing miraculous deeds किमेतदित्यद्भुतकर्मकारी ह्येकः करोत्यप्रतिमं महच्च VarāP. 23. 22.

अद्भुतकर्मकृत् (adbhutakarma-kṛt) *adj.* performing wonderful deeds शरवेश्माकरोत्पार्थस्त्वष्टेवाद्भुतकर्मकृत् MahāBhā. vii. 74. 57; प्रययौ पार्थः रथेनाद्भुतकर्मकृत् MahāBhā. ii. 23. 7; ततो नारायणः श्रीमान्मोक्षयित्वा … ग्राहं चाद्भुतकर्मकृत् VāmaP. 85. 76.

अद्भुतकर्मकौशल (adbhutakarma-kauśala) *n.* skill in wonderful deeds कार्यान्तेऽद्भुतकर्मकौशलकृतावज्ञा विरागस्पृशः… भृत्यास्त्यजन्ति प्रभुम् RājTa. (Ka.) 8. 656.

अद्भुतकर्मचारिन् (adbhutakarmacār-in) *adj.* performing wonderful deeds विष्णुः सदैवाद्भुतकर्मचारी प्रोवाच VāmaP. 93. 9.

अद्भुतकर्मन् (adbhuta-karman) *adj.* performing wonderful deeds, exhibiting wonderful workmanship कौरवान् कारणं कृत्वा कालेनाद्भुतकर्मणा। अहानि युयुधे भीष्मो दशैव परमास्त्रवित् MahāBhā. i. 2. 25; i. 1. 23; ततो लब्धवरा प्रीता …। जगाम सह संसर्गमृषिणाद्भुतकर्मणा MahāBhā. i. 51. 66; ii. 23. 7; iii. 80. 15; iii. 154. 34; सर्वज्ञं त्वां कथं मोह आविशत्स्वर्गवासिनम् । एवमद्भुतकर्माणम् MahāBhā. iii. 178. 29; iii. 43. 27; v. 164. 30; vi. 50. 1; xii. 98*(3); i. 1. 19; xv. 8. 6; ततः प्रध्माप्य तं शङ्खम् । प्रविवेश पुरं कृष्णो बाणस्याद्भुतकर्मणः HariVaṁ. 110. 35; 87. 13; ततो हि यजमानस्य जह्नोरद्भुतकर्मणः। गङ्गा संप्लावयामास यज्ञवाटं महात्मनः Rāmā. i. 934*(1); vi. 66. 33; JayāS. 1. 37; प्रलम्बं निहतं दृष्ट्वा बलेनाद्भुतकर्मणा। प्रहृष्टास्तुष्टुवुर्गोपाः ViṣṇuP. v. 9. 37; VāyuP. i. 1. 72; प्रतिशापश्च दक्षस्य रुद्रादद्भुतकर्मणः BrahmāṇḍP. i. 1. 64; i. 2. 1; MatsyaP. 53. 58; प्रवक्ष्यामो मतं कृत्स्नं व्यासस्याद्भुतकर्मणः MārkP. 4. 42; तेनैवाद्भुतकर्मणा निजमिह क्रीत्वा[यं]सङ्घानिकान्मुक्त्वा चीवरिकां प्रदाय विधिना सामान्यमेकन्तथा EI. xx. 44. 14; SātvaT. 1. 3; वायोः सुतस्यैव कथं प्रभावो निगद्यतामद्भुतकर्मणोऽपि PadmP.(Ra.) 19. 95; 17. 88; 8. 125; श्यामो वटः सोऽयमेतस्याद्भुतकर्मणः। छायामप्यधिवास्तव्यैः परं ज्योतिर्निषेव्यते AnargharRā. 7. 127; स धर्मः पीडितः पूर्वं सोमेनाद्भुतकर्मणा VarāP. 32. 9; 55. 32; अथ क्रोधावृतेनाथ ब्रह्मणाद्भुतकर्मणा। सृष्टस्तु पुरुषो धीमान् VāmaP. 2. 39; 8. 26; 9. 11; ततः प्रादाद्वरं ब्रह्मा व्याघ्रस्याद्भुतकर्मणः VāmaP. 54. 20; हरेरद्भुतकर्मणः । दुर्विभाव्यमिवाभाति कविभिश्चापि चेष्टितम् BhāgP. ii. 4. 8; i. 4. 46; i. 18. 1; मनोजवायाद्भुतकर्मणे गृणे BhāgP. ix. 5. 6; iii. 10. 10; उभौ चाद्भुतकर्माणौ … न वेद्मि BrahmP. 50. 57; नन्दी चाद्भुतकर्मासौ ददौ तेनैकदन्तकः BṛDharmaP. i. 60. 84; i. 59. 18; BhaviP. 549B. 6 (iii(4). 5. 30); 418B. 17 (iii(1). 3. 51); DevīBhāP. iv. 9. 37; iv. 16. 1; KalkiP. ii. 1. 2; PadmP. iv. 39. 36; i. 38. 41; ĀdiP. 7. 50; GaṇeP. ii. 82. 15; YogVā. ii. 3. 26; कुमार इव विद्यानां वृन्देनाद्भुतकर्मणा। यः शशासासुरान् घोरान् EI. xviii. 109. 15; i. 357. 24; अहो न जानीषे रामस्याद्भुतकर्मणः … यशस्त्रैलोक्यविश्रुतम् RāmāMañ. 134. 19; तामष्टमेऽब्दे विप्राय शान्तायाद्भुतकर्मणे प्रददौ … पिता S'aṅkaVi.(Ā.) 9. 10; अहो विधेरचिन्त्यैव गतिरद्भुतकर्मणः KathāSaSāg. xii. 7. 205; vii. 2. 96; KaṁsaVa. 2. 5; KathāKau. 2. 20; चापदानं तु खण्डनेऽद्भुतकर्मणि AnekāK. 508; *n.* wonderful act, miraculous deed दैत्यान्मानुषदेहस्थान्सूदयामास वीर्यवान्। छिन्नं बाहुसहस्रं च बाणस्याद्भुतकर्मणा BrahmāṇḍP. ii. 73. 101; एतस्याद्भुतकर्माणि शृणु मे गदतः सुर GaṇeP. ii. 11. 2; त्वद्विजृम्भितमतोऽद्भुतकर्मस्वप्युदेति न तव स्तुतिबन्धः Stotrā. 11. 4.

अद्भुतकर्मरक्ता (adbhutakarma-raktā) *adj.* (*f.*) fond of miraculous deeds पानीयमे पुष्पवती … प्रच्छन्नपापाद्भुतकर्मरक्ता VasiS. 24. 24.

अद्भुतकल्प (adbhuta-kalpa) *adj.* almost miraculous एतान्यद्भुतकल्पानि दृष्ट्वाहं द्रुतमागता MahāBhā. iii. 73. 17; xii. 160. 63; रथेनाद्भुतकल्पेन सङ्ग्रामे सोऽभ्यवर्तत Rāmā. vii. 28. 7.

अद्भुतकविता (adbhuta-kavitā) *f.* wonderful poetry अद्भुतकवितादर्शनात्कविराजो राजेन्द्रेण नित्यसेवकः कृतः PrabaK. 63. 22.

अद्भुतकान्ति (adbhuta-kānti) *f.* extraordinary lustre सूर्यस्य … सप्तस्वद्भुतकान्तिसौख्यविभवः Sārā. 54. 3; अद्भुतकान्तिपूरम् … आमुद्रिताननमहो मधुरं मुरारेः KṛṣṇaKa. 3. 62.

अद्भुतकामकेलि (adbhuta-kāmakeli) *adj.* consisting of wonderful love-sports आविरासीत् … रङ्गभवनेऽद्भुतकामकेलिः… चरणायुधानामद्भुतसुरतोत्सवः MahāN. 2. 62.

अद्भुतकारक (adbhuta-kāraka) *adj.* producing wonder ततः सिद्धादिचरितं तन्मत्वाद्भुतकारकम् ।… ते वाक्यमब्रुवन् KathāSaSāg. ii. 4. 189.

अद्भुतकारण (adbhuta-kāraṇa) *n.* wonderful cause नमो नमस्तेऽखिलकारणाय निष्कारणायाद्भुतकारणाय BhāgP. viii. 3. 15; भीष्माभिसेचनं पर्व ज्ञेयमद्भुतकारणम् MahāBhā. i. 2. 54; नमो नमस्तेऽद्भुतकारणाय SkandP. ii(1). 20. 81; जीवंजीवकयुग्मानां व्यक्तवाचां समं शुकैः । आलापः सारिकाभिश्च तस्मिन्नद्भुतकारणम् PadmP.(Ra.) 6. 102; संसारविच्छित्तिकरैर्यजद्भिरतोऽवसीयेत चतुर्भुजस्त्वम् परं न जानाति यतो वपुस्ते देवादयोऽप्यद्भुतकारणं तत् VarāP. 73. 26.

अद्भुतकारिन् (adbhutakār-in) *adj.* [*f.* -iṇī] working wonderful deeds कौमारव्रतयुक्ता सावासीदद्भुतकारिणी PadmP.(Ra.) 90. 9; PadmP. iv. 88. 60; इयमत्राद्भुतकारिणि मदपुरुषे नैव वर्णना वितथा YaśasCam. i. 505. 3; वयं रणे निपतिताः पुनः संजीविता हर । मयूरेशाङ्गसंभूतवायुनाऽद्भुतकारिणा GaṇeP. ii. 116. 46; यशःशब्देन लोकप्रसिद्धिहेतुभूतमद्भुतकारि वस्तूच्यते यथा रामस्य सप्ततालव्यथनादि AbhinBhā. i. 41. 7 (*on* 1. 115); भक्तिमदोद्भुतकारी विस्मृतदेहश्चलः प्रकृत्यैव KalāVi. 6. 9; राजन्मे पश्य तपसो बलमद्भुतकारिणः । सशरीरो दिवं गच्छ RāmāMañ. 34. 20; अङ्के तस्मिन्नेतानि प्रत्यक्षजानि स्युः ।… अद्भुतकारिणां दर्शनम् NāṭaLaRaK. 284; यत्रोल्लसत्यद्भुतकारिवाचः स्फुर[न्ति चि]त्ते विदुषां सदा EI. ii. 422. 3.

अद्भुतकार्यकारिन् (adbhutakāryakār-in) *adj.* performing wonderful deeds अशक्तिरस्यास्ति न दिग्जयेषु यस्यानुजोऽहं शिरसा धृताज्ञः । स्थानस्य एवाद्भुतकर्मकारी बिभर्तु रक्षामणिना समत्वम् VikraDeC. 3. 54.

अद्भुतकीर्तन (adbhuta-kīrtana) *n.* narration of a marvellous deed अत्युक्तौ यदि न प्रकुप्यति मृषावादं न चेन्मन्यसे तद्ब्रूमोऽद्भुतकीर्तनेषु रसना केषां न कण्डूयते SubhāRaK. 41. 24 = S'ārṅgaPa. 1246.

अद्भुतकीर्ति (adbhuta-kīrti) *f.* wonderful fame क्ष्मापतिरिन्द्रराजः शास्ता बभूवाद्भुतकीर्तिसूतिस्तद्दत्तलाटेश्वरमण्डलस्य EI. iii. 55. 9.

अद्भुतकीर्तिलाभ (adbhutakīrti-lābha) *m.* obtaining wonderful fame शिरःप्रदानेऽद्भुतकीर्तिलाभस्तवापि लोके S'aṅkaDigVi.(Mā.) 11. 15.

अद्भुतकुतूहला (adbhuta-kutūhalā) *adj.* (*f.*) having extraordinary or unusual curiosity अथ सर्वैः स्तुता देवैर्देव्यद्भुतकुतूहला । उवाच स्वामिनम् S'ivaP. ii(5). 7. 5 (228A. 12)

अद्भुतकृच्चरित्रा (adbhutakṛc-caritrā) *adj.* (*f.*) whose nature works miracles पदोर्नखाली तव रोहिणीयं मुदे न कस्यादद्भुतकृच्चरित्रा GotaSt. 7.

अद्भुतकृत् (adbhuta-kṛt) *adj.* who works wonders गगनगामित्वमिच्छत्यद्भुतकृद् व्रती JayāS. 29. 148; अथाम्बुधौ मन्दरतुल्यशैलैः सेतुर्निबद्धोऽद्भुतकृत्प्लवङ्गैः DaśāvaC. 7. 211.

अद्भुतकृष्ण (adbhuta-kṛṣṇa) *m.* wonderful Kṛṣṇa, Kṛṣṇa who is a wonder कस्ते गुणान् गदितुमद्भुतकृष्ण शक्तः S'aṅkaDigVi.(Mā.) 7. 30.

अद्भुतकृष्णराज (adbhutakṛṣṇarāja) *m.* name of a king तस्माद्बभूवाद्भुतकृष्णराजो विख्यातकीर्तिः EI. ix. 13. 3.

अद्भुतकृष्णरूप (adbhuta-kṛṣṇarūpa) *n.* wonderful or extraordinary form of Kṛṣṇa चैद्यः … क्षणमद्भुतकृष्णरूपदर्शी … अवतस्थे Yādavā. 15. 126.

अद्भुतकेतुयष्टि (adbhuta-ketuyaṣṭi) *f.* wonderful or extraordinary banner-staff जगज्जिगीषोर्मदनस्य जैत्री पताकयेवाद्भुतकेतुयष्टिः Yādavā. 13. 49.

अद्भुतकेलिभेद (adbhutakeli-bheda) *m.* variety of wonderful sports एवंविधैश्चाद्भुतकेलिभेदैरानन्दमूर्च्छामतुलां व्रजस्य । पदे पदे नूतनयन्नसीमं परात्मरूपिन् पवनेश पायाः Nārāy. x. 71. 10.

अद्भुतकेशवकेलि (adbhuta-keśavakeli) *f.* wonderful sport of Kṛṣṇa श्रीजयदेवभणितमिदमद्भुतकेशवकेलिरहस्यम् GītGo. i. 4. 9.

अद्भुतकौतुक (adbhuta-kautuka) *adj.* wonderfully curious, having an extraordinary curiosity अथ राजगृहस्वामी जगादाद्भुतकौतुकः PādmP. (Ra.) 91. 1.

अद्भुतकौतुकिन् (adbhuta-kautukin) *adj.* curious about a wonderful thing पौरग्रामेयका अपि । तमवेक्षितुमाजग्मुः सर्वोऽप्यद्भुतकौतुकी MalliC. 8. 190.

अद्भुतक्रतु (ádbhuta-kratu) *adj.* possessing wonderful mental power मा कस्याद्भुतक्रतू यक्षं भुजेमा तनूभिः ṚV. v. 70. 4; यज्ञेभिरद्भुतक्रतुं यं कृपा सूदयन्त इत् ṚV. viii. 23. 8.

अद्भुतक्रमपरायण (adbhutakrama-parāyaṇa) *adj.* devoted to him (i. e. Hari) whose steps are wonderful ते वै विदन्त्यतितरन्ति च देवमायाम्…। यद्यद्भुतक्रमपरायणशीलशिक्षास्तिर्यग्जना अपि BhāgP. ii. 7. 46.

अद्भुतक्रिय (adbhuta-kriya) *adj.* who performs wonderful deeds वन्दक्रो नेमिनाथस्य कृष्णोऽभूदद्भूतक्रियः PrdmP.(Ra.) 20. 241.

अद्भुतखड्ग (adbhuta-khaḍga) *m.* wonderful sword खड्गोऽद्भुतखड्गकुपितकृपाणौ … चाटुप्रवाहोऽयम् SaduktiKa. 186. 21.

अद्भुतगति (adbhuta-gati) *adj.* having a wonderful gait अद्भुतगतिः … न कस्य मनसस्तोषाय योषा PadyaVe. 385.

अद्भुतगन्ध (adbhuta-gandha) *adj.* having a wonderful smell [GOLD., MW.]

अद्भुतगरिमकार्मण (adbhutagarima-kārmaṇa) *n.* magic of wonderful greatness साक्षादङ्कृत … अद्भुतगरिमकार्मणविविधकेलिनिर्माणम्। … त्रिपुरवैरिणम् YātrāPra. 3. 63(9)

अद्भुतगर्भधारिणी (adbhutagarbha-dhāriṇī) *adj.* (*f.*) carrying a wonderful foetus बभौ सखीजनैः साद्भुतगर्भधारिणी । उपास्यमाना VikraDeC. 2. 70.

अद्भुतगर्भमाहात्म्य (adbhutagarbha-māhātmya) *n.* greatness of the wonderful foetus देवी … अद्भुतगर्भमाहात्म्यपरिवर्तितस्वभावा AvantiKa. 159. 4.

अद्भुतगात्र (adbhuta-gātra) *n.* wonderful limb कदा पुनस्तव लप्स्ये सुखमङ्गसङ्गजम् । अतिशीतलितानि येन मेऽद्भुतगात्राणि भवन्ति तत्क्षणात् SkandP. iv. 44. 17.

अद्भुतगुण (adbhuta-guṇa) *adj.* [*f.* -ā] having a wonderful quality वंशे तस्य बभूवुरद्भुतगुणा धाराधरित्रीभुजः SubhāRaK. 46. 7; तुभ्यमद्भुतगुणाय … नमः VasaViKā. 10. 65; तत्राद्भुतगुणो वज्रवीर्यनामा नृपोऽभवत् PārśvaC. 3. 5; (Praśasti) 4; काष्ठपुत्रिका मम पितरमद्भुतगुणं वर्णयन्ति PrabaK. 81. 21 = PurāPraSaṁ. 8. 29; ततोऽद्भुतगुणा बाला … प्रबुद्धैवाभवत्तदा KathāKau. 2. 34.

अद्भुतगुणावास (adbhutaguṇāvāsa) *m.* abode of wonderful qualities श्रीमत्केशवमिश्रमद्भुतगुणावासं नियुज्य स्वयं चक्रे … प्रबन्धमनवं माणिक्यचन्द्रो नृपः AlaṅkāŚe. 22. 4(21)

अद्भुतगोपखेलन (adbhuta-gopakhelana) *adj.* engaged in wonderful sports of cowherds प्रणुनाव च … हरिमद्भुतगोपखेलनम् Yādavā. 9. 58.

अद्भुतघोरवीर्य (adbhutaghora-vīrya) *adj.* of wonderful and terrible power तमभ्युपेत्याद्भुतघोरवीर्यं स कुम्भकर्णो युधि वानरेन्द्रम् Rāmā. vi. 55. 50.

अद्भुतचण्डतेजस् (adbhutacaṇḍa-tejas) *adj.* possessed of wonderful and terrible lustre विष्णुः … सुदर्शनेनाद्भुतचण्डतेजाः … हिरण्यनेत्रस्य शिरः … चिच्छेद S'ivaP. ii(2). 42. 45 (270A. 2)

अद्भुतचण्डवीर्य (adbhutacaṇḍa-vīrya) *adj.* possessed of wonderful and terrible valour शृण्वम्बिके … उत्पन्न एषोऽद्भुतचण्डवीर्यः । निमीलिते चक्षुषि मे भवत्या S'ivaP. ii(5). 42. 25 (269A. 13)

अद्भुतचरितोपवर्णन (adbhutacaritopavarṇana) *n.* description of a wonderful or marvellous deed यत्राद्भुतचरितोपवर्णनेन भूतभाविनोर्वस्तुनोः प्रत्यक्षायमाणत्वं भवति स भाविकालङ्कारः PratāYaBhū. 461. 1.

अद्भुतचरित्र (adbhuta-caritra) *n.* wonderful or marvellous deed अद्भुतचरित्रानुदर्शिताधिपत्यप्रलोभान् क्षत्रियकुमारकांस्तृणमिव गणयन्ती सा UdaySuKa. 97. 25; कपीश्वरः … चक्रेऽद्भुतचरित्रं स तत्र विक्रमसंयुतम् S'ivaP. iii. 20. 19 (319B. 4); *adj.* of wonderful course of life or behaviour शतदलम् … धत्तेऽसौ नवशाखी नाद्भुतमद्भुतचरित्रेषु MohaRāPa. 2. 27.

अद्भुतचर्य (adbhuta-carya) *adj.* of wonderful behaviour क्रीडन्नद्भुतचर्यः … त्वम् … जय StavMā. 192. 85.

अद्भुतचारित्र (adbhuta-cāritra) *adj.* (person) of wonderful course of life एवं सोऽद्भुतचारित्रो विक्रमादित्यभूमिपः … ददर्श … द्विजम् KathāSaSāg. xviii. 5. 89.

अद्भुतचारित्रा (adbhuta-cāritrā) *f.* name of the goddess Lalitā अनघाद्भुतचारित्रा LalitāSa. 231; (adbhutacāri-trā) *adj.* (*f.*) one who guards against startling events (foreboding calamity), one who saves from dangerous situations (comm.), LalitāSa. 231; cf. **अद्भुतचारिन्**.

अद्भुतचारिन् (adbhutacār-in) *adj.* startling event (foreboding calamity) अद्भुतेषु भूकम्पादिषूत्पातेषु निमित्तेषु चरन्तीत्यद्भुतचारीणि दुष्टफलानि तेभ्यः त्रायते LalitāSaBh. 194. 16 (*on* 231)

अद्भुतचिन्ता (adbhuta-cintā) *f.* thought about the mystery निर्निद्रस्तयैवाद्भुतचिन्तया RājTa.(Ka.) 2. 98.

अद्भुतचिन्मय (adbhuta-cinmaya) *adj.* consisting of the wonderful consciousness ब्रह्माद्भुतचिन्मयम् … स्मरन् पृथ्वीराजनृपः … लेभे शिवं शाश्वतम् HammīMaKā. 3. 72.

अद्भुतचेष्ट (adbhuta-ceṣṭa) *adj.* of wonderful or astounding acts को वेत्त्यद्भुतचेष्टानां कृत्यं प्राकृतचेतसाम् RājTa.(Ka.) 1. 305.

अद्भुतचेष्टित (adbhuta-ceṣṭita) *adj.* whose acts are wonderful or marvellous शरीरिणः । मनुष्यतां समासाद्य जायन्तेऽद्भुतचेष्टिताः PadmP.(Ra.) 14. 255; शक्तिदेवताम् । विसृज्यावस्थितो वालिः स्वसैन्येऽद्भुतचेष्टितः PadmP.(Ra.) 65. 57; आनर्तयत्यद्भुतचेष्टितोऽसौ ननर्त खेलं नवनीतकाङ्क्षी Yādavā. 4. 27; *n.* wonderful or miraculous act जगौ … नलस्याद्भुतचेष्टितम् BṛKathāMañ. 15. 360; निधिरद्भुतचेष्टितानाम् … त्वं वेधसा विरचितः VikraDeC. 5. 87.

अद्भुतजनितरुष् (adbhutajanita-ruṣ) *f.* anger caused by the wonderful act अद्रिं क्रव्यादवीरः प्रहितमनिलजेनाच्छिनत् मुद्गरेण । लाङ्गूलेनाञ्जनेयोऽद्भुतजनितरुषा मुद्गरं द्राक् चकर्ष MahāN. 9. 36.

अद्भुतजलनिधि (adbhuta-jalanidhi) *f.* ocean of wonders or miracles यदेव तावदाकर्णयितुमावयोरद्भुतजलनिधिमज्जनमन्तःकरणम्, तदेव मञ्जरीसमागमसंविधानम् … कथयतु Mukundā. 207(9)

अद्भुतजव (adbhuta-java) *m.* great or wonderful speed दृष्टो योजनबाहुरद्भुतजवद्वन्द्वाहतैकव्रती AdbhuDa. 1. 19.

अद्भुतजिनधर्म (adbhuta-jinadharma) *m.* wonderful Jain religion अथैकदा त्रिदशविलासिनीजनप्रवर्तिताद्भुतजिनधर्मसंकथा NemiNir. 2. 46.

अद्भुततत्पदोत्सव (adbhuta-tatpadotsava) *m.* wonderful celebration of his (teacher's) feet अचीकरद् योऽद्भुततत्पदोत्सवम् Gurvā. 410.

अद्भुततत्प्रभाव (adbhuta-tatprabhāva) *m.* his great or wonderful power सर्वंस्याद्भुततत्प्रभावमहिमव्याहारमय्यो गिरः KathāSaSāg. xviii. 2. 280.

अद्भुततनु (adbhut-tanu) *adj.* whose body is wonderful क्षेत्रेशमद्भुततनुं प्रणमामि देवम् S'āraTi. 20. 34.

अद्भुततम (adbhuta-tama) *adj.* [*f.* -ā] most wonderful, most miraculous, most extraordinary वर्म भास्वरम् । आबबन्धाद्भुततमं जपन्मन्त्रं यथाविधि MahāBhā. vii. 69. 39; तत्राद्भुततमं द्रौणिर्दर्शयामास विक्रमम् MahāBhā. vii. 131. 113; तदद्भुततमं लोके गङ्गापतनमुत्तमम् Rāmā. i. 42. 10; ब्रूह्येतदद्भुततमं भगवांस्तत्र कारणम् BhāgP. vii. 1. 20; तदद्भुततमं शीलं स्मृत्वा BrahmāṇḍP. iii. 39. 101; तदद्भुततमं वाक्यं श्रुत्वा PadmP. v. 34. 1; PāraS. 1. 23; प्राप्तो मयाद्भुततमो भवतां प्रसादात्संग्राममूर्ध्नि सुरशत्रुजयः प्रमर्दात् VāmaP. 56. 64; सान्द्रानन्दमविन्दताद्भुततमं श्रीशालिदेवः सदा S'ātiC. 3. 155; प्राप्तोऽयं पृथिवीरथोऽद्भुततमः सप्तानिलाश्वैश्चलन् TripuDi. 4. 8; यादृग्भूरिमिरुग्रमद्भुततमैस्तप्तैस्तपोभिर्भवेत् । श्लाघ्यं जन्म EI. i. 356. 21; कथाद्भुततमापि वृथा न यस्य EI. ii. 10. 7; *n.* most wonderful or extraordinary fact or event अयोनिजत्वं कृष्णायाः द्रुपदस्य महाहवे । तदद्भुततमं श्रुत्वा MahāBhā. i. 153. 9; उत्कृष्ट एव तु ग्राहः सोऽर्जुनेन … बभूव नारी … तदद्भुतं महद्दृष्ट्वा (v. l. तदद्भुततमं दृष्ट्वा) MahāBhā. i. 208. 12; देवदुन्दुभयो नेदुर्ववौ च पवनः शिवः । तदद्भुततमं दृष्ट्वा MahāBhā. iii. 75. 16; किमद्भुततरं (v. l. अद्भुततमं) लोके भविताप्यथवाप्यभूत् MahāBhā. vii. 75. 10; अपश्यन्नद्भुततमाकाशमनाकाशं जनार्दनैः । तदद्भुततमं दृष्ट्वा MahāBhā. x. 6. 18; xii. 31. 25; संचचाल वसुंधरा । ततस्तदद्भुततमं श्रुत्वा VāmaP. 6. 72; यदासीदद्भुततमं कन्यारूपस्य मे महत् । वृन्दावने भगवता दर्शितम् ĀdiP. 12. 54; इदमद्भुततमं युवतिसहस्रैर्विलुप्यमानस्य । वृद्धिर्भवति न हानिर्यत्तव सौभाग्यकोषस्य Subhāṣi. 2532.

अद्भुततर (adbhuta-tara) *adj.* [*f.* -ā] more wonderful, more miraculous, more extraordinary संप्राप्य … । ऐश्वर्यमद्भुततरं च समन्तभद्रं रक्षःपतिः परमसंसृतिसौख्यमेतः PadmP.(Ra.) 19. 138; देवराज अयमत्राद्भुततरो विमर्दः MahāvīC. 6. 48(1); दृश्यतामद्भुततरं ममेदं वैष्णवं धनुः RāmāMañ. 49. 1; प्रभावोऽयं किं त्वद्भुततरस्तव । स्थलीकृतं जलं येन भ्रूक्षेपेण RāmāMañ. 314. 3; किमेतदद्भुततरं लङ्कायां भूतमुत्थितम् RāmāMañ. 349. 2; यथा प्राप्तिभ्रंशा धरणिपतिभावस्य विविधाः … तथा दृष्टस्तस्य प्रमयसमयोऽद्भुततरः RājTa.(Ka.) 8. 1472; एतासु केतकि लतासु विकासिनीषु सौभाग्यमद्भुततरं भवती बिभर्ति SūktiMu. 33. 41; अलस्तद्विरां माधुर्यस्य समृद्धिरद्भुततरा नान्यत्र सा वीक्ष्यते S'aṅkaDigVi.(Mā.) 4. 91; S'ārṅgaPa. 1013; दृष्ट्वाद्भुततरं भावं स्वप्ने सत्यफलप्रदे । … भीता सा KathāKau. 2. 44; अद्भुततरमथापि शृण्वताम् …आलोकमानः सागरमथनसंरम्भमानन्द गोविन्दः NīlaVi. 88. 7; श्रीविन्ध्येश्वरशूलिनोऽद्भुततरः स्तम्भावलीशोभितः प्रासादोऽयम् EI. xxiii. 187. 6; [without a noun] more wonderful or extraordinary (fact or event) कुक्षिणा दश मासांश्च गर्भं संधारयन्ति याः । नार्यः … किमद्भुततरं ततः MahāBhā. iii. 196. 9; किमद्भुततरं लोके…यदश्वान् पार्थगोविन्दौ मोचयामासतू रणे MahāBhā. vii. 75. 10; तमद्भुततमं (v. l. तमद्भुततरम्) दृष्ट्वा राक्षसौ … रावणं तमवोचतुः Rāmā. vii. 32. 17; UttaRāC. 7. 8(4)

अद्भुततरम् (adbhuta-taram) *adv.* marvellously सा यावन्ति पदान्यलीकवचनैरालीजनैः पाठिता । तावन्त्येव कृतागसोऽद्भुततरं संलप्य पत्युः पुरः S'ārṅgaPa. 3580.

अद्भुततर्क (adbhuta-tarka) *m.* wonderful argument प्राक्प्रत्यक्पृथिवीभृतोः परिषदि प्रख्यातसंख्यावतामद्भुतायाद्भुततर्ककर्कशतया विच्छिद्य विद्यापदम् AlaṅkāŚe. 5. 2(65)

अद्भुततर्कबोध (adbhuta-tarkabodha) *m.* extraordinary proficiency in logic पश्चादद्भुततर्कबो(बो)धव(ब)लतस्तत्रैव … उपार्ज्य यशः EI. i. 65. 10.

अद्भुतता (adbhuta-tā) *f.* A the state of being wonderful or marvellous [सूत्राभिधर्म-]विनयाः सुगतस्य वाचो बाधा विनाद्भुततया सततं जयन्ति

DharmoPra. 1. 12; **B** the state of being the marvellous sentiment विभावैरनुभावैश्च … । नीतः सदस्यरसत्वं विसयोऽद्भुततां व्रजेत् RasāSu. 197. 3 (2. 242)

अद्भुततुङ्गमूर्ति (adbhuta-tuṅgamūrti) *adj.* having a wonderful tall body अद्भुततुङ्गमूर्तिः … देव समग्रकमैवनविदलनरसिकः … दधासि तत् त्वमृषभगजविलसितम् ChandaśCū. 2. 271(2)

अद्भुततुलाहेमन् (adbhuta-tulāheman) *n.* wonderful weighing (of a person) in gold दृष्ट्वैनं रचयन्तमद्भुततुलाहेम्नः सदा संपतद्यागाज्याहुतितर्पितो व्यचरयत् (व्यरचयन्) मन्ये तुलोपायनम् EI. xxi. 284. 23.

अद्भुततेजस् (adbhuta-tejas) *adj.* of wonderful brilliance or power प्रवक्ष्यामि मतं कृत्स्नं व्यासस्यामिततेजसः (v. l. °स्याद्भुततेजसः) MahāBhā. i. 1. 23; शृणुध्वं संयताः सर्वे विष्णोरद्भुततेजसः । सारभूतमिदं शास्त्रम् JayāS. 1. 40; 13. 11; तस्यासुराः सुराः सर्वे वक्त्रस्याद्भुततेजसः । तेजसा न प्रकाशन्ते दीपः सूर्योदये यथा SkandP. v(1). 2. 40; विश्वानावाहयिष्यामि देवानद्भुततेजसः ViṣṇuDhaP. iii. 103. 6; नृपः … विदूषकाय प्रददौ लक्ष्मीं चाद्भुततेजसे BṛKathāMañ. iii. 1. 250; *n.* marvellous splendour or brilliance सुरासुरास्तस्य सर्वे वक्त्रस्याद्भुततेजसा । … अवर्तन्त विचेतसः PadmP. v. 14. 97; स विक्रमेणाद्भुततेजसा च … विक्रमादित्य इति क्षितीन्दोरवाप … समाख्याम् VikraDeC. 3. 1.

अद्भुततोरण (adbhuta-toraṇa) *adj.* with a wonderful or marvellous arch ओङ्कारेऽद्भुततोरणं जिनगृहम् Gurvā. 200.

अद्भुतत्याग (adbhuta-tyāga) *adj.* of wonderful generosity or liberality वैश्रवणः सकलमद्भुतत्यागः … प्रददौ वित्तं द्विजातिभ्यः KalāVi. 2. 49.

अद्भुतत्यागनिधि (adbhutatyāga-nidhi) *m.* treasure of wonderful liberality (i. e. very generous) अस्याद्भुतत्यागनिधेः पुरस्तात्कल्पद्रुमाद्याः परमाणुकल्पाः VikraDeC. 9. 143.

अद्भुतत्यागशील (adbhuta-tyāgaśila) *adj.* wonderfully bountiful सोऽद्भुतत्यागशीलश्च शृङ्गारी च दिवं गतः EI. ix. 109. 15 = ix. 121. 18.

अद्भुतत्व (adbhuta-tva) *n.* **A** the state of being wonderful, marvellous or surprising अद्भुतत्वं विस्मयहेतुत्वम् PadMañ. *on* KāśiVṛ. *on* P. vi. 1. 147; अद्भुतत्वं प्रतिक्षणमभिनवत्वम् S'rutaPra. iB. 244. 32 (*on* i. 1. 21); अद्भुतत्वादवाच्यं तदतर्क्यानैयमेव च AnuVyā. 7A. 3 (*on* i. 1. 10); अद्भुतत्वादिति । आश्चर्यतमत्वात् NyāySu.(Ja.) 123B. 1 (*on* i. 1. 5); अद्भुतत्वम् अनतिविलम्बित्वं च प्रतीतम् AupaSūṬ. 41. 5; सत्त्वेऽप्यद्भुतत्वादेव युक्तम् । उक्तं हि अद्भुतत्वादनिर्वाच्यम् Nyāyāmṛ. 206B. 6; कादाचित्कतया अद्भुतत्वं लक्ष्यत इति भावः La-S'abdeS'e. ii. 182. 9; अद्भुतत्वमत्यन्तातथ्यत्वरूपं द्रष्टव्यम् AlaṅkāMañ. 218. 2; **B** the state of being the marvellous sentiment पुलकादिभिरनुभावैर्व्यज्यमानोऽद्भुतत्वमापद्यते RasāSu. 197. 13 (2. 243)

अद्भुतत्वविवक्षा (adbhutatva-vivakṣā) *f.* wish or desire to describe (something as) being wonderful यदि वा नगरविशेषस्थितेरद्भुतत्वविवक्षया यत्र हि नारीणां मुखं चन्द्र इत्युच्यते तदा विरोधाभासः RasGaṅ. 576. 13.

अद्भुतत्वाद्यभिप्राया (adbhutatvādy-abhiprāyā) *adj.* (*f.*) having the intended sense of being wonderful etc. इत्यादिश्रुतिस्तु अद्भुतत्वाद्यभिप्राया Nyāyāmṛ. 537A. 7.

अद्भुतत्वाभिप्राया (adbhutatvābhiprāyā) *adj.* (*f.*) having the implication of wonderfulness or surprise न चेयं श्रुतिरद्भुतत्वाभिप्राया Advai-Si. 785. 4.

अद्भुतदर्पण (adbhuta-darpaṇa) *n.* **1** wonderful mirror पञ्चविंशतितत्त्वानां पुरुषोऽद्भुतदर्पणम् । अध्यात्ममबुधस्येह किमसत्कमैभिर्भवेत् BhāgP. vi. 5. 17; **2** name of a drama इदमेव तदद्भुतदर्पणं नाम (नाटकम्) AdbhuDa. i. 5(27); 10. 31(6); *m.* name of a gem (used as mirror) अथवा अस्ति महाराजलङ्केश्वरस्य श्वशुरेण दानवेन्द्रेण दर्शनोपदीकृतो महामणिरद्भुतदर्पणो नाम AdbhuDa. 1. 22(16); 5. 22(5); 5. 24(1-2); 6. 0(19); 10. 13.

अद्भुतदर्शन (adbhuta-darśana) *adj.* [*f.* -ā] **A** of wonderful appearance दुराधर्षम् … अतीवाद्भुतदर्शनम् । पुत्रं जनय सुश्रोणि MahāBhā. i. 114. 25; पलाशदण्डं सङ्गृह्य वामनोऽद्भुतदर्शनः । … दक्षिणां देहीत्युवाच MahāBhā. ii. App. I. 21. (327); पवित्रभूतां लोकस्य शुभामद्भुतदर्शनाम् (नलिनीं ददर्श) MahāBhā. iii. 151. 3; iii. 23. 50; iii. 40. 7; iii. 112. 6; iii. 113. 1; iii. 186. 65; iii. 217. 1; रूक्षवर्णाश्च जलदा दृश्यन्तेऽद्भुतदर्शनाः MahāBhā. iv. 37. 5; तयोर्द्वे दिवसे युद्धं कुरुपाण्डवसेनयोः । कर्णे सेनापतौ राजन्नभूदद्भुतदर्शनम् MahāBhā. viii. 1. 15; viii. 24. 29; viii. 40. 78; स सन्निपातस्तुमुलो बभूवाद्भुतदर्शनः MahāBhā. ix. 14. 30; ix. 43. 38; प्रकृत्या ह्युपपन्नोऽसि बुद्ध्या चाद्भुतदर्शन MahāBhā. xii. 107. 4; xii. 126. 8; xii. 127. 10; इत्येतन्मे पिता श्रुत्वा सोमादद्भुतदर्शनात् MahāBhā. xiii. 36. 18; तत्र द्रक्ष्यसि काकुत्स्थ यज्ञं चाद्भुतदर्शनम् Rāmā. i. 30. 11; पादपैरन्वितः कपिः । हनुमान्पर्वताकारो बभूवाद्भुतदर्शनः Rāmā. v. 1. 45; vi. 24. 22; मम पुत्रा हतास्तेन ज्येष्ठास्तेऽद्भुतदर्शनाः VāyuP. ii. 34. 115 = BrahmāṇḍP. ii. 71. 211; पुमान् … निशि चाद्भुतदर्शनः NītiSā. 18. 53; देवर्षिः … तं दृष्ट्वा देवतापूज्यं भार्या चाद्भुतदर्शनाम् । प्राह VāmaP. 69. 137; 2 24; 9. 8; 71. 12; चापं चाद्भुतदर्शनम् । मारुतो दत्तवांस्तस्मै DevīBhāP. v. 9. 14; v. 33. 32; दृष्टः स्वप्ने … महेश्वरः … अद्भुतदर्शनः BṛDharmaP. i. 9. 17; i. 60. 69; SaurP. 41. 2; तेजसां निधिः … एनं स्तुवीमोऽद्भुतदर्शनम् BhaviP. 227A. 31 (i. 153. 40); BrahmP. 50. 14; 53. 1; 226. 25; रुरुः … परिभ्रमन्ददर्शैकां कन्यामद्भुतदर्शनाम् KathāSaSāg. ii. 6. 76; अधिगिरं चिरमद्भुतदर्शनैर्बहुपदार्थचयैर्हतमानसा । पदरुजम् … न विवेद विदेहजा Rāgh. 6. 24; AdhyāRā. iv. 9. 28; अथान्यं शृणु देवेशि चक्रमद्भुतदर्शनम् TantrRā. 8. 91; **B** of a wonderful nature प्रेक्षमाणो बहून्भावाञ्जगामाद्भुतदर्शनान् MahāBhā. vii. 57. 22; एतत्संयमनं पुण्यमतीवाद्भुतदर्शनम् MahāBhā. iii. 160. 9; तां श्रुत्वा दिव्यसङ्काशां कथामद्भुतदर्शनाम् Rāmā. vii. 57. 1; vii. 84. 8; vii. 91. 8; गच्छामो यात्रामद्भुतदर्शनाम् BṛKathāS'loSaṁ. 7. 79; *n.* appearance or sight of a wonderful event or portent तदा करोत्यद्भुतदर्शनानि यैर्ज्ञायते राहुरुपैष्यतीति AVPari. 53(1). 2; क्षेपे चाद्भुतदर्शने । एतेष्वेवं गतिं प्राज्ञः … सम्प्रयोजयेत् NāṭyaS'ā. 12. 37; 32. 322; हेमन्ते शोभनाः स्मृताः । हिमपातानिलोत्पातविरूपाद्भुतदर्शनम् VasiS. 45. 134; 45 130; अधीयत … नाद्भुतदर्शने KāśyaS. 59B. 37; दिव्यस्त्रीरूपगन्धर्वविमानाद्भुतदर्शनम् । … शरत्काले शुभाः MatsyaP. 229. 22; अस्याद्भुतदर्शनमेव नः प्रत्ययकारणमासीत् ĀścaCū. 7. 27(4); अनिष्टश्रवणे चैव क्षेपे चाद्भुतदर्शने । …एवंविधेषु कार्येषु गतिं शीघ्रां प्रयोजयेत् ViṣṇuDhaP. iii. 29. 5; नाप्यद्भुतदर्शनादतीतानागतत्वप्रत्यक्षत्वप्रतीतेः काव्यलिङ्गमिदम् AlaṅkāSa. 180. 5; उत्पातोऽद्भुतदर्शनम् Aparā. 963. 11 (*on* 3. 58); भक्त्या च तुष्ट्याद्भुतदर्शनाच्च । … एते गणाः … प्रणामं कुर्वन्ति LiṅgaP. i. 72. 153; निरीक्ष्यमाणे काष्ठे तु बभूवाद्भुतदर्शनम् BrahmP. 50. 24; अक्षतादर्शनात्तत्र सोमस्याद्भुतदर्शनम् BhaviP. 408A. 27 (ii(3). 20. 30); 409B. 36 (ii(3). 20. 85); 410B. 4 (ii(3). 20. 105); 876A. 29 (iv. 188. 2); चित्रेत्ययमद्भुतदर्शने णिचं लभते । चित्रयति SiddhāKau. 427B. 4.

अद्भुतदर्शनीय (adbhuta-darśanīya) *adj.* [*f.* -ā] of wonderful beauty इहागतो जटिलो ब्रह्मचारी … अन्यच्च तस्यातद्भुदर्शनीयं विकूजितं पादयोः सम्प्रभाति MahāBhā. iii. 112. 5; iii. 112. 7; अन्यच्च तस्याद्भुतदर्शनीया विभाति माला कनकप्रभासा MahāBhā. iii. 550*(1); तावृश्यमूकस्य समीपचारी चरन्ददर्शाद्भुतदर्शनीयौ Rāmā. iv. 68*(6)

अद्भुतदिव्यगन्ध (adbhutadivya-gandha) *adj.* possessed of wonderful heavenly fragrance वातैरभाव्यद्भुतदिव्यगन्धैः S'aṅkaDigVi.(Mā.) 2. 76.

अद्भुतदिव्यमन्दिर (adbhutadivya-mandira) *n.* wonderful divine mansion (सः) ददर्शाद्भुतदिव्यमन्दिरं विचित्ररत्नेन्द्रमयं मनोज्ञम् SkandP. ii(9). 17. 8.

अद्भुतदृष्ट (adbhuta-dṛṣṭa) *adj.* seen in a wonderful manner पादकर्णसमवायत एव प्राकृतैः फणिभिरद्भुतदृष्टाः (ते) Gaṅgāva. 2. 5.

अद्भुतदृष्टि (adbhuta-dṛṣṭi) *adj.* possessed of wonderful look शुद्धवस्त्रा सुमनसस्तथा चाद्भुतदृष्टयः । … प्रविशेयुः समं त्रयः NāṭyaS'ā. 5. 70.

अद्भुतदृष्टित्व (adbhutadṛṣṭi-tva) *n.* the state of having extraordinary vision सूत्रधारस्य गुणः सौमनस्यविसयोगाद्भुतदृष्टित्वरक्षादिभिरा (दिरा) कृतिश्च (स्थापकः प्रविशेत्तत्र) AbhinBhā. i. 247. 21 (*on* 5. 162)

अद्भुतदेवता (adbhuta-devatā) *f.* marvellous or mysterious goddess यस्यैषाद्भुतदेवतेव सततं कीर्तिर्ज्ञैः स्तु(? स्तू)यते EI. xiv. 300. 23.

अद्भुतद्योतसनीड (adbhutadyota-sanīḍa) *adj.* along with its base of wonderful lustre किं कोऽपि … अस्ति यः खलु … अद्भुतद्योतसनीडं वैडूर्यमणिमानयति YaśasCam. ii. 302. 26.

अद्भुतद्वन्द्व (adbhuta-dvandva) *n.* extraordinary or wonderful couple तदद्भुतद्वन्द्वमवेक्ष्य सख्यः प्रापुस्तुलामप्सरसामनूनाम् Yādavā. 13. 13.

अद्भुतधर्म (adbhuta-dharma) *m.* extraordinary or miraculous event अद्भुतधर्मः कतमः । यत्र श्रावकबोधिसत्त्वतथागतानां परमाद्भुताश्चर्यधर्माणां देशना AbhidhSa. 79. 6; ये च गुरुवं बुद्धत्वं पश्यन्ति अद्भुतधर्मैयुक्तम् MaYānaSū. 48. 24 (9. 80); °चतस्रप्रतिसं[विद्]अष्टादशावेणीकाद्भुतधर्मसमन्वागतस्य सर्वसत्त्ववत्सलमहाकारुणिकस्य (बुद्धस्य) EI. i. 240. 6.

अद्भुतधामन् (adbhuta-dhāman) *n.* wonderful abode अलभ्यत प्राक्तनचक्रवर्तिना न जन्म यत्राद्भुतधाम्नि केनचित् VikraDeC. 2. 85; पौषधशालिका :… मन्त्रीन्दुनाकार्यन्ताद्भुतधाम धार्मिकदृशाम् VasaViKā. 14. 7; जातरूपरुचिमुञ्जसुधाम्ना छातरूपकटिमद्भुतधाम्ना । नाकभूजमिव सत्कृतिलब्धम् … तम् … मेने S'aṅkaDigVi.(Mā.) 5. 23; *adj.* possessed of wonderful lustre तस्मिन् सदस्यद्भुतधाम्नि…। रेजे बिडौजा इव दिव्यमूर्तिः आनन्दरङ्गक्षितिपालकोऽसौ Ānand-Ra. 4. 23.

अद्भुतधी (adbhuta-dhī) *adj.* of wonderful intellect मूर्तिमन्तस्त्रयो वेदाः …। सुराः सङ्कल्पकामास्तु यत्राद्भुतधियोऽभवन् SkandP. ii(2). 21. 56.

अद्भुतधैर्य (adbhuta-dhairya) *adj.* of wonderful courage (रामम्) तं दृष्टवान्प्रथममद्भुतधैर्यवीर्यगाम्भीर्यमक्षणविमुक्तसमीपजानिम् RasGaṅ. 342. 13.

अद्भुतनय (adbhuta-naya) *adj.* of wonderful conduct or polity विविक्तासीनमितरे मितरेचितदिङ्मुखाः। परीयुरद्भुतनयं तनयं मातरिश्वनः RāmC. 10. 8; स चमत्कारविस्मयं स्वानन्दवेशपेशलमद्भुतनयं तनयं विलोक्य … वाग्देवता … किञ्चिदपाठीत् CaitaCa. 27. 9 (1)

अद्भुतनाटक (adbhuta-nāṭaka) *n.* marvellous drama केनाप्यद्भुतनाटकेन कमपि श्रीमन्तमानन्दयन् NyāySiA. 224. 23.

अद्भुतनाट्यविद्या (adbhuta-nāṭyavidyā) *f.* marvellous dramaturgy अस्ति …। अपां निधेरद्भुतनाट्यविद्यागुरुश्चकोरीकुलबन्धुरिन्दुः Acyutarā. 1. 5.

अद्यप्रसूत (adya-prasūta) *adj.* [*f.* -ā] **i** born today यथाहमिति भूतानां प्रतीतिः ⋯। अद्यप्रसूतादारभ्य चाशतान्तात्प्रतीयते BṛBrahmaS. iv. 8. 52; **ii** appearing or arising today गोशब्दबुद्ध्या ह्यस्तन्या गोशब्दोऽयं प्रकाशितः। गोशब्दविषयत्वेन यथैवाद्यप्रसूतया S'lokaVār. 6. 418 (838. 4); TattvSaṁ. 2123.

अद्यप्रातीन (adya-prātīna) *adj.* which is to take place or happen

just this morning परोवरीण॰ ···अद्यप्रातीन॰ ···साप्तपदीनम् S'ākaṭāVyā. iii. 3. 59 (comm. एवमद्यप्रातः अद्यप्रातीनं मरणम् । अद्यप्रातीना गौ अद्यप्रातीनो वियोगः); SiddhaHe. vii. 1. 105 (comm. अद्यप्रातीनो लाभः); मैमो ततः साप्तपदीनमद्य-प्रातीनमेनं नु पुषाण भूत्यै DvyāśraKā. 18. 28; विवाहमङ्गलमप्यद्यप्रातीन तदपि युष्माभिरनुष्ठेयम् KaumuMi. 2. 14 (8); [read प्रातीन for प्राचीन of NS. Ed. PrabhāC. 47. 4]; 137. 10.

अद्यभुजि (adya-bhuji) *f.* an act of eating on this day (i. e. today) अत्र भुजिक्रियायाः कर्तरि द्वे शक्ती व्यवस्थिते । एकाद्यभुजेः साधनभूता, अपरा ह्यहेऽतीते इति भिन्नयोर्द्वयोः कर्तृशक्त्योर्मध्ये वर्तते तद् ह्यहलक्षणः कालः Prasā. i. 458. 12.

अद्यभू (adya-bhū) *adj.* taking place today अन्यः खल्वयमद्यभूतो ज्ञान-स्याकारः Kāśi. ii. 124. 21 (*on* 5(3). 64)

अद्यमान (adyá-māna) *adj.* [*f.* -ā] being eaten or consumed यतीनामद्यमानानां शीर्षाणि परापतन् TaiS. II. iv. 9. 2; अद्यमानाः पीयमानाः आपो न क्षीयन्ते TaiS. VI. iv. 3. 4; तेषामद्यमानानां स्यूमरश्मिर्कृषिरथं प्राविशत् KāṭhS. 8. 5; वैश्योऽद्यमानो न क्षीयते PañcBr. vi. 1. 10; xxi. 2. 2; कुसान्तानि न क्षीयन्तेऽद्यमानानि सर्वदा S'atBr. XIV. iv. 3. 1; मृत्वा पुनर्मृत्युमापद्यन्ते । अद्यमानाः स्वकर्मभिः TaiĀ. i. 8. 6 (59. 1); इमं लोकं वमुच्य त्वमवाङ्मूर्धा पति-ष्यसि । ··· अद्यमानो जन्तुगृध्रैः MahāBhā. xii. 146. 17; अथवा तत्कृतेन पापेन क्रव्याद्भिरपि अद्यमानस्तैरद्यत इत्युच्यते ManuBh. i. 437. 4 (*on* 5. 33); कथमिव अनु-पचरितं तद्भावम् (रेतःसिग्भावम्) अद्यमानान्नानुगतोऽनुशयी प्रतिपद्यते Brahm-SūBh. (S'aṅ.) 557. 13 (*on* iii. 1. 26); प्राणिभिरद्यमानमन्नं प्राणस्येति दर्शनमात्रम् ChāndoUBh. 270. 2 (*on* v. 2. 2); प्राणेनैवाद्यमानं प्राणस्थितिकरं सदन्नं तृप्तिकरं भवति BṛĀraUBh. 61. 7 (*on* i. 3. 18); ततश्च अन्नात् अद्यमानात् वीर्यम् Praśna-UBh. 302. 6 (*on* 6. 4); BṛĀraUBhVā. i. 5. 76; उपसेचनं हि नाम स्वयमद्यमानं सदन्यस्यादनहेतुः S'rīBh. 244. 15 (*on* i. 2. 9); VedāntKa. 151. 23 (*on* i. 3. 8); 494. 19 (*on* iii. 4. 27); GoviBh. 32. 3 (*on* i. 2. 9)

अद्यमानत्व (adyamāna-tva) *n.* the state of being eaten up तस्मात् प्रविभक्तादमूर्तात् यदन्यन्मूर्तरूपं मूर्तिः, सैव रयिः अन्नम् अमूर्तेन तेन अत्ता अद्य-मानत्वात् PraśnaUBh. 241. 10 (*on* 1. 5); कृत्स्नजगत्संहारे मृत्व्यपेक्षाभावेऽप्यत्र मृत्योरद्यमानत्वं व्यष्टिसंहारस्य तद्वारकत्वं चाभिप्रेतम् S'rutaPra. iB. 301. 21 (*on* i. 2. 9)

अद्यमुषित (adya-muṣita) *adj.* which is stolen today तस्माद् द्यूतविधौ त्वयाद्यमुषितो हारः परित्यज्यताम् RasMañ. 97 (comm. अद्य मुषितः)

अद्ययज्ञ (adya-yajña) *m.* the current sacrifice तृतीयस्या विकृतिषु तु यथार्थमूहः सर्वत्र यथा अद्ययज्ञाय इमामूर्जं प्रथमामित्यादि Rudra. *on* ĀpaS'S. iv. 1. 8.

अद्ययावत् (adya-yāvat) *adv.* till today, up to this day, even now, uptil now अनादावद्ययावदभावाद्भविष्यदप्येवम् SāṁkhyaPraSū. 1. 158; न च ततःप्रभृ-तद्भवता सह कथमद्ययावदेतस्य स्नेहानुवृत्तिः Hitopa. 1. 52 (9); न च ततःप्रभृ-त्यद्ययावत् सादृश्यमनुवर्तते NyāyMañ. i. 190. 29; दाक्षिणात्यानामाह्ने(? हि)नैबु-कायनुष्ठानमनाद्ययावदनुवर्तमानमविगीतम् TātpaṬ. (Vā.) 47. 2 (*on* i. 1. 1); तथा सति हि नाद्ययावद् वेदसम्प्रदायोऽनुवर्तेत Kāśi. i. 110. 21 (*on* 2. 101); i. 200. 6 (*on* 2. 286); ध्यानगम्यं चिदाभासं सच्चिदानन्दविग्रहम् । सर्वव्यापी जगद्धेतु-रद्ययावद्विचिन्तितम् GaṇeP. ii. 40. 40; ii. 125. 47; चिरातीता अप्यद्ययावत् ··· कवयः Kāvyānu.(He.) 4. 1; अद्य यावद्गुशमदा यावज्जीवं च दास्यति(सि) प्रीतिं ममेति सन्तुष्टो गुरुर्मां पर्यपाठयत् DvyāśraKā. 13. 48; अश्वापहारादारभ्याद्या-वद्वृत्तमुच्यताम् PārśvC. 6. 1039; एवं सादृश्यपरम्परायद्यावत्प्रवृत्ता NyāyRa. 797. 15 (*on* 6. 265); प्रपत्त्यैकनिष्ठैस्तच्छिष्यप्रशिष्यादिभिर्योग्यैरद्ययावद्यथाशक्ति तदनुष्ठान-दर्शनात् PañcRāRa. 55. 21; 77. 3; मन्वाद्युपदेशेनैवाद्ययावदर्वाचीनपर्यन्तमेतदा-चारानुष्ठानम् MīmāKau. i. 62. 2 (*on* i. 3. 9); एतादृशोऽयं रहस्यार्थोऽत एवाद्ययावद् गुप्तः SetuBa. 271. 29; जन्मप्रभृति अद्ययावत् ज्ञानाज्ञान(कृत ··· पातकानाम्)-निरासार्थं अनुग्रहं कृत्वा प्रायश्चित्तमुपदिशन्तु भवन्तः BālamBha. iii. 210. 27 (*on* 3. 327)

अद्यर्थ (ady-artha) *adj.* having the meaning of the root *ad*- चल्य-द्यर्थात् JaineVyā. i. 2. 84; चल्यर्थेभ्योऽद्यर्थेभ्यश्च ञुभ्यो ण्यन्तेभ्यो मं भवति ।··· अद्यर्थेभ्यः निगारयति । भोजयति । आशयति JaineVyā. 33. 4 (*on* i. 2. 84); i. 2. 122; ii. 4. 59; S'ākaṭāVyā. i. 3. 118; SiddhaHe. v. 1. 12; *m.* meaning 'to eat' सर्वत्राद्यर्थकार्यमदेर्नेष्यते । आदयन्ते देवदत्तेन JaineVyā. 33. 6 (*on* i. 2. 84); Prasā. ii. 326. 16.

अद्यर्थवर्तमान (adyartha-vartamāna) *adj.* having the meaning of the root *ad*- भुजेरद्यर्थवर्तमानाद्दो भवति । भुङ्क्ते । भुञ्जाते । भुञ्जते JaineVyā. 31. 6 (*on* i. 2. 63)

अद्यवत् (adya-vat) *adv.* like this day, as (it occurs) today तस्माद-द्यवदेवात्र सर्गप्रलयकल्पना । समस्तक्षयजन्मभ्यां न सिध्यत्यप्रमाणिका S'lokaVār. 5(15). 113 (673. 1); Kāśi. i. 141. 8 (*on* 2. 154); अद्यवदेव विश्वम्भरादयः ··· न युगपदुदयविलयभागिनः ĀgaPrā. 15. 2; YuktiSneha. 30. 29 (*on* i. 1. 2); अद्यव-देव विश्वम्भरादयः क्रमप्राप्तागन्तुकोपचयापचयैकदेशशालिनः ĪśvaSi. (Yā.) 73. 25.

अद्यस्तोत्रिय (adya-stotriya) *n.* the *stotriya* (*tṛca*) (of a particular *stotra* to be chanted) in today's Soma-sacrifice श्वस्तोत्रियमद्यस्तोत्रियस्यानुरूपं कुर्वन्ति GopBr. ii. 5. 11.

अद्यश्व (adya-śva) *n.* today and tomorrow, the present and the following day अस्या अमुष्या अद्यश्वात् मिथुनादहोरात्राभ्यामेवैनान् निर्भजति Pañc-Br. ix. 4. 18; इन्द्र त्रिधातु शरणमिति संतनयः प्रगाथा भवन्त्यद्यश्वस्यैव संतत्यै JaimiBr. 2. 391; एतद्ध वा अद्यश्वं देवानां यद् गौरिवीतम् JaimiBr. 3. 17.

अद्यश्वस् (adya-śvas) *adv.* today and / or tomorrow, quickly, soon सर्वचर्मार्थश्वोदशैकादशमाशब्दोर्ध्वदेहोर्ध्वेन्दमकृतपूर्वादियस्तद्धिते SaraKaṇṭhā.(Gr.) iii. 2. 4 (comm. अद्य श्वो वा जायते अद्यश्वीना गौः); क्रियापरिच्छेदहेतुः कालः··· तन्निबन्धनश्च लोके अद्यश्वः परश्वः S'ṛṅgāPra. 142. 7; अद्यश्व इति । आसन्नप्रसवा इत्यर्थः BālamBha. i. 224. 23 (*on* 1. 81); अद्यश्वः फणिनां शकुन्तशिशवो दन्ताव-लानां शशाः सिंहानां च सुखेन मूर्धसु पदं धास्यन्ति शालावृकाः BhāmiVi. 1. 70 (comm. अद्य अधुनैव श्वो वा अतिशीघ्रमेवेत्यर्थः)

अद्यश्वीन (adyaśv-īna) *adj.* [*f.* -ā] [*nipātana* in P. v. 2. 13; Jaine-Vyā. 238. 32 (*on* iii. 4. 134); CāndraVyā. iv. 2. 21; SiddhaHe. vii. 1. 105] **i** likely to happen today or tomorrow, imminent केचित्तु विजायते इति नानुवर्तयते । अवष्टब्धमात्रे निपातनमित्याहुः । अद्यश्वीनं मरणम् । अद्यश्वीनो वियोगः KāśiVṛ. *on* P. v. 2. 13; अद्यश्वीनमिदं मन्ये तस्याः प्राणविवर्जनम् PadmP.(Ra.) 81. 69; 29. 64; YaśasCam. ii. 354. 23; प्राणापातध्वंसिताङ्गस्य शत्रोरद्यश्वीनं मृत्यु-मन्यश्चकार Rāvaṇā. 16. 46; PrabhāC. 58. 14; स मेने भवमाश्वीनमद्यश्वीनं जयो-त्सवम् S'āliC. 5. 46 (comm. अद्य श्वो वा भवम्); ह्यद्यश्वीनो गोसमूहः अद्यश्वीनं गोमण्डलमित्यत्रापीष्टत्वात् PadMañ. *on* KāśiVṛ. *on* P. v. 2. 13; केचित्तु विजायत इति नानुवर्तयन्ति । अद्यश्वीनं मरणम् । आसन्नमित्यर्थः SiddhāKau. 294B. 12–13; Prasā. i. 867. 17–18; **ii** (female) likely to deliver today or tomorrow, *on* the verge of delivering याद्यश्वीना सा स्यादित्याहुः S'āṅkhaS'S. xvi. 22. 25; अद्य वा श्वो वा विजायते । अद्यश्वीना गौः । अद्यश्वीना वडवा KāśiVṛ. *on* P. v. 2. 13; अद्यश्वीनाभिश्च गोभिरशून्यपर्यन्तैः ··· सर्वतः समाकुलैर्गोकुलैरधिष्ठितकक्षोप-कण्ठां नगरसीमामलङ्घयम् TilaMañ. 118. 2; Vaija. 174. 17; अद्यश्वीना तु सा गौः स्याद्यद्य श्वो वा विजायते KośaKaTa. 1. 6776; SiddhāKau. 294B. 12; Prasā. i. 867. 17; **iii** delayed, postponed अकालसहं कार्यमद्यश्वी(? श्वी)नं न कुर्यात NītiVā. 10. 63.

अद्यश्वीनपथा (adyaśvīna-pathā) *f.* the matter of what is happening today or tomorrow (i. e. immediate) तस्य ··· प्राणेषु चाद्यश्वीनपथा कथा YaśasCam. ii. 363. 19.

अद्यश्वीनविनाश (adyaśvīna-vināśa) *adj.* perishing today or to-morrow, perishing immediately अद्यश्वीनविनाशस्य शरीरस्य शरीरिणाम् । सकाम-निर्जरासारं तप एव महाफलम् TriṣaS'aPuC. iv. 7. 377.

अद्यश्वीनसमागम (adyaśvīna-samāgama) *adj.* to be met today or tomorrow जनानां जानतामेतानद्यश्वीनसमागमान् PāṇḍaC. 7. 506.

अद्यसिद्धि (adya-siddhi) *f.* success on the very day, immediate success अथ सिद्धैः (v. l. अद्यसिद्ध्यै) शुभैर्भक्ष्यैर्नैवेद्यं विनिवेदयेत् BhaviP. 689A. 20 (iv. 59. 5)

अद्यसुत्या (adya-sutyā́) *f.* pressing of Soma (in sacrifice) on the very day अथ वयमद्यसुत्यामेव तुभ्यं प्रब्रूमोऽङ्गिरोभ्यश्च S'atBr. III. v. 1. 15; KauṣīBr. 30. 6 (144. 17); इमामेव वयं तुभ्यमद्यसुत्यां प्रब्रूमः JaimiBr. 3. 188; आदित्या अद्यसुत्यां ददृशुः GopBr. ii. 6. 14; अद्यसुत्यामित्यालेखनः ĀpaS'S. xxi. 6. 2; KātyS'S. xii. 6. 26.

अद्यस्तोत्रिय (adya-stotriya) *n.* the *tṛca* which is at the basis of to-day's *stotra* श्वस्तोत्रियमद्यस्तोत्रियस्यानुरूपं कुर्वन्ति GopBr. ii. 5. 11; ii. 5. 15.

अद्यहत (adya-hata) *adj.* killed today देवाद्यहतमृगाणां (v. l. अद्य-हतानां मृगाणाम्) मांसं क्व Hitopa. 2. 79(20)

अद्याग्रेण (adyāgreṇa) *adv.* from now on, henceforth अद्याग्रेण अच्छि-न्नाग्राणि तृणानि भक्षयत Divyāva. 4. 22; 44. 11.

अद्यादि (adyādi) *adj.* (words) beginning with *adya* तच्छतम् । सार्ध-मद्यादिभिः प्लुतैः पादादौ व्यञ्जनोदयम् ṚPrāti. 7. 19.

अद्यादि (adyādi) *adv.* from today, today onwards स्थिरस्त्वमद्यादि दुरात्मदण्डकः सुपालकः पुण्यकृतां च मत्प्रियः SkandP. iv. 32. 51; vi. 129. 63.

अद्यादिविक्रयिन् (adyādivikray-in) *adj.* seller of eatables etc. फला-

चादिविक्रयिण ईशाने च वणिग्जनाः AgniP. 106. 9.

अद्याद्य (adyādya) *adj.* eatable etc. पूर्ववत् पूर्वमद्याद्यैः पदार्थैः परितोषयेत् KulārT. 10. 35.

अद्याद्या (adyádyā) *adv.* [PadaPā. अद्यऽअद्य] on each present day अद्याद्या श्वःश्व इन्द्र त्रास्व परे च नः ṚV. viii. 61. 17.

अद्यापि (adyāpi) **i** even now, even today, even to this date, down to the present time ते उ एवाद्यापि हविर्धाने AitBr. 5. 3 (124); 3. 5 (67); राहुः ... ग्रसत्यद्यापि चैव तौ MahāBhā. i. 17. 8; i. 57. 19; कृताभिषेकैस्तैर्न्यस्ता वल्कलाः पादपेष्विह । अद्यापि न विशुष्यन्ति Rāmā. iii. 70. 22; अद्यापि तन्मे हृदि वर्तते च Saund. 7. 18; 11. 44; अद्यापि हस्तिकरशीकरशीतलाङ्गीं बालाम् ...स्वप्नेषु नित्यमुपलभ्य Avimā. 2. 1; 2. 6(25); किं नु खल्वद्यापि वृत्तान्तं न प्रेषयति स ब्राह्मणः PratiYau. 2. 5(5); अद्यापि स्तनवेपथुं जनयति श्वासः प्रमाणाधिकः S'āk. 1. 29; अद्यापि नोज्झति हरः किल कालकूटम् S'atTrayī. 202; सुप्तोऽस्यद्यापि जीव स्मरसि न चरणस्(?णौ) त्वं कुतो माधवस्य S'atTrayī. 660; किमद्यापि ममोपरि ... विश्वासकारणम् PañcT. 2. 22 (203. 1); 2. 29 (229. 11); 4. 1 (375. 2); न ते संसारेऽस्मिन् भवति सुखदाद्यापि विरतिः VijñāS'. 13; वाल्मीकेरागमनमुदीक्षमाणो नाद्यापि यज्ञदीक्षां प्रविशति महाराजः KundaMā. 2. 1 (143); किमद्यापि निह्नूयते एव विषेः किलैतद्व्यवसितं न लोभस्य MudrāRā. 5. 20 (1); सुचरितपदवीमनुयान्ति यस्य नाद्यापि सत्पुरुषाः EI. xviii. 126. 2; यो वाजीकरणार्थमुज्झति वसून्यद्यापि वैद्यादिषु PādaTā. 8. 4; यत्र ... अद्यापि तद्रागाविद्धनिर्गतपलाशमिवाभाति नवकिसलयमरण्यम् Kād. 21. 16; 21. 10–11; अस्य देहस्य ... दोषानुदाहरन्तो नाद्यापि पारं पश्यन्ति महर्षयः AvantiKa. 42. 14; 70. 20; 209. 18; 211. 16; त्वमद्यापि प्रकृतिविश्रम्भणायोपेक्षितः DaśKuC. 84. 15; न जातु वैनायकमेकमुद्धृतं विषाणमद्यापि पुनः प्ररोहति S'iśuVa. 1. 60; गुरुः खेदं खिन्ने मयि भजति नाद्यापि कुरुषु VeṇīSaṁ. 1. 100 = KāvyPra. 74. 6; यस्याद्यापि हतारातिमन्दिरोद्यानपादपान् । दावव्याजेन दहति प्रकामं कोपपावकः EI. i. 181. 4; नैकोऽपि त्वादृशोऽद्यापि जायमानेषु राजसु Kāvyāda. 2. 47; अद्याप्यनिर्मुक्तमन्दरमन्थनसंस्कारमिवावर्तभ्रान्तिभिः सापस्मारमिव फेनैः ... जलनिधिमपश्यत् VāsaDa. 268. 7; किमद्याप्यसंभावनेयमस्मासु MahāviC. 1. 51(4); 4. 55(5); 5. 39(4); 6. 7(4); कथमद्यापि नोच्छ्वसिति MālaMā. 9. 117; आः कथमद्यापि राक्षसत्रासः UttaRāC. 1. 50(1); 3. 14; 4. 3(2); 7. 17(2); अद्यापि बिभर्ति वटो विशेषणं यदभिसंबन्धात् KuṭṭaMa. 175; 354; तथा हि चरणाक्रान्तिनतमद्यापि यशांसि शाद्वलम् BṛKathāS'loSaṁ. 9. 36; 15. 48; अद्यापि ... सर्वा दिशो धवलयन्ति येषाम् EI. ii. 345. 5; यस्य ... कीर्तिम् ... अद्यापि ... गायन्ति सिद्धस्त्रियः EI. ii. 346. 10; देवि किमद्यापि स्त्रीस्वभावं न मुञ्चसि ĀścaCū. 2. 9(4); अद्यापि यस्य शिरसि श्रियमेति HarVi. 1. 43; अवलोक्य वक्त्रकमलं यस्य शशी ... क्षीयतेऽद्यापि EI. i. 156. 4; नाद्यापि विश्रान्तिमुपैति शब्दः EI. iv. 283. 21; दानविस्मितचित्तेन शिरःकम्पं विधास्यता । भूकम्पः क्रियतेऽद्यापि EI. xix. 176. 16; सखा च मे कौण्डिन्यः कौसीद्याद्याप्यध्वनि मन्दायते SubhaDha. 1. 9(3); 2. 14(34); 5. 11 (19); येनाद्यापि करङ्कदण्डपतनाशङ्की जनस्तिष्ठति AmaS'. 131; शुकादयः ... मन्त्रमिमं पुण्यं जपन्त्यद्यापि पार्वति KulārT. 3. 68; यदेकादशमाधारं बीजं कोणत्रयोद्भवम् । ब्रह्माण्डादिकटाहान्तं जगदद्यापि दृश्यते NityāṢoḍa. 1. 6; अभूद्देवादियः ... जनाः कीर्तिपीयूषसिन्धुं यस्याद्यापि श्रवणपुटकैः ... पिबन्ति NalaCam. 1. 19; 1. 53(5); यस्य च ... कीर्तिपरिवरा ... न च क्वचिदद्यापि बध्नाति स्थितिम् YaśasCam. i. 87. 2; ii. 180. 3; न पुनरेतस्य (साहित्यस्य) ... अद्यापि कश्चिदपि विपश्चिदयमस्य परमार्थ इति मनाङ्मात्रमपि विचारपदवीमवतीर्णः VakroJī. 26. 16; यस्य... कीर्तिमूर्तिर्लोकेऽद्यापि स्थिरा EI. ii. 121. 12; अद्यापि तूर्णममुना स्वभुजार्जितेन हेमाम्बुजेन विरचय्य वतंसमस्याः NavaSāC. 18. 40; अद्यापि देवा इच्छन्ति जन्म भारतभूतले BṛNāraP. 3. 52; येषामद्यापि कीर्तिर्धवलयति ... विश्वम् EI. xxii. 130. 6; ये खलु नाद्यापि संभूतिमनुभवन्ति TattvPradī.(A). 51. 6 (*on* 1. 38); भ्रमरः ... वारणोऽद्याप्यसौ ... निषेव्यत इति भ्रातः क एष ग्रहः BhallaS'. 18; अद्यापि बालो दामोदरः SaraKaṇṭhā. 539. 6; येनाद्यापि च तैः स्मृतेन हरिणैः शष्पं परित्यज्यते KaviKaṇṭhā. 4. 1(8); अद्यापि यस्य चरितानि जनाः ... स्तुवन्ति EI. xxv. 57. 23; अद्यापि ... सीमन्तिनीनां हृदि स्थातुं वाञ्छति मान एषः KāvyPra. 361. 3; अद्यापि ... नृत्यत्पिशाचाङ्गनाः । उद्गायन्ति यशांसि यस्य PraboCan. 1. 5 (3. 12); 3. 19 (59. 11); 4. 1 (65. 13); अद्यापि तां कनकचम्पकदामगौरीम् ... चिन्तयामि CaurPañ. 1; 50; न वैरे वाच्यता राहोर्यस्याद्यापि न शाम्यति । कण्ठे कठिनवैकुण्ठचक्रधारोद्धतव्यथा DaśāvaC. 4. 47; निर्दग्धाः ... दृश्यन्तेऽद्यापि भूतेश्च इव धवलैरस्थिभिः EI. iv. 316. 11; भो लङ्केश्वर दीयतां जनकजा ... नाद्यापि किञ्चिद्गतम् VyaktiVi. 66. 25 = SāhiDa. 189. 6; शङ्के पङ्कजसंभवस्तु भगवानद्यापि बाल्यावधिः ... प्रियां कलयितुं दीर्घं तपस्तप्यते SubhāRaK. 16. 81; मुधा भानोऽद्यापि कुतोऽस्ति दक्षिणदिशः कोणान्तवासी मुनिः EI. i. 310. 25; लोके यस्य पितामहः शुचिमहःपुञ्जं निजं नाटयत्यद्यापि EI. xxii. 61. 20; नृपतेरद्यापि यस्य ... प्रशस्तिं पराम् ... पठन्ति ... नदाः EI. xxii. 60. 10; xxii. 60. 13; xxii. 61. 17; यस्मादद्यापि ... त्यजति न दिशं दक्षिणां प्रेतभर्ता EI. i. 308. 8; i. 309. 20; अथ सकलगुणानामाकरस्तस्य शिष्यो हृदयशिवसमाह्वो यद्यशोऽद्यापि वर्ण्यम् EI. i. 259. 21; यदीयैरद्यापि ... यशोभिः शोभन्ते ... दिशः EI. xii. 8. 11–12; नृपस्त्वां हन्तुमुद्यतः । ... किञ्चिन्नाद्यापि बुध्यसे Mānaso. ii. 18. 990; (ब्रह्मा) अद्यापि विधानवपक्षसङ्गं खलप्लवंगस्य न निर्मिमीते S'rīKaC. 2. 17; नन्दिक्षेत्रे ... अद्यापि यत्र व्यज्यन्ते पूजाचन्दनबिन्दवः RājTa (Ka.) 1. 36; 3. 78; तामद्याप्यरिमन्दिरे कृतपदां लक्ष्मीमुपेक्षामहे PārthPa. 10; 29(18); तदद्यापि हि गार्हस्थ्यतृषो रंस्ये तया सह PariPar. 1. 355; AdbhuSāg. 1. 15; अद्यापि तेन देवाद्याः श्रूयते मन्वते सदा AnuVyā. 49A. 5 (*on* 3. 3); कथमद्यापि हठाहरणखिन्नाम् ... जानकीम् ... पश्यामि PrasaRā. 7. 8(1); नागतो गोपोऽद्यापि वनान्तरात् GopāKeCan. 116. 26; 118. 34; अद्यापि न कोऽपि दूतः समुपैति HammīMaMa. 3. 11(5); कथमद्यापि चिरयति मम प्राणेश्वरी MohaRāPa. 1. 3(2); यत्रैकपलितभ्रान्तिं करोत्यद्यापि जाह्नवी SūktiMu. 2. 2; 2. 76; अद्याप्येतत्सकलमकृथा नार्थिसात् Ekāva. 8. 30(18) (271. 7); (त्वाम्) नाद्यापि पश्यति ... उपनिषदाम् ... सहस्रम् KṛṣṇaKa. 1. 94; अद्याप्य[न्ति]क्रभूरमुष्य ... तेजसामुद्गमैः ... विद्योतते EI. iii. 12. 8; विवृद्धिमेहि महतीमद्यापि SūktiRa. 171. 22 अद्यापि ... तत् पाठ्यमानमास्ते PrabaK. 4. 25; 77. 9; अद्याप्यसौ नागतः JīvanVi. 117. 10; कुमारसचिवैर्नाद्यापि किं मुच्यते SāhiDa. 579. 5; न तव क्लान्तिरद्यापि शान्ता HaṁsaSaṁ. 86; अतः क्रियन्ते जनताभिरेषामद्यापि कण्ठे गुणबन्धनानि Nalābhyu. 1. 23; अद्याप्युज्झति नैव दैवविहितं क्षैण्यं क्षपावल्लभः BhojPra. 6. 21; मालवक्ष्मापोऽद्यापि ... भयेन चकितः स्वप्नेऽपि तं पश्यति EI. xxi. 283. 13; तैः सार्धमद्यापि यः ... वाराणस्यधिवासतामधिगतः EI. xv. 22. 53; मुखत्यद्यापि राहुः Subhāṣi. 51; अद्यापि घासकवलग्रसनानभिज्ञो मन्मार्गवीक्षणपरस्तनयो मदीयः Subhāṣi. 660; गवादीनां पयः ... दधि जायते । क्षीरोदधेस्तु नाद्यापि महतां विकृतिः कुतः Subhāṣi. 854; 1106; 1278; यस्य (चामुण्डराजस्य) प्रतापः प्रसृतः पृथिव्यां बिभेद शङ्के दृषदोऽपि नूनम् । अद्यापि नो चेत् स्फटिकोपलेभ्यो हिरण्यरेताः प्रकटः कुतोऽस्तु HammīMaKā. 2. 23; प्राणाः पान्थ समं त्वयैव चलिताः काद्यापि जन्मैकता MādhavaĀ. 113; अद्यापि लोकैस्तत्सर्वमप्यालोक्यते PurāPraSaṁ. 94. 7; सः ... नाद्यापि प्रत्यवस्थानाद्विरमति KaṁVa. 5. 15 (12); यस्य ... अद्यापि ... धत्ते संततिरुन्नतिम् EI. ii. 57. 5; ताडंकम् ... प्रिया । धत्ते ... अद्यापि EI. viii. 111. 55; अद्यापि क्षीयते नैव श्रीकर्णस्य यशोभरः CampaS'reKa. 41; यदद्यापि वार्तिककारभाष्यकारादयो विवदन्ते MīmāKau. i. 112. 9 (*on* i. 3. 24); मानमपाकरोषि न मनागद्यापि RasGaṅ. 90. 19; 112. 4; मुदा यं गायन्ति ... अद्यापि ... सगरजाः GaṅgāL. 16; किं वा न तदवतीर्णमद्यापि तस्य कर्णपथम् NīlaVi. 32. 17; कराल त्वं वत्स क्व गत इति नाद्यापि विदितः JānaPa. 3. 4; 4. 33; तत् ... अद्यापि सन्धिशाखाङ्कैर्दृश्यते SetuBa. 15. 17; 18. 8; **ii** even at this stage, even by this much (referring to condition or stage) सिद्धे हि चोदनायाः प्रामाण्ये तस्यार्थो निरूपयितुं युक्तम् 'स्वाध्यायोऽध्येतव्यः' इति, तन्नाद्यापि प्रमाणम् TātpaṬ.(U.) 5. 27 (*on* 1. 11); नाद्याप्यभिन्नं वस्तु आगमार्थ इति निश्चितम् IṣṭaSi. 26. 11; ननु नाद्यापि चतुष्ट्वमेवमवतिष्ठते NyāyMañ. i. 59. 18; अद्यापि न हि ते सिद्धा मिथः संकरभागिनः TarkSaṁ.(Ā.) 98. 4; 30. 11; ब्रह्म त्वद्यापि न सिद्धम् – एतादृशं नैतादृशमिति AṇuBh. 111. 18 (*on* i. 4. 17); ननु स धर्मः कीदृशः । न तावदापरोक्ष्यम् । तस्यैव विचारविषयत्वेनाद्याप्यसिद्धेः TantrRaha. 8. 29.

अद्यारभ्य (adyārabhya) from today onwards, since this day अद्यारभ्य निवत्स्यामि मुनिवत् Kāvyālaṅ.(Bh.) 5. 43; अद्यारभ्य तपश्चरणपरायणो भवामि PuruṣPa. 172. 18; 219. 18; अद्यारभ्य यावत्कालेन स्ये(?से)त्स्यति तावत्कालम् ... पुरश्चरणमहं करिष्ये TantrSā.(R.) 41. 16.

अद्यावधि (adyāvadhi) *adv.* till today, hitherto, until now, up to this time अद्यावधि त्वया विप्र ... कथं नाज्ञायि तनयः S'ivaP. ii(1). 17. 44 (61B. 16); अद्यावधि कृतिरेषा BhāṭṭCin. 127. 1 (*on* xvi. 4. 10); अद्यावधि कृतिघ्नास्तु श्रुता दृष्टाश्च सांप्रतम् UttaKuC. 64; तेनाद्यावधि गोकुलेन्द्रतनयः स्वाच्छन्द्यमेवास्तु ते CaitaCa. 263. 11 (10); अद्यावधि न कस्यापि कथितम् SetuBa. 179. 10; 224. 4; **B** from today onwards अद्यावधि एते सर्वे शूद्रवद्ब्राह्मणाः BallāC. 108. 8.

अद्याश्व (adyā-śvá) *n.* today and tomorrow उभे बृहद्रथन्तरे भवतः ... अद्य वाव रथन्तरं श्वो बृहद्द्याश्वादेवैनमन्तरेति TaiS. III. i. 7. 2 (Bhaṭṭabhāskara अद्य च श्वश्च अद्याश्वम् । अच् इति योगविभागात् अच् समासान्तः । अन्येषामपि दृश्यते इति पूर्वपदस्य दीर्घत्वम्)

अद्याहृत (adyāhṛtá) *adj.* brought (here) today पूर्वेद्युराहृतो यज्ञस्य रसो युश्चाद्याहृतस्तमेवैतदुभयं संसृजति S'atBr. III. ix. 3. 29.

अद्यु (á-dyu) *adj.* without lustre अद्युं कृणोत् शंसं निनित्सोः ṚV. vii. 34. 12.

अद्युत् (a-dyút) *adj.* having no light, without light अयं द्योतयदद्युतो व्य१क्तून् ... इन्दुरिन्द्र ṚV. vi. 39. 3.

अद्युतत्तराम् (adyutat-tarām) [3rd Per. sg. aor. of द्युत् to shine

with तराम्] MahāP. 26. 36; RāghPāṇ.(Dha.) 4. 23

अद्युति (a-dyuti) *adj.* having no lustre or brightness अखण्डमण्डलः क्वेन्दुः क्व कान्ताननमद्युति Kāvyālaṅ.(Bh.) 2. 44.

अद्युतित्वा (a-dyutitvā) *ger.* without shining द्योतित्वा शत्रवोऽपरस्मिन् दृष्ट्वा यं युधि नेशुरद्युतित्वा Rāvaṇā. 1. 28.

अद्युस्थ (a-dyustha) *adj.* not in the second member of (द्यु = उत्तरपदं) a compound सस्सेऽद्युस्थस्य JaineVyā. v. 4. 33.

अद्यूत (a-dyūta) *adj.* [*f.* -ā] **i** without gambling यत्र सर्वत आपः प्रस्यन्देरन् सा स्वस्त्ययन्यद्यूता च ĀśvaGS. ii. 7. 11; ii. 7. 9; **ii** other than the (meaning of) gambling अद्यूते दिवः CāndraVyā. vi. 3. 85.

अद्यूत्य (a-dyūtyà) *n.* unfavourable game of dice, game not decided by dice [GELD.] अद्यूत्येऽवसे नि ह्वये वाम् RV. i. 112. 24 (Sāy. अद्यूत्ये द्योतनरहिते प्रकाशनरहिते रात्रेः पश्चिमे यामे); VājaS. 34. 29 (Mahīdhara सन्मार्गागते) VājaS.(K.) xxxiii. 1. 23.

अद्यूनता (adyūna-tā) *f.* lack of fair play अहोऽस्याद्यूनता येन सुप्ते मय्येकको ऽस्त्यसौ KumāDeC. 3. 8.

अद्येव (adyeva) may be today (i. e. uncertain) एवे चानियोगे अद्येव KātanVr̥. *on* i. 2. 6; GaṇRa. 1. 4 (5); PrakriKau. i. 65. 1.

अद्यैव (adyaiva) this very day, just now, immediately तन्मामद्यैव पश्यन्तु पाण्डवाः संशितव्रतम् MahāBhā. xi. 1. 20; अद्यैव कुरु यच्छ्रेयो मा त्वा कालोऽत्यगादयम् MahāBhā. xii. 169. 13; तस्मादद्यैव सहिताः ... देवानेव जिघांसामः Rāmā. vii. 6. 44; तस्मादद्यैव मे श्रेयश्चेतव्यमिति निश्चयः BuddhaC. 6. 22; रागाग्निरद्यैव हि मां दिधक्षुः Saund. 10. 53; नियोगे तु। अद्यैव गच्छ KātanVr̥. *on* i. 2. 6; अशून्या मे रसाद्यैव भवतः पुण्यकर्मणः BrahmāṇḍP. i. 1. 25; अथास्ति प्रत्याशा, अथवा अद्यैव प्राणा मोक्तव्याः PratiYau. 1. 5 (11); अद्यैव वा मरणमस्तु युगान्तरे वा S'atTrayī. 265; नन्वद्यैव ... वो गुणवति गृहे रामभद्रः सुजातः MahāvīC. 3. 47; अद्यैवाहं च्युतो राज्यात्। न मे सम्पाद्यत्याज्ञाम् BrKathāS'loSaṁ. 14. 21; अद्यैव नष्टं कुरूणां बलमिति धार्तराष्ट्रा मेनिरे GītāBh.(Rā.) 36. 1 (*on* 1. 9)

अद्योच्चरित (adyoccarita) *adj.* uttered today अद्योच्चरितेऽपि गकारेऽवश्यं किञ्चिद्रूपं गृह्यते S'āstrDī. 142. 19 (*on* i. 1. 6)

अद्योच्चारित (adyoccārita) *adj.* uttered today ह्यस्तनोच्चारणो वापि गोशब्दोऽद्यापि विद्यते। गोशब्दज्ञानगम्यत्वादद्योच्चारितशब्दवत् TattvSaṁ. 2126.

अद्योढा (adyoḍhā) *adj.* (*f.*) indeed married today अद्य + ओढा = अद्योढा KāśiVr̥. *on* P. vi. 1. 95; ऊट इति किम्? अद्योढा KātanVr̥. *on* iv. 6. 116; आ + ऊढा = ओढा, अद्य + ओढा = अद्योढा PadMañ. *on* iii. 3. 141; अद्य आ ऊढा = अद्योढा इत्यत्र पूर्वमन्तरङ्गत्वाद्गुणे पररूपम् LaS'abdeS'e. ii. 566. 6.

अद्योतक (a-dyotaka) *adj.* not expressing, not indicating [*nt.*]

अद्योत्पन्न (adyotpanna) *adj.* born today, newly born अद्योत्पन्नमिवात्मानमवगच्छामि ŪruBha. 45 (7)

अद्योत्य (a-dyotya) *adj.* not to be suggested or indicated यो हि मन्यतेऽद्योत्ये तस्मिंस्तेन (प्रत्ययेन) भवितव्यम् MahāBh. ii. 13. 5 (*on* iii. 1. 7)

अद्रढिमन् (a-draḍhiman) *m.* non-firmness or weakness तन्न पूर्वहेतुरद्रढिम्ने नाप्युत्तरो द्रढिम्ने तस्मानियमाभ्युपगमेऽधिकाभिमानं दोष एव NyāyMañ. ii. 201. 3.

अद्रव (a-drava) *adj.* not liquid अद्रवं मूर्तिमत्स्वाङ्गम् MahāBh. ii. 222. 9 (*on* iv. 1. 54) = CāndrVr̥. *on* i. 3. 146 = CāndraVr̥. *on* ii. 3. 61 = KāśiVr̥. *on* iv. 1. 54; *on* i. 3. 27 = PrakriKau. i. 365. 3 = SiddhāKau. 126A. 13; स्वाङ्गं स्यादद्रवं मूर्तम् MugdhaBo. 4. 17 (43. 4); सर्वं चाम्लं द्रवमद्रवं च पयसा सह विरुद्धम् CaraS. i. 26. 86 (1922 Ed.) = AṣṭāSaṁ. i. 55. 24 (1. 9); सपाण्डुवर्णं घनमद्रवं च तत्पक्वलिङ्गं शकृदुद्दिशन्ति Hastyāyur. 92. 14 (1. 12); नैकध्यं पयसाश्नीयात् सर्वं चोष्णं द्रवाद्रवम् BhojanKu. 135. 2.

अद्रवत्व (adrava-tva) *n.* the state of not being a liquid, non-liquidification अद्रवत्वादनग्नित्वादभौमत्वादवायुतः। ... वृक्षाणां नास्ति भौतिकम् MahāBhā. xii. 177. 9; सागरश्च क्षयं गच्छेदनलश्चापि शीतताम्। आपोऽद्रवत्वं च Rāmā. vi. 796*(9); AdvaiSi. 792. 12; एवमपि ज्ञानं स्वाङ्गं स्यात् प्राणिस्थत्वादद्रवत्वाच्चेत्यत आह। मूर्तिमदिति Prasā. i. 365. 11; Kālacakra. 5. 119 (nt)

अद्रवपायिन् (a-dravapāyin) *adj.* who does not drink liquid स्थिरतां गतमक्लिन्नमन्नमद्रवपायिनाम्। भवत्याबाधजननमनुपानमतः पिबेत् SuśruS. i. 46. 439.

अद्रवमूर्तिमल्लक्षण (adravamūrtimal-lakṣaṇa) *adj.* having non-liquid condition and material form as the characteristics न चात्राद्रवमूर्तिमल्लक्षणं पारिभाषिकं स्वाङ्गं विवक्षितम् Nyās. i. 224. 23 (*on* i. 3. 20)

अद्रवरूपत्व (adravarūpa-tva) *n.* the state of having a non-liquid form ननु चैवमप्यद्रवरूपत्वात्पिण्डीभिरेकतापन्नायाः सुराया न पानोपपत्तिः ManuBh. i. 360. 20 (*on* 4. 80)

अद्रवरूपवन्मात्रवृत्ति (adravarūpavanmātra-vr̥tti) *adj.* existent only in what is not liquid and what has colour अन्ये तु तेजस्त्वं नाद्रवरूपवन्मात्रवृत्ति ... पृथिवीत्ववत् TattvCin. i. 757. 1 (comm. नाद्रवमात्रवृत्तीत्येवं साध्यं रूपवत्पदं च स्वरूपोत्कीर्तनं न तु साध्यप्रविष्टम्)

अद्रवादिक (adravādi-ka) *adj.* other than liquid etc. नात्राद्रवादिकं स्वाङ्गं विवक्षितम् Prasā. ii. 401. 9.

अद्रवादिलक्षण (adravādi-lakṣaṇa) *adj.* having non-liquid condition etc. as the characteristics स्वमङ्गं स्वाङ्गम्, न तु पारिभाषिकम् अद्रवादिलक्षणम् PadMañ. *on* KāśiVr̥. *on* P. i. 3. 20; स्वाङ्गमद्रवादिलक्षणं पारिभाषिकं गृह्यते Prasā. i. 689. 12.

अद्रविण (a-draviṇa) *adj.* devoid of wealth, poor विमुक्तो व्यवसायेन लभते चेत्समीहितम्। न लोके विरही कश्चिद्भवेदद्रविणोऽपि वा PadmP.(Ra.) 111. 19; विद्वधासि ...। अद्रविणं द्रविणपतिम् KuṭṭaMa. 33.

अद्रव्य (a-dravya) *n.* **1** non-substance विभक्त्यर्थाभिधानेऽद्रव्यस्य लिङ्गसङ्ख्योपचारानुपपत्तिः Vār. 7 *on* iii. 2. 24; (क्रियावत्त्वं गुणवत्त्वं च) उभयमप्येतदद्रव्ये नास्त्येव PadārthSaṁ. 237. 21; 247. 8; किमेतिङ्सङ्ख्यादामन्तावद्रव्ये CāndraVyā. iv. 3. 46; किमेमिङ्झिङ्क्षादामद्रव्ये JaineVyā. iv. 2. 20; अद्रव्यत्वं वाक्येनाङ्गं स्यात् ṬupṬ. 7. 17 (*on* iv. 1. 11); विरोध्यद्रव्यममेदे S'ākaṭāVyā. ii. 1. 94; अद्रव्ये चासजातीये चैतन्ये वासना कुतः Br̥ĀraUBhāVā. ii. 3. 106; गगनगुणत्वे चाद्रव्यतया समवायिकारणत्वाभावेनावयवभावाभावात् TattvBi. 10. 1; कार्ये सूर्यस्य वै नित्यं विनियोगं करोम्यहम्। सबाह्याभ्यन्तरं सर्वं द्रव्याद्रव्यं प्रदर्शये PadmP. ii. 7. 48; विरोधिनामद्रव्याणां न वा द्वन्द्वः स्वैः SiddhaHe. iii. 1. 130; अद्रव्यमेतच्च विविच्यमानम् MahāViSt.(H.) 1. 23 = SyādvāMañ. 23; किमेव्याचाद्रव्ये चतरां चतमाम् MugdhaBo. 7. 51 (72. 6); द्रव्यस्यैव गुणवत्त्वनियमात् न अद्रव्ये तन्मुख्यता TarkSaṁ.(Ā.) 116. 18; 121. 7; 128. 9; अद्रव्यं च स्याद् गुणाश्रयाभावात् TarkBhā.(Ke.) 30. 13; आगन्तुकधर्माश्रयो द्रव्यम्। अतथाभूतमद्रव्यम् NyāyPari. 5. 6; 6. 8; 504. 8; 505. 19; न तावत्सर्वमद्रव्यं स्वाश्रयव्यापि NyāySiA. 190. 25; 241. 4; अद्रव्येऽपि द्रव्यत्वाध्यासंसम्भवात् SiddhāLeSaṁ. 207. 8; प्रकर्षेण मेयं प्रमेयम्। तच्च द्विविधं द्रव्याद्रव्यभेदात् YatīndraDī. 34. 8; 90. 2; LaS'abdeS'e. ii. 137. 10; **2** other than a substance (औषधं पुनश्च द्विविधम्) द्रव्यमद्रव्यं च।... अद्रव्यं पुनरुपवासानिलातपच्छायामन्त्रसान्त्व ... संवाहनादि AṣṭāSaṁ. i. 74. 5 (1. 12); सतां कृच्छ्रेषु पाण्डित्यमद्रव्यं दुःखभेषजम्। न तत्सुखे ... उपयुज्यते RāmāMañ. 161. 7; असागरोत्थं पीयूषमद्रव्यं व्यसनौषधम्। त्वयाहं पायितः PadmP. iv. 96. 2; **3** unsuited or improper person or thing क्रिया हि द्रव्यं विनयति नाद्रव्यम् ArthS'ā. i. 34. 4 (1. 5) = ManuBh. i. 295. 14 (*on* 3. 195); विनेतुरद्रव्यपरिग्रह एव बुद्धिलाघवं प्रकाशयति Mālavikā. 1. 16 (8); अद्रव्यमेत्य भुवि शुद्धनयोऽपि मन्त्री शीर्णाश्रयः पतति कूलजवृक्षवृत्त्या MudrāRā. 7. 14; नाद्रव्ये निहिता काचित्क्रिया फलवती भवेत् Hitopa. 0. 28; द्रव्यं हि क्रियां विनयति नाद्रव्यम् NītiVā. 5. 43; न शास्त्रमद्रव्येषु अर्थवत् KāvyālaṅSū. i. 2. 4; **4** section dealing with non-substance शब्दस्य द्रव्याद्रव्यत्वश्रोत्रगमनशब्दागमनादिविवादमद्रव्ये शमयिष्यामः NyāySiA. 194. 26.

अद्रव्य (a-dravya) *adj.* [*f.* -ā] **1** devoid of wealth, without property अद्रव्यां मृतपत्नीं तु सङ्गृह्णन्नापराध्नुते MatsyaP. 227. 129; किमद्रव्यस्याधिकारो नेति S'ābaBh. 1381. 17 (*on* vi. 1. 39); 1382. 1 (*on* vi. 1. 40); न च जात्या कश्चिदद्रव्यो नाम ṬupṬ. 101. 1 (*on* vi. 1. 40); वीरसूं प्रियवादिनाम्। त्यजन्दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियाः YājñaSm. 1. 76; नन्वद्रव्यस्यैव पुत्रो दद्यात् BālaKrī. i. 218. 8 (*on* 2. 47); i. 93. 20 (*on* 1. 99); य एवाद्रव्यः सोऽपि द्रव्यवान्भवति ManuBh. i. 89. 19 (*on* 2. 29); तेषामधिकारो भवत्येवाद्रव्याणाम् PrakaPañ. 483. 8; उताद्रव्योऽपि कर्मार्थेन द्रव्यमर्जयित्वानुतिष्ठन्नधिक्रियते S'āstrDī. 455. 9 (*on* vi. 1. 8); अद्रव्यो द्रव्यहीनः DīpKa. 11. 19 (*on* 1. 76); अद्रव्योऽपि द्रव्यमर्जयित्वा अधिक्रियत एव BhāṭṭDī. ii. 231. 20 (*on* vi. 1. 8); अद्रव्यस्य न क्रतुभिर्द्रव्याक्षेपः इत्यत आह MayūMāli. 455. 14 (*on* vi. 1. 8); **2** devoid of a *rc* (as the basis) अद्रव्यं चापि दृश्यते MīmāSū. vii. 2. 14; अपि चाद्रव्यं साम दृश्यते। द्रव्यशब्दश्छन्दोगैर्ऋक्ष्वाचरितः अद्रव्यम् अनृचमित्यर्थः S'ābaBh. 1546. 11 (*on* vii. 2. 14); **3** not having a substance as the basis or cause यदि रूपादयो न पतन्ति द्रव्ये पतति तिष्ठेयुरिति अद्रव्या रूपादयः स्युः NyāyVār. 238. 19 (*on* ii. 1. 31); अद्रव्यं परमाण्वादि TātpaṬ.(Vā.) 182. 15 (*on* i. 1. 5); नित्यः शब्दः अद्रव्यद्रव्यत्वात् NyāyKuA. i. 105. 5; न ह्यद्रव्यस्य विनाशः सम्भवति परमात्मादिवत् NyāyRa. 769. 14 (*on* 6. 156); न चेदमद्रव्यं रूपिद्रव्यम् Kiraṇā. 17. 18; वैशेषिकाणां हि अद्रव्यं वा द्रव्यम् अनेकद्रव्यं वा द्रव्यम् SyādvāMañ. 8 (29); **4** lacking in an offering material [अद्र] व्यस्य च होमस्य संनिहितद्रव्याकाङ्क्षत्वाच SaṅkaKāBh. 143 8 (*on* iii. 2. 41); **5** without discipline or worth छिनत्त्ये-

वायसं शस्त्रमद्रव्यं विषयं विष(? श)म् RāmāMañ. 131. 13.

अद्रव्यग्राहक (adravya-grāhaka) *adj.* causing perception of the non-substance तदेवं मनःस्पर्शनलोचनानि द्रव्याद्रव्यग्राहकाणि NyāySiA. 195. 8.

अद्रव्यचिन्तना (adravya-cintanā) *f.* enquiry into non-substance तत्रापि सप्रकारद्रव्यचिन्तनादद्रव्यचिन्तनाप्यन्तर्भवति NyāyPari. 510. 15.

अद्रव्यचिन्ता (adravya-cintā) *f.* inquiry about non-substance अथाद्रव्यचिन्ता TattvMu. 5. 2.

अद्रव्यजात (adravya-jāta) *n.* collection of non-substances तत्तद्रव्येषु दृष्टं नियतिमदपृथक्सिद्धमद्रव्यजातं तद्द्विश्वं परस्य TattvMu. 5. 1.

अद्रव्यजाति (adravya-jāti) *f.* category of non-substance प्राणिसदृशग्रहणादद्रव्यजातेर्न भवति । रूपरसगन्धस्पर्शाः CāndraVṛ. *on* ii. 2. 53.

अद्रव्यजातीयत्व (adravyajātīya-tva) *n.* the state of not belonging to the category of substance गुणादयो विवादाधिकरणा न पतन्ति अद्रव्यजातीयत्वाद्गुरुत्ववदिति सिद्धम् TātpaṬ.(Vā.) 394. 7 (*on* ii. 1. 33)

अद्रव्यडम्बर (a-dravyaḍambara) *adj.* free from the pomp of materials or wealth पुण्यतीर्थमनायासं क्रतुरद्रव्यडम्बरः । अशोषणं शरीरस्य क्षमा नाम परं तपः (v. l. तमः) BṛKathāMañ. ix. 1. 530 = SūktiRa. 179. 10.

अद्रव्यता (adravya-tā) *f.* the nature of not being a substance वेदयज्ञशब्दौ तदभिमानिदेवताविशेषपरौ गुणक्रियादेरद्रव्यतया शरीरत्वायोगात् S'rutaPra. iB. 316. 32 (*on* i. 2. 19)

अद्रव्यत्व (adravya-tva) *n.* **A i** the nature of a non-substance अद्रव्यत्वान्न संख्यास्ति तेषु काचिद्विभेदिनी TattvSaṁ. 640; अथ संबन्धः, तत्रापि संयोगस्तावन्नास्त्येव समवायस्याद्रव्यत्वात् TātpaṬ.(U.) 157. 20 (*on* 4. 148); न संयोगस्तावदिन्द्रियस्याभावेन सह, अद्रव्यत्वात् TātpaṬ. (U.) 414. 13 (*on* 5 (8). 18); न च चालनं ध्वजाग्रवत् सुकृतदुष्कृतयोर्मुख्यं संभवति, अद्रव्यत्वात् BrahmSūBh.(S'aṅ.) 662. 2 (*on* iii. 3. 26); संबन्धो हि सदाशिवस्य शक्त्या सह न ··· शक्तेरद्रव्यत्वात् YaśasCam. ii. 277. 7; स्वर्गशब्दः ··· द्रव्यं तु व्यभिचरत्येवमद्रव्यत्वात्स्वर्गस्य न क्रियाङ्गत्वम् NyāyMañ. i. 304. 27; तर्काश्चात्र ··· अद्रव्यत्वे निर्गुणत्वप्रसङ्गः ĀtmaTaVi. 811. 20; गुणवतोऽप्यद्रव्यत्वे तल्लक्षणव्याघातात् Kiraṇā. 112. 13; NyāyRa. 479. 13 (*on* 5 (8). 18); द्रव्यस्यैव तत्र तत्र तद्भावोपलम्भादद्रव्यत्वाच्चाभावमिथ्याज्ञानयोः NyāyMa. 114. 11; न चाद्रव्यत्वमुपाधिः TattvPradī.(Ci.) 318. 9; न च रूपादेरद्रव्यत्वादुक्तगुणवत्त्वराहित्यमद्रव्यत्वव्यतिरेकः पूर्वोक्तोपाधिसत्त्वात् TarkSaṁ.(Ā.) 4. 21; न च बुद्धेर्नित्यत्वम् ··· अद्रव्यत्वं तस्याः सुवचम् NyāyPari. 503. 25; न तावत्संयोगः दृशेरद्रव्यत्वात् S'atDū. 100. 19; ननु शब्दस्याद्रव्यत्वव्यञ्जकत्वे सिद्धान्तयितुं न शक्यम् NyāySiA. 248. 19; (अधिष्ठातृकृत्यम्) न तावन्नोदनादिकम् अद्रव्यत्वात् NyāySu.(Ja.) 109B. 5 (*on* i. 1. 3); तेषां शब्दात्मकत्वेनांबरगुणत्वे सत्यद्रव्यत्वात् PariVṛ.(Sī.) 38. 18; क्रियाया अद्रव्यत्वेन तद्विशेषणस्याप्यद्रव्यत्वात् Prasā. i. 435. 19; YuktiSneha. 86. 32 (*on* i. 1. 5); MānaMe. 15. 3; **A ii** the nature of not having a substance as its cause अद्रव्यत्वेन नित्यत्वमुक्तम् VaiśeSū. ii. 1. 13; अथाद्रव्यत्वे सतीति विशेष्येत, तथाप्यकारणवत्त्वमेव नित्यतानिमित्तमापद्येत BrahmSūBh.(S'aṅ.) 374. 3 (*on* ii. 2. 15); यतोऽद्रव्यत्वमविद्यमानकारणभूतद्रव्यत्वमुच्यते Bhām. 402. 17 (*on* ii. 2. 15); **B i** the state of not containing sacrificial material अद्रव्यत्वात्तु शेषः स्यात् MīmāSū. iii. 4. 21; ii. 3. 20; अग्निहोत्रादीनां शेषः स्यात् । कस्मात् अद्रव्यत्वात् S'ābaBh. 923. 3 (*on* iii. 4. 21); अद्रव्यत्वात् द्रव्यदेवतासंबन्धराहित्यान्न स्वतन्त्रं कर्म किन्तु क्रतुशेषः VedāntKa. 75. 2 (*on* i. 1. 4); **B ii** the state of not possessing the wealth or share in property द्रव्यवत्त्वात्तु पुंसां स्याद्द्रव्यसंयुक्तम्, क्रयविक्रयाभ्यामद्रव्यत्वं स्त्रीणां, द्रव्यैः समानयोगित्वात् MīmāSū. vi. 1. 10; न ह्यद्रव्यत्वं नियतं जातिवत् ManuBh. i. 89. 19 (*on* 2. 29); i. 337. 20 (*on* 4. 22); अद्रव्यत्वाच्च स्त्रिया द्रव्यत्यागात्मयागानुष्ठानासंभवात् ··· अनधिकारः S'āstrDī. 449. 16 (*on* vi. 1. 3); BālaKrī. i. 58. 21 (*on* 1. 50); BhāṭṭDī. ii. 220. 17 (*on* vi. 1. 2); स्त्रीणामद्रव्यत्वात् ··· इति पूर्वपक्षं कृत्वा सिद्धान्तितम् VīraMi.(Lakṣaṇa.) 15. 7; अद्रव्यत्वे हेतुमाह – भार्येति (भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः) MayūMāli. 449. 9 (*on* vi. 1. 3)

अद्रव्यत्वपक्ष (adravyatva-pakṣa) *m.* the view of (something) not being a substance अथाद्रव्यत्वपक्ष उच्यते (शब्दस्य) NyāySiA. 250. 13.

अद्रव्यत्वलक्षण (adravyatva-lakṣaṇa) *adj.* characterised by not being a substance नवबाह्यस्य सतोऽद्रव्यत्वलक्षणमन्ययोगं च व्यवच्छिनत्त्येवकारः SarvaDaKau. 7. 14.

अद्रव्यत्वसमर्थन (adravyatva-samarthana) *n.* justification of (something) being a non-substance न च द्रव्याद्रव्यविभागो माभूदिति वाच्यम्, भाष्यकारैरेव सत्त्वरजस्तमसामद्रव्यत्वसमर्थनात् NyāySiA. 242. 16.

अद्रव्यत्वसिद्धि (adravyatva-siddhi) *f.* establishment of (something) being a non-substance सत्त्वादिगुणोक्तनयाच्च शब्दानामद्रव्यत्वसिद्धिः NyāySiA. 248. 18.

अद्रव्यत्वापत्ति (adravyatvāpatti) *f.* contingency of (something) being a non-substance न च प्रकृतिपुरुषसंगतिः अतिरिक्तास्ति कालपदवेदनीयेति वाच्यम्, तस्याः संयोगत्वे तदात्मनोऽस्याद्रव्यत्वापत्तेः TarkSaṁ.(Ā.) 49. 30; न प्रथमे क्षणेऽद्रव्यत्वापत्तिः समवायिकारणं द्रव्यमिति द्रव्यलक्षणयोगात् TarkBhā. (Ke.) 31. 2.

अद्रव्यदेवता (a-dravyadevatā) *adj.* (*f.*) devoid of the oblation-material and deity एताश्चाद्रव्यदेवताश्चोदनाः अभिजिता यजेतेति S'ābaBh. 1593. 23 (*on* viii. 1. 16)

अद्रव्यदेवताक (adravyadevatā-ka) *adj.* devoid of oblation-material and deity अद्रव्यदेवताके केवले नामधेये श्रूयमाणे ब्रूमो ज्योतिष्टोम एव ग्रहाभ्यासविशेषविधानमिति S'ābaBh. 609. 7 (*on* ii. 3. 20)

अद्रव्यदेवतात्मकत्व (adravyadevatātmaka-tva) *n.* the state of not being of the form of oblation-material and deity न ··· वारवन्तीयं यागनिर्वृत्तिसमर्थमद्रव्यदेवतात्मकत्वात् TantrVā. 557. 19 (*on* ii. 2. 27)

अद्रव्यद्रव्य (adravya-dravya) *n.* substance not caused by (another) substance द्विविधं चाद्रव्यद्रव्यं, परममहदाकाशादिकं परमाणुरूपं च PrakaPañ. 148. 11; 332. 6.

अद्रव्यद्रव्यत्व (adravyadravya-tva) *n.* the state of a substance not caused by another substance अद्रव्यद्रव्यत्वात् परमाणावनुपलब्धिः रूपसंस्काराभावाद्वायोरनुपलब्धिरिति NyāyVār. 233. 2 (*on* ii. 1. 331); द्रव्यस्याश्रयभूतद्रव्यान्तरसद्भावे प्रमाणाभावादद्रव्यद्रव्यत्वं निश्चीयते PrakaPañ. 148. 11; 332. 7; आकाशादीनां त्वरूपत्वादद्रव्यद्रव्यत्वाच्चेति वेदितव्यम् (अदर्शनम्) PrakaPañ. 131. 8; नित्यः शब्दोऽद्रव्यद्रव्यत्वात् NyāyKuA. i. 105. 5; वायुपरमाणोर्गुणवत्त्वाद्द्रव्यत्वम् अद्रव्यद्रव्यत्वाच्च नित्यत्वं तथा कालस्यापि Upask. 110. 11 (*on* ii. 2. 7); अद्रव्यद्रव्यत्वम् असमवेतद्रव्यत्वम् NyāyK. 11.

अद्रव्यधर्मत्व (adravyadharma-tva) *n.* the state of the property of a non-substance तस्य (एकत्वस्य) अद्रव्यधर्मत्वाद् असत्त्वभूतत्वात् Pradī. iii. 103A. 17 (*on* iii. 1. 67)

अद्रव्यधर्मन् (adravya-dharman) *adj.* having the character of being poor or devoid of wealth किंधर्मा ? अद्रव्यधर्मेति S'ābaBh. 1382. 13 (*on* vi. 1. 41)

अद्रव्यनिरूपण (adravya-nirūpaṇa) *n.* explanation of a non-substance अद्रव्यनिरूपणे तु तेजोबन्नगुणव्यवस्था समर्थयिष्यते NyāySiA. 201. 8.

अद्रव्यनिष्ठ (a-dravyaniṣṭha) *adj.* not residing in a substance अद्रव्यनिष्ठे सामान्ये नानेकसमवेतता TarkSaṁ.(Ā.) 121. 6.

अद्रव्यपरिग्रह (adravya-parigraha) *m.* choice or acceptance of an unsuitable or improper person विनेतुरद्रव्यपरिग्रह एव बुद्धिलाघवं प्रकाशयति Mālavikā. 1. 16(8)

अद्रव्यप्रकर्ष (adravya-prakarṣa) *m.* intensification of a non-substance किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे P. v. 4. 11; सुजन्ताद्विशब्दात्तरसमपौ, अद्रव्यप्रकर्षे आतिशयिकः आम्प्रत्ययः KāśiVṛ. *on* P. viii. 2. 27.

अद्रव्यप्रकर्षत्व (adravyaprakarṣa-tva) *n.* the state of intensification of a non-substance सप्तम्यर्थप्रकर्षे प्रत्ययः, तस्याद्रव्यप्रकर्षत्वादलुक्पक्षे ··· आमुप्रत्ययः PadMañ. *on* KāśiVṛ. *on* P. vi. 3. 17.

अद्रव्यभाव (adravya-bhāva) *m.* nature of a non-substance (lack of the nature of a substance) अभावश्च न केनचित् संयुज्यते, अद्रव्यभावात् NyāyMañ. i. 46. 16; नित्याया एव बुद्धेः स्वयमभिदधतः केचिदद्रव्यभावम् TattvMu. 5. 64; सहजस्वरूपतया स्थितात् अद्रव्यभावात् प्रच्याव्य Bhāsk. i. 277. 14 (*on* i. 5. 17)

अद्रव्यभूत (a-dravyabhūta) *adj.* not being a substance भेषजमङ्गभेदादपि द्विविधं, द्रव्यभूतमद्रव्यभूतं च । तत्र यदद्रव्यभूतं तदुपायाभिप्लुतम् CaraS. iii. 8. 87 (1941 Ed.) असत्त्वभूतानां सर्वनामप्रयोगासहत्वेनाद्रव्यभूतानां यत् शक्तिरूपम् Bhāsk. i. 274. 6 (*on* i. 5. 17)

अद्रव्यभेद (adravya-bheda) *m.* variety of what is not a substance एकत्वादयस्तत्त्वमुक्ताकलापे अद्रव्यभेदा अस्माभिरुक्ताः NyāySiA. 247. 2.

अद्रव्यरूप (adravya-rūpa) *adj.* [*f.* –ā] of the form of what is not a substance द्रव्याद्रव्यरूपप्रमेयग्राममधिजिगमिषतां न कुदृष्टिबाह्यकल्पितकूटयुक्तिगर्तनिपातः NyāyPari. 508. 13; ब्रह्ममीमांसायां त्वविद्याद्रव्यरूपा पुरुषाश्रिता SāṁkhyaPraBh. 131. 17 (*on* 5. 65)

अद्रव्यवचन (adravya-vacana) *adj.* denoting a non-substance एभ्योऽद्रव्यवचनेभ्यः करणे तृतीयापञ्चम्यौ स्तः PrakriKau. i. 435. 6 = SiddhāKau. 151A. 5.

अद्रव्यवचनता (adravyavacana-tā) *f.* the state of denoting a non-substance स गुणो यदा स्तोकादिशब्दैरभिधीयते तदैषामद्रव्यवचनता Prasā. i. 435. 15.

अद्रव्यवचनत्व (adravyavacana-tva) *n.* expression of a non-substance आख्यातेन क्रियाया विधानादद्रव्यवचनत्वाच्च बलभिदादेः ManuBh. i. 60. 27 (*on* 2. 6)

अद्रव्यवत् (a-dravyava(n)t) *adj.* not residing in the substance (*lit.* not having the substance as its substratum) द्रव्यमाश्रयभूतमस्यास्तीति द्रव्यवत् न द्रव्यवत् अद्रव्यवत् द्रव्यानाश्रितमित्यर्थः Upask. 85. 7 (*on* ii. 1. 11)

अद्रव्यवत्त्व (adravyava(n)t-tva) *n.* the state of what does not reside in a substance अद्रव्यवत्त्वेन द्रव्यम् VaiśeSū. ii. 1. 11.

अद्रव्यवर्ग (adravya-varga) *m.* aggregate of what is not a substance स्वाधारैकायुरेषा परमुपचरिता सेयमद्रव्यवर्गे TattvMu. 5. 41.

अद्रव्यवाचित्व (adravyavāci-tva) *n.* expression of a non-substance प्लक्षशब्दस्पर्शा इत्यत्राद्रव्यवाचित्वात् 'जातिरप्राणिनाम्' इत्यस्याप्रवृत्तौ PadMañ. on KāśiVr. *on* P. ii. 4. 12.

अद्रव्यवाचिन् (a-dravyavācin) *adj.* expressing a non-substance द्रव्यं हि लोकेऽधिकरणमित्युपचर्यते … तथा व्याकरणे विप्रतिषिद्धं चानधिकरणवाचि (P. ii. 4. 13) इत्यद्रव्यवाचीति गम्यते MahāBh. i. 371. 5 (*on* ii. 1. 1); विरोधिनामद्रव्यवाचिनां समाहारे ऐकार्थ्यं वा भवति CāndraVr. *on* ii. 2. 65; अद्रव्यवाचिनां विप्रतिषिद्धार्थानां द्वंद्व एकवत् स्याद्वा PrakriKau. i. 634. 6; SiddhāKau. 205A. 13; अद्रव्यवाचिनां चेद्विरुद्धार्थानामेवेति … न LaSabdeSe. ii. 137. 11; ii. 137. 13.

अद्रव्यविवाद (adravya-vivāda) *m.* dispute over something other than wealth or riches द्विगुणो दण्डस्तु पराजयनिमित्तदण्डापेक्षया । न तु विवादास्पदीभूतद्रव्यापेक्षया । अद्रव्यविवादेष्वव्याप्तेः VīraMi. (Vyavahāra) 77. 11.

अद्रव्यविशेष (adravya-viśeṣa) *m.* variety of what is not a substance (a subdivision of quality or guṇa) अस्मदादिघ्राणग्राह्यविजातीयेतरोऽद्रव्यविशेषो गन्धः YatīndraDī. 94. 9.

अद्रव्यव्यावृत्ति (adravya-vyāvr̥tti) *f.* exclusion of what is not a substance नापि द्रव्यलक्षणमद्रव्यव्यावृत्तये PrakaVi. 507. 4.

अद्रव्यव्युदास (adravya-vyudāsa) *m.* elimination of what is not a substance द्रव्यशब्देनाद्रव्यव्युदासः NyāyVār. 331. 11 (*on* ii. 2. 67); तावेतावसदद्रव्यव्युदासरूपेण प्रवर्तमानौ एकमर्थं ब्रुवाते NyāyVār. 331. 12 (*on* ii. 2. 67)

अद्रव्यशब्दत्व (adravyaśabda-tva) *n.* **1** the state of being devoid of the word (denoting the quality etc.) of the substance अद्रव्यशब्दत्वात् MīmāSū. i. 3. 31; (comm. द्रव्याश्रयस्य गुणस्य यः शब्दोऽद्रव्यशब्दः); **2** the state of having a word denoting the non-substance अपि चाद्रव्यशब्दत्वाद् व्यक्तेरेवाभिधेयता TantrVā. 257. 6 (*on* i. 3. 26); तव त्वद्रव्यशब्दत्वाद्भवेद्भेदो गवाश्ववत् TantrVā. 257. 17 (*on* i. 3. 26)

अद्रव्यसंयोग (a-dravyasaṁyoga) *m.* non-possession of riches, poverty, अनित्योऽद्रव्यसंयोगः SābaBh. 1382. 1 (*on* vi. 1. 40)

अद्रव्यसंस्पर्शिन् (a-dravyasaṁsparśin) *adj.* not touching the substance, unconnected with the substance यथा प्रमाणान्तरादवसीयमानमाधुर्येऽपि द्रव्ये प्रत्यक्षरूप इन्द्रियद्वारस्तिक्तावभासः अद्रव्यसंस्पर्शी नाभासमात्रतयावतिष्ठते BrahmSi. 134. 6.

अद्रव्यसमवेत (adravya-samaveta) *adj.* inherent in other than the substance द्रव्यासमवेतं हि असमवेतमेव स्यादद्रव्यसमवेतं वा Kiraṇā. 16. 4.

अद्रव्यसाध्य (adravya-sādhya) *adj.* to be accomplished without wealth or property यानि चाद्रव्यसाध्यानि संध्योपासनादीनि नित्याग्निहोत्रादीनि ManuBh. i. 532. 9 (*on* 6. 94)

अद्रव्यस्वभाव (adravya-svabhāva) *adj.* of the nature of the non-substance असत्त्वप्रकृतिरिति । अद्रव्यस्वभाव इत्यर्थः Pradī. iv. 63A. 15 (*on* iv. 1. 44)

अद्रव्यात्मक (adravyātmaka) *adj.* of the nature of not consisting of substance (i. e. not having the substance as its cause) न च तस्मिन्विनाशित्वं द्रव्येऽद्रव्यात्मके सति SlokaVār. 22. 156 (769. 6)

अद्रव्यादिधी (adravyādi-dhī) *f.* the notion of non-substance etc. अद्रव्यादिधियो हेतुर्न गुणत्वादि युक्तिमत् TattvSaṁ. 778.

अद्रव्यान्तरत्व (adravyāntara-tva) *n.* the state of not being a different substance (identity of substance) आत्मप्रदेशानामद्रव्यान्तरत्वादेकार्थसमवायस्याविशेषे स्मृतियौगपद्यप्रतिषेधानुपपत्तिः NyāyBh. 212. 12 (iii. 2. 33)

अद्रव्यार्थ (a-dravyārtha) *adj.* expressive of or signifying a non-substance अद्रव्यार्थाश्चादयो निपातसंज्ञाः स्युः PrakriKau. i. 40. 4; Prasā. i. 40. 23; SiddhāKau. 7B. 1.

अद्रव्याश्रित (a-dravyāśrita) *adj.* not having a substance as substratum, not abiding in a substance न हि कार्यं किञ्चिदद्रव्याश्रितमात्मानं लभते PrakaPañ. 327. 7.

अद्रष्टव्य (a-draṣṭavya) *adj.* [*f.* -ā] **i** not fit to be seen तथाप्यमुष्य पापस्य पारङ्कच्छामि न कश्चित् । अद्रष्टव्येष्वहं नूनमद्रष्टव्यशिरोमणिः MalliC. 7. 580; अद्रष्टव्यानि पश्यन्ति शृण्वन्त्यपरवान् बहून् PārśvC. 6. 560; **ii** to look at whom is improper अद्रष्टव्याः खलु परपुरन्ध्रयः MohaRāPa. 3. 44(13)

अद्रष्टव्यत्व (adraṣṭavya-tva) *n.* the state of being unfit to be looked at तेनाद्रष्टव्यत्वाल्लज्जाहेतुदर्शनत्वात्पुरुषलिङ्गं कौपीनम् Pradī. iv. 314A. 13 (*on* v. 2. 20)

अद्रष्टव्यमुख (adraṣṭavya-mukha) *adj.* whose face is unworthy of being looked at अद्रष्टव्यमुखोऽसि त्वं पापापसर सत्वरम् PariPar. 6. 229; रात्रिञ्चर दुराचार … अद्रष्टव्यमुखोऽसीति मया नेत्रे निमीलिते PāṇḍaC. 7. 616; Samarā-Saṁ. 9. 622; PrabaK. 53. 22; अयमद्रष्टव्यमुखोऽस्तीति निष्कासितः Kumā-PraPra. 91. 21.

अद्रष्टव्यशिरोमणि (adraṣṭavya-śiromaṇi) *m.* foremost of those who are unworthy of being seen अद्रष्टव्येष्वहं नूनमद्रष्टव्यशिरोमणिः MalliC. 7. 580.

अद्रष्टुम् (a-draṣṭum) *inf.* not to see, (to avoid the sight of) तदा तस्य महादुःखं सतोऽप्युच्छेत्तुमक्षमः । अद्रष्टुमिव सूर्योऽस्तपर्वतान्तरितोऽभवत् PārśvC. 1. 208.

अद्रष्टृ (a-draṣṭr̥) *adj.* non-perceiver अथ वाद्रष्टाश्रोताबोद्धाकर्ताविज्ञाता भवति ChāndoU. vii. 9. 1) अद्रष्टा चतुर्णामचतुरः । विद्रष्टा चतुर्णां विचतुरः MahāBh. v. 4. 77; यथा चक्षुर्द्रष्टृ न बाह्येन प्रकाशेन विना प्रकाशयतीत्यद्रष्टृ भवति SābaBh. 44. 6 (*on* i. 1. 5)

अद्रष्टृक (adraṣṭr̥-ka) *adj.* [*f.* -ā] without a perceiver or observer कालान्तरे चेद् दृश्यत्वं नश्यद्रष्टृकमिष्यते NaiṣkaSi. 68. 4; अद्रष्टृकं चानुभवमनिद्रं स्वप्नदर्शनम् YogVā. iv. 1. 3; इदानीं नाद्रष्टृका सत्त्ववृत्तिर्ज्ञानम् PrakaVi. 89. 22.

अद्रष्टृत्व (adraṣṭr̥-tva) *n.* the state of being a non-perceiver दुष्टकरणस्य कल्पितत्वेन अद्रष्टृत्वात् GuruCandr. i. 376. 24; Nyāyāmr̥. 151A. 5.

अद्रावक (a-drāvaka) *adj.* not flowing, not liquid यदद्रावकौषधेन तालमोचाफलानि संयोज्य निष्पाद्यते तदद्रावितं रसाख्यम् JayaMa. 36. 11 (*on* 1. 3)

अद्रावित (a-drāvita) *adj.* not liquified पेयं द्विविधम् … द्रावितमद्रावितं च JayaMa. 36. 10 (*on* 1. 3)

अद्रावितस्थान (adrāvita-sthāna) *n.* calm or quiet place असिन्नद्रावितस्थाने गहने पुण्डरीकिणि । प्रफुल्लानोकहच्छन्ने नातिराजति वासरः Rāgh-Pāṇ.(Dha.) 7. 32.

¹अद्रि (á-dri) *m.* [MAYR. 1. 548; DEBRU. p. 859 / अदिशदिभूशुभिभ्यः क्रिन् Uṇā. 4. 65; अत्ति अद्यते वा अद्रिः Prasā. ii. 606. 1; SiddhāKau. 551B. 3] **1 Ai** piece of rock, huge stone **ii** stone for pressing Soma **iii** flint-stone **iv** stone used as a weapon, sling-stone **v** very strong object or hard stuff like a stone **vi** thunderbolt **Bi** mountain, hill, crag, cliff **ii** the mountain Himālaya **iii** mount Kailāsa **C** cloud **2i** name of the grandson of Pr̥thu **ii** epithet of Kr̥ṣṇa **iii** epithet of Siva **iv** name of one of the fifty Rudras **v** name of a chief of evil beings called Piśācas **vi** deity of a Kulaparvata **vii** name used for the enemy or enemies of Indra **3A** number seven **B** word representing the consonants **i** *d* **ii** *th* **4** tree, plant, vegetation **5** the sun **6** name of a measure **7** mountain rat **1Ai** piece of rock, huge stone वाजे अद्रिं मरुतो रंहयन्तः R̥V. i. 85. 5; v. 52. 9; x. 94. 1; MahāBhā. vii. 97. 41; अद्रिमणिहीरकगैरिकादयः पाषाणाः Upask. 218. 10 (*on* iv. 2. 11); वानरेन्द्रगणेश्वरः !… द्रुमैरश्मभिरद्रिभिः । प्रजह्रे च यथान्यायं प्रहारक्रमकोविदः RāmC. 11. 84; **1Aii** stone for pressing Soma तुभ्येदेते बहुला अद्रिदुग्धाः R̥V. i. 54. 9; ता हर्द्री धिषणाया उपस्थे R̥V. i. 109. 3; i. 121. 8; सुषुमा यातमद्रिभिः R̥V. i. 137. 1; i. 139. 10; प्रभृतो मे अद्रिः R̥V. i. 165. 4; ii. 16. 5; युञ्जे अद्रिम् R̥V. iii. 1. 1; iii. 41. 2; हंसा इव कृणुथ श्लोकमद्रिभिः R̥V. iii. 53. 10; iv. 45. 5; दश क्षिपो युञ्जते बाहू अद्रिम् R̥V. v. 43. 4; v. 86. 6; तमु ते गावो नर आपो अद्रिरिन्दुं समह्यन् पीतये समस्मै R̥V. vi. 40. 2; vi. 63. 3; vii. 22. 4; मेजाते अद्री रथ्येव पन्थाम् R̥V. vii. 39. 1; vii. 42. 1; अयं ह यद्वाम् … अद्रिरूर्ध्वो विवक्ति R̥V. vii. 68. 4; viii. 4. 13; viii. 38. 3; सोमपृष्ठासो अद्रयः R̥V. viii. 63. 2; viii. 72. 11; ix. 11. 5; तम् … जामयो हरिं हिन्वन्त्यद्रिभिः R̥V. ix. 26. 5; ix. 34. 3; ix. 51. 1; यस्य ते मद्यं रसं तीव्रं दुहन्त्यद्रिभिः । स पवस्व R̥V. ix. 65. 15; ix. 68. 9; अद्रयस्त्वा बप्सति गोरधि त्वचि R̥V. ix. 79. 4; ix. 87. 8; दुदुहानो अद्रौ ।… सुवनस्य राजा विदद्गातुम् R̥V. ix. 96. 10;

अद्विषत् (a-dviṣat) *adj.* [*f.* -ntī] not hating (any one), who does not despise (others) युधिष्ठिरम् । अद्विषन्तं कथं द्विष्यात्त्वादृशो भरतर्षभ MahāBhā. ii. 50. 2; द्विषतां च प्रहर्षोऽभूदार्तिश्चाद्विषतामपि MahāBhā. iii. 23. 16; यो द्वेष्टि कंचिदन्येन च द्विष्यते स एव मन्त्रं ब्रूयात् योऽस्मान् द्वेष्टीति उताद्विषन्नद्विष्यमाणश्चापि S'ābaBh. 1517. 3 (*on* vi. 8. 28); अद्विषंश्चायं प्रवर्तमानोऽप्रतिकूलं दु:खहानमधिगच्छति NyāyVār. 90. 14 (*on* i. 1. 22); एनं एवंविदं प्रतिस्पर्धिनो द्विषन्त: अद्विषन्तोऽपि सपत्ना यतो भवन्ति Tai.UBh. 295. 2 (*on* 3. 4); भ्रातृव्या हि द्विविधा भवन्ति द्विषन्त: अद्विषन्तश्च BṛĀraUBh. 273. 7 (*on* ii. 1. 1); (बुद्धिम्) द्विषन्तीमद्विषन्नात्मा (पश्यति) NaiskaSi. 84. 9; द्विषन्तश्चाद्विषन्तश्च म्रियन्ते तस्य शत्रव: TaiUBhVā. 206. 15(3); BṛĀraUBhVā. i. 3. 189; सुखदु:खे असक्तोऽद्विषंश्च भुञ्जानो न सुखं दु:खतयानुमन्यते TātpaṬ.(Vā.) 72. 12 (*on* i. 1. 1); (प्राह) ध्वस्तगर्वोऽद्विषन्नृणाम् । जैनो मुनि: PrabhāC. 78. 23.

अद्विषेण (adviṣeṇa) *m.* name of a seer अद्विषेण: ह्यरूपश्च ... । एकोनविंशदित्येते ऋषयो मन्त्रवादिन: VāyuP. i. 59. 97.

अद्विषेण्य (a-dviṣeṇyá) *adj.* not repugnant, not hostile उप॑ न: पि॒त॒वा च॑र शि॒व: शि॒वाभि॑रू॒तिभि॑: । म॒यो॒भुर॑द्विषे॒ण्य: ṚV. i. 187. 3; वसुं॒ न चि॒त्रम॑हसं गृणीषे वा॒मं शे॒वमति॑थिमद्विषे॒ण्यम् ṚV. x. 122. 1.

अद्विष्ट (a-dviṣṭa) *adj.* **i** not hostile, not malevolent, free from hatred दंष्ट्रान् खड्गान् ... गर्दभान् । एतानद्विष्टान् मद्रेश: ... दृष्ट्वा विस्मयं परमं ययौ MatsyaP. 118. 61; कर्माशयप्रपञ्चमुच्छेत्तुम् ... अद्विष्टोऽपि ... द्विष्ट इव तत्फलं भुङ्क्ते TātpaṬ.(Vā.) 637. 12 (*on* iv. 1. 68); ब्राह्मणजातिरद्विष्ट: ... प्रायेण न हि दृश्यते TriṣaS'aPuC. i. 1. 743; अद्विष्टो हतवान् द्विष: VītaRā. 11. 2 (comm. द्वेषकालुष्यरहित:); **ii** not despised, not condemned अद्विष्टे त्वविरुद्धा प्रवृत्ति: BālaKrī. i. 115. 24 (*on* 1. 155); शिष्टानां संमता: अनुमता अगर्ह्या अद्विष्टा: प्रिया इति यावत् ManuBh. i. 226. 17 (*on* 3. 39)

अद्विष्टमनस्क (adviṣṭa-manaska) *adj.* with a mind without hatred न ह्यद्विष्टमनस्कस्य कर्मैतत्सिद्धिमश्नुते BṛĀraUBhVā. vi. 4. 50.

अद्विष्ठगुण (adviṣṭha-guṇa) *adj.* quality not residing in two (things) आकाश: स्पर्शवद्गुणासमवायिकारणाद्विष्ठगुणयोराश्रय: TattvPradī.(Ci.) 174. 11.

अद्विष्ठता (adviṣṭha-tā) *f.* the state of not being present in two (things) संयोगस्याप्यद्विष्ठताया वक्ष्यमाणत्वात् NyāySu.(Ja.) 355B. 12 (*on* ii. 2. 6)

अद्विष्ठत्व (adviṣṭha-tva) *n.* the state of not being present in two (things) किमिदमेकद्रव्यत्वं किमेकत्वसंख्याविशिष्टद्रव्यसमवेतत्वमुत अद्विष्ठत्वम् Tattv-Pradī.(Ci.) 197. 3; विशेषणविशेष्यभावादे: संबन्धत्वमेव नास्ति अद्विष्ठत्वात् Tattv-Pradī.(Ci.) 206. 5; न ते संबन्धा अद्विष्ठत्वात् NyāySu.(Ja.) 355B. 12 (*on* ii. 2. 6); विषयविषयिभावस्य चाद्विष्ट(? ष्ठ)त्वेन असंबन्धत्वात् Nyāyāmṛ. 188A. 8.

अद्विष्यमाण (a-dviṣyamāṇa) *adj.* not being despised or hated यो द्वेष्टि कंचिदन्येन च द्विष्यते स एव मन्त्रं ब्रूयात् योऽस्मान् द्वेष्टीति उताद्विष्यन्नद्विष्यमाणश्चापीति S'ābaBh. 1517. 3 (*on* vi. 8. 28)

अद्विष्यमाणत्व (adviṣyamāṇa-tva) *n.* the nature of what is not being hated विदुषस्तु तदसंस्पर्शादाभासमात्रं मणिकृपाणदर्पणादिनिबन्धनविशेषवत् । न विपाक: अनभिनन्द्यमानत्वात् अद्विष्यमाणत्वाच्च BrahmSi. 133. 18.

अद्विस् (a-dvis) *adv.* not twice (i. e. only once) संख्यादे: संख्येयादनपत्येऽजादेर्लुगद्वि: CāndraVyā. ii. 4. 11; द्विगोरनपत्ये यस्वरादेर्लुबद्वि: SiddhaHe. vi. 1. 24.

अद्विसंवीक्षण (a-dvisaṁvīkṣaṇa) *adj.* which does not see a second thing अद्विसंवीक्षणं चक्षु: ... अद्य मे किं करिष्यति RasMañ. 129 (न द्वयो: संवीक्षणं यस्य । तदतिरिक्तानवलोकीत्यर्थ:)

अद्विसंस्पर्शन (a-dvisaṁsparśana) *adj.* which does not touch a second thing अद्विसंस्पर्शन: पाणिरद्य मे किं करिष्यति RasMañ. 129 (comm. न द्वयो: संस्पर्शो यस्य तदन्यासंस्पर्शीत्यर्थ:)

अद्विसंमीलन (a-dvisammīlana) *adj.* which does not think any other thing or object अद्विसंमीलनं मन: । ... अद्य मे किं करिष्यति RasMañ. 129 (comm. न द्वयो: संमीलनं यस्य)

अद्विहल् (a-dvihal) *adj.* (a stem) not having two consonants अद्विहलो यदि भवति Nyās. i. 16. 25 (*on* i. 1. 0); अद्विहलो यदि भवति अश्नोतेरेव Prasā. ii. 136. 13.

अद्विहलार्थ (advihalārtha) *adj.* (grammatical operation) meant for (a stem) not having two consonants अद्विहला(? ल)र्थोऽयमारम्भ: Nyās. 872. 18 (*on* vii. 4. 72)

अद्वीप (a-dvīpa) *adj.* without a support (*lit.* without a landing place) (के वीरा: पर्यवारयन्) इष्वस्त्रसागरम् ... अद्वीपम् MahāBhā. vi. 15. 26 (Nīlakaṇṭha अद्वीपं निराश्रयम्); आसीत्केशपरामर्शो मुष्टियुद्धं च दारुणम् । नखैर्दन्तैश्च शूराणामद्वीपे द्वीपमिच्छताम् MahāBhā. vii. 31. 26 (Nīlakaṇṭha निराश्रयम्); [nt.]

अद्वेष (a-dveṣá) *adj.* [*f.* -ā́] not malevolent, devoid of hostility अ॒द्वे॒षो विष्णु॒र्वात॑ ऋभु॒क्षा अच्छा॑ सु॒म्नाय॑ ववृतीय दे॒वान् ṚV. i. 186. 10; अ॒द्वे॒षे द्यावा॑पृथि॒वी हु॑वेम ṚV. v. 45. 12; ṚV. ix. 68. 10 = VājaS. 12. 29; शयान: पर्णसंस्तरे । तुङ्गपर्यङ्कमद्वेषं गङ्गदत्तानिवेशनम् BṛKathāS'loSaṁ. 18. 533; निरहंममताबुद्धिरद्वेष: करुणासम: । लाभालाभे सुखे दु:खे मानामाने समे(? म:) प्रिय: GaṇeP. ii. 146. 15; ततो नीरागमद्वेषममोहं सर्वदर्शिनम् । ध्यायन्नात्मानम् ... । लभते परमात्मत्वम् YogS'ā. 8. 16; *m.* non-hatred, absence of envy or hatred विषयनिष्ठा धर्मा: विषयिधर्मा: । ते च ... इच्छानिच्छे द्वेषाद्वेषौ ... इत्येवमादय: TārkiRa. 293. 13; अद्वेष: कतम: AbhidhSa. 6. 14; अद्वेष: अपि करुणा AbhidhK. 8. 29; मैत्र्यद्वेष: AbhidhK. 8. 29; सम्यग्ज्ञानप्रकृति: शान्त: ...। जन्मजरामरणादित्रासो वैरस्यवासना विषये । सुखदु:खयोरनिच्छाद्वेषाविति तत्र जायन्ते Kāvyālaṅ.(Ru.) 15. 16; यत्र परस्यानभिप्रेतस्य विराग: सक्ताच्चानभिप्रेतात् स

उभयतोऽद्वेषः JayaMa. 361.8 (*on* 6.6); ध्यानमास्तिक्यमद्वेषः ··· । य एवंभूतमाचारमनुतिष्ठन्ति मानवाः BhaviP. 85B.22 (i. 44.13); अनसूयया अद्वेषेण ManvaVi. 568.24 (*on* 4.228); अमायमनहंकारमरागममदं तथा । अमोहकमदम्भं च अद्वेषाक्षोभके तथा । अमात्सर्यमलोभं च दश पुष्पं प्रकीर्तितम् MahNirvāT. 5.148; अद्वेषमाश्रिताः शान्ताः मामेकं पुरुषोत्तमम् । भजन्ति ध्यानयोगेन BṛBrahmaS. i. 7.88.

अद्वेषण (a-dveṣaṇa) *adj.* without hatred ब्राह्मणानभिगम्याक्रोधनोऽद्वेषणः सर्वकर्माणि संन्यसेत् ĀgniVeGS. ii. 7.11 (119.10)

अद्वेषपर (a-dveṣapara) *adj.* not intent on hating देव्यद्वेषपरे तस्मिन्नभिचारविनिर्मितिः । असंभाव्या RājTa.(Jo.) 492.

अद्वेषपेशल (adveṣa-peśala) *adj.* amiable due to absence of hatred अद्वेषपेशलं कुर्यान्मनः कुसुमकोमलम् CāruCaS'. 24.

अद्वेषरागिन् (a-dveṣārāgin) *adj.* free from hatred and passion विद्वद्भिः सेवितः सद्भिः नित्यमद्वेषरागिभिः । हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत ManuSm. 2.1; अद्वेषरागिभिः अविहितरागद्वेषशून्यैः CaturCin. ii(1). 10.10.

अद्वेषविषय (a-dveṣaviṣaya) *m.* not (being) the object of hatred प्रतिराजादेरपि अद्वेषविषयः ··· दूतो राज्ञः प्रशस्यो भवति ManvaMu. 258.26 (*on* 7.64); VīraMi. (Rājanīti.) 188.18.

अद्वेषस् (a-dveṣás) *adv.* in a friendly manner, without being malevolent यच्चिद्धि ते इत्था भर्गः शशमानः पुरा निदः । अद्वेषो हस्तयोर्दधे ṚV. i. 24.4; अद्वेषो नो मरुतो गातुमेतन ṚV. v. 87.8; अद्वेषो अद्य बर्हिषः स्तरीमणि ग्राव्णां योगे मन्मनः साध ईमहे ṚV. x. 35.9; *adj.* free from malevolence अनवायमनवयवम् । यदन्ये न व्यवेयुः । अद्वेषस इति वा Nir. 6.11 (116.10)

अद्वेषांशिका (a-dveśāṁśikā) *adj.* (*f.*) which forms part of absence of hatred अविहिंसा कतमा । अद्वेषांशिका करुणता AbhidhSa. 7.1.

अद्वेषिन् (a-dveṣin) *adj.* non-hater अद्वेषी वाक्चित्तानुकूलः VaikhāDS. i. 2.7; अद्वेषी सुमुखः ··· नरः ··· स्वर्गतिं प्रतिपद्यते BrahmP. 225.25; स मे भर्ता महादेवः ··· अद्वेषी BṛDharmaP. i. 37.58; जारमद्वेषिणं द्विषम् । न रक्षन्त्वप्रकाशं हि S'ukraNi. 1.298.

अद्वेष्टृ (a-dveṣṭṛ) *adj.* who does not hate अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च BhagGi. 12.13; (यतः) अद्वेष्टापि भवति कश्चिद् भ्रातृव्यः BṛĀraUBh. 50.19 (*on* i. 3.7); अद्वेष्टा यः ··· मुच्यते बन्धनात् GaṇeP. ii. 141.3; शान्तानां समदृष्टीनामद्वेष्टॄणां च जन्तुषु AdhyāRā. ii. 6.54; अद्वेष्टा ··· ब्राह्मणो भवेत् MahNirvāT. 8.114; विधाकवलयासानामद्वेष्टा हृष्टमानसः (वारणः) Hastyāyur. 127.25 (1.17)

अद्वेष्टृत्व (advestṛ-tva) *n.* the state of being a non-hater उत्पन्नात्मप्रबोधस्य त्वद्वेष्टृत्वादयो गुणाः । ··· भवन्ति NaiṣkaSi. 202.7; तदानीम् ··· अद्वेष्टृत्वादयः सद्गुणाश्चालंकारवदनुवर्तन्ते VedāntSā.(Sa.) 33.20.

अद्वेष्ट्रादिसाधन (adveṣṭrādi-sādhana) *adj.* having as means not hating etc. अमानित्वादिनिष्ठो यो यश्चाद्वेष्ट्रादिसाधनः । ज्ञानमुत्पद्यते तस्य NaiṣkaSi. 202.1.

अद्वेष्य (a-dveṣyá) *adj.* [*f.* -ā] **I** not to be hated, (i. e. non-enimical) अद्वेष्यै द्यावापृथिवी हुवे MaiS. ii. 7.9; आयतिसममद्वेष्यं मित्रं कुर्वीत NītiSā. 4.66; परिवारः स्वप्रशंसार्थमद्वेष्याणामपि निन्दा ManvaVi. 776.25 (7.47); **II** free from hateful things अदुःखमद्वेष्यम् ···शिवालयं मोक्षमुदाहरन्ति VarāṅgaC. 10.9.

अद्वेष्यत्व (adveṣya-tva) *n.* the state of being what is not to be hated तदा बन्धस्य ··· अद्वेष्यत्वात् GuruCandr. i. 187.21.

अद्वैत (á-dvaita) *adj.* [*f.* -ā] **I** non-dual सलिल एको द्रष्टाद्वैतो भवति S'atBr. XIV. vii. 1.31; शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते MāṇḍūU. 7; यदद्वैतं परं ब्रह्म सदसद्भाववर्जितम् BrahmāṇḍP. iii. 15.6; अद्वैतं ब्रह्म प्रतिष्ठा आनन्दमयस्य TaiUBh. 252.18 (2.5); यो हि ··· अद्वैतम् आत्मानं पश्यति BṛĀraUBh. 618.18 (*on* iv. 4.6); न हि अहेयानुपादेयाद्वैतात्मावगतौ सत्याम् BrahmSūBh. (S'aṁ.) 34.4 (*on* i. 1.4); अद्वैतं परमानन्दं ब्रह्मैवास्मीति भावयेत् SarvaVeSā-Saṁ. 892; न शक्नोति कामसंदूषिताशयः । द्रष्टुं तत्परमद्वैतम् BṛĀraUBhVā. (Sambandha.) 343; पदसमन्वयः ··· अद्वैतमात्मतत्त्वमवगमयेत् PañcPā. 46.5 (*on* i. 1.1); 71.3 (*on* i. 1.1); अद्वैतमात्मपदमाहुरनन्यमानम् SaṁkṣeS'ā. 1.116 (i. 100.2); 1.162 (i. 132.16); परस्य प्रकृष्टस्याद्वैतस्य परमात्मनो यदपथ्यं संसारकारणं कर्मादि न तदाचरेत् BālaKrī. ii. 28.16 (*on* 3.65); अपृथग्भूतशक्तित्वाद्ब्रह्माद्वैतं तदुच्यते LakṣmīT. 2.11; अद्वैतं भावयात्मानम् KūrmaP. 13.7 (1.1); 333.5 (1.33); नित्यमद्वैतमपरं परं ब्रह्म ··· तमेव ··· विभुम् GaṇeP. ii. 54.53; अद्वैतं कथं द्वैतं वक्तुं शक्नोति BrahmP. 49.16; अद्वैतमेकम्···नानात्मानि प्रपश्यन्ति मायया मोहिता जनाः SaurP. 11.27; अनपावृतमद्वैतं तदनन्तम् LiṅgaP. i. 86.58; निराधारं निराधेयमद्वैतं चैक्यवर्जितम् YogVā. iii. 13.48; अद्वैतम् ··· गोविन्दम् ··· अहं भजामि BrahmSi. 5.42; तस्मात् सर्वेषु कालेषु मामद्वैतमुपाश्रय S'aṅkaVi. (Ā.) 8.19; 17.8; अद्वैतस्य वस्तुनोऽन्यथाग्रहणं नाम द्वैतरूपेण प्रतिभासः JīvānVi. 112.1; सदद्वैतं श्रुतं यत्तत्पञ्चभूतविवेकतः । बोद्धुं शक्यम् PañcDa. 2.1; MahNirvāT. 2.34; तदा ··· द्वैतभानेऽप्यद्वैतं वस्तु भासते VedāntSā.(Sa.) 30.6; संचिन्त्य ··· अद्वैतं भगवद्विग्रहम् BṛBrahmaS. iv. 2.102; आत्मन्यद्वैतेऽप्यनिर्वचनीयानाद्यविद्याकल्पिता अनिर्वचनीया एव SiddhāBi. 18.2; नत्वा ··· अद्वैतमीश्वरं नृहरिम् Daiva. i. 1.1; तामद्वैतां स्वरूपेण Jīvān. 61.4; **II** without a second, peerless, unique अद्वैतः द्रष्टव्यस्य द्वितीयस्याभावात् BṛĀraUBh. 587.2 (*on* iv. 3.32); अद्वैतभटः ··· महणाङ्गणः EI. ix. 324.8; धर्माद्वैतनिधिः ··· महणाङ्गणः EI. ix. 323.6; अद्वैतमनुमिमानः श्रीबाहुबलिनो नयम् ··· स प्राप तक्षशिलापुरीम् TriṣaS'aPuC. i. 5.52; अद्वैतेऽपि स ऐश्वर्ये जातु नोत्सेकमादधे TriṣaS'aPuC. ii. 3.117; i. 3.573; i. 1.120; श्रुतमद्वैतं त्वद्भुजस्तम्भवैभवम् PāṇḍC. 5.374; 9.205; सुसंसर्गस्य माहात्म्यमद्वैतं कथ्यतेऽधुना PārśvC. 3.420; **III** of unitary character, without a difference अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यत् UttaRāC. 1.39; अद्वैतं दीप्तम् ··· वाक्यं स्वायंभुवं विदुः MahāP. 39.17; अद्वैते हि सुखे प्रियस्य मुदिताधीनाः ··· स्त्रियः VasaViKā. 14.46; सा तदा पतिमद्वैतं ध्यात्वाकाशात्मकं शिवम् S'aṅkaVi.(Ā.) 9.12; योगे भोगेऽपि सक्तानां वस्तुना हृद्गतेन यत् । अद्वैतं तत्परानन्दसाम्राज्यं सुधियो विदुः TārāS'a. 58.

अद्वैत (a-dvaita) *n.* **I I** non-duality, identify (monism) अद्वैतं च तथा द्वैतं द्वैताद्वैतं तथैव च । न द्वैतं नापि चाद्वैतमित्येतत्पारमार्थिकम् DakṣaSm. 7.46; नाद्वैतमात्मनो लिङ्गात्तद्भेदप्रतीतेः SāṁkhyaSū. 5.61; 1.157; नान्यस्याद्वैतसंस्कारसंस्कृतं मानसं तथा ViṣṇuP. ii. 16.16; तत्राज्ञायुक्तमद्वैतं दीप्तं गम्भीरशब्दवत् BrahmāṇḍP. i. 33.23; अद्वैतमेवावगम्यमानमुपायस्य भ्रान्ततामवगमयति TātpaṬ. (U.) 230.14 (*on* 7.159); 298.9 (*on* 8.245); आयातमन्यथाद्वैतमपि चेत्थमयुक्तिमत् NyāyVi. 2.81; किं पारमार्थिकं स्यादद्वैतम् PraśnoRaMāli. 60; SarvaSiSaṁ. 9.35; अद्वैतं भावयेन्नित्यं न द्वैतं गुरुणा सह KulārT. 12.63; 1.108; तथा क्षुधाद्युपघाते विच्छिन्नात्मविज्ञानस्य । क्षणमालोकस्थानीयायां क्षुन्निवृत्तौ पुनर्दृढसंस्कारवशादद्वैत एवावस्थानम् ManuBh. i. 507.16 (*on* 6 32); नाद्वैतं भवितुमलं विना प्रतीचा SaṁkṣeS'ā. 3.305 (ii. 322.25); न चाविशुद्धे द्वैतार्थे शक्यमद्वैतमीक्षितुम् BṛĀraUBhVā. iii. 2.61; कूटस्थबोधतोऽद्वैतं साक्षात्त्वं प्रत्यगात्मनः NaiṣkaSi. 118.4; NyāyMañ. ii. 103.12; i. 202.11; स्यादेतदेवं यद्यद्वैतं कस्यचित्प्रमाणस्य गोचरः PrakaPañ. 336.3; अद्वैतान्न परं तत्त्वम् YaśasCam. ii. 317.8; दग्धेन्द्रियाणां रुचिवशेनाद्वैतेऽपि प्रवर्तितद्वैतः TattvPradī.(Ā.) 105.8 (*on* 1.83); अत्र च ग्राह्यग्राहकयोः संविदन्तर्भावाद्वैतम् NayaVi. 107.5 (*on* i. 1.5); अद्वैते हि विषयविषयिभावो नास्ति Bhām. 118.1 (*on* i. 1.4); 571.10 (*on* iii. 2.37); तस्मादद्वैतमेवाहुर्मुनयः परमार्थतः KūrmaP. 456.5 (2.2); वेदान्तशास्त्रमूर्धन्यमद्वैतं यच्च बोधयेत् SaurP. 40.56; परं वेदान्तिनो नित्यमद्वैतं प्रतिचक्षते S'ivaP. iv. 43.9 (403A.8); अद्वैतं यो न यातोऽसौ कथमद्वैतकर्मभिः युज्यते YogVā. iii. 27.9; तदद्वैतं वन्दे परमशिवशक्त्यात्म निखिलम् ĪśvaPraSū. i. 1.1; ज्ञानस्य ··· नार्थमन्तरेण अनुपपत्तिरिति सिद्ध्यत्यद्वैतम् NyāyRa. 270.15 (*on* 5(3).8); अत्र त्र्यन्तिदन्तीन्द्रा वदन्त्यद्वैतमात्मनाम् ĪśānS'iPa. ii. 1.20; MālinīT. 18.74; एते च त्रिदण्डिव्यपदेशजीविनो द्वैताद्वैतमार्गपरिभ्रष्टाः PraboCan. 2.5 (21.8); अखिलानामन्योन्यमद्वैतमिवाविरासीत् S'rīKaC. 20.13; मायामात्रमिदं द्वैतमद्वैतं परमार्थतः GauḍKā. 1.17; AnuVyā. 17A.5; स चानिर्वाच्यो ··· न चाद्वैतं व्याहन्ति VedāntKa. 227.24 (*on* i. 4.26); संवेदनं संवित् ज्ञानं तस्या अद्वैतम् SyādvāMañ. 16 (314); अद्वैतं पारमार्थिकम् S'aṅkaVi.(Ā.) 234.9; यस्य जीवब्रह्मणोरद्वैतं तत्त्वम् S'atDū. 179.5; अद्वैत एव वेदवाक्यानां तात्पर्यम् SarvaDaSaṁ. 5.274; अद्वैते निर्विघ्ना स्थितिः JīvanVi. 154.11; अद्वैते त्रिपुटी नास्ति भूमानन्दोऽत उच्यते PañcDa. 15.33; कथमद्वैतं श्रुत्यादिना निषिध्यते TattvPrakā. 20B.5 (*on* i. 1.17); 44A.4 (*on* i. 3.7); किं च वेदान्तवादिनां भवतामप्रामाणिकमद्वैतं प्रामाणिकं वा LaṭaMe. 2.17 (6); तस्माद्भेदयितुमशक्यत्वादद्वैतं सिद्धम् SarvaDaKau. 116.21; अद्वैतवाक्येन अद्वैतस्यैव ··· °सत्यत्वसिद्धेः Nyāyāmṛ. 267A.5; 552B.7; भेदप्रमाणमेवैतदद्वैतं साधयत्यलम् BhedaDhi. 118.3; अतो विशिष्टमद्वैतं वर्णेषु प्रणवो मतः BṛBrahmaS. i. 6.39; यद्यप्यद्वैत एव श्रुतिशिखरगिरामागमानां च निष्ठा S'ivārkaMaDī. i. 1.11 (*on* i. 1.1); CaitaCa. 18.8 (1); **I II** absence of difference or separateness, unity, union अद्वैतं सुखदुःखयोः ··· कथमप्येकं हि तत्प्राप्यते UttarāC. 1.39; तदद्वैतं वन्दे परमशिवशक्त्यात्म निखिलम् ĪśvaPraSū. i. 1.1; तस्या एव धियः श्रुत्या सर्वस्याद्वैतं गोचरयन्त्या कथं नाभेदे प्रामाण्यमासादयितव्यम् KhaṇḍanKhā. 150.12; आवयोरङ्गयोः···अद्वैते च । सितं स्फीतं न स्यादन्योन्यवीक्षणम् RasMañ. 67; अद्वैतमित्र सर्वेषामद्भुतानाममन्यत Yādavā. 10.108; त्वम् ··· अद्वैतेनैकं विष्णुमभ्यर्च्य भक्त्या ChandoMañ. 2.125; अद्वैतं गुणसंपदामुपनिषत्केलीविलासावलेः केयम् CaitaCa. 75.9 (3); **अद्वैतेन** (a-dvaitena) [Inst.] without distinction or difference यद्यप्येष भवेद्भर्ता ममार्ये वृत्तवर्जितः । अद्वैध- (v. l. अद्वैतेन [PW])मुपवर्तव्यस्तथाप्येष मया भवेत् Rāmā. ii. 110.3; **I III**

meditation (resulting in non-duality) अमनस्कं तथाद्वैतम् … तुर्या चेत्येकवाचकाः HathPra. 4.4; **2** one of the epithets of Gaṇeśa अमोघसिद्धिरद्वैतम् … इति वैनायकं नाम्नां सहस्रम् GaṇeP. i. 46.70; *m.* **i** one of the epithets of Viṣṇu in his child form अद्वैतः … इति … कथितम् … नाम…विष्णोर्बालकत्वमुपेयुषः PañcaRā.(Nā.) iv. 8.117; **ii** name of a devotee (of Lord Viṣṇu) हन्त भो अद्वैत CaitaCa. 19.7 (1); 21.2 (1); 58.6 (3); 88.2 (3); अद्वैतस्यालयमपि नयाम्येष याहि त्वमेताम् CaitaCa. 109.21 (4); चैतन्यमद्वैतमितीक्षते जनः CaitaCa. 241.10 (10); **iii** name of a teacher (Advaitānanda) [PW]

अद्वैतकत्व (advaitaka-tva) *n.* the state of having non-duality अद्वैतकत्वेन वागविषयत्वात् SiddhāBi. 151.4.

अद्वैतकथा (advaita-kathā) *f.* talk of non-duality स्वैः स्वैर्व्यवस्थितैरूपैः पदार्थानां तु या स्थितिः। सा सत्ता न स्वतन्त्रान्या तत्राद्वैतकथा कथम् Saṁvi-Si. 96.22.

अद्वैतक्षति (advaita-kṣati) *f.* loss of non-duality प्रपञ्चस्यापि बाधान्नाद्वैतक्षतिः AdvaiSi. 222.2; 592.3.

अद्वैतगुणकीर्तन (advaitaguṇa-kīrtana) *n.* statement or mention of the merits of non-duality द्वैतनिन्दया चाद्वैतगुणकीर्तनाद्ब्रह्मैव … प्रतिपाद्यम् Bhām. 314.7 (*on* i 4.19); इदं सर्वं यदयमात्मेत्यन्तमद्वैतगुणकीर्तनम् VedāntKa. 219.1 (*on* i. 4.19)

अद्वैतगुरु (advaita-guru) *m.* teacher of the philosophy of non-duality अद्वैतगुरुमीशानं न ध्यायेत्स तु पातकी S'aṅkaVi.(Ā.) 279.12.

अद्वैतगोचरत्व (advaitagocara-tva) *n.* the state of having non-duality as object कोऽसौ विरोधः द्वैताद्वैतगोचरत्वमिति चेत् S'atDū. 55.25; 70.28.

अद्वैतगोचरशास्त्र (advaitagocara-śāstra) *n.* the Upaniṣadic text referring to non-duality (i. e. Brahman without a second) यच्चाद्वैतगोचरशास्त्रस्य निषेधकान्तरं न दृश्यते S'atDū. 130.29.

अद्वैतघटिता (advaita-ghaṭitā) *adj.* (*f.*) made of an undifferentiated thing (i. e. made of one thing only) नीरैर्नदद्भिरुद्दामसंभवद्भिर्निरन्तरम्। प्लाविता भूस्तदद्वैतघटितेव तदाभवत् PrabhāC. 5.11.

अद्वैतचार (advaita-cāra) *adj.* whose behaviour (i. e. assumed appearance) is common to both men and women (?) शृङ्गाराङ्गारसंतप्तचेतसो वा कस्य दर्शनिनो नेपथ्यमानन्दमुत्थापयेत्।… सेलुकार इवाद्वैतचार° … °सौगतः MudriKu. 3.12 (4)

अद्वैतचारित्र (advaita-cāritra) *n.* unique good conduct ईदृगद्वैतचारित्रपवित्रात्मा बलो मुनिः। हा धिगस्माभिरत्यन्तं भाग्यवन्ध्यैर्न वन्दितः PāṇḍaC. 18.212.

अद्वैतचित्त (advaita-citta) *adj.* having an identical mind ध्रुवनैवं स संप्राप्तः पुरं पुरुषसत्तमः। सुहृदाद्वैतचित्तेन विहितप्रतिभाषणः PadmP.(Ra.) 18.19.

अद्वैतचित्सुख (advaitacit-sukha) *n.* non-dual consciousness as well as bliss) अद्वैतचित्सुखमहाम्बुधिमग्नभावमस्मत्पितामहमशेषगुरुं प्रपद्ये S'ivārkaMa-Dī. i. 1.9 (*on* i. 1.1)

अद्वैतचिन्मात्र (advaita-cinmātra) *adj.* consisting only of a secondless one and only of consciousness अद्वैतचिन्मात्ररूपपरमार्थनिरूपणस्यैव प्रकृतत्वेन प्राधान्येनापरिणाम्युक्तेरनुपयोगात् GuruCandr. ii. 307.22.

अद्वैतचूतप्रसव (advaitacūta-prasava) *m.* blossom of the unique mango tree (called *Ekāmra*) अद्वैतचूतप्रसवासवेषु पदे पदे प्रस्तुतमज्जनाभिः कम्पातरङ्गानिलकन्दलीभिराचान्तघर्माम्बुकणावलीनि … (गतागतानि) YātrāPra. 3.147.

अद्वैतज्ञान (advaita-jñāna) *n.* knowledge of one without a second (i. e. Brahman) तेषामनुत्पाद एवाद्वैतज्ञानस्य प्रसज्यते BrahmSi. 32.9; अद्वैतज्ञानं मनोवृत्तिमात्रम् ChāndoUBh. 9.8 (*on* i. 1.1); S'ivaP. vi. 18.5 (494B.3); ततश्चाद्वैतज्ञानं बाध्यतामेति BrahmSūBh.(Bhā.) 20.21 (*on* i. 1.4); प्रागद्वैतज्ञानात्सद्बुद्धिबोध्यत्वात् BrahmSūBh.(Rā.) 58.3 (*on* i. 1.1); एवमत्राप्यद्वैतज्ञानेन बाधितं भेदज्ञानम् … भवति GītāBh.(Rā.) 64.2 (*on* 2.12); BṛNāraP. 20.32; अवाप्तवान् मनःशुद्धिमद्वैतज्ञानसाधनाम् SkandP. iii(1). 20.51; यत्तदविद्यानिवर्तकं विशदमद्वैतज्ञानमुदेष्यति S'atDū. 62.8; 181.11; 189.18; अद्वैतज्ञानं कथं सत्यं भवेत् SarvaDaKau. 128.4; उद्देश्यविधेयभावस्फूर्तौ न ह्यद्वैतज्ञानमस्ति AṇuBh. 245.18 (*on* iii. 3.37); 245.21 (*on* iii. 3.37); अद्वैतज्ञाने तु श्रुतितात्पर्यभ्रमो दोषः Nyāyāmṛ. 131B.8; 261A.6; एतेन द्वैतज्ञानेनाद्वैतज्ञानस्य बाधो निरस्तः SiddhāBi. 52.3; अद्वैतज्ञानादिभेदाग्रहान्नार्थापत्तिः सर्वभेदविषया GuruCandr. ii. 244.13; ii. 244.15; अद्वैतज्ञानादिभेदं विना यस्यां किञ्चिदनुपपन्नमिति न गृहीतम् सार्थापत्तिः LaCandr. 518.26.

अद्वैतज्ञानद (advaitajñāna-da) *adj.* which bestows the knowledge of the one without a second स्वामितीर्थाभिधे तीर्थे … अद्वैतज्ञानदे पुंसां मुक्तिप्रदायिनि SkandP. ii(1). 12.51; iii(1). 30.63.

अद्वैतज्ञानफलत्व (advaitajñānaphala-tva) *n.* the nature of being the fruit or result of the knowledge of the one without a second अद्वैतज्ञानफलत्वे मोक्षस्य…विचिकित्सागन्धोऽपि नास्ति Bhām. 639.6 (*on* iii. 3.32)

अद्वैतज्ञानवत् (advaitajñāna-va(n)t) *adj.* having the knowledge of the one without a second अद्वैतज्ञानवतोऽपि कर्मेति चेत् ChāndoUBh. 8.16 (*on* i. 1.1); तेषामद्वैतज्ञाने बाधकत्वज्ञानमद्वैतज्ञानवता कारयितुं शक्यते GuruCandr. ii. 250.10.

अद्वैतज्ञानवत् (advaitajñāna-vat) *adv.* as in the case of the knowledge of the one without a second चरमज्ञानस्य … अद्वैतज्ञानवद्व्यावहारिकसतः प्रमात्वसंभवेन Nyāyāmṛ. 260B.7.

अद्वैतज्ञानवत्त्व (advaitajñānavat-tva) *n.* the state of possessing the knowledge of the one without a second स्तोतॄणामद्वैतज्ञानवत्त्वे स्तुत्यनुपपत्तिः S'rutaPra. iA. 240.11 (*on* i. 1.1)

अद्वैतज्ञानविरोध (advaitajñāna-virodha) *m.* contradiction with the knowledge of the one without a second विधीनामद्वैतज्ञानविरोधं दर्शयति VedāntKa. 94.26 (*on* i. 1.4)

अद्वैतज्ञानसिद्धि (advaitajñāna-siddhi) *f.* accomplishment of the knowledge of the one without a second अद्वैतज्ञानसिद्ध्यन्यथानुपपत्त्यापि प्रमाणादिभेदः सत्यो वक्तव्यः PrakaVi. 420.25.

अद्वैतज्ञानस्वभाव (advaitajñāna-svabhāva) *m.* the nature of the knowledge of the one without a second यद्वैतज्ञानस्वभावालोचनयोत्तरपूर्वसुकृतदुष्कृतयोरश्लेषविनाशौ Bhām. 721.21 (*on* iv. 1.15)

अद्वैतज्ञानार्थम् (advaita-jñānārtham) *adv.* for the knowledge of the one without a second न हि सांख्योऽद्वैतज्ञानार्थं प्रधानोपदेशं मन्यते NyāySu. (Ja.) 120A.10 (*on* i. 1.15)

अद्वैतज्ञानावसानत्व (advaitajñānāvasāna-tva) *n.* the state of culminating in the knowledge of the one without a second अद्वैतज्ञानावसानत्वात् शास्त्रशिष्यशासनादिद्वैतभेदस्य BṛĀraUBh. 691.7 (*on* v. 1.1)

अद्वैतज्ञानिन् (advaita-jñānin) *adj.* knower of the one without a second अद्वैतज्ञानिनं प्रति व्यवहारव्याघातः … आपादनीयः GuruCandr. ii. 250.11.

अद्वैतज्ञानोत्तरम् (advaitajñānottaram) *adv.* after the knowledge of the one without a second तव त्वद्वैतज्ञानोत्तरं भेदज्ञानस्य तद्बाधकस्य न स्वीकारः सम्भवति GuruCandr. ii. 240.15.

अद्वैतज्ञानोत्पादक (advaitajñānotpādaka) *adj.* which produces the knowledge of the one without a second अद्वैतज्ञानोत्पादकत्वेदभागस्य … मोक्षफलकत्वेन LalitāTriBh. 352.5 (*on* 58)

अद्वैतज्ञानोदय (advaitajñānodaya) *m.* emergence of the knowledge of the one without a second अद्वैतज्ञानोदयसामर्थ्यादेवानिच्छतोऽप्यहमर्थविनाश इति चेत् S'atDū. 123.5.

अद्वैतज्ञानोपकारक (advaitajñānopakāraka) *adj.* helpful or subservient to the knowledge of the one without a second उपासनानि सत्त्वशुद्धिकरत्वेन … अद्वैतज्ञानोपकारकाणि ChāndoUBh. 9.17 (*on* i. 1.1)

अद्वैततत्त्व (advaita-tattva) *n.* ultimate reality which is one without a second अद्वैततत्त्वसाक्षात्कारो हि अविद्यासमारोपितं प्रपञ्चम् … उपशमयति Bhām. 639.8 (*on* iii. 3.32); 745.13 (*on* iv. 3.7); नमोऽद्वैततत्त्वाय मुक्तिप्रदाय नमो ब्रह्मणे व्यापिने निर्गुणाय MahNirvāT. 3.59 (comm. सजातीयविजातीयस्वगतभेदरहिताय); ध्येयं तेजोऽद्वयम् … अभिन्नरूपमद्वैततत्त्वम् BṛBrahmaS. iii. 2.27; (सा) … न … श्रद्धां दधे निषधराड्मितौ मतानामद्वैततत्त्व इव सत्यतरेऽपि लोकः NaiṣC. 13.36; श्रीमन्नारायण एव चिदचिद्विशिष्टाद्वैततत्त्वम् YatīndraDī. 2.1.

अद्वैततनूज (advaita-tanūja) *m.* son of Advaita गौरो हरिर्नैतयाव्रजेऽद्वैततनूजमेकमधुरं गोपालदासाभिधम् CaitaCa. 254.1(10)

अद्वैतता (advaita-tā) *f.* the state of having no duality अहंवृत्त्योभयं रक्तं तन्नाशेऽद्वैततात्मनः NaiṣkaSi. 77.5; तत्संपर्कात्तत्र चाद्वैततान्या SaṁkṣeS'ā. 1.158 (i. 130.3); वस्तुनोऽद्वैततापत्तेत् IṣṭaSi. 274.7; न विद्यते द्वैतं यस्य तत्त्वस्य तदद्वैतं तस्य भावोऽद्वैतता NyāySu.(Ja.) 635B.12 (*on* iv.2)

अद्वैततात्पर्यक (advaita-tātparyaka) *adj.* having the purport of non-duality अद्वैतबोधकानि सर्वशाखागतानन्तवाक्यानि यच्चद्वैततात्पर्यकानि(?णि) न स्युः GuruCandr. i. 458.5.

अद्वैततात्पर्यकत्व (advaitatātparyaka-tva) *n.* the state of having non-duality as its purport इत्यद्वैतसिद्धौ सर्वाद्वैतश्रुतेः अद्वैततात्पर्यकत्वनिर्णयः AdvaiSi. 526.5; अनुवादाभावेऽपि श्रुतेरद्वैततात्पर्यकत्वेन भ्रमजनकत्वस्यादोषत्वसंभवात् GuruCandr. ii. 207.20.

अद्वैततात्पर्यग्रह (advaitatātparya-graha) *m.* comprehension of the purport of non-duality अद्वैततात्पर्यग्रहस्य च प्रत्यक्षाद्यविरोधेन प्रमारूपतया दोषत्वाभावात् AdvaiSi. 395. 18.

अद्वैततामत (advaitatā-mata) *n.* doctrine of non-duality तस्यापि भङ्गुरत्वादिविशेषमपहाय हि । अद्वैततामतं साक्षादुक्तदोषस्ततो भवेत् AnuVyā. 69A. 11 (*on* 4. 2); न विद्यते द्वैतं यस्य तत्त्वस्य तदद्वैतं तस्य भावोऽद्वैतता । तस्याः मतमद्वैततामतम् NyāySu.(Ja.) 635B. 12 (*on* iv. 2. 11)

अद्वैततासमरस (advaitatā-samarasa) *adj.* having the same joy (i. e identity) with the non-dual consciousness प्रज्ञाघनम् ··· अद्वैततासमरसम् ··· ज्योतिः परं यदमृतं हृदि चाकशीति HarVi. 47. 78.

अद्वैतत्याग (advaita-tyāga) *m.* abandonment of non-duality क्षुधाद्युपहतस्याप्यद्वैतत्यागो विरोधिना भोजनेन तावत्काल एव ManuBh. i. 507. 13 (*on* 6. 32)

अद्वैतत्व (advaita-tva) *n.* non-duality, the state of being unitary निरतिशयानन्दस्वाभाव्यम् अद्वैतत्वं च अधिगन्तव्यम् BrĀraUBh. 513. 8 (*on* iv. 3. 1); 280. 16 (*on* ii. 3. 1); स एष परमानन्दः स्वाभाविकः, अद्वैतत्वात् TaiUBh. 271. 9 (*on* 2. 8); लक्ष्यस्यैव च परमात्मनोऽद्वैतत्वम्, न तु वाच्यस्येति चेत् IṣṭaSi. 174. 18; सम्यग्ज्ञानाज्जीवभेदे प्रसिद्धावद्वैतत्वं ब्रह्मणो न प्रसिध्येत् SaṁkṣeSā. 2. 150 (ii. 93. 9); देवमुपश्लोकयता कथंकारमद्वैतत्वमात्मनो न चोतितम् YaśasCam. i. 458. 8; तस्यैकस्यैवाद्वैतत्वमित्युक्ते समाधिकराहित्यमेवोक्तं स्यात् ViṣṇuTaNi. 14B. 2; यदिदं परमेश्वरस्याद्वैतत्वं च विशेषणमुक्तं न तद्द्वितीयवस्तुराहित्याभिप्रायेण । किं तु परमार्थतः NyāySu.(Ja.) 223A. 10 (*on* i. 4. 6); तदभ्यासस्यैकाग्रतापादनद्वारेणाद्वैतत्वं भजतीत्याह । वीणेत्यादि DīpKa. 85. 31 (*on* 3. 115); सति प्रपञ्चे जीवे वाद्वैतत्वं ब्रह्मणः कुतः SarvaVeSāSaṁ. 731.

अद्वैतत्वविवेकिन् (advaitatva-vivekin) *adj.* who discriminates about non-duality द्वैतस्य प्रतिभानं तु व्यवहारे द्वयोः समम् । समाधौ नेति चेत्तद्वत्स्वाद्वैतत्वविवेकिनः PañcDa. 12. 87.

अद्वैतत्वोपलक्षित (advaitatvopalakṣita) *adj.* marked by non-duality उक्तसत्त्वं च नाद्वैतत्वोपलक्षितब्रह्मणः संभवति LaCandr. 359. 8; 8. 23.

अद्वैतदयित (advaita-dayita) *adj.* 1 loved by (the teacher) Advaita अद्वैतदयितः ··· स चैतन्यः किं मे पुनरपि दृशोर्यास्यति पदम् StavMā. 4. 6; 2 (one) who loves (the teacher) Advaita, StavMā. 4. 6; 3 who is fond of (the Doctrine of) non-duality, StavMā. 4. 6.

अद्वैतदर्शन (advaita-darśana) *n.* doctrine of non-duality अपरेऽद्वैतदर्शनावलम्बिन औपनिषदिकाः TattvSaṁPañ. 123. 1 (*on* 328); अथवाद्वैतदर्शने ··· विवर्तानां भूतमयत्वात् ··· युक्तमेव तन्मयत्वम् ManuBh. i. 11. 4 (*on* 1. 7); अद्वैतदर्शनेनातो नास्ति किंचित्प्रयोजनम् BrĀraUBhVā. iii. 2. 48; iii. 2. 44; iii. 2. 49; सत्ताग्रहणपक्षेऽपि विशेषावगतिः कुतः । सा भाति भेदसृष्टा चेत्सिद्धमद्वैतदर्शनम् NyāyMañ. i. 91. 33; ii. 94. 5; ii. 94. 7; तस्मान्न भेदाभेदौ इति अद्वैतदर्शनेन द्वैतदर्शनस्य बाधः सिद्धः VivaPraSaṁ. 340. 1; अद्वैतदर्शनविदां भुवि सार्वभौमो यात्येषः SaṅkaDigVi.(Mā.) 6. 55; 5. 100; शापं दास्यत्यथाचार्यः ··· सिद्धान्ते जडता तेऽस्तु परमद्वैतदर्शने SaurP. 39. 50; अद्वैतदर्शनं यन्मे याज्ञवल्क्यानुशासनम् JānaPa. 7. 38; *adj.* who feels unity (with Viṣṇu) अतुलां प्रीतिमालेभे विष्णोरद्वैतदर्शनः । ··· असौ SkandP. ii(2). 12. 98.

अद्वैतदर्शित्व (advaitadarśi-tva) *n.* the nature of one who realises non-duality ईशस्य नित्यमद्वैतदर्शित्वात् द्वैते प्रवृत्तिर्ज्ञानं च न स्यात् GuruCandr. i. 406. 14.

अद्वैतदर्शिन् (advaitadarś-in) *adj.* realiser of non-duality अद्वैतदर्शिनां न तथा प्रवर्तनमिति चेन्न S'atDū. 148. 28.

अद्वैतदृष्टि (advaita-dṛṣṭi) *f.* view of non-duality सेयमद्वैतदृष्टिर्दृष्टार्थापि KhaṇḍanKhā. 224. 14.

अद्वैतदेव (advaita-deva) *m.* Lord Advaita अहो साधु समाहितमद्वैतदेवेन CaitaCa. 121. 8(5)

अद्वैतद्रोहिन् (advaita-drohin) *adj.* who hates the doctrine of non-duality अद्वैतद्रोहिणः केचिल्लिङ्गाङ्कितभुजद्वयाः ···समागताः S'aṅkaVi.(Ā.) 21. 11.

अद्वैतधामन् (advaita-dhāman) *n.* abode of non-duality या ते अग्न इत्यनेन मन्त्रेणाग्नौ प्रताप्य ··· । हस्तमग्नौ समारोप्य स्वात्मन्यद्वैतधामनि S'ivaP. vi. 13. 44 (487B. 9)

अद्वैतधी (advaita-dhī) *f.* knowledge of non-duality अद्वैतधियोऽस्मद्बुद्धयः ··· परिनितिष्ठन्ति KhaṇḍanKhā. 156. 18; व्यावहारिकभेदमात्रेणाद्वैतधीबाधकत्वोपपत्तेः Nyāyāmṛ. 261A. 8; तथा सति ··· अद्वैतधियोऽप्यबाधकत्वापत्तेः GuruCandr. i. 108. 3; i. 495. 3.

अद्वैतनमस्कार (advaita-namaskāra) *m.* homage of identity रागाद्युपाधिविकल्परहितपरमसमाधिबलेनात्मन्येवाराध्याराधकभावः पुनरद्वैतनमस्कारो भण्यते TātpaVr.(A.) 6. 18 (*on* 1. 5)

अद्वैतनिन्दा (advaita-nindā) *f.* censure of the doctrine of non-duality अद्वैतनिन्दां कुर्वन्ति ये मूढा दुःखभोगिनः । ते सर्वे नरकं यान्ति S'aṅkaVi.(Ā.) 17. 14; भविष्यन्ति तस्य शिष्या अनेकशः । ··· अद्वैतनिन्दानिरताः SaurP. 39. 66.

अद्वैतनिरत (advaita-nirata) *adj.* devoted to the doctrine of non-duality अद्वैतनिरतो यत्र स देशः पुण्यवर्धनः S'aṅkaVi.(Ā.) 17. 12.

अद्वैतनिर्णय (advaita-nirṇaya) *m.* ascertainment about non-duality निगमादीनां तात्पर्यगोचरो द्वैतनिर्णयः अद्वैतनिर्णयो वा पारमार्थिकः S'aṅkaVi.(Ā.) 20. 5.

अद्वैतनिर्णयवत् (advaitanirṇaya-va(n)t) *adj.* having the definite knowledge of non-duality यथा च तव भेदानिर्णयेऽपि भेदनिर्णयवानिति कल्पना, तथैवाद्वैतानिर्णयेऽपि ममाद्वैतनिर्णयवानिति कल्पना GuruCandr. ii. 354. 17; LaCandr. 541. 38.

अद्वैतनिर्वृत्ता (advaita-nirvṛttā) *adj.* (*f.*) sprung from non-duality आश्रयाम्यद्वैतनिर्वृत्तां निर्वाणकाष्ठाम् AmṛUda. 1. 16 (23)

अद्वैतनिश्चय (advaita-niścaya) *m.* determination of non-duality उपदेष्टुश्चाद्वैतनिश्चयानिश्चययोः कस्मै किमुपदेश्यम् NyāySiA. 228. 12; प्रपञ्चतात्त्विकत्वस्य ··· सन्दिग्धत्वेनाद्वैतनिश्चयासम्भवात् LaCandr. 386. 41; 8. 21.

अद्वैतनिश्चयानिश्चय (advaita-niścayāniścaya) *m.* decision or lack of decision about non-duality उपदेष्टुश्चाद्वैतनिश्चयानिश्चययोः कस्मै किमुपदेश्यम् NyāySiA. 228. 12.

अद्वैतनिषेध (advaita-niṣedha) *m.* refutation of non-duality भाष्ये अद्वैतनिषेधाय श्रुत्यर्थापरिज्ञाननिमित्तप्राप्तेरुक्तत्वात् TattvPrakā. 20B. 6 (*on* i. 1. 17); पूर्वम् अद्वैतनिषेधमुखेन प्रवृत्तम् NyāySu.(Ja.) 637A. 10 (*on* 4. 2)

अद्वैतनिष्कल (advaita-niṣkala) *adj.* unique and without limitations स तं ददर्श मुनीश्वरम् ··· अद्वैतनिष्कलं ब्रह्म चिन्तयन्तम् SkandP. iii (1). 26. 85.

अद्वैतनिष्ठ (advaita-niṣṭha) *adj.* devoted to non-duality न च यत्किञ्चित्प्रवृत्तिशून्यं कञ्चिदद्वैतनिष्ठं पश्यामः S'atDū. 138. 1.

अद्वैतनिष्ठता (advaitaniṣṭha-tā) *f.* the state of being intent on non-duality उपसंहारस्य चाद्वैतनिष्ठता GuruCandr. i. 455. 21.

अद्वैतनिष्ठत्व (advitaniṣṭha-tva) *n.* the state of being intent on non-duality पुरुष एवेदमित्यादिपरामर्शस्याद्वैतनिष्ठत्वात् LaCandr. 828. 40; उपनिषदामद्वैतनिष्ठत्वात् NyāySu.(Ja.) 65A. 6 (*on* i. 1. 1)

अद्वैतपक्ष (advaita-pakṣa) *m.* view of non-duality अद्वैतपक्षो भवता मदीयोऽयं प्रसाध्यते BrĀraUBhVā. iv. 3. 1701; अतः सर्वथा नाद्वैतपक्षः कश्चिदनवद्यः NyāyMañ. ii. 103. 11; यथाचः पक्षस्तद्वद्द्वैतपक्षक्षतिः NyāyMa. 309. 8.

अद्वैतपक्षपात (advaita-pakṣapāta) *m.* desire or liking (shown by) Advaita नवद्वीपे चरणाविर्भावावधि अत्रैवाद्वैतपक्षपातः CaitaCa. 48. 8 (2)

अद्वैतपथ (advaita-patha) *m.* path of non-duality श्रीवास भवानपि अद्वैतपथपतितोऽभूत् CaitaCa. 53. 12 (2)

अद्वैतपर (advaita-para) *adj.* [*f.* -ā] I having firm belief in non-duality निदाघोऽप्युपदेशेन तेनाद्वैतपरोऽभवत् ViṣṇuP. ii. 16. 19; II having non-duality as the purport विरुध्यमानं वचो यदद्वैतपरैर्वचोभिः SaṁkṣeSā. 3. 287 (ii. 313. 12); तत्त्वसाक्षात्कारपरे यावद्वाचो गतमित्यद्वैतपरं घटते NayaVi. 263. 3 (*on* i. 1. 24); उपनिषदश्च ··· अद्वैतपरा एव युज्यन्ते Bhām. 502. 14 (*on* ii. 3. 43); कथमद्वैतपरमागमवाक्यं प्रमाणं भवेत् PramāMā. 19. 7; अद्वैतपराणां वेदान्तवाक्यानां सामञ्जस्यं भवति NītiMā. 27. 3; 32. 18; सृष्टिवाक्यापेक्षितसर्गादिप्रपञ्चनद्वारा पुराणमद्वैतपरम् VedāntKa. 56. 26; कुरुध्वमद्वैतपरान् निबन्धान् S'aṅkaDigVi.(Mā.) 13. 74; अस्तु तर्हि ··· अद्वैतपरो वेदादिः ··· सर्वस्य मिथ्यात्वे प्रमाणम् NyaySu.(Ja.) 485B. 9 (*on* iii. 2. 1)

अद्वैतपरता (advaitapara-tā) *f.* the state of having non-duality as the purport अद्वैतपरतया युष्माभिरभ्युपेतैः श्रुतिशतैर्विरोधप्रसङ्गात् S'atDū. 178. 20.

अद्वैतपरत्व (advaitapara-tva) *n.* the state of having non-duality as the purport उक्तनिर्वाहगोचरदृष्टान्तमुखेनाद्वैतपरत्वेन परोक्तस्य श्लोकस्यार्थमाह S'rutaPra. iA. 242. 25 (*on* i. 1. 1); न च तेषामद्वैतपरत्वम् NyāyKu. 141. 21; अत्राद्वैतपरत्वे तात्पर्यलिङ्गानुगुणत्वम् ··· उपपादितम् NyāySu.(Ja.) 29A. 7 (*on* i. 1. 1); तत्राद्वैतपरत्वं न सम्यक् प्रत्यपादि SarvaDaKau. 113. 16; दुन्दुभ्यादिवाक्यस्य ··· अद्वैतपरत्वात् GuruCandr. ii. 289. 11; ii. 257. 18; तत्परत्वात् अद्वैतपरत्वात् LaCandr. 384. 24.

अद्वैतपरमार्थता (advaitaparamārtha-tā) *f.* reality of non-duality किमद्वैतपरमार्थताभ्युपगमेन समाहितं भवति KhaṇḍanKhā. 217. 24.

अद्वैतपराक्रम (advaita-parākrama) *adj.* having peerless valour

पत्तिभिः ··· दर्शयद्भिर्नराद्वैतमिवाद्वैतपराक्रमैः TrisaS'aPuC. i. 4. 485.

अद्वैतपरिभावना (advaita-paribhāvanā) *f.* contemplation of non-duality अद्वैतपरिभावनामुवा प्रसङ्गाख्येन ··· गन्तव्याभावादेव नास्ति गतिः Bhām. 734. 7 (*on* iv. 2. 13)

अद्वैतपर्यवसान (advaita-paryavasāna) *n.* termination or culmination in non-duality यच्चाद्वैतपर्यवसानमुक्तम् NyāySu.(Ja.) 382B. 7 (*on* ii. 2. 6)

अद्वैतपान (adaita-pāna) *n.* experience of non-duality अद्वैतपानगन्धविधुरायाः तदभ्याससहितपूजातोऽत्यन्तमपकृष्टत्वात् SetuBa. 316. 27.

अद्वैतपुर (advaita-pura) *n.* name of a city भगवानद्वैतपुरं प्रविष्टः CaitaCa. 120. 13 (5); 124. 22 (5)

अद्वैतप्रकटन (advaita-prakaṭana) *n.* appearance or presence of Advaita यत्राद्वैतप्रकटनमसावुत्सवो मे प्रमोदी CaitaCa. 196. 15 (8)

अद्वैतप्रतिज्ञा (advaita-pratijñā) *f.* proposition of non-duality नित्या जीवात्मानो न विकारा न चाद्वैतप्रतिज्ञाविरोध इति सिद्धम् Bhām. 484. 8 (*on* ii. 3. 17)

अद्वैतप्रतिपत्ति (advaita-pratipatti) *f.* realisation or experience of non-duality प्रमाणादिविभागाद्वैतप्रतिपत्त्योर्विरोधात् BrahmSi. 32. 9; प्राणाद्युपासनानि चान्तःकरणस्य पराग्वृत्तिनिरोधद्वारेणाद्वैतप्रतिपत्तावेवोपयुक्तानि NyāySu. (Ja.) 65A. 9 (*on* i. 1. 1)

अद्वैतप्रतिपादक (advaita-pratipādaka) *adj.* propounding or teaching non-duality तथा चाद्वैतप्रतिपादकश्रुतेरुपपत्तिविरोध इति हृदयम् NyāySu. (Ja.) 28B. 8 (*on* i. 1. 1); 28A. 9 (*on* i. 1. 1); अद्वैतप्रतिपादकशास्त्रविरोधेन प्राण्यङ्गत्वहेतुकाशुचित्वानुमानप्रयोक्तृवदुपहसनीयतामाह LalitāSaBh. 221. 10 (*on* 290); अयमेव स इत्यद्वैतप्रतिपादकत्वात् VedāntKa. 373. 13 (*on* iii. 2. 11)

अद्वैतप्रतिपादन (advaita-pratipādana) *n.* propounding or exposition of non-duality अथ मन्यसे नेदं शास्त्रं सृष्टिप्रतिपादनपरं किं तर्हि अद्वैतप्रतिपादनपरम् BrahmSūBh.(Bhā.) 98. 16 (*on* ii. 1. 14); सन्ति चात्र ··· अद्वैतप्रतिपादनपराः शतशः श्रुतयः Bhām. 557. 17 (*on* iii. 2. 11); 165. 18 (*on* i. 2. 3); LaCandr. 504. 19.

अद्वैतप्रतीति (advaita-pratīti) *f.* cognition of non-duality अद्वैतप्रतीतिमप्रमां मन्यमानस्य तव अप्रमाविषये किं प्रमाणमिति कथं न प्रश्नो व्याहन्येत KhaṇḍanKhā. 142. 14.

अद्वैतप्रमाण (advaita-pramāṇa) *n.* means of cognition of non-duality न च वाच्यम् – सामान्येनाद्वैतप्रमाणसिद्धौ भूतायामपि विशेषतः प्रमाणे प्रश्नः KhaṇḍanKhā. 140. 2; द्वैताद्वैतप्रमाणयोर्व्यावहारिकपारमार्थिकविषयत्वेन व्यवस्थोक्त्ययोगाच्च Nyāyāmṛ. 48A. 5.

अद्वैतप्रमुख (advaita-pramukha) *adj.* among whom Advaita is chief or prominent अद्वैतप्रमुखाः पतन्ति युगपत्सर्वे क्षितौ दण्डवत् CaitaCa. 20. 2 (1)

अद्वैतप्रसङ्ग (advaita-prasaṅga) *m.* contingency of non-duality अन्याभावे चेद्वस्तुनस्सत्त्वम्, अद्वैतप्रसङ्गः IṣṭaSi. 274. 10; परस्पराभावधर्मिणोरेकत्र समवाये नेदं स्वाभाविकं नानात्वं क्वचिदपीत्यद्वैतप्रसङ्गः TātpaṬ.(Vā.) 93. 8 (*on* i. 1. 1)

अद्वैतप्रसङ्गतस् (advaitaprasaṅga-tas) *adv.* **I** due to the contingency of non-duality तत्त्वेऽद्वैतप्रसङ्गतः। एकाभावादसंदेहान्न रूपं वस्तुनो भिदा TattvPradī.(Ci.) 167. 14; **II** on the occasion of (expounding) non-duality एतच्च ब्रह्ममीमांसाभाष्येऽद्वैतप्रसङ्गतो विस्तरेणोपपादितम् SāṁkhyaPraBh. 31. 7 (*on* 1. 61)

अद्वैतप्राप्तप्रतिष्ठ (advaita-prāptapratiṣṭha) *adj.* who has obtained foothold in non-duality अद्वैतप्राप्तप्रतिष्ठा भक्ता हि द्वैतावस्थायां महाद्वैतं पश्यन्ति Bhāsk. ii. 280. 18 (*on* iv. 1. 1)

अद्वैतप्रेमपात्र (advaita-premapātra) *adj.* which is the object of Advaita's love or affection (स्वरूपम्) यदिदमद्वैतप्रेमपात्रम् CaitaCa. 49. 10 (2)

अद्वैतफल (advaita-phala) *n.* fruit (in the form) of non-duality तव ज्ञानेन किमद्वैतफलमस्ति S'aṅkaVi.(Ā.) 157. 3.

अद्वैतबद्धादर (advaita-baddhādara) *adj.* which has respect for non-duality श्रद्धामद्वैतबद्धादरबुधपरिषच्छेमुषीसंनिषण्णाम् (सिक्त्वा ··· जीवयसि) S'aṅkaDigVi.(Mā.) 13. 62.

अद्वैतबन्धु (advaita-bandhu) *m.* very close (*lit.* identical) friend चौलुक्यक्षितिपालवीरधवलस्याद्वैतबन्धुः सुधीस्तेजःपालः EI. viii. 213. 40.

अद्वैतबाधक (advaita-bādhaka) *adj.* annulling non-duality अद्वैतबाधकमभून्मम यद् द्वितीयमद्वैतमस्य बत बाधकमेव जातम् SaṅkṣeS'ā. 4. 56 (ii. 390. 12)

अद्वैतबुद्धि (advaita-buddhi) *f.* knowledge of non-duality अद्वैतबुद्धिरपि भेदधियात्मनि स्यात् SaṁkṣeS'ā. 2. 2 (ii. 2. 5); PrakaVi. 352. 23; अद्वैतबुद्धेः प्रामाण्यं व्यवस्थापयन्तीनामसद्बुद्धीनामेव क्रमेण जायमानत्वात् AdvaiSi. 519. 5; GuruCandr. i. 456. 16; धियमद्वैतबुद्धिं राति ददातीति वा (धीरा) LalitāSaBh. 185. 33 (*on* 220)

अद्वैतबोध (advaita-bodha) *m.* understanding of non-duality अद्वैतबोधे च न वेदान्ताः शक्ता इत्युक्तम् NayaVi. 263. 9 (*on* i. 1. 24); तस्मादद्वैतबोधाय स्थिरो भव परावरे S'aṅkaVi.(Ā.) 233. 7.

अद्वैतबोधक (advaita-bodhaka) *adj.* [*f.* -ikā] which teaches non-duality प्रत्यक्षविरुद्धश्चाद्वैतबोधक आम्नायो न यथाश्रुति युक्तः NayaVi. 223. 8 (*on* i. 1. 5); NyāyMa. 293. 3; नन्वद्वैतबोधिका श्रुतिः सत्या वा मिथ्या वा SarvaDaKau. 128. 2; अद्वैतबोधकानि सर्वशाखागतानन्तवाक्यानि यद्यद्वैततात्पर्यकानि न स्युः GuruCandr. i. 458. 5; ii. 287. 12.

अद्वैतबोधन (advaita-bodhana) *n.* teaching of non-duality बाध्यायाश्चाद्वैतबोधने श्रुतिर्निराबाधा सती तयोरैक्यं बोधयति KhaṇḍanKhā. 150. 9; PañcDa. 6. 222; उपजीव्यप्रमाणाविरुद्धं चाद्वैतबोधनम् TattvPrakā. 118B. 11 (*on* ii. 3. 29)

अद्वैतब्रह्मज्ञान (advaitabrahma-jñāna) *n.* knowledge of the Absolute तान् (दोषान्) अद्वैतब्रह्मज्ञानसाधनमुक्तिरूपेण हरतीति (कलिदोषहरा) LalitāTriBh. 259. 5 (*on* 4)

अद्वैतब्रह्मतत्त्व (advaitabrahma-tattva) *n.* reality as the Absolute अद्वैतब्रह्मतत्त्वस्य प्रतिपत्तिरहेतुका BrahmSi. 135. 10; अद्वैतब्रह्मतत्त्वसाक्षात्कारः ··· तन्मध्यपतितसकलकर्मविरोधी Bhām. 722. 18 (*on* iv. 1. 15)

अद्वैतब्रह्मदर्शिन् (advaitabrahma-darśin) *adj.* who has realized the Absolute विवर्तस्यास्य जगतः सन्मात्रत्वेन दर्शनम्। अपवाद इति प्राहुरद्वैतब्रह्मदर्शिनः SarvaVeSāSaṁ. 680.

अद्वैतब्रह्मन् (advaita-brahman) *n.* Absolute (without a second) अद्वैतब्रह्मभूतश्च जडवल्लोकमाचरत् AgniP. 379. 3; अद्वैतब्रह्मप्रतिपत्त्यन्यथानुपपत्त्यैव प्रमाणादिप्रपञ्चस्य सत्यता वक्तव्या PrakaVi. 422. 23; भूतोत्पत्तिलयशीलनं ह्यद्वैतब्रह्मध्यानोपयोगीति बुद्ध्याद्युत्पत्तिक्रमविचारोऽपि तत्फल एव VedāntKa. 317. 23 (*on* ii. 3. 15); तत्त्वमस्यादिवाक्यादपि नाद्वैतब्रह्मणि जीवैक्यनिश्चयः, अद्वैतब्रह्मणः एवानिश्चयात् GuruCandr. i. 3. 11; iii. 62. 5; अर्थवादो 'येनाश्रुतं श्रुतम्' इत्यादि प्राशस्त्यबोधकं वाक्यं अद्वैतब्रह्माप्तिसाधनश्रवणादौ प्रवर्तकत्वादद्वैतब्रह्मतात्पर्यग्राहकम् GuruCandr. i. 455. 24; अद्वैतब्रह्मरूपाधिष्ठानसाक्षात्कारे जाते तु बलिनि सर्वेभ्यो द्वैतवादिमतेभ्यो बलवति वेदनये वेदान्तदर्शने जयश्रीः जयोत्कर्षकाष्ठा LaCandr. 227. 5; अद्वैतब्रह्मनिश्चयद्वारा ब्रह्मात्मैक्यनिश्चयाधीनाज्ञाननिवृत्त्यर्थकत्वेनोक्तश्रुतिर्नानुवादः LaCandr. 386. 42; 526. 21.

अद्वैतब्रह्मविज्ञान (advaitabrahma-vijñāna) *n.* knowledge of the Absolute अद्वैतब्रह्मविज्ञानं वक्ष्ये यद्भवतोऽगदत् AgniP. 379. 1; SkandP. iii(1). 26. 94.

अद्वैतब्रह्मस्वरूप (advaitabrahma-svarūpa) *n.* the essential nature of the Absolute अद्वैतब्रह्मस्वरूपमप्याविष्कृतपञ्चब्रह्मरूपम् ··· साक्षाच्चकार दाक्षायणीरमणम् NīlaVi. 96. 14.

अद्वैतब्रह्मावस्थान (advaitabrahmāvasthāna) *n.* the state of remaining in the Absolute अद्वैतब्रह्मावस्थानं मोक्षः NyāySu.(Ja.) 486R. 7 (*on* iii. 2. 1)

अद्वैतभक्ति (advaita-bhakti) *f.* undivided devotion पर्वतीयनृपा अपि। प्रतिराजानमद्वैतभक्तिमानितयामिलन् TṛiṣaS'aPuC. i. 5. 188.

अद्वैतभङ्ग (advaita-bhaṅga) *m.* breakdown or loss of non-duallty अद्वैतभङ्गं मत्वाह ··· सकार्याया मायाया अनिर्वचनीयत्वात् नाद्वैतभङ्गः PrakaVi. 91. 25; NyāySiA. 215. 6; उपाधिश्चेत् स्वीक्रियते तर्ह्युपाधिसिद्ध्यैव पुनरद्वैतभङ्ग इत्यर्थः SāṁkhyaPraBh. 157. 9 (*on* 6. 46); Bhāsk. i. 166. 19 (*on* i. 4. 3)

अद्वैतभङ्गप्रसङ्ग (advaitabhaṅga-prasaṅga) *m.* contingency of the loss of non-duality यदुक्तं परैः किं द्वयोस्तादात्म्यमेकस्य वा। नाद्यः। अद्वैतभङ्गप्रसङ्गात्। न द्वितीयः। असंभवात् SarvaDaSaṁ. 16. 893; इयं श्रुतिर्जीवपरयोर्भेदं प्रतिपादयति वा न वा। नाद्यः। अद्वैतभङ्गप्रसङ्गात् MānaMe. 206. 1; Bhāsk. i. 214. 19 (*on* i. 5. 5)

अद्वैतभङ्गापत्ति (advaitabhaṅgāpatti) *f.* contingency of the loss of non-duality चरमवृत्त्युपलक्षितस्याप्यद्वैतभङ्गापत्त्या सिद्धात्ममात्रत्वात् Nyāyāmṛ. 633A. 7.

अद्वैतभाज् (advaita-bhāj) *adj.* who follows (the doctrine) of non-duality केयं लीला व्यरचि भवता योऽयमद्वैतभाजामत्यन्तेष्टस्तमधृत भवानाश्रमं यत्तुरीयम् CaitaCa. 121. 13(5)

अद्वैतभान (advaita-bhāna) *n.* comprehension of non-duality 'यत्र त्वस्य' इति श्रुतिरखण्डब्रह्माद्वैतभाने ब्रह्मविदः प्रापञ्चिकभेदादर्शनं वदति AṇuBh.

27. 12 (*on* i. 1. 11); ततश्च अद्वैतभानसमकालम् ··· विषयान् भुञ्जान: SetuBa. 277. 18; नित्या पूजा त्रिविधा । द्वैतभानसामान्याभावे परा । अद्वैतभानसामान्याभावे त्वपरा SetuBa. 275 8.

अद्वैतभाव (advaita-bhāva) *m.* the state of being without a second भगवन् अवगतेरात्मज्योतिषो नैरन्तर्यभावात्कूटस्थनित्यताद्वैतभावाश्च सर्वप्रत्ययभेदेष्वव्यभिचारात् UpadeSā. 102. 109; किं स्यात्पुन: संसरणस्य बीजमद्वैतभावं समुपेयुषोऽस्य ViveCū. 348; अद्वैतभावस्तत्त्वं स्यात्तत्तु वाचा न गम्यते BṛDharmaP. ii. 1. 12; एवमद्वैतभावेन यद्ब्रह्म परिकीर्तितम् । तस्य पूजाविधानं मे कथयस्व SkandP. vii(1). 106. 1; परमा प्रकृतिर्भगवान्वासुदेव इत्यद्वैतभावेनेश्वरं मन्यन्ते (पाञ्चरात्रा:) Aparā. 11. 20 (*on* 1. 7); परमसुखनिधानं सत्यमद्वैतभावं नमत भजत भक्त्या तं परात्मानमाद्यम् SarvaDaKau. 114. 8; 128. 1.

अद्वैतभावनबल (advaitabhāvana-bala) *n.* strength of the mystic realization of non-duality अद्वैतभावनबलाद्भवति हि सन्मात्रपरिशेषम् ParamāSā. 41.

अद्वैतभावना (advaita-bhāvanā) *f.* contemplation of non-duality परे ब्रह्मणि लय एव पर: पुरुषार्थ: तत्साधनं धनं हि केवलमद्वैतभावनेति सर्वशास्त्रप्रतिपाद्यत्वेन CaitaCa. 4. 21(1); अद्वैतभावनायुक्ते स्थण्डिलेशविधावपि । अभ्यर्च्य चण्डम् AgniP. 97. 61; सृष्ट्यप्ययक्रमौ भूतानामद्वैतभावनोपयोगिनौ निरूपितौ BrahmSūBh.(Bhā.) 133. 19 (*on* ii. 3. 15)

अद्वैतभावस्था (advaitabhāva-sthā) *adj.* (*f.*) based on the thought of non-duality प्रथमाद्वैतभावस्था सर्वप्रचरगोचरा (पूजा) NityāṢoḍa. 275. 4.

अद्वैतभाषा (advaita-bhāṣā) *f.* language (i. e. view-point) of non-duality अद्वैतभाषया चोद्यं नास्ति नापि तदुत्तरम् PañcDa. 2. 39.

अद्वैतभाष्य (advaita-bhāṣya) *n.* explanation of non-duality अद्वैतभाष्यं तव संमतं चेत् सोऽद्य वा ममाग: पुरतो भवाशु S'aṅkaDigVi.(Mā.) 7. 14; अद्वैतभाष्यं कुर्वन् ··· श्रीशङ्करभगवत्पादाचार्य: ··· स्थलविशेषं प्राप S'aṅkaVi.(Ā.) 19. 6; 231. 17.

अद्वैतभ्रातृसौहार्दपक्ष (advaitabhrātṛsauhārda-pakṣa) *m.* view of fraternal affection that is secondless (matchless or unique) अद्वैतभ्रातृसौहार्दपक्षमुद्द्योतयिष्यति TriṣaS'aPuC. i. 5. 110.

अद्वैतमत (advaita-mata) *n.* doctrine of non-dualism (नृपति:) गृहीतपिशितव्रत: पुनर्वेदवैद्याद्वैतमतमोहितमति: ··· मांसभक्षणक्षणं नावाप Yaśas-Cam. ii. 332. 1; कथमद्वैतमतम् ··· सेत्स्यति TarkSaṁ.(Ā.) 141. 17; अद्वैतमते च प्रमाणमेव नास्ति तत्सद्भावे द्वैतप्रसङ्गात् SyādvāMañ. 13(118); तदा तस्य भेदस्य स्वरूपेऽन्तर्भावात्प्रतियोगिनोऽपि स्वरूपतया निमज्जनादद्वैतमतमेव पर्यवस्येत् NyāySu.(Ja.) 381A. 4 (*on* ii. 2. 6); यस्त्वद्वैतमते स्थित्वा भारतीमतनिन्दक: । स याति नरकं घोरम् S'aṅkaVi(Ā.) 249. 9; 90. 2; अन्यथा चतुर्थाध्यायान्ते तादृशप्रक्रियाया हेयत्वमद्वैतमतस्य च ग्राह्यत्वं सूत्रभाष्ययोर्नोच्येत GuruCandr. ii. 311. 22; किंचोक्तवाक्यं बौद्धमतनिराकरणपरं न त्वद्वैतमतनिराकरणपरमद्वैतमतस्य सर्वमतश्रेष्ठतया ··· उक्तत्वात् LaCandr. 226. 5.

अद्वैतमतनिरास (advaitamata-nirāsa) *m.* refutation of non-dualistic doctrine अजलमेव हि रश्मिप्रतप्तमूषरम् । भ्रान्त्या जलात्मनावगतं पश्चाद्बाधकेन यथावस्थितरूपमवगम्यत इत्यलमनेन बालजल्पितेन इत्यद्वैतमतनिरास: S'āstrDī. 111. 3 (*on* i. 1. 5)

अद्वैतमतनिष्ठ (advaitamata-niṣṭha) *adj.* devoted to the doctrine of non-dualism अद्वैतमतनिष्ठानामनुष्ठानमपाकृतम् । ब्रह्मसूत्रार्थवैरूप्यं तेषामथ निरूप्यते S'atDū. 241. 26.

अद्वैतमतपरत्व (advaitamatapara-tva) *n.* the state of having the doctrine of non-dualism for its ultimate import प्रकृतश्रुतेरद्वैतमतपरत्वे नास्त्युच्छित्तिर्येषां तेऽनुच्छित्तयस्तादृशा धर्मा: यस्यासौ GuruCandr. ii. 274. 4.

अद्वैतमतवत् (advaitamata-vat) *adv.* like the doctrine of non-dualism अध्यासादयस्त्वद्वैतमतवद्दृष्या: NyāySiA. 248. 15.

अद्वैतमतोपसंहार (advaitamatopasaṁhāra) *m.* summing up of the doctrine of non-dualism तत: केवलमात्मा प्रकाशते यमाश्रित्याद्वैतमतोपसंहार: ĀtmaTaVi. 936. 2.

अद्वैतमय (advaita-maya) *adj.* comprising of non-duality (identity) विज्ञानमद्वैतमयं तद्भागोऽन्यो मयोदित: ViṣṇuP. i. 22. 48.

अद्वैतमात्रक (advaitamātra-ka) *n.* mere non-duality शान्ताशेषविशेषांशस्तिष्ठेदद्वैतमात्रके SarvaVeSāSaṁ. 962.

अद्वैतमार्ग (advaita-mārga) *m.* path to non-duality ननु शुक्र: शुद्धोऽद्वैतमार्ग: BṛĀraUBh. 629. 15 (*on* iv. 4. 9); एवमेको मार्गोऽस्तु ब्रह्मविदुषामद्वैतमार्गसमारोहणासमर्थानामिति S'aṅkaVi.(Ā.) 265. 16; 237. 6.

अद्वैतमिथ्यात्वोक्ति (advaitamithyātvokti) *f.* statement about the falsity of non-dualism तदनन्यत्वपदेनाद्वैतमिथ्यात्वोक्तेरेवमुपक्रमत्वम् VedāntKa. 236. 12 (*on* ii. 1. 14)

अद्वैतमुद्रा (advaita-mudrā) *f.* posture of the fingers conveying non duality अद्वैतमुद्रामिह दर्शयन्तौ । आराध्य देवौ हरिशंकरौ स: ··· अर्चयति स्म वाग्भि: S'aṅkaDigVi. (Mā.) 12. 8.

अद्वैतमुष् (advaita-muṣ) *adj.* stealer of non-dualism सहसोदयनादय: कवीन्द्रा: परमद्वैतमुषश्चकम्पिरे स्म S'aṅkaDigVi.(Mā.) 15. 72.

अद्वैतमूर्ति (advaita-mūrti) *adj.* whose form is devoid of duality (i. e. is universal) अद्वैतमूर्तेर्विशिखेन शम्भो: ··· अतन्यत ··· एकत्र शीतातपयोर्निवेश: S'rīKaC. 20. 50.

अद्वैतमोक्ष (advaita-mokṣa) *m.* emancipation in the form of non-duality नित्यनिर्दु:खनिरतिशयानन्दस्याद्वैतमोक्षस्य···हेयत्वोक्त्यसंभवश्च त्वन्मते स्फुट: GuruCandr. ii. 275. 5.

अद्वैतयजन (advaita-yajana) *n.* worship of non-duality (a kind of worship) प्रसङ्गादिदमुद्दिष्टमद्वैतयजनं महत् MāliniT. 18. 48.

अद्वैतयाथात्म्य (advaita-yāthātmya) *n.* true nature in the form of non-duality द्वैतस्याद्वैतयाथात्म्यात्क्लृप्तसर्पादितत्त्ववत् BṛĀraUBhVā. i. 4. 1138.

अद्वैतरक्षणकृते (advaitarakṣaṇa-kṛte) *adv.* for the protection of (the doctrine of) non-dualism जाने भवन्तमहम्···अद्वैतरक्षणकृते विहितावतारम् S'aṅkaDigVi.(Mā.) 7. 104.

अद्वैतरसालनेतृ (advaitarasāla-netṛ) *m.* the deity Ekāmreśvara at S'ivakāñcī आवासमद्वैतरसालनेतु: ··· पुरमभ्ययासीत् YātrāPra. 3. 36.

अद्वैतरूप (advaita-rūpa) *adj.* [*f.* -ā] I non-dual by nature शिवोऽहमद्वैतरूपोऽहम् KāmRāU. 400. 16; ब्रह्मज्ञानाग्निना कर्मबन्धं निर्दहेत् । तत: पवित्रं परमेश्वराख्यमद्वैतरूपम् PaiṅgU. 425. 15 (4. 11); अद्वैतरूपं सत्यं प्रतीम: TātpaṬ.(U.) 229. 14 (*on* 5 (3). 155); त्वाम् ··· मात: प्रत्यगद्वैतरूपां शंसन्ति केचित् TripuVePāSt. 46; ManuBh. i. 507. 3 (*on* 6. 32); S'aṅkaVi.(Ā.) 32. 10; Bhāsk. i. 7. 17 (*on* i. 1. 1); II whose beauty has no second ईदृगद्वैतरूपा त्वं काचिन्नु वटदेवता PāṇḍaC. 6. 651; *n.* [Instr.] in a non-dual form वागर्थौ यावदस्मिश्चिरमनुवसतोऽद्वैतरूपेण लोके EI. vi. 202. 25.

अद्वैतरूपक (advaitarūpa-ka) *adj.* having a non-dual form स्वात्मन्येवाथ संशुद्धं ज्ञानमद्वैतरूपकम् BṛĀraUBhVā. iv. 4. 733.

अद्वैतरूपता (advaitarūpa-tā) *f.* the state of having a non-dual form नश्यतीदं मनस्तद्वद् द्वैतमद्वैतरूपताम् । आपाद्य BṛĀraUBhVā. iv. 4. 724.

अद्वैतरूपत्व (advaitarūpa-tva) *n.* the state of having a non-dual form परमेश्वरो हि प्रमाणादिव्यवहारेऽपि परशक्तिमय एव सर्वथा अद्वैतरूपत्वात ParāTri. 60. 11.

अद्वैतरूपवती (advaitarūpa-vatī) *adj.* (*f.*) possessed of unparalleled beauty नवीनब्रह्मणा निर्मितानां भवतीनामद्वैतरूपवतीनामेकमेव रूपं नासया हीनम् PrabaCin. 9. 22.

अद्वैतरूपविभव (advaitarūpa-vibhava) *adj.* possessing the grandeur of matchless beauty असूत सा सूनुम् ···। अद्वैतरूपविभवम् TriṣaS'aPuC. iv. 7. 76.

अद्वैतरूपिणी (advaita-rūpiṇī) *f.* one of the hundred epithets of the goddess Tārā अद्वैतरूपिणी आद्या ··· शतनाम ··· ताराया: परिकीर्तितम् KālīViT. 12. 2.

अद्वैतरूपिन् (advaita-rūpin) *adj.* [*f.* -iṇī) possessed of non-dual form नित्यायाद्वैतरूपिणे ।··· नारायण नमोऽस्तु ते NārāyUTāU. 82. 4 (2); ब्रह्ममयी ··· केलिरद्वैतरूपिणी GopāKeCan. 146. 19; 146. 28.

अद्वैतलक्षणा (advaita-lakṣaṇā) *adj.* (*f.*) characterised by non-duality प्रतर्दन: ···। देहान्ते मुक्तिमापन्न: परामद्वैतलक्षणाम् SaurP. 39. 63.

अद्वैतलिङ्ग (advaita-liṅga) *n.* probans proving non-duality तद्दर्शनेनाद्वैतलिङ्गशब्दयोरपि तच्छङ्का Nyāyāmṛ. 135B. 7.

अद्वैतवन (advaita-vana) *n.* forest of non-duality अद्वैतवने सदा विचरताच्चेत:कुरङ्ग: सताम् VijñāS'. 102.

अद्वैतवर्त्मन् (advaita-vartman) *n.* way of non-duality स्वयमथ परितस्तारायमद्वैतवर्त्म S'aṅkaDigVi.(Mā.) 15. 174 (1736)

अद्वैतवस्तु (advaita-vastu) *n.* non-dual entity मोहो नाद्वैतवस्तुविषयाश्रयकोऽप्रतीते: SaṁkṣeS'ā. 3. 13 (ii. 157. 7); 2. 211 (ii. 126. 14); विगीतो भेदव्यवहारोऽद्वैतवस्त्ववलम्बन: NītiMā. 16. 5; अद्वैतवस्तुपराणां शास्त्राणां द्वैतनिषेधपरत्वेन बलीयस्त्वम् NītiMā. 17. 14.

अद्वैतवाक्य (advaita-vākya) *n.* sentence which states non-duality अद्वैतवाक्यानां च परमार्थवस्तुविषयत्वम् BrahmSūBh.(Bhā.) 98. 30 (*on* ii. 1. 14); VedāntKau. 139. 19 (*on* i. 4. 20); यदि ··· अद्वैतवाक्यार्थज्ञानोत्पत्तिरिष्यते S'at-Dū. 60. 28; 66. 23; 95. 9; प्रमाणं चेत् नातत्त्वावेदकम्, अद्वैतवाक्यवत् Vādā.

17. 2; अद्वैतवाक्यस्य प्रतीतार्थबाधः किं न स्यात् Nyāyāmṛ. 104A. 8 = AdvaiSi. 359. 4; नाप्यदै(? द्वै)तवाक्यान्तरम् Nyāyāmṛ. 252B. 7; AdvaiSi. 511. 2; अतोऽद्वैतवाक्यानि नाखण्डतापराणि Sāṁkhya PraBh. 70. 24 (*on* 1. 154); BhedaDhi. 51. 5; अद्वैतवाक्यस्य षड्विधतात्पर्यलिङ्गवत्तया बलवत्त्वेन AdvaiSi. 524. 3; अद्वैतवाक्यार्थबाधोक्तिः प्रलाप इति भावः GuruCandr. i. 280. 20; द्वैतवाक्यानामद्वैतवाक्यशेषत्वात् GuruCandr. ii. 262. 14; i. 317. 12; i. 459. 10; ii. 224. 9; ii. 258. 7; वाक्यस्य अद्वैतवाक्यस्थपदस्य LaCandr. 376. 37; 516. 30; GoviBh. 3. 1 (*on* i. 1. 0)

